, Jayantabhaṭṭa and K. S. Varadacharya

# Nyāyasūtra

— Nyāyamañjarī — Nyāyasaurabhaṭippaṇī

SARIT

SARIT

# Contents

Contents i

I श्रीः :श्रीमज्जयन्तभट्टविरचिता न्यायमञ्जरी न्याय-सौरभाख्यटिप्पणीसंयुता १

१ भागः १ ३
१.१ प्रथममाह्निकम्—प्रमाणसामान्यपरीक्षणम् . . . . ३
१.२ द्वितीयमाह्निकम्—प्रत्यक्षपरीक्षा . . . . . . . . १५२
१.३ तृतीयमाह्निकम्—शब्दपरीक्षा . . . . . . . . . ३४५
१.४ चतुर्थमाह्निकम्—शब्दपरीक्षा . . . . . . . . . ५०७

२ भागः २ :द्वितीयसंपुटः ६१७
२.१ पञ्चममाह्निकम्—शब्दपरीक्षा :जात्यङ्गीकाराक्षेपः . ६१७
२.२ षष्ठमाह्निकम्—शब्दपरीक्षा :पदवाक्यस्वरूपविमर्शः ७३४
२.३ सप्तममाह्निकम्—प्रमेयपरीक्षा :प्रमेयनिर्देशः . . . ८२४
२.४ अष्टममाह्निकम्—प्रमेयपरीक्षा :शरीरपरीक्षा . . . ९००
२.५ नवममाह्निकम्—प्रमेयपरीक्षा :अपवर्गपरीक्षा . . ९५३
२.६ दशममाह्निकम्—संशयपरीक्षा :संशयलक्षणम् . . १०२६
२.७ एकादशमाह्निकम्—तर्कादिपरीक्षा :तर्कलक्षणम् . १०७२
२.८ द्वादशमाह्निकम्—जाति-निग्रहस्थानपरीक्षा :जातिसामान्यलक्षणम् . . . . . . . . . . . . . . . . . . १११७

The TEI Header ११७४

# Part I

[

श्रीः :श्रीमज्जयन्तभट्टविरचिता न्यायमञ्जरी न्यायसौरभाख्यटिप्पणीसंयुता]श्रीः : श्रीमज्जयन्तभट्टविरचिता न्यायमञ्जरी न्यायसौरभाख्यटिप्पणीसंयुता

# १ भागः १

I.1/KSV

## १.१ प्रथममाह्निकम्—प्रमाणसामान्यपरीक्षणम्

### मङ्गलाचरणम्

नमः शाश्वतिकानन्दज्ञानैश्वर्यमयात्मने ।
सङ्कल्पसफलब्रह्मस्तम्बारम्भाय शम्भवे ॥ १ ॥[§ 2]

विश्वं सृजन् करुणया परिपालयन् यः
विश्वक्रियासु यमयत्यखिलान्तरात्मा ।
विद्यास्वयंवरपतिर्विदधातु सोऽयं
विश्वस्य मङ्गलममेयमहाविभूतिः ॥[§ 6]

अनुगृह्णन्तु सद्भावपवित्रितजगत्त्रयाः ।
आघ्राय मञ्जुलं न्यायमञ्जर्याः सौरभं बुधाः ॥[§ 8]

इह खल्वनन्यसाधारणशेमुषीविभवसमाकृष्टसकलसुधीजनहृदयः श्रीमान् जयन्तभट्टः प्रारीप्सितप्रबन्धस्य निर्विघ्नपरिसमाप्तिप्रचयगमनाद्यर्थं स्वेष्टदेवतानमस्काररूपं मङ्गलमारचयति—नम इत्यादि । नात्र विकारार्थे मयट्, ब्रह्मणो निर्विकारत्वात्; किन्तु प्राचुर्यार्थे । ननु तर्हि ब्रह्मण्यज्ञानादयोऽपि प्रसज्येरन् । सुखप्रचुरजीवनतात्पर्येण प्रयुक्ते हि सुखमयं जीवनम् इत्यादौ

I.2/KSV

नमामि यामिनीनाथलेखाऽलङ्कृतकुन्तलाम् ।
भवानीं भवसन्तापनिर्वापणसुधानदीम् ॥ २ ॥[§ 11]

सुरासुरशिरोरत्नमरीचिखचिताङ्घ्रये ।

२ ] स्तम्भा— nyāma-wit__kha
१५ ] कुण्डलाम्— nyāma-wit__ka

विघ्नान्धकारसूर्याय गणाधिपतये नमः ॥ ३ ॥[§ 13]

जयन्ति पुरजिद्दत्तसाधुवादपवित्रिताः ।
निदानं न्यायरत्नानां अक्षपादमुनेर्गिरः ॥ ४ ॥[§ 15]

**ग्रन्थावतरणम्**

अक्षपादमताम्भोधिपरिमर्षरसोत्सुकाम् ।
विगाहन्तामिमां सन्तः प्रसरन्तीं सरस्वतीम् ॥ ५ ॥[§ 17]

नानागुणरसास्वादखिन्नाऽपि विदुषां मतिः ।
आलोकमात्रकेणेममनुगृह्णातु नः श्रमम् ॥ ६ ॥[§ 19]

दुःखापेक्षयैव प्राचुर्यस्य सुखे बोधनात्—उच्यते—प्राचुर्यं हि द्विविधं—स्वसमानाधिकरणविजातीयाल्पत्वसापेक्षं, स्वव्यधिकरणसजातीयाल्पत्वसापेक्षं चेति । आद्यं सुखमयं जीवनमित्यादौ । तत्तु न प्रकृते । द्वितीयं च सूर्यप्रकाशप्राचुर्यतात्पर्यके प्रचुरप्रकाशः सविता इत्यादौ । न हि तत्र सूर्यगताप्रकाशांशापेक्षया सूर्यगतप्रकाशांशप्राचुर्यं बोध्यते; सूर्ये अप्रकाशांशस्यासम्भवात् । किन्तु सूर्यव्यतिरिक्तलौकिकसर्वतेजोगतप्रकाशापेक्षया सूर्यप्रकाशप्राचुर्यमेव । प्रकृतेऽपि जीवगतानन्दाद्यपेक्षया ब्रह्मानन्दस्य प्राचुर्यमेव मयडा बोध्यत इति न दोषः । ननु भोः ! सिद्धान्ते, ब्रह्मण्यानन्दस्याप्यनङ्गीकारात् कथमिदम् ? अत्यल्पमेतत्—किं आनन्दो ब्रह्म इत्यादिश्रुतिरेव सैद्धान्तिकैर्न श्रुता ? श्रुतापि न प्रमाणं वा ? युक्त एव तथा व्यपदेशः । निर्वाहस्तु स्वावसरे भविष्यति ॥ १ ॥ यामिनीनाथेत्यादि । ईश्वरस्यार्धनारीत्वात्, पार्वत्याः भवानीत्वाद्वा तथा वर्णनम् । चन्द्रकलायाः वामभाग एव सत्त्वेन अर्धनारीमूर्तौ पार्वत्या वामार्धगतत्वेन वा तथोक्तिः ॥ २ ॥ जयन्तीत्यादि । एतच्छ्लोकार्थः ग्रन्थकारेणैव ग्रन्थान्ते न्यायोद्धारगभीरनिर्मलगिरा गौरीपतिस्तोषितो वादे येन इत्यादिश्लोकेन किञ्चिदिव विवृतः । तथोक्तं शैवपुराणे उमासंहितायां द्वितीयाध्याये— गौतममधिकृत्य—तुतोष,
I.3/KSV भगवानाह, ग्रन्थकर्ता भविष्यसि । वत्साक्षय्या

न्यायौषधिवनेभ्योऽयमाहृतः परमो रसः ।
इदमान्वीक्षकीक्षीरात् नवनीतमिवोद्धृतम् ॥ ७ ॥[§ 22]

कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः ।
वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम् ॥ ८ ॥[§ 24]

४ ] परिशर्म— nyāma-wit__ka    १ ] मेतत्— nyāma-wit__ka

तैरेव कुसुमैः पूर्वमसकृत्कृतशेखराः ।
अपूर्वरचने दाम्नि दधत्येव कुतूहलम् ॥ ९ ॥[§ 26]

यद्वा निर्गुणमप्यर्थं अभिनन्दन्ति साधवः ।
प्रणयिप्रार्थनाभङ्गसंविधानमशिक्षिताः ॥ १० ॥[§ 28]

तदियं वाङ्मयोद्यानलीलाविहरणोद्यतैः ।
विदग्धैः क्रियतां कर्णे चिराय न्यायमञ्जरी ॥ ११ ॥[§ 30]

अक्षपादप्रणीतो हि विततो न्यायपादपः ।
सान्द्रामृतरसस्यन्दफलसन्दर्भनिर्भरः ॥ १२ ॥[§ 32]

च ते कीर्तिः त्रैलोक्ये प्रभविष्यति । अक्षयं च कुलं तेऽस्तु महर्षिभिरलङ्कृतम् । भविष्यसि ऋषिश्रेष्ठ सूत्रकर्ता ततस्ततः । इत्येवं शङ्करात् प्राप वरं मुनिवरस्स वै । त्रैलोक्ये विततश्चासीत् पूज्यश्च यदुनन्दन । इति ॥ ४ ॥ न्यायौषधीत्यादि ॥ पूर्वोत्तरार्धे भिन्नवाक्ये ॥ ७ ॥ पूर्वश्लोकोक्तमेव समर्थयति—कुतो वेत्यादि ॥ ८ ॥ अनपूर्वत्वेऽनुपादेयता स्यादित्यत्राह—तैरेवेत्यादि ॥ ९ ॥ यद्वेत्यादि । साधवः—सुसंस्कृतमनस्काः निर्गुणमप्यर्थमभिनन्दन्ति । अशिक्षितास्तु— असंस्कृतमनसः प्रणयिप्रार्थनाभङ्गसंविधानमेवाभिनन्दन्तीत्यर्थः । अथ वा प्रणयिप्रार्थनाभङ्गसंविधानमित्यत्र विषयत्वरूपं कर्मत्वं द्वितीयार्थः । प्रणयिनां प्रार्थनाया भङ्गाचरणदिषये अशिक्षिताः—अनभिज्ञा इति साधवो विशेष्यन्ते साभिप्रायम् । यतस्तादृशाः साधवः अतो निर्गुणमप्यभिनन्दन्त्येवेति ॥ १० ॥ एवं साधूनभिनन्द्य स्वप्रार्थनां कथयति—तदियमित्यादिना ॥ ११ ॥ आक्षपादीयेषु कतिपयसूत्रेष्वेव कुतः पक्षपातः ? प्रतिसूत्रं कुतो न व्याख्याति भवान् ? इत्याशङ्कामपनुदति—अक्षपादेत्यादित्रिभिः श्लोकैः । गभीरं न्यायपादपं पङ्गुरहमारोढुं कथं प्रभवेयम् । तद्वैभवप्राग्भागगतातिशयं द्रष्टुमपि I.4/KSV

वयं मृदुपरिस्पन्दाः तदारोहणपङ्गवः ।
न तद्विभूतिप्राग्भारमालोकयितुमप्यलम् ॥ १३ ॥[§ 35]

तदेकदेशलेशे तु कृतोऽयं विवृतिश्रमः ।
तमेव चानुगृह्णन्तु सन्तः प्रणयवत्सलाः ॥ १४ ॥[§ 37]

असङ्ख्यैरपि नात्मीयैः अल्पैरपि परस्थितैः ।

---

५ ] संविधानाम—
nyāma-wit_kha

गुणैस्सन्तः प्रहृष्यन्ति चित्रमेषां विचेष्टितम् ॥ १५ ॥§ 39

परमार्थभावनाक्रमसमुन्मिषत्पुलककलाञ्छितकपोलम् ।
स्वकृतीः प्रकाशयन्तः पश्यन्ति सतां मुखं धन्याः ॥ १६ ॥§ 41

## शास्त्राणामवश्याध्येयत्वम्

इह प्रेक्षापूर्वकारिणः पुरुषार्थसंपदमभिवाञ्छन्तः तत्साधनाधिगमोपायमन्तरेण तदवाप्तिममन्यमानाः तदुपायावगमनिमित्तमेव प्रथममन्वेषन्ते । दृष्टादृष्टभेदेन च द्विविधः पुरुषार्थस्य पन्थाः । तत्र दृष्टे विषये सुचिरप्ररूढवृद्धव्यवहारसिद्धान्वयव्यतिरेकाधिगतसाधनभावे भोजनादावनपेक्षितशास्त्रस्यैव भवति प्रवृत्तिः । न हि मलिनः स्नायात् बुभुक्षितो वाऽश्नीयात् इति शास्त्रमुपयुज्यते । अदृष्टे तु स्वर्गापवर्गमात्रे नैसर्गिकमोहान्धतमसविलुप्तालोकस्य लोकस्य शास्त्रमेव प्रकाशः । तदेव सकलसदुपायदर्शने दिव्यं चक्षुरस्मदादेः, न योगिनामिव योगसमाधिजज्ञानाद्युपायान्तरमपीति । तस्मादस्मदादेः शास्त्रमेवाधिगन्तव्यम् ॥ नालमहम् । अतस्तदेकदेश एव मम सर्वोऽपि परिश्रमो विश्राम्यति इति समुदितार्थः ॥ १४ ॥ परमार्थेत्यादि । परमार्थभावनाक्रमसमुन्मिषत्पुलककलाञ्छितकपोलं सतां मुखं स्वकृतीः प्रकाशयन्तो धन्याः पश्यन्ति । ये तु ग्रन्थकर्तारः, स्वग्रन्थोक्ततत्त्वार्थपरिशीलनविकसितं सतां निर्मत्सराणां मुखं पश्यन्ति, त एव धन्या इत्याशयः । निर्मत्सरा विद्वांसस्सुदुर्लभा इति यावत् ॥ १६ ॥ § 42

उपयुज्यत इति । स्वविषयप्रवर्तनायेति शेषः । स्नानभोजनादेः राग-
I.5/KSV प्रासत्वादिति हेतुरूह्यः । योगसमाधिजेत्यादि । योगिनो ह्यतीन्द्रियं

## विद्यास्थानानि

तच्च चतुर्दशविधं, यानि विद्वांसः चतुर्दशविद्यास्थानान्याचक्षते ॥

## वेदाः

तत्र वेदाश्चत्वारः । प्रथमोऽथर्ववेदः, द्वितीय ऋग्वेदः, तृतीयो यजुर्वेदः, चतुर्थः सामवेदः । एते चत्वारो वेदाः साक्षादेव पुरुषार्थसाधनोपदेशस्वभावाः, अग्निहोत्रं जुहुयात् स्वर्गकामः आत्मा ज्ञातव्यः इत्यादिश्रुतेः ॥

## धर्मशास्त्राणि

स्मृतिशास्त्रमपि मन्वाद्युपनिबद्धं अष्टकाशिखाकर्मप्रपाप्रवर्तनादिपुरुषार्थसाधनोपदेश्येव दृश्यते । अश्रूयमाणफलानामपि कर्मणां फलवत्ता विधिवृत्तपरीक्षायां वक्ष्यते—सर्वो हि शास्त्रार्थः पुरुषार्थपर्यवसायी न स्वरूपनिष्ठ इति ॥ धर्माधर्मादिकमपि पश्यन्तीति शास्त्रमर्यादा । न तथा वयमयोगिनः शक्नुम इत्यस्मदादेः शास्त्रमेव चक्षुरित्यर्थः ॥ § 43

७ ] गत— nyāma-wit__kha
८ ] तद्द्विविधिः— nyāma-wit__kha
८ ] तस्य— nyāma-wit__kha
८ ] रुचि— nyāma-wit__kha
१३ ] ज्ञानाभ्यु— nyāma-wit__ka
२३ ] चतुर्विधं— nyāma-wit__ka
२९ ] शास्त्रं— nyāma-wit__ka

विद्यास्थानानीति । साक्षात् परंपरया वा पुरुषार्थोपकारकाणि विद्यास्थानानीत्यर्थः । विद्यास्थानपदार्थः ग्रन्थकृताऽनुपदमेव प्रदर्श्यते ॥ § 44

अथर्ववेदस्य प्राथम्यं ग्रन्थकृतैव शब्दपरीक्षायां स्थापयिष्यते । अग्निहोत्रमित्यादि तु अनुमितश्रुतिवाक्यम्, अर्थानुकरणं वा । पूर्वोत्तरकाण्डयोरविशेषेण प्रामाण्यज्ञापनाय वाक्यद्वयमुपात्तम् ॥ § 45

स्मृतिशास्त्रं—धर्मशास्त्रम् । विधिवृत्तपरीक्षायामिति । पञ्चमाह्निके विध्यर्थविचारावसरे अश्रूमाणफलानामपि नित्यकर्मणां अन्ततः प्रत्यवायादिपरिहारो वा फलं वर्तत एवेति साधयिष्यते । अतः शास्त्रार्थस्सर्वोऽपि न स्वरूपतः पुरुषार्थः, किन्तु पुरुषार्थपर्यवसाय्येवेति ॥ § 46

I.6/KSV

## पुराणेतिहासौ

इतिहासपुराणाभ्यामपि उपाख्यानादिवर्णनेन वैदिक एवार्थः प्रायः प्रतन्यते । यथोक्तम्—म. भा. आ. १-२६५ § 47

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
विभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति इति ।§ 49

तदेवं वेदपुराणधर्मशास्त्राणां स्वत एव पुरुषार्थसाधनोपदेशस्वभावत्वाद्विद्यास्थानत्वम् ॥ § 50

## अङ्गानि

अङ्गानि व्याकरणकल्पज्योतिशिशक्षाछन्दोनिरुक्तानि वेदार्थोपयोगिपदादिव्युत्पादनद्वारेण विद्यास्थानत्वं प्रतिपद्यन्ते । तेषामङ्गसमाख्यैव तदनुगामितां प्रकटयति ॥ § 51

## मीमांसा

१२ ] उपाध्याय— nyāma-wit__ka
१२ ] प्रायेण— nyāma-wit__kha
१४ ] ममायं— nyāma-wit__kha
१६ ] ज्योति— nyāma-wit__kha
१७ ] स्थानं— nyāma-wit__ka

विचारमन्तरेणाव्यवस्थितवेदवाक्यार्थानवधारणात् मीमांसा वेदवाक्यार्थविचारात्मिका वेदाकरस्येतिकर्तव्यतारूपमनुभवन्ती विद्यास्थानतां प्रतिपद्यते । तथा च भट्टः— § 52

इतिहासपुराणाभ्यामिति । उपाख्यानादिवर्णनमुखेन वैदिकार्थप्रतिपादकत्वरूपार्थसामान्यात् पुराणतर्कमीमांसा पुराणं धर्मशास्त्रं च इत्यादौ पुराणपदं इतिहासमपि संगृह्णातीति भावः । उपाख्यानवर्णनोपयोगितया इतरवर्णनादीनामपि प्रसक्तत्वात् प्राय इत्युक्तम् ॥ § 53

ननु व्याकरणादीनामपि धर्मशास्त्रादीनामिव स्वत एव पुरुषार्थोपदेशित्वं कुतो न स्यादिति शङ्कायामाह—तेषामिति ॥ § 54

अव्यवस्थितेति । उदिते जुहोति अनुदिते जुहोति सदेव सौम्येदमग्र आसीत् असद्वा इदमग्र आसीत् इत्यादिवाक्यानामित्यर्थः ।

धर्मे प्रमीयमाणे तु वेदेन कर आत्मना ।इतिकर्तव्य-
ताभागं मीमांसा पूरयिष्यति इति ॥§ 56&

अत एव सप्तममङ्गमिति न गण्यते मीमांसा; प्रत्यासन्नत्वेन वेदैकदेशभूतत्वात् । विचारसहायो हि शब्दः स्वार्थं निराकाङ्क्षं प्रबोधयितुं क्षमः ॥

## न्यायविस्तरः

न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां, वेदप्रामाण्यरक्षाहेतुत्वात् । वेदेषु हि दुस्तार्किकरचितकुतर्कविप्लावितप्रामाण्येषु शिथिलितास्थाः कथमिव बहुवित्तव्ययायासादिसाध्यं वेदार्थानुष्ठानमाद्रियेरन् साधवः । किं वा स्वामिनि परिम्लाने तदनुयायिना मीमांसादिविद्यास्थानपरिजनेन कृत्यमिति । तस्मादशेषदुष्टतार्किकोपमर्दद्वारकदृढतरवेदप्रामाण्यप्रत्ययाधायिन्यायोपदेश— क्षममक्षपादोपदिष्टमिदं न्यायविस्तराख्यं शास्त्रं शास्त्रप्रतिष्ठाननिबन्धनं इति धुर्यं विद्यास्थानम् ॥

## किं नाम विद्यास्थानत्वम्

विद्यास्थानत्वं नाम चतुर्दशानां शास्त्राणां—पुरुषार्थसाधनज्ञानोपायत्वमेवोच्यते । वेदनं—विद्या, तच्च न घटादिवेदनं, अपि तु धर्म इत्यादि । धर्मप्रमितौ वेदाः करणम् । करणस्य इतिकर्तव्यताप्रकारं मीमांसा बोधयति । उद्यमननिपातनादीतिकर्तव्यतानभिज्ञस्य वास्यादिकरणं न हि फलाय कल्पेत । एवं वेदार्थनिर्णायकत्वादेव तस्या वेदैकदेशत्वमनुपदमुच्यते ॥ § 57

---

१ ] स्थितवाक्या— nyāma-wit_kha
२ ] मनुबिभ्रतीति— nyāma-wit_kha
१३ ] प्रबो— nyāma-wit_ka
१३ ] हेतुत्वात्— nyāma-wit_kha
१३ ] शिक्षितास्था— nyāma-wit_ka
१३ ] प्रतिष्ठान— nyāma-wit_kha
१३ ] इति पदं— nyāma-wit_kha
१३ ] यतो वेदनं— nyāma-wit_ka

वेदप्रामाण्यशैथिल्येन मीमांसादीनां किमागतमित्यत्राह—किं वा स्वामिनीति । स्वामी—अङ्गी वेदः । शास्त्रप्रतिष्ठाननिबन्धनं—स्वेतरसर्वशास्त्रजीवनाधारभूतम् । धुर्यं—तत्कार्यनिर्वाहात् अग्रयम् ॥ § 58

न घटादिवेदनमिति । एतत् ज्ञानमिति प्रोक्तं अज्ञानं यदतोऽन्यथा गी., तत् ज्ञानमज्ञानमतोऽन्यदुक्तम् वि. पु. इत्यादौ पुरुषार्थसाधन

पुरुषार्थसाधनवेदनं; विद्यायाः स्थानं—आश्रयः—उपाय इत्यर्थः । तच्च पुरुषार्थसाधनपरिज्ञानोपायत्वं कस्यचित् साक्षात्, कस्यचिदुपायद्वारेण । तानीमानि चतुर्दश विद्यास्थानानीत्याचक्षते । यथोक्तम्—या-स्मृ. १-३

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।वेदाः स्थानानि
विद्यानां धर्मस्य च चतुर्दश इति ।§ 60&

अन्यत्राप्युक्तम्—

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविंस्तरः ।पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश इति ॥§ 62&

**गौतमप्रणीतन्यायशास्त्रमेव विद्यास्थानगणपरिगणितम्**

पूर्वत्र तर्कशब्देनोपात्तं उत्तरत्र च न्यायविस्तरशब्देनैतदेव शास्त्रमुच्यते । न्यायः—तर्कः—अनुमानम्, सोऽस्मिन्नेव शास्त्रे व्युत्पाद्यते ॥

यतः—साङ्ख्यार्हतानां तावत् क्षपणकानां कीदृशमनुमानोपदेशकौशलं ? कियदेव तत्तर्केण वेदप्रामाण्यं रक्ष्यत इति नासाविह गणनार्हः ॥

बौद्धास्तु यद्यपि अनुमानमार्गावगाहननैपुणोद्धुरां कन्धरामुद्वहन्ति; तथाऽपि वेदविरुद्धत्वात्तत्तर्कस्य कथं वेदादिविद्या- ज्ञानस्यैव ज्ञानत्वेन, तदतिरिक्तस्याज्ञानत्वेन च वर्णनादित्याशयः । लोकेऽपि हि तत्तदसाधारणकार्यनिर्वाहकस्यैव तत्तद्वस्तुत्वेन निर्देशः । यथा सत्पुत्रः, असत्पुत्र इत्यादाविति भावः । धर्मस्य चेति । धर्मस्य च स्थानानीत्यन्वयः ॥ § 63

पूर्वत्र—पुराणतर्केत्यादिश्लोके । पूर्वत्र तर्कशब्देनोपात्तं एतदेव शास्त्रम् । उत्तरत्र च न्यायविस्तरशब्देनोच्यत इत्यन्वयः ॥ § 64

ननु तर्कावलम्बिषु सांख्यार्हतबौद्धचार्वाकवैशेषिकनैय्यायिकेषु षट्सु षट्तर्कीति प्रसिद्धेषु सत्सु, न्यायशास्त्रमेव पुराणतर्केत्यादौ परिगण्यत इत्यत्र किं विनिगमकम् ? इत्यत्राह—यत इत्यादि । इह—विद्यास्थानेषु ॥ § 65

◦ ] कियदिव तर्केण— nyāma-wit__ka
◦ ] नेहासौ— nyāma-wit__ka
◦ ] अनुमानावगाहन— nyāma-wit__ka
◦ ] उद्वहन्ति— nyāma-wit__ka

नैपुणोद्धुरां कन्धरामित्यादि । स्वस्यैव महातार्किकत्वाभिमानेन उद्धृत-ग्रीवा गच्छन्तीति हास्योक्तिरियम् ॥ § 66
I.9/KSV

स्थानमध्ये पाठः । अनुमानकौशलमपि कीदृशं शाक्यानामिति पदे पदे दर्शयिष्यामः ॥ § 67

चार्वाकास्तु वराकाः प्रतिक्षेप्तव्या एव; कः क्षुद्रतर्कस्य तदीयस्येह गणनावसरः ? § 68

वैशेषिकाः पुनरस्मदनुयायिन एवेत्येवमस्यां जनतासु प्रसिद्धायामपि षट्तर्क्यां इदमेव तर्कन्यायविस्तरशब्दाभ्यां शास्त्रमुक्तम् ॥ § 69

इयमेवान्वीक्षिकी चतसृणां विद्यानां मध्ये न्यायविद्या गण्यते— § 70

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती इति ॥§ 71

## आन्वीक्षिकीशब्दव्युत्पत्तिः

प्रत्यक्षागमाभ्यामीक्षितस्य अन्वीक्षणं—अन्वीक्षा; अनुमानमित्यर्थः; तद्व्युत्पादकं शास्त्रं आन्वीक्षिकी ॥ § 72

ननु चतस्रश्चेद्विद्याः तत्कथं चतुर्दश दर्शिताः—नैष विरोधः —वार्तादण्डनीत्योर्दृष्टैकप्रयोजनत्वेन सर्वपुरुषार्थोपदेशिविद्यावर्गे गणनानर्हत्वात्, त्रय्यान्वीक्षिक्योश्च तत्र निर्देशाच्चतुर्दशैव विद्याः ॥ § 73

यद्यपि चार्वाकाः प्रत्यक्षातिरिक्तं प्रमाणं नाभ्युपगच्छन्तीति प्रसिद्धं, तथापि स्वपक्षनिर्धारणाय तैरप्यपरित्याज्य एव तर्कः । अमुमाशयं सूचयति वराक शब्दः । वस्तुतस्तु सुशिक्षितचार्वाका अनुमानमपि प्रमाणमुररीकुर्वन्तीति स्वावसरे प्रकाशयिष्यते ॥ § 74

अस्मदनुयायिन इति । तथा च तेऽप्यत्र क्रोडीकृता एवेति भावः ॥ § 75

ननु आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । विद्याश्चतस्र एवैताः इत्यादिवचने आन्वीक्षिक्या एव गणनात् कथं न्यायविस्तरस्य विद्यात्वमिति शङ्कायां, तयोः पदयोः पर्यायत्वं सव्युत्पत्तिप्रदर्शनं दर्शयति—इयमेवेत्यादिना । अन्वीक्षिक्यभिन्ना इयं न्यायविद्यैव चतसृणां विद्यानां मध्ये गण्यते इत्यन्वयः ॥ § 76

कथमिति । चतस्र इति खलु वक्तव्यमित्यर्थः । दृष्टैकप्रयोजनत्वेनेति । लोकस्य जीवनहेतुप्रतिपादिका हि वार्ता, वार्ता तु जीवनम् इति

## मीमांसाशास्त्रेण नेदं शास्त्रं चरितार्थम्

∘ ] आन्वीक्षकम्— nyāma-wit__kha

∘ ] कथं— nyāma-wit__kha

ननु वेदप्रामाण्यनिर्णयप्रयोजनश्चेन्न्यायविस्तरः कृतमनेन, मीमांसात एव तत्सिद्धेः । तत्र ह्यर्थविचारवत् प्रामाण्यविचारोऽपि कृत एव—सत्यम्—सत्वानुषङ्गिकः । तत्र मुख्यस्त्वर्थविचार एव । पृथक् प्रस्थाना हीमा विद्याः । सा च वाक्यार्थविद्या, न प्रमाणविद्येति । न च मीमांसकाः सम्यक् वेदप्रामाण्यरक्षणक्षमां सरणिमवलोकयितुं कुशलाः । कुतर्ककण्टकनिकरनिरुद्धसञ्चारमार्गाभासपरिभ्रान्ताः खलु ते इति वक्ष्यामः । न हि प्रमाणान्तरसंवाददार्ढ्यमन्तरेण प्रत्यक्षादीन्यपि प्रमाणभावं भजन्ते, किमुत तदधीनवृत्तिरेष शब्दः ? शब्दस्य हि समयोपकृतस्य बोधकत्वमात्रं स्वाधीनं, अर्थतथात्वेतरत्वपरिनिश्चये तु पुरुषमुखप्रेक्षित्वमस्यापरिहार्यम् । कामन्दकोक्तेः । तद्विघ्ननिवारणार्था च दण्डनीतिः । एवञ्चानयोः दृष्टार्थत्वं स्पष्टम् । विद्यास्थानानि तु सर्वपुरुषार्थसाधनोपदेशीनि इति भावः ॥ § 77

आनुषङ्गिक इति । प्रत्यक्षादिप्रमाणैरेव धर्मस्वरूपादिनिर्णयसम्भवे किं चेदार्थविचारेणेतिशङ्कायां तद्व्युदसनाय प्रमाणस्वरूपविचारं संक्षेपतः कृत्वा वेदैकसमधिगम्यो धर्मः इत्येतावन्मात्रं तत्र प्राधान्येन विवक्षितम्, न त्वतिरिक्तमपि । एवञ्च जैमिनिसूत्रेषु प्रमाणस्वरूपादिकथनं एतच्छास्त्रसिद्धार्थानुवादमात्रमिति भावः । वाक्यार्थविद्येति । पदशास्त्रं व्याकरणं, वाक्यशास्त्रं मीमांसा, प्रमाणशास्त्रं न्याय इति हि प्रामाणिकी प्रसिद्धिरिति भावः । न च मीमांसका इत्यादि । कुतर्ककुशलवेदाप्रामाण्यवादिपुरुषव्याघ्रभीताः खलु मीमांसकमृगाः किंकर्तव्यतामूढाः स्वरक्षणाय द्राविडप्राणायामादिकमारचयन्तीति अहो बत इमे श्रोत्रियाः इत्यादिना तत्र तत्र निरूपयिष्यत इति भावः । किमुतेति । सर्वप्रमाणाग्रणीत्वेन प्रसिद्धमपि प्रत्यक्षं शुक्तिरजतादिज्ञाने अर्थं व्यभिचरत् स्वप्रमाण्ये तर्कमेव सहायमपेक्षते चेत् विप्रलम्भकादिभूयिष्ठे जगति सुलभप्रमादस्य शब्दस्य विषये हि सुतरां तर्कापेक्षा । तच्च शब्दप्रामाण्यं यक्षानुरूपो बलिः इतिन्यायेन कुतर्कनिराकरणक्षममहातार्किकैकसंरक्ष्यं, न केवलसांप्रदायिकेनेति वेदप्रामाण्यं तर्कशास्त्राधीनमेवेति । समयः—सङ्केतः, शक्तिरिति यावत् । अर्थतथात्वेतरत्वे—यथार्थत्वायथार्थत्वे ॥ § 78

I.11/KSV

तस्मादाप्तोक्तत्वादेव शब्दः प्रमाणीभवति, नान्यथेत्येतच्चास्मिन्नेव शास्त्रे व्युत्पादयिष्य ते ॥ § 79

ननु अक्षपादात् पूर्वं कुतो वेदप्रामाण्यनिश्चय आसीत् ? अत्यल्पमिदमुच्यते—जैमिनेः पूर्वं केन वेदार्थो व्याख्यातः ? पाणिनेः पूर्वं केन पदानि व्युत्पादितानि ? पिङ्गलात् पूर्वं केन छन्दांसि रचितानि ? आदिसर्गात्प्रभृति वेदवदिमा विद्याः प्रवृत्ताः । संक्षेपविस्तरविवक्षया तु तांस्तान् तत्र तत्र कर्तॄनाचक्षते ॥ § 80

∘ ] पुराण— nyāma-wit__ka
∘ ] विरचितानि— nyāma-wit__ka

## शास्त्राधिकारिणः

ननु वेदप्रामाण्यं निर्विचारसिद्धमेव साधवो मन्यन्ते—इति किमत्र विचारयत्नेन ? न—संशयविपर्यासनिरासार्थत्वात् । यस्य हि वेदप्रामाण्ये संशयाना विपर्यस्ता वा मतिः, तं प्रति शास्त्रारम्भः । न हि विदितवेदार्थं प्रति मीमांसा प्रस्तूयते । तदुक्तम्— § 81

नान्यतो वेदविद्भ्यश्च सूत्रवृत्तिक्रियेष्यते इति ॥§ 82

नन्वित्यादि । अक्षपादैस्तर्कशास्त्रप्रणयनात्पूर्वं परीक्षकाः वेदप्रामाण्यादिकं कथमरक्षन् ? विनैवाक्षपादशास्त्रं तैः वेदप्रामाण्यसंरक्षणे सैव रीतिरिदानीमप्यनुस्रियतां, किमाक्षपादेन शास्त्रेणेति प्रश्नाशयः । एवं धार्ष्ट्यात्पृच्छन्तं प्रति प्रतिबन्दिमाह—जैमिनेरित्यादि । ऋजुं समाधानमाह—आदिसर्गादित्यादि ॥ § 83

निर्विचारसिद्धमेवेति । ये तु साधवश्चतश्चालनेऽपि श्रद्धादार्ढ्यात् वेदप्रामाण्ये न संशेरते, तान् प्रति तत्प्रामाण्यसाधनप्रयासो व्यर्थ एव । ये च मूर्खाश्चतशो बोधनेऽपि नास्तिक्यात् वेदप्रामाण्ये न श्रद्दधते, तान् प्रत्यपि तत्प्रयासो व्यर्थ एवेत्यधिकारिणोऽभावादनारंभणीयं शास्त्रमित्याक्षेपाशयः । सत्यं मुनिरसौ निश्चितार्थेभ्यः नोपदिशति; किन्तु विपर्यस्तान् शिक्षयति युक्त्या, अज्ञसन्दिहानाबुद्धरतीति समाधानाशयः ॥ § 84

तदुक्तमिति । श्लोकवार्तिके १-४-४३ भट्टपादैरिति शेषः । वार्तिकस्यायमर्थः । अन्यतः—प्रकारान्तरेण वेदविद्भ्यः—वेदार्थमवगतवद्भ्यः ।

भवति च चतुष्प्रकारः पुरुषः; अज्ञः, सन्दिग्धः, विपर्यस्तः, निश्चितमतिश्चेति । तत्र निश्चितमतिरेष मुनिः अमुना शास्त्रेण अज्ञस्य ज्ञानमुपजनयति, संशयानस्य संशयमुपहन्ति, विपर्यस्यतो विपर्यासं व्युदस्यतीति तान् प्रति युक्तः शास्त्रारम्भः ॥

कुतः पुनरस्य मुनेः निश्चितमतित्वं जातम् ? उच्यते—भवति तावदेष निश्चितमतिः; स तु तपःप्रभावाद्वा देवताराधनाद्वा शास्त्रान्तराभ्यासाद्वा भवतु । किमनेन ?

तत्रैतत् स्यात्, तत एव शास्त्रान्तरादस्मदादेरपि तत्त्वाधिगमो भविष्यतीति किमक्षपादप्रणीतेन शास्त्रेण ?—परिहृतमेतत्— सङ्क्षेपविस्तरविवक्षया शास्त्रप्रणयनस्य साफल्यात् । विचित्रचेतसश्च भवन्ति पुरुषा इत्युक्तम् । येषामित एवाज्ञानसंशयविपर्यया विनिवर्तन्ते, तान् प्रत्येतत्प्रणयनं सफलमितीदं प्रणीतवानाचार्यः ॥

तत्रेदमादिमं सूत्रम्—

* * *

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव— तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजा— तिनिग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगमः ॥ ॥

१-१-१ ॥

* * *

सूत्रस्य तद्वृत्तेर्वा प्रणयनं नेष्यते, किन्तु तद्व्यतिरिक्तान् प्रत्येवेति । भवति चेति । उद्योतकारैरप्युक्तं वार्तिके—पुरुषः पुनश्चतुर्धा भिद्यते—प्रतिपन्नोऽप्रतिपन्नः सन्दिग्धो विपर्यस्तश्च इति ॥ § 85

किमनेनेति । किमनेन काकदन्तपरीक्षणेनेत्यर्थः । ननु नेदं काकदन्तपरीक्षणं, अपि तु येनोपायेन स मुनिर्निश्चितमतिरासीत्तमेवोपायं वयमप्याश्रयेमहीति किमनेनशास्त्रेण इति प्रश्नाशयं स्फुटयति—तत्रैतत्स्यादिति । सङ्क्षेपेत्यादि । तावत्तत्त्वज्ञानोत्पादनक्षमः तपःप्रभावो देवताराधनं वा न सर्वेषां सुशकं; तदपेक्षया परकल्पिततडाकोपजीवनन्यायेनैतच्छास्त्राध्ययनमेव वरं, को हि सुमतिः सिद्धमन्नं परित्यज्य भिक्षामटेत्—इत्यप्युपलक्षणम् ॥ § 86

I.13/KSV

## शास्त्रारम्भे अभिधेयप्रयोजनकथनमावश्यकम्

ननु किमर्थोऽयमादिवाक्यारम्भः ? § 87

कोऽयं प्रश्नः ? शास्त्रं चेदारम्भणीयं क्रमवृत्तित्वाद्वाचः प्रथममवश्यं किमपि वाक्यं प्रयोक्तव्यम् । न ह्यादिवाक्यमकृत्वा द्वितीयादिवाक्यप्रणयनमुपपद्यत इति ग्रन्थकरणमेवाघटमानं स्यात् ॥ § 88

आह—न खल्वेवं न जाने ! किन्तु यदेव शास्त्रे व्युत्पाद्यत्वेन स्थितं तदेव व्युत्पाद्यताम् । किमादौ तदभिधेयप्रयोजनकीर्तनेन ? § 89

उच्यते— § 90

आदिवाक्यं प्रयोक्तव्यमभिधेयप्रयोजने ।
प्रतिपादयितुं श्रोतृप्रवाहोत्साहसिद्धये ॥ १७ ॥§ 92

अभिधेयफलज्ञानविरहास्तमितोद्यमाः ।
श्रोतुमल्पमपि ग्रन्थमाद्रियेरन् न सूरयः ॥ १८ ॥§ 94

को हि नाम विद्वान् अविदितविषये निष्प्रयोजने च कर्मणि प्रवर्तेत । आह च भट्टः—श्लो. वा. १-१-१२. § 95

∘ ] विपर्यस्तस्य— nyāma-wit_ka
∘ ] ऋषेरपि— nyāma-wit_ka
∘ ] शास्त्रान्तराद्वा— nyāma-wit_ka
∘ ] तत्त्वावगमो— nyāma-wit_ka
∘ ] माद्रियन्ते— nyāma-wit_kha

सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते इति ॥§ 97

## प्रयोजनपरिज्ञानसंभवाक्षेपपरिहारौ

ननु प्रयोजनपरिज्ञानमादौ श्रोतॄणां कुतस्त्यम् ? इति चिन्त्यम्—किमस्मादेव वाक्यात् ? उत युक्तितः ? § 98

प्रष्टुराशयमजानन्निव पृच्छति—कोऽयमिति । प्रष्टुराशयं उद्घाटयति—आहेति । प्रमाणशास्त्रं खल्विदमित्युक्तं, तर्हि प्रत्यक्षानुमान... इति सूत्रेणैव प्रथमतो भाव्यं, कुतोऽत्र निःश्रेयसादिफलोपदेशस्य प्रसक्तिरित्याक्षेपाशयः । समाधत्ते—उच्यत इति । अभिधेयप्रयोजने प्रतिपादयितुं इत्यन्वयः । विरहात् अस्तमिता उद्यमा येषां ते तथा । उक्तार्थेऽभियुक्तोक्तिं संवादयति—आहेति । श्लोकवार्तिकारंभ इति शेषः । इदं चोपलक्षणम्—अभिधेयसम्बन्धप्रयोजनप्रतिपादनार्थत्वं प्रथमसूत्रस्य इति तात्पर्यटीकाया अपि ॥ § 99

I.14/KSV

वाक्यं तावदनिश्चितप्रामाण्यं कथं प्रयोजननिश्चयाय प्रभवति । संशयाद्वा प्रवृत्तौ वेदार्थेऽपि तथैव स्यादिति शास्त्रमनारब्धव्यं स्यात् ॥ § 100

युक्तितः प्रयोजनावगमः शास्त्रे सर्वस्मिन्नधीते सति सम्भवति, नेतरथेति तदवगमपूर्विकायां प्रवृत्तौ इतरेतराश्रयः—शास्त्राधिगमात् प्रयोजनपरिज्ञानं, प्रयोजनपरिज्ञानाच्च शास्त्रश्रवणे प्रवृत्तिः— § 101

उच्यते—आदिवाक्यादेव श्रोतुः शास्त्रप्रयोजनपरिज्ञानं; अर्थसंशयाच्च श्रवणे प्रवृत्तिः । § 102

वेदे ह्यसिद्धप्रामाण्ये महाक्लेशेषु कर्मसु ।
नानर्थशङ्कया युक्तं अनुष्ठानप्रवर्तनम् ॥ १९ ॥§ 104

अनिश्चितप्रामाण्यमिति । न हि प्रमाणान्तरसंवाददार्ढ्यमन्तरेण प्रत्यक्षादीन्यपि प्रमाणभावं भजन्ते, किमुत तदधीनवृत्तिरेष शब्दः इति खलूक्तम् । अतो आदिवाक्यश्रवणमात्रात् न प्रयोजननिर्णयो भवेदित्यर्थः । वेदार्थेऽपि तथैव स्यादिति । वेदप्रामाण्यनिश्चय एतच्छास्त्राधीन इति पूर्वमुक्तम् । एतच्छास्त्रे प्रामाण्यसंशयेऽपि यदि कश्चिदधीयीतेमं शास्त्रं, तर्हि

२ ] प्रतिपादन— nyāma-wit__ka nyāma-wit__kha
१२ ] वाक्यात्— nyāma-wit__ka
१६ ] शास्त्राधिगमे—

वेदे प्रामाण्यनिश्चयाभावेपि तदर्थानुष्ठानायैव यतताम्, मध्ये किमनेन संशयग्रहग्रस्तप्रामाण्येन शास्त्रेणेत्याशयः । सर्वस्मिन्नधीत इति । न ह्यादिमवाक्यार्थज्ञानमात्रात् युक्तीनां अवगमः संभवति, किन्तु शास्त्राध्ययनानन्तरमेव युक्तिपरिज्ञानं भवेदिति । वेदे हीति । यद्यपि शास्त्राध्ययनारंभकाले प्रयोजनज्ञानं निर्विचिकित्सं न जातमेव; अथाप्यापाततः प्रयोजनज्ञाने जाते प्रवृत्ताः पुरुषाः प्रामाण्यं तद्वैपरीत्यं वा स्वयमेव जानन्ति । वेदार्थानुष्ठानस्य तु अतिक्लेशसाध्यत्वात् न केवलमत्यायाससाध्ये तादृशे कर्मणि आपातप्रतीत्या बुद्धिमान् प्रवर्तेत इति तत्र प्रामाण्यनिश्चयः प्रथममावश्यकः । सुकरे तु शास्त्राध्ययने सामान्यतः प्रयोजनपरिज्ञानादपि प्रवृत्तिर्युक्तैवेति समाधानग्रन्थाशयः । वेदे प्रामाण्ये असिद्धे सति महाक्लेशमयेषु कर्मसु, निष्प्रयोजनत्वशङ्कायां अनुष्ठाने प्रवृत्तिर्न युक्तेत्यर्थः । महाक्लेशेष्विति बहुव्रीहिः ॥ § 105

I.15/KSV

बहुवित्तव्ययायासवियोगसुगमेऽध्वनि ।
प्रवृत्तिरुचितोदारफले लघुपरिश्रमे ॥ २० ॥ § 107

शृण्वन्त एव जानन्ति सन्तः कतिपयैर्दिनैः ।
किमेतत्सफलं शास्त्रं उत मन्दप्रयोजनम् ॥ २१ ॥ § 109

सूक्ष्मेक्षिका तु यद्यत्र क्रियते प्रथमोद्यमे ।
असौ सकलकर्तव्यविप्रलोपाय कल्पते ॥ २२ ॥ § 111

आर्तो हि भिषजं पृष्ट्वा तदुक्तमनुतिष्ठते ।
तस्मिन् सविचिकित्सस्तु व्याधेराधिक्यमाप्नुयात् ॥ २३ ॥ § 113

तेनादिवाक्याद्विज्ञाय साभिधेयं प्रयोजनम् ।
तत्सम्भावनया कार्यः तच्छास्त्रश्रवणादरः ॥ २४ ॥ § 115

## उपादेयताज्ञानजनकमादिमवाक्यमिति पक्षः

येरप्यादिवाक्यमित्थं व्याख्यायते किल—(?')अनन्वितपदार्थकं वाक्यमनुपादेयं—दशदाडिमादिवाक्यवत् । अन्वितपदार्थकमपि § 116

बहुवित्तेत्यादि । बहुवित्तव्ययायासरहितत्वात्सुगमे, लघुपरिश्रमे, अथापि उदारफलेऽध्वनि शास्त्राभ्यासे प्रवृत्तिरुचिता । आपातप्रतीत्या प्रवृत्तेरनङ्गीकारे बाधकमाह—सूक्ष्मेक्षिका त्विति । प्रवृत्त्यारम्भकाल एव इदं सफलमेवेति सूक्ष्मविचारणापूर्वकनिर्णयः यदि सर्वत्रापेक्ष्येत तदा जगति किञ्चिदपि

कार्यं न निर्वर्तेत । विप्रलोपः—विनाशः । इममेवार्थं दृष्टान्तेन विशदयति—आर्तो हीति । भिषजा औषधे उपदिष्टे प्रथममेव व्याधिर्निश्चेषं विनश्यत्येवेति न सर्वे प्रवर्तन्ते । अपि तु इदमपि भुञ्जाम इत्येव । रोगनिवृत्तौ च प्रामाण्यनिश्चय इत्यनुभवः । वैद्य एव संशयीत चेत् व्याधिरेव वर्धेत । एवं लोको निर्व्यापारः प्रसज्येत । अतः फलसंभावनयाऽपि प्रवृत्तिरङ्गीकार्यैवेति ॥ § 117

प्रकारान्तरेण आदिमवाक्यं व्याकुर्वतां मतमुपन्यस्य समाधत्ते— यैरपीति । व्यापकानुपलब्ध्येति । यदुपादेयं तत् सप्रयोजनमिति

निष्प्रयोजनमनुपादेयमेव—सदसद्वायसदशनविमर्शवाक्यमिव । तदिह उपादेयताव्यापकप्रयोजनाद्यनुपलम्भादनादरणीयमिति व्यापकानुपलब्ध्या प्रत्यवतिष्ठमानः परः प्रयोजनाद्यभिधायिना आदिवाक्येन निवृत्ताशङ्कः क्रियत इति—तैरपि प्रयोजनप्रतिपादनमेवादिवाक्यस्यार्थ इत्युक्तं भवति । तत्प्रतिपादनेनैव व्यापकानुपलब्धिपरिहारादाशङ्का निवारिता भवतीति ॥

**अर्थसंशायकतया प्रवर्तकत्वमादिवाक्यस्येति पक्षान्तरम्**

यदपि प्रवृत्तिहेतोरर्थसंशयस्य, तर्कापरनाम्न औचित्यस्य वा समुत्पादनमादिवाक्येन क्रियत इति केचिदाचक्षते—तदपि प्रयोजनाभिधानद्वारकमेव । प्रयोजनविषयो हि संशयो वा संभावनाप्रत्ययो वा प्रवृत्त्यङ्गभूतस्तेनोत्पादनीय इति तदुत्पत्तौ प्रयोजनाभिधानमेवादिवाक्यस्य व्यापारः । संशयस्तु वस्तुवृत्तोपनत एव, पुरुषवचसां द्वैविध्यदर्शनात् । शौचसमाचारसाधुतादिना तु तस्मिन् सम्भावनाप्रत्ययोऽपि लोकस्य भवतीति । तस्मात् प्रयोजनप्रतिपादनार्थमेवादिवाक्यमिति सूक्तम् ॥ व्याप्तौ व्यापकस्य प्रयोजनस्याभावे व्याप्यस्योपादेयत्वस्यापि निवृत्तिरावश्यकी, व्यापकाभावे व्याप्याभावादिति ॥ § 118

सन्दिग्ध एवार्थे विचारावतारात्, एतच्छास्त्रप्रतिपाद्यार्थः पूर्वमेव निर्णीतश्चेत्प्रवृत्तिर्न भवेत् । आद्यवाक्येन अर्थे प्रदर्शिते तेन तदर्थे सन्दिहानाः तन्निर्णयाय, शास्त्रे प्रवर्तन्ते इति अर्थसंशय एवादिवाक्यकृत्यमिति मन्यतां मतमाह—यदपीति । आदिवाक्यश्रवणसमनन्तरं न संशयनैय्यत्यम्, तस्य कोटिद्वयोपस्थित्यधीनत्वादित्यतः—तर्केत्यादि । तथा च संशयाभावेऽपि संभावनाप्रत्ययो भवितुमर्हतीति भावः । वस्तुवृत्तोपनत इति । न तु आदिवाक्याधीन इति यावत् । समाचारः—सदाचारः । अपिशब्दस्तस्य संभावनाद्योतकः ॥ § 119

I.17/KSV

११ ] प्रत्यवतिष्ठमानः— nyāma-wit__kha

११ ] मिधायिना— nyāma-wit__kha

२० ] संभावनाप्रियो लोको— nyāma-wit__ka

यच्च श्रोतृप्रवृत्त्यङ्गं तद्वक्तुं युक्तमादितः ।
न च प्रयोजनज्ञानादन्यदस्ति प्रवर्तकम् ॥ २५ ॥§ 121

अभिधेयकथनमपि तत्साध्यप्रयोजनोपपादनाय श्रोतृबुद्धिसमाधानाय च कर्तव्यमेव ॥ § 122

अर्थाक्षिप्तस्तु सम्बन्धः फलशास्त्राभिधेयगः ।
तन्निर्देशेन सिद्धत्वात् न स्वकण्ठेन कथ्यते ॥ २६ ॥§ 124

अभिधेयस्य शास्त्रस्य च वाच्यवाचकभावलक्षणः सम्बन्धः, शास्त्रार्थस्य निःश्रेयसस्य च साध्यसाधनभावलक्षणः सम्बन्धः तदाश्रयनिर्देशादेव सिद्धः ॥ § 125

## षोडशपदार्थोद्देशः

अभिधेयास्तु प्रमाणादयो निग्रहस्थानपर्यन्ताः षोडश पदार्थाः प्रथमसूत्रे निर्दिष्टाः; तेषां स्वरूपमुपरिष्टाद्वक्ष्यते ॥ § 126

अर्थपरिच्छित्तिसाधनानि प्रत्यक्षादीनि प्रमाणानि । § 127

आदिमवाक्यप्रयोजनविचारमुपसंहरति—यच्चेति । श्रोतृप्रवृत्त्यङ्गं यत् तदेवादितो वक्तुं युक्तं, न च प्रयोजनज्ञानापेक्षयाऽतिरिक्तं किञ्चित् श्रोतृप्रवर्तकं वर्तते; अतः प्रयोजनकथनपरमेव प्रधानत आदिमवाक्यमिति निर्णय इति । नन्वेवमस्तु, अथापि अभिधेयप्रयोजने प्रतिपादयितुमादिवाक्यम् इति कथमित्यत्राह—अभिधेयकथनमपीति । तत्साध्यं—अभिधेयसाध्यं यत् प्रयोजनं तदुपपादनाय । नन्वेवं सम्बन्धोऽपि प्रथमं वक्तव्य एवेत्यत्राह—अर्थाक्षिप्तस्त्विति । स्वकण्ठेन—स्पष्टोक्त्या । तदाश्रयेति । तादृशविषयेत्यर्थः ॥ § 128

वक्ष्यत इति । परीक्ष्यत इत्यर्थः । तेन प्रमाणादिस्वरूपप्रतिपादनपराणां उत्तरवाक्यानां न विरोधः । अथ वा—उपरिष्टात् इत्यनेनोत्तरवाक्यसन्दर्भ एव विवक्षितः । तथा च प्रमाणादीनां स्वरूपमात्रमिदानीं कथ्यते, तत्परीक्षणं च पश्चादिति भावः । अर्थस्वरूपनिष्कर्षः—अर्थपरिच्छित्तिः ।

तत्परिच्छेद्यमात्मादि प्रमेयम् ।

नानार्थावमर्शः संशयः ।

हिताहितप्राप्तिपरिहारौ, तत्साधनं च प्रयोजनम् ।

हेतोः प्रतिबन्धावधारणं दृष्टान्तः ।

प्रमाणतोऽभ्युपगम्यमानः सामान्यविशेषवानर्थः सिद्धान्तः ।

परार्थानुमानवाक्यैकदेशभूताः प्रतिज्ञादयोऽवयवाः ।

सन्दिग्धेऽर्थेऽन्यतरपक्षानुकूलकारणदर्शनात् तस्मिन् सम्भावनाप्रत्ययस्तर्कः ।

---

७ ] भावः— nyāma-wit__kha

साधनोपलम्भजन्मा तत्त्वावबोधो निर्णयः ।
वीतरागकथा वस्तुनिर्णयफला वादः ।
विजिगीषुकथा तु पुरुषशक्तिपरीक्षणफला जल्पः ।
तद्विशेषो वितण्डा ।
अहेतवो हेतुवदाभासमानाः हेत्वाभासाः ।
अर्थविकल्पैर्वचनविघातः छलम् ।
हेतुप्रतिबिम्बनप्रायं प्रत्यवस्थानं जातिः ।
सत्यवस्त्वप्रतिभासः विपरीतप्रतिभासश्च निग्रहस्थानम् ॥ तत्परिच्छेद्यं— प्रमाणैः परिच्छेद्यं—निर्णेयम् । प्रतिबन्धः—व्याप्तिः । यस्मिन्नधिकरणे हेतोर्व्याप्तिर्निश्चीयते स दृष्टान्त इत्यर्थः । सामान्यविशेषवानिति । सामान्यविशेषवदर्थाभ्यनुज्ञा सिद्धान्तः इति वार्तिकमनुसृत्येदमुक्तम् । प्रत्येकमप्यवयवव्यवहारसत्त्वात्—एकदेशभूता इत्युक्तम् । तर्कफलभूतो निर्णयः । वितरागकथा इति लक्षणत् । वस्तुनिर्णयफल इति प्रयोजनवाक्यम् । न हि जल्पे वस्तुनिर्णयो नियमेन सम्भवति; प्रामाणिकोऽपि सन् अकस्मादप्रत्यवस्थाने जल्पे निगृह्यते, अत एवोक्तं पुरुषशक्तिपरीक्षणफला इति । विजिगीषुकथा इति विशेष्यवाचकम् । तद्विशेषः—जल्पविशेषः, विजिगीषुकथात्वात् पुरुषशक्तिपरीक्षणफलत्वाच्च । स्वपक्षस्थापनाहीना वितण्डेति तु विशेषः ॥ § 129

I.19/KSV

## सौत्रसमासकथनम्

तत्र वक्ष्यमाणलक्षणसूत्रनिर्देशानुसारेण कानिचित् एकवचनान्तानि, कानिचिद्बहुवचनान्तानि पदानि विगृहीतव्यानि । प्रमाणावयवहेत्वाभासानां बहुवचनेन विग्रहो दर्शयितव्यः, शेषाणामेकवचनेन; लक्षणसूत्रेषु तथा निर्देशात् । एवञ्चोद्देशलक्षणयोरेकविषयता नितरां दर्शिता भवति । इतरेतरयोगे द्वन्द्वस्समासः । प्रमाणादीनां तत्त्वमिति सम्बन्धमात्रे षष्ठी । तत्त्वस्य ज्ञानं, निःश्रेयसस्याधिगम इति कर्मणि षष्ठ्यौ, तत्त्वस्य ज्ञायमानत्वेन निःश्रेयसस्य चाधिगम्यमानत्वेन कर्मत्वात् ॥ § 130

## सूत्रे समासासम्भवाशङ्का

नन्वेवं व्याख्यायमाने तत्त्वपदस्य प्रमाणादिपदसापेक्षत्वेनासमर्थत्वात् असमासः प्राप्नोति । सापेक्षमसमर्थं भवतीत्याहुः । न चेदं प्रधानं सापेक्षम्, येन भवति वै प्रधानस्य सापेक्षस्यापि § 131

---

२५ ] मात्मादि— nyāma-wit__kha

२ ] राग— nyāma-wit__kha

२ ] फलो— nyāma-wit__kha

१९--२० ] एकवचनान्तानि पदानि विग्रहे ग्रहीतव्यानि— nyāma-wit__kha

१ ] तत्त्वस्य—क. तत्त्व— nyāma-wit__kha

कानिचिदिति । प्रमाणप्रमेयेत्यादिसूत्रे विग्रहकाले प्रमाणावयवहेत्वाभास-पदानि बहुवचनान्तानि, इतराणि तु एकवचनान्तानि च ग्राह्यानि, उत्तरत्र सूत्रकृता तथा निर्देशात् । सूत्रे कुतस्तथा निर्देश इति चेत्, तत्तत्तदवसरे स्पष्टीभविष्यति । एवं च—लक्षणसूत्रानुगुणवचनग्रहणेन च । उद्देशलक्षण-योः—उद्देशलक्षणवाक्ययोः ॥ § 132

ननु तत्त्वज्ञानादिति समासो न सम्भवति । तत्त्वपदस्य प्रमाणादिपदेन साकं सापेक्षत्वेन समासासम्भवात् । समर्थः पदविधिः इति खलु पाणिनीयं सूत्रम् । तत्र सामर्थ्यं नाम निराकांक्षार्थप्रतिपादनक्षमत्वम् । तत्त्वज्ञानात् इति पदं च साकांक्षतत्त्वपदघटितत्वेन न निराकांक्षबोधजननक्षमम् । अतः प्र-माण...निग्रहस्थानतत्त्वज्ञानात् इति प्रमाण...निग्रहस्थानानां तत्त्वानां ज्ञानात् इति वा वक्तव्यम् । न हि राजन्यन्वयतात्पर्येण ऋद्धस्य राजमातङ्गाः इति प्रयोक्तुं युक्तमिति शङ्कते—नन्विति । ननु वृत्तिघटकेऽपि पुरुषेऽन्वयतात्प-र्येण राजपुरुषः शोभन इति प्रयोगात् प्रकृतेऽपि तथाऽस्त्विति शङ्कते— न चेदमिति । इदं तत्त्वपदं सापेक्षमपि प्रधानमिति च न इत्यर्थः । तेन प्रकृते को लाभ इत्यत्राह—येनेति । येन—एवभङ्गीकारेण सापेक्षस्यापि

समास इति राजपुरुषः शोभन इतिवत् समस्यते; उत्तरपदार्थप्रधान-त्वात् षष्ठीतत्पुरुषस्य । ज्ञानमेवात्र प्रधानं, तत्त्वमुपसर्जनम्; अतश्च ऋद्धस्य राज्ञः पुरुष इतिवदसमास एव युक्तः ॥

ननु ज्ञानमपि प्रमाणादिसापेक्षं भवत्येव, तद्विषयं हि तदिति— न—त-त्त्वपदेनास्य निराकाङ्क्षीकृतत्वात्—, तत्त्वस्य ज्ञानमिति । तदि दानीं तत्त्वमेव सापेक्षं वर्तते—कस्य तत्त्वमिति । तस्मात्तत्त्वस्योपसर्जनस्य सतः सापेक्ष-त्वादसमास एव ॥

## अत्र केषाञ्चित्समाधानम्, तद्दूषणं च

इत्येवमभिशङ्कमानाः केचन—तत्त्वं च तत् ज्ञानं च इति कर्मधारयं व्याचचक्षिरे—तत्पुनरयुक्तम्—ज्ञानस्य स्वतस्तत्त्वातत्त्वविभागाभावात् । विष-यकृतो हि ज्ञानानां तथाभावोऽतथाभावो वा । तदेतत् तत्त्वविषयज्ञानं भवति, न स्वतस्तत्त्वस्वभावम् ॥

## स्वमतरीत्या समाससमर्थनम्

किं पुनरिदं तत्त्वं नाम ? सतोऽसतो वा वस्तुनः प्रमाणपरिनिश्चितस्व-रूपं शब्दप्रवृत्तिनिमित्तं तदित्युच्यते । तस्य भावस्तत्त्वमिति । तच्च ज्ञानेन निश्चीयते । तत् परिच्छिन्दत् ज्ञानं प्रधानस्य समासो भवत्येवेति । त-त्पुरुषश्चोत्तरपदार्थप्र । अत उत्तरपदार्थभूतपुरुषेऽन्वयतात्पर्येण तथा प्रयोगो युज्यते, न त्वप्रधानभूतपूर्वपदार्थान्वयतात्पर्येणेत्यर्थः । दृष्टान्तं स्वयं प्रदर्श्य समाधत्ते—राजपुरुष इति । पुरुषपदार्थे शोभनान्वयतात्पर्येण युक्तोऽयं प्र-योगः । राजनि विशेषणान्तरान्वयतात्पर्येण तु न युक्तः । यथा ऋद्धस्य राज्ञः पुरुषः इति बोधतात्पर्येण ऋद्धस्य राजपुरुष इति प्रयोगः इति भावः ॥
§ 133

तत्त्वमेव । अप्रधानभूतमिति शेषः ॥ § 134

तदेतदिति । तस्मात् एतत् तत्त्वज्ञानं तत्त्वविषयज्ञानमेव भवतीति घट्टकुट्यां प्रभातमित्यर्थः ॥ § 135

सत इत्यादि । तथा च भाष्यं, किं पुनस्तत्त्वम् ? सतश्च सद्भावः, असतश्चासद्भावः इति । परिच्छिन्द्यत्—विषयीकुर्वत्—निष्कर्षयदिति यावत् । ननु विषयपरिच्छेदकं चेत् ज्ञानं, तज्ज्ञानं केन परिच्छिद्येत ? यद्यन्येन, तर्ह्यनवस्था ।

तत्त्वज्ञानमित्युच्यते । ज्ञानस्यापि तद्रूपं ज्ञानान्तरपरिच्छेद्यमेव भवति । निर्णीततत्त्वाश्च प्रमाणादय इति व्यतिरेकनिर्देश एव युक्तः । न चासमासप्रसङ्गमात्रात् अन्यथा वर्णनमुचितम् । ईदृशानां समासानां सामर्थ्यानपायेन बहुशो दृष्टत्वात्—देवदत्तस्य गुरुकुलमिति । उपसर्जनं नोपसर्जनमिति न कारणमेतत् समासे । विग्रहवाक्यसमानार्थतया समासो भवति, सा चेह विद्यत एव । वैय्याकरणा अपि ईदृंशि पदानि समस्यन्त्येव । अथ शब्दानुशासनं, केषां शब्दानाम् ? लौकिकानां वैदिकानां च इति । तस्माद्यथाभाष्यमेव षष्ठीत्रयव्याख्यानमनवद्यम् ॥ यदि न केनापि, तर्हि विषयोऽपि तथैव भवतु । एवञ्च ज्ञानस्य विषयनैयत्याभावात् तस्य तत्त्वभावः स्वत एवेति तत्त्वविषयकमेव ज्ञानं तत्त्वज्ञानमिति न युक्तमिति शङ्कायामाह—ज्ञानस्यापीति । निराकरिष्यते निर्विषयकं ज्ञानं, परिहरिष्यते चानवस्था उत्तरत्रेति भावः । उपसर्जनमित्यादि । प्रधानमप्रधानं वेत्यर्थः । वैय्याकरणा अपीत्यादि । लौकिकानां वैदिकानां च शब्दानुशासनमिति खल्वन्वयो वक्तव्यः, अतः सति तात्पर्ये नैकदेशान्वयो दोष इत्यर्थः । यदि च केषां शब्दानामित्यत्रैव व्यस्तानुशासनपदान्तराध्याहारेण लौकिकानां वैदिकानामित्यादेः व्यस्ताभ्यां शब्दानां अनुशासनं इति पदाभ्यामन्वयान्नैष दोषः । उक्तं च तथा भाष्यप्रदीपे कैय्यटेन—उत्तरपदार्थान्तर्गतस्यापि पूर्वपदार्थस्य बुध्या प्रविभागात् प्रत्यवमर्शः इति चेत्; तर्हि किं तत्रैवाध्याहारः कर्तुं शक्यत इति विचारयतु भवान् । श्रुतानां शब्दानां गतिरस्माभिरुक्ता । अध्याहारस्तु सर्वत्र सुलभ इति भावः । अत्रेदमवधेयम्— प्रमाणादीनां तत्त्वानां ज्ञानादित्यत्र प्रमाणादीनां तत्त्वानामिति न समानाधिकरणे पदे; येन समासानुपपत्तिः स्यात्, परस्परं तयोरनन्वयश्च । किन्तु प्रमाणादिगतं यत् तत्त्वं याथात्म्यं, तस्य ज्ञानात् इत्यर्थो विवक्षितः । न हि यथा कथञ्चित् प्रमाणादिज्ञानं निःश्रेयसायालम्, किन्तु प्रमाणादिवस्तुयाथात्म्यज्ञानमेव । एवञ्च चैत्रस्य गुरुकुलं शरैः शातितपत्रोऽयं इत्यादाविव एकदेशान्वयो न दोषाय । समासघटकाप्रधानार्थेनाभेदान्वय एव विरुद्धः, ऋद्धस्य राजमातङ्गाः इत्यप्रयोगात् । न तु भेदसम्बन्धेनान्वयोऽपि । अतश्च प्रकृते न कोऽपि दोषः । एवं सामानाधिकरण्यभ्रमव्युदासायैव च भाष्यकारेण (?')प्रमाणादीनां तत्त्वस्य इत्येकवचनान्ततत्त्वपदं प्रयुक्तं इति । षष्ठीत्रयेति—प्रमाणीदीनां तत्त्वस्य

ननु षोडशपदार्थतत्त्वज्ञानस्य कथं निश्रेयसाधिगमहेतुत्वमिति वक्तव्यम् । वेदप्रामाण्यसिद्ध्यर्थं चेदं शास्त्रमिति तावन्मात्रमेव व्युत्पाद्यतां, किं षोडशपदार्थकन्थाग्रन्थनेन—उच्यते—

१. आत्मापवर्गपर्यन्तद्वादशविधप्रमेयज्ञानं तावत् अन्यज्ञानानौपयिकमेव साक्षादपवर्गसाधनमिति वक्ष्यामः । तत्त्वज्ञानान्मिथ्याज्ञाननिरासे सति तन्मूलः संसारो निवर्तत इति प्रमेयं तावदवश्योपादेयम् ॥

२. तस्य तु प्रमेयस्यात्मादेरपवर्गसाधनत्वाधिगम आगमैकनिबन्धनः ॥

तस्य प्रामाण्यनिर्णीतिरनुमाननिबन्धना ।
आप्तोक्तत्वं च तल्लिङ्गमविनाभावि वक्ष्यते ॥ २७ ॥ § 138

प्रतिबन्धग्रहे तस्य प्रत्यक्षमुपयुज्यते ।
कोऽन्यस्सन्तरणे हेतुरनवस्थामहोदधेः ॥ २८ ॥ § 140

आयुर्वेदादिवाक्येषु दृष्ट्वा प्रत्यक्षतः फलम् ।
वचः प्रमाणमाप्तोक्तमिति निर्णीयते यतः ॥ २९ ॥ § 142

उपमानं तु क्वचित् कर्मणि सोपयोगं—इत्येवं चतुष्प्रकारमपि प्रमाणं प्रमेयवदुपदेष्टव्यम् ॥ ज्ञानं, निःश्रेयसस्याधिगमः इति भाष्योक्तरीत्येति शेषः ॥ § 143

आत्मेति । यद्यपि प्रमाणान्येव प्रथमं उपादेयानि, अथापि प्रमाणानां प्रमेयसिद्ध्यर्थमेवोपादेयत्वेन प्रमेयशेषत्वात् प्रथमं प्रमेयमेवोपात्तम् ॥ § 144

अन्यज्ञानानौपयिकमेव—अद्वारकमेवेति यावत् ॥ § 145

तस्य—वेदस्य । अनुमाननिबन्धनेति । प्रामाण्यस्य परतस्त्वादिति शेषः । तल्लिङ्गं—प्रामाण्यलिङ्गम् । अविनाभावि—व्याप्तं, प्रामाण्यव्याप्तमित्यर्थः । कोऽन्य इत्यादि । परश्चतपरिक्षोदात् परस्तादपि वादिभिः । उपलम्भबले स्थेयम् इति ह्यभियुक्ताः । एवं उत्तरोत्तरोपजीव्यत्वेन शब्दानुमानप्रत्यक्षाणामुपादेयत्वेऽपि उपमानफलं किमित्यत्राह—क्वचिदिति । गवयालम्भादिचोदनार्थानुष्ठान इति ग्रन्थकार एव वक्ष्यति ॥ § 146

I.23/KSV

३. संशयादयस्तु पदार्था यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तोऽपि न्यायप्रवृत्तिहेतुत्वात् पृथगुपदिश्यन्ते । न्यायश्च वेदप्रामाण्यप्रतिष्ठापनपूर्वकत्वेन पुरुषार्थोपयोगित्वमुपयातीति दर्शितम् ॥ § 147

---

१२ ] तद्रूपं तत्— nyāma-wit__ka

१३ ] निर्णय— nyāma-wit__kha

६ ] शास्त्रमिति— nyāma-wit__kha

८ ] तावज्ज्ञाना— nyāma-wit__ka

१६ ] दृष्टं— nyāma-wit__ka

१७ ] निर्णीयतां— nyāma-wit__kha

१ ] प्रमेये— nyāma-wit__kha

तत्र नानुपलब्धेऽर्थे न निर्णीते प्रवर्तते ।
किन्तु संशयिते न्यायः, तदङ्गं तेन संशयः ॥ ३० ॥§ 149

४. प्रयोजनमनुद्दिश्य न च न्यायं प्रयुञ्जते ।
५. दृष्टान्तः पुनरेतस्य सम्बन्धग्रहणास्पदम् ॥ ३१ ॥§ 151
६. सिद्धान्तोऽपि धर्मिप्रापणेनाश्रयासिद्धितामपोद्धरत् न्यायं प्रवर्तयति ॥

§ 152

ननु संशयपदेन न्यायविषयं सन्दिग्धं धर्मिणमभिदधता आश्रयासिद्धिरपोद्धृतैव—सत्यम्—क्वचित्तु विषये संशयमन्तरेणापि न्यायप्रवृत्तिर्दर्शयिष्यत इति संशयितैकविषयन्यायनियमाभावात् सिद्धान्तोऽपि वक्तव्यः ॥ § 153

७. न्यायाभिधानेऽवयवाः परं प्रत्युपयोगिनः ।
परार्थमनुमानं च तदाहुर्न्यायवादिनः ॥ ३२ ॥§ 155

यथासंभवमिति । तत्र संशयस्य बुद्धौ, प्रयोजनस्य फले, दृष्टान्तस्य यथायथमात्मादिषु, क्वचित् प्रमाणेष्वपि, सिद्धान्तस्यापि तथैव, अवयवस्य शब्दप्रमाणे, तर्कनिर्णययोः बुद्धौ, वादजल्पवितण्डानां शब्दे, हेत्वाभासानां यथासंभवं, छलजात्योः शब्दे, निग्रहस्थानानां यथासंभवं चान्तर्भावः । तथा च पदार्थो द्विविधः, प्रमाणं प्रमेयं चेति । अतः इतरेषां पृथक् ग्रहणमयुक्तमित्याक्षेपाशयः । सत्यम्; फलविशेषाभिप्रायेण पृथक्कथनमिति समाधानाशयः ॥ § 156

तत्रेत्यादि । सर्वथा अगृहीते, निर्णीते चार्थे न्यायः न प्रवर्तते, किन्तु संशयित एवार्थे न्यायः प्रवर्तते । तेन हेतुना संशयः तदङ्गं—न्यायाङ्गम् ॥

§ 157

सिद्धान्तस्य पृथक् निर्देशमाक्षिपति—नन्विति । क्वचिदिति । श्रोत्रियोऽपि सन् श्रुत्युक्तार्थदार्ढ्याय विचारे प्रवर्तत एव । न हि तस्य श्रुत्युक्तार्थे संशयोऽस्तीति वक्ष्यते ॥ § 158

न्यायाभिधान इति । न्यायाभिधाने प्रसक्त इति यावत् ॥ § 159

I.24/KSV

ननु प्रतिज्ञोदाहरणाभ्यां तदभिधेयौ सिद्धान्तदृष्टान्तौ गम्येते एव; किं पृथगुपादानेन ?—न—यद्येवं हेत्वाख्येनावयवेन तदभिधेयसिद्धेरनुमानमपि पृथक् न वक्तव्यं स्यात् । एवं भवतु किं नश्छिन्नम्—मैवम्—अभिधेये न्याये निरूपणीये तदभिधायिनामवयवानामवसर इति तदर्थः पृथक् प्रतिपादनार्हो भवति । इतरथा अवयवमात्रोपदेश एव शास्त्रं समाप्येत ॥

§ 160

८ ] धर्म— nyāma-wit__kha
२ ] यद्येवं— nyāma-wit__kha
४--५ ] प्रथमं व्युत्पादनार्हो— nyāma-wit__kha

८. तर्कः—संशयविज्ञानविषयीकृततुल्यकल्पपक्षद्वयेऽन्यतरपक्षशैथिल्यसमुत्पादनेन तदितरपक्षविषयं प्रमाणं अक्लेशसंपद्यमानप्रतिपक्षव्युदासमनुगृह्णाति मार्गशुद्धिमादधान इति पृथगुपदिश्यते । § 161

प्रतिज्ञोदाहरणाभ्यां सिद्धान्तदृष्टान्तावित्यत्र यथासङ्ख्यमन्वयः । तदभिधेयसिद्धेरिति । व्याप्तस्यैव हेतुत्वादिति भावः । इष्टापत्तिरेव तत्रास्माकमित्याह— एवं भवत्विति । न्याये निरूपणीये—न्याये निरूपणीयत्वेन प्राप्ते तदानीमवयवाः प्रयोक्तव्याः; सिद्धान्ताद्यधीनप्रवृत्तिकत्वाच्च न्यायस्य सिद्धान्तादयः पृथग्वक्तव्या इत्यर्थः । तदभिधायिनां— तत्प्रतिपादकानाम् । पृथक्प्रतिपादनार्ह इत्यस्य प्रतिज्ञादिरिति शेषः । अवयवमात्रोपदेश इति । सर्वस्यापि शास्त्रार्थस्य न्यायवाक्य एव परिसमाप्तत्वादिति भावः ॥ § 162

अक्लेशसंपद्यमानप्रतिपक्षव्युदासं इति क्रियाविशेषणं विधेयविशेषणं वा । मार्गशुद्धिमिति । प्रतिबन्धादिनिरसने प्रमाणप्रवृत्तिं सुलभां करोति तर्क इत्यर्थः । यथा—आत्मा नित्यः ? उतानित्यः ? इति संशये प्रजापतिः प्रजा असृजत न जायते म्रियते वा इत्याद्यागमानामुभयपक्षानुगुण्यादागमेनाप्यनिर्णये, हेतोरनुपलंभेनानुमानस्याप्यप्रवृत्तौ, प्रत्यक्षस्य सुतरामप्रवृत्तौ च तर्क एव प्रमाणं प्रवर्तयति—यद्यात्माऽनित्यः स्यात् तर्हि कृतहानाकृताभ्यागमप्रसङ्गः, यदि नित्यः तर्हि स्वकृतं स्वयमुपभुञ्जयादिति तर्कानुगृहीतमनुमानं—आत्मा नित्यः विचित्रनियतफलभोक्तृत्वात्—इत्येवंविधं प्रवर्तते । तर्काननुगृहीतं तु दुर्बलमेव । अतश्च तर्कः स्वयं प्रमाणमभवदपि प्रमाणानुग्राहकः ।

स चाशयशुद्धिमुपदर्शयितुं वादे प्रयोक्ष्यते ॥

९. अन्यतराधिकरणनिर्णयमन्तरेण न पर्यवस्यति न्याय इति न्यायोपरमकारणत्वेन तस्य प्रवर्तको निर्णयः । इतरथा निरवसानमनासादितफलं को नाम न्यायमारभेत ॥

### तत्त्वज्ञानपदेन न निर्णयलाभः

ननु तत्त्वज्ञानपदेन गतार्थत्वान्न पृथक् वक्तव्यो निर्णयः । निर्णयो हि तत्त्वज्ञानमेव—अस्त्येतत्—किन्तु षोडशपदार्थतत्त्वज्ञानं प्रमाणान्तरकरणकमपि भवति । न तस्य न्यायोपरमहेतुत्वम् । एष तु साधनदूषणसरणिक्षोदजन्मा निर्णयः तदुपरमहेतुः पृथगुपादानमन्तरेण न लभ्यते ॥ ननु यदि न तर्कः स्वतन्त्रं प्रमाणं तर्हि प्रमाणतर्कसाधनोपालंभः इति वादलक्षणे कथं विशेषणदानम् । प्रमाणैः तर्कैश्च स्वपक्षसाधनं परपक्षोपालंभश्चेति खलु तदर्थः । अतश्च तर्कोऽपि स्वतन्त्रं प्रमाणमेवेति चेत् तत्राह— स चेति । विषयशुद्ध्यर्थमेव तर्कापेक्षा । न तु स स्वतन्त्रं प्रमाणम् । प्राधान्यात्तु तस्यापि सहपाठः । यदि तर्कोऽपि प्रमाणं, तर्हि सूत्रकारः प्रमाणं तर्कश्च कथं पृथक् निर्दिशेत् । अतः वादेऽपि विषयशुद्ध्यर्थमेव तर्कः । वादसूत्रवार्तिकेऽप्ययमर्थः

स्पष्टीकृतः उद्योतकारेण ॥ § 163

अन्यतराधिकरणनिर्णयं—अन्यतरसिद्धान्तनिर्णयम् । तस्य—न्यायस्य ॥ § 164

प्रमाणान्तरकरणकं—आप्तवाक्यजन्यम् । श्रुत्यादिवाक्यैरपि तत्त्वज्ञानं जातमेव, तद्दार्ढ्याय खलु न्यायमपेक्षते पुरुष इति न्यायेनैवाविकम्प्यो निर्णयो भवितुमर्हति । उक्तं च आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इति । तदुपरमहेतुः—न्यायोपरमहेतुः । पदार्थतत्त्वज्ञानात् पदार्थतत्त्वनिर्णयः किञ्चिद्विशिष्यत इति पृथङ्निर्देश आवश्यक इत्यर्थः ॥ § 165

I.26/KSV

## अनुमानपदेनापि न निर्णयलाभः

ननु अनुमानपदादेष तर्हि यथाभिलषितो लप्स्यते निर्णयः । प्रतिबद्धाल्लिङ्गाल्लिङ्गिनि ज्ञानमनुमानं; स एव च निर्णयः— तदयुक्तम्—अनुमानफलं निर्णयः, नानुमानम् । करणस्य प्रमाणत्वान्निर्णयोपादानमन्तरेण तदनुमानमफलमपर्यवसितं स्यात् ॥ § 166

## तत्त्वज्ञानानुमानपदाभ्यामपि न निर्णयलाभः

उभाभ्यां तर्हि तत्त्वज्ञानानुमानपदाभ्यां अयमाक्षेप्स्यते निर्णयः; अनुमानस्य तत्त्वज्ञानान्तत्वात्—न—निर्णयोपादानाद्विना तदन्तत्वासिद्धेः; लिङ्गाभाससमुत्थतत्त्वज्ञानाभाससम्भवात् ॥ § 167

## तत्त्वज्ञानानुमानसंशयपदैरपि न निर्णयलाभः

ननु संशयपूर्वकत्वादनुमानस्य सामर्थ्यात् निर्णयान्ततैव भविष्यति इति संशयानुमानतत्त्वज्ञानपदैर्गतार्थो निर्णयः— मैवम्—संशयपूर्वकत्वेऽप्यनुमानस्य तदाभासोपजनितनिर्णयाभाससम्भवात् ॥ § 168

नैष नियमः—संशयपूर्वकमनुमानमिति । तस्मादनुमानस्य विशिष्टनिर्णयावसानत्वलाभाय निर्णयपदमुपादेयमित्यलं प्रसङ्गेन ॥ § 169

---

२७ ] प्रयोक्ष्यत इति— nyāma-wit__kha

२८ ] मन्तरेण न पर्यवस्यति न्यायो— nyāma-wit__kha ; मन्तरेण पर्यवस्यति न्याय इति न्यायो— nyāma-wit__ka

१६ ] लषतो— nyāma-wit__ka

१६--१७ ] निर्णयः— nyāma-wit__kha

१९ ] फल— nyāma-wit__ka

४--५ ] निर्णया— nyāma-wit__ka

अनुमानफलमिति । अनुमितिर्हि अनुमानफलं । अनुमितिरेव निर्णयरूपः, प्रत्यक्षानुमित्युपमितिशाब्दज्ञानानामेव निर्णयपदार्थत्वादिति ॥ § 170

गतार्थो निर्णय इति । संशयानन्तरं तर्कादिजन्मा हि निर्णयः न ह्याभासरूपः स्यादित्यभिमानः । तादृशमभिमानमेवापनुदति—मैवमिति ॥ § 171

तदाभासः—अनुमानाभासः; व्याप्तिभ्रम इति यावत् ॥ § 172

नैष नियम इति । श्रोतव्यो मन्तव्यः इत्युक्तश्रवणानन्तरभाविमननस्यानुमानात्मकस्य संशयपूर्वकत्वाभावादित्यर्थः । विशिष्टेति । उक्ततत्त्वज्ञानविलक्षणेत्यर्थः ॥ § 173

I.27/KSV

१०. वादे तु विचार्यमाणो न्यायः संशयच्छेदनेनाध्यवसितावबोधं अध्यवसिताभ्यनुज्ञां च विदधत् तत्त्वपरिशुद्धिमादधातीति वीतरागैः शिष्यसब्रह्मचारिभिस्सह वादः प्रयोक्तव्यः ॥ § 174

११-१२. जल्पवितण्डे तु दुष्टतार्किकोपरचितकपटदूषणाडम्बरसन्त्रास्यमानसरलमतिसमाश्वासनेन तद्धृदयस्थतत्त्वज्ञानसंरक्षणाय क्वचिदवसरे वीतरागस्याप्युपयुज्येते इति वक्ष्यामः ॥ § 175

१३. हेत्वाभासाः सम्यङ्न्यायप्रविवेकोपकारद्वारेण तदुपयोगिनः । हेत्वाभासस्वरूपावधारणे हि सति तद्विलक्षणतया हेतवस्सुखमवगम्यन्ते ॥ § 176

नन्वत्र विपर्ययो दृश्यते; हेत्ववगमे सति तदितरहेत्वाभासव्यवस्थापनात्—सत्यमेवम्—तथाऽपि प्रयोक्तुं परिहर्तुं च द्वयमपि ज्ञेयम् । हेतवः प्रयुज्यन्ते, हेत्वाभासाश्च परिह्रियन्त इति ॥ § 177

यच्च निग्रहस्थानपरिगणिता अपि हेत्वाभासाः पुनरुपदिश्यन्ते, तत् वादे चोदनीया भविष्यन्तीत्याशयेन ॥ § 178

वादस्य स्वरूपं तदावश्यकतोपपादनद्वारा संक्षिप्य कथयति—वादे त्विति । अध्यवसितावबोधं—अध्यवसितरूपं अवबोधं—संशयोत्तरतत्त्वनिर्णयमिति यावत् । अध्यवसिताभ्यनुज्ञां—पूर्वमवगतार्थसंवादम् । चकारो वाऽर्थे ॥ § 179

ननु वादस्य कथञ्चिद्वीतरागैः परिग्रहेऽपि विजिगीषुकथारूपस्य जल्पस्य, स्वपक्षस्थापनाहीनपरपक्षदूषणरूपवितण्डायाश्च कथं वीतरागपरिग्राह्यत्वमित्यत्राह—जल्पवितण्डे त्विति । तथोक्तं—तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् ४-२-५० इति । तद्धृदयस्थेति । सरलमतिहृदयस्थेत्यर्थः । § 180

१४ ] विचार्यमाणे— nyāma-wit__kha
१४ ] मध्य— nyāma-wit__ka
१५ ] भ्यनुज्ञातं— nyāma-wit__kha
१९ ] युज्यन्ते— nyāma-wit__kha
२४ ] प्रयोक्तुं च— nyāma-wit__kha

तदुपयोगिनः—सम्यङ्न्यायोपयोगिनः, तत्त्वज्ञानोपयोगिनो वा ॥ § 181
हेतवः—सद्धेतवः । चोदनीयाः—उद्भावनीयाः ॥ § 182
I.28/KSV

१४-१६. छलजातिनिग्रहस्थानानि जल्पवितण्डोपकरणानि । तेषामवधृतस्वरूपाणां स्ववाक्ये परिवर्जनं, क्वचिदवसरे प्रयोगः, परप्रयुक्तानां च प्रतिसमाधानं, इत्यादि शक्यक्रियम् । अतस्तान्यपि जल्पवितण्डाङ्गत्वात् ज्ञातव्यानीति पृथगुपदिश्यन्ते ॥

दुश्शिक्षितकुतर्कांशलेशवाचालिताननाः ।
शक्याः किमन्यथा जेतुं वितण्डाटोपपण्डिताः ॥ ३३ ॥§ 185

गतानुगतिको लोकः कुमार्गं तत्प्रतारितः ।
मा गादिति छलादीनि प्राह कारुणिको मुनिः ॥ ३४ ॥§ 187

तदेवमुपदेष्टव्याः पदार्थाः संशयादयः ।
तन्मूलन्यायनिर्णयवेदप्रामाण्यसिद्धये ॥ ३५ ॥§ 189

तेनागमप्रमाणत्वद्वाराऽखिलफलप्रदा ।
इयमान्वीक्षिकी विद्या विद्यास्थानेषु गण्यते ॥ ३६ ॥§ 191

आह च भाष्यकारः— § 192

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयस्सर्वधर्माणां विद्योद्देशे परीक्षिता ॥§ 194

जल्पवितण्डोपकरणानि—जल्पवितण्डयोरुपकरणानि । क्वचिदिति । स चावसरः दुष्टतार्किक इत्यादिना अनुपदमेवोक्तः । जल्पवितण्डयोरावश्यकतामुपपादयति—दुश्शिक्षितेत्यादि । सुशिक्षित इतिवत् दुश्शिक्षित इति । दुश्शिक्षितानां कुतार्किकानां—ये कुतर्कांशलेशाः, तैः वाचालितानि वाचालो बहुगर्हवाक्, आननानि येषां तादृशाः वितण्डाटोपपण्डिताः अन्यथा— जल्पवितण्डे विना जेतुं शक्याः किम् ? न कथञ्चिदपीत्यर्थः । तत्प्रतारितः—वितण्डाटोपपण्डितवञ्चितः । तेनेत्यादि । सर्वपुरुषार्थरत्नाकरे वेदे प्रामाण्यस्थापनात् इयमपि विद्या अखिलपुरुषार्थसाधनमिति भावः ॥ § 195

१७ ] संविदे— nyāma-wit__kha

प्रदीप इत्यादि । प्रमाणमेव खलु परीक्षकाणां चक्षुः । प्रमाणशास्त्रं चेदं सर्वविद्यानां भवति प्रदीपतुल्यम् । एवं अहरहःप्रवृत्तीनां सर्वासामपि अनुमानमूलत्वात् सर्वकर्मणामुपायः । भोजनादावपि हि ह्योदृष्टेष्टसाधनत्व-निश्चयात्प्रवर्तन्ते सर्वे । अत एव सर्वधर्माणां आश्रयः—आधारः—

इत्येष षोडशपदार्थनिबन्धनेन
निःश्रेयसस्य मुनिना निरदेशि पन्थाः ।
अन्यस्तु सन्नपि पदार्थगणोऽपवर्ग-
मार्गोपयोगविरहादिह नोपदिष्टः ॥ ३७ ॥§ 200

**इति उद्देशसूत्रविवरणम्**

**त्रेधा शास्त्रं प्रवर्तते**

त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः—उद्देशः, लक्षणं, परीक्षा चेति । नामधेयेन पदार्थाभिधानमुद्देशः । उद्दिष्टस्य तत्त्वव्यवस्थापको धर्मो लक्षणम् । लक्षितस्य तल्लक्षणमुपपद्यते न वेति विचारः परीक्षा ॥

**चतुर्थोऽपि प्रकारोऽत्रैवान्तर्भवति**

ननु च विभागलक्षणा चतुर्थ्यपि प्रवृत्तिरस्त्येव । भेदवत्सु प्रमाण-सिद्धान्तच्छलादिषु तथा व्यवहारात्—सत्यम्—प्रथमसूत्रोद्दिष्टे भेदवति पदार्थे भवत्येव विभागः; उद्देशरूपानपायात्तु उद्देश एवासौ । सामान्यसंज्ञया कीर्तनमुद्देशः, प्रकारभेदसंज्ञया कीर्तनं विभाग इति । तथा चोद्देशतयैव तत्र तत्र भाष्यकारो व्यवहरति अयथार्थः प्रमाणोद्देशः—इत्याक्षेपे—तस्माद्यथार्थ एव प्रमाणोद्देशः इति समाधानमभिदधानः । तस्मात् त्रिविधैव प्रवृत्तिः ॥ सन्न्यायव्युत्पादनात् । तथोक्तं—आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इति । अत इयं आन्वीक्षिकी विद्यास्थानेषु गण्यत इति । प्रकीर्तिता इति प्रायः पाठः । व्याख्याभेदास्तु वार्तिक-टीकादिषु द्रष्टव्याः ॥ § 201

अन्यः—द्रव्यगुणकर्मादिः ॥ § 202

सत्यमित्यादि । अयं भावः—सावान्तरभेदो हि पदार्थ उद्देशसूत्रे उद्दिष्टः । अतः उद्देशे विभागोऽप्यन्तर्भूत एव । किञ्च निर्विशेषं न सामान्यमिति न्यायात् भेदवानेव पदार्थो निर्दिश्यते । तदेवोपपादयति—सामान्येत्यादि । विभागस्याप्युद्देशरूपत्वे भाष्यसम्मतिमाह—तथा चेति । अयथार्थ इत्यादि ।

**उद्देशादीनां क्रमः**

तत्रोद्देशः प्रथममवश्यं कर्तव्यः । अनुद्दिष्टस्य लक्षणपरीक्षानुपपत्तेः ।

---

१५ ] परीक्षेति— nyāma-wit_kha

१५--१६ ] नामधेय— nyāma-wit_ka

१९ ] भवत्येव— nyāma-wit_ka

२० ] पदिष्टे— nyāma-wit_kha

सामान्यविशेषलक्षणयोरपि, पौर्वापर्यनियमोऽस्त्येव । अलक्षिते सामान्ये विशेषलक्षणावसराभावात् । परीक्षा तु लक्षणोत्तरकालभाविनीति तत्स्वरूपनिरूपणादेव गम्यते । विभागसामान्यलक्षणयोस्तु नास्ति पौर्वापर्यनियमः । पूर्वं वा सामान्यलक्षणं ततो विभागः, पूर्वं वा विभागः ततस्सामान्यलक्षणमुच्यत इति । तदिहोद्देशस्तावद्व्याख्यातः । अस्माभिस्तु लक्षणसूत्राण्येव व्याख्यास्यन्ते । परीक्षासूत्रसूचितं तु वस्तु सोपयोगलक्षणवर्णनावसर एव यथाबुद्धि दर्शयिष्यते; न पृथक् परीक्षासूत्रविवरणश्रमः करिष्यते । अत एव प्रथमसूत्रानन्तरं दुःखजन्म— इत्यादिद्वितीयसूत्रं लक्षणानौपयिकत्वान्नेह विवृतम् । अपवर्गपरीक्षाशेषभूतत्वात्तु तदवसर एव निर्णयिष्यते ॥ द्वितीयाध्यायद्वितीयाह्निकोपक्रमभाष्यमिदम् । अयमर्थः—न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात् इतिसूत्रमवतारयति भाष्यकारः— अयथार्थ इति । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति निर्देशो न युक्तः, ऐतिह्यादीनां प्रमाणानां बहूनां सत्त्वात् । अतः पूर्वमुक्तः प्रमाणोद्देशः अयथार्थः—न वस्तुस्थित्यनुगुण इति भाष्यस्यार्थः । एवमाक्षेपे कॢप्तेष्वेव तेषामन्तर्भावमुक्त्वा उपसंहरति भाष्यकारः—तस्मादिति । अत्र बहूनां प्रमाणानां सत्त्वात् चत्वारि प्रमाणानीति विभागो न युक्त इति वक्तव्ये प्रमाणोद्देशः इति कथनेन, उपसंहारेऽपि तथैव कथनेन च विभागोऽप्युद्देशविशेष एवेति भाष्यकाराशयः स्पष्ट इति भावः ॥ § 203

नास्तीत्यादि । आद्यस्योदाहरणं—आप्तोपदेशः शब्दः स द्विविधो दृष्टादृष्टार्थत्वात् इत्यादि । द्वितीयस्योदाहरणं—प्रत्युक्षानुमानोपमानशब्दाः प्रमाणानि इति । अनेन सूत्रेण विभागे प्रतिपादिते सामान्यलक्षणजिज्ञासायां प्रमाणपदावृत्त्या तत्पदं प्रमाणसामान्यपरं व्याख्यातं भाष्ये ॥ § 204

अस्माभिस्त्वित्यादि । अत एवोक्तमुपक्रमे—तदेकदेशलेशे तु कृतोऽयं विवृतिश्रमः इति । निर्णयिष्यते—णयधोतो रूपमिदम् ॥ § 205

I.31/KSV

प्रमाणसामान्यलक्षणविभागसूत्रं त्ववसरप्राप्तत्वादिदानीमेव विव्रियते— § 206

## प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ १-१-३ ॥ § 207

### प्रमाणसामान्यस्वरूपलक्षणाक्षेपः

अत्रेदं तावद्विचार्यते—किं प्रमाणं नाम ? किमस्य स्वरूपम् ? किं वा लक्षणमिति ? ततः सूत्रं योजयिष्यते ॥ § 208

६ ] परीक्षा— nyāma-wit_ka
८ ] पूर्वं— nyāma-wit_ka
१२ ] प्रथम— nyāma-wit_kha
२१ ] लक्षणं— nyāma-wit_kha
२१ ] सूत्रे— nyāma-wit_kha

## प्रमाणस्वरूपलक्षणकथनम्

तदुच्यते—अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम् । बोधाबोधस्वभावा सामग्री हि तस्य स्वरूपम् । अव्यभिचारादिविशेषणार्थोपलब्धिसाधनत्वं लक्षणम् ॥ § 209

## सामग्रयाः प्रमाणत्वाक्षेपः

ननु च प्रमीयते येन, तत् प्रमाणमिति करणसाधनोऽयं प्रमाणशब्दः । करणं च साधकतमम् । तमबर्थश्चातिशयः । स चापेक्षिकः । साधकान्तरसंभवे हि तदपेक्षयाऽतिशययोगात् किञ्चित्साधकतममुच्यते । सामग्र्याश्चैकत्वात् तदतिरिक्तसाधकान्तरानुपलम्भात् किमपेक्षमस्या अतिशयं ब्रूमः ॥ § 210

प्रमाणेत्यादि । सामान्यलक्षणं विभागं च प्रतिपादयत् सूत्रमित्यर्थः ॥ § 211

अव्यभिचारिणीमित्यादि । अव्यभिचारिणीमिति भ्रमव्यावृत्त्यर्थम् । असन्दिग्धामिति संशयव्यावृत्त्यर्थम् । अर्थोपलब्धिं विदधतीति घटादिव्यावृत्त्यर्थम् । बोधाबोधस्वभावेति । अबोधरूपं हीन्द्रियं प्रत्यक्षे करणम् । बोधरूपाणि हि अनुमानोपमानशब्दज्ञानानि अनुमित्युपमितिशाब्देषु यथासंख्यं करणानि । उक्तवाक्यं विवेचयति—बोधेत्यादि ॥ § 212

सामग्री प्रमाणम् इत्युक्तिमाक्षिपति—नन्विति । सामग्र्याश्चैकत्वादिति । निखिलकारकसमुदायस्यैव सामग्रीपदार्थत्वात् तदतिरिक्तस्य

अपि च कस्मिन् विषये सामग्र्याः प्रमाणत्वम् ? प्रमीयमाणो हि कर्मभूतो विषयः सामग्र्यन्तर्भूतत्वात् सामग्र्येवेति करणतामेव यायात् । निरालम्बनाश्चेदानीं सर्वप्रमितयो भवेयुः, आलम्बनकारकस्य चक्षुरादिवत् प्रमाणान्तःपातित्वात् ॥

कश्च सामग्र्या प्रमेयं प्रमिमीते ? प्रमाताऽपि तस्यामेव लीनः । एवञ्च यदुच्यते प्रमाता प्रमाणं प्रमेयं प्रमितिरिति चतसृषु विधासु तत्त्वं परिसमाप्यते इति, तद्व्याहन्यते । न च लोकोपि सामग्र्याः करणभावमनुमन्यते तस्यां करणविभक्तिमप्रयुञ्जानः । न ह्येवं वक्तारो भवन्ति लौकिकाः, सामग्र्या पश्याम इति; किन्तु दीपेन पश्यामः, चक्षुषा निरीक्षामह इत्याचक्षते । तस्मान्न सामग्री कारणम्, अकारणत्वाच्च न प्रमाणमिति नेदं साधु प्रमाणस्वरूपम् ॥

## सामग्र्याः करणत्वसिद्धान्तः

अत्रोच्यते—यत एव साधकतमं करणं, करणसाधनश्च प्रमाणशब्दः, तत एव सामग्र्याः प्रमाणत्वं युक्तम्; तद्व्यतिरेकेण कारकान्तरे क्वचिदपि

---

४ ] हि— nyāma-wit_kha

९ ] मस्याति— nyāma-wit_ka

तमबर्थसंस्पर्शानुपपत्तेः । अनेककारकसन्निधाने तत्कारणत्वप्रसक्तेरेवाभावे न ह्यतिशय उपपादयितुं शक्येत । विदुषोर्हि द्वयोः कश्चनातिशेते, न तु विद्वदविदुषोः । प्रत्येकं तु कारणानां साधकत्वमेव नास्ति इति भावः ॥
§ 213

निरालम्बना इति । कर्मकारकस्यापि सामग्रीगोष्ठीनिविष्टत्वेन सामग्र्याः करणत्वे कर्मणोऽपि करणत्वप्राप्त्या कथं ज्ञानं करणविषयकं स्यादिति ज्ञानं निरालम्बनं प्रसज्येतेत्यर्थः ॥ § 214

तस्यामेव—सामग्र्यामेव । तथा च प्रमातुरपि करणत्वमेव, न तु कर्तृत्वमिति भावः । यदुच्यत इति । उपोद्घातभाष्यार्थानुवादोऽयम् । अथ प्रतीतिविरोधमप्याह—न च लोकोऽपीति । अकारणत्वादिति । कारणत्वस्यैवाभावे किमुत करणत्वमिति भावः । करणं, अकरणत्वादित्येव वा पाठः ॥ § 215

तद्व्यतिरेकेण—सामग्रीव्यतिरेकेण । कारकान्तरे—प्रत्येकं कारके । अतिशयपदार्थं विवृण्वन् सामग्र्या एव साधकतमत्वमुपपादयति—अनेकेति । निखिलेत्यर्थः । यस्मिन् सति कार्यं निष्पद्यते, यस्मिन्नसति न, तदेव साधकतमं भवति । प्रत्येकं कारकाणां सत्वेऽपि कार्यं न हि निष्पद्यते ।

कार्यं घटमानं अन्यतरव्यपगमे च विघटमानं कस्मै अतिशयं प्रथच्छेत् ? न चातिशयः कार्यजन्मनि कस्यचिदवधार्यते, सर्वेषां तत्र व्याप्रियमाणत्वात् ॥

सन्निपत्त्यजनकत्वमतिशय इति चेन्न—आरादुपकारकाणामपि कारकत्वानपायात् । ज्ञाने च जन्ये किमसन्निपत्यजनकम् ? सर्वेषामिन्द्रियमनोऽर्थादीनामितरेतरसंसर्गे सति ज्ञाननिष्पत्तेः ॥

अथ सहसैव कार्यजननमतिशयः; सोऽपि कस्याश्चिदवस्थायां करणस्येव कर्मणोऽपि शक्यते वक्तुं—यथा अविरलजलधरधाराप्रबन्धबद्धान्धकारनिवहे बहुलनिशीथे सहसैव स्फुरता विद्युल्लताऽऽलोकेन कामिनीज्ञानमादधानेन तज्जन्मनि सातिशयत्वमवाप्यते, एवमितरकारककदम्बसन्निधाने सत्यपि सीमन्तिनीमन्तरेण तद्दर्शनं न संपद्यते, आगतमात्रायामेव तस्यां भवतीति तदपि कर्मकारकमतिशययोगित्वात् करणं स्यात् ॥ कारकाणां समग्रभावे च निष्पद्यते कार्यम्, अतः कारकसाकल्यापरपर्यायसामग्र्येव करणमिति युक्तम् । प्रत्येकं कारकाणि कारणानि, तत्समुदायश्च करणमिति तु सारम् । कस्मा इति । सकलकारणसमवायान्तराऽन्यस्मै कस्मै इत्यर्थः । कस्यचिदिति । प्रत्येकं तु केनापि कारणेन कार्यं न जन्यते, सर्वमेलने सति जन्यते; तदा अतिशयः प्रत्येकं किंनिष्ठ इति न हि निर्णेतुं शक्यत इत्यर्थः ॥ § 216

२१ ] न्तरीभूतत्वात्— nyāma-wit__kha
२२ ] गमे— nyāma-wit__ka
२४ ] सामग्रमाः— nyāma-wit__ka
३१ ] मितरेतर— nyāma-wit__ka

सन्निपत्त्य—व्यापारोपरि भारं निधाय, व्यवधानेनेति यावत् । आरादुपकारकाणां—अद्वारकारणानाम् । अवान्तरापूर्वद्वारा परमापूर्वफलकं हि प्रोक्षणादि सन्निपत्योपकारकं, साक्षात्परमापूर्वफलकं च प्रयाजादि आरादुपकारकम् । अयं भावः—व्यापारवत्कारणस्यैव करणत्वात् व्यापाररूपातिशय एव तमबर्थः इति न युक्तम्; कारकत्वं हि क्रियावेशमन्तरा न संभवतीति सर्वत्रेदं समानम् । चक्रभ्रमणादीनां तु व्यापाराणां साक्षात् घटादिजनकानामपि कारकत्वमविशिष्टमिति व्यापारावेशमादाय वैलक्षण्यं दुर्वचमेवेति । ज्ञाने तु सुतरां तद्दुर्वचं वैलक्षण्यमित्याह—ज्ञाने चेति । इतरेतरेति । संयोगरूपव्यापारस्य द्विनिष्ठत्वेन इन्द्रियमेव करणं, घटादि च कर्म इति नियमासंभव इति भावः ॥ § 217

करणस्य—करणत्वेन त्वत्सम्मतस्य । आदधानेनेति । विद्युल्लता लोकेनेत्यस्येदं विशेषणम् । तज्जन्मनि—कामिनीप्रत्यक्षोत्पत्तौ ॥ § 218

I.34/KSV

तस्मात् फलोत्पादाविनाभाविस्वभावत्वमवश्यतया कार्यजनकत्वमतिशयः । स च सामग्र्यन्तर्गतस्य न कस्यचिदेकस्य कारकस्य कथयितुं पार्यते । सामग्र्यास्तु सोऽतिशयः सुवचः । सन्निहिता चेत् सामग्री संपन्नमेव फलमिति सैवातिशयवती ॥ § 219

### प्रमातृप्रमेययोः साधकतमत्वाभावान्न करणत्वम्

ननु मुख्ययोः प्रमातृप्रमेययोरपि तदविनाभावित्वमतिशयोऽस्त्येव, प्रमितिसम्बन्धमन्तरेण तयोस्तथात्वाभावात् । प्रमिणोतीति प्रमाता भवति, प्रमीयत इति च प्रमेयम्—सत्यमेतत्—किन्तु साकल्यप्रसादलब्धप्रमितिसम्बन्धनिबन्धनः प्रमातृप्रमेययोर्मुख्यस्वरूपलाभः । साकल्यापचये प्रमित्यभावात् गौणे प्रमातृप्रमेये संपद्येते । एवञ्च साकल्यमन्तरेण यदि प्रमितिरवकल्पेत भवेद्व्यभिचारः, न त्वसौ तथा दृश्यते इति प्रमित्यव्यभिचारात् साकल्यमेव सातिशयमिति तमवर्थयोगात् तदेव करणम् ॥ § 220

निष्कृष्टमतिशयस्वरूपं प्रदर्शयति—फलोत्पादेति । फलोत्पादाविनाभाविस्वभावत्वं यत् अवश्यतया कार्यजनकत्वं, तदेवातिशय इत्यर्थः । एकस्य कारकस्येति । एकस्यैव कारकस्येत्यर्थः । सैवातिशयवतीति । सामग्र्या एव फलोत्पादाविनाभाविस्वभावत्वादित्यर्थः ॥ § 221

तदविनाभावित्वमिति । प्रमितिरूपफलाविनाभावित्वमित्यर्थः । प्रमातुः प्रमातृत्वं, प्रमेयस्य प्रमेयत्वं च प्रमितिसम्बन्धनिबन्धनमेवेत्येतदुपपादयति—प्रमिणोतीतीति । तथा च प्रमातृप्रमेययोरपि साधकतमत्वात् करणत्वमापन्नमिति प्रमाणप्रमेयादिविभागः कथमित्यर्थः । साकल्यस्य— सामग्र्याः प्र-

२२ ] प्रमाता— nyāma-wit__ka nyāma-wit__kha
२५--२७ ] प्रमितितमवर्थयोगात्—

सादात्—सामर्थ्यात् लब्धेत्यर्थः । गौणे इति । प्रमित्याश्रयः प्रमातृपदस्य मुख्यार्थः । यदा च प्रमितिरेव नोत्पन्ना तदा प्रमित्याश्रयत्वम् आत्मनो न संभवति; यथा सुषुप्त्यादौ । तत्र च भूतपूर्वगत्याद्याश्रयणेन प्रमातृत्वं गौणमेव वक्तव्यम्, अपचत्यपि देवदत्ते पाचकोऽयम् इत्यादिवदिति ॥ § 222

I.35/KSV

## सामग्र्याः साधकतमत्वोपपादनम्

यत्तु किमपेक्षं सामग्र्याः करणत्वमिति—तत् अन्तर्गतकारकापेक्षमिति ब्रूमः । कारकाणां धर्मः सामग्री न स्वरूपहानाय तेषां कल्पते; साकल्यदशायामपि तत्स्वरूपप्रत्यभिज्ञानात् ॥ § 223

## प्रत्येकापेक्षया सामग्री भिन्ना ? उताभिन्ना ?

ननु समग्रेभ्यः सामग्री भिन्ना चेत् कथं पृथङ्नोपलभ्यते ? अभेदे तु सर्वकारकाणि करणीभूतान्येवेति कर्तृकर्मव्यवहारोच्छेदप्रसङ्गः—मैवम्—समग्रसन्निधानाख्यधर्मस्य प्रत्यक्षमुपलम्भात् । § 224

करणत्वं—साधकतमत्वम् । अन्तर्गतेति । सामग्री नाम यावत्कारणसमुदायः । करणत्वं च तदन्तर्गतप्रत्येककारकापेक्षमित्यर्थः । ननु अन्वयव्यतिरेकवशात् सामग्रयाः करणत्वावधारणेऽपि प्रत्येककारकसत्त्वे कार्यानुत्पादेन व्यभिचारात् प्रत्येकं कारकाणां कारणत्वासंभवेन न तदपेक्षः अतिशयः सामग्रया वक्तुं शक्य इत्यत्राह—कारकाणामिति । अयं भावः समग्राणां भावः खलु सामग्री । एवञ्च कारकाणां समुदायविशेषः सामग्री । समुदायश्च समुदाय्यनतिरिक्तः । ततश्च समुदायेषु विद्यमानो धर्मः न हि समुदायिनां कारणत्वं हन्ति । तथा सति प्रत्येकं कारणत्वाभावेन समुदितस्यापि कारणत्वं न स्यात् । किञ्च प्रत्येकं कारणत्वस्यैवाभावे तेषां कारकत्वमेव न स्यात्, कार्यनिर्वर्तकस्यैव कारकत्वात् । ननु प्रत्येकं कारकाणां कार्यव्यभिचारात् कथं तेषां कारणत्वावधारणमिति चेत्, लोक एव प्रष्टव्यः । पामरोऽपि हि तन्तूनां प्रत्येकं सतामपि पटकारणत्वं प्रत्येति । अतश्च यत्सत्त्वे यत्सत्त्वं, यदभावे यदभावः इति सहचारग्रहः सर्वानुभवसिद्धः । न हि तत्र यन्मात्रसत्वे यत्सत्त्वमित्यन्वयः । अतः प्रत्येकमपि कारणत्वं वर्तत एवेति ॥ § 225

समुदायसमुदायिनोर्भेदाभेदं विकल्प्य दूषयति—नन्विति । करणीभूतान्येवेति । सामग्र्याः करणत्वस्योपपादितत्वात् कारकाणां तदभिन्नत्वे कर्तृकर्मकारकादीनामपि करणकारकत्वापत्तिरितीतरकारकोच्छेदप्रसङ्ग

११ ] किमपेक्ष्य— nyāma-wit__ka

१३ ] तत्त्वरूप— nyāma-wit__kha

१४ ] असमग्रेभ्यः— nyāma-wit__ka

इत्यर्थः । समुदायसमुदायिनोर्वैलक्षण्यं वर्तत एवेत्यभिप्रायेण समाधत्ते—मैवमित्यादि । ननु तर्हि तन्तुपटयोरिव यदि भेदस्तदाऽपसिद्धान्त इत्याशङ्कायां

पृथगवस्थितेषु हि स्थालीजलज्वलनतण्डुलादिषु न समग्रताप्रत्ययः; समुदितेषु तु भवतीत्यतः तन्तुपटलपरिघटितपटाद्यवयविवत् कारककलापनिष्पाद्यद्रव्यान्तराभावेऽपि समुदायात्मिका सामग्री विद्यत एवेति समुदाय्यपेक्षया करणतां प्रतिपद्यते । तस्मान्न परिचोदनीयमिदं कस्मिन् कर्मणि सामग्री करणमिति । समुदायिनां सामग्र्यवस्थायामपि स्वरूपानपायात् समुदायिविशेषे कर्मणि सामग्री करणम् । अत एव प्रमितेर्न निरालम्बनत्वम् ॥

एतेन प्रमात्रादिः पृथगुपदर्शित इति विधाचतुष्टयमपि समाहितम् ॥

यत्त्वभ्यधायि सामग्र्याः करणविभक्तिनिर्देशो न दृश्यत इति— तत्रोच्यते—सामग्री हि संहतिः । सा हि संहन्यमानव्यतिरेकेण न व्यवहारपदवीमवतरति तेन सामग्र्या पश्यामीति न व्यपदेशः ॥ —न तथाऽत्र, किन्तु सेनावनन्यायेन भेदव्यवहार इत्याह—तन्त्विति । द्रव्यान्तराभावेऽपि—सामग्रीरूपावयव्यन्ताराभावेऽपि । तथा च प्रत्येकविवक्षया इमे वृक्षा इति व्यवहारेऽपि बुद्धिविशेषविषयत्वकृतः इदं वनमिति यथा, तथा प्रकृतेऽपि प्रत्येकविवक्षया कर्मादि कारकतां प्रमितौ भजते । समुदायापेक्षया तु सामग्र्येव प्रमितिकरणमिति भावः । समुदायिविशेषे— समुदायघटककारकविशेषे ॥ § 226

एतेन—प्रत्येकं कर्मकारकताद्यनपायेन । विधाचतुष्टयम् । प्रमाणं, प्रमाता, प्रमेयं, प्रमितिरिति चतुष्टयम् ॥ § 227

करणविभक्तीति । सामग्र्या पश्यामीति निर्देश इत्यर्थः । तेनेत्यादि । सामग्र्याख्यातिरिक्तपदार्थस्याभावेन न तथा निर्देश इति भावः ॥ § 228

नन्वभ्युपगच्छामः—सामग्र्याः प्रत्येकानतिरेकात् सामग्र्या पश्यामीति न निर्देश इति; किन्तु—सामग्र्याः करणत्वमुक्तं, सामग्री च प्रत्येकाभिन्ना । ततश्च सामग्र्यन्तर्गतानां सर्वेषामपि करणत्वं प्राप्तम्; एवञ्च चक्षुषा पश्यामीतिवत् घटेन

## केषाञ्चिदेव करणत्वव्यवहारे हेतुः

यस्तु दीपेन्द्रियाणां तृतीयानिर्देशः, स फलोपजननाविनाभाविस्वभावत्वाख्यसामग्रीसरूपसमारोपणनिबन्धनः । अन्यत्रापि च तद्रूपसमारोपेण स्थाल्या पचतीति व्यपदेशो दृश्यते एव । तस्मादन्तर्गतकारकापेक्षया लब्धकरणभावा सामग्री प्रमाणम् ॥

## प्रकारान्तरेण करणस्वरूपनिरूपणम्

१० ] स्थालीज्वलनजल— nyāma-wit__kha
११ ] घटा— nyāma-wit__kha
१५ ] सामग्री— nyāma-wit__kha
१७ ] प्रमाता— nyāma-wit__kha
२० ] सामग्रीं— nyāma-wit__kha

अपरे पुनराचक्षते—सामग्री नाम समुदितानि कारकाणि । तेषां द्वैरूप्यमहृदयङ्गमम् । अथ च तान्येव पृथगवस्थितानि कर्मादिभावं भजन्ते, अथ च तान्येव समुदितानि करणीभवन्तीति कोऽयं नयः ? तस्मात् कर्तृकर्मव्यतिरिक्तम् अव्यभिचारादिविशेषणकार्थप्रमाजनकं कारकं करणमुच्यते । तदेव तृतीयया व्यपदिशन्तिदीपेन पश्यामि, चक्षुषा निरीक्षे, लिङ्गेन बुद्ध्ये, शब्देन जानामि, मनसा निश्चिनोमीति ॥

ननु त्रीण्येव कारकाण्यस्मिन् पक्षे भवेयुः—ज्ञानक्रियायां तावत् एवमेवैतत्, यथा भवानाह । पाकादिक्रियासु क्रियाश्रय- पश्यामि, इत्यपि व्यवहारः कुतो न ? इत्याशङ्क्य परिहरति—यस्त्वित्यादि । फलोपजननाविनाभावित्वाख्यः तमबर्थः यः अतिशयः तं दीपादावभ्यर्हिततमत्वात् आरोप्य लोके दीपेन पश्यामीत्यादिव्यपदेशः; विषये सत्यप्यन्धकारादौ प्रत्यक्षानुत्पत्त्या तत्रालोकस्याभ्यर्हिततमत्वात् । एवं आलोके सत्यपि चक्षुषो निमीलने न प्रत्यक्षमिति चक्षुषोऽभ्यर्हिततमत्वप्रतीत्या चक्षुषा पश्यामीति व्यवहारः । अत एव स्थाल्यां पचतीत्यत्र स्थालीसौष्टवादिविवक्षायां सत्यां स्थाल्या पचति, स्थाली पचति इति, काष्ठसौष्ठवविवक्षायां काष्टं पचतीत्यादिश्च प्रयोगः । अतो न दोष इति परिहाराशयः ॥ § 229

तेषां समुदायाभिन्नानां समुदायिनाम् । द्वैरूप्यमेवोपपादयति—अथ चेति । अथ चेति विरोधद्योतकम् ॥ § 230

त्रीण्येवेति । अपादानादीनामपि कर्तृकारकेणैव क्रोडीकारापत्तेरित्यर्थः । तथा च कर्तृ कर्म करणमिति त्रीण्येव कारकाणि भवेयुरिति । ज्ञानक्रियायां—

धारणाद्युपकारभेदपर्यालोचनया भवत्वधिकरणादिकारकान्तरव्यवहारः । प्रमितौ तु मनोदीपचक्षुरादेः न लक्ष्यते विशेष इति तत्सर्वं करणत्वेन सम्मतम् ॥

कस्तेषु तमवर्थ इति चेत् ? अस्ति कश्चित्—यदयं लोकः अहं मया जानामि घटेन घटं जानामि इति न कर्तृकर्मणी विस्मृत्यापि करणत्वेन व्यपदिशति, नयनमनोदीपशब्दलिङ्गानि तु तथा व्यपदिशति; सोऽयमेषां पश्यति कर्तृकर्मवैलक्षण्यं चक्षुरादीनाम् । तद्वैलक्षण्यमेव च तेषामतिशय इति । तदयमिह प्रमाणं, प्रमाता, प्रमेयं, प्रमितिरिति चतुर्वर्ग एव व्यवहारः परिसमाप्यते । तस्मात् कर्तृकर्मविलक्षणा संशयविपर्ययरहितार्थबोधविधायिनी बोधाबोधस्वभावा सामग्री प्रमाणमिति युक्तम् ॥

## बौद्धसम्मतप्रमाणस्वरूपनिराकरणम्

ये तु बोधस्यैव प्रमाणत्वमाचक्षते—न सूक्ष्मदर्शिनस्ते । बोधः खलु प्रमाणस्य फलं, न साक्षात्प्रमाणम् । करणार्थाभिधानो हि प्रमाणशब्दः,

५ ] पचन्तीति— nyāma-wit__ka

९ ] अथ तान्येव—क. अथ च तानि— nyāma-wit__kha

१० ] समुदितानि— nyāma-wit__ka

प्रमीयते अनेनेति प्रमाणम् । प्रमीयत इति कोऽर्थः ? प्रमा जन्यत इति । प्रमाणादवगच्छाम इति वदन्तो लौकिकाः ज्ञानरूपक्रियायाम् । यद्यपि ज्ञानं गुणः, अथापि जानामीत्यादिधातुवाच्यत्वात् क्रियात्वोक्तिः । ज्ञानस्थले हि आत्मन एवोपादानत्वेन, फलित्वेन, अधिकरणत्वेन च कर्मकरणकारकव्यतिरिक्तसर्वकारकत्वमात्मन एव ॥ § 231

तेषु—मनोदीपचक्षुरादिषु । कर्तृकर्मकारकातिरिक्तत्वात् करणस्य, सजातीयवस्त्वपेक्षयैव तमबर्थस्योपपादनीयत्वादित्यर्थः । अनुभवसाक्षिकोऽयं विशेष इत्यभिप्रायेणाह—यदयमित्यादि ॥ § 232

बोधस्यैवेति । प्रमा प्रमाणमिति पर्यायतया लोके प्रयोगात् ज्ञानस्य प्रामाण्यमित्यादिव्यवहाराच्च ज्ञानरूपमेव प्रमाणम् । तथा च बोधाबोधस्वभावेत्यसङ्गतमित्याशयः । उत्तरत्र प्रमाया अपि प्रमाणपदवाच्यत्वकथनादत्र साक्षादित्युक्तम् । अधिकमुत्तरत्र स्पष्टीभविष्यति ॥ § 233

I.39/KSV

करणस्यैव प्रामाण्यमनुमन्यन्ते । यस्तु प्रमा प्रमाणमिति प्रमाणशब्दः, स प्रमाणफले द्रष्टव्यः । तथा च संशयविपर्ययात्मकं अप्रमाणफलमपि ज्ञानं आत्ममनोऽनुमाने तद्विशेषणार्थपरिच्छेदे वा विशिष्टप्रमाजननात् प्रमाणतां प्रतिपद्यते । अव्यभिचारादिविशेषणोपपन्नमपि ज्ञानमफलजनकं अप्रमाणमेव । केवलप्रमास्वभावं प्रमाणाद्विभिन्नं फलमिति प्रत्यक्षलक्षणे वक्ष्यामः ॥ § 234

अथ व्यतिरिक्तफलजनकमपि बोधरूपमेव प्रमाणमुच्यते— तदयुक्तम्—सकलजगद्विदितबोधेतरस्वभावशब्दलिङ्गदीपेन्द्रियादिपरिहारप्रसङ्गात् । तस्मात् सामग्र्यनुप्रविष्टो बोधः विशेषणज्ञानमिव क्वचित्प्रत्यक्षे, लिङ्गज्ञानमिव लिङ्गिप्रमितौ, सारूप्यदर्शनमिवो- § 235

यस्त्विति । कुत्रचित् प्रयुज्यत इति शेषः । प्रमाणफल इति । तथा च अन्नं प्राणा इतिवत् प्रमाणजन्यायां प्रमायां प्रमाणव्यपदेश उपचारादिति भावः । अस्य व्यवहारस्य मुख्यत्वे बाधकमप्याह—तथा चेति । ज्ञानेच्छादीनामात्मलिङ्गत्वेन, तत्र संशयविपर्ययज्ञानयोरप्यात्मानुमितिसाधनत्वेन तयोरपि प्रमाकरणत्वात् प्रमाणत्वप्रसङ्गः, सिद्धान्ते तु तदुभयव्यतिरिक्तत्वस्य प्रमाणलक्षणे निवेशितत्वान्न हानिरिति भावः । ज्ञानं इत्यस्य प्रमाणतां प्रतिपद्यत इत्यनेनान्वयः । ननु यदि प्रमाकरणमेव प्रमाणं, तदा कदाचिदनुमित्याद्यनुपधायकस्य व्याप्तिज्ञानादेः प्रमाणत्वं न स्यात्, तेन प्रमाया अजननादित्याशङ्कामिष्टापत्त्या परिहरति—अव्यभिचारादीत्यादिना ॥ § 236

३० ] सर्वं— nyāma-wit__kha
२ ] वर्गेणैव— nyāma-wit__kha
६ ] दर्शनास्ते— nyāma-wit__kha
२१ ] प्रमाणफलमिति— nyāma-wit__kha
२२ ] प्रमाण— nyāma-wit__kha
२४--२६ ] प्रमाण— nyāma-wit__kha
२८ ] प्रविष्ट— nyāma-wit__kha
२९ ] प्रतीतौ— nyāma-wit__kha

व्यतिरिक्तेति । प्रमाणव्यतिरिक्तेत्यर्थः । अनुमित्यादिस्थले प्रमाणप्रमित्योः बोधरूपत्वं भवतामपि सम्मतमिति भावः । परिहारप्रसङ्गादिति । शब्दलिङ्गादीनां ज्ञानरूपत्वाभावेन प्रमाणपदवाच्यत्वाभावप्रसङ्ग इति यावत् । सामग्र्यनुप्रविष्ट इति । बोधाबोधात्मकत्वात् सामग्र्याः बोधोऽपि प्रमाणतां प्रतिपद्यते, न बोधमात्रमिति । बोध इति । अस्य प्रमाणतां प्रतिपद्यत इत्यग्रिमेणान्वयः । क्वचित्—विशिष्टप्रत्यक्षे ॥ § 237

I.40/KSV

पमाने, शब्दश्रवणमिव तदर्थज्ञाने प्रमाणतां प्रतिपद्यते । अत एव बोधाबोधस्वभावा सामग्री प्रमाणमित्युक्तम् ॥ § 238

## बौद्धैकदेशिमतनिराकरणम्

अन्ये तु तुल्यसामग्र्यधीनयोः ज्ञानार्थयोः ग्राह्यगाहकभावं वदन्तः बोधं प्रमाणमभ्युपागमन् । क्षणभङ्गिषु पदार्थेषु सहकार्युपादानकारणापेक्षक्षणान्तरसन्ततिजननेन च लोकयात्रामुद्वहत्सु ज्ञानजन्मनि ज्ञानमुपादानकारणम्, अर्थः सहकारिकारणम्; अर्थजन्मनि च अर्थः उपादानकारणं, ज्ञानं च सहकारिकारणमिति—ज्ञानं च ज्ञानार्थजन्यम्, अर्थश्च अर्थज्ञानजन्यो भवतीत्येवमेकसामग्र्यधीनतया तमर्थमव्यभिचरतो ज्ञानस्य तत्र प्रामाण्यमिति ॥ § 239

तदिदमनुपपन्नम्—अफलजनकस्य प्रमाणत्वानुपपत्तेरित्युक्तत्वात् । अपि च कर्मणि ज्ञानं प्रमाणमिष्यते । यथोक्तम्— § 240

सव्यापारमिवाभाति व्यापारेण स्वकर्मणि इति । स चायमर्थक्षणो ज्ञानसमकालः ततःपूर्वाभ्यां ज्ञानार्थलक्षणाभ्याम् उपजनित इति तत्कर्मतां प्रतिपद्यतां, न पुनः स्वसमानकालप्रसूतज्ञानक्षणकर्मतामिति ॥ § 241

ननु च तुल्यसामग्र्यधीनतया समानकालतया च तदव्यभिचारसिद्धौ सत्यां क्व कर्मत्वमुपयुज्यते ? हन्त तर्हि सहोत्पन्नयोः समानसामग्रीकयोः ग्राह्यग्राहकनियमः किंकृत इति वक्तव्यम् ? § 242

कर्मणीति । ज्ञानस्य हि प्रामाण्यम् विषययाथार्थ्ये पर्यवस्यतीत्यर्थः । यथोक्तमिति । भवतैव प्रमाणसमुच्चये इति शेषः । तत्कर्मतां— पूर्वक्षणगतार्थक्षणकर्मकताम् । कारणस्य पूर्ववर्तित्वमेव, न समानकालिकत्वं इति भावः ॥ § 243

क्वोपयुज्यत इति । ज्ञानार्थयोस्तु अव्यभिचारः सिद्धः, तुल्यकालत्वात् तुल्यसामग्र्यधीनत्वाच्च । कर्मत्वं यत्किञ्चिन्निष्ठं भवतु, किमनया काकदन्तप-

---

१९--२० ] क्षणान्तरं— nyāma-wit__ka
२३ ] चारतो— nyāma-wit__ka
२७ ] स्वकर्मणा— nyāma-wit__kha

१--२ ] सिद्धौ क्व— nyāma-wit__kha
३ ] वर्तव्यं— nyāma-wit__kha

रीक्षयेति भावः । सिद्धान्ती परीक्षायाः फलं विशदयति—हन्त तर्हीति ।

ज्ञानं स्वप्रकाशस्वभावमिति ग्राहम्, अर्थो जडात्मेति ग्राह्यम्— इति चेत्—अयमपि विशेषस्तुल्यकालयोः कुतस्त्यः ? उपादानसहकारिकारणभेदादिति चेत्, न—तस्य क्षणभङ्गभङ्गे निराकरिष्यमाणत्वात् ॥

**बौद्धैकदेशिमतान्तरनिराकरणम्**

येऽपि निराकारस्य बोधस्वरूपस्य नीलपीताद्यनेकविषयसाधारणत्वात्, जनकत्वस्य च चक्षुरादावपि भावेनातिप्रसङ्गात्, तदाकारत्वकृतमेव ज्ञानकर्मनियममवगच्छन्तः साकारं ज्ञानं प्रमाणमिति प्रतिपेदिरे तेऽपि विज्ञानाद्वैतसिषाधयिषयैवमभिदधानाः तन्निरासप्रसङ्ग एव निरसिष्यन्ते । न ह्येकमेव साकारं ज्ञानं ग्राह्यं ग्राहकं च भवितुमर्हतीति वक्ष्यते ॥

अर्थस्तु साकारज्ञानवादिनो न समस्त्येव । स ह्यनुमेयो वा स्यात् ? प्रत्यक्षो वा ? नानुमेयः; सम्बन्धग्रहणाभावात् ।

अर्थे हि सति साकारं निराकारं तदत्यये ।
नित्यानुमेयबाह्यार्थवादी ज्ञानं क्व दृष्टवान् ॥ ३८ ॥§ 246

पुनश्शङ्कते—ज्ञानमिति । अयमपि विशेष इति । तुल्यकालसामग्र्योर्मध्ये ज्ञानमेव स्वप्रकाशम् अर्थस्तु जड इति कथं निर्णय इति भावः । नन्वस्ति वैलक्षण्यं, ज्ञानमुपादानम्, अर्थः सहकारीति शङ्कते—उपादानेति ॥ § 247

तदाकारत्वेति । ज्ञानं यदाकारं भवति, स एव तत्र विषयः, ज्ञानस्य हि आकारो विषयाधीन इति कर्मत्वव्यवस्था भवतीत्याशयः । विज्ञानाद्वैतसिषाधयिषयेति । ज्ञानाकारान्यथानुपपत्त्याऽर्थाकारस्य कर्मणः सिद्धिरिति वदतां हि अयमाशयः । अर्थस्य प्रत्यक्षत्वनिराकरणपूर्वकमनुमेयत्वसमर्थनेन लोकेऽनास्थायां जातायाम्, अनन्तरं सम्बन्धानुपपत्त्यादिभिः अर्थस्यापह्नवे विज्ञानमेकमेवावशिष्येतेति भिक्षुपादप्रसरणन्यायेन विज्ञानाद्वैत एव हार्दोऽभिमान इति । वक्ष्यत इति । नवमाह्निक इति शेषः ॥ § 248

सम्बन्धग्रहणं—व्याप्तिग्रहणम् । उक्तमर्थमुपपादयति—अर्थ इति । अर्थो हि नित्यानुमेयः, एवं तर्हि ज्ञानस्य अर्थस्य च कुत्र व्याप्तिग्रहणं संम्भवेदित्यर्थः । सति—गृहीते सति ॥ § 249

I.42/KSV

नापि प्रत्यक्षोऽर्थः; आकारद्वयानुपलम्भात् । अभ्युपगमे चानवस्थाप्रसङ्गात् । अर्थाकारो हि निराकारज्ञानगम्यो न भवतीति ज्ञानेनाकारवता

११ ] प्रकाश— nyāma-wit__kha
१२ ] कारणयोः— nyāma-wit__kha
१५ ] ये हि— nyāma-wit__kha
१५ ] रूपस्य— nyāma-wit__kha
१६ ] तदाकार— nyāma-wit__ka
१७ ] साकारविज्ञानं— nyāma-wit__kha
२३ ] नित्यानुमेये— nyāma-wit__ka

गृह्यते; सोऽयमिदानीं ज्ञानाकारोऽपि ग्राह्यत्वात् अन्येनाकारवता गृह्यते, सोऽप्यन्येनेति ॥ § 250

अथ वा अर्थो निराकारज्ञानग्राह्यतां नोपयातीति स्वग्राहके ज्ञानात्मनि समर्पितात्मा भवतीति साकारं ज्ञानमेवेदं संपन्नमिति पुनरर्थोऽन्यः कल्पनीयः, सोऽपि ग्राह्यत्वात् स्वग्राहकस्य साकारत्वसिद्धये तत्रैव लीयत इति साकारं ज्ञानमेवावशिष्यत इति पुनरन्योऽर्थ इति इत्थमनवस्था । प्रतिकर्मव्यवस्था तु जनकत्वनिबन्धना भविष्यति, वस्तुस्वभावस्यापर्यनुयोज्यत्वात् । साकारपक्षेऽपि पर्यनुयोगसाम्यमित्यादि सर्वं उपरिष्टात् सविस्तरमभिधास्यते । साकारपक्षेऽपि च न प्रमाणात् व्यतिरिक्तं फलमुपदर्शितमित्यसत्पक्ष एवायम् ॥ § 251

## प्राकट्यलिङ्गेन ज्ञानमनुमीयते

शावरास्तु ब्रुवते—य एते बोधप्रामाण्यवादिनो विज्ञानादभिन्नमेव फलमभिदधति, ते बाढं निरसनीया भवन्त्येव; वयं तु विज्ञानात् भिन्नमेव फलं दृष्टताख्यम् अभ्युपगच्छामः । तेनैव तदनुमीयते § 252

आकारद्वयं—अयमर्थाकारः, अयं ज्ञानाकार इति विषयं विषयिणं च न हि कश्चित् पृथगुपलभत इत्यर्थः । अनवस्थामेवोपपादयति—अर्थाकारो हीति ॥ § 253

प्रकारान्तरेणानवस्थामुपपादयति—अथ वेति ॥ § 254

निरसनीया इति । विज्ञानाद्वैतमतं त्वस्माकमपि निरसनीयमेव, क्रियारूपस्य बोधस्यैव फलत्वं तु न संभवतीत्यर्थः । दृष्टता—ज्ञातता प्राकट्याद्यपरपर्याया वस्तुवृत्तिधर्मः । तेन—विज्ञानफलेन प्राकट्येन तत्— विज्ञानमनुमीयते । कार्येण कारणानुमानादित्यर्थः । ननु ज्ञानस्य फलरूपत्वेन

ज्ञानं हि नाम क्रियात्मकं, क्रिया च फलानुमेया; ज्ञातृव्यापारमन्तरेण फलानिष्पत्तेः ॥

संसर्गोऽपि कारकाणां क्रियागर्भ एव भवति । तदनभ्युपगमे किमधिकृत्य कारकाणि संसृज्येरन् । न चासंसृष्टानि तानि फलवन्ति । क्रियावेशवशाच्च कारकं कारकं भवति । अपरथा हि तत् वस्तुस्वरूपमात्रमेव स्यात्, न कारकम् । ततश्च न फलार्थिभिरुपादीयेतेति व्यवहारविलोपः । तस्मात् यथा हि कारकाणि तण्डुलसलिलानलस्थाल्यादीनि सिद्धस्वभावानि साध्यं धात्वर्थमेकं पाकलक्षणमुररीकृत्य संसृज्यन्ते, संसृष्टानि च

११ ] वक्ता— nyāma-wit__kha
१४ ] भवति— nyāma-wit__ka
१६ ] पुनरर्थोऽन्य इति— nyāma-wit__kha
१९ ] त्यस्मत्पक्ष— nyāma-wit__ka
२३ ] अर्थदृष्टताख्यं— nyāma-wit__kha
२३ ] तेनैतदेवानु— nyāma-wit__ka

क्रियामुत्पादयन्ति, तथाऽऽत्मेन्द्रियमनोऽर्थसन्निकर्षे सति ज्ञानाख्यो व्यापार उपजायते । स च न प्रत्यक्षः; अर्थस्यैव बहिर्देशसम्बद्धस्य ग्रहणात्, आकारद्वयप्रति- तद्भिन्नत्वं फलस्य कथमित्यत्राह—ज्ञानं हीति । क्रियात्मकमिति । धात्वर्थत्वादिति भावः । पचतीतिवत् खलु जानातीति व्यपदेशः । फलानुमेयेति । चेतनस्यैन्द्रियकत्वाभावेन तत्क्रियाया अपि ऐन्द्रियकत्वं न संभवति । तथा च फलेनैवानुमेया ज्ञानरूपा चेतनक्रियेति क्रियारूपं ज्ञानं न फलं इत्यर्थः ॥ § 255

प्रकारान्तरेणापि ज्ञानस्य क्रियारूपत्वमुपपादयति—संसर्गोऽपीति । क्रियागर्भः—क्रियाद्वारक इति यावत् । नानाविधानां हि कारकाणां कारकत्वं क्रियावेशमन्तरा न संभवति, स्वरूपस्य पूर्वमेव सिद्धत्वात् । तत्रापि कर्तृकर्मकरणादिकारकाणां हि कारकत्वम् एकक्रियोद्देशमन्तरा न संभवति । एवमेव आत्मेन्द्रियमनःप्रभृतीनां कारकत्वम् एकक्रियावसानकमेव वाच्यं, सैव क्रिया ज्ञानमित्युच्यत इति समुदितार्थः । ततश्च—कारकाणां क्रियावेशाभावेन कारकत्वस्यैवाभावे । अस्तु ज्ञानस्य क्रियात्वं, ततः किमित्यत्राह—स चेति । अर्थो हि बाह्यः, ज्ञानं चान्तरं, तत्कथमुभयोरेकदा ग्रहणं स्यात् । किञ्च ज्ञानं खलु सविषयम् । भूतले घट इत्याद्यनुभवकाले, अयं ज्ञानांशः, अयं विषयांशः इति आकारद्वयाप्रतिभासात्, प्रतीयमानः आकारः घटादिः बाह्य एव स्यात्, बहिष्ठत्वेन भासमानत्वात् इति । ननु ज्ञातता नाम ज्ञानविषयता । एवं च ज्ञानरूपो व्यापारो

भासाभावात्, अगृहीतस्यापि तस्य चक्षुरादिवदुपायत्वात् परोक्षोऽपि चासौ विषयप्रकाशतालक्षणेन फलेन कल्प्यते । तदाह भाष्यकारः न ह्यज्ञातेऽर्थे कश्चिद्बुद्धिमुपलभते, ज्ञाते त्वनुमानादवगच्छति इति । वार्तिककृताऽप्युक्तम्—

नान्यथा ह्यर्थसद्भावो दृष्टस्सन्नुपपद्यते ।
ज्ञानं चेन्नेत्यतः पश्चात प्रमाणमुपकल्प्यते ॥ इति ॥§ 258

तदेष फलानुमेयो ज्ञातृव्यापारो ज्ञानादिशब्दवाच्यः प्रमाणम् । इन्द्रियादीनां तु तदुत्पादकतया इन्द्रियव्यापारे ज्ञानमुपचरति, न साक्षादिति ॥

### ज्ञानस्य नित्यपरोक्षत्वनिरासः

अत्र प्रतिविधीयते—अहो बत इमे केभ्यो बिभ्यतः श्रोत्रियाः परं किमपि वैक्लव्यमुपागताः ! न खलु नित्यं परोक्षं ज्ञानं यदि प्रत्यक्षतो न गृह्येत कथं तेन व्यापारेणार्थे ज्ञातताऽख्यं प्रत्यक्षं फलमुपजायेतेत्याशङ्कां परिहरति—अगृहीतस्यापीति । अयं भावः—ज्ञातता न ज्ञानविषयत्वरूपा, किन्तु ज्ञानजन्यः विषयनिष्ठः अतिशयविशेषः । तथा च ज्ञानस्यातीन्द्रिय-

८--१० ] अपरथा— nyāma-wit_ka
१४ ] तथेन्द्रिय— nyāma-wit_ka
३ ] मुपजायते— nyāma-wit_ka

त्वेऽपि तज्जन्यज्ञाततायाः प्रत्यक्षत्वं युज्यत एव, यथाऽतीन्द्रियेणापि चक्षुषा घटादिचाक्षुषमिति । ननु स व्यापारः यदि सदा परोक्षः, तर्हि तत्सद्भाव एव किं मानमित्यत्राह—परोक्षोऽपीति । नित्यपरोक्षोऽपीत्यर्थः । नीलो घट इत्यादिप्रत्ययाद्यथा नैल्यादिर्घटधर्मः सिद्ध्यति, तथा घटो ज्ञात इति प्रत्ययात् घटे ज्ञातत्वरूपः कश्चनातिरिक्तो धर्मः सिद्धः । स च ज्ञानविषयत्वनिबन्धन इति कार्यभूतया ज्ञाततया कारणभूतं ज्ञानमनुमीयते । ज्ञातता, प्राकट्यं, प्रकाश इत्यवमादिः पर्याय इति । भाष्यकारः—शबरः । औत्पत्तिकसूत्र-भाष्ये शून्यवादगतमिदम् । वार्तिककृता—कुमारिलेन । नान्यथेत्यादि । ज्ञानं न स्याच्चेत् दृष्टस्सन्नर्थसद्भावो अन्यथा—ज्ञानाभावे नोपपद्यते, इत्यतः पश्चात्—अर्थप्रकाशानन्तरमेव ज्ञाने प्रमाणं—प्राकट्याख्यमुपकल्पत इत्य-न्वयः । अर्थप्रकाशान्यथाऽनुपपत्त्या ज्ञानं सिद्ध्यतीत्यर्थः ॥ § 259

बिभ्यत इति । भयं कश्चायमियान् संत्रासः इत्यत्र सूचयति । अयं घटः इत्यादौ आकारद्वयानुपलंभात् ज्ञानाकारस्योभयसम्मतत्वात्

भवितुमर्हति, ज्ञातोऽर्थ इति क्वचित्तद्विशिष्टार्थप्रत्यवमर्शदर्शनात्; विशेष-णाग्रहणे शुक्लः पट इतिवत् विशिष्टप्रतीतेरनुत्पादात् ॥

कश्चायमियान् संत्रासः ! विषयग्रहणकाले विज्ञानाग्रहणमात्रकेण बाह्यार्थनिह्नववादिनः शाक्याः शक्याः शमयितुम् ॥

## ज्ञानं न क्रियारूपम्

यत्तु क्रियास्वभावत्वात्तस्य परोक्षत्वं—तदयुक्तम्—न हि क्रियास्वभावं ज्ञानम् अपि तु फलस्वभावमेव ॥

## क्रियारूपमपि ज्ञानं न नित्यपरोक्षम्

अपि च क्रियाऽपि प्रत्यक्षद्रव्यवर्तिनी प्रत्यक्षैव भाट्टानां प्रत्यक्षश्चात्मा; तत् किमनेनापराद्धं, यदेतदीयक्रियाया अप्रत्यक्षत्वमुच्यते । न चोत्क्षेप-णादिभेदभिन्नपरिस्पन्दात्मकव्यापारव्यतिरेकेण बाह्यकारकेष्वपि सूक्ष्मा नाम काचिदस्ति क्रिया । सा हि यदि नित्या जातिवत्, अथानित्या रूपव-त् वस्तुधर्म इष्येत । तावतैव व्यवहारोपपत्तौ कल्पित एवार्थकारो न वास्तव इति बाह्यार्थमपलपन्तं प्रत्युत्तरयितुं खलु—(?')सत्यमेक एवाकार उपलभ्यते, परन्तु स आकारोऽर्थस्यैव, बहिष्टत्वेन प्रतीतेः; न तावता ज्ञानापलापः, तस्यानन्तरमनुमेयत्वात्— इत्युच्यते । किमर्थमेतावता ज्ञानस्य नित्यानुमेयत्वाङ्गीकरणम्, अर्थग्रहणकाले ज्ञानं न गृह्यत इत्युक्तिमात्रेणैव तत्पक्षनिरासात् । तर्हि ज्ञानं कदा गृह्यते इति चेदनुव्यवसायकाले इत्य-न्यदेतत् । अतः बाह्यार्थसाधनबद्धकच्छैर्भट्टैः संभ्रमादेव ज्ञानस्य नित्यप-रोक्षत्वमङ्गीकृतमिति नर्मोक्तिगर्भदूषणसंपिण्डितार्थः । विशेषणाग्रहणे—ज्ञान-रूपविशेषणबुद्धेरभावे ॥ § 260

---

४ ] ज्ञान— nyāma-wit__kha
५ ] उत्पादकतया— nyāma-wit__ka
३१ ] अक्रिया— nyāma-wit__ka
३१--३२ ] स्वभावज्ञानमपि— nyāma-wit__ka
१ ] भट्टानां— nyāma-wit__kha
५ ] इष्यते— nyāma-wit__ka

शाक्याः—बौद्धाः ॥ § 261

फलस्वभावमिति । इन्द्रियव्यापारादिनिर्वर्त्यात्मगतगुणरूपत्वादिति भावः ॥ § 262

क्रियारूपत्वेऽपि न परोक्षत्वं ज्ञानस्येत्याह—अपि चेति । प्रत्यक्ष इति । औत्पत्तिकसूत्रश्लोकवार्तिके आत्मवादे अहंप्रत्ययविज्ञेयो ज्ञाता नः सर्वदैव हि इत्यादौ आत्मनः मानसप्रत्यक्षविषयत्वोक्तेरिति भावः । अनेन—ज्ञानेन । वस्तुधर्म इत्येतत् जातिवदित्यत्रापि सम्बध्यते ।

तत्र यदि नित्या, तर्हि सर्वदा वस्तुनः क्रियायोगात् सर्वदा फलनिष्पत्तिप्रसङ्गः । अथ कारकनिर्वर्त्या क्रिया, साऽपीदानीं कार्यत्वात् सव्यापारकारककार्या भवेदित्यनवस्था । निष्क्रियकारककार्यत्वे तु क्रियामिव फलमपि निष्क्रियाण्येव कारकाणि कुर्युरिति किं क्रियया ?

ननु करोतीति कारकम् । क्रियाऽऽवेशमन्तरेण च कारकत्वानुपपत्तिः—सत्यं, करोतीति कारकं, तत्तु फलमेव करोति, न क्रियाम् ॥

ननु करोतीति यद्ब्रूषे सेयमुक्तैव क्रिया भवति । चैत्रः कटं करोतीति चैत्रस्येव कटस्येव करोत्यर्थस्याप्रत्याख्येयत्वात्; तत्कृतमेव चैत्रादीनां कारकत्वम्—उच्यते—नातीन्द्रियक्रियायोगनिबन्धनः कारकभावः, क्रियाया अतीन्द्रियत्वेन तद्योगकृतकारकत्वानधिगमे व्यवहारविप्रलोपप्रसङ्गात् । क्रियाऽऽवेशकृतं हि तत्कारकत्वमनवगच्छन्तः कथं फलार्थिनस्तदुपाददीरन् ॥ अनवस्थेति । सूक्ष्मायाः क्रियाया अनित्यत्वेन, हेत्वपेक्षणात्; हेतावपि अतीन्द्रियसूक्ष्मक्रियाया अंगीकारस्यावश्यकत्वेनानवस्थाप्रसङ्गः । निष्क्रियेति । उपलभ्यमानक्रियाऽतिरिक्तसूक्ष्मक्रियाशून्येत्यर्थः ॥ § 263

क्रियाऽऽवेशमिति । न हि तूष्णीं स्थितः चैत्रादिः घटादिनिर्वर्तको भवति । न हि स्वयं क्रियाशून्यस्य क्रियानिर्वर्तकत्वरूपं कारकत्वं संभवतीत्यर्थः ॥ § 264

ननु फलं करोतीति सत्यं, परन्तु करोत्यर्थः या क्रिया, तदाश्रयत्वं कारकस्यावर्जनीयं खलु, कर्तरि लकारादित्यभिप्रायेण पुनश्शङ्कते—नन्वित्यादि । उक्तैव—अस्मदुक्तैव । चैत्रस्येवेति । एतस्मिन् हि वाक्ये चैत्रपदस्य कटपदस्य च यथा यः कश्चनार्थो वर्तते, तथा करोतिपदस्यापि कश्चनार्थो वर्तत एवेति तादृशक्रियानिर्वर्तकत्वात् कारकत्वमिति सिद्धमेवेति । तत्कृतं—करोत्यर्थभूतक्रियानिर्वर्तकत्वकृतम् । तथा च विषयत्वात् कर्मत्वं यथा, तथा तादृशक्रियाकर्तृत्वात् चैत्रोऽपि कर्ता भवति । क्रियाऽऽवेशाभावे निरतिशयत्वेन कर्तृकर्मव्यवहारः कथं स्यादित्याशयः ॥ § 265

I.47/KSV

---

२३ ] अक्रियामिव— nyāma-wit__ka
२७ ] क्रियैव— nyāma-wit__ka
२७--२८ ] चैत्रस्यैव— nyāma-wit__ka
३१ ] मनधि— nyāma-wit__ka

मत्पक्षे कारकत्वं हि नास्ति किञ्चिदतीन्द्रियम् ।
कारकत्वं स्वरूपस्य सहकार्यादिसन्निधिः ॥ ३९ ॥ § 267

तावदेव विनिश्चित्य तदुपादीयतेऽर्थिभिः ।
तदेवोपाददानैश्च फलमप्यधिगम्यते ॥ ४० ॥ § 269

निर्व्यापारस्य सत्त्वस्य को गुणः सहकारिभिः ।
सव्यापारस्य सत्त्वस्य को गुणः सहकारिभिः ॥ ४१ ॥ § 271

अथ व्यापार एवैष सर्वैस्सम्भूय साध्यते ।
किं फलेनापराद्धं वः तद्धि सम्भूय साध्यताम् ॥ ४२ ॥ § 273

## भौतिकक्रियैव करोत्यर्थः

यत्तु करोत्यर्थस्याप्रत्याख्येयत्वादित्युक्तं—तत्रोच्यते—परि स्पन्द एव भौतिको व्यापारः करोत्यर्थः । न हि वयं परिस्पन्दात्मकं परिदृश्यमानं व्यापारमपह्नुमहे, प्रतिकारकं विचित्रस्य ज्वलनादेर्व्यापारस्य प्रत्यक्षमुपलम्भात् । अतीन्द्रियस्तु व्यापारो नास्तीति ब्रूमहे ॥ § 274

## भौतिकक्रियातिरिक्तक्रियासद्भावतदभावौ

ननु पाको नाम धात्वर्थः परिदृश्यमानज्वलनादिव्यापारव्यतिरिक्त एषितव्य एव, तमन्तरेण फलनिष्पत्तेरभावात् । § 275

सत्त्वस्येति । कारकस्येत्यर्थः; द्रव्यासुव्यवसायेषु सत्त्वम् । किं सहकारिसान्निध्याहितो व्यापारः कारकेष्वतिरिक्तोऽस्ति ? उत न ? आद्ये पूर्वं व्यापारस्यासत्त्वे सहकारिभिर्वा किं क्रियेत ? यदि स्वतः सव्यापारः, तदा सहकारिभिः किं कर्तव्यम् । अथ सर्वैस्संभूय व्यापारमात्रं जन्यते, तर्हि फलमेव जनयन्तु ते, किमन्तर्गडुनाऽतीन्द्रियेण व्यापारेणेत्यर्थः ॥ § 276

करोत्यर्थ इति । प्रयत्नविषये तु वक्तव्यमनुपदमेवोच्यते । अतीन्द्रियस्तु भूतनिष्ठः चेतननिष्टो वा व्यापारस्तु नास्त्येवेत्येतावदत्र वक्तव्यम् । अतीन्द्रियस्त्विति । ऐन्द्रियिकवस्तुवृत्तिरिति शेषः ॥ § 277

I.48/KSV

असति च तस्मिन् किमधिकृत्य कारकाणि संसृज्येरन्नित्युक्तम्— तदयुक्तम्—यं तमेकं धात्वर्थं साध्यं बुध्यसे, स किं समुदितसकलकारकसम्पाद्यः ? एकैककारकनिर्वर्त्यो वा ? § 278

१८--१९ ] अथ— nyāma-wit__ka

२१ ] करोत्यर्थस्य— nyāma-wit__ka

१ ] परि— nyāma-wit__ka

१--२ ] एषितव्यः— nyāma-wit__ka

तत्राद्यपक्ष एकैकं भवेत्कारकमक्रियम् ।
एकैकनिष्क्रियत्वे च साकल्येऽपि कुतः क्रिया ॥ ४३ ॥[§ 280]

उत्तरस्मिन् पक्षे प्रत्येकमपि पाकक्रियायोगात् कारकान्तरनिरपेक्षादेकस्मात् कारकात् फलनिष्पत्तिप्रसङ्गः । न च तथाविधधात्वर्थपुरस्सरः कारकाणां संसर्गः ॥ [§ 281]

क्रियानिमित्तसंसर्गवादिनो हि द्वयी गतिः ।
सत्यां क्रियायां सम्बन्धः ? सम्बन्धे सति वा क्रिया ॥ ४४ ॥[§ 283]

मेलनात् पूर्वसिद्धायां क्रियायां मेलनेन किम् ?
तथा च जन्येत फलं विभक्तैरपि कारकैः ॥ ४५ ॥[§ 285]

किमधिकृत्येति । पाकरूपैकक्रियोद्देशेन हि काष्टादीनां ज्वलनादीति भावः । तत्राद्यपक्ष इत्यादि । पाकादिरूपायाः क्रियाया हि कारकसमुदायसंपाद्यत्वमुक्तम्, एवं तर्हि प्रत्येकं स्यात् । क्रियाशून्यत्वेनाकारकत्वे समुदितैरपि क्रिया न निर्वर्त्येत; न हि शतमप्यन्धाः पन्थानं पश्यन्तीति भावः ॥ [§ 286]

उत्तरस्मिन् पक्षे—प्रत्येकमेव कारकैः पाकादिर्निर्वर्त्येत इति पक्षेः । तथाविधेति । काष्ठादिगतज्वलनाद्यतिरिक्तः अतीन्द्रियः पाकादिरूपः इत्यर्थः ॥ [§ 287]

पाकादिक्रियानिमित्त एव कारकाणां मेलनमिति पक्षे, किं सिद्धया पाकादिक्रियया कारकाणि संसृज्यन्ते, उत असिद्धया—साध्यया क्रिययेति विकल्प्य दूषयति—क्रियानिमित्तेत्यादि । मेलनादिति । आद्ये पक्षे पाकादिक्रियायाः कारकमेलनात्पूर्वं सिद्धत्वात् मेलनवैयर्थ्यम् । तथा च निखिलकारकमेलनात्पूर्वमेव क्रियायाः सिद्ध्या प्रत्येकं कारकैः क्रियासिद्धिः स्वीकृता भवेत् ।

मेलनात्तु क्रियासिद्धौ पुनरेकैकमक्रियम् ।
तथा सति न काष्ठानि ज्वलेयुः पिठराद्विना ॥ ४६ ॥[§ 290]

ननु पिठराद्विना काष्ठानि ज्वलन्ति, न तु पचन्ति—मैवम् —सत्यपि पिठरे ज्वलन्त्येव काष्ठानि, नान्यत् कुर्वन्ति दृश्यन्ते । तस्मात् क्रियान्तराभावात् फलमेवोररीकृत्य कारकाणि संसृज्यन्ते ॥

**फलमन्यत्, क्रिया चान्या**

ननु फलमपि सिद्धं चेत् कः सर्वेषां सिद्धस्वभावानां द्वितीयं विक-

१५ ] ऽपि— nyāma-wit__ka
२१ ] मील— nyāma-wit__kha
२१ ] मील— nyāma-wit__kha
१० ] मिल— nyāma-wit__kha

ल्पं प्रत्याह—मेलनात्त्विति । मेलनानन्तरमिति यावत् । न ज्वलेयुरिति । तण्डुलसलिलानलस्थाल्यादीनि हि मिलितान्येव क्रियानिर्वर्तकत्वात्कारकाणि भवेयुरिति प्रत्येकं सत्त्वे कारकत्वाभावात् क्रियाशून्यत्वापत्त्या विना तण्डुलादिकं काष्ठं न ज्वलेदित्यर्थः ॥ § 291

ननु पाकक्रिया अन्या, अन्या च ज्वलनक्रिया, तथा च प्रत्येकं काष्ठादि पाकनिरूपितकारकत्वशून्यमपि, ज्वलननिरूपितकारकत्वविशिष्टत्वात् प्रत्येकं ज्वलननिर्वर्तने न काऽप्यनुपपत्तिरिति शङ्कते—नन्विति । मैवमिति । पाकादिक्रियानिर्वर्तनकालेऽपि हि काष्ठानां प्रत्येकं सतां यादृशी ज्वलनक्रिया, न ततो विलक्षणा दृश्यत इति अतिरिक्तातीन्द्रियक्रियासिद्धिर्न भवत्येवेति ॥ § 292

नन्विति । अयं भावः—कारकैः फलमेव निर्वर्त्यते, न क्रियेति । सिद्धान्तेऽपि सिद्ध्यसिद्धिभ्यां व्यावातः समानः—किं सिद्धेन फलेन कारकाणां सम्बन्धः ? उतासिद्धेन ? आद्ये फलस्य सिद्धत्वात् कारकव्यापारवैय्यर्थ्यम् । अन्त्येऽस्मत्पक्षादविशेषः, प्रत्येकं कारकैः फलनिष्पत्त्यभावेन कारकत्वासंभवात् । अतः उभयोः समानोऽयं दोष इति चेत्—सत्यं—परन्तु दोषस्य समानत्वेऽप्यतिरिक्तातीन्द्रियक्रियाङ्गीकरणं किमर्थमिति वक्तव्यम् ? यदि च तादृशक्रियाङ्गीकारे सर्वोऽपि दोषः सुपरिहरः स्यात्, अङ्गीकुर्मस्तदा तादृशीं क्रियाम् । भक्षितेऽपि लशुने न शान्तो व्याधिः इति न्यायेन तदङ्गीकारेऽपि दोषसाम्ये फलशून्यं तत् परित्यज्यताम्, क्लृप्तेनैव यथा निर्वाहो भवेत् तथा उपायं उभावप्यावामन्विष्यावः । कोऽयमुपाय इति चेत् ? प्रत्येकस्य समुदायानति

सम्बन्धः ? फलं सिद्धं, कारकाणि सिद्धानीति सम्बन्धाभावः । साध्यं चेत् फलं, सैव क्रिया परिस्पन्दव्यतिरिक्तेति—मैवं वोचः— फलस्य क्रियात्वानुपपत्तेः । ओदनं हि फलं, न क्रिया; क्रियानाम्नि तु क्रियमाणे न विवदामहे ॥

### पचतीत्यादौ पाकशब्दार्थः

ननु पाक इदानीं कः ? न च पचेर्वाच्यशून्यतैव युक्ता— उच्यते—समुदितदेवदत्तादिसकलकारकनिकरपरिस्पन्द एव विशिष्टफलावच्छिन्नः पाक इत्युच्यते; स एव हि पचेरर्थः । ता एव काष्ठपिठरादिक्रिया ज्वलनभरणादिस्वभावाः पृथक्तया व्यवस्थितः तथात्वेनैवावभासन्ते; समुदितास्तु सत्यः फलान्तरावच्छेदात् रूपान्तरेण पाकादिना परिस्फुरन्ति, व्यपदिश्यन्ते च । तथा च देवदत्तः पचतीतिवत् काष्ठानि पचन्ति, स्थाली रेकेण समुदायेन फलनिर्वर्तने प्रत्येकमपि तत् कारकं भवेदेवेति । अतिरिक्ता तु क्रिया न सिद्धा । यदि सिद्धा स्यात् तदा कथंचिन्निर्वाहो वाच्यः । तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन ? इति न्यायेन कारकैः फलनिर्वतनमित्यंगीकार एव युक्तः, न तु मध्ये अतिरिक्ताया अतीन्द्रियायाश्च क्रियायाः सिद्धौ प्रमाणं पश्याम

१२ ] काष्ठानि— nyāma-wit__kha

इति । ननु कारकैः साध्यं तु किञ्चिदुभयसम्मतम् । तत् फलमिति भवन्तो ब्रुवते, क्रियेति तु वयम् । अतः कुतोऽस्मासु प्रद्वेषः इति चेत्, नैवं सति वयं विवदामहे । कारकस्य फलस्य च मध्येऽप्रामाणिकीं अतिरिक्तां तु क्रियां नानुमन्यामह इति । सम्बन्धाभाव इति । सिद्धानि वस्तूनि निराकांक्षाणि । साध्यानां हि सिद्धकारकापेक्षेत्यर्थः ॥ § 293

इदानीं—ज्वलनाद्यपेक्षयाऽतिरिक्तक्रियाया अनङ्गीकारे । पाकः क इति । पाकशब्दार्थः क इत्यर्थः । पचेः—पचधातोः । विशिष्टफलावच्छिन्नः—विक्लृत्यादिरूपविलक्षणफलोद्देश्यकः । ननु यदि पचधातोरतिरिक्तोऽर्थो न स्यात् तदा देवदत्तः पचतीति पाकस्य देवदत्तक्रियात्वेन व्यवहारः कथम् ? काष्ठादि क्रियात्वं पाकस्य कुतो न स्यादिति शङ्कायां उभयोस्तौल्य-मेवाङ्गीकरोति— तथा चेति । ननु देवदत्तः काष्ठैः स्थाल्यां तण्डुलं पचति इति प्रयोगात्

पचतीति व्यपदेशो दृश्यते । देवदत्तस्यापि । दर्वीविघट्टनादिरेव परिदृश्य-मानस्तत्र व्यापारः, न ततोऽन्यः सूक्ष्मः ॥

## आत्मनो न क्रिया

ननु देवदत्तादेर्भौतिको व्यापारः आत्मव्यापारपूर्वको भवितुमर्हति—नैत-देवम्—न ह्यात्मनो व्यापारः कश्चिदस्ति । इच्छाद्वेषपूर्वकप्रयत्नवशादेव स भौतिकव्यापारकरणतां प्रतिपद्यते ॥

तस्मात् कारकचक्रेण चलता जन्यते फलम् ।
न पुनश्चलनादन्यो व्यापार उपलभ्यते ॥ ४७ ॥§ 296

चलन्तो देवदत्ताद्याः तदनन्तरमोदनः ।
एतावद्दृश्यते त्वत्र न त्वन्या काचन क्रिया ॥ ४८ ॥§ 298

काष्ठादीनां करणत्वादिकं सर्वसम्मतम्, विवक्षाभेदेन तु काष्ठानि पच-न्तीत्यादि प्रयोग इति पूर्वमेवोक्तम् । अत एव विविच्य प्रश्ने काष्ठानि ज्वलन्ति, न तु पचन्ती त्येवोच्यते, न तु कदाऽपि देवदत्तः न पचतीत्याशंकायामाह—देवदत्तस्यापीति । अयं भावः—देवदत्तः पचतीत्युक्ते देवदत्तो वा किं क-रोति ? दर्वीं विघट्टयति, काष्ठानि चालयति, अग्निं ज्वालयति; न त्वेभ्यो विलक्षणं पाकाख्यं किञ्चित्कर्म करोति । स्वतन्त्रः कर्ता इतरकारकाणां कर्त्रधीनत्वेन कर्तुः प्राधान्यात् देवदत्तनिष्ठत्वेन पाकस्य व्यवहारः । अत एव यत्र कर्तृवैशिष्ट्यं विना सामग्रीवैशिष्ट्यादेव फलनिष्पत्तिः, तादृशस्थले कर-णादीनामपि प्राधान्यविवक्षया काष्ठानि पचन्ति, असिः छिनत्ति, चक्षुः पश्यति इत्यादिव्यवहारः । अतश्च पाकादिर्नातिरिक्ता सूक्ष्मा क्रियेति ॥ § 299

६ ] न फलं— nyāma-wit__ka
१२ ] तथैवा— nyāma-wit__ka
३२ ] व्यापारः— nyāma-wit__kha
३४ ] व्यापारः— nyāma-wit__kha
५ ] लभ्यते— nyāma-wit__ka

भौतिकः—शारीरकः । अचेतनव्यापारस्य चेतनव्यापारपूर्वकत्वात् आत्मव्यतिरिक्तोऽतीन्द्रियो व्यापारः सिद्ध एवेत्यर्थः । न हीति । विभोरात्मनः परिस्पन्दलक्षणक्रियाया असंभवादिति शेषः । सः—आत्मा । चलनं—क्रिया ॥ § 300

I.52/KSV

## भावनाऽपि न पुरुषव्यापारः

एतेन भावनाख्यः करोत्यर्थः पुरुषव्यापारो वाक्यार्थ इति योऽभ्युपगतः—सोऽपि प्रत्युक्तो वेदितव्यः । न हि पुरुषव्यापारः कश्चिदुपलभ्यते । विशिष्टगुणसमवाय एवास्य कर्तृत्वम् । न च ज्ञानादयो गुणा एव व्यापारसंज्ञावाच्याः, सिद्धस्वभावत्वात् ॥ § 301

## ज्ञानं न क्रियारूपम्

ननु क्रियावचनो धातुरिति जानातेरपि क्रियैव वाच्या स्यात् । सा च क्रिया ज्ञानात्मा पुरुषव्यापारः—नायं नियमः क्रियावचनो धातुरिति । गडि वदनैकदेशे इत्यपि दर्शनात् ॥ § 302

अपि च घटमहं जानामि इत्यत्र भवतः किं प्रतिभासते । घटमिति तावद्विषयः, अहमित्यात्मा; जानामीति तु चिन्त्यं— किमत्र प्रकाशत इति । न व्यापारः, परोक्षत्वात् । फलं यद्यत्र प्रकाशते—तदेव तर्हि धातुवाच्यमभ्युपगतं भवति । तस्मान्न क्रियात्मकं ज्ञानम् ॥ § 303

एतेन—अतीन्द्रियपुरुषव्यापारनिराकरणेन । अभ्युपगतः—भाट्टैरिति शेषः । पचतीत्यस्य खलु पाकं करोतीति विवरणम् । तेन आख्यातं करोतिसमानार्थकमुक्तम् । आख्यातस्य च अर्थभावनाख्यः पुरुषव्यापारोऽर्थः । स च न प्रयत्नपदवाच्यः गुणः, किन्तु क्रिया इति तेषां मतम् । विशिष्टगुणसमवाय एवेति । प्रयते इत्यनुव्यवसायनियामकाकारविशेषविशिष्टप्रयत्नाख्यगुणवत्त्वमेव पुरुषस्य कर्तृत्वम् । प्रयत्नश्च न क्रियारूपः, किन्तु गुण इति न पुरुषव्यापारः अतिरिक्तः सिध्यतीति । सिद्धस्वभावत्वादिति । क्रिया हि साध्यस्वरूपा । ज्ञानादयस्तु घटादिवत् सिद्धपदार्थस्वरूपाः । अतः यत्नः न क्रिया, किन्तु गुण एव ॥ § 304

गडि वदनैकदेश इति । यद्यपि वदनैकदेशक्रियैव धात्वर्थ इत्युक्तं वैयाकरणैः; अथापि भू सत्तायां, अस भुवि इत्यादौ सत्तादीनां सिद्धस्वरूपाणां धात्वर्थतायाः अवश्यवक्तव्यत्वेन प्रकृतेऽपि तथैवास्त्वित्याशयः ॥ § 305

१ ] प्रत्यव— nyāma-wit__kha
१--२ ] घटमिति विषयः— nyāma-wit__ka
३ ] प्रकाश्यते— nyāma-wit__ka

क्रियाया एव धात्वर्थत्वमित्यत्र बाधकमप्याह—अपि चेत्यादि । परोक्षत्वादिति । भवत इति वर्तते ॥ § 306

I.53/KSV

यदि च क्रियात्मकं ज्ञानमभविष्यत्, न भाष्यकारः क्रियातः पृथगेनं निरदेक्ष्यत; निर्दिशति च बुद्धिकर्मणी अपि हि प्रत्यभिज्ञायेते, ते अपि नित्ये प्राप्नुतः इति तस्मात् अन्यत् ज्ञानं, अन्या च क्रियेति न क्रियास्वभावत्वान्नित्यं परोक्षं ज्ञानम् ॥ § 307

## नित्यपरोक्षस्य ज्ञानस्यानुमेयत्वमपि न संभवति

यदि च नित्यपरोक्षो ज्ञातृव्यापारः, स तर्हि प्रतिबन्धाग्रहणादनुमातुमपि न शक्यः । क्रियाविशिष्टवाह्यकारकसिद्धान्तस्य निरस्तत्वात् ॥ § 308

आत्माद्यनुमाने का वार्ता ? इति चेत्—न—तत्र सामान्यतो व्याप्तिग्रहणस्य संभवादिति वक्ष्यामः । इह तु बाह्यकारकेष्वपि न तत्पूर्वकं फलं दृष्टमित्युक्तम् ॥ § 309

न चार्थापत्तिरपि ज्ञातृव्यापारकल्पनायैव प्रभवति; इन्द्रियार्थसन्निकर्षवशादेवार्थदृष्टताया घटमानत्वात् ॥ § 310

## प्राकट्यस्वरूपपरिशीलनम्

का चेयमर्थस्य दृष्टता नाम ? किं दर्शनकर्मता ? किं वा प्रकाशस्वभावतेति ? तत्र दर्शनस्य परोक्षत्वात् कथं तत्कर्मता— अर्थस्य दृष्टता गृह्येत । विशेषणाग्रहणे विशिष्टप्रतीतेरनुत्पादात् । अर्थप्रकाशतायास्तु सर्वान् प्रत्यविशेषात् सर्वे सर्वज्ञाः स्युः ॥ § 311

प्रतिबन्धाग्रहणादिति । व्याप्तिग्रहणासंभवादिति यावत् । ननु कुतोऽसंभवः, विशेषतो दृष्टस्यानुमानस्याभावेऽपि सामान्यतोदृष्टानुमानस्य संभवादित्यत्राह—क्रियेति । ज्वलनभरणाद्यतिरिक्तायाः पाकादिक्रियाया निरस्तत्वात् तद्दृष्टान्तेन सामान्यतोदृष्टानुमानेनापि न साधनसम्भव इति भावः । वक्ष्यामः—सप्तमाह्निक इति शेषः । तत्पूर्वकम्—अतीन्द्रियक्रियापूर्वकम् ॥ § 312

यच्चोक्तं—नान्यथा ह्यर्थसद्भावः इत्यादि; तत्राह—न चेति ॥ § 313

विशेषणाग्रहणे विशेषणस्य—दर्शनस्य अतीन्द्रियत्वेन अग्रहणे । सर्वान् प्रत्यविशेषादिति । नीलादयो ह्यर्थधर्माः सर्वसमानाः, न हि

२१ ] निरदेक्ष्यत्— nyāma-wit__ka

२२--२३ ] नित्यपरोक्षं— nyāma-wit__kha

२४ ] नित्यो— nyāma-wit__ka

२४ ] ज्ञान— nyāma-wit__kha

३ ] मर्थ— nyāma-wit__kha

४ ] दृष्टत्वात्— nyāma-wit__kha

न स्युः, सम्बन्धितयोत्पादादिति चेत्—अकारणमेतत्— अर्थस्यैव हि प्रकाशत्वमतिशयः दीपादेरिव, न पुरुषनियमेन व्यवतिष्ठते ॥

न च द्वित्वादिना साम्यं तस्मिन् नियमदर्शनात् ।
प्रकाशे तु न दीपादौ सम्बन्धनियमः क्वचित् ॥ ४९ ॥§ 316

यदपेक्षाधिया जातं द्वित्वं तस्यैव तद्ग्रहः ।
संवेदनमपि प्राज्ञैः कस्यातिशय उच्यते ॥ ५० ॥§ 318

ज्ञातुश्चेदन्तराऽन्येन व्यापारेणास्य को गुणः ।
ननु नैव क्रियाशून्यं कारकं फलसिद्धये ॥ ५१ ॥§ 320

उक्तमत्र क्रिया ह्येषा यथादर्शनमिष्यताम् ।
ज्ञानं संवेदनं चेति विद्मः पर्यायशब्दताम् ॥ ५२ ॥§ 322

संवेदनं तु ज्ञानस्य फलत्वेन न मन्महे ।
अर्थातिशयपक्षे च सर्वसर्वज्ञता पुनः ॥ ५३ ॥§ 324

नीलो घटः कंचित्प्रति नीलः, अन्यं प्रत्यनीलो भवेत्; तद्वत् प्रकाशस्याप्यर्थधर्मत्वे सर्वान् प्रत्यविशेषप्रसंगेन सर्वे सर्वज्ञाः स्युः ॥ § 325

सर्वसर्वज्ञतापत्तिं परिजिहीर्षति—न स्युरिति । सम्बन्धितयोत्पादादिति । प्रकाशस्य सप्रतियोगिकपदार्थत्वात्, प्रकाशते इत्युक्ते कं प्रति, किं प्रकाशते इति सम्बन्धाकाङ्क्षाया नियतत्वेन सर्वान् प्रति नाविशेषप्रसङ्गः । यथा खलु पदार्थधर्मोऽपि द्वित्वादिः न सर्वैर्गृह्यते तथेत्यर्थः । न व्यवतिष्ठत इति । न हि दीपः एकं प्रति प्रकाशते, तदैवान्यं प्रति न प्रकाशत इत्यर्थः ॥ § 326

द्वित्वादिसाम्यं प्रकाशस्य परिहरति—न चेत्यादि । अयं भावः— द्वित्वादिकं तु अपेक्षाबुद्धिजन्यं वयमिच्छामः । अतस्तेषां पदार्थधर्मत्वेऽपि प्रकाशरूपत्वाभावात् न सर्वसाधारण्यम् । प्रकाशाख्यस्तु धर्मः यदि वस्तुनः स्यात् स कथमन्यस्याप्रकाशरूपः स्यात् इति ॥ § 327

केचित्तु प्रकाशस्थाने संवेदनाख्यमङ्गीकुर्वन्ति । तमपि पक्षं पूर्ववदेव विकल्प्य दूषयति—संवेदनमपीति । अन्तराऽन्येनेति । पुरुषसंवेदनयोर्मध्ये ज्ञानाख्यातिरिक्तव्यापारेण किं प्रयोजनमित्यर्थः ॥ § 328

---

१६ ] अर्थस्यैव— nyāma-wit__ka
१७ ] दीपादिरिव— nyāma-wit__ka
१९ ] सम्बन्धि— nyāma-wit__ka
२० ] धिया ज्ञातं nyāma-wit__ka ; धियो जातं
२० ] द्वित्वमस्यैव— nyāma-wit__ka
२२ ] ज्ञातुश्चेदन्तर— nyāma-wit__ka
१ ] वेति— nyāma-wit__kha
३ ] तु— nyāma-wit__kha

I.55/KSV

भट्टपक्षात् विशेषश्च न कश्चित् कथितो भवेत् ।
नोभयातिशयोऽप्येषः दोषद्वितयसम्भवात् ॥ ५४ ॥[§ 330]

संवेदनं च तत् केन ग्राह्यं ज्ञानानुमापकम् ।
अनवस्था भवेदस्य ज्ञाने संवेदनान्तरात् ॥ ५५ ॥[§ 332]

स्वसंवेद्या च संवित्तिः उपरिष्टान्निषेत्स्यते ।
स्मृतिप्रमोषवादे च रजतस्मरणात्मिका ॥ ५६ ॥[§ 334]

कथं ते फलसंवित्तिः स्वप्रकाशा भविष्यति ।
नाभाति स्मृतिरूपेण न चाप्यनुभवात्मना ॥ ५७ ॥[§ 336]

न तृतीयः प्रकारोऽस्ति तत् कथं सा प्रकाशताम् ।
न च क्वचिदनाकारा संवित्तिरनुभूयते ॥ ५८ ॥[§ 338]

इयं संविदयं चार्थ इति नास्ति हि भेदधीः ।
अर्थाकारानुरक्ता तु यदि संवित् प्रकाशते ॥ ५९ ॥[§ 340]

भट्टपक्षादिति । संवेदनस्यार्थगतातिशयरूपत्वात् भाट्टसम्मतप्राकट्यस्थाने संवेदनं मूर्धाभिषिक्तं नान्यो विशेष इत्यर्थः । उभयं—ज्ञाता, विषयश्च । दूषणान्तरमाह—संवेदनमिति । ज्ञानानुमापकं तच्च संवेदनं केन ग्राह्यं इत्यन्वयः । यदि न केनापि, तर्हि लिङ्गज्ञानाभावान्नानुमानोदयः । यद्यन्येन, तर्ह्यनवस्था । यदि च स्वप्रकाशं, तत्तूत्तरत्र दूष्यते इति दूषणाशयः । उपरिष्टात्—विज्ञानाद्वैतनिरासावसरे प्रामाण्यस्वतस्त्वनिराकरणावसरे च । ज्ञानानां स्वप्रकाशत्वे बाधकमप्याह—स्मृतीति । भ्रमस्थले अख्यातिवादिनस्ते एवं वदन्ति—शुक्तिप्रत्यक्षं रजतस्मरणं चेति ज्ञानद्वयरूपमेव इदं रजतमिति ज्ञानम् । तत्र रजतस्मरणं न स्मृतित्वेन गृह्यते इत्यख्यातिरुपपद्यत इति । एतस्मिन् वादे स्मृतित्वस्याग्रहणं कथम् ? ज्ञानं खलु स्वप्रकाशम् । यदि च ज्ञानग्रहणेऽपि तद्गतं स्मृतित्वं न गृहीतं, तर्हि प्रामाण्यमपि तथेति युक्तम् । ननु स्मृतित्वाकाराग्रहणेऽपि स स्वप्रकाशा भवत्येवेति चेत्—न—निर्धर्मकस्य ज्ञानस्य भानासंभवात् । स्मृतित्वं न गृहीतं, अनुभवत्वमपि न गृहीतं, तर्हि केनाकारेण तज्ज्ञानं भासते ? यदि ज्ञानत्वमात्रेण, तदा प्रामाण्यमपि न भासेत । किञ्च ज्ञानस्य सामान्यतो भानं तु न संभवति । निराकारज्ञान-

२३ ] वादेऽपि— nyāma-wit__ka
१ ] नास्ति च— nyāma-wit__ka

भानासंभवात् । विषयोपरागे च तदधीनं स्मृतित्वप्रत्यक्षत्वादिकमपि भासेत ॥ § 341

ननु विषयोपरागातिरिक्तः ज्ञानाकार एव नास्ति । अतो विषयाकारेणैव

वाह्यार्थनिह्नवस्तर्हि त्वया सौगतवत् कृतः ।
स्वप्रकाशमते युक्तं न फलं संविदात्मकम् ॥
तस्मात् फलानुमेयस्य व्यापारस्य न मानता ॥ ६० ॥§ 345

### गृहीतग्रहणेऽपि प्रामाण्यं वर्तत एव

यदपि प्रमाणविशेषणमनधिगतार्थग्राहित्वमभिधीयते परैः— तदपि न सांप्रतम्—प्रमाणस्य गृहीततदितरविषयप्रवृत्तस्य प्रामाण्ये विशेषाभावात् ॥

ननु गृहीतविषये प्रवृत्तं प्रमाणं किं कुर्यात् ? अगृहीतेऽपि किं कुर्यात् ? प्रमामिति चेत्; गृहीतेऽपि तामेव विधत्ताम् । कृतायां करणायोगादिति चेत्—न—प्रमान्तरकरणात् । प्रमान्तरकरणे किं फलमिति चेत्—प्रमान्तरकरणमेव फलम्; न च फलस्य फलं मृग्यम् । न च प्रयोजनानुवर्ति प्रमाणं भवति ॥ ज्ञानस्यापि भानम् । अतश्च न स्मृतित्वभानापादनप्रसक्तिरिति चेत् सौगतसन्दर्शितोऽयं पन्थाः न वैदिकादरणमर्हति । अर्थाकारातिरिक्तः ज्ञानाकारो यतः नोपलभ्यते, अतः ज्ञानाकारार्थाकारयोरैक्यं सिद्ध्येत् । तेन च भिक्षुपादप्रसरणन्यायेन सर्वसंप्रतिपन्नज्ञानाकारेणैव निर्बाहे अर्थाकारः कल्पितोऽप्युपपद्यत इति बाह्यार्थनिह्नव एव तदुक्तदिशा सिद्ध्येत् । अतः अर्थाकारातिरिक्तः स्मृतित्वाद्याकारः एषितव्य एव । ज्ञानानां स्वप्रकाशत्वे च स्मृतित्वस्यापि ग्रहणावश्यंभावेन अख्यातिस्मृतिप्रमोषवाद एव नावतिष्ठेतेति ज्ञानानां न स्वप्रकाशत्वं युक्तम् । न युक्तं च संवेदनप्राकट्याद्यनुमेयस्य ज्ञानस्य कियात्मकतेति ॥ § 346

परैः भाट्टैः । तथोक्तम्—तस्मात् दृढं यदुत्पन्नं न च संवादमृच्छति । ज्ञानान्तरेण विज्ञानं तत्प्रमाणं प्रतीयताम् ॥ श्लो. वा. १-१-२ श्लो. ८० इति । तदितरेति । अगृहीतेत्यर्थः ॥ § 347

नन्वस्ति विशेष प्रयोजनतदभावरूप इति शङ्कते—नन्विति । न च प्रबोजनानुवर्ति प्रमाणमिति । तथा च न पर्यनुयोगावकाश इत्यर्थः ॥ § 348

I.57/KSV

कस्य चैष पर्यनुयोगः ? न प्रमाणस्य, अचेतनत्वात् । पुंसस्तु सन्निहिते विषये करणे च संभवन्ति ज्ञानानीति सोऽपि किमनुयोज्यताम् ! किम-

२८ ] गृहीते— nyāma-wit__ka
२८ ] प्रवृत्तं प्रमाणं— nyāma-wit__kha
२८ ] कुर्यात्— nyāma-wit__kha
२९ ] प्रमाणमिति— nyāma-wit__ka
२९ ] विदधातुम्— nyāma-wit__kha
३० ] प्रमाणान्तर— nyāma-wit__ka
३०--३१ ] प्रमाणान्तर— nyāma-wit__ka

क्षिणी निमील्य नास्से, कस्मात् दृष्टं विषयं पश्यसीति ? प्रमाणस्य तु न किञ्चिद्बाधं पश्यामः, येन तदप्रमाणमिति व्यवस्थापयामः । न च सर्वात्मना वैफल्यं, हेये अहिकण्टकवृकमकरविषधरादौ विषये पुनःपुनरुपलभ्यमाने मनस्सन्तापात् सत्वरं तदपहानाय प्रवृत्तिः; उपादेयेऽपि चन्दनघनसारहार-महिलादौ परिदृश्यमाने प्रीत्यतिशयः स्वसंवेद्य एव भवति ॥ § 349

## धारावाहिविज्ञानानि समानविषयाण्येव

यच्चेदमुच्यते—

यत्रापि स्यात् परिच्छेदः प्रमाणैरुत्तरैः पुनः ।
नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तथा ॥
श्लो. वा. १-१-२. श्लो. ७४ § 353

इति तदपि न हृदयङ्गमम् । यतः— § 354

प्रश्नानवसरमेवोपपादयति—कस्य चेति । किमक्षिणी निमील्य... पश्य-सीति अनुयोज्यतां किम् ? इत्यन्वयः । बाधः—नेदं रजतमित्यादिवदुत्तर-कालिकः । एतदुक्तं भवति—ज्ञानं न पुरुषतन्त्रम्, अपि तु करणतन्त्रम् । तथा च दृष्टेऽप्यर्थे चक्षुः पुनः ज्ञानमुत्पादयत्येव । तस्य च बाधाद्यदर्शनात् नाप्रामाण्यं वक्तुं शक्यम् । अन्यथा धारावाहिविज्ञानस्य प्रामाण्यं न स्यात् इति । अधिकमन्यत्र ॥ § 355

गृहीतग्राहिणोऽपि प्रयोजनमुपपादयति—न चेत्यादिना । जन्ममृत्युज-राव्याधिदुःखदोषानुदर्शनम् इत्यादिना दोषानुदर्शनस्य वैराग्यहेतुत्वं भगव-तोक्तम् । परिदृश्यमान इति । पुनःपुनरिति आवर्तते । तथा चोक्तं भगवता— ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते इति । स्वसंवेद्यः—आत्मसाक्षिकः ॥ § 356

यत्रापीति । यस्मिन् विषये उत्तरैः प्रमाणैः पुनः परिच्छेदः— विषयीक-रणं स्याच्चेत्, तत्रापि पूर्वेण ज्ञानेन तथा—अन्ततः तत्कालवृत्तित्वादिना वा नूनं नावधृतः । उत्तरज्ञानविषयः कालादिः पूर्वज्ञाने न विषयो भवतीत्यन-वगतार्थगन्तृत्वं धारावाहिज्ञानस्य वर्तत एवेत्याशयः ॥ § 357

I.58/KSV

नैवाधिकपरिच्छेदः प्रमाणैरुत्तरैर्ध्रुवम् ।
धारावाहिकबोधेषु कोऽधिकोऽर्थः प्रकाशते ॥ ६१ ॥ § 359

---

१३ ] कस्यैव— nyāma-wit_ka
१३--१४ ] सन्निहिते— nyāma-wit_kha
१६ ] किञ्चिदृश्यं— nyāma-wit_ka
१८ ] हि— nyāma-wit_ka

न हि स्वहस्ते शतकृत्वोऽपि परिदृश्यमाने केचन विशेषाः परिस्फुरन्ति ॥ § 360

ननु गृहीतेऽपि विषये प्रवर्तमानं प्रमाणं कदा विरमेत् ? न हि तस्य विरतौ कञ्चिदवधिमधिगच्छामः । प्रमोत्पादस्त्ववधिरनेन लङ्घित एव—उच्यते—विषयान्तरसम्पर्काद्वा श्रमाद्वा उपायसङ्क्षयाद्वा विरामो भविष्यति ॥ § 361

अनवस्थापि चेयं न मूलघातिनी । न ह्युत्तरोत्तरविज्ञानोपजननं विना प्रथमज्ञानोत्पादो विहन्यते ॥ § 362

मूलक्षतिकरीमाहुरनवस्थां हि दूषणम् ।
मूलसिद्धौ त्वरुच्याऽपि नानवस्था निवार्यते ॥ ६२ ॥ § 364

यदि चानुपलब्धार्थग्राहि मानमुपेयते ।
तदयं प्रत्यभिज्ञायाः स्पष्ट एव जलाञ्जलिः ॥ ६३ ॥ § 366

नैवेत्यादि । कालस्यातीन्द्रियत्वस्य साधयिष्यमाणत्वात् तत्तत्कालादिविषयत्वेन भेदोपपादनं न संभवत्येव । केचनेति । अपूर्वा इति शेषः ॥ § 367

लङ्घित एवेति । एकदा प्रमोत्पादनेनैव करणानि हि चरितार्थानि । पुनःपुनरुत्पादने तु अवसानमेव न स्यादिति भावः ॥ § 368

ननु एतावत्पर्यन्तं प्रमाऽनुवर्तत इति यदि न नियमः, कथं तर्हि व्यवस्था इति शङ्कायां एतादृश व्यवस्थाभावो न दोषायेति समाधत्ते— अनवस्थापीति । उपजननं विना—उपजननाभावे । उत्पन्नं हि ज्ञानमुत्पन्नमेव, न तस्योत्तरत्रानुवृत्त्याऽननुवृत्त्या वा विघातसंभवः । यावत्कारणमनुवर्तताम्, का हानिरिति भावः । न हीति । योग्यविभुविशेषगुणा हि स्वानन्तरोत्पन्नविशेषगुणनाश्या इत्यर्थः ॥ § 369

जलाञ्जलिरिति । तत्तांशे गृहीतग्राहित्वात् इति भावः । तथा च क्षणभङ्ग एव सिद्ध्येदित्याशयः । विशिष्टवेषेणानधिगतार्थविषयकत्वमपि

यश्चेदानीन्तनास्तित्वप्रमेयाधिक्यलिप्सया ।
तस्याः प्रमाणतामाह सोऽपि वञ्चयतीव नः ॥ ६४ ॥ § 372

आविनाशकसद्भावात् अस्तित्वं पूर्वया धिया ।
स्पष्टमेव, तथा चाह चिरस्थायीति गृह्यते ॥ ६५ ॥ § 374

तस्मादनुपलब्धार्थग्राहित्वे त्यज्यतां ग्रहः । § 375

१८ ] दृश्यमाने— nyāma-wit__kha
२० ] न— nyāma-wit__kha
२१ ] तस्य— nyāma-wit__ka
२१ ] किञ्चि— nyāma-wit__kha
२३ ] प्रमादाद्वा— nyāma-wit__kha
२४ ] न— nyāma-wit__ka
१६ ] अविनाशक— nyāma-wit__ka

## स्मृतेः प्रामाण्यवारणम्

नन्वेतस्मिन् परित्यक्ते प्रामाण्यं स्यात् स्मृतेरपि ॥ ६६ ॥§ 376

न स्मृतेरप्रमाणत्वं गृहीतग्राहिताकृतम् ।
अपि त्वनर्थजन्यत्वं तदप्रामाण्यकारणम् ॥ ६७ ॥§ 378

### स्मृतेरनर्थजत्वोपपादनम्

ननु कथमनर्थजा स्मृतिः ? तदारूढस्य वस्तुनः तदानीमसत्त्वात् । कथं तर्हि भूतवृष्ट्यनुमानं नानर्थजम्; तत्र धर्मिणोऽनुमेयत्वात्, तस्य च ज्ञानजनकस्य तत्र भावात् । नद्याख्य एव धर्मी वृष्टिमदुपरितनदेशसंसर्गलक्षणेन धर्मेण तद्वाननुमीयते, विशिष्टसलिलपूरयोगित्वात् । स चानुमानग्राह्यो धर्मी विद्यत एवेति नानर्थजमनुमानम् ॥ नोपपादयितुं शक्यमित्याह यश्चेति । आहेति । लोक इति शेषः । इतिः भिन्नक्रमः ॥ § 379

एतस्मिन्—अनधिगतार्थगन्तृत्वरूपे विशेषणे । समाधत्ते—नेति ॥ § 380

अपवरकनिहितं घटं स्मृत्वा प्रवर्तमानस्यार्थलाभात् कथमनर्थजत्वं स्मृतेरित्याशङ्कते । नन्विति । समाधत्ते—तदारूढस्येति । स्मृतौ विषयीभूतस्येत्यर्थः । तदानीं—स्मरणकाले । तद्वान्—धर्मवान्—वृष्टिमदुपरितनदेशसंसर्गवान् इति यावत् । इयं नदी वृष्टिमदुपरितनदेशसंसर्गवती, कलुषात्यन्तवेगवत्परिपूर्णप्रवाहवत्त्वात्—इत्यनुमानाकारो बोध्यः ॥ § 381
I.60/KSV

## प्रातिभं ज्ञानं अर्थजन्यमेव

कथं तर्हि प्रातिभं अनागतार्थग्राहि श्वो मे भ्राताऽऽगन्ता इति प्रत्यक्षमर्थजमिष्यते भवद्भिः ? तत्र देशान्तरे वर्तमानस्य भ्रातुः श्वोभाव्यागमनविशेषितस्यैव तथैव ग्रहणम्; तेन च रूपेण गृह्यमाणस्य सतस्तस्य ज्ञानजनकत्वमिति अर्थजमेव प्रातिभम् । स्मरणं तु निर्दग्धपित्रादिविषयमनपेक्षितार्थमेव जायमानं दृष्टमिति अन्यत्र देशान्तरस्थितार्थस्मरणे तदर्थसत्त्वमकारणमेव ॥ § 382

तस्मादनर्थजत्वेन स्मृतिप्रामाण्यवारणात् ।
अगृहीतार्थगन्तृत्वं न प्रमाणविशेषणम् ॥ ६८ ॥§ 384

समानतन्त्रोक्तत्वात्—भवद्भिरिति । तथा च काणादं सूत्रम्—आर्षं सिद्धदर्शनं च वेदेभ्यः १-२ इति । अत्र भाष्यम्—(?')आम्नायविधातॄणामृषीणां अतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु ध-

१ ] षः— nyāma-wit__kha

र्मादिषु...धर्मविशेषवशाद्यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तत् आर्षमित्याचक्षते । तत्तु प्रस्तारेण बाहुल्येन देवर्षीणाम् । कदाचिदेव लौकिकानाम्—यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयति इति इति । प्रातिभं च ज्ञानं प्रणिधानलिङ्गादिज्ञानानां... न्या. सू. ३-२-३३ इति सूत्रभाष्यदर्शनेन नैय्यायिकानामपि सम्मतमेव ॥ § 385

तथैव ग्रहणमिति । श्वोभाव्यागमनविशिष्टत्वेनैव देवदत्तस्य ग्रहणात् अर्थजमेव तज्ज्ञानमिति । नन्वेवं स्मृतेरपि अतीतकालादिविशिष्टघटादिरेव विषय इति तस्याः कथमनर्थजत्वमिति शङ्कायामाह—स्मरणन्त्विति । तथा च विशिष्टस्यैवानुमानम्; तत्र च धर्मिणः तदानीमपि सत्त्वात् नानर्थजं तत् । स्मृतिस्थले तु धर्म्यपि न तदानीमस्तीति अस्ति महान् भेद इति भावः ॥
§ 386

ननु प्रत्यक्षमप्यसदर्थविषयकं दृश्यत एव शुक्तौ इदं रजतमित्यादि । अतः क्वचित् अर्थजन्यत्वाभावमात्रेण सर्वत्राप्रामाण्यसाधने प्रत्यक्षादीनामपि अप्रामाण्यं स्यात् । निर्दग्धपितृस्मरणेऽपि पिता भूतकालवृत्तित्वेनैव स्मर्यते । तत्काले च पिता आसीदेव । अतः कथं स्मृतेरनर्थजत्वं तदानीं पित्रभावमात्रेण इति शङ्कायामाह—अन्यत्रेति । अयं भावः—शुक्तिरजतादिभ्रमाणामपि

### अनधिगतार्थगन्तृत्वं प्रामाण्यस्वरूपं न जैमिनिसम्मतम्

शब्दस्यानुपलब्धेऽर्थे प्रामाण्यं चाह जैमिनिः ।
सर्वप्रमाणविषयं भवद्भिर्वर्ण्यते कथम् ॥ ६९ ॥§ 389

### धर्मकीर्त्युक्तप्रमाणसामान्यलक्षणपरिष्करणम्

अपरे पुनः—अविसंवादकत्वं प्रमाणसामान्यलक्षणमाचक्षते । तदुक्तम्—प्रमाणमविसंवादि ज्ञानम् इति ॥

अविसंवादकत्वं च प्रापकत्वमुच्यते । ज्ञानस्य प्रापकत्वं— सुखदुःखसाधनसमर्थपदार्थप्राप्तिपरिहारहेतुभूतायाः प्रवृत्तेर्निमित्तप्रदर्शकत्वमेव; ज्ञानप्रदर्शिते हि विषये प्रवृत्तौ सत्यां प्राप्ति- अर्थजत्वं ग्रन्थकृतैवोत्तरत्र निरूप्यते । अतो न तत्तौल्यं स्मृतेः । अत्रेदमवधेयम्— पूर्वानुभवमन्तरा स्मृतिः कदापि न जायत इति संप्रतिपन्नं सर्वेषाम् । अतः परमुखनिरीक्षणान्न स्मृतेः प्रमात्वम् । यद्यप्यनुमानादीनामपि पूर्वानुभवापेक्षाऽस्त्येव; अथापि अपूर्वार्थविषयकत्वात् न स्मृतितौल्यम् । एवं तर्हि अपूर्वार्थविषयकत्वमेव प्रमात्वमित्यङ्गीक्रियतामिति तु न युक्तम्—धारावाहिविज्ञानानामप्रमात्वप्रसङ्गात् । वस्तुतस्तु प्रमाणलक्षणे अर्थोपलब्धिं विदधती इति विशेषणदानेनैव स्मृतिहेतोः प्रमाणत्वव्यावृत्तिः । अत एव प्रमालक्षणेऽप्यनुभवपदनिवेशः । अतश्च स्मृतेरनुभवत्वाभावादेव न प्रमात्वम् । किं बहुना ! शाब्दज्ञानस्य

७ ] तां— nyāma-wit__ka

सम्बन्धग्रहणपूर्वकत्वेन सम्बन्धग्रहणकाले प्रतिभातानामेव शाब्दबोधे भानात् अनधिगतार्थगन्तृत्वं शाब्दबोधादौ दुरुपपादमेव ॥ § 390

ननु अर्थेऽनुपलब्धे तत्प्रमाणम् इति जैमिनिभिः सूत्रणात् अनवगतार्थगन्तृत्वमेव प्रामाण्यं जैमिनिसम्मतमित्याशङ्कां वारयति—शब्दस्येति । वेदाख्यस्य शब्दप्रमाणस्य हि प्रामाण्यं तादृशं युक्तमेव, तत्तु न सर्वप्रमाणानुगतम् । शब्दसूत्र एव श्रवणादिति भावः ॥ § 391

धर्मकीर्तिना प्रमाणवार्तिके प्रमाणमविसंवादि ज्ञानम्; अर्थक्रियास्थितिः । अविसंवादनम् इति कथितम् । धर्मोत्तराचार्यैश्च न्यायबिन्दुटीकायां चेदं लक्षणं सम्यक् समर्थितम् । तत्सर्वमालोड्य स्वयं तत् अतिविशदयति—अपरे पुनरित्यादि ॥ § 392

सुखदुःखेत्यादि । सुखदुःखसाधनसमर्थेत्यस्य यथासंख्यं पदार्थप्राप्तिपरिहारयोरन्वयः । निमित्तस्य प्रदर्शकत्वमित्यर्थः । अर्थप्रदर्शकत्वमेवोपपादयति—ज्ञानेति । नन्विदमसम्बद्धमुच्यते—प्रमाणस्य प्रदर्शकत्वमेव

र्भवतीतिप्राप्तिं प्रति प्रमाणस्य प्रदर्शकत्वमेव व्यापारः । प्रदर्शयता हि तेन सोऽर्थः प्रापितो भवति, यथा हन्तव्यं प्रति राज्ञामाज्ञादानमेव हन्तृत्वम् । तदुक्तं प्रापणशक्तिः प्रामाण्यम् इति । लोकेऽपि च प्रदर्शितं वस्तु प्रापयतः प्रमाणत्वव्यवहारः ॥

तच्च प्रापकत्वं प्रत्यक्षानुमानयोरुभयोरप्यस्तीति प्रमाणसामान्यलक्षणम् ॥

तत्र प्रत्यक्षस्य वस्तुस्वलक्षणविषयत्वात् तस्य च क्षणिकत्वेन प्राप्त्यसम्भवेऽपि तत्सन्तानप्राप्तेः सन्तानाध्यवसायजननमेव प्रापकत्वम् । अनुमानस्य त्वारोपितार्थविषयत्वेऽपि मूलभूतवस्तुक्षणपारम्पर्यप्रभवत्वात् मणिप्रभामणिबुद्धिवत् तत्प्राप्त्या प्रापकत्वम् । व्यापारः अर्थप्रापकत्वं प्रामाण्यमिति च इत्यत्राह—प्रदर्शयता हीति । लोकेऽपीति । शुक्तौ रजतज्ञानं हि प्रदर्शितं रजतं न प्रापयतीति अप्रमेत्युच्यत इति शेषः ॥ § 393

क्षणिकवादे प्रदर्शितस्य प्राप्तिर्न संभवत्येवेति शङ्कायामाह—तत्रेति । सन्तानाध्यवसायेति । ज्ञानस्य स्वलक्षणमात्रविषयकस्यैव प्रमात्वात् । अर्थस्य क्षणिकत्वेन प्राप्तिकाले दृष्टस्य नष्टत्वेन दृष्टस्य प्राप्त्यसंभवेऽपि तत्सन्तानघटकवस्तुप्राप्तेः एकसन्तानविषयकाध्यवसायजननेनैव प्रापकत्वमित्यर्थः । आरोपितेति । धर्मः धर्मिणो भिन्नश्चेत् हिमवद्विन्ध्ययोरिव सम्बन्धानुपपत्तिः । अभिन्नश्चेत्सुतरां सम्बन्धानुपपत्तिः, सम्बन्धस्य द्विनिष्ठत्वात् । अतो धर्मधर्मिरूपवस्तुद्वयं नास्त्येव । किन्तु वस्तुस्वरूपं धर्मधर्मिभावादिकल्पनाहीनमेव

---

१०--११ ] प्रमाणमविसंवादकत्वं— nyāma-wit__kha
१२ ] भूतायाः— nyāma-wit__kha
१२ ] त्तं— nyāma-wit__kha
३ ] हर्तव्यं— nyāma-wit__kha
३ ] हर्तृत्वं— nyāma-wit__kha
४ ] प्रमाण— nyāma-wit__ka
४ ] प्रापयतः— nyāma-wit__ka
६ ] प्रमाणा— nyāma-wit__ka

। तदेव स्वलक्षणमित्युच्यते । प्रथमाक्षपातसमनन्तरं यत् ज्ञानं प्राथमिकं तत् स्वलक्षणमात्रविषयकं निर्विकल्पं प्रमाणञ्च । अनन्तरं च एकस्यां प्रमदातनौ कामिनीत्वादिकमिव वासनया आकाराः कल्प्यन्ते । वासनाधीनत्वादेव आकाराः मिथ्याः । तद्विषयत्वाच्च सविकल्पकमप्रमाणम् । अनुमानमपि सविकल्परूपत्वादारोपितार्थविषयकमप्रमाणं च इति तेषां मतम् । मणिप्रमेति । तथोक्तं प्रमाणवार्तिके— § 394

मणिप्रदीपप्रभयोः मणिबुद्ध्याऽभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥§ 396

यथा, तथाऽयथार्थत्वेऽप्यनुमानतदाभयोः ।
अर्थक्रियाऽनुरोधेन प्रमाणत्वं व्यवस्थितम् ॥ इति
॥§ 398

I.63/KSV

तदिदमध्यवसितप्रापकत्वं प्रामाण्यं अध्यवसितस्यावस्तुत्वेऽपि तन्मूलवस्तुप्राप्त्या निर्वहति, यथाऽध्यवसितप्रापकं च प्रमाणमिति मतम् । अतश्च पीतशङ्खादिग्राहिणां शङ्खादिमात्रप्राप्तौ सत्यामपि न प्रामाण्यम्, यथाऽध्यवसितस्याप्राप्तेः । अवगतो हि पीतश्शङ्खः, प्राप्यते च श्वेत इति । तस्माद्यथाऽवगतार्थप्रापकत्वं—अविसंवादकत्वं प्रामाण्यमिति ॥ § 399

## धर्मकीर्त्युक्तप्रमाणसामान्यलक्षणदूषणम्

तदेतदनुपपन्नम्—इदमेव तावद्भवान् व्याचष्टाम् ! किं प्रदर्शितप्रापकं प्रमाणम् ? उताध्यवसितप्रापकम् ? § 400

तत्रानुमाने प्रदर्शनमेव नास्ति, का कथा तत्प्रापणस्य ! प्रत्यक्षे तु बाढं प्रदर्शनमस्ति, न तु प्रदर्शितं प्राप्यते; क्षणिकत्वेनातिक्रान्तत्वात् ॥ § 401

अध्यवसितप्रापकत्वमपि दुर्घटम् । अध्यवसायस्य भवन्मते वस्तुविषयत्वाभावात्; अवस्तुनश्च प्राप्तुमशक्यत्वात् । तदुक्तं भवद्भिः—यथाऽध्यवसायमतत्त्वत्वात्, यथातत्त्वं चानध्यवसायात् इति ॥ § 402

१ ] प्रमाणं— nyāma-wit__ka
२ ] प्रापकत्वं च प्रामाण्यमिति— nyāma-wit__ka
३--४ ] यथाऽवगत— nyāma-wit__kha
८ ] प्रदर्शितमेव— nyāma-wit__ka
१० ] अध्यवसिता— nyāma-wit__ka
१० ] प्रापण— nyāma-wit__kha
१२ ] तत्त्वात्— nyāma-wit__ka

मूलभूतवस्तुप्राप्तिस्तु काकतालीयम् । न तु तदन्यतरेणापि प्रमाणेनापि स्पृष्टम्, यद्वत्वा प्राप्यते ॥ § 403

व्याचष्टाम् । चक्षिङ् व्यक्तायां वाचि, लोटि प्रथमैकवचनम् ॥ § 404

प्रदर्शनमेव नास्तीति । अनुमेयस्य वस्तुनः परोक्षत्वादिति भावः ॥ § 405

अतिक्रान्तत्वादिति । निर्विकल्पकस्य प्रमात्वेऽपि, न हि दृष्टमेव प्राप्तुं शक्यते, क्षणिकत्वाद्वस्तूनामित्यर्थः । वस्तुविषयत्वाभावादिति । तन्मते हि सविकल्पकगृह्यमाणं वस्तु न सत्यम् । विकल्पस्याप्रमात्वात् । यथेत्यादि । अध्यवसायगृहीतप्रकारेण हि वस्तु मिथ्या, यथाभूतं च वस्तु न विकल्पे भासत इत्यर्थः ॥ § 406

ननु तर्हि विकल्पाधीनप्रवृत्तावपि फलं लभ्यत एवेति शङ्कायामाह—मूलेति । अन्यतरेण—प्रत्यक्षेण, अनुमानेन वा ॥ § 407
I.64/KSV

सन्तानप्राप्त्या तत्प्राप्तिरित्यपि न युक्तम्—सन्तानस्य भेदाभेदविकल्पाभ्यामनुपपन्नत्वात् । एतच्च सविस्तरं क्षणभङ्गभङ्गे निरूपयिष्यते ॥ § 408

## प्रमाणस्य सांवृतसत्यत्वनिरासः

ननु काल्पनिकेऽपि सन्ताने सति संवृत्त्या प्रमाणलक्षणमिदं निर्वक्ष्यते; यथोक्तं—(?')सांव्यवहारिकस्यैतत्प्रमाणस्य लक्षणम्, § 409

अयं भावः—प्रभायां मणिबुद्धिवत् विकल्पानामर्थप्रापकत्वेन यदि प्रामाण्यमुपपाद्यते, तर्हि प्रभायां मणिबुद्धेरपि प्रमात्वप्रसङ्गः । न चेष्टापत्तिः; तर्हि शुक्तौ रजतमितिबुद्धेः अतस्मिंस्तद्विषयायाः प्रमात्वप्रसङ्गः । न च शुक्तिरजतबुद्धेः अर्थप्रापकत्वाभावान्न प्रमात्वमिति वक्तुं शक्यम्; रङ्गरजतयोरिमे रजतरङ्गे इत्यादिभ्रमस्थले रजतप्राप्तेः सत्त्वेन प्रमात्वप्रसङ्गः । न च यत् दृष्ट्वा रजतमिति प्रवर्तते तत्प्राप्तौ न रजतप्राप्तिः, रङ्गस्यैव प्राप्तेः । रजतप्राप्तिस्तु रजतस्याकस्मात्तत्र सन्निधानादाकस्मिकीति नार्थप्रापकत्वं रङ्गे रजतबुद्धेरिति वाच्यम्; प्रकृतेऽपि यां प्रभां दृष्ट्वा मणिरिति प्रवृत्तः, तत्र तत्प्राप्तिः—प्रभायाः प्राप्तिः, न तु मणिप्राप्तिः; मणिप्राप्तिस्त्वाकस्मिक्येवेति तुल्यम् । न च प्रभामणिबुद्धेरर्थप्रापकत्व नियतमेवेति आकस्मिकत्वं कथमिति शंक्यम्; अविनाभावकृतं तन्नैय्यत्यम्, न तु प्रभाज्ञानाधीनं तत् । अस्तु स एव विशेष इति चेत्, पीतशङ्खभ्रमात् प्रवृत्तौ शंखस्य प्राप्त्या कथं तस्य भ्रमत्वमुच्यते ? ननूक्तं तत्र कारणं यथाध्यवसिताऽप्रापकत्वात्, अध्यवसितः पीतः शंखः, प्राप्यते तु श्वेतः शंख इति चेत्, प्रकृतेऽपि मणिप्रभायां मणिबुद्धौ महत्त्वादिविशिष्टः अध्यवस्यते, प्राप्यते चाणुर्मणिः । न

३ ] निर्वक्ष्यति— nyāma-wit_kha ४ ] संव्यव— nyāma-wit_ka

हि मणितत्प्रभयोराकारभेद एव नास्ति, अनुभवविरोधात् । अतश्च यथाध्यवसितार्थप्रापकत्वं कस्यापि विकल्पस्य नास्त्येवेति भ्रमप्रमाविभाग एव न निर्बोढुं शक्य इति ॥ § 410

भेदाभेदेति । सन्तानः किं सन्तानिनो भिन्नः ? उताभिन्नः इति विकल्पाभ्यामित्यर्थः । अत्राद्येऽपसिद्धान्तः; अन्त्ये दोषापरिहारश्च ज्ञेयः ॥ § 411

ननु प्रमाणानां परमार्थसत्यत्वाभावेऽपि सांवृतसत्यत्वं वर्तते । द्विविधं हि सत्यम् । तथोक्तं बोधिचर्यावतारे—संवृतिः परमार्थश्च सत्यद्वयमिदं मतम् बोधि. प्रज्ञापार. १ इत्यादि, इत्याशङ्कते—नन्विति ॥ § 412

I.65/KSV

वस्तुतस्त्वनाद्यविद्यावासनाऽऽरोपितग्राह्यग्राहकादिभेदप्रपञ्चं ज्ञानमात्रमेवेदमिति किं प्राप्यते ? को वा प्रापयति(?')—इति ॥ § 413

सोऽयं पलायनप्रकार इव प्रस्तूयते—केयं संवृतिर्नाम ? साऽपि सती, असती वेति विकल्प्यमाना नैव व्यवहारहेतुर्भवति ॥ § 414

अविद्यावासनाकृतश्च न भेदव्यवहारः, किन्तु पारमार्थिक एवेति साधयिष्यते ॥ § 415

सांवृतसन्तानकल्पनामां वा जात्यवयविप्रभृतयोऽपि सांवृताः किमिति नेष्यन्ते ? वृत्तिविकल्पादिबाधकोपहतत्वादिति चेत्, सन्तानेऽपि समानः पन्था इति कदाशालम्बनमेतत् । तस्मादसम्भवि दर्शितप्रापकत्वमित्यलक्षणमेतत् ॥ § 416

## अव्याप्तं च धर्मकीर्त्युक्तं प्रमाणलक्षणम्

अव्यापकं चेदं लक्षणम् । उपेक्षणीयविषयबोधस्याव्यभिचारादिविशेषणयोगेन लब्धप्रमाणभावस्याप्यनेनासङ्ग्रहात् ॥ § 417

पलायनेति । वादाहवाद्भीतस्येति शेषः । यस्तु वास्तविकं प्रमाणमपि नाभ्युपगच्छति स हि वादेऽनधिकृतः । तथोक्तम्—सर्वथा सदुपायानां वादमार्गः प्रवर्तते । अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः श्लो. वा. १-१-५ निरा. १२८ इति । अत्र उपायः—स्वपक्षसाधकं प्रमाणम् । तथा च वास्तविकप्रमाणानभ्युपगमप्रकटनं वादान्निवृत्तीच्छासूचकमिति भावः ॥ § 418

साधयिष्यते—नवमाह्निके ॥ § 419

उपेक्षणीयेत्यादि । ज्ञानं हानोपादानान्यतरपर्यवसाय्येवेति न नियमः । सामग्र्यधीनं हि ज्ञानं कदाचित् प्रवृत्तिनिवृत्त्यपर्यवसायि भवत्येव; तदेव उदासीनवस्तुविषयकबोध इत्युच्यते । तच्च नाप्रमाणं—व्यभिचाराद्यभावात्,

५ ] संवृत— nyāma-wit__ka
५ ] किं— nyāma-wit__ka
६--७ ] चेत्— nyāma-wit__ka

कारणदोषाभावाच्च । अतस्तत् प्रमाणमेव । तत्र च अर्थप्रापकत्वापरपर्यायअर्थक्रियाकारित्वरूपाविसंवादाभावादव्याप्तिरिति ॥ § 420

ननु हेयः, उपादेयश्चेति विषयो द्विविध एव । परस्परविरोधे तु न प्रकारान्तरस्थितिः इति न्यायेन, अनुपादेयत्वे हेयत्वमेव स्यात् । अतश्च

ननु कोऽयमुपेक्षणीयो नाम विषयः ? स ह्युपेक्षणीयत्वादेव नोपादीयते चेत्, स तर्हि हेय एव, अनुपादेयत्वादिति—नैतद्युक्तम् —उपेक्षणीयविषयस्य स्वसंवेद्यत्वेनाप्रत्याख्येयत्वात् ॥

हेयोपादेययोरस्ति दुःखप्रीतिनिमित्तता ।
यत्वेन हानोपादाने भवतस्तत्र देहिनाम् ॥ § 423

यत्वसाध्यद्वयाभावात् उभयस्याप्यसाधनात् ।
ताभ्यां विसदृशं वस्तु स्वसंविदितमस्ति नः ॥ § 425

उपादेये च विषये दृष्टे रागः प्रवर्तते ।
इतरत्र तु विद्वेषः, तत्रोभावपि दुर्लभौ ॥ § 427

## अनुपादेयत्वमात्रान्न हेयत्वम्

यत्तु अनुपादेयत्वात् हेय एवेति—तदप्रयोजकम् । न ह्येवं भवति; यदेतन्नपुंसकं, स पुमान्, अस्त्रीत्वात्; स्त्री वा नपुंसकं, अपुंस्त्वादिति । स्त्रीपुंभ्यामन्यदेव नपुंसकं, तथोपलम्भात् । एवमुपेक्षणीयोऽपि विषयो हेयोपादेयाभ्यामर्थान्तरं, तथोपलम्भादिति ॥ उदासीनः कश्चन विषयो हेयातिरिक्तो नास्त्येवेति शङ्कते—नन्वित्यादिना । एवं वादिनो मुखमनुभवप्रदर्शनेनाच्छादयति—नैतद्युक्तमित्यादिना । स्वसंवेद्यत्वेन—स्वानुभवसिद्धत्वेन ॥ § 428

उभयस्य—हानस्य, उपादानस्य च । ताभ्यां—हेयोपादेयाभ्याम् । इतरत्र—हेये । विद्वेषः—प्रवर्तत इत्याकर्षः । तत्र—उपेक्षणीये—उदासीने । उभावपि—रागः द्वेषश्च । पथि गच्छतः यत् तृणपर्णादिविषयकं ज्ञानं जायते, न तत्र नरस्येप्सा जिहासा वा भवतीत्यनुभवसिद्धमिदम् ॥ § 429

यत्त्विति । पथिगतं तृणपर्णादिकं हि पुरुषो नोपादत्ते, किन्तु जहात्येव । अतोऽनुपादेयत्वं हेयत्वरूपमेवेत्यर्थः । अर्थान्तरमिति । उपादित्सया यथोपादानं तथा जिहासया हानं स्यात् । उदासीने जिहासाया अभावात् न तत्र हानपदप्रयोगः । न हि परीक्षायामनुपविष्टः अनुत्तीर्णत्वेन व्यवह्रियते ॥ § 430

I.67/KSV

---

३० ] उभयस्यापि— nyāma-wit__kha

७ ] लभ्यमानत्वात्— nyāma-wit__kha

२१ ] यदेतत्— nyāma-wit__ka

यदेतत् तृणपर्णादि चकास्ति पथि गच्छतः ।
न धीश्छत्रादिवत् तत्र न च काकोदरादिवत् ॥§ 432

तस्मादुपेक्षणीयज्ञानस्य तमप्रापयतोऽपि प्रामाण्यदर्शनात् न प्रापकत्वं तल्लक्षणम् ॥ § 433

### अर्थप्रदर्शकत्वमात्रपर्यवसितं अर्थप्रापकत्वं तु ज्ञानस्य व्यभिचरितम्

ननु यावान् प्रमाणस्य व्यापारः प्रापणं प्रति ।
तावान् उपेक्षणीयेऽपि विषये तेन साधितः ॥§ 435

उक्तं हि—राज्ञामादेष्टृत्वमेव हन्तृत्वं, प्रदर्शकत्वमेव ज्ञानस्य प्रापकत्वमिति—मैवम्— § 436

एवं प्रदर्शकत्वं स्यात् केवलं तस्य लक्षणम् ।
तच्च प्रचलदर्कांशुजलज्ञानेऽपि दृश्यते ॥§ 438

उपेक्षणीये विषये दृष्टान्तं प्रदर्शयति—यदेतदित्यादि । छत्रादिवत्पथि गच्छतः छत्रं उपादेयं हि भवति । काकोदरः—सर्पः । तं— उपेक्षणीयं विषयम् । तल्लक्षणं—प्रमाणलक्षणम् । § 439

नन्वित्यादि । प्रमाणभूतस्य संप्रतिपन्नस्यापि ज्ञानस्य अर्थप्रापकत्वं— अर्थप्रदर्शकत्वमेव । पुरुषस्तु स्वप्रयत्नादर्थं प्राप्नोति । एवञ्च उपेक्षणीयज्ञानस्यापि स्वविषयप्रदर्शकत्वं वर्तत एवेति नाव्याप्तिः प्रमाणलक्षणस्येति आक्षेपाशयः । प्रमाणस्य अर्थप्रापणं प्रति यावान् प्रदर्शनरूपः व्यापारः तावान् व्यापारः उपेक्षणीयेऽपि विषये तेन उपेक्षणीयज्ञानेन साधित इत्यन्वयः । दण्डयितरि राजनि अपराधिपुरुषहन्तृत्वं नाम वधादेष्टृत्वमात्रं, न तु साक्षात् हन्तृत्वम् । तथा प्रमाणस्य प्रापकत्वं अर्थप्रदर्शकत्वमात्रमेवेत्यर्थः ॥ § 440

एवमित्यादि । एवं सति तस्य—प्रमाणस्य प्रदर्शकत्वं केवलं लक्षणं स्यात् । न त्वर्थसत्यतायां निर्बन्धः स्यात् । तच्च लक्षणं मरीचिकाजलज्ञानेऽसदर्थविषयेऽपि समानमिति तत्रातिव्याप्तिः स्यात् । यदि च परंपरयाऽर्थप्राप्तिहेतुत्वमपि विवक्षितं, तदा उपेक्षणीयज्ञानेऽव्याप्तिः । सेयमुभयतःपाशा रज्जुरित्यर्थः ॥ § 441

I.68/KSV

### अन्ततः स्वलक्षणज्ञानस्यापि प्रामाण्यं दुरुपपादम्

२५ ] प्रामाण्यस्य— nyāma-wit__kha    प्रामाण्य— nyāma-wit__kha
२६ ] उपेक्षणीयज्ञानस्य तमप्रापयतोऽपि

ननु तत्र विपरीताध्यवसायजननादप्रामाण्यम् । दर्शनं हि मरीचिस्वलक्षणविषयमेव सलिलाध्यवसायं तु जनयदप्रमाणीभवति । तथा ह्येकमेव दर्शनं अनुकूलेतरविकल्पोपजननतदनुत्पादभेदात् त्रिधा कथ्यते प्रमाणं, अप्रमाणं, प्रमाणं च न भवतीति । नीलज्ञानं हि नीलं प्रति प्रमाणम्; नीलमिदमित्यनुकूलविकल्पोपजननात् । नीलाव्यतिरेकि क्षणिकत्वमपि तेन गृहीतमेव । तत्र तु प्रमाणं न भवति, अनुकूलेतरविकल्पानुत्पादात् । स्थैर्ये तु तदप्रमाणं, विपरीताध्यवसायकलुषितत्वादिति ॥ § 442

यद्येवमस्मिन् प्रक्रमे सुतरामिदं प्रमाणलक्षणं दुस्स्थम्— सन्तानाध्यवसायः प्रापणं प्रति प्रमाणस्य व्यापार इति च वर्णितवानसि । अतश्च यथा मरीचिस्वलक्षणदर्शनमुदकाध्यवसायजननादप्रमाणम्, एवं स्वलक्षणदर्शनमपि तद्विपरीतसन्तानाध्यवसायजननादप्रमाणीभवेदिति । सन्ताने च काल्पनिके व्यवसिते दृश्याभिमुखः किमिति प्रवर्तते ? § 443

ननु स्वलक्षणविषयं दर्शनं प्रमाणभूतं कथमप्रमाणं च भवतीत्याशंकायां आह—तथा हीति । अनुकूलेति । अनुकूलविकल्पः, इतरविकल्पश्चेत्यर्थः । हानोपादानप्रयोजकविकल्प इत्यर्थः । नीलं प्रतीति । स्वलक्षणांश इति यावत् । तन्मते स्वरूपातिरिक्तधर्मानङ्गीकारात् नीलाव्यतिरेकीति । अनुकूलेतरेति । अस्थिरमप्यनुकूलं भवति, स्थिरमपि प्रतिकूलं भवति । अतश्च क्षणिकत्वं नानुकूलप्रतिकूलविकल्पप्रयोजकमिति भावः । विपरीतेति । क्षणिकत्वविपरीतेत्यर्थः । क्षणिकत्वमेव वस्तूनां स्वरूपम् । तथा च एकमेव स्वलक्षणदर्शनं स्वलक्षणांशे प्रमाणं, स्थैर्यांशेऽप्रमाणं, क्षणिकत्वांशे तूदासीनमिति अंशभेदात्प्रामाण्याप्रामाण्ययोर्न विरोध इत्युक्तं भवति ॥ § 444

प्रक्रमः—प्रयत्न इति यावत् दृश्याभिमुख इति । स्वलक्षणं वस्तु दृश्यं, विकल्पविषयभूतं तु विकल्प्यम् । आद्यं सत्यं, द्वितीयं मिथ्या । एवञ्च विकल्पविषयस्य सन्तानस्य मिथ्यात्वात्, दृश्यस्य च क्षणिकत्वेनाति

दृश्यविकल्प्यावर्थावेकीकृत्य प्रवर्तते यदि वा ।
अविवेकात् प्राप्तिः स्यात्, प्रमाणमपि दूरतस्तस्याः ॥§ 447

तस्मान्न प्रापकं प्रमाणम् ॥

## बौद्धाभिमतप्रमाणलक्षणदूषणोपसंहारः

अपि च प्राप्त्यप्राप्ती पुरुषेच्छामात्रहेतुके भवतः ।
अर्थप्रतीतिरेव प्रमाणकार्याऽवधार्यते तस्मात् ॥§ 449

२३ ] नि— nyāma-wit__ka
२४ ] न— nyāma-wit__ka
२६ ] अनुकूल— nyāma-wit__kha
२७ ] वसाय— nyāma-wit__kha
२ ] दर्शना— nyāma-wit__ka
१८ ] मात्रके— nyāma-wit__ka
१९ ] र्यते— nyāma-wit__kha

मानस्य लक्षणमतः कथयद्भिस्तद्विशेषणं वाच्यम् ।
न पुनः प्रापणशक्तिः प्रामाण्यं कथयितुं युक्तम् ॥[§ 451]

### साङ्ख्याभिमतप्रमाणलक्षणम्

साङ्ख्यास्तु—बुद्धिवृत्तिः प्रमाणं इति प्रतिपन्नाः । विषयाकारपरिणतेन्द्रियादिवृत्त्यनुपातिनी बुद्धिवृत्तिरेव पुरुषमुपरञ्जयन्ती प्रमाणम् । तदुपरक्तो हि पुरुषः प्रतिनियतविषयद्रष्टा संपद्यते ॥ क्रान्तत्वात् दृश्यवस्तूद्देशेन प्रवृत्तिः कथं घटताम् । यदि च दृश्यस्य स्वलक्षणस्य, विकल्प्यस्य सन्तानस्य च भेदाग्रहात् पुरुषः प्रवर्तत इत्युच्यते, तदा अज्ञानात् प्रवृत्तिरुक्ता भवति । न चेष्टापत्तिः । ज्ञानस्यैव प्रवृत्तिहेतुत्वेन तस्याप्रामाणिकत्वादिति । तस्याः—अविवेकात्प्राप्तेः प्रमाणमपि दूरतः ॥ [§ 452]

अपि चेत्यादि । ज्ञानं ह्यर्थं प्रदर्शयति, न तु प्रापयति । प्राप्त्यप्राप्ती तु पुरुषेच्छादिमूलकप्रयत्नमूलके भवतः । अतस्तावन्मात्रं लक्षणं वक्तव्यम् । एवं सति असदर्थप्रकाशकस्यापि मरीचिकाजलज्ञानादेः प्रामाण्यं स्यादित्युक्ते तद्वारणमात्रं वक्तव्यम्—उक्तश्च क्रमः अव्यभिचारिणीमर्थोपलब्धिं विदधती प्रमाणमिति । एतत्परित्यज्य प्रापणशक्तिः प्रामाण्यमित्यादिकं कथयितुं न युक्तम् । उक्तदूषणजालावतारादिति सङ्क्षेपः ॥ [§ 453]

बुद्धिवृत्तीत्यादि । साम्यावस्थापन्नं गुणत्रयमेव प्रकृतिः । तद्विकारभूतं महत्तत्त्वमेव पुरुषसंसारापवर्गादिहेतुः । तच्च महत्तत्त्वं सात्त्विकराजसतामसभेदात् त्रिविधम् । तत्र यदा सत्त्वसमुद्रेकस्तदा बुद्धितत्त्वसंज्ञां लभते

### तन्निरासः

तदेतदहृदयङ्गमम्—यो हि जानाति, बुध्यते, अध्यवस्यति, न तस्य तत्फलमर्थदर्शनं, अचेतनत्वान्महतः । यस्य चार्थदर्शनं न स जानाति, न बुध्यते, नाध्यवस्यति, इति भिन्नाधिकरणत्वं प्रमाणफलयोः । ज्ञानादिधर्मयोगः प्रमाणं पुंसि न विद्यते, तत्फलमर्थदर्शनं बुद्धौ नास्तीति ॥

अथ स्वच्छतया पुंसो बुद्धिवृत्त्यनुपातिनः ।
बुद्धेर्वा चेतनाकारसंस्पर्श इव लक्ष्यते ॥[§ 456]

एवं सति स्ववाचैव मिथ्यात्वं कथितं भवेत् ।
चिद्धर्मो हि मृषा बुद्धौ, बुद्धिधर्मश्चितो मृषा ॥[§ 458]

साकारज्ञानवादाच्च नातीवैष विशिष्यते ।
त्वत्पक्ष इत्यतोऽमुष्य तन्निषेधान्निषेधनम् ॥[§ 460]

---

२३ ] सांख्यस्तु— nyāma-wit__kha
२० ] वादांश्च— nyāma-wit__kha
२३ ] प्रतिपन्नः— nyāma-wit__kha

निरसिष्यते च सकलः कपिलमुनिप्रक्रियाप्रपञ्चोऽयम् ।
तस्मान्न तन्मतेऽपि प्रमाणमवकल्पते किञ्चित् ॥§ 462

प्रकाशहेतुत्वात् सत्त्वस्य; ज्ञानस्यापि तादृशत्वात् । इदं च बुद्धितत्त्वं इन्द्रियद्वारा बहिर्निर्गत्य विषयमुपसर्पत्, विषयमावृण्वत् विषयाकारपरिणतं भवति । एवं विषयाकारपरिणतेन्द्रियवृत्त्यनुसारिणी बुद्धिवृत्तिः सन्निहिते स्वच्छे पुरुषे प्रतिफलिता भवति । एवं प्रतिफलिता बुद्धिवृत्तिः प्रमाणम् । इदमेव प्रतिफलनं चिच्छायापत्तिः, पुरुषोपराग इत्यादिशब्दैर्व्यवह्रियते । एवं प्रतिफलने सति पुरुषः प्रमातेत्युच्यते इति तन्मतसंक्षेपः ॥ § 463

प्रमाणफलयोर्व्यधिकरणत्वात् अयःपिण्डौष्ण्यवत् प्रमातृत्वं मृषैव स्यादिति दूषयति—यो हीत्यादिना । यः—महान्—महत्तत्त्वमिति यावत् । तत्फलं— अध्यवसायफलम् । नाध्यवस्यतीत्यनन्तरं—निर्लिप्तत्वात्पुरुषस्य, अध्यवसायादयो हि महदपरपर्यायाया बुद्धेरेव धर्मा इति शेषः ॥ § 464

साकारज्ञानवादः—४१-४२ पुटयोः निरूपितः ॥ § 465
I.71/KSV

### प्रमाणसामान्यलक्षणपरीक्षोपसंहारः

तीर्थान्तराभिहितरूपमतः प्रमाणं
नैवापवादरहितं प्रतितर्कयामः ।
तेनामलप्रमितिसाधनमिन्द्रियादि-
साकल्यमेव निरवद्यमुशन्ति मानम् ॥§ 469

इति प्रमाणसामान्यलक्षणपरीक्षा § 470

### प्रमाणविभागः

तच्चतुर्विधं प्रमाणम् । तदाह सूत्रकारः— § 471

**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥** § 472

इह हि भेदवतः प्रथमसूत्रोद्दिष्टस्य त्रयं वक्तव्यं—सामान्यलक्षणं, विभागः, विशेषलक्षणं च । तत्र विशेषलक्षणप्रतिपादकानि चत्वारि सूत्राणि भविष्यन्ति—इन्द्रियार्थसन्निकर्षोत्पन्नम्... इत्यादीनि । इह तु विभागसामान्यलक्षणे प्रतिपाद्येते ॥ § 473

एकेनानेन सूत्रेण द्वयं चाह महामुनिः ।
प्रमाणेषु चतुस्सङ्ख्यां तथा सामान्यलक्षणम् ॥§ 475

११ ] भाष्य— nyāma-wit_ka
१३ ] प्रथमं— nyāma-wit_kha

## प्रमाणेयत्तानिर्णयः

प्रत्यक्षानुमानोपमानशब्दसन्निधाने प्रमाणश्रुतिरुच्चरन्ती चत्वार्येव प्रमाणानीति दर्शयति । § 476

तीर्थ—शास्त्रम् । अपवादरहितमित्यनन्तरं इतिकरणं द्रष्टव्यम्, विधेयविशेषणं वा । प्रतितर्कयामः—विभावयामः । अमलप्रमितिसाधनं—अव्यभिचार्यसन्दिग्धार्थप्रमितिसाधनं इन्द्रियादिसाकल्यमेव निरवद्यं मानमिति ॥ § 477

इह—अस्मिन् सूत्रे ॥ § 478

प्रत्यक्षानुमानोपमानशब्दसन्निधाने—प्रत्यक्षानुमानोपमानशब्दवाचकपदसमुदायसन्निधाने ॥ § 479
I.72/KSV

ननु न चत्वारि प्रमाणानि इति सङ्ख्यावचनः शब्दः श्रूयते; नापि प्रत्यक्षादीन्येवेत्यवधारणश्रुतिरस्ति । तत्कुत इयत्तानियमावगमः ? § 480

शब्दशक्तिस्वभावादिति ब्रूमः । गर्गान् भोजय, यज्ञदत्तदेवदत्तावानय इति विना सङ्ख्याशब्दमेकवारं च भवत्येव द्वित्वादिनियमावगमः । एवमिहापि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इत्युक्ते सामर्थ्यात् न्यूनाधिकसङ्ख्याव्यवच्छेदोऽवधार्यते—इत्येवं तावत् विभागावगमः ॥ § 481

सामान्यलक्षणन्तु प्रमाणपदादेव समाख्यानिर्वचनसामर्थ्यसहितादवगम्यते ॥ § 482

प्रमीयते येन तत् प्रमाणमिति करणार्थाभिधायिनः प्रमाणशब्दात् प्रमाकरणं प्रमाणमित्यवगम्यते । तच्च प्रागेव दर्शितम् ॥ § 483

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् इति च मध्ये साध्यसाधनग्रहणमुपाददानः सूत्रकारः सर्वप्रमाणसाधारणं रूपमिदं परिभाषते—यत्साध्यसाधनस्य प्रमाकरणस्य प्रमाणत्वमिति ॥ § 484

न श्रूयते इत्यन्वयः ॥ § 485

शब्दशक्तिस्वाभाव्यादिति । असति बाधके सर्वं वाक्यं सावधारणमिति हि लौकिकाः परीक्षकाश्च । यदि चातिरिक्तं प्रमाणमभिमतं स्यात् तदा आदिप्रभृतिपदं प्रयुज्येतेति भावः । गर्गान्—गर्गगोत्रोद्भवान् । कपिञ्जलाधिकरणन्यायेन त्रयाणामेव बुद्धौ सन्निधानादित्यर्थः ॥ § 486

एवमित्यादि । ननु प्रमाणानीति बहुवचनं पञ्चत्वादीनामपि वाचकम् । उत्सर्गतस्तु त्रित्वं प्राप्तम् । एवं सति कथं चतुष्ट्वनियमः ? इति चेत्—उक्तमत्र प्रत्यक्षादिप्रमाणचतुष्टयवाचकपदचतुष्टयसन्निधानात् बहुत्वं चतुष्ट्वे विश्राम्यतीति ॥ § 487

---

८ ] स्वाभाव्यात्— nyāma-wit__ka

८ ] गर्गास्त्रीन्— nyāma-wit__ka; nyāma-wit__kha

९ ] वचन— nyāma-wit__ka

१५ ] मव— nyāma-wit__kha

समाख्यानिर्वचनम्—योगव्युत्पत्तिनिर्वचनम् ॥ § 488

पूर्वोक्तप्रमाणसामान्यलक्षणस्योत्सूत्रत्वशङ्कां निराकरोति—प्रमीयत इत्यादिना ॥ § 489

सर्वेति । उपमानप्रकरणेऽपि वक्ष्यति—साध्यसाधनशब्देन करणस्य प्रमाणताम् । ब्रवीति, एतच्च मन्तव्यं सर्वत्र परिभाषितम् इति ॥ § 490

I.73/KSV

अशुद्धप्रमितिविधायिनस्तु प्रामाण्यं प्रसज्यत इति स्मृतिसंशयविपर्ययजनकव्यवच्छेदाय प्रत्यक्षसूत्रात् अर्थोत्पन्नमिति अव्यभिचारीति व्यवसायात्मकमिति च पदत्रयमाकृष्यते, तद्धि प्रमाणचतुष्टयसाधारणम् । अर्थोत्पन्नपदेन फलविशेषणेन स्मृतिजनकम्, अव्यभिचारिपदेन विपर्ययाधायि, व्यवसायात्मकपदेन संशयजनकं प्रमाणं व्युदस्यते ॥ § 491

अतश्चैवमुक्तं भवति—अर्थविषयमसन्दिग्धं अव्यभिचारि च ज्ञानं येन जन्यते तत् प्रमाणं—इत्येवमेकस्मादेव सूत्रात् सामान्यलक्षणं विभागश्चावगम्यते ॥ § 492

## एकस्यैव सूत्रस्य विभाग—सामान्यलक्षणपरत्वं युज्यत एव

ननु ! एकस्य सूत्रस्य विभागसामान्यलक्षणपरत्वेन वाक्यभेदः । अर्थैकत्वाच्चैकं वाक्यं युक्तम् ? § 493

उच्यते— § 494

श्रुत्यर्थद्वारकानेकवस्तुसूचनशालिषु ।
सूत्रेष्वनेकार्थविधेः वाक्यभेदो न दूषणम् ॥§ 496

प्रमाणान्तरसंस्पर्शशून्ये शब्दैकगोचरे ।§ 497

ननु प्रत्यक्षलक्षणसूत्रोक्तानां कथं इतरसाधारण्यम् ? इत्याशङ्कायामाह— तद्धीति । फलं—ज्ञानम् ॥ § 498

ननु सूत्रमिदं फलभूतज्ञानलक्षणपरम् । एवञ्चैषां विशेषणानां प्रमाणपरत्वं कथं व्याख्यायते—अव्यभिचारिणीं—अर्थोपलब्धिं विदधतीति—इति शङ्कायामाह—अतश्चेति । एवञ्च येनेतिपदाध्याहारेणायमर्थो लब्ध इत्यर्थः ॥ § 499

वाक्यभेदः । विभागार्थमेकवारं पठनीयं, सामान्यलक्षणार्थं च प्रमाणपदं पुनरिति वाक्यभेदः । तथोक्तं जैमिनिना—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् जै. सू. २-१-४६ इति । प्रकृते च प्रत्यक्षानुमानोप-

१ ] संशय— nyāma-wit__ka
३ ] साधनम्— nyāma-wit__ka
३ ] अर्थोत्पत्ति— nyāma-wit__ka

मानशब्दाः; प्रमाणानि इति विभागे पूर्ववाक्यस्योत्तरपदाकाङ्क्षा नियतैवेति एकवाक्यतैव युक्तेति ॥ § 500

श्रुतीत्यादि । सूत्राणि खलु श्रुत्युक्तार्थविषयाणि; न त्वपूर्वं किञ्चिद्बोधयितुं प्रवृत्तानि । अतश्च सूत्राणि श्रुतिप्रतिपन्नार्थोपस्थापनद्वारा नानार्थसूचकानि भवन्त्येव । अतश्च श्रुतावेव वाक्यभेदादि दूषणं, न सूत्रे ॥ § 501

I.74/KSV

प्रमेये वाक्यभेदादिदूषणं किल दूषणम् ।
अर्थद्वयविधानं हि तत्रैकस्य न युज्यते ॥§ 503

## सूत्रे वाक्यभेददोषाभावोपपादनम्

राजा स्वाराज्यकामो वाजपेयेन यजेत इति गुणविधिपक्षे— स्वाराज्यं प्रति यागो विधातव्यः, यागं प्रति च वाजपेयगुणो विधातव्यः—इत्येकस्य वाक्यस्य परस्परविरुद्धविध्यनुवादादिरूपापत्तेः अर्थद्वयविधानमतिदुर्घटम् ॥ § 504

इह पुनः प्रमाणान्तरपरिनिश्चितार्थसूचनचातुर्यमहार्घेषु सूत्रेषु नानार्थ-विधानं भूषणं भवति, न दूषणम् । अनेकार्थसूचनादेव सूत्रमुच्यते । एतदेव सूत्रकाराणां परं कौशलं, यत् एकेनैव वाक्येन स्वल्पैरेवाक्षरैः अनेकवस्तुस-मर्पणम् । अध्याहारेण वा तन्त्रेण वा आवृत्त्या वा तमर्थं प्रत्याययिष्यति सूत्रमिदमिति न दोषः ॥ § 505

## विभागसामान्यलक्षणयोः कथने न पौर्वापर्यनियमः

विभागसामान्यलक्षणयोर्विधाने पौर्वापर्यनियमो विशेषलक्षणवन्नास्तीति तन्त्रेण युगपदुभयाभिधानमपि न विरुध्यते । विशेषलक्षणं अनुक्ते सा-मान्यलक्षणे वक्तुमयुक्तमिति तत्रैष नियमः । सामान्यलक्षणविभागयोस्तु यथारुचि प्रतिपादनम्—आदौ विभागः, ततः सामान्यलक्षणम्; आदौ वा सामान्यलक्षणं, ततो विभागः । § 506

ननु कुतस्तत्रैव वाक्यभेदो दोष इत्याशंकायामाह—अर्थद्वयविधानमिति । यत्र शब्देनैवार्थद्वयमवगन्तव्यं तत्र सकृदुच्चरितः शब्दः सकृदेवार्थं गमय-तीति न्यायात् एकेनैव शब्देन उच्चरितेन युगपत् अर्थद्वयबोधनं न भवेत्, अतः अर्थान्तरबोधनाय वाक्यमावर्तनीयमिति भवति वाक्यभेदः । प्रकृते तु

७ ] महार्घेषु— nyāma-wit__ka
१२ ] विशेषणलक्षव— nyāma-wit__kha
१३ ] युगपदभि— nyāma-wit__ka
१४ ] लक्षणविभागयोस्तु— nyāma-wit__kha

सूत्रपदैः प्रमाणान्तरावगतार्थसूचनमेव, न विधानमिति न वाक्यभेद इति भावः ॥ § 507

ननु सामान्यलक्षणकथनानन्तरमेव विभागो वक्तव्यः । सामान्यतो विदिते हि विभागशङ्का । एवञ्च एकेन सूत्रेणोभयमेकदा कथमवगन्तुं शक्यते ? इत्यत्राह—विभागेत्यादि । समान्यलक्षणविशेषलक्षणयोरेवायं नियमः ।

सिद्धान्तच्छलवदुभयं वा युगपदेव प्रतिपाद्यते—इति तन्त्रेण आवृत्त्या वा तदुपपादने न कश्चिद्दोष इति ॥

## प्रमाणसङ्ख्याविषयविप्रतिपत्तिः

आस्तां तावदिदं सूत्रे तन्त्रावृत्त्यादिचिन्तनम् ।
चतुस्सङ्ख्या प्रमाणेषु ननु न क्षम्यते परैः ॥§ 510

न्यूनाधिकसङ्ख्याप्रतिषेधेन हि चत्वारि प्रमाणानि प्रतिष्ठाप्येरन्; स च दुरुपपादः । तथा हि—प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः । प्रत्यक्षानुमाने द्वे एवेति बौद्धाः । प्रत्यक्षमनुमानमाप्तवचनं चेति त्रीणि प्रमाणानीति साङ्ख्याः । आधिक्यमपि प्रमाणानां मीमांसकप्रभृतयः प्रतिपन्नवन्तः । तत्कथं चत्वार्येव प्रमाणानीति विभागनियमः ?

## समाधानम्

उच्यते—अनुमानप्रामाण्यं वर्णयन्तः बार्हस्पत्यं तावत् उपरिष्टात् प्रतिक्षेप्स्यामः । शब्दस्य चानुमानवैलक्षण्यं तल्लक्षणावसर एव वक्ष्यत इति शाक्यपथोऽपि न युक्तः ॥ न तु सामान्यलक्षणविभागयोरित्यर्थः । तत्र भहर्षिसंवादमेवाह—सिद्धान्तच्छलवदिति । सिद्धान्तस्य छलस्य च स्वरूपलक्षणपरसूत्रे यथा तथेत्यर्थः । व्यक्तीभविष्यतीदं तत्प्रकरणे ॥ § 511

आस्तामित्यादि । इदं तन्त्रावृत्त्यादिचिन्तनमित्यन्वयः । द्वे एवेति बौद्धा इति । यद्यपि वैशेषिका अपि कक्षीकर्तव्याः, तथापि न्यायवैशेषिकयोस्समानतन्त्रत्वस्य सम्मतत्वात्परित्यागः । मीमांसकप्रभृतय इति । प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः पञ्चेति प्राभाकराः । तैस्सहानुपलब्धिरपीति षडिति भाट्टाः । एवं ब्रह्मविवर्तवादिप्रमुखाः प्रभृतिपदेन गृह्यन्ते ॥ § 512

अनुमानेति । उपरिष्टात्तावदनुमानप्रामाण्यं वर्णयन्तः वयं बार्हस्पत्यं प्रतिक्षेप्स्याम इत्यर्थः । उपरिष्टात् अनुमानप्रामाण्यसमर्थनेन चार्वाकमतं निरस्तं भविष्यतीति भावः । तल्लक्षणावसरे—शब्दलक्षणविचारावसरे ॥ § 513

I.76/KSV

## अत्र बौद्धानामाक्षेपः, प्रमाणद्वैविध्यनिदानम्

८ ] सांख्याः— nyāma-wit_ka

नन्वेतत् भिक्षवो न क्षमन्ते— § 514

ते हि प्रमेयद्वैविध्यात् प्रमाणं द्विविधं जगुः ।
नान्यः प्रमाणभेदस्य हेतुर्विषयभेदतः ॥§ 516

विषयश्च प्रत्यक्षपरोक्षभेदेन स्वलक्षणसामान्यभेदेन वा द्विविध एव । परस्परपरिहारव्यवस्थितात्मसु पदार्थेषु तृतीयराश्यनुप्रवेशाभावात् ॥ § 517

तृतीयविषयासत्त्वपरिच्छेद एव कुतस्य इति चेत्—प्रत्यक्षमहिम्न एवेति ब्रूमः । नीले प्रवर्तमानं प्रत्यक्षं नीलं नीलतया परिच्छिनत्तीति तावदविवाद एव । तदेव प्रत्यक्षमनीलमपि व्यवच्छिनत्ति, नीलसंविदि तस्याप्रतिभासात् । नीलज्ञानप्रतिभास्यं हि नीलं—इति तदितरदनीलमेव भवति ॥ § 518

तृतीयमपि राशिं अत एव तदपाकरोति । सोऽपि हि राशिः नीलसंविदि भाति ? न वा ? § 519

ते हीत्यादि । तथोक्तं प्रमाणवार्तिके मानं द्विविधं विषयद्वैविध्यात्, शक्त्यशक्तितः । अर्थक्रियायाम् इति अर्थक्रियासमर्थं यत् तदत्र परमार्थसत् । अन्यत् संवृतिसत् प्रोक्तं, ते स्वसामान्यलक्षणे इति च । स्वसामान्यलक्ष-णे— स्वलक्षणं सामान्यलक्षणं चेत्यर्थः । स्वलक्षणं—प्रत्यक्षस्य, सामान्यं—अनुमानस्य च विषयः । सामान्यमेव सामान्यलक्षणमित्यप्युच्यते ॥ § 520

परिच्छेदः—निर्णयः । तस्य—अनीलस्य । ज्ञानं हि विषयं तदितर-व्यावृत्तमेव गृह्णाति, विषयपरिच्छेदरूपत्वात् ज्ञानस्य । एवञ्च यानि वस्तूनि पुरतो भासन्ते तानि सर्वाणि प्रत्यक्षाणि, इतराणि तु परोक्षाणि जगदन्तर्गतं सर्वमपि एकस्य प्रत्यक्षं वा स्यात् परोक्षं वा । एतद्राशिद्वयानन्तर्भूतं हि किञ्चिदपि न वक्तुं शक्यमिति प्रत्यक्षपरोक्षरूपद्वैविध्यं सुस्थिरमिति सङ्ग्रहः । नीलमित्यभिलापसौकर्यात् सर्वप्रदर्शनार्थम् ॥ § 521

I.77/KSV

भाति चेन्नीलमेव स्यात् न प्रकारान्तरं तु तत् ।
नो चेत् तथाऽप्यनीलं स्यात् न प्रकारान्तरं हि तत् ॥§ 523

इदमेव हि नीलानीलयोर्लक्षणम्—यत् नीलज्ञानावभास्यत्वानवभास्यत्वे नाम ॥ § 524

एवं च प्रत्यक्षं स्वविषये प्रवृत्तं तं प्रत्यक्षतया व्यवस्थापयति, तत्राप्र-तिभासमानं परोक्षतया, तृतीयमपि प्रकारं पूर्ववदेव प्रतिक्षिपतीति ॥ § 525

एवं स्वलक्षणसामान्यव्यतिरिक्तविषयनिषेधेऽप्येष एव मार्गोऽनुगन्तव्यः । एवं हि प्रत्यक्षेण स्वविषयः परिनिश्चितो भवति । तदुक्तं—तत् परिच्छिनत्ति, अन्यत् व्यवच्छिनत्ति, तृतीयप्रकाराभावं च सूचयतीत्येकप्रमाणव्यापारः इति ॥ § 526

१ ] सामान्यभेदे वा— nyāma-wit__kha
४ ] त्येताव— nyāma-wit__ka
६ ] मिव— nyāma-wit__kha

अन्यथा विषयस्यैव स्वरूपापरिनिश्चयात् ।
क्वोपादानपरित्यागौ कुर्युरर्थक्रियार्थिनः ॥§ 528

तदुक्तम्—अनलार्थ्यनलं पश्यन्नपि न तिष्ठेन्न प्रतिष्ठेत इति ॥ § 529

भातीत्यादि । नीलमित्याकारे यद्यत् भासते तत्सर्वं नीलमेव खलु स्यात् । अनीलत्वे नीलमित्याकारासंभवात् । धर्मधर्मिभेदस्तु नास्त्येव । यच्च तस्मिन् न भासते तदनीलमेवेति न प्रकारान्तरसम्भवः । प्रकारान्तरं— नीलानीलाभ्यामन्यः प्रकारः । इदमेवेति । विषयाकारः खलु ज्ञानाकारानुमेयः ॥ § 530

एष एवेत्यादि । प्रत्यक्षेण हि स्वलक्षणमात्रं गृह्यते, सामान्यं त्वनुमानविषयः । एवञ्च केचित् स्वलक्षणरूपाः, केचिच्च सामान्यरूपा इति तृतीया विधा वस्तुषु दुर्निरूपेत्यर्थः । अतश्चैकस्यैव प्रमाणस्य प्रवृत्तिः त्रिमुखा भवति । निरूपितं चेदं पूर्वमेव । तत्तद्वस्तुस्वरूपं स्वलक्षणशब्दार्थः । वस्तुद्वयाद्यनुगताकारः सामान्यशब्दार्थः । अन्यथा—एवमेकस्यैव प्रमाणस्य तथा व्यवच्छेदकत्वानङ्गीकारे । क्व—किमधिकृत्य हेयोपादानव्यवहारौ कुर्युः इत्यर्थः । अर्थक्रियार्थिनः इति कर्तृवाचकं पदम् ॥ § 531

उक्तमर्थं सदृष्टान्तं संवादयति—तदुक्तमिति । न तिष्ठेदित्यादि । अर्थपरिच्छेदाभावेन न निवर्तेत, नापि प्रवर्ततेत्यर्थः ॥ § 532
I.78/KSV

## निर्विकल्पस्य त्रिमुखत्वाभावेऽपि न दोषः

यद्यपि निर्विकल्पकं प्रत्यक्षं पुरोऽवस्थितवस्तुस्वलक्षणप्रदर्शनमात्रनिष्ठितव्यापारं अविचारकमेव—तथापि तत्पृष्ठभाविनां विकल्पानामेव च दर्शनविषये कृतपरिच्छेद-तदितरविषयव्यवच्छेदतृतीयप्रकाराभावव्यवस्थापनपर्यन्तव्यापारपाटवमवगन्तव्यम्, इतरथा व्यवहाराभावात् ॥ § 533

## उक्तार्थेऽनुमानोपन्यासः

एवं च परस्परपरिहारव्यवस्थितस्वरूपपदार्थव्यवच्छेदिप्रत्यक्षप्रभावावगतविरोधित्वात् प्रत्यक्षेतरविषययोः तृतीयविषयासत्त्वपरिनिश्चयेऽनुमानमपि प्रवर्तितुमुत्सहते—विरुद्धयोरेकतरपरिच्छेदसमये द्वितीयनिरसनमवश्यं भाति, विरुद्धत्वादेव, शीतोष्णवत् । तृतीयविषयोऽपि तद्विरुद्ध एव, तद्बुद्धावप्रतिभासमानत्वात् ॥ § 534

१६ ] वर्ति— nyāma-wit_ka
१६ ] लक्षणं— nyāma-wit_kha
२० ] परस्परं— nyāma-wit_kha

ननु निर्विकल्पे स्वरूपमात्रमेव भासते, तत्कथं तेन इतरव्यवच्छेदादिकं कर्तुं शक्यमित्याशंकते—यद्यपीत्यादि । अविचारकमेव—अविमर्शात्मकमेव, प्रकारभानाभावादित्याशयः । व्यवहाराभावात्—व्यवहाराभावप्रसङ्गात् । व्यवहारः खलु ज्ञानाधीनः । ज्ञानं च ज्ञेयपरिच्छेदः । परिच्छेदश्च नियमेन त्रिमुखः ॥ § 535

एवञ्चेत्यादि । परस्पराभावरूपतया व्यवस्थितस्वरूपाणां पदार्थानां व्यवच्छेदकस्य प्रत्यक्षस्य प्रभावात् अवगतविरोधयोः प्रत्यक्षपरोक्षविषययोः, तृतीयविषयासत्त्वनिश्चये सति वक्ष्यमाणदिशा अनुमानमपि प्रवर्तितुमुत्सहत इत्यर्थः । तद्विरुद्ध एवेति । शीतमिति बुद्धौ यत् भासते तत् शीतमेव, यन्न भासते तत् तद्विरुद्धमेव, तच्चोष्णं वा स्यात्, अन्यद्वा स्यात्, परन्तु तत्, तद्विरुद्धं चेत्येतदपेक्षया तृतीया कोटिस्तु नास्त्येवेत्यर्थः ॥ § 536
I.79/KSV

## तत्त्वतदन्यत्वाभ्यां तृतीयो राशिर्नास्त्येव

ननु न त्वं द्वितीयमिव तृतीयं कदाचिदपि विषयमग्रहीः ? ग्रहणे हि विषयद्वयवत् तस्यापि सत्त्वं स्यात् । अगृहीतस्य च विरोधमविरोधं वा कथं निश्चेतुमर्हसीति ॥ § 537

भोः साधो ! नात्र पृथक् ग्रहणमुपयुज्यते, तद्बुद्ध्यनवभासमात्रेणैव तद्विरोधसिद्धेः । विरुद्धं हि तदुच्यते, यत् तस्मिन् गृह्यमाणे न गृह्यते । तदिदमग्रहणमेव विरोधावहमिति न पृथग्ग्रहणमन्वेषणीयम् ॥ § 538

एवं इतरेतरपरिहारव्यवस्थितानामर्थानां न तृतीयो राशिरस्तीति सर्वथा सिद्धं विषयद्वैविध्यम् ॥ § 539

एवमेव सदसन्नित्यानित्यक्रमयौगपद्यादिषु प्रकारान्तरपराकरणमवगन्तव्यम् ॥ § 540

तत्र प्रत्यक्षे स्वलक्षणात्मनि विषये प्रत्यक्षं प्रवर्तते; परोक्षे तु सामान्याकारेऽनुमानमिति— § 541

तृतीयराशिव्यवच्छेद इति न वक्तुं शक्यते, सिद्ध्यसिद्धिभ्यां व्याधातादिति शङ्कते—नन्विति । त्वं द्वितीयमिव तृतीयं विषयं कदाचिदपि नाग्रहीः किम् ? एवञ्च—अगृहीतस्य विरोधमविरोधं वा कथं निश्चेतुमर्हसि । यदि च तृतीयं कदाचिदग्रहीः, तर्हि ग्रहणे विषयद्वयवत् तृतीयमप्यङ्गीकर्तव्यमेव, गृहीतस्य निषेधायोगात् इत्याशङ्काऽभिप्रायः ॥ § 542

समाधत्ते—भोः ! साधो इति । पृथग्ग्रहणं—स्वातन्त्र्येण प्रतियोगिविधयाऽनुयोगिविधया वा ग्रहणम् । विशिष्याग्रहणेऽपि तद्विरुद्धत्वेन तद्व्यतिरिक्तं सर्वं क्रोडीक्रियत इत्यर्थः । तथा च तृतीयो राशिर्नास्तीत्युक्ते

---

१० ] विषयवत्— nyāma-wit__ka
१२ ] मात्रेण— nyāma-wit__ka
१० ] विरोधं वा— nyāma-wit__ka

सर्वं राशिद्वयान्तर्भूतमित्येतावन्मात्रं विवक्षितमिति न दोष इति भावः ॥ § 543

इति विषयद्वयवेदने प्रमाणद्वयसिद्धे इत्युत्तरश्लोकेनैकं वाक्यम् ।

प्रमाणद्वयसिद्धे च विषयद्वयवेदने ।
वद कस्यानुरोधेन तृतीयं मानमिष्यताम् ॥§ 546

**परोक्षे शब्दादीनां नावकाशः**

न चास्मिन्नेव परोक्षे सामान्यात्मनि विषयेऽनुमानमिव शब्दाद्यपि प्रमाणान्तरं प्रवर्तते इति वक्तुं युक्तम्, एकस्मिन् विषये विरोधविफलत्वाभ्यां अनेकप्रमाणप्रवृत्त्यनुपपत्तेः । पूर्वप्रमाणावगतरूपयोगितया तस्मिन् वस्तुनि पुनः परिच्छिद्यमाने प्रमाणमुत्तरमफलमेव स्यात् । एवं ह्याहुः—अधिगतमर्थमधिगमयता प्रमाणेन पिष्टं पिष्टं स्यात् इति । अन्यरूपतया तु तद्ग्रहणं उत्तरप्रमाणेन दुश्शकम्, आद्यप्रमाणविरुद्धत्वादिति ॥

अत एव न संप्लवमभ्युपगच्छन्ति नीतिविदः । एकस्मिन् विषये अनेकप्रमाणप्रवृत्तिः संप्लवः । स च तथाविधविषयनिरासादेव निरस्तः । न च प्रत्यक्षानुमाने परस्परमपि संप्लवेते; स्वलक्षणेऽनुमानस्य सामान्ये प्रत्यक्षस्य च प्रवृत्त्यभावात् ॥ प्रमाणेति । एवं विषयद्वैविध्यानुरोधेन प्रमाणद्वये सिद्धे सति, तृतीयविषयस्याभावेन कीदृशविषयानुरोधेन तृतीयं प्रमाणमङ्गीकर्तव्यमित्यधिक्षेपे ॥ § 547

नन्वास्तां विषयद्वैविध्यम् । अथापि प्रामाण्यद्वैविध्यं कुतः ? परोक्षमेव विषयमधिकृत्यानुमानस्येव शब्दस्यापि प्रवृत्तिसंभवादिति शङ्कते—न चेति । समाधत्ते—एकस्मिन्निति । वैफल्यमुपपादयति—पूर्वेत्यादि । तस्मिन्—एकरूपवत्तया पूर्वमेव परिच्छिन्ने वस्तुनि पूर्वप्रमाणावगतरूपयोगितया पुनः परिच्छिद्यमाने सति उत्तरं प्रमाणमफलं स्यात् परिच्छेद्याभावादित्यर्थः । ननु पूर्वप्रमाणावगतरूपवत्त्वेन ग्रहणे खलु वैफल्यं, अन्यरूपतया ग्रहणे को दोष इति शङ्कायामाह—अन्यरूपतयेति । क्षणभङ्गवादिनामयं सिद्धान्तः स्मर्तव्यः ॥ § 548

एकत्र प्रमाणद्वयप्रवृत्तौ विरोधमुपपादयति—अत एवेति । तथाविधेति । प्रमाणद्वयप्रवृत्तियोग्येत्यर्थः ॥ § 549

I.81/KSV

सम्बन्धग्रहणापेक्षमनुमानं स्वलक्षणे ।
सजातीयविजातीयव्यावृत्ते वर्ततां कथम् ॥ ८० ॥§ 551

५ ] विषये— nyāma-wit__ka
६ ] एकत्र— nyāma-wit__kha
८ ] मफलम्— nyāma-wit__kha
१० ] दुश्शक्यम्, आदि— nyāma-wit__kha
१३ ] माने एव— nyāma-wit__ka

प्रत्यक्षमपि सद्वस्तुसंस्पर्शनियतव्रतम् ।
विकल्पारोपिताकारसामान्यग्राहकं कथम् ॥ ८१ ॥§ 553

यच्च शब्दोपमानादि प्रमाणान्तरमिष्यते ।
तदेवं सति कुत्रांशे प्रतिष्ठामधिगच्छतु ॥ ८२ ॥§ 555

वस्तु स्वलक्षणं तावत् प्रत्यक्षेणैव मुद्रितम् ।
ततोऽन्यदनुमानेन सम्बन्धापेक्षवृत्तिना ॥ ८३ ॥§ 557

नानाप्रमाणगम्यश्च विषयो नास्ति वास्तवः ।
तद्वानवयवी जातिरिति वार्तैकभद्रिका ॥ ८४ ॥§ 559

यदि च प्रत्यक्षविषये शब्दानुमानयोरपि वृत्तिरिष्यते तर्हि प्रत्यक्षसंवित्सदृशीमेव ते अपि बुद्धिं विदधाताम्; न चैवमस्ति । तदाहुः § 560

समानविषयत्वे च जायते सदृशी मतिः ।
न चाध्यक्षधिया साम्यं एति शब्दानुमानधीः ॥§ 562

उक्तमर्थमुपपादयति—सम्बन्धेत्यादि । सम्बन्धग्रहणापेक्षमनुमानं सजातीयविजातीयव्यावृत्ते स्वलक्षणे कथं वर्ततां—प्रवर्तताम् ? सद्वस्तुसंस्पर्शनियतव्रतं—सन्मात्रग्राहि प्रत्यक्षमपि कथं विकल्पारोपिताकारसामान्यग्राहकम् ? एवं सति, यच्च शब्दोपमानादि प्रमाणान्तरमिष्यते, तत्—प्रमाणान्तरं कुत्रांशे विषये प्रतिष्ठामधिगच्छतु इत्यन्वयः । मुद्रितमिति उत्तरार्धेऽप्यन्वेति, परिच्छिन्नमित्यर्थः । ननु अन्यरूपतया तु तद्ग्रहणं उत्तरप्रमाणेन दुश्शकं, आद्यप्रमाणविरुद्धत्वात् इत्युक्तिर्न युक्ता; कालभेदेन विरोधपरिहारात् । दृश्यते खलु अवयविजातिप्रभृतयः पदार्थाः कालद्वयसम्बन्धिनः एकदा प्रत्यक्षाः, अन्यदा चानुमानिकाः इति शङ्कायां तादृशं वस्त्वेव नास्तीत्याह—नानेत्यादि । तद्वान्—नानाप्रमाणसम्बन्धी, कालद्वयसम्बन्धी वा ॥ § 563

प्रत्यक्षसंवित्सदृशीमेव बुद्धिं ते अपि—शब्दानुमाने अपि विदधातामित्यन्वयः ॥ § 564

I.82/KSV

तेजोऽन्यदेव नक्षत्रशशाङ्कशकलादिषु ।
उद्घाटितजगत्कोशमन्यदेव रवेर्महः ॥§ 566

आह च— § 567

१० ] ते— nyāma-wit__ka    nyāma-wit__kha
१० ] विदध्याताम्—

अन्यदेवेन्द्रियग्राह्यमन्यः शब्दस्य गोचरः ।
शब्दात् प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ॥ § 569

अपि च— § 570

अन्यथैवाग्निसम्बन्धात् दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः संप्रतीयते ॥ § 572

तस्मादुक्तेन वर्त्मना विषयद्वैविध्यनिश्चयात् न तृतीयं प्रमाणमस्ति, न च संप्लव इति ॥ § 573

प्रत्यक्षानुमानयोः प्रमाणत्वाविशेषेऽपि महान् विशेषो वर्तत इत्याह— तेज इति । नक्षत्रादितेजः अनुमानस्य, रवेर्महः प्रत्यक्षस्य च दृष्टान्तः । सूर्यालोकमध्यवर्तिनं हि अप्रसक्तसंशयं गृह्णाति । एवं प्रत्यक्षेण गृहीते स्वलक्षणे न सन्देहावकाशः, प्रकाराणामभानात् । नक्षत्रालोकमध्यवर्ति तु विकल्पितमेव गृह्येतेति भावः ॥ § 574

भिन्नाक्षः—अन्धः शब्दात् अर्थं यद्यपि अवगच्छति, परन्तु तमर्थं प्रत्यक्षतया नेक्षते । अतो परोक्षोऽर्थः परोक्ष एव, प्रत्यक्षश्च प्रत्यक्ष एवेति एकस्मिन्नर्थे न प्रमाणसंप्लव इति । अन्यथैवेत्यादि । अग्निसम्बन्धात् दग्धः पुरुषः दाहं अन्यथैव केवलदाहशब्दार्थापेक्षया विलक्षणतयैवाभिमन्यते । दाहशब्देन तु दाहरूपः अर्थः अन्यथैव संप्रतीयते । दाहशब्दादुपस्थितः दाहरूपः अर्थः न शरीरव्यथादिकं करोति, अग्निसम्बन्धादनुभूतस्तु दाहरूपः अर्थः शरीरमतीव व्यथयतीति महान् भेदः प्रत्यक्षपरोक्षयोरिति भावः । दग्धः पुरुषः दाहं अन्यथैवाभिमन्यते, दाहशब्देन दाहरूपार्थस्तु अग्निसम्बन्धापेक्षया अन्यथैव संप्रतीयत इति वा अन्वयः । तस्मादिति । प्रत्यक्षत्वं परोक्षत्वं चार्थधर्मौ । प्रत्यक्षः सदा सर्वस्य प्रत्यक्ष एव । एवं परोक्षोऽपि । यथा नीलः सदा सर्वान् प्रति नील एव । अतो विषयद्वैविध्यात् प्रमाणं द्विविधमेवेति ॥

## सिद्धान्तः

अत्राभिधीयते—

यत्तावदिदमाख्यायि राश्यन्तरनिराकृतौ ।
प्रत्यक्षस्यैव सामर्थ्यं इत्येतन्नोपपद्यते ॥ ८५ ॥ § 577

पूर्वापरानुसन्धानसामर्थ्यरहितात्मना ।
भारः कथमयं बोढुं अविकल्पेन पार्यते ॥ ८६ ॥ § 579

विकल्पाः पुनरुत्प्रेक्षामात्रनिष्ठितशक्तयः ।

२ ] प्रतीति— nyāma-wit__ka
२ ] मीक्ष्यते— nyāma-wit__ka

तेभ्यो वस्तुव्यवस्थायाः का कथा ? भवतां मते ॥ ८७ ॥[§ 581]

अथवा भवतु नाम नीलादाबुक्तेन प्रकारेण राश्यन्तरनिराकरणम् । प्रत्यक्षपरोक्षभावनिर्णये तु नैष प्रकार योजयितुं शक्यते । विषये हि प्रवृत्तं प्रत्यक्षं विषयस्वरूपमेव परिच्छिनत्ति, न पुनस्तस्य प्रत्यक्षतामपि । नीलमिदमिति हि संवेद्यते, न पुनः प्रत्यक्षमिदमिति । तथा हि—किमिदं विषयस्य प्रत्यक्षत्वम् नाम ? किमक्षविषयत्वम् ? उत अक्षजज्ञानविषयत्वमिति ? तत्राक्षविषयत्वं तावदन्वयव्यतिरेकसमधिगम्यमेव, न प्रत्यक्षगम्यम् । तथाऽऽह भट्टः औत्पत्तिकसूत्रे अनुमानप्रकरणे श्लो. वा. ६०— यद्यपीत्यादिना पु. ७८ प्रदर्शिते समाधाने विद्यमानं दौर्बल्यं प्रदर्शयति— यत्तावदित्यादिना । भवतां हि मते निर्विकल्पकं असमर्थमेव इतरव्यवच्छेदे । सर्वमपि सविकल्पकन्तु अप्रमाणमेवेति केन वस्तुव्यवस्था ? इति सारम् । अविकल्पेन—निर्विकल्पकेन स्वलक्षणप्रत्यक्षेणेति यावत् ॥ [§ 582]

वैभवेनाप्याह—अथवेति । अयं प्रत्यक्षः, अयं परोक्षः इति विषययोः प्रत्यक्षत्वपरोक्षत्वे अनुव्यवसायैकगम्ये; न तु प्रत्यक्षत्वपरोक्षत्वे विषयासाधारणधर्मौ । एवञ्च अक्षविषयत्वं अक्षजन्यज्ञानविषयत्वं वा प्रत्यक्षत्वं, तद्विलक्षणं च परोक्षत्वमिति वक्तव्यम् । तद्विषयकहानोपादानाद्यन्वयव्यतिरेकवशादेव इन्द्रियविषयत्वं निश्चेतुं शक्यम् । एवञ्च अक्षविषयत्वं विषयप्रतिभासकाले न गृहीतुं शक्येत । अक्षजन्यज्ञानविषयत्वमपि विषयप्रतिभासकाले न गृहीतुं शक्येत, विषयप्रतिभासकाले ज्ञानस्याप्रतिभासात् । ज्ञानस्य स्वप्रकाशत्व

न हि श्रावणता नाम प्रत्यक्षेणावगम्यते ।साऽन्वयव्य-
तिरेकाभ्यां ज्ञायते बधिरादिषु इति ॥[§ 584]&

अक्षजज्ञानकर्मत्वमपि प्रत्यक्षत्वं तदानीं परिच्छेत्तमशक्यमेव, विषयप्रतिभासकाले तत्प्रतिभासस्याप्रतिभासात् । तद्ग्रहणमन्तरेण च तत्कर्मताग्रहणासंभवात् ॥

### विषयभानदशायां ज्ञानं न भाति

कथं पुनर्विषयग्रहणकाले तत्प्रतिभासस्याप्रतिभासः ? नैव युगपदाकारद्वितयं प्रतिभासते; इदं ज्ञानं, अयं चार्थः इति भेदानुपग्रहात् । एकश्चायमाकारः प्रतिभास्यमानः ग्राह्यस्यैव भवितुमर्हति, न ग्राहकस्येति वक्ष्यते ॥

### ज्ञानाप्रतिभासेऽपि विषयप्रतिभासो युज्यत एव

ननु च नागृहीतं ज्ञानमर्थप्रकाशनकुशलं भवति । आहुः—

---

३ ] निर्णये— nyāma-wit__kha
२१ ] प्रमाणता— nyāma-wit__ka
२१ ] ना— nyāma-wit__kha
२१ ] तज्ज्ञानस्यानवभासः— nyāma-wit__kha

अप्रत्यक्षोपलंभस्य नार्थदृष्टिः प्रसिद्ध्यति इति ।§ 586

निरासपूर्वकं अनुव्यवसायवेद्यत्वं स्थापयिष्यते । एवञ्च प्रत्यक्षत्व-परोक्षत्वयोर्विषयधर्मत्वाभावात् तदादाय प्रमाणद्वैविध्यस्थापनं न शक्यमिति संपिण्डितार्थः । सा—श्रावणता । श्रोत्रेण शब्दे गृह्यमाणे तद्गतं श्रावणत्वं न गृहीतुं शक्यते । किन्तु अयं शब्दः श्रुतो न वा ? इति संशये अन्वयव्य-तिरेकाभ्यामेव निर्णयः । अन्वयव्यतिरेकौ—प्रवृत्त्यप्रवृत्ती । बधिरादीत्यादिना अनवहितचित्तपरिग्रहः । तत्प्रतिभासस्य-ज्ञानप्रतिभासस्य । तद्ग्रहणं—ज्ञान-ग्रहणम् ॥ § 587

कथमिति । विषयप्रतिभासकाले विद्यमानस्य ज्ञानस्य कुतो न भान-मित्यर्थः । अनुभवाभावादिति समाधत्ते—नैवेति । अस्तु आकारद्वयाग्रहणं, स अर्थस्यैवेति कथमित्यत्राह—न ग्राहकस्येति । वक्ष्यते— विज्ञानवाद-निरासावसरे ॥ § 588

अप्रत्यक्षेत्यादि । प्रत्यक्षः उपलंभः यस्येति बहुव्रीहिः, अनन्तरं न-ञ्समासः । घटादिविषयकोपलम्भः यस्य न प्रत्यक्षः तस्यार्थदर्शनमिति न सिद्ध्यत्येव । ज्ञानस्यैवानवभासे ज्ञानभास्यस्य विषयस्य प्रतिभासासंभवादि

तदयुक्तम् । अप्रत्यक्षोपलंभस्यैवार्थदृष्टिः प्रसिद्ध्यति । प्रत्यक्षोपलम्भ-स्य तु नार्थदृष्टिः । उपलम्भ एव प्रत्यक्ष इति, द्वितीयाकारानवभासात् कुतोऽर्थदृष्टिः ?

यदि च गृहीतं ज्ञानं अर्थं प्रकाशयेत् न द्वयीं गतिमतिवर्तेत । तद्धि ज्ञानं ज्ञानान्तरग्राह्यं वा भवेत्, स्वप्रकाशं वा । ज्ञानान्तरग्राह्यत्वे त्वनवस्था, मूलक्षतिकरी चेयमित्यन्धमूकं जगृत् स्यात् उपलम्भप्रत्यक्षतापूर्वकार्थप्रत्य-क्षवादिनः । नापि स्वप्रकाशं ज्ञानं, ज्ञेयत्वात्, नीलपीतादिवत् । विस्तरतस्तु स्वप्रकाशं विज्ञानं विज्ञानवादिनिराकरणे निराकरिष्यामः ॥

न च ज्ञानस्याप्रत्यक्षतायां तदुत्पादानुत्पादयोरविशेषात् अज्ञत्वं सर्वज्ञत्वं वा परिशङ्कनीयम्; विज्ञानोत्पादमात्रेण ज्ञातुः ज्ञातृत्वसिद्धेः । विषयप्रकाश-नस्वभावमेव ज्ञानमुत्पद्यत इति कथमुत्पन्नमनुत्पन्नान्न विशिष्यते ? यथा च नीलादिविषयज्ञानोत्पत्त्या अस्य ज्ञातृत्वं तथा सुखादिविषयज्ञानोत्पत्त्या भोक्तृत्वमिति तत्रापि नातिप्रसङ्गः ॥ त्यर्थः । तदयुक्तमित्यादि । आकार-द्वयाननुभवात् यदि भासमानः आकारः ज्ञानस्य, तर्हि अर्थप्रतिभासो न स्यादेव । अतः ज्ञानभानशून्यवादशायामेवाथभानं भवेदिति सुष्ठूक्तं अप्रत्य-क्षोपलंभस्यैवार्थदृष्टिः प्रसिद्ध्यति इति ॥ § 589

अन्यथा दोषमाह—यदि चेत्यादि । प्रामाणिक्या अनवस्थाया अदोष-त्वात् मूलक्षतिकरीति । व्यवहारप्रवृत्तिरूपमूलस्यैव क्षतिकरीत्यर्थः । ननु कथं ज्ञानस्य ज्ञेयत्वम् ? ज्ञानविषयत्वं हि ज्ञेयत्वम् ! एवञ्च आत्माश्रयादिः इति शङ्कायामाह—विस्तरस्त्विति ॥ § 590

◦ ] प्रत्यक्षो— nyāma-wit__kha
◦ ] शे— nyāma-wit__ka
◦ ] उप— nyāma-wit__ga

विषयेति । तथा च विषयप्रकाशसद्भावान्नाविशेषप्रसङ्ग इत्यर्थः । ननु तर्हि सुखादेरपि स्वप्रकाशत्वं न स्यात् । सुखादिकं ह्युत्पन्नं सत् स्वयं भासत् इत्यनुभवसिद्धमिति शङ्कायां तत्रापि सुखादिज्ञानोत्पत्त्यैव सुखादिप्रकाशः इति समाधत्ते—यथा चेति ॥ § 591

I.86/KSV

तस्मात् विषयविज्ञानकाले तद्विज्ञानाग्रहणात् न तत्कर्मत्वकृतं विषयप्रत्यक्षत्वमवभासते, तदप्रतिभासे च न परोक्षव्यवच्छेदः, न च तृतीयप्रकारासत्त्वसूचनमिति कथं प्रत्यक्षं विषयद्वित्वसिद्धौ प्रमाणम् ? § 592

## विषयद्वैविध्यसाधकानुमानदूषणम्

यच्चानुमानमप्युक्तं विषयद्वयसिद्धये ।
तत् प्रत्यक्षपरिच्छिन्नतद्विरोधनिबन्धनम् ॥ ८८ ॥§ 594

विरोधबोधसामर्थ्यं प्रत्यक्षस्य च दूषितम् ।
तदग्रहे च तन्मूलमनुमानं न सिध्यति ॥ ८९ ॥§ 596

एवञ्च विषयद्वित्वसाधनानुपपत्तितः ।
तत्कृतस्त्यज्यतामेष प्रमाणद्वित्वदोहदः ॥ ९० ॥§ 598

## विषयद्वैविध्यमपि न प्रमाणद्वैविध्यनियामकम्

अथ वा सत्यपि विषयद्वैविध्ये, सामग्रीभेदात् फलभेदाच्च प्रमाणभेदो भवन् कथमपाक्रियते !

अन्ये एव हि सामग्रीफले प्रत्यक्षलिङ्गयोः ।
अन्ये एव च सामग्रीफले शब्दोपमानयोः ॥ ९१ ॥§ 601

इति वक्ष्यामः । तेन तद्भेदादपि प्रमाणभेदसिद्धेः न द्वे एव प्रमाणे ॥
§ 602

तद्विज्ञानाग्रहणात्—विषयविषयकविज्ञानाग्रहणात् । तत्कर्मत्वकृतंतादृशविज्ञानविषयत्वकृतम् ॥ § 603

यच्चानुमानमिति । विरुद्धयोरेकतरपरिच्छेदसमये द्वितीयनिरसनं अवश्यं भाति, विरुद्धत्वादेव इत्यनुमानमित्यर्थः । प्रत्यक्षपरिच्छिन्नेत्यादि । तेन सह विरोधः यत्र प्रत्यक्षेणैव परिच्छिन्नः, यथा वह्निजलादौ, तत्रैव भवदुक्तरीत्याऽन्यतरपरिशेषः । प्रकृते तु विषयग्रहणकाले प्रत्यक्षत्वादिधर्माणामग्रहणात् तयोर्विरोधोऽपि न गृहीत इति नानुमानप्रवृत्तिरित्यर्थः ॥ § 604

∘ ] न— nyāma-wit__kha

पुनरपि वैभवेनाह—अथ वेति । प्रत्यक्षलिङ्गयोः—प्रत्यक्षानुमानयोः । प्राचीनमते ज्ञायमानलिङ्गस्यैवानुमितिकरणत्वात् तथोक्तिः । यथा प्रत्यक्षानुमानयोः प्रमाणत्वाविशेषेऽपि सामग्रीफलयोर्भेदात् भेदः, तथा शब्दोपमाने अपि सामग्रीफलभेदात् भिद्येते एवेति वक्ष्यत इत्यर्थः ॥ § 605
I.87/KSV

## साङ्ख्यसम्मतप्रमाणत्रित्वनिरासः

एतेन त्रीणि प्रमाणानीति साङ्ख्यव्याख्याताऽपि तत्सङ्ख्या प्रत्याख्याता; सामग्रीफलभेदेन उपमानस्य चतुर्थप्रमाणस्य प्रतिपादयिष्यमाणत्वात् ॥ § 606

## प्रमाणसंप्लवो न दोषः

यत्पुनः एकस्मिन् विषये अनेकप्रमाणप्रसरं निरस्यता सौगतेन संप्लवपराकरणमकारि—तदपि मतिमोहविलसितम्; असति संप्लवे अनुमानप्रामाण्यप्रतिष्ठापनानुपपत्तेः ॥ § 607

न ह्यविज्ञातसम्बन्धं लिङ्गं गमकमिष्यते ।
सम्बन्धधीश्च सम्बन्धिद्वयावगतिपूर्विका ॥ ९२ ॥§ 609

सामान्यात्मकसम्बन्धिग्रहणं चानुमानतः ।
तस्मादेव यदीष्येत व्यक्तमन्योन्यसंश्रयम् ॥ ९३ ॥§ 611

अनुमानान्तराधीना सम्बन्धिग्रहपूर्विका ।
सम्बन्धाधिगतिर्न स्यात् मन्वन्तरशतैरपि ॥ ९४ ॥§ 613

तेन दूरेऽपि सम्बन्धग्राहकं लिङ्गलिङ्गिनोः ।
प्रत्यक्षमुपगन्तव्यं तथा च सति संप्लवः ॥ ९५ ॥§ 615

साङ्ख्यव्याख्याता—साङ्ख्याभिहितेति यावत् ॥ § 616

न हीत्यादि । सम्बन्धः—व्याप्तिरूपः अनौपाधिकः संबन्धः । अयमर्थः— व्याप्यत्वेन ज्ञायमानं लिङ्गं हि अनुमितिकरणम् । व्याप्तिश्च सम्बन्धरूपा इत्युक्तम् । सा च द्विनिष्ठा । एवं तादृशसम्बन्धरूपप्रकारविशिष्टत्वात् तत् सामान्यरूपमेव, न तु स्वलक्षणरूपम् । सामान्यं चानुमानस्यैव विषयः । एतादृशसम्बन्धिद्वयज्ञानं किं अनेनैवानुमानेन गृह्यते ? उत अनुमानान्तरेण ? उत प्रत्यक्षेण ? आद्ये—अन्योन्याश्रयः, अनेनानुमानेन सम्बन्धिग्रहणे सत्यनुमानप्रवृत्तिः । अनुमानप्रवृत्त्यनन्तरमेव च सम्बन्धिज्ञानं इति ।

०--१ ] ग्रहणं— nyāma-wit__ka

द्वितीये—अनवस्था । तृतीये—प्रमाणसंप्लवः । यः सम्बन्धी अनुमानेन गृह्यते स एव प्रत्यक्षेणापि ग्राह्य इति प्रत्यक्षानुमानयोरेकविषयत्वात् इति ॥ § 617
I.88/KSV

## बौद्धमते अनुमानोपपत्तिवर्णनम्, तन्निराकरणं च

तत्रैतत्स्यात्—अविदितसौगतकृतान्तानामेतच्चोद्यम् । ते हि— § 618

विकल्पविषये वृत्तिमाहुः शब्दानुमानयोः ।
तेभ्यः संबन्धसिद्धौ च नानवस्था, न संप्लवः ॥ ९६ ॥§ 620

तथा हि—दर्शनसमनन्तरोत्पत्त्यवाप्तदर्शनच्छायाऽतुरज्यमानवपुषो विकल्पाः प्रत्यक्षायन्ते । तदुल्लिखितकाल्पनिकतदितरपरावृत्त स्वभावसामान्याकारप्रतिष्टोऽयमनुमानव्यवहारः पारम्पर्येण मणिप्रभामणिबुद्धिवत् तन्मूल इति तत्प्राप्तयऽवकल्पते, न पुनः प्रत्यक्षैकसमधिगम्यं वस्तु स्पृशतीति कुतः संप्लव ? कुतो वाऽनवस्था ? § 621

तदेतद्वञ्चनामात्रम् । यो हि तादात्म्यतदुत्पत्तिस्वभाव प्रतिबन्ध इष्यते स किं वस्तुधर्मः ? विकल्पारोपिताकारधर्मो वा ? तत्र नायमारोपितधर्मो भवितुमर्हति । वस्तु वस्तुना जन्यते, वस्तु च § 622

एतच्चाद्यम्—असति-संप्लवे अनुमानानुत्थित्याक्षेपः । तेभ्यः— विकल्पेम्य । दर्शनेत्यादि । प्रत्यक्षं निर्विकल्पसविकल्पभेदभिन्नम् । तत्र प्रथमाक्षसन्निपातजन्यं यत् निर्विकल्पकादिपदवाच्यं स्वलक्षणविषयकं ज्ञानं, तदेव मुख्यं प्रत्यक्षं, प्रमाणभूतं च । तदनन्तरक्षणादिषु तु जायमानं विकल्पशब्दवाच्यं सामान्यविषयकं ज्ञानं तु, प्रत्यक्षपदवाच्यस्वलक्षणज्ञानानुविधायित्वात् प्रत्यक्षपदवाच्यं न प्रमाणम् किन्तु विकल्परूपं तत् । अनुमानादिकमपि विकल्परूपमेव । अथापि—मणिप्रभायां मणिबुद्ध्या प्रवृत्तस्य परंपरया यथा मणिलाभः—तथा विकल्पात् प्रवर्तमानः पुरुषः तन्मूलभूतस्वलक्षणज्ञानविषयं वस्तु प्राप्नोति परंपरया, इति अनुमानस्य प्रत्यक्षस्य च विषयभेदात् न प्रमाणसंप्लव इति भावः ॥ § 623

वञ्चनामात्रमिति । तादात्म्यतदुत्पत्तिरूपा व्याप्तिः किं वस्तुन एव धर्मः ? उत विकल्पविषयस्यावस्तुनः ? नान्त्यः—क्षणिकपरंपरायाः सत्यत्वेन कायकारणभावादेरवस्तुधर्मत्वासंभवात् । अवस्तुनो हि कुतः कारणापेक्षा ? न हि रज्जुसर्पः कारणजन्यः । एवञ्च व्याप्तिः वस्तुधर्म एवेति वक्तव्यम् । तथा च वस्तु विकल्पविषयो न भवति, तद्धर्मः प्रतिबन्धः परं विकल्पेन गृह्यत इति डिम्भप्रलोमनमिति ॥ § 624
I.89/KSV

६ ] तथा— nyāma-wit__ka
११ ] तु— nyāma-wit__kha
१७ ] त्ति— nyāma-wit__kha

वस्तुस्वभावं भवेत् । तस्माद्वस्तुधर्मः प्रतिबन्धः । विकल्पैश्च वस्तु न स्पृश्यते, तत्प्रतिबन्धश्च निश्चीयत इति चित्रम् ॥ § 625

इदं च सुभाषितम् ! वस्तुनोः प्रतिबन्धः तादात्म्यादिः, गम्यगमकत्वं च विकल्पारोपितयोरपोहयोः; तदेवं अन्यत्र प्रतिबन्धः अन्यत्र तद्ग्रहणोपायः; अन्यत्र प्रतीतिः, अन्यत्र प्रवृत्तिप्राप्ती इति सर्वं कैतवम् । न च दृश्यसंस्पर्श-शून्यात्मनां विकल्पानां दर्शनच्छाया काचन संभवति । इदन्ताग्राहित्वसंस्पष्ट-त्वाद्यपि वस्तुसंस्पर्शरहितमकिञ्चित्करं अप्रमाणत्वानपायात् ॥ § 626

अप्रमाणपरिच्छिन्नः प्रतिबन्धश्च, तत्त्वतः ।
न परिच्छिन्न एवेति ततो मिथ्याऽनुमेयधीः ॥ १७ ॥§ 628

अथाभिमतमेवेदं बुद्ध्यारूढत्ववर्णनात् ।
हन्त ! तात्त्विकसंबन्धसाधनव्यसनेन किम् ? ॥ १८ ॥§ 630

उक्तमर्थं सोपालम्भं प्रकटयति—इदं चेति । इदमिति किम् ? इत्य-त्राह—वस्तुनोरित्यादि । अपोहयोरिति । विकल्पो हि सामान्यविषयकः, सामान्यं चापोहरूपमित्यत एवमुक्तम् । अन्यत्र प्रतिबन्धः— वस्तुनोर्व्याप्तिः । अन्यत्र तद्ग्रहणोपायः अवस्तुनो अपोहयोर्गम्यगमकभावः । अन्यत्र प्र-तीतिः—अवस्तुविषयः विकल्पः । अन्यत्र प्रवृत्तिप्राप्ती—अवस्तुसामान्यविष-यिणी प्रवृत्तिः । प्राप्तिस्तु वस्तुविषयिणीति । विकल्पानां दर्शनच्छायानुरञ्ज-नात् दर्शनपदवाच्यत्वमित्यंशं दूषयति—न चेति । जपाकुसुमादिर्हि स्वसंबद्ध एव स्फटिके लौहित्यमापादयति । विकल्पानां तु दर्श-विषयवस्तुसम्बन्ध एव नास्ति । यदि स्यात् तदा प्रमाणसंप्लवो जागरूकः । एवञ्च विन्ध्य-हिमाचलयोरिव सर्वथा संबन्धशून्ययोः कथं छायानुवृतिरिति । ननु विकल्पे प्रकारभानेऽपि निर्विकल्पविषयस्य विशेष्यस्यापि भानात्—अस्ति दर्शन-च्छायापत्तिर्विकल्पस्येत्यत्राह— इदन्तेति । इदन्ताया विकल्पे कलुषितत्वेन वस्तुरूपत्वं नास्त्येवेत्यर्थः ॥ § 631

अन्ततः अनुमानोपपादनमेव न शक्यमित्युपसंहरति—अप्रमाणेति ॥ § 632

I.90/KSV

## अनुमाने प्रमाणसंप्लवः सर्वथा दुर्वारः

५ ] स्व— nyāma-wit__kha
५ ] नः— nyāma-wit__ka
५ ] दि— nyāma-wit__kha
७ ] अन्यत्र— nyāma-wit__ga
८ ] स्प— nyāma-wit__kha
९ ] स्प— nyāma-wit__kha
१२ ] त— nyāma-wit__ka

यथा च सामान्यविषये प्रत्यक्षाभ्युपगममन्तरेण सम्बन्धग्रहणमघटमानमिति विसंष्ठुलमनुमानं, एवं अवगतसंम्बन्धस्य द्वितीयलिङ्गदर्शनमपि दुरुपपादमिति ततोऽपि संप्लवापलापिनामनुमानमुत्सीदेत् ॥ § 633

न ह्यसाधारणांशस्य लिङ्गत्वमुपपद्यते ।
विना न चानुमानेन सामान्यमवगम्यते ॥ ९९ ॥§ 635

सैवानवस्था तत्रापि स एवान्योऽन्यसंश्रयः ।
स एव च विकल्पानां सामर्थ्यशमनक्रमः ॥ १०० ॥§ 637

अतः सम्बन्धविज्ञानलिङ्गग्रहणपूर्वकम् ।
अनुमानमनिह्नुत्य कथं संप्लवनिह्नवः ॥ १०१ ॥§ 639

**विषयद्वैविध्याङ्गीकारेऽपि प्रमाणसंप्लवः दुर्वारः**

अपि च विषयद्वैविध्यसिद्धावपि प्रत्यक्षानुमाने एव परस्परमपि संप्लवेयाताम् । यतः— § 640

प्रत्यक्षत्वं परोक्षोऽपि प्रत्यक्षोऽपि परोक्षताम् ।
देशकालादिभेदेन विषयः प्रतिपद्यते ॥ १०२ ॥§ 642

द्वितीयेति । महानसादौ व्याप्तिग्रहणकाले प्रथमं लिङ्गदर्शनम् । ततः पर्वतादौ तादृशव्याप्तिविशिष्टधूमदर्शनं द्वितीयमावश्यकम् । व्याप्तिरूपप्रकारशून्यो हि केवलधूमः न बह्निमनुमापयेत् । अतश्च पुनरपि प्रमाणसंप्लवो दुर्वार इति भावः ॥ § 643

एतदेवोपपादयति—न ह्यसाधारणेत्यादि । असाधारणांशः— स्वलक्षणमात्रम् । सामान्यं—व्याप्यत्वादिरूपम् । न हि महानसदृष्ट एव धूमः पर्वते वह्न्यनुमितिहेतुर्भवितुमलमिति यावत् । सैवेत्यादि । न ह्यविज्ञातसम्बन्धं इत्यादिनाऽभिहिता इत्यर्थः । अतश्चानुमानप्रामाण्यवादिनां प्रमाणसंप्लवोऽवर्जनीय इत्युपसंहरति—अत इति । सम्बन्धविज्ञानलिङ्गग्रहणेति द्वंद्वः । अधिकं पूर्वमेव निरूपितम् । अनिह्नुत्य—अङ्गीकृत्येति यावत् ॥ § 644

प्रत्यक्षत्वमित्यादि । परोक्षोऽपि विषयः प्रत्यक्षत्वं, प्रत्यक्षोऽपि विषयः परोक्षतां देशकालादिभेदेन प्रतिपद्यते । दूरात् धूमेन वह्निमनुमाय

क्षणभङ्गं निषेत्स्यामः सन्तानो यश्च कल्पितः ।
दर्शितप्राप्तिसिद्ध्यादौ संप्लवेऽपि स तादृशः ॥ १०३ ॥§ 647

**जात्यवयविप्रभृतीनां स्थिराणां सत्त्वात्प्रमाणसंप्लवः दुर्वारः**

यदपि जात्यादिविषयनिषे (Edtext outside numbered paragraph)धमनोरथैः संप्लवपराकरणमध्यवसितं—तत्र जात्यादिसमर्थनमेवोत्तरीकरिष्यति ।

तावकैर्दूषणगणैः कालुष्यमपनीयते ।
तद्वानवयवी जातिरिति वार्तैव भद्रिका ॥ १०४ ॥§ 649

**गृहीतग्राहित्वेऽपि नाप्रामाण्यम्**

यदपि विरोधवैफल्याभ्यां न संप्लव इत्युक्तं—तत्र वैफल्यं, अनधिगतार्थगन्तृत्वविशेषणनिवारणेनैव प्रतिसमाहितम् । विरोधोऽपि नास्ति; पूर्वज्ञानोपमर्देन नेदं रजतम् इतिवत् उत्तरविज्ञानानुत्पादात् । अनेकधर्मविसरविशेषितवपुषि धर्मिणि कदाचित् केनचित् कश्चिन्निश्चीयते धर्मविशेष इति को विरोधार्थः ? पर्वतं गच्छन् तमेव वह्निं प्रत्यक्षीकरोति । एवं जलान्तस्थः स्फटिकः परोक्षः स एव वहिःस्थः प्रत्यक्ष इति । ननु वस्तुनः प्रतिक्षणं भङ्गात् अनुमानविषयः अन्यः, अन्य एव च प्रत्यक्षस्येति कथं देशकालादिभेदेन संप्लवः ? इत्यत्राह— क्षणभङ्गमिति । किञ्च दर्शितप्राप्तिसिद्धीनां निर्वाहाय यदा सन्तानः कल्पितः, तदा तेनैव प्रमाणसंप्लवः सिद्ध इत्याह—सन्तान इति ॥ § 650

अवयवी जातिरिति वार्तैकभद्रिका इत्युक्तं निराकरोति—यदपीति । तद्वान्—नानाप्रमाणगम्यत्वेनापनीतदोषः । अवयवी जातिश्चेति वार्ता साधीयस्येवेत्यर्थः ॥ § 651

प्रतिसमाहितमिति । अनधिगतार्थगन्तृत्वस्य प्रमाणलक्षणत्वे हि एकेन प्रमाणेनावगते प्रमाणान्तरप्रवृत्तिर्विफलेति दोषः, तच्च लक्षणं नास्माकमिति न दोष इति भावः । उपमर्दः—बाधः । विसरः—समुदायः । अनेकधर्मविशिष्टो हि धर्मी । स च कदाचिदेकाकारेण, कदाचिच्चाकारान्तरेण गृह्यत इति न विरोध इत्यर्थः ॥ § 652

I.92/KSV

**समानविषयत्वेऽपि शब्दलिङ्गयोः विलक्षणप्रतीतिजनकत्वम्**

यदपि प्रत्यक्षस्य शब्दलिङ्गयोश्च समानविषयत्वे सति सदृशप्रतीतिजनकत्वमाशङ्कितम्—तत्र केचिदाचक्षते—विषयसाम्येऽप्युपायभेदात् प्रतीतिभेदो भवत्येव; दूराविदूरदेशव्यवस्थितपदार्थप्रतीतिवत् ॥ § 653

अन्ये तु मन्यन्ते—नोपायभेदात् प्रतीतिभेदो भवति, अपि तु विषयभेदादेव । सन्निकृष्टविप्रकृष्टग्रहणेऽपि विषयौ भिद्येते । दूरात् सामान्यधर्म-

२ ] क— nyāma-wit__kha
६ ] र्दे— nyāma-wit__ka

मात्रविशिष्टस्य धर्मिणो ग्रहणम्; अदूरात्तु सकलतद्गतविशेषसाक्षात्करणम् । तदिमाः प्रत्यक्षानुमानशब्दप्रमितयः प्रमेयभेदात् भिद्यन्ते ॥ § 654

विशेषधर्मसंबद्धं वस्तु स्पृशति नेत्रधीः ।
व्याप्तिबोधानुसारेण तद्वन्मात्रं तु लैङ्गिकी ॥ १०५ ॥§ 656

शब्दात् तत्तदवच्छिन्ना वाच्ये सञ्जायते मतिः ।
शब्दानुवेधशून्या हि न शब्दार्थे मतिर्भवेत् ॥ १०६ ॥§ 658

समानविषयत्वे च जायते सदृशी मतिः इत्युक्तं प्रतिसमाधत्ते— यदपीति । उपायभेदात् इन्द्रिय—व्याप्तिज्ञान—सादृश्यज्ञान—शब्दरूपोपायभेदादित्यर्थ ॥ § 659

ननु एकस्यैव सतः वस्तुनः कथं सन्निकर्षविप्रकर्षभेदात् भेदः इत्यत्राह— दूरादिति । सकलेति । योग्यसकलेत्यर्थः ॥ § 660

प्रत्यक्षानुमानादीनां विविच्य विषयान् दर्शयति—विशेषेति । तद्वन्मात्रं—व्याप्त्यवगतधर्ममात्रविशिष्टधर्मिणं लैङ्गिकी मतिः स्पृशतीत्यन्वयः । तत्तदवच्छिन्ना—तत्तद्वाचकशब्दावच्छिन्ना । शब्देनार्थोपस्थितिवेलायां तत्तदर्थस्य तत्तच्छब्दवाच्यतयोपस्थितिरिति भावः । एतदेवोपपादयति— शब्देति । शब्दार्थे—शब्दोपस्थापितेऽर्थे ॥ § 661

ननु द्वितीयेऽस्मिन् पक्षे कथं संप्लवः ? प्रत्यक्षादीनां विषयव्यवस्थाया

### प्रत्यक्षादीनां विषयवैलक्षण्येऽपि संप्लवोऽप्यस्त्येव

कथं तर्हि तेषां संप्लवः ? सर्वत्र विषयभेदस्य दर्शितत्वात्— सत्यम्—धर्म्यभिप्रायेण संप्लवः कथ्यते । इमौ तु पक्षौ प्रत्यक्षलक्षणे विस्तरशो विचारयिष्येते । सर्वथा तावदस्ति प्रमाणानां संप्लव इति सिद्धम् ॥

### भाष्योक्तप्रमाणसंप्लवोदाहरणम्

तदुदाहरणं तु भाष्यकारः प्रदर्शितवान्—अग्निराप्तोपदेशात् प्रतीयते, अमुत्रेति; प्रत्यासीदता धूमदर्शनेनानुमीयते; प्रत्यासन्नतरेण उपलभ्यते इत्यादि ॥

### भाष्योक्तप्रमाणव्यवस्थोदाहरणम्

क्वचित्तु व्यवस्था दृश्यते—यथा अग्निहोत्रं जुहुयात् स्वर्गकामः(?') इत्यस्मदादेरागमादेव ज्ञानं, न प्रत्यक्षानुमानाभ्याम् । स्तनयित्नुशब्दश्रवणात् तद्धेतुपरिज्ञानमनुमानादेव, न प्रत्यक्षागमाभ्याम् । स्वहस्तादौ प्रत्यक्षादेव प्रतीतिः, न शब्दानुमानाभ्याम् इति । तस्मात् स्थितमेतत्—प्रायेण प्रमाणानि प्रमेयमभिसंप्लवन्ते, क्वचित्तु प्रमेये व्यवतिष्ठन्तेऽपीति ॥

---

३ ] विशेष— nyāma-wit__kha
४ ] य— nyāma-wit__kha
४ ] तीति— nyāma-wit__ka
७ ] त्वदवच्छिन्ना— nyāma-wit__kha

## प्रमाणसंप्लवोपसंहारः

इत्युद्धृताखिलपरोदितदोषजात-
संपातभीतिरिह संप्लव एष सिद्धः ।
सर्वाश्च सौगतमनस्सु विरप्ररूढाः
भग्नाः प्रमाणविषयद्वयसिद्धिवाञ्छाः ॥ १०७ ॥§ 666

उक्तत्वात्, इति शङ्कते कथमिति । धर्म्यभिप्रायेणेति । धर्मभेदेन विषयव्यवस्थायामपि तत्तत्प्रमाणगम्यधर्मविशिष्टधर्मिणः सर्वत्रानुगतत्वादस्त्येव संप्लव इत्यर्थः । इमौ पक्षौ—केचित्पक्षः, अन्ये तु पक्षश्च ॥ § 667

अग्निरित्याद्यर्थानुवादमात्रम् ॥ § 668

व्यवतिष्ठन्त इति गन्धादौ विषये द्रष्टव्यम्, घ्राणैकग्राह्यत्वात् गन्धस्य ॥ § 669

संपातः—धारा संपात आसारः । इह—अस्मिन् सद्दर्शने । प्रमाणेति । प्रत्यक्षानुमानरूपप्रमाणद्वय—स्वलक्षणसामान्यरूपविषयद्वयसिद्धौ वाञ्छा येषां ते तथा ॥ § 670

I.94/KSV

## प्रमाणसंख्याधिक्यपरीक्षा

एवं तावत् न्यूनत्वं सङ्ख्यायाः परीक्षितम्, आधिक्यमिदानीं परीक्ष्यते ॥ § 671

तत्र अर्थापत्त्या सह प्रत्यक्षादीनि पञ्च प्रमाणानीति प्राभाकरः ॥ § 672

अभावेन सह षडिति भाट्टः ॥ § 673

संभवैतिह्याभ्यामष्टाविति केचित् ॥ § 674

अशक्य एव प्रमाणसङ्ख्यानियम इति सुशिक्षितचार्वाकाः ॥ § 675

## अर्थापत्तेरतिरिक्तप्रमाणत्वम् ।

तत्र भाट्टास्तावदित्थमर्थापत्तिमाचक्षते दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यर्थान्तरकल्पना अर्थापत्तिः । दृष्ट इति—प्रत्यक्षादिभिः पञ्चभिः प्रमाणैः, श्रुत इति—कुतश्चन लौकिकाद्वैदिकाद्वा शब्दादवगतोऽर्थः; ततोऽन्यथाऽनुपपद्यमानार्थान्तरकल्पनाऽर्थापत्तिः—इत्येवं षड्प्रमाणप्रभवत्वेन षड्विधाऽसौ भवतीति ॥ § 676

---

२१ ] तेषां— nyāma-wit__ka
२२--२३ ] विचारयिष्येते— nyāma-wit__kha
२६ ] मिमी— nyāma-wit__kha
३१ ] स्वहस्तौ द्वौ इति तु— nyāma-wit__kha
१८ ] प्रभाकरः— nyāma-wit__kha
१ ] मानाद— nyāma-wit__kha

पञ्चेति । तथाऽऽह शालिकनाथः प्रकरणपञ्चिकायाम्—तत्र पञ्चविधं मानं प्रत्यक्षमनुमा तथा । शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतम् इति ॥ § 677

अभावः—अनुपलब्धिः । षडिति । प्रत्यक्षादेश्च षड्कस्य प्रमाणषड्कविज्ञातः इत्यादि वार्तिकम् ॥ § 678

सुशिक्षितेति । प्रथा च प्रत्यक्षमेकं चार्वाकाः इति पूर्वमुक्तं तु अशिक्षित-चार्वाकविषयमिति भावः ॥ § 679

दृष्ट इत्यादि—यद्यपि दृष्टः श्रुतो वा इत्यादिः भाष्ये दृश्यते । भाष्यं च भाट्टप्र भाकरसाधारणम् । अतः भाट्टः इत्युल्लेखः न युज्यत इव । अथापि भट्टानुयायिभिः पार्थसारथिमिश्रैः विरचितायां शास्त्रदीपिकायां भाष्यानुपूर्वीतौल्यदर्शनात् एतत्प्रकरणे शक्तिनिराकरणसंरंभस्य दर्शनाच्च पार्थसारथ्यादिमतमेवात्र दूषितमिति प्रतिभाति । अतएव भाट्टाः इत्युक्तं, न तु भट्टः इति । गुरुमतं तु प्रत्येकं विचार्यते । नोपपद्यत इति । इतिशब्दः हेतुवचनः । दृष्टः श्रुतो वा इत्युक्तं विवृणोति—दृष्ट इतीति । ततः—श्रुतात् अर्थात् । अस्य कल्पना इत्यत्रान्वयः । षट्प्रमाणेति—प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिरूपेति शेषः ॥ § 680
I.95/KSV

## श्रुतार्थापत्तेः वैलक्षण्यम्

दृष्टवचनेनोपलब्धिवाचिना गतार्थत्वेऽपि श्रुतार्थापत्तेः पृथगभिधानं प्रमाणैकदेशविषयत्वेन प्रमेयविषयार्थापत्तिपञ्चकविलक्षणत्वात् ॥ § 681

## प्रमाणषड्कपूर्विकाः षडर्थापत्तयः

तत्र प्रत्यक्षपूर्विका तावदर्थापत्तिः—प्रत्यक्षावगतदहनसंसर्गोद्भतदाहाख्यकार्यान्यथाऽनुपपत्त्या वह्नेर्दाहशक्तिकल्पना ॥ § 682

अनुमानपूर्विका—देशान्तरप्राप्तिलिङ्गानुमितमरीचिमालिगत्यन्यथाऽनुपपत्त्या तस्य गमनशक्तिकल्पना ॥ § 683

उपमानपूर्विका—उपमानज्ञानावगतगोपिण्डादिसारूप्यविशिष्टगवयादिप्रमेयाऽन्यथाऽनुपपत्त्या तस्य तज्ज्ञानग्राह्यत्वशक्तिकल्पना इति ॥ § 684

ननु दृष्ट इत्यत्र दर्शनपदं न प्रत्यक्षमात्रपरम्, अनुमानादिपरत्वस्यानुपदमेव वर्णितत्वात्; किन्तु प्रमाणसामान्यपरम् । एवञ्च शब्दस्यापि तेनैव

---

११ ] पृथग्वि— nyāma-wit__kha
२३ ] न्यगत्य— nyāma-wit__ka
२५--२६ ] गवयसारूप्यविशिष्टगोपिण्डादिप्रमेयाऽ— nyāma-wit__kha
२६ ] कल्पना— nyāma-wit__ka

गतार्थत्वात् दृष्टः श्रुतो वा इति विभागः किं निबन्धन इत्याशङ्क्य समाधत्ते—दृष्टेति । प्रमाणैकदेशविषयत्वेनेति । इतरत्र अर्थकल्पनम्, अत्र तु प्रमाणस्य शब्दस्य कल्पनमित्यर्थः । स्पष्टीकरिष्यते चेदमुपरिष्टात् ॥ § 685

तत्र प्रत्यक्षतो ज्ञाताद्दाहाद्दहनशक्तता । वह्नेः— इति श्लोकवार्तिकोक्तं मनसि कृत्वाऽऽह—प्रत्यक्षावगतेति । अस्य दाहाख्यकार्ये अन्वयः । अत एवास्याः प्रत्यक्षपूर्वकत्वम् ॥ § 686

...अनुमितात् सूर्ये यानात् तच्छक्तियोग्यता इत्युक्तं स्मृत्वाऽऽह—देशान्तरेति । देशान्तरप्राप्तिरूपात् लिङ्गात् अनुमिता या मरीचिमालेः—सूर्यस्य गतिः, तदन्यथानुपपत्त्येत्यन्वयः । तस्य—सूर्यस्य ॥ § 687

गवयोपमिताया गोः तज्ज्ञानग्राह्यता मताश्लो-वा-अर्था. इत्युक्त स्मरन्नाह—उपमानेति । उपमानज्ञानावगतं यत् गोपिण्डसारूप्यं, तद्विशिष्टगवयेत्यन्वयः । तस्य—गवयस्य । तज्ज्ञानग्राह्यत्वेति । गवयपदजन्यज्ञानविषयत्वेत्यर्थः ॥ § 688

I.96/KSV

तदिमास्तावदतीन्द्रियशक्तिविषयत्वादर्थापत्तयः प्रमाणान्तरम् । शक्तेः प्रत्यक्षपरिच्छेद्यत्वाऽनुपपत्तेः तदधीनप्रतिबन्धाधिगमवैधुर्येणानुमानविषयत्वायोगात् ॥ § 689

अन्वयव्यतिरेकौ हि द्रव्यरूपानुवर्तिनौ ।
शक्तिस्तु तद्गता सूक्ष्मा न ताभ्यामवगम्यते ॥ १०८ ॥§ 691

शब्दोपमानयोस्तु अत्र संभावनैव नास्तीति अर्थापत्तेरेवैष विषयः ॥ § 692

अर्थापत्तिपूर्विका यथा—शब्दकरणिकार्थप्रतीत्यन्यथाऽनुपपत्त्या शब्दस्य वावकशक्तिमवगत्य तदन्यथाऽनुपपत्त्या तस्य नित्यत्वकल्पना । सा चेयं शब्दपरीक्षायां वक्ष्यते ॥ § 693

अभावपूर्विका तु भाष्यकारेणोदाहृता—जीवतश्चैत्रस्य गृहाभावमवसाय तदन्यथाऽनुपपत्त्या बहिर्भावकल्पना—इति ॥ § 694

ननु कार्यदर्शनादर्शनाभ्यां शक्तेरनुमेयत्वसंभवे कथमनुमानाविषयत्वम् ? इत्यत्राह—अन्वयेति । अयमर्थः—अन्वयव्यतिरेकदर्शनं च न शक्तिकार्ययोः संभवति । किन्तु द्रव्यस्वरूपकार्ययोरेव । न हि वह्निशक्तिसत्त्वे दाहः, तदभावे तदभावः इति वक्तुं शक्यते; शक्तेरतीन्द्रियत्वात् । अतश्च यथा प्रत्यक्षेण न शक्तिसिद्धि तथाऽनुमानेनापि; किन्त्वर्थापत्त्यैवेति । अत्रशक्तिसिद्धौ ॥ § 695

अभिधानप्रसिद्ध्यर्थमर्थापत्त्यावबोधितात् । शब्दे बोधकसामर्थ्यात् तन्नित्यत्वप्रकल्पनम् इति वार्तिकमनुसन्दधन्नाह—अर्थापत्तीति । तदन्यथानुप-

१७ ] गत— nyāma-wit__ka
१८ ] त्वात्— nyāma-wit__ka
२३ ] का— nyāma-wit__ka
२६ ] परीक्षा— nyāma-wit__ka

पत्त्या—वाचकत्वशक्तिमत्त्वान्यथाऽनुपपत्त्या । शब्देऽनित्ये तन्नाशे शक्तेरपि नाशात् कालान्तरे तत्पदात् शाब्दबोधानुपपत्तिरित्यादिकं शब्दनित्यत्वाधिकरणेऽभिधास्यत—इति वार्तिकोक्तं स्वयमप्यनुसरन् आह—सा चेयमिति ॥
§ 696

भाष्यकारेण—शबरस्वामिना ॥ § 697
I.97/KSV

## अर्थापत्तिः नानुमानम्

ननु दृष्टेन अदृष्टसिद्धेरनुमानमेवेदं स्यात्—नानुमानं—सामग्र्यभावात् । पक्षधर्मतादिसामग्र्या यज्ज्ञानमुत्पद्यते तदनुमानमिति तार्किकस्थितिः । सा चेह नास्ति । बहिर्भावविशिष्टे चैत्रे, चैत्रविशिष्टे बहिर्भावे वाऽनुमेये कस्य लिङ्गत्वमिति चिन्त्यम् । गृहाभावविशिष्टस्य वा चैत्रस्य ? चैत्राभावविशिष्टस्य वा गृहस्य ? गृहे चैत्राभावस्य वा ? तत्र चैत्रादर्शनस्य वा ? न चैषामन्यतमस्यापि पक्षधर्मत्वमस्ति । न हि गृहं वा, चैत्रो वा, तदभावो वा, तददर्शनं वा चैत्रस्य धर्मः, तद्बहिर्भावस्य वेत्यपक्षधर्मत्वादन्यतमस्यापि न लिङ्गत्वम् ॥
§ 698

## प्रमेयानुप्रवेशाच्च अर्थापत्तिर्नानुमानम्

अपि च प्रमेयानुप्रवेशप्रसङ्गादपि नेदमनुमानम् । तथा हि— आगमावगतजीवनस्य गृहाभावेन चैत्रस्य बहिर्भावः परिकल्प्यते, इतरथा मृतेनानैकान्तिको हेतुः स्यात् । अभावश्च गृहीतः सन् बहिर्भावमवगमयति, नागृहीतः; धूमवत् । अभावग्रहणं च § 699

ज्ञातसम्बन्धस्यैकदेशदर्शनात् एकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिरनुमानं इति मीमांसकैर्लक्षणात् तार्किकेत्युक्तम् । बहिर्देशविशिष्टेऽर्थे देशे वा तद्विशेषिते । प्रमेये, यो गृहाभावः पक्षधर्मस्त्वसौ कथम् ? तदभावविशिष्टं तु गृहं धर्मो न कस्यचित्—इतिवार्तिकोक्तमुपपादयति—बहिर्भावेत्यादि । यद्यप्यर्थापत्तिसामान्यस्यैवानुमानान्तर्भावो वर्णनीयः, अथापि अभावपूर्विकां दृष्टान्तीकृत्य शाबरभाष्येऽतिरिक्तत्वसाधनात् स एव क्रमोऽत्राप्यादृतः । बहिर्भावचैत्रयोः पक्षसाध्ययोर्विशेषणविशेष्यभावे विनिगमनाविरहेणानुमानद्वयमुपन्यस्तम् । एवमुत्तरप्रकरणं सर्वं श्लोकवार्तिकमनुसृत्यैव वर्णितमिति

८ ] सिद्धसिद्धे— nyāma-wit__kha

९ ] सामग्र्या हि— nyāma-wit__ka

९ ] मुपजन्यते— nyāma-wit__kha

१० ] वैत्राभावविशिष्टे— nyāma-wit__kha

१२ ] चैत्रा— nyāma-wit__kha

१९ ] तधू nyāma-wit__kha

पृथक्पृथक् न वार्तिकं सर्वत्र प्रदर्श्यते, ग्रन्थविस्तरमियेत्यवगन्तव्यम् ॥
§ 700

जीवतश्च गृहाभावः पक्षधर्मोऽत्र कल्प्यते । तत्संवित्तिर्बहिर्भावं न चाबुध्वोपजायते—इत्यादिवार्तिकोक्तमनुवदति—अपि चेत्यादिना । प्रमेयानुप्रवेशो नाम प्रमाणेन गम्यस्य प्रमेयस्य प्रमाण एव क्रोडीकरणम् । चैत्रः,

सकलसदुपलम्भकप्रमाणप्रत्यस्तमयपूर्वकम् । इह तु सदुपलम्भकमस्त्येव जीवनग्राहि प्रमाणम् । जीवनं हि क्वचिदस्तित्वमुच्यते । अप्रत्यस्तमिते तु सदुपलम्भके प्रमाणे कथमभावः प्रवर्तेत ? इति प्रवर्तमान एवासौ सदुपलम्भकं प्रमाणं पृथग्विषयमुपस्थापयति—बहिरस्य भावः, गृहे त्वभाव इति । तेन जीवतो बहिर्भावव्यवस्थापनपूर्वकगृहाभावग्रहणोपपत्तेः प्रमेयानुप्रवेशः ॥

अनुमाने तु धूमादिलिङ्गग्रहणसमये न मनागपि तदनुमेयदहनलिङ्ग्यनुप्रवेशस्पर्शो विद्यत इति ॥

ननु अर्थापत्तावपि किं प्रमेयानुप्रवेशो न दोषः ?—न दोष इति ब्रूमः—प्रमाणद्वयसमर्पितैकवस्तुविषयाभावभावसमर्थनार्थमर्थापत्तिः प्रवर्तमाना प्रमेयद्वयं परामृशत्येव, अन्यथा तद्घटनायोगात् । बहिर्वर्तते, गृहेऽसत्वादित्युक्ते मृते व्यभिचारात्, शास्त्राद्यवगतजीवनस्य गृहेऽसत्वादित्येव हेतुर्वाच्यः । गृहे अभावग्रहश्च प्रतियोगिग्राहकसर्वप्रमाणाप्रवृत्तावेव संभवेत् । आगमाद्यवगतत्वात् चैत्रसद्भावस्य प्रतियोगिग्राहकप्रमाणप्रवृत्त्या अभावाग्रहणे प्रसक्ते, गृहे चैत्रे प्रवर्तमानं अनुपलब्धिरूपं प्रमाणं, सत्त्वग्राहकं प्रमाणं अन्यविषयं नियोजयति, सत्त्वस्य बहिर्विषयत्वादिति । एवञ्च अनुमानेन निर्णयः यः बहिःसद्भावरूपोऽर्थः स लिङ्गज्ञान एव विषयो भवत्येव । आगमात्तु सत्त्वं गृहीतं, अनुपलब्ध्या त्वसत्त्वं; न ह्युभयमेकस्य संभवति; नाप्यन्यतराप्रामाण्यं, तुल्यत्वात्, अतः इदं प्रमाणद्वयं विषयभेदेन परस्परविरोधं व्यवस्थापयति—गृहेऽभावः, बहिःसत्त्वमिति । एवञ्च हेतुज्ञानकाल एव साध्यस्यापि स्वयं व्यवस्थापनात् न प्रमाणान्तरापेक्षाऽस्तीति अर्थापत्तिर्नानुमानमिति । न ह्येवमनुमाने लिङ्गज्ञानकाल एव साध्यस्यापि भानम् । अतो विलक्षणेयमर्थापत्तिः ॥ § 701

अन्यथानुपपत्तौ तु इत्यादिना वार्तिकोक्तं वैलक्षण्यमुपपादयितुं स्वयमाक्षिपति—नन्विति । तत्रापि हि प्रमाणप्रवृत्तिकाल एव प्रमेयनिर्णयः उक्तरीत्याऽवर्जनीयः । ततश्च अर्थापत्त्या गम्यं किमन्यदस्तीत्यर्थः । प्रमाणद्वयं—भावाभावग्राहकं प्रमाणद्वयम् । परामृशत्येवेति । एतदुक्तं भवति—अयमेव

अतश्च येयमागमादनियतदेशतया क्वचिदस्तीति संवित्तिरभूत्, सैवेयं गृहाभावे गृहीते बहिरस्तीति संवित्तिरधुना संवृत्ता । तदतो वैलक्षण्यात्

११ ] र्तते— nyāma-wit__kha
१५ ] तल्लिङ्गत— nyāma-wit__kha

नानुमानमर्थापत्तिः ॥

### अर्थापत्तिस्थले व्याप्तिग्रहणमपि न संभवति

अतश्चैवं—सम्बन्धग्रहणाभावात्—

भावाभावौ हि नैकेन युगपद्वह्निधूमवत् ।
प्रतिबद्धतया बोद्धुं शक्यौ गृहबहिःस्थितौ ॥ १०९ ॥ § 704

अन्यथाऽनुपपत्त्या च प्रथमं प्रतिबन्धधीः ।
पश्चाद्यद्यनुमानत्वं उच्यते, काममुच्यताम् ॥ ११० ॥ § 706

नन्वस्त्येव गृहद्वारे वर्तिनः सङ्गतिग्रहः ।
भावेनाभावसिद्धौ तु कथमेष भविष्यति ॥ १११ ॥ § 708

यत्र गृहे चैत्रस्य भावमवगम्य तदन्यथाऽनुपपत्त्या तदन्यदेशेषु नास्तित्वमवगम्यते—तत्र देशानामानन्त्यात् दुरधिगमः प्रतिबन्धः ॥ प्रवृत्तिक्रमः अर्थापत्तिप्रमाणस्य । अयमेव च विशेषोऽस्येतरप्रमाणेभ्यः । अत एवेयमतिरिक्तं प्रमाणमुच्यतेऽस्माभिः । अतोऽयमपर्यनुयोज्यः व्याप्त्यादिकमन्तराऽपि इन्द्रियं कथमर्थमवगमयतीत्यादिवत् । तत्तत्प्रमाणानामसाधारण्यं तु सर्वसम्मतमिति ॥ § 709

सम्बन्धग्रहणाभावात् इत्यस्य प्रतिबद्धतया बोद्धुं न हि शक्यौ इत्यनेनान्वयः । अन्यथेत्यादि । यदि च, प्रतिबन्धसम्बधः—व्याप्तिःग्रहणं प्रथमतः अर्थापत्त्यैव, ततश्चानुमानं प्रवर्तत इत्युच्यते—तदा सिद्धमर्थापत्तेरतिरिक्तत्वमित्यर्थः । तदेतदुक्तं वार्तिके—तेन सम्बन्धवेलायां सम्बन्ध्यन्यतरो ध्रुवम् । अर्थापत्त्याऽवगन्तव्यः पश्चादस्त्वनुमानता इति ॥ § 710

ननु सम्बन्धग्रहः अर्थापत्त्यैव संभवेदिति नायं निर्बन्धः । गृहद्वारे स्थितः पुरुषः बहिर्गच्छन्तं देवदत्तं पश्यन् युगपदेव देवदत्ते बहिर्भावं गृहेऽभावं च प्रत्यक्षेणैव गृह्णाति यदा तदा तयोः प्रत्यक्षेणैव सङ्गतिग्रहः सुलभ इति शङ्कते— नन्विति । समाधत्ते—भावेनेति । एष—सङ्गतिग्रहः ॥ § 711

उक्तमेवोपपादयति—यतेति । एवञ्चोक्तस्थलेऽर्थापत्तिमन्तरा निर्वाहेऽपि भावेनाभावनिर्णयस्थले अर्थापत्तिरेव शरणीकरणीयेति भावः ॥ § 712

I.100/KSV

अनग्निव्यतिरेकस्य निश्चये धूमस्य का वार्तेति चेत्—उच्यते— तत्र धूमज्वलनयोः अन्वयग्रहणसंभवात् न व्यतिरेकग्रहणमाद्रियेरन् । भूयोदर्शनसुलभनियमज्ञानसंपाद्यमानसाध्याधिगमनिर्वृत्तमनसां किमनग्निव्यतिरेक-

१ ] वृ— nyāma-wit__kha
२ ] द— nyāma-wit__kha
७ ] न्ध— nyāma-wit__kha
७ ] रोद्धुं— nyāma-wit__kha
११ ] न— nyāma-wit__kha

निश्चयेन ? इह पुनरन्वयावसायसमय एव गम्यधर्मस्य दुरवगमत्वमुक्तं, अनन्तदेशवृत्तित्वात् ॥ § 713

अनुपलब्ध्या तन्निश्चय इति चेत्—न—मन्दिरव्यतिरिक्तसकलभुवनतलगततदभावनिश्चयस्य नियतदेशयाऽनुपलब्ध्या कर्तुमशक्यत्वात् । तेषु तेषु देशान्तरेषु परिभ्रमन् अनुपलब्ध्या तदभावं निश्चेष्यामीति चेत्—मैवम्—

गत्वा गत्वाऽपि तान् देशान् नास्य जानामि नास्तिताम् ।
कौशाम्ब्यास्त्वयि निष्क्रान्ते तत्प्रवेशादिशङ्कया ॥ ११२ ॥ § 716

तस्मादभूमिरियमसर्वज्ञानामित्यर्थापत्त्यैव तन्निश्चयः ॥ § 717

ननु इत्थममुमर्थमनुमानान्निश्चेष्यामः—देशान्तराणि, चैत्रशून्यानि, चैत्राधिष्ठितदेशव्यतिरिक्तत्वात्, तत्समीपदेशवदिति —न—प्रत्यनुमानोपहतत्वात्—देशान्तराणि, चैत्राव्यतिरिक्तानि, तत्समीपदेशव्यतिरिक्तत्वात्, चैत्राधिष्ठितदेशवत् इति । तस्मान्नियतदेशोपलभ्यमानपरिभितपरिमाणपुरुषशरीरान्यथाऽनुपपत्त्यैव तदितरसकलदेशनास्तित्वाबधारणं तस्येति सिद्धम् ॥ § 718

अनग्नीति । न ह्यनग्निः सर्वो देशः सुगमः । अग्निशून्यदेशव्यावृत्तताज्ञानाभावे च धूमे व्यभिचारसंशयः स्यादेवेति शेषः । तत्र व्यतिरेकव्याप्तेरन्वयव्याप्त्युपष्टंभकत्वमेव, न स्वातन्त्र्येण वस्तुसाधकत्वमिति समाधत्ते— तत्रेति ॥ § 719

तन्निश्चयः—देशान्तरासत्त्वनिश्चयः । तत्प्रवेशः—कौशाम्बीप्रवेशः । न हि सकलं भुवनतलं युगपदेकेनास्मादृशेनोपलब्धुं शक्यमिति भावः । इयं—भावेनाभावसिद्धिः ॥ § 720

तत्समीपदेशव्यतिरिक्तत्वादिति । चैत्रशून्यत्वेनास्मदिन्द्रियादिगोचरदेशव्यतिरिक्तत्वादित्यर्थः ॥ § 721
I.101/KSV

## श्रुतार्थापत्तिः

पीनो दिवा च नात्तीति साकाङ्क्षवचनश्रुतेः ।
तदेकदेशविज्ञानं श्रुतार्थापत्तिरुच्यते ॥ ११३ ॥ § 723

इहैवंविधसाकाङ्क्षवचनश्रवणे सति समुपजायमानं रजनीभोजनविज्ञानं, प्रमाणान्तरकरणकं भवितुमर्हति, प्रत्यक्षादेरसन्निधानात् । न प्रत्यक्षं क्षपाभक्षणप्रतीतिक्षमम्, परोक्षत्वात् । नानुमानं, अनवगतसम्बन्धस्यापि तत्प्रतीतेः

१ ] क— nyāma-wit_kha
३ ] मन— nyāma-wit_kha
१३ ] व्य— nyāma-wit_kha
१६ ] इति— nyāma-wit_ka

। उपमानादेस्तु शङ्कैव नोदेति । तस्मात् शाब्द एव रात्रिभोजनप्रत्ययः ॥
§ 724

शब्दश्च न श्रूयमाण इममर्थमभिवदितुमलम्, एकस्य वाक्यस्य विधिनिषेधरूपार्थद्वयसमर्थनशून्यत्वात् । अत्र च रात्र्यादिपदानामश्रवणात्; अपदार्थस्य वाक्यार्थत्वानुपपत्तेः । न च विभावरीभोजनलक्षणोऽर्थः दिवावाक्यपदार्थानां भेदः संसर्गो वा; येनायमपदार्थोऽपि प्रतीयेत् ॥ § 725

पीन इत्यादि । कुमारिलोऽप्याह—पीनो दिवा न भुङ्क्ते चेत्येवमादिवचःश्रुतौ । रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते इति । परन्तु प्रमेयमर्मविज्ञानचतुरो ग्रन्थकारः श्रुतार्थापत्तिप्रवृत्तिमूलं सूचयितुं पूर्वपक्षमलङ्कृत्य किञ्चिदन्यथा व्याचख्याविति बोद्धव्यम् । आकाङ्क्षा चात्र अर्थविषयिणी । क्षपाभक्षणं—रात्रिभोजनम् । सम्बन्धः—व्याप्तिः । शङ्कैव नोदेतीति । उपमानस्य शक्तिमात्रग्राहकत्वादिति शेषः । शाब्द एवेति । तस्मात् वाक्यान्तरेणायं बुद्धिस्थेन प्रतीयते इति वार्तिकमपि स्मर्तव्यम् ॥ § 726

ननु पदादनुपस्थितस्यापि संसर्गादेः वाक्यार्थत्वं सिद्धान्तेऽङ्गीक्रियते, एवं प्रकृतेऽप्यस्तु शाब्द एव बोधः इत्याशङ्क्य समाधत्ते—न चेत्यादिना । अपदार्थोऽपि, भेदः, संसर्गो वा वाक्यार्थो भवितुमर्हति, न तदतिरिक्तः रात्रिभोजनादिरित्यर्थः । भेदः-विशेषः, व्यक्तिविशेष इति यावत् । घटत्वादिशक्तानां घटादिपदानां घटमानय इत्यादौ व्यक्तिविशेषबोधकत्वं तात्पर्यवशात् इति व्यक्तिविशेषः परस्परसंसर्गश्च वाक्यार्थः सर्वैरभ्युपेयः । प्रकृते च रात्रिभोजनादिर्नान्यतररूप इति न शब्दस्तद्बोधक इति भावः ॥ § 727
I.102/KSV

तस्मात् कल्प्यागमकृतं नक्तमत्तीति वेदनम् ।
तद्वाक्यकल्पनायां च प्रमाणं परिचिन्त्यताम् ॥ ११४ ॥§ 729

नाऽध्यक्षमनभिव्यक्तशब्दग्रहणशक्तिमत् ।
न लिङ्गम्; अगृहीत्वाऽपि व्याप्तिं तदवधारणात् ॥ ११५ ॥§ 731

क्वचिन्नित्यपरोक्षत्वात् व्याप्तिबोधोऽपि दुर्घटः ।
विनियोक्त्री श्रुतिर्यत्र कल्प्या प्रकरणादिभिः ॥ ११६ ॥§ 733

विनियोक्त्री हि श्रुतिः सर्वत्र प्रकरणादौ वाक्यविद्भिरभ्युपगम्यते । यथोक्तम्— § 734

विनियोक्त्री श्रुतिस्तावत् सर्वेष्वेतेषु सम्मता इति । तस्याश्च नित्यपरोक्षत्वात् दुरधिगमस्तत्र लिङ्गस्य प्रतिबन्धः । न च निशापदवचनस्य स-

२ ] णं— nyāma-wit__kha
९ ] नां— nyāma-wit__ka
२५ ] तु— nyāma-wit__kha
२९ ] स्य— nyāma-wit__ka
१ ] हि— nyāma-wit__ka

त्ताऽनुमातुमपि शक्या, तस्यां साध्यायां भावाभावोभयधर्मकस्य हेतोरसिद्धविरुद्धानैकान्तिकत्वेनाहेतुत्वात् । न चात्र धर्मः कश्चिदुपलभ्यते; यस्तेन तद्वान्, पर्वत इवाग्निमान् अनुमीयते ॥ § 735

तस्मात् वाक्यान्तरेणायं बुद्धिस्थेन प्रतीयते । तस्य चागमिकत्वेऽपि यत्तद्वाक्यं प्रतीयते । प्रमाणं तस्य वक्तव्यं प्रत्यक्षादिषु यद्भवेत् । न ह्यनुच्चारिते वाक्ये प्रत्यक्षं तावदिष्यते । नानुमानं न चेदं हि दृष्टं तेन सह क्वचित् इत्यादिवार्तिकोक्तं परिष्कृत्यानुवदति—तस्मादित्यादि । तस्मात्—भेदसंसर्गातिरिक्तविषयकशाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणत्वात् । अध्यक्षं अनभिव्यक्तशब्दग्रहणशक्तिमत् न इत्यन्वय । मीमांसकमते शब्दस्य नित्यत्वात् अभिव्यक्तस्यैव श्रोत्रेण ग्रहणात् तथोक्तिः । न लिङ्गं—नानुमानम् । प्राचीनमते ज्ञायमानलिङ्गस्यैव अनुमितिकरणत्वेनानुमानशब्दवाच्यत्वम् । अत्र हेतुः—अगृहीत्वेति । व्याप्तिमगृहीत्वाऽपीत्यन्वयः । कल्प्यतां व्याप्तिज्ञानमित्यत्राह—क्वचिदिति ॥ § 736

शब्दस्य कुत्रचित् नित्यपरोक्षत्वमेवोपपादयति—विनियोक्त्रीत्यादिना । यत्र—यद्विषये । प्रकरणादिभिः यद्विषयिणी विनियोक्त्री श्रुतिः कल्प्या, तस्याः श्रुतेर्नित्यपरोक्षत्वं सिद्धमेवेत्यर्थः । प्रकरणादिभिरित्यादिना लिङ्गवाक्यस्थानसमाख्यानां ग्रहणम् । उक्तमर्थमुपपादयति—विनियोक्त्री हीत्यादि । वाक्यविद्भिः—मीमांसकैः । विनियोक्त्रीत्यादि । (?)श्रुतिलिङ्गवाक्य

न च दिवावाक्यं, तदर्थो वा निशावचनानुमाने लिङ्गतां प्रतिपत्तुमर्हति—

अश्रुते हि निशावाक्ये कथं तद्धर्मताग्रहः ।
श्रुते तु तस्मिन् तद्धर्मग्रहणे किं प्रयोजनम् ? ॥ ११७ ॥§ 739

दिवावाक्यपदार्थानां तिष्ठतु लिङ्गत्वं, अनुपपद्यमानतयाऽपि न निशावाक्यप्रत्यायकत्वमवकल्पते । पदार्थानां हि सामान्यात्मकत्वात् विशेषमन्तरेणानुपपत्तिः स्यात्, न वाक्यान्तरमन्तरेण । तस्मात् श्रूयमाणं वाक्यमेव तदेकदेशमन्तरेण निराकाङ्क्षप्रत्ययोत्पादकस्वव्यापारनिर्वहणसन्धिमनधिगच्छत् तदेकदेशमाक्षिपतीति सेयं प्रमाणैकदेशविषया श्रुतार्थापत्तिः ॥ प्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्(?) जै. सू. ३-३-१४ इति सूत्रवार्तिकस्थोऽयं श्लोकः । एतेषु प्रकरणादिषु सर्वेष्वपि स्थलेषु श्रुतिस्तावत् विनियोक्त्री—विनियोजिका सम्मता इत्यन्वयार्थः । अयं भावः । विनियोजकप्रमाणेषु श्रुत्यादिषु मध्ये पूर्वपूर्वं प्रबलम् । उत्तरोत्तरं दुर्बलम् । लिङ्गादीनि हि न साक्षाद्विनियोजकानि, किन्तु श्रुतिकल्पनयैव । धर्मस्य चोदनालक्षणत्वेन श्रुत्येकसमधिगम्यत्वात् । एवञ्च सर्वत्रापि लिङ्गादिषु श्रुतिकल्पनैव । सा च श्रुतिर्नित्यानुमेयैवेति तद्विषयकव्याप्तिग्रहणं दुर्घटमेव । अत्र वार्तिके सर्वेष्वेतेष्विति दृष्ट्या सर्वत्र प्रकरणादौ इत्युक्तम् । यद्यपि

६ ] र्मी— nyāma-wit__kha    २३ ] ऽपि— nyāma-wit__kha

लिङ्गादिष्वित्येव वक्तव्यं, प्राथम्यात्; अथापि प्रकरणसमाख्ययोः बलाबलविचारप्रकरणस्थत्वात् अस्य वार्तिकस्य, प्रकरणादौ इत्युक्तम् ॥ § 740

दिवावाक्यं, तदर्थो वा निशावाक्यानुमाने लिङ्गमिति विकल्प्य दूषयति—न चेत्यादिना । दिवावाक्यं—दिवा न भुङ्क्ते इति वाक्यम् । तद्धर्मताग्रहः—निशावाक्यधर्मत्वेन ज्ञानं दिवावाक्यस्य कथम् ? इत्यर्थः । धर्मः—लिङ्गम् । यदि च निशाभोजनवाक्यं श्रुतम्, तर्हि तदनुमानं नोत्तिष्ठत्येवेति ॥ § 741

तदर्थो वा ? इति द्वितीयकल्पं प्रतिवक्ति—दिवावाक्यपदार्थानामिति । सामान्यं हि पदार्थः । विशेषश्च वाक्यार्थः । सामान्यानां विशेषं विनाऽनुपपद्यमानत्वात् विशेषप्रत्यायनायालं भवेद्वा तत्पदार्थः, न तु वाक्यापस्थापनाय । अतश्चात्र निशावाक्योपस्थितिः प्रमाणान्तराधीनैवेत्यर्थापत्तिसिद्धिरित्यर्थः ॥ § 742

I.104/KSV

## श्रुतार्थापत्तिस्थले अर्थानुमानमपि न संभवति

ननु ! अर्थादेव कथमर्थान्तरं न कल्प्यते ? पीवरत्वं हि नाम भोजनकार्यमुपलभ्यमानं स्वकारणं भोजनं, अनलमिव धूमः समुपस्थापयतु । तच्च वचसा कालविशेषे निषिद्धं तदितरकालविशेषविषयं भविष्यतीति किं वचनानुमानेन ? वचनमपि नादृष्टार्थं, अपि तु अर्थगत्यर्थमेव । तत् अस्य साक्षादर्थस्यैव कल्प्यमानस्य को दोषः ? यद्व्यवधानमाश्रीयते—उच्यते— § 743

शब्दप्रमाणमार्गेऽस्मिन् अनभिज्ञोऽसि वालक ।
प्रमाणतैव न ह्यस्य साकाङ्क्षज्ञानकारिणः ॥ ११८ ॥ § 745

पुरोऽवस्थितवस्त्वंशदर्शनप्राप्तिनिर्वृति ।
प्रत्यक्षादि यथा मानं न तथा शाब्दमिष्यते ॥ ११९ ॥ § 747

वाक्यार्थे हि समग्राङ्गपरिपूरणसुस्थिते ।
अविधाय धियं नास्य व्यापारः पर्यवस्यति ॥ १२० ॥ § 749

तावन्तं बोधमाधाय प्रामाण्यं लभते वचः ।
तदर्थवाचकत्वाच्च तद्वाक्यं वाक्यमिष्यते ॥ १२१ ॥ § 751

तच्च—भोजनं च । कालविशेषे—दिवा । तदितरकालः—रात्रिः । अर्थगतिः—अर्थावगतिः । वचनं खलु अर्थावगत्यर्थमेवापेक्षणीयं, अर्थावग-

२९ ] णं— nyāma-wit__kha
१८ ] त्या— nyāma-wit__ka
२७ ] दु— nyāma-wit__ka
१ ] भि— nyāma-wit__kha

तेरेवानुमानतः सिद्धौ मध्ये किं तेन ? इत्यर्थः । तत्—तस्मात् । अस्य—अनुमितेन शब्देनाभिधेयस्य ॥ § 752

समाधत्ते—उच्यत इति । न हीत्यादि । निराकांक्षबोधजनकं वाक्यमेव प्रमाणम् । न तु यथाकथञ्चिद्यत्किञ्चिदर्थोपस्थापकम्, उन्मत्तवाक्यानामपि प्रामाण्यापत्तेः । प्रत्यक्षं तु पुरोवस्थितवस्तुनि सर्वांशानवगाहनेऽपि यावद्ग्रहणं प्रमाणं भवितुमर्हति । न तथा शब्दः । शब्दस्य व्यापारो हि यावताऽर्थ-परिसमाप्तिः तावत्पर्यन्तं भवत्येव, एवं च श्रुतार्थापत्तिस्थले, श्रुतेन वाक्येन पूर्णस्य बोधस्यानिर्वाहात्, तद्वाक्यस्य प्रामाण्यरक्षणायैव वा वाक्यान्तरमेव कल्पनीयं, न त्वर्थमात्रं यथाकथञ्चित् । एवञ्च वाक्यान्तरकल्पनस्यैवावस-रप्राप्तत्वे मध्ये तत्पूर्वं अर्थकल्पनायाः का प्रसक्तिः ? इति समुदितार्थः ।

शब्दैकदेशश्रुत्याऽतः तदंशपरिपूरणम् ।
कल्प्यं, प्रथममर्थस्य कुतस्तेन विना गतिः ? ॥ १२२ ॥ § 755

प्रायः श्रुतार्थापत्त्या च वेदः कार्येषु पूर्यते ।
तत्रार्थः कल्प्यमानस्तु न भवेदेव वैदिकः ॥ १२३ ॥ § 757

यो मन्त्रैरष्टकालिङ्गैः तद्विधिः परिकल्प्यते ।
श्रुतिर्लिङ्गादिभिर्या च कल्प्यते विनियोजिका ॥ १२४ ॥ § 759

विश्वजित्यधिकारश्च यागकर्तव्यताश्रुतेः ।
उत्पत्तिवाक्यं सौर्यादावधिकारविधिश्रुतेः ॥ १२५ ॥ § 761

तदंशेति । अश्रुतांशेत्यर्थः । कल्प्यमित्येतदनन्तरं एवञ्चेति शेषः । तेन विना—शब्देन विना अर्थस्य प्रथमं कुतः—केन प्रमाणेन गतिः—अव-गतिः— निश्चय इति यावत् । ननु श्रुतार्थापत्तिस्थले कल्प्यमानस्यार्थस्य शाब्दरूपत्वानङ्गीकारे का हानिः ? इति शङ्कायां प्रायशश्चानया वेदे व्यवहारो व्यवस्थितः । सोऽवैदिकः प्रसज्येत यद्येषा भिद्यते ततः इति वार्तिकोक्तमेव समाधानमाह— प्राय इत्यादि । वार्तिकस्यायमर्थः—अनया—श्रुतार्थाप-त्त्यैव प्रायः सर्वोऽपि व्यवहारो वेदे वर्तते । केवलश्रौतार्थापेक्षया श्रुत्यर्थाप-त्तिसिद्धार्था एव वेदेषु बहवः । एवं स्थिते तेऽर्था यदि अनुमानगम्याः, तर्हि वेदगम्या न स्युः; तथा च तेषां धर्मत्वमपि न स्यात् । चोदनालक्षणत्वाद्ध-र्मस्येति । वैदिकः— वेदैकगम्यः ॥ § 762

पूर्वं कार्येषु इत्युक्तार्थे निदर्शनान्याह—यो मन्त्रैरित्यादि । अष्टकाश्राद्ध-लिङ्गभूतैः मन्त्रैः अष्टकाश्राद्धविधिः कल्पनीया । तथा च स्मृत्यधिकरणशाब-

२१ ] धः— nyāma-wit__kha
२२ ] लि— nyāma-wit__ka;

nyāma-wit__kha

रभाष्यम्—अष्टकालिङ्गाश्च मन्त्रा वेदे दृश्यन्ते—तेषु वैदिकशब्दानुमानमिति इति । श्रुतिरित्यादिः । अयमंशः पूर्वमेव विनियोक्त्री श्रुतिस्तावत् इत्यत्र विवृतः । विश्वजितीत्यादिः । विश्वजिदधिकरणे ४-३-५ तस्मात् श्रुत्येकदेशः सः इतिश्रुतिखण्डभाष्याद्युक्तोऽयमर्थः । अधिकारः—फलसम्बन्धः । फलमन्तरा कर्तव्यत्वविधिर्न संभवतीति फलविधिरनुमेयेति यावत् । सौर्यादाविति । सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इत्यस्य कर्मस्वरूपबोधकोत्पत्तिविध्यभावे वैयर्थ्यमिति दर्शपूर्णमासादिविधे

ऐन्द्राग्नादिविकारेषु कार्यमात्रोपदेशतः ।
यश्च प्रकृतिवद्भावो विध्यन्त उपपाद्यते ॥ १२६ ॥[§ 765]

तदेवमादौ सम्बन्धग्रहणानुपपत्तितः ।
श्रुतार्थापत्तिरेवैषा निस्सपत्नं विजृम्भते ॥ १२७ ॥[§ 767]

तया श्रुत्यैकदेशश्च सर्वत्र परिकल्प्यते ।
अर्थकल्पनपक्षे तु न स्याद्वेदैकगम्यता ॥ १२८ ॥[§ 769]

इत्यर्थापत्तिरुक्तैषा षड्प्रमाणसमुद्भवा ।[§ 770]

## अर्थापत्तिः न प्रमाणान्तरम्, किन्तु अनुमानमेव

एषा विचार्यमाणा तु भिद्यते नानुमानतः ॥ १२९ ॥[§ 771]

प्रतिबन्धाद्विना वस्तु न वस्त्वन्तरबोधकम् ।
यं कञ्चिदर्थमालोक्य न यः कश्चित् प्रतीयते ॥ १३० ॥[§ 773]

प्रतिबन्धोऽपि नाज्ञातः प्रयाति मतिहेतुताम् ।
न सद्योजातबालादेः उद्भवन्ति तथा धियः ॥ १३१ ॥[§ 775]

रतिदेशेन कल्पनमित्युक्तं सप्तमचतुर्थपादे । ऐन्द्राग्नेत्यादि । ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः इति विहिताया इष्टेः दर्शपूर्णमासोक्ताङ्गातिदेश इति इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः स्यात् ८-२-५ इत्यत्रोक्तम् । प्रकृतिवद्भावः—प्रकृतिवत् भावः स्वरूपावाप्तिरित्यर्थः । विध्यन्तशब्दस्त्वेवं भाषितः शबरस्वामिभिः—दर्शपूर्णमासाभ्यां यजेत इति विध्यादिः ।

१८ ] तथा— nyāma-wit__ka
२० ] रेवै nyāma-wit__ka
२३ ] यत्कि— nyāma-wit__kha
२३ ] च्य— nyāma-wit__ka
२३ ] च— nyāma-wit__kha

विध्यन्तोऽपि प्रधानविधिवर्जितं कृत्स्नं पौरोडाशिकं ब्राह्मणम् इति ७-४-२० । अर्थापत्तिपूर्वपक्षमुपसंहरति—इत्यर्थापत्तिरिति ॥ § 776

भिद्यते नानुमानतः इत्युक्तमाक्षिपति—प्रतिबन्धादित्यादि । यः कश्चित् अर्थ इति शेषः । न हि घटं पश्यन् पटं कश्चिन्निश्चिनोतीत्यर्थः । सद्योजातेति । न हि सद्यो जातो बालः धूमात् वह्निं प्रतिपत्तुमलम् । अतः अज्ञातः प्रतिबन्धः न निर्णयहेतुरित्यर्थः । तथा च पूर्वोदाहृतस्थले चैत्रस्य बहिर्भावादेः पूर्वमनवगतत्वेन कथं व्याप्तिग्रह इत्यर्थः । उक्तमर्थं

न विशेषात्मना यत्र संबन्धज्ञानसंभवः ।
तत्राप्यस्त्येव सामान्यरूपेण तदुपग्रहः ॥ १३२ ॥ § 779

अपि च—तेन विना नोपपद्यत इति (Edtext outside numbered paragraph)कल्पनमर्थापत्तिः । तेन विना नोपपद्यत इति च व्यतिरेकभणितिरियम् । व्यतिरेकश्च प्रतीतः, तस्मिन् सत्युपपद्यते इत्यन्वयमाक्षिपति । अन्वयव्यतिरेकौ च गमकस्य लिङ्गस्य धर्म इति कथमर्थापत्तिः नानुमानम् ? केवलव्यतिरेकी हेतुरन्वयमूल एव गमक इति वक्ष्यामः ॥

## शक्तिकल्पकार्थापत्तिनिराकरणम्

याश्च प्रत्य (Edtext outside numbered paragraph)क्षादिपूर्विकाः शक्तिकल्पनायामर्थापत्तय उदाहृताः ताश्च शक्तेरतीन्द्रियाया अभावात् निर्विषया एव ॥

स्वरूपादुद्भवत् कार्यं सहकार्युपवृंहितात् ।
न हि कल्पयितुं शक्तं शक्तिमन्यामतीन्द्रियाम् ॥ १३३ ॥ § 781

## अतिरिक्तशक्तिसाधनम्

ननु शक्तिमन्तरेण कारकं कारकमेव न भवेत् । यथा पादपं छेत्तुमनसा परशुरुद्यम्यते, तथा पादुकाद्यप्युद्यम्येत । प्रतिवक्ति—न विशेषात्मनेति । यद्विषये विशेषतो दृष्टं लिङ्गं न संभवति, तत्राऽपि सामान्यतो दृष्टेनैव तदुपपत्तिरित्यर्थः । प्रतिबन्धाद्विना इत्यारभ्यैव सिद्धान्तोपपादनं वा । संबन्धज्ञानं—व्याप्तिज्ञानम् ॥ § 782

यद्यप्यर्थापत्तौ नान्वयव्याप्तिसंभवः, अथापि व्यतिरेकव्याप्तिरियमित्याह— अपि चेत्यादि । ननु अभावयोरेव परस्परं व्याप्तिः, तेन च प्रतियोगिनः कथं सिद्धिः ? न ह्यन्यत्र व्याप्तिः, अन्यस्य सिद्धिरित्युपपद्यते इति शङ्कायामाह— व्यतिरेकश्चेति । तथा च व्यतिरेकव्याप्तिरप्यन्वयदार्ढ्यायैवेति । तथैवोक्तं कुसुमाञ्जलौ उदयनाचार्यैरपि ॥ § 783

११ ] का— nyāma-wit_kha

स्वरूपादित्यादि । सहकार्युपबृंहितात् स्वरूपात्—कारणवस्तुनः उद्भवत् कार्यं अन्यां अतीन्द्रियां शक्तिं कल्पयितुं न हि शक्तमित्यन्वयः ॥ § 784

I.108/KSV

शक्तेरनभ्युपगमे हि द्रव्यस्वरूपाविशेषात् सर्वस्मात् सर्वदा सर्वकार्योदयप्रसङ्गः । तथा हि—विषदहनयोर्मारणे दाहे च शक्तावनिष्यमाणायां मन्त्रप्रतिबद्धायां स्वरूपप्रत्यभिज्ञायां सत्यामपि स्वकार्यौदासीन्यं यत् दृश्यते, तत्र का युक्तिः ? न हि मन्त्रेण स्वरूपसहकारिसान्निध्यं प्रतिबध्यते; तस्य प्रत्यभिज्ञायमानत्वात् । शक्तिस्तु प्रतिबध्यत इति सत्यपि स्वरूपे सत्स्वपि सहकारिषु कार्यानुत्पादो युक्तः ॥ § 785

किञ्च सेवाध्ययनादिसाम्येऽपि फलवैचित्र्यदर्शनात् अतीन्द्रियं किमपि कारणं कल्पितमेव धर्मादि भवद्भिः । अतः शक्तिरतीन्द्रिया तथाऽभ्युपगम्यतामिति ॥ § 786

## शक्तेरतिरिक्तत्वनिराकरणम्

तदेतदनुपपन्नम्—यत्तावदुपादाननियमादित्युक्तं—तत्रोच्यते— न हि वयमद्य किञ्चिदभिनवं भावानां कार्यकारणभावमुत्थापयितुं § 787

पादपच्छेदाय कथं पादुकोद्यमप्रसक्तिरिति शग्कायामाह—शक्तेरित्यादि । परशुपादुकयोरुभयोरपि पादपच्छेदनानुगुणशक्तिशून्यत्वाविशेषे कुतः पादुका नोद्यम्यते पादपच्छेदाय ? अतः शक्तिमत्त्वतदभावाभ्यामेव निर्वाहो वाच्य इत्यर्थः । मन्त्रेण प्रतिबद्धं विषदहनयोः स्वरूपमेव पूर्वस्वरूपापेक्षया भिन्नं कुतो न स्यादिति शङ्कायामाह—स्वरूपप्रत्यभिज्ञायां सत्यामपीति । स्वरूपेत्यादि । स्वरूपस्य सहकारिणो वा सान्निध्यमित्यर्थः । पूर्वं यादृशं स्वरूपं यादृशसहकारिसहकृतं दाहादिजनकमासीत्, मन्त्रादिप्रयोगानन्तरं तत्र स्वरूपे सहकारिषु वा सन्निहितानां तदेवेदं इति प्रत्यभिज्ञासत्त्वात् शक्तिनाशमन्तरा कार्यानुदयो न निर्वोढुं शक्य इति भावः । अतिरिक्तशक्त्यङ्गीकारे वा कथं प्रतीकारः ? इत्यत्राह—शक्तिस्त्विति ॥ § 788

सेवा—गुरुशुश्रूषा । फलवैचित्र्यं—ज्ञानतारतम्यं, शिष्यस्येति शेषः । अतः—उक्तन्यायात् । तथेति । यथा चेतने धर्मः अतीन्द्रियः अङ्गीकृतः, तथा अचेतनेऽपि कार्यानुकूलः कश्चनाङ्गीकार्य एव । अन्यथा धर्माधर्मावपि न सिद्ध्येतां इत्यर्थः ॥ § 789

उपादाननियमः पादपच्छेदनाय परशुरेवोपादीयते, न पादुकादीति नियमः । उपादानं—ग्रहणम् । न हीत्यादि । अयं भावः—अन्वयव्यतिरेकौ शक्नुमः, किन्तु यथाप्रवृत्तमनुसरन्तो व्यवहरामः । न ह्यस्मदिच्छया आपः शीतं शमयन्ति, कृशानुर्वा पिपासाम् ॥

१० ] का— nyāma-wit_kha
१४ ] (?)र्जे— nyāma-wit_kha

तत्र छेदनादावन्वयव्यतिरेकाभ्यां वा वृद्धव्यवहाराद्वा परश्वधादेरेव कारणत्वमध्यवगच्छाम इति तदेव तदर्थिन उपादद्महे, न पादुकादीति ॥

**सर्वस्मात् सर्वदा सर्वोत्पत्तिप्रसङ्गवारणम्**

न च परश्वधादेः स्वरूपसन्निधाने सत्यपि सर्वदा कार्योदयः, स्वरूपवत् सहकारिणामप्यपेक्षणीयत्वात्, सहकारिसन्निधानस्य सर्वदाऽनुपपत्तेः । सहकारिवर्गे च धर्मादिकमपि निपतति; तदपेक्षे कार्योत्पादे कथं सर्वदा तत्संभवः ?

धर्माधर्मयोश्च जगद्वैचित्र्यकार्यवलेन कल्पनमपरिहार्यम् । तयोश्च न शक्तित्वादतीन्द्रियत्वम्; अपि तु स्वरूपमहिम्नैव; मनःपरमाण्वादिवत् ॥ हि कार्यकारणभावज्ञापकौ, न तु कार्यकारणभावकल्पकौ । यथानुभवं लोकः प्रवर्तते । एवञ्च शक्तेरभावेऽपि परशुरेव छेदनायोपादीयते, तथानुभवात् । अन्यथा छेदनानुगुणा शक्तिः परशुमेवाश्रयते, न पादुकामिति कुतः अवगतम् ? अनुभवात्तथेति चेत्, तेनैवानुभवेनोपादानादिकमप्यस्तु, मध्ये किं शक्तिकल्पनयेति ॥ § 790

अशक्तत्वाविशेषात् सर्वस्मात् सर्वदा कार्योत्पत्तिप्रसङ्ग इति दोषं परिहरति—न चेति । ननु यादृशाद्वह्नेः दाहः, तादृशादेव मन्त्रादिप्रतिबद्धात् न दाहः; तदानीं च स्वरूपं सहकारिसान्निध्यं च तदवस्थमेवेति कथं न दाह इति शङ्कायां, सहकारिषु कालेश्वरादृष्टानामतीन्द्रियाणामप्यन्तर्भावात्, तदन्यतमलोपः संभावनार्ह इति न तेन शक्तिसिद्धिरित्याह—सहकारिवर्गे चेति ॥ § 791

नन्वङ्गीकृतः अतिरिक्तः अतीन्द्रियः पदार्थः । तस्य शक्तिरिति वा धर्म इति वा यथेच्छं नाम क्रियताम् । न हानिरित्यत्राह—धर्माधर्मयोश्चेति । धर्माधर्मौ हि चेतनगतावतिशयौ जगद्वैचित्र्यान्यथाऽनुपपत्त्या सर्वैरप्यवश्यकल्प्यौ । तेनैव चेतनगतातिशयेन दाहादिप्रकृतकार्योत्पत्तेर्निर्बाहे भूतधर्मः शक्त्याख्यः अपूर्वः न कल्प्य इति भावः । ननु वयमप्यतीन्द्रियं सहकारिविशेषमेव शक्तिं ब्रूमः ? को विशेषः ? इत्यत्राह—तयोश्चेति ॥ § 792

I.110/KSV

यदपि विषदहनसन्निधाने सत्यपि मन्त्रप्रयोगात् तत्कार्यादर्शनम्,—तदपि न शक्तिप्रतिबन्धननिबन्धनम्; अपि तु सामग्र्यन्तरानुप्रवेशहेतुकम् ॥ § 793

ननु मन्त्रेण प्रविशता तत्र किं कृतम् ? न किञ्चित् कृतम्; सामग्र्यन्तरं तु संपादितम् । काचिद्धि सामग्री कस्यचित् कार्यस्य हेतुः ॥ § 794

स्वरूपं तदवस्थमेवेति चेत्; यद्येवं अभक्षितमपि विषं कथं न हन्यात् ? § 795

---

७ ] वृद्ध— nyāma-wit_kha
११ ] सहकार्यादि— nyāma-wit_kha
१४ ] वै— nyāma-wit_kha
४ ] मन्त्रिणा— nyāma-wit_kha

तत्राऽऽस्यसंयोगाद्यपेक्षणीयमस्तीति चेत्, मन्त्राभावोऽप्यपेक्ष्यताम् । दिव्यकरणकाले धर्म इव मन्त्रोऽप्यनुप्रविष्टः कार्यं प्रतिहन्ति ॥ § 796

शक्तिपक्षेऽपि वा मन्त्रस्य को व्यापारः ? मन्त्रेण हि शक्तेर्नाशो वा क्रियते ? प्रतिबन्धो वा ? न तावत् नाशः ; मन्त्रापगमे पुनस्तत्कार्यदर्शनात् ॥ § 797

सामग्र्यन्तरं—विपरीता सामग्री ॥ § 798

तत्र—कारणस्वरूपे । काचिदिति । काचिदेव मन्त्राद्यघटिता सामग्री दाहादिकार्यस्य हेतुः । मन्त्रघटने च मन्त्राद्यघटितसामग्री शिथिला, मन्त्रादिघटितसामग्र्यन्तरं चापतितम्, अतो न दाह इत्यर्थः ॥ § 799

तदवस्थमेवेति । न हि मन्त्रेण पूर्वतनसामग्रीस्वरूपे वैकल्यादिकमापादितम्; एवञ्च कुतो न दाहः इत्याशयः । अभक्षितमिति । विषस्य हि विनाशहेतुत्वं स्वरूपम्, एवं च अभक्षितं विषं कुतो न हन्ति ? यदि अभक्षिते हननशक्तिर्नास्ति, तर्हि शक्तिरेव न सिद्ध्येत्, अतः तत्र आस्यसंयोगोऽपि सहकारिसमुदायगतमङ्गीकर्तव्यम् । एवं प्रकृतेऽपि मन्त्राभावः सहकारिसमुदायघटकः । मन्त्रसन्निधाने च मन्त्राभावरूपसहकारिणः वैकल्यं जातम् । एवञ्च पूर्वतनसामग्री नष्टेति न दाहः । एवमेवोपपत्तौ किं अतीन्द्रियशक्तिकल्पनेनेत्यर्थः । एवमनङ्गीकारे शक्त्यङ्गीकारेऽपि न निर्वृतिरित्याह—शक्तिपक्षेऽपीति । पुनरिति । अयं भावः—ननु मन्त्रापगमे शक्तिः पुनरुत्पन्ना । एवं चोपपद्यते कार्यदर्शनमिति चेत्—पूर्वं प्रतिबन्धेन नष्टायाः शक्तेः

प्रतिबन्धस्तु स्वरूपस्यैव शक्तेरिवास्तु ॥

स्वरूपस्य किं जातम् ? शक्तेरपि किं जातम् ? कार्यौदासीन्यमिति चेत्, तदितरत्रापि समानम् ॥

स्वरूपमस्त्येव, दृश्यमानत्वात् इति चेत्; शक्तिरप्यस्त्येव, पुनः कार्यदर्शनेनानुमीयमानत्वादिति ॥

### शक्तेः नित्यत्वानित्यत्वविकल्पनेन दूषणम्

किञ्च शक्तिरभ्युपगम्यमाना पदार्थस्वरूपवन्नित्या अभ्युपगम्येत ? कार्या वा ? नित्यत्वे—सर्वदा कार्योदयप्रसङ्गः । सहकार्यपेक्षायां तु स्वरूपस्यैव तदपेक्षाऽस्तु, किं शक्त्या ? कार्यत्वे तु—शक्तेः पदार्थस्वरूपमात्रकार्यत्वं वा स्यात् ? सहकार्यादिसामग्रीकार्यत्वं वा ? पुनस्तत्रोत्पादे हेतुः वक्तव्यः । यदि कारणस्वरूपमात्रं शक्तेर्हेतुः; तर्हि प्रतिबन्धककालेऽपि कारणस्वरूपस्य शक्तिहेतोः सत्त्वे कथं तन्नाशः । यदि च प्रतिबन्धकाभावविशिष्टं स्वरूपमेव शक्तेर्हेतुः, तर्हि प्रतिबन्धकाभावविशिष्टं स्वरूपं कार्यस्यैव हेतुरङ्गीक्रियतां, किमन्तर्गडुना शक्त्या ? इति ॥ § 800

९ ] का— nyāma-wit__ka
१० ] न्त्रो— nyāma-wit__ka
२९ ] जातम्— nyāma-wit__kha
३० ] तोऽ— nyāma-wit__kha
३१ ] रप्यस्ति— nyāma-wit__kha
३१--३२ ] दर्शनेनानुमेयत्वात्— nyāma-wit__ka

प्रतिबन्धकेन शक्तिर्न नाश्यते, किन्तु तस्याः कार्योन्मुख्यमात्रं वार्यते इति द्वितीयकल्पं प्रतिवक्ति—प्रतिबन्ध इति । कारणस्वरूपमेव प्रतिबन्धकसमवहितं चेत् कार्यविमुखं भवतीति कल्प्यताम् । किमन्तर्गडुना शक्त्या ? इति भावः ॥ § 801

ननु स्वरूपं प्रतिबन्धेन नाशयितुं न शक्यम्, एवञ्च स्वरूपं प्रत्यकिञ्चित्कारिणा प्रतिबन्धेन कथं कार्यनिरोध इति शङ्कते—स्वरूपस्येति । एवमाक्षेपपरिहारौ शक्तिपक्षेऽपि तुल्यावित्याह—शक्तेरपीति । अतिरिक्तातीन्द्रियशक्तिकल्पनागौरवं परमवशिष्यत इति शेषः ॥ § 802

अनुमीयमानत्वादिति । शक्तिनाशपक्षस्त्वनुपदमेव प्रतिक्षिप्त इत्यर्थः ॥ § 803

नित्येत्यादि । अत्र नित्यत्वं न सदातनत्वं, असंभवात् । किन्तु यावत्स्वरूपभावित्वमेव । पदार्थस्वरूपवत् इत्यनेनायमर्थः सूचितः । सहकार्यपेक्षायामिति । नित्याया अपि शक्तेः कार्यकरणार्थं सहकार्यन्तरापेक्षायामित्यर्थः । पदार्थस्वरूपमात्रेति । शक्त्युत्पत्तौ किं पदार्थस्वरूप

स्वरूपमात्रकार्यत्वे—पुनरपि सर्वदा कार्योत्पादप्रसङ्गः; सर्वदा शक्तेरुत्पादात् । सामग्रीकार्यत्वे तु कार्यमेव सामग्रीकार्यमस्तु, किं अन्तरालवर्तिन्या शक्त्या ?

### अतिरिक्तशक्त्यङ्गीकारे अनवस्थाऽप्यपरिहार्या

अशक्तात् कारकात् कार्यं न निष्पद्यत इति चेत्; शक्तिरपि कार्यं, तदुत्पत्तावप्येवं शक्त्यन्तरकल्पनादनवस्था ॥

### अनवस्थापरिहारशङ्का

आह—दृष्टसिद्धये ह्यदृष्टं कल्प्यते, न तु दृष्टविघाताय । शक्त्यन्तरकल्पनायां शक्तिश्रेणीनिर्माण एव क्षीणत्वात् कारकाणां कार्यविघातः स्यादिति एकैव शक्तिः कल्प्यते; तत् कुतोऽनवस्था ?

### एवमपि शक्तिरन्यथासिद्धैव

अत्रोच्यते—यद्यदृष्टमन्तरेण दृष्टं न सिद्ध्यति, काममदृष्टं कल्प्यताम् । अन्यथाऽपि तदुपपत्तौ किं तदुपकल्पनेन ? दर्शिता चान्यथाऽप्युपपत्तिः ॥

मात्रं कारणम् ? उत तदतिरिक्ता सहकारिसामग्री ? आद्ये, यावत्स्वरूपं कार्योदयप्रसङ्गः । सहकार्यन्तरापेक्षायां प्रतिबन्धकाभावविशिष्टं स्वरूपं शक्तिं प्रति कारणमिति खलु वक्तव्यम् । तत् कार्यं प्रत्येव कारणमित्यङ्गीकारेणैवोपपत्तौ मध्ये किं शक्तिकल्पनयेत्यर्थः ॥ § 804

शक्तिरपीति । शक्तेरपि कारणाधीनत्वेन तादृशकारणस्यापि शक्तिमत्त्वावश्यंभाव इति क्रमेणानवस्थेत्यर्थः ॥ § 805

अनवस्थां परिजिहीर्षति—दृष्टसिद्धय इति । कार्यनिर्वहणायैव कल्प्यमाना शक्तिस्तदनुरूपैव सिद्ध्यति । अनवस्थायां तु कथं तया कार्यं निरूह्येतेति धर्मिग्राहकप्रमाणादेवानवस्थापरिहार इति भावः ॥ § 806

२२ ] त्वे— nyāma-wit__ka
२२ ] कार्य— nyāma-wit__kha
३३ ] तत्क— nyāma-wit__ka
३३ ] यो— nyāma-wit__kha

दर्शिता चेति । मन्त्राभावोऽप्यपेक्ष्यताम् इत्यादिनेत्याशयः ॥ § 807
I.113/KSV

कल्प्यमानमपि चादृष्टं, तत् कल्प्यतां; यत् अनवस्थां नावहेत; धर्मादिवत् ॥ § 808

अपि च व्यापारोऽप्यतीन्द्रियः शक्तिवदिष्यते भवद्भिः; अन्यतरकल्पनयैव कार्योपपत्तेः किमुभयकल्पनागौरवेण ॥ § 809

## शक्त्यनङ्गीकारेऽपि कारकाणां कारकत्वं निर्बहत्येव

शक्तमव्याप्रियमाणं न कारकं कारकमिति चेत्; तच्छक्तमिति तदा कथं जानामि ? § 810

कार्यदर्शनात् ज्ञास्यामीति चेत्; व्यापारादेव कार्यं सेत्स्यति ॥ § 811

पादुकादेर्व्याप्रियमाणादपि न पादपच्छेदो दृश्यत इति चेत्; प्रत्यक्षस्तर्हि व्यापारः, नातीन्द्रियः; यतः कार्यदर्शनात्पूर्वमपि § 812

तत्—तादृशम् । यथा कल्पने अनवस्था नापादयितुं शक्या तथेत्यर्थः ॥ § 813

ननूक्तं तथैव, धर्मिग्राहकमानादिति—इत्यत्राह—अपि चेति । उपपादितमेतत् पूर्वमेव ॥ § 814

ननूभयमप्यावश्यकमेव । न हि शक्तमपि कारकं क्रियावेशमन्तरा कार्यनिर्वर्तकम् । छेदनशक्तोऽपि परशुरुद्यमनादिरिक्तं कथं छेदकम् ? अत उभयमप्यावश्यकमेवेति शङ्कते—शक्तमिति । जानामि—जानीयां—श्रद्दध्यामिति यावत् । तत्—कारकं, अथवा तस्मिन् कार्ये शक्तमित्यर्थः । कारकम् इति पूर्ववाक्यादाकृष्टव्यम् । शक्तमव्याप्रियमाणमित्याद्यास्ताम् । प्रथमं शक्तं इति सिद्धौ उपरितनं सेत्स्यति । अतस्तदेव प्रथमं वक्तव्यं इत्यर्थः ॥ § 815

व्यापारादेवेति । कार्यदर्शनात् व्यापार एवानुमीयताम् । कथं तावता शक्तिसिद्धिरित्यर्थः ॥ § 816

ननु व्यापारादेव कार्यसिद्धिरनुभवविरुद्धा । व्यापृतादप्यशक्तात् पादुकादेः छेदनासंभवात् । अतः शक्तिरप्यावश्यकीति शङ्कते—पादुकादेरिति । न दृश्यत इत्यन्वयः । तथा च पादपच्छेदानुगुणशक्तिः परश्वधादौ वर्तते, न पादुकादाविति कल्प्यमित्यर्थः । एवं तर्हि अतीन्द्रिया अतिरिक्ता च शक्तिः व्यापारश्चेत्युभयं न सिद्ध्येदेवेत्याह—प्रत्यक्षस्तर्हीति । व्याप्रियमाणत्वं हि उद्यमननिपातनादिक्रियान्वयित्वम् । तच्च प्रत्यक्षमेव । छेदनरूपकार्यस्यैव

व्याप्रियमाणत्वं ज्ञातमायुष्मता । कार्यानुमेयो हि व्यापारः कार्यं विना न ज्ञायेतैव । कार्यं त्वन्यतरस्मादपि घटमानं नोभयं कल्पयितुं प्रभवति—

११ ] हते— nyāma-wit__ka
१५ ] तथा— nyāma-wit__kha

इत्यलं प्रसङ्गेन ॥

प्रकृतमनुसरामः । तस्मादतीन्द्रियायाः शक्तेरभावात् निर्विषया यथोदाहृताः ता अर्थापत्तयो भवन्ति ॥

**सिद्ध्यन्त्यपि शक्तिः अनुमानेनैव, न त्वर्थापत्त्या**

अपि वा शक्तिरतीन्द्रिया अनुमानस्यैव विषयः । कार्यस्य कारणपूर्वकत्वेन व्याप्तिग्रहणात्, स्वरूपमात्रस्य च कारणत्वानिर्वहणात् अधिकं किमप्यनुमास्यते; सा शक्तिरिति ॥

शब्दनित्यत्वसिद्धौ तु याऽर्थापत्तिरुदाहृता ।
तस्याः शब्दपरीक्षायां समाधिरभिधास्यते ॥ १३४ ॥§ 819

**अभावपूर्विकाया अर्थापत्तेरप्यनुमानान्तर्भावः**

अभावपूर्विकाऽप्यर्थापत्तिरनुमानमेव । जीवतो गृहाभावेन लिङ्गभूतेन बहिर्भावावगमात् । चैत्रस्य गृहाभावो धर्मी, बहिर्भावेन तत्रानिष्पत्त्या छेदनेन न हि तदनुमेयम् । एवञ्च कार्यानुमेयः अतीन्द्रियो व्यापारो नास्त्येव । परिदृश्यमानादप्यतिरिक्तेऽतीन्द्रियो व्यापारः अस्ति चेत्, अलं शक्तिकल्पनया । कार्यानुरोधेन कल्पनायां अन्यतरेणैव कार्यस्योपपत्तेः अन्यतरदेव सिद्ध्येत्, नोभयमपीति । सिद्धान्ते च अतीन्द्रियेणादृष्टादिनैव सर्वनिर्वाहात् शक्तिरनुपयुक्तैवेति ॥ § 820

शक्तिसाधनायार्थापत्तिरपि नावश्यकीत्याह—अपि वेति । कारणत्वानिर्वहणादिति । प्रतिबन्धकसमवधानकाले स्वरूपमात्रेण कार्यानुदयादिति भावः ॥ § 821

उदाहृतेति । अर्थापत्तिपूर्वकार्थापत्तिनिरूपणप्रकरणे ९६ पु. इत्यर्थः । तस्याः समाधिरित्यन्वयः ॥ § 822

गृहाभावः—गृहे अभाव इत्यर्थः । चैत्रप्रतियोगिकः गृहानुयोगिकः अभाव इति यावत् । एवमुत्तरत्र मनुष्यगृहाभावत्वादित्यादावपि बोध्यम् । धर्मी—पक्षः । तथा च चैत्रप्रतियोगिकगृहानुयोगिकः अभावः, बहिर्गत

तद्वान् इति साध्यो धर्मः; जीवन्मनुष्यगृहाभावत्वात्, पूर्वोपलब्धैवंविधगृहाभाववत् । यथा धूमो धर्मी, वह्निमानिति साध्यो धर्मः; धूमत्वात्, पूर्वोपलब्धधूमवदिति ॥

अतश्च गृहादीनां लिङ्गत्वाशङ्कनं, अपाकरणं च आडम्बरमात्रम् ॥

**प्रमेयानुप्रवेशदोषपरिहारः**

यत्पुनः प्रमेयानुप्रवेशदूषणमभ्यधायि—तदपि न सांप्रतम् ॥

किं प्रमेयमभिमतमत्रभवताम् ? किं सत्तामात्रम् ? उत बहिर्देशविशेषितं सत्त्वम् ?

सत्तामात्रं तावदागमादेवावगतमिति न प्रमाणान्तरप्रमेयतामवलम्बते ।

९ ] कार्यात्— nyāma-wit_ka
१६ ] वाहात्— nyāma-wit_ka

बहिर्देशविशेषितं तु सत्त्वं भवति प्रमेयम् । तस्य तु तदानीमनुप्रवेशः कुतस्त्यः ? गृहाभावग्राहकं हि प्रमाणं गृह एव सदुपलम्भकप्रमाणावकाशमपाकरोति, न बहिस्संदसत्त्वचिन्तां प्रस्तौति ॥

मृतस्य जीवतो दूरे तिष्ठतः प्राङ्गणेऽपि वा ।
गृहाभावपरिच्छेदे न विशेषोऽस्ति कश्चन ॥ १३५ ॥§ 825

चैत्रप्रतियोगिकः, जीवन्मनुष्यप्रतियोगिकगृहानुयोगिकाभावत्वात्, यत्र जीवन्मनुष्यप्रतियोगिकगृहानुयोगिकाभावत्वं तत्र बहिर्गतमनुष्यप्रतियोगिकत्वं, यथा जीवन्मैत्रप्रतियोगिकगृहानुयोगिकाभावे इति अनुमानाकारनिष्कर्षः ॥ § 826

आगमात् ज्योतिश्शास्त्रादिरूपात्, लौकिकाद्वा आप्तोच्चरितात् । एवञ्च सत्त्वसामान्यं न पुनरनुमीयते, येन प्रमेयानुप्रवेशः आपाद्यते । बहिर्देशे सत्त्वं त्वनुमेयं भवति । अस्य त्वनुमानकाले कथमनुप्रवेशः ? इत्यर्थः । गृहाभावग्राहकमिति । गृहे अभावग्रहणं प्रति जीवनग्राहि प्रमाणं न हि बाधकम् । गृहेऽभावग्राहकस्य गृहे सत्त्वग्राहकेणैव विरोधः । अतः गृहेऽभावग्रहणकाले बहिस्सत्त्वरूपस्य प्रमेयस्य नानुप्रवेशप्रसङ्गः इति भावः ॥ § 827

गृहेऽभावग्रहणकाले बहिस्सदसत्त्वस्यासंबन्धं उपपादयति—मृतस्येति । मृतस्य वा दूरे—देशान्तरे जीवतो वा प्राङ्गणे—बहिः यत्र कुत्रचित् तिष्ठतोऽपि वा

जीवनविशिष्टस्त्वसौ गृह्यमाणो लिङ्गतामश्नुते, व्यभिचारनिरासात् । न च विशेषणग्रहणमेव प्रमेयग्रहणम् । जीवनमन्यत्, अन्यच्च बहिर्भावाख्यं प्रमेयम् ॥

## जीवनमन्यत्, अन्यश्च बहिर्भावः

ननु जीवनविशिष्टगृहाभावप्रतीतिरेव बहिर्भावप्रतीतिः । नैतदेवम्—जीवनविशिष्टगृहाभावप्रतीतेः बहिर्भावस्य प्रतीतिः, न तत्प्रतीतिरेव बहिर्भावप्रतीतिः न हि दहनाधिकरणे धूमप्रतीतिरेव दहनप्रतीतिः ॥

ननु धूमादन्य एव दहनः; इहापि गृहाभावजीवनाभ्यामन्य एव बहिर्भावः ॥

पर्वतहुतवहयोः सिद्धत्वात् मत्वर्थमात्रं तत्रापूर्वमनुमेयम्; एवमिहापि बहिर्देशयोगमात्रमपूर्वमनुमेयम् ॥

यदि तु तदधिकं प्रमेयमिह नेष्यते, तदा गृहाभावजीवनयोः स्वप्रमाणाभ्यामवधारणादानर्थक्यमर्थापत्तेः । तस्मात् प्रमेयान्तरसद्भावात् तस्य च तदानीमननुप्रवेशात् न प्रमेयानुप्रवेशो दोषः ॥ गृहेऽभावपरिच्छेदे न कश्चन

२ ] साध्योऽर्थः— nyāma-wit__kha
३ ] धर्मी— nyāma-wit__kha
७ ] प्रवेशा— nyāma-wit__kha
७ ] सां— nyāma-wit__ka
१४ ] वृत्तस्य— nyāma-wit__kha

विशेषोऽस्तीति । गृहे अभावग्राहकेण नैतेषां ग्रहणसंभवः, प्रमाणान्तराव-सेयानि तानीति भावः ॥ § 828

प्रमेयाननुप्रवेशमेव स्पष्टयति—जीवनेति ॥ § 829

नन्विति । तथा च जीवनविशिष्टगृहाभावबहिर्भावयोरविशेषात् जीवनग्रहणकाले बहिर्भावस्यापि ग्रहणात् प्रमेयानुप्रवेशो दुर्वार इति भावः । उभयमपि नैकं, किन्तु ज्ञाप्यज्ञापकभावापन्ने ते इत्याह जीवनेति ॥ § 830

ननु वह्निधूमयोः भेदसत्त्वात् धूमप्रतीतिरेव न दहनप्रतीतिरूपा । प्रकृते तु जीवनविशिष्टगृहाभाव बहिर्भावयोर्न विशेषोऽस्तीति शङ्कते— नन्विति । समाधत्ते—इहापीति ॥ § 831

पुनः शङ्कते—पर्वतेति । समाधत्ते—एवमिहापीति ॥ § 832

उभयोरभेदे अर्थापत्तिरपि निरर्थिकेत्याह—यदि त्विति । यदि

अर्थापत्तावपि च तुल्य एवायं दोषः, तत्राप्यर्थात् अर्थान्तरकल्पनाऽभ्युपगमात् । दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना शा. भा. १-१-५ शा. दी. १-१-५ इत्येवं ग्रन्थोपनिबन्धात् । तस्य तस्मात् प्रतीतिरिति यत्र व्यवहारः, तत्रावश्यं तत्प्रतीतौ तदनुप्रवेशो दोष एव । स्वभावहेताविव तद्बुद्धिसिद्ध्या तत्सिद्धेः प्रमाणान्तरवैफल्यादिति ।

**प्रभाकरोक्तः अर्थापत्तेरतिरिक्तत्वसाधनप्रकारः**

प्रभाकरास्तु प्रकारान्तरेणानुमानाद्भेदमत्राचक्षते । अनुमाने गमकविशेषणमन्यथाऽनुपपन्नम्, अनलं विना धूमो हि नोपपद्यते; इह तु विपर्ययः, गम्यो गमकेन विना नोपपद्यते । गम्यः— बहिर्भावः, स जीवतो गृहाभावं विना नोपपद्यते, गृहान्निर्गतो जीवन् बहिर्भवतीति ॥ जीवतो गृहाभावप्रतीतिरेव बहिर्भावप्रतीतिः स्यात्, तर्हि व्यर्थैवार्थापत्तिः; जीवनस्य शास्त्रेण गृहाभावस्यानुपलब्ध्या च ग्रहणात्, तदतिरिक्तस्य च ग्राह्यस्य प्रमेयस्यानङ्गीकारात् इत्यर्थः ॥ § 833

ननु वह्निधूमौ विलक्षणौ स्वतन्त्रौ पदार्थौ, प्रकृते तु धर्म्यैक्यमेवेत्यस्ति विशेष इति चेत् तत्राह—अर्थापत्तावपीति । अयं—प्रमेयानुप्रवेशः । अर्थादित्यादि । यदि चोभयोरभेदः तदा स्ववचनविरोधः अर्थादर्थान्तरकल्पनेति लक्षणकथनात् । अतश्चोभयोरर्थान्तरत्वापलपनेऽपसिद्धान्त एवेति । दोष एवेति । तस्मात् यस्य प्रतीतिः, तत् कारणभूतं तदेव कथं स्यादित्याशयः । स्वभावहेताविवेति । इदमुत्तरत्र व्यक्तीभविष्यति । तद्बुद्धीति । हेतुज्ञाने जाते तदेव यदि साध्यज्ञानरूपं स्यात् तदा साध्यस्य हेतुज्ञानकाल एव सिद्धत्वात् कुतः प्रमाणान्तरगवेषणमित्यर्थः ॥ § 834

---

३ ] वः प्रतीतः— nyāma-wit__kha

५ ] किन्तु— nyāma-wit__kha
८ ] मानम्— nyāma-wit__ka
२५ ] व— nyāma-wit__kha
२५--२६ ] तत्र— nyāma-wit__kha
२६ ] वाच्य— nyāma-wit__kha
३० ] त्रत्वम्— nyāma-wit__kha
३०--३२ ] गृहा— nyāma-wit__ka

गमकविशेषणं—गमकं-ज्ञापकं तद्रूपं विशेषणं-धर्मः हेतुः—ज्ञापको हेतुरिति यावत् । अन्यथा-साध्यं विना । गृहाभावमिति । गमकमिति शेषः । नोपपद्यत इति । धूमः खलु गमकमात्रं, न तु धूमाधीनो वह्निः,

भाष्यपप्येवं योजयन्ति—दृष्टः श्रुतो वार्थः अर्थकल्पना; अर्थान्तरं कल्पयतीत्यर्थः । यतः सा कल्पना प्रमेयद्वारिकाऽन्यथा (?)पपद्यत इत्यर्थः । एवं गम्यगमकयोरनुपपद्यमानत्वविपर्ययात् (?)मानात् प्रमाणान्तरमियमर्थापत्तिरिति बहिर्भावोऽन्यथानोपपद्यते, स च गम्य इति ॥

**प्रभाकरपक्षप्रतिक्षेपः**

एतदपि ग्रन्थवैषम्योपपादनमात्रं, न तु नूतनविशेषोत्प्रेक्षणम् । गम्ये तावदगृहीते सति तद्गतमनुपपद्यमानत्वं कथमवधार्येत ? गृहीते तु गम्ये किं तद्गतानुपपद्यमानत्वग्रहणेन ? साध्यस्य सिद्धत्वात् ॥

पुरा तद्गतमन्यथाऽनुपपद्यमानत्वं गृहीतमासीदिति चेत्— अहो ! महाननुमानाद्विशेषः । इदं हि पूर्वं प्रतिबन्धग्रहणमुक्तं स्यात् ॥ अयोगोलके व्यभिचारात् प्रकृते तु जीवतो गृहेऽभावः न केवलं गमकं, अपि तु एतदधीन एव बहिर्भाव इति अनुमानाद्विशेषः ॥ § 835

योजयन्तीति । तथा च बृहती—ननु च दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इति गमकस्यान्यथाऽनुपपद्यमानतां दर्शयति । अग्रन्थज्ञो देवानां प्रियः । दृष्टः श्रुतो वाऽर्थोऽर्थकल्पना । किमिदमर्थकल्पनेति ? दृष्टः श्रुतो वाऽर्थोऽर्थान्तरस्य प्रमाणमित्यर्थः । अन्यथा नोपपद्यत इति केन सम्बन्ध्यते ? प्रमित्येति वदामः; अन्यथाऽनुपपद्यमानत्वमापादयन् अर्थान्तरं गमयति इति । अत्र नन्वित्यादिराक्षेपः, अग्रन्थज्ञ इत्यादिः समाध(?)नम् । कल्पनाशब्दोऽत्र प्रमितिपरः इति ऋजुविमलायां शालिकनाथः । कल्पना—कल्पकः; प्रमितिरेव हि कल्पनापदार्थः । प्रमेयद्वारिका— जीवतो गृहेऽभावाधीना ॥ § 836

एतदपीत्यादि । बहिर्भावः जीवतो गृहेऽभावं विना नोपपद्यते इति कथने हि बहिर्भावज्ञानमप्यावश्यकमेव प्रथमम्, धर्मिण एवाज्ञाने तत्रानुपपद्यमानत्वरूपधर्मग्रहणासंभवात् । पूर्वं तद्ग्रहणे तु अन्ततः व्याप्तिग्रहण एव पर्यवस्यतीति नास्त्यनुमानाद्विशेष इत्यर्थः ॥ § 837

I.119/KSV

अपि च बहिर्भावस्य गृहाभावं विनाऽनुपपत्तिरित्युक्ते तस्मिन् सति तस्योपपत्तिर्वक्तव्या । सा च का ? किमुत्पत्तिः ? ज्ञप्तिर्वा ? § 838

यदि ज्ञप्तिः, सा चानुमानेऽपि । गम्यं गमकं विना नास्ति, तस्मिन् सत्यस्तीति समानः पन्थाः ॥

---

१३--१४ ] जन— nyāma-wit__ka नोपपद्यते— nyāma-wit__kha

१५ ] नोपपद्यते कल्प्यमानाऽर्थोऽन्यथा

७ ] गम्यस्य गमकं— nyāma-wit__ka

उत्पत्तिस्तु गृहाभावात् बहिर्भावस्य दुर्भणा ।
प्राक्सिद्धे हि गृहाभावे तदुत्पादः क्षणान्तरे ॥ १३६ ॥§ 841

कारणं पूर्वसिद्धं हि कार्योत्पादाय कल्पते ।
तेनैकत्र क्षणे जीवन् न गृहे न बहिर्भवेत् ॥ १३७ ॥§ 843

तस्माद्यत्किञ्चिदेतत् ॥ § 844

## अर्थापत्तौ हेतोः कारकत्वमपीति पक्षान्तरनिराकरणम्

एवञ्च यदेके ज्ञप्त्युत्पत्तिकृतमिह वैलक्षण्यमुत्प्रेक्षितवन्तः— धूमेनाग्निर्गम्यत एव, गृहाभावेन बहिर्भावो जन्यतेऽपीति—तदपि प्रत्युक्तं भवति ॥ § 845

## अर्थापत्तिस्थले व्याप्त्युपपादनम्

यत्तु सम्बन्धग्रहणाभावादित्युक्तं—तदपि न सुन्दरम्— मन्दिरद्वारवर्तिनस्तदुत्पत्तेः ॥ § 846

यतः सा कल्पना प्रमेयद्वारिका इत्यंशं दूषयति—अपि चेति । सा च—उपपत्तिश्च ॥ § 847

सम्मतमर्थं दूषयति—उत्पत्तिरिति । कारकहेतुहेतुमद्भावस्थले हि पूर्वक्षणे कारणम्, अनन्तरक्षण एव च कार्यमिति संप्रतिपन्नम् । प्रकृते तु एकस्मिन्नेव काले गृहावच्छेदेन अभावः, बहिरवच्छेदेन भाव इति भावाभावयोः न कालभेदः । अतः एकस्मिन्नेव क्षणे अनयोः न उत्पाद्योत्पादकभावसंभव इत्यर्थः । तेनेति । गृहेऽभावस्य पूर्वसिद्धत्वाभावात् तेन बहिर्भावः नोत्पद्येतेति ॥ § 848

ज्ञप्तीति । ज्ञप्त्युत्पत्तिभ्यां कृतमित्यर्थः । प्राभाकरैः सम्मुग्धतया उक्तार्थस्यैव स्वेन विकल्प्य दूषणात् अस्य पक्षस्य स्वत एव निरास इति भावः ॥ § 849

उक्तमिति । पूर्वं ९९ पुटे द्रष्टव्यम् । तदुत्पत्तेः—सम्बन्धग्रहणोत्पत्तेः ॥ § 850

I.120/KSV

एतच्च स्वयमाशङ्क्य न तैः प्रतिसमाहितम् ।
उदाहरणमन्यत्तु व्यत्ययेन प्रदर्शितम् ॥ १३८ ॥§ 852

---

९ ] दुर्बला— nyāma-wit__ka nyāma-wit__kha
१७ ] राशुद्धं द्वारा—

गृहभावेन बहिरभावकल्पनमिति, तत्रैतदेव वक्तव्यम् । इयमभावपूर्विका न भवत्येवार्थापत्तिः । षडर्थापत्तीः प्रतिज्ञाय इमामभावपूर्विकां अर्थापत्तिमुक्त्वा उपनैय्यायिककेसरिकटाक्षपातभीतां इह गहने हरिणीमिव यदुपेक्ष्य गम्यते—तदत्यन्तमत्रभवतामनार्थजनोचितं चेष्टितम् ॥ § 853

त्वदेकशरणां बालामिमामुत्सृज्य गच्छतः ।
कथं ते तर्कयिष्यन्ति मुखमन्या अपि स्त्रियः ! ॥ १३९ ॥§ 855

भावेनाभावकल्पना तु प्रत्यक्षपूर्विकैवार्थापत्तिः । तस्या अपि च न दुरवगमः सम्बन्धः । असर्वगतस्य द्रव्यस्य नियतदेशवृत्तेरक्लेशेन तदितरदेशनास्तित्वावधारणात् । अनग्निव्यतिरेकनिश्चये च धूमस्य भवतां का गतिः ? या तत्र वार्ता सैवेहापि नो भविष्यति ॥ § 856

न च भूयोदर्शनावगम्यमानान्वयमात्रैकशरणतया— § 857

स्वयमाशङ्क्येति । गृहद्वारि स्थितो यस्तु बहिर्भावं प्रकल्पयेत् इत्यादिना वार्तिककृतेत्यर्थः । व्यत्ययेनेति । यदेकस्मिन्नयं देशे न तदान्यत्र विद्यते इतीति शेषः । अवतारितं चेदं भट्टोम्बेकेन—उदाहरणान्तरपरिग्रहेण परिहारमाह इति । इयमित्यादि । किन्तु भावपूर्विकैवेति शेषः । एवं प्रतिज्ञातदृष्टान्तपरित्यागिनं सोपहासमुपालभते—उपनैय्यायिकेत्यादि । गौतमादिमहर्षिभ्यस्तु भीतिः न्याय्येति उपहासः ॥ § 858

प्रत्यक्षपूर्विकैवेति । गृहे विद्यमानत्वस्य प्रत्यक्षत्वादित्यर्थः । इयमपि नार्थापत्तिः, अपि तु अनुमानमेवेत्याह—तस्या अपीति । तदितरेति । तादृशद्रव्यदेशेतरेत्यर्थः । अनग्नीति । अनग्नेर्व्यतिरेकः । व्यतिरेकव्याप्तिर्हि प्रकृतहेतोरेवोपोद्बलकः । तथा च वह्न्यभाववतो व्यावृत्त्यवगमरूपव्यतिरेकव्याप्तेरपि भवद्दृष्ट्याऽर्थापत्तिरूपत्वेन अनुमानस्याप्यर्थापत्तावेवान्तर्भावः स्यादिति ॥ § 859

अन्वयसहचारदर्शनमात्रेणानुमानप्रवृत्तेः व्यतिरेकव्याप्त्यभावेऽपि न क्षतिरिति शङ्कते—न चेति । अस्य कथयितुमुचितमित्यनेनान्वयः ।

यस्य वस्त्वन्तराभावो गम्यस्तस्यैव दुष्यति ।
मम त्वदृष्टिमात्रेण गमकाः सहचारिणः ॥ श्लो. वा.§ 862

इति कथयितुमुचितम् । अनिश्चितव्यतिरेकस्य साध्यनिश्चयाभावादिति दर्शयिष्यामः ॥

पक्षधर्मान्वयवत् व्यतिरेकोऽपि नागृहीतोऽनुमानाङ्गम् । बहिर्भावसिद्धौ चानुमानप्रयोगः स एव, यस्त्वया दर्शितः । तस्य तु प्रतिप्रयोगः प्रत्यक्षादिविरुद्धत्वात् हेत्वाभास एवेत्यलं प्रसङ्गेन ॥

८ ] तत्रैव— nyāma-wit__kha
१० ] कटाक्ष— nyāma-wit__kha

### श्रुतार्थापत्तिरप्यनुमानमेव

श्रुतार्थापत्तिरपि वराकी नानुमानात् भिद्यते । वचनैकदेशकल्पनाया अनुपपन्नत्वात्, अर्थस्य च कार्यलिङ्गगम्यस्य सत्त्वात् । यथा क्षितिधरकन्धराधिकरणं धूममवलोक्य तत्कारणमनलमनुमिनोति भवान्, एवमागमात्पीनत्वाख्यं कार्यमवधार्य तत्कारणमपि भोजनमनुमिनोतु । कोऽत्र विशेषः । तत्कार्यतया भूयोदर्शनतः प्रतिपन्नत्वात् । लिङ्गस्य तु क्वचित् प्रत्यक्षेण ग्रहणम्, क्वचित् वचनतः प्रतिपत्तिरिति नैष महान् भेदः ॥ दर्शयिष्याम इति । अनुमानसूत्र इति शेषः ॥ § 863

ननु व्यतिरेकव्याप्तिः स्वरूपसत्येवालमित्यत्राह—पक्षधर्मेति । अन्यथा पक्षधर्मताया अपि ज्ञानमनपेक्षितं स्यादिति भावः । स एवेत्यादि । पूर्वपक्षकाले भवता प्रदर्शित एवास्मत्सम्मतः दूषणोद्धारात् निरवद्यः स्थापितः । अतस्तस्य प्रतिप्रयोगः निरवकाश इति भावः ॥ § 864

दृष्टार्थापत्तेरेवानुमानान्तर्भावे किमुत श्रुतार्थापत्तेरित्यभिप्रायेण आह—वराकीति । अर्थस्य चेति । कार्यरूपलिङ्गगम्यस्य अर्थस्य—पीनत्वाख्यस्य । विशेष इति । अनुमानादिति शेषः । ननु तत्र धूमस्य दर्शनमेव, अत्र तु पीनत्वस्य प्रतीतिः शब्दादित्यस्ति विशेषः इति शङ्कां वारयति—लिङ्गस्येति ॥ § 865

I.122/KSV

### श्रुतार्थापत्तेरावश्यकत्वाक्षेपपरिहारौ

ननु वचनमपरिपूर्णमिति प्रतीतिमेव यथोचितां जनयितुमसमर्थम्— § 866

किं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यतो न भवति तत्पीनताप्रतीतिः ? § 867

न न भवति, साकाङ्क्षा तु भवति । न च साकाङ्क्षप्रतीतिकारिणस्तस्य प्रामाण्यम्—इति तदेव तावत् पूरयितुं युक्तम् ॥ § 868

तदसत्—कस्यात्र साकाङ्क्षत्वम् ? किं शब्दस्य ? किं वा तदर्थस्य ? उत स्वित्तदवगमस्य । इति ॥ § 869

शब्दस्य तावदर्थनिरपेक्षस्य न काचिदाकाङ्क्षा, अनभिव्यक्तशब्दवत् ॥ § 870

अर्थस्तु साकाङ्क्षस्सन् अर्थान्तरमुपकल्पयतु; कोऽवसरो वचनकल्पनायाः ? § 871

---

७ ] यात्, य— nyāma-wit__kha
७ ] न— nyāma-wit__ka
८ ] प्रतिपक्ष— nyāma-wit__kha
१२ ] कार्यलिङ्गस्य— nyāma-wit__kha
१४ ] पीवर— nyāma-wit__ka
१४ ] को— nyāma-wit__ka

अवगमोऽप्यर्थविषय एव साकाङ्क्षो भवति, न शब्दविषयः श्रोत्रकरणकः । तस्मादवगमनैराकाङ्क्ष्यसिद्धये तदर्थकल्पनमेव § 872

प्रमाणतैव न ह्यस्य साकाङ्क्षज्ञानकारिणः१०४ पु. इत्युक्तं स्मारयति— नन्विति । असमर्थमिति । तथा च निराकाङ्क्षबोधसिद्ध्यर्थं वाक्यान्तरापेक्षैवास्ति, पदजन्यपदार्थोपस्थितेरेव शाब्दबोधं प्रति कारणत्वादिति विशेषः । सिद्धान्ती शोधनाय पृच्छति—किमिति । पूर्वपक्षी समाधत्ते—न न भवतीति । भवत्येवेत्यर्थः । अस्तु निराकाङ्क्षबोधः अन्यसापेक्षः, अथापि सोऽर्थः शब्दादेवोपस्थापयितव्य इति कुत इत्यत्राह—तदेवेति । वचनमेवेत्यर्थः । पदजन्यपदार्थोपस्थितेरेव शाब्दबोधजनकत्वात् । न चायं शाब्दबोध एव नेति वाच्यम् पीनत्वाद्यर्थानां शब्दत एवोपस्थितत्वादिति भावः ॥ § 873

समाधत्ते—तदसदिति । अवगमस्य—ज्ञानस्य ॥ § 874

तदवगम इत्यत्र तृतीयकल्पे तच्छब्दार्थः किम् अर्थः ? उत शब्दः ? इति विकल्प्य दूषयति—अवगमोऽपीति । शब्दविषयः—शब्दविषयकः । इन्द्रियं खलु विद्यमानयथाभूतार्थग्राहि नाधिकमर्थमपेक्षत इति भावः । तस्मादित्यादि । न च पदजन्यपदार्थोपास्थित्यभावे कथं तस्य पीनो देवदत्तः

युक्तम् । वचनैकदेशकल्पनमपि अर्थावगतिसिद्ध्यर्थमेवेति तत्कल्पनमेवास्तु; किं सोपानान्तरेण ?

### श्रुतार्थापत्तेरनुमानत्वेऽपि तद्गम्यार्थानां नावैदिकत्वम्

यत्तु कल्प्यमानस्यार्थस्यावैदिकत्वं प्राप्नोतीति—तत्र वचनकल्पनापक्षे सुतरामवैदिकः सोऽर्थः स्यात्; कल्प्यमानस्य वचनस्य वेदादन्यत्वात् ॥

श्रुतः, अनुमित(?) द्विविधः, स वेद एवेति चेत्; श्रौतार्थः, श्रौतार्थानुमितः द्विविधः स वेदार्थ एव भविष्यतीति किं वचनसोपानान्तरकल्पनया ? तेन श्रूयमाणवेदवचनप्रतिपाद्यार्थसामर्थ्यलभ्यत्वादेव तस्य वेदार्थता भविष्यति । सर्वथा न वचनैकदेशविषया श्रुतार्थापत्तिः श्रेयसी । श्रुत्येकदेशकल्पनापक्षप्रतिक्षेपाच्च ॥

### अर्थस्यातीन्द्रियत्वेऽपि व्याप्तिग्रहः संभवत्येव

तदतीन्द्रियतया सम्बन्धग्रहणमघटमानमिति यदुक्तं—तदपि प्रत्युक्तम्— अर्थे तु सामान्येन सम्बन्धग्रहणमपि सूपपादम् । तत्र तत्र यज्यादेरर्थस्याधिकाराद्यर्थान्तरसम्बद्धस्य दृष्टत्वादिति ॥ इत्यादिशब्दजन्यज्ञाने भानमिति शङ्क्यम्—क एवमाह, तस्मिन्नेव बोधे रात्रिभोजनभानमिति । पार्ष्णिकस्तु स बोधः, न शाब्द इति ॥ § 875

श्रुतार्थापत्तिकल्पिकां भीतिमपनुदति—यत्त्वित्यादि । वेदादन्यत्वादिति । वेदस्यापौरुषेयत्वेन कल्पयितुमशक्यत्वादिति भावः ॥ § 876

१३ ] गम्यो— nyāma-wit__kha
७ ] रा— nyāma-wit__kha
१ ] देवदत्तस्य— nyāma-wit__ka

शङ्कते—श्रुत इति । प्रकृतेऽपीदं तुल्यमित्याह—श्रौतार्थेत्यादि । तेनेत्यादि । भवता कल्पितेन शब्देन प्रतिपाद्यत्वापेक्षयाऽपि साक्षाद्वेदप्रतिपाद्यार्थसामर्थ्यलभ्यत्वमेव अर्थस्य वैदिकत्वं प्रापयेदिति भावः ॥ § 877

सामान्येनेत्यादि । विशेषतो दृष्टाऽनुमानाभावेऽपि सामान्यतोदृष्टानुमानं वर्तत एव । अन्यथा विश्वजिता यजेत इत्यादौ अधिकारविधिकल्पनैव न स्यात् इति भाव ॥ § 878

I.124/KSV

## प्राभाकरोक्तश्रुतार्थापत्तिनिराकरणप्रकारः

प्राभाकरास्तु दृष्टः श्रुतो वा इतिभाष्यं लौकिकमभिधानान्तरमेवेदमुपलब्धिवचनम् इति वर्णयन्तः श्रुतार्थापत्तिं प्रत्याचक्षते । श्रूयमाणस्यैव शब्दस्य तावत्यर्थे सामर्थ्यमुपगच्छन्तः तमर्थं शाब्दमेव प्रतिजानते । वाक्यस्य दूराविदूरव्यवस्थितगुणागुणक्रियाद्यनेककारककलापोपरक्तकार्यात्मकवाक्यार्थप्रतीतौ इषोरिव दीर्घदीर्घो व्यापारः । अविरतव्यापारे च शब्दे सा प्रतीतिरुदेति, तद्व्यापारविरतौ नोदेति । तदुत्पादककारकाभावात् । वृद्धव्यवहारतश्च शब्देषु व्युत्पद्यमानो लोकः तथाभूतवाक्यव्यवहारिणो वृद्धान् पश्यन् वाक्यस्यैव तादृशवाक्यार्थे सामर्थ्यमवधारयति । तदनुवर्तीनि तु पदानि तस्मिन्नैमित्तिके निमित्तानि भवन्ति ॥ § 879

श्रुतार्थापत्तिगम्यस्यार्थस्य साक्षादेव वैदिकत्वं वदतां प्राभाकराणां मतमुपन्यस्यति—प्राभाकरास्त्वित्यादि । तथा हि बृहती—दृष्टः श्रुतो वेति दर्शनश्रवणोपन्यासः किं कारणान्तरव्युदासाय ? नेति वदामः, उपलब्धोऽर्थ इत्यर्थः । श्रुतग्रहणमिदानीं किमर्थम् ? दृष्ट इत्येव वक्तव्यम्— उच्यते—अभिधानान्तरमेवेदमुपलब्धेर्वाचकम् इति । अत्र शालिकनाथमिश्राः—अस्यार्थः—दृष्टशब्दमात्रेण न सर्वपरिग्रह, किन्तु श्रुतशब्दसहितेन; तेन श्रुतग्रहणं नानर्थकम् । कथं पुनः श्रुतग्रहणरहितेन दृष्टशब्देनोपलब्धं नोच्यते—श्रूयताम्—दृष्टशब्देन यद्यप्युपलब्धिमात्रमुच्यते; तथाऽपि श्रुतशब्दसन्निधानात् गोबलीवर्दन्यायेन शब्दप्रमितव्यतिरिक्तमुच्यते । नन्वेतस्य गोबलीवर्दन्यायस्याश्रयणे किं प्रयोजनम् ? उच्यते—लौकिका वयम् । लोकश्चेत्थमपि व्यवहरमाणो दृश्यते । न च लोके पर्यनुयोगावकाशोऽस्ति अनादित्वात् इति । लौकिका हि न मयेदं दृष्टं श्रुतं वा इति व्यवहरन्ति, न त्ववगतिपदप्रयोगमात्रेण तृष्यन्ति इत्याशयः । ननु श्रूयमाणस्यैव शब्दस्य कथं ततोऽप्यधिकबोधजनकत्वम् ? इत्यत्राह वाक्यस्येति । तथाविधेति । दूरादूरव्यवस्थितपदार्थबोधकेत्यर्थः । तदनुवर्तीनि—

२२ ] दीर्घो— nyāma-wit__ka
२४ ] व्युत्पाद्यमानो—
nyāma-wit__kha
२५ ] स्य च— nyāma-wit__kha

तादृशसामर्थ्याबधारणानुयायीनि । तस्मिन्नित्यादि । अर्थावगत्यर्थो हि शब्दः । अतश्च प्रधानभूतार्थावगतौ अप्रधानं शब्दः प्रधानानुरोध्येव भवेदित्यर्थः ॥ § 880

I.125/KSV

नैमित्तिकानुकूल्यपर्यालोचनया क्वचिदश्रूयमाणान्यपि तानि निमित्ततां भजन्ते—विश्वजिदादौ स्वर्गकामादिपदवत् ॥ § 881

क्वचित् श्रूयमाणान्यपि तदननुकूलत्वात् परित्यज्यन्ते— यस्योभयं हविरार्तिमार्च्छेत् इतिवत् ॥ § 882

क्वचिदन्यथास्थितानि तदनुरोधादन्यथैव स्थाप्यन्ते— प्रयाजशेषेण हवींष्यभिघारयति इतिवत् ॥ § 883

तस्मात् प्रथमावगतैकघनाकारवाक्यार्थानुसारेण सतामसतां वा पदानां निमित्तभावव्यवस्थापनात् अश्रूयमाणतथाविधैकदेशादपि वाक्यात् तदर्थावगतिसंभवात् किं श्रुतार्थापत्त्या ? अत एव न सोपातव्यवहितं तस्यार्थस्य शाब्दत्वम्, साक्षादेव तत्सिद्धेः ॥ § 884

## पदाश्रवणेऽपि अर्थोपस्थित्युपपादनम्

ननु अश्रूयमाणेषु निमित्तेषु कुतस्तदर्थमवगच्छामः ? अनवगच्छन्तश्च कीदृशं नैमित्तिकमवकल्पयामः ?—उच्यते—श्रुतेष्वपि पदेषु तेषां निमित्तभावो न स्वमहिम्नाऽवफल्पते, किन्तु नैमित्ति- § 885

नैमित्तिकस्य यत् आनुकूल्यं, तत्पर्यालोचनया—कीदृशेन व्यापारवता नैमित्तिकं प्रधानं अनुकूलितं स्यादिति पर्यालोचनयेत्यर्थः ॥ § 886

यस्योभयमिति । श्रुतस्य विधिप्रत्ययस्यार्थः त्यज्यत इत्यस्योदाहरणमिदम् ॥ § 887

प्रयाजशेषेणेति । विधिप्रत्ययाश्रवणेऽपि तत्कल्पनाया उदाहरणमिदम् ॥ § 888

तस्मात्—शब्दस्य अर्थशेषत्वात् । एकघनेति । श्रुतेषु पदेषु अयमंशः अनेन पदेन प्रत्याय्यते—इति विवेचनमन्तरा शाब्दबोधस्य आहत्य तावत्पदजातत्वात् तावानप्यर्थः तच्छब्दगम्य एव, न तु कल्पितपदान्तरगम्य इत्यर्थः । सोपानं—कल्पितशब्दः ॥ § 889

कीदृशमिति । निमित्तभेदात् खलु प्रत्यक्षादिनैमित्तिकभेदः सिध्यति । प्रकृते च निमित्तस्यैवाभावे नैमित्तिकं शाब्दमिति कथं निर्णयेतेत्यर्थः । स्वमहिम्ना—स्वरूपत इति यावत् । नैमित्तिकं—पदार्थस्मरणादि ।

कानुसारद्वारक इत्युक्तम् । एवमश्रुतेष्यपि भविष्यति । न यजौ करणविभक्तिं शृणुमः; न स्वर्गे कर्मविभक्तिम्; नाग्निचिदादिषु क्विप्प्रत्ययम्;

२५ ] एव— nyāma-wit__ka
२७ ] न च— nyāma-wit__kha

नाधुनादिषु प्रकृतिम्; न समासतद्धितेषु यथोचितां विभक्तिम्, अपि च प्रतीम एव तदर्थम् ॥

एवं विश्वजिदादावपि यजेत इति नैमित्तिकबलादेव स्वर्गकामादिपदार्थं प्रत्येष्यामः । नियोगगर्भत्वाच्च विनियोगस्य लिङ्गादीनि श्रुतिकल्पनामन्तरेणापि नियोगव्यापारं परिगृह्य तेन वस्तुनि विनियोजकतां प्रतिपत्स्यन्ते ॥

**एतन्मते मुख्यगौणादिव्यवहारनिर्वाहः**

नन्वेवं सति सर्वत्र शब्दव्यापारसंभवात् ।
मुख्यस्यापि भवेत् साम्यं गौणलाक्षणिकादिभिः ॥ १४० ॥§ 892

एवमित्यादि । पदाश्रवणेऽपि प्रकारान्तरेण उपस्थितस्यार्थस्य शाब्दबोधे भानसंभवादिति भावः । अत्र दृष्टान्तान्याह—न यजावित्यादि । शृणुम इत्युत्तरवाक्येष्वप्यन्वेति । स्वर्गकामो यजेत इत्यादौ हि यागस्य करणत्वावगमकतृतीयाभावेऽपि करणत्वं बोध्यत एव; यागस्वर्गयोः साध्यसाधनभावस्य वेदैकगम्यत्वात् । एवं स्वर्गस्य भाव्यत्वमपि तत्रैव बोध्यते । अग्निचित् इत्यादौ च अग्नौ चेः इति क्विबो विधानेऽपि न शृणुम एव प्रत्ययम् । अधुना इत्यत्र च अधुना इति निपातनात् प्रत्ययमात्रमेव शिष्यते । किं बहुना लौकिकेष्वपि समासादिषु राजपुरुष इत्यादौ राजादिपदात् षष्ठ्याद्यभावेऽपि तदर्थप्रतीतिः परं वर्तत एव । अतः पदादनुपस्थितस्यापि शाब्दे भानं युज्यत एवेति प्रघट्टकार्थः ॥ § 893

एवं सति—पदादनुपस्थितस्यापि शाब्दबोधविषयत्वे । शब्दव्यापारः—अर्थोपस्थितिः । एवञ्च गौणस्य लाक्षणिकस्याप्यर्थस्य शाब्दबोधविषयत्वेन मुख्यापेक्षया को विशेषस्तयोः । एवं श्रुतिलिङ्गादीनामङ्गताग्राहकाणां प्रमाणानां परस्परविरोधे पूर्वपूर्वप्राबल्यं यत् भवद्भिर्वर्ण्यते तदपि न स्यात् । तत्र अर्थोपस्थितिं प्रति श्रुतिकल्पनाया आवश्यकत्वेन पूर्वपूर्वप्रमाणमुत्तरोत्तरं कल्पयित्वा क्रमेण श्रुतिं कल्पयतीति वक्तव्यम् । एवञ्च यावत् अनन्तर

श्रुतिलिङ्गादिमानानां विरोधे यच्च वर्ण्यते ।
पूर्वपूर्वबलीयस्त्वं, तत् कथं वा भविष्यति ? ॥ १४१ ॥§ 896

उच्यते—सत्यपि सर्वत्र शब्दव्यापारे तत्प्रकारभेदोपपत्तेरेष (Edtext outside numbered paragraph)न दोषः । न हि पदानां सर्वात्मना निमित्तभावमपहायैव नैमित्तिकप्रतीतिरुपप्लवते । तदपरित्यागाच्च तत्स्वरूपवैचित्र्यमनुवर्तत एव ॥

अन्यथा सिंहशब्देन मतिः केसरिणीसुते ।
अन्यथा देवदत्तादौ प्रतीतिरुपजन्यते ॥ १४२ ॥§ 898

१३ ] करण— nyāma-wit__ka
१८ ] व्यापारपरिगृहीते— nyāma-wit__ka
४ ] धो यश्च— nyāma-wit__kha

गङ्गायां मज्जतीत्यत्र गङ्गाशब्दो निमित्तताम् ।
उपयाति यथा, नैवं घोषादिवसतौ तथा ॥ १४३ ॥§ 900

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानामपि अर्थसन्निकर्षविप्रकर्षकृतोऽस्त्येव विशेष इति तत्रापि न विनियोगसाम्यम् ॥

श्रुतिलिङ्गादिभिर्योऽपि कल्पयेद्विनियोजिकाम् ।
तस्यापि तस्यास्तुल्यत्वात् बाध्यबाधकता कथम् ? ॥ १४४ ॥§ 902

प्रमाणं श्रुतिं कल्पयितुं प्रवर्तते, तावत्येव पूर्वप्रमाणेन श्रुतेः कल्पितत्वात् अनन्तरमप्रमाणं इति हि स्थितिः । एवञ्च वाक्यकल्पनां विनैवार्थोपस्थितिमात्रमेव यदि शाब्दबोधहेतुः, तर्हि कथं प्राबल्यदौर्बल्ये वर्णयितुं शक्येतेत्याक्षेपाशयः ॥ § 903

तत्प्रकारभेदेति । शब्दव्यापारप्रकारविशेषेत्यर्थः । विशेषश्चानुपदमेवोपपाद्यते । न हीत्यादि । न हि वयं सर्वेषामपि शाब्दबोधविषयाणामर्थानां यथाकथञ्चिदुपस्थितिं ब्रूमः । किन्त्वर्थैकदेशस्यैव । लक्षणास्थले हि अवाच्यानामप्यर्थानां बोधविषयत्वं सर्वसम्मतं, न तावता शक्तेरेव लोपः । बोधस्यानुभवसिद्धत्वे तदनुगुणा सामग्री यथाकथञ्चिदुपपादनीया परं, न तूत्पादनीया । एवञ्च न कोऽपि दोष इति ॥ § 904

मुख्यलाक्षणिकबोधयोर्विशेषमाह—अन्यथेत्यादि । सिंहोऽयम् इत्यत्र सिंहपदेन, सिंहो देवदत्तः इत्यत्र च तत्पदेन विलक्षणौ बोधौ सर्वानुभवसिद्धौ, एवं गङ्गायां मज्जति गङ्गायां घोषः इत्यादौ गङ्गापदाभ्याम् । वैलक्षण्यनियामकं च आनुभाविकस्मारकशक्तिभेदो वा अन्यद्वेत्यन्यदेतदिति ॥ § 905

एवमेव श्रुतिलिङ्गादिष्वप्यूह्यम् । अन्यथा भवन्मते वा कथं निर्बाह इत्याह—श्रुतीत्यादि । तस्यापि—लिङ्गादेरपि । तस्याः—श्रुतिकल्पनायाः सर्वैरपि श्रुतिरेव कल्प्यते चेत् कथं प्राबल्यदौर्बल्यनिर्णयः ? विलम्बा

अथ तत्कल्पने तेषां विदूरान्तिकवृत्तिता ।
स एवार्थगतो न्याय इति तत्कल्पनेन किम् ? ॥ १४५ ॥§ 908

ऐन्द्राग्नादिषु वैकृतेषु कर्मसु न प्राकृतविध्यन्तवचनानुमानम्, अपि तु चोदकव्यापारेण तस्यैव प्राप्तिः । वैकृतस्य विधेः काचिदाकाङ्क्षा चोदक इत्युच्यते ॥

**अर्थाध्याहारेऽपि उपदेशातिदेशयोर्वैलक्षण्यम्**

नन्वेवमुभयत्र तदवगमाविशेषात् उपदेशातिदेशयोः को विशेषः ? न नियोगावगमे कश्चिद्विशेषः; किन्तूपदेशे यथोपदेशं कार्यम्, अतिदेशे तु

यथाकार्यमुपदेश इत्येतयोर्विशेषः ॥

ननु यथाकार्यमुपदेशेऽनुपयुज्यमानकृष्णलचर्ववघातादेः प्राप्तिरेव न भवेदिति को बाधार्थः ?—न अखण्डमण्डलविध्यन्त- विलम्बाभ्यां निर्णयश्चेत् प्रकृतेऽपि तथाऽस्तु । श्रुत्या हि शीघ्रमेवाभिमतार्थोपस्थितिः, लिङ्गेन तु विमर्शपूर्वकत्वात् ततः किञ्चिद्विलम्बेन, वाक्येन तु ततोऽधिकविमर्शसापेक्षत्वात् ततः किञ्चिद्विलम्बेनेत्येवंरीत्याऽर्थोपस्थितौ विलम्बस्यानुभवसिद्धत्वात् । एवं विकृतिषु प्रकृत्यङ्गातिदेशस्थलेऽप्यङ्गानामेवातिदेशः, न तु तद्विधायकवाक्यानां, वैय्यर्थ्यात् । अग्निविधिर्हि स्वयमेवाङ्गानेवाक्षिपति, न तु तद्वाक्यान् । अतः सर्वत्रार्थस्यैवोपस्थितिः, न तु शब्दस्येति ॥ § 909

को विशेष इति । उभयत्रापि परमुखनिरीक्षाया अनावश्यकत्वादिति भावः । नियोगावगमे—विधिरूपार्थावगताविति यावत् । न हि साभ्यागन्तरि गृहिणि भुञ्जति उभयोः भोजनफले वैषम्यमिति । उपदेशस्थले उपदेशानुरोधेन कार्यत्वावगतिः, अतिदेशस्थले तु विध्या कार्यत्वावगतौ सत्यां कथंभावाकाङ्क्षया अङ्गप्राप्तिरिति विशेषः ॥ § 910

नन्वेवं सति—दशमे बाधाध्याये अतिदेशप्राप्तकृष्णलचर्वुपयोग्यवघातादेः अनुपयोगात् बाध इत्युक्तिर्न संगच्छते । अतिदेशाद्वाक्यप्राप्तौ सत्यां खलु अवहननप्राप्तिरिति तद्बाधवर्णनमावश्यकं, यदि च कार्यानुगुणैवोपदेशकल्पना तर्हि कृष्णलचर्ववहननस्य कार्यानुगुण्यं नास्तीति स्वयमेवाप्राप्तौ कुतो बाधावतारः ? इति शङ्कते—नन्विति । समाधत्ते—नेति । अखण्डेत्यादि । अखण्डं मण्डलं येषां विध्यन्तानामिति विग्रहः । विध्यन्तः—

काण्डप्राप्तेः । न ह्यंशांशिकया चोदकः प्रवर्तत इत्यलमनया प्रसक्तानुप्रसक्त्यागतशास्त्रान्तरगर्भकथाविस्तरप्रस्तावनया ॥

## एवं श्रुतार्थापत्तिप्रतिक्षेपृप्रभाकरपक्षोपसंहारः

इति प्रसङ्गाद्व्याख्यातं लेशतो वाक्यविन्मतम् ।
एतस्य युक्तायुक्तत्वपरिच्छेदे तु के वयम् ! ॥ १४६ ॥ § 913

श्रुतार्थापत्तिरस्माकं दूषणीयतया स्थिता ।
तद्दूषणं च पूर्वोक्तवीथ्याऽनेन पथाऽस्तु वा ॥ १४७ ॥ § 915

## आलङ्कारिकपक्षप्रतिक्षेपः

एतेन शब्दसामर्थ्यमहिम्ना सोऽपि वारितः ।
यमन्यः पण्डितंमन्यः प्रपेदे कंचन ध्वनिम् ॥ १४८ ॥ § 917

९ ] कदा— nyāma-wit__kha
१४--१५ ] देशेनु—
nyāma-wit__ka
५ ] केवलम्— nyāma-wit__kha

विधेर्निषेधावगतिर्विधिबुद्धिर्निषेधतः ।[§ 918]

यथा—

भव धम्मिय वीसत्थो मा स्म पान्(?)थ ! गृहं विश ॥ १४९ ॥[§ 919]

मानान्तरपरिच्छेद्यवस्तुरूपोपदेशिनाम् ।
शब्दानामेव सामर्थ्यं तत्र तत्र तथा तथा ॥ १५० ॥[§ 921]

अङ्ग इत्युक्तम् । कृत्स्नाङ्गसमुदायस्यैव प्राप्तेरित्यर्थः । अंशांशिकया—एकैकदेशेन । तथा चातिदेशकाले कृत्स्नमपि प्राप्नुयादेव; प्राप्त्यनन्तरमेव च उपयोगानुपयोगचिन्तया बाधाद्यवतारः, न तु पूर्वमेवेति ॥ [§ 922]

श्रुतार्थापत्ते निरसनीयत्वेनैतत्पक्षस्यायुक्तताविचारे औदासीन्यादाह— केवयमिति ॥ [§ 923]

सोऽपि—ध्वनिरपि । विधेर्निषेधावगतेरुदाहरणम्—भव धम्मियेति । अत्र सिंहस्तत्रास्ति, विस्रब्धो मा भव इति ध्वन्यते । भव धम्मिय वीसत्थो सो सुणओ अज्ज मारिओ देण । गोलाण+ईकच्छकुडङ्गवासिणा दरिअसीहेण ॥ छाया—भव धार्मिक ! विस्रब्धः स शुनकोऽद्य मारितस्तेन । गोदावरीनदीकूललतागहनवासिना दृप्तसिंह्येन ॥ निषेधतः विधिबुद्धेरुदाहरणं—मा स्म पान्थेति । न कोऽप्यस्ति गृहे, रात्रिरियं गाढा च वार्षिकी । एकाकिन्यहमप्यस्मि इत्याद्यपादत्रयम् । अत्र गृहं विश इत्यर्थः ध्वन्यते । ध्वनेः पार्थक्याभावे हेतुमाह—मानान्तरेति । शाब्दबोधे हि तात्पर्य

अथवा नेदृशी चर्चा कविभिः सह शोभते ।
विद्वांसोऽपि विमुह्यन्ति वाक्यार्थगहनेऽध्वनि ॥ १५१ ॥[§ 926]

तदलमनया गोष्ठ्या विद्वज्जनोचितया चिरं
परमगहनस्तर्कज्ञानामभूमिरयं नयः ।
प्रकृतमधुना तस्मात् ब्रूमो न भात्यनुमानतः
तनुरपि सतामर्थापत्तेर्विशेष इति स्थितम् ॥ १५२ ॥[§ 930]

## अनुपलब्धेः प्रमाणान्तरत्वाक्षेपः

आह—अभावस्तर्हि प्रमाणान्तरमस्तु—

सत्परिच्छेदकं यत्र न प्रमाणं प्रवर्तते ।
तदभावमितौ मानं प्रमाणाभाव उच्यते ॥ १५३ ॥[§ 932]

ज्ञानमेव मुख्यं कारणम् । तात्पर्यनिर्णयवेलायामेव अर्थो निर्णीत एव । तत्प्रतिपादनाच्च शब्दानां तावदर्थबोधकत्वं शक्त्या लक्षणया वा अङ्गीकरणीयमेवेति क्लृप्तशब्दवृत्तिभ्यामेव बोधनिर्वाह इति भावः । ननु यदि मानान्तरपरिच्छेद्यवस्तुस्वरूपोपदेशकत्वं शब्दानां तर्हि स्मृतेरिव शाब्दबोधस्यापि प्रमात्वं न स्यादिति चेत्—तुल्यमिदमनुमितावपि । तत्र व्याप्तिग्रहणवेलायामेव धूमत्वसामान्यात् वह्नित्वसामान्यस्यापि निश्चितत्वावश्यंभावात् । यदि च सामान्यात्मना निश्चयेऽपि विशेषात्मनाऽनिश्चयात् पक्षधर्मताज्ञानात् व्यक्तिविशेषे विश्राम्यन्ती अनुमितिः न स्मृतिरूपा भवितुमर्हतीत्युच्यते, तर्हि प्रकृतेऽपि सैव रीतिः । न हि प्रमाणान्तरसंवाददार्ढ्यमन्तरेण प्रत्यक्षादीन्यपि प्रमाणभावं भजन्ते पु. १० इति कथितमप्यत्रानुसन्धेयम् । एतद्विचारस्य प्रकृतेऽनतिप्रयोजनकत्वात् सोपहासमुपसंहरति—अथवेति । तदलमित्यादि । अयं परमगहनो विषयः तर्कज्ञानामपि दुर्निर्णेय एवं । अनुभवशरणास्तु वयं अर्थापत्तेरनुमानात् तनुमपि विशेषं न प्रतीम इत्यर्थः ॥ § 933

अभावः—उपलंभाभावः—अनुपलब्धिरिति यावत् । यत्र भूतलादौ सतो घटादेः परिच्छेदकं ज्ञापकं प्रमाणं न प्रवर्तते तत्र तादृशघटाभावप्रमितौ प्रमाणाभावः उपलंभाभावः मानम् । प्रतियोग्यनुपलम्भ एव अभावोपलम्भे कारणमिति यावत् ॥ § 934

I.131/KSV

इह घटो नास्तीति घटं प्रति सदुपलम्भकप्रमाणप्रवृत्तिर्नास्तीति असौ प्रमाणाभावः घटाभावं परिच्छिनत्ति ॥ § 935

तत्र च घटविषयज्ञातृव्यापारानुत्पाद एव दृश्यादर्शनवाच्यः प्रमाणं, नास्तीति बुद्धिः फलम् ॥ § 936

अथ वा घटाभावग्राही ग्रहीतृव्यापार सदुपलम्भकप्रमाणाभावजनितो नास्तीति प्रत्ययस्वभावः प्रमाणम्, फलं तु हानादिज्ञानं भविष्यति । तदुक्तम्—

प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
साऽऽत्म(?)ऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि इति ।§ 939

अन्यवस्तुशब्दन घटाभाव एवोक्तः ॥ § 940

स्वयं व्याकरोति—इहेत्यादि ॥ § 941

प्रमाणफले विविच्य दर्शयति—तत्र चेति । ज्ञातृव्यापार ज्ञानम् । अन्धकार घटाभावप्रत्यक्षानुदयात् योग्यानुपलब्धेरेव कारणत्वेन दृश् त्युक्तम् । दृश्यादर्शनं—योग्यानुपलब्धिः ॥ § 942

हातोपादानयोरेव मुख्यफलत्वात् नास्तीति बुद्धिः फलम् इति न स्वरसमित्यत आह—अथ वेति । घटाभावविषयकः प्रतियोग्यनुपलब्धिजन्यः

१ ] शब्दः— nyāma-wit__ka
४ ] प्रतीति— nyāma-wit__ka

नास्तीति प्रत्ययात्मकः यः ज्ञातृव्यापारः स एव प्रमाणम्, हानोपादानःसाधनत्वात् इत्यर्थः ॥ § 943

प्रत्यक्षादेरिति । प्रत्यक्षानुमानोपमानशब्दार्थापत्तीनामनुत्पत्तिरेव अभावाख्यं प्रमाणमुच्यते । प्रमाणाभावः—प्रमाणरूप अभावः उपलंभाभावो वा । ननु आत्मनः सर्वप्रमाणानुत्पत्तिः किंरूपा ? इत्यत्राह—सेति । भाट्टैः आत्मनो नित्यस्यापि सविकारत्वमङ्गीकृतम् । तथोक्तं विक्रिया ज्ञानरूपाऽस्य न नित्यत्वे विरोत्स्यते इति; नानित्यशब्दवाच्यत्वमात्मनो विनिवार्यते । विक्रियामात्रवाचित्वे न ह्युच्छेदोऽस्य तावता इति च । एवं च घटादिज्ञाने जाते आत्मनोऽपि घटज्ञातृरूपतया परिणामः घटादिज्ञानानुत्पत्तौ च तज्ज्ञातृरूपपरिणामो नास्तीति अपरिणामी आत्माऽवतिष्ठते इति । ननु तर्हि सुपुप्तिरेव स्यात् जाग्रद्दशायां यत्किञ्चिद्विषयभानस्य नियतत्वेन आत्मनः परिणामाभावो न वक्तुं शक्य इति चेदाह—विज्ञानं वेति । न सर्वथा परिणामाभावः । किन्तु यत्किञ्चिद्वस्तु भासत एव । किं तदन्यवस्त्वित्यत्राह—अन्यवस्तुशब्देनेति ॥

तत्र तावदिदं नास्तीति ज्ञानं न प्रत्यक्षजनितम्, इन्द्रियार्थसन्निकर्षाभावात् । सन्निकर्षो हि संयोगसमवायस्वभावः, तत्प्रभवभेदो वा संयुक्तसमवायादिरिह नास्त्येव । संयुक्तविशेषणभावोऽपि न संभवति, कुम्भाभावस्य भूप्रदेशविशेषणत्वाभावात् । न ह्यसंयुक्तमसमवेतं वा किञ्चिद्विशेषणं भवति । संयुक्तस्य दण्डादेः समवेतस्य शुक्लगुणादेः तथाभावदर्शनात् । अभावश्च न केनचित्संयुज्यते, अद्रव्यभावात् । न क्वचित् समवैति, गुणादिवैलक्षण्यादिति ॥

यदि च संयुक्तविशेषणभावसन्निकर्षोपकृतं चक्षुरभावं गृह्णाति, तर्हि तदविशेषात् संयुक्तद्रव्यवृत्तीन् रसादीनपि गृह्णीयात् ॥

अयोग्यत्वान्न गृह्णातीति चेत्—तदभावमपि मा ग्रहीत्, अयोग्यत्वाविशेषात् । योग्यायोग्यत्वकृतग्रहणाग्रहणनियमवादे वा अभावस्य प्रत्यक्षाद्यगम्यत्वमुपपादयति—तत्र तावदिति । संयुक्तसमवायादिरित्यादिना अवशिष्टद्वयपरिग्रहः । नास्तीति । असंभवादेवेत्यर्थः । विशेषणतायाः सन्निकर्षत्वं निराकरोति—संयुक्तविशेषणभाव इति । अद्रव्यभावात्—द्रव्यरूपत्वाभावात् । द्रव्ययोरेव खलु संयोगः ॥ § 944

बाधकमप्याह—यदि चेति । रसादीनपीति । घटाभावस्य चक्षुस्संयुक्तभूतलविशेषणत्वात् चक्षुषा ग्रहणं चेत् चक्षुस्संयुक्तखण्डशर्करादिविशेषणत्वात् रसादेरपि चक्षुषा ग्रहणं कुतो न स्यादित्यर्थः ॥ § 945

अयोग्यत्वाविशेषादिति । रसादिवत् चक्षुर्ग्रहणायोग्यत्वादित्यर्थः । ननु योग्यत्वायोग्यत्वे कार्यानुमेये । एवं चानुभवानुरोधात् अभावः चक्षुर्योग्य एव,

---

३० ] भाव—ख. भवो— nyāma-wit__ga
३० ] संयोग— nyāma-wit__ka
३४ ] स स— nyāma-wit__kha
२ ] वर्तीन्— nyāma-wit__kha
३ ] तदभाव— nyāma-wit__kha

रसादिश्च तदयोग्य इति कल्पयाम इत्यत्राह—योग्यायोग्यत्वेति । किम् ? इत्यधिक्षेपे । योग्यं गृह्यते, अयोग्यं न गृह्यते इत्येवं मुखपिधाने

योग्यतैव सन्निकर्षो भवतु; किं षड्कघोषेण ? तस्मान्न घटाभावज्ञानं चाक्षुषम् ॥

**अभावस्यैन्द्रियकत्वनिरासः**

ननु भूप्रदेशं च घटाभावं च विष्फारिते चक्षुषि निरीक्षामहे; निमीलिते तु तस्मिंस्तयोरन्यतरमपि न पश्यामः । तत्र समाने च तद्भावभावित्वे भूप्रदेशज्ञानं चाक्षुषम्, अभावज्ञानं तु न चाक्षुषमिति कुतो विशेषमवगच्छामः ?

बाढमवगच्छामः सन्निकर्षाभावादेव । न ह्यसन्निकृष्टं चक्षुरवगतिजन्मने प्रभवति ॥

तद्भावभावित्वं त्विदमन्यथासिद्धम्; विदूरदेशव्यवस्थितस्थूलज्वालावलीजटिलज्वलनगतभास्वररूपोपलम्भानुवर्तितद्गतोष्णस्पर्शज्ञानवत् । तत्र यथा रूपानुमीयमानस्पर्शवेदने नयनान्वयव्यतिरेकानुविधानमन्यथासिद्धम्, एवमिहापि भूप्रेदेशोपलम्भाविनाभाविनि कुम्भाभावग्रहणे तत्कृतमिन्द्रियान्वयव्यतिरेकानुविधानमिति न चाक्षुषो घटाभावप्रतिभासः । तदुक्तम्—

गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।मान-
सं नास्तिताज्ञानं जायतेऽक्षानपेक्षया इति
॥§ 947 &

संयुक्तविशेषणतादिषड्विधसन्निकर्षवर्णनं किमर्थमित्यर्थः । तस्मात्—योग्यत्वायोग्यत्वकृतवैषम्यस्य दुर्वचत्वात् ॥ § 948

तद्भावभावित्वे—तस्य भावे सति भावित्वं इत्यन्वयः, अवधारणविवक्षया च तस्याभावे सत्यभावित्वमिति व्यतिरेकश्च लभ्यते, तथा च— चक्षुस्संयोगान्वयव्यतिरेकानुविधायित्व इति यावत् ॥ § 949

अवगतिजन्मने—ज्ञानोत्पादनाय ॥ § 950

विदूरेत्यादि । विदूरदेशव्यवस्थितः स्थूलज्वालावलीजटिलश्च यः ज्वलनः तद्गतभास्वररूपोपलंभानुवर्ति यत् तद्गतोष्णस्पर्शज्ञानं तद्वदित्यर्थः । तादृशज्वलनदर्शनकाले एव तद्गतोष्णस्पर्शज्ञानं जायत एव, अथापि न तच्चाक्षुषं, एवमेव भूतलदर्शने सति घटाभावज्ञानमित्यर्थः । तत्कृतं—अविनाभावकृतम् ॥ § 951

स्वोक्तार्थे भट्टाचार्यसम्मतिमाह—तदुक्तमिति । वस्तु—अभावाधि

अतश्चैव असन्निहितस्यापि क्वचिद्ग्रहणम् । स्वरूपमात्रकेण गौरमूल-

२५ ] तं— nyāma-wit__kha
२५ ] शे— nyāma-wit__kha
२७ ] न्वय— nyāma-wit__kha
२८ ] अविनाभावकृत— nyāma-wit__ga
२९ ] न्वय— nyāma-wit__kha

क(?)पलब्धवतः ततो देशान्तरं गतस्य तत्र केनचित् गर्गोऽस्ति वा ? नास्ति वा ? इति पृष्टस्य सत स्वरूपमात्रं गृहीतम् । गौरमूलकमनुस्मरतः तदानीमसन्निकृष्टेऽपि गर्गस्य भावे तदैव तस्य ज्ञानमुदेति । तत्र इन्द्रिय-कथापि नास्तीति न तस्य प्रत्यक्षत्वम् ।

**अभावस्यानुमानागम्यत्वम्**

न चानुमानगम्योऽयमभावः; भूप्रदेशस्य, तद्गतघटादर्शनस्य वा लिङ्ग-त्वानुपपत्तः । न भूप्रदेशो लिङ्गम्; अगृहीतसम्बन्धस्यापि तत्प्रतीतेः, अनैकान्तिकत्वात्, अपक्षधर्मत्वात्, तदधिकरणाभावानन्त्येन सम्बन्धग्रह-णासंभवाच्च । नापि घटादर्शनं लिङ्गम्; करणभूतं वस्तु । एवञ्च प्रतियोगिस्म-रणकालीनाधिकरणदर्शनाविनाभूतमपि अग्न्युष्णस्पर्शज्ञानवत् नैन्द्रियिकम-भावज्ञानं, अपि तु मानसमेवेति ॥ § 952

एवं तद्भावभावित्वमभ्युपगम्य तस्यान्यथासिद्धिरुक्ता; वस्तुतस्तु त-द्भावभावित्वमेव तस्य नास्तीत्याह—अतश्चेति । यत अभावज्ञानमधिकर-ण ज्ञानं च भिन्नप्रमाणजन्यम्, अत एव कुत्रचित् अधिकरणग्रहणव्यव-धानेनाप्यभावग्रहणं दृश्यत इत्यर्थः । अत्र वार्तिकोक्तार्थे स्वयं दृष्टान्तमाह—स्वरूपमात्रणेत्यादि अभावरूपविशेषणग्रहणं विनेत्यर्थः—गौरमूलकमिति स्व-पितामहग्रामस्य नाम—तथा च वक्ष्यति—अस्मत्पितामह एव ग्रामकामः सांग्रहणीं कृतवान्; स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप इति । तत्र— देशान्तरे गर्गोऽस्ति वेति गौरमूलकग्राम इति शेषः । असन्निकृष्ट इति । इन्द्रियेणेति शेषः । तस्य—गर्गाभावस्य । न च प्रात-रवगतोऽभावस्तदा स्मर्यत इति वाच्यम्, प्रतियोगिनस्तदानीं कथंचिदपि बुद्धावनारोहात् इति शास्त्रदीपिकावचनमपीह योजनीयम् ॥ § 953

ननु असकृत् घटयुक्तं भूतलं, तद्रहितं च तत् पश्यन् यदा शुद्धं भूतलं पश्यति तदा घटाभावमनुमिनोति भूयोदर्शनवशादिति शङ्कते—न चेति । लिङ्गं विकल्प्य दूषयति—भूप्रदेशस्यति अगृहीतेति । व्याप्तिज्ञानशून्यस्येत्य-र्थः । तदसंभवहेतुमाह—अनैकान्तिकत्यादिति । घटेन साकमपि भूतलस्य बहुशस्सहचारदर्शनादिति शेषः । अपक्षधर्मत्वात्— भूतलस्य भूतलधर्म-त्वाभावात् । तदधिकरणेति । घटाभावाधिकरणेत्यर्थः ।

अपक्षधर्मत्वात् । घटादर्शनं घटस्य धर्मः, न तदभावस्य । घटाभावप्र-तीतिं प्रति व्याप्रियमाणत्वात् तद्धर्मत्वमस्येति चेत्—न— इतरेतराश्रयप्रसङ्गात् । तद्धर्मत्वे सति लिङ्गप्रतीतिजनकत्वं, प्रतीतिजन्मनि सति तद्धर्मत्वमिति । असिद्धायां च घटाभावप्रतीतौ तद्धर्मताज्ञानमदर्शनस्य दुर्घटमेव । सिद्धायां तु किं पक्षधर्मताज्ञानेन ? साध्यप्रतीतेः सिद्धत्वात् ॥

अपि चेदमदर्शनाख्यं लिङ्गमविदितव्याप्ति कथमभावस्यानुमापकं भवेत् ? व्याप्तिग्रहणं च धूमाग्निवत् उभयधर्मिग्रहणपूर्वकम् । तत्र व्याप्तिग्रहण-

२ ] णदर्शनात्— nyāma-wit__kha २ ] म्— nyāma-wit__ka

२ ] न— nyāma-wit__ka

वेलायामेव तावत् कुतस्त्यमभावाख्यधर्मिग्रहणमिति चिन्त्यम् ॥

तत एवानुमानादिति यद्युच्यते, तदितरेतराश्रयम् । अनुमानान्तरनिबन्धने तु तद्ग्रहणेऽनवस्था ॥ घटस्य धर्म इति । घटस्य दर्शनमित्युक्ते हि दर्शने घटधर्मत्वं विषयीक्रियते, घटस्य रूपमितिवत् । एवं अदर्शनमपि तथैव विषयीक्रियत इत्यनुभवसिद्धमेतत् । ननु धर्मत्वं बहुविधं, यथा हि आत्मधर्मोऽपि ज्ञानं सम्बन्धान्तरेण घटधर्मो भवति, यथा वा वह्निव्याप्यो धूमः वह्निधर्मोऽपि भवति तथा घटाभावप्रतीतिजनकत्वादेव अदर्शनं घटाभावधर्मोऽपि भवितुमर्हत्येवेति शङ्कते—घटाभावेति ॥ § 954

उभयधर्मीति । व्याप्यव्यापकरूपधर्मीत्यर्थः । एवञ्च घटाभावरूपस्य व्यापकस्य घटादर्शनरूपस्य व्याप्यस्य च प्रथमं स्वरूपग्रहणमन्तरा व्याप्तिग्रहणमेव न संभवेत् । प्राथमिकं च तत् घटाभावज्ञानं केन प्रमाणेन जायत इति वक्तव्यम् । यदि तेनैवानुमानेन, तर्हि, अनुमानेन धर्मिग्रहणं, धर्मिग्रहणे चानुमानप्रवृत्तिरित्यन्योऽन्याश्रयः । यदि चानुमानान्तरेण तर्ह्यनवस्था । प्रत्यक्षस्य च प्रसक्तिर्वारितैवेति ॥ § 955

किञ्च घटादर्शनमपि घटदर्शनाभावरूपं, स च हेतुभूतः दर्शनाभावः केन गृह्यत इति यथोक्तदोषानतिपातः ॥ § 956

न चेदं शाब्दादिरूपं, तन्निमित्तानां शब्दादीनां सर्वथाऽप्रवृत्तः । अतः अभावः अभावाख्येन प्रमाणान्तरेणैव गम्य इति प्रघट्टकार्थः ॥ § 957

I.136/KSV

अदर्शनाख्यं लिङ्गमपि दर्शनाभावस्वभावमिति तत्स्वरूपपरिच्छेदचिन्तायामप्ययमेव पन्थाः । अतो दूरमपि गत्वा तदवगमसिद्धये प्रमाणान्तरमभावपरिच्छेदनिपुणमवगन्तव्यमिति तत एव तदवगमसिद्धेर्न तस्यानुमेयत्वम् ॥ § 958

न चेदं इह घटो नास्ति इति ज्ञानं शब्दोपमानार्थापत्त्यन्यतमनिमित्तमाशङ्कितुमपि युक्तमिति सदुपलम्भकप्रमाणातीतत्वादभावस्यैव भूमिरभाव इति युक्तम् ॥ § 959

अपि च प्रमेयं अनुरूपेण प्रमाणेन प्रमातुमुचितम्— § 960

भावात्मके प्रमेये हि नाभावस्य प्रमाणता ।
अभावेऽपि प्रमेये स्यात् न भावस्य प्रमाणता ॥ १५४ ॥ § 962

न प्रमेयमभावाख्यं निह्नुतं बौद्धवत् त्वया ।
प्रमाणमपि तेनेदं अभावात्मकमिष्यताम् ॥ १५५ ॥ § 964

---

० ] तिव्या— nyāma-wit__ka
० ] तद्धर्मता— nyāma-wit__kha
० ] न्धे— nyāma-wit__ka
० ] ख्य— nyāma-wit__kha
० ] प्रमाणे— nyāma-wit__ka
२ ] बोधवत्— nyāma-wit__kha

## अभावाख्यातिरिक्तप्रमाणनिराकरणम्

अत्राभिधीयते—सत्यमभावः प्रमेयमभ्युपगम्यते, प्रत्यक्षाद्यवसीयमानस्वरूपत्वात्तु न प्रमाणान्तरमात्मपरिच्छित्तये मृगयते । § 965

अदूरमेदिनीदेशवर्तिनस्तस्य चक्षुषा ।
परिच्छेदः परोक्षस्य क्वचिन्मानान्तरैरपि ॥ १५६ ॥§ 967

भावात्मक इत्यादि । प्रमेये भावरूपे प्रमाणोऽपि भावरूप एव स्यात् । अभावः यदा प्रमेयः, तदा प्रमाणमप्यभावरूपम् । गन्धादिग्राहकाणामिन्द्रियाणां गन्धवत्त्वादिनाऽऽनुरूप्यस्य सम्मतत्वात् । अभावाख्यं प्रमेयं त्वतिरिक्तमङ्गीकृतम्, एवं सति तेन सहातिरिक्तं प्रमाणमप्यङ्गीकार्यमेव । दुःखं माऽस्तु, सुखं परं भवत्विति कोऽयं न्याय इति भावः ॥ § 968

सत्यमित्यादि । न वयं प्रमाणं विना प्रमेयमात्रमङ्गीकुर्मः, परन्तु प्रमाणेन क्लृप्तातिरिक्तेनैव भाव्यमिति कुतो भर्त्सयति भवान् ? समीपस्थस्याभावस्येन्द्रियेण ग्रहणं, परोक्षस्य तु यथासंभवमनुमानादिनाऽपि इति नातिरिक्तप्रमाणापेक्षेति ॥ § 969

I.137/KSV

तथा च इह घटो नास्ति इति ज्ञानमेकमेवेदम् इह कुण्डे दधि इति ज्ञानवत्, उभयालम्बनमनुपरतनयनव्यापारस्य भवति । तत्र भूप्रदेशमात्र एव नयनजं ज्ञानम्, इतरत्र प्रमाणान्तरजनितमिति कुतस्त्योऽयं विभागः ? § 970

अत्राग्निरिति युक्तोऽयं अनक्षजः प्रतिभासः । धूमग्रहणानन्तरं अविनाभावस्मरणादिबुद्ध्यन्तरव्यवधानसंभवात् । इह तु तथा नास्त्येव । अव्यवहितैव हि भूप्रदेशवत् घटनास्तिताऽवगतिरविच्छेदेनानुभूयते । न च क्षितिधराधिकरणपरोक्षाशुशुक्षणिवदनीक्षणविषयता भवत्यभावस्य; तद्व्यापारान्वयव्यतिरेकानुविधायित्वात् तत्प्रतीतेः । तत्र हि व्यापृताक्षोऽपि न पर्वतवर्तिनमनलमवलोकयितुमुत्सहते; इह तु घटाभावमपरिम्लाननयनव्यापार एव पश्यतीति चाक्षुषमभावज्ञानम्, तद्भावभावित्वानुविधानात् ॥ § 971

अभावाधिकरणयोरेकप्रमाणगम्यत्वमुपपादयति—तथा चेत्यादिना । इह कुण्डे दधि इति ज्ञानं हि विशेष्यविशेषणोभयविषयकं चाक्षुषमेव । एवं भूतले घटाभावः इत्यत्रापि उभयोरप्येकेन प्रमाणेन ग्रहणं युक्तम् । न ह्येकमेव ज्ञानं विशेष्यांशे चाक्षुषं विशेषणांशे मानसमिति संभवेत्, प्रमाणभेदे प्रमितिभेदावश्यंभावात् । न वेदं विभिन्नमेव ज्ञानद्वयम्, अननुभवात् ।

६ ] वः— nyāma-wit__kha
८ ] ति— nyāma-wit__kha
९ ] विधानात्— nyāma-wit__kha
११ ] त्ववि— nyāma-wit__kha

अतः ज्ञानैक्ये अनुभवसिद्धे प्रमाणपरिशीलनायां विशेष्यग्रहणार्थमावश्यकेन चक्षुषैव विशेषणग्रहणमकामेनापि वाच्यमिति ॥ § 972

ननु यद्येकस्मिन्नेव ज्ञाने एकांशे परोक्षत्वं अपरांशेऽपरोक्षत्वं च नाङ्गीक्रियेत तर्हि पर्वतो वह्निमान् इति ज्ञानं कथम् ? तत्र हि पर्वतः अपरोक्षः, वह्निश्च परोक्षः । एवं प्रकृतेऽपि भूतलांशे ऐन्द्रियिकम्, अभावांशे अनैन्द्रियिकमिति कुतो न स्यादिति शङ्कायां, पर्वतो वह्निमान् इति विशिष्टमेकं ज्ञानं परोक्षमेव । पर्वतो धूमवान् इति पक्षधर्मताज्ञानं परमपरोक्षम् । अतो नानुपपत्तिरित्याह—अत्राग्निरित्यादि । इह—भूतलं घटाभाववदित्यत्र । तथा— बुद्ध्यन्तरव्यवधानम् । अनीक्षणविषयता—चक्षुरिन्द्रियाग्राह्यता । अपरिम्लानेति । अनुपरतेत्यर्थः । तद्भावभावित्वेति । अस्य अनन्यथासिद्धेत्यादिः ॥ § 973

I.138/KSV

न च दूरस्थितहुतवहरूपदर्शनपूर्वकस्पर्शानुमानवदिदमन्यथासिद्धं तद्भावभावित्वम् । तत्र हि बहुशः स्पर्शदर्शनकौशलशून्यत्वमवधारितं चक्षुषः, स्पर्शपरिच्छेदि च कारणान्तरं त्वगिन्द्रियमवगतम् ॥ § 974

अविनाभाविता च पुरा तथाविधयो रूपस्पर्शयोरुपलब्धेत्यनुमेय एवासौ स्पर्श इति युक्तं तत्रान्यथासिद्धत्वं चक्षुर्व्यापारस्य ॥ § 975

प्रकृते तु नेदृशः प्रकारः समस्ति । न चैकत्र तद्भावभावित्वमन्यथासिद्धमिति सर्वत्र तथा कल्प्यते । एवं हि रूपमपि चाक्षुपतामवजह्यात् ॥ § 976

## वैभवेन अभावस्य चाक्षुषत्वसमर्थनम्

ननु नीरूपस्यासंबद्धस्य च चाक्षुषत्वमभावस्यकथमभिधीयते ? § 977

चक्षुर्जनितज्ञानवत्त्वाद्धि चाक्षुषत्वम्, न रूपवत्त्वेन । रूपवतामपि परमाणूनामचाक्षुषत्वात् । नीरूपस्यापि रूपस्य चाक्षुषत्वाच्च ॥ § 978

संबद्धमपि न सर्वं चाक्षुषम्, आकाशस्य तथात्वेऽपि तदभावात् । § 979

अनन्यथासिद्धत्वमेवाशंक्योपपादयति—न चेति । स्पर्शदर्शनकौशलं स्पर्शविषयकप्रत्यक्षजननसामर्थ्यम् ॥ § 980

तथाविधयोः—ज्वालाबलीजटिलेत्याद्युक्तविधयोः ॥ § 981

एवमिति । परमाणौ रूपसत्वेऽपि चक्षुषाऽग्रहणात् रूपं चाक्षुपे कारणं न स्यात् । यदि तत्राग्रहणमन्यथासिद्धं प्रकृतेऽपि तथा । तस्मादेकैव रीतिः सर्वत्र वक्तुमशक्येति भावः ॥ § 982

असम्बद्धस्येति । चक्षुषेति शेषः । एवमुत्तरत्र सर्वत्रापि ॥ § 983

---

२९ ] दूरव्यवस्थितः— nyāma-wit__kha

४ ] त्वाश्चा— nyāma-wit__kha

५ ] चाक्षुषत्वात्— nyāma-wit__kha

चक्षुर्जतितेत्यादि । चक्षुषा गृह्यत इत्यस्मिन्नर्थे शेषे इति सूत्रात् शैषिकेऽणप्रत्यये खलु चाक्षुषम् इति पदनिष्पत्तिः । एवञ्च चक्षुरिन्द्रिय-जन्यज्ञानविषयत्वं चाक्षुषपदप्रवृत्तिनिमित्तम् । न तु रूपवत्त्वम्, अन्वयतो व्यतिरेकत्वश्च व्यभिचारात् इत्यर्थः ॥ § 984

एवं नीरूपस्य, असम्बद्धस्य—इत्युक्तयोः नीरूपत्वस्यान्यथासिद्धिमुक्त्वा द्वितीयस्य तामाह—सम्बद्धमपीति । विभोः खल्वाकाशस्य चक्षुस्सम्बन्धः अव-र्जनीय इति भावः ॥ § 985

I.139/KSV

ननु असम्बद्धस्य चक्षुषा ग्रहणे दूरव्यवहितस्य विभीषणादेरपि चाक्षुष-त्वप्रसङ्गः—उच्यते—भावे खल्वयं नियमः, यत् असम्बद्धस्य चक्षुषाऽग्रहणम्, अभावस्त्वसम्बद्धोऽपि चक्षुषा गृहीष्यते ॥ § 986

षट्प्रकारसन्निकर्षवर्णनमपि भावाभिप्रायमेव, सम्बद्धं हि यत् गृह्यते तत् षण्णां सन्निकर्षणामन्यतमेन सन्निकर्षेणेति ॥ § 987

प्राप्यकारित्वमपीन्द्रियाणां वस्त्वभिप्रायमेवोच्यते । तस्मादवस्तुत्वादभावस्य तेन सन्निकर्षमलभमानमपि नयनमुपजनयति तद्विषयमवगममिति न दोषः ॥ § 988

न चासम्बद्धत्वाविशेषात् देशान्तरादिषु सर्वाभावग्रहणमाशङ्कनीयम्, आश्रयग्रहणसापेक्षत्वादभावप्रतीतः; आश्रयस्य च सन्निहितस्यैव प्रत्यक्षत्वात् ॥ § 989

## स्वपक्षेन अभावस्य प्रत्यक्षत्वोपपादनम्

अथवा संयुक्तविशेषणभावाख्यसन्निकर्षोपकृतं चक्षुरभावं ग्रहीष्यति । यथा समवायप्रत्यक्षत्ववादिनां पक्षे समवायामति ॥ § 990

विभीषणस्येदानीमपि लङ्कायां राज्यकरणस्य पुराणप्रसिद्ध्या विर्भीष-णादेरित्युक्तम् । यद्वा दूरव्यवधानं कालतो देशतश्चेति कृत्वा तथोक्तम् । इन्द्रियसम्बन्धं विनाऽपि चाक्षुषत्वे देशान्तरकालान्तरव्यवहितस्यापि चाक्षुषत्वं स्यादित्यर्थः ॥ § 991

ननु यदि अभावः इन्द्रियसन्निकर्षं विनाऽपि गृह्येत तर्हि विशेषण-ताख्यसन्निकर्षः किमर्थमिति शङ्कायां, समवायप्रत्यक्षे तदुपयोक्ष्यते, एवञ्च षड्विधसन्निकर्षोऽपि भावविषयक एवेत्याह—षट्प्रकारेति । सम्बद्धमिति । इन्द्रियेणेति शेषः ॥ § 992

ननु तर्हि इन्द्रियाणां प्राप्यकारित्वं भज्येतेति कथं बौद्धपराकरणम् ? इति शङ्कायामाह—प्राप्यकारित्वमिति । वस्त्विति भावरूपेत्यादिः । भवति, अस्ति इति प्रतीतिविषयत्वमिति यावत् । अवस्तुत्वादिति । अभावरूप-त्वादित्यर्थः । तेन—अभावेन ॥ § 993

१ ] ष— nyāma-wit__ka

देशान्तरादिष्वित्यादिना कालान्तरपरिग्रहः । आश्रयेति । निष्प्रतियोगिकः यथा वाऽभावो नास्ति, तथा निरनुयोगिकोऽपि नास्तीति भावः ॥ § 994

एवं वैभवेनोक्त्वा वस्तुगत्याऽऽह—अथवेति । पक्षे—नैय्यायिकपक्षे । तथा च प्रत्यक्षलक्षणसूत्रन्यायवार्तिकम्—समवायेऽभावे च विशेषण-विशेष्यभावात् इति । समर्थितं चैतत् तात्पर्यटीकायां वाचस्पतिमिश्रैः ॥ § 995

I.140/KSV

## संयुक्तविशेषणतासन्निकर्षस्यावश्यकत्वम्

ननु तदिदमसिद्धमसिद्धस्य दृष्टान्तीक्रियते—मैवम्— भवताऽपि द्रव्य-गुणयोर्वृत्तेरपरिहार्यत्वात् । भेदबुद्ध्या सिद्धभेदयोः असम्बद्धयोश्च द्रव्यगुण-योरदर्शनात् अवश्यं काचिद्वृत्तिरेषितव्येति अलमर्थान्तरचिन्तनेन ॥ § 996

## अभावस्य सम्बन्धोपपादनम्

यत्तूक्तं संयोगसमवाययोरभावात् अभावो न भूप्रदेशस्य विशेषणमिति—तदप्यसाधु—संयोगसमवायाभ्यामन्यस्यैव विशेषणविशेष्यभावनाम्नः सम्बन्ध-स्य अदूर एव प्रतीतिबलेन दर्शयिष्यमाणत्वात् ॥ § 997

## संयुक्तविशेषणतायाः सन्निकर्षत्वे उक्तातिप्रसङ्गपरिहारः

यस्तु संयुक्तविशेषणभावे सन्निकर्षे रसादिभिरतिप्रसङ्ग उद्भावितः, सोऽयं संयुक्तसमवायाख्ये चक्षूरूपसन्निकर्षेऽपि समानो दोषः ॥ § 998

संयुक्तसमवायोऽपि तर्हि मा भूत् सन्निकर्षः; किं नश्छिन्नम् ? तत्किं असम्बद्धमेव रूपं गृह्णातु चक्षुः ! न हि संयुक्तसमवायादन्यः चक्षूरूपयोः सम्बन्धः ॥ § 999

असिद्धमिति । समवायस्यैव तन्मतेऽसिद्धत्वात् । वृत्तेः—सम्बन्धस्य । ननु भाट्टानामस्माकं द्रव्यगुणयोर्नात्यन्तभेदः, किन्तु भेदाभेदे एवेति शङ्कायां, तस्याः परिहारस्य बहुग्रन्थसाध्यत्वेन संक्षेपात् परिहारमाह—भेदबुद्ध्येति । घटः रूपवान्, न तु रूपम् इति प्रतीतेरित्यर्थः ॥ § 1000

अदूर इति । बौद्धाक्षेपप्रतिवचनावसर इत्यर्थः ॥ § 1001

अतिप्रसङ्ग इति । चक्षुस्संयुक्तरसखण्डादौ रसस्य विशेषणत्वादित्यर्थः । चक्षूरूपेति । चक्षुषः रूपेण सहेत्यर्थः । चक्षुस्संयुक्तघटादिसमवायः रूपे रसे चाविशिष्टः, अथापि चक्षुषा रूपमेव गृह्यते न रस इति यथा, तथा प्रकृतेप्यस्त्वित्यर्थः ॥ § 1002

२१ ] तद्धी— nyāma-wit__kha

ननु कं प्रत्युच्यते, न वयं संयुक्तसमवायमभ्युपगच्छामः—इति भावेन वक्ति—संयुक्तेति । प्रतिवक्ति—तत्किमिति । नन्वस्तु सम्बन्धः, स भवदुक्त एवेति कथमित्यत्राह—न हीति ॥ § 1003
I.141/KSV

### सन्निकर्षाणामावश्यकता

ननु ! अर्थग्रहणात्मको व्यापार एव चक्षुषः सन्निकर्षो योग्यता वा । तद्वशादेव रूपस्य तत् ग्राहकमुपेयते, न च संयुक्तसमवायादिनेति—स तर्हि व्यापारः, सा वा योग्यता कथमभावमपि प्रति तस्य न स्यात् । प्राप्यकारीणि चेन्द्रियाणि कारकत्वादिष्यन्ते, सन्निकर्षश्च निह्नूयते इति विप्रतिषिद्धम् ॥ § 1004

तस्मात् षड्प्रकारा सन्निकर्षानुगामिनी योग्यता वक्तव्या, न योग्यतामात्र एव विश्रम्य स्थातव्यम् । यत्र योग्यता तत्र सन्निकर्षोऽप्यस्ति, न तु यत्र सन्निकर्षः तत्रावश्यं योग्यतेत्येवमभ्युपगच्छतां न रसाद्यतिप्रसङ्गचोदना धुनोति मनः । रसादेः सत्यपि सन्निकर्षे योग्यत्वाभावादग्रहणम् ॥ § 1005

योग्यतामात्रवादेऽपि नाभावस्यास्त्ययोग्यता ।
भवद्भिर्वस्तुधर्मोऽस्य को वा नाभ्युपगम्यते ? ॥ १५७ ॥ § 1007

सर्वोपाख्यवियुक्तत्वात् नास्त्येवेत्येष वोच्यताम् ।
अभावश्चाक्षुषज्ञानविषयो वाऽभ्युपेयताम् ॥ १५८ ॥ § 1009

ननु इदमसङ्गतम्, अन्यस्यैव सन्निकर्षत्वात् । तथोक्तं—व्यापारो न यदा तेषां तदा नोत्पद्यते फलम् इति । उक्तं चात्रैव भट्टोम्बेकेन—योग्यतालक्षण एव सन्निकर्षः, योग्यता च कार्यानुमेया इति । तदिदं शङ्कते—नन्विति । समाधत्ते—स तर्हीति । तस्य—इन्द्रियस्य । प्राप्यकारीणीत्यादि । सत्संप्रयोगे पुरुषस्येन्द्रियाणां इत्यनेन खलु इन्द्रियसंयोगः वस्तूनामुच्यते, संयोगश्चानेकविध इति सूचनाय संप्रयोग इति च; एवं सति कथं सन्निकर्षो निह्नूयत इति भावः ॥ § 1010

षड्प्रकारा योग्यता इत्यन्वयः ॥ § 1011

एवं सन्निकर्षेणैव योग्यताया उपपादनीयत्वेन सन्निकर्षावश्यकत्वमुक्त्वा केवलयोग्यतापक्षेऽपि नानुपपत्तिरित्याह—योग्यतामात्रवादेऽपीति । घटादेरिव सर्वोऽपि धर्मः तैरभावस्याङ्गीक्रियते । एवञ्च अभावस्यैतान् धर्मान् प्रतिषिध्य शशशृङ्गादिवत् निरुपाख्यत्वरूपावस्तुत्वमेवाङ्गीक्रियतां, चाक्षुषत्वं वाऽङ्गीक्रियताम्; न तु अभावं वस्तुरूपमङ्गीकृत्य तस्यानैन्द्रियिकत्वाङ्गीकरणं

११ ] कत्व— nyāma-wit__kha
२० ] प्रति— nyāma-wit__ka

युक्तमित्यर्थः ॥

## अभावस्याप्रत्यक्षत्वे पूर्वोक्तयुक्तिनिराकरणम्

यदपि—

स्वरूपमात्रं दृष्ट्वाऽपि पश्चात् किञ्चित् स्मरन्नपि ।
तत्राम्यनास्तितां पृष्टः तदैव प्रतिपद्यते ॥ § 1014

इत्युक्तं—तदपि न युक्तम्—वस्त्वन्तरविविक्तगौरमूलकस्वरूपग्रहणसमय एव तत्रासन्निहितसकलपदार्थाभावग्रहणस्य मेचकबुद्ध्या सिद्धत्वात् इदानीं तद्गतगर्गाभावस्मरणं न तस्य परोक्षस्यानुभवः ॥

तथा हि—तदानीं गर्गस्तत्र नासीत् इत्येवं असौ स्मृत्वा सत्यवादी वदति, इदानीमस्तित्वनास्तित्वे प्रति संशेत एवासौ; गर्गस्य कुतश्चिदागतस्येदानीं तत्रास्तित्वसंभवात् ॥

ननु ! न पूर्वं सर्वाभावग्रहणमनुभूतवानसौ गौरमूलके इति चेत्—अननुभूयमानमपि तदस्य बलात् कल्प्यतेऽभ्यस्तविषयेऽविनाभावस्मरणवत् । तथा हि—तेन तेनानुयुक्तः तस्य तस्याभावं स्मृत्वोत्तरमसौ सर्वेभ्य आचष्टे ॥ स्वरूपमात्रमित्यादि । एतत्तात्पर्यं पूर्वमेव १३४ पुटे विवृतम् । इत्युक्तमिति । कुमारिलभट्टपादैः श्लोकवार्तिक इति शेषः । वस्त्वन्तरविविक्तेति । स्वरूपमात्रं इति श्लोकखण्डार्थानुवादः । मेचकबुद्ध्या— अप्रातिस्विकबुद्ध्या । एवञ्च सामान्यतो गौरमूलके निखिलाभावग्रहणं पूर्वमेव जातम्, यदा च प्रतियोगिविशेषोपस्थिति तदा विशिष्य तदभावस्मरणम् । निर्विशेषं न सामान्यम् इति न्यायात् । पूर्वं गौरमूलकगतत्वेन खलु अभावमयं व्यवहरति, न तु व्यवहारकालेऽपि तत्र गर्गस्यासत्त्वं प्रतिज्ञ तुं प्रभवति । एवञ्च पूर्वगृहीताभावस्मरणमेवेदमित्यर्थः ॥ § 1015

न पूर्वमनुभूतवानिति । पूर्वं गौरमूलके न हि सर्वाभावप्रत्यक्षं जातमित्यर्थः । अननुभूयमानं—अनुव्यवसायागम्यम् । तत्—सर्वाभावग्रहणम् । कथं अननुभूतस्य कल्पनं, न हि तदा निर्विकल्पकमासीत् । तस्य संस्काराहेतुत्वात् इत्यत्राह—अभ्यस्तेति । अनभ्यस्तविषये व्याप्तिस्मरण

ननु ! मेचकबुद्ध्या सकलाभावग्रहणे सहसैव सकलाभावस्मृतिरुपजायेत—मैवम्—यत्रैव प्रश्नादिस्मरणकारणमस्य भवति तदेव स्मरति, न सर्वमविद्यमानस्मरणनिमित्तम् । क्रमोपलब्धेष्वपि वर्णेषु युगपदन्त्यवर्णानुभवसमनन्तरं स्मरणम्, अन्यत्र तु युगपदुपलब्धेऽपि क्रमेण स्मरणं भविष्यतीति न मेचकबुद्धावयं दोषः ॥

किञ्च स्वरूपमात्रं दृष्टमिति वदता भवताऽपि मेचकज्ञानमभ्युपगतमेव;

---

११ ] दृष्ट्वा च— nyāma-wit__ga
२४--२५ ] स्मरति— nyāma-wit__kha
२५ ] एवास्य— nyāma-wit__ka
२७ ] मूलके— nyāma-wit__kha ; मूलके इति चेन्न— nyāma-wit__ka

मात्रग्रहणेन तदन्याभावग्रहणसिद्धेः । एवं हि भवानेवाभ्यधात्—

अयमेवेति यो ह्येष भावे भवति निर्णयः ।नैष वस्त्वन्त-
राभावसंवित्त्यनुगमादृते इति ॥§ 1017&

तस्मात् गौरमूलकावगमसमय एव तत्रासन्निहितस्य गर्गादेरभावग्रहणात् नेदानीं परोक्षाभावग्रहणमभावकारणकमभ्युपगन्तव्यमिति प्रत्यक्षगम्य एवायमभावः ॥ परिशीलनादिभिः विलम्बः संभाव्येत । असकृदभ्यस्तविषये हि अनुमितिरपि प्रत्यक्षवदेव शीघ्रं जायते । एवं प्रकृतेऽपि पूर्वज्ञानस्य शीघ्रमुपजातत्वेन नानुभवः । यथा हि भावविषयेऽपि कदाचित् रथ्यायां गच्छन् गर्गं पश्यन्नपि तदानीमेव नास्य तज्ज्ञानानुभवः, देशान्तरे च पुरुषान्तरेण किं गर्गः इतोऽगच्छत् ? इति पृष्टः तदानीं गर्गं किञ्चिच्चिन्तनया प्रतिसन्धाय आः सत्यं गतः इति प्रतिवदति । तदानीं गर्गस्मरणमेव, न त्वपूर्वानुभव इति सर्वैरास्थेयमेव । एवं अयं न्यायः तुल्यः अभावविषयेऽपि इति ॥
§ 1018

यत्रेत्यादि । भूतले यदा घटो गृह्यते, तदा तदितरयावत्प्रतियोगिकाभावः सामान्यतो गृह्यत एव । अत एव कालान्तरे तत्र पट आसीद्वेति प्रश्ने तदा पटस्य विशिष्य प्रतियोगिन उपस्थित्या विशिष्य पटाभावः स्मर्यते इतीदं सर्वानुभवसिद्धमेवेति । अत्र दृष्टान्तमाह—क्रमेति । व्यतिरेकदृष्टान्तोऽयम् ॥ § 1019

इदं तेषामप्यपरिहार्यमित्याह—किञ्चेति । अयमेवेति । अयमेवेति यः भावविषयक एष निर्णयः भवति, एष निर्णयः एवकारार्थत्वेन

**अभावस्यानुमेयत्वाभावः कुत्रचित्सम्मत एव**

यत्पुनरननुमेयत्वं इह घटो नास्ति इति प्रकृताभावविषयमभ्यधायि—तत् अस्माकमभिमतमेव ॥

कश्चित्पुनरसन्निकृष्टदेशवृत्तिरनुमेयोऽपि भवत्यभावः—यथा सन्तमसे सलिलधाराविसरसिक्तसस्यमूलमभिवर्षति देवे घनपवनसंयोगाभावोऽनुमीयते; यथा वा अर्थापत्तावुदाहृतं गृहाभावेन चैत्रस्य बाहेरभावकल्पनमिति ॥

आगमादप्यभावस्य क्वचिद्भवति निश्चयः ।
चोरादिनास्तिताज्ञानं अध्वगानामिवाप्ततः ॥ १५९ ॥§ 1022

---

९ ] गर्गाभाव— nyāma-wit__ka
११ ] अन्यत्र तु युगपदुप— nyāma-wit__kha
१५ ] तदन्यथा— nyāma-wit__ka
१७ ] मेव तयोश्चेष— nyāma-wit__ka
१७ ] वेश्च— nyāma-wit__kha
१७ ] ण— nyāma-wit__kha
० ] मतम्— nyāma-wit__kha
० ] स— nyāma-wit__ka
० ] क्तस्य, क्तस्य— nyāma-wit__ka

## प्रमाणप्रमेययोरानुरूप्यं न नियतम्

यत्पुनः—अनुरूपेण प्रमाणेन प्रमेयं प्रमीयते, प्रमेयत्वात्, भावात्मकप्रमेयवदिति—एतदप्यप्रयोजकं साधनम् ॥

अभावः पटलादीनां प्रत्यक्षस्य प्रपद्यते ।
विपक्षवृत्त्यभावश्च लिङ्गस्य सहकारिताम् ॥ १६० ॥ § 1024

पुरुषोक्तिषु दोषाणामभावश्चोपयुज्यते ।
सामग्र्यन्तर्गतात् तस्मात् अभावादपि भावधीः ॥ १६१ ॥ § 1026

वस्त्वन्तराभावग्रहणमन्तरा नैव भवति इत्यर्थः । एवञ्च स्वरूपमात्रं गृह्यते चेत् इतरत् किञ्चिदपि विशेषणं न गृहीतमेवेति मेचकबुद्ध्या यावदभावः गृह्यत एवेति ॥ § 1027

केषाञ्चिदभावानामनुमेयत्वस्याप्युत्तरत्र वक्ष्यमाणत्वात् सामान्यतः अभावानुमेयत्वनिरासः नाभ्युपगन्तुं शक्य इत्यतः—प्रकृतेति । अभिमतमेवेति । इह घटो नास्ति इति प्रतीतेः प्रत्यक्षत्वादित्यर्थः ॥ § 1028

सर्वथाऽनुमेयत्वसूचनाय—सन्तमस इति ॥ § 1029

पटलः—नेत्ररोगविशेषः । प्रत्यक्षस्येति । उत्तरार्धगतं सहकारितां इति पदमत्राप्याकर्षणीयम् । विपक्ष इति । विपक्षावृत्तित्वं हि लिङ्गस्याङ्गम् । वेदे दोषाप्रसक्तेः—पुरुषोक्तिष्विति । लौकिकपुरुषोक्तिष्वित्यर्थः । दोषाणां—विप्रलम्भकत्वादीनाम् । तस्मात्—

अभावश्च क्वचिल्लिङ्गमिष्यते भावसंविदः ।
वृष्ट्यभावोऽपि वाय्वभ्रसंयोगस्यानुमापकः ॥ १६२ ॥ § 1032

तस्माद्युक्तमभावस्य नाभावेनैव वेदनम् ।
न नाम यादृशो यक्षो वलिरप्यस्य तादृशः ॥ १६३ ॥ § 1034

इति अभावाख्यप्रमाणनिरसनम्

## बौद्धोक्ताभावनिराकरणप्रकारः

अत्र रक्तपटाः प्राहुः प्रमेये सति चिन्तनम् ।
युक्तं नाम प्रमाणस्य, तदेव त्वतिदुर्लभम् ॥ १६४ ॥ § 1036

अभावो नाम प्रतीयमानो न स्वतन्त्रतया घटादिभावस्वरूपवदनुभूयते, अपि तु देशकालप्रतियोगिविशिष्टत्वेन । तथा ह्येवं प्रतीतिः इदमिदानीमिह

० ] प्रत्यक्षं प्रतिपद्यते— nyāma-wit__kha

१ ] क्षे वृ— nyāma-wit__kha

नास्ति इति । स चेत्थमवगम्यमानोऽपि यदि तैः सम्बद्ध एव भवेदभावः, क एनं द्विष्यात् । न ह्यसौ तत्संबद्धः । न हि देशेन कालेन प्रतियोगिना सहास्य कश्चित् सम्बन्धः, संयोगसमवायादेरनुपपत्तेः । न च सम्बन्धरहितमेव विशेषणं भवति ॥

**विशेषणविशेष्यभावस्य सम्बन्धत्वनिराकरणम्**

ननु ! विशेषणविशेष्यभाव एव सम्बन्धः, किं सम्बन्धान्तरापेक्षया ?— मैवम्—सम्बन्धान्तरमूलकत्वेन तदवगमात् । संयुक्तं कारणात् । अभावेन भावानुमितौ दृष्टान्तमाह—वृष्टीति । अत्र गगनं, वाय्वभ्रसंयोगवत्, अत्र वृष्ट्यभावादिति । न नामेति । सर्वत्रेति शेषः ॥ § 1037

रक्तपटाः—बौद्धाः । प्रमाणस्य चिन्तनमित्यन्वयः । तदेव— अभावरूपं प्रमेयमेव । अतन्त्रतया—स्वतन्त्रतया । इदमिति प्रतियोगि, इदानीमिति कालः, इहेत्यनुयोगि चोच्यते । तैः—देशकालप्रतियोगिभिः । संयोगेति । द्रव्ययोरेव संयोगात्, अवयवावयव्यादीनामेव समवायादित्यर्थः ॥ § 1038

तदवगमात्—विशेषणविशेष्यभावावगमात् ॥ § 1039

I.146/KSV

समवेत वा विशषण भवति; दण्डी देवदत्तः, नीलमुत्पलमिति । अतश्च न वास्तवः स्वतन्त्र एव विशेषणविशेष्यभावः सम्बन्धः ॥ § 1040

पुरुषेच्छया विपर्यस्यन्तमप्येनं पश्यामः । विशेषणमपि विशेष्यीभवति, विशेष्यमपि विशेषणीभवतीति काल्पनिक एवायं सम्बन्धः, न वस्तुधर्मः ॥ § 1041

**अभावप्रतियोगिनोः प्रतियोगित्वं न सम्बन्धः**

प्रतियोगिना सह नतरामभावस्य सम्बन्धः, असमानकालत्वात् । यदा हि घटः, न तदा तदभावः; यदा वा तदभावः, न तदा घट इति ॥ § 1042

विरोधाख्यः सम्बन्धो भविष्यतीति चेत्, को विरोधार्थः ? यदि हि प्राक् सिद्धो घटाभावः आगत्य घटं विरुन्ध्यात् भवेदपि तद्विरोधी, घटमुद्गरयोरिव; न त्वेवमस्ति, तयोरसमानकालत्वात् । अभ्युपगमे वा घटतदभावयोः घटमुद्गरयोरिव वध्यघातुकयोः साहचर्यमनुभूयेत । घटाभावः किं कुर्वन् घटं विरुन्ध्यात् ? अकिञ्चित्करस्य विरोधित्वेऽतिप्रसक्तिः । अभावान्तरकरणे त्वनवस्था । मुद्गरादयो घटाभावस्य हेतवो न भवितुमर्हन्ति; भावस्य स्वत एव भङ्गुरत्वेन विनाशहेत्वनपेक्षत्वात् ॥ § 1043

---

११ ] घटाभाव— nyāma-wit__kha
६ ] ख्य— nyāma-wit__kha
७--८ ] न— nyāma-wit__ga
१० ] णत्वे— nyāma-wit__kha
११ ] थटस्य नाभावहेतवो भवितु— nyāma-wit__kha

एवं—विशेषणविशेष्यभावम् । घटवत् भूतलमित्यत्र हि घटो विशेषणं, भूतलं विशेष्यं; भूतले घट इत्यत्र तु घटो विशेष्यः, भूतलं विशेषणमिति विपर्यासो दृश्यते । एवं घटाभाववत् भूतलमित्यादावपीत्यर्थः ॥ § 1044

विरोधः—प्रतियोगिताऽपरपर्यायः । अभ्युपगम इति । समानकालिकत्वेत्यादिः । अतिप्रसक्तिः—पटाभावस्यापि घटेन साकं विरोधापत्तिः । ननु अभावं भावं करोति चेदुपलंभाद्यापत्तिः, अभावकरणे तु को दोषः ? इत्यत्र ह—अभावान्तरेति । ननु मुद्गरेण खलु घटध्वंसो जन्यते, तेन घटध्वंसमुद्गरयोः कार्यकारणभावो वाच्यः । असम्बद्धयोश्च कार्यकारणभावो न स्यात् । एवञ्च भावाभावयोः सम्बन्धः सिद्ध एव । अथ तयोः कार्यकारणभाव एव सम्बन्धः, नातिरिक्त इति चेत्—प्रतियोग्यभावयोरपि निरूपकनिरूप्य—भावादिरेव यः कश्चित्सम्बन्धोऽस्तु । भावाभावयोस्तु सम्बन्धः अभ्युपगत एव इति शङ्कायां तयोः कार्यकरणभाव एव नास्तीति, न प्रतियोग्यभावयोः सम्बन्धो युज्यत इत्याह—मुद्गरादय इति । भङ्गुरत्वेन—प्रतिक्षणं नश्यमानत्वेन ॥ § 1045

I.147/KSV

भावो विनश्वरात्मा चेत्, कृतं प्रलयहेतुभिः ।
अथाप्यनश्वरात्मा चेत्, कृतं प्रलयहेतुभिः ॥ १६५ ॥§ 1047

तस्माद्विजातीयकपालादिसन्ततिजनन एव मुद्गरादिकारकव्यापारः; सामग्र्यन्तरानुप्रवेशे सति सन्तत्यन्तरोत्पादः, न पुनरभावस्य ततो निष्पत्तिः । स हि घटात् वस्त्वन्तरं चेत् किमायातम् ? यदसौ न पूर्ववदुपलभ्यते । तद्विरोधित्वादिति चेत्, प्रत्युक्तमेतत् । अनर्थान्तरत्वे तु घटस्यैव मुद्गरकार्यत्वं स्यात् ॥ § 1048

### परिणामवाद्युक्ताभावस्वरूपनिराकरणम्

ननु ! यानि मुद्गरेण कपालानि जन्यन्ते, स एव घटाभावः । हन्त तर्हि कपालास्फोटने सति घटाभावस्य विनष्टत्वात् घटस्योन्मज्जनं प्राप्नोति ॥ § 1049

किञ्च अकिञ्चित्कराणि कपालानि घटस्याभाव इति यद्युच्यते, पटस्यापि तथोच्येरन् । किञ्चित्कारकत्वं तेषां पूर्ववत् प्रतिक्षेप्तव्यम् ॥ § 1050

भाव इति । घटादिः यद्यनित्यस्वभावः, तर्हि नाशोऽपि स्वतो भविष्यत्येव । यद्यविनाशस्वभावः, तदा मुद्गरादयो वा किं कुर्युः ? अत उभयथाऽपि न विनाशकारणापेक्षेत्यर्थः ॥ § 1051

४ ] रे— nyāma-wit__ka nyāma-wit__kha
७ ] ल— nyāma-wit__kha
१० ] किञ्च का—

तर्हि मुद्गरेण किं क्रियत इत्यत्राह—तस्मादिति । विजातीयेति । घटसन्तानात् विलक्षणस्य कपालसन्तानस्य जनन एव मुद्गरोपयोग इत्यर्थः । सः—घटनाशः । किमायातमिति । घटवत् घटनाशाख्यं स्वतन्त्रं वस्त्वन्तरं जातं चेत्, उभयमप्युपलभ्यतां कामम् । विरोधित्वान्नोभयोपलब्धिरिति चेत्, सः अनुपदमेव निरस्तः । घटनाशस्य घटादनर्थान्तरत्वे घटनाशको मुद्गरो घटहेतुः स्यात् । अतो नाशः न स्वतन्त्रः कश्चित्पदार्थः ॥ § 1052

ननु घटस्य ध्वंसो नाम कपालावस्थाप्राप्तिरेव । सा च भवद्भिरप्यङ्गीकृता, एवञ्च कुतो विवादः ? इत्याशङ्कते—नन्विति ॥ समाधत्ते—हन्तेति । कपालावस्थैव यदि घटध्वंसरूपा, तर्हि कपालस्य नाशे घटध्वंसस्यापि नाशात् पुनर्घटोन्मज्जनं स्यात् । वयं तु ध्वंसमेव नाङ्गीकुर्म इति नास्माकं दोष इत्यर्थः ॥ § 1053

अकिञ्चित्कराणि—अनिरूपकाणीति यावत् । तथा—नाशत्वेन ॥ § 1054
I.148/KSV

## अभावस्वरूपानुपपत्तिः

अपि चायमभावो भवनधर्मा वा स्यात् ? अभवनधर्मा वा ? भवनधर्मत्वे भावोऽसौ भवेत्, घटादिवत् । अभवनधर्मा तु यद्यभावोऽस्ति, स नित्य एवासौ तर्हि भवेत् ॥ § 1055

## अभावस्य सप्रतियोगिकत्वनिरासः

स चायमेकपदार्थसम्बन्धी वा स्यात् ? सर्वपदार्थसम्बन्धी वा ? तत्र एकभावसम्बन्धित्वे न तस्य नियमकारणमुत्पश्यामः । सर्वभावसम्बन्धित्वे तु सर्वपदार्थप्रतिकूलस्याभावस्य नित्यत्वात् नित्यसन्निहितत्वात् सकृदेव त्रैलोक्यलोपप्रसङ्गः । तस्मात् न नित्योऽनित्यो वा कश्चिदभावो नामास्ति ॥ § 1056

## अभावानभ्युपगमेऽपि न साङ्कर्यम्

ननु ! अभावानभ्युपगमे भावानामितरेतरसङ्करात् अखिलव्यवहारविप्लवः प्राप्नोति । यदाह— § 1057

क्षीरे दधि भवेदेवं दध्नि क्षीरं घटे पटः ।

३--४ ] नित्यस्सन्नित्यो वा कश्चि— nyāma-wit__kha

३ ] तत्वे सति— nyāma-wit__ka

शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्तिरात्मनि ॥ इति
॥§ 1059

प्रकारान्तरेणाभावं निराकरोति—स चेति। अभावः किं एकप्रतियोगिकः ? उत सर्वप्रतियोगिकः ? आद्ये—विनिगमनाविरहः, द्वितीये—सकृदेव सर्वाभावस्य सिद्ध्या त्रैलोक्यनिवृत्तिप्रसङ्ग इति भावः । अनित्यो वेति । अनित्यत्वे हि सार्वत्रिकस्य अभावव्यवहारस्य विलोपप्रसङ्ग इति भावः ॥
§ 1060

इतरेतरसाङ्कर्यमेवाह—क्षीर इत्यादि । श्लोकवार्तिकोऽयम् । अतिरिक्ताभाववादिशान्तरक्षितविरचिततत्त्वसङ्ग्रहेऽपि अयमर्थः प्रकारान्तरेण दृश्यते। यद्यभावाख्यः कश्चन पदार्थो न स्यात् तदा जगति विरोध एवोपपादयितुमशक्यः । विरोधस्याभावरूपत्वात् । एवञ्च विरोधाभावे च सर्वं सर्वरूपं स्यात्। क्षीरे हि दध्नः प्रागभावो वर्तते, यदि प्रागभावो न स्यात्, क्षीरे दधि स्यात्। एवं दध्नि क्षीरध्वंसो वर्तते, यदि ध्वंसो न स्यात्, तर्हि दध्न्यपि क्षीरं स्यात्। एवं घटे पटान्योन्याभावो वर्तते, यदि अन्योन्याभावो न स्यात्, तर्हि घटोऽपि पटः स्यात्। एवं शशे शृङ्गाभावो वर्तते, यद्यत्यन्ताभावो न स्यात्, तर्हि शशेऽपि शृङ्गं स्यात्। अतः भावानां साङ्कर्यवारणायाभावः अवश्यमङ्गीकरणीयः इति ॥ § 1061
I.149/KSV

अभावाभ्युपगमे तु भावानामिंतरेतराभावात् असङ्कीर्णता सेत्स्यति—तदेतदसाधु—स्वत एव भावानामसङ्कीर्णस्वभावत्वात् ॥ § 1062

अभावकारणकसङ्करपरिहारकथने तु सुतरां विप्लवः— § 1063

भावो भावादिवान्यस्मात् अभावांशादपि ध्रुवम् ।
असङ्कीर्णोऽभ्युपेतव्यः स कथं वा भविष्यति ? ॥ १६६
॥§ 1065

अन्योन्यमप्यभावानां यद्यसङ्कीर्णता स्वतः ।
भावैः किमपराद्धं वः, परतश्चेत्, कुतो नु सा ? ॥ १६७
॥§ 1067

भावेभ्यो यद्युपेयेत भवेदन्योन्यसंश्रयम् ।
अभावान्तरजन्या चेत् अनवस्था दुरुत्तरा ॥ १६८ ॥§ 1069

---

८ ] मा— nyāma-wit__ka
१--२ ] भावादसङ्कीर्ण— nyāma-wit__kha
६ ] मपि— nyāma-wit__kha
७ ] वा— nyāma-wit__kha

अभावस्वभावतायाश्च सर्वान् प्रत्यविशेषात् प्रतिषेध्यनिबन्धन एव तद्भेदः । प्रतिषेध्याश्च भावाः परस्परेण भिद्यमानास्तं भिन्दन्तीति प्रत्युत भावाधीनमभावानामसाङ्कर्यं वक्तुमुचितम्, न तु विपर्ययो युक्तः । तत् अखिलपदार्थव्यवस्याविसंष्ठुली भावभयादपि नाभावाभ्युपगमो युक्तः ॥ § 1070

भाव इत्यादि । घटादिर्भावः अन्यस्मात् पटादिभावात् भिद्यते, तथा अभावादपि स भिद्यत एवेति वक्तव्यम्, अन्यथा भावाभावयोः साङ्कर्यप्रसङ्गः । अभावप्रतियोगिकान्योन्याभावाङ्गीकारे त्वनवस्था किञ्च घटाभावः पटाभावाद्भिद्यत एव । तयोरन्योन्याभावाङ्गीकारादनवस्था । यदि अभावस्थले अन्योन्याभावमन्तरा स्वत एव भेदव्यवहारनिर्बाहः, तर्हि भावयोरपि तथैव स्वतः असङ्कीर्णव्यवहारोऽस्तु । यद्यभावयोः परस्परभेदः प्रतियोगिभूतघटपटादिभेदादेव सिद्ध्यतीत्युच्यते—तर्ह्यन्योन्याश्रयः भावयोः घटपटयोः भेदो हि अभावात् सिद्ध्यति, अभावयोस्तु भावात् सिद्ध्यतीति । अतः स्वलक्षणस्वभावानां भावानां भेदः स्वत एवास्त्विति नातिरिक्ताभावसिद्धिः इत्यर्थः ॥
§ 1071

प्रत्युत विपर्यय एवेत्याह—अभावेति । प्रतियोगिनिरूप्या ह्यभावाः प्रतियोगिभेदादेव परस्परविलक्षणा वाच्याः, अभावानां निराकारत्वात् । प्रतियोगिनस्तु घटपटादयो विलक्षणाः स्वतः प्रत्यक्षत एव सिद्धाः । अतः अभावानां साङ्कर्यवारणाय भावा अङ्गीकार्या इति कथनं युज्येतापि, न तु भावानां असाङ्कर्याय अभावोऽङ्गीकार्य इति भावः ॥ § 1072

I.150/KSV

## अतिरिक्ताभावानभ्युपगमपक्षे नञर्थः

नन्वभावप्रतिक्षेपे नञः किं वाच्यं ? उच्यताम् ।
नैव शब्दानुसारेण वाच्यस्थितिरुपेयते ॥ १६९ ॥ § 1074

बौद्धाः खलु वयं लोके सर्वत्र ख्यातकीर्तयः ।
विकल्पमात्रशब्दार्थपरिकल्पनपण्डिताः ॥ १७० ॥ § 1076

क्वचिन्नामपदप्राप्तवृत्तिना जन्यते नञा ।
निषेधपर्युदस्तान्यविषयोल्लेखिनी मतिः ॥ १७१ ॥ § 1078

क्वचित्त्वाख्यातसम्बन्धमुपेत्य विदधात्यसौ ।
तदुपात्तक्रियाऽऽरंभनिवृत्त्युल्लेखमात्रकम् ॥ १७२ ॥ § 1080

६ ] त्म— nyāma-wit__kha

## अभावानभ्युपगमेऽप्येकादशविधानुपलब्धिनिर्वाहः

ननु ! चानेन मार्गेण यद्यभावो निरस्यते ।
एकादशप्रकारैषाऽनुपलब्धिः क्व गच्छतु ॥ १७३ ॥§ 1082

१. स्वभावानुपलब्धिर्यथा—नेह घटः, अनुपलब्धेः—इति ॥ § 1083

बौद्धाः खलु वयमिति । बुद्ध्या परिकल्पितेन वस्तुनैव व्यवहारं निर्वहामः । अतो वयं बौद्धाः । अतः सर्वस्यापि शब्दस्यार्थः वास्तविक एवेति न नियमः । एवञ्च अभ वाख्यवस्तुन अभावेऽपि नञ्व्यवहारो युज्यत एवेत्यर्थः । एतदेवाह—क्वचिदित्यादि । नञर्थो हि द्विविधः; पर्युदासः, प्रतिषेधश्च । तत्र पर्युदासे—न घटः पटः इत्यादौ हि अन्योन्याभावो भासते । स च परस्परापोहरूप एवेति नातिरिक्तः । प्रतिषेधे—चैत्रः कटं न करोति इत्यादौ च क्रियानिवृत्तिरेव बोध्यते । सा च स्वरूपमेव कुत्रचित्, कुत्रचिच्च वस्त्वन्तररूपेति न ततोऽप्यभावसिद्धिरिति ॥ § 1084

एकादशप्रकारेति । न्यायबिन्द्वादौ धर्मकीर्त्याद्युक्तेत्यर्थः । धर्मोत्तराचार्यैश्चेमा अनुपलब्धयः विशदं व्याख्याताः ॥ § 1085

अत्र स्वभाव इत्यादौ प्रतिषेध्यस्य इत्यादिः । प्रतिषेध्यस्य यः स्वभाव इति । एवमेवोत्तरत्रापि । इह इति पक्षः, न घट इति साध्यः, अनुपलब्धेरिति हेतुः । धूमवह्न्योरिव घटस्य स्वेन साकं कार्यकारणभावाभावात् स्वभावानुपलब्धिः ॥ § 1086
I.151/KSV

२. कारणानुपलब्धिर्यथा—नात्र धूमः, दहनानुपलब्धेः—इति ॥ § 1087

३. व्यापकानुपलब्धिर्यथा—नात्र शिंशपा, वृक्षानुपलब्धेः— इति ॥ § 1088

४. कार्यानुपलब्धिर्यथा—नात्र निरपवादा धूमहेतवः सन्ति, धूमानुपलब्धेः—इति ॥ § 1089

५. स्वभावविरुद्धोपलब्धिर्यथा—नात्र शीतस्पर्शः, पावकोपलब्धेः—इति ॥ § 1090

६. स्वभावविरुद्धकार्योपलब्धिर्यथा—नात्र शीतस्पर्शः, धूमोपलब्धेः—इति ॥ § 1091

७. विरुद्धव्याप्तोपलब्धिर्यथा—न ध्रुवभावी भूतस्यापि भावस्य विनाशः, हेत्वन्तरापेक्षणात्—इति ॥ § 1092

८. कार्यविरुद्धोपलब्धिर्यथा—नात्र शीतकारणमप्रतिबद्धसामर्थ्यमस्ति, ज्वलनोपलब्धेः—इति ॥ § 1093

---

९ ] बदि— nyāma-wit_kha
२ ] नात्र शीतस्पर्शः पावकोप— nyāma-wit_kha
६--८ ] धूमोपलब्धेः— nyāma-wit_ka
१० ] अध्रुव— nyāma-wit_kha

९. व्यापकविरुद्धोपलब्धिर्यथा—नात्र तुहिनस्पर्शः, कृशानुदर्शनात्—इति ॥ § 1094

द्वितीये—धूमं प्रति दहनस्य कारणत्वात् कारणानुपलब्धिः ॥ § 1095

तृतीये—शिंशपापेक्षया वृक्षः व्यापकः ॥ § 1096

चतुर्थे—धूमकारणानां धूमः कार्यः । कारणे सति कार्येण भवितव्यमेवेति न निर्बन्धः, प्रतिबन्धकाद्यपवादे सति कार्यानुत्पत्तेः । अतः अप्रतिबद्धसामर्थ्यानि इति न्यायबिन्दूक्तमेव निरपवादाः इत्युक्तम् ॥ § 1097

पञ्चमे—शीतस्पर्शविरुद्धत्वं पावकस्य ॥ § 1098

षष्ठे—स्वभावविरुद्धस्य वह्नेः कार्यः धूमः ॥ § 1099

सप्तमे—ध्रुवभावित्वविरुद्धेन अध्रुवभावित्वेन हेत्वन्तरापेक्षणं व्याप्तम् । एतद्विचारः क्षणभङ्गे भविष्यति ॥ § 1100

अष्टमे—शीतकारणस्य यत् कार्यं शीतस्पर्शादि, तद्विरुद्धः ज्वलनः ॥ § 1101

नवमे—तुहिनस्पर्शव्यापकशीतस्पर्शविरुद्धः कृशानुः ॥ § 1102
I.152/KSV

१०. कारणविरुद्धोपलब्धिर्यथा—नैतस्यरोमहर्षदन्तवीणादिविशेषाः सन्ति, सन्निहितहुतवहविशेषात्—इति ॥ § 1103

११. कारणविरुद्धकार्योपलब्धिर्यथा—प्रवृत्तदन्तवीणादिविशेषपुरुषाधिष्ठित एष देशो न भवति, धूमवत्त्वात्—इति ॥ § 1104

सत्यम्, एकादशविधाऽनुपलब्धिरिहेष्यते ।
सा त्वसद्व्यवहारस्य हेतुः नाभावसंविदः ॥ १७४ ॥§ 1106

## अनुपलब्धेः स्वभावहेतावन्तर्भावो युज्यते

ननु ! अनुपलब्धेः स्वभावहेतावन्तर्भाव उक्तः, स्वभावहेतौ च साध्यसाधनयोरव्यतिरेक इष्यते । असद्व्यवहारश्च ज्ञानाभिधानात्मकत्वात् तत एव पृथमिति कथं तद्विषयतां यायात्—सत्यमेवम्— किन्तु नासद्व्यवहारस्तया साध्यते, अपि तु तद्योग्यता । योग्यता च न ततोऽर्थान्तरमिति न स्वभावहेतुत्वहानिः ॥ § 1107

दशमे—रोमहर्षादिकारणशीतस्पर्शविरुद्धः हुतवहः ॥ § 1108

एकादशे—दन्तवीणादिकारणविरुद्धस्य वह्नेः कार्यभूतः धूमः ॥ § 1109

२९ ] वहाधिष्ठित— nyāma-wit__kha
२९ ] षत्वात्— nyāma-wit__ka
३१ ] एव— nyāma-wit__ka
४ ] श्चा— nyāma-wit__ka
५--६ ] स्साध्यते— nyāma-wit__ka

एकादशविधानुपलब्धिः असद्यवहारस्य हेतुरिष्यत इत्यन्वयः । अभावसंविदः—अभावाख्यप्रमेयनिर्णयस्य । बौद्धमते असद्यवहारस्येष्टत्वात् व्यवहारमात्रात् नार्थसिद्धिरित्यर्थः ॥ § 1110

अन्तर्भाव इति । यद्यपि धर्मकीर्तिना हेतुबिन्दौ त्रीण्येव च लिङ्गानि, अनुपलब्धिः स्वभावकार्ये चेति इति अनुपलब्धिः पृथगुक्ता; अथापि उत्तरत्र तत्रैव अत्र द्वौ वस्तुसाधनौ, एकः प्रतिषेधहेतुः इत्युक्तम् । तेनैव प्रमाणवार्तिकेऽपि स्वभावकार्यसिद्ध्यर्थं इत्यादिना हेतुद्वैविध्यं प्रतिपाद्य हेतुस्वभावव्यावृत्त्यैवार्थव्यावृत्तिवर्णनात् । सिद्धोदाहरणेत्युक्ताऽनुपलब्धिः पृथक् न तु इत्युक्तम् । तदनुयायिना मोक्षाकरगुप्तेनाऽपि तर्कभाषायां; प्रथमं लिङ्गत्रैविध्यमुक्त्वा ननु ! यद्यनुपलब्धेरपि तादात्म्यतदुत्पत्ती एव सम्बन्धौ, कथं तर्हि कार्यस्वभावाभ्यामनुपलब्धेर्भेदः ? प्रतिषेधसाधनात् भेदः, न वस्तुतः इत्युक्त्वा पूर्वोक्तधर्मकीर्तिवाक्यमेव प्रमाणतयोपन्यस्तमिति ज्ञेयम् । तद्योग्यता—व्यवहारयोग्यता । ततः—वस्तुस्वभावात् ॥ § 1111

I.153/KSV

ननु ! योग्यता भावात्मिका, अनुपलब्धिस्स्वभावस्वभावेति कथमनर्थान्तरत्वम् ?—नैतदेवम्—न ह्युपलब्धिप्रतिषेधात्मिकामभावस्वभावामनुपलब्धिमनुपलब्धिविदो वदन्ति, किन्तु प्रतिषेधपर्युदस्तवस्त्वन्तरोपलब्धिमेवार्थाभावस्वभावामिति ॥ § 1112

अत एवेदमपि न चोद्यम्—अनुपलब्धेरभावात्मकत्वात् अनुपलब्ध्यन्तरपरिच्छेद्यत्वादनवस्थेति; यस्मात् वस्त्वन्तरोपलंभात्मिकाऽनुपलब्धिः स्वसंवेद्यैवेति ॥ § 1113

### अनुपलंभमात्रात् न अतीन्द्रियाणां अभावव्यवहारः सिद्ध्येत्

ननु ! अनुपलब्धेः असद्यवहारसिद्धौ अदृश्यस्यापि तथात्वं सिद्ध्येत्—न—दृश्यत्वविशेषणोपादानादुपलब्धिलक्षणप्राप्तस्यानुपलब्धेरसद्यवहारः, न यस्य कस्य चिदिति । तत्र— § 1114

घटादेः पूर्वदृष्टस्य दृश्यत्वपरिनिश्चयात् ।
असत्त्वव्यवहारो हि सिद्ध्यत्यनुपलब्धितः ॥ १७५ ॥§ 1116

एकान्तानुपलब्धेषु विहायःकुसुमादिषु ।
दृश्यत्वयोग्यतायोगात् असत्त्वपरिनिश्चयः ॥ १७६ ॥§ 1118

---

२५ ] जानन्ति— nyāma-wit__ka
१ ] अदृष्ट— nyāma-wit__kha
४ ] ऽनवधारणात्— nyāma-wit__kha ---Note : उत्तरपुटे.
७ ] त्वा— nyāma-wit__ga

अनर्थान्तरत्वं—भावरूपाया योग्यताया इति शेषः । प्रतिषेधेत्यादि । प्रतिषेधेन पर्युदस्तं व्यावर्तितं यत् वस्त्वन्तरं तदुपलब्धिमेव पूर्ववस्त्वभावस्त्वभावामित्यर्थः । केवलभूतलोपलंभ एव अभावोपलंभ इति भावः ॥ § 1119

स्वसंवेद्यैवेति । उपलम्भस्य ज्ञानरूपत्वेन तस्य स्वप्रकाशत्वादित्यर्थः ॥ § 1120

अदृश्यस्य—अतीन्द्रियस्य पिशाचादेः । दृश्यत्वविशेषणेति । तथोक्तं हेतुबिन्दौ प्रतिषेधसिद्धिरपि यथोक्ताया एवानुपलब्धेः इति । व्याख्यातं च धर्मोत्तराचार्येण—प्रतिषेधव्यवहारस्य सिद्धिः यथोक्ता यादृश्यनुपलब्धिः तत एव भवति इति ॥ § 1121

तदानीमदृश्यत्वाविशेषेऽपि घटगगनकुसुमपिशाचाद्यभावानां विशेषानाह—घटादेरित्यादि । कालान्तरे दृष्टस्यैव घटादेः इदानीमनुपलंभादिदानीमसत्त्वमात्रं निश्चीयते, न तु सर्वदाऽसत्त्वम् । गगनकुसुमादेस्तु

पिशाचादेस्तु दृश्यत्वनिश्चयोऽनवधारणात् ।
न शक्योऽनुपलम्भेन कर्तुं नास्तित्वनिश्चयः ॥ १७७ ॥§ 1124

तत्रापि त्वपिशाचोऽयं चैत्र इत्येवमादिषु ।
तादात्म्यप्रतिषेधेषु दृश्यत्वं नोपयुज्यते ॥ १७८ ॥§ 1126

पिशाचेतररूपो हि चैत्रः प्रत्यक्षगाचरः ।
तादूप्यनिश्चये तस्य किं फलं तद्विशेषणम् ॥ १७९ ॥§ 1128

इत्यसद्व्यवहारस्य सिद्धेरनुपलब्धितः ।
न भाववदभावाख्यं प्रमेयमवकल्पते ॥ १८० ॥§ 1130

**बौद्धमतप्रतिक्षेपः**

अत्राभिधीयते—इदं तावत्सकलप्राणिसाक्षिकं संवेदनद्वयमुपजायमानं दृष्टं इह घटोऽस्ति इह नास्ति इति । तत्र विकल्पमात्रसंवेदनमनालम्बनम् ? आत्मांशावलम्बनं वा ? इत्यादि यदभिलप्यते, तत् नास्तित ज्ञान इव अस्तिताज्ञानेऽपि समानम् । अतो द्वयोरपि प्रामाण्यं भवतु ! द्वयोरपि वा मा भूत् !

यत्तु—अस्तीति ज्ञानं प्रमाणम् इतरत्त्वप्रमाणमिति कथ्यते— तदिच्छामात्रम् । अस्तीतिज्ञानसमानयोगक्षेमत्वे च नास्तीतिज्ञानस्य विषयश्चिन्तनीयः ॥ सर्वदाऽनुपलम्भात् सर्वदाऽसत्त्वं निश्चीयते । पिशाचादेस्तु अस्मादृशैरनुपलंभेऽपि मांत्रिकयोगिप्रभृतिभिरुपलंभात् अनुपलंभमात्रान्न नास्तित्वं निश्चेतुं शक्यम् । एवमत्यन्ताभावस्थल एव प्रतियोगिदृश्यत्वमपेक्षितम्, अन्योन्याभावस्थले तुअनुयोगियोग्यत्वमेव । यथा चैत्रः पिशाचो न

१७ ] ---Note : पूर्वपुटात्.

इत्यादौ हि पिशाचस्यादृश्यत्वेऽपि तद्भेदः चैत्रे सर्वैः गृह्यत एवेति सङ्क्षेपः ॥ § 1131

विकल्पेत्यादि । अनालम्बन एव विकल्पः सर्वोऽपीति माध्यमिकाः, आत्मावलम्बन इति योगाचाराः । आत्मशब्दः स्वशब्दपर्यायः, नैरात्म्यवादिनो हि ते । स्वशब्दश्च संवेदनपरामर्शी । विषयस्य बाह्यत्वात् आत्मांशेत्युक्तम् । परन्तु अस्ति नास्ति इति ज्ञानद्वयमपि विकल्परूपमेव । एवं सति अस्ति इति प्रतीतिविषयः कल्पितो वाभावः अङ्गीक्रियते, नास्ति इति प्रतीतिविषय अभावः परं नेत्यतिविचित्रमेतदिति ॥ § 1132
I.155/KSV

## न भूतलमात्रं अभावः

ननु ! घटविविक्तभूतलोपलम्भभावे घटानुपलम्भ इत्युक्तम्— तदयुक्तम्—केयं घटविविक्तता ? सा भूप्रदेशादभिन्ना ? भिन्ना वा ? अभेदे भूप्रदेशाविशेषात् घटसन्निधानेऽपि घटो नास्ति इति प्रतिपत्तिर्जायेत । भेदेऽपि नाम्नि विवादः स्यात् ॥ § 1133

भेदाभेदेन चिन्त्या च घटादपि विविक्तता ।
अभेदे घट एव स्यात् भेदे चाभाव एव सा ॥ १८१ ॥§ 1135

तत् इह घटो नास्ति इति घटविविक्तभूतलालम्बनतायामस्याः संविदः, इह इति तावदस्मिन् संविदंशे देश आलम्बनमित्यविवाद एव, इह घटोऽस्ति इति भावप्रतीतिसमयेऽपि तत्र तदवभासाभ्युपगमात् । घटो नास्ति इत्यत्र तु यदवभासते, तत् न भूतलमात्रमेव; भावप्रतीतिसमयवत् तदतिरिक्तप्रतिभास- § 1136

पूर्वोक्तं १५३ पुटे आक्षिपति—नन्विति । विविक्तता, राहित्ये, कैवल्यं वा । घटविविक्तं भूतलमित्यत्र घटविविक्तताख्यः कश्चन धर्मः भूतले अङ्गीक्रियते उत नेति विकल्प्य, द्वितीये उभयोरभेदे घटकालेऽपि घटविविक्ततारूपभूतलसत्वात् घटो नास्ति इति व्यवहारापत्तिः; यदि च स अतिरिक्तो धर्मः तर्हि सिद्धः भूतलातिरिक्तः अभाव इत्याह—केयमित्यादिना ॥ § 1137

प्रकारान्तरेणापि विकल्प्य दूषयति—भेदाभेदेनेति । घटात्, तद्विविक्तता, अतिरिक्ता ? न वा ? आद्ये अभावसिद्धिः । द्वितीये घट एव घटाभावरूपः स्यात् । न चेष्टापत्तिः; तर्हि घटे सत्येव घटाभावप्रतीत्यापत्तिः । भेदाभेदपक्षस्तु व्याहत एवेत्याशयः ॥ § 1138

५ ] इह— nyāma-wit__ka
६ ] द्वयमपि— nyāma-wit__ka
२१ ] आ— nyāma-wit__ka
१ ] प्रतीति— nyāma-wit__ka
१ ] यं— nyāma-wit__kha

इह घटो नास्ति इत्यस्याः संविदः घटविविक्तभूतलालम्बनतायां सिद्धायामित्यन्वयः । इह इत्यस्य देशालम्बनत्वे प्रमाणं दर्शयति— इह घटोऽस्तीति । तदवभासेति । देशप्रतिभानेत्यर्थः । भावप्रतीतिसमयवविति इह घटः इत्यत्र यथा इहशब्दार्थापेक्षया घटशब्दार्थः पृथग्भूतः, तथा इह न घटः इत्यत्रापि इहशब्दार्थापेक्षया न घट इत्यंशः अतिरिक्त एवेति भावः ॥ § 1139

I.156/KSV

स्यावश्यभावित्वात् । तदतिरिक्तं तु प्रतिभासमानं घटविविक्ततेति वा कथ्यतां, घटाभाव इति वा ! नात्र वस्तुनि विशेषः ॥ § 1140

## अभावप्रतीतिर्न मिथ्या

ननु ! घटो नास्ति इति विकल्पमात्रमेतत्—न—दर्शनानन्तरप्रवृत्तत्वेन विधिविकल्पतुल्यत्वात् ॥ § 1141

यथाऽनुभवमुत्पत्तुमर्हन्ति किल कल्पनाः ।
प्रतिषेधविकल्पस्तु न विध्यनुभवोचितः ॥ १८२ ॥§ 1143

## अभावविकल्पाः भावविकल्पतुल्या एव

ननु ! नैव विकल्पानां वयं प्रामाण्यवादिनः ।
कामं विधिविकल्पानामपि मा भूत् प्रमाणता ॥ १८३ ॥§ 1145

प्रामाण्यं दर्शनानां चेत् त्वधिकल्पानुसारतः ॥ १८४ ॥§ 1146

वस्तुप्राप्त्या विधिविकल्पानां प्रमाणव्यवहार इति चेत्, इहापि तत्प्राप्त्यैव निषेधविकल्पानामस्तु प्रामाण्यव्यवहारः । किमत्र वस्तु प्राप्यत ? इति चेत्, तत्रापि—किं प्राप्यते ? नीलमिति चेत् ! § 1147

प्रवृत्तन्वेन—उत्पन्नत्वेन । ननु कथमुभयोस्तौल्यम् ? घटोऽस्तीति विकल्पः अन्यः, अन्यश्च घटो नास्तीति—इति शङ्कायामाह—यथेति । यद्यपि प्रतिषेधविकल्पः, विधिविकल्पश्च विषयतो विलक्षण एव । अथाऽपि घटपटविकल्पयोरिव अनुभवत्वेन तौल्यमप्यनुभवसिद्धमेवापलपितुमशक्यमिति भावः ॥ § 1148

नन्विति । तथा च प्रतिषेधविकल्पाः अर्थशून्या इत्यर्थः । समाधत्ते— काममिति । तथा च नीलादिकमपि न सिद्ध्येदित्यर्थः । शङ्कते— प्रामाण्यमिति । निर्विकल्पपृष्टभावित्वात् विधिविकल्पानां न प्रतिषेधविक-

२६ ] कथं— nyāma-wit_ka
१ ] तदि— nyāma-wit_ga

ल्पतौल्यमिति चेत्—प्रकृतेऽपि स समाधिः कुतो न स्यादिति समाधत्ते—इहापीति ॥ § 1149

ननु विधिविकल्पैः प्रवर्तमानः घटादिकं वस्तु प्राप्नोतीति युक्तं विधिविकल्पानां प्रामाण्यमिति शङ्कते—वस्तुप्राप्त्येति । तत् प्रकृतेऽपि तुल्यमित्याह—इहेति । अत्र—अभावविकल्पाधीनप्रवृत्तिस्थले । तत्र—भावविकल्पाधीनप्रवृत्तिस्थले । नीलं—घटादि । ननु केयमभावप्राप्तिः ? को वा

सेयमभावस्यापि प्राप्तिर्भवत्येव । नीलं हि प्राप्यमाणं तदभावाविनाभूतपीतादिव्यवच्छिन्नरूपं प्राप्यते । सा चेयं तथाभूतनीलप्राप्तिर्भवन्ती इतराभावप्राप्तिरपि भवति, अन्यथा हि नीलयाप्तिरेव न स्यादिति । एतच्च लाक्षणिकं विरोधमाचक्षाणैर्भवद्भिरेवोपगतम् ॥

सुखदुःखसमुत्पत्तिरभावे शत्रुमित्रयोः ।
कण्टकाभावमालक्ष्य पदं पथि निधीयते ॥ १८५ ॥ § 1152

प्रागुत्पत्तेर्घटाभावं बुद्ध्वा तत्कारणादरः ।
व्याध्यभावपरिच्छेदात् भेषज्यविनिवर्तनम् ॥ १८६ ॥ § 1154

इहाभावप्रतिष्ठानव्यवहारपरम्पराम् ।
पश्यन् अभावं को नाम विह्नुवीत सचेतनः ॥ १८७ ॥ § 1156

## अभावः न निरुपाख्यः

ननु ! नाजनकमालम्बनं भवति ज्ञानस्य । अभावस्तु सकलोपाख्यविनिर्मुक्तस्वरूप इति न ज्ञानजननपटुः । अतः कथं तदालम्बनम् ? उच्यते—सौगतानां तावत् न किञ्चिज्ज्ञनकं वस्तु प्रतिभासते । द्वित्रिक्षणावस्थितिप्रसङ्गेन क्षणभङ्गव्रतविलोपप्रसङ्गात् । अभावप्राप्तये यतते ? इत्यत्रानुभवं प्रमाणयति—नीलं हीति । अन्यथा—यदि नीलप्राप्तिः पीताद्यभावप्राप्तिरूपा न स्यात्, तर्हि नीलार्थं प्रवृत्तः पीतप्राप्तावपि तृप्येतेत्यर्थः । लाक्षणिकं विरोधमिति । लक्षणवाक्येष्वपि हि कल्पनाऽपोढं अभ्रान्तं इत्यादिपदैः लक्षणमपीतरव्यावृत्तिरूपमभ्युपगतमेव । एवञ्च सिद्धः इतरेतराभाव इत्यर्थः ॥ § 1157

अभावानां भाववदेवार्थक्रियाकारित्वमप्यनुभवसिद्धमित्याह—सुखेत्यादि । शत्र्वभावः सुखकारणं, मित्राभावः दुःखकारणमित्यन्वयः । सचेतनः—विवेकी ॥ § 1158

ननु ! लक्षणं इतरव्यावृत्तिरूपमेव । परन्तु व्यावृत्तेः तुच्छत्वेन न पदार्थत्वमिति शङ्कते—नन्विति । ज्ञानस्य अजनकं ज्ञानस्यालंबनं न भवतीत्यन्वयः । अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययेषु आलम्बनप्रत्ययः विषयः, स एव ज्ञानजनक इति तन्मतम् । क्षणिकवादे जन्यजनकभाव

१९ ] मैव— nyāma-wit__ka

एवानुपपन्न इति, कथं ज्ञानजनकत्वमर्थानामित्याह—उच्यत इत्यादिना । द्वित्रीति । कार्यक्षणे कारणसत्वस्यावश्यकत्वादिति भावः । उत्पत्त्यपेक्षया द्विक्षणत्वं,

उत्पद्यते च, अर्थज्ञानं च जनयति, जातेन तेन गृह्यते च—इत्यासां क्रियाणामेककालत्वाभावात् । तस्मात् अकारक एव भावः प्रतिभासते ॥

आकारार्पणपक्षं च प्रतिक्षेप्स्यामः । एवं भाववदभावोऽप्यजनकः प्रतिभासताम् ॥

अस्माभिस्तु भाववदभावोऽपि ज्ञानजननसमर्थ इष्यते । न हि निश्लेषसामर्थ्यरहितत्वमभावलक्षणम्; अपि तु नास्तीतिज्ञानगम्यत्वम् । सत्प्रत्ययगम्यो हि भाव इष्यते, असत्प्रत्ययगम्यस्त्वभाव इति । तदिदमुक्तम्—सदसती तत्त्वम् इति ॥

### भावाभावयोर्विशेषः

ननु ! भाववदेष ज्ञानजनकस्सन् अभावो न भावाद्विशिष्यते । अहो निपुणदर्शी देवानांप्रियः ! प्रतीतिभेदश्चास्ति ? न च प्रतीयमानौ भावाभावौ भिद्येते इति कथमेवं भवेत् ? अपि रे मूढ ! ज्ञानजनकत्वाविशेषेऽपि रूपरसौ कथं भिद्येते ? प्रतीतिभेदादिति चेत्; भावाभावावपि जनकत्वधर्मसामान्येऽपि प्रतीतिभेदादेव भिद्येयाताम् । न हि प्रतिभास्यभेदमन्तरेण प्रतिभासभेदो भवतीति भवताऽप्यभ्युपगतम् । यथोक्तम्— ज्ञानापेक्षया तु त्रिक्षणत्वमित्याह—उत्पद्यते चेत्यादि । अकारकः— अकिञ्चित्कारी । कारणतारहित इति यावत् ॥ § 1159

ननु समाहितोऽयं दोषः धर्मकीर्तिना प्रमाणवार्तिके—भिन्नकालं कथं ग्राह्यं ? इति चेत्; ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञाः ज्ञानाकारार्पणक्षमम् इति—इत्यत्राह—आकारार्पणपक्षमिति ॥ § 1160

उक्तमिति । न्यायभाष्य इति शेषः ॥ § 1161

न विशिष्यत इति । उभयोरपि ज्ञानजनकत्वाविशेषादित्यर्थः समाधत्ते—अहो इति । देवानांप्रिय इति । देवानांप्रिय इति च मूर्खे इति वार्तिकादलुक् । न चेति । न भिद्यते इति च कथमित्यन्वयः । नीलप्रतीतेः पीताद्यभावप्रतीतिरूपताया उक्तत्वेन पीताभावस्यैव नीलरूपत्वेन भावातिरिक्तः अभावो नास्त्येव तन्मते । परन्तु विषयभेदमन्तरा प्रतीतिभेदस्य सर्वथा दुर्निरूप

प्रामाण्यं वस्तुविषयं द्वयोरर्थभिदां जगौ ।
प्रतिभासस्य चित्रत्वात्, एकस्मिंस्तदयोगतः ॥ इति ॥ § 1164

तस्मात् अस्ति इति (Edtext outside numbered paragraph)प्रतीतेरिव भावः, नास्ति इति प्रतीतेरभावो (Edtext outside numbered paragraph)भूमिरित्यभ्युपगम्यताम् ॥

---

२७ ] प्येत— nyāma-wit__ka
२८ ] तत्र— nyāma-wit__kha
२९ ] न भिद्येते— nyāma-wit__kha
३२ ] गतम्— nyāma-wit__kha

अथवा विज्ञानवाद एव सुस्पष्टमास्थीयताम् । अन्तरावस्थानं तु न सांप्रतम् । अर्थक्रियासामर्थ्यमपि तस्य दर्शितमेव ॥

स्वज्ञानाख्यक्रियाशक्तिरमुष्य दुरपह्नवा ।
अर्थक्रियाऽन्यजन्या तु न भावेनापि जन्यते ॥ १८८ ॥§ 1166

एवं च सति यः पूर्वं शक्तिवादोऽत्र वर्णितः ।
स प्रत्यक्षविरुद्धत्वात् कण्ठशोषाय केवलम् ॥ १८९ ॥§ 1168

**अभावस्य सम्बन्धोपपादनम्**

तथा, सम्बन्धाभावादिति यदुक्तम्—तत्र देशेन सह तावत् अभावस्य विशेषणविशेष्यभावः सम्बन्धः । स तु सम्बन्धान्तरमूल इति भावेऽयं नियमः, नाभावे ॥ त्वेन, यदि भावाभावप्रतीत्योर्भेदः तर्हि भावाभावयोरपि भेदः दुर्विवार एवेति सिद्धान्त्याशयः ॥ § 1169

प्रामाण्यमिति । वस्तुविषयं प्रामाण्यं द्वयोरर्थयोर्भिदां जगौ—न्यरूपयत् । कुतः ? प्रतिभासस्य चित्रत्वात् इति । प्रतीतेर्भावः भूमिरिव इत्यन्वयः । भूमिः—विषयः ॥ § 1170

विज्ञानातिरिक्तभावपदार्थमङ्गीकुर्वतो वैभाषिकस्य तव, प्रतीतिसाम्ये अभावानङ्गीकरणमयुक्तमित्याह—अथवेति । तस्य—अभावस्य । दर्शितमिति । सुखदुःखसमुत्पत्तिः इत्यादिना पु. १५७ पूर्वमित्यर्थः ॥ § 1171

ननु न सर्वेषामभावानां सुखदुःखाद्यर्थक्रियाकारित्वमनुभवसिद्धं—इति शङ्कायां—स्वविषयवज्ञानाख्यार्थक्रियाकारित्वमन्ततः सर्वेषामभावानां वर्तत एव । भावानामपि केषाञ्चिदेवमेव भवताऽपि वक्तव्यमित्याह—स्वज्ञानेति । अन्यजन्या—ज्ञानातिरिक्तकार्योपगद्या । एवमतिरिक्तोऽभाव, तस्य कारणत्वमपि यदा सिद्धं, तदा प्रतिबन्धकाभावस्य अभावरूपत्वेन कारणत्वासंभवात् शक्तिसिद्धिरित्यपि न युज्यत इति स्मारयति—एवञ्चेति ॥ § 1172

I.160/KSV

यद्वा भावेऽप्येष न नियमः । न ह्येवं भवति—यत् सम्बद्धं तत् विशेषणमेव । पादपीडिते, शिरसि वा धार्यमाणे दण्डे, दण्डी इति प्रत्ययानुत्पादात् । नाप्येवम्, यत् विशेषणं तत् सम्बन्द्धमेवेति; समवायस्य सत्यपि विशेषणत्वे सम्बन्धान्तराभावात् । तस्मात् सम्बन्धान्तररहितोऽपि, प्रतिबन्ध इव, वाच्यवाचकभाव इव, विशेषणविशेष्यभावः स्वतन्त्र एव सम्बन्धः तथाप्रतीतेरवधार्यते ॥ § 1173

---

४ ] न च, यश्च— nyāma-wit__ka

४ ] नि— nyāma-wit__ka

४ ] तत्— nyāma-wit__ka

४ ] यत्— nyāma-wit__ka

८ ] एव— nyāma-wit__ka

उभयोरुभयात्मकत्वात् कदाचित् कस्यचित् तथा प्रतिभासात् पुरुषेच्छानुवर्तनेन व्यत्ययप्रत्ययसत्त्वेऽपि न दोषः । तस्मात् विशेषणविशेष्यभाव एव सम्बन्धो देशेन भूतलादिना सहाभावस्य ॥ § 1174

एवं कालेनापि सह स एव वेदितव्यः । क्रियया कर्तृस्थया वा गमनादिकया, कर्मस्थया वा भेदनादिकया सह संयोगाद्यभावेऽपि विशेषणविशेष्यभाव एव सम्बन्धः, तद्वदभावस्यापि भविष्यतीति ॥ § 1175

प्रतियोगिना तु सह विरोधोऽस्य सम्बन्धः । अयमेव च विरोधार्थः, यदेकत्रोभयोरसमावेशः । अतश्चैकविनाशे न सर्वविनाशः; घटाभावस्य घटैकप्रतियोगिकत्वात् ॥ § 1176

पादपीडिते इत्यस्य दण्डे इत्यनेनान्वयः । तस्मात्—विशेषणविशेष्यभावस्य सम्बन्धान्तरानधीनत्वेऽपि स्वतस्सम्बन्धत्वसम्भवात् । अत्र दृष्टान्तमाह—प्रतिबन्ध इति । वह्निधूमयोर्यथाव्याप्यव्यापकभावः तथा प्रकृतेऽपि । वह्निधूमयोः यद्यपि संयोगोऽस्ति तथापि स न व्याप्यव्यापकभावप्रयोजकः । तादृशोऽपि सम्बन्धः शब्दार्थयोर्नास्तीति विशेषः ॥ § 1177

पुरुषेच्छया विपर्यस्यन्तमप्येनं पश्यामःपु. १४६ इत्येतत्समाधत्ते—उभयोरिति । किमुत ! पुरुषापेक्षया दण्डो विशेषणं, रूपाद्यपेक्षया तु तदेव दण्डो विशेष्यः—नीलदण्डवान् पुरुषः इत्यादौ इत्यप्यूह्यम् ॥ § 1178

१४८ पुटे उक्तं समाधत्ते अतश्चेति ॥ § 1179
I.161/KSV

## भवनधर्मैवाभावः

यत्तु—भवनधर्मा ? अभवनधर्मा वा ? इति विकल्पितम्—तत्र भवनधर्मैवाभावोऽभ्युपगम्यते । भवनधर्मत्वेऽपि चाभावो न भावान्न भिद्यते; प्रतिभासभेदस्य रूपरसादिषूपदर्शितत्वात् । भवनधर्मत्वं चास्य हेत्वन्वयव्यतिरेकित्वात् भवति । घटो हि मृत्पिण्डदण्डादीनिव जन्मनि, विनाशेऽपि मुद्गरादीननुवर्तते हेतून् ॥ § 1180

विजातीयसन्ततिजननपक्षेऽपि सदृशसन्तानजनिकायाः शक्तेरभावः क्रियत एव । अन्यथा मुद्गराद्युपनिपातेऽपि विजातीयेव सजातीयसन्ततिरपि जायेत । सजातीयविजातीयोभयसन्ततिजननशक्तियुक्तो घट इति चेत्; मुद्गरादियोगात् पूर्वमपि कपालसन्ततिजननम्, तद्योगेऽपि वा सति

११ ] त्वे— nyāma-wit__kha
१२ ] देशे— nyāma-wit__kha
१२ ] भावस्य सम्बन्धः— nyāma-wit__kha
१३--१४ ] स्वया— nyāma-wit__kha
१४ ] दि— nyāma-wit__ga
१७ ] योः— nyāma-wit__ka
३ ] वदु— nyāma-wit__ka
४ ] नि— nyāma-wit__ka

घटसन्ततिजननमनियमेन दृश्येतेति । विजातीयक्षणोत्पादनस्वभावे च घटे मुद्गरादिवैय्यर्थ्यमेव स्यात् ॥ § 1181

हेत्वन्वयव्यतिरेकित्वात्—हेतुसत्त्वे अभावसत्त्वं, हेत्वभावे अभावस्याप्यभाव इत्यन्वयव्यतिरेकवत्त्वात् । एवञ्च कारणाधीनत्वात् भवति इति प्रतीतिविषयत्वमप्यस्त्यभावे, इदानीं घटध्वंस उत्पन्नः इति प्रतीतेरिति ॥ § 1182

ननु ! मुद्गरादीनां अभावजनकत्वं नास्ति, किन्तु विजातीयसन्तानजनकत्वमेवेति पूर्वमेव १४७ पु. उक्तम् । एवञ्चाभावः न हेतुजन्यः इत्यत्राह— विजातीयेति । सर्वस्यापि भावस्य स्वसदृशसन्तानारम्भकशक्तिमत्त्वमेव वक्तव्यम्; अन्यथा घटसन्तानात् पटसन्तानस्याप्युत्पत्त्यापत्तिः । एवञ्च घटसन्तानजनकशक्तिमतः घटक्षणात् कपालरूपविजातीयसन्तानोत्पत्तिकाले पूर्वविद्यमानायाः शक्तेरुपमर्दः अवश्यं वाच्यः । एवञ्च शक्तिनाशस्य मुद्गरहेतुकत्वं सिद्धमिति सिद्धमभावस्य हेतुजन्यत्वम् । न च सजातीयविजातीयोभयसन्तानजननशक्तिर्वर्तत एव घटादिक्षणस्येति उभयविधशक्तिसत्त्वादुभयं उपपद्यते, न तदर्थं अन्यतरशक्तिनाशः अपेक्षणीयः इति वाच्यम्; एवं तर्हि पूर्वं घटपरंपरा, अनन्तरं मुद्गरनिपातात्परमेव कपालपरंपरेति व्यवस्थैव दुर्वचा । न च मुद्गरनिपातात्परमेवेति न, किन्तु क्षणस्यैव एवं स्वभाव इति शङ्क्यम्; एवं तर्हि मुद्गरादीनां वैय्यर्थ्यापातः । संपूर्णस्वभाववादे च पूर्वोत्तरक्षणयोरपि कार्यकारणभावो न स्यादिति प्रघट्टकार्थः ॥ § 1183
I.162/KSV

तदुत्पादस्वभावे हि न किञ्चिन्मुद्गरादिना ।
अतदुत्पादकत्वेऽपि न किञ्चिन्मुद्गरादिना ॥ १९० ॥§ 1185

मुद्गरोपनिपाताच्च यद्युत्पन्नं क्षणान्तरम् ।
घटक्षणस्य किं वृत्तं ? येन नाभाति पूर्ववत् ॥ १९१ ॥§ 1187

नन्वस्याभवनं वृत्तं, स एवार्थोऽयमुच्यते ।
घञा किमपराद्धे वः किं वाऽप्युपकृतं ल्युटा ॥ १९२ ॥§ 1189

ननु ! उक्तं—न तस्य किञ्चिद्भवति, न भवत्येव केवलमिति— तदयुक्तम्—यदसौ न भवति स एवास्याभावः ॥ § 1190

ननु ! स न, न तु तस्याभावः—मैवम्—स नेतिशब्दयोर्ज्ञानयोश्च विषयभेदात् । स इति ज्ञानस्य स्मर्यमाणो घटादिर्विषयः; नेति तु ज्ञानस्य अभावो भूमिरित्यलमलीकविदग्धविरचितविफलवक्रवचनविमर्देन ॥ § 1191

७ ] भ्यु— nyāma-wit__ka
१० ] लक्ष— nyāma-wit__ka
३ ] वा— nyāma-wit__kha

तदुत्पादः—विजातीयसन्तत्युत्पादकत्वम् । अतदुत्पादकत्वेऽपि— विजातीयसन्तत्यनुत्पादकस्वभाववत्त्वेऽपि । उभयथा च मुद्गरव्यापारो व्यर्थ एवेत्यर्थः । मुद्गरेत्यादि । ननु मुद्गरेण कपालरूपक्षणान्तरं नूतनमुत्पादितम्; न तु पूर्वक्षणस्य, तच्छक्तेर्वा नाशः अनेन कृतः इति चेत् ? तर्हि घटक्षणः कुत्र गतः ? न कुत्रापीति चेत्, पूर्ववत् कुतो नोपलभ्यते ? ननु घट एतावत्पर्यन्तं भवन्नासीत्, इदानीमस्य अभवनमेव संवृत्तं, अतो नोपलभ्यत इति चेत्, अहो मेधाविन् ! घट्टकुट्यां प्रभातम् !! अभावः इति घञन्तेन यं वयं अब्रूम, स एव अभवनम् इति ल्युडन्तेन त्वयोच्यत इति महान् भेदः ! इति भावः ॥ § 1192

न तस्येति । घटस्य न किञ्चिद्भवति; घटो न भवतीत्येतावन्मात्रमित्यर्थः ॥ § 1193

नन्विति । स नेत्येतावदेवोच्यते । न तु किञ्चिदस्तीति । अतः कथमभावसिद्धिरित्यर्थः । सैव प्रतीतिरभावसाधिकेत्याह—स नेतीति । ज्ञानभेदसाधकः शब्दभेदः इति सूचनाय, दृष्टान्ताय च—शब्दयोरिति ॥ § 1194

एवमभावाख्यमतिरिक्तं प्रमेयं प्रसाधितम् । अथ तत्प्रमाणभूताया अनुपलब्धेरनुमानेऽन्तर्भावः न संभवत्येव, किन्तु अनुपलब्धिसहकृतेन्द्रिय

**बौद्धमतनिरासोपसंहारः**

तस्मादित्थमभावस्य प्रमेयत्वोपपादनात् ।
न ह्यसद्व्यवहाराय कल्पन्तेऽनुपलब्धयः ॥ १९३ ॥§ 1197

न स्वभावानुमाने च तदन्तर्भावसम्भवः ।
मेयं पृथगभावाख्यं अमूषामुपपादितम् ॥ १९४ ॥§ 1199

कारणानुपलब्ध्यादेः बाढमस्त्वनुमानता ।
स्वभावानुपलब्धिस्तु प्रत्यक्षमिति साधितम् ॥ १९५ ॥§ 1201

या चेयमेकादशानुपलब्धिवधूशुद्धान्तमध्ये विरुद्धव्याप्तोपलब्धिरुदाहृता—(Edtext outside numbered paragraph)न ध्रुवभावी भूतस्यापि भावस्य विनाशः, हेत्वन्तरा (Edtext outside numbered paragraph)पेक्षणात् इति—सेयं इदानीमेव साध्वी दूषिता; विस्तरस्तु क्षणभङ्गपक्षे दूषयिष्यते ॥

## प्राभाकरमतपरिशीलनम्

यैस्तु मीमांसकैः सद्भिरभावो नाभ्युपेयते ।
प्रमादेनामुना तेषां वयमप्यद्य लज्जिताः ॥ १९६ ॥§ 1203

घटो हि न प्रतीयते, न तु तदभावः प्रतीयते इत्येवंवदद्भिरेभिर्दर्शनादर्शने एव पदार्थानां सदसत्त्वे इति कथितं स्यात् । एतच्चा- ग्राह्यत्वादभावस्य प्रत्यक्षत्वमेवेत्याह—न स्वभावानुमान इति । तत्र हेतुमाह—मेयमिति । अमूषां—अनुपलब्धीनाम् । केषाञ्चित्त्वभावानामनुमेयत्वमिष्टमेवेत्याह—कारणेति ॥ § 1204

एवं कारणानुपलब्ध्यादेः अनुमानेऽन्तर्भावस्य, स्वभावानुपलब्धेः प्रत्यक्षरूपत्वस्य च कथनेन पूर्वोक्तैकादशानुपलब्धीनां सम्मतत्वं सिद्धमिव । एवं सति विरुद्धव्याप्तोपलब्ध्या क्षणिकत्वमपि भावानां सिद्ध्येत् इति चेत् तत्राह—या चेति । सेयं साध्वी इदानीमेव दूषिता इत्यन्वयः । ध्वंसस्य मुद्गरादिसापेक्षत्वस्य स्थापितत्वादिति शेषः ॥ § 1205

येः—प्रभाकराद्यैः । तेषां वैदिकमूर्धन्यत्वात्—सद्भिरिति ॥ § 1206

दर्शनादर्शने इति । न तु तदभावः प्रतीयते इत्यनेन हि अभावाप्रतिपत्तिमात्रात् अभावापलापः प्रतीयते; तच्चायुक्तमिति भावः ॥ § 1207

I.164/KSV

युक्तम्—दर्शनादर्शनाभ्यां हि सदसत्त्वे निश्चीयेते, न तु दर्शनादर्शने एव सदसत्त्वे ॥ § 1208

न चाप्रतीतिमात्रेण तदभावनिबन्धनाः ।
व्यवहाराः प्रकल्पन्ते, मृदन्तरिततोयवत् ॥ १९७ ॥ § 1210

खपुष्पस्य पिशाचस्य मृदन्तरितवारिणः ।
न खल्वनुपलभ्यत्वे विशेषः प्रतिभाति नः ॥ १९८ ॥ § 1212

सर्वदाऽनुपलम्भो हि कुर्वन्नास्तित्वनिश्चयम् ।
विशिष्यते मृदन्तस्स्थसलिलानुपलब्धितः ॥ १९९ ॥ § 1214

आगमाद्युक्तितश्चापि सत्त्वसंभावनां गतः ।
सर्वदाऽनुपलब्धोऽपि न पिशाचः खपुष्पवत् ॥ २०० ॥ § 1216

## अनुपलब्धेः स्वतस्सिद्धत्वनिराकरणम्

अतश्च यदुच्यते—अनुपलब्धेः पुनः अनुपलब्धिरेवानुपलब्धिरिति—तद्भणितिमात्रम् । खपुष्पादेस्तु सविशेषणतयाऽनुपलब्ध्याऽभाव एव निश्चीयते, न तस्यानुपलब्धिमात्रम् ॥ § 1217

तदप्रतीतिमात्रं न तदभावमवगमयितुमलमितीमममर्थं सदृष्टान्तमुपपादयति—न चेत्यादि । ननु तर्हि अप्रतीयमानत्वाविशेषात् खपुष्पमपि सिद्ध्येत् इत्यत्राह—खपुष्पेत्यादि । नः न खलु प्रतिभाति ! इति काकुः । खपुष्प-

स्य, पिशाचस्य, मृदन्तरितजलस्य चाप्रतीयमानत्वाविशेषेऽपि प्रतीतिषु विशेषः अनुभवसिद्ध एवेत्याह—सर्वदेत्यादि । खपुष्पादयो हि सर्वदाऽनुपलभ्यमानाः सन्तः नास्तीतिप्रतीतिविषया भवन्ति । मृदन्तरिततोयानुपलब्धिस्तु न तथेति अनुभवसिद्धो विशेष इत्यर्थः । सर्वदाऽनुपलम्भो हि नास्तित्वनिश्चयं कुर्वन्, मृदन्तरितसलिलानुपलब्धितः विशिष्यत इत्यन्वयः । एवं शब्दादिनाऽवगत-सद्भावः पिशाचादिः सर्वदा चक्षुरादिभिरनुपलब्धोऽपि न खपुष्पतुल्यः । अतः अप्रतीतिसाम्येऽपि नाविशेषः एतेषामिति ॥ § 1218

ननु ! घटस्यैवानुपलब्धिः, न तु तदभावस्योपलब्धिः इति वदता अनुप-लब्धिः गृह्यत इति वक्तव्यम्; एवञ्च अभावः सिद्धः, अनुपलब्धेरभावरूप-त्वात् । यद्यनुपलब्धिरेव न केनापि प्रमाणेन सिद्धः, तर्हि घटानुपलब्धेरग्रहणे घटोपलम्भप्रसङ्गः, इति शङ्कायां अनुपलब्धेः स्वत एव सिद्धिरिति यदुक्तं तत्प्रतिवदति—अतश्चेति । सविशेषणतया—विशिष्टत्वेन । आकाशं, पुष्पं च प्रत्येकं प्रसिद्धमेव, विशिष्टं त्वप्रसिद्धमित्यर्थः ॥ § 1219

I.165/KSV

## अभावानभ्युपगमे बाधकम्

अनिष्यमाणे चाभावे भावानां प्रतियोगिनि ।
नित्यतैषां प्रसज्येत न ह्येते क्षणिकास्तव ॥ २०१ ॥§ 1221

मुद्गरादेश्च किं कार्यं ? कपालपटलीति चेत् ।
घटस्तर्ह्यविनष्टत्वात् स्वकार्यं न करोति किम् ? ॥ २०२ ॥§ 1223

अदर्शनादिति चेत्;

तदानीमेव दृष्टस्य स्थिरस्यामुष्य किं कृतम् ?
सर्वेन्द्रियादिसामग्रीसन्निधानेऽप्यदर्शनम् ॥ २०३ ॥§ 1226
तस्मात् तदभावकृतमेव तदानीं तस्यादर्शनम् ॥ § 1227

स्वप्रकाशा च नास्तीति संवित्तिर्भवतां मते ।
न निरालम्बना चेयं, अस्तीति प्रतिपत्तिवत् ॥ २०४ ॥§ 1229

विकल्पविषयाः शब्दा यथा शौद्धोदनेर्गृहे ।
गीयन्ते भवता नैवमिति नश्वाच्यमुच्यताम् ॥ २०५ ॥§ 1231

प्रतियोगिनि—विरोधिनि । एषां—भावानाम् । प्रागभावप्रध्वंसाभावयोरेव पूर्वोत्तरावधिरूपत्वेन, तयोरभावे पूर्वोत्तरावध्यभावसिद्ध्या भावानां नित्यत्वमेव

स्यादिति । ननु अभावानभ्युपगमेऽपि बौद्धैर्यथा भावानां नित्यत्वं वारितं, तथा वयमपि प्राभाकराः वारयामः इत्यत्र, तर्हि तद्वदेव भावानां क्षणिकत्वमभ्युपगन्तव्यम् । ते हि अहेतुविनाशवादिनः वस्तूनां क्षणिकत्वं स्वभाव इति वदन्ति इत्याह—न ह्येत इति ॥ § 1232

अदर्शनादिति । विद्यमानोऽपि घटः न किञ्चित्करोति, तत्कार्यस्यादर्शनादिति भावः । अदर्शनं किंकृतमित्यन्वयः । तथा च तत्सत्त्वे किं प्रमाणमिति भावः ॥ § 1233

स्वप्रकाशा चेति । नास्ति इति संवित्तिरित्यन्वयः । गुरुभिः ज्ञानस्य स्वप्रकाशत्वमुच्यते । अस्ति इति प्रतिपत्तिः यथा न निरालम्बना, तथा नास्ति इति प्रतीतिरपि न निरालम्बना । अतश्च विषयो वक्तव्यः । न च बौद्धवत् असद्विषयत्वं वक्तुं शक्यम्, तर्हि वेदजन्यज्ञानस्यापि निर्विषयत्वसंभवात् वेदस्यैवाप्रामाण्यापत्तेः । अतः नञ्वाच्यं किम् ? उच्यताम् ॥ § 1234

I.166/KSV

प्रसिद्धिश्च परित्यक्ता, न चाभावः पराकृतः ।
उपेक्षितश्च भाष्यार्थः, इत्यहो नयनैपुणम् ॥ २०६ ॥§ 1236

अलं च बहुनोक्तेन विमर्दोऽत्र न शोभते ।
महात्मनां प्रमादोऽपि मर्षणीयो हि मादृशैः ॥ २०७ ॥§ 1238

तस्मात् नास्ति इति प्रत्ययगम्योऽभाव इति सिद्धम् ॥ § 1239

## अभावप्रभेदाः

स च द्विविधः—प्रागभावः, प्रध्वंसाभावश्चेति । चतुर्विध इत्यन्ये—इतरेतराभावः, अत्यन्ताभावः, तौ च द्वाविति ॥ § 1240

षट्प्रकार इत्यन्ये—अपेक्षाभावः, सामर्थ्याभावः, ते च चत्वार इति ॥ § 1241

## प्रागभावादीनां स्वरूपाणि

तत्र च— § 1242

प्रागात्मलाभान्नास्तित्वं प्रागभावोऽभिधीयते ।
उत्पन्नस्यात्महानं तु प्रध्वंस इति कथ्यते ॥ २०८ ॥§ 1244

न प्रागभावादन्ये तु भिद्यन्ते परमार्थतः ।
स हि वस्त्वन्तरोपाधिरन्योऽन्याभाव उच्यते ॥ २०९ ॥§ 1246

प्रसिद्धिश्च परित्यक्तेति । तथा च बृहती—अस्ति चेयं प्रसिद्धिः मीमांसकानां षष्टं किलेदं प्रमाणम् इति । न चास्य ग्रन्थतो लोकतश्च प्रमाणताऽवसीयते । अतो न विद्मः प्रसिद्धेः किं बीजमिति...वटयक्षप्रसिद्धिवत् इति । वटयक्षप्रसिद्धिवदिति । व्यामोहपूर्विकेयं प्रसिद्धिरिति यावत् इति च पञ्चिका । अलं इत्यादिरुपहासोक्तिः ॥ § 1247

द्विविधः—इति स्वमतेन । अनुपदमेतद्विव्रियते इतरेतराभावः— § 1248

अन्योन्याभावः ॥ § 1249

अपेक्षाभावः—इदानीमत्र घटोऽस्ति, तत्र तु नास्ति—इत्येवं देशकालापेक्षया प्रतीयमानः । एतत्पक्षे वायौ रूपाभावादिरेव अत्यन्ताभावः । सामर्थ्याभावः—बीजादौ अङ्कुरकरणाकरणयोर्निर्वाहाय । तेन च कुर्वद्रूपत्वनिराकरणम् । एवं वह्नौ दाहतदभावनिर्वाहाय च । तेन च शक्तिनिराकरणम् ॥ § 1250

आत्मलाभात् प्राक् इत्यन्वयः । अन्ये—प्रध्वंसात्यन्तान्योन्यापेक्षासामर्थ्याभावाः । उक्तमर्थमुपपादयति—स हीति । अत्र न इति

स एवावधिशून्यत्वात् अत्यन्ताभावतां गतः ।
अपेक्षाभावता तस्य देशोपाधिनिबन्धना ॥ २१० ॥§ 1253

सामर्थ्यं पूर्वसिद्धं चेत् प्रध्वंसे तदभावधीः ।
नो चेत् तर्हि विशेषोऽस्य दुर्लभः प्रागभावतः ॥ २११ ॥§ 1255

उत्पन्नस्य विनाशो वा तदनुत्पाद एव वा ।
अभावस्तत्त्वतः, अन्ये तु भेदास्त्वौपाधिका मताः ॥ २१२ ॥§ 1257

तस्मादभावाख्यमिदं प्रमेयं, तस्येन्द्रियेण ग्रहणं च सिद्धम् ।
अतः प्रमाणेषु जगाद युक्तं चतुष्टमेषां मुनिरक्षपादः ॥ २१३ ॥§ 1259

## संभवैतिह्ये प्रमाणान्तरे

ननु ! नाद्यापि चतुष्ट्वमेषामवतिष्ठते; संभवैतिह्ये इति द्वयोः प्रमाणान्तरभावात् ॥

संभवो नाम—समुदायेन समुदायिनोऽवगमः; संभवति खार्यां द्रोणः, संभवति शते सहस्रमिति ॥ प्रतीतिः प्रागभावः, अयं न इति प्रतीतिश्च अन्योन्याभावः इतीयानेव विशेषः । अवधिशून्यः—कालाद्यवधिशून्यः । समवायिकारणे प्रागभावप्रध्वंसयोः प्रतीतिः, इतरत्र च अत्यन्ताभावप्रतीतिः इति खलु विवेकः । तत्र समवायिकारणे आगामितायाः, गततायाश्च प्र-

१ ] तत्— nyāma-wit__kha

तीत्या तावुभावभावौ अवधिमन्तौ । अत्यन्ताभावस्तु न तथा, न हि भूतले घटो न इत्यत्र भूतले घटोत्पत्तिः, तत्प्रध्वंसो वा; तयोरुपादानगतत्वात् । अतः अवधिशून्यः—अत्यन्ताभावः । अत एवेमं त्रैकालिकाभावं व्यवहरन्ति । यद्यप्येवं एषां अस्ति सूक्ष्मो भेदः, अथापि निषेधाधिकरणभेदादेव तदुपपत्तौ व्यर्थं पार्थक्यकल्पनमिति भावः । प्रागभावप्रध्वंसापेक्षयाऽत्यन्ताभाववैलक्षण्यरक्षणायैव ध्वंसप्रागभावाधिकरणे नात्यन्ताभावः इति प्राचीनाः । तयोर्विरोधे मानाभावः इति च(?)नवीनाः । एषां दृष्टैव त्रयाणामेकजातीयतासंभवो ज्ञेयः । अपेक्षाभावश्चानुपदमेवोपपादितः । तस्य—प्रागभावस्य, अत्यन्ताभावात्मकप्रागभावस्य वा । निष्कृष्य वदति—उत्पन्नस्येत्यादि । प्रमेयं—सिद्धं इत्याकर्षः ॥ § 1260

समुदायेनेति—अनेनास्यानुमानाद्वैलक्षण्यसिद्धिः । अनुमानं हि कार्यात् कारणादेः । न ह्यत्र तथा समुदायसमुदायिनोः वक्तुं शक्यमित्यभिमानः ॥ § 1261

I.168/KSV

अनिर्दिष्टप्रवक्तृकप्रवादपरंपरा चैतिह्यम्; इह वटे यक्षः प्रतिवसति इति । न चायमागमः; आप्तस्योपदेष्टुरनिश्चयादिति ॥ § 1262

## संभवैतिह्ये अनुमानरूपे एव

तदिदमनुपपन्नम्— § 1263

भिन्नः संभव एष न ह्यनुमितेराख्यायि खार्यां खलु
द्रोणः संभवतीति सेयमविनाभावात् मतिर्लैङ्गिकी ।
ऐतिह्यं तु न सत्यमत्र हि वटे यक्षोऽस्ति वा नेति वा
को जानाति ? कदा ? क्व ? केन कलितं ? यक्षस्य
कीदृग्वपुः ? ॥§ 1267

सत्यमपि चागमात् पृथङ्नैतिह्यम्, उपदेशरूपत्वात् । आप्तग्रहणं सूत्रे न लक्षणायेति वक्ष्यामः ॥ § 1268

## प्रमाणसङ्ख्याविषये चार्वाकमतम्

चार्वाकधूर्तस्तु अथातस्तत्त्वं व्याख्यास्यामः इति प्रतिज्ञाय प्रमाणप्रमेयसङ्ख्यालक्षणनियमाशक्यकरणीयत्वमेव तत्त्वं व्याख्यातवान् । प्रमाणसङ्ख्यानियमाशक्यकरणीयत्वसिद्धये च प्रमितिभेदान् प्रत्यक्षादिप्रमाणानुपजन्यानीदृशानुपादर्शयत् § 1269

---

३ ] व— nyāma-wit_kha
४ ] रा— nyāma-wit_ka
२५ ] तदनु— nyāma-wit_kha
२६ ] अतः— nyāma-wit_kha
१ ] च— nyāma-wit_kha
२ ] ग्रहणसूत्र— nyāma-wit_ka

अनिर्दिष्टेति । आप्तोपदेशः शब्दः इति हि लक्षणम् । ऐतिह्यस्य च अनिर्दिष्टप्रवक्तृकत्वात् न आप्तोपदेशरूपशब्दप्रमाणतेत्यभिमानः ॥ § 1270

भिन्न इति । अयं भावः—न हि सर्वत्र कारणात् कार्यानुमानमेव; इदं द्रव्यं पृथिवीत्वात्, रूपवान् रसात्—इत्याद्यनुमानानामपि दर्शनात् । अविनाभूतयोर्व्याप्तिः । अविनाभावश्च कार्यकारणभावतो वा नियतसामानाधिकरण्याद्वा, घटकघटितभावादिनेवेत्यन्यदेतत् । अतश्च संभवोऽप्यनुमानमेव ॥ § 1271

ऐतिह्यस्थलेऽपि तादृशवाक्यस्य अर्थसाहित्ये शब्द एवान्तर्भावः, राहित्ये च न प्रमाणतैवेत्याह—ऐतिह्यमित्यादि ॥ § 1272

अनिर्दिष्टप्रवक्तृकस्य ऐतिह्यस्य कथं आप्तोपदेशरूपशब्दत्वम् ? इत्यत्राह— आप्तग्रहणं त्विति । उत्तरत्र शब्दनिरूपणोपक्रम एवेदं स्पष्टीभविष्यति ॥ § 1273

प्रमाणेत्यादि । प्रमाणानां प्रमेयाणां च संख्यानियमस्य लक्षणनियमस्य च अशक्यकरणीयत्वमित्यर्थः । प्रमाणानुपजीव्यान्—प्रमाणानधीनान् ॥ § 1274

I.169/KSV

वक्राङ्गलिः प्रविरलाङ्गुलिरेष पाणिः
इस्यस्ति धीः तमसि मीलितचक्षुषो वा ।
नेयं त्वगिन्द्रियकृता, न हि तत्करस्थं
तत्रैव हि प्रमितिमिन्द्रियमादधाति ॥ २१५ ॥§ 1278

दूरात्करोति निशि दीपशिखा च दृष्टा
पर्यन्तदेशविसृतासु मतिं प्रभासु ।
धत्ते धियं पवनकम्पितपुण्डरीक-
षण्डेऽनुवातभुवि दूरगतेऽपि गन्धे ॥ २१६ ॥§ 1282

स एवंप्रायसंवित्तिसमुत्प्रेक्षणपण्डितः ।
रूपं तपस्वी जानाति न प्रत्यक्षानुमानयोः ॥ २१७ ॥§ 1284

वक्राङ्गुलिरित्यादि । चाक्षुषप्रत्यक्षानुपजीव्यत्वबोधनाय—तमसि मीलितचक्षुषो वा इति । वाकारः किं तमःपर्यन्तानुधावनेन इति धार्ष्ट्यार्थः । अस्तु धीः, किं तेन ? इत्यत्राह नेयमिति । अत्र हेतुमाह—न हीति । तत्करस्थं इन्द्रियं तत्रैव प्रमितिं न ह्यादधाति—इत्यन्वयः । एतदुक्तं भवति—निमीलितचक्षुषामप्यस्माकं मम अङ्गुलिः बक्रः, ममाङ्गुली विरलौ

२७ ] दीप्र— nyāma-wit__kha
२७ ] दृष्ट्वा— nyāma-wit__ka
३ ] षण्डोऽ— nyāma-wit__kha

इत्यादिप्रतीतिरनुभवसिद्धा । दण्डादिषु हि हस्तस्पर्शवशात् वक्रत्वादिकं त्व-गिन्द्रियग्राह्यं भवेदपि । अङ्गुलिः स्वगतं वक्रत्वं कथं स्वयं गृह्णीयात् । न हि चक्षुरिन्द्रियं आत्मन आश्रयं गोलकं गृह्णाति । अत इयं प्रतीतिर्दुर्निरूपैव । एवं विरलौ अङ्गुली इत्यत्रापि । वैरल्यं च हस्तान्तरेण स्पर्शमन्तराऽपि स्वयमेव भासत एव । एतदपि दुर्निरूपमेवेति ॥ § 1285

एवं निशि दूरात् दृष्टा दीपशिखा च पर्यन्तदेशविसृतासु प्रभासु— विष-यसप्तमी, मतिं करोति अहो पर्यन्तप्रसृमरप्रभाभासुरेयं दीपशिखा इति । तत्र पर्यन्तदेशस्य आकाशरूपस्य दूरादग्रहणेऽपि तत्र प्रसृमरत्वं तु त-दैव गृह्यते । इयं च प्रतीतिः नानुमानरूपा; हेतुज्ञानादीनामदर्शनात् । अत इदमपि विलक्षणं प्रत्यक्षम् । एवं गन्धे घ्राणेन्द्रियेण गृहीते दूरगतेऽपि वाय्वनुकूलप्रदेशवर्तिनि पवनकम्पितपुण्डरीकवने—तद्विषये धियं धत्ते, पुरुष इति शेषः । न ह्यत्र घ्राणेन पुण्डरीकवनग्रहणं संभवीत्यर्थः । सुरभि

**चार्वाकमतनिरासः**

प्रत्यक्षाद्विरलकराङ्गुलप्रतीतिः
व्यापित्वादकुशलमिन्द्रियं न तस्याम् ।
आनाभेस्तुहिनजलं जनैः पिबद्भिः
तत्स्पर्शः शिशिरतरोऽनुभूयतेऽन्तः ॥ २१८ ॥§ 1290

संयोगबुद्धिश्च यथा तदुत्था तथैव तज्ञा तदभावबुद्धिः ।
क्रियाविशेषग्रहणाच्च तस्मात् आकुञ्चितत्वावगमोऽङ्गुलीनाम्
॥§ 1292

पद्मामोदविदूरदीपकविभाबुद्धिः पुनर्लैङ्गिकी
व्याप्तिज्ञानकृतेति, का खलु मतिर्मानान्तरापेक्षिणी ।
सङ्ख्याया नियमः प्रमाणविषये नास्तीत्यतो नास्तिकैः
तत्सामर्थ्यविवेकशून्यमतिभिः मिथ्यैव विस्फूर्जितम् ॥ २२०
॥§ 1296

इयत्त्वमविलक्षणं नियतमस्ति मानेषु नः
प्रमेयमपि लक्षणादिनियमान्वितं वक्ष्यते ।
अशक्यकरणीयतां कथयता तु तत्त्वं, सतां
समक्षममुनाऽऽत्मनो जडमतित्वमुक्तं भवेत् ॥ २२१ ॥§ 1300

इति जयन्तभट्टकृतौ न्यायमञ्जर्यां प्रथममाह्निकम् चन्दनम् इत्येव-मादिज्ञानानामपीदमुपलक्षणम् । एवञ्च ज्ञानज्ञेययोर्व्यवस्थैव दुर्वचेति प्र-माणप्रमेयसंङ्ख्यानियमः अशक्यकरणीय एवेति ॥ § 1301

एतत्सर्वं समाधत्ते—प्रत्यक्षादिति । इन्द्रियं अकुशलं न, किन्तु समर्थमेवेत्यर्थः । चक्षुरिन्द्रियेण स्वाश्रयगतगुणाद्यग्रहणेऽपि त्वगिन्द्रियं स्वाश्रयगतजलादिसंयोगं गृह्णातीत्यनुभवसिद्धम् । तच्चेन्द्रियं शरीरव्यापकम् । अतश्च अङ्गुलिगतवैरल्यं तद्गतत्वमिन्द्रियं गृहीतुं समर्थमेव । त्वचो व्यापकत्वं साक्षात्स्वसंयुक्तग्राहकत्वं चोपपादयति—आनाभेरिति ॥ § 1302

तदुत्था—त्वगिन्द्रियजन्या । येनेन्द्रियेण यो गृह्यते तेनेव तदभावोऽपि गृह्यते इति स्वाश्रयगतसंयोगाभावोऽपि त्वचैव गृह्यते । एवं त्वचा स्वाश्रयगतक्रियाग्रहणस्यापि संभवात् आकुश्चितत्वग्रहणमपि त्वचैवेत्यर्थः ॥ § 1303

तत्सामर्थ्यं—प्रमाणसङ्ख्यानियमनिश्चयसामर्थ्यम् ॥ § 1304

अविलक्षणं—सर्वसम्मतम् । सतां समक्षमित्यन्वयः ॥ § 1305

इति प्रथममाह्निकम्

## १.२ द्वितीयमाह्निकम्—प्रत्यक्षपरीक्षा

I.171/KSV

### प्रत्यक्षलक्षणम्

एवं प्रमाणानां सामान्यलक्षणे, विभागे च निर्णीते सति, अधुना विशेषलक्षणवर्णभावसर इति, सकलप्रमाणमूलभूतत्वेन पूर्वपठितत्वेन ज्यैष्ठ्यात् प्रथमं प्रत्यक्षस्य लक्षणं प्रतिपादयितुमाह— § 1307

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ १-१-४ ॥ § 1308

प्रत्यक्षमिति लक्ष्यनिर्देशः; इतरल्लक्षणम् । समानासमानजातीयव्यवच्छेदो लक्षणार्थः । समानजातीयं प्रमाणतयाऽनुमानादि, विजातीयं प्रमेयादि; ततो व्यवच्छिन्नं प्रत्यक्षस्य लक्षणमनेन सूत्रेणोपपाद्यते ॥ § 1309

### सूत्रस्यायुक्तताऽऽक्षेपः

अत्र चोदयन्ति—इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणैः स्वरूपं वा विशेष्यते ? सामग्री वा ? फलं वा ? § 1310

विभागे—चतुष्टयत्वेनेति शेषः ॥ § 1311

समानेति । सजातीयविजातीयव्यावृत्तिः लक्षणस्य प्रयोजनमित्यर्थः ॥ § 1312

२ ] पूर्व— nyāma-wit__ka
२--३ ] प्रत्य— nyāma-wit__ka
१ ] श— nyāma-wit__kha

चोदयन्तीति । अयमाशयः । अस्मिन् सूत्रे प्रत्यक्षं इति पदं लक्ष्यवाचकम्, अत एव विशेष्यम् । प्रत्यक्षशब्दश्च अफलरूपे अकरणरूपे च केवलज्ञाने, तादृशज्ञानकरणे इन्द्रियादौ, फलरूपे ज्ञाने च वर्तते । तदत्र प्रत्यक्षपदं किं केवलज्ञानस्वरूपमात्रपरम् ? उत ज्ञानकरणपरम् ? उत फलभूतज्ञानपरम् ? तत्राद्ये पक्षेऽव्याप्तिरतिव्याप्तिश्च । तदा हि अकरणस्याफलस्यैव च लक्षणमिदमिति भवति । तथा च फलरूपज्ञाने, इन्द्रिये च प्रमाणत्वेन वर्णनीये लक्षणा I.172/KSV

तत्र स्वरूपविशेषणपक्षे, यत् एवंस्वरूपं ज्ञानं तत् प्रत्यक्षमिति तत्स्वरूपस्य विशेषितत्वात्, फलविशेषणानुपादानाच्च लक्षणमव्याप्त्यतिव्याप्तिभ्यामुपहतं स्यात् । अव्याप्तिस्तावत्—अतथाविधस्वरूपस्य बोधस्य, इन्द्रियादेश्च निर्मलफलजनकतया लब्धप्रमाणभावस्यापि प्रामाण्यं नोक्तं भवेत् । अतिव्याप्तिश्च—तथाविधस्वरूपस्यापि ज्ञानस्याकारकस्य, वा संस्कारकारिणो वा स्मृतिं जनयतो वा संशयमादधानस्य वा विपर्ययमुत्पादयतो वा प्रमाणत्वं प्राप्नोति, फलस्याविशेषितत्वात् ॥

तद्विशेषणाभिधाने पुनः—अश्रुतसूत्रान्तराध्याहारप्रसक्तिः, अव्याप्तिश्च तदवस्थेति न स्वरूपविशेषणपक्षः ॥

नापि सामग्रीविशेषणपक्षः—तत्र हि—इन्द्रियार्थसन्निकर्षोत्पन्नम् इति इन्द्रियार्थसन्निकर्षोत्पन्नं सामग्र्यं इति व्याख्यातव्यम् । ज्ञानं, अव्यपदेश्यम्, अव्यभिचारि, व्यवसायात्मकमिति च तज्जनकत्वादुपचारेण तथा साकल्यं वर्णनीयमिति क्लिष्टकल्पना ॥ समन्वयः । तथा चानेन सूत्रेण संग्राह्यानामप्यसंग्रहप्रसङ्गः । एवं प्रमाजनकस्य यथाऽसंग्रहः तथा प्रमाऽजनकेऽतिव्याप्तिः । संस्कारादीनां प्रमात्वाभावेन तज्जनकं हि न प्रमाणत्वेन संग्राह्यम् । एवं यत् करणं न किञ्चिदपि फलमादधाति तदपि न प्रमाणत्वेन संग्राह्यम् । उक्तं तु स्वरूपलक्षणं तत्र वर्तत इत्यतिव्याप्तिः ॥ § 1313

सामग्र्यमिति । कारणशब्दस्य कार्यशब्दवत्, सामग्रीशब्दस्य सामग्र्यशब्दः प्रतिकोटिभूतः । एतदुक्तं भवति—प्रत्यक्षपदं यद्यपि करणव्युत्पत्त्या सामग्रीपरं वक्तुं शक्यम्, परन्तु सामग्र्याः इन्द्रियार्थसन्निकर्षादिरूपायाः तज्जन्यत्वासंभवेन ज्ञानरूपत्वाभावेन च इन्द्रियार्थसन्निकर्षोत्पन्नज्ञाननिष्ठकार्यतानिरूपकमिति व्याख्येयमिति ॥ § 1314

I.173/KSV

फलविशेषणपक्षोऽपि न सङ्गच्छते—ज्ञानप्रत्यक्षशब्दयोः फलकरणवाचिनोः सामानाधिकरण्यप्रसङ्गात् । असमानाधिकरणप्रमाणलक्षणप्रस्तावात् । प्रत्यक्षं प्रमाणमुच्यते । तच्च करणमिति वर्णितम् । ज्ञानं तु तदुपजनितं फलमिति कथमैकाधिकरण्यम् ? तस्मात् पक्षत्रयस्याप्ययुक्तत्वात् पक्षान्तरस्याप्यसंभवादयुक्तं सूत्रमिति ॥ § 1315

१९ ] वि— nyāma-wit__ka
१९ ] पपाद— nyāma-wit__ka
२७ ] पपन्नम्— nyāma-wit__kha
८ ] योः— nyāma-wit__kha
११ ] युक्तियुक्त— nyāma-wit__kha

## सूत्रार्थसमर्थनम्

अत्रोच्यते—स्वरूपसामग्रीविशेषणपक्षौ तावत् यथोक्तदोषोपहतत्वात् नाभ्युपगम्येते । फलविशेषणपक्षमेव संमन्यामहे । तत्र च यत् वैय्यधिकरण्यं चोदितं, तत् यतः शब्दाध्याहारेण परिहरिष्यामः । यतः एवंविधविशेषणविशिष्टं ज्ञानाख्यं फलं भवति, तत् प्रत्यक्षमिति सूत्रार्थः । इत्थं च न क्वचिदव्याप्तिरतिव्याप्तिर्वा, न काचित् क्लिष्टकल्पना । यतः शब्दाध्याहारमात्रेण निरवद्यलक्षणोपवर्णनसमर्थसूत्रपदसङ्गतिसंभवात् ॥ § 1316

सामानाधिकरण्यप्रसङ्गादिति । फलविशेषणपक्षे ज्ञानपदं प्रत्यक्षपदं च सामान्यविशेषभावापन्नं, अत एव विशेषणविशेष्यभावापन्नं वाच्यमित्यर्थः । अस्तु तथैव, का हानिः ? इत्यत्राह—असमानाधिकरणेति । पूर्वं प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इत्युद्दिष्टानां खलु लक्षणमुच्यते । तत्र च सूत्रे करणवाच्यनुमानादिपदसमभिव्याहृतं प्रत्यक्षपदमपि करणपरमेव । एवं च फलवाचिनो ज्ञानपदस्य, करणवाचिनः प्रत्यक्षपदस्य च कथं विशेषणविशेष्यभावरूपसामानाधिकरण्यसंभव इति भावः ॥ § 1317

यतश्शब्दाध्याहारेणेति । एवमेव वाचस्पतिमिश्रा अपि—अत्र यतः इत्यध्याहृत्य यत्तदोर्नित्याभिसम्बन्धात् तत् प्रत्यक्षम् इति प्रमाणवाचिप्रत्यक्षपदं योजनीयम् इति आहुः तात्पर्यटीकायाम् । निरवद्यलक्षणोपवर्णनसमर्थानि यानि सूत्रघटकपदानि तेषां सङ्गतिसम्भवात् नासाङ्गत्यमित्यर्थः ॥ § 1318
I.174/KSV

## स्वव्याख्याने बीजवर्णनम्

ननु समानाधिकरणे एव ज्ञानप्रत्यक्षपदे कथं न व्याख्यायेते ? किं यतः शब्दाध्याहारेण ? उक्तमत्र—करणस्य प्रमाणत्वात् ज्ञानस्य च तत्फलत्वात् फलकरणयोश्च स्वरूपभेदस्य सिद्धत्वात् ॥ § 1319

तदत्र— § 1320

प्रमाणतायां सामग्र्याः तज्ज्ञानं फलमिष्यते ।
तस्य प्रमाणभावे तु फलं हानादिबुद्धयः ॥ § 1322

## प्रत्यक्षस्य प्रवृत्तिनिवृत्तिहेतुत्वाक्षेपः

ननु स्मृत्याद्यनेकबुद्धिव्यवधानसंभवात् कथमिन्द्रियार्थसन्निकर्षोत्पन्नमालोचनाज्ञानं हानादिफलं भवेत् ? तथा हि— कपित्थादिजातीयमर्थं इन्द्रियादिसन्निकर्षादिसामग्रीत उपलभ्य तद्गतं सुखसाधनत्वमनुस्मर-

१५--१६ ] यद्वि— nyāma-wit__kha

९ ] भ्यते— nyāma-wit__ka

ति—एवंजातीयकेन मम पूर्वं सुखमुपजनितमभूत् इति । ततः स्मृत्यनन्तरं परामर्शज्ञानमस्योपजायते— अयं स कपित्थजातीयः इति । तत उपादेयताज्ञानमुत्पद्यते— यत एष सुखसाधनं कपित्थादिजातीयः पदार्थः, तस्मादुपादेयः इति । अत्रान्तरे प्रथमस्येन्द्रियसन्निकर्षजन्मनः कपित्थालोचनाज्ञानस्य नामापि नावशिष्यत इति कथमस्य तत्फलत्वमिति ॥ § 1323

नन्विति । इदं करणलक्षणपरमिति विस्मृत्य एतत्सूत्रमात्रद्रष्टुरियमाशङ्का ॥ § 1324

प्रमाणतायामित्यादि । प्रमाणपदं करणार्थकत्वे सामग्रीपरम् । भावार्थकत्वे प्रमितिपरम् । तत्राद्ये ज्ञानमेव फलम् । द्वितीये प्रवृत्तिनिवृत्त्यादिनिश्चयः फलमित्यर्थः ॥ § 1325

आलोचनाज्ञानम्—साक्षात्काररूपं सविकल्पकज्ञानम् । हानादिफलं— हानादिफलकम् । उपलभ्येति । इयमुपलब्धिरेव आलोचनाज्ञानम् । तद्गतं— कपित्थगतम् । ततः इत्यस्य विवरणम्—स्मृत्यनन्तरमिति । परामर्शज्ञानमिति । इदमेव शास्त्रे कुत्रचित् विकल्प इत्युच्यते । एष कपित्थादिजातीय इत्यन्वयः । कथमिति । हानोपादानादेरनुमानमूलकत्वात् इत्यर्थः ॥ § 1326

I.175/KSV

## प्रत्यक्षस्य प्रवृत्तिहेतुत्वे वाचस्पतिमतम्

अत्राचार्यास्तावदाचक्षते—साधु चोदितम् । सत्यम्, ईदृश एवायं ज्ञानानां क्रमः । न वयं प्रथममालोचनाज्ञानस्य उपादानादिषु प्रमाणतां ब्रूमः । तथा हि—प्रथममिन्द्रियार्थसन्निकर्षोत्पन्नमालोचनाज्ञानं इन्द्रियार्थसन्निकर्षादिसामग्रीस्वभावस्य प्रत्यक्षस्य प्रमाणस्य फलमेव, न तु स्वयं प्रमाणतां प्रतिलभते; स्मृतिजनकत्वात् । तदनन्तरं हि सुखसाधनत्वानुस्मृतिर्भवतीति सेयमनुस्मृतिरप्रमाणफलमपि सती प्रत्यक्षं प्रमाणं संपद्यते, तथाऽयं कपित्थादिजातीयः इतीन्द्रियविषयपरामर्शोत्पत्तौ इन्द्रियार्थसन्निकर्षेण सह व्याप्रियमाणत्वात् ॥ § 1327

स पुनः परामर्शप्रत्ययः प्रत्यक्षजनितः धूमज्ञानवत् अनुमानं प्रमाणमुच्यते, परोक्षस्याग्नेरिव सुखसाधनसामर्थ्यस्य ततः अवगतेः ॥ § 1328

प्रमाणतां—करणताम् । प्रत्यक्षस्य प्रमाणस्य—इन्द्रियाख्यस्य । स्मृतिजनकत्वादिति । प्रमाणं ह्यनुभवजनकम्; एवञ्च स्मृतिजनकत्वात् आलोचनाज्ञानं इन्द्रियाख्यप्रमाणस्य फलमेव, न तु प्रमाणमित्यर्थः । अप्रमाणफलमपि सती—प्रमाणफलं अभवत्यपि । साक्षात् इन्द्रियाद्यजन्य-

१२ ] त्थ— nyāma-wit__ka
१२--१३ ] त— nyāma-wit__ka
५ ] त्व— nyāma-wit__kha
७ ] शेष— nyāma-wit__kha

मपीत्यर्थः । ननु पूर्वानुभवजनितसंस्कारादुत्पन्नाया सुखसाधनत्वानुस्मृतेः कथं प्रत्यक्षप्रमाणत्वम् ? इति शङ्कायामाह—तथेति । नात्र स्मृतेः प्रत्यक्षप्रमाणत्वमुक्तं, किन्तु अनुस्मृतेः । इदन्तांशे तस्याः प्रत्यक्षत्वं वर्तत एव इन्द्रियसापेक्षत्वात् । प्रत्यभिज्ञा ह्यनुस्मृतिः । प्रत्यभिज्ञा च प्रत्यक्षमेवेत्यर्थः । इन्द्रियेत्यादि । इन्द्रियविषयवस्तुविषयकपरामर्शेत्यर्थः ॥ § 1329

स पुनरित्यादि । धूमज्ञानं यथा वह्न्यनुमितिहेतुः, तथा सोऽयं कपित्थजातीयः इति परामर्शः सुखसाधनसामर्थ्यानुमितिहेतुर्भवतीत्यर्थः । प्रत्यक्षजनितः—सुखसाधनत्वानुस्मृतिजनितः । परंपरया प्रत्यक्षजनितो वा । स्वानुभवजनित इति यावत् । तथा च उपादानादिषु सुखसाधनत्वानुस्मृतिः प्रत्यक्षं प्रमाणं, परामर्शश्चानुमानरूपं प्रमाणमिति विवेकः । प्रकृते उपादेयं वस्तु ऐन्द्रियिकं, अनुमानस्थले तु तत् परोक्षमिति विशेषः अनन्तरवाक्येषु
I.176/KSV स्पष्टः ॥

यद्यपि न काचिदतीन्द्रिया शक्तिरस्मन्मते विद्यते; तथाऽपि स्वरूपसहकार्यादिदृष्टादृष्टकारणसमूहसन्निधानस्वभावमपि सामर्थ्यमतीन्द्रियमेव ॥

तस्मादेष कपित्थादिजातीयोऽर्थः सुखसाधनमिति वह्निमत्पर्वतप्रतीतिवत् तज्जातीयलिङ्गकमानुमानिकमिदं ज्ञानम् । तदिदमनुमानफलमपि सुखसाधनत्वनिश्चयात्मकं ज्ञानं इन्द्रियविषये कपित्थादावुपादेयज्ञानं इन्द्रियार्थसन्निकर्षेण सह जनयत् प्रत्यक्षं प्रमाणं भवति । तदेव च हृदि व्यवस्थाप्य भाष्यकृत् वभाषे—यदा ज्ञानं वृत्तिः तदा हानोपादानोपेक्षाबुद्धयः प्रमितिः इति ॥

### आलोचनाज्ञानं मुख्यं प्रमाणमेव

व्याख्यातारस्तु ब्रुवते—नायमीदृशो ज्ञानानां क्रमः; आद्यमालोचनाज्ञानं सुखसाधनत्वानुस्मृतिं उपजनयतीति—सत्यम्— स्मृत्या च तस्य विनश्यत्ता; विनश्यदवस्थं चेन्द्रियविषये कपित्थादौ सुखसाधनत्वनिश्चयमादधाति, सुखसाधनत्वज्ञानमेव चोपादेयताज्ञानमुच्यते, नान्यत् । परामर्शस्तु न कश्चिदन्तराले संवेद्यते । ननु कथं सुखसाधनसामर्थ्यं भवन्मतेऽनुमेयम् ? अतीन्द्रियस्य शक्त्यपरपर्यायस्य सामर्थ्यस्यानभ्युपगमादिति आशङ्क्य समाधत्ते—यद्यपीत्यादि । अतीन्द्रियधर्माधर्मादिघटितत्वात् सामग्र्याः अतीन्द्रियमेव सामर्थ्यमित्यर्थः ॥ § 1330

ननु तर्हि प्रवृत्तिहेतुः अनुमानमेवेति प्रत्यक्षस्य प्रवृत्तिहेतुत्वं न सिद्धमेवेत्यत्राह—तदिदमिति । अस्य ज्ञानेऽन्वयः । इन्द्रियविषय इति । इदं ममोपादेयमिति हि उपादेयताज्ञानं; तच्च प्रत्यक्षकपित्थविषयमेवेति इन्द्रियार्थसन्निकर्षापेक्षा वर्तत एवेति हानोपादानयोः इन्द्रियं प्रमाणं भवत्येवेति । बभाष इति । प्रमाणविभागसूत्र इति शेषः । वृत्तिः—व्यापारः ॥
§ 1331

स्मृत्या—सुखसाधनत्वानुस्मृत्या । तस्य—आलोचनाज्ञानस्य । विनश्यत्ता—योग्यविभुविशेषगुणानां स्वोत्तरोत्पन्नगुणनाश्यत्वनियमादित्यर्थः । पराम-

३३ ] पेक्षे— nyāma-wit__kha इति—?? पूर्वपुटात्
१५६.४--१५७.१९ ] ---Note :

र्शः—सोऽयं कपित्थजातीयः इत्येवंरूपः पूर्वोक्तः । अन्तराले— आलोचनाज्ञान-उपादेयताज्ञानयोर्मध्ये ॥ § 1332
I.177/KSV

तदेव साध्यं दर्शितम् । इन्द्रियार्थसन्निकर्षजनितमुपादेयताज्ञानफलकं अवकल्पते—इति किमसंवेद्यमानज्ञानकन्थाकल्पनेनेति ॥ § 1333

ननु ! परामर्शोऽनुभूयत एव, न तु कल्प्यते । धूमज्ञानानन्तरमविनाभावं यत्र धूमस्तत्राग्निः इत्यनुस्मृत्य पराभृशति तथा चायं धूमः इति । असति तु परामर्शे न लिङ्गज्ञानं लिङ्गिनि प्रमाणतां प्रतिपद्येत; स्मरणजनकं हि तत् । न च स्मृतिजनकं प्रमाणमिष्यते । स्मरणानन्तरं च लिङ्गप्रतीतिर्भवन्ती नोपलभ्यानुवादेन भवेत्— अयमग्निमान् इति ॥ § 1334

अपि च तथा च कृतकः शब्दः इति यत् उपनयवचनमवयवेषु पठ्यते, तस्य किं वाच्यं भविष्यति परामर्शापलापवादिनाम् । स्वप्रतिपत्तिवच्च परप्रतिपत्तिरवयवैर्जन्यते इति वक्ष्यामः । तस्मादप्रत्याख्येयः परामर्श इति ॥ § 1335

कल्पनायां खलु दोषः । अनुभवात् सिद्धौ न वयं अपराधिन इत्याशयवान् शङ्कते—नन्विति । कुतः प्रमाणतां न प्रतिपद्येतेत्यत्र हेतुः—स्मरणजनकमिति । तत्—लिङ्गज्ञानम् । लिङ्गज्ञानं हि एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम् इतिरीत्या स्वव्यापकत्वरूपसम्बन्धिनः वह्नेः स्मृतिजनकं सत् व्याप्तिस्मृतिजनकम् । स्मृतिजनकं च लिङ्गज्ञानं न प्रमाणं भवितुमर्हति, अनुभवजनकस्यैव प्रमाणत्वात् । विवेचितं चैतत् पूर्वमेव । अतः पूर्वोत्पन्नं लिङ्गज्ञानं न प्रमाणम् । किन्तु व्याप्तिस्मरणानन्तरमेव लिङ्गस्य प्रतीतिः कल्पनीया । सैव लिङ्गपरामर्श इत्युच्यत इति मध्ये परामर्शकल्पनमावश्यकमेवेति । उपलभ्येति । लिङ्गप्रतीतिः अयमग्निमान् इतिरीत्या अनुमेयं वस्तु पूर्वमेव प्रदर्शयन्ती न भवेत्, किन्तु वह्निजातीयव्याप्यधूमजातीयवानयं इत्येव भवेत् । न च तावता प्रकृतेष्टसिद्धिरिति भावः ॥ § 1336

ननु परार्थानुमानमिदमुच्यते भवद्भिः । वयं तु स्वार्थानुमाने ब्रूमः इति चेत् तत्राह—स्वप्रतिपत्तिवच्चेति ॥ § 1337
I.178/KSV

## परामर्शस्य अनपेक्षता

अत्र वदन्ति— § 1338

न तावदन्तरा कश्चित् परामर्शोऽनुभूयते ।

१९ ] शान— nyāma-wit_ka
२० ] मर्शशानम्— nyāma-wit_kha
२७ ] परा— nyāma-wit_kha

अनुमेयमितेः पूर्वं ऊर्ध्वं च नियमस्मृतेः ॥ २ ॥§ 1340

अत एवार्थमालोक्य विनैव हि दवीयसा ।
विलम्बेन व्यवस्यन्ति ग्रहणादिषु लौकिकाः ॥ ३ ॥§ 1342

लिङ्गज्ञानं च विनश्यदवस्थमनुमेयप्रतीतौ व्याप्रियमाणं प्रमाणतां प्रतिपत्स्यते । तत्कृतैवोपलभ्यानुवादेन लिङ्गबुद्धिर्भविष्यति । तस्मात् कपित्थादिपदार्थदर्शनस्य परामर्शसोपानमनारोहत एवोपादेयज्ञानफलता वक्तुं युक्तेति ॥ § 1343

अपि च अनुमेयविषये वह्न्यादौ सुखसाधनत्वानुस्मृतिकृतमुपादेयताज्ञानं तव न समस्त्येव । ततश्च तत्रापि तथा चायं ज्वलनजातीयः इतिपरामर्शो भवताऽभ्युपेय एव । स च किंकरणकः ? इति निरूपणीयम् । न तावदिन्द्रियद्वारकः, पावकस्य परोक्षत्वात् । शब्दोपमाने त्वाशङ्कितुमपि तत्र न युक्ते । § 1344

अनुमेयमितिः—अनुमेयविषये मितिः, अनुमितिरिति यावत् । दवीयसा—अधिकेन विलम्बेन विनैव—विलम्बं विनैव ग्रहणादिषु—उपादानादिषु, आदिना हानपरिग्रहः । तथा च प्रत्यक्षस्थले अनुमानस्थल इव न विलम्बोऽनुभूयत इति ऐन्द्रियिकमेवोपादेयताज्ञानम् । अन्यथा अनुमित्यधीनोपादेयताज्ञानात् प्रत्यक्षस्थले वैलक्षण्यं दुर्वचं स्यादिति ॥ § 1345

तत्कृतैव—तादृशप्रमाणत्वकृतैव ॥ § 1346

न समस्त्येवेति । प्रत्यक्षे प्रथमं वस्तुग्रहणमात्रं, सुखसाधनत्वनिर्णयश्च परामर्शाधीन इति यथोच्यते, तथा अनुमितिस्थलेऽपि अनुमानेन धर्मिमात्रं गृह्यते । इष्टसाधनत्वनिर्णयश्च पाश्चात्य इति खलु वक्तव्यम् । एवञ्चानुमित्या हानोपादानादिकं न स्यादेवेति । नन्वेतदिष्टमेव, यतः तत्रानुमानान्तरद्वारैव प्रवृत्त्यादिरित्यत्राह ततश्चेति । न युक्ते इति । शब्दस्योपस्थित्यभावेन, उपमानस्य शक्तिग्राहकत्वेन चेति शेषः । ननु अग्नेः परोक्षत्वेऽपि प्रत्यक्षो धूम एव प्रथमं वह्निं, ततस्तस्य सुखसाधनत्वं चावगमयतीति न दोष इति
I.179/KSV शंकते—

धूमाख्याल्लिङ्गादेव स उत्पद्यत इति चेत्—न—लिङ्गस्य परामर्शाविषयीकृतस्यानुमेयमितिजनननैपुण्यानभ्युपगमात् । धूमावमर्शस्य तदानीमतिक्रान्तत्वात् । तथा हि—प्रथमं लिङ्गज्ञानं, ततो व्याप्तिस्मरणम्, ततो धूमपरामर्शः, ततो वह्निज्ञानम्, तेन धूमपरामर्शस्य विनश्यत्ता, ततोऽग्नौ सुखसाधनत्वानुस्मरणम् । तदा च धूमपरामर्शस्य विनाश एवेति तस्मिन् विनष्टे न केवलो धूमस्तदानीमनलपरामर्शं जनयितुमुत्सहते ॥

अग्नौ सुखसाधनत्वानुस्मरणानन्तरं पुनः धूमज्ञानं इन्द्रियादुत्पद्यत इति

---

११ ] मे— nyāma-wit__kha
१८ ] ज्ञानं— nyāma-wit__ka
१९ ] तथा च— nyāma-wit__kha
२० ] यः— nyāma-wit__ka

चेत्—मैवम्—अननुभवात् । भवतु वा धूमज्ञानम्, तथाऽपि धूमज्ञानानन्तरं पुनर्व्याप्तिस्मृतिः पुनः धूमपरामर्शश्चावश्यं भवेत्, इत्यत्रान्तरे हुतभुजि सुखसाधनत्वानुस्मृतिरतिक्रान्तेति तत्सहायपरामर्शजन्यसुखसाधनत्वनिश्चयोत्पादो न स्यात् । सुखसाधनत्वानुस्मरणेन हि विनश्यदवस्थेन जन्यमानः प्रत्यक्षविषयोऽसौ दृष्ट इति ॥ धूमेति । लिङ्गस्य—लिङ्गस्वरूपस्य । अनभ्युपगमात् । परामृश्यमानलिङ्गस्यैवानुमितिकरणत्वात् इत्यर्थः । ननु प्रथममेव परामर्शस्य निष्पन्नत्वेन परामृश्यमानं लिङ्गमस्त्येवेति का हानिरित्यत्राह—धूमावमर्शस्येति । तदा— सुखसाधनत्वानुस्मरणकाले । केवलः—परामर्शाविषयः । अनलपरामर्शे— तथा चायं ज्वलनजातीयः इति परामर्शे उपादेयत्वहेतुभूतम् ॥ § 1347

ननु पूर्वधूमज्ञानस्य नाशेऽपि ज्ञानान्तरं कल्प्यत इति शङ्कते— अग्नाविति । इन्द्रियादिति । न हि स्मरणस्य मध्ये संभवः, तस्योद्बोधकाद्यपेक्षत्वादित्याशयः । अननुभवात् पुनः ज्ञानान्तरस्याननुभवात् । ननु फलबलेन कल्प्यताम्, अनुभवस्त्वतिसूक्ष्मः विना शपथं न हि निरसितुं शक्य इत्यत्राह—भवतु वेति । व्याप्तिस्मृतिरिति । सुखसाधनत्वाकारविशिष्टवह्निव्याप्तिस्मृतिरित्यर्थः । अतिक्रान्तेति—सुखसाधनत्वानुस्मृत्यनन्तरं खलु पुनः धूमज्ञानादिपरंपरा कल्पितेति परामर्शकाले तादृशानुस्मृतिनाशोऽनिवार्य एवेति भावः ॥ § 1348

I.180/KSV

## परामर्शस्य अवसरोऽपि नास्ति

अथ मन्यसे न तदानीं पुनर्धूमज्ञानव्याप्तिस्मरणतत्परामर्शोत्पादादिज्ञानशृङ्खलाऽभ्युपेयते, किन्तु प्राक्तन एव धूमपरामर्शः कृशानौ सुखसाधनत्वानुस्मरणानन्तरं स्मरिष्यते; तेन स्मृतिविषयवर्तिना सता तथा चायमग्निजातीयः इति ज्वलनपरामर्शो जनयिष्यते इति—एतदप्ययुक्तम्—अग्निज्ञानानन्तरं युगपत्स्मरणद्वयोदयप्रसङ्गात्—तदैव सुखसाधनताऽनुस्मृतिः, तदैव धूमपरामर्शस्मृतिरिति । न हि क्रमोत्पादे किञ्चित्कारणमस्ति । ज्ञानयौगपद्यं च शास्त्रे प्रतिषिद्धम् ॥ § 1349

## परामर्शस्य दुर्घटता

---

१८ ] मर्शज्ञान— nyāma-wit__kha
१८ ] न्या— nyāma-wit__ga
२० ] ये— nyāma-wit__kha

१ ] नेदानीं— nyāma-wit__ka
१ ] दित— nyāma-wit__ka

भवतु वा क्रमोत्पादः; तथाऽपि स्मरणद्वयसमनन्तरमुपजायमानः पावकपरामर्शो नोपलभ्यानुवादेन जायते । क्रमपक्षेऽपि च वह्निज्ञानानन्तरं तद्गतसुखसाधनत्वानुस्मरणमेव पूर्वं भवेत्, ततो धूमपरामर्शस्मरणम्, तेन तस्य विनश्यत्ता, ततोऽग्नौ तज्जातीयत्वपरामर्शः, तेन सुखसाधनत्वस्मृतेर्विनाश एवेति पुनरपि सा विनष्टा § 1350

स्मृतिविषयवर्तिनेति । सुखसाधनत्वाकारविशिष्टेन चेत्यर्थः । स्मरणद्वयमित्युक्तं; किं तत् द्वयम् ? इत्यत्राह—तदैवेति । अग्निज्ञानानन्तरक्षण एवेत्यर्थः । अस्तु तर्हि क्रमेणैव स्मरणद्वयोत्पत्तिरित्यत्राह—न हीत्यादि । अग्निज्ञानानन्तरक्षणे सुखसाधनत्वस्मृतिस्तु सम्मत एव, धूमपरामर्शसंस्कारस्य सत्वेन धूमपरामर्शस्मृतिरपि तदैव भवेदिति कथं क्रमः नियम्यत इति । ननु अस्तु यौगपद्यं स्मृतिद्वयस्येत्यत्राह—ज्ञानेति । एतत्तत्वं च मनःप्रकरणे स्पष्टीभविष्यति ॥ § 1351

ननु संस्कारस्य सत्त्वमात्रान्न स्मरणोत्पत्तिः; किन्तु उद्बोधकसमवधानादेव । अदृष्टादीनामप्युद्बोधककोटिप्रविष्टत्वेन तत्समवधानाऽसमवधाने कार्यानुमेये इति शङ्कायामाह—भवतु वेति । उपलभ्येति । अनुमितवह्निव्यक्त्यन्तर्भावेनेत्यर्थः । पूर्वं भवेदिति । अनलार्थिनः खलु धूमदर्शनात् वह्न्यनुमितिः । तस्य च प्रथमं सुखसाधनत्वस्मरणमेव जायेत । एवञ्च न
I.181/KSV प्रकृतेष्टसिद्धिरिति ।

सती सुखसाधनत्वनिश्चयजन्मनि न व्याप्रियेतेति । न च धूमलिङ्गानुमितवह्निज्ञानानन्तरं धूमस्मरणमुचितम्, अनलमुपलभ्य हि तद्गतसुखसाधनत्वमनुस्मरति लोकः, न धूममिति ।

तेनानुमानविषये परामर्शोऽतिदुर्घटः ।
प्रत्यक्षविषयेऽप्येवं, किमनेन शिखण्डिना ? ॥ ४ ॥ § 1354

## उपनयवाक्यस्य सार्थक्यम्

यत्पुनः—उपनयवचनमभिधेयरहितमप्रयोज्यं प्रसज्यत इति परिचोदितम्—तत्—अवयविप्रसङ्ग एव १० आह्निके निरूपयिष्यामः । तस्मादन्तरावर्तिनः परामर्शज्ञानस्याभावात् आद्यमालोचनाज्ञानमेव हेयादिज्ञानफलं यथोक्तरीत्या भविष्यतीति ॥

## सुखसाधनत्वनिश्चयः प्रत्यक्षरूपोऽपि भवत्येव

ननु च ! प्रत्यक्षफलमिह मीमांस्यं वर्तते, स चायं सुखसाधनत्वाल्लिङ्गादुद्गम्यमानः आनुमानिक इति न प्रत्यक्षफलतामवलम्बते— सत्यमेतत्—किन्तु सम्बन्धग्रहणसमये सुखसाधनत्वनिश्चयः प्रत्यक्षजनितोऽपि समस्ति, यतोऽनुमानं प्रवर्तते; महानसादौ धूमाग्नि- निश्चयजन्मनि—निश्चयोत्पत्तौ । वस्तुतस्तु वह्निनिश्चयानन्तरं पुनः धूमस्मरणकल्पनमप्ययुक्तमित्याह—न चेति । उपसंहरति—तेनेति । एवमिति । अनुमानस्थले मध्ये परामर्शमन्तराऽपि प्रवृत्तिनिर्वाहे प्रत्यक्षस्थलेऽपि किं परामर्शकल्पनयेति

भावः । शिखण्डिना—नपुंसकेन-प्रयोजनरहितेनेति यावत् । परामर्शेणेति शेषः ॥ § 1355

अप्रयोज्यं—प्रयोक्तुमनर्हम् ॥ § 1356

ननु अनुमानस्थले यथा तथा वाऽस्तु, प्रत्यक्षे तु न तथा वक्तुं शक्यमिति शङ्कते—नन्विति । प्रत्यक्षस्य फलमिति विग्रहः । न हि सुखसाधनत्वं प्रत्यक्षग्राह्यो धर्मः । प्रतिपुरुषं सुखस्य वैचित्र्येण, तस्य वस्तुधर्मत्वासंभवात् । अतः पूर्वं तज्जातीयं वस्तु सुखसाधनत्वेनानुभूय तज्जातीयत्वलिङ्गात् खलु पुरोवर्तिनि सुखसाधनत्वं निश्चिनोति । अतस्तत्र परामर्शादिकमावश्यकमेवेति शङ्काशयः । सत्यमिति । अयमाशयः—कुत्रचित् प्रत्यक्षस्थलेऽनुमानात्सुखसाधनत्वनिश्चयेऽपि सर्वत्राप्येवमिति न निर्बन्धः । अन्यथा तादृशानुमितिहेतुभूतस्य व्याप्तिग्रहणस्यैव दुर्घटत्वात् । महानसादौ प्रत्यक्षतः I.182/KSV

दर्शनवत् । अतः सम्बन्धग्रहणकालभाविनं सुखसाधनत्वनिश्चयं चेतसि विधाय भाष्यकारस्तत्फलत्वंप्रत्यक्षज्ञानस्य वर्णितवान् इति ॥

**प्रत्यक्षेण सुखसाधनत्वनिश्चयाक्षेपः, समाधानं च**

ननु ! सम्बन्धग्रहणकालेऽपि सुखसाधनत्वशक्तेरतीन्द्रियत्वात् कथं प्रत्यक्षगम्यता ? तज्जातीयत्वाल्लिङ्गादेव तदाऽपि तद्ग्रहणे इष्यमाणे ततः पुनः सम्बन्धग्रहणादनवस्था । सुखादेव कार्यात् तदा तदवगम इति चेत्, तदाऽपि नाज्ञातसम्बन्धमवगतिजननसमर्थमिति तत्संबन्धग्रहणवेलायामपि शक्तिग्रहणे प्रत्यक्षस्याक्षमत्वात् अनुमानान्तरापेक्षायामनवस्था तदवस्था—उच्यते—

न खल्वतीन्द्रिया शक्तिः अस्माभिरुपगम्यते ।
यया सह न कार्यस्य सम्बन्धज्ञानसंभवः ॥ ५ ॥ § 1359

स्वरूपसहकारिसन्निधानमेव शक्तिः, सा च सुगमैव ॥

**सिद्धान्ते शक्तेरैन्द्रियिकत्वसंभवः**

ननु ! सहकारिणां मध्ये अदृष्टमप्यनुप्रविष्टम् । न च तत् प्रत्यक्षगम्यम्, अतीन्द्रियत्वाद्धर्मस्येति साऽपि न सुगमा शक्तिः— नैतत्—न धर्मादि शक्तित्वादतीन्द्रियम्; अपि तु तत् नैसर्गिकमेव । जगद्वैचित्र्येण तदनुमानं वक्ष्यामः । तदेवं तदितरसहकारिस्वरूप- गृहीतव्याप्तिकस्यैव पर्वतादौ वह्न्यनुमितिसंभवः । यदि व्याप्तिग्रहणमप्यनुमानात्, तर्ह्यनवस्था । अतः यत्रकुत्रचित् सुखसाधनत्वं प्रत्यक्षेण गृह्यत एवेति वक्तव्यम् । तदभिप्रायेण भाष्यं प्रवृत्तमिति ॥ § 1360

व्याप्त्याख्यसम्बन्धग्रहणकालेऽपि यद्यनुमानादेव सम्बन्धग्रहणं, तर्ह्यनवस्थेति दूषणं न युक्तम्, यतः प्रत्यक्षेण सम्बन्धग्रहणमेव न संभवतीति शङ्कते— नन्विति । तदापि—सम्बन्धग्रहणकालेऽपि । ननु तज्जातीयत्वाल्लिङ्गान्न

२६ ] काल— nyāma-wit__ka
२७ ] स्तत्फलं— nyāma-wit__kha
५ ] सु— nyāma-wit__ka
५--६ ] ध— nyāma-wit__ka

सुखसाधनत्वशक्त्यनुमानं, किन्तु सुखरूपकार्यादेव तत्कारणभूतशक्तेरनुमानं ब्रूम इति शङ्कते—सुखादेवेति । अक्षमत्वात्—शक्तेरतीन्द्रियत्वेनेति शेषः ॥ § 1361

साऽपि—अनतिरिक्ताऽपि । अस्य शक्तिरित्यत्रान्वयः । तदितरेति । अदृष्टादिकं कार्यसामान्यकारणम् । न तस्य प्रत्येकानुमानेन कारणत्वं I.183/KSV ग्राह्यम्,

सन्निधानात्मिकायाः शक्तेः प्रत्यक्षग्राह्यत्वसंभवात् उपपन्नं तज्जातीयत्वलिङ्गस्य संबन्धग्रहणम् ॥

### मानसप्रत्यक्षेण सुखसाधनत्वनिश्चयसंभवः

ननु ! कपित्थादिकार्यस्य सुखस्येदानीं न चक्षुर्ग्राह्यत्वमिति तत्सम्बन्धिग्रहणाभावात् कथं चाक्षुषप्रत्ययगम्यः सम्बन्धः ? न चाक्षुषगम्यः सम्बन्धः, किन्तु मानसप्रत्यक्षगम्यः ।

सुखादि मनसा बुध्द्वा कपित्थादि च चक्षुषा ।
तस्य कारणता तत्र मनसैवावगम्यते ॥ ६ ॥§ 1364

### मनसा सुखसाधनत्वग्रहणेऽतिप्रसङ्गपरिहारः

ननु च ! मनसा कपित्थादेः सुखसाधनत्वग्रहणाभ्युपगमे बाह्यविषयप्रमितिषु मन एव निरङ्कुशं करणमिदानीं संवृत्तमिति कृतं चक्षुरादिभिः । अतश्च न कश्चिदन्धो वा बधिरो वा स्यात्— नैष दोषः—प्रथमप्रवृत्तसमनस्कवाह्येन्द्रियजनितविज्ञानविषयीकृतवपुषो वाह्यस्य वस्तुनो मनोग्राह्यत्वाभ्युपगमात्, तस्यैव नियामकत्वात् नोच्छृङ्खलमन्तःकरणं बाह्यविषये प्रवर्तते ॥ धर्मिग्राहकानुमानग्राह्यत्वात् । अतः तद्व्यतिरिक्तसहकारिसन्निधानमेवात्र ग्राह्यम् । तस्य च प्रत्यक्षत्वं संभवत्येवेति । सम्बन्धग्रहणमिति । प्रत्यक्षेणेति शेषः ॥ § 1365

ननु कपित्थं हि चाक्षुषं, सुखं त्वचाक्षुषम् ? कथमुभयोः कार्यकारणभावरूपसम्बन्धः चक्षुर्गम्यः ? सम्बन्धिनोरग्रहणे च कथं सम्बन्धग्रहणमिति शङ्कते—नन्विति । ननु मानसत्वं वा कथम् ? सुखस्य मानसत्वेऽपि कपित्थस्य मानसत्वाभावात्, इत्यत्राह—सुखादीति ॥ § 1366

कपित्थादेः—कपित्थादिनिष्ठस्य । कृतमित्यादि । सुखसाधनत्वं हि कपित्थधर्मः, अत एव बाह्य इति तस्य मनसा ग्रहणे, तद्वदेव सर्वमपि बाह्यं मनसा गृह्येत चेत् बाह्येन्द्रियाणि व्यर्थान्येवेति । अतश्चेति । चक्षुरिन्द्रियविनाशेऽपि मनसा रूपग्रहणे को वाऽन्धः स्यादित्यर्थः । समनस्केति । I.184/KSV मनस्सहकृतेत्यर्थः । अयं भावः—मनः सर्वथा न बाह्ये विषये

### सर्वत्र सुखसाधनत्वं न मानसं भवितुमर्हति

ननु च ! सम्बन्धग्रहणकाले यदि मानसेन प्रत्यक्षेण सुखसाधनत्वाव-

२३ ] स— nyāma-wit__kha
२५ ] य— nyāma-wit__ka
३३ ] नाश्— nyāma-wit__kha

धारणं, तर्हि तत्काल इव व्यवहारकालेऽपि मानसप्रत्यक्ष एव सुखसाधनत्वनिश्चयोऽस्तु, किं तज्जातीयत्वलिङ्गापेक्षणेनेति— मैवम्—शब्दलिङ्गेन्द्रियाद्युपरतौ केवलमन्तःकरणं करणं कल्प्यते, परिदृश्यमानायाः प्रतीतेरपह्नोतुमशक्यत्वात् । लिङ्गाद्युपायान्तरसंभवे तु यदि मन एव केवलं कारणमुच्यते तन्मानसमेवैकं प्रमाणं स्यात्, न चत्वारि प्रमाणानि भवेयुरित्यलं प्रसङ्गेन ॥

तस्मात् सम्बन्धग्रहणकाले यत्तत्कपित्थादिविषयमक्षजं ज्ञानं तत् उपादेयादिज्ञानफलमिति भाष्यकृतश्चेतसि स्थितम् । सुखसाधनत्वज्ञानमेवोपादेयादिज्ञानमित्युक्तम् ॥

## प्रमाण-फलयोरभेदवादिमतम्

आह—किमर्थमयमीदृशः क्लेश आश्रीयते ? प्रमाणादभिन्नमेव फलमस्तु ! तदेव चक्षुरादिजनितं कपित्थादिपदार्थदर्शनं विषयप्रकाशेन व्याप्रियमाणमिवाभातीति करणमुच्यताम्, तदेव विषयानुभवस्वभावत्वात् फलमिति कथ्यताम् । इत्थं च प्रमाणफले न भिन्नाविकरणे भविष्यतः, अन्यत्र प्रमाणं, अन्यत्र फलमिति । तदुक्तम् प्रमाणसमुच्चये—९—

सव्यापारप्रतीतित्वात् प्रमाणं फलमेव सत् इति ॥ प्रवर्तत इति न वक्तुं शक्यम्, घटादिविषयकस्मरणादीनामनुपपत्तेः । अतः प्राथमिकग्रहणमेव केवलेन मनसा न संभवतीति वक्तव्यमिति प्रकृते न दोष इति ॥ § 1367

व्यवहारकाले—हानोपादानादिव्यवहारकाले । गत्यन्तरासंभव एवायं न्याय इत्याह—मैवमिति । इन्द्रियादीत्यादिना उपमानपरिग्रहः ॥ § 1368

उपादेयादिज्ञानं—उपादेयत्व-हेयत्वप्रकारकज्ञानम् ॥ § 1369

दिङ्नागोक्तमनुवदति—आहेति । ननु प्रमाणं च सिद्धरूपं, फलं तु साध्यस्वरूपम् । तदुभयमेकं कथं भवेत् ? इत्यत्राह—तदेवेति । अस्य दर्शनमित्यनेनान्वयः । विषयमुखतः दर्शनं करणं, स्वरूपतस्तु फलं भवतीत्यर्थः । सव्यापारेति । प्रमाणत्वोपचारस्तु निर्व्यापारे न विद्यते I.185/KSV

तदिदमनुपपन्नम्—प्रमाणस्य स्वरूपहानिप्रसङ्गात् । करणं हि प्रमाणमुच्यते—प्रमीयते चानेनेति । न च क्रियैव क्वचित् करणं भवति । क्रियायां साध्यायां कारकं किमपि करणमुच्यते । तत्र यथा दात्रेण चैत्रः शालिस्तम्बं लुनाति इति कर्तृकर्मकरणानि क्रियातो भिन्नान्युपलभ्यन्ते, तथेहापि चक्षुषा घटं पश्यति इति दर्शनक्रियातः पृथग्भाव एव तेषां युक्तः, न दर्शनं करणमेवेति । प्रमा, प्रमाणमिति तु फले प्रमाणशब्दस्य साधुत्वाख्यानमात्रं; कृतिः, करणं इतिवत् ॥

## प्रमाणफलयोः सामानाधिकरण्यं नाम किम् ?

यत्तु—न भिन्नाधिकरणे प्रमाणफले इत्थं भविष्यतः इति— सेयमपूर्ववाचोयुक्तिः । किमत्राधिकरणं विवक्षितम् ? यदि ताव- इत्युत्तरार्धं ज्ञेयम्

५ ] चै— nyāma-wit__ka

५ ] स्तम्भं— nyāma-wit__ka

११ ] भि— nyāma-wit__ka

। अत्रैवं वृत्तिः—व्यापारेण सह प्रतीतत्वादित्यर्थः । अत्र प्रमाणत्वोपचार-निमित्तं प्रमाणफलमेव भवतीति प्रमाणप्रतीतिः फलम् । अत्र बाह्यानां यथा प्रमाणात् फलं अर्थान्तरं तथा न भवति इति । ज्ञानं विनाऽर्थस्य, अर्थं विना ज्ञानस्य चाननुभवात् अन्यतरपारिशेष्ये आवश्यके अन्तरङ्गेन ज्ञानेनैव सर्वनिर्वाहे, विषयाभिमुखं तदेव प्रमाणं, स्वाभिमुखं तु फलमिति हार्दं आशयः ॥ § 1370

प्रमाणफलयोर्भेदं सनिदर्शनमुपपादयति—तदिदमित्यादि । क्रियातः—लवनरूपक्रियातः । तेषां—कर्तृकर्मकरणानाम् । ननु तर्हि करणार्थव्युत्पन्नस्य प्रमाणपदस्य प्रमापदस्य च समानो निर्देशः कथमित्यत्राह—प्रमेति । साधुत्वाख्यानमात्रमिति । फलेऽपि प्रमाणशब्दः प्रयुक्तः साधुरेव । न तावता फलकरणयोरभेदसम्भवः । व्युत्पत्तिवैचित्र्येण एकस्य पदस्यार्थद्वयसाधारण्येऽपि नार्थद्वयैक्यं संभवति । यथा—स्त्रियां क्तिन् इति सूत्रेण भावार्थक्तिनन्तः कृतिशब्दः, ल्युट् च इतिविहितभावार्थकल्युडन्तकरणशब्देन समानार्थकोऽपि करणार्थकल्युडन्तकरणशब्देन समानार्थो न हि भवति । तथा प्रकृतेऽपि भावार्थकल्युडन्तप्रमाणशब्दस्य भावार्थकाङन्तप्रमाशब्दस्य च समानत्वेऽपि करणार्थकल्युडन्तप्रमाणशब्दस्य न समानत्वमिति भावः ॥ § 1371

यत्त्वित्यादि उक्तिदूषणम् । अयं सङ्ग्रहः—फलं करणं च भिन्नविषयकं
I.186/KSV न भवतीत्यर्थः ? उत भिन्नाश्रयं न संभवतीत्यर्थः ? आद्ये इष्टापत्तिः ।

द्विषयः ? तदस्त्येवैकविषयत्वम् । यद्विषयं हि दर्शनम्, स एव चक्षुरादेः करणस्य विषयः । आश्रयोऽस्त्वधिकरणमिति बौद्धगृहे तावदवाचको ग्रन्थः । क्षणिकत्वेन सर्वकार्याणां निराधारत्वात् ॥

अस्मत्पक्षे तु भिन्नाश्रययोरपि फलकरणभावः पाककाष्ठयोर्दृष्टः । तथा चक्षुर्ज्ञानयोरपि भविष्यतीति । क्वचित्तु भिन्नयोरपि ज्ञानयोः फलकरणत्वेन स्थितयोः लिङ्गलिङ्गिज्ञानयोरिव विशेषणविशेष्यज्ञानयोरिव चैकात्म्याश्रवत्वमस्ति । न त्वनेन समानाश्रयत्वेन प्रयोजनम्, चक्षुरादावनिर्वहणात् ॥

अथ एकफलनिष्पत्तौ व्यापारसमानाश्रयत्वमुच्यते, तदपि भवतु कारकान्तराणां; न तु फलस्वभावस्य ज्ञानस्य फलनिष्पत्तौ व्यापारः संभवति ॥

यदपि सव्यापारप्रतीतित्वादित्युच्यते—तदपि प्रमाणफलयोर्भिन्नतामेव सूचयति । न हि स्वरूपनिष्पत्तौ सव्यापारत्वमुपपद्यते; अपि तु पृथग्भूतफलनिर्वृत्तावेवेति ॥ इन्द्रियस्य ज्ञानस्य च एकविषयत्वात् । न द्वितीयः, बौद्धमते उभयाश्रयस्य एकस्य वस्तुनः अनङ्गीकारात् इति ॥ § 1372

१ ] ला— nyāma-wit__ka
४ ] रः— nyāma-wit__kha
५--८ ] निष्पत्तौ—
nyāma-wit__kha
९ ] वृ— nyāma-wit__ka

ननु व्यधिकरणयोः प्रमाप्रमाणयोर्वा साध्यसाधनभावः कथमित्यत्राह— अस्मत्पक्षे त्विति । एवं भिन्नाश्रययोः साध्यसाधनभावमुक्त्वा भिन्नविषययोः समानाश्रययोरपि तमाह—क्वचिदिति । एकात्म्येति । एकात्मवृत्तित्वमिति यावत् । किन्तु एतादृशं समानाश्रयत्वं निरुपयोगीत्याह—न त्वनेनेति । चक्षुरादामिति । भिन्नाधिकरणकर्याः चक्षुर्दर्शनयोः साधनसाध्यभावदर्शनादित्यर्थः ॥ § 1373

व्यापारसमानाश्रयत्वमिति । चक्षुर्दर्शनयोः भिन्नाधिकरणत्वेऽपि तयोर्व्यापारस्य विषये समानत्वात् तत्कृतं सामानाधिकरण्यमस्त्येव । दर्शनस्य तु विषयत्वं सम्बन्धः, चक्षुषस्तु संयोगस्सम्बन्ध इति विशेषः ॥ § 1374

भिन्नतामेवेति । सव्यापारत्वनिर्व्यापारत्ववैलक्षण्यस्य भवतैवोक्तत्वादित्याशयः ॥ § 1375

I.187/KSV

## प्रमाणफलयोरभेदः अनुभवविरुद्धः

ननु ! वस्तुस्थित्या फलमेव ज्ञानं, फलमपि तु भवत् विषयानुभवं प्रति व्यापृतमिति । अयि मुग्धबुद्धे ! विषयानुभव एव ज्ञानमुच्यते, न तु विषयानुभवः विषयानुभवे सव्यापारो भवति ॥ § 1376

अथ मनुषे ? विषयाधिगमाभिमानः तस्मिन् सति भवतीति ? कोऽयमभिमानो नाम ? विषयानुभवात् भिन्नः ? अभिन्नो वा ? अभेदे सति, तस्मिन् सति भवतीत्यसङ्गता वाचो युक्तिः । भेदे त्वस्मन्मतानुप्रवेशः ॥ § 1377

अपि च ज्ञानं विषयाधिगमे व्यापृतमिति कृत्वा विषयाधिगमाभिमानमुपजनयति ? उत विषयाधिगमस्वभावत्वादेव ? इति विचारे विषयाधिगमात् पृथग्भूतस्य तत्र व्याप्रियमाणस्यानुपलंभात् विषयाधिगमस्वभावमेव ज्ञानमवधार्यते । तत्कृतश्चाभिमान इति फलमेव ज्ञानमवकल्पते न करणमिति । तथा च लोक फलत्वमेव ज्ञानस्यानुमन्यते, न करणत्वम् । तथा ह्येवं वदति, चक्षुषा पश्यामि, लिङ्गेन जानामीति; न तु ज्ञानेन जानामीति व्यपदिशन् कश्चिद्दृश्यते ॥ § 1378

विषयानुभव एवेति । न हि निर्विषयं किञ्चित् ज्ञानं क्वचिद्दृष्टमित्यर्थः ॥ § 1379

विषयाधिगमः—सविषयत्वम् । तस्मिन् सति—सविषयतादशायाम् । सविषयत्वं खलु ज्ञानस्य ज्ञानत्ववत् कश्चन धर्मः । एवञ्च सविषयत्वाभावेऽपि ज्ञानत्वं कुतो निवर्तेत । नैल्याभावेऽपि वटे घटत्ववत् अतश्च सविषयत्वकृतं प्रमाणत्वं, ज्ञानत्वकृतं फलत्वमिति सिद्धं सामानाधिकरण्यमिति बौद्धाशयः

२१--२२ ] ज्ञान— nyāma-wit__kha
२२ ] मूढ— nyāma-wit__ka
२८ ] वि— nyāma-wit__ka
२९ ] दिव— nyāma-wit__ka

। सिद्धान्ते तु सविषयं वस्तु करणं, तदभिमानः फलं इति चेत्, सिद्धं करणफलत्वयोः वैयधिकरण्यमित्याशयः ॥ § 1380

अपि च सविषयत्वं नैल्यादिवत् न निरूपितस्वरूपविशेषणधर्मः, किन्तु कम्बुग्रीवादिवत् स्वरूपनिरूपकधर्मः । अतस्तदभावे तत् ज्ञानमेव न स्यात् । अतः फलकरणयोरैक्यं न संभवत्येवेति चाह—अपि चेत्यादिना ॥ § 1381
I.188/KSV

ननु ! सत्स्वपि चक्षुरादिषु विषयज्ञानमनुपजनयत्सु न करण(?)ं व्यपदिशति लोकः, जनयत्सु च व्यपदिशतीति लोके करणोत्पादकत्वादेव तेषां करणत्वव्यपदेशः, न साक्षात् करणत्वादिति— तदयुक्तम्—चक्षुराद्येव करणं, न तु तेनान्यत् करणमुपजन्यते । किं हि तदन्यत् करणम् ? ज्ञानमिति चेत्—कस्यां क्रियायां तत् करणमिति परीक्ष्यतामेतत् । न ह्यात्मन्येव किञ्चित्करणं करणं भवतीति ॥ § 1382

यत्तु ज्ञानमनुपजनयति चक्षुरादौ न करणतामाचष्टे लोकः— तद्युक्तमेव । न हि क्रियोत्पत्तावव्याप्रियमाणं करणं कारकं भवति । तेन चक्षुरादेर्ज्ञानक्रियामुपजनयतः करणत्वम्, ज्ञानस्य तु फलत्वमेवेति युक्तस्तथा व्यपदेशः ॥ § 1383

प्रमाणस्य प्रमाणत्वं तस्मादभ्युपगच्छताम् ।
भिन्नं फलमुपेतव्यं एकत्वे तदसंभवात् ॥ ७ ॥§ 1385

ननु चक्षुषा पश्यामि इति व्यवहारः घटाद्यनुभववेलायामेव । अतश्च चक्षुषः करणत्वं घटादिदर्शनाधीनं जातमित्यौपाधिकमेव चक्षुरादेः करणत्वमिति शङ्कते—नन्विति । यद्यपि ज्ञानजनकत्वकृतं चक्षुरादेः करणत्वं ज्ञानशेषत्वात् ज्ञानाधीनं, तथापि नेदमौपाधिकम् । साधनं हि स्वतः साध्यशेषभूतम् । दण्डादीनामपि हि घटकरणत्वं घटाधीनमेव, न तावता दण्डादेः करणत्वमेव औपाधिकमिति वक्तुं शक्यं इत्याशयवान् समाधत्ते—तदयुक्तमिति । न हीति । करणं किञ्चित् आत्मन्येव न हि करणं भवति इत्यन्वयः । अनुमितिदृष्ट्या करणभूतमपि लिङ्गज्ञानादिकं चक्षुरादिदृष्ट्या न करणं भवति, अपि तु चक्षुषः फलमेव धूमदर्शनम् । अतः स्वस्मिन् स्वं करणं न भवत्येवेत्यर्थः ॥ § 1386

ननु तर्हि ज्ञानमजनयतः चक्षुरादेः करणत्वं न स्यात् । कार्यजनकं हि करणमिति शङ्कामिष्टापत्त्या परिहरति—यत्त्वित्यादि । पाकक्रियां कुर्वति सति पाचकोऽयमिति व्यवहारः इतरकाले तथा व्यवहारस्तु उपलक्षणतया, स्वरूपयोग्यतया वा नेय इति भावः ॥ § 1387
I.189/KSV

१७ ] मु— nyāma-wit__ka
२३ ] मुप—क., म— nyāma-wit__kha
२५ ] स्य— nyāma-wit__kha
२८ ] त्वं— nyāma-wit__ka

### प्रमाणप्रमेयप्रमितीनामभेदनिरासः

यस्तु मूढतरः प्रमाणप्रमेयफलव्यवहारमेकत्रैव ज्ञानात्मनि निर्वाहयितुमुद्यच्छति प्रमाणसमुच्चये ११—

यदाभासं प्रमेयं तत् प्रमाणफलते पुनः ।
ग्राहकाकारसंवित्त्योः त्रयं, नातः पृथक् कृतम् ॥§ 1390

इति—तमपवर्गाह्निके ज्ञानाद्वैतदलनप्रसङ्गेन दुराचारं निर्भर्त्सयिष्यामह इत्यलं विस्तरेण । तस्मात् सुष्ठूक्तं—यदा ज्ञानं प्रमाणं, तदा हानादिबुद्धयः फलम् इति ॥ § 1391

### प्रत्यक्षलक्षणपरीक्षोपसंहारः

तदेवं फलविशेषणपक्षे यतः शब्दाध्याहारेण वाचकं सूत्रं— यत इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणविशेषितं ज्ञानाख्यं फलं भवति, तत् प्रत्यक्षमिति ॥ § 1392

### इन्द्रियार्थसन्निकर्षोत्पन्नम् इतिपदस्य प्रयोजनम्

तत्र इन्द्रियार्थसन्निकर्षोत्पन्नपदं अर्थानपेक्षजन्मनः स्मृत्यादिज्ञानस्य, अर्थजनितस्यापि च परोक्षविषयस्यानुमानादिज्ञानत्त्य व्यवच्छेदार्थम् । अतः तज्जनकस्य न प्रत्यक्षता प्रसज्यते ॥ § 1393

ननु इन्द्रियार्थसन्निकर्षोत्पन्नमिन्द्रियगत्यनुमानमप्यस्ति । तद्धि इन्द्रियार्थसन्निकर्षेण लिङ्गभूतेन जन्यते, देशान्तरप्राप्त्येव तपनगमनानुमानमिति कथमनेन पदेनानुमानमपाक्रियते— § 1394

यस्तु मूढतरः—दिङ्नागादिः । यदाभासमिति । अत्र वृत्तिः— (?')योगाचारास्तु बाह्यार्थमपलपन्तः ज्ञानस्यैवानादिवासनोपप्लावितः नीलपीतादिविषयाकारः प्रमेयम्, स्वाकारः प्रमाणम्, स्वसंवित्तिः फलमिति मन्यन्ते । यथाऽऽहुः—यदाभासं......पृथक्कृतम् इति ॥ § 1395

तज्जनकस्य—स्मृत्यादिजनकस्य । प्रत्यक्षता—प्रत्यक्षप्रमाणता ॥ § 1396

लिङ्गभूतेनेति । लिङ्गस्यानुमितिकरणत्वादित्यर्थः । मदीयं चक्षुः, गमनशालि, दूरस्थेन घटेन संयुक्तत्वात्, इत्यनुमानाकारः । अत्र चानुमाने I.190/KSV

नैतदेवम्—इन्द्रियेण स्वविषयसन्निकृष्टेन सता तत्रैव यद्विज्ञानमुत्पद्यते तत् इन्द्रियार्थसन्निकर्षोत्पन्नमिह ब्रूमहे । न चेदृशमिन्द्रियगत्यनुमानम् ॥

कुतो विशेषप्रतिलम्भ इति चेत्—उत्पन्नग्रहणादिति ब्रूमः । उत्पन्नग्रहणेन हि सन्निकर्षम्य कारकत्वं ख्याप्यते । तच्चापीन्द्रियविषयेऽर्थे ज्ञानमुत्पादयतो

१८ ] वि— nyāma-wit_ka
२५ ] नानु— nyāma-wit_ka

निर्वहति । इन्द्रियगत्यनुमाने तु न सन्निकर्षं कारकमाहुः, अपि तु ज्ञापकम् । अत एव स्वग्रहणसापेक्षः तदनुमानेऽ(?) व्याप्रियते, न रूपादिप्रमिताविव तन्निरपेक्ष इति ॥

## इन्द्रियार्थपदविवरणम्

इन्द्रियाणि घ्राणरसननयनस्पर्शनश्रोत्राणि पृथिव्यादिभूतपञ्चकप्रकृतीनि वक्ष्यन्ते ८ आह्निके । अर्थास्तु गन्धरूपरसस्पर्शशब्दाः गन्धत्वादिस्वजात्यवच्छिन्नाः, तदधिकरणानि पृथिव्यप्तेजांसि द्रव्याणि, तदधिष्ठानाः सङ्ख्यादयो गुणाः, उत्क्षेपणादीनि कर्माणि, तद्वृत्तीनि इन्द्रियार्थसन्निकर्ष एव हेतुरिति लिङ्गविधया इन्द्रियार्थसन्निकर्षजन्यत्वं एतदनुमाने वर्तत इत्यर्थः । तत्रैवेति । यत्र इन्द्रियं संयुक्तं, तद्विषयकं ज्ञानं अत्र विवक्षितम् । उक्तानुमाने तु इन्द्रियार्थयोः सन्निकर्षेण इन्द्रियगतेरनुमानं, न तु सन्निकर्षविषयस्येति । तथा च इन्द्रियार्थसन्निकर्षनिष्ठकारणतानिरूपितं यत् स्वविषयविषयकनिष्ठं कार्यत्वं तद्वदित्यर्थः ॥ § 1397

विशेषेति । कार्यताविशेष इत्यर्थः । इन्द्रियार्थसन्निकर्षनिष्ठकारणतानिरूपितकार्यतावदिति सामान्यतोऽर्थस्तत्पदाद्भवति । तत् कथं कार्यतायां इन्द्रियविषयविषयकनिष्ठत्वं लभ्यते ? इति शङ्काशयः । ख्याप्यत इति । उत्पत्तिशब्दस्य तादृशकार्य एव मुख्यत्वात् । ज्ञापकमिति । हेतुः द्विविधः कारकः, ज्ञापकश्च । आद्यः मुख्यः, दण्डात् घटः इत्यादौ । द्वितीयः गौणः, धूमात् वह्निमान् इत्यादौ । एवञ्च इन्द्रियार्थसन्निकर्षस्य मुख्यं हेतुत्वं कारकत्वरूपं स्वत प्राप्तमिति । अत एव—ज्ञापकत्वादेव । असौ—इन्द्रियार्थसन्निकर्षः ॥ § 1398

भूतपञ्चकप्रकृतीनि—भूतपञ्चकसमवायिकारणकानि । अर्थाः—इन्द्रियविषयाः । पृथिव्यप्तेजांसीति । वायोः स्पर्शानुमेयत्वादेवमुक्तिः । तद्वृत्तीनि— I.191/KSV

सामान्यानि, येषां स्पर्शनेन चक्षुषा ग्रहणं कणव्रतमते निरूपितं तेऽर्थाः । प्रागुक्तश्चाभावोऽप्यर्थ एव; विचार्य गम्यमानत्वात् ॥

## सन्निकर्षभेदः

सन्निकर्षस्त्विन्द्रियाणामर्थैः सह षट्प्रकारः । तत्र द्रव्यं चक्षुषा त्वगिन्द्रियेण वा संयोगात् गृह्यते । तद्गतो रूपादिर्गुणः संयुक्तसमवायात् । रूपत्वादिसामान्यानि संयुक्तसमवेतसमवायात् गृह्यन्ते । चक्षुषा संयुक्तं द्रव्यं, तत्र समवेतं रूपं, रूपे च समवेतं रूपत्वमिति । समवायाच्छब्दो गृह्यते । श्रोत्रमाकाशद्रव्यम्, तत्र समवेतः शब्दः । शब्दत्वं समवेतसमवायात् गृह्यते; श्रोत्राकाशसमवेते शब्दे तद्धि समवेतमिति । संयुक्तविशेषणभावादभावग्रहणं व्याख्यातम् पु. १५० । इह घटो नास्तीति— चक्षुषा संयुक्तो भूप्रदेशः, तद्विशेषणीभूतश्चाभाव इति ॥

## सन्निकर्षसत्त्वे प्रमाणम्

१३--१४ ] विवेतरनि— nyāma-wit__kha

१७ ] ब्द— nyāma-wit__kha

ननु ! सन्निकर्षावगमे किं प्रमाणम् ? व्यवहितानुपलब्धिरिति ब्रूमः । यदि ह्यसन्निकृष्टमपि चक्षुरादीन्द्रियं अर्थं गृह्णीयात्; व्यवहितोऽपि ततोऽर्थ उपलभ्येत, न चोपलभ्यते; तस्मादस्ति सन्निकर्षः ॥

**अव्यवधानमात्रं न प्रत्यक्षप्रयोजकम्**

ननु ! अव्यवधानमेवास्तु, किं सन्निकर्षेण ?—मैवम्— द्रव्यगुणकर्मवृत्तीनि । स्पर्शनेन—त्वगिन्द्रियेण । विचार्य गम्यमानत्वादिति—घटोऽस्ति न वेति संशये निर्णयार्थं प्रवर्तमानः घटं तदभावं वा निश्चिनोति । अत्र यथा घटः पदार्थः, तथा घटाभावोऽपि पदार्थ एवेत्यर्थः ॥ § 1399

आकाशद्रव्यं—आकाशरूपं द्रव्यम्; एवं श्रोत्राकाश इत्यत्रापि ॥ § 1400

व्यवहितानुपलब्धिः—कुड्यादिव्यवहितवस्त्वनुपलब्धिः । सन्निकर्षाभावे कुड्यव्यवहितस्याप्युपलब्धिप्रसंगः । व्यवहितः—कुड्यादिनेति शेषः ॥ § 1401

ननु तर्हि अव्यवधानमेव प्रत्यक्षत्वप्रयोजकं कल्प्यतां, किं सन्निकर्षेण ? न च कुड्यादिव्यवधानाभावेऽपि चक्षुर्निमीलनदशायां प्रत्यक्षापत्तिरिति शङ्क्यम्; पक्ष्मचर्मण एव तत्र व्यवधानत्वात् इति शङ्कते—नन्विति । चक्षुरुन्मीलनदशायां अनवधानात् प्रत्यक्षाभावस्तु मतद्वयेऽपि समान इति भावः । I.192/KSV

इन्द्रियाणां कारकत्वेन प्राप्यकारित्वात् । संसृष्टं च कारकं फलाय कल्पत इति कल्पनीयः संसर्गः । एतच्च इन्द्रियपरीक्षायां निपुणं निर्णेष्यते ८ आह्निके इति नेह विविच्यते । रसस्पर्शनयोश्च स्पष्टं प्राप्यकारित्वमुपलभ्यते इति तत्सामान्यादिन्द्रियान्तरेष्वपि कल्पनीयमिति ॥

ननु ! एवं सत्यर्थाक्षिप्तः कारकत्वादेव सन्निकर्ष इति स्वकण्ठेन कस्मादुच्यते ? षड्विधत्वज्ञापनार्थमित्युक्तम् ॥

उत्पन्नग्रहणेन इन्द्रियार्थयोर्ज्ञानजनकत्वं दर्शयति । तत्र इन्द्रियं करणत्वेन जनकम्, अर्थस्तु कर्मत्वेन ॥

ननु ! अर्थस्य ज्ञानजनकत्वं कुतोऽवगम्यते ? तद्विषयज्ञानोत्पादादेव । स्वतस्साकारत्वस्य निराकृतत्वात् ४१-४२ पु. । प्रकारान्तरेण प्रतिकर्मव्यवस्थाया असिद्धेः ॥

ननु ! प्रयोजनमेतत्, प्रमाणं पृष्टोऽसि, तद्ब्रूहि—उच्यते— एतदेव प्रमाणम्—अन्यस्यापि वीरणादेः कर्मकारकस्य कटादिकार्योत्पत्तौ प्रत्यक्षानुपलंभप्रतिपन्नाभ्यामन्वयव्यतिरेकाभ्यां यथा कारकत्वेनेति । न हि क्रियावेशमन्तरा कारकत्वं निर्वहतीत्यर्थः । संसृष्टं— स्वविषयेणेति शेषः । § 1402

ननु सन्निकर्षमन्तरा इन्द्रियाणां कारकत्वमेव यदि न भवति, तर्हि इन्द्रियोत्पन्नम् इत्येबालं, किमर्थं इन्द्रियार्थसन्निकर्षोत्पन्नम् इति—इति शङ्कते—नन्विति । सन्निकर्षः अर्थाक्षिप्त इत्यन्वयः । अर्थाक्षिप्तः— अर्थादेव

३५--१ ] अर्थस्तु— nyāma-wit_kha

२ ] यो— nyāma-wit_ka

५ ] अप्र— nyāma-wit_ka

सिद्धः—अन्यथाऽनुपपत्त्या सिद्ध इति यावत् । स्वकण्ठेन— स्ववाचकशब्देन । अत्र स्वशब्दः सन्निकर्षपरः । षड्विधत्वेत्यादि । प्रमेयानुरोधात् खलु इन्द्रियषट्ककल्पनमिति भावः ॥ § 1403

अथ उत्पन्नपदप्रयोजनमाह—उत्पन्नग्रहणेनेति । तदनन्तरत्वादिकं विहायेति शेषः । एतेन अर्थानां काल्पनिकत्वं निरस्तमित्याशयः ॥ § 1404

शङ्कते नन्विति । कुतः—कथम् ? तद्विषयेति । अर्थविषयकेत्यर्थः । प्रतिकर्मव्यवस्था—प्रतिनियतविषयव्यवस्था । एतद्विस्तरस्तु नवमाह्निके द्रष्टव्यः ॥ § 1405

प्रमाणं पृष्टोऽसीति । न तु प्रयोजनमिति शेषः । वीरणं— तृणविशेषः I.193/KSV । प्रत्यक्षानुपलंभेति । दर्शनादर्शनेत्यर्थः । स्वानुभवैकवेद्यत्वे

कारणत्वमवधार्यते, तथाऽर्थस्यापि ज्ञानोत्पत्तौ । यथा हि देवदत्तार्थी कश्चित् गृहं गतः, तत्रासन्निहितं न पश्यति देवदत्तम्, क्षणान्तरे चैनमायान्तं पश्यति, तत्रान्वयव्यतिरेकाभ्यां देवदत्तसदसत्त्वानुवर्तिनौ ज्ञानोत्पादानुत्पादाववधार्य मानसेन प्रत्यक्षेण चन्दनसुखवदस्य तत्कारणतां प्रतिपद्यते ॥

ननु ! वीरणकटयोः पृथगुपलंभात् युक्त एष न्यायः, अर्थस्तु ज्ञानात् पृथक् न कदाचिदुपलभ्यत इति दुरधिगमौ तत्रान्वयव्यतिरेकौ—उच्यते—अयमेव पृथगुपलंभः, यदसन्निहितेऽर्थे न तद्विषयमबाधितं ज्ञानमुत्पद्यत इति । तदलमस्मिन्नवसरे ज्ञानवादगर्भचोद्योद्भिभावयिषया; भविष्यत्येतदवसरे ९ आह्निके इति ॥

### उत्पन्न पदप्रयोजनम्

यथा चेन्द्रियाणां करणानां अन्वयव्यतिरेकाभ्यां ज्ञानकारणत्वं, एवमर्थस्य कर्मणोऽपीत्युत्पन्नग्रहणेन दर्शितम् ॥

### सुखादयोऽपि मानसप्रत्यक्षविषयाः

ननु ! इन्द्रियार्थसन्निकर्षोत्पन्नपदेन सुखादिविषयं प्रत्यक्षं न सङ्गृहीतम्—न न सङ्गृहीतम्—मनस इन्द्रियत्वात्, सुखादेरर्थस्य चन्दनसुखदृष्टान्तः । अस्य—विषयस्य । यथा चन्दनसुखं मानसप्रत्यक्षवेद्यं, तथा विषयस्य प्रत्यक्षकारणत्वं स्वानुभवसिद्धमित्यर्थः ॥ § 1406

सहोपलंभनियमात् अभेदो नीलतद्धियोः इति वदन् पृच्छति— नन्विति । वीरणं—तृणविशेषः । यदि ज्ञानार्थयोर्भेदः, तर्हि कुत्रचित् ज्ञानं जातं अर्थं व्यभिचरेदिति भावेन—अबाधितमिति । यथा चेत्यादि । अर्थस्य ज्ञानजनकत्वं कथमवगम्यते ? इति पृच्छता हि, इन्द्रियाणां ज्ञानजनकत्वं संभवति इत्यङ्गीकृतम् । तत्र यत् प्रमाणं तदेवात्रापीति भावः ॥ § 1407

न सङ्गृहीतमिति । सूत्रे घ्राणरसनचक्षुस्त्वक्छ्रोत्राणि भूतेभ्यः इति कथनात् I.194/KSV एभिरिन्द्रियैः सुखादेरग्रहणात्, इन्द्रियार्थसन्निकर्षजन्यत्वं सुख

२३ ] स्य— nyāma-wit__ka
२६ ] त्— nyāma-wit__ka
२७ ] अर्थः— nyāma-wit__kha
२८ ] दुर्गमौ— nyāma-wit__kha
९ ] करणे— nyāma-wit__kha

तद्ग्राह्यत्वात् । भौतिकघ्राणादीन्द्रियधर्मवैलक्षण्यात्तु मनसस्तद्वर्गे परिगणनं न कृतमिति ॥

### सन्निकर्षाणामुपयोगप्रकारः

तच्चेदं प्रत्यक्षं चतुष्टय-त्रय-द्वयसन्निकर्षात् प्रवर्तते । तत्र बाह्ये रूपादौ विषये चतुष्टयसन्निकर्षात् ज्ञानमुत्पद्यते—आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेति । सुखादौ तु त्रयसन्निकर्षात् ज्ञानमुत्पद्यते, तत्र चक्षुरादिव्यापाराभावात् । आत्मनि तु योगिनः द्वयोरात्ममनसोरेव संयोगात् ज्ञानमुपजायते; तृतीयस्य ग्राह्यस्य ग्राहकस्य वा तत्राभावात् । तस्मात् सुखादिज्ञानसङ्ग्रहात् इन्द्रियार्थसन्निकर्षोत्पन्नमिति युक्तमुक्तम् । आत्ममनसोस्तु सदपि ज्ञानजनकत्वमिह न सूत्रितम्, सर्वप्रमाणसाधारणत्वात् ॥

### ज्ञानपदप्रयोजनम्

ज्ञानग्रहणं विशेष्यनिर्देशार्थम् । तस्य हि इन्द्रियार्थसन्निकर्षोत्पन्नत्वादीनि विशेषणानि । तान्यसति विशेष्ये कस्य विशेषणानि स्युरिति ॥

अथवा सुखादिव्यावृत्त्यर्थं ज्ञानपदम् । इन्द्रियार्थसन्निकर्षोत्पन्नं हि सुखमपि भवति । तत्र तज्जनकं कारकचक्रं प्रमाणं मा भूत्, ज्ञानजनकमेव प्रमाणं यथा स्यादिति ज्ञानग्रहणम् ॥ प्रत्यक्षे नास्तीत्यव्याप्तिरित्यर्थः । ननु यदि मनः इन्द्रियं, तर्हि इन्द्रियसूत्रे कुतः न पठितमित्यत्राह—भौतिकेति । वैलक्षण्योपपादकतया भौतिकेपदम् ॥ § 1408

आत्मेति । आत्ममनैन्द्रियार्थानां चतुर्णामत्र सन्निकर्षः । त्रयेति । आत्मा, मनः, सुखादिरिति त्रयं बोध्यम् । योगिन इति । यद्यप्यहंप्रत्यये सर्वेषामपि स्वात्मा विषयीभवत्येव, अथापि यथाऽवस्थितात्मसाक्षात्कारः योगिनामेव । अन्यथा सर्वेषामपि तत्त्वज्ञानित्वप्रसङ्गः ॥ § 1409

अव्याप्त्यतिव्याप्त्यसंभवान्यतमवारणायैव पदप्रयोगः लक्षणवाक्ये युक्त इत्याशयेनाह—अथवेति । सुखमपि भवतीति । अन्ततः तस्यापि मनस्सन्निकर्षजन्यत्वादित्यर्थः ॥ § 1410

I.195/KSV

## सुखादीनां ज्ञानरूपत्वाक्षेपः

अत्र शाक्याश्चोदयन्ति—न ज्ञानपदेन सुखादिव्यवच्छेदः कर्तुं युक्तः, शक्यो वा; सुखादीनामपि ज्ञानस्वभावत्वात् । ज्ञानस्यैवामी भेदाः, सुखं दुःखं इच्छा द्वेषः प्रयत्न इति । कारणाधीनो हि भावानां भेदो भवितुमर्हति । समानकारणानामपि तु भेदेऽभिधीयमाने न कारणकृतं पदार्थानां नियतं रूपमिति तदाकस्मिकत्वप्रसङ्गः । तदुक्तम् प्रमाणवार्तिकं—३-२५१—

२१ ] वा— nyāma-wit__ka
२५ ] (?)— nyāma-wit__kha
२७--२८ ] सुखं— nyāma-wit__ka
१ ] का— nyāma-wit__ka

तदतद्रूपिणो भावाः तदतद्रूपहेतुजाः ।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम् इति । § 1413
तस्मात्, ज्ञानरूपाः—सुखादयः—तदभिन्नहेतुजत्वात्—इति ॥ § 1414

## सुखादीनां ज्ञानरूपत्वनिराकरणम्

तदिदमनुपपन्नम्—प्रत्यक्षविरुद्धत्वाद्धेतोः । सुखादिसंवेद्यमानमानन्दादिरूपतयाऽनुभूयते, ज्ञानं विषयानुभवस्वभावतयेति प्रत्यक्षसिद्धभेदत्वात् कथमभेदे अनुमानं क्रमते ? § 1415

सुखादिकं ज्ञानस्यैवाकारविशेष इति वादिनो बौद्धस्य मतमुपक्षिपति— अत्रेति । ज्ञानस्यैवामी भेदा इति । तथा च प्रमाणवार्तिकं—सुखदुःखाभिलाषादिभेदा बुद्धय एव ताः ३-४४९ इति । अत्र युक्तिमाह—कारणाधीन इति । नियतं रूपं—तत्तद्वस्तुप्रतिनियतः आकारः । तदाकस्मिकत्वप्रसङ्गः— कार्यवैलक्षण्यस्य निर्हेतुकत्वापत्तिः । तदतदिति । यथासंख्यमन्वयः । तद्रूपहेतुजाः तद्रूपिणो भावाः, अतद्रूपहेतुजाः अतद्रूपिणो भावाश्च भवन्ति । मृत्पिण्डजातीयादुत्पन्नं मृज्जातीयं, तद्विजातीयाच्चोत्पन्नं कार्यं तद्विजातीयमेव भवति । एवञ्च यादृशेन कारणेन आत्ममनस्संयोगादिना ज्ञानमुत्पद्यते, तादृशेनैव कारणेनोत्पद्यमानं सुखादि अज्ञानं—ज्ञानविलक्षणं भवति किम् ? तदभिन्नहेतुजत्वात्—ज्ञानेन साकं अभिन्नहेतुजत्वात्; ज्ञानहेतुजातीयहेतुजन्यत्वादिति यावत् ॥ § 1416

कार्ययोः वैलक्षण्यस्यानुभवसिद्धत्वात् तदभिन्नहेतुजत्वं नास्तीत्युपपादयति—सुखादीति । ज्ञानं हि बाह्यं विषयमपि क्रोडीकरोति, न तथा सुखम् ॥ § 1417

I.196/KSV

अत एवेदमपि न वचनीयम्—एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्तं पश्यामः, तत्र यथेष्टं संज्ञाः क्रियन्तामिति— संविदो विषयानुभवस्वभावतयैव प्रतिभासात्, सुखादेश्च विषयानुभवस्वभावस्यानुस्यूतस्याप्रतिभासात् । ज्ञानमेव विषयग्रहणरूपं प्रकाशते; न सुखं, दुःखं वा ॥ § 1418

यस्तु सुखज्ञानं दुःखज्ञानमिति प्रतिभासः, सः ज्ञानस्वभावभेदकृत एव, संशयज्ञानं विपर्ययज्ञानमितिवत्—उक्तमत्र— संशयविपर्ययादौ विषयानुभवस्वभावत्वमनुस्यूतमवभाति । संशयो हि विषयग्रहणात्मकोऽनुभूयते, अनिश्चितं तु विषयं गृह्णाति । विपर्ययोऽपि विषयग्रहणात्मक एव, विपरीतमसन्तं

---

१३ ] रूपाः— nyāma-wit__ka
१४ ] वे— nyāma-wit__ka
६--७ ] वानुस्यूतस्या— nyāma-wit__kha
१२ ] सङ्गं— nyāma-wit__ka

वा विषयं गृह्णाति । न तु विषयग्रहणस्वभावं सुखं दुःखं चानुभूयते । अतः अन्य एवायं ग्राह्यैकस्वभावः आन्तरो धर्मः सुखदुःखादिरिति घटज्ञानवद्विषयतयैव ज्ञानं भिनत्ति, न स्वभावभेदेन संशयज्ञानवदिति ॥ § 1419

## ज्ञानसुखादयः न स्वप्रकाशाः

तत्रैतत् स्यात्—स्वप्रकाशत्वात् सुखादेः न ग्राह्यैकस्वभावत्वम् । अतश्च ग्राह्यग्रहणोभयस्वभावत्वात् ज्ञानमेव तदिति—मैवं वोचः—स्वप्रकाशत्वं ज्ञानेऽपि प्रतिक्षिप्तम् पु. ४१, प्रतिक्षेप्स्यते ९ आह्निके च । तत् कुतः सुखादौ भविष्यति । न हि ग्रहणस्वभावं कश्चित् सुखमनुभवति ज्ञानवदिति ॥ § 1420

अत एव—ज्ञानसुखयोः सर्वथा विलक्षणत्वादेव । ननु न ज्ञानमेव सुखं, किन्तु ज्ञानस्याकारभेदः; अतः प्रतिभासभेदो युक्त इत्यत्राह—सुखादेरिति । यथा हि मृदाकारविशेषे घटे मृदयम् इति प्रतिभासः, तथा ज्ञानस्य आकारभूतं यदि सुखं, तर्हि विषयानुभवस्वभावं प्रतीयेतेत्यर्थः ॥ § 1421

अनुस्यूताकारप्रतिभासं शङ्कते—यस्त्विति । समाधत्ते—उक्तमिति । ग्राह्यैकस्वभावः—विषयमात्ररूपः । अवधारणेन ज्ञानवत् विषयित्वं व्यवच्छिद्यते । घटज्ञानवदिति । सुखज्ञानमिति हि घटज्ञानमितिव्यवहारतुल्यमित्यर्थः ॥ § 1422

स्वप्रकाशत्वस्यैव निर्वचनं—ग्राह्यग्रहणोभयस्वभावत्वादिति । विषयाणां घटादीनां ज्ञानेनैव भानम् । ज्ञानस्य तु स्वत एव । अतः ज्ञानं I.197/KSV

## सुखादयः ज्ञानेनैव गृह्यन्ते

ननु ! अस्य प्रकाशत्वानभ्युपगमे सुखादेरुत्पादानुत्पादयोरविशेषात् सर्वदा सुखित्वं, न कदाचिद्वा स्यात्—इति—

नैतदेवम्—उत्पन्नमेव सपदि सुखं गृह्यते ज्ञानेनेति कथमनुत्पन्नान्न विशिष्यते । प्रत्युत स्वप्रकाशसुखवादिनामेष दोषः, स्वप्रकाशसुखोत्पादात् तेनैव स्वप्रकाशेन सुखेनान्योऽपि सुखी स्यात्, स्वप्रकाशस्य दीपादेः सर्वान् प्रत्यविशिष्टत्वात् । क्वचित् सन्ताने स्वप्रकाशसुखोत्पादात् तेनैव स्वप्रकाशेन अन्योऽपि सुखी स्यात्, यस्यापि सुखं नोत्पन्नमिति ॥

किञ्च किमेकं एव ज्ञानं सर्वसुखदुःखाद्यशेषाकारभूषितमिष्यते ? उत किञ्चित्सुखात्मकं, किञ्चिद्दुःखात्मकमिति ?

आद्ये पक्षे, सर्वाकारखचितज्ञानोपजननादेकस्मिन्नेव क्षणे परस्परविरुद्धसुखदुःखादिधर्मप्रबन्धसंवेदनप्रसङ्गः ॥

उत्तरस्मिंस्तु, किञ्चित्सुखज्ञानं, किञ्चिद्दुःखज्ञानमिति यत्किञ्चिदसुख-

---

१७ ] वात्— nyāma-wit__ka
१८ ] क्षे— nyāma-wit__ka
२ ] स्व— nyāma-wit__ka
६ ] अ— nyāma-wit__ka
६--८ ] स्यात्— nyāma-wit__ka
१२ ] वे— nyāma-wit__kha

दुःखखचितं विषयानुभवस्वभावमपि ज्ञानमनुभूयमानमेषितव्य- विषयमिव आत्मानमपि विषयीकरोति । इदमेव स्वप्रकाशत्वम् । उत्पन्नं हि सुखं स्वयं गृह्यत एव ॥ § 1423

अविशेषादिति । उत्पन्नस्य हि सुखादेः स्वतो भानं न संभवति, अस्वप्रकाशत्वात् । ज्ञानेन ग्रहणाङ्गीकारे तस्यापि ज्ञानस्य—अस्वप्रकाशत्वेन ज्ञानान्तरगवेषणात् अनवस्था । अतः उत्पादानुत्पादयोरविशेष एवेति । सुखित्वमिति । स्यात् इत्याकर्षः । कदाचिद्वा इत्यनन्तरं सुखित्वं इत्यनुषङ्गः । तथा च सदैकरूपत्वमेवात्मनः स्यादित्यर्थः ॥ § 1424

ननु द्वित्वादिवद्भवतु, का हानिः ? इत्यत्राह—किञ्चेति ॥ § 1425

आद्य इत्यादि । आद्यपक्षे एकमेव ज्ञानं; द्वितीये तु नानाज्ञानम् । किञ्चित् ज्ञानं सुखात्मकं, अन्यच्च किंचित् ज्ञानं दुःखात्मकमित्यर्थः ॥ § 1426

असुखदुःखखचितं—सुखदुःखाखचितं—उदासीनस्वभावम् । एषितव्य-
I.198/KSV मेवेति । सर्वमपि सुखदुःखान्यतरोपरक्तमेव भवतीति न हि प्रतिज्ञातुमेव । तच्च न स्वच्छम्; अपि तु केनचिद्घटादिना विषयेणोपरक्तं, अन्वयव्यतिरेकाभ्यां च घटाद्युपजननापायेऽपि बोधस्वभावमनुवर्तमानं प्रतीयते । तदिदानीं सुखज्ञानमप्यनुभूयमानं सुखेन विषयभावजुषा घटादिनेवोपरज्यते इति गम्यते, न स्वरूपेणैव सुखात्मकम्; ततो भिन्नरूपस्य बोधमात्रस्वभावस्य ज्ञानस्यान्यदा दृष्टत्वादिति । तस्मात् न बोधरूपाः सुखादयः ॥

**ज्ञानसुखयोः सजातीयकारणजन्यत्वं नास्त्येव**

अभिन्नहेतुजत्वादिति चायमसिद्धो हेतुः; समवायिकारणस्यात्मनः, असमवायिकरणस्य चात्ममनस्संयोगस्य चाभेदेऽपि निमित्तकारणस्य सुखत्वज्ञानत्वादेर्भिन्नत्वात् ॥

ननु सुखोत्पादात्पूर्वमनाश्रयं सुखत्वसामान्यं कथं तत्र स्यात् ? कश्चास्य सुखहेतुभिः कारकैः संसर्गः ? असंसृष्टं वा कथं कारकं स्यात् ?—उच्यते—सर्वगतानि सामान्यानि साधयिष्यन्त ५ आह्निके इति सन्ति तत्रापि सुखत्वादीनि । योग्यतालक्षण एव चैषां सुखहेतुभिः कारकैः संसर्गः, धर्माधर्मवत् । धर्माधर्मौ हि सर्वस्य प्राणिनां सुखदुःखहेतोः जायमानस्य शाल्यादेः कार्यस्य कारणम् । शक्यमिति भावः । स्वच्छं—विषयानुपरक्तम् । विषयानुपरक्तस्य ज्ञानत्वासंभवादिति हेतुरूह्यः । अपि त्वित्यादि । एतदुक्तं भवति । ज्ञानं हि घटादिना विषयेणोपरक्तं घटज्ञानं, पटज्ञानं इत्यादिना व्यवह्रियते । घटज्ञाने पटस्य पटज्ञाने घटस्य चाविषयीकरणेनान्वयव्यतिरेकाभ्यां हि घटस्य ज्ञानस्य च भेदः सिद्ध्यत्येव । एवमेव हि सुखाद्युपरक्तं ज्ञानं सुखज्ञानमित्यनुभूयते । तत्रापि घट-ज्ञानयोरिव सुख-ज्ञानयोर्भेद आवश्यक एव, सुखदुःखानुपरक्तस्य ज्ञानस्यानुभवादिति ।

१ ] असु— nyāma-wit__ka
१ ] ख— nyāma-wit__ka
२ ] पि— nyāma-wit__kha
२ ] च— nyāma-wit__kha
५ ] हेतौ— nyāma-wit__ka

अन्यदा—सुखदुःखानुपरागकाले ॥ § 1427

सुखत्वज्ञानत्वादेरिति । अयमाशयः—दण्डचक्रसलिलकुलालमृदादिभिस्स-जातीयैरेव कारणैरुपजायमानोऽपि एको घटो भवति, अपरः मणिकः, अन्यः शरावः । तत्र हि स्वरूपभेदापादकः जातिभेद एव कार्यभेदनियामकः । तद्वदत्रापि । न च तत्र मृदयमित्येकाकारानुवृत्तिः दृश्यत एवेति वाच्यम्; द्रव्यसमवायिकारणके गुणे तादृशद्रव्यत्वानुवृत्तेरदर्शनात् इति ॥ § 1428

सुखत्वसामान्यं—सुखत्वरूपा जातिः । तत्र—सुखरूपकार्योत्पत्तिस्थले एषां—सुखत्वादिजातीनाम् । सुखदुःखहेतोः शाल्यादेर्जायमानस्येत्यन्वयः । I.199/KSV

तयोश्च तत्कारणैः बीजक्षितिजलादिभिस्सह योग्यतैव संसर्गः । एवं सुखत्वादीनामपि स्यात् । तस्मात् निमित्तकारणभेदात् भिन्नानि ज्ञान-सुखादीनि कार्याणि ॥

निमित्तकारणान्यत्वमपि कार्यस्य भेदकम् ।
विलक्षणा हि दृश्यन्ते घटादौ पाकजा गुणाः ॥ ८ ॥ § 1431

अपि च ज्ञानमिच्छन्ति न सर्वे ज्ञानपूर्वकम् ।
सुखदुःखादि सर्वं तु विषयज्ञानपूर्वकम् ॥ ९ ॥ § 1433

विषयानुभवोत्पाद्याः यत्रापि न सुखादयः ।
तत्रापि तेषामुत्पत्तौ कारणं विषयस्मृतिः ॥ १० ॥ § 1435

क्वचित्तु सङ्कल्पोऽपि सुखस्य कारणतां प्रतिपद्यते । तस्मात् सर्वं सुखादि ज्ञानपूर्वकमेव ॥ तादृशशाल्याद्युत्पत्त्यर्थमिति भावः । यद्वा सुखदुःखहेतोरिति पञ्चम्यन्तम् । तयोः—धर्माधर्मयोः ॥ § 1436

घटादाविति । पाकजगुणान् प्रति घटो हि समवायिकारणम् । अपि चेत्यादि । ज्ञानं हि स्वोत्पत्तौ पूर्वं घटादिविषयमपेक्षते, न ज्ञानान्तरम् । सुखमपि यदि ज्ञानरूपं तर्हि स्वोत्पत्तौ विषयमपेक्षेत । लोके तु सुखं पूर्वं अनुकूलत्वज्ञानमेवापेक्षते । एवञ्च सुखं, न ज्ञानरूपं, ज्ञानजन्यत्वादिति । ननु विषयज्ञाने जातेऽपि कुत्रचित् सुखानुत्पत्त्या न तयोः कार्यकारणभाव इति चेत्— सुखादीनां ह्युत्पत्तौ न विषयज्ञानमात्रं हेतुः, किन्त्वनुकूलत्व-स्मरणमपि । एतदभावाच्च न विषयज्ञानमात्रात् सुखाद्युत्पत्तिरिति । यद्यपि सिद्धान्ते ज्ञानात् ज्ञानान्तरोत्पत्तिरिष्यते । अथापि न सर्वं ज्ञानं ज्ञानसापेक्षं, अनुव्यवसाय एक एव ज्ञानापेक्षः । सुखं तु सर्वं ज्ञानापेक्षमेवेत्यस्ति ज्ञानसुखयोर्विशेषः । नन्वेवमपि ज्ञानानां द्विक्षणावस्थायित्वनियमेन सर्वत्रापि पूर्वज्ञानापेक्षा उत्तरज्ञानस्य वर्तत एवेति चेत्—इदमपि धारावाहिज्ञानस्थ-ल एव । न हि तत्रापि बौद्धमत इव ज्ञानात् ज्ञानान्तरोत्पत्तिः; किन्तु स्वकारणादेव । एवञ्च ज्ञानस्य न नियमेन ज्ञानान्तरापेक्षा, सुखस्य त्व-

स्त्येवेति ज्ञानसुखयोर्वैलक्षण्यं दुरपह्नवमिति । अनुपदमेव च स्पष्टीकृतं इदं ग्रन्थकारेण ॥ § 1437

सङ्कल्पः—मनोवृत्तिः, अभिमान इति यावत् । ज्ञानपूर्वकमेव, न तु विषयपूर्वकमिति एवकारार्थः ॥ § 1438

I.200/KSV

ज्ञानमपि ज्ञानपूर्वकमेवेति चेत्—न—उपरिष्टान्निराकरिष्यमाणत्वात् । न हि गर्भादौ मदमूर्छाद्यनन्तरं वा ज्ञानमुपजायमानं ज्ञानान्तरपूर्वकं भवतीति वक्ष्यामः ७ आह्निके । तेन ज्ञानसुखादीनां वैलक्षण्योपपादनात् सुखादिनिवृत्त्यर्थं ज्ञानग्रहणमर्थवत् ॥ § 1439

## अव्यभिचारिपदेन न ज्ञानपदवैय्यर्थ्यम्

ननु ! एवमपि न ज्ञानग्रहणेन कृत्यम्, अव्यभिचारिपदादेव सुखादिव्यवच्छेदस्य सिद्धत्वात् । व्यभिचाराव्यभिचारौ हि ज्ञानस्य धर्मौ, न सुखादेः । अतस्तदुपादानात् तद्धर्मयोगि ज्ञानं लभ्यत एव । किं ज्ञानग्रहणेन ? नैतदेवम्—सुखस्यापि सव्यभिचारस्य दृष्टत्वात् । किं पुनस्सुखं व्यभिचारवत् दृष्टम् ? यदेतत् परदाराभिमर्शादिनिषिद्धाचरणसंभवं सुखं, तद्व्यभिचारि ॥ § 1440

## ज्ञानवत् सुखमपि व्यभिचरितं अस्त्येव

ननु ! सुखस्य कीदृशो व्यभिचारः ? ज्ञानस्यापि कीदृशो व्यभिचारः ? § 1441

अतस्मिंस्तथाभावः—सुखस्यापि अतस्मिंस्तथाभाव एव ॥ § 1442

किं परपुरन्ध्रीपरिरंभसंभवं सुखं सुखं न भवति ? किं शुक्तिकायां रजतज्ञानं ज्ञानं न भवति ? § 1443

ज्ञानं भवति, किन्तु मिथ्या—इदमपि सुखं भवति, किन्तु मिथ्या ॥ § 1444

ज्ञानमपीति । बौद्धमते उत्तरज्ञानं प्रति पूर्वक्षणिकविज्ञानस्य कारणत्वात्, सिद्धान्तेऽपि कुत्रचित्तथाऽङ्गीकारादिति भावः ॥ § 1445

तद्धर्मयोगि—व्यभिचाराव्यभिचारधर्मयोगि । किं—कीदृशम् ॥ § 1446

लोके ह्यनुभूयमानं सुखं कदाप्यसुखं न भवतीति कथं सुखस्य व्यभिचार इति शंकां ज्ञानप्रतिबन्दिदानेन निराकरोति—नन्वित्यादिना । अत्र पूर्ववाक्यं आक्षेपः—उत्तरवाक्यं समाधानम् । एवमुत्तरत्रापि ॥ § 1447

---

५ ] सर्वं सुखादि ज्ञानपूर्वकमेवेति चेत्— nyāma-wit__ka ---Note: पूर्वपुटात्

२० ] सुखादीनां— nyāma-wit__kha

२१--२२ ] सुखादि— nyāma-wit__kha

I.201/KSV

ननु ! न सुखं मिथ्या, तदपि ह्यानन्दस्वभावमेव—यद्येवं शुक्तिकायां रजतज्ञानमपि न मिथ्या, तदपि हि विषयानुभवस्वभावमेव ॥ § 1448

ननु ! विषयानुभवस्वभावमपि तज्ज्ञानं विषयं व्यभिचरति— सुखमपि तर्हीदमानन्दस्वभावमपि स्वहेतुं विषयं व्यभिचरत्येव ॥ § 1449

किमसुखसाधनेन तज्जनितम् ? ज्ञानमपि किं अज्ञानसाधनेन जनितम् ? § 1450

ननु ! ज्ञानं ज्ञानसाधनेन जनितं असत्येन प्रत्यक्षबाधितेन रजतादिना—सुखमपि सुखसाधनेन जनितं असत्येन तु शास्त्रबाधितेन परवनितादिना ॥ § 1451

किं परवनितादि न सत्यम् ? तत्रापि ज्ञानजनकं न सत्यम् ? § 1452

असत्यं, प्रत्यक्षबाधितत्वात्; परवनिताद्यपि सुखसाधनमसत्यं, शास्त्रबाधितत्वात् ॥ § 1453

ननु ! शास्त्रेण किमत्र बाध्यते ? ज्ञानेऽपि प्रत्यक्षेण किं बाध्यते ? § 1454

विषयो मिथ्येति ख्याप्यते; शास्त्रेणापि सुखस्य हेतुर्मिथ्येति ख्याप्यते ॥ § 1455

किं स विषयस्सुखहेतुर्न भवति ? यथा त्वेष विषयः कलुषस्य ज्ञानस्य हेतुः, तथा सोऽपि कलुषस्य कटुविपाकस्य सुखस्य हेतुरिति तथाविधं सुखमपि व्यभिचारि भवत्येवेत्यलमतिकेलिना ॥ § 1456

तस्मात् समानन्यायत्वात् सुखे व्यभिचारिताऽस्तीति अव्यभिचारिपदात् ज्ञानं न लभ्यते ॥ § 1457

तदपि—परदारोपभोगजसुखमपि । ज्ञानसाधनेनेत्यस्य विशेषणं असत्येनेत्यादि । एवं सुखसाधनेनेत्यत्रापि ॥ § 1458

ज्ञानजनकं—शुक्तिकादि । निरधिष्ठानस्तु भ्रमः नास्त्येव ॥ § 1459

अलमिति । अयमत्र सारः । अन्यथाख्यातिरेव सिद्धान्ते, न त्वसत्ख्यातिः । एवञ्च शुक्तौ इदं रजतमित्यादौ रजतं न सर्वथा मिथ्या, आपणे सत्त्वात् । किन्तु तादात्विकप्रत्यक्षजनकत्वविशिष्टवेषेणैव मिथ्यात्वम् । एवञ्च परदारादेरपि बलवदनिष्टाननुबन्धित्वविशिष्टसुखसाधनत्वविशिष्टवेषेणापि तथात्वमेवेति ॥ § 1460

I.202/KSV

## व्यवसायात्मकम् इति पदेन सुखादिव्यावृत्तिशङ्का

२३ ] सत्यम्— nyāma-wit__kha

अपर आह—किमनेन डिम्भकलहेन ? मा भूदव्यभिचारिपदात् (?) स्य लाभः ! तथाऽपि व्यवसायात्मकपदात् लभ्यत एव ज्ञानम् । न हि सुखदुःखादयो व्यवसायात्मकाः भवन्ति, किन्तु ज्ञानमेव तथाविधमिति ॥
§ 1461

संशयव्यवच्छेदार्थं तत्पदमिति चेत्—सत्यम्—सुखादिव्यवच्छेदमपि कर्तुमलमेव भवति, व्यवसायात्मकत्वस्य सुखादिष्वसंभवादिति ॥ § 1462

## ज्ञानपदप्रयोजननिगमनम्

तदेवं सिद्धेऽपि सुखादिव्यवच्छेदे कर्तव्यमेव ज्ञानग्रहणम्, विशेष्यनिर्देशार्थत्वात् । तस्य हि सर्वाण्यमूनि विशेषणान्युपात्तानि तदनुपादाने निरालम्बनानि भवेयुः । श्रोतुश्च बुद्धिर्न समाधीयेतेति । तेन बलाद्गम्यमानमेव कर्तव्यमेव ज्ञानग्रहणम् । अर्थाक्षिप्तस्यावचने प्रत्यक्षं प्रत्यक्षमित्येतावन्मात्रमभिधेयं स्यात्; अन्यदर्थाल्लभ्यत एव । तस्मात् धर्मिनिर्देशार्थं युक्तं ज्ञानपदम् ॥ § 1463

## अव्यपदेश्यपदप्रयोजनम्

शब्दानामर्थसंस्पर्शित्वं शाक्यमतनिरासेन साधयिष्यत ३ आह्निके इति शब्दानुप्रवेशवशेन व्यपदेश्यं नाम ज्ञानमुपपद्यत इति तद्व्यवच्छेदार्थमव्यपदेश्यपदम् ॥ § 1464

तथाविधं—व्यवसायात्मकम् ॥ § 1465

तत्पदं—व्यवसायात्मकपदम् । २३० पुटे एतदुपपाद्यते । ततश्च प्रयोजनान्तराय तदुपात्तं, न तु सुखव्यावृत्तये इति भावः । अस्तु तत्, तेनैवेदमपि निरस्तं भवत्वित्याह—सत्यमिति । कर्तुमलमिति—तत्पदमित्याकर्षः ॥ § 1466

उपात्तानि सर्वाण्यमूनि विशेषणानीत्यन्वयः । बलादेव गम्यमानमित्यन्वयः । न तु स्वरसतो (?)टिति प्रतीयत इति भावः । एवकारः अप्यर्थको वा । यथाकथञ्चिदर्थात्प्राप्तिमात्रेण वैयर्थ्यापादने अनिष्टप्रसङ्गमाह— अर्थाक्षिप्तस्येति । अवचने आपाद्यमाने इति शेषः ॥ § 1467
I.203/KSV

## भाष्योक्तं अव्यपदेश्यपदप्रयोजनम्

११ ] तुच्छं संभवन्ति—
nyāma-wit__ka
२२--२३ ] मव्यपदेश—

nyāma-wit__kha

तत्र वृद्धनैयायिकास्तावदाचक्षते—व्यपदिश्यत इति व्यपदेश्यं शब्दकर्मतापन्नं ज्ञानमुच्यते । यत् इन्द्रियार्थसन्निकर्षादुत्पन्नं सत् विषयनामधेयेन व्यपदिश्यते—रूपज्ञानं रसज्ञानमिति, तत् व्यपदेश्यं ज्ञानं प्रत्यक्षफलं प्रत्यक्षं मा भूदिति अव्यपदेश्यग्रहणम्— तदिदमनुपपन्नम्-न हि नामधेयव्यपदेश्यत्वमप्रामाण्यकारणं भवति । यदि हि तत् रूपज्ञानं रसज्ञानं च विषयाव्यभिचारि, निस्संशयं च तत् कथमप्रमाणफलमुच्यते । व्यभिचारादिदोषयोगे वा पदान्तरेण तत्प्रतिक्षेपात् किमव्यपदेश्यपदेन ? § 1468

प्रमाणफलं च तद्विज्ञानं इदानीं किंप्रमाणप्रभवं भवतु ? न प्रत्यक्षफलम्, एतत्पदप्रतिक्षिप्तत्वात् । नानुमानादिजन्यम्, तद्वैलक्षण्यात् । नास्ति किञ्चित् पञ्चमं प्रमाणम् । असङ्ग्रहोऽस्य लक्ष्यस्य लक्षणेनेति प्रज्ञाप्रमादः । तस्मादपव्याख्यानमेतत् ॥ § 1469

वृद्धनैयायिकाः—वात्स्यायनमहर्षयः । शब्दकर्मतापन्नं—नामधेयशब्देनाभिलप्यमानम् । अव्यपदेश्यग्रहणं इत्यनन्तरं इतिकरणं द्रष्टव्यम् । तथा च शब्दानुविद्धस्य प्रत्यक्षस्य वारणाय अव्यपदेश्य पदमिति भावः । पदान्तरेण—अव्यभिचारिपदेन ॥ § 1470

ननु न तस्याप्रामाण्यमुक्तं, किन्तु तस्यात्रालक्ष्यत्वमात्रं चेत् तत्राह—प्रमाणफलमिति । किं प्रमाणेति । अयमर्थः—यदि चतत् ज्ञानं अव्यपदेश्यपदेन व्यावर्त्यते, तर्हीदं ज्ञानं किं रूपमिति वक्तव्यम् । प्रत्यक्षरूपत्वं तु निराकृतमेव । अनुमानादिरूपत्वं तु सुतरां न संभवति । अतः ज्ञानलक्षणाप्रत्यासत्तिवशात् शब्दस्य प्रत्यक्षे भानं तत्र वक्तव्यम् । एवञ्च सुरभि चन्दनं इतिवत् अलौकिकलौकिकसन्निकर्षाभ्यामुत्पन्नं एकं ज्ञानं तदिति वक्तव्यम् । तथा च तदपि लक्ष्यमेव अन्यत्र कुत्राप्यनन्तर्भावात् ॥ § 1471

भाष्यकृतस्तु—सूत्रे इन्द्रियार्थसन्निकर्षपदोपादानेन इदं सूत्रं केवललौकिकसन्निकर्षजन्यप्रत्यक्षलक्षणपरमेव । न ह्यलौकिकः सन्निकर्षः इन्द्रियार्थसम्बन्धरूपः । अतश्च लौकिकालौकिकसन्निकर्षद्वयजन्यस्य शब्दानुविद्ध I.204/KSV

## अव्यपदेश्यपदस्य मतान्तरेण प्रयोजनवर्णनम्

व्यवच्छेद्यान्तरमव्यदेश्यपदस्य वर्णयाञ्चक्रुराचार्याः । शब्दार्थेषु स्थविरव्यबहारवः व्युत्पद्यमानो जनः संशयावगमसमये संज्ञोपदेशकादयं पनस उच्यत इति वृद्धोदीरितात् वाक्यात् पुरोवस्थितशाखादिमन्तमर्थं पनसशब्दवाच्यतया जानाति । तदस्य ज्ञानमिन्द्रियजमपि न केवलेन्द्रियकरणकं भवितुमुचितम्, असति संज्ञोपदेशिनि शब्दे तदनुत्पादात् । तेन शब्देन्द्रियाभ्यां संभूय जनितत्वात् उभयजमिदं ज्ञानं व्यपदेशाज्जातमिति व्यपदेश्यमुच्यते ।

---

१२ ] रूपज्ञानं— nyāma-wit__ka
१५ ] भवत् भवति— nyāma-wit__kha
१६ ] प्र— nyāma-wit__kha
६--७ ] व्यवहारतः— nyāma-wit__ka
७ ] संशयापगम— nyāma-wit__ga

तत् अव्यपदेश्यपदेन व्युदस्यते ॥

न चेदं पञ्चमं प्रमाणमवतरति, किन्तु शाब्दमिवैतदनुमन्यते लोकः तथा च—कथं पुनर्जानीते भवान् पनसोऽयमिति ? इति पृष्टः प्रतिवक्ति—मम देवदत्तेनाख्यातं, पनसोऽयमिति इति । न पुनरेवं विस्मृत्यापि ब्रवीति चक्षुषा मया प्रतिपन्नं, पनसोऽयमुच्यत इति प्रत्यक्षस्य प्रमाणत्वेऽपि वा नात्र लक्ष्यत्वमिति तस्य अव्यपदेश्यपदेनैव व्यावृत्तिर्वक्तव्येत्याशयः । ननु तर्हि तस्य कुत्रान्तर्भाव इति चेत्, यत्र कुत्रापि वा यथा(?)वं भवतु । अन्यथा हि ईश्वरप्रत्यक्षस्य नित्यस्य इन्द्रियार्थसन्निकर्षजन्यत्वाभावेनाव्याप्त्यापत्त्या तस्यालक्ष्यतायां वाच्यायां, तस्य कुत्रान्तर्भाव इत्यपि प्रश्नः समुदेत्येव । समाधिस्तु तुल्यैव—इत्याशयः ॥ § 1472

स्थविरः—वृद्धः । संज्ञोपदेशात्—संज्ञासंज्ञिसम्बन्धज्ञापकात् । अस्य वाक्यादित्यत्रान्वयः । अयमत्र भावः—श्रुतपनसपदेन पुरुषेण वृक्षसामान्ये प्रत्यक्षतो गृहीते कोऽयं वृक्षः इति संशये सति विशेषसंज्ञाबोधकशब्दश्रवणवशात् पनसशब्दवाच्यत्वप्रकारकं पुरोवर्तिवृक्षविशेष्यकं च अयं पनसः इति ज्ञानं जायते । नेदं केवलं प्रत्यक्षं, शब्दश्रवणस्याप्यपेक्षणात् । अतः शब्द-इन्द्रियोभयजज्ञानव्यावृत्त्यर्थं अव्यपदेश्यपदमिति ॥ § 1473

ननु इन्द्रिय-संस्काराभ्यां जातं प्रत्यभिज्ञानं यथा प्रत्यक्षं, तथेदमपि कुतो न स्यात् ? यदिदं ज्ञानं न प्रत्यक्षं तर्हि कुत्रान्तर्भाव इति आशङ्क्य
I.205/KSV शाब्देऽन्तर्भावं वदति—न चेत्यादि । तथा च प्रतिवक्ति इत्यन्वयः ।

इति । तत् इन्द्रियान्वयव्यतिरेकानुविधाने सत्यपि शब्द एवात्र करणम् ॥

अत एव सूत्रकृता शब्दलक्षणं वर्णयता नेन्द्रियानुप्रवेशप्रतिषेधाय किमपि विशेषणमुपरचितम्; उपदेशः शब्दः इत्येतावदेव लक्षणमभिहितम् । अतश्चेन्द्रियानुप्रवेशेऽपि शाब्दतामस्य मन्यते सूत्रकारः ॥

इह पुनः अव्यपदेश्यविशेषणपदोपादानेन शब्दानुप्रवेशप्रतिषेधात् न प्रत्यक्षमेतत् ज्ञानम् । तस्मादेवंविधव्यपदेश्य वज्ज्ञानव्यवच्छेदार्थमव्यपदेश्यपदमिति ॥

### उक्तमतनिराकरणम्

तदेतत् व्याख्यातारो नानुमन्यन्ते—यदुभयजं ज्ञानं अव्यपदेश्यपदेन व्युदस्यते, तदपि नाप्रमाणम्, अप्रमाणलक्षणातीतत्वादिति, प्रमाणं भवत् कस्मिन् अनुविशतामिति चिन्त्यम्—

ननु ! शाब्दमिदं ज्ञानं तद्भावानुविधानतः ।
भवत्वक्षजमप्येतत् तद्भावानुविधानतः ॥ ११ ॥ § 1476

शाब्दं चोभयजं चेति विरुद्धमभिधीयते ।

५ ] यदुभयज— nyāma-wit__ka

प्रमाणान्तरमेव स्यात् इत्थं तदपि पूर्ववत् ॥ १२ ॥§ 1478

तत्—तस्मात् । शब्द एवेति । प्रत्यभिज्ञायां हि संस्कारसहकृतमिन्द्रियं करणमिति तत् प्रत्यक्षमुच्यते । तथाऽत्रापि इन्द्रियसहकृतः शब्द एव करणमिति शाब्द एवायम् ॥ § 1479

अत एव—कुत्रचित् शाब्दबोधविशेषे अंशतः इन्द्रियस्याप्यपेक्षणादेव ॥ § 1480

शब्देन्द्रियोभयजन्यं प्रदर्शितं ज्ञानं कथं शाब्दम् ? एवं सति तस्य प्रत्यक्षत्वमपि यदि निराक्रियते तर्हि पञ्चममेव ज्ञानमेतत् स्यात् । अत इदं प्रत्यक्षमेवेति न तद्व्यावृत्त्यर्थं अव्यपदेश्यपदोपादानमिति युक्तमिति समाधत्ते— तदेतदिति । अव्यपदेश्यपदेनेति । अव्यभिचारिपदेन वारणे हि तस्य व्यभिचारित्वात् अप्रामाण्यमिति स्यात् । नेदानीं, तस्याव्यभिचरितत्वात् ॥ § 1481

पूर्वोक्तमनुवदति—नन्विति । तद्भावः—इन्द्रियसद्भावः । पूर्ववत्—भाष्यकारपक्षोक्तशब्दानुविद्धप्रत्ययवत् ॥ § 1482

I.206/KSV

ननु ! लोकः शाब्दतामस्य व्यपदिशति—देवदत्तेनाख्यातं पनसोऽयमिति इति व्यवहारादित्युक्तम् । अहो ! लोकवत्सलः श्रद्दधानो महानुभावः ! न खलु लोकस्य व्यपदेशैकशरणा वस्तुस्थितयो भवन्ति । लोको हि यथारुचि व्यपदिशति । नानामुनिजनसाधारणमपि तीर्थं नन्दिकुण्डमिति किं न श्रुतवान् भवान् ? § 1483

हन्त ! तर्हि सूत्रकाराशयमनुसरन्तः शाब्दमिदं ज्ञानं प्रतिपद्यामहे ; यदयं सूत्रकारः प्रत्यक्षे शब्दानुप्रवेशव्यवच्छेदाय विशेषणमिदमुपदिशति, शब्दे तु नेन्द्रियव्युदासाय किञ्चिद्विशेषणमुपादत्ते, स पश्यति कारणान्तरानुप्रवेशेऽपि शाब्दमेतत् ज्ञानमिति । उच्यते— § 1484

मनुवत् सूत्रकारोऽपि न धर्मस्योपदेशकः ।
येनैतदनुरोधेन तस्य ब्रूयाम शाब्दताम् ॥ १३ ॥§ 1486

वस्तुस्थित्या तु निरूप्यमाणमिन्द्रियान्वयव्यतिरेकानुविधायित्वादिदं विज्ञानं न प्रत्यक्षफलतामतिवर्तते । ततश्च व्युदस्यमानं प्रमाणान्तरतामेव स्पृशेत् ॥ § 1487

## स्वमतेन अव्यपदेश्यपदप्रयोजनकथनम्

---

२६ ] वत्सः— nyāma-wit__kha
२९ ] श्रुतदानिति— nyāma-wit__ka
३० ] ज्ञानं इति— nyāma-wit__kha
१ ] करणा— nyāma-wit__kha

तस्मादुभयजज्ञानव्युदासानुपपत्तितः ।
व्याख्या भङ्ग्यन्तरेणास्य पदस्येयं विधीयते ॥ १४ ॥§ 1489

असम्भवदोषव्यवच्छेदार्थमव्यपदेश्यपदोपादानम् । एवं हि परो मन्यते—सति लक्ष्ये लक्षणवर्णनमुचितम् । इह तु § 1490

अहो इत्यादि । तेन हि व्यवहारेण संज्ञासंज्ञिसम्बन्धनिश्चयमात्रं, न तु पनसप्रत्यक्षं तज्जन्यमित्यवधेयम् । इदं च उत्तरत्र २२० पु. स्पष्टीभविष्यति ॥ § 1491

सूत्रस्वारस्यानुरोधेनास्य शाब्दत्वं ब्रूम इति पूर्वोक्तमेवानुवदति— हन्तेत्यादि । सः—एवं वदन् सूत्रकारः । पश्यति—अभिप्रैतीति यावत् । मनुवदित्यादि । अयं भावः—शब्दैकसमधिगम्ये धर्मादौ शब्देन यथा बोध्यते, तथैव प्रतिपत्तव्यम् । प्रत्यक्षविषयवस्तुविषयकविचारे तु यथाप्रमाणं शब्दो नेय इति । व्युदस्यमानं—प्रत्यक्षेऽनन्तर्भाव्यमानम् ॥ § 1492

I.207/KSV

लक्ष्यमाणं प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नं नाम न किञ्चिदस्ति । गौरित्यादिज्ञानानां शब्दावच्छिन्नवाच्यविषयत्वेन शाब्दत्वात् । इह हि विषयव्यतिरेकेण ज्ञानानामतिशयो दुरुपपादः, बोधस्वभावस्य सर्वान् प्रत्यविशिष्टत्वात् । तत्र यथा दण्डीति शुक्ल इति वा प्रत्ययो विशेषणावच्छिन्नविशेष्यविषयतया सातिशयत्वमश्नुते, तथा गौरित्यादिप्रत्ययोऽपि वाचकावच्छिन्नवाच्यविषयत्वात् सातिशयत्वं भजते; शब्दावच्छिन्नवाच्यविषयत्वाच्च शाब्द एष प्रत्ययः, तद्व्यतिरिक्तकरणकार्यत्वानुपपत्तेः ॥ § 1493

न हीन्द्रियकरणकमिदं ज्ञानं भवितुमर्हति, चक्षुषो विशेषणाविषयत्वात्, विशेष्ये च श्रोत्रस्यासामर्थ्यात् । न च युगपदिन्द्रियद्वयद्वारकमेकमुत्पद्यमानं ज्ञानं क्वचित् दृष्टम् ॥ § 1494

तत्रैतत्स्यात्—मानसमिदं ज्ञानं सुगन्धिबन्धूकबोधवद्भविष्यति । उक्तमत्र—शब्दलिङ्गादिकरणान्तरव्यापारविरतौ कार्यमुपजायमानं केवलमनःकरणमिति कल्प्यते, न तत्संभवेऽपि । तथा हि सति § 1495

अतिशयः—विशेषः । विशेषणेत्यादि । दण्डिनं शुक्लं च पुरुषं-दृष्ट्वा कदाचित् दण्डीति, कदाचित्तु शुक्ल इति बुद्धिर्जायते । तत्र बुद्ध्योर्भेदः न स्वरूपतः, उभयोरपि ज्ञानत्वात् । नापि विशेष्यभेदात्; तदभावात् । अत विशेषणभेदादेव । शब्दश्च सर्वत्र विशेषणतया भासत एव । एवञ्च शब्दावच्छिन्नविषयत्वात् ज्ञानानां शब्दैरेव सातिशयत्वं वक्तव्यमिति शाब्दमेव सर्वं ज्ञानम् इति ॥ § 1496

ननु प्रत्यक्षे विषयस्यापि भानात्, तदंशे इन्द्रियापेक्षणात् प्रत्यक्षं तत् कुतो न स्यात् इत्यत्राह—न हीत्यादि । विशेषणाविषयत्वात्— श-

२१ ] दीनां— nyāma-wit__ka

१ ] नै— nyāma-wit__ka

ब्दाग्राहकत्वात् । विशेष्ये—घटादौ । ननु एवमपि विशेषणविशेष्ययोरुभयोरपि इन्द्रियग्राह्यत्वमस्त्येवेति इन्द्रियद्वयजन्यं तत् ज्ञानं कुतः प्रत्यक्षं न भवतीत्यत्राह—न चेति । युगपदिन्द्रियद्वयेन मनसस्सन्निकर्षासंभवादित्यर्थः । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इति हि सूत्रम् ॥ § 1497

शङ्कते—तत्रेति । मानसमिति । सुरभि चन्दनमित्यादिप्रतीतिरपि दृष्टान्ततया बोध्या । समाधत्ते—उक्तमिति । तत्संभवे—शब्दादिकरणान्तरसंभवे । तथा हि सति—शब्दादिकरणान्तरसन्निधानेऽपि केवलमानस I.208/KSV

मानसमेवैकं प्रमाणं स्यादिति । अस्ति चात्र शब्द एव करणम् । स हि सहस्रकिरणवदात्मानं च विषयं च प्रकाशयति इति । तस्मादिन्द्रियविषयेऽपि गौरित्यादिज्ञानमुत्पद्यमानं शाब्दमेवेत्यवधार्यते ॥

**अतीतोऽपि शब्दः ज्ञानगोचरो भवेदेव**

ननु ! सङ्केतावगमसमये गौरित्यादिशब्दः श्रुत आसीत् । स इदानीमतिक्रान्त इति कथं तत्कृत एष प्रत्ययः स्यात्—उच्यते— तदानीमश्रूयमाणस्य शब्दस्य स्मृत्यारूढस्य तत्प्रत्ययहेतुत्वात् ॥

तच्छ्रुतावपि किं सर्वे वर्णाः प्रत्यक्षगोचराः ।
विशेषः कोऽन्त्यवर्णेन गृहीतेन स्मृतेन वा ॥ १५ ॥§ 1500

तदेवं स्मृतिविषयीकृतशब्दजनित एष प्रत्यय इत्यभ्युपेतव्यः । यथा परोक्षेऽपि शब्द उच्चरित आत्मानं प्रकाशयति, अर्थं च; तथा प्रत्यक्षे विषये स एव स्मर्यमाणः आत्मानमर्थं च प्रकाशयतीति वाचकावच्छिन्नवाच्यप्रतिभासश्चैवंविधासु बुद्धिषु नूनमेषितव्यः । यथाऽऽह भट्टः—संज्ञित्वं केवलं परम् इति ॥

संज्ञित्वमिति मत्वर्थीयप्रत्ययान्तादुत्पन्नः भावप्रत्ययः संबन्धमाचष्टे । संज्ञासंज्ञिसंबन्धः संज्ञित्वमिति । (?')कृत्तद्धितसमासेषु त्वाङ्गीकारे । ननु विशेष्यांशे इन्द्रियस्यापेक्षणात् कथं शब्द एव इतीत्यत्राह—स हीति । एवदुक्तं भवति । शब्दो हि श्रूयमाणः अर्थमप्युपस्थापयेदेव । न तथा चक्षुः अर्थेन साकं शब्दमुपस्थापयेत् । एवञ्च शब्देनैव विषयभानस्यापि निर्वाहे माऽस्त्विन्द्रियापेक्षा । शब्दविवर्ता एव ह्यर्था इति ॥ § 1501

तत्कृतः शब्दजन्यः । स्मृतेन शब्देन ज्ञानजनने मानसमेवेदं संवृत्तमित्यत्राह—तच्छ्रुतावपीत्यादि । अयमर्थः—शब्दा हि द्विक्षणावस्थायिनः । अन्तिमवर्णश्रवणकाले पूर्वपूर्ववर्णा नष्टा एव । एवञ्च नष्टानां वर्णानां स्मरणादेव बोधः सर्वत्र अनेकवर्णकपदस्थले वाच्य इति नायं दोष इति । परोक्षेऽपीति । विषय इति शेषः ॥ § 1502

I.209/KSV

---

२० ] शते— nyāma-wit_kha
२४ ] इदानी— nyāma-wit_ka
२८--२९ ] परोक्षोऽपि— nyāma-wit_ka
३१ ] वृद्ध— nyāma-wit_kha
३३ ] प्रत्ययादु— nyāma-wit_ka

सम्बन्धाभिधानं भावप्रत्ययेन(?') हरिटीका इत्याभियुक्तस्मरणात् । संज्ञा च शब्दः । सोऽयं शब्दविशिष्टार्थप्रतिभास उक्तो भवति ॥ § 1503

न च शब्दानुसन्धानरहितः कश्चित् प्रत्ययो दृश्यते, अनुल्लिखितशब्दकेष्वपि प्रत्ययेष्वन्ततः सामान्यशब्दसमुन्मेषसंभवात्, तदुल्लेखव्यतिरेकेण प्रकाशात्मिकायाः प्रतीतेरनुत्पादात् । तथाऽऽह भर्तृहरिः—

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥
वाक्यपदीयं-१-२४ § 1506

इति । तस्मात् प्रत्यक्षस्य लक्ष्यस्याभावात् कस्येदं लक्षणमुपक्रान्तमिति असंभवदोषमाशङ्क्याह सूत्रकारः—अव्यपदेश्यमिति ॥ § 1507

## अव्यपदेश्यपदेन शब्दानुवेधपक्षनिरासप्रकारः

यदिदं अविदितपदपदार्थसम्बन्धस्य ज्ञानमुत्पद्यते, विदितसम्बन्धस्यापि वा यत् प्रथमाक्षसन्निपातसमय एव ज्ञानमनुल्लिखितशब्दकं शब्दानुस्मरणे हेतुभूतमुपजायते, तत् अशब्दम्—अशब्दावच्छिन्नविषयमव्यपदेश्यमिन्द्रियार्थसन्निकर्षैककरणमविकल्पं प्रत्यक्षम् । न च शब्दकृता बुद्धीनां प्रकाशस्वभावता, स्वत एव § 1508

ननु अज्ञातवाचकपदानां बालानामपि घटादिप्रत्यक्षं जायत एव । तत् कथं सर्वत्र शब्दानुवेधः ? इत्यत्राह—न चेत्यादि । सामान्येति । अन्ततः वस्त्वादिशब्दानां भानादित्यर्थः । ननु वस्त्वादिपदमप्यजानानां स्तनन्धयानां, पश्वादीनां च प्रत्यक्षे का गतिरिति चेत्, तत्रापि सूक्ष्मः शब्दः भायात् कामम् । अथवा तेषां भ्रमादीनामिव लक्ष्यतैव मा भूत् । परीक्षकप्रत्यक्षस्यैव लक्ष्यत्वात् । अधिकमन्यत्र ॥ § 1509

अविदितपदपदार्थसम्बन्धस्येति । स्तनन्धयादेरित्यर्थः । पूर्वोक्तदिशा परीक्षकाणां प्रत्यक्षमेव लक्ष्यभूतमित्यङ्गीकारेऽप्याह—विदितसम्बन्धस्यापीति । अशब्दावच्छिन्नविषयं—शब्दानवच्छिन्नवस्तुविषयकम् । अत एव—
I.210/KSV इन्द्रियार्थसन्निकर्षैककरणमिति । स्वत एव—शब्दानुवध

तासामेवंरूपत्वात् । न च निर्विकल्पकसमये यत्किञ्चिदिदमित्यादिसामान्यशब्दोल्लेखः कोऽपि कैश्चिदनुभूयते । तस्मात् गौरित्यादिज्ञानानां शाब्दत्वेऽपि तथाविधस्य ज्ञानस्य लक्ष्यस्य सद्भावात् न व्यर्थं लक्षणमित्येवमसंभवदोषनिराकरणार्थमव्यपदेश्यपदमिति ॥

---

१३--१४ ] शब्देष्वपि— nyāma-wit__ka
१६ ] गमं विना— nyāma-wit__ka
१८ ] सद्भा— nyāma-wit__kha
२४ ] शता— nyāma-wit__ka
९ ] शब्दो(?)कः कश्चित्— nyāma-wit__ka
१० ] अभा— nyāma-wit__ka

### गौरित्यादिज्ञानानां न शाब्दत्वम्

तदेतदाचार्या न क्षमन्ते । न गौरित्यादिज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमपि इदं शाब्दमिति वक्तुं युक्तम् । न चात्र शब्दावच्छिन्नार्थः प्रकाशते, तथाविधार्थग्रहणे कारणाभावात् । विशेष्यार्थप्रमितौ तावत् शब्दः करणम् । विशेषणीभूतस्य तु शब्दस्य ग्रहणे किं करणमिति निरूप्यताम् । न श्रोत्रम्, विरम्यव्यापारासंवेदनात् । सम्बन्धग्रहणादूर्ध्वं च स्मर्यमाणशब्दयोजनया जायमाने गौरित्यादिज्ञाने श्रोत्रं करणमाशङ्कितुमपि न युक्तम् । नापि मनः बाह्यकरणनिरपेक्षं बाह्ये विषये धियमाधातुमलम्, अन्धाद्यभावप्रसङ्गात् ॥

ननु शब्द एव करणमित्युक्तम्, तत् किमपरकरणाशङ्कनेन ? मैवम्—एकस्य कारकस्य एकस्यामेव क्रियायां कर्मकरणभावानुपपत्तेः । सवितृप्रकाशवत् इति चेत्, न, क्रियाभेदात् । मन्तराऽपि । एवं रूपत्वात्—प्रकाशस्वरूपत्वात् । अनुल्लिखितशब्दकेष्वपि इत्युक्तं प्रतिवक्ति—न चेति । तथाविधस्य—शब्दाननुविद्धस्य प्रत्यक्षस्य ॥ § 1510

गौरित्यादिज्ञानानां...शाब्दत्वात् इत्युक्तिरेवायुक्तेतिवादिनो मतमाह—तदेतदिति । न युक्तं इत्यन्वयः । विरम्येति । विशेष्यग्रहणाय प्रवृत्तस्य इन्द्रियान्तरव्यापारस्य विच्छित्तिं विना श्रोत्रेन्द्रियव्यापारो न हि भवेत्, विच्छित्तिस्तु नानुभूयत इत्यर्थः । आशङ्कितुमपीति । शब्दस्मरणे सर्वथा श्रोत्रानपेक्षणादित्यर्थः । अन्धादीति । विनैव चक्षुः मनसैव रूपादिग्रहणसंभवादिति हेतुः ॥ § 1511

कर्मकरणभावेत्यादि । शब्दो हि प्रतीतौ विशेषणतया भासते इति कर्मत्वं सिद्धम्, तर्हि तस्यैव करणत्वं कथमित्यर्थः । सवित्रिति । सूर्य I.211/KSV

यत्रासौ करणं, न तत्र कर्म; यत्र वा कर्म, न तत्र करणमिति । घटादिविषयप्रमितिजन्मनि करणमेव तरणिप्रकाशः, न कर्म; तद्ग्रहणकाले तु कर्मैवासौ, न करणम् ॥

किं तर्हि तत्र करणमिति चेत्, केवलमेव चक्षुरिति ब्रूमः । आलोकग्रहणे चक्षुषः प्रकाशान्तरनिरपेक्षत्वात् कथमेवमिति चेत्, अपर्यनुयोज्या हि वस्तुशक्तिः । घटादिग्रहणे चक्षुरुद्योतमपेक्षते, नोद्योतग्रहण इति कमनुयुञ्महे । सोऽयं सूर्यप्रकाशः प्रकाशान्तरनिरपेक्षचक्षुरिन्द्रियप्रथमगृहीतः चिरमवतिष्ठमानः तदिन्द्रियग्राह्य एव विषये गृह्यमाणे करणतामुपयातीति युक्तम् ॥

शब्दस्तु क्षणिकः श्रोत्रेन्द्रियग्राह्यः तदितरपरिच्छेद्ये विषये तदवगमक्रियायां करणीभूय, भूयस्तस्यामेव क्रियायां कथमिव कर्मभावमनुभवेत् । शब्दो हि धूमादिवदुपाय एव, नोपेयः । स उपायत्वात् प्रथमं गृह्यतां नाम; नोपेयग्रहणकाले पुनर्ग्रहणमर्हति— धूमवदेवेति । एवं स्मर्यमाणोऽपि शब्दो यत्रार्थप्रतीतिकारणं तत्रापि प्रथमं शब्दस्मरणं, ततः शब्दार्थसम्प्रत्ययो भवति

---

१५ ] (?)— nyāma-wit_kha
१६ ] ण— nyāma-wit_kha
६ ] एक— nyāma-wit_kha
८ ] दे— nyāma-wit_kha

। न तरां तत्रार्थप्रतीतिवेलायां शब्दग्रहणं संभाव्यते । तस्मात् नास्ति वाचकविशेषितवाच्यप्रतिभासः ॥ सन्निप्रकाशो हि स्वप्रत्यक्षे स्वयमेव हेतुः, एवञ्च स्वस्य कर्मत्वं करणत्वं च सिद्धमेवेति । क्रियाभेदमुपपादयति—यत्रेत्यादि । तद्ग्रहणकाले—प्रकाशग्रहणकाले । घटादिग्रहणकाले तु करणमेवेत्यर्थः ॥
§ 1512

तत्र—प्रकाशग्रहणे । केवलं—प्रकाशनिरपेक्षम् । कथमेवं—घटादयो हि प्रकाशसापेक्षेणेन्द्रियेण गृह्यन्ते, प्रकाशस्तु प्रकाशनिरपेक्षेणैवेन्द्रियेण गृह्यत इति कथमित्यर्थः । नन्वथाऽपि स्वग्रहणकाले कर्मणः प्रकाशस्य घटादिग्रहणं प्रति वा कथं करणत्वम् ? घटग्रहणकाल एव प्रकाशग्रहणस्यावश्यकत्वात् । एवञ्च प्रकाशघटयोः एकदैव ग्रहणेन प्रकाशस्य तदैव कर्मत्वं करणत्वं चावर्जनीयमिति शङ्कां, कालभेदेन क्रियाभेदमुपपादयन्नपाकरोति—प्रथमगृहीत इत्यादि ॥ § 1513

शब्दे तु न तथा कालभेदेन क्रियाभेदोपपादनं संभवतीत्याह—शब्दस्तु क्षणिक इति ॥ § 1514

I.212/KSV

अपि च गौरित्यादिज्ञानं इन्द्रियार्थसन्निकर्षान्वयव्यतिरेकानुविधायि प्रसभं तत्कथं शाब्दमित्युच्यते ॥ § 1515

शब्दस्मरणसापेक्षं यस्योत्पादकमिन्द्रियम् ।
तदेव यदि ते शाब्दं अहो नैयायिको भवान् ! ॥ १६ ॥§ 1517

## ऐन्द्रियिकप्रत्यक्षेऽपि शब्दभानसंभवः

ननु ! शब्दावच्छिन्नमर्थं न चक्षुःश्रोत्रयोः अन्यतरदपि करणं ग्रहीतुमलमित्युक्तम् । भोः साधो ! चक्षुरेवैनं ग्रहीष्यतीति कथं न ब्रूषे ? § 1518

ननु ! नाविषये युक्तमिन्द्रियस्य प्रवर्तनम् ।
तेन शब्दविशिष्टार्थज्ञानं नेन्द्रियजं ब्रुवे ॥ १७ ॥§ 1520

मरीचिषु जलज्ञानं कथमिन्द्रियजं तव ?
तत्रापि हि न तोयेन सन्निकर्षोऽस्ति चक्षुषः ॥ १८ ॥§ 1522

ननु ! च स्मृत्युपारूढं उदकं तत्र गृह्यते ।
इहापि स्मृत्युपारूढः शब्दः कस्मान्न गृह्यते ! ॥ १९ ॥§ 1524

ननु ! शब्दो न नेत्रस्य कदाचिदपि गोचरः ।§ 1525

८ ] तत्रापि— nyāma-wit__ka

प्रसभमुच्यते इत्यन्वयः । शब्दस्मरणसापेक्षमिन्द्रियं यस्योत्पादकमित्यन्वयः । नैयायिक इति । विचारचतुर इति यावत् । अथवा एकदेशिभिः पूर्वं गौरित्यादिज्ञानानां शाब्दत्वेऽपि इत्यनेन शब्दानुवेधस्य कुत्रचिदङ्गीकारादेकदेशी वा नैयायिकः ॥ [§ 1526]

पूर्वं न हीन्द्रियकरणकमिदं इत्यादिनोक्तमाशङ्क्य समाधत्ते— नन्वित्यादिना ॥ [§ 1527]

अविषये—स्वाविषये—स्वेन गृहीतुमशक्य इति यावत् । विशेष्यविशेषणयोरुभयोरपि इन्द्रियेण, तत्रापि एकेनैव ग्रहणमिति नायं नियम इति स्फुटयितुं सिद्धान्ती पृच्छति—मरीचिष्विति । पूर्वपक्षी समाधत्ते— नन्विति । ममापि तथैवेत्याह—तत्रापीति । स्मृत्युपारूढं—स्मृत्युपस्थापितम् । कदाचिदपीति । मरीचिर्हि चक्षुर्योग्यः, शब्दस्तु न तथेत्यस्ति वैषम्यमित्यर्थः । इदं वैषम्यमप्रयोजकं, चक्षुर्योग्यमपि सर्वं सर्वत्र न हि भासते, तत्र असतोऽपि घटस्य तत्र भानप्रसङ्गात् । अतः इन्द्रिय I.213/KSV

असन्निहितमप्यम्बु किं वा भवति गोचरः ? ॥ २० ॥[§ 1529]

ननु ! एकेन्द्रियवादः स्यात् चक्षुषा शब्दवेदने ।
अत्रापि सर्वबोधः स्यात् असन्निहितवेदने ॥ २१ ॥[§ 1531]

### प्रत्यक्षं इन्द्रियासन्निकृष्टवस्तुविषयकमपि भवति

ननु च ! मरीचिजलज्ञानं भ्रान्तमिति (Edtext outside numbered paragraph)कथमिह दृष्टान्तीक्रियते ?

कथमस्य भ्रान्तत्वम् ? किमनिन्द्रियजत्वात् ? उत व्यभिचारित्वात् ? तत्रानिन्द्रियजत्वेनास्य भ्रान्ततायां इन्द्रियार्थसन्निकर्षोत्पन्नपदेनैव निरासात् अव्यभिचारिपदमनुपादेयमिति । तदुपादानात् व्यभिचारित्वेनास्य भ्रान्तत्वमिति नूनमिदमिन्द्रियजमसन्निहितसलिलज्ञानमभ्युपगन्तव्यम् ॥

यथा चाविषये तस्मिन् नीरे नयनजा मतिः ।
तथा वाचकसंस्पृष्टे वाच्ये किमिति नेष्यते ? ॥ २२ ॥[§ 1533]

यथा च तव कालादि नीरूपमपि चाक्षुषम् ।
तथा शब्दानुरक्तोऽपि किमित्यर्थो न चाक्षुषः ? ॥ २३ ॥[§ 1535]

एवं हि इन्द्रियव्यतिरेकानुविधानमत्र न बाधितं भविष्यति ।

ननु ! चाक्षुषतां शब्दे न जीवन् वक्तुमुत्सहे ।त्यजैनं वाचकोपेतवाच्यावगमदुर्ग्रहम् ॥ २४ ॥[§ 1537]&

सन्निकृष्टमेव भासत इति वक्तव्यम् । तच्च मरीचिषु शब्दे च समानम्

। अतः ज्ञानलक्षणाप्रत्यासत्त्यैवोभयमपि निर्वाह्यमिति न पर्यनुयोगावकाश इति समाधत्ते—असन्निहितमित्यादिना ॥ § 1538

अविषये—इन्द्रियासन्निकृष्टे । तस्मिन् नीरे—मरीचिकाजले । कालादीति । इदानीं घट इत्यादाविति शेषः । इन्द्रियेत्यादि । इन्द्रियाभावेऽपि जायमानत्वं न प्रत्यक्षत्वबाधकम् । विशेष्येन्द्रियसन्निकर्षेणैव प्रत्यक्षत्वनिर्वाहात्, प्रत्यभिज्ञावदिति । एवञ्च भ्रान्तिज्ञानस्य, इन्द्रियासन्निकृष्टभानांशमात्रे प्रकृतोदाहरणमिति भावः । प्रसभमुष्यते इति स्वोक्ति सत्यापयति—नन्विति । समाधत्ते—त्यजेति । दुर्ग्रहः—दुराग्रहः ॥ § 1539
I.214/KSV

## गौरयम् इत्यादिज्ञानानां शाब्दत्वासंभवः

अपि चामुष्य शाब्दत्वे सम्बन्धग्रहणं कथम् ?
न चागृहीतसम्बन्धः शब्दो भवति वाचकः ॥ २५ ॥ § 1541

निर्विकल्पकविज्ञानविषये न च तद्ग्रहः ।
शाब्दपक्षे तु निक्षिप्तं भवता सविकल्पकम् ॥ २६ ॥ § 1543

सम्बन्धः शक्यते बोद्धुं न च मानान्तराद्विना ।
शाब्दज्ञानेन तद्बोधे भवेदन्योन्यसंश्रयः ॥ २७ ॥ § 1545

न च शब्दोपरक्तेऽर्थे सम्बन्धं बुद्ध्यते जनः ।
गोशब्दवाच्यो गोशब्द इति हि ग्रहणं भवेत् ॥ २८ ॥ § 1547

वाच्यस्य हि गवादेः गोशब्दविशेषितस्य वाच्यत्वात् वाच्योऽर्थ इव गोशब्दोऽपि वाच्यतामवलम्बते ॥ § 1548

यदि च स्वानुरागेण वाचकात् वाच्यवेदनम् ।
लिङ्गादपि भवेत् बुद्धिः स्वावच्छेदेन लिङ्गिनि ॥ २९ ॥ § 1550

अथ धूमान्वितत्वेन न वह्निरवगम्यते ।
इहापि शब्दयोगेन गवादिर्नैव गम्यते ॥ ३० ॥ § 1552

सम्बन्धः—शक्तिः । निर्विकल्पेत्यादि । अयं भावः—सविकल्पकः सर्वोऽपि हि भवतां शब्दानुविद्ध एव । तत्र शब्दस्य शक्तिग्रहणं न निर्विकल्पकेन, तस्य बालमूकादिविज्ञानसदृशत्वात् । नापि सविकल्पकान्तरेण, अनवस्थानात् । नापि तेनैव, आत्माश्रयात् । नापि वाक्यादिना सम्बन्ध-

बोधः, सम्बन्धज्ञाने जाते वाक्यप्रयोगः, वाक्यप्रयोगे सति सम्बन्धज्ञानमित्यन्योन्याश्रयात् । अतः गौरयं इत्यादिः न शाब्दप्रत्यय इति । अनुभवविरोधश्च; वाच्यस्य—अर्थस्य हि गोशब्दविशेषितस्यैव भानमिति गोशब्दविशिष्टस्य गोशब्दवाच्यत्वे विशेषणस्य गोशब्दस्यापि गोशब्दवाच्यत्वप्रसङ्ग इति ॥ § 1553

यदि चेत्यादि । वाचकात्—शब्दात् वाच्यस्य वेदनं—बोधनं स्वानुरागेण—स्वोपरक्तत्वेन—स्वावच्छिन्नत्वेनैव यदि इत्यन्वयः । शब्दः स्वावच्छिन्नमेवार्थं बोधयेद्यदीति शङ्कार्थः । प्रतिबन्द्या समाधत्ते—लिङ्गादपीति । शङ्कते—अथेति । समाधत्ते—इहापीति । ननु वाच्यत्वं हि वस्तुधर्मः, वस्तुनो वाच्यत्वात् । अतः वस्तुनो भाने तद्धर्मस्यापि भानं युक्तमिति नेयं, I.215/KSV

न चास्ति वस्तुनो धर्मो वाच्यता नाम कश्चन ।
यदि स्यात्, निर्विकल्पेऽपि प्रतिभासेत रूपवत् ॥ ३१ ॥§ 1556

अर्थासंस्पर्शिनः शब्दान् कथयन् दुष्टसौगतः ।
प्रत्यक्षास्त्रेण भेत्तव्यः स कथं हन्यते त्वया ॥ ३२ ॥§ 1558

प्रत्यक्षविषये वृत्तिः शब्दानां भवतः कुतः ?
तेषां यद्विषये वृत्तिः तद्धि शाब्दीकृतं त्वया ॥ ३३ ॥§ 1560

## सर्वत्र वाचकभानाङ्गीकारे शब्दविवर्तवादावतारः स्यात्

अपि च—विषयभेदेन प्रतिभासभेदो भवतीति दुराश (Edtext outside numbered paragraph)या शब्दविशिष्टमर्थं निर्विकल्पात् सविकल्पस्य विषयमधिकं पश्यति भवान् ! अनेनैव च वर्त्मनाऽवतरन् परं शब्दाध्यासं न पश्यतीति कोऽयं व्यामोहः ? स त्वं वचनीयोऽसि संवृत्तः—मधु पश्यसि दुर्बुद्धे ! प्रपातं नैव पश्यसि इति ॥

तस्मात् गौरिति विज्ञानं प्रत्यक्षमवधार्यताम् ।
शब्दस्मरणसापेक्षचक्षुरिन्द्रियनिर्मितम् ॥ ३४ ॥§ 1562

प्रतिबन्दी युक्तेतिशङ्कां परिहरति—न चेत्यादिना । रूपवत्—वस्तुस्वरूपवत् । अथवा, विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् प्राथमिके निर्विकल्पके नीलरूपादिग्रहणानन्तरमेव नीलो घटः इति प्रतीत्या, रूपपदं नीलादिपरं वा । अथ शब्दानुविद्धसर्वप्रत्ययवादे बाधकमाह—अर्थेति । अर्थशून्यस्यापि शशशृङ्गादिशब्दस्य दर्शनात्, सर्वोऽपि शब्दः तथा कुतो न स्यात् इति वादी बौद्धः—शब्दं विनाऽपि घटाद्यर्थानां प्रत्यक्षसिद्धत्वात् अर्थाः नापलपितुं शक्याः इति खलु निग्राह्यः । एवञ्च प्रत्यक्षसिद्धं कञ्चनार्थं

◦ ] योग्यता— nyāma-wit__ka

प्रसाध्य तत्र शब्दप्रवृत्तिरुपवर्णनीया । प्रत्यक्षस्यापि भवता शाब्दत्वं यद्यङ्गीक्रियते, तर्हि शब्दप्रतीतिरेवार्थप्रतीतिर्जातेति शब्दातिरिक्तार्थसद्भावे भवता प्रमाणं दुरुपपादं स्यात् ॥ § 1563

अनेनैवेति । यदि सविकल्पकं सर्वमपि शब्दानुविद्धमेव तर्हि तथैव I.216/KSV वाक्यपदीयोक्तदीशा शब्दाध्यासप्रसङ्ग । त्यर्थः । प्रपातः—प्रपातस्तु तटो

मानसत्वं तु यद्यस्य नेष्यते युक्तमेव तत् ।
तद्भावानुविधायित्वात् बाह्येन्द्रियजमेव तत् ॥ ३५ ॥§ 1566

## सविकल्पके शब्दानुवेधाभावे निर्विकल्पकादवैलक्षण्यापादनम्

अत्र पुनः प्रवराः प्राहुः—ननु ! एवं गौरित्यादिबोधेषु वाचकावच्छिन्नवाच्यप्रतिभासे सर्वप्रकारमपाक्रियमाणे प्रथमाक्षसन्निपातसमयसमासादितसद्भावनिर्विकल्पकवेदनवैलक्षण्यं कथमेषां भवेत् । न हि विषयातिशयमन्तरेण प्रतिभासातिशयो भवितुमर्हति । दण्डीति दण्डविशिष्टः पुरुषः प्रतिभासते, इतरथा न केवलपुरुषप्रतीतेरेषा प्रतीतिर्विशि (Edtext outside numbered paragraph)ष्यत । उभयप्रतिभासेऽपि न दण्डपुरुषाविति प्रती (Edtext outside numbered paragraph)तेः । विशेषणविशेष्यभावस्य नियामकत्वात् ॥

पूर्वापरचिरक्षिप्रक्रमाद्यवगमेष्वपि ।
दिक्कालादिविशिष्टोऽर्थः स्फुरत्यतिशयग्रहात् ॥ ३६ ॥§ 1568

प्रत्यक्षः किं स कालादिः ? प्रतीतिं पृच्छ, किं मया ?
गृह्यते तद्विशिष्टोऽर्थः, स च नेत्येतदद्भुतम् ॥ ३७ ॥§ 1570

भृगुः । मधुग्रहणलोभात् अधस्स्थितं महागर्तमपि न जानासीत्युपहासः । तद्भावः—बाह्येन्द्रियसद्भावः ॥ § 1571

सर्वप्रकारं इति क्रियाविशेषणम् । विषयातिशयः—विषयवैलक्षण्यम् । एषा—दण्डविशिष्टपुरुषविषयिणी । न विशिष्येतेत्यन्वयः । दण्डपुरुषोभयविषयत्वमेव प्रत्येकविषयकप्रतीतेर्वैलक्षण्यमित्यपि न युक्तमित्याह—उभयेति । दण्डपुरुषाविति प्रतीतेः दंण्डीति प्रतीतिर्न विशिष्येतेत्यन्वयः । किं तर्हि तत्र नियामकमित्यत्राह—विशेषणेत्यादि ॥ § 1572

पूर्वापरशब्दौ दैशिकपरत्वापरत्वपरौ । चिरक्षिप्रशब्दौ कालिकपरत्वापरत्वपरौ । क्रमः—कारणकार्ये । दिक्कालसमवायानां यथासंख्यं निदर्शनम् । एतादृशप्रत्ययेष्वपि अन्ततः तत्तत्कालादीनां वा विशेषणतया भानादस्त्येव विषयवैलक्षण्यमिति । मयेति । पृष्टेनेति शेषः । कालादिविशिष्टोऽर्थः गृह्यते,

१५ ] सत्तस्य— nyāma-wit__kha

स तु कालादिः न गृह्यत इत्येतदत्यद्भुतम् । विशेषणाग्रहणे कथं तद्विशिष्टबुद्धिः स्यादित्याशयः । दिक्कालयोः प्रत्यक्षत्वं वक्ष्यति अनुमानपरीक्षायाम् ॥
§ 1573

I.217/KSV

## कालवत् समवायोऽपि प्रत्यक्षः

एतेन समवायेऽपि प्रत्यक्षत्वं प्रकासितम् ।
इहेति तन्तुसम्बन्धपटप्रत्ययदर्शनात् ॥ ३८ ॥§ 1575

अयं पट इति प्रत्ययात् इह तन्तुषु पट इति विलक्षण एष प्रत्ययः । तन्तुपटसम्बन्धस्य विशेषणस्याप्रत्यक्षतायां न केवलपटप्रत्ययात् विशिष्येतेति ॥ § 1576

## सामग्रीभेदमात्रान्न प्रतीतिभेदः

अथ मतं—उपायभेदात् प्रतीतिभेदो भवति; दूराविदूरदेशव्यवस्थितस्थाण्वादिपदार्थप्रतीतिवत्, संस्कृतासंस्कृताक्षकरणविषयबोधवद्वेति—तदसांप्रतम्—उपायभेदेऽपि तद्भेदासिद्धेः । उपायो बुद्धावतिशयमादधाति, न विषये ॥ § 1577

विषयावगतिसमये च न बुद्धिरवभातीति नैयायिकाः । तदयमतिशयः यदधिकरणः, सा न प्रतिभासते बुद्धिः; यच्च तदानीमवभासते विषयः, तत्रातिशयो नास्ति; दृश्यते चातिशयसंवेदनमिति सङ्कटः पन्थाः । न च दूराविदूरदेशवर्तिनि पदार्थे प्रतीतिरुपायभेदात् भिद्यते । साऽपि हि विषयभेदादेव भिद्यते ॥ § 1578

केवल पटप्रत्ययादिति । एष प्रत्यय इत्यनुकर्षः ॥ § 1579

सिद्धान्तिच्छायया-शङ्कते—अथ मतमिति । देशस्यापि प्रतीत्युपायत्वात्—दूरेत्यादि । भेदासिद्धिमुपपादयति—उपाय इति । वह्निविषयकमेव प्रत्यक्षमनुमानं च, न हि तत्र विषये विशेषः इत्यर्थः ॥ § 1580

ननु बुद्ध्यधीनमेव विशेषं—अन्ततः प्रत्यक्षत्वपरोक्षत्वादिरूपं—विषये ब्रूमः—इति चेत्—तत्राह—विषयेति । न ह्येकस्मिन्नेव समये ज्ञानार्थयोः प्रतिभासः संभवी, अननुभवात् । लोके अयं घट इत्यादिप्रतिभासकाले, अयं अर्थस्य आकारः, अयं ज्ञानस्येति न विविच्यानुभूयते । अतोऽयमन्यतरप्रतिभास एवेति, अर्थप्रतीतिकाले न ज्ञानप्रतीतिः, ज्ञानप्रतीतिकाले च नार्थप्रतीतिः, आकारद्वयाप्रतीतेरिति अभ्युपगन्तव्यमित्यर्थः । इदं सर्वमभ्युपगम्योक्तमित्याह—न चेति ॥ § 1581

२४ ] य— nyāma-wit__ka
२ ] काश— nyāma-wit__ka
१ ] म— nyāma-wit__ka

I.218/KSV

दूराद्धि वस्तुसामान्यं धर्ममात्रोपलक्षितम् ।
अदूरतस्तु विस्पष्टविशेषमवसीयते ॥ ३९ ॥§ 1583

यथा माधेन वर्णितम् शिशुपालवधे १-३— § 1584

चयस्त्विषामित्यवधारितं पुरा
ततः शरीरीति विभाविताकृतिम् ।
विभुर्विभक्तावयवं पुमानिति
क्रमादमुं नारद इत्यबोधि सः इति ॥§ 1588

क्रियान्तराणां वैचित्र्ये यद्वा तद्वाऽस्तु कारणम् ।
भेदो ज्ञानक्रियायास्तु कर्मभेदनिबन्धनः ॥ ४० ॥§ 1590

## उपायभेदादेव निर्विकल्पकसविकल्पकवैलक्षण्यम्

तदेतदाचार्याः प्रतिसमादधते—न विषयभेदादेव प्रतिभासभेदः, किन्तु उपायभेदात् भवत्येव ॥ § 1591

यच्च चोदितम्—विषयप्रतिभासकाले तत्प्रतिभासाप्रतिभासात् अतिशय-वचने सङ्कटः पन्था इति—तदविदितनैयायिकदर्शनस्यैव चोद्यम् । ज्ञानोत्पाद एव विषयस्य प्रत्यक्षतेति नो दर्शनं, न ज्ञानग्रहणमिति । तत्र यथा पुरुष इति निरतिशयज्ञानमात्रोत्पादे तावन्मात्रविषयप्रत्यक्षता भवति, न तत्र ज्ञानं प्रकाशते, अगृह्यमाणेऽपि ज्ञाने विषय एव प्रतिभासते; एवं दण्डीति, शुक्ल-वासा इति विशेषणज्ञानाभ्युपायवशात् सातिशयप्रत्ययजनने तदग्रहणे स एव विषयोऽवभासते इति कियानेष सङ्कटः पन्थाः ! तथा च § 1592

धर्ममात्रेति । धर्मसामान्येत्यर्थः । ननु छेदनभेदनादिक्रियासु उपायाधीन एव भेदो दृष्ट इति शङ्कायामाह—क्रियान्तराणामिति ॥ § 1593

उपायभेदादेव इत्यन्वयः ॥ § 1594

तत्प्रतिभासेति । अर्थविषयकज्ञानप्रतिभासेत्यर्थः । न ज्ञानेति । ज्ञानं स्वयं गृहीतमेवार्थं प्रत्याययतीति नेत्यर्थः । एवञ्च ज्ञानाप्रतिभासेऽपि विषयप्र-तिभासाङ्गीकारे न बाधकमित्यर्थः । तदेवोपपादयति—तत्रेति । निरतिशयेति । दण्डी पुरुष इति ज्ञानापेक्षयेत्यर्थः । तावन्मात्रेति । पुरुषमात्रेत्यर्थः । तदग्रहणे—प्रत्ययाग्रहणे । स एव—सातिशय एव—दण्डोपरक्त

I.219/KSV

दण्डीति पुरुषप्रवणैव मतिः । को दण्डी पुरुषः ? कः पुरुषो दण्डी ? इति सामानाधिकरण्येन निस्सन्दिग्धस्य पुंस एव प्रतिभासात् । एवं दण्डिनं

१७ ] सामान्याधिकरणस्य—
nyāma-wit__ka

भोजय, दण्डिने देहीति भोजनादिकार्ययोगित्वं न दण्डे दृश्यते, अपि तु पुंस्येव ॥

### विशिष्टबुद्धेः विशेष्यप्रवणत्वम्

ननु ! दण्डी पर्वतमारोहतीति दण्डेऽपि कार्यान्वयो दृश्यते लोके; वेदेऽपि दण्डी मैत्रावरुणः प्रैषानन्वाह इति प्रैषानुवंचनस्य वचनान्तरतः प्राप्तेः दण्डविधानार्थमेतद्वाक्यं भवति । यथा लोहितोष्णीषा ऋत्विजः प्रचरन्ति इति श्येनादौ ऋत्विजां प्रकृतिवद्भावेन प्राप्तानां लोहितोष्णीषविधानमात्रमेतत् भवति—उच्यते— भवत्वेवं, किन्तु, दण्डमबलम्ब्य पुरुषः पर्वतमा(?)हति, न दण्डो निश्चेतनः । वेदेऽपि दण्डपाणिः पुरुषः प्रेषाननुभाषत, न दण्डः; न लोहिता उष्णीषाश्चरन्ति, किन्तु अन्यपदार्थीभूता ऋत्विज एवेति सर्वत्र विशेष्यप्रवणैव मतिः । उभयप्रतिपादने तु दण्डपुरुषाविति स्यात्, न दण्डीति ॥

विशेषणविशेष्यभावस्य नियामकत्वादिति चेत्, सेयं विशेष्यप्रवणा मतिरुक्तैव, भवति, विशेषणस्य विशेषणत्वेनैवोपसर्जनत्वात् । दण्डः अस्य अस्तीति पुरुष एवोच्यते, न दण्डपुरुषौ ॥

एवं पूर्वापरादिप्रत्ययाः, चिरक्षिप्रादिप्रत्ययाः, इह तन्तुषु पट इत्यादिप्रत्ययाश्च दिक्कालसमवायग्राहिणः । त इमे दिक्कालसमवायाः सामग्र्यन्तर्गतास्सन्तः प्रत्ययातिशयमादधति, न तद्विषयीभवन्ति पटादिद्रव्यवत् ॥ दण्ड्येवेति यावत् । पुरुषप्रवणैवेति । न तु दण्डप्रवणेत्यर्थः । तत्र प्रमाणमाह—को दण्डीत्यादि ॥ § 1595

लोहितोष्णीषा इत्यस्य बहुव्रीहित्वात्—अन्यपदार्थीभूता इति । उभयप्रतिपादने—विशेषणविशेष्ययोरुभयोरपि समप्राधान्येन प्रतिपादने ॥ § 1596

दिक्-काल-समवायाः—यथासंख्यं उक्तप्रतीतित्रयविषयाः । सामग्र्यन्तर्गता इति । तेषां तत्र विषयत्वादित्यर्थः । न तद्विषयीभवन्ति— केवलघटप्रतीत्यपेक्षया इह इदानीं घटः इति प्रतीतेर्वैलक्षण्यात् ॥ § 1597

I.220/KSV

एवं पतनाद्यनुमेयगुरुत्वादिकारणभेदजनिताः गुरुः पाषाणः इत्यादिप्रत्ययाः परोक्षविशेषणं विशष्यमवलम्बन्ते इत्यलं विस्तरेण ॥ § 1598

तस्मात् गौरित्यादिज्ञानं न वाचकावच्छिन्नवाच्यविषयम् । अतश्च न शाब्दं तत् । अपि तु सुस्पष्टं प्रत्यक्षमेव । तस्मिंश्च लक्ष्ये सति लक्षणवैयर्थ्यशङ्काकरणाभावात् नासंभवदोषनिराकरणार्थमव्यपदेश्यपदम् ॥ § 1599

### स्वमतेन अव्यपदेश्य पदप्रयोजनवर्णनम्

किमर्थं तर्हीदमस्तु ? उक्तमाचार्यैः—उभयजज्ञानव्यवच्छेदार्थमिति ॥ § 1600

२३ ] दण्डि— nyāma-wit_kha

११ ] लक्षिते— nyāma-wit_kha

## वाचकावच्छिन्नवाच्यविषयकं ज्ञानं शाब्दमेव

ननु ! तदपि प्रत्यक्षमेवेति; अनपोह्यमुक्तम् । पुरोवस्थितगवादिपदार्थस्वरूपमात्रग्रहणनिष्ठितसामर्थ्यमत्र प्रत्यक्षम् । गोशब्दवाच्यतायां तु संज्ञाकर्मोपदेशी शब्द एव प्रमाणम् ॥ § 1601

यद्यपि शब्दार्थसम्बन्धपरिच्छेदे गत्यन्तरमपि संभवति; तथापि यत्र तावत् संज्ञिनं निर्दिश्य संज्ञा वृद्धैरुपदिश्यते—गोशब्दवाच्योऽयं, पनसशब्दवाच्योऽयमिति, तत्र तद्वाच्यतापरिच्छेदे स एव करणम् ॥

अत एव च लोकोऽपि शाब्दत्वमिह मन्यते ।
शब्दोपरचितापूर्वज्ञानातिशयतोषितः ॥ ४१ ॥§ 1604

§ 1605

अतीन्द्रियस्यापि अनुमितस्य विशेषणतया भानं युक्तमित्याह—एवमिति । परोक्षविशेषणमिति बहुव्रीहिः । परोक्षार्थस्य प्रत्यक्षे भानं तु ज्ञानलक्षणया प्रत्त्यासत्त्या, मनसा वेति वक्ष्यते ॥ § 1606

उभयजं—शब्देन्द्रियजं पूर्वमुपपादितं अयं पनसः इति ज्ञानम् ॥ § 1607

अनपोह्यं—निह्नोतुमशक्यम् । अनपोह्यत्वं विषयांश एवेत्याह—पुर इति । पदाथस्वरूपेति । विशेष्यस्वरूपेति यावत् ॥ § 1608

गत्यन्तरम्—ज्ञानलक्षणप्रत्यासत्तिरूपम्, मन एव वा । सः—शब्दः ॥
§ 1609

उभयजज्ञानं यदि न प्रत्यक्षं, तर्हि किंरूपमित्यत्राह—अत इत्यादि ।
I.221/KSV शाब्दत्वे हेतुः—शब्दोपरचितेत्यादि । इदं च लोकस्य विशेषणम् ।

तच्छब्दवाच्यताज्ञप्तिः विना संज्ञोपदेशिनः ।
शब्दान्नेति स एवात्र सत्यप्यक्षे प्रकर्षभाक् ॥ ४२ ॥§ 1612

अतः सूत्रकृताऽप्यत्र शब्दातिशयदर्शिना ।
व्यधायि तद्व्यवच्छेदः न तु धर्मोपदेशिना ॥ ४३ ॥§ 1614

तस्मात् उभयजज्ञानव्यवच्छेदार्थमेवेदं पदमिति ॥

### भाष्योक्तस्य अव्यपदेश्य पदप्रयोजनस्य समर्थनम्

अन्ये तु मन्यन्ते—यदि सङ्केतग्रहणकाले भाविनः संज्ञोपदेशकवचनजनितस्योभयजज्ञानस्य व्यवच्छेदकमिदं वर्ण्यते पदम्, तदा तद्व्यवहारकालेऽपि यत् अयं गौः इति सङ्केतग्रहणकालानुभूतदेवदत्ताद्युदीरितसंज्ञोपदेशकवचनस्मरणपूर्वकं विज्ञानमुत्पद्यते, तदप्युभयजमेवेति कथमनेन न व्युदस्यते

२१ ] मभि— nyāma-wit__kha
९ ] र्शनात्— nyāma-wit__kha
१४ ] व्यवहार— nyāma-wit__ka

॥

ननु ! तत्र शब्दस्मरणं कारणं, न शब्दः । सङ्केतकालेऽपि शब्दस्मरणमेव कारणम् । न हि क्रमभाविनो वर्णा युगपदनुभवितुं पार्यन्ते । एतदेवोपपादयति—तदिति । संज्ञोपदेशिनः—वृद्धस्य शब्दाद्विना तच्छब्दवाच्यताज्ञप्तिः शब्दात् न, इति—इति हेतोरित्यन्वयः । प्रकर्ष इति । प्रकर्षो हि कालदेशपुरुषविशेषाद्यपेक्षक इत्यर्थः । तथा चायं शाब्द एवेति भावः । न तु धर्मोपदेशिनेति । धर्मो हि न तर्कनिर्णेयः । अतस्तत्र यथाशास्त्रज्ञवचनं अङ्गीकार एव युक्तः । अयं तु न तादृशः, अतोऽस्ति विचारस्यावकाश इति पूर्वं पु. २०६ उक्तस्योत्तरमिदम् ॥ § 1615

नन्वेवं सति, ज्ञानलक्षणप्रत्यासत्त्या शब्दोपस्थितौ तद्विशिष्टं यत् गौरयम् इत्यादिज्ञानं तदपि शाब्दमेव स्यात् । न ह्यनुपदमुक्तात् वृद्धोदीरितवाक्यविशेषणकादस्य विशेषः ! अतः तद्व्यवच्छेदार्थमेवेदं लक्षणमित्युच्यतामित्याशङ्कतां मतमाह—अन्ये त्विति । तद्व्यवहारः—सङ्केतव्यवहारः ॥ § 1616

न शब्द इति । प्रकृते तु श्रूयमाण एव शब्दो विशेषणतामश्नुते, तत्र तु स्मृत इत्यस्ति विशेष इत्याशयः । पुनरप्यवैलक्षण्यमेवोपपादयति—सङ्केतेति । न हि पार्यन्त इति । शब्दानां द्विक्षणावस्थायित्वादित्याशयः । I.222/KSV

अन्त्यवर्णे तु गृह्यमाणे स्मर्यमाणे वा किं शब्दव्यापारो विशिष्यते ?

ननु ! व्यवहारकाले गवादिनामधेयपदमात्रमेव स्मर्यमाणमिन्द्रियेण सह सविकल्पप्रत्ययोदये व्याप्रियते । सङ्केतकाले तु संज्ञोपदेशिवृद्धवाक्यं—इति चेत्—मैवम्—व्यवहारकालेऽपि संज्ञोपदेशकं वृद्धवाक्यमेव स्मर्यते, तदस्मरणे तच्छब्दवाच्यताऽनवगमात् । अस्य गौरिति नाम देवदत्तेनोपदिष्टमासीत् इत्येवमनुस्मृत्य गोशब्दवाच्यतयैवं व्यवहरतीति वाक्यस्मरणजमेवेदं ज्ञानम्—

तस्मादस्यापि तद्वाक्यं संज्ञाकर्मोपदेशकम् ।
हेतुतामुपयातीति शाब्दमेतदपीष्यताम् ॥ ४४ ॥§ 1619

एवमस्त्विति चेत् शान्तमेवं सति तपस्विनाम् ।
नैयायिकानामुत्पन्नं प्रत्यक्षं सविकल्पकम् ॥ ४५ ॥§ 1621

यत्र मार्गान्तरेणापि सङ्केतज्ञानसंभवः ।
तत्राप्यनेन न्यायेन शाब्दता न निवर्तते ॥ ४६ ॥§ 1623

नैयायिकानां च सविकल्पप्रत्यक्षमयाः प्राणाः । तस्मान्नोभयजस्य शाब्दत्वं ज्ञानस्य वक्तव्यम् ॥ ननु व्यवहारकाले कृत्स्नस्यापि शब्दस्य स्मरणं, प्रकृते तु अन्तिमवर्णोऽनुभूयत एवेत्याशङ्कायामाह—अन्त्यवर्णे त्विति ।

---

१ ] गृह्यमाणे वा शब्द— nyāma-wit__ka
२ ] तत्र— nyāma-wit__ka
६ ] मेव— nyāma-wit__ka

किं विशिष्यत इति । न हि अन्तिमवर्णग्रहणमात्रं बोधजनकं, किं तु तेन कृत्स्नवर्णस्मरणेन पदोपस्थित्या खलु बोधो निर्वाह्यः । तथा च को विशेष इत्याशयः ॥ § 1624

पुनरपि सिद्धान्ती वैलक्षण्यमुपपादयति—नन्विति । तदस्मरणे— वृद्धवाक्यास्मरणे ॥ § 1625

अस्य—प्रत्ययस्य । इष्टापत्तौ बाधकमाह—शान्तमिति । सविकल्पकं प्रत्यक्षं शान्तमित्यर्थः । कुत इत्यत्राह—यत्रेत्यादि । वाच्यत्वं हि केवलान्वयि । अतः सविकल्पकं सर्वं वाचकावच्छिन्नमेवेति शाब्दमेव स्यात् । सविकल्पकप्रत्यक्षहानौ च नैयायिकमतमेवोच्छिद्येत । नैयायिकाः खलु भेदवादिनः I.223/KSV ।

सम्बन्धाधिगमस्तु नानाप्रमाणकः । तत्र स्वे स्वे विषये तत्तत्प्रमाणं प्रवर्तते । यथाऽऽहं भट्टः सम्बन्धः त्रिप्रमाणकः श्लो. वा. सम्ब. परि—१४१ इति । तस्मान्नैकस्य शब्दस्य भारः आरोपणीयः । प्रत्यक्षं तु सङ्केतग्रहणकालेऽपि स्वविषयग्राहकमिति नोभयजज्ञानव्यवच्छेदपंक्षो निरवद्यः । तस्माद्वरं जरन्नैयायिककथितशब्दकर्मतापन्नज्ञानव्यवच्छेदपक्ष इति स एवाश्रीयताम् । तत्र तावत् कर्मणि कृत्ये कृते व्यपदेश्यशब्दो यथार्थतरो भवति ॥

### शब्देन्द्रियजज्ञानस्य न पञ्चमप्रमाणत्वम्

ननु ! तत्र चोदितं; न तादृशं ज्ञानमप्रमाणं, न पञ्चमं प्रमाणमिति—सत्यम्—अयन्तु तेषामाशयः । रूपादिविषयग्रहणाभिमुखं हि भेदश्च सविकल्पविषयः । निर्विकल्पस्य वस्तुद्वयविषयकत्वाभावात् । अतश्च सविकल्पप्रत्यक्षहानौ भेदवादिनो नैयायिकस्य प्राणोच्छेद एवेति ॥ § 1626

नानाप्रमाणकः—प्रत्यक्षानुमानादिप्रमाणकः । ननु कथमेकस्मिन्नेव विषये एकदैव नानाप्रमाणप्रवृत्तिरित्यत्राह—स्वे स्वे इति । सम्बन्ध इति । अर्थानुवादोऽयम् । वृद्धव्यवहाराच्छक्तिग्रहणोपपादनप्रकरणगतमिदम् । तथा हि—शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति । श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया । अन्यथाऽनुपपत्त्या च बुद्ध्येच्छक्तिं द्वयाश्रिताम् । अर्थापत्त्याऽवबुध्यन्ते संबन्धं त्रिप्रमाणकम् इति वार्तिकम् । अयमर्थः—व्युत्पित्सुर्बालः, वाचकं शब्दं, तत्प्रयोक्तारं प्रयोजकवृद्धं, तदर्थं च गवादिकं प्रत्यक्षेणेव जानाति; तत्र शब्दं श्रोत्रेण, इतरौ चक्षुषेति विशेषः । अनन्तरं स एव व्युत्पित्सुः गवानयनादौ प्रवर्तमानस्य श्रोतुः—प्रयोज्यवृद्धस्य अर्थज्ञानं गवानयनादिव्यापारेणानुमिनोति । ततः अस्य शब्दस्यास्मिन्नर्थे शक्तिमन्तरा अर्थज्ञानमेव न स्यादित्यर्थापत्त्या वाच्यवाचकभावरूपां शक्तिं गृह्णाति । एवं शक्तिज्ञानस्य प्रत्यक्षअनुमान-अर्थापत्त्यधीनत्वेऽपि अर्थापत्तिरभ्यर्हिततम उपायः । न हि हेतूनां सर्वेषां दण्डचक्रभ्रमणादीनामेकरूपमेव हेतुत्वं संभवति । अत एव त्रिप्रमाणकम् इत्युक्तम् । अत्र यद्यपि अर्थापत्तिर्नातिरिक्तं प्रमाणं, अथापि प्रमाणमेवेति न विरोधः । भारः—शक्तिग्राहकत्वम् । जर-

३० ] ज्ञानपक्ष— nyāma-wit__ka

नैयायिकाः— भाष्यकाराः । कृत्ये—अर्हे कृत्यतृचश्च इत्युक्तकृत्यप्रत्यये । यथार्थतरः—शब्दकर्मकत्वादन्वर्थः ॥ § 1627

तेषां—भाष्यकाराणाम् ॥ § 1628

I.224/KSV

तदक्षजं ज्ञानं प्रमाणं फलं वोच्यते । यदा तु तदेव शब्देनोच्यते रूपज्ञानं रसज्ञानमिति, तदा रूपादिज्ञानविषयग्रहणव्यापारलभ्यां प्रमाणतामपहाय शब्दकर्मतापत्तिकृतां प्रमेयतामेवावलम्बत इति न तस्यां दशायां तत्प्रमाणमिति कुतः पञ्चमप्रमाणप्रसङ्ग इति ॥ § 1629

## मतान्तरेण अव्यपदेश्य पदप्रयोर्जनवर्णनम्

अपर आह—सविकल्पकस्य शब्दसङ्कल्पकस्य शब्दसंसर्गसापेक्षजन्मनः प्रत्यक्षज्ञानस्य शाब्दतां पूर्ववदाशङ्क्य तस्यैवशाब्दतां दर्शयत्यव्यपदेश्यपदेन सूत्रकारः । प्रत्यक्षमेव तत् ज्ञानम्, इन्द्रियान्वयव्यतिरेकानुविधायित्वात्, अव्यपदेश्यं—अशाब्दमित्यर्थः ॥ § 1630

स्पष्टत्वात् वाचकाभावात् इन्द्रियानुविधानतः ।
लोकस्य सम्मतत्वाच्च प्रत्यक्षमिदमिष्यते ॥ ४७ ॥ § 1632

शब्दानुस्मृतिजत्वेऽपि न शाब्दं ज्ञानमीदृशम् ।
शब्दस्मृतिः सहायः स्यात् इन्द्रियस्य प्रदीपवत् ॥ ४८ ॥ § 1634

## निर्विकल्पकस्य सूत्रारूढत्वोपपादनम्

नन्वेवं सविकल्पस्य प्रत्यक्षत्वे प्रसाधिते ।
नेदानीं सङ्गृहीतं स्यात् प्रत्यक्षं निर्विकल्पकम् ॥ ४९ ॥ § 1636

यस्तु शब्दानुवेधेन शाब्दत्वं सविकल्पके ।
कश्चिदाशङ्कते, तस्य प्रतिशब्दोऽयमुच्यते ॥ ५० ॥ § 1638

यत्र शब्दानुवेधेऽपि प्रत्यक्षं ज्ञानमिष्यते ।
तत्र तत्स्पर्शशून्यस्य तथात्वे का विचारणा ॥ ५१ ॥ § 1640

---

२५ ] प्रमाणं वा— nyāma-wit__kha
२९ ] शब्दसं— nyāma-wit__ka; nyāma-wit__ga

९ ] यत्र—क. यत्तु— nyāma-wit__kha

निर्विकल्पकवत्तस्मात् प्रत्यक्षं सविकल्पकम् ।
समग्रहीच्च तदिदंपदेनानेन सूत्रकृत् ॥ ५२ ॥§ 1642

स्पष्टत्वात्—इतरप्रमाणापेक्षया संशयावकाशविरलत्वात् स्पष्टत्वम् । वाचकाभावात्—वाचकभानरहितत्वात् । यस्त्विति । अस्य आशङ्कते इत्यनेनान्वयः । प्रतिशब्दः—प्रत्युत्तरम् । सविकल्पकस्यैव प्रत्यक्षत्वे निर्विकल्पकस्य प्रत्यक्षत्वं कैमुतिकसिद्धमित्याह—यत्रेति । यत्र—सविकल्पके । तत्र— निर्विकल्पके । तत्स्पर्शः—शब्दभानम् । निर्विकल्पकस्य प्रत्यक्षत्वं कैमुतिकसिद्धमिति तस्य दृष्टान्तत्वाभिधानम् ॥ § 1643

I.225/KSV

इत्याचार्यमतानीह दर्शितानि यथाऽऽगमम् ।
यदेभ्यः सत्यमाभाति सभ्यास्तदवलम्ब्यताम् ॥ ५३ ॥§ 1645

## अव्यभिचारि पदप्रयोजनम्

अव्यभिचारिग्रहणं व्यभिचारिज्ञानव्यवच्छेदार्थम् । यथा— ग्रीष्मे तपति ललाटन्तपे तपने तन्मरीचिषु चतुरमूषरभुवमभिहत्य समुत्फलितेषु तरङ्गाकारधारिषु यत् वारिज्ञानं, तत् अतस्मिंस्तदितिग्रहणात् व्यभिचारि भवति । तत् अनेन पदेन व्यवच्छिद्यते, न तत् प्रत्यक्षमिति ॥ § 1646

तत्र निर्विकल्पकमपि प्रथमनयनसन्निपातजं ज्ञानमुदकसविकल्पकज्ञानजनकं उदकग्राह्येव न यथा, तथा तथागताः कथयन्ति । मरीचिविषयमविकल्पकं ज्ञानं उदकविकल्पकजननात् अप्रमाणमिति । निर्विकल्पावस्थायामविचारयत एव प्रथमोन्मीलितचक्षुषो झटिति सलिलप्रतिभासात् ॥ § 1647

चतुरं इति प्रतिफलनक्रियायाः विशेषणम्, अभिहननस्य वा । न तत् प्रत्यक्षमिति । प्रत्यक्षप्रमाणस्य खलु लक्षणमुच्यत इत्यर्थः ॥ § 1648

ननु मरीचिषु प्रथमाक्षपातजं हि ज्ञानं निर्विकल्परूपं प्रमाणमेवेति कथमुच्यते तस्य व्यावृत्त्यर्थं अव्यभिचारीतिविशेषणमित्यत्राह—तत्रेति । प्रथमनयनसन्निपातजमपीत्यन्वयः । उदकग्राह्येव नेति । न ह्युदकेन साकं चक्षुषस्सन्निकर्षः, किन्तु मरीचिभिरेवेति हेतुः । ननु तर्हि मरीचिविषयकं तज्ज्ञानं कथमप्रमाणमित्यत्राह—मरीचीत्यादि । अन्यथा हि उदकसन्निकर्षजोदकज्ञानस्य मरीचिसन्निकर्षजोदकज्ञानस्य च वैलक्षण्यमेव दुर्वचं स्यादित्याशयः । वस्तुतस्तत्र निर्विकल्पमपि न मरीचिविषयकमित्याह—निर्विकल्पेति । अविचारयत इति प्रथमाक्षसन्निपातजत्वोपपादनाय ॥ § 1649

३ ] बारिधि— nyāma-wit__kha
५ ] ज— nyāma-wit__kha
५--६ ] ग्राह्येव— nyāma-wit__ka
६ ] तथा— nyāma-wit__ka
७ ] सवि— nyāma-wit__kha
८ ] वत— nyāma-wit__ka

I.226/KSV

अथवा वाचकोल्लेखपूर्विका अपि संविदः नैवेन्द्रियार्थजन्यत्वं जहति इत्युपपादितम् । तस्मात् सविकल्पकमविकल्पकं वा यत् अतस्मिंस्तदिति ज्ञानमुत्पद्यते तत् व्यभिचारि । तच्चेह व्यावर्त्यमिति ॥ § 1650

## इन्द्रियार्थसन्निकर्षोत्पन्नपदेनैव भ्रमव्यावृत्तिशङ्का, समाधानं च

ननु ! मरीचिषु जलज्ञानमविद्यमानसलिलावभासित्वात् अतिन्द्रियार्थसन्निकर्षजम् । अतश्चेन्द्रियार्थसन्निकर्षोत्पन्नपदेन तद्व्युदाससिद्धेः किमव्यभिचारिपदेन ? नैतदेवम्— § 1651

तस्येन्द्रियार्थजन्यत्वं सिद्धं तद्भावभावतः ।
न ह्यनुन्मीलिताक्षस्य मरौ सलिलवेदनम् ॥ ५४ ॥§ 1653

अर्थोऽपि जनकस्तस्य, विद्यते नासतः प्रथा ।§ 1654

## भ्रमस्थले विषयभानप्रकारचिन्ता

तदालम्बनचिन्तां तु त्रिधाऽऽचार्याः प्रचक्रिरे ॥ ५५ ॥§ 1655

कैश्चिदालम्बनं तस्मिन् उक्तं सूर्यमरीचयः ।
निगूहितनिजाकाराः सलिलाकारधारिणः ॥ ५६ ॥§ 1657

तुष्यत्वित्यादिन्यायेनाह—अथवेति । वाचकोल्लेखेत्यादि । मरीचिकां पश्यन्नपि भ्रान्तः उदकमिदं इति खलु जानाति । अतः अतस्मिंस्तद्रूपत्वं दुरपह्नवमेवेत्याशयः ॥ § 1658

तद्भावभावतः—इन्द्रियार्थसन्निकर्षे सत्येवोत्पादात् । किं ततः ? इत्यत्राह—अर्थोऽपीति । असदर्थविषयकत्वमेव कुतो न स्यादित्यत्राह— विद्यत इति । प्रथा-प्रकाशः, प्रतीतिरिति यावत् ॥ § 1659

उक्तं इति विधेयप्राधान्यात्कथनम् ॥ § 1660

ननु स्वासाधारणाकारतिरोभावमात्रेणान्याकारस्य कथं तत्र भानम् ? न हि सलिलेन्द्रियसन्निकर्षस्तत्रोपपादयितुं शक्य इति शङ्कायामाह— I.227/KSV

तत्र तरङ्गादिसामान्यधर्मग्रहणे सति न स्थाणुपुरुषवत् उभयविशेषाः स्मरणपथमवतरन्ति । न च सन्निहितमरीचिविशेषाः स्मरणपथमवतरन्ति । किन्तु पूर्वोपलब्धविरुद्धसलिलवर्तिनो विशेषाः । तत्स्मरणाच्च स्थगितेषु स्वविशेषेषु मरीचयः स्वरूपमुपदर्शयितुमशक्नुवन्तः तोयरूपेणावभासन्ते ॥

२३ ] ज्ञान— nyāma-wit__ka

## मतान्तरेण भ्रमोपपादनम्

अन्ये त्वालम्बनं प्राहुः पुरोऽवस्थितधर्मिणः ।
सादृश्यदर्शनोद्भूतस्मृत्युपस्थापितं पयः ॥ ५७ ॥§ 1663

यत्र किल ज्ञाने यत् रूपमुपप्लवते, तत् तस्यालम्बनमुच्यते, न सन्निहितम्; भूप्रदेशस्य तदारंभकाणां च परमाणूनां तदालम्बनत्वप्रसङ्गात् । इदं च सलिलावभासि विज्ञानम् । अतस्तदेवास्यालम्बनम् । तच्च नेह सन्निहितम् । न चैकान्तासतः खपुष्पादेः ख्यातिरवकल्पत इति देशान्तरादौ विद्यमानमेव सलिलं सदृशदर्शनप्रबुद्धसंस्कारोपजनितस्मरणोपारूढमिहावलम्बनीभवति ॥ तत्रेत्यादि । तरङ्गादीति । तरलत्वादीति (?)वत् । ननु तर्हि संशयरूपत्वं कुतो न ? इत्यत्राह—न स्थाण्विति । अत्र नञः स्मरणपथमवतरन्तीत्यनेनान्वयः । मरीचेस्तथैव कुतो न भानम् ? इत्यत्राह—न चेति । पूर्वोपलब्धं यत् मरीचित्वं, तद्विरुद्धा ये सलिलवर्तिनो विशेषाः सलिलत्वादयः ते न स्मरणपथमवतरन्तीत्यन्वयः । तत्स्मरणात्—सलिलत्वादिस्मरणात् । स्थगितेषु—आच्छादितेषु । स्वविशेषेषु—मरीचित्वादिषु ॥ § 1664

धर्मिणः इत्यस्य सादृश्यपदार्थेनान्वयः । ननु इन्द्रियसन्निकर्षस्तु मरीचेः, आलम्बनत्वं तु पयस इति कथं घटतामित्यत्राह—यत्रेत्यादि । अयं भावः—इन्द्रियसन्निकर्षमात्रं न ज्ञानविषयताप्रयोजकम्, पुरोवर्तिधर्म्यतिरिक्तानां भूप्रदेश-तदुपादानपरमाणूनां च इन्द्रियसन्निकर्षे सत्यपि ज्ञानाविषयत्वात् । इदं जलम् इत्येव खलु ज्ञानस्याकारः । अत्र अयं देशो जलवान् इति
I.228/KSV देशस्याप्यालम्बनत्वं कदाचित् संभवेत्, परमाणूनां तु तदपि

## तत्रैव पक्षान्तरोपपादनम्

अन्यदालम्बनं चान्यत् प्रतिभातीति केचन ।
आलम्बनं दीधितयः तोयं च प्रतिभासते ॥ ५८ ॥§ 1667

कर्तृकरणव्यतिरिक्तं ज्ञानजनकमालम्बनमुच्यत इति न परमाण्वादौ प्रसक्तिरिति । तदिदं पक्षत्रयमपि उपरिष्टान्निपुणतरं निरूपयिष्यते ३ आह्निके ॥

तदेवं बाह्येन्द्रियार्थान्वयव्यतिरेकानुविधायिनां विभ्रमाणामिन्द्रियार्थसन्निकर्षोत्पन्नपदेन निरसितुमशक्यत्वात् युक्तमव्यभिचारिपदोपादानम् ॥

## मानसविभ्रमाः

(Edtext outside numbered paragraph)ये तु—मानसाः विभ्रमाः बाह्येन्द्रियानपेक्षजन्मानः—तेषामिष्यत एवेन्द्रियार्थसन्निकर्षपदेन पर्युदसनमिति न तदर्थमव्यभिचारिपदोपादानम् । तद्यथा—

२०--२३ ] सन्निहितम्—
nyāma-wit__kha

विरहोद्दीपितोद्दामकामाकुलितदृष्टयः ।
दूरस्थामपि पश्यन्ति कान्तामन्तिकवर्तिनीम् ॥ ५९ ॥[§ 1669]

**मानसविभ्रमहेतवः**

ननु ! एवंप्रायेषु निरालम्बनेषु विभ्रमेषु कुतस्त्यः आकारः प्रतिभाति ? उच्यते— नेति । अतो यत् प्रकाशते तदेवालम्बनम् । प्रकृते च सलिलमेव प्रकाशत इति तदेबालम्बनम् । एवमालम्बनत्वे सिद्धे तस्योपस्थितिर्यथाकथञ्चित् वक्तव्येति स्मरणमेवोपस्थापकं कल्प्यत इति ॥ [§ 1670]

कर्तृकरणेति । एवञ्चास्मिन् मते यत् प्रकाशते तदेवालम्बनमिति न नियमः । एवञ्चात्र प्रथमपक्षे मरीचीनामेव विषयत्वं, तोयभानं तु ज्ञानाख्यप्रत्यासत्त्या । द्वितीयपक्षे तथैव प्रत्यासत्त्या तोयानामेव विषयत्वम् । तृतीयपक्षे तु विषयत्वं अन्यस्य, भानं चान्यस्येति नायं दोष इति विशेषः ॥ [§ 1671]

निरालम्बनेष्विति—मरीचिजलज्ञानादौ हि पुरोवस्थितासु मरीचिषु जलप्रतिभास इति साधिष्ठानकोऽयं भ्रमः । कामुककान्तादर्शनादौ कस्मिन् पुरोवर्तिनि कान्ताप्रतीतिः ? न हि निरधिष्ठानको भ्रमः सिद्धान्तेऽङ्गीकर्तुं शक्यते । शून्यवादावतारप्रसङ्गात् इति भावः ॥ [§ 1672]
I.229/KSV

आकारः स्मृत्युपारूढः प्रायेण स्फुरति भ्रमे ।
स्मृतेस्तु कारणं किञ्चित् कदाचित् भवति क्वचित् ॥ ६०
॥[§ 1674]

क्वचित् सदृशविज्ञानं कामशोकादयः क्वचित् ।
क्वचित्तु दर्शनाभ्यासः तिमिरं चक्षुषः क्वचित् ॥ ६१ ॥[§ 1676]

क्वचिन्निद्रा क्वचिच्चिन्ता धातूनां विकृतिः क्वचित् ।
अलक्ष्यमाणे तद्धेतौ अदृष्टं स्मृतिकारणम् ॥ ६२ ॥[§ 1678]

बालस्येन्दुद्वयज्ञानमस्ति नास्तीति वेत्ति कः ।
अस्तित्वेऽपि स्मृतौ हेतुमदृष्टं तस्य मन्वते ॥ ६३ ॥[§ 1680]

नूनं नियमसिद्ध्यर्थं जनकस्यावभासनम् ।
न चैकान्तासतो दृष्टा ज्ञानोत्पादनयोग्यता ॥ ६४ ॥[§ 1682]

न च सन्निहितं वस्तु तत्रास्ति वनितादिकम् ।

---
४ ] कचित्त्व— nyāma-wit__kha

तेनेदं स्मृत्युपारूढं अवभातीति मन्वते ॥ ६५ ॥§ 1684

तत्राद्येन पदेनैताः स्वान्तःकरणसंभवाः ।
निरस्ता भ्रान्तयोऽक्षादिसंसर्गरहितोदयाः ॥ ६६ ॥§ 1686

याः पुनः पीतशङ्खादिमरुनीरादिबुद्धयः ।
अक्षजास्तद्व्युदासाय सूत्रे पदमिदं कृतम् ॥ ६७ ॥§ 1688

स्मृत्युपारूढ इति । एवञ्च पुरोवर्तित्वांशे परं भ्रम इति भावः । अलक्ष्यमाण इति । तद्धेतौ-भ्रमहेतौ अलक्ष्यमाणे—प्रत्यक्षतोऽगृह्यमाणे अदृष्टं वा स्मृतिकारणं कल्पनीयमित्यर्थः । ननु बालस्य कथं पूर्वोक्तदोषाणां प्रसङ्गः ? कथं वा तस्य भ्रमोत्पत्तिः ? इत्यत्राह—बालस्येति । स्मृताविति । आकारः स्मृत्युपारूढः इत्यत्रोक्तायां भ्रमहेतुभूतायां स्मृतौ इत्यर्थः । नियमसिद्धयर्थं—कार्यकारणयोर्व्याप्तिसिद्धयर्थं अत्रापि जनकस्य—भ्रमहेतोः अवभासनं नूनमङ्गीकर्तव्यम् । अन्यथा कुत्रापि कार्यात् कारणानुमानं न स्यादित्यर्थः । ननु निरधिष्ठान एव वनितादिभ्रमः कुतो न स्यादित्यत्राह—न चेति । आद्येन पदेन—इन्द्रियार्थसन्निकर्षोत्पन्नपदेन । इदं पदं—अव्यभिचारिपदम् । एवञ्च भ्रमः द्विविधः—अन्तर्गताकारे बहिष्ठत्वविषयकः, बहिर्गत एव वस्तुनि आकारान्तरविषयक इति सर्वोऽपि भ्रमः सालम्बन एवेति ॥ § 1689

I.230/KSV

## व्यवसायात्मकदलप्रयोजनम्

दूरात् स्थाणुपुरुषसाधारणं धर्ममारोहपरिणाहरूपं उपलभमानस्य तयोरन्यतरत्र वर्तमानान् वक्रकोटरादीन् करचरणादीन् वा विशेषानपश्यतः समानधर्मप्रबुद्धसंस्कारतया चोभयवर्तिनोऽपि विशेषाननुस्मरतः पुरोऽवस्थितार्थविषयं स्थाणुर्वा पुरुषो वेति संशयज्ञानमुपजायते । तत् इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणयुक्तमपि न प्रत्यक्षफलम् । अतस्तद्व्यवच्छेदाय व्यवसायात्मकग्रहणम् ॥ § 1690

## इन्द्रियार्थसन्निकर्षोत्पन्नपदेन न संशयव्युदाससंभवः

ननु ! मानसत्वात् संशयज्ञानस्य इन्द्रियार्थसन्निकर्षोत्पन्नग्रहणेन निरासः सिद्ध्यत्येव; किं पदान्तरेण ? तथा च भाष्यकारः— स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहसुखादिप्रत्यक्षं इच्छादयश्च मनसो लिङ्गानि न्या. भा. १-१-१६ इति वक्ष्यति । मैवम्—स्थाण्वादिसंशयस्य बाह्येन्द्रियान्वयव्य-

२ ] चरणान्— nyāma-wit__kha
१० ] वक्ष्यते— nyāma-wit__ka

तिरेकानुविधायित्वात् । कश्चिद्धि मानसः संशयः समस्त्येव; यथा— दैशिकस्य ज्योतिर्गणकादेः एकदाऽन्यदा चासम्यगादिश्य तृतीये पदे पुनरादिशतः संशयो भवति—किमयमस्मदादेशः संवदेत् ? उत विसंवदेत् ? इति । स भाष्यकृतश्चेतसि § 1691

तयोः—स्थाणुपुरुषयोः । उभयवर्तिनोऽपि विशेषाननुस्मरत इत्यनेन भ्रमवैलक्षण्यमुक्तम् ॥ § 1692

मानसत्वादिति । इन्द्रियेण धर्मिणि गृहीतायां साधारणधर्मयोः स्मरणे च पश्चाज्जायमानः संशयो मानसिक एव । न हि तत्र वस्तुद्वयेन साकमिन्द्रियसन्निकर्षो वर्तत इत्यर्थः । संशयस्य मानसत्वे संवादमाह—तथा चेति । कार्यात् खलु कारणानुमानमिदम् । तेन च संशयस्य मनःकारणकत्वमुक्तं भवतीत्यर्थः । बाह्येन्द्रियेति । तथा च चाक्षुष एवायं स्थाणुपुरुषसंशय इत्यर्थः । ननु तर्हि मानसः संशय एव नास्ति किम् ? इत्यत्राह— कश्चिदिति । दैशिकः—ग्रामीणः । भाष्यमप्येतद्विषयमित्याह—स भाष्यकृत I.231/KSV

केवलमनःकरण इति स्थितः । यस्तु विष्फारिताक्षस्य स्थाणुर्वा ? पुरुषो वा ? इत्यादिः संपद्यते संशयः तमनिन्द्रियार्थसन्निकर्षजं को नामाचक्षीत !

## अव्यभिचारिपदेनापि न संशयव्युदाससंभवः

ननु ! अतस्मिंस्तदिति ज्ञानं व्यभिचारि व्याख्यातम् । एकरूपं च पुरोऽवस्थितमर्थं अनेकरूपतया स्पृशति संशयः—स्थाणुर्वा ? पुरुषो वा ? इति । सोऽयमतस्मिंस्तथाभावात् विपर्यय एवेति पूर्वपदव्युदस्तत्वात् न पदान्तरव्यवच्छेद्यतामर्हतीति । नैतदेवम्— स्वरूपभेदात् कारणभेदाच्च । एकमेव विरुद्धमाकारमुल्लिखन् विपर्ययो जायते—स्थाणौ पुरुष इति, पुंसि वा स्थाणुरिति । अनियताकारद्वयोल्लखी तु संशयो भवति—स्थाणुर्वा स्यात् ? पुरुषो वेति । सोऽयं स्वरूपभेदः प्रत्यात्मसंवेद्यः ॥

कारणभेदश्च—विरुद्धविशेषस्मरणप्रभवो विपर्ययः—शुक्तिकायां सन्निहितायां रजतविशेषान्, मरीचिषु सन्निहितेषु सलिलगतविशेषाननुस्मरतः विपर्ययो भवति; उभयविशेषस्मरणजन्मा तु संशय इति—पदान्तरनिरसनीय एवायम् ॥ इति । एवं मानससंशयसत्वेऽपि संशयसामान्यस्य मानसत्वाभावात् इन्द्रियार्थसन्निकर्षोत्पन्नपदेन न व्युदासः ॥ § 1693

नन्विदं अतस्मिंस्तदिति ज्ञानं कथं भवेत् । तत्र हि पुरोवर्तिनि स्थाणुत्वं पुरुषत्वं वा वर्तत एव खल्वित्यत्राह—एकेति । स्थाणुत्वपुरुषत्वान्यतरवत् तदन्यतराभावोऽपि तत्र वर्तत एव, तयोर्विरुद्धत्वादित्यतस्मिंस्तदिति ज्ञानमेव तदिति । स्वरूपभेदादिति । विपर्ययापेक्षयेति शेषः । एकमेवेति आकारविशेषणम् ॥ § 1694

३ ] करण— nyāma-wit__ka
४ ] एवमेव— nyāma-wit__kha
७ ] भेदस्तु— nyāma-wit__kha

पदान्तरेत्यादि । अव्यभिचारिपदेन न संशयव्युदास इत्यर्थः । एतदुक्तं भवति । प्रतीतः आकारो यदि धर्मिणि नास्ति, तदा तत् ज्ञानं व्यभिचरितमित्युच्यते । संशयस्थले तु प्रतीतः एकः आकारः धर्मिण्यस्त्येवेति संशयः व्यभिचरित इति न वक्तुं शक्यत इति ॥ § 1695

I.232/KSV

## अव्यपदेश्यपदेनैव व्यवसायात्मकपदं न चरितार्थम्

ननु ! संशयविपर्यययोरपि निर्विकल्पयोरसंभवात् अव्यपदेश्यपदेनैव प्रवरपक्षे प्रतिक्षेपः सिद्ध्येत् । पुरोऽवस्थितस्थाण्वादिधर्मिदर्शनमात्रमेव निर्विकल्पकमिन्द्रियव्यापारजम् । अनन्तरन्तु उभयान्यतरविशेषणस्मरणजन्मनोरुल्लिखितशब्दयोरेव संशयविपर्यययोरुत्पादः । तत्र विशेषस्मृत्यैव शब्दानुवेधस्याक्षेपात् । अतः पदद्वयमपि तद्व्युदासाय न कर्तव्यम् ॥ § 1696

अत्रैतदेव तावद्वक्तव्यम् । प्रवरपक्षः प्रतिक्षिप्त एव, यतः शब्दानुवेधजातमपि प्रत्यक्षमुपपादितम् ॥ § 1697

## इन्द्रियार्थसन्निकर्षोत्पन्नपदेनापि न संशयविपर्ययव्युदाससंभवः

ननु ! भवतु प्रवरपक्षः प्रतिक्षिप्तः । सदृशदर्शननिष्ठिते तु नयनव्यापारे, विशेषस्मृतेरूर्ध्वमुपजायमानौ संशयविपर्ययौ नेन्द्रियजाविति प्रथमपदेनैव निरस्तौ भवतः—तदसत्—स्मृतेरूर्ध्वमपी- § 1698

निर्विकल्पयोः—शब्दाननुविद्धयोः । प्रवरः—भाष्यकारः । यदक्षपादः प्रवरो मुनीनां इति वार्तिकोक्तेः तथा निर्देशः । असंभवदोषनिरासकतया अव्यपदेश्यपदस्य स्वेन व्याख्यातत्वात् प्रवरपक्षे इत्युक्तम् । अव्यपदेश्यपदेन तयोर्निरासमेवोपपादयति—पुरोऽवस्थितेत्यादि । उभयान्यतरेति यथाक्रमं संशयविपर्ययाभिप्रायम् । अव्यपदेश्यपदेन संशयविपर्ययव्युदाससूचनाय—उल्लिखितशब्दयोरिति । उल्लिखितशब्दयोरित्यत्र प्रमाणमाह—तत्रेति । उपपादितं—पूर्वं २०५, २१५ पुटे । तथा च नानेन संशयव्यावृत्तिः ॥ § 1699

नन्विति—यद्यप्यनुपदमेव संशयविपर्यययोरैन्द्रियिकत्वमुक्तं, तथाऽपि तदेवाक्षिप्यत इति मन्तव्यम् । पूर्वं हि इन्द्रियान्वयव्यतिरेकानुविधानात् ऐन्द्रियिकत्वमुक्तम् । इन्द्रियव्यापारस्तु सदृशदर्शने पर्यवस्यतीत्याक्षेपः । सदृशदर्शननिष्ठिते—सदृशदर्शन एव विश्रान्ते । एवञ्चानन्तरमिन्द्रियव्यापाराभावात् कथं तयोरिन्द्रियार्थसन्निकर्षजन्यत्वम् ? न हि संशयविपर्ययोः

I.233/KSV

२३--२४ ] जन्मनो—
nyāma-wit__ka
२६ ] अत्र तदेव—

nyāma-wit__kha

न्द्रियव्यापारानुवृत्तेरित्युक्तत्वात् । एतच्चान्वयव्यतिरेकाभ्यामवगम्यते, निमीलितचक्षुषस्तदनुत्पादात् । न च तदानीमन्तःसङ्कल्परूपेणापि शब्दोल्लेखः । उत्पन्ने तु संशये विपर्यये च वाचकस्मरणं भविष्यतीति सम्यग्ज्ञानवत् संशयविपर्ययावपि शब्दोल्लेखशून्यौ संवेद्येते । विशेषस्मृतिस्तु विशेषविषयत्वात् तानेवाक्षिपतु । शब्दस्य किं वर्तते ? वाचकशब्दस्मृतिस्तु शब्दमुपस्थापयति । सा च न तावदुत्पन्नेति ॥

सम्यक्प्रत्ययवत्तस्मात् वाचकोल्लेखवर्जितौ ।
अक्षव्यापारजौ न स्तः न संशयविपर्ययौ ॥ ६८ ॥§ 1702

ईदृशयोः कथमनयोराद्यपदव्युदसनीयता ? तस्मात् ।
तदपाकृतये युक्तं पदद्वयस्याप्युपादानम् ॥ ६९ ॥§ 1704

### प्रत्यक्षं इति पदव्याख्यानम्

एवं लक्षणपदानि । लक्ष्यपदं तु प्रत्यक्षम् इति ज्ञानविशेषे रूढ्यैव प्रवर्तते; योगस्य व्यभिचारात् । प्रति गतमक्षं प्रत्यक्षमित्यक्षरार्थः । स चायं सुखादावपि संभवतीति रूढिरेव साधीयसी ॥ प्रकारतया भासमाने वस्तुनि इन्द्रियसम्बन्धोऽस्ति । अन्यथा व्याप्तिग्रहणकाले वह्नेरैन्द्रियिकत्वात् अनुमानेऽपि वह्नेरैन्द्रियिकत्वं स्यादिति भावः । स्मृतेरनन्तरमपि कुतः इन्द्रियव्यापारापेक्षेत्यत्र अनुभवं पृच्छेति वदति—एतच्चेति । तदनुत्पादात्—संशयविपर्यययोरनुत्पादात् । तयोः प्रकारांशे इन्द्रियसन्निकर्षाभावेऽपि, विशेष्यांशे अस्त्येव सः । ततश्च प्रत्यभिज्ञावत् तावपि प्रत्यक्षावेवेति न निराससंभवः । सम्यग्ज्ञानं—शब्दाननुविद्धप्रमात्मकसविकल्पकज्ञानम् । तानेव—विशेषानेव । एवकारेण शब्दव्यवच्छेदः । अक्षव्यापारजौ न स्त इति न इत्यन्वयः ॥
§ 1705

व्यभिचारमेवोपपादयति—प्रति गतमिति । इन्द्रियसम्बद्धमित्यर्थः । सम्बन्धश्च जन्यजनकभावः । एवञ्च सुखादीनामपि मानसत्वादतिव्याप्तिः । बाह्येन्द्रियमात्रविवक्षायामात्मप्रत्यक्षादावव्याप्तिप्रसङ्गः ॥ § 1706
I.234/KSV

## सूत्रे प्रत्यक्षपदं यौगिकमपि स्यात्

अथवा ज्ञानपदस्य सूत्रे निर्देशात् योगपक्षोऽप्यस्तु । न चासौ दृश्यमानो निह्नोतुं युक्तः । योगरूढिस्तु नाम न सम्मतैव विदुषाम् । यत्रापि हि द्वयं दृश्यते तत्रापि शब्दप्रवृत्तौ प्रयोजकमेव भवति ॥ § 1707

२३ ] दुपपन्नेति— nyāma-wit__kha

२५ ] व्यापारजन्मानौ स्तः— nyāma-wit__kha

कथं पुनः अक्षं प्रति गतं ज्ञानमिष्यते ? न संयोगित्वेन; अञ्जनादेः प्रत्यक्षप्रसङ्गात् । न समवायित्वेन; अक्षवर्तिनां रूपादीनां तथात्वप्रसङ्गात् । न जनकत्वेन; अक्षारंभकाणां परमाणूनामपि तथाभावप्रसक्तेः । तस्मात् जन्यत्वेनैव ज्ञानमक्षं प्रति गतमिति व्याख्येयम् ॥ § 1708

अव्ययी(?)वव्याख्यानं तु न युक्तम्; प्रत्यक्षः पुरुषः, प्रत्यक्षा स्त्री, इत्यादिव्यवहारदर्शनात्—इत्यलमतिप्रसङ्गेन ॥ § 1709

अर्थपौष्कल्ये संभवति डित्थादिपदवत्केवलसाङ्केतिकत्वं न युक्तमित्यत आह—अथवेति । तर्हि सुखादौ कथं व्यभिचारवारणमित्यत्राह— ज्ञानपदस्येति । दृश्यमानः—प्रतीयमानः । ननु कुतः योगरूढयोर्विकल्पादरणं, अस्तु तयोस्समुच्चयेन बोध इत्यत्राह—योगरूढिस्त्विति । एतत्तत्त्वं शब्दप्रकरणे स्पष्टीभविष्यति । द्वयं—योगः रूढिश्च । प्रयोजकमेवेति । अन्यतरदिति शेषः । पङ्कजनिकर्तृत्वसाम्यात् भेकादिषु पङ्कजपदप्रयोगवारणाय परं रूढ्यपेक्षा, न त्वर्थबोधायेति । प्रति इत्यस्य विवरणं गतमिति ॥ § 1710

प्रत्यक्षप्रसङ्गात्—प्रत्यक्षत्वप्रसङ्गात् । प्रत्यक्षपदवाच्यत्वप्रसङ्गादिति वा ॥ § 1711

न युक्तमिति । अत्र—यद्यपि भाष्ये अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम् इति कथनादव्ययीभावपक्षः भाष्योक्त इति ग्रन्थकृदभिप्रेतीव; परन्तु वार्तिके, नायं समासः, किन्तु स्वरूपकथनमात्रम् । समासे खलु द्वितीयैव स्यात्, न षष्ठी । अतः प्रतिगतमक्षं प्रत्यक्षमिति प्रादिसमासो द्रष्टव्यः इत्युक्तमत्र स्मरणीयम् । प्रत्यक्षसूत्रे यतः शब्दाध्याहारः पूर्वमेवोक्तः ॥ § 1712

I.235/KSV

तेनेन्द्रियार्थजत्वादिविशेषणगणान्वितम् ।
यतो भवति विज्ञानं तत् प्रत्यक्षमिति स्थितम् ॥ ७० ॥§ 1714

इति विगतकलङ्कमस्य धीमान्
अकुरुत लक्षणमेतदक्षपादः ।
न तु पररचितानि लक्षणानि
क्षणमपि सूक्ष्मदृशां विशन्ति चेतः ॥ ७१ ॥§ 1718

इति प्रत्यक्षसूत्रव्याख्यानप्रकरणम् § 1719

## परसम्मतप्रत्यक्षलक्षणपरीक्षा

## तत्र धर्मकीर्त्युक्तप्रत्यक्षलक्षणविचारः

यत्तावत् कल्पनाऽपोढमभ्रान्तमिति लक्षणम् ।
प्रत्यक्षस्य जगौ भिक्षुः तदत्यन्तमसांप्रतम् ॥ ७२ ॥§ 1721

शब्दसंसर्गयोग्यार्थप्रतीतिः किल कल्पना ।
अस्याश्च केन दोषेण प्रामाण्यं न विषह्यते ॥ ७३ ॥§ 1723

न तु पररचितानि लक्षणानि इत्युक्तमेव विवृणोति—यदित्यादि । यद्यपि दिङ्गागेन प्रत्यक्षं कल्पनापोढं इतिमात्रमुक्तम् । परन्तु एवं सति तिमिरादिदोषदूषितचक्षुषः प्रथमसन्निकर्षजन्मनां शुक्तिरजतादिज्ञानानां कल्पनापोढत्वादतिव्याप्तिरित्यालोच्य धर्मकीर्तिः अभ्रान्तपदं योजयामास । शुक्तिरजतज्ञानस्य भ्रान्तत्वात् निरासः । अभ्रान्तत्वमात्रोक्तौ अनुमानादावतिव्याप्तिः, तेषां भ्रमत्वव्यवहाराभावात् । अतः कल्पनापोढमिति । तेषां कल्पनारूपत्वेन व्युदासः । स्वलक्षणमेव परमार्थसत् । तदेव प्रत्यक्षे विषयः । सामान्यलक्षणं तु अपरमार्थसत्, तच्चानुमानस्य विषयः इति न्यायबिन्दुः । धर्मोत्तरचार्यस्तु असत्यभ्रान्तग्रहणे गच्छद्वृक्षदर्शनादि कल्पनापोढत्वात् प्रत्यक्षं स्यात् इत्याह ॥ § 1724

भिक्षुः—बौद्धभिक्षुः धर्मकीर्तिः । जगाविति । न्यायबिन्दाविति १-४ शेषः । शब्देत्यादि । अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिःकल्पना १-५ इति न्यायबिन्दुवाक्यानुवादोऽयम् । इदं च न्यायबिन्दुवचनमेवं व्याख्यातं I.236/KSV

### विकल्पानामप्रामाण्योपपादनम्

ननु ! अभिलापसंसर्गयोग्यप्रतिभासत्वादपि कमन्यं दोषं मृगयते भवान् ! असदर्थविषयत्वमेवेदमुक्तं भवति, शब्दार्थस्य वास्तवस्याभावात् । स्वलक्षणस्य सजातीयेतरव्यावृत्तात्मनः सम्बन्धाधिगमसव्यपेक्षप्रवृत्तिना शब्देन विषयीकर्तुमशक्यत्वात् । तद्व्यतिरिक्तस्य वस्तुनोऽनुपलम्भात् ॥ धर्मोत्तराचार्येण—(?')अभिलप्यतेऽनेनेत्यभिलापः—वाचकः शब्दः । अभिलापेन संसर्गः अभिलापसंसर्गः—एकस्मिन् ज्ञानेऽभिधेयाकारस्याभिधानाकारेण सह ग्राह्याकारतया मिलनम् । ततो यदैकस्मिन् ज्ञानेऽभिधेयाभिधानयोः आकारौ सन्निविष्टौ भवतः, तदा संसृष्टे अभिधानाभिधेये भवतः । तथा च वाच्यवाचकयोरेकज्ञानविषयत्वं संसर्ग इत्युक्तं भवति । अभिलापसंसर्गाय योग्यः अभिधेयाकारप्रतिभासः—यस्यां प्रतीतौ सा तथोक्ता इति । अधिकं तत्रैव द्रष्टव्यम् ॥ § 1725

कुतः उक्तस्य दोषत्वमित्यत्राह—असदर्थेत्यादि । स्वलक्षणज्ञानस्यातो वैलक्षण्यमाह—स्वलक्षणस्येति । निर्विकल्पविषयो वस्तुस्वरूपमात्रं— स्वलक्षणम् । तद्व्यतिरिक्तस्य—स्वलक्षणव्यतिरिक्तस्य । वस्तुनः—परमार्थभूतस्य । अत्र यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः तत् स्वलक्षणम् । तदेव परमार्थसत् १-१३ इति न्यायबिन्दूक्तं स्मर्तव्यम् । एतदुक्तं भवति ।

२ ] विपयत्वागे तत्त्वयुक्तं—
nyāma-wit__kha

पुरोवर्तिनि वस्तुनि प्रथमाक्षसन्निपातसमनन्तरं यत् वस्तुस्वरूपमात्रविषयकं ज्ञानं तदेव निर्विकल्पं प्रमाणम् । अनन्तरं भासमानानां धर्माणां वासनाधीनत्वेन तद्विषयकं ज्ञानं सविकल्पमप्रमाणमेव, कल्पिताकारविषयत्वात् । तथोक्तम्—परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ । कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः इति । एवञ्च यन्निर्विकल्पं नामजात्याद्यगोचरं तदेव प्रमाणं चेत् नामजात्यादिगोचरं सविकल्पमप्रमाणमेवेति कल्पनापोढं प्रत्यक्षमिति । शिष्टदलप्रयोजनं तु स्पष्टीभविष्यति ॥ § 1726

I.237/KSV

न चेन्द्रियार्थसन्निकर्षान्वयव्यतिरेकानुविधायिनी कल्पना बुद्धिः; तमन्तरेणापि भावात्, तस्मिन् सत्यपि च पूर्वानुभूतवाचकशब्दयोजनं विनाऽनुत्पादात् । यदि च इन्द्रियार्थसन्निकर्षः तज्जनको भवेत्, प्रथममेव तथाविधां धियं जनयेत्, न च जनयति । तदयं शब्दस्मृतेरूर्ध्वमपि न जनक इति मन्यामहे ॥ § 1727

तदुक्तम्— § 1728

यः प्रागजनको बुद्धेः, उपयोगाविशेषतः ।
स पश्चादपि, तेन स्यादर्थापायेऽपि नेत्रधीः ॥ इति ॥ § 1730

अपि च—सत्यपीन्द्रियार्थसंसर्गे स्मृत्यपेक्षायां सोऽर्थस्तयैव व्यवहितः स्यात् । आह च— § 1731

अर्थोपयोगेऽपि पुनः स्मार्तं शब्दानुयोजनम् ।
अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् ॥ इति ॥ § 1733

भावादिति । शुक्तिरजतादिविकल्पानामुत्पत्तेरित्यर्थः । तस्मिन्— इन्द्रियार्थसन्निकर्षे । प्रथममेव—निर्विकल्पककाल एव । शब्दव्युत्पत्तेः पूर्वमेवेति वा । तथाविधां—अभिलापसंसर्गादिवतीम् ॥ § 1734

यः प्रागित्यादि । यः इन्द्रियसन्निकर्षः प्राक्—वाचकशब्दोपस्थितेः पूर्वं बुद्धेः—विकल्पात्मिकाया अजनकः—जननासमर्थ इति यावत्; सः सन्निकर्षः पश्चादपि—शब्दस्मृत्यनन्तरमपि उपयोगाविशेषतः तदधीनोपयोगे विशेषाभावात् अजनक एव । अतः अर्थमन्तराऽपि विकल्प उदेतुं प्रभवत्येवेति । उपयोगः—उपकारः ॥ § 1735

तथैव—स्मृत्यैव । अर्थोपयोगेऽपीति । अक्षधीः—प्रत्यक्षं अर्थे— विषये उपयोगेऽपि—अर्थग्रहणव्यापृतावपि, यदि मध्ये स्मार्तं शब्दस्मृत्यधीनं शब्दानुयोजनं—अभिलापसंसर्गं यद्यपेक्षेत, तर्हि अर्थः तया स्मृत्या व्यवहितो

१ ] स्मृत्यपेक्षया— nyāma-wit__kha

१ ] स्तथैव— nyāma-wit__ka

भवेदिति । तथा च शब्दस्मृत्या व्यवधानात् इन्द्रियं कथं सविकल्पं जनयेत् । स्मृत्यधीनं च सविकल्पं कथं वा प्रमाणं स्यादिति भावः ॥ § 1736
I.238/KSV

### विकल्पानामनिन्द्रियजत्वम्

सङ्केतस्मरणसहकारिसव्यपेक्षमक्षमीदृशीं बुद्धिं जनयतीति चेत्—न—व्यतिरिक्ताव्यतिरिक्तोपकारादिविकल्पैः सहकारिणो निरस्तत्वात् । किञ्च दण्डीत्यादिविकल्पविज्ञानं नेन्द्रियापातवेलायामेव जायते; किन्तु बहुप्रक्रियापेक्षम् । यदाह—प्र. वा. ३-१४५ § 1737

विशेषणं विशेष्यं च संबन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सकलं चैतत् तथा प्रत्येति नान्यथा ॥ इति ॥§ 1739

ननु शब्दस्मरणस्य स्वातन्त्र्येण प्रत्यक्षकरणत्वं नास्त्येव, किन्तु सन्निकर्षवत् इन्द्रियसहकार्येवेति न तेन व्यवधानमिति शङ्कते—सङ्केतेति । व्यतिरिक्तेत्यादि । वस्तूनां क्षणिकत्वसाधनावसरे कथितोऽयं विचारो बौद्धैः । कुसूलस्थबीजैः अंकुराकरणात् क्षेत्रस्थबीजैरङ्कुरकरणाच्च करणाकरणयोरेकत्र विरोधात् कुसूलस्थबीजमन्यत्, क्षेत्रस्थबीजं चान्यदिति वक्तव्यम् । सहकारिसमवधानवशात् कुसूलस्थं बीजमेवाङ्कुरं जनयतीति तु न वक्तुं युक्तम् । सहकारिणः किं बीजस्योपकुर्वन्ति ? उत स्वातन्त्र्येणाङ्कुरं जनयन्ति ? उत किञ्चिदपि न कुर्वन्ति ? न तृतीयः, सहकारित्वासंभवात् । न मध्यमः, बीजस्याकरणत्वं तदा ह्यापद्येत । न प्रथमः, सहकारिभिः संपाद्यमान उपकारः किं बीजस्वरूपादतिरिक्तः ? उत न ? यदि न, तर्हि बीजस्वरूपातिरिक्तोपकाराकरणात् व्यर्थाः सहकारिणः, बीजस्वरूपं हि पूर्वमेव सिद्धम् । यदि चातिरिक्तः, तर्हि ये सहकारिणः बीजातिरिक्तमुपकास्मतिशयं वा संपादयन्ति ते स्वातन्त्र्येण कार्यमेव निर्वर्तयन्तु, किं मध्ये बीजेन कर्तव्यम् । तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इति न्यायात् । तथा चान्वयव्यतिरेकवशात् सहकारित्वेनाभिमतानामेव करणत्वं समायास्यतीति । अयं च न्यायः प्रकृतेऽपि तुल्य इति विकल्पाः नेन्द्रियजन्या इति । इन्द्रियापातः—प्रथमाक्षसन्निपातः । लौकिकीं स्थितिमिति । पादादिसुंयुक्ते सति दण्डे दण्डीति व्यवहाराभावात्, यादृशरीत्या सम्बन्धे विशिष्टव्यवहारः लोकसम्मतः तादृशवैलक्षण्यं चेति तात्पर्यम् । तथा— दण्डीत्यादिरीत्या ॥ § 1740

I.239/KSV

२३ ] ---Note: संक(?)य्यैतत् इति प्रमाणवातिकपाठः ।

न चेयतीं प्रक्रियां प्रथमनयनोपनिपातजातमविकल्पकं ज्ञानमुद्वोढुं क्षममित्याह—प्र. वा. ३-१७४ § 1741

सङ्केतस्मरणोपायं दृष्टसङ्कलनात्मकम् ।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम् इति ॥§ 1743

## विकल्पद्वैविध्यम्

तत्रैतत् स्यात्—द्विविधा विकल्पाः; छात्रमनोरथविरचिताः, इदन्ताग्राहिणश्च नीलमित्यादयः । तत्र पूर्वे मा भूवन् प्रमाणम् । कस्तेष्वर्थनिरपेक्षजन्मसु प्रामाण्येऽभिनिविशेत ! इदन्ताग्राहिणां त्वर्थाविनाभूतत्वात् कथं न प्रामाण्यम् ? इति—उच्यते—सर्व एवामी विकल्पाः परमार्थतोऽर्थं न स्पृशन्त्येव । स हि निर्विकल्पकेनैव सर्वात्मना परिच्छिन्नः । तदुक्तम्
§ 1744

एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो नदृष्टो भागः स्यात् यः प्रमाणैः परीक्ष्यते इति ॥§ 1746

इयतीं प्रक्रियामिति । विलम्बहेतुमिति यावत् । संकेतेत्यादि । नामविकल्पाभिप्रायेण संकेतस्मरणमत्रोक्तम् । सविकल्पकं हि संकेतस्मरणाद्युपायजन्यम् । चाक्षुषं तु पुरोवृत्तिस्वलक्षणवस्तुमात्रविषयकं, इन्द्रियसन्निकर्षः तावत्येव खलु विश्रान्तः । अतः नामादिकल्पनानां चाक्षुषे निर्विकल्पके कथमवकाश इत्यर्थः । उपायपदं नपुंसकलिङ्गेऽपि बौद्धसम्मतम् ॥
§ 1747

छात्राः—बाला इति यावत् । अमी विकल्पाः—छात्रमनोरथकल्पिताः इदन्ताग्राहिणश्च । सः—परमार्थभूतः अर्थः । सर्वात्मनेति । स्वरूपस्य निर्विकल्पेनैव गृहीतत्वात् स्वरूपातिरिक्तस्य च धर्मादेः कल्पितत्वात् न हि ज्ञातव्यान्तरमवशिष्यत इति भावः । एकस्येत्यादि । वस्तूनां स्वरूपं त्वेकरूपमेव, तच्च स्वरूपं प्रत्यक्षेण गृहीतम् । स्वरूपातिरिक्तं तु किञ्चिदपि नास्त्येव । अतश्च प्रत्यक्षेणागृहीतस्यांशस्य स्वरूपेऽसंभवात् कुतः प्रमाणान्तरगवेषणमित्यर्थः । नदृष्टः इत्येकं पदम् ॥ § 1748
I.240/KSV

## कल्पनानामर्थासंस्पर्शित्वम्

२० ] शून्यं तच्चाक्षुषं— nyāma-wit__kha

२३ ] निवेशः— nyāma-wit__kha

यत्तु केषांश्चिद्विकल्पानामिदन्ताग्राहित्वस्पष्टत्वादि रूपं तत् अर्थाविनाभाविनिर्विकल्पकदर्शनपृष्ठभावित्वावाप्ततच्छायासंसर्गज— नितं, न तु तेषामर्थस्पर्शः कश्चिदस्ति । अर्थात्मनो निर्विकल्पेनैव मुद्रितत्वात् ॥ § 1749

तस्मादतात्त्विकाकारसमुल्लेखपुरस्सराः ।
न यथावस्तु जायन्ते कदाचिदपि कल्पनाः ॥ ७४ ॥§ 1751

## कल्पनाभेदाः

पञ्च चैते कल्पना भवन्ति—जातिकल्पना, गुणकल्पना, क्रियाकल्पना, नामकल्पना, द्रव्यकल्पना चेति । ताश्च क्वचिदभेदेऽपि भेदकल्पनात्, क्वचिच्च भेदेऽप्यभेदकल्पनात् कल्पना उच्यन्ते ॥ § 1752

जातिजातिमतोर्भेदो न कश्चित्परमार्थतः ।
भेदारोपणरूपा च जायते जातिकल्पना ॥ ७५ ॥§ 1754

इदमस्य गोर्गोत्वमिति न हि कश्चिद्भेदं पश्यति । तेनाभेदे भेदकल्पनैव ॥ § 1755

एतया सदृशन्यायान्मन्तव्या गुणकल्पना ।
तत्राप्यभिन्नयोर्भेदः कल्प्यते गुणतद्वतोः ॥ ७६ ॥§ 1757

तथा चाहुः—एष गुणी रूपादिभ्योऽर्थान्तरत्वेन नात्मानं नो दर्शयति; तेभ्यश्च व्यतिरेकं वाञ्छसीति चित्रम् ॥ § 1758

पृष्ठभावित्वेति । निर्विकल्पकेण स्वरूपे गृहीते हि विकल्पानामवसरः । स्वरूपस्यैवाग्रहणे आकाराणां कुत्र कल्पना ? निरधिष्ठानस्य भ्रमस्यासंभवात् । माध्यमिकातिरिक्तैः बौद्धैः निरधिष्ठानो भ्रमो नाङ्गीक्रियत इति स्मर्तव्यम् ॥ § 1759

अस्य गोः इदं गोत्वं इत्यन्वयः । न हि कश्चिद्भेदं पश्यतीति । घटपटयोरिवेति भावः । यद्यपि भेदं व्यवहरति, तथापि न पश्यति । व्यवहारस्त्वन्यथासिद्ध इति भावः । एवमुत्तरत्रापि ॥ § 1760

तेभ्यः—रूपादिभ्यः । व्यतिरेकं—स्वस्य गुणिन इति शेषः ॥ § 1761
I.241/KSV

भेदारोपणरूपैव गुणवत्कर्मकल्पना ।
तत्स्वरूपातिरिक्ता हि न क्रिया नाम काचन ॥ ७७ ॥§ 1763

गच्छति देवदत्त इति देवदत्तस्यैवान्यूनानतिरिक्तस्य प्रतिभासात् ॥ § 1764

२ ] नात्मानं दर्श—
nyāma-wit__kha

विभिन्नयोस्त्वभेदेन प्रवृत्ता नामकल्पना ।
चैत्रोऽयमित्यभेदेन निश्चयो नाममामिनोः ॥ ७८ ॥§ 1766

चैत्र इत्ययं शब्दः, अयमित्यर्थः; कीदृशमनयोस्सामानाधिकरण्यम् ॥ § 1767

एवं दण्ड्ययमित्यादिर्मन्तव्या द्रव्यकल्पना ।
सामानाधिकरण्येन भेदिनोर्ग्रहणात्तयोः ॥ ७९ ॥§ 1769

## विपर्यय इव बाधकप्रत्ययाभावेऽपि कल्पनानां मिथ्यात्वम्

ननु ! यद्यभेदे भेदं, भेदे चाभेदं आरोपयन्त्यः कल्पनाः प्रवर्तन्ते—तत्कथमासु बाधकः प्रत्ययो न जायते, शुक्तिकारजतबुद्धिवत्—उच्यते—यत्र वस्तु वस्त्वन्तरात्मनाऽवभासते तत्र § 1770

तत्स्वरूपेति । कर्मवद्वस्तुस्वरूपेत्यर्थः । अन्यूनानतिरिक्तस्येति । न हि तिष्ठतो देवदत्तात् गच्छन् देवदत्तः न्यूनः, अतिरिक्तो वा दृश्यते । स एवायं देवदत्तः इति प्रत्यभिज्ञा हि भवतां प्रमा इति भावः ॥ § 1771

विभिन्नयोः इत्यत्रापि नामनामिनोरित्यस्याकर्षः । कीदृशं इत्यधिक्षेपे ॥ § 1772

एवमिति । यद्यप्यत्र दण्डोऽयमिति न प्रतीतिः, किन्त्वयं दण्डीति । अथापि दण्ड एव खलु विशेषणं, अतोऽस्ति भेद इत्यभिमानः । इममेवोत्तरत्र पु. २४९ निराकरोति ॥ § 1773

यत्रेत्यादि । अयं भावः—व्यवहारदृष्ट्या भ्रमो हि द्विविधः—एकः—पुरोवर्त्येव एकं वस्तु वस्त्वन्तरात्मनाऽवभासते, यथा शुक्तिः रजततया । अपरस्तु—अविद्यमान एव विद्यमान इव । यथा केशोण्ड्रकादि । तत्राद्यः
I.242/KSV धर्माध्यासः, द्वितीयस्तु धर्मिण एव । तत्राद्ये बाधको युक्तः—नेदं रजतं,

बाधको भवति, मरीचिष्विव जलबुद्धौ । इह तु न जात्यादिवस्त्वन्तरमस्ति, यतो वस्त्वन्तरात्मनाऽस्य ग्रहो भवेत् । व्यक्तिविषया एवैते सामान्यादिविकल्पाः । तस्माद्वस्त्वन्तरानवभासिष्वेषु न बाधकः प्रत्ययो जायते । तस्मान्न विपर्ययात्मानो विकल्पाः ॥

## विपर्ययाद्वैलक्षण्येऽपि विकल्पानामप्रामाण्यमेव

न चैते प्रमाणम्, एतदुल्लिख्यमानस्य जात्यादेरपारमार्थिकत्वात् । अत एव प्रमाणविपर्ययाभ्यामयमन्य एव विकल्प इत्याचक्षत इत्यलं विस्तरेण ॥

एवमेताः प्रवर्तन्ते वासनामात्रनिर्मिताः ।

२२ ] शुक्तिर्वा— nyāma-wit__ka nyāma-wit__kha
१० ] सामानाधिकरण्यवैयधिकरण्य—

कल्पितालीकभेदादिप्रपञ्चाः पञ्चकल्पनाः ॥ ८० ॥§ 1776

एवं च पश्यता तासां प्रामाण्यामोदमन्दताम् ।
भिक्षुणा लक्षणग्रन्थे तदपोढपदं कृतम् ॥ ८१ ॥§ 1778

किन्तु शुक्तिरिति । द्वितीये न तथा ज्ञातुं शक्यते कस्याप्याकारस्यापरिशेषात् । यदा च सर्वविकल्पनिवृत्तिः, तदा ह्यसौ परिनिर्वृत्त एव; न तदाऽपि बाधकप्रत्ययावकाश इति । व्यक्तिविषयाः—स्वरूपविषयाः । विपर्ययः— विपरीतभानम् । तथा च एकत्र विद्यमानमन्यथावभासते । अन्यत्र तु अविद्यमानमेव भासत इति न तयोस्साम्यमिति ॥ § 1779

न चैतावता विकल्पाः प्रमाणानि—तौल्यनिषेधस्तु बाधकप्रत्ययवारणायेत्याह न चत इति । अयमाशयः—यत्र बाधकप्रत्ययोदयः तत्रैवाप्रामाण्यमिति न निर्बन्धः । यादृशभ्रमविशेषस्थले कान्तारमध्यसकृद्दृष्टरज्जुसर्पादौ— बाधकप्रत्यय एव नोदेति तेषां भ्रमत्वाभावप्रसङ्गात् । अतश्च असदर्थविषयत्वमेव भ्रमत्वमिति वक्तव्यम् । तच्च प्रकृतेऽपि तुल्यमिति । प्रमाणं— स्वलक्षणं निर्विकल्पात्मकम् । तथा सविकल्पकं—न शुक्तिरजतज्ञानतुल्यं, न वा स्वलक्षणज्ञानतुल्यम् । किन्तु उभयविलक्षणमेवेति । भेदादीत्यादिना अभेदपरिग्रहः । तदपोढपदं—कल्पनापोढपदम् । तथा च प्रत्यक्षप्रमाण I.243/KSV

## —धर्मकीर्त्युक्तप्रत्यक्षलक्षणनिराकरणम्—

### सविकल्पकानां प्रामाण्यसाधनम्

अत्र प्रतिविधीयते—तदिदं संकीर्णप्रायमतिबहु विलपता भवता न नियतं किमपि विकल्पानामप्रामाण्यकारणमिति स्पष्टमावेदितम् । तदुच्यताम्—

किं शब्दार्थावभासित्वगर्भीकृतमसदर्थवाचित्वं तदप्रामाण्यकारणमभिमतम् ?

उत संङ्केतस्मृत्यपेक्षोपनतमनिन्द्रियार्थसन्निकर्षजत्वम् ?

उत विशेषग्रहणाद्यपेक्षावाप्तं बहुप्रयाससाध्यत्वम् ?

उत पूर्वापरपरामर्शशून्यचाक्षुषवैलक्षण्यवाचोयुक्तिसमर्पितं विचारकत्वम् ?

उत निर्विकल्पकपरिच्छिन्नवस्तुग्राहितानिबन्धनमधिगताधिगन्तृत्वम् ?

उत भेदाभेदसमारोपभणितमतस्मिंस्तदितिग्राहित्वम् ?

उत वृत्तिविकल्पादिवाधितसामान्यग्रहणसूचितं बाध्यत्वमेवेति ॥ लक्षणे विकल्पवारणाय कल्पनापोढपदम् । विपर्ययवारणाय अभ्रान्तपदं च भिक्षुणा धर्मकीर्तिना कृतमिति ॥ § 1780

संकीर्णेति । प्रमाणभूतनिर्विकल्पकवैलक्षण्यमुच्यते, उच्यते चाप्रमाणभूतभ्रमवैलक्षण्यमिति विकल्पानां प्रामाण्याप्रामाण्यसांकर्यमुक्तं भव-

१८ ] भेद— nyāma-wit__kha
४ ] करण— nyāma-wit__kha
८ ] विशेषण— nyāma-wit__kha

तीत्यर्थः । पूर्वापरेति । पूर्वापरपरामर्शशून्यं यत् चाक्षुषं—स्वलक्षणमात्रविषयकं निर्विकल्पं प्रमाणभूतं ज्ञानं तद्वैलक्षण्योपपादनसामर्थ्यात् प्राप्तं यत् विचारकत्वमित्यर्थः । वृत्तिविकल्पेति । अयमर्थः—सामान्यं स्वाश्रये किं कार्त्स्न्येन वर्तते ? उतैकदेशेन ? आद्ये घटत्वस्य एकस्यामेव घटव्यक्तौ परिसमाप्त्या घटान्तरे घटत्वं न स्यात् । नान्त्यः, सामान्यस्य निरवयवत्वात्
I.244/KSV । प्रत्येकं घटे घटत्वजात्येकदेशस्यैव सत्त्वेन यावद्घटत्वजातेरसत्त्वेन च तस्य

**विकल्पाप्रामाण्यापादकप्रथमहेतुनिरासः**

तत्र तावन्न शब्दसंसर्गयोग्यार्थग्रहणद्वारकमसदर्थग्राहित्वमेषामप्रामाण्यकारणमभिधातुं युक्तम्, शब्दार्थस्य वास्तवस्य ३ आह्निके समर्थयिष्यमाणत्वात् ॥

कः पुनरसाविति चेत् ? य एव निर्विकल्पके प्रतिभासते ॥

किं निर्विकल्पके सामान्यादिकमवभासते ? बाढमवभासत इति ५ आह्निके वक्ष्यामः ॥

अत एव वाध्यत्वमपि न प्रामाण्यापहारकारणमेषां वक्तव्यम्; वृत्तिविकल्पादेर्बाधकस्य ५ आह्निके परिहरिष्यमाणत्वात् । बाधकान्तरस्य च नेदमिति प्रत्ययस्य शुक्तिकारजतज्ञानादिवत् भवतैवानभ्युपगमात् ॥

**तत्रैव द्वितीयकल्पनिरासः**

नाप्य निन्द्रियार्थसन्निकर्षजन्यत्वं सङ्केतग्रहणकालानुभूतशब्दस्मरणापेक्षणादस्य वक्तव्यम्; सहकार्यपेक्षायामपि तद्व्यापाराविरतेः ॥ घटपदार्थतैव न स्यात् । न हि पटैकदेशभूततन्तुमति पुरुषे पटवानिति प्रतीतिः प्रमा भवेत् । अतः सामान्यस्यैव दुर्निरूपत्वेनावस्तुत्वात् तद्विषयको विकल्पः भ्रान्तिरेवेति । वृत्तिविकल्पादित्यत्रादिपदार्थः सामान्यप्रकरण एव द्रष्टव्यः ॥ § 1781

असौ—शब्दार्थः ॥ § 1782

एकोक्त्या सप्तमकल्पोऽपि दूषित एवेत्याह । अत एवेति । यतो निर्विकल्पेऽपि सामान्यादिकमवभासते तत एव सविकल्पस्यापि निर्विकल्पवदेव बाध्यत्वमपि न भवेदेवेति । वृत्तिविकल्पादेरिति । कार्त्स्न्येन वर्तते ? उतैकदेशेन वर्तते ? इत्यादिपूर्वोक्तविकल्पस्येत्यर्थः ॥ § 1783

द्वितीयं दूषयति—नापीति । सहकारी शब्दस्मरणादिरूपः । तद्व्यापारः—
I.245/KSV इन्द्रियव्यापारः । पूर्वोक्तपु. २३७ श्लोको विपरिणमय्य पटनीय

यः प्रागजनको बुद्धेः स लब्ध्वा सहकारिणम् ।
कालान्तरेण तां बुद्धिं विदधत् केन वार्यते ? ॥ ८२ ॥ § 1786

व्यतिरिक्ताव्यतिरिक्तोपकारकरणादिविकल्पास्तु क्षणभङ्गभङ्गे ७ आह्निके निराकरिष्यन्ते ॥

रूपग्रहणे च चक्षुषः प्रदीपाद्यपेक्षायां दुष्परिहारास्ते विकल्पाः । न वै

३२ ] बाध— nyāma-wit__kha    १७ ] देर— nyāma-wit__kha

किञ्चिदेकं जनकम् इति भवन्तोऽपि पठन्ति ! इति भवत्पक्षेऽपि तुल्यास्ते । यद्युभयोर्दोषः, न तेनैकश्चोद्यो भवति । तस्मात् उपयोगाविशेषतः इत्यसिद्धो हेतुः । अयमेवोपयोगविशेषः, यत् इन्द्रियालोकमनस्कारविषयवद्वाचकस्मरणमपि सामग्र्यन्तरमेतत्प्रत्ययजन्मनि व्याप्रियत इति न वाचकस्मरणजनितत्वेन स्मार्तत्वादप्रमाणं विकल्पः । रूपस्मृत्याख्यसमनन्तरप्रत्ययतिर्मितस्य निर्विकल्पस्य रूपज्ञानस्यापि तथात्वप्रसङ्गात् ॥ इत्याह—य इति । यः—हेतुः प्राक्—सहकारिसमवधानात् प्राक् बुद्धेरजनक आसीत्, स एव हेतुः सहकारिणं कालान्तरेण लब्ध्वा तामेव बुद्धिं विदधत् केन वारयितुं शक्यत इत्यर्थः ॥ § 1787

ननु सहकारिणोऽप्यसंभव उपपादितः—इत्यत्राह—व्यतिरिक्ताव्यतिरिक्तेति । इदं उपकारविशेषणम् ॥ § 1788

सहकार्यपेक्षणमात्रात् करणत्वं नापैतीत्यत्र निदर्शनं प्रतिबन्दी चाह—रूपेत्यादि । अधिपतिसहकारिसमनन्तरालम्बनप्रत्ययाश्चत्वार्यपि ज्ञानसाधनानीति खलु तैरुच्यन्ते । तत्र दीपादयः सहकारिप्रत्ययाः भवन्मते कथं सहकारिणो भवेयुः इति । किञ्चिदेकं न वै जनकं इत्यन्वयः । एकमेव फलोपधायकं न भवति, किन्तु मिलितमेवेत्यर्थः । ते—उक्तविकल्पाः । इन्द्रियेत्यादि । अधिपत्यादीनां यथासंख्यं अन्वयः । तत्र प्रकृते मनस्कारः समनन्तरप्रत्ययः रूपाद्यालोचनाज्ञाने । रूपस्मृतीति । न हि रूपाविषयकं चाक्षुषं किञ्चिदुदेतुमप्यलम् । रूपाप्रतीतौ हि वस्तु कथं प्रतीयेत । अतश्च रूपस्मृत्याख्यसमनन्तरप्रत्ययं विना निर्विकल्पोऽपि न भवेदेवेत्याशयः ॥ § 1789

I.246/KSV

## इन्द्रियसन्निकर्षस्य फलेनाव्यवधानोपपादनम्

यच्चेदमुच्यते—सोऽर्थो व्यवहितो भवेत् इति—तन्न विद्मः, कीदृशं व्यवधानमर्थस्येति । न हि दीपेन वा मनसा वा विज्ञानहेतुना कदाचिदर्थो व्यवधीयते । मनोवच्च वाचकस्मृतिरपि सामग्र्यन्तर्गता सती तत्प्रतीतौ व्याप्रियत इति कथमर्थं व्यवदधीत ॥ § 1790

स्मृतिविषयीकृतः शब्दः तमर्थं व्यवधत्त इति चेत्—न— शब्दस्य तत्प्रकाशकत्वेन ज्ञानवत् दीपवद्वा व्यवधायकत्वाभावात् । न चेन्द्रियव्यापारतिरोधानं व्यवधानम्; तस्याधुनाप्यनुवर्तमानत्वात् ॥ § 1791

---

१९--२० ] विशेषादिन्द्रिया— nyāma-wit__kha
२० ] विषयत्वव— nyāma-wit__kha
२१ ] न्तर्गत— nyāma-wit__kha
९ ] वत्— nyāma-wit__ka
९ ] रप्यसा— nyāma-wit__kha
११ ] त— nyāma-wit__ka

यथा तद्भावभावित्वादाद्यं विज्ञानमक्षजम् ।
तथा तद्भावभावित्वादुत्तरं ज्ञानमक्षजम् ॥ ८३ ॥§ 1793

न हि वाचकस्मरणान्तरं अक्षिणी निमील्य विकल्पयति— पटोऽयमिति ॥ § 1794

अथ यावद्वाचकविज्ञानं हृदयपथमवतरति तावत्सोऽर्थः क्षणिकत्वादतिक्रान्त इति व्यवहित उच्यते—तदपि दुराशामात्रम् । क्षणभङ्गस्योपरिष्टान्निराकरिष्यमाणत्वात् ७ आह्निके ॥ § 1795

तत्प्रतीतौ—अर्थप्रतीतौ । व्याप्रियत इति । तथा च शब्दस्मरणस्यापि सामग्र्यन्तर्गतत्वेन तस्य व्यवधायकत्वं न संभवतीत्यर्थः ॥ § 1796

व्यवधत्त इति । इन्द्रियसन्निकर्षादेरिति शेषः । अनुपदोक्तमजानानं प्रति तदेव स्पष्टयति—शब्दस्येति । तत्प्रकाशकत्वेन—अर्थप्रकाशकत्वेन । अव्यवधायकत्वे दृष्टान्तः—ज्ञानवद्दीपवदिति । ननु व्यवधानं इन्द्रियव्यापारव्यवच्छेद एवेत्याशङ्क्य समाधत्ते—न चेति ॥ § 1797

तद्भावभावित्वात्—इन्द्रियान्वयव्यतिरेकानुविधायित्वात् । आद्यं विज्ञानं—निर्विकल्पकम् । उत्तरं—सविकल्पकमपि ॥ § 1798

हृद्गतं प्रकाशयति—अथेति । यावत्तावच्छब्दौ कालावधिपरौ ॥ § 1799
I.247/KSV

अपि च प्रदर्शितप्राप्त्यादिव्यवहारवत्सन्तानद्वारकमिहापि तद्ग्रहणं भविष्यतीति सर्वथा न व्यवधानम् । तदेवं समयस्मरणसापेक्षत्वेऽपि नेन्द्रियार्थसन्निकर्षोत्पन्नतामतिवर्तते सविकल्पकं विज्ञानमिति कथमप्रत्यक्षम् ? § 1800

## तृतीयविकल्पनिरासः

यत्पुनः विशेषणविशेष्यग्रहणादिसामग्र्यपेक्षत्वेन बहुप्रयाससाध्यत्वमप्रामाण्यकारणमभिधीयते—तदतीव सुभापितम् ! न हि बहुक्लेशसाध्यत्वं नाम प्रामाण्यमुपहन्ति । उक्तं च न हि गिरिशृङ्गमारुह्य यद्गृह्यते तदप्रत्यक्षम् इति । रसादिज्ञानापेक्षया च रूपादिज्ञानस्य दीपाद्यालोकाहरणप्रयाससाध्यत्वादप्रामाण्यं स्यात् ॥ § 1801

## चतुर्थविकल्पनिरासः

यदपि पूर्वापरपरामर्शरहितचाक्षुषविज्ञानवैपरीत्येन विकल्पज्ञानानां विचारकत्वादप्रामाण्यमुच्यते—तदपि न सम्यक् । सर्वत्र ज्ञानस्य विचारकत्वानुपपत्तेः । विचारको हि प्रमाता । स हि पश्यति, स्मरति, अनुसन्धत्ते, विचारयति, इच्छति, द्वेष्टि, यतते, गृह्णाति, जहाति, सुखमनुभवतीति व-

७ ] रूपशा— nyāma-wit_kha
११ ] माता— nyāma-wit_kha

क्ष्यामः । अर्थं च स्पृशतो विज्ञानस्य विचारयतोऽपि कथमप्रामाण्यं स्यात् ॥ § 1802

प्रदर्शितेति । इन्द्रियादिनेति शेषः । लोके ह्यभिमतमर्थं पश्यन् प्रवृत्तस्तमेव प्राप्नोतीति सर्वसिद्धम् । क्षणभङ्गे च तत्सन्तानैक्यान्निर्बाह्यम् । तत्र दृष्टस्यातिक्रान्तत्वेऽपि यथा संतानैक्यात् दृष्टस्यैव प्राप्तिरुच्यते भवद्भिः, तथा प्रकृतेऽप्यस्त्विति भावः । समयः—शक्तिः । वाचकशब्द इति यावत् ॥ § 1803

रसादीति । रसादिप्रत्यक्षं हि विषयेन्द्रियसम्बन्धातिरिक्तं नापेक्षते, रूपप्रत्यक्षं तु तदतिरिक्तालोकादिसंपादनमपेक्षत इति तस्याप्रामाण्यं स्यादिति ॥ § 1804

सर्वत्रेति । ज्ञानं हि विचारात्मकं, न तु विचारकम्; विचारकस्तु पुरुष एवेत्यर्थः । अस्तु तर्ह्यौपचारिकमेव ज्ञानस्य विचारकत्वम्—इत्यत्राप्याह—अर्थं स्पृशत इति । अर्थजन्यस्येति यावत् ॥ § 1805

I.248/KSV

## पञ्चमविकल्पनिरासः

अथास्य निर्विकल्पेनैव सर्वात्मना स्पृष्टत्वात् पिष्टपेषणमयुक्तमिति सविकल्पमधिगतार्थग्राहित्वादप्रमाणमिति मन्यसे, तदपि न साधु—पूर्वमेव पु. ५६ परिहृतत्वात् । न ह्यनधिगताधिगन्तृत्वं प्रामाण्यमित्युक्तम् । गृहीतग्रहणेऽपि प्रमाणस्य प्रमाणत्वानतिवृत्तेः ॥ § 1806

## षष्ठविकल्पनिरासः

यत्त्वभ्यधायि—भिन्नेष्वभेदं अभिन्नेषु च भेदं कल्पयन्त्यः कल्पनाः, अतस्मिंस्तद्ग्रहणे प्रामाण्यमवहजतीति—तदयुक्तम् अतस्मिंस्तद्ग्रहो भवत्यप्रमाणत्वकारणम्; तत्त्विह नास्ति । तस्य हि बाधकप्रत्ययोपसन्निपातान्निश्चयः । न च भवदुपवर्णितासु पञ्चस्वपि जात्यादिकल्पनासु बाधकं किञ्चिदस्तीति नातस्मिंस्तद्ग्राहिण्यः कल्पना भवन्ति ॥

जातिर्जातिमतो भिन्ना गुणी गुणगणात् पृथक् ।
तथैव तत्प्रतीतेश्च कल्पनोक्तिरबाधिका ॥ ८४ ॥§ 1809

एतच्चोपरिष्टान्निर्णेष्यते ॥ § 1810

द्रव्यनाम्नोऽतु भिन्नयोर्भेदेनैव प्रतीतिः, नाभेदकल्पना । न हि देवदत्तशब्दोऽयम् इत्येवं तद्वाच्यः प्रतीयते ॥ § 1811

---

२ ] मपि— nyāma-wit__kha
६ ] द्ग्रहे— nyāma-wit__kha
६ ] स्तद्ग्रहणे— nyāma-wit__kha
६--७ ] ण— nyāma-wit__ka
७ ] पनि— nyāma-wit__kha
२१७.१४--२१८.१६ ] इत्येवं तद्वाच्या— nyāma-wit__kha

ननु देवदत्तोऽयं इति संज्ञासंज्ञ्यभेदव्यवहारो दृश्यत एवेति चेत्—न, शब्दविशिष्टतद्वाच्यावगतिरेषा, न शब्दोऽस्यामर्थारूढोऽवभासते । न शब्दविवर्तरूपेणार्थः परिस्फुरति । किं तर्हि ? § 1812

कथमत्राप्रामाण्यकारणाभावनिश्चय इत्यत्राह—तस्येति । तस्य—अप्रामाण्यस्य ॥ § 1813

तथैव—पृथक्त्वेनैव । अबाधिकेति । प्रामाण्यं प्रतीति शेषः ॥ § 1814

घटस्य रूपं, गवि गोत्वमित्यादौ गुणगुणिनोः भेदप्रतीतावपि, नीलो घटः, गौः इत्यदिसामानाधिकरण्यप्रतीतिरप्यस्ति । द्रव्यनाम्नोस्तु तदपि नास्तीति कथं तत्र अभेदकल्पनेति तुशब्देन सूचितम् । दृश्यत इति । देवदत्तपदं हि
I.249/KSV तत्र

> शब्दस्मृत्याख्यसामग्र्यसामर्थ्यातिशयोद्भवः ।
> प्रत्ययातिशयः सोऽयं इत्येवं प्राक् प्रसाधितम् ॥ ८५ ॥§ 1817

दण्डोऽयमिति द्रव्याभेदकल्पना तु मन्दमतिभिरेवोदाहृता । न हि दण्डोऽयमिति देवदत्ते प्रतीतिः, अपि तु दण्डीति । तत्र च प्रकृतिप्रत्ययौ पृथगेवोपलभ्येते—दण्डोऽस्यास्तीति (Edtext outside numbered paragraph)दण्डीति । तदिह यथैव वस्तु तथैव तदवसाय इति नाभेदारोपः ॥

कर्मणि (Edtext outside numbered paragraph)तु द्वयमपि नास्ति; (Edtext outside numbered paragraph)नाभिन्ने भेदकल्पना; न च भिन्नेऽप्यभेदकल्पना ॥

> क्रिया हि तद्वतो भिन्ना भेदेनैव च गृह्यते ।
> चलतीत्यादिबोधेषु तत्स्वरूपावभासनात् ॥ ८६ ॥§ 1819

> तेन क्रियागुणद्रव्यनामजात्युपरञ्जितम् ।
> विषयं दर्शयन्नेति विकल्पो नाप्रमाणताम् ॥ ८७ ॥§ 1821

> विपर्ययात्समुत्तीर्ण इति साधु सहामहे ।
> प्रमाणात्तु बहिर्भूतं विकल्पं न क्षमामहे ॥ ८८ ॥§ 1823

> क्वचिद्बाधकयोगेन यदि तस्याप्रमाणता ।
> निर्विकल्पेऽपि तुल्याऽसौ द्विचन्द्राद्यवभासिनि ॥ ८९ ॥§ 1825

संज्ञाबोधकम् । प्राक्—अव्यपदेश्यपदकृत्यविचारावसरे ॥ § 1826

प्रतीत्योर्वैलक्षण्यमुपपादयति—तत्रेति । तदवसायः—तज्ज्ञानम् ॥ § 1827

१ ] तत्त्वतो— nyāma-wit__kha ५ ] र्णा— nyāma-wit__ka

कर्मणि त्विति । अयं गौः, नीलोऽयमित्यादौ सामानाधिकरण्यप्रतीतिर्वा वर्तते, कर्मणि तु तदपि नास्तीति सूचनाय तु शब्दः ॥ § 1828

तत्स्वरूपेति । आश्रयातिरिक्तक्रियास्वरूपेत्यर्थः । धातोः क्रिया अर्थः, आख्यातस्य आश्रयः । न हि चलतीति प्रत्ययः सदाऽस्तीति क्रियातद्व-तोर्भेद इत्यर्थः । विषयं दर्शयन् विकल्पः अप्रमाणतां नैति इत्यन्वयः । विपर्ययादिति । विकल्पोऽयं विपर्ययविलक्षण इति सम्मतमेव, अप्रामाण्यं तु नेत्यर्थः । द्विचन्द्रेति । तस्यापि प्रथमाक्षपातजत्वादित्यर्थः । ननु तर्हि I.250/KSV

मनोराज्यविकल्पानां काममस्त्वप्रमाणता ।
यथावस्तु प्रवृत्तानां न त्वसावक्षजन्मनाम् ॥ ९० ॥§ 1831

## विकल्पा अपि स्वतन्त्राः

न च निर्विकल्पपृष्ठभावित्वकृतमेषामेतद्रूपम्; (Edtext outside numbered paragraph)विषयसंस्पर्शमन्तरेण स्वतस्स्वच्छ-रूपाणां ज्ञानानामेवमाकारत्वानुपपत्तेः (Edtext outside numbered paragraph)किं निर्विकल्पपृष्ठभाविता करिष्यति ? तदनन्त-रभाविनी हि स्मृतिरपि क्वचिद्दृश्यत एव; न च सा तच्छायावती इति दुराशामात्रमेतत् ॥

ननु निर्विकल्पकेनैव वस्तुसर्वस्वं गृहीतं एकस्यार्थस्वभावस्येति वर्णित-म्—प्रतिविहितमेतत्—गृहीतग्रहणेऽपि प्रामाण्यानपायात् ॥

## निर्विकल्पविषयवस्तुनि विप्रतिपत्तयः

(Edtext outside numbered paragraph)किञ्च किं निर्विकल्पकेन गृह्यत इत्येतदेव न जानीमः ॥

भवन्तो निर्विकल्पस्य विषयं संप्रचक्षते ।
सजातीयविजातीयपरावृत्तं स्वलक्षणम् ॥ ९१ ॥§ 1833

भ्रान्तिज्ञानमेव नास्तीत्यत्राह—मनोराज्येति । कामुकस्य सर्वत्र कामिनीदर्शनरूपाणामित्यर्थः । एवं केषाञ्चित् स्वप्नानां च । यथावस्तु—व-स्त्वनतिक्रम्य । असौ—अप्रमाणता ॥ § 1834

निर्विकल्पसमनन्तरभावित्वकृतमेव विकल्पानां इदन्ताग्राहित्वादीति य-दुक्तं तत्प्रत्याह—न चेति । एषां—सविकल्पानां । एतत्—स्पष्टत्वं इद-न्ताग्राहित्वादि । विषयेति । अयमर्थः—तन्मते हि ज्ञानं स्वतो निराकारम् । विषयोल्लिखवशादेव साकारज्ञानानुभवः । एवञ्च विकल्पानां निर्विकल्पाधीन-त्वेऽपि साकारत्वं विषयसंबन्धाधीनमेव वक्तव्यमिति निर्विकल्पपृष्टभावित्वं किं वा तत्र करिष्यतीति विकल्पानां विषयसंस्पर्शोऽङ्गीकरणीय एवेति । निर्विक-

ल्पपृष्टभाविनीषु स्मृतिषु इदन्ताग्राहित्वस्पष्टत्वादेरभावात् व्यभिचरितं चेदमित्याह—तदनन्तरेति । क्वचिदिति । यथा विशेषानवगाहि स्वरूपमात्रावगाहि निर्विकल्पं प्रथमं जायते, ततश्च तत्र विशेषभानादिकं; एवं स्मरणस्थलेऽपि I.251/KSV कदाचित् प्रथमं स्वरूपमात्रस्मरणं, ततस्तत्र विशेषचिन्तन

महासामान्यमन्ये तु सत्तां तद्विषयं विदुः ।
वाग्रूपमपरे तत्त्वं प्रमेयं तस्य मन्वते ॥ ९२ ॥§ 1837

मित्यनुभूयत एव तथा च निर्विकल्पानुभवाज्जायमानापि स्मृतिः न स्पष्टरूपा वा इदमिति ग्राहिणी वोपलभ्यत इति न निर्विकल्पपृष्ठभावित्वकृतं तदिति ॥ § 1838

अन्ये त्विति । ब्रह्मविवर्तवादिन इत्यर्थः । श्लोकवार्तिके प्रत्यक्षसूत्रे भट्टपादैः—अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् इत्यारभ्य महासामान्यमन्यैस्तु द्रव्यं सदिति चोच्यते । सामान्यविषयत्वं च प्रत्यक्षस्यैवमाश्रितम् । विशेषास्तु प्रतीयन्ते सविकल्पकबुद्धिभिः इत्यादिनोक्तान्यपक्षप्रत्यभिज्ञानायैवात्रापि महासामान्यमन्ये तु इत्युक्तम् ॥ § 1839

तच्च वार्तिकं न्यायरत्नाकरे पार्थसारथिमिश्रैः एवमवतारितम्—वेदान्तिनस्तु महासामान्यमेव सत्ता-द्रव्यशब्दाभिलप्यं निर्विकल्पस्य विषयमाहुः इति ॥ § 1840

भट्टोम्बेकैश्च तात्पर्यटीकायां—वेदान्तवादिनस्तु महासामान्यं निर्विकल्पस्य विषयमाहुः । तच्च केचित् सत्तामाहुः, अपरे द्रव्यमित्येतद्दर्शयति इत्यवतारितम् ॥ § 1841

काशिकायां सुचरितमिश्रैश्च अद्वैतवादिनस्तु सन्मात्रविषयं निर्विकल्पकं प्रत्यक्षमित्याचक्षते, तदेतदुपन्यस्यति इति स्पष्टमेवाभिहितम् ॥ § 1842

अयञ्च पक्षः मण्डनमिश्रकृतब्रह्मसिद्धौ तर्ककाण्डान्ते यथानुवृत्तव्यवहारसिद्धिं यथाऽवभासं कथयन्ति बाह्याः । तथैव भेदव्यवहारयोगं वदन्ति वेदान्तविवेकभाजः इत्यत्र वर्णितः । बाह्याः बौद्धाः सकलव्यावृत्तं वस्त्वेव निर्विकल्पप्रत्यक्षविषय इति वदन्ति । वयन्तु सकलानुवृत्तं सत्तामात्रमेव तद्विषय इति वदामः इति तदर्थः ॥ § 1843

सुरेश्वराचार्यैः बृहदारण्यकसम्बन्धवार्तिक ९१८ वस्तुस्वरूपसंस्पर्शिचक्षुरादिभ्य उत्थितम् । भेदस्पृक् नाक्षजादि...... इत्यत्रायमर्थ उक्तः । एतद्विस्तरश्च संक्षेपशारीरकाद्वैतसिद्ध्यादिषु द्रष्टव्यः ॥ § 1844

अयं च पक्षः प्रथमं हरिणा वाक्यपदीये उपक्षिप्तः । अपरे—शब्दविवर्तवादिनः । तथा ह्युक्तं हरिणा वाक्यपदीये—अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरं । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः इति । एवञ्च पूर्वोक्ताः ब्रह्मविवर्तवादिनः । हरिस्तु शब्दविवर्तवादीत्येतावानेव विशेषः । इतरत्सर्वमपि प्रायः तयोस्तुल्यम् ॥ § 1845
I.252/KSV

केचिद्गुणक्रियाद्रव्यजातिभेदादिरूषितम् ।
शबलं वस्तु मन्यन्ते निर्विकल्पकगोचरम् ॥ १३ ॥[§ 1847]

प्रत्यक्षविषयेऽप्येताः चित्रं विप्रतिपत्तयः ।
परोक्षार्थे हि विमतिः प्रत्यक्षेणोपशाम्यति ॥ १४ ॥[§ 1849]

प्रत्यक्षे हि समुत्पन्ना विमतिः केन शाम्यति ?
इदं भाति न भातीति संविद्विप्रतिपत्तिषु ।
परप्रत्यायने पुंसां शरणं शपथोक्तयः ॥ १५ ॥[§ 1852]

केचित्—भाट्टाः । तथा च वार्तिकम्—निर्विकल्पकबोधेऽपि द्व्यात्मकस्यैव वस्तुनः । ग्रहणं इति प्रत्यक्ष—११८ । अत्र न्यायरत्नाकरः— द्व्यात्मकस्य—सामान्यविशेषात्मकस्येत्यर्थः । सामान्यावभासोऽपि प्रतीतिसिद्ध एव । न हि निर्विकल्पकेनागृहीतस्य सविकल्पकेनापि ग्रहणं संभवति । न वाऽगृहीते सामान्ये व्यक्त्यन्तरे प्रत्यभिज्ञा संभवति । तस्मात् सामान्यं विशेषश्च निर्विकल्पेऽपि प्रकाशत एव इति ॥ [§ 1853]

एवमाकृतिवादे च—यदा तु शबलं वस्तु युगपत् प्रतिपद्यते । तदाऽन्यानन्यभेदादि सर्वमेव प्रलीयते इत्युक्तम् । एतच्च निर्विकल्पविषयमिति तद्व्याख्यायां उक्तम् । एतच्छ्लोकप्रत्यभिज्ञापनायैवात्रापि श्लोके शबल शब्दप्रयोगः । अधिकमुत्तरत्र द्रष्टव्यम् ॥ [§ 1854]

एवञ्च भाट्टैः जातिव्यक्त्योर्गुणगुणिनोश्च भेदाभेदापरपर्यायस्य तादात्म्यस्यैवांगीकारात् निर्विकल्पे सामान्यविशेषोभयात्मकं वस्तु भासत इत्यङ्गीक्रियते । तथोक्तमाकृतिवादे—तेन नात्यन्तभेदोऽपि स्यात्सामान्यविशेषयोः इति । अत एव शतदूषिण्यां निर्विशेषविषयनिर्विकल्पभंगवादे—जातिगुणादिविशिष्टमेव द्रव्यं निर्विकल्पे भासते । परन्तु जातिगुणाद्यात्मकमपि वस्तु न तथा निर्विकल्पे विविच्यते । विकल्पे तु तदेव जातिगुणाद्यात्मना विकल्प्यते इति अभिहितम् । इदं च मतं कौमारिलानामिति तद्व्याख्यायां चण्डमारुते महाचार्यैरुक्तम् । अधिकमन्यत्र ग्राह्यम् ॥ [§ 1855]

परेति । एवं वादिषु विप्रतिपद्यमानेषु अनुभवे शरणीकरणीये सर्वेऽपि वादिनः स्वानुभवमपि तथा तथा आचक्षत इति अन्ततः शपथकरणमेवावशिष्यत I.253/KSV

न तु शपथशरणा एव निरुद्यममास्महे । मार्गान्तरेणापि तत्प्रमेयं निश्चिनुमः ॥

निर्विकल्पानुसारेण सविकल्पकसंभवात् ।
ग्राह्यं तदानुगुण्येन निर्विकल्पस्य मन्महे ॥ १६ ॥[§ 1858]

२२ ] दूषितम्— nyāma-wit_kha

२२ ] ग्राह्यान्तरा— nyāma-wit_ka

## स्वलक्षणमात्रं न निर्विकल्पविषयः

तत्र न तावत्सकलसजातीयव्यावृत्तं स्वलक्षणं प्रत्यक्षस्य विषयः ॥

गृहीते निर्विकल्पेन व्यावृत्ते हि स्वलक्षणे ।
अकस्मादेव सामान्यविकल्पोल्लसनं कथम् ? ॥ १७ ॥ § 1860

निर्विकल्पानुसारेण हि विकल्पाः प्रादुर्भवितुमर्हन्ति । अपि च—

विजातीयपरावृत्तविषया यदि कल्पना ।
व्यावृत्तिरूपं सामान्यं गृहीतं हन्त ! दर्शनैः ॥ १८ ॥ § 1862

इति । शपथोऽपि यदि क्रियेत तदा का गतिरिति चेत् तत्राह—न त्वित्यादि ॥ § 1863

सकलेतरव्यावृत्तं स्वरूपमेव निर्विकल्पे भासते इत्युक्ते तत्र इतरपदार्थः— सजातीयो विजातीयश्च । तत्र सजातीयव्यावृत्ताकारभाने बाधकमाह— सजातीयेति । गृहीत इत्यादि । अयमर्थः । निर्विकल्पेन सकलेतरव्यावृत्तं रूपमेव गृह्यते, सामान्यं तु विकल्पस्यैव विषय इति खलु तव मतम् । अत्रेदं पृच्छामः—सामान्यं अन्यत्र कदापि गृहीतं अत्र विकल्पे भासते ? उत कुत्रापि न ? कुत्राप्यभातस्य भानं तु न संभवत्येव, न हि शशशृङ्गादिः कुत्रचिद्भासते । अन्यत्र भातं चेत्, किं विकल्पे ? उत निर्विकल्पे ? यदि विकल्पे तर्हि पुनरनवस्था । यदि निर्विकल्पे तर्हि सिद्धं नः समीहितमिति । व्यावृत्ते स्वलक्षणमात्रे निर्विकल्पेन गृहीते सति सामान्यविषयविकल्पः आकस्मिक एव कथं स्यात् इत्यर्थः ॥ § 1864

अथ विजातीयव्यावृत्ताकारभाने दोषमाह—विजातीयेति । सामान्यं हि भवन्मते अन्यापोहरूपम् । तथा च निर्विकल्पे सामान्यभानमंगीकृतमेवेति

I.254/KSV । ननु

व्यावृत्तान्ननु नैवान्या व्यावृत्तिः परमार्थतः ।
व्यावृत्तग्रहणेनैव सुतरां तद्ग्रहो भवेत् ॥ १९ ॥ § 1867

सामान्यग्रहणेऽप्येवं तद्व्यापारावकल्पनात् ।
स्वलक्षणपरिच्छेदनिष्ठं तन्नावतिष्ठते ॥ १०० ॥ § 1869

## नापि सन्मात्रं निर्विकल्पस्य विषयः

नापि सत्ताद्वैतवादिसम्मतसत्ताख्यो निर्विकल्पस्य विषयो युक्तः ॥

सत्ताग्रहणपक्षेऽपि विशेषावगतिः कुतः ।

---

१६ ] पारवि— nyāma-wit__kha

सा भाति भेदस्पृष्टा चेत् सिद्धमद्वैतदर्शनम् ॥ १०१ ॥§ 1871

न च भेदं विना सत्ता गृहीतुमपि शक्यते ।
नाविद्यामात्रमेवेदमिति च स्थापयिष्यते ॥ १०२ ॥§ 1873

## निर्विकल्पे सूक्ष्मशब्दानुवेधोऽप्ययुक्तः

वाक्तत्त्वप्रतिभासोऽपि प्रतिक्षिप्तोऽनया दिशा ।§ 1874

वस्तुनः सकलेतरव्यावृत्तत्वेपि तेनाकारेण वस्तु न गृह्यते, किन्तु व्यावृत्त्याश्रयं वस्तुमात्रमिति चेत् तत्राह—व्यावृत्तादिति । न हि स्वरूपातिरिक्तो धर्मो नामास्ति भवतामित्यर्थः । एवं चास्मिन् मतेऽपि सामान्यग्रहणेऽपि निर्विकल्पप्रवृत्तिसंभवात् स्वलक्षणमात्रविषयकं निर्विकल्पकमिति न क्षोदक्षममिति ॥ § 1875

विशेषेत्यादि । निर्विकल्पेन सामान्यं न गृह्यत एवेति पक्षे—अज्ञातस्य सामान्यस्य विकल्पेऽपि भानासंभवादिर्यो दोष उक्तः, तादृशः प्रकृतेऽपि जागरूकः । निर्विकल्पेन विशेषाग्रहणे तर्हि केन विशेषो गृह्यत इति वक्तव्यम् । न केनापीति चेत् भानमेव न स्यात् । विकल्पेनैवेति चेदनवस्था । निर्विकल्पेनैवेति चेत् भेदविषयो निर्विकल्पः सिद्ध इति अद्वैतासिद्धिः । सिद्धमद्वैतदर्शनं इति नर्मोक्तिः । किञ्च समानानां भावस्यैव सामान्यरूपत्वात् व्यक्तिविशेषाणामग्रहणे तदाश्रितं सामान्यमपि न गृह्येत । न च भेदाः सन्त्येव, परन्तु कल्पितास्ते—इति चेत्, तदेतत् नवमाह्निके निराकरिष्यते ॥ § 1876

अनया दिशेति । ब्रह्मविवर्तवादाभ्युपगतब्रह्मापरपर्यायमहासामान्यस्थानापन्नमेव शब्दतत्त्वमिति पूर्वमेवोक्तम् । एवञ्च शब्दतत्त्वमेकमेव सर्वानुगतं सत्यं निर्विकल्पविषयः । व्यक्तयस्तु मिथ्या एवेत्युक्तम् । I.255/KSV

कथं च चाक्षुषे ज्ञाने वाक्तत्त्वमवभासते ॥ १०३ ॥§ 1878

अगृहीते तु सम्बन्धे गृहीते वाऽपि विस्मृते ।
अप्रबुद्धेऽपि संस्कारे वाचकावगतिः कुतः ? ॥ १०४ ॥§ 1880

## जात्यादिशबलितमपि न निर्विकल्पस्य विषयः

चित्रताऽपि पृथग्भूतैर्धर्मैस्तत्समवायिभिः ।

---

११ ] संस्पृष्टा— nyāma-wit__ka
२१ ] ष्यति— nyāma-wit__ka

जात्यादिभिर्यदीष्येत धर्मिणः काममस्तु सा ॥ १०५ ॥[§ 1882]

तदात्मता तु नैकस्य नित्यं तत्त्वानुपग्रहात् ।
अंशनिष्कर्षपक्षे तु धर्मभेदो बलाद्भवेत् ॥ १०६ ॥[§ 1884]

तथोक्तं च—वाक्यपदीयो ३-३२ सत्यासत्यौ तु यौ भावौ प्रतिभावं व्यवस्थितौ । सत्यं यत् तत्र सा जातिरसत्या व्यक्तयः स्मृताः । सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः । सा नित्या सा महानात्मा इति । एवञ्च ब्रह्मविवर्तवादे प्रदर्शिता दोषा अत्रापि समानाः ॥ [§ 1885]

कथमिति । शब्दो हि श्रावण इति भावः । ननु ज्ञानलक्षणाप्रत्यासत्त्या शब्दभानं भवताप्यङ्गीकृतं, कः प्रद्वेषोऽस्मासु ? इत्यत्राह—अगृहीत इति । सत्यमङ्गीकृतमस्माभिः, विकल्पस्थले पूर्वमेव गृहीतशक्तिकस्य तद्युज्यते । न तु प्राथमिकप्रत्यये । विकल्पस्थलेऽपि, वाचकशब्दस्याज्ञाने, ज्ञातेऽपि संस्कारप्रमोषवशाद्विस्मरणे, सत्यपि संस्कारे उद्बोधकासमधाने वा कथं शब्दभानं स्यात् । सूक्ष्मशब्दभानादिकं तु स्फोटवादे विचार्यते ॥ [§ 1886]

चित्रतेत्यादि । अयमर्थः । एकस्मिन् धर्मिणि विद्यमानाः जातिगुणक्रियात्मका धर्माः प्रथमग्रहणेऽपि गृह्यन्त एव । परन्त्वयं धर्मी, अयं गुणः, इयं जातिः, इयं क्रियेति विविच्य न भासन्ते । अतस्तन्निर्विकल्पमित्युच्यते । धर्मधर्मिणोश्च भेदाभेदावेवेति पूर्वमेवोक्तम् । तत्र निर्विकल्पेऽभेदांशस्यैबौत्कट्यम् । तदनन्तरं च पुरुषापेक्षानुगुणं जातिः गुणो वा धर्मिणः पृथगुद्भूतं सत् गृह्यते । तथोक्तमाकृतिवादे—भेदेभ्योऽनन्यरूपेण सामान्यं गृह्यते यदा । तदा विशेषमात्रेण वस्तु प्रत्यवभासते । तदुद्भूत्या च सामान्यं तद्भावानुगुणं स्थितम् । सदप्यग्राह्यरूपत्वादसद्वत्प्रतिभाति नः । विशेषानपि सामान्याद्यदा भेदेन बुध्यते । तदा सामान्यमात्रत्वमेवमेव प्रतीयते । यदा तु शबलं वस्तु युगपत्प्रतिपद्यते । तदान्यानन्यभेदादि सर्वमेव प्रलीयते इति ॥ [§ 1887]

I.256/KSV

यत्र यत्र यदोद्भूतिः जिघृक्षा चेति कथ्यते ।
तदात्मकत्वं धर्माणामुच्यते चेत्यसङ्गतम् ॥ १०७ ॥[§ 1889]

देशभेदस्तु धर्माणां अस्माभिरपि नेष्यते ।
धर्मी हि तेषामाधारो न पुनस्स तदात्मकः ॥ १०८ ॥[§ 1891]

## निर्विकल्पकविचारोपसंहारः

१४ ] यस्य— nyāma-wit__kha

तस्माद्य एव वस्त्वात्मा सविकल्पस्य गोचरः ।
स एव निर्विकल्पस्य शब्दोल्लेखविवर्जितः ॥ १०९ ॥[§ 1893]

अत्रैवं पृच्छ्यते—नामजात्यादिशबलं वस्तु निर्विकल्पे भासत इत्यत्र, किं धर्मिणोऽत्यन्तं भिन्नैः धर्मिणि वर्तमानैर्नामजात्यादिभिः शबलितं वस्तु ? उतात्यन्ताभिन्नैः तादृशैः ? उत भिन्नाभिन्नैः ? आद्येऽस्मदिष्टापत्तिः । द्वितीये तु अभिन्नयोर्धर्मधर्मिभावः कथम् ? न हि स्वयमेव धर्मः धर्मी च भवितुमर्हति । एवं च एकस्यैव धर्मिणः तत्त्वेन—धर्मात्मकत्वेनाग्रहणात् धर्माणां धर्म्यात्मकत्वं, धर्मिणो धर्मात्मकत्वं वा कथम् । नान्त्यः—भेदाभेदयोः परस्परविरुद्धत्वेनैकत्रासंभवात् । ननु उपपादकांशभेदाद्विरोधं परिहरामः—तथोक्तं— एवञ्च परिहर्तव्यः भिन्नाभिन्नत्वकल्पना । केनचित् ह्यात्मनैकत्वं नानात्वं चास्य केनचित् इति ॥ [§ 1894]

अत्र न्यायरत्नाकरः—यत्तु अन्यानन्यतैव कथमेकस्येत्युक्तं तत्राह—एवञ्चेति । एतदेव दर्शयति—केनचिदिति । गोत्वं हि शाबलेयात्मना बाहुलेयाद्भिद्यते, स्वरूपेण च न भिद्यते । तथा व्यक्तिरपि गुणकर्मजात्यन्तरात्मना गोत्वाद्भिद्यते, स्वरूपेण च न भिद्यते । तथा व्यक्त्यन्तरादपि व्यक्तिर्जात्यात्मना न भिद्यते, स्वरूपेण च भिद्यते । अपेक्षाभेदाच्चाविरोधः इत्यादि । तथा च को दोषः ? इति चेत्—एवं तर्हि अनुवृत्तांशव्यावृत्तांशभेदस्य सिद्धत्वाद्धर्मधर्मिभेद एव दृढीकृतो भवति । अपेक्षावशात् यत्र यस्य धर्मस्य उपादित्सा तस्य तत्रोद्भवः ग्रहणं चेत्युच्यते, अभेदश्च तयोरुच्यत इति विचित्रमिदम् । अतोऽयमपि पक्षो न युक्तः ॥ [§ 1895]
I.257/KSV

किमात्मकोऽसाविति चेद्यद्यदा प्रतिभासते ।
वस्तुप्रमितयश्चैव प्रष्टव्या न तु वादिनः ॥ ११० ॥[§ 1897]

क्वचिज्जातिः क्वचिद्द्रव्यं क्वचित्कर्म क्वचिद्गुणः ।
यदेव सविकल्पेन तदेवानेन गृह्यते ॥ १११ ॥[§ 1899]

इह शब्दानुसन्धानमात्रमभ्यधिकं परम् ।
विषये न तु भेदोऽस्ति सविकल्पाविकल्पयोः ॥ ११२ ॥[§ 1901]

अतः शब्दानुसन्धानवन्ध्यं तदनुबन्धि वा ।
जात्यादिविषयग्राहि सर्वं प्रत्यक्षमिष्यते ॥ ११३ ॥[§ 1903]

१५ ] विधेये— nyāma-wit__ka

तस्माद्यत्कल्पनापोढपदं प्रत्यक्षलक्षणे ।
भिक्षुणा पठितं तस्य व्यवच्छेद्यं न विद्यते ॥ ११४ ॥§ 1905

## अभ्रान्तपदप्रयोजनदूषणम्

अभ्रान्तपदस्यापि व्यावर्त्यं न किंचन तन्मते पश्यामः ॥ § 1906

ननु ! तिमिर-आशुभ्रमण-नौयान-संक्षोभाद्याहितविभ्रमं द्विचन्द्रअलातचक्र चलत्पादपादिदर्शनमपोह्यमस्य परैरुक्तम्—सत्यमुक्तम्, § 1907

ननु शब्दानुल्लेखिनी प्रतीतिः कीदृशी स्यादित्यत्र—अनुभवं पश्येति वदति—वस्त्वित्यादि ॥ § 1908

इह—सविकल्पे । शब्दः—वाचकशब्दः । तस्मादिति—नामजात्यादिविषयकप्रत्यक्षस्यापि प्रत्यक्षप्रमाणत्वेन तद्व्यावृत्त्यर्थं कल्पनापोढपदमिति न युज्यत इत्यर्थः ॥ § 1909

तिमिराशुभ्रमणनौयानसंक्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम् इति न्यायबिन्दुः । अत्र संक्षोभः—वातपित्तश्लेष्मणाम् । तेन ज्वलितस्तभादिभ्रान्तिः इति धर्मोत्तरटीका । संक्षोभः—चित्तसंक्षोभ इति यावत् । द्विचन्द्र— इत्यादीनां यथासंख्यमन्वयः । अलातं—अर्धदग्धकाष्ठः । तस्याशुभ्रमणेन अग्नौ चक्राकारभ्रान्तिविषयः चक्रं अलातचक्रमुच्यते । एवञ्च द्विचन्द्रभ्रमे तिमिरं दोषः, अलातचक्रभ्रमे आशुभ्रमणं, चलत्पादपभ्रमे नौयानं दोषः, आदिपदग्राह्यपिशाचभ्रमादौ संक्षोभादिरिति ग्राह्यम् ॥ § 1910
I.258/KSV

अयुक्तं तु—कल्पनाऽपोढपदेनैव तद्व्युदाससिद्धेः । तत्रापि निर्विकल्पकं ज्ञानं एकचन्द्रादिविषयमेव, विकल्पास्तु विपरीताकारग्राहिणो भवन्ति; यथा मरीचिग्राहिणि निर्विकल्पके सलिलावसायी विकल्प इति ॥ § 1911

## अभ्रान्तपदप्रयोजनसमर्थनं—तन्निराकरणं च

ननु ! तिमिरेण द्विधाकृतं चक्षुरेकतया न शक्नोति शशितं ग्रहीतुं इति निर्विकल्पकमपि द्विचन्द्रादिज्ञानम्—यद्येवं तरलतरङ्गादिसादृश्यरूषितं ऊषरे मरीचिचक्रं चक्षुषा परिच्छेत्तुमशक्यमिति तत्रापि निर्विकल्पकमुदकग्राहि विज्ञानं किमिति नेष्यते ? अभ्युपगमे वा सदसत्कल्पनोत्पातादिकृतः प्रमाणेतरव्यवहारो न स्यात् ॥ § 1912

## ज्ञानानां भ्रमत्वनिदानम्

२० ] तन्मतेन— nyāma-wit__kha

१२ ] तरङ्गादि— nyāma-wit__kha

१२ ] द्विचन्द्र— nyāma-wit__kha

अपि च न बाधकोपनिपातमन्तरेण भ्रान्तताऽवकल्पते ज्ञानानाम् । न च क्षणिकवादिमते वाध्यबाधकभावो बुद्धीनामुपपद्यत इत्यलं विमर्देन ॥
§ 1913

पूर्वोक्तं पु. २३५ दलकृत्यं शङ्कते—नन्वित्यादि । तिमिरादिदोषदुष्टमपि चक्षुः प्रथमसन्निकृष्टं चन्द्रं गृह्णाति । दोषवशात् नयनद्वयगतरश्मिद्वयं स्वतन्त्रं चन्द्रसंयुक्तं पृथक्पृथक् चन्द्रं गृह्णाति । अतः द्वित्वप्रतिभासः । परन्तु प्रत्येकं प्रत्येकं यथावस्थितवस्तुग्रहणात् न तत्र कल्पनावकाशः । अतश्च कल्पनापोढत्वात् द्विचन्द्रभ्रमेऽतिव्याप्तिः । अतः अभ्रान्तपदम् । यद्यपि शुक्तिरजतादिज्ञानेऽप्यतिव्याप्तिर्वक्तुं शक्या, परन्तु कल्पनापोढपदेनैव तैमिरिकज्ञानस्य स्पष्टनिरस्यत्वप्रतीतये द्विचन्द्रज्ञानमुपात्तम् । समाधत्ते—यद्येवमिति । मरीचिज्ञानमपि अभ्रान्तपदेनैव वारयाम इति चेत्तत्राह—अभ्युपगम इति । तथा च अभ्रान्तपदेनापि व्यावृत्तिर्दुवचैव स्यात् । प्रथमाक्षसन्निपातप्रभवत्वेन निर्विकल्पवदेव हि तेषामपि प्रामाण्यमेव वक्तव्यं स्यादित्याशयः ॥ § 1914

न चेति । ज्ञानानां क्षणिकत्वेन बाधकज्ञानकाले बाध्यं ज्ञानं स्वयमेव नष्टमिति कथमनयोर्बाध्यबाधकभाव इति भावः ॥ § 1915
I.259/KSV

इति सुनिपुणबुद्धिर्लक्षणं वक्तुकामः
पदयुगलमपीदं निर्ममे नानवद्यम् ।
भवतु, मतिमहिम्नश्चेष्टितं दृष्टमेतत्
जगदभिभवधीरं धीमतो धर्मकीर्तेः ॥ ११५ ॥ § 1919

## सांख्योक्तप्रत्यक्षलक्षणदूषणम्

श्रोत्रादिवृत्तिरपरैरविकल्पकेति
प्रत्यक्षलक्षणमवर्णि तदप्यपास्तम् ।
साम्यान्नयस्य, न च सिद्ध्यति बुद्धिवृत्त्या
द्रष्टृत्वमात्मन इति प्रतिपादितं प्राक् ॥ ११६ ॥ § 1923

## जैमिन्युक्तप्रत्यक्षलक्षणदूषणम्

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलंभनत्वात् इत्येतत्सूत्रं जैमिनीयैः साक्षात्प्रत्यक्षलक्षण- § 1924

दिङ्नागस्तु प्रत्यक्षं कल्पनापोढं प्रमाणसमुच्चये इत्येतावन्मात्रं लक्षणमुक्तवान् । तत्र दोषं पश्यन् अभ्रान्तपदेन तत् परिष्कृतवान् धर्मकीर्तिरिति

९ ] साध्यात्र— nyāma-wit__ka nyāma-wit__kha
१२ ] साक्षाल्लक्षण—

सुनिपुणबुद्धिरिति नर्मोक्तिः । नायं तदपराधः, किन्तु मतिवैभवस्येत्याह—भवद्भिति ॥ § 1925

श्रोत्रादीति । युक्तिदीपिकायां श्रोत्रादिवृत्तेः प्रत्यक्षप्रमाणत्वमुपपादितम् । सृष्टिप्रक्रियायां श्रोत्रेन्द्रियस्याद्यत्वात् तस्योत्कीर्तनम् । प्रमाणभूतप्रत्यक्षबोधनाय अविकल्पकपदम् । नयस्य साम्यात्—न तु पररचितानि लक्षणानि क्षणमपि सूक्ष्मदृशां विशन्ति चेतः इति न्यायस्य साम्यात् । दोषमप्याह—न चेत्यादि । प्राक्—६९—७० पुटयोरिदं द्रष्टव्यम् ॥ § 1926

सदित्यादि । अत्र तत्प्रत्यक्षं इत्यन्तं लक्षणवाक्यम् । एतादृशं प्रत्यक्षं धर्मं प्रति अनिमित्तम्—अप्रमाणम्—प्रत्यक्षेण धर्मः ग्रहीतुं न शक्यत इत्यर्थः । तत्र हेतुः—विद्यमानेति । प्रत्यक्षं खलु वर्तमानमात्रग्राहकम्, धर्मस्तु अतीतः अनागतश्च वर्तते । तयोः कथं प्रत्यक्षेण ग्रहणं स्यात् । अतः विधिरेव वेद एव धर्मे प्रमाणं; नान्यदित्यर्थः ॥ § 1927

I.260/KSV

परत्वेन न व्याख्यातम्; चोदनालक्षणोऽर्थो धर्मः इति प्रकृतप्रतिज्ञासङ्गत्यभावात् । अपि तु—धर्मं प्रति प्रत्यक्षमनिमित्तं, एवं लक्षणकत्वादिति अनुवादभङ्ग्या लक्षणे योजितम् । यथोक्तम्—

एवं सत्यनुवादत्वं लक्षणस्यापि संभवेत् इति ।
श्लो. वा. १-१-४-३९§ 1930

तदेतल्लक्षणवर्णने सूत्रयोजनमसमीचीनम्; अतिव्याप्तिदोषानतिवृत्तेः । तथा हि—इन्द्रियाणां सति संप्रयोगे पुरुषस्य जायमाना बुद्धिः प्रत्यक्षमिति सूत्रार्थः । तथा चातिव्याप्तिः—संशयविपर्ययबुद्ध्योरपि इन्द्रियसंयोगजत्वेन प्रत्यक्षत्वप्रसङ्गात् ॥ § 1931

सङ्गत्यभावादिति । इदं नैकं सूत्रं, किन्तु तत् प्रत्यक्षमित्येकं लक्षणपरं—अन्यच्च भिन्नं सूत्रमिति व्याख्यातवन्तं भवदासं दूषयद्भिः भट्टपादैरपि वर्ण्यते सूत्रभेदेन येन प्रत्यक्षलक्षणम् । तेन सूत्रस्य सम्बन्धो वाच्यः पूर्वप्रतिज्ञया इति सङ्गत्यभाव एव दूषणमुक्तम् । धर्मविचारः खलु प्रतिज्ञातः, तस्य नेदं प्रत्यक्षलक्षणं साक्षात्संगतमिति ॥ § 1932

एवं लक्षणकत्वादिति—प्रत्यक्षस्येति शेषः । एवमिति । अस्य लक्षणवाक्यस्य अनुबादरूपत्वमपि संभवेत् । लोकसिद्धलक्षणानुवादेन धर्मे प्रत्यक्षस्य प्रमाणत्वमुच्यत इत्यर्थः । अनतिवृत्तेरिति । पार्थसारथिमिश्रैः न्यायरत्नाकरे भवदासेन हि सता संप्रयोग इत्युक्तं, संप्रयोगशब्दश्च सकलसम्बन्धवचनो व्याख्यातः । अतस्तस्यानुमानादिषु आभासेषु चातिव्याप्तिर्भवति, नास्मद्व्याख्याने इत्युक्तं न युक्तमित्यनेन सूचितम् ॥ § 1933

३--४ ] अनुवादत्वं—
nyāma-wit__kha
७ ] सत्संप्रयोगे सति—

nyāma-wit__kha

सतीत्यादि । सति इन्द्रियार्थसम्बन्धे इति शाबरं भाष्यम् । यद्यपि अत्र—इदं वाक्यं न विग्रहपरं, किन्तु व्याख्यानमात्रम् । विग्रहस्तु संश्चासौ संप्रयोगश्च इत्येवेति अविद्यमानसंयोगात् प्रत्यक्षत्वनिराकृतिः १-१-४, ३६ इति वार्तिके, तद्व्याख्यासु चाभिहितम्, परन्तु ग्रन्थकृतां सप्तमीतत्पुरुष एवात्र भाष्यकारसम्मत इति अभिप्रायः । सप्तमीपक्ष एव न त्यज्यते इत्यनुपदं वदन्ति च । अयमाशयो ग्रन्थकृताम्—इदं च सूत्रं न प्रत्यक्षलक्षणपरं, किन्तु धर्मे प्रत्यक्षाप्रवृत्तिनिरूपणपरमिति सम्मतमेव । धर्मे

अथ सत्संप्रयोग इति सतां संप्रयोग इति व्याख्यास्यते— तथाऽपि निरालम्बनविभ्रमा एवार्थनिरपेक्षजन्मानो निरस्ता भवेयुः, न सालम्बनौ संशयविपर्ययौ ॥

अथ सति संप्रयोग इति सप्तमीपक्ष एव न त्यज्यते; संशयविपर्ययच्छेदी च संप्रयोग इत्युपसर्गो वर्ण्यते । यथोक्तम्—

सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।दुष्टत्वाच्छुक्तिकायोगो वार्यताम-
क्षजेक्षणात् ॥ इति ।§ 1935&

श्लो. वा. १-१-४-३९

तथाऽपि प्रयोगसम्यक्त्वस्यातीन्द्रियत्वेन प्रत्यक्षानवगम्यत्वात् कार्यतोऽवगतिर्वक्तव्या । कार्यं च ज्ञानम् । न च तदविशेषितमेव प्रयोगस्य सम्यक्त्वमवगमयति । न च तद्विशेषणपरमिह पदमपि, प्रत्यक्षाप्रवृत्तौ हेतुः विद्यमानोपलंभनत्वादिति । प्रत्यक्षस्य विद्यमानोपलंभनत्वमेवासिद्धमित्याशंका सत्संप्रयोगे इत्यनेन वार्यत इति कथनमेव सुन्दरम् । इदं च कर्मधारयाश्रयणे कथं वा सिध्येत् ? आर्थिकं तदिति चेत्, ततो वरं शाब्दत्वकल्पनम् । असतां संप्रयोगस्यासंभवात् सदिति व्यर्थमिति धर्मकीर्तिदूषणभीत्या कर्मधारयाश्रयणमपि न युक्तम्, सूत्रस्यानुवादकत्वेन लक्षणपरत्वाभावेनैव तन्मुखपिधानात् । कर्मधारयाश्रयणेऽपि हि सत्पदं व्यर्थमेव । संप्रयोगे इत्यस्य निमित्तसप्तमीत्वेन विद्यमानस्यैव निमित्तत्वसंभवात् तेनैव विद्यमानत्वं लभ्येत । परमते अविद्यमानसंप्रयोगजन्ययोगिप्रत्यक्षवारणाय तदिति वर्णनमपि न चारुतरम् । परमतदृष्टया लक्षणे विशेषणदानस्यासंभवात् । अतः प्रकृतात्यन्तोपयुक्ततत्पुरुषाश्रयणमेव वरम् ॥ § 1936

संशयविपर्ययाविति । एतयोः इन्द्रियार्थसन्निकर्षजन्यत्वं पूर्वं पु. २३२-२३३ उपपादितम् ॥ § 1937

दुष्प्रयोगः—असत्सन्निकर्षः । अतीन्द्रियत्वेनेति । शुक्तिरजतसत्यरजतसन्निकर्षयोर्हि वैलक्षण्यं न तदानीमनुभवसिद्धम् । अविशेषितं—दुष्टज्ञानवारकविशेषणासहितं, तत् ज्ञानम् । ज्ञानं सम्यक् चेत् कारणमपि सम्यक्, नो चेन्न—इत्येव वक्तव्यमित्यर्थः ॥ § 1938

I.262/KSV

२८ ] यते— nyāma-wit__kha

३१ ] सत्स— nyāma-wit__kha

अक्षरमपि, मात्रामपि वा सूत्रे पश्यामः । सतां संप्रयोग इति च पदं निरालम्बनज्ञाननिवृत्तये वर्णितम् । सति इति तु सतिसप्तम्यैव गतार्थत्वाद-नर्थकम् ॥ § 1939

लोकत एव कार्यविशेषावगमात् प्रयोगसम्यक्त्वमवगमिष्यामः इति चेत्—लोकत एव प्रत्यक्षस्य सिद्धत्वात् किं तल्लक्षणे सूत्रसामर्थ्ययोजनाक्लेशेन ॥ § 1940

## उपवर्षोक्तप्रत्यक्षलक्षणवर्णनम्

यदप्यत्र भगवान् वृत्तिकारः प्राह—यत् प्रत्यक्षं न तद्व्यभिचरति, यत् व्यभिचारि न तत्प्रत्यक्षम् । किं तर्हि प्रत्यक्षम् ? तत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत् प्रत्यक्षम् । यद्विषयं ज्ञानं तेनैव संप्रयोगे इन्द्रियाणां पुरुषस्य बुद्धिजन्म सत्प्रत्यक्षम् । यत् अन्यविषयकं ज्ञानमन्यसंप्रयोगे भवति न तत् प्रत्यक्षमिति—इत्येवं तत्सतोर्व्यत्ययेन लक्षणमनपवादमवकल्पत इति—त-दपि वृथाऽटाट्यामात्रम्; संशयज्ञानेन व्यभिचारानतिवृत्तेः । तत्र हि यद्विषयं ज्ञानं तेन संप्रयोग इन्द्रियाणामस्त्येव ॥ § 1941

ननु ज्ञानं न तथा विशेष्यते । अथापि अर्थप्राप्त्यप्राप्तयोः लोकसिद्धत्वात् तदादायैव सन्निकर्षसदसत्त्वं निर्णेष्याम इति शङ्कते—लोकत एवेति । तर्हि प्रत्यक्षस्वरूपादिकमपि लोकत एव प्रतिपद्यतां, किं तल्लक्षणाद्यभिधानेनेति समाधानग्रन्थाशयः ॥ § 1942

अनपवादं—असद्विषयकभ्रमव्यावृत्तम् । वृथाऽटाट्या-वृथाभ्रमणम् ॥ § 1943

I.263/KSV

## संशयस्येन्द्रियजन्यत्वोपपादनम्

ननु ! उभयविषयं ज्ञानम्; न चोभाभ्यां संप्रयुक्तमिन्द्रियम्— मैव-म्—न हि धवखदिरवत् द्वावपि संशयसंविदि प्रतिभासेते । किं तु स्थाणुर्वा पुरुषो वेति अनिर्धारितैकतरपदार्थतत्त्वावमर्शी संशयो जायते । नूनं च त-योरन्यतरेणेन्द्रियं संप्रयुक्तमेवेति । उभयावमर्शित्वाच्च संशयस्य येन संप्रयुक्तं चक्षुः तद्विषयमपि तज्ज्ञानं भवत्येवेति नातिव्याप्तिः परिहृता भवति ॥ § 1944

---

३ ] परं— nyāma-wit__kha
३ ] विज्ञान— nyāma-wit__ka
३ ] सप्तम्यैव— nyāma-wit__kha
० ] भवान्— nyāma-wit__ka; nyāma-wit__kha
० ] यद्व्यभिचारि न तत्प्रत्यक्षं, यत् प्रत्यक्षं, न तद्व्यभिचरति । तत्संप्रयोगे— शिष्टं यथानिवेशितमेव— nyāma-wit__ka ; यद्व्यभिचारि न तत् प्रत्यक्षं, यत् प्रत्यक्षं, यद्विषयं ज्ञानमन्यसंप्रयोगे भवति न तत्प्रत्यक्षं इत्येवं— nyāma-wit__kha
० ] संप्रयोगे इन्द्रियाणां बुद्धिजन्म सत्प्रत्यज्ञं तदन्यविषयं ज्ञानं अन्यसंप्रयोगे भवति न तत् प्रत्यक्षमस्त्येव— nyāma-wit__kha
० ] तरेण— nyāma-wit__ka

## सूत्रस्यानुवादकत्वोपपादनं परैः

अथ ब्रूयुः—किमनेन परिक्लेशेन ? न लक्षण वर्णनमस्माकमभिमतम्, अनुवादपक्षनिक्षिप्तत्वात् । अपि तु लोकप्रसिद्धप्रत्यक्षानुवादेन धर्मं प्रत्यनिमित्तत्वमेव विधीयते ! न धर्मं प्रति प्रमाणं प्रत्यक्षं, विद्यमानोपलंभनत्वात्—विद्यमानार्थग्राहित्वादित्यर्थः । धर्मश्च न वर्तमानः; त्रिकालानवच्छिन्नस्य तस्य यजेत दद्यात् जुहुयात् इत्यादिशब्देभ्यः प्रतीतेः ॥ § 1945

तर्हि सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम् इति किमर्थो ग्रन्थ इति चेत्—न—विद्यमानोपलंभनसमर्थनार्थत्वात् । यदि विद्यमानोपलंभनत्वमसिद्धमिति परो ब्रूयात्—स वक्तव्यः—विद्यमानोपलंभनं प्रत्यक्षं, सत्संप्रयोगजत्वादिति ॥ § 1946

ननु यावद्विषयसंयोग एव विवक्षणीयः । अन्यथा हि भ्रमेऽपि धर्म्यंशे सन्निकर्षसत्त्वात् कथं वारणम् ? तथा च संशयव्युदास इति शङ्कते— नन्विति । ज्ञानं—संशयः । धवखदिरवदिति । समुच्चयात्मकज्ञान इव इति यावत् । तद्विषयमपीति । अन्यतरस्यैव प्रकारत्वेन तदंशे इन्द्रियसन्निकर्षोऽस्त्येव । अन्यथा प्रत्यभिज्ञाद्यपि न प्रत्यक्षं स्यादित्यर्थः ॥ § 1947

यथार्थमाशयमनुवदति—अथेति । त्रिकालेति । न हि कालविशेष एव विधायको विधिरित्यर्थः । भूतो भविष्यंश्च धर्मो वर्तत एव ॥ § 1948

किमर्थ इति । प्रत्यक्षमनिमित्तं, विद्यमानोपलंभनत्वात् इत्येतावतैवोक्तार्थलाभादित्यर्थः ॥ § 1949

I.264/KSV

प्रत्यक्षग्रहणमपि हेतुनिर्देशार्थमेव । सत्संप्रयोगस्यासिद्धतां ब्रुवन्ननेन प्रत्याख्यायते सत्संप्रयोगजं प्रत्यक्षं प्रत्यक्षत्वादिति । तदुक्तम् श्लो. वा १-१-४-२१ § 1950

प्रत्यक्षत्वमदोहेतुः शेषं हेतुप्रसिद्धये इति ।§ 1951

स्वातन्त्र्येणापि प्रत्यक्षत्वं धर्मग्राहकत्वनिषेधाय वक्तव्यम् । न धर्मग्राहि प्रत्यक्षं, प्रत्यक्षत्वात्, अस्मदादिप्रत्यक्षवत् इत्येवमन्यत्रैव सूत्रतात्पर्यात् नातिव्याप्त्यादिदोषावसर इहेति ॥ § 1952

## अनुवादकत्वेऽपि सूत्रस्य दोषकथनम्

---

० ] लक्षण— nyāma-wit__kha
० ] मपि— nyāma-wit__ka
० ] तत्सं— nyāma-wit__ka
० ] चेन्न विद्यमानो— nyāma-wit__kha
० ] मतो हे— nyāma-wit__ka; nyāma-wit__kha
० ] शेषहेतु— nyāma-wit__ka
२ ] मन्यसूत्र— nyāma-wit__ka

तदेतदपि न प्रामाणिकमनोऽनुकूलम् । कतरस्य प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वं प्रतिपाद्यते ? किमस्मदादिप्रत्यक्षस्य ? योगिप्रत्यक्षस्य वा ? तत्र अस्मदादिप्रत्यक्षस्य तथात्वे सर्वेषामविवाद एवेति किं तत्रेयता श्रमेण ! योगिप्रत्यक्षस्य तु भवतामसिद्धत्वात् कस्य धर्मं प्रत्यनिमित्तत्व प्रतिपादनम् ? § 1953

प्रत्यक्षेति । तदनिमित्तम् इत्येवालमित्यर्थः । अदोहेतु—सत्संप्रयोगजत्वे हेतुः । तथा हि व्याख्यातं मिश्रैः—सत्संप्रयोगजत्वस्यैव कुतः सिद्धिरित्यत आह—प्रत्यक्षत्वमिति । तदेते त्रयः प्रयोगाः, प्रत्यक्षमनिमित्तं, विद्यमानोपलंभनत्वात्; विद्यमानोपलंभनत्वं च सत्संप्रयोगजत्वात्; सत्संप्रयोगजत्वं च प्रत्यक्षत्वादिति इति । शेषं सूत्रं विद्यमानोपलंभनत्वरूपहेतोरसिद्ध्याशंकायां हेतुसिद्ध्यर्थं प्रवृत्तमित्यर्थः । प्रत्यक्षत्वं—प्रत्यक्षलक्षणम् । प्रत्यक्षं न धर्मग्राहकं इति वक्तव्ये, कुत इति प्रश्ने, प्रत्यक्षस्यैवंरूपत्वादिति खलु वक्तव्यमित्यर्थः । अन्यत्रैव—लक्षणादन्यस्मिन्ननुवाद एव ॥ § 1954

तथात्वे—प्रत्यक्षं प्रत्यप्रमाणत्वे । योगीति । तथोक्तं वार्तिके— अस्मदादौ प्रसिद्धत्वाद्योग्यर्थमभिधीयते १-१-४-२१ इति ॥ § 1955

I.265/KSV

एवं च धर्मिणोऽभावादाश्रयासिद्धतां स्पृशेत् ।
विद्यमानोपलंभत्वप्रत्यक्षत्वादिसाधनम् ॥ ११७ ॥§ 1957

परप्रसिद्ध्या तत्सिद्धिरिति चेत्—केयं प्रसिद्धिर्नाम ? प्रमाणमूला ? तद्विपरीता वा ? आद्ये पक्षे प्रमाणस्यापक्षपातित्वात् परस्येव तवापि सिद्धिर्भवतु । अप्रमाणमूलत्वे तुन कस्यचिदप्यसौ प्रसिद्धिः ॥ § 1958

योगिज्ञानं परेषां यत् सिद्धं, तदनुभाषणे ।
प्रतिज्ञापदयोरेव व्याघातस्ते प्रसज्यते ॥ ११८ ॥§ 1960

परैर्हि धर्मग्राहि योगिज्ञानमभ्युपगतम् । अतस्तदनुभाषणे धर्मग्राहकं न धर्मग्राहकमित्युक्तं स्यात् ॥ § 1961

परसंसिद्धमूलं च नानुमानं प्रकल्पते ।
उक्तं भवद्भिरेवेदं निरालम्बनदूषणे ॥ ११९ ॥§ 1963

धर्मिणः—उभयसंप्रतिपन्नस्य पक्षस्य । लौकिकप्रत्यक्षस्य धर्मं प्रत्यप्रमाणत्वसाधने सिद्धसाधनम्; योगिप्रत्यक्षस्य भवदनभिमतत्वात् पक्षत्वमेव न संभवतीत्युभयथापि सूत्रं व्यर्थमित्यर्थः ॥ § 1964

---

७ ] प्रत्यप्रमाणता— nyāma-wit__kha
१२ ] प्रमाणपक्ष— nyāma-wit__ka
१३ ] माणत्वे— nyāma-wit__ka
१९ ] दूषणम्— nyāma-wit__kha

तवापीति । न हि प्रमाणसिद्धस्यापह्नवः केनापि कर्तुं शक्य इत्यर्थः ॥
§ 1965

व्याघात इति । परसम्मतं हि योगिप्रत्यक्षं धर्मग्रहणशक्तम्, तत्कथं परसम्मतं सिद्धवत्कृत्य तस्य धर्मग्राहकत्वमात्रं नाङ्गीक्रियत इत्यर्धजरतीत्यर्थः । एतदेवोपपादयति—परैरीत्यादि । तथोक्तं अतीतानागतेऽप्यर्थे सूक्ष्मे व्यवहितेऽपि च । प्रत्यक्षं योगिनामिष्टं कैश्चित् श्लो. वा. १-१-४-२६ इत्यादि । परे—शाक्यार्हतादयः ॥ § 1966

परसंसिद्धमूलं—परमतमात्रसिद्धपक्षकम् । उक्तमिति । तथा हि वार्तिकम्—श्लो. वा. १-१-५-निरा. ४५ अथापि रूढिरूपेण प्रत्ययः स्यात् तथापि तु । ग्राहकं वस्तु सिद्धं नः प्रत्ययोऽन्यस्य वस्तुनः । तमभ्युपेत्य पक्षश्चेत् अभ्युपेतं विरुध्यते इत्यादि । अयं भावः । सर्वोऽपि प्रत्ययः मिथ्या,

साध्यसिद्धिर्यथा नास्ति परसिद्धेन हेतुना ।
तथैव धर्मिसिद्धत्वं परसिद्ध्या न युज्यते ॥ १२० ॥§ 1969

## सूत्रस्य तर्करूपत्वोपपादनं, तन्निराकरणञ्च

तत्रैतत्स्यात्—प्रसङ्गसाधनमिदम् । प्रसङ्गश्च नाम परसिद्धेन परस्यानिष्टापादनमुच्यते । परस्य च विद्यमानोपलंभनं सत्संप्रयोगजन्यं च प्रत्यक्षं सिद्धम् । अतस्तेनैव हेतुना धर्मानिमित्तत्वं तस्योपपाद्यत इति को दोषः ?—नैतदेवम्—

प्रसङ्गसाधनं नाम नास्त्येव परमार्थतः ।
तद्धि कुड्यं विना तत्र चित्रकर्मेव लक्ष्यते ॥ १२१ ॥§ 1971

न हि नभःकुसुमस्य सौरभासौरभविचारो युक्तः ॥

अथापि (Edtext outside numbered paragraph)किं न एतेन ! भव (Edtext outside numbered paragraph)त्वेवं प्रसङ्ग (Edtext outside numbered paragraph)साधनम् । तदपि तु व्याप्तिमूलं भवति ॥

न च संभवति व्याप्तिप्रतीतिरिह मादृशाम् ।
न धर्मग्राहि सर्वेषां प्रत्यक्षमिति वेत्ति कः ? ॥ १२२ ॥§ 1973

प्रत्ययत्वात्, इत्यनुमाने पक्षत्वेन लोकप्रसिद्धः प्रत्यय एव विवक्षित इति कथनेऽपि अन्यस्य ग्राहकात् ज्ञानात् भिन्नस्य वस्तुनः ग्राहकं आत्मधर्मभूतं वस्त्वेव प्रत्ययशब्दार्थ इति अस्माकं प्रसिद्धम् । तस्यैव पक्षीकरणे

१० ] तदत्रापि न तु—
nyāma-wit_kha

च अभ्युपगमविरोधः—अस्माभिः अर्थग्राहकत्वेन प्रमाणत्वेन चाभिमतं प्रत्ययं पक्षत्वेनांगीकृत्य पुनस्तस्य अर्थाविषयत्वादप्रामाण्यसाधनं व्याहतमिति । एवञ्च परपक्षसिद्धस्य पक्षीकरणं न युज्यत इति भवद्भिरेव कथितमिति प्रकृते परमतसिद्धस्य योगिप्रत्यक्षस्य पक्षीकरणं न युक्तम् । धर्मी—पक्षः ॥ § 1974

प्रसङ्गेत्यादि । कन्दल्यामप्ययं पक्षः प्रस्तुत्य निरस्तः ॥ § 1975

मादृशां—असर्वज्ञानाम् । प्रत्यक्षं हि ज्ञानं तत्तदात्ममात्रसाक्षिकम् । एवं स्थिते सर्वेषामपि प्रत्यक्षं न धर्मग्राहीति को वा वेत्ति ? यदि कश्चित् वेत्ति तर्हि स एव सर्वज्ञः योगिपदवाच्यः संजातः । सर्वज्ञेन च तेन धर्मोऽपि तथैव गृह्येत ॥ § 1976

I.267/KSV

मत्प्रत्यक्षमक्षमं धर्मग्रहण इति भवान्न जानीते, त्वत्प्रत्यक्षमपि न धर्मग्राहीति नाहं जाने, अन्यस्य प्रत्यक्षमीदृशमेवेति उभावप्यावां न जानीवहे ॥ § 1977

त्वया तु यदि सर्वेषां प्रत्यक्षं ज्ञातमीदृशम् ।
तर्हि त्वमेव योगीति योगिनो द्वेक्षि किं वृथा ? ॥ १२३ ॥§ 1979

प्रामाणिकस्थितिं तस्मादित्थं श्रोत्रिय ! बुध्यसे !
परोक्तेऽतीन्द्रिये ह्यर्थे मा वादीर्दूषणं पुनः ॥ १२४ ॥§ 1981

प्रमाणसिद्धे हतशक्ति दूषणं
प्रमाणशून्येऽपि वृथा तदुक्तयः ।
निरस्य चोद्यव्यसनं तु मृग्यतां
अतीन्द्रिये वस्तुनि साधनं पुनः ॥ १२५ ॥§ 1985

स चेत् पर्यनुयुक्तः सन् वक्तुं शक्नोति साधनम् ।
ओमिति प्रतिपत्तव्यं नो चेन्नास्त्येव तस्य तत् ॥ १२६ ॥§ 1987

उक्तमेव विवृणोति—मत्प्रत्यक्षेति । उभाविति । स्वप्रत्यक्षस्य धर्मग्रहणासामर्थ्यात् तद्दृष्टान्तेन इतरेषामपि प्रत्यक्षं तादृशमेवेत्यनुमिनुमः—इति चेत् स्वेनावगतमेवान्येनाप्यवगम्येतेति वा, स्वेनानवगतमन्यस्याप्यनवगतमेवेति वा न वक्तुं शक्यमिति ग्रन्थकृदेव सप्तमाह्निके क्षणभङ्गे वक्ष्यति । यथा—यदहं न वेद्मि तत् परोऽपि न वेदेति चेत् इत्यादिना । बुध्यसे इति । अवगच्छेति यावत् ॥ § 1988

सर्वेषां प्रत्यक्षं ईदृशमिति त्वया यदि ज्ञातं इत्यन्वयः ॥ § 1989

प्रमाणसिद्धेऽर्थे दूषणमकिञ्चित्करं, प्रमाणशून्येऽपि तथेत्यर्थः । अयं भावः— अतीन्द्रियं तु वस्तु भवतामपि सम्मतम् । तत्र च प्रमाणं केवलं मृग्यम् । न त्वन्येनोक्ते प्रमाणे केवलदूषणकथनं युक्तम् । शब्दोऽपि हि लोकावगतसामर्थ्यः अत्यन्तलोकविलक्षणेऽतीन्द्रिये वस्तुनि कथं प्रमाणं स्यादिति ॥ § 1990

स चेदिति । अतीन्द्रियसाधकं प्रमाणमवगन्तुमशक्तेन त्वया पृष्टः सः— यः कश्चित् तत्साधनं वक्ति चेत्, तूष्णीमभ्युपगम्य सन्तोष्टव्यमायुष्मता । यदि नांगीकरोषि तर्हि अतीन्द्रियसाधनं न शक्यमेव ॥ § 1991

I.268/KSV

## योगिप्रत्यक्षे प्रमाणम्

आह—शिक्षिताः स्मः प्रामाणिकवृत्तम् । न दूषणं ब्रूमः । भवन्तमेवानुयुञ्ज्महे; तदेतर्हि कथ्यताम्—धर्माधिगमनिपुणयोगिप्रत्यक्षसिद्धौ किं प्रमाणमिति—इदमुच्यते—दर्शनातिशय एव प्रमाणम् । तथा ह्यस्मदादिरपेक्षितालोकोऽवलोकयति निकटस्थितमर्थबृन्दम् । उन्दुरुवैरिणस्तु सान्द्रतमतमःपङ्कपटलविलिप्तदेशपतितमपि संपश्यन्ति । संपातिनामा च गृध्रराजो योजनशतव्यवहितामपि दशरथनन्दनसुन्दरीं ददर्शेति श्रूयते रामायणे । सोऽयं दर्शनातिशयः शुक्लादिगुणातिशय इव तारतम्यसमन्वित इति गमयति परमपि निरतिशयमतिशयम् । अतश्च यत्रास्य परः प्रकर्षः, ते योगिनो गीयन्ते । दर्शनस्य च परोऽतिशयः सूक्ष्मव्यवहितविप्रकृष्टभूतभविष्यदादिविषयत्वम् ॥ § 1992

स्वयमज्ञश्चेत् परोक्तमेव शरणीकर्तव्यमित्युक्तो वादी सावहेलनमधिक्षिपति—शिक्षिताः स्म इत्यादिना । अपेक्षितालोकः—आलोकरूपसहकारिविशिष्टः अस्मदादिरित्यर्थः । उन्दुरुवैरिणः—मार्जाराः । तत्सुरवैरिण इति पाठे—राक्षसाः—इत्यर्थः । निशाचरा हि ते । परं—सर्वापेक्षया अन्तिमसीमवर्तिनम् । नन्वस्तु तथा । तथाऽपि सर्वदर्शित्वं कथं सिद्धमित्यत्राह—दर्शनस्येति । एतदुक्तं भवति । लोके कश्चिदेकं पश्यति, अन्यस्ततोऽधिकं, अपरश्च ततोऽप्यधिकमिति दर्शनं लोके तरतमभावापन्नं दृष्टम् । तस्य च तारतम्यस्य कुत्रचिद्विश्रान्तिर्वाच्या । कतिपयदर्शित्वं तु सर्वसमानम् । अतः तादृशोऽतिशयो निरतिशयो न स्यात् । आपेक्षिककतिपयदर्शित्वप्रतिकोटि तु सर्वदर्शित्वमेव । तत्र यदि सर्वशब्दे संकोचोऽङ्गीक्रियते तर्हि पुनस्सैव गतिः । अतः देशतः कालतः स्वरूपतश्च संकोचरहितसर्वदर्शित्वमेव वक्तव्यमिति सिद्धं सूक्ष्मत्रिकालवर्तिसर्वदर्शित्वं केषाञ्चिदिति ॥ § 1993

I.269/KSV

---

४ ] तत्सुर— nyāma-wit__ka

७--८ ] कथ— nyāma-wit__ka

## धर्मादयोऽपियोगिप्रत्यक्षविषयाः

ननु ! स्वविषयानतिक्रमेण भवतु तदतिशयकल्पना । धर्मस्तु चक्षुषो न विषय एव । तदुक्तम्—श्लो. वा-१-१-२-११४ § 1994
(?')

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यात् न रूपे श्रोत्रवृत्तिता ॥§ 1996

अपि च—

येऽपि चातिशया दृष्टाः प्रज्ञामेधाबलैर्नृणाम् ।
स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥ इति ।§ 1999

§ 2000

एतदयुक्तम्—यतः, यद्यपि नास्मदादिनयनविषयो धर्मः— तथापि योगीन्द्रियगम्यो भविष्यति । तथा हि—योजनशतव्यवहितं, अन्धकारान्तरितं वा नास्मदादिलोचनगोचरतामुपयाति, संपातिपृषदंशदृशोस्तु विषयो भवत्येव ॥ § 2001

## चक्षुषैव योगिनां धर्मग्रहणम्

नन्वेवमविषये प्रवृत्तं योगिनां चक्षुर्गन्धरसादीनपि गृह्णीयात् । यथोक्तम्—श्लो. वा. १-१-२-११२ § 2002

एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते ।
नूनं स चक्षुषा सर्वान् रसादीन् प्रतिपद्यते इति ॥§ 2004

स्वं—तत्तदिन्द्रियाणि । श्रोत्रवृत्तिता—श्रोत्रस्य वृत्तिः—यस्मिन् तत् श्रोत्रवृत्ति, तस्य भावः । यद्विषयकप्रवृत्तिमत् श्रोत्रं तत्तेत्यर्थः । श्रोत्रग्राह्यतेति यावत् ॥ § 2005

स्तोकस्तोकान्तरत्वेनेति । एकापेक्षयाऽन्यस्य पुरुषस्येन्द्रियाणां सन्नप्यतिशयः किञ्चित्किञ्चिदन्तरवानेव स्यात्, न तु अतीन्द्रियार्थग्रहणरूपादतिशयो महदन्तरो दृष्ट इत्यर्थः । व्यवहितं—इत्यस्य वस्तु इति विशेष्यम्, एवमुत्तरत्रापि ॥ § 2006

३ ] र्नराः— nyāma-wit__ka
१२ ] नैव— nyāma-wit__ka
१३ ] च— nyāma-wit__kha

प्रमाणेन—प्रमाकरणेनेन्द्रियेणेति यावत् । चक्षुषैव यदि सर्वं जानीयात् तर्हि रसादिग्राहकत्वमपि चक्षुष एव स्यादिति इन्द्रियव्यवस्थैव न स्यादिति ॥ § 2007

I.270/KSV

नैतदेवम्—रसादिग्राहीण्यपि योगिनामिन्द्रियाणि चक्षुर्वदतिशयवन्त्येवेति न रसादिषु चक्षुर्व्यापारः परिकल्प्यते । धर्मेऽपि न तर्हि कल्पनीय इति चेत्—न—तस्य रसादिवत् तदविषयत्वाभावात् ॥ § 2008

अपि च योगीन्द्रियाविषयत्वं धर्मस्य कथमवगतवान् भवान् ? अविषयत्वं तद्भावेऽपि तदनवगमादवगम्यते—यथा नयनसद्भावेऽपि शब्दाश्रवणात् तदविषयता शब्दस्यावसीयते—न चैवं योगिचक्षुषि सत्यपि धर्मस्याग्रहणं अवगन्तुं शक्नोति भवान्, उभयस्यापि भवतः परोक्षत्वात् इत्यविषयस्स तस्येति न ते वक्तुं युक्तमिति ॥ § 2009

## धर्मः योगिप्रत्यक्षविषय एव

ननु ! कर्तव्यतारूपः त्रिकालस्पर्शवर्जितः ।
चक्षुर्विषयतामेति धर्म इत्यतिसाहसम् ॥ १२७ ॥§ 2011

नैतदिति । अयं भावः—चक्षुषैव रसादिग्रहणापादनं, योगिनां रसनेन्द्रियादीनामभावादुच्यते ? उत सतामपि तादृशशक्त्यभावात् । नाद्यः, इन्द्रियाणां सद्भावात् । अन्त्ये किं रसादिग्रहणशक्तिः पूर्वं विद्यमाना योगिनां नष्टा ? उतातीन्द्रियरसादिग्रहणशक्तिर्नास्तीति ? प्रथमे अस्मादृशामयोगिनामिन्द्रियस्य विद्यमानं सामर्थ्यमपि योगिनामिन्द्रियस्य नास्तीति चित्रमिदम् । द्वितीये चक्षुर्वदेव रसनादिकमपि योगप्रभावादतीन्द्रियरसादिग्रहणशक्तं वर्तत एवेति किं चक्षुष उपरि भारारोपणेनेति । तर्हीति । यथा लोके रसस्य चक्षुषा कुत्राप्यग्रहणात् योगिचक्षुषोऽपि तत्रासामर्थ्यकल्पना, तथैव धर्मस्य कुत्रापि चाक्षुषत्वादर्शनात् धर्मेऽपि असामर्थ्यकल्पनमेव न्याय्यमित्यर्थः । समाधत्ते—तस्येति । तदविषयत्वेति । चक्षुरविषयत्वस्यासिद्धेरिति भावः ॥ § 2012

ननु चक्षुर्विषयत्वं वा कथं सिद्धमित्याशङ्कायां बाधकाभावादेव सिद्धमित्याह—अपि चेति । उभयस्य—योगिचक्षुषः धर्मस्य च ॥ § 2013

त्रिकालेति । तथोक्तं श्लो. वा. १-१-२-१३ श्रेयस्साधनता ह्येषां नित्यं वेदात् प्रतीयते । ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः इति ॥ § 2014

२ ] पि तर्हि— nyāma-wit__ka
३ ] यता शब्दस्या— nyāma-wit__kha
७ ] इति— nyāma-wit__kha
८ ] तस्य नेति नैव— nyāma-wit__kha

I.271/KSV

सत्यं साहसमेतत्ते मम वा चर्मचक्षुषः ।
न त्वेष दुर्गमः पन्था योगिनां सर्वदर्शिनाम् ॥ १२८ ॥§ 2016

## त्रिकालानवच्छिन्नोऽपि धर्मः प्रत्यक्ष एव

यच्च त्रिकालानवच्छिन्नो यजेतेत्यादिलिङादियुक्तशब्दैकशरणावगमो धर्मः कथं ततोऽन्येन प्रमाणेन परिच्छिद्यतामित्युच्यते— तदपि प्रक्रियामात्रम् । किमिव हि त्रिकालस्पर्शास्पर्शाभ्यां कृत्यम् ? यथा वयं गमनादिक्रियाणां देशान्तरप्राप्त्यादिप्रयोजनतां जानीमः—तथा अग्निहोत्रादिक्रियाणां स्वर्गादिफलतां ज्ञास्यन्ति योगिन इति किमत्र साहसम् ? § 2017

## अन्ततः धर्मादयो मनसा वा गृह्यन्त एव भावनाबलजप्रत्यक्षवत्

यदि हि बाह्येन्द्रियेष्वमर्षः, न तेष्वतिशयो विषह्यते, तदलमनुबन्धेन ॥ § 2018

मनःकरणकं ज्ञानं भावनाभ्याससंभवम् ।
भवति ध्यायतां धर्मे कान्तादाविव कामिनाम् ॥ १२९ ॥§ 2020

मनो हि सर्वविषयं, न तस्याविषयः कश्चिदस्ति । अभ्यासवशाद्यातीन्द्रियेष्वप्यर्थेषु परिस्फुटाः प्रतिभासाः प्रादुर्भवन्तो दृश्यन्ते । यथाऽऽहुः प्र. वा. ३-२८२. § 2021

कामशोकामयोन्मादचोरस्वप्राद्युपद्रुताः ।
अभूतानपि पश्यन्ति पुरतोऽवस्थितानिव ॥§ 2023

शरणं—उपायः । ततः—शब्दात् । यद्यपि अत्र त्रिकालानवच्छिन्नत्वमात्रं न धर्मस्य शब्दैकगम्यत्वे हेतुः, अनुमानस्यापि कालत्रयविषयत्वात्; किन्तु प्रत्यक्षागम्यत्व एव । अथापि सर्वथाऽप्रत्यक्षे नानुमानमपि प्रवर्तेतेत्याशयः । प्रक्रिया—उपपादनप्रकारः ॥ § 2024

अनुबन्धः—दोषोत्पादनम् । दोषोत्पादेऽनुबन्धः स्यात् इति कोशः ॥ § 2025

I.272/KSV

---

३ ] यां— nyāma-wit__ka
८--१० ] मनो हि— nyāma-wit__ka
११ ] यदा— nyāma-wit__ka
१३ ] ---Note : द्युपप्लुता—इति प्रमाणवार्तिकपाठः ।

## भावनाबलजप्रत्यक्ष धर्मप्रत्यक्षे दृष्टान्तो भवत्येव

ननु ! एतेषां मिथ्याज्ञानत्वात् न योगिविज्ञाने दृष्टान्तत्वं युक्तम्—न—स्फुटाबभासमात्रतया दृष्टान्तत्वोपपत्तेः । न हि शब्दघटयोरपि सर्वात्मनाऽतुल्यत्वम् । तत्र कामशोकादिभावनाभ्यासभुवां प्रतिभासानां बाधकवैधुर्यादप्रामाण्यं भविष्यति, नेतरेषाम्, तदभावात् । स्फुटाभासत्वं तूभयत्रापि तुल्यम् ॥ § 2026

## पत्यक्षस्यातिशः अतीन्द्रियार्थविषयत्वरूपो युक्त एव

ननु ! अभ्यासोऽपि क्रियमाणो नात्यन्तमपूर्वमतिशयमावहति, लङ्घनाभ्यासवत् । योऽपि हि प्रतिदिनमनन्यकर्मा लङ्घनमभ्यस्यति सोऽपि कतिपयपदपरिमितमवनितलमभिलङ्घयति; न तु पर्वतमम्बुधिं वेति—उच्यते— § 2027

लङ्घनं देहधर्मत्वात् कफजाड्यादिसंभवात् ।
मा गात् प्रकर्षं, ज्ञाने तु तस्य कः प्रतिबन्धकः ॥ १३१
॥§ 2029

लङ्घनादौ तु पूर्वेद्युः प्रयत्नसमुपार्जितः ।
न देहेऽतिशयः कश्चिदन्येद्युरवतिष्ठते ॥ १३२ ॥§ 2031

तत्र केवलमभ्यासात् प्रक्षये कफमेदसोः ।
शरीरलाघवं लब्ध्वा लङ्घयन्ति यथोचितम् ॥ १३३ ॥§ 2033

एतेषां—कामशोकादिपीडितपुरुषदर्शनानाम् । ननु परस्परमत्यन्तविलक्षणयोर्यत्किञ्चित्साम्यमात्रेण यदि दृष्टान्तत्वं, तर्हि शब्दघटयोरपि यत्किञ्चिदंशे दृष्टान्तत्वप्रसङ्ग इति शङ्कामिष्टापत्त्या परिहरति—न हीति । यथा घटः अनित्यः तथा शब्दोऽप्यनित्य इति प्रतीतिस्संभवत्येवेत्यर्थः । बाधकवैधुर्यात्—बाधकप्रत्ययापहृतविषयत्वात् ॥ § 2034

तस्य—प्रकर्षस्य । ज्ञानस्य महिमा तु निरवधिरित्यर्थः ॥ § 2035

लङ्घनाभ्यासस्य दृष्टान्तत्वमेव न संभवतीत्याह—लङ्घनादाविति । अयं भावः । लङ्घनाभ्यासेन खलु शरीरे नातिरिक्तः अतिशय उत्पाद्यते । किन्तु

इह विज्ञानजन्यस्तु संस्कारो व्यवतिष्ठते ।

२ ] स्फुटाभामात्र— nyāma-wit__ka
४ ] स्फुटाभत्वं— nyāma-wit__ka
६ ] अभ्यासः— nyāma-wit__ka
७ ] यो हि— nyāma-wit__ka

क्रमोपचीयमानोऽसौ परातिशयकारणम् ॥ १३४ ॥[§ 2038]

यथाऽनुवाकग्रहणे संस्थाऽभ्यसनकल्पितः ।
स्थिरः करोति संस्कारः पाठस्मृत्यादिपाटवम् ॥ १३५ ॥[§ 2040]

यथा वा पुटपाकेन शोध्यमानं शनैश्शनैः ।
हेम निष्प्रतिकाशं तद्याति कल्याणतां पराम् ॥ १३६ ॥[§ 2042]

तथैव भावनाभ्यासात् योगिनामपि मानसम् ।
ज्ञानं सकलविज्ञेयसाक्षात्कारक्षमं भवेत् ॥ १३७ ॥[§ 2044]

अस्मदादेश्च रागादिमलावरणधूसरम् ।
मनो न लभते ज्ञानप्रकर्षपदवीं पराम् ॥ १३८ ॥[§ 2046]

प्रत्यहं भावनाभ्यासक्षपिताशेषकल्मषम् ।
योगिनां तु मनः शुद्धं कमिवार्थं न पश्यति ॥ १३९ ॥[§ 2048]

यथा च तेषां रागादिप्रहाणमवकल्पते ।
तथाऽपवर्गचिन्तायां विस्तरेणाभिधास्यते ॥ १४० ॥[§ 2050]

तदेवं क्षीणदोषाणां ध्यानावहितचेतसाम् ।
निर्मलं सर्वविषयं ज्ञानं भवति योगिनाम् ॥ १४१ ॥[§ 2052]

शरीरलाघवप्रतिबन्धककफादिपरिहारमात्रं तेन क्रियते । प्रकृते तु निदिध्यासनवशादपूर्व एव संस्कारातिशय आत्मन्युत्पद्यते । यथा वेदमधीयानो वटुः पुनःपुनरावृत्त्या स्थिरतरं संस्कारं संपादयति तथेति । विज्ञानेति । विशिष्टं ज्ञानं विज्ञानम् । यथेति । संस्था—धारणा । अनुवाकग्रहणे सति धारणाभ्यासेन स्थिरीकृत संस्कारः पाठस्मृत्यादिषु पाटवं यथा करोतीत्यर्थः । निष्प्रतिकाशं—निस्समम् । निष्प्रतीकाशमिति वक्तव्ये अपि माषं मषं कुर्यात् छन्दोभङ्गं न कारयेत् इति न्यायात्तथोक्तम् ॥ [§ 2053]
I.274/KSV

## अस्त्येवास्मदादीनामपि भविष्यद्विषयं प्रातिभं ज्ञानम्

१ ] भ्यासेन— nyāma-wit__ka
४ ] काशे— nyāma-wit__ka
६ ] ज्ञाने— nyāma-wit__kha
६ ] रे— nyāma-wit__kha
८ ] ज्ञानं— nyāma-wit__ka
९ ] प्रत्यूह— nyāma-wit__kha
११ ] मा— nyāma-wit__kha

अपि चानागतज्ञानमस्मदादेरपि क्वचित् ।
प्रमाणं प्रातिभं, श्वो मे भ्राताऽऽगन्तेति दृश्यते ॥ १४२ ॥ § 2055

नानर्थजं, न सन्दिग्धं, न बाधविधुरीकृतम् ।
न दुष्टकारणं चेति प्रमाणमिदमिष्यताम् ॥ १४३ ॥ § 2057

क्वचिद्बाधकयोगश्चेत् अस्तु तस्याप्रमाणता ।
यत्रापरेद्युरभ्येति भ्राता तत्र किमुच्यताम् ॥ १४४ ॥ § 2059

काकतालीयमिति चेत्, न प्रमाणप्रदर्शितम् ।
वस्तु तत्काकतालीयमिति शङ्कितुमर्हति ॥ १४५ ॥ § 2061

### प्रातिभं ज्ञानं प्रमाणमेव

ननु ! अनर्थजमिदं ज्ञानं, भ्रातुस्तज्जनकस्य तदानीमसत्त्वात् । स्यादेतदेवं—यदि तदाऽस्तित्वेन भ्रातरं गृह्णीयात् । किन्तु भाविनमेनं गृह्णाति । भावित्वं च तदाऽस्यास्त्येवेति कथमनर्थजं तज्ज्ञानम् ॥ § 2062

प्रशस्तपादभाष्यादिषूक्तं कालत्रयविषयकं प्रातिभं ज्ञानं प्रमाणभूतमिति, तदेतदाह—अपि चेति । तत्तु प्रस्तारेण देवर्षीणां, कदाचिदेव लौकिकानां इति भाष्यात् क्वचिदित्युक्तिः । अनर्थजं—अर्थाजन्यम् । बाधेत्यादि । बाधज्ञानापहृतविषयकमिति यावत् । एवमपि यस्मिन् शुक्तिरजतज्ञाने कारणान्तरवशात् बाध एव नोत्पन्नः तत्तौल्यं कुतो न स्यादित्यतः—न दुष्टेत्यादि । प्रातिभानुविधायिभ्रात्रागमनादिरूपं वस्तु प्रमाणप्रदर्शितमपि काकतालीयमिति शङ्कितुमपि नार्हतीत्यन्वयः । एवं सति सर्वेषामपि प्रमाणानां एवं शङ्कितुमर्हत्वात् शून्यवाद एव परिशिष्येतेत्यर्थः ॥ § 2063

तज्जनकस्य—प्रातिभज्ञानजनकस्य । तथा च भ्रान्तिरूपमेवेदं प्रातिभं ज्ञानमिति भावः । यदीत्यादि । अन्यथा भूतवस्तुविषयकानुमानमपि तदानीमनर्थजन्यमेव स्यात्, एवं शब्दोऽपीति । अतश्च प्रातिभमर्थजन्यमेवेति न दोषः ॥ § 2064

I.275/KSV

ननु ! भावितया ग्रहणमघटमानम् । भावित्वं हि नाम सावधिः प्रागभावः । अभावस्य च भावेन भ्रात्रा सह कः सम्बन्धः ? वस्त्ववस्तुनोर्विरोधात्—तदेतदसम्यक्—तद्देशसम्बन्धस्य तत्र प्रागभावः, न तु धर्मिणः । स हि

१ ] गतं— nyāma-wit_kha
८ ] यं भवि—क, यमिति भवि— nyāma-wit_kha
९ ] न्त— nyāma-wit_ka
९ ] क्ष— nyāma-wit_ka
१० ] तथै— nyāma-wit_ka

विद्यत एव प्रागवगतः । स च कुतश्चित् भोजनोत्कण्ठादेः कारणात् स्मरणपदवीमुपारूढः श्वस्तनागमनविशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति । तस्मादनर्थजत्वाभावात् प्रमाणं प्रातिभम् । प्रमाणं च सत् प्रत्यक्षमेव, न प्रमाणान्तरम्; शब्दलिङ्गसारूप्यनिमित्तानपेक्षत्वात् ॥ § 2065

## प्रातिभं प्रत्यक्षमेव

ननु ! प्रत्यक्षमपि मा भूत्, इन्द्रियानपेक्षत्वात्—मैवम्—मनस एव तत्रेन्द्रियत्वात् । पूर्वोत्पन्नचाक्षुषविज्ञानविशेषणस्य बाह्यस्य § 2066

अघटमानं भवतीति शेषः । अयं भावः—प्रागभावः खलु भविष्यतीति प्रतीतिगम्यः । एवं च भ्रातुर्भविष्यत्त्वेन ग्रहणे भ्रातृप्रागभाव एव सिध्यति । तथा च भ्राता तदानीं नास्तीत्यनर्थजत्वं सिद्धं प्रातिभस्येति । सावधिः—ज्ञातोत्तरावधिरिति यावत् । कस्सम्बन्ध इति । प्रतियोगित्वं तु नात्र वक्तुं शक्यम्, अभावग्रहणकाले प्रतियोगिनस्सत्त्वाऽसंभवेन विवक्षितार्थासिद्धेः । प्रतियोगितयाऽन्वये हि प्रत्यक्षा प्रागभावप्रतीतिः, न तु प्रातिभं तत् । विशेषणविशेष्यभावेन खल्वत्रोपस्थितिरावश्यकी । तदा चोभयोरपि सत्त्वमावश्यकम् । तच्च न घटत एव प्रतियोगितयाऽन्वये । प्राक्—पूर्वकाले । अयमर्थः—न ह्यत्र भ्राता भविष्यति इति प्रतीतिः, किन्तु आगमिष्यति इति—भ्रातुरागमनं भविष्यतीत्यर्थः । एवञ्च नायं भ्रातृप्रागभावः, किन्तु भ्रात्रागमनप्रागभावः । तथा च एतद्देशसम्बन्धप्रागभावविशिष्टस्य भ्रातुरेव ग्रहणात्, विशेषणविशेष्ययोश्च तदानीं सत्त्वान्नानर्थजं प्रातिभमिति ॥ § 2067

इन्द्रियेति । बाह्येन्द्रियेत्यर्थः । विशेषणविशेष्ययोस्सत्त्वेऽपि न हि चक्षुस्सन्निकर्षो वर्तत इत्यर्थः । ननु मनः बाह्यविषये न स्वतन्त्रम् । अन्यथा अन्धोऽपि, रूपं गृह्णीयादित्यत्राह पूर्वेति । न हि मनः अपूर्वं बाह्यं गृह्णाति,

वस्तुनो मनो ग्राहकमिति नान्धाद्यभाव इत्युक्तम् । शब्दाद्युपायान्तरविरतौ च जायमानमनवद्यं ज्ञानं मानसं प्रत्यक्षं भवति । सुरभि केतककुसुमम्, मधुरा शर्करेति ज्ञानवदित्यप्युक्तम् । अत एव नानियतनिमित्तकं ज्ञानं प्रतिभेति वक्तव्यम्; प्रत्यक्षनिमित्तत्वात् ॥

## आर्षज्ञानमन्यत्, अन्या च प्रतिभा

न चार्षं नाम ज्ञानं प्रतिभा; प्रत्यक्षातिरिक्तस्यार्षनाम्नः प्रत्ययस्याभावात् । ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् इति किन्तु पूर्वावगतिजसंस्कारसचिवं सत् वस्तूपस्थापयतीति नोक्तदोष इत्यर्थः । प्रातिभस्य प्रामाण्ये सिद्धे, इतरानन्तर्भावाच्च तस्य प्रत्यक्षत्वं स्वतस्सिद्धमेवेति । प्रत्यक्षनिमित्तत्वादिति बहुव्रीहिः ॥ § 2068

२५ ] अभावेन— nyāma-wit__ka
२६ ] प्रा— nyāma-wit__ka
१ ] भाव— nyāma-wit__kha
२२ ] नग्राहक— nyāma-wit__ka
२५--२७ ] ज्ञानं— nyāma-wit__kha

आर्षं सिद्धदर्शनं च धर्मेभ्यःक. सू. ९-२ इति भाहर्षसूत्रम् । अत्र प्रशस्तपादाचार्याः (?')आम्नायविधा तॄणामृषीणां अतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोस्संयोगात् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते । तत्तु प्रस्तारेण देवर्षीणां, कदाचिदेव लौकिकानां—यथा कन्यका ब्रवीति—श्वो मे भ्राताऽगन्तेति हृदयं मे कथयति इति, इति । अत्र सिद्धदर्शनं न ज्ञानान्तरं इत्यादिना सिद्धदर्शनं प्रत्यक्षानुमानान्यतरान्तर्भूतमेवेति वदतां प्रशस्तपादानां आर्षं अतिरिक्तं प्रमाणमिति सम्मतमिव भाति । न्यायकन्दल्यां श्रीधराचार्याश्च अत्र तत् प्रत्यक्षार्षयोरन्यतरस्मिन्नन्तर्भूतं इति वदन्त इममर्थं द्रढयन्ति । तदेतन्निराकरोति—न चेत्यादि । अयं भावः आर्षं सिद्धदर्शनं च धर्मेभ्यः इत्यत्रार्षं ज्ञानं प्रातिभमिति यदुक्तं तदिष्टमेव । परन्तु न तदतिरिक्तं प्रमाणम् । एकसूत्रनिर्दिष्टयोः चकारेण समुच्चितयोरुभयोर्मध्य एकस्यातिरिक्तत्वेऽन्यस्यानतिरिक्तत्वे च न सौत्रं विनिगमकं पश्यामः । अतस्सर्वोऽप्ययं प्रत्यक्षविशेष एवेति । ऋषीणामपीति । तथा च आर्षज्ञानस्य शब्दाद्यधीनत्वेऽपि शाब्दत्वं तु न संभवत्यवेति अन्ततः तत् मानसप्रत्यक्षरूपमेव वक्तव्यम् । अतश्च आर्षं प्रातिभं च प्रत्यक्षप्रभेद इत्यर्थः ॥
§ 2069

I.277/KSV

हि वदन्ति । आगमग्रहणं च निदर्शनार्थम् । अनुपायस्य ज्ञानस्य तेषामसत्त्वात् ॥ § 2070

## सिद्धदर्शनमपि न प्रतिभा

न च सिद्धदर्शनं प्रतिभा; अस्मदादेरपि भावात् । तस्मान्न प्रमाणान्तरं प्रातिभम्, अपि तु प्रत्यक्षमेव ॥ § 2071

## प्रत्यक्षमपि कालत्रयविषयकमस्त्येव

ननु ! प्रत्यक्षमपि नेदं भवति; तद्धि वर्तमानैकविषयम् । यथोक्तम्—श्लो. वा. १-१-४-८४ § 2072

संबद्धं वर्तमानं च गृह्यते चक्षुरादिना इति ।§ 2073

तथा—एष प्रत्यक्षधर्मश्च वर्तमानार्थतैव यत् इति च । मैवम्— अनागतग्राहिणः प्रत्यक्षस्य प्रदेशान्तरे स्वयमेवोक्तत्वात् ॥ § 2074

रजतं गृह्यमाणं हि चिरस्थायीति गृह्यतेइति च भवानेवावोचत् । तस्मात् प्रत्यक्षमनागतग्राहि श्वो मे भ्राताऽऽगन्ता इति सिद्धम् ॥ § 2075

२७ ] इति— nyāma-wit__kha

एवञ्चास्मदादीनामिवानागते भ्रातरि, योगिनां भविष्यति धर्मे प्रत्यक्षं प्रवर्त्स्यतीति । तस्मात् यत् सर्वज्ञनिषधाय कथ्यते— § 2076

यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
भवेदिदानीं लोकस्य तथा कालान्तरेऽप्यभूत् ॥§ 2079
श्लो. वा १-१-२-११३ इति—तदपास्तं भवति ॥ § 2080

## योगिनां सर्वज्ञत्वसंभवाक्षेपपरिहारौ

तत्रैतत्स्यात्—सर्वज्ञता योगिनां किमेकेन ज्ञानेन ? बहुभिर्वा ? § 2081

कथ्यत इति । रूपग्राहकजातीयैः चक्षुरादिभिः यज्जातीयस्य वस्तुन इदानीं ग्रहणं कालान्तरेऽपि तत्तथैव स्यात् । प्रमाणस्वभावः सर्वदैकरूप एव इति वार्तिकार्थः । अतश्चातीन्द्रियार्थदर्शनं योगिनामपि न स्यादिति भावः ॥ § 2082

तत्र—सर्वज्ञसिद्धौ । एतत्—आक्षेपजालम् । यद्यपीति शेषः ।

न तावदेकेन न ह्येकस्मिन् ज्ञाने परस्परविरोधिनोऽर्थाः शीतोष्णवदवभासन्ते ॥

नापि बहुभि—तानि हि क्रमेण वा भवेयुः ? युगपद्वा ? न युगपज्ज्ञानानि संभवन्ति; सूक्ष्मान्तःकरणसापेक्षत्वात् । क्रमभाविभिस्तु ज्ञानैरशेषत्रिभुवनकुहरनिहितनिखिलपदार्थसार्थसाक्षात्करणमेषां मन्वन्तरकोटिभिरपि दुर्घटमिति कथं सर्वज्ञा योगिनः ?

उच्यते—युगपदेकयैव बुद्ध्या सर्वत्र सर्वानर्थान् द्रक्ष्यन्ति योगिनः । यत्तु विरुद्धत्वादिति, तदप्रयोजकम्—विरुद्धानामपि नीलपीतादीनामेकत्र चित्रप्रत्ययेऽवभासनात् । एकत्र च मेचकप्रत्यये सन्निहितपदार्थव्यतिरिक्तसकलवस्त्वभावग्रहणस्य पूर्वं पु. १४३ दर्शितत्वात् । शीतोष्णयोरपि क्वचिदवसरे भवति युगपदुपलंभः—तद्यथा— प्रतपति हुतवहविस्फुलिङ्गनिकरानुकारिकिरणे तरुणोष्मणि ग्रीष्मे हिमशकलशिशिरपयसि सरसि निमग्न(?)भिदघ्नदेहस्य पुंसः युगपदेव सरस्सलिलसूर्यातपवर्तिनो शीतोष्णस्पर्शावनुभवपथमवतरतः ॥ न हीति । न हि नीलो घटः, पीतः पट इतिवत् नीलपीतो घट इति प्रतीतिः संभवतीत्यर्थः ॥ § 2083

सूक्ष्मेति । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इति हि वक्ष्यत इत्यर्थः । क्रमेत्यादि । इदमुपलक्षणम्—अभ्युपगमे वा एतादृशं सर्वज्ञत्वं सर्वेषामपि संभवेदेव ॥ § 2084

विरुद्धानामिति । वस्तुनोर्हि नीलपीतयोर्विरोधः, न तु ज्ञानेन साकं तयोः । समूहालम्बने अत्यन्तविरुद्धानामपि भानात् । अन्यथा नील-

२०--२१ ] प्रत्यये—
nyāma-wit__kha

२२ ] ग्रहणपूर्वस्य—
nyāma-wit__kha

पीत इति वक्तुमप्यसंभवात् । अतः ज्ञाने न कस्यापि विषयस्य विरोध इत्यप्यूह्यम् । युगपदिति । यद्यपि युगपत् ज्ञानद्वयं नाङ्गीक्रियत एव, अथापि अत्यन्तविरुद्धत्वेन ज्ञायमानयोः शीतोष्णयोरुभयोरपि एकज्ञानविषयत्वं न केवलं शाब्दादिधीमादायैवोपपादनीयं, ऐन्द्रियिकानुभवमादायापीति प्रतिपादनार्थमिदम् । शीतोष्णयोरुभयोरपि त्वगिन्द्रियग्राह्यत्वात् युगपदुभयविषयानुभवः संभवत्येव ॥ § 2085
I.279/KSV

## योगिनां सर्वज्ञत्वेऽपीश्वराद्विशेषः

ननु ! एकेन ज्ञानेन सर्वानर्थान् भूतभाविनः परोक्षानपि पश्यन्तो योगिनः कथमखिलत्रैलोक्यवृत्तान्तदर्शिनः सकलजगद्गुरोरीश्वराद्विशिष्येरन् । अस्ति विशेषः—ईश्वरस्य तथाविधं नित्यमेव ज्ञानं, योगिनां तु योगभावनाभ्यासप्रभवमिति ॥ § 2086

## अपूर्वमपि वस्तु भावनावशात् योगिप्रत्यक्षविषयः

ननु ! नादृष्टपूर्वेऽर्थे क्वचिद्भवति भावना ।
आगमात्तु परिच्छिन्ने धर्मे भावनयाऽपि किम् ? ॥ १४६
॥§ 2088

चोदनैव धर्मे प्रमाणमिति सावधारणप्रतिज्ञार्थः, प्रथममागमादवगतधर्मस्वरूपेषु सत्स्वपि योगिषु न विप्लवत एवेति—उच्यते— योगिष्वस्त्येवायं प्रकारः । पश्चादपि प्रवर्तमाने धर्मग्राहिणि प्रत्यक्षे चोदनैवेत्यवधारणं शिथिलीभवत्येव । अपि चेश्वरज्ञानं सांसिद्धिकमेव § 2089

विशिष्येरन्—भिद्येरन्, विलक्षणा भवेयुः । अस्तीति । एवञ्च ईश्वरज्ञानं नित्यं, स्वाभाविकं च; योगिज्ञानं तु अनित्यं, नैमित्तिकं चेति विशेष इति भावः ॥ § 2090

नन्वित्यादि । भावना नाम अनुभवजन्या स्मृतिहेतुश्च । एवञ्चातीन्द्रियवस्तुविषयकानुभवस्य पूर्वमसंभवेन कथं तद्भावना ? कथं वा ततो योगिनामपूर्ववस्तुप्रत्यक्षम् ? यदि च वेदादतीन्द्रियार्थज्ञानाधीना भावनेत्युच्यते, तर्हि धर्मादिः वेदादेव निर्णीतस्वरूप इति ततो भावनया किं प्रयोजनम् ? इत्यर्थः । न विप्लवत एवेति । एतादृशयोगिष्वङ्गीकृतेष्वपि चोदनैव धर्मे प्रमाणमिति प्रतिज्ञाया नोपरोधः । योगिभिर्हि प्रथमावगतये वेद एव शरणीकरणीयः संपन्न इत्यर्थः । शिथिलीभवत्येवेति । गृहीतग्राहित्वं न प्रामाण्यं व्याहन्तीत्युक्तं पूर्वमेव । एवञ्च वेदाधीनत्वेऽपि योगिप्रत्यक्षस्य धर्मे प्रामाण्यं वर्तत एवेति चोदनैव प्रमाणमिति भवदवधारणं व्याहतमेवेति । ननु प्रामाण्यमत्र

स्वातन्त्र्येण विवक्षितम् । योगिनां धर्मप्रत्यक्षप्रामाण्यं तु वेदाधीनमेवेति न दोष इति शङ्कायामाह—अपि चेति । सांसिद्धिकमिति । तस्य नित्यसर्वज्ञत्वमन्यथा

धर्मविषयं वेदस्य कारणभूतं वक्ष्यामः । तस्मिन्नपि सति न चोदनैवेत्यवधारणार्थसिद्धिः ॥

### जैमिनिसूत्रनिराकरणोपसंहारः

तस्मात् न धर्मग्राहकं योगिप्रत्यक्षं विद्यमानोपलम्भनत्वात्, सत्संप्रयोगजत्वात् इत्यादिसाधनमप्रयोजकम् ॥

प्रमाणान्तरविज्ञातप्रमेयप्रतिपादकः ।
धर्मोपदेशकः शब्दः शब्दत्वात् घटशब्दवत् ॥ १४७ ॥§ 2093

प्रत्यक्षः कस्यचिद्धर्मः प्रमेयत्वात् घटादिवत् ।
इत्यादयश्च सुलभाः सन्त्येव प्रतिहेतवः ॥ १४८ ॥§ 2095

तेन निष्प्रतिघयुक्तिसाधितां योगबुद्धिमखिलार्थदर्शिनीम् ।
किं विडम्बयितुमुच्यते मुधा दुष्टहेतुनिकुरुम्बशम्बरम् ॥§ 2097

तदित्थमपि जैमिनीयं सूत्रमसङ्गतार्थम् । लक्षणपरत्वं त्वस्य निरस्तमेव ॥

### वैशेषिकसम्मतप्रत्यक्षलक्षणनिरासः

यदपि कैश्चित् प्रत्यक्षलक्षणमुक्तं—आत्मेन्द्रियमनोऽर्थसन्निकर्षाद्यदुत्पद्यते ज्ञानं तदन्यदनुमानादिभ्यः प्रत्यक्षम् इति—तदपि त्रयद्वयसन्निकर्षजन्मनां सुखात्मादिज्ञानानां अव्यापकं, अतिव्यापकं च व्यभिचार्यादिबोधानामित्युपेक्षणीयम् ॥ न स्यादित्यर्थः । ननु ईश्वरो नास्माभिरङ्गीक्रियत इति अनभ्युपगतदूषणमित्यत्राह—वक्ष्याम इति ॥ § 2098

प्रमाणान्तरेत्यादि । अर्थं बुद्ध्वा शब्दरचना इति खलु न्याय इति भावः । ननु तर्हि यदि शब्दः प्रमाणान्तरावगतमेवार्थं बोधयेत् तर्हि तस्य स्मृतितौल्यमेवेति कथं तस्यातिरिक्तप्रमाणत्वमिति चेत्—तदेतत् शब्दपरीक्षायां व्यक्तीभविष्यति ॥ § 2099

सूत्रमपि इत्यन्वयः । नास्य लक्षणपरत्वासंभवमात्रं, असंगतार्थकत्वमपीत्यर्थः ॥ § 2100

आत्मेत्यादि । आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, ततः प्रत्यक्षम्—इति क्रमादित्याशयः । त्रयद्वयेति । अर्थसन्निकर्षं वर्जयित्वा त्रयं सुखप्रत्यक्षे, अर्थेन्द्रियद्वयं वर्जयित्वा द्वयं आत्मप्रत्यक्षे कारणम् । व्यभिचार्यादीत्यादिना संशयपरिग्रहः । तेषामपीन्द्रियजन्यत्वमुक्तमेव ॥ § 2101

I.281/KSV

## साङ्ख्याभिमतप्रत्यक्षलक्षणदूषणम्

ईश्वरकृष्णस्तु प्रतिविषयाध्यवसायो दृष्टम् इति प्रत्यक्षलक्षणमवोचत् । तदपि न मनोज्ञम्—अनुमानादिज्ञानानामपि विषयाध्यवसायस्वभावत्वेनातिव्याप्तेः ॥ § 2102

## युक्तिदीपिकाकारप्रदर्शितव्याख्यानासामञ्जस्यम्

यत्तु राजा व्याख्यातवान्—प्रतिराभिमुख्ये वर्तते, तेनाभिमुख्येन विषयाध्यवसायः प्रत्यक्षम् इति—तदप्यनुमानादावस्त्येव । घटोऽयमितिवत् अग्निमान् पर्वत इत्याभिमुख्येनैव प्रतीतेः । स्पष्टता तु सर्वसंविदां स्वविषये विद्यत एवं ॥ § 2103

## इन्द्रियसन्निकर्षजन्यत्वमन्तरा नान्यत् प्रत्यक्षलक्षणम्

अथ मन्यसे ! सामान्यविहितस्य विशेषेण बाधात् अनुमानादिव्यावृत्तिः सेत्स्यति । सामान्येनाध्यवसाय उत्सृष्टः, स लिङ्गशब्दाभ्यां विशेषितः इति तदितरोऽध्यवसायः प्रत्यक्षमिति स्थास्यति । यद्येवं प्रत्यक्षलक्षणमिदानीमव्याकरणीयमेव । शब्दलिङ्गग्रहणे वर्णिते सति तद्वैलक्षण्यादेव प्रत्यक्षं ज्ञास्यत इति । तस्मादिन्द्रियार्थसन्निकर्षपदोपादानमन्तरेण नानुमानादिव्यवच्छेद उपपद्यत इति इदमपि न प्रत्यक्षलक्षणमनवद्यम् ॥ § 2104

विषयेति । अध्यवसायो हि निर्णयः । तद्रूपत्वं चानुमानादेरप्यस्तीत्यर्थः ॥ § 2105

प्रतिरिति । न ह्यनुमानादिकं विषयमभिमुखीकृत्य प्रवर्तते, किन्तु परोक्षं विषयमधिकृत्येति भावः । आभिमुख्येनैवेति । ज्ञानस्याभिमुख्यं नाम—विषयीकरणमेव । तच्च सर्वत्र वर्तत एवेति भावः ॥ § 2106

उत्सृष्टः—उत्सर्गप्राप्तः । तथा च—प्रत्यक्षलक्षणे दृष्टं इति, अनुमानलक्षणे लिङ्गं इति, शब्दलक्षणं शब्दः इति च विशेष्यवाचकं पदम् । लिङ्गशब्दाभ्यां अनुमानशब्दयोः निर्देशात् दृष्टस्य प्रत्यक्षस्य वैलक्षण्यं सिद्धमेवेत्यर्थः । यदीत्यादि । दृष्टादिपदैरेव तद्व्यावृत्तिवर्णने तावदेव लक्षणमलं, प्रतिविषयेत्यादिविवरणमनपेक्षितमेव । यदि तेषां पदानां लक्ष्यमात्रपरत्वात्

अलमतिविस्तरेण परदर्शनगीतमतः
विगतकलङ्कमस्ति न हि लक्षणमक्षधियः ।
तदलमक्षपादमुनिनैव निबद्धमिदं
हरति मनांसि लक्षणमुदारधियाम् ॥ १५० ॥§ 2111

इति प्रत्यक्षम्

---

१२ ] अनु— nyāma-wit__ka

## अथानुमानम्

* * *

तत्पूर्वकं च त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं च ॥ ५ ॥

* * *

एवं प्रमाणज्येष्ठेऽस्मिन् प्रत्यक्षे लक्षिते सति ।
कथ्यतेऽवसरप्राप्तमनुमानस्य लक्षणम् ॥ १५१ ॥§ 2113

तत्रानुमानस्वरूपं ब्रूमहे । ततस्तत्र सूत्रं योजयिष्यामः ॥

पञ्चलक्षणकाल्लिङ्गात् गृहीतान्नियमस्मृतेः ।
परोक्षे लिङ्गिनि ज्ञानं अनुमानं प्रचक्षते ॥ १५२ ॥§ 2115

अत्रापि लिङ्गविषयं ज्ञानं, ज्ञानविषयीकृतं वा लिङ्गं प्रतिबन्धस्मरणसहितं प्रमाणम्; लिङ्गिज्ञानं फलम्, लिङ्गिज्ञानस्य वा प्रमाणतायां पूर्ववदुपादानादिज्ञानं फलमुपवर्णनीयम्; करणस्य हि प्रमाणत्वमिति स्थितमेवैतत् ॥ इतरत् लक्षणप्रतिपादकं आवश्यकमेवेत्युच्यते, तर्हि लक्षणमतिव्याप्तमेव । अतः इन्द्रियजन्यत्वादिकं निवेशनीयमेव ॥ § 2116

विषयशुद्धिमन्तरा पठ्यमानं वाक्यं विपरीतमप्यर्थं बोधयेदिति मत्वाऽऽह— तत्रेति । पञ्चेति । पक्षसत्त्वादीनि पञ्चलिङ्गान्यनुपदमेव वक्ष्यन्ते । गृहीतादिति लिङ्गविशेषणम् । लिङ्गात्—लिङ्गज्ञाप्यायाः नियमस्मृतेरित्यर्थः । नियमस्मृतिसहकृतात् लिङ्गादिति वा । लिङ्गी—अविनाभावव्याप्त्याख्यसम्बन्धेन लिङ्गविशिष्टः—साध्य इत्यर्थः ॥ § 2117

अत्रापीति । प्रत्यक्षलक्षणे यथा, तथाऽत्रापि प्रमाणफले ज्ञेये ॥ § 2118
I.283/KSV

### लिङ्गशब्दनिर्वचनं, तस्य पञ्चलक्षणत्वं च

तत्र परोक्षोऽर्थो लिङ्ग्यते—गम्यतेऽनेनेति लिङ्गम् । तच्च पञ्चलक्षणम् । कानि पुनः पञ्चलक्षणानि ? पक्षधर्मत्वम्, सपक्षधर्मत्वम्, विपक्षाद्व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वं चेति ॥ § 2119

सिषाधयिषितधर्मविशिष्टो धर्मी पक्षः, तद्धर्मत्वं—तदाश्रितत्वमित्यर्थः ॥ § 2120

साध्यधर्मयोगेन निर्ज्ञातं धर्म्यन्तरं सपक्षः, तत्रास्तित्वम् ॥ § 2121

साध्यसंस्पर्शशून्यो धर्मी विपक्षः, ततो व्यावृत्तिः ॥ § 2122

३ ] ने— nyāma-wit_kha
६ ] लिङ्ग— nyāma-wit_kha
१७ ] क्षे स— nyāma-wit_ka

अनुमेयस्यार्थस्य प्रत्यक्षेणाऽऽगमेन वाऽनपहरणं अवाधितविषयत्वम् ॥ § 2123

संशयबीजभूतेनार्थेन प्रत्यनुमानतया प्रयुज्यमानेनानुपहतत्वमसत्प्रतिपक्षत्वम् ॥ § 2124

एतैः पञ्चभिर्लक्षणैरुपपन्नं लिङ्गं अनुमापकं भवति ॥ § 2125

## हेतुदोषाः

एतेषामेव लक्षणानां एकैकापायात् पञ्च हेत्वाभासा वक्ष्यन्ते ॥ § 2126

पूर्ववदिति—प्रमाणतायां सामग्र्याः इत्यादिना पूर्वं पु. १७४ उपपादितदिशेत्यर्थः ॥ § 2127

लिगि-गताविति धातुः । गत्यर्थाश्च ज्ञानार्थकाः ॥ § 2128

सिषाधयिषितो यो धर्मः—वह्न्यादिः, तद्विशिष्ट इत्यर्थः ॥ § 2129

साध्यरूपधर्मवत्त्वेन निर्णीतमित्यर्थः ॥ § 2130

अनपहरणमिति । विषयापहारो हि बाधः ॥ § 2131

प्रत्यनुमानतया प्रयुज्यमानेन संशयबीजभूतेनार्थेन—साध्यतदभावसाधारणत्वात् अनुपहतत्वमित्यर्थः । तुल्यबलप्रत्यनुमानाभावः । अत्र संशयपदप्रयोगेन अबाधितत्ववैलक्षण्यम् ॥ § 2132

I.284/KSV

यस्य पक्षधर्मता नास्ति—असावसिद्धो हेत्वाभासः । यथा— नित्यः शब्दः, चाक्षुषत्वात् ॥ § 2133

साध्यविपर्ययव्याप्तस्तु विरुद्धः । स यथा—नित्यः शब्दः, कृतकत्वात्, आकाशवत् ॥ § 2134

विपक्षेऽसत्त्वं यस्य नास्ति सोऽनैकान्तिकः । यथा—नित्यः शब्दः, प्रमेयत्वादिति ॥ § 2135

यस्याबाधितविषयत्वं नास्ति स कालात्ययापदिष्टः । यथा— अनुष्णः, तेजोऽवयवी, कृतकत्वात्, घटवदिति ॥ § 2136

यस्य निष्प्रतिपक्षता नास्ति स प्रकरणसमः । यथा— अनित्यः, शब्दः, नित्यधर्मानुपलब्धेः, घटवत्; नित्यः, शब्दः, अनित्यधर्मानुपलब्धेः, आकाशवदिति । सोऽयं एतेषु पञ्चसु लक्षणेष्वविनाभावो लिङ्गस्य परिसमाप्यते ॥ § 2137

## अबाधितत्वस्य पृथक् हेतुलक्षणताऽऽक्षेपः

६ ] वं— nyāma-wit_ka    nyāma-wit_kha
२० ] स— nyāma-wit_ka;

ननु ! त्रिलक्षणके हेतावविनाभावः परिसमाप्यते । न च तथाविधे बाधा संभवति; बाधाविनाभावयोर्विरोधात् ॥ § 2138

साध्यविपर्यय इति । सपक्षः साध्यवान्—तत्र सत्त्वस्य विरुद्धं—साध्याभाववत्येव सत्त्वमित्यर्थः । नैयत्यविवक्षणादनैकान्तव्यावृत्तिः । अनेन हेतोः नियमेन साध्याभावव्याप्तेरेव सत्त्वेन सपक्षसत्त्वं नास्तीत्युक्तम् । अविनाभावः-व्याप्तिः । परिसमाप्यते—निर्णीयत इति यावत् । प्रकरण-समप्रभृतिशब्दान् तदवसरे निर्वक्ष्यामः ॥ § 2139

त्रिरूपाल्लिङ्गात् यदनुमेये ज्ञानं तदनुमानं३-३, त्रैरूप्यं पुनर्लिङ्गस्यानुमेये सत्त्वमेव, सपक्ष एव सत्त्वं, असपक्षे चासत्त्वमेव निश्चितम्३-५ इत्यादिना न्यायबिन्दौ धर्मकीर्त्युक्तं उपक्षिपति—नन्विति । विरोधादिति । बाधायां सत्यां त्रिलक्षणकत्वस्यैवासंभवादित्यर्थः ॥ § 2140

I.285/KSV

## बाधितत्वं पक्षस्यैव, न हेतोः

यच्चेदमग्न्यनुष्णत्वसाधने कृतकत्वं त्रिलक्षणमपि बाधकविधुरितविषय-मित्युदाहृतम्—तत् असमीक्षिताभिधानम्; अत्र त्रैलक्षण्यानुपपत्तेः । प-क्षधर्म एव तावदयं न भवति । प्रत्यक्षाद्यनिराकृतो हि पक्ष उच्यते । न चायमीदृश इत्यपक्ष एव । तद्धर्मो हेतुः कथं पक्षधर्मः स्यात् ॥ § 2141

नाप्ययमन्वयी हेतुः; अन्वयग्रहणसमय एव तद्विप्लवावधारणात् । अन्व-यो हि गृह्यमाणः सर्वाक्षेपेण—यद्यत् कृतकं, तत्तदनुष्णम्—इत्येवं गृह्यते । ततश्च तद्ग्रहणसमय एव—अयमुष्णोऽपि कृतक इति हृदयपथमवतरति तनूनपात्—इति कथमन्वयग्रहणम् ? § 2142

ननु कृतकत्वस्य वह्नौ सत्त्वात् कथमत्र पक्षधर्मताविरहः ? इत्याशंक्य वह्नेः पक्षत्वमेव न संभवतीति हेतोः पक्षवृत्तित्वं नास्त्येवेत्युपपादयति— य-च्चेदमित्यादि । पक्षधर्मः—पक्षवृत्तिरिति यावत् । प्रत्यक्षादीति । तथोक्तं न्याय-बिन्दौ—स्वरूपेणैव स्वयमिष्टोऽनिराकृतः पक्षः ३-३८ इति । व्याख्यातं च ग्र-न्थकारेणैव—यः साधयितुमिष्टोऽप्यर्थः प्रत्यक्षानुमानप्रतीतिस्ववचनैर्निराक्रिय-ते, न स पक्षः ४८ इति । धर्मोत्तराचार्योऽप्याह—प्रत्यक्षादिभिरनिराकृतः इति । अपक्ष इति । साध्यवत्तया गृहीते पक्षे सत्त्वं हि लक्षणम् । प्रकृते च वह्नौ अनुष्णत्वं प्रत्यक्षबाधितमेवेति कथं तस्य पक्षत्वमित्यर्थः । तथा च अयं बाधः पक्षदोष एव, न तु हेतुदोषः, हेतोस्तु पक्षधर्मत्वाभाव एव दोषः, न बाध इति ॥ § 2143

ननु पक्षे साध्यस्यासिद्ध्या नैवं दूषयितुं शक्यमिति शङ्कायाम्—तर्ह्यत्र बाधाभावेऽस्य प्रसज्यमानं हेतुत्वं किमन्वयरूपम् ? उत व्यतिरेकरूपम् ? इति विकल्प्य दूषयति—नापीत्यादिना । सर्वाक्षेपेण—उत्सर्गतः—सर्वं क्रोडीकृत्येति यावत् । अयं तनूनपात् इत्यन्वयः । अयं भावः—यद्यत् कृतकं

तत्तदनुष्णं यथा घटादि—इति खलु व्याप्तिर्ग्राह्या । तत्र कृतकसामान्यस्यैव व्याप्तौ भानमनुभवसिद्धम् । कृतकसामान्यान्तर्गते च वह्नावनुष्णत्वं प्रत्यक्षबाधितमेवेति यद्यत् कृतकं तत्तदनुष्णमिति व्याप्तेरुन्मेष एव नास्ति ।

यदि त्वनलमुत्सृज्य घटादावन्वयग्रहः ।
नान्तर्व्याप्तिर्गृहीता स्यात् साध्यसाधनधर्मयोः ॥ १५३ ॥§ 2146

ततश्चैवंविधाद्धेतोः स्वसाध्यनियमोज्झितात् ।
साध्याभिलाष इत्येवं षण्डानुनयदोहदः ॥ १५४ ॥§ 2148

अन्वयपूर्वकत्वाच्च व्यतिरेकग्रहणस्य तन्निराकरणे तदपाकरणमवगन्तव्यम् ॥

अपि च सिषाधयितधर्मवैपरीत्येन वह्नेः प्रत्यक्षतो निश्चयात् वस्तुवृत्तन स एव विपक्ष इति न ततो व्यतिरेकः कृतकत्वस्येति । तस्मात् त्रैलक्षण्यापायादेव हेत्वाभासोऽयमिति न रूपान्तरमबाधितविषयत्वमपेक्षते ॥

## हेतोरबाधितत्वमपि दुरधिगमम्

कथं चेदमबाधितत्वं निश्चीयते ?
न ह्यदर्शनमात्रेण बाधाविरहनिश्चयः ।
सर्वात्मना हि नास्तित्वं विद्युः कथमयोगिनः ॥ १५५ ॥§ 2151

अनिश्चिते तदङ्गे च न हेतोर्हेतुता भवेत् ।
यथैव पक्षधर्मादिरूपाणामनुपग्रहे ॥ १५६ ॥§ 2153

तस्मादबाधितत्वं रूपान्तरमवचनीयमिति ॥ अनुमितेस्तु न तसम् । एवं स्थिते कस्याहेतोर्हेतुत्ववारणायाबाधितत्वं पृथक् संपादनीयमिति ॥ § 2154

ननु पक्षान्तर्भावेण कथं व्यभिचारापादनम् ? इति शङ्कायामाह— यदीति । अन्तर्व्याप्तिरिति । पक्षे साध्यसिध्यनुकूला व्याप्तिः इत्यर्थः । यो हेतुमान् स साध्यवान् इति व्याप्तौ यदि पक्षः सामान्यतो वा कदाचिदपि धर्मितया न भासेत, तर्हि प्रकृतसाध्यनिरूपितव्याप्त्यभावेन पक्षे साध्यसाधनासमर्थाद्धेतोः साध्यसाधनप्रयासः पुत्रावाप्तये षण्डानुनयप्रायासायेतेति । अन्वयेति । व्यतिरेकव्याप्तिरपि अन्वयव्याप्तिपोषणायैव ॥ § 2155

वस्तुनः वृत्ते—शीलं स्वभाव इति यावत् ॥ § 2156

नास्तित्वं—बाधाभावः । अयोगिनः—असर्वज्ञाः । तदङ्गं—हेतोरङ्गभूतेऽबाधितत्वे । यथा हेतोः पक्षवृत्तित्वादिज्ञानविरहे स हेतुरसाधकः, एवं सर्वोऽपि हेतुः अबाधितत्वस्य ग्रहीतुमशक्यतया असाधक एव स्यादिति ॥ § 2157

I.287/KSV

## अबाधितत्वं हेत्वङ्गमेव

अत्राभिधीयते—यदुक्तं—अन्वयग्रहणं सर्वाक्षेपेणेति तद्ग्रहणवेलायामेव सिषाधयिषितधर्मविपर्ययाध्यासितहुतवहस्वरूपपरिस्फुरणादन्वयशून्योऽयं हेतुरिति—तदहृदयङ्गमम् । अन्वयः सत्यं सर्वाक्षेपेण गृह्यते, न पुनः एकैकधर्मिसमुल्लेखेन । एवं हि तदानन्त्यात् अन्वयो गृहीतुमेव न शक्येत । अनुमानस्य च वैफल्यमित्थं भवेत्, अग्निमतां धूमवतां सर्वधर्माणां अन्वयावगमकाल एव गृहीतत्वात् ॥ § 2158

धूमो हि यत्र यत्रेति सामान्येनैव गृह्यते ।
न पुनः पर्वतेऽरण्ये गृहे वेत्येवमिष्यते ॥ १५७ ॥§ 2160

एवञ्च सत्याक्षेपवाचोयुक्तिरुपपन्ना भविष्यति ।
न चैवं सति वक्तव्यं षण्डानुनयमार्गणम् ।
न हि तद्वर्जमित्येवं व्याप्तिग्रहणमिष्यते ॥ १५८ ॥§ 2163

तद्ग्रहणं—अन्वयग्रहणम् । तदानन्त्यात्—धर्मिणामानन्त्यात् । न शक्येतेति । वह्निधूमयोर्व्याप्तिर्हि—यो धूमवान् स वह्निमान् इति सामान्यत एव गृह्यते, न तु धूमवत् महानसं वह्निमत्, धूमवान् पर्वतो वह्निमान् इति प्रत्येकं धर्मिव्यक्तीनां भानपूर्वकम्, व्यक्तीनामानन्त्येन व्याप्तिग्रहणस्य दुर्लभत्वापत्तेः । एवं पर्वतादेः प्रातिस्विकत्वेन ग्रहणे तत्र वह्निमत्तायाः तदैव सिद्ध्याऽनुमानवैयर्थ्यं च । किन्तु पर्वतादिकं व्याप्तौ सामान्यतः धूमवत्त्वेन वह्निमत्त्वेनैव च क्रोडीक्रियते । व्याप्तिर्हि साध्यसाधनयोरेव, न तत्राधिकरणव्यक्तिविशेषभाननिर्बन्धः । एवञ्च प्रकृतेऽपि यद्यत् कृतकं तत्सर्वमनुष्णं दृष्टमिति व्याप्तौ न किञ्चिदपि बाधकमिति । इत्थं—भवदुक्तावेवानुमानवैयर्थ्यं, नास्मदुक्तरीतावित्यर्थः ॥ § 2164

एवञ्चेत्यादि । एवं सति चेत्यन्वयः । पक्षादीनां सामान्याकारेण व्याप्तौ भानेनैव सर्वाक्षेपेण व्याप्तिर्गृह्यत इत्युक्तिर्निरूढेवेति को दोषः इत्यर्थः । तद्वर्जं—पक्षवर्जम् ॥ § 2165

ननु यद्यपि व्याप्तिः ग्रहणकाले पर्वतादिपक्षवर्जं न गृह्यते । अथापि यो धूमवान् स वह्निमान् इति सामान्यतो व्याप्तिग्रहणे कथं पर्वताद्यधिकरणविशेषे वह्निविशेषस्य सिद्धिस्तया व्याप्त्या वक्तुं शक्येत, तथाऽग्रहणादिति

सामान्येन च व्याप्तिर्गृहीता सती सिषाधयिषितधर्म्यपेक्षया सैवान्तर्व्याप्तिरुच्यते—यैव च नगलग्नाग्न्यनुमानसमये तद्व्यतिरिक्तकान्तारादिप्रदेशवर्तिनी बहिर्व्याप्तिरभूत् सैव कालान्तरे कान्तारवर्तिनि वह्नावनुमीयमानेऽन्त-

व्याप्तिरवतिष्ठते । तदिहापि यत् कृतकं तदनुष्णमिति सामान्यतः परिच्छेदात् न तदानीमनलोन्मेष इति सिद्धोऽन्वयः ॥

व्यतिरेकोऽपि कार्ये तेजोऽवयविनि पक्षीकृते कृतकत्वस्य तेजःपरमाणुभ्यः ॥ शङ्कायामाह—सामान्येनेति । अयं भावः—यद्यपि व्याप्तिस्सामान्यत एव गृह्यते, अथापि पर्वतो धूमवान् इति पक्षधर्मताज्ञानानन्तरं खलु एकसम्बन्धिज्ञानविधया व्याप्तिस्मरणं जायते । तथा च स्मरणकाले सामान्यतः स्मृताऽपि व्याप्तिः पक्षधर्मताज्ञानबलात् प्रकृतपक्षादिविषयिणी विश्राम्यतीति सैव विशेषव्याप्तिरूपाऽपि पर्यवस्यतीति अधिकरणविशेषे साध्यविशेषनिर्णयो भवत्येवेति । अन्तर्व्याप्तिः—अन्तरङ्गभूता व्याप्तिः—विशेषव्याप्तिरिति यावत् । बहिर्व्याप्तिः—बहिरङ्गभूता व्याप्तिः—सामान्ययाप्तिरिति यावत् । तदानीं—सामान्यतो व्याप्तिग्रहकाले । अनलोन्मेषः—वह्नेः प्रातिस्विकतयोपस्थितिः । तथा च व्याप्तिग्रहणकाल एव वह्निविशेषाभानात् प्रत्यक्षबाधः पूर्वोक्तरीत्या न वक्तुं शक्य इत्यर्थः ॥ § 2166

अन्वयपूर्वकत्वाच्च व्यतिरेकग्रहणस्य इत्याद्यपाकरोति—व्यतिरेकोऽपीति । कृतकत्वस्य व्यतिरेकोऽपि सिद्धः इत्यन्वयः ॥ § 2167

ननु नित्यस्य तेजःपरमाणोरुभयवादिसंप्रतिपन्नत्वे तत्र कृतकत्वस्य व्यतिरेकः सिद्ध्येत्, ये तु नित्यं परमाणुं नाभ्युपगच्छन्ति वेदान्तिप्रभृतयः तैस्सह विवादे कः प्रतीकार इति चेत्, तर्हि चन्द्रे, तारकासु वा ज्योति(?) व्यतिरेको ग्रहीष्यते, शास्त्रतः तेषां तेजोद्रव्यत्वस्य निर्णीतत्वात् । अथ यदि विधुतारकादयो न तेजांसि, अपि तु सहस्रकिरणमरीचिप्रतिफलनवशादालोकभानमात्रमित्युच्येत, तर्हि मा भवन्तु तानि तेजांसि । अथापि न नो हानिः । तदा हि विपक्ष इति कश्चिदेव नास्तीत्युक्तं भवति । तथा च विपक्षावृत्तित्वं हेतोस्सिद्धमेवेत्याह—

विधुतारकपरमाण्वनभ्युपगमे तु विपक्ष एव नास्तीति तदभावात् सुतरां तत्रावृत्तिर्भवतीति । न हि सपक्ष इव विपक्षे वृत्तिरिष्यते, येन यत्नतः तत्सिद्धये यतेत । अग्निरेव विपक्ष इति चेत्—मैवम्— न हि पक्ष एव विपक्षो भवितुमर्हति ॥

## पक्ष इति कश्चन नास्त्येवेत्याक्षेपः

ननु ! वस्तूनामद्विरूपत्वात् पक्षो नाम परमार्थतो नास्त्येव । साध्यधर्माधिकरणभूतश्चेत् सोऽर्थः, तत्सपक्ष एव; विपर्यये तु न विपक्षतामतिवर्तते । न च क्रमद्वययोगित्वं रूपद्वयरहितत्वं वा वस्तुनः समस्तीति ॥ विध्वित्यादि । अत्रेदमवधेयम्—यादृशपुरुषविशेषेणैतावता उष्णस्पर्श एव नानुभूतः तादृशेन पुरोवर्तिवह्निमधिकृत्यैवं प्रयोगे विपक्ष एव अप्रसिद्धः । परन्त्वस्मिन् प्रयोगे अनुष्णत्वं—स्पर्शगतजातिविशेष एव, न तूष्णत्वाभावरूपम्, उष्णस्पर्शस्यैव तेनाननुभूतत्वात् । यस्तु चन्द्रतारकादिषु परमाणौ वा शास्त्राच्चोष्णस्पर्शं निश्चिन्वन्नेव पुरोवर्तिभौमवह्निमधिकृत्य तथा प्रयुङ्क्ते, तदा परमाण्वादिकमेव

२८ ] पेक्षायां— nyāma-wit_kha

विपक्ष इति । ननु यदि विपक्ष एव नास्ति तर्हि विपक्षावृत्तित्वं वा कथं प्रसिद्ध्येत् ? इत्यत्राह—न हीति । दुष्टहेतुषु यत् प्रसिद्धं विपक्षवृत्तित्वं तदभावः प्रसिद्ध्येदेवेति भावः । ननु अनुष्णत्वसाधने तदभाववानग्निरेव विपक्ष इति, तस्मात् व्यावृत्तिः हेतोः कृतकत्वस्य नास्तीति कथं व्यतिरेकः ? इत्यत्राह—अग्निरेवेति । व्याप्तिज्ञानकाले न तत्र तदभावनिर्णयसंभव इत्यनुपदमेवोक्तम् ॥ § 2168

ननु लोके हि वस्तु कोटिद्वयान्तर्गतं, घटः—तद्भिन्नश्चेत्येवंरीत्या । तथा च प्रकृते वस्तुसामान्यं साध्यवद्वा भवेत्, साध्याभाववद्वा । एतदन्यतरकोटावेव सर्वमपि वस्त्वन्तर्भूतम् । तत्र साध्यवांश्चेत् सः सपक्ष एव, साध्याभाववांश्चेत् स विपक्ष एव । को हि नामेदानीं पक्षः तृतीयः परिशिष्यत इति शङ्कते—नन्विति । ननु कश्चन साध्यवानेव, अन्यश्च साध्याभाववानेव, एभ्यस्तृतीय उभयवान् कश्चन कुतो न स्यादित्यत्रोक्तं—वस्तूनामद्विरूपत्वादिति । तत्—तस्मात् । तथा चोभयात्मकमेकं न स्यादिति तृतीयो राशिर्नास्त्येव । ननूभयात्मकत्वस्य विरोधेन तृतीयराश्यसंभवेऽपि उभयानात्मकत्वेनैव एको राशिरस्तु; अथवा कालभेदेन तत्तदभाववद्वस्त्वेको राशिरस्त्येवेति कथं राशिद्वयमेवेत्यत्राह—न चेति । अयं भावः—अस्तु कालभेदेनोभयात्मकत्वो

### पक्षः कश्चिदस्त्येव

तदयुक्तम्—अनुमानोच्छेदप्रसङ्गात् । अद्विरूपत्वेऽपि वस्तूनां निसर्गविषयीकृतः अर्थः कश्चित् पक्ष एषितव्यः । तदभावे तदपेक्षस्वरूपयोः सपक्षविपक्षयोरप्यभावः स्यात् । तदस्य पक्षस्य सतो विपक्षत्वमारोप्य यत्तेन व्यभिचारचोदनं तेनाग्न्यनुमानमपि विप्लवेत ॥

### पर्वते वह्न्यनुमानस्य वह्न्यनुष्णत्वानुमानस्य च वैलक्षण्यशङ्कापरिहारौ

ननु ! पर्वतादिर्धर्मी न ज्वलनाख्यसाध्यधर्मशून्यतया तत्र निश्चितः । तेजोऽवयवी तु अनुष्णत्ववैपरीत्येन प्रत्यक्षतो निश्चित इति—तत्किमिदानीं पर्वतादिः अग्निमत्तया निश्चितः ? तथाभ्युपगमे वा किमनुमानेन ? पपादनम् । अथापि नैषः तृतीयो राशिः; तत्काले तु प्रथमराशिः, तदभावकाले तु द्वितीयो राशिरिति कुत इष्टसिद्धिः । उभयानात्मकत्वं तु शशशृङ्गादिवत्तुच्छत्वे विश्राम्येतेति स्मर्तुमप्ययोग्यम् । तथा च द्वैराश्यमेव सुप्रतिष्ठितमिति पक्षो नाम कश्चिन्नास्त्येवेति ॥ § 2169

अनुमानोच्छेदमेवोपपादयति—तदभाव इति । पक्षस्यैवाभाव इत्यर्थः । सपक्षेत्यादि । पक्षसदृशः खलु सपक्षः, पक्षविरुद्धश्च विपक्षः । एतदुभयं पक्षस्यैवाभावे कथं प्रतितिष्ठेतेत्यर्थः । अग्न्यनुमानमपीति । पर्वतो वह्निमान् धूमादित्यादावपि पक्षस्यैवाभावे तदनुमानमपि नावतिष्ठेतेत्यर्थः ॥ § 2170

ननु वह्नेरनुष्णत्वं प्रत्यक्षबाधितं, पर्वते वह्निस्तु न तथेति वैलक्षण्यमस्त्येव । तथा चाद्यानुमानतौल्यं न वह्न्यनुमानादीनामिति शङ्कते— नन्विति

२१ ] ऽपि स— nyāma-wit__kha

। समाधत्ते—तत्किमिति । पर्वतो वह्निशून्यतया न निश्चित इति चेत्, तर्हि पर्वतो वह्निमत्त्वेन निश्चित इत्यायातम् । तथा च सिद्धसाधनम् इत्यर्थः । तथा—अग्निमत्त्वेन निश्चित इति ॥ § 2171

I.291/KSV

## पक्षानङ्गीकारे अनुमानोच्छेदः स्यात्

ननु ! न पर्वतोऽग्निमत्तया निश्चितः; नापि तद्वैपरीत्येन । किन्तु सन्दिग्ध एवास्ते । यद्येवं सन्दिग्धेऽपि विपक्षे वर्तमानो धूमादिरहेतुरेव स्यात् । निश्चितविपक्षवृत्तिवत् सन्दिग्धविपक्षवृत्तेरपि अहेतुत्वात् सर्वमनुमानमुत्सीदेत् । तस्मात् पक्षेण व्यभिचारचोदनमनुचितमिति व्यतिरेकवानेवायं हेतुः ॥ § 2172

## बाधः न पक्षमात्रदोषः, किन्तु हेतोरपि

यत्पुनरभिहितं—अनिराकृतपक्षवृत्तित्वमस्य नास्तीति— तत्सत्यम्—वयमप्यमुं पक्षं अध्यक्षवाधितमिच्छाम एव । स तु न पक्षमात्रपर्यवसितो बाधः, किन्तु हेतुमपि स्पृशति ॥ § 2173

आस्त इति । प्रकृते तु वह्निः उष्णत्वेन निश्चित इति शेषः । समाधत्ते—यद्येवमिति । साध्यतदभाववत्त्वेन सन्दिग्धश्चेत् सः पक्षोऽपि भवितुमर्हति, तथा सन्दिग्धविपक्षोऽपि भवितुमर्हति । हेतोस्तद्वृत्तित्वज्ञानं च— हेतुः किं साध्यवद्वृत्तिः ? उत साध्याभाववद्वृत्तिः(?।) इत्येवंरूपं पर्यवस्यति । अयं च व्यभिचारसंशय एव । तथा चेदृशदोषस्य सर्वत्र संभवात् अनुमानमेवोच्छिद्येतेति ॥ § 2174

ननु पक्षे साध्यस्य सन्दिग्धत्वेऽपि न तस्य सन्दिग्धविपक्षत्वं संभवति, यतः सर्वमप्यनुमानमुच्छेद्येत । सन्दिग्धसाध्यवान् खलु पक्षः । स च संशयः सर्वत्र सुलभ एव । पक्षान्तर्भावेण व्यभिचारसंशयः साध्यसंशय एव पर्यवस्येत् । धूमः किं वह्निमत्पर्वते वर्तते ? उत वह्न्यभाववत्पर्वते ? इति संशये पर्वते वह्निसत्त्वे आद्यः पक्षः, वह्नेरसत्त्वे द्वितीयः पक्षः प्रत्यवतिष्ठेत । तथा च पर्वतो वह्निमान् ? उत न ? इत्याकारः पर्यवसन्नः । स च पक्षतारूप इति पक्षान्तर्भावेण व्यभिचारसंशयः गुण एव, न दोष इति चेत्, प्रकृतेऽपि इमं न्यायं पश्यतु भवानिति । पक्षेण—पक्षान्तर्भावे ॥ § 2175

अनिराकृतेति । प्रत्यक्षाद्यबाधितेत्यर्थः । तथा च पक्षे साध्यः प्रत्यक्षबाधितः, न तु हेतुरिति बाधः न हेतुदोष इति भावः । सत्यं इत्यर्धाङ्गीकारे । अयं पक्षदोष इत्यभ्युपगच्छामः, हेतुदोषो न भवतीति तु नाभ्युपगच्छामः । पक्षनिष्ठोऽपि दोषः हेतुमपि दूषयेदेवेति । स तु बाधः इत्यन्वयः ॥ § 2176

१० ] यत्तु— nyāma-wit__ka

I.292/KSV

न हेतुनिरपेक्षात्मा पक्षो नामास्ति कश्चन ।
प्रसाधयितुमिष्टो हि हेतुना पक्ष उच्यते ॥ १५९ ॥§ 2178

स न साधयितुं शक्यः प्रत्यक्षे प्रतियोगिनि ।
साध्यापहारद्वारेण हेतुर्भवति बाधितः ॥ १६० ॥§ 2180

अबाधितानुमेयत्वमत एवास्य लक्षणम् ।
न तु हेतुरसिद्धोऽयं ज्वलने वृत्तिसंभवात् ॥ १६१ ॥§ 2182

## अबाधितत्वं न दुरवगमम्

यत्त्वबाधितता ज्ञातुं शक्या नेति विकल्पितम् ।
पक्षस्यापि महाभाग ! कथं तां प्रतिपत्स्यसे ॥ १६२ ॥§ 2184

प्रयत्ने क्रियमाणेऽपि यदि बाधा न दृश्यते ।
नास्त्येवेत्यवगन्तव्यं व्यवहारो हि नान्यथा ॥ १६३ ॥§ 2186

अतस्त्रिलक्षणेऽपि हेतौ बाधसंभवादबाधितत्वं रूपान्तरं वक्तव्यम् ॥ § 2187

एतदेवोपपादयति—न हेत्वित्यादि । अयमर्थः—वह्निरनुष्णः कृतकत्वादित्यादौ यद्यपि पक्षे साध्यवत्त्वमेव प्रत्यक्षबाधितं, न तदानीं हेतोरुल्लेखः । अथापि पक्षसाध्याद्युल्लेखश्चानुमितिस्थल एव । अनुमितिश्च हेतुशरणैव । हेतौ प्रतिष्ठिते सर्वं प्रतिष्ठेत, तस्मिन्नप्रतिष्ठिते न किञ्चित्प्रतिष्ठेत । केनचिद्धेतुना कुत्रचिदधिकरणे कस्यचित्साध्यस्य साधनेऽभिमते खलु तत्र भवता प्रत्यक्षबाधाद्युत्कीर्तनम् ! तादृशदोषोत्कीर्तने च स दोषः बाधितसाध्यकत्वादिरूपः स्पृशत्येव हेतुम् । अन्यथा खलु अयं सद्धेतुव्यपदेशार्ह एव स्यात् । न हि एतदपेक्षयाऽतिरिक्तः असिद्ध्यादिस्तत्र हेतौ वर्तते । अतः अबाधितसाध्यकत्वं सद्धेतोरावश्यकमेवेति ॥ § 2188

पक्षस्यापीति । न हि बाधस्य दोषत्वं नास्तीति भवानप्यवोचत्, किन्तु पक्षस्यायं दोष इत्येव । तथा च पक्षे अबाधितत्वज्ञानं भवताऽपि संपादनीयम् । तथा च यश्चोभयोः समो दोषः तमेव त्वं ब्रवीषि माम् । तत्त्वजिज्ञासुं प्रत्याह—प्रयत्न इति । नान्यथेति । सर्वत्रैवं संशये पुरुषप्रवृत्तिरेव न स्यात् । अतश्च संशयात्मा विनश्यति इति सत्यमुक्तम् ॥ § 2189

I.293/KSV

७ ] यत्तु वा— nyāma-wit_kha

एवञ्च यदुच्यते—बाधाविनाभावयोर्विरोधादिति—तत्कथञ्चिद्युक्तं, कथञ्चिदयुक्तम् । पञ्चलक्षणके लिङ्गे यः परिसमाप्तोऽविनाभावः तत्र नास्त्येव बाध इत्येवं युक्तमेतत् । त्रिलक्षणकलिङ्गाभिप्रायेण त्वयुक्तमिति ॥ § 2190

## आगमबाधितो हेतुः

एवमागमबाधितोऽपि हेतुर्द्रष्टव्यः । यथा—ब्राह्मणेन सुरा पेया अदुष्टत्वात्, क्षीरवदिति ॥ § 2191

## अनुमानेनानुमानस्य विरोधासंभवः

ननु ! प्रत्यक्षागमविरुद्धवदनुमानविरुद्धमनुमानं कस्मान्नोदाह्रियते ? असम्भवादिति ब्रूमः—न ह्यनुमानविरुद्धमनुमानमवकल्पते । अनुमानयोर्हि तुल्यबलयोर्बाध्यबाधकभावः ? अतुल्यबलयोर्वा ? तत्र तुल्यबलयोस्तुल्यबलत्वादेव न बाध्यबाधकभावः । समाने हि वीर्ये किं कस्य बाधकम् ? बाध्यं वा ? अतुल्यबलत्वपक्षेऽपि—यत्कृतमल्पबलत्वमन्यतरस्य तत एव तदप्रामाण्यसिद्धेः किमनुमानबाधया ? तस्मान्नानुमानविरुद्धमनुमानं बुद्ध्यामहे ॥ § 2192

अत एवानुमानविरुद्धमनुमानमपश्यता भाष्यकारेणोक्तम्— यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासस्सः न्या. भा. १-१ इति ॥ § 2193

कथंचिदित्यादि । बाधाविनाभावयोर्विरोधः इति सामान्यत उक्तिर्न दुष्यति; पञ्चलक्षणके हेतावुभयोर्मेलनासंभवात्; त्रिलक्षणकहेत्वभिप्रायेणोच्यते चेत् वह्न्यनुष्णत्वानुमानादावुभयं संभवतीति न विरोध इत्यर्थः ॥ § 2194

आगमः—ब्राह्मणो न सुरां पिबेत् इत्यादिः ॥ § 2195

यत्कृतमिति । प्रत्यक्षेणागमेन वोपोद्बलितत्वादेवानुमानस्य प्राबल्यं वक्तव्यम् । दौर्बल्यं च प्रत्यक्षागमविरोधादेव । तथा च प्रत्यक्षविरोधात् आगमविरोधाच्च प्राथमिकमनुमानं मृतमिति तेन किं कर्तुं शक्यम् ? § 2196

I.294/KSV

## असत्प्रतिपक्षत्वमपि हेत्वङ्गमेव

यत्र तु तुल्यबले द्वे अनुमाने निपततः स सत्प्रतिपक्षस्य विषयः इति । असत्प्रतिपक्षत्वं पञ्चमं लिङ्गलक्षणमुपदिश्यते ॥ § 2197

## परस्परविरुद्धहेतुद्वयसमावेशो भवत्येव

४ ] ---Note : एतदारभ्य २९५ पुटे पुस्तके नास्ति ॥

४ ] ---Note : अङ्कितभागपर्यन्तं ख

ननु ! वस्तूना(?)द्विरूपत्वात् कथमेकत्र धर्मिणि परस्परविरुद्धधर्मद्वयाक्षेपिप्रयोजकहेतुद्वयसन्निपातो भवेत् । अत एव विरुद्धाव्यभिचारी नाम न हेत्वाभास इहेष्यते । तदतिदुर्लभः सत्प्रतिपक्षो हेतुरिति कमपहर्तुं पञ्चममिदं हेतुलक्षणमुपदिश्यत इति— सत्यमेवम्—किन्तु संशयबीजं यत् विशेषाग्रहणं, तदन्यतरनिर्णयाय भ्रान्त्या प्रयुज्यमानं सत्प्रतिपद्यते—स्थाणुरयं पुरुषधर्मानुपलब्धेः, पुरुषोऽयं स्थाणुधर्मानुपलब्धेरिति । अन्यतरविषयानुपलंभ एवायं § 2198

यत्रेति । नन्वनुपदमेवोक्तं तुल्यबलानुमानद्वयामेलनं, इदानीमस्ति तदित्युच्यत इति कथमिदम् ? उच्यते—अनुमानयोस्तुल्यबलत्वे बाध्यबाधकभावो नास्तीत्येतावदेवोक्तम्, न तु तादृशानुमानासंभवः । ननु उभयोर्मेलने परस्परबाधः कथं न स्यादिति चेत्—न तत्र परस्परबाधः—किन्त्वनिर्णय एव । भाष्यकारोऽप्याह—उभयपक्षसाम्यात् प्रकरणसमो निर्णयाय न प्रकल्पते न्या. भा. १-२-७ इति ॥ § 2199

धर्मद्वयाक्षेपि—साध्यद्वयसाधनम् । अत एव—तादृशहेतुद्वयमेलनासंभवादेव । प्राचीनबौद्धैः दिङ्नागादिभिः संशायकतया विरुद्धाव्यभिचारिणोऽङ्गीकारेऽपि, धर्मकीर्त्यादिभिरेव तन्निरासात् न्या. विं. ३-११० सर्वसंप्रतिपन्नमेतदिति भावः । विरुद्धाव्यभिचारिशब्दश्च एवं निरुक्तः धर्मोत्तरेण—विरुद्धं न व्यभिचरतीति विरुद्धाव्यभिचारी । विरुद्धश्चासौ अव्यभिचारी चेति वा न्या. बिं. ३-११० इति । कन्दलीकारोऽपि विरुद्धं प्रत्यनुमानं न व्यभिचरति— नातिवर्तते २४३ पु. इत्याह । स्वसाध्यविरुद्धसाधकहेतुमानिति फलितार्थः । इदं विस्तरशः कन्दल्यां द्रष्टव्यम् । कमपहर्तुं—कं दोषं वारयितुम् । भ्रान्त्येति । अन्यतरधर्मस्य सद्भावावश्यकात् धर्मद्वयस्याप्यनुपलंभः दोषमूलत्वात् भ्रान्तिरित्युच्यते । तथा च वस्तुनः अद्व्यात्मकत्वेऽपि अनुपलंभस्य संभवात्, विशेषादर्शनात् संशयादिप्रसक्तिरिति भावः । अस्तु सर्वं !

संशयाधायी पक्षधर्मान्वयव्यतिरेकोपपत्तिभ्रमेण हेतुरिति प्रयुज्यमानः सत्प्रतिपक्षो भवतीति प्रकरणसमहेत्वाभासचिन्तायां विस्तरेण निरूपयिष्यते । पुरुषप्रज्ञाप्रमादमूलत्वाच्च वस्तुनो द्व्यात्मकत्वमिति तत्रैव वक्ष्यते ॥

लक्षणान्तरमतः कथनीयम्
प्रत्यनेकविकलत्वमवश्यम् ।
तेन लिङ्गमनुमानपथज्ञाः
पञ्चलक्षणकमभ्युपजग्मुः ॥ १६३ ॥§ 2204

**पञ्चलक्षणकाल्लिङ्गात् इतिपद्यस्थगृहीतात्इतिपदव्याख्यानम्**

पञ्चलक्षकाल्लिङ्गादिति व्याख्यातम् । व्याप्तिग्रहणसमयसमधिगतस्वरूपस्यापि लिङ्गस्य पुनर्धर्मिणि क्वचिदनवधृतवपुषो नास्याध्यवसायसाधनत्वमिति द्वितीयं लिङ्गदर्शनमेवापेक्षणीयमिति गृहीतादित्युक्तम् । लिङ्गं हि ज्ञापकं;

न चक्षुरादिवत् कारकम् । ज्ञापकस्य चायं स्वभावः, यत् ज्ञातं अनु ज्ञापयतीति । व्याप्तिग्रहणकालगृहीतमेव व्याप्तिवत् स्मर्यमाणतथैव लिङ्गं लिङ्गिनं गमयिष्यतीति चेन्न—ग्रहणमन्तरेण व्याप्तिस्मृतेरप्यभावात् इत्यलं प्रसङ्गेन ॥ वस्तुनः कथं द्व्यात्मकत्वम् ? इत्यत्राह—पुरुषेति । वस्तुनः एकात्मकस्यैव पुरुषबुद्धिदोषवशात् द्व्यात्मकत्वप्रतिभासमात्रमित्यर्थः । तत्रैव—हेत्वाभासचिन्तायामेव ११ आह्निके । लक्षणान्तरं—असत्प्रतिपक्षत्वरूपम् ॥ § 2205

व्याप्तीत्यादि । महानसादौ वह्निव्याप्यत्वेन गृहीतस्यापि धूमस्य, पुनः कालान्तरे पर्वतादौ ग्रहणमन्तरा न वह्न्यनुमापकत्वं, ज्ञायमानं हि लिङ्गमनुमितिकरणम्, न स्वरूपसत्—इत्यतो गृहीतात् इत्युक्तमित्यर्थः । क्वचित् धर्मिणि—पक्षे । अनवधृतवपुषः—अनवगतस्येति यावत् । अध्यवसायः—अनुमितिः । द्वितीयं—व्याप्तिग्रहणकालिकं प्रथमं, पक्षधर्मताज्ञानकालिकं द्वितीयमित्यर्थः । अपेक्षणीयमेव इत्यन्वयः । यथा महानसादौ गृहीता व्याप्तिः कालान्तरे स्मृतैवानुमितिहेतुः, तथा धूमोऽपि स्मृत एवानुमितिहेतुः कुतो न स्यादित्याक्षिपति—व्याप्तीति । समाधत्ते—ग्रहणमिति । पूर्वं

### नियमस्मृतेः इत्यस्य व्याख्यानम्

नियमस्मृतेरिति । विव्रियतां ! कोऽयं नियमो नाम ?

व्याप्तिः—अविनाभावः—नित्यसाहचर्यमित्यर्थः ॥

### नियमो नाम कः ?

आह—नैतावत्येव विरन्तुमुचितम् । तस्य तदविनाभावित्वमित्यत्र हि निमित्तमन्वेषणीयं तार्किकैः ॥

### तादात्म्यतदुत्पत्तिभ्यां व्याप्तिनिरूपणम्

तच्च तादात्म्यतदुत्पत्तिरूपमीक्षितवन्तो भिक्षवः । यो हि यदात्मा भावः स कथं तमुत्सृजति ? वृक्षात्मिकैव हि शिंशपा तेन वृक्षत्वमनुमापयति । सोऽयं स्वभावहेतुरुच्यते, वृक्षोऽयं शिंशपात्वात् इति । तत्र तादात्म्यं प्रतिबन्धः ॥ गृहीतायाः व्याप्तेः स्मृतौ उद्बोधकं खलु वक्तव्यम् । एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम् इतिविधया धूमज्ञानं स्वाधिनाभावसम्बन्धिनः वह्नेः स्मारकं भवतीति खलु व्याप्तिस्मृतिर्वक्तव्या । तत्र यदि धूमज्ञानमेव स्मृतिरूपं, तर्हि वह्निज्ञानमपि तादृशमेव स्यात् । तथा च अनुमितिः स्मृतिरूपा वक्तव्या— तच्च न युक्तमेव । पर्वते वह्नेः पूर्वमननुभूतत्वेनेदानीं स्मृतेरयोगात् । अतः धूमस्मरणान् न पर्वते वह्न्यनुमितिनिर्वाहः ॥ § 2206

एतावत्येव—एवमुत्तरदान एव । तार्किकैरिति । न हि श्रद्धाजडास्तार्किका इति भावः ॥ § 2207

---

५ ] त्रिलक्षणकलिङ्गाविनाभावामिप्रायेण
त्वदुक्तमेतदित्यलं— nyāma-wit_kha

---

३ भावात् ] २९३ पुटे द्रष्टव्यम् ।

भिक्षवः—धर्मकीर्त्यादयः । तथोक्तं प्रमाणवार्तिके धर्मकीर्तिना— कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमः, दर्शनान्न नदर्शनात् इति । अयमर्थः—अविनाभावस्य नियमः—निर्णयः, नियताविनाभावो वा, नियामकात्—तादृशनियमहेतुभूतात् कार्यकारणभावात् स्वभावाद्वा भवति । न तु कदापि अन्वयदर्शनात् व्यतिरेकदर्शनाद्वा भवति । व्यक्तीनामनन्तत्वेन असर्वज्ञदुर्ज्ञेयत्वेन अन्वयव्यतिरेकसहचारग्रहस्यासंभवादिति भावः । यो हि भावः—पदार्थः यदात्मा—यादृशस्वभावकः । तं— स्वभावम् । तादात्म्यं प्रतिबन्धः—द्रव्यं घटः इत्यादौ सामान्य

कार्यं नाम कारणाधीनात्मलाभमेव भवति, न कारणानपेक्षमिति । तदुपलभ्यमानं तदनुमापयति—अग्निरत्र धूमात्—इति कार्यहेतौ तदुत्पत्तिः प्रतिबन्धः । एवं हि द्विविधं प्रतिबन्धमनुमेयाव्यभिचारनिबन्धनमनुक्त्वा केवलसाहचर्यनियममात्रवर्णनं यत् पादप्रसारिका सैवेति ॥

उच्यते—पादप्रसारिकैव साधीयसी स्थूलदृष्टिभिरवलम्बिता वरं, न सूक्ष्मदृष्टिभिः उत्प्रेक्षिताः तादात्म्यादिप्रतिबन्धाः ॥

तादात्म्ये तावद्गमकाङ्गे हेतुसाध्ययोरव्यतिरेके गम्यगमकभाव एव दुरुपपादः । न खल्वगृहीतं लिङ्गं लिङ्गिप्रतीतिमाधातुमर्हति । तत्र लिङ्गबुद्धौ लिङ्गी प्रतिभासते ? न वा ? अप्रतिभासे तद्बुद्ध्या तदग्रहणात् कथं तस्य तदात्मकत्वम् ? प्रतिभासे तु लिङ्गवत् प्रत्यक्ष एव सोऽर्थ इति किमनुमानेन ?

विपरीतसमारोपव्यवच्छेदार्थमनुमानमिति चेत्—तत्स्वरूपग्रहणे विपरीतारोपणावसराभावात् । न हि शिरःपाण्यादिविशेषदर्शने सति स्थाणुसमारोपः प्रवर्तते । तत्र तद्भेदादुपपद्येतापि । विशेषयोः तादात्म्यं सर्वसम्मतम् । विशेषे सति सामान्यं—यत्र घटत्वं, तत्र द्रव्यत्वमिति । इयं व्याप्तिर्धर्मयोः । एवं धर्मिणोर्व्याप्तिस्तु तादात्म्यमूलैव । यो घटः स द्रव्यमेवेति । यो विशेषात्मा स सामान्यात्माऽपि भवतीति यावत् ॥ § 2208

तत्—कार्यम् । तत्—कारणम् । पादप्रसारिकैवेत्यादिः नर्मोक्तिः ॥
§ 2209

गमकाङ्गे—व्याप्तिनिश्चायकाङ्गभूते सति । अव्यतिरेके—सति चेति शेषः । उक्तमेवोपपादयति—न खल्विति । तदग्रहणात्—लिङ्गिनः—साध्यस्याविषयीकरणात् । प्रत्यक्ष एवेति । उभयोरभेदादित्यर्थः । एतदुक्तं भवति— हेतुसाध्ययोरभेदे, पक्षे हेतुदर्शनदशायामेव हेत्वभिन्नं साध्यमपि सिद्धमेव । तयोर्भेदे च तादात्म्याद्व्याप्तिरिति भग्नमेवेति ॥ § 2210

विपरीतेति । अवृक्षत्वव्यवच्छेदार्थमित्यर्थः । ननु तत्र अवृक्षत्वमस्ति चेत् तन्न निषेद्धुं शक्यम्, नास्ति चेत् निषेधो व्यर्थ इति चेत्तत्रोक्तम्— समारोपेति । अरोपितं तत् व्यवच्छिद्यत इत्यर्थः । अभावस्थले सर्वत्रेय

---

१२--१३ ] त्तिप्र— nyāma-wit_kha

१४ ] प्र— nyāma-wit_kha

न हि शिरःपाण्यादय एव पुरुष इति तद्ग्रहणेऽप्यपुरुषारोपः कामं भवेत् । इह वृक्षत्वशिंशपात्वयोरभेदात् शिंशपात्वग्रहणे सति का कथा वृक्षेतरसमारोपस्य !

अपि च वृक्षत्वग्रहणे सति सामान्यधर्मग्रहणात् विशेषानध्यवसायात् कदाचिदशिंशपारोपः स्यात्; न तु शिंशपात्वग्रहणे सति अवृक्षत्वसमारोपो युक्तः ॥

प्रमातुः शिंशपात्वं हि यस्य प्रत्यक्षगोचरः ।
परोक्षं तस्य वृक्षत्वमिति नातीव लौकिकम् ॥ १६४ ॥§ 2213

किञ्च साध्यसाधनयोरव्यतिरेकात् यथा शिंशपात्वे च वृक्षत्वमनुमीयते तथा वृक्षत्वेनापि शिंशपात्वमनुमीयेत, तादात्म्याविशेषात् । तथा च प्रयत्नानन्तरीयकत्वेनानित्यत्वं साध्यते, तद्वदनित्य- मेव गतिः । भूतले घटोऽस्ति चेत् तन्न निषेध्यम्, नास्ति चेत् निषेधो व्यर्थः, अतश्च भूतले घटो नास्तीति प्रतीतिप्रयोगादयो विलुप्येरन् । अतः निषेधस्थले सर्वत्र प्रतियोगिप्रसक्तिः अरोपात्मिकैव । वस्तुतः अयमपि दृष्टान्तः प्रकृताननुगुण इत्याह—तत्रेति । अभेदादिति । यद्यपि सिद्धान्ते वृक्षत्वं परा जातिः, पृथिवीत्ववत्; शिंशपात्वं चापरा, घटत्ववत् इति तयोर्नाभेदः; तथापि जाति मनङ्गीकुर्वतां स्वलक्षणमात्रं वस्तुस्वरूपमभिदधतां वृक्षत्वशिंशपात्वयोरुभयोरपि स्वरूपानतिरेकात्तयोरभेद एव । अत एव स्वरूपस्य तादात्म्यहेतुरिति व्यवहारः ॥ § 2214

स्यात्—संभाव्येत । ननु घृतादौ घृतत्वे गृहीतेऽपि इयं पृथिवी ? उत जलम् ? इति संशयदर्शनात् विशेषग्रहणेऽपि संशयो युज्यत एवेत्यत्राह—प्रमातुरिति । नातीव लौकिकमिति । अत्यन्तं लोकविरुद्धमित्यर्थः । घृतादौ कदाचिद्घनीभावस्य, कदाचिद्द्रवत्वस्य च दर्शनाद्युज्यते संशयः इयं पृथिवी ? उत जलं इति । प्रकृते तु शिंशपां पश्यन् को वा तत्र वृक्षत्वे संशयीतेत्यर्थः ॥ § 2215

शिक्षकपुरुषप्रमादात् कदाचित् कस्यचित् सामान्यमनवगतमपि स्यादित्यत आह—किञ्चेति । तादाम्यहेतुः खलु अयम् । प्रयत्नानन्तरीयकत्वम्—

त्वेनापि तत्साध्येत । ततश्च सपक्षव्याप्त्यव्याप्तिभ्यां कृतकत्वप्रयत्नानन्तरीयकत्वयोर्यो भेदः उक्तः स हीयेत ॥

### व्याप्तेरद्विष्ठत्वम्, तादात्म्यस्य नियमे पर्यवसानं च

ननु च ! अन्यः संबन्धः, अन्यश्च प्रतिबन्धः । द्विष्ठः संबन्धः, प्रतिबन्धस्तु परायत्तत्वलक्षणः । तत्र शिंशपात्वं वृक्षत्वे प्रतिबद्धम्, न वृक्षत्वं शिंशपात्वे । प्रयत्नानन्तरीयकत्वमपि अनित्यत्वे नियतम्, न त्वनित्यत्वं तत्रेति

५ ] चिदपि शिं— nyāma-wit__ka
१० ] त्वना— nyāma-wit__kha

। तथा धूमस्याग्नौ प्रतिबन्धः, न त्वग्नेर्धूमे । सत्यमेवम्—किन्त्वेवमुच्यमाने नियम एवाङ्गीकृतो भवेत्, न तादात्म्यम् । तादात्म्ये हि यथा शिंशपा शिंशपां विना न दृश्यते तथा वृक्षत्वमपि शिंशपारहितं नदृश्येत, दृश्यते च खदिरादौ शिंशपारहितं वृक्षत्वं, विद्युदादौ च प्रयत्नानन्तरीयकत्वरहितमनित्यत्वमुपलभ्यत इति कथमभेदः ? ४-२०१ प्रयत्नानन्तरकालोत्पन्नत्वम् । अस्य स्वभावानुमानरूपत्वं प्रमाणवार्तिकधर्मोत्तरटीकादौ न्या. वि. टी. २-२१ उपपादितम् । कृतकत्वेत्यादि । शब्दे अनित्यत्वेन कृतकृत्वसाधने सपक्षव्याप्तं, तत्रैव प्रयत्नानन्तरीयकत्वसाधने तत सपक्षे विद्युदादौ अव्याप्तं इति भेदः तत्र तत्रोक्तः ॥ § 2216

ननु ! एकसम्बन्धिज्ञानविधया हेतोस्साध्योपस्थापकत्वेऽपि हेतुसाध्ययोर्वर्तमानः सम्बन्धः न संयोगादितुल्यः; येन हस्तिदर्शने हस्तिपस्मरणवत्, हस्तिपदर्शने हस्तिस्मरणवच्च, धूमदर्शनेन वह्न्युपस्थितिवत्, वह्निदर्शनेन धूमोपस्थितिराशङ्क्येत । किन्तु धूमादेव वह्न्यनुमितिः, न तु वह्नेर्धूमानुमितिरिति संप्रतिपन्नम् । एवञ्च प्रकृतेऽपि शिंशपात्वेन वृक्षत्वमात्रमेव सिद्ध्येत्, न तु वैपरीत्येनापीति शङ्कते—नन्विति । न त्विति । विद्युदादौ व्यभिचारात् इति हेतुः । पूर्वपक्ष्युक्तं व्याप्तेः संयोगादिवैलक्षण्यमङ्गीकरोति—सत्यमिति । शिंशपारहितं—शिंशपात्वं विनेति यावत् ॥ § 2217

I.300/KSV

विना साधनधर्मेण साध्यधर्मोऽयमस्ति हि ।
दृष्टस्तद्व्यतिरेकेण तदात्मा चेति कैतवम् ॥ १६५ ॥ § 2219

अथ विद्युदाद्यनित्यत्वादन्यदेव घटाद्यनित्यत्वं, यत् प्रयत्नानन्तरीयकत्वाभिन्नमुच्यते; तर्हि धर्मिभेदेन धर्माणां भेदेऽन्वयग्रहणानुपपत्तेः सर्वमनुमानमुत्सीदेत् । धूमाग्न्योस्तु कार्यकारणयोर्भेदात् युक्तं वक्तुम्—धूमस्याग्नौ प्रतिबन्धः, न त्वग्नेर्धूमे । इह तु साध्यसाधनयोरव्यतिरेकात् न तथा शक्यते वक्तुम् । तथाऽभिधाने वा नाव्यतिरेकः । सर्वथा तादात्म्यं वा त्यज्यताम्, वृक्षत्वानित्यत्वाभ्यां शिंशपात्वप्रयत्नानन्तरीयकत्वे वा अनुमीयताम्, नान्तराऽवस्थातुं शक्यते ॥ § 2220

## स्वभावहेतुकानुमानान्तरनिराकरणम्

यश्चायं—अनित्यः शब्दः कृतकत्वादिति स्वभावहेतुरुदाहृतः— स कथं स्वभावहेतुः ? इदं हि चिन्त्यताम् । अनित्यत्वं नाम § 2221

२९--३० ] त्वना— nyāma-wit_kha
३४ ] त्वना— nyāma-wit_kha
३ ] दृश्यते— nyāma-wit_kha
४ ] त्वना— nyāma-wit_kha
१८ ] धर्मा— nyāma-wit_kha
२० ] त्वना— nyāma-wit_kha
२५ ] त्वना— nyāma-wit_kha
२५ ] येताम्— nyāma-wit_kha

साध्यहेत्वोः पक्षविशेषणत्वात् धर्मेण इत्युत्कीर्तनम् । हि—यस्मात् साधनं विनापि साध्यं कुत्रचिद्वर्तते ततस्साधनव्यतिरेकेण वर्तमानः साधनस्वरूप इति वञ्चनामात्रमित्यर्थः । अन्वयः—यत्र धूमस्तत्राग्निरितिरूपः । अनुपपत्तेः—व्यक्तीनां व्याप्तौ भानासंभवेन सामान्यत एव व्याप्तिग्रहणं वक्तव्यम् । न हि पर्वतीयधूमवह्न्योः व्याप्तिग्रहणसंभवः । उत्सीदेत् । अयोगोलकादौ धूमव्यभिचारित्वेऽपि वह्नेः, तदतिरिक्तवह्नेरेव व्याप्तिरित्यपि वक्तुं शक्यतया सदसद्धेतुविभागस्य दुर्वचत्वादप्यनुमानप्रामाण्यमुत्सीदेदित्यपि बोध्यम् । धूमे इत्यनन्तरं इतिकरणं द्रष्टव्यम् ॥ § 2222

उदाहृतः—न्यायबिन्द्वादौ ३-११ इति शेषः । ननु अनित्यत्वादयो हि स्वरूपरूपाः । अतः तस्य स्वभावहेतुत्वमिति चेत्—तत्राह—इदं हीति । कथमिति । धर्माणां स्वरूपरूपत्वेऽपि तन्निरूपकभेदाद्वाऽवश्यं भेदः एषितव्यः, नो चेत् सर्वपदानां पर्यायतैव स्यादिति भावः ॥ § 2223

I.301/KSV

किमुच्यते ? किं च कृतकत्वम् ? इति । तत्रानित्यत्वं विनाशयोगः, उत्पत्तियोगश्च कृतकत्वम् । उत्पन्नस्य च भावस्य विनाशः; न तूत्पाद एव विनाश इति कथं साध्यसाधनयोरव्यतिरेकः ? § 2224

## परैः स्वभावहेतुकानुमानसंभवसमर्थनम्

अत्र चोदयन्ति—विनाशयोगे ह्यनित्यत्वे विनाशी शब्द इति बुद्धिः स्यात्, नानित्य इति । एष्या च सा मिथ्या बुद्धिः, शिखरिण इव कृशानुविशेषितस्य विनाशवतः शब्दस्य गृहीतुमशक्यत्वात् ॥ § 2225

अभावेन हि धर्मेण तद्वत्ता धर्मिणः कथम् ?
अभावग्रहवेलायां धर्मिणोऽनुपलम्भनात् ॥ १६६ ॥ § 2227

अनित्यत्वमिति च भावप्रत्ययः कथमभावे भवेत् ? विरुद्धत्वात् । तस्मादुभयान्तपरिच्छिन्ना वस्तुसत्ताऽनित्यत्वमुच्यताम् । कृतकत्वमपि सत्तैव, कारणोत्पादिता धारा सती कथ्यत इति । एवञ्च सत्तैव साध्यं साधनं चेति सिद्धं स्वभावहेतुत्वम् ॥ § 2228

## सिद्धान्तिना तन्निराकरणम्

तदिदमनुपपन्नम् । साध्यसाधनयोस्तथात्वेनानवभासनात् । एवं ह्युच्यमाने शब्दः सत्तावान् सत्तावत्त्वादिति प्रतीतिः स्यात् । न चैवं दृश्यते । अपि तु—अनित्यः शब्दः, कृतकत्वादिति ॥ § 2229

---

१८ ] विनाशे— nyāma-wit_kha
१९ ] एव— nyāma-wit_kha
२१ ] तद्वतो— nyāma-wit_kha

विनाशेति । अनित्यत्वस्य विनाशयोगरूपत्व इति यावत् । सा बुद्धिः मिथ्या इत्यन्वयः । तत्र हेतुं सदृष्टान्तमाह—शिखरिण इति । यथा वा वह्निरूपविशेषणविशिष्टः पर्वतः दृश्यते, तथा विनाशविशिष्टः शब्दः न हि गृह्यते, विशेष्यस्य नष्टत्वात् । अतः अभावग्रहवेलायां धर्मिणः शब्दस्य नष्टत्वेन धर्मिणः अभावाख्येन धर्मेण कथं वैशिष्ट्यम् ? विशेषणविशेष्ययोः समकालत्वाभावात् । भिन्नकालयोरपि विशेषणविशेष्यभावे व्यवहारसामान्यमुच्छृङ्खलं स्यादिति । विरुद्धत्वादिति । अभावे भावसत्ताया इति शेषः । अन्तः—अवधिः । पूर्वोत्तरावधिद्वयमिति यावत् । वस्तुसामान्यस्य क्षणिकत्वात्—धारा इत्युक्तम् ॥
§ 2230

तथात्वेन—अभिन्नत्वेन—यद्वा, सत्तारूपत्वेन ॥ § 2231
I.302/KSV

अथोभयान्तपरिच्छिन्ना सत्ता साध्या, कारणनिर्वर्त्याऽऽश्रयसमवायिनी च साधनमुच्यते—तदेतदघटमानम्—विनाशरूपस्यान्तस्य तदानीमविद्यमानत्वेन सत्तापरिच्छेदकत्वाभावात् ॥ § 2232

बुद्धिस्थेनाथ तेनास्याः परिच्छेदोऽभ्युपेयते ।
शब्दस्यैव परिच्छेदो विनाशेनास्तु तादृशा ॥ १६७ ॥ § 2234

धर्मः समानकालोऽपि बुद्ध्यैव विषयीकृतः ।
तद्विशेषणतां याति तथा भाव्यपि यास्यति ॥ १६८ ॥ § 2236

तदेवं विनाशी शब्द इति विशेषणविशेष्यभावसिद्धेः किं सत्तासाध्यकल्पनया ॥ § 2237

## अभावपदादपि भावप्रत्ययो युज्यत एव

यत्पुनरभिहितम्—अभावे भावप्रत्ययस्त्वतलादिर्न स्यादिति—तदत्यन्तानभिज्ञस्य चोद्यम् । शब्दप्रवृत्तिनिमित्तस्य तत्र भाव- § 2238

समवायिनीति । सत्तेति आकृष्यते । अयं भावः—सत्ताया ऐक्येऽपि अवच्छेदकभेदाद्भेदव्यवहारः । पूर्वोत्तरावध्यवच्छिन्ना सत्ता अनित्यत्वम् । मध्यकालावच्छिन्ना सत्ता कृतकत्वमिति । तदानीं—वस्तुसत्ताकाले । उत्पत्तिर्यद्यपि वस्तुन्यन्वेति । आद्यक्षणसम्बन्धस्यैवोत्पत्तिपदार्थत्वात् । सम्बन्धस्य च वस्तुनिष्ठत्वात् । विनाशस्तु वस्तुकाले नास्त्येवेति तस्य कथं सत्तापरिच्छेदकत्वम् ? § 2239

शङ्कते—बुद्धिस्थेनेति । समाधत्ते—शब्दस्यैवेति । तदानीमसताऽपि बुद्धिस्थेन सत्त्वेन यदि विनाशस्य संस्पर्शः, तर्हि तादृशेनैव शब्देन विनाशस्य सम्बन्धोऽस्तु; किं बककबन्धनप्रयासेन ? अतीतेन धर्मिणा धर्मस्य यथा

२३ ] तादि— nyāma-wit__kha

योगः, तथा भविष्यताऽपि धर्मेण धर्मिणोऽपि सम्बन्धोऽपि युज्यत एवेति । एवञ्चासमानकालिकयोरपि विशेषणविशेष्यभावसम्भवेन सत्तान्वेषणप्रयासो विफल एवेत्यर्थः ॥ § 2240

I.303/KSV

प्रत्ययेनाभिधानात्—तस्य गुणस्य हि भावात् द्रव्ये तच्छब्दनिवेश इति । अभावेऽपि अभावत्वमिति दर्शनात् । तस्मात् बुद्धिस्थविनाशयोग एवानित्यत्वम् ॥ § 2241

कृतकत्वमप्युत्पत्तियोग एव, न सत्ता । कारणोत्पादिताश्रयावच्छेदे तु तस्या इष्यमाणे धर्मिण एव तदवच्छेदो भवत्विति किं सोपानान्तरेण ॥ § 2242

## वस्तुभेदेन धर्मा अपि भिद्यन्त एवेत्याक्षेपः

ननूत्पादविनाशाख्यं न धर्मद्वयमन्वयि ।
यद्घटे, नास्ति तच्छब्दे; यच्च शब्दे, न तद्घटे ॥ १६९ ॥§ 2244

गुणस्य—धर्मस्य । द्रव्ये—वस्तुनि । वस्तुनि विद्यमानं कञ्चन धर्मं निमित्तीकृत्य शब्दस्य प्रवृत्त्या—स धर्मः प्रवृत्तिनिमित्तमित्युच्यते । अभावे च अभावत्वधर्ममादाय अभावशब्दस्य प्रवृत्तिरिति को दोष इत्यर्थः ॥ § 2245

कारणेत्यादि । कृतकत्वं हि नित्यात् धर्मिणं व्यावर्तयति । तत्र धर्मिनिष्ठायाः सत्तायाः कारणोत्पादितघटादिनिष्ठत्वमुपपाद्य, तादृशविलक्षणस्य सत्तायाः नित्येभ्यः व्यावर्तकत्वापेक्षया कृतकत्वं साक्षाद्धर्मिणमेव नित्येभ्यो व्यावर्तयतु, न तु तदवच्छिन्नसत्तावच्छेदात्—इत्यर्थः । युक्तं चैतत्—नैल्यपदेन नीलवृत्तिधर्मबोधने प्राप्ते, नीले घटे विद्यमानः गन्धादिरूपः धर्मः न हि नीलपदेन बोधयितुं शक्यः । भवद्दृष्ट्या तु कारणो पन्नघटवृत्तिसत्तायाः कृतकत्वपदार्थ वे हि नीलवृत्तिगन्धधर्ममपि नीलत्वपदं बोधयतु । अतः तत्तच्छब्दप्रवृत्तिनिमित्तभेदनिर्वाहाय धर्माणां साक्षादेव व्यावर्तकत्वं एषितव्यम् ॥ § 2246

नन्वित्यादि । कृतकत्वादीनां साक्षात् व्यावर्तकत्वं दुर्वचमेव । सर्वानुगतं सत्तादिधर्मं व्यावर्त्य, तस्याः सत्तायाः विशिष्टवेषेणेतरव्यावर्तकत्वानङ्गीकारे, कृतकत्वं हि कृतके तद्घटे पर्याप्तम् । एवं अनित्यत्वमपि । तथा च यत् कृतकं, तदनित्यं इति सामान्यव्याप्तिर्न स्यात् । व्यक्तिभेदेन धर्मभेदात् । सत्ता तु सर्वानुगता ॥ § 2247

यदि च—कृतकत्वमपि कृतकेषु सर्वेषु अनुगतं एकमेव । कृतकस्य वस्तुनः यो भावः तद्धि कृतकत्वं; तच्च कृतकेषु सर्वेषु स्यादेव । सर्वेषु तेषु कृतकशब्दप्रयोगे हि प्रवृत्तिनिमित्तमपि सर्वत्र स्यादेवेति व्याप्त्युपपद्यत इत्युच्यते

अथैक एव धर्मः सर्वभावसंबन्धी इष्येत, तर्हि—

एकभावसमुत्पादे सर्वोत्पादः प्रसज्यते ।
एकप्रलयकाले च सकलप्रलयो भवेत् ॥ १७० ॥§ 2250

तस्मात् सत्तापक्ष एव वरम् ॥

**धर्मिभेदेऽपि धर्माणामनुगतत्वं युक्तम्**

नैतदेवम्—धर्मिभेदेऽपि धर्माणां तुल्यरूपाणां अवभासात् ॥

न घटादिस्वरूपं हि नाश इत्यवकल्पते ।
येनानन्वयदोषः स्यात् तद्भेदोपनिबन्धनः ॥ १७१ ॥§ 2253

एकत्वमपि धर्मस्य नास्ति सर्वेषु धर्मिषु ।
येनैकध्वंससमये सकलध्वंससङ्करः ॥ १७२ ॥§ 2255

भिन्नत्वेऽपि च धर्माणां समानरूपत्वेनावभासमानत्वात् अन्वयग्रहणादिकार्याविरोधः । अत एव सामान्यमन्तरेणापि —तर्हि घटपटादिषु सर्वत्र विद्यमानं कृतकत्वं एकमेवेति, घटे उत्पन्ने घटगतकृतकत्वस्य उत्पत्त्या, पटगतकृतकत्वस्य तस्य चाभेदात् पटगतकृतकत्वमप्युत्पन्नमेवेति, एकस्य उत्पादे सर्वोत्पादः । एवं विनाशेऽपि । यद्यपि केवलस्य सत्वस्य सर्वत्रैक्यात् व्यावर्तकत्वं न संभवति, अथापि तत्सामग्र्यधीनस्वरूपविशेषणभेदात् विशिष्टवेषेण व्यावर्तकत्वसंभवः । व्याप्तिस्तु सामान्यात्मनेति गत्यन्तराभावादङ्गीक्रियते—इति आहत्यार्थः ॥ § 2256

तद्भेदः—धर्मिभेदः । एकत्वमपि नेति । तुल्यरूपाणां धर्माणां इति ह्यनुपदमुक्तम् । एतदेवोपपादयति—भिन्नत्वेऽपीत्यादि । अयं भावः— यद्यपि कृतकत्वादयो धर्माः आश्रयभेदेन भिद्यन्त एव, अतः न एकस्योत्पत्तौ सर्वोत्पत्तिप्रसङ्गादिः । व्याप्तिस्तु सर्वेषां कृतकत्वानां अनुगतैकरूपेण संभवः । अनुगतरूपं तु सर्वत्र जातिरेवेति न निर्बन्धः । घटवत्त्वेन रूपेण निखिलानां घटवद्भूतलानामुपस्थितौ हि घटवत्त्वमेवानुगतं रूपं, तच्च न जातिरूपम् । एवं प्रकृतेऽपि यत्र यत्र कृतकपदं प्रयुज्यते, तत्र सर्वत्रापि न कृतकपदभेदः । सर्वथा भेदे सति ककारादीनामप्यानन्त्यात्, सर्वो व्यवहारः उच्छिद्येत । यदा

समानधर्ममूलान्वयादिव्यवहारोपपत्तेः तत्र न सूत्रकारेण सामान्यग्रहणं कृतम् । अपि तु साधर्म्यग्रहणमुपात्तम्—उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम् इति । तेन विनाशोत्पादधर्मयोः साध्यसाधनभावात्, तयोश्च भेदात्, अनित्यः शब्दः कृतकत्वादिति न स्वभावहेतुरिति सिद्धम् ॥

**कार्यानुमानमपि न संभवति**

१५ ] कार्य— nyāma-wit_kha

कार्यहेतुरपि न संभवति । भवतां हि पक्षे क्षणयोर्वा कार्यकारणभावो भवेत् ? सन्तानयोर्वा ?

क्षणयोर्नेति वक्ष्यामः क्षणभङ्गनिराकृतौ ।
संभवन्नपि दुर्लक्षः सूक्ष्मत्वाच्च तयोरसौ ॥ १७३ ॥§ 2259

धूमाग्निसन्तानयोस्तु अवास्तवत्वादेव नास्ति कार्यकारणभावः । अर्थक्रियाकारित्वमेव वस्तुत्वम् । यदि धूमः कार्यत्वादनलमनुमापयेत्—कटुमलिनगगनगामित्वादिधर्मैरपि तस्य गमको भवेत् । च पदानि अभिन्नानि, उच्चारणभेदमात्रं, तदा प्रवृत्तिनिमित्तमपि तदनुरूपमेव वक्तव्यम् । तदादाय व्याप्त्युपपत्तिः । सत्ताद्वारकपक्षे च यस्या अनुगतत्वं तस्याः न व्यावर्तकत्वं, यस्याश्च व्यावर्तकत्वं न तस्या अनुगतत्वमिति दोषः दुर्वार एव । सोपानान्तरकल्पनं परमवशिष्यत इति ॥ § 2260

संभवन्नपीति । पूर्वोत्तरार्धयोः कार्यकारणभाव इति वर्तते । अथवा असौ इति धर्मी । तयोः—क्षणयोः ॥ § 2261

धूमाग्निसन्तानयोः—धूमसन्तानस्याग्निसन्तानस्य च । अवास्तवत्वात्—मिथ्यात्वात् । अतिरिक्तस्य वास्तवस्य सन्तानस्याभावादिति भावः । अर्थेति । न्यायबिन्दौ स्वलक्षणस्वरूपमभिधाय तदेव स्वलक्षणमेव परमार्थसत् अर्थक्रियासामर्थ्यलक्षणत्वाद्वस्तुनः इति खलुक्तम् । सन्तानश्च न स्वलक्षणरूपः । कटुत्वं—श्वासरोधकत्वम् । धर्मैरिति—वैशिष्ट्यं तृतीयार्थः । तस्य—वह्नेः । कार्यं यादृशं दृष्टं, तादृशमेव कारणं हि तदनुमापयेत् । यथा नीलः पटो नील

न च कथञ्चित् तत्कार्यत्वं कथञ्चिदतत्कार्यत्वं च धूमस्योपपन्नम् । सर्वात्मकस्य तदन्वयव्यतिरेकानुविधायिप्रभवत्वात् ॥

अथ सर्वात्मनाऽपि तत्कार्यत्वे—

धूमत्वमात्रमेवाग्निसहचारीति मन्यसे ।
सहचारित्वमेवास्तु तदुत्पत्तिकथा वृथा ॥ १७४ ॥§ 2264

## सिद्धान्ते कार्यलिङ्गकानुमानमुपपद्यत एव

ननु भवद्भिरपि कार्यानुमानमङ्गीकृतमेव । यथा शेषवत् इति व्याख्यास्यते । यथाऽऽह कणव्रतः—कार्यं कारणं संयोगि समवायि विरोधि चेति लैङ्गिकम् वै. सू. ९-२-१ इति—न—साहचर्योपलक्षणार्थत्वात् । धूमाग्न्योर्नदीपूरयोर्वा न कार्यकारणभावात् गमकत्वं यथोक्तन्यायेन; अपि तु नित्यसाहचर्यान्नियमादेवेति ॥ तन्तुमित्यर्थः । सर्वात्मकस्य—यावद्वस्तुस्वरूपस्य । धूमस्वरूपमेव सर्वं अन्वयव्यतिरेकाधीनवह्निहेतुकम् । न तत्रांशभेदो दृश्यते ॥ § 2265

---

७ ] दुर्लक्ष्यः— nyāma-wit_kha
२५ ] प्रस— nyāma-wit_ka

अपिः भिन्नक्रमः; तत्कार्यत्वेऽपीत्यन्वयः । धूमत्वेत्यादि । अयमर्थः— धूमस्वरूपमात्रस्यैव वह्न्यधीनत्वेऽपि धूमत्वाकारमात्रं वह्निसहचरितं, न कटुत्वाद्याकारोऽपि । यस्मिन्नंशे सहचरितो गृह्यते, तदंशमात्रस्य कार्ये सिद्धिः, नातिरिक्तस्येति चेत्—एवं सति साहचर्यनियम एव शरणीकर्तव्य इति तेनैव व्याप्तिनिश्चयः । कार्यकारणभावनिर्णयार्थं भवताऽपि तस्यावश्यापेक्षणीयत्वादिति भावः ॥ § 2266

कणव्रतः—कणादः । अनेन समानतन्त्रसंवादः प्रदर्शितः । साहचर्येति । यद्यपि कार्यानुमानमस्त्यस्माकं वस्तुस्वरूपपर्यालोचनया । गमकत्वं तु न कार्यकारणभावस्य, किन्तु तयोस्साहचर्यस्यैवेति न विरोध इत्यर्थः ॥ § 2267

उपर्युक्तकणादसूत्रे विरोधिनोऽपि लिङ्गत्वमुक्तम् । तत् कथं घटताम् ? विरोधिनोस्साहचर्यासंभवादिति शङ्कते—विरोधिनोरिति । उक्तमेवोपपादयति—विरोधिनोरिति । परस्परविरोधे हि न प्रकारान्तरस्थितिः इति न्यायादित्यर्थः । तयोः भावाभावयोः इत्यन्वयः ॥ § 2268

I.307/KSV

## कणादसूत्रसमर्थनम्

विरोधिनोः कथं साहचर्यमिति चेत्; सदसतोर्गम्यगमकभावात्, विरोधिनोरेकतरदर्शनात् अन्यतरस्याभावोऽनुमीयते । भावाभावयोश्च साहचर्यं तयोरस्त्येव । कणादसूत्रे कार्यादिग्रहणं चोपलक्षणम् ॥ § 2269

अन्येषामपि हेतूनां भूम्नां जगति दर्शनात् ।
सूर्यास्तमयमालोक्य कल्प्यते तारकोदयः ॥ १७५ ॥§ 2271

पूर्णचन्द्रोदयाद्वृद्धिरम्बुधेरवगम्यते ।
उदितेनानुमीयन्ते सरितः कुम्भयोनिना ॥ १७६ ॥§ 2273

शुष्यत्पुलिनपर्यन्तविश्रान्तखगपङ्क्तयः ।
पिपीलिकाण्डसञ्चारचेष्टानुमितवृष्टयः ॥ १७७ ॥§ 2275

भवन्ति पथिकाः पर्णकुटीरकरणोद्यताः ।
अन्येऽपि सौगतोद्गीतप्रतिबन्धद्वयोज्झिताः ॥ १७८ ॥§ 2277

कियन्तो बत ! गण्यन्ते हेतवः साध्यबोधकाः ।
लोकप्रसिद्धाः तादात्म्यतदुत्पत्त्यवधीरणात् ॥ १७९ ॥§ 2279

२४ ] योनिनः— nyāma-wit_kha    १ ] न्योऽपि— nyāma-wit_ka

डिम्भहेवाकसदृशं स्वमत्या तत्समर्थनम् ।§ 2280

अतश्च—

तत्स्वभावस्तत्कार्यमित्यादि व्यसनमात्रकम् ॥ १८० ॥§ 2282

§ 2283

केषामुपलक्षणमित्यत्राह—अन्येषामिति । अन्येषां—कारकहेतुभावरहितानामपि हेतूनां—ज्ञापकहेतूनाम् । शुष्यत्पुलिन...पङ्कयः इति विधेयविशेषणम् । अगस्त्योदये जलाशयाः प्रसन्ना भवन्तीति प्रसिद्धम् । प्रसादश्च जलस्यानाविलत्वं, तच्च वृष्टिशान्तौ भवेत् । अतः अगस्त्योदये सति वृष्ट्युपरतिरनुमीयत इति तात्पर्यम् ॥ § 2284

सञ्चाररूपा चेष्टा इत्यर्थः । अन्येऽपीति । किं बहुना ! तादात्म्यतदुत्पत्तिरहिताः, केवलसाहचर्यमात्रशालिनो हेतवो बहवो वर्तन्त एव । कृत्तिकोदयाद्रोहिण्युदयादिरूपा इति तादात्म्यतदुत्पत्तिभ्यामेव व्याप्तिसिद्धिरिति न युक्तमिति सारम् । उपसंहरति—अतश्चेति ॥ § 2285

I.308/KSV

## बौद्धमते सर्वथा व्याप्तिग्रहः न संभवति

अपि च— § 2286

व्यावृत्त्योर्लिङ्गलिङ्गित्वं, प्रतिबन्धश्च वस्तुनोः ।
विकल्पैर्ग्रहणं तस्य, कथं सङ्गच्छतामिदम् ? ॥ १८१ ॥§ 2288

उक्तं चैतत् प्रथम एवाह्निके पु. ८८-८९ इत्यलं प्रसङ्गेन । तस्मादनुमितिहेतुः सम्बन्धः साहचर्यमिति सिद्धम् । न तु शौद्धोदनिशिष्यपरिकल्पितमुभयमप्येतत् ॥ § 2289

## साहचर्यं तु सहजमेव

यत्त्वभ्यधीयत परैः किमधीनमस्य
तत्साहचर्यमिति तत्र विधिः प्रमाणम् ।
तादात्म्यतज्जननयोरपि चैष तेषां
तुल्योऽनुयोग इति किं विफलैः प्रलापैः ॥ १८२ ॥§ 2293

## अनुमितिकाले व्याप्तेः स्मरणमेव, न त्वनुभवः

नियमो व्याख्यातः । स्मृतेरिति कोऽर्थः ? उच्यते— § 2294

नियमो हि गृहीतोऽङ्गं अनुमेयप्रमां प्रति ।
न नारिकेलद्वीपस्थो धूमादग्निं प्रपद्यते ॥ १८३ ॥§ 2296

साध्यानुमितिवेलायां न चास्ति नियमग्रहः ।
नियमग्रहकाले च न साध्यमनुमीयते ॥ १८४ ॥§ 2298

साहचर्य—साहचर्यरूपः सम्बन्ध इत्यन्वयः । विधिः—नियतिः । वह्नेरौष्ण्यं, न जलस्येति कुतः ? इत्याक्षेपतुल्योऽयमिति भावः । अन्यथा—अनयोरेव तादात्म्यतदुत्पत्ती, नान्ययोरिति कथम् ? इत्येषः अनुयोगः तेषामपि तुल्य एवेति—यश्चोभयोस्समो दोषः इतिन्यायः स्मर्तव्य इति भावः ॥ § 2299

नारिकेलद्वीपस्थ इति । सर्वथाऽननुभूत वह्निधूमस्वरूप इति यावत् । अस्तु व्याप्तेः ज्ञाताया एवानुमितिजनकत्वम् । व्याप्तिज्ञानं स्मरणरूपमेवेति कुतोऽयं निर्बन्धः ? इत्यत्राह—साध्येति । न चास्तीति । न हि तदानीं व्यापकः वह्न्यादिः प्रत्यक्षः । यत्र च महानसादौ व्याप्तेर्ग्रहणं, तत्र न वह्न्याद्यनुमितिः । अतोऽगत्या पर्वते वह्न्यनुमितिकाले व्याप्तेः स्मरणमेवेति ॥ § 2300

I.309/KSV

तेन पूर्वगृहीतस्सन् इदानीं स्मृतिगोचरः ।
नियमः प्रतिपत्त्यङ्गं, तथाऽवगतिदर्शनात् ॥ १८५ ॥§ 2302

द्वितीयलिङ्गदर्शने सत्यपि नियमस्मरणमन्तरेण साध्यप्रमितेरमुत्पादात् ॥ § 2303

यत्रापि विषयेऽभ्यस्ते नैव सञ्चेत्यते स्मृतिः ।
तत्राप्यनेन न्यायेन बलात् सा परिकल्प्यते ॥ १८६ ॥§ 2305

## अनुमितिः स्मृतिरूपेति पक्षः

अत एव केचन प्रत्युत्पन्नकारणजन्यां स्मृतिमेवानुमानमुक्तवन्तः ॥ § 2306

## परोक्षे लिङ्गिनीतिपदप्रयोजनम्

प्रत्युत्पन्नं च कारणं कुत्रचिद्धर्मिणि धर्मान्तरसहचरितलिङ्गदर्शनमिति परोक्षे लिङ्गिनीत्युक्तम् ॥ § 2307

---

२५ ] ---Note : एतदारम्य ३१२ पुटे स्व पुस्तके लुप्तः ।
२५ ] ---Note : एवंचिह्नितान्तो भागः

## साध्यविशिष्टपक्ष एवानुमेयः, न साध्यमात्रम्

तत्र लिङ्गी तावदुच्यते—धर्मविशिष्टो धर्मी साध्यः, स एव लिङ्गीति । न धर्मिमात्रं साध्यम्; पर्वतादिधर्मिणः सिद्धत्वात् । न § 2308

तथाऽवगतिदर्शनात् इत्येतद्विवृणोति—द्वितीयेति । ननु असकृदभ्यस्तविषये लिङ्गदर्शनादेवानुमितिः । यथा भोजनस्य तृप्तिसाधनत्वानुमितिः । बुभुक्षितः अन्नं पश्यन्नेव भोक्तुमारभते । न हि तत्र मध्ये पूर्वानुभूतान्नाद्युपस्थितिपूर्वकं व्याप्तिस्मरणमनुभवसिद्धं इति चेदाह—यत्रापीति । सञ्चत्यते— स्पष्टमनुभूयते । एवञ्च अभ्यासबलात् जायमानं ज्ञानं सुशीघ्रजातत्वात् अनुमितिवन्न भासते । वस्तुतस्तु स निर्णयः अनुमितिरूप एवेत्यर्थः ॥ § 2309

केचनेति । एके तावद्वर्णयन्ति, लिङ्गलिङ्गिसम्बन्धस्मृतिरनुमानमिति इति न्यायवार्तिकं, वाचस्पतिना आचार्यदेशीयमतमाह—एके तावदिति इत्यवतारितं द्रष्टव्यम् ॥ § 2310

तत्रेति । लिङ्गी इत्येतद्व्याख्यायते इत्यर्थः । धर्मः—साध्यः, धर्मी—

धर्ममात्रम्; अग्नेरपि यत्र तत्र सिद्धत्वात् । न च द्वयोस्साध्यत्वम्; स्वतन्त्रयोस्तयोरपि सिद्धत्वादेव । तस्मादेकस्य द्वयोर्वा स्वातन्त्र्येणानुमेयता नावकल्पते इत्यवश्यमन्यतरविशिष्टोऽन्यतरः साध्यो वक्तव्यः ॥

## पक्षविशेष्यकानुमितिरेव स्वारसिकी

तत्रापि तु धर्मविशिष्टो धर्मी साध्यो युक्तः, न धर्मिविशिष्टो धर्मः । तथा हि—देशविशिष्टे वह्नौ साध्ये षोडशविकल्पाः संभवेयुः । १ सर्व एवाग्निः सर्वदेशविशिष्टः ? २ अनिर्धारितदेशविशेषविशिष्टः ? ३ पूर्वानुभूतमहानसादिदेशविशिष्टः ? ४ संप्रत्युपलभ्यमानपर्वतादिदेशविशिष्टो वा ? अनुमेयः स्यात् ?

५ अनिर्धारितविशेषो वा कश्चिदग्निः सर्वदेशविशिष्टः ? ६ अनिर्धारितदेशविशिष्टः ? ७ पूर्वानुभूतदेशविशिष्टः ? ८ परिदृश्यमानदेशविशिष्टो वाऽनुमेयः स्यात् ?

९ पूर्वानुभूतो वाग्निः सर्वदेशविशिष्टः ? १० अनिर्धारितदेशविशिष्टः ? ११ प्राक्दृष्टदेशविशिष्टः ? १२ उपलभ्यमानदेशविशिष्टः अनुमेयः स्यात् ?

१३ एवं सिषाधयिषितो वाऽग्निः सर्वदेशविशिष्टः ? १४ प्रागनुभूतदेशविशिष्टः ? १५ इदानी नुभूयमानदेशविशिष्टो वाऽनुमेयः ? इति ॥

तत्रैते पञ्चदशपक्षाः प्रत्यक्षविरोधसिद्धसाधनत्वादिदोषोपहता इत्यनादरणीया एव ॥ पक्षः । अन्यतरेति । पर्वते वह्निः, पर्वतो वह्निमान्—इति द्वेधाऽप्यनुमितेः सम्मतत्वादित्यर्थः ॥ § 2311

सर्व एवाग्निः इत्येतदुत्तरविकल्पत्रयेऽपि योज्यम् ॥ § 2312

अनिर्धारितविशेष इति । विशेषश्चात्र तार्णत्वादिः, महानसीयत्वादिः, तद्व्यक्तित्वादिकं वा । इदं उत्तरविकल्पत्रयेऽपि संबध्यते ॥ § 2313

प्रत्यक्षेत्यादि । अत्र आदिना व्याघातग्रहणम् । तत्राद्यपक्षपञ्चके

यश्च षोडशः पक्षः १६ एतद्देशविशिष्ट एषोऽग्निरिति तत्रापि देशविशेषावच्छेदमन्तरेणैव वह्निरिति गृहीतुमेव न शक्यत एवेति प्रथमं देश एव गम्यते । तस्य च पूर्वप्रतिपन्नत्वात् इदानीमनवगतदहनविशिष्टस्यानुमातुं योग्यत्वात् स एव साध्यो युक्तः ॥

अपि चाग्नेः साध्यतायां अनुपलब्धतद्धर्मः कथमनुमापकः स्यात् ? अनुपलब्धे तु ज्वलने न तद्धर्मतया धूमो गृहीतुं पार्यते । उपलब्धे तु हुतभुजि भवदपि निष्फलमेव धूमस्य तद्धर्मताग्रहणम्; अनुमेयस्य तदानीमभावात् । तस्मादग्निविशिष्टः परिदृश्यमानो देश एव साध्यः । स च स्वरूपतः प्रत्यक्षोऽपि परोक्षधर्मविशिष्टतया अनुमेय इति धूमधर्मयोगात् अग्निधर्मवान् स एवानुमीयते । सोऽनुमानस्य विषयो लिङ्गीत्युच्यते । परोक्षग्रहणं चैतदभिप्रायमेव ॥

### परोक्षे इति विशेषणमावश्यकम्

क्वचित्तु व्याप्तिस्मरणसमनन्तरमेव प्रत्यासीदतः प्रमातुः झटिति समुन्मिषन्नकस्मादेव प्रत्यक्षीभवति विभावसुरिति न तद्विशिष्ट- प्रत्यक्षविरोधः स्पष्टः । सर्वदेशवृत्तित्वत्य एकस्मिन् वह्नौ, सर्वेषु वा वह्निषु बाधितत्वात् । षष्ठे सिद्धसाधनम् । सप्तमे अष्टमे च व्याघातः । नवमे बाधः । दशमे व्याहतिः । एकादशे सिद्धसाधनम् । द्वादशे व्याहतिः । त्रयोदशे चतुर्दशे च बाधः । पञ्चदशेऽसिद्धिः ॥ § 2314

न शक्यत इति । विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकनिर्णयस्य कारणत्वादिति भावः । एवञ्च देश एव प्रथममवगतः, तदा च वह्निर्नानवगत इति अवगतस्य देशस्य विशेष्यत्वं अनवगतस्य वह्नेर्विधेयत्वमेव च युक्तमिति ॥ § 2315

अनुमेयस्याभावात् अनुमेयत्वविशिष्टवह्नेरभावात् । तदानीं वह्नेः सिद्धत्वादित्यर्थः । ननु परिदृश्यमानस्य देशस्य कथमनुमेयत्वमित्यत आह— स चेति । अरोगोऽयं निष्पन्नः इत्यादौ तथा व्यवहारादिति भावः । एतदभिप्रायं—विशेषणस्य परोक्षत्वात् विशिष्टस्यापि परोक्षत्वतात्पर्यकम् ॥ § 2316

तद्विशिष्टतया—साध्यविशिष्टतया । यत्र यवनिकाद्यन्तरितः यः पुरुषः धूमं पश्यन् यावत् व्याप्तिं स्मरति, तावदेव यवनिकापगमादिना वह्नीन्द्रिय

तयाऽपि धर्मिणः परोक्षत्वमवकल्पत इति तद्व्यावृत्तये परोक्षग्रहणम् । नित्यपरोक्षस्यापि चेश्वरादृष्टेन्द्रियादेरनुमेयतां वक्ष्यामः ॥

तस्माद्यथोचिताल्लिङ्गात् यथोक्तनियमस्मृतेः ।
यथोक्तलिङ्गिविज्ञानमनुमानमिति स्थितम् ॥ १८७ ॥ § 2319

### अनुमानप्रामाण्याक्षेपः

३१ नित्य] ३०९ पुटे द्रष्टव्यम् ।

ननु ! सत्यनुमानस्य प्रामाण्ये, लक्षणाश्रयः ।
कार्यो विचारः, न पुनः प्रामाण्यं तस्य युज्यते ॥ १८८
॥§ 2321

तथा चाहुः—प्रामाण्यस्यागौणत्वात् अनुमानादर्थनिश्चयो दुर्लभः । पक्षधर्मादिरूपं हि लिङ्गस्य बलाद्गौण्या वृत्त्या दर्शयितव्यम् । धर्मे हि साध्ये न हेतोः पक्षधर्मत्वम्, अग्निधर्मत्वात् धूमस्य । धर्मिणि साध्ये हेतोरनन्वयित्वम्, न हि यत्र धूमः तत्र पर्वत इत्यन्वयः । द्वये तु साध्ये द्वयमपि नास्ति । न हि दहनमहीध्रयोः धूमो धर्मः ॥ संयोगात् वह्निप्रत्यक्षं तत्र तस्य जायते । तत्राव्यवहितपूर्वक्षणे व्याप्तिस्मृतेस्सत्वेन तज्ज्ञानस्यानुमानत्ववारणाय परोक्षपदमित्यर्थः । ननु परोक्षत्वं चानुमितिकालिकमेव वक्तव्यम् । अन्यथा व्याप्तिस्मरणस्यैवासंभवात् । एवञ्चातीन्द्रियवस्तुनः कदाऽप्यननुभवेन तत्र व्याप्तिस्मरणमेव कथमिति चेत् तत्राह— नित्येति । प्रसक्तमुपसंहरति— यथोचितादिति ॥ § 2322

लक्षणाश्रयः—लक्षणविषयकः विचारः कार्यः—कर्तुमर्हः । अगौणत्वात्— यत् अगौणं तदेव किल प्रमाणम्, अन्यथा लौकिकलिपिपत्रताम्रशासनादीनामपि प्रमाणत्वप्रसङ्गः । प्रमाणज्ञापकत्वमात्रात् खलु तेषां प्रमाणत्वम् । अन्यथा प्रमाणेयत्तैव दुर्वचा स्यादिति भावः । अनुमानस्य गौणत्वमेव विस्तरशः उपपादयति—पक्षधर्मेत्यादि । धर्मे—केवलवह्न्यादौ । अग्निधर्मत्वादिति । एकसम्बन्धिविधया ह्यनुमानप्रवृत्तिः । तत्र वह्निव्याप्यत्वात् धूमस्य व्याप्तयाख्यसम्बन्धानुयोगित्वात् वह्निधर्मः धूम इत्युक्तिः । धर्मिणि—केवलपर्वतादौ । न हीत्यादि । वह्निव्याप्यो हि धूमः, न तु पर्वतव्याप्यः । संयोगसम्बन्धमात्रं तु गगनेऽप्यस्तीत्यप्रयोजकम् ॥ § 2323
I.313/KSV

नाप्येवमन्वयः—यत्र धूमः तत्र पर्वताग्नी इति । धर्मविशिष्टे धर्मिणि साध्ये, तदुभयमघटमानमेव ॥ § 2324

नाप्यग्निविशिष्टधराधरधर्मतया धूमः प्रथममुपलब्धुं शक्यते ॥ § 2325

न चाप्येवमन्वयः—यत्र धूमः तत्राग्निमान् पर्वत इति । तस्मादवश्यं पक्षधर्मत्वान्वयव्यवहारसिद्धये धर्मविशिष्टे धर्मिणि रूढः पक्षशब्दः तदेकदेशे धर्मिणि गौण्या वृत्त्या वर्णनीयः । अन्वयप्रदर्शनसमये च तदेकदेशे तथैव योजनेऽतिगौणलक्षणत्वादिन्द्रियार्थसन्निकर्षजत्वादिवदगौणलक्षणत्वाभावादनुमानमप्रमाणम् ॥ § 2326

## व्याप्तिरपि दुर्ग्रहा

४ ] र्थः— nyāma-wit_ka

५ ] नार्थ— nyāma-wit_kha

अपि च— § 2327

विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात् ।
तद्वतोऽनुपपन्नत्वात् अनुमानकथा कुतः ? ॥ १८९ ॥§ 2329

## साहचर्यमपि न व्याप्तिग्राहकम्

साहचर्ये च सम्बन्धे विस्रम्भ इति मुग्धता ।
शतकृत्वोऽपि तद्दृष्टौ व्यभिचारस्य संभवात् ॥ १९० ॥§ 2331

अघटमानमिति । वैशिष्ट्याभानात् इति हेतुः ॥ § 2332

प्रथमं—एतदनुमानात् वह्नौ पर्वतीयत्वनिर्णयात् पूर्वम् ॥ § 2333

न चेत्यादि । तत्र अग्निमान् पर्वत इत्युक्ते हि पर्वतस्याप्यधिकरणभूतमन्यत् भासेत । स चानुभवविरुद्धः । अन्वयः—यत्र धूमः तत्राग्निरिति । पक्षशब्द एव गौणश्चेत्, तमादाय हेतोः पक्षधर्मत्वं तु ततोऽपि गौणमापन्नमिति भावः । एतादृशपक्षधर्मत्वादिपु. २८२विशिष्टलिङ्गस्यानुमानरूपत्वे तु गौणमेव प्रमाणं तत् ॥ § 2334

विशेष इत्यादि । पर्वतीयवह्निधूमयोर्न व्याप्तिग्रहसंभवः । सामान्यतः यत् धूमवत्, तत् वह्निमदिति तु महानसादौ सिद्धमेव । अतः एतादृशवह्निव्याप्यधूमवान् पर्वत इति परामर्शोऽपि न घटत एवेति अनुमानकथैव गलहस्तिता ॥ § 2335

मुग्धता—मौढ्यम् । संभवात्—पार्थिवत्वलोहलेख्यत्वयोः शतशः सहचारदर्शनेऽपि वज्रमणौ व्यभिचारात् । उक्तार्थे पूर्वपक्षिसम्मतिमाह—

देशकालदशाभेदविचित्रात्मसु वस्तुषु ।
अविनाभावनियमो न शक्यो वक्तुं, आह च ॥ १९१ ॥§ 2338

अवस्थादेशकालादिभेदाद्भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥ १९२ ॥§ 2340

## व्याप्तिः असर्वज्ञैर्न गृहीतुं शक्या

भवन्नप्यविनाभावः परिच्छेत्तुं न शक्यते ।
जगत्त्रयगताशेषपदार्थालोचनाद्विना ॥ १९३ ॥§ 2342

न प्रत्यक्षीकृता यावद्धूमाग्निव्यक्तयोऽखिलाः ।
तावत्स्यादपि धूमोऽसौ योऽनग्नेरिति शङ्क्यते ॥ १९४ ॥§ 2344

२३ ] वस्तुं— nyāma-wit__kha

## सर्वज्ञानां तु नानुमानापेक्षा

ये तु प्रत्यक्षतो विश्वं पश्यन्ति हि भवादृशाः ।
किं दिव्यचक्षुषामेषामनुमानप्रयोजनम् ॥ १९५ ॥§ 2346

## सामान्यद्वाराऽपि न व्याप्तिग्रहसंभवः

सामान्यद्वारकोऽप्यस्ति नाविनाभावनिश्चयः ।
वास्तवं हि न सामान्यं नाम किञ्चन विद्यते ॥ १९६ ॥§ 2348

आह चेति । देश-काल-अवस्थाभेदैः एकमेव वस्तु विविधविरुद्ध-विचित्रशक्तियुक्तं दृश्यते । एवं वस्तुस्वरूपे अनियते नियमरूपव्याप्तिः कथम् ? तेन भावानां—वस्तूनां सिद्धिश्च कथम् ? § 2349

उक्तमेवोपपादयति—न प्रत्यक्षीकृतेति । यथा अग्निमत्सु बहुषु सधूमेषु सत्स्वपि अयोगोलके व्यभिचारः, तथा धूमवति कुत्रचित् वह्निरपि व्यभिचरितः स्यादिति भावः ॥ § 2350

भवादृशा इति नर्मोक्तिः । अनुमानेन प्रयोजनं किम् ? इत्यन्वयः ॥ § 2351

ननु व्यक्तीनामनन्तत्वेऽपि सर्वव्यक्त्यनुगतसामान्यस्यैकस्य सत्त्वेन यत्र धूमत्वविशिष्टं, तत्र वह्नित्वविशिष्टमितिरीत्या सामान्यद्वारैव व्याप्तिर्ग्रहीष्यते इति चेत् तत्राह—सामान्येति । तत्र हेतुमाह—वस्तवमिति । एतत्तत्त्वं सामान्यप्रकरणे व्यक्तीभविष्यति ॥ § 2352
I.315/KSV

## भूयोदर्शनेनापि न व्याप्तिनिश्चयः

भूयोदर्शनगम्याऽपि न व्याप्तिरवकल्पते ।
सहस्रशोऽपि तद्दृष्टौ व्यभिचारावधारणात् ॥ १९७ ॥§ 2354

बहुकृत्वोऽपि वस्त्वात्मा तथेति परिनिश्चितः ।
देशकालादिभेदेन दृश्यते पुनरन्यथा ॥ १९८ ॥§ 2356

भूयोदृष्ट्या च धूमोऽग्निसहचारीति गम्यताम् ।
अनग्नौ तु स नास्तीति न भूयोदर्शनाद्गतिः ॥ १९९ ॥§ 2358

५ ] शः— nyāma-wit_kha
६ ] क— nyāma-wit_ka
२ ] ष्टे— nyāma-wit_kha
५ ] दृष्ट्वा— nyāma-wit_kha

## साहचर्यनियमोऽपि दुर्ग्रहः

न चापि दृष्टिमात्रेण गमकाः सहचारिणः ।
तत्रैव नियतत्वं हि तदन्याभावपूर्वकम् ॥ २०० ॥§ 2360

नियमश्चानुमानाङ्गं गृहीतः प्रतिपद्यते ।
ग्रहणं चास्य नान्यत्र नास्तितानिश्चयं विना ॥ २०१ ॥§ 2362

व्यभिचारेति । पार्थिवत्वलोहलेख्यत्वयोः शतशस्सहचारदर्शनेऽपि वज्रमणौ व्यभिचारात् । पूर्वश्लो. १९० क्वचित्सहचारदर्शनं दूषितं, अद्य तु भूयोदर्शनमिति न पौनरुक्त्यम् । वस्तूनामस्थिरत्वादपि भूयोदर्शनं व्यभिचरत्येवेत्यप्याह—बहुकृत्व इति । बहुशः तथेति—तादृशशक्तिविशिष्टोऽयमितिरीत्या परिनिश्चितः ॥ § 2363

एवं व्यतिरेकसहचारोऽपि न भूयोदर्शनेनावगन्तुं शक्य इत्याह— अनग्नाविति । गतिः—अवगतिः ॥ § 2364

बहुषु उभयव्यतिरेकदर्शनेऽपि यत्र कुत्रचित् व्यभिचारे, भूयोदर्शनं निरुपयोगमेव । यावत्संभवं ग्रहणं त्वनुपयुक्तमित्याह—न चापीति । वास्तविकसहचारवतोः कुत्रचित्तथा ज्ञानमात्रान्न व्याप्तिनिश्चयः । न हि साहचर्यमात्रं व्याप्तिः, किन्तु नियतसाहचर्यमेव । नियमश्च ज्ञात एवानुमितिहेतुः, न तु स्वरूपतः । नियमज्ञानं च साध्याभाववति सर्वत्र हेतोरभावज्ञानादेव । अतश्च पूर्वोक्तदोषो दुरतिक्रम एव । ननु वह्निमति महानसादौ धूमदर्शनात् वह्न्यभाववति ह्रदादौ धूमादर्शनात्

दर्शनादर्शनाभ्यां हि नियमग्रहणं यदि ।
तदप्यसत्, अनग्नौ हि धूमस्येष्टमदर्शनम् ॥ २०२ ॥§ 2367

अनग्निश्च कियान् ? सर्वं जगज्ज्वलनवर्जितम् ।
तत्र धूमस्य नास्तित्वं नैव पश्यन्त्ययोगिनः ॥ २०३ ॥§ 2369

तदेवं नियमाभावात् सति वा ज्ञप्त्यसंभवात् ।
अनुमानप्रमाणत्वदुराशा परिमुच्यताम् ॥ २०४ ॥§ 2371

## अनुमानानां प्रामाण्यं दुर्निरूपमेव

अनुमानविरोधोऽपि यदि चेष्टविघातकृत् ।

२ ] पश्यन्ति— nyāma-wit__ka
५ ] वा— nyāma-wit__ka

विरुद्धाव्यभिचारो वा सर्वत्र सुलभोदयः ॥ २०५ ॥§ 2373

अत एवानुमानानामपश्यन्तः प्रमाणताम् ।
तद्विस्रंभनिषेधार्थं इदमाहुर्मनीषिणः ॥ २०६ ॥§ 2375

हस्तस्पर्शादिनान्धेन विषमे पथि धावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥ २०७ ॥§ 2377

अपि च—

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥ २०८ ॥§ 2379

## अनुमानप्रामाण्यसमर्थनम्

अत्राभिधीयते—किमयमनुमानस्वरूपाक्षेप एव क्रियते ? उत तत्तत्तार्किकोपलक्षिततल्लक्षणाक्षेपः ? इति ॥ वह्निमत्येव धूमो वर्तत इति नियमः ज्ञायत एवेत्यत्राह—दर्शनेति । कियान्— अनवधिक इत्यर्थः । तदेव विव्रियतेऽनन्तरपादेन । नैवेति । न हि तत्र सामान्यमुखेनापि ग्रहणं भवेत् । न हि अनग्नित्वं नाम कश्चनानुगतधर्मोऽस्ति, येन तत्पुरस्कारेण वा नियमो गृहीतः स्यादित्यर्थः ॥ § 2380

एवमनुमानस्यासाधकत्वमुक्त्वा, बाधकत्वमपि तस्य न संभवतीत्याह—अनुमानविरोध इति । अनुमानस्यानुमानाद्विरोधाङ्गीकारे तु तादृशप्रत्यनुमानं सर्वत्र सुलभं इति पूर्वमेवोक्तम् २९३ पु. । अनुमानप्रधानेन—अन्धविशेषणमिदम् । यत्नत्यादि । अत्र नैषा तर्केण मतिरापनेया कठ. २-९ तर्काप्रतिष्ठानात् ब्र. सू. २-१-१६ इत्यादिकमप्यनुसन्धेयम् ॥ § 2381

I.317/KSV

तत्रानुमानस्वरूपं चाशक्यनिह्नवमेव, सर्वलोकप्रसिद्धत्वात् ॥ § 2382

अबलाबालगोपालहालिकप्रमुखा अपि ।
बुध्यन्ते नियतादर्थात् अर्थान्तरमसंशयम् ॥ २०९ ॥§ 2384

अनुमानापलापे तु प्रत्यक्षादपि दुर्लभा ।
लोकयात्रेति लोकाः स्युः लिखिता इव निश्चलाः ॥ २१० ॥§ 2386

प्रत्यक्षदृष्टमपि पदार्थजातं तज्जातीयत्वलिङ्गव्यापारेण सुखसाधनं इतरकारणमिति वा निश्चित्य तदुपाददते, जहति वा लौकिकाः ॥ § 2387

---

१४--१५ ] ता— nyāma-wit_ka

## अनुमानलक्षणाक्षेपसमाधानम्

अथाविचारितरमणीयतैव तत्त्वं, न तु लक्षणनियमः शक्यक्रियस्तस्येति लक्षणाक्षेपोऽयमुच्यते—सोऽप्ययुक्तः । यतः— § 2388

यं कश्चिदर्थमालोक्य यः कश्चिन्नावगम्यते ।
कश्चिदेवाक्षिपत्यर्थमर्थः कश्चिदिति स्थितिः ॥ २११ ॥§ 2390

तत्र वस्तुस्वभावोऽयमिति पादप्रसारिका ।
दृश्यते ह्यविनाभूतादर्थादर्थान्तरे मतिः ॥ २१२ ॥§ 2392

अतो यद्दर्शनाद्यत्र प्रतीतिरुपजायते ।
तयोरस्त्यर्थयोः कश्चित् सम्बन्ध इति मन्महे ॥ २१३ ॥§ 2394

तदात्मतातदुत्पत्ती न श्रद्दधति तद्विदः ।
साहचर्यं तु सम्बन्ध इति नो हृदयङ्गमम् ॥ २१४ ॥§ 2396

हालिकः—हलं बहतीत्यर्थे ठक् । कृषीबलः—पामर इति यावत् । अनुमानमन्तरा केवलात् प्रत्यक्षात् लोकयात्राऽनिर्वाहमेवोपपादयति—प्रत्यक्षेति । इतरकारणं—दुःखसाधनम् । न हि पुरतोवर्त्यन्नस्य तृप्तिसाधनत्वं तदानीं प्रत्यक्षमिति शेषः ॥ § 2397

अस्त्यनुमानं लोके, परन्तु तत्स्वरूपहेत्वादिकं त्वनिर्वचनीयमिति विकल्पं द्वितीयं प्रतिवक्ति—अथेति । यं कश्चिदिति । न हि घटं दृष्ट्वा पटं प्रत्येति मनुजः, धूमं दृष्ट्वा तु वह्निं सर्वोऽपि प्रत्येत्येव । अतोऽस्त्यनयोर्विशेषः । स एवाविनाभाव इति व्याप्तिरिति चोच्यत इति भावः । तद्विदः—तयोस्सम्बन्ध

तस्मिन् सत्येव भवनं न विना भवनं ततः ।
अयमेवाविनाभावो नियमः सहचारिता ॥ २१५ ॥§ 2400

किंकृतो नियमोऽस्यास्मिन्निति चेदेवमुत्तरम् ।
तदात्मतादिपक्षेऽपि नैष प्रश्नो निवर्तते ॥ २१६ ॥§ 2402

ज्वलनाज्जायते धूमः न जलादिति का गतिः ?
एवमेवैतदिति चेत्, साहचर्येऽपि तत्समम् ॥ २१७ ॥§ 2404

तर्कस्य यावान् विषयः स तावति निरूप्यते ।

१ ] भवने— nyāma-wit_kha

वस्तुस्वभावभेदे तु न तस्य प्रभविष्णुता ॥ २१८ ॥§ 2406

अयं च विषयो युक्तेः, यदुक्तं नियमाद्विना ।
नार्थादर्थान्तरे ज्ञानं अतस्तस्य प्रकल्पनम् ॥ २१९ ॥§ 2408

ततः परं तु नियमोऽप्येष किंकृतः ? इति न युक्तिः प्रभवति । तादात्म्यतदुत्पत्त्योरनुपपन्नत्वात् । अतो नियम एव विरम्यते ॥

न च प्रतिभामात्रमानुमानिकी प्रमितिरिति वक्तुं युक्तम्; विदः । साहचर्यमेव विशिनष्टि—तस्मिन्निति । ततो विना—इत्यन्वयः । एष प्रश्नः—किंकृतस्तयोरेव तादात्म्यं तदुत्पत्तिश्चेति प्रश्नः । प्रतिपक्षी उत्तरं वदति—एवमिति । तथानुभवादिति भावः । तुल्योऽयं समाधिरस्माकमपीत्याह—साहचर्येऽपीति । ननु अनुमानप्रामाण्यं तर्कविरुद्धं, तर्काश्च पूर्वमुपपादिताः; इत्यत्राह—तर्कस्येति । स्वभावभेदः—स्वभावविशेषः । तर्कोऽपि सर्वत्र नैकरूपः प्रवर्तेत, न हि यदि वह्निर्द्रव्यं तर्हि पृथिव्यादिवन्न दहेत् इति तर्कः प्रवर्तितुमलम् । धर्मिग्राहकप्रमाणात् तत्तदसाधारणधर्मविशिष्टधर्मिसिद्धिं तर्को न निवारयेत् । नियममन्तरा एकज्ञानात् अन्यस्य ज्ञानं न भवतीति यदुक्तं, अयमेव युक्तेः—तर्कस्य विषयः । विधेयप्राधान्यात् पुल्लिङ्गत्वम् । तथा च न तर्कस्य निरवकाशत्वमित्यर्थः ॥ § 2409

ततः परं—एवमनुभवान्नियमसिद्ध्यनन्तरम् ॥ § 2410

ननु भोजनोत्कण्ठादेः भविष्यद्भ्रात्रागमनज्ञानं पूर्वमुक्तम्, न हि तत्र नियतसाहचर्यं शपथमन्तरेण शक्यम्, एवमेवानुमानमप्यनिर्वचनीयहेतुकमेव कुतो न स्यादित्यत्राह—न चेति । प्रतिभास्थलेऽथसत्यत्वनिर्बन्धो नास्ति

नियतात् कुतश्चिदेव वस्तुनि प्रतीतिदर्शनादित्युक्तत्वात् । नियमश्च यद्यगृहीत एव प्रतीत्यङ्गं भवेत्, नारिकेलद्वीपवासिभिरपि धूमदर्शनात् कृशानुरनुमीयेत । न चैवमस्तीति नियमग्रहणमपेक्षणीयम् ॥

## मानसं व्याप्त्यवधारणम्

यच्च विकल्पितं अशक्यं तद्ग्रहणमिति—तत्र केचिदाचक्षते— मानसं प्रत्यक्षं प्रतिबन्धग्राहीति । प्रत्यक्षानुपलंभाभ्यां अनलसहचरितमनग्नेश्च व्यावर्तमानं धूममुपलभ्य विभावसौ नियतो धूम इति मनसा प्रतिपद्यते ॥

मनश्च सर्वविषयं केन वा नाभ्युपेयते ।
असन्निहितमप्यर्थमवधारयितुं क्षमम् ॥ २२० ॥§ 2413

## सामान्यद्वारा व्याप्तिः

न च सकलत्रिभुवनविवरनिरुद्धधूमाग्निव्यक्तिसार्थसाक्षात्करणमुपयुज्यते, ज्वलनत्वादिसामान्यपुरस्सरतया व्याप्तिग्रहणात् ॥

९ ] मो— nyāma-wit_kha
१२ ] ज्यते— nyāma-wit_kha
३० ] मपी— nyāma-wit_kha

यत्तूक्तं—सामान्यं वास्तवं नास्तीति—तत् शब्दार्थचिन्ताप्रसङ्गे प्रतिसमाधास्यते ४ आह्निके ॥ अत्र त्वस्तीति प्रतिभातोऽनुमानमत्यन्तविलक्षणमित्यर्थः । नारिकेलद्वीपवासिभिः—कदाप्यदृष्टवह्निधूमस्वरूपैः ॥ § 2414

प्रत्यक्षानुपलंभाभ्यां—वह्निमत्येव दर्शनेन वह्न्यभाववत्वदर्शनेन च । उत्तरत्र यथासंख्यमिदमन्वेति । अनलसहचरितं—इत्यस्य धूमं इत्यनेनान्वयः । विभावसौ नियतः—वह्निनिरूपितनियमवान् । ननु मनसः बहिर्विषयेऽस्वातन्त्र्यात् कथं प्रतिबन्धग्रहणं मानसमित्यत्राह—मनश्चेति । वह्निधूमयोः बाह्यत्वेऽपि तयोर्नियमज्ञानं आन्तरमेवेति भावः ॥ § 2415

निरुद्धेति । अन्तर्गतेत्यर्थः ॥ § 2416

I.320/KSV

## यौक्तिकप्रत्यक्षात् व्याप्त्यवधारणरूपपक्षः

अपरे पुनः योगिप्रत्यक्षकल्पं यौक्तिकं सम्बन्धग्राहि प्रत्यक्षं प्रतिपेदिरे किल । धूमत्वाग्नित्वसामान्यपुरस्कारेण व्याप्यव्यापकयोरन्वयो नाम गृह्यताम्, व्यतिरेकस्त्वनग्निभ्यः धूमस्य ग्रहीतव्यः । अनग्नयश्चातिविततताः । न च तेष्वनग्नित्वं नाम सामान्यमस्ति । तेन समस्तत्रैलोक्यान्तर्गताग्न्यनग्निगतान्वयव्यतिरेकग्राहिप्रत्यक्षव्यतिरेकेण न प्रतिबन्धोऽवधृतो भवेत् । अनवधृतश्च न प्रमाङ्गम् । अस्ति च प्रमेति युक्तिबलात् प्रतिबन्धग्राहकमेकस्मिन् क्षणे प्रत्यक्षमिदमशेषव्यक्तिविषयमसंवेद्यमानमपि कल्पितमिति यौक्तिकमुच्यते ॥ § 2417

## व्यतिरेकसहचारनिश्चयं विनापि व्याप्तिर्निर्णीयते

अन्ये पुनः अत एव तत्कल्पनाभयात् भूयोदर्शनपरिच्छिन्नसामान्यपुरस्सरान्वयमनपेक्षितव्यतिरेकनिश्चयमेव लिङ्गं गमकमभ्युपागमन् । यथोक्तम्—श्लोक. वा. १-१-५, अनु. १३४-१३७ § 2418

मम त्वदृष्टिमात्रेण गमकाः सहचारिणः इति ॥ § 2419

योगीति । योगिनो हि सर्वं साक्षात्कुर्वन्तीति श्रूयते । इन्द्रियासन्निकृष्टस्य कथं प्रत्यक्षत्वमिति शङ्कायां, कार्यानुरोधेन कारणस्य कल्पनीयतया योगप्रभावजनितमदृष्टविशेषं कारणमामनन्ति । एवमेवात्रापि यत्र धूमस्तत्राग्निः इति व्याप्तिः सर्वानुभवसिद्धा । अन्वयग्रहणं यद्यपि सामान्यद्वारा भवेत् । अनग्निष्वनुगतसामान्याभावात् व्यतिरेकग्रहणं तु न तथा भवेत् । दृश्यते त्वनुमितिः । व्याप्तिग्रहणस्यानुमितिमूलकत्वे त्वनवस्था । अतः गत्यन्तराभावात् फलबलेन युक्तिमूलकमेव व्याप्तिप्रत्यक्षं प्रथमतः कल्पनीयम् । न चैकस्मिन्नेव क्षणे युक्तिवशाद्वा सर्वव्यक्तिप्रत्यक्षं नानुभवसिद्धमिति शङ्क्यम्

२४ ] युक्तं— nyāma-wit_kha

। ज्ञानस्यातिसूक्ष्मत्वेन दुर्विज्ञेयत्वादज्ञाततौल्यं भवेत् । ज्ञानद्वयादनुमितिस्थले यथा वा विशिष्टं ज्ञानं फलबलेन कल्प्यते तथात्राप्युपपद्यते । अतो यौक्तिकप्रत्यक्षगम्यः प्रतिबन्ध इति ॥ § 2420

अत एवेत्यस्यैव प्रपञ्चः—तत्कल्पनाभयादिति । भूयोदर्शनपरिच्छिन्नः सामान्यपुरस्सरः अन्वयः यस्येति बहुव्रीहिः । अदृष्टिमात्रेण—

अयमाशयः—

भूयोदर्शनतस्तावत् उदेति मतिरीदृशी ।
नियतोऽयमनेनेति सकलप्राणिसाक्षिका ॥ २२१ ॥§ 2423

तावता च गमकत्वमौत्सर्गिकं सिद्ध्यति । मीमांसकानां तु विपक्षे दर्शनं बाधकः प्रत्ययः । न च सोऽस्ति, नाद्य यावदनग्नौ धूमो दृष्टः । अनुत्पन्नेऽपि बाधके तदाशङ्कनमयुक्तमित्युक्तं तैः—

दोषज्ञाने त्वनुत्पन्ने न शङ्क्या निष्प्रमाणता इति ॥
श्लो. वा. १-२-६०§ 2425

**व्यतिरेकनिश्चयः आवश्यकः**

एतत्तु न चारु । व्यतिरेकनिश्चयमन्तरेण प्रतिबन्धग्रहणानुपपत्तेरित्युक्तत्वात् । ज्ञापकत्वाद्धि नियमः स्वग्रहणमपेक्षते । नियमश्चायमुच्यते—यत् तस्मिन् सति भवनं, ततो विना न भवनमिति । भूयोदर्शनतश्च तस्मिन् सति भवनमित्यन्वयमात्रपरिच्छेदादर्धगृहीतो नियमः स्यात्, ततो विना न भवनमित्यस्यार्थस्यापरिच्छेदादिति ॥ यत्र कुत्रचिद्वह्निधूमयोरदर्शनत एव, न तु अवह्निषु सर्वत्र तन्निर्णयः अपेक्षित इत्यर्थः । सहचारिणः—निर्णीतसाहचर्यमात्रवन्तः ॥ § 2426

ननु व्यतिरेकानिश्चये कथं नियतसाहचर्यं गृह्येत । न हि साहचर्यमात्रं व्याप्तिः; व्यभिचारात् । अतः अन्वयग्रहणमात्रान्न प्रतिबन्धावधारणमित्यत्राह—अयमाशय इति । औत्सर्गिकमिति । एतदुक्तं भवति । अनग्नीनां सर्वेषां दुर्ज्ञेयत्वेऽपि कुत्रचिद्ध्रदादौ व्यभिचारादर्शनात् तादन्मात्रव्यतिरेकग्रहसहकृतादन्वयग्रहादेव व्याप्तिः यावद्बाधं निर्णेष्यत एव । बाधस्य कुत्राप्यदर्शनात् गृहीता व्याप्तिस्तावत्पर्यन्तं तथैवावतिष्ठत इति । अयमेवार्थः विव्रियते—अनन्तरवाक्यैः ॥ § 2427

उक्तमेवोपपादयति—ज्ञापकत्वादिति । ज्ञापकत्वं—एकसम्बधिज्ञानविधया इतरज्ञानजनकानां अयं स्वभावः—स्वयं ज्ञातानामेव ज्ञापकत्वमिति इत्यर्थः ॥ § 2428

I.322/KSV

२० ] सकला— nyāma-wit_ka
२६ ] न तद्य— nyāma-wit_kha

## व्यतिरेकोऽपि गृहीतुं शक्यत एव

अपरे पुनः अनग्नित्वसामान्यमन्तरेणापि योगिप्रत्यक्षकल्पनामकुर्वन्त एव मानसप्रत्यक्षगम्यमन्वयव्यतिरेकमाहुः। धूमाग्निसामान्ये तावत्सहचरिते उपलब्धे, तद्वत्तदभावावपि सहचरितावुपलभ्येते एव। धूमत्वसामान्यस्यानग्नौ जलादावदर्शनात्। सर्वगतत्वेऽपि सामान्यानां वृत्तिभेदो नियामक इति वक्ष्यते ॥ § 2429

यद्यपि चानग्नित्वाद्यभावसामान्यं नास्ति; तथाऽपि प्रतिषेध्याग्नित्वसामान्यानुगमसिद्ध्यैव तदभावानुगमग्रहणं सिद्ध्यति ॥ § 2430

## स्वपक्षेण व्याप्तिग्रहसमर्थनम्

सकलव्यक्तिविज्ञानमनङ्गं व्याप्तिनिश्चये।
भावसामान्ययोर्यद्वत् तथैव तदभावयोः ॥ २२२ ॥§ 2432

पूर्वोक्त३२० पु.पक्षात् वैलक्षण्यसूचनाय—योगिप्रत्यक्षेत्यादि। धूमाग्निसामान्ये—धूमाग्न्योः सामान्ये। तद्वत्—धूमत्ववह्नित्वद्वारैव। वह्न्यभावो नाम वह्नित्वावच्छिन्नप्रतियोगिकाभावः, एवं धूमाभावः—धूमत्वावच्छिन्नप्रतियोगिकः। एवञ्च भावयोरिवाभावयोरपि धूमत्वादिकमेवानुगमकं भवितुमर्हति। अनग्नौ जलादौ धूमत्वावच्छिन्नत्यादर्शने स व्यतिरेकः अन्वयवदेव वह्न्यभावधूमाभावादिकं सामान्यद्वारा क्रोडीकुर्यादेवेति। ननु धूमत्वादिकं सर्वगतमिति भवता सिद्धान्तः। अतश्च जलादौ कथं तदभावः, तदवच्छिन्नाभावो वा ? इत्यत्राह—सर्वगतत्वेऽपीति। जातेः सर्वगतत्वेऽपि समवायेन सा यत्र वर्तते तत्रैव स्वाभावप्रतीतिं निरुणद्धि, न तु स्वरूपतो यत्र वर्तते तत्र। समवायेन जातिः व्यक्तिष्वेव वर्तते। अतस्तत्र तत्प्रतीतिः, व्यक्तेर्जातिव्यञ्जकत्वात्। अन्यत्र तु व्यञ्जिकाया व्यक्तेरभावेन तदभावप्रतीतिरित्यादिकं तत्प्रकरणे वक्ष्यत ४ आह्निके इत्यर्थः ॥ § 2433

तद्वदित्याद्यनुपदोक्तं स्फुटयति—यद्यपीत्यादिना ॥ § 2434

भावयोरिति वक्तव्ये, व्याप्तेस्सामान्यप्रधानकत्वेन भावसामान्ययोरित्युक्तम्। यथा अन्वयग्रहणकाले व्यक्तीनां प्रातिस्विकभानं नोपयुक्तं तथा

भावयोः साहचर्यं यत् अन्वयं तत् प्रचक्षते।
व्यतिरेकं तु मन्यन्ते साहित्यं तदभावयोः ॥ २२३ ॥§ 2437

साध्यसाधनभावस्तु भवेद्यत्राप्यभावयोः।
तयोरेवान्वयस्तत्र व्यतिरेकस्तु भावयोः ॥ २२४ ॥§ 2439

१६ ] त्व— nyāma-wit__ga

तदेवमभावान्वयवद्भावव्यतिरेकोऽपि प्रत्यक्षगम्यो भवत्येव ॥

इयानेव विशेषस्तु भावयोर्यादृशी ययोः ।
व्याप्यव्यापकता सैव व्यत्यस्ता तदभावयोः ॥ २२५ ॥§ 2441

अभावयोस्तु गम्यगमकभावे भावयोर्व्याप्तिव्यत्ययो द्रष्टव्यः । एवञ्च प्रतिषेध्यानुगमपूर्वकसामान्याभावद्वयानुगमप्रत्ययोपपत्तेः अन्वयव्यतिरेकनिश्चयेऽपि न योगिप्रत्यक्षमुपयुज्यते; भावाभावसाहचर्यमवधार्य मनसा नियमज्ञानसिद्धेरित्यलं निर्बन्धेन ॥

तस्मात् नियमवत् तद्ग्रहणोपायोऽप्यस्तीति सिद्धम् ॥ व्यतिरेकग्रहणकालेऽपि तदनुपयुक्तमित्यर्थः । ननु भावयोस्साहचर्यमन्वयः, अभावयोस्साहचर्यं व्यतिरेकः इति न युक्तं; अभावसाध्यकस्थले वैपरीत्यव्यवहारादिति शङ्कायां आह—साध्येति । तथा च भावपदं साध्यहेतुपरं, अभावपदं च तदभावपरमिति भावः । धूमाभाववान् वह्न्यभावात् इत्यादौ यत्र वह्न्यभावः तत्र धूमाभावः इत्यन्वयः, यत्र धूमः तत्र वह्निरिति व्यतिरेकः; धूमाभावाभावादेः धूमादिरूपत्वात् । अभावान्वयवद्भावव्यतिरेकोऽपि इत्येतत् अभावसाध्यहेतुकस्थलाभिप्रायेणोक्तम् ॥ § 2442

ययोर्भावयोः इत्यन्वयः । व्यत्यस्तेति । अन्वयस्थले हेतुः व्याप्यः, साध्यः व्यापकः । व्यतिरेकव्याप्तौ साध्याभावः व्याप्यः, हेत्वभावः व्यापकः, व्यापकाभावात् खलु व्याप्याभाव इत्यर्थः । एतदेवोपपाद्यतेऽनन्तरवाक्येन । प्रतिषेध्येति । प्रतियोगिनोः वह्निधूमयोः अनुगमात् तत्प्रतियोगिकयोरभावयोरप्यनुगतत्वसिद्ध्या अन्वयव्यतिरेकनिश्चयः सुलभ एव । परं तु व्यतिरेकसाहचर्यस्य प्रकृते आरोपात्मकत्वस्वारस्यात् तदंशे मानसमेव ज्ञानं विवक्षितम् ॥ § 2443

I.324/KSV

## पक्षधर्मताज्ञानस्यावश्यकत्वम्

गृहीते नियमे यावत्पुनः क्वचिद्धर्मिणि धूमादेर्लिङ्गस्य ग्रहणं न वृत्तं, तावन्न भवति लिङ्गिनोऽवगतिरिति सम्बन्धग्रहणकालापेक्षया द्वितीयं तल्लिङ्गदर्शनमपेक्षितव्यम् । सैवेयं पक्षधर्मतोच्यते । पक्षधर्मान्वयव्यतिरेकनिश्चये सत्यपि प्रत्यक्षागमविरोधेन प्रतिपक्षोपनिपातेन वा न गमकत्वमिति तदपरं लक्षणद्वयमुपदिष्टं— अबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति । तदेवमनुभवसिद्धत्वात् अनुमानस्वरूपमिव तस्य लक्षणमपि तान्त्रिककथितमप्रत्याख्येयम् ॥ § 2444

---

१४ ] धा— nyāma-wit__ka
१४ ] न्य— nyāma-wit__kha
१४ ] तद्य— nyāma-wit__kha
४ ] च— nyāma-wit__ka
२८३.६--२८४.८ ] विरचित— nyāma-wit__kha
६ ] तं लक्षण— nyāma-wit__ga

अपि च यदि तान्त्रिकविरचितमवाचकं लक्षणं तत् स्वयमनवद्यमावेद्यताम् । न तु तद्द्वेषेण लक्ष्यमप्यनुमानं निह्नोतुं युक्तम् ॥ § 2445

## पक्षपदस्य गौणत्वेऽपि प्रमाणस्य न गौणत्वम्

यत्पुनरभाणि ३१२ पु. प्रमाणस्यागौणत्वादनुमानादर्थनिश्चयो दुर्लभ इति—तन्न बुध्यामहे—न हि प्रमाणस्य किञ्चिद्गौणत्वमिह पश्यामः । पक्षधर्मादिपदानि यदि नाम व्याख्यातृभिः गौणानि प्रयुक्तानि किमेतावता प्रमाणं गौणीभवेत् ! § 2446

शब्दान्तरेण हि तल्लक्षणाभिधाने न कश्चिद्गौणतादिप्रमादः ॥ § 2447

क्वचिद्धर्मिणि—पर्वतादौ । द्वितीयं—प्रथमं केवलधूमदर्शनं, ततः व्याप्तिस्मृतिः, ततः व्याप्यस्य हेतोः प्रकृतपक्षवृत्तित्वानुसन्धानं वह्निव्याप्यधूमवांश्चायं इत्येवंरूपं द्वितीयम् । न गमकत्वं—नानुमापकत्वं, लिङ्गस्येति शेषः । तान्त्रिकः—तन्त्रं शास्त्रं सिद्धान्तं वा वेत्तीति । तान्त्रिको ज्ञातसिद्धान्तः इत्यमरः ॥ § 2448

सिद्धान्तोक्तलक्षणस्य दुष्टत्वमभ्युपेत्याह—अपि चेति । अवाचकं— विवक्षितार्थबोधनाय नालम् । पूर्वमुक्त३१६ पुटेविकल्पः अत्र स्मर्तव्यः ॥ § 2449

तन्न बुध्यामह इति । गौणत्वं मुख्यत्वं वा शब्दगतावतिशयौ, न त्वर्थनिष्ठौ तौ । अतः अर्थस्य गौणत्वं नाम को दोष इति न जानीम इत्यर्थः ॥ § 2450

ननु गौणार्थः, मुख्यार्थः इत्यादिव्यवहारात् शब्दवत् अर्थेऽपि गौणत्वमस्त्येवेत्यत्राह—शब्दान्तरेणेति । गौणवृत्त्या बोधितः अर्थः गौणः,

## अनुमानप्रामाण्यदूषणप्रतिवचनम्

यदप्यवादि पु. ३१३—विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात् इति—तदप्यसाधु—साध्यस्य मत्वर्थस्य दर्शितत्वात् ॥

यदपि अवस्थादेशकालादिभेदात् इत्यभ्यधायि ३१४-पु. तदपि न भयावहम्—सम्यगवधृतायां व्याप्तौ विप्लवाभावात् । प्रमातुरेव तत्र तत्रापराधः, नानुमानस्येति ॥

यदपि व्याहारि ३१६ पु.—विरुद्धानुमानविरोधयोः सर्वत्र संभवात् कुत्रचिद्य विरुद्धाव्यभिचारिण इष्टविघातकृतश्च सुलभत्वादिति—तदप्यालजालम्—प्रयोजकहेतौ प्रयुक्ते सत्येवंप्रायाणामनवकाशत्वात् ॥

सद्वितीयप्रयोगास्तु न भवन्ति प्रयोजकाः ।
उत्प्रेक्षामात्रमूलत्वाद्धेत्वाभासा भवन्ति ते—इति वक्ष्यामः ॥ § 2453

१० ] स्य— nyāma-wit_kha
१४ ] रे— nyāma-wit_ka

मुख्यवृत्त्या बोधितः मुख्यार्थ इति शास्त्रकारैः उपचारात् सङ्केताद्वा उच्यते, न तु गौणत्वादिरर्थधर्मः । गङ्गायां घोषः इत्युक्ते गौण्या योऽर्थः गङ्गातीरादिर्बोध्यते स एवार्थः गङ्गातीरे घोषः इत्यत्र मुख्यो भवति । अतः गौणत्वमुख्यत्वे नार्थधर्मौ, किन्तु शब्दधर्माविव । एवं प्रकृतेऽपि पक्षपदस्थाने साध्यविशिष्टधर्मिपदप्रयोगे प्रमाणमगौणं भवति । अतः किमिदं दूषणम् !
§ 2454

साध्यस्येति । यद्यपि धूमसामान्याद्वह्निसामान्यं यत्र कुत्रचित्सिद्धम्, अथापि प्रकृतपक्षे वह्निसम्बन्धः असिद्ध इति तत्साधनमवशिष्यत एवेति । अयमेव सम्बन्धः वह्निमान् इत्यत्र मतुबा बोध्यते ॥ § 2455

विरुद्धेति । यद्यप्ययं पूर्वं नोक्तः, अथापि सोऽपि तत्र अर्थसिद्ध इति भावः । आलजालं—अतिवाग्जालमिति यावत् । प्रयोजकहेतौ— अप्रयोजकशंकायां तद्वारकसत्तर्कविशिष्टसाधकहेतावित्यर्थः । सद्वितीयप्रयोगाः समानद्वितीयहेतुप्रयोगमात्रम् । अप्रयोजकत्वे हेतुः—उत्प्रेक्षेति । न हि द्वितीयहेतुप्रयोगमात्रेण हेतोस्सप्रतिपक्षत्वं, सद्धेतावपि तादृशहेत्वाभासप्रयोगसंभवात् । किन्तु तुल्यबलत्व एव । उत्प्रेक्षामात्रमूलत्वात् प्रतिहेतोः अप्रयोजकशंकावारकतर्कासंभवेन न ते प्रयोजकहेतवः ॥ § 2456

I.326/KSV

## विरुद्धाव्यभिचारी न सर्वत्र सुलभः

न विशेषविरुद्धश्च न चास्तीष्टविघातकृत् ।
हेतौ सुप्रतिबद्धे हि नैताः सन्ति विडम्बनाः ॥ २२७ ॥§ 2458

तादृशा चानुमानेन पुंसोऽर्थमधिगच्छतः ।
नान्धेन तुल्यता हस्तस्पर्शानुमितवर्त्मना ॥ २२८ ॥§ 2460

यत्नेनानुमितो योऽर्थः कुशलैरनुमातृभिः ।
अभियोगशतेनापि सोऽन्यथा नोपपाद्यते ॥ २२९ ॥§ 2462

## मतान्तरेणानुमानद्वैविध्यवर्णनम्

सुशिक्षिततराः प्राहुः—द्विविधमनुमानम्; किञ्चिदुत्पन्नप्रतीति, किञ्चिदुत्पाद्यप्रतीति । ईश्वराद्यनुमानं तूत्पाद्यप्रतीति ॥ § 2463

तत्र धूमानुमानादेः प्रामाण्यं केन नेष्यते ?
अतो हि साध्यं बुद्ध्यन्ते तार्किकैरक्षता अपि ॥ २३० ॥§ 2465

यत्त्वात्मेश्वरसर्वज्ञपरलोकादिगोचरम् ।
अनुमानं न तस्येष्टं प्रामाण्यं तत्त्वदर्शिभिः ॥ २३१ ॥§ 2467

हेतौ समीचानव्याप्तिविशिष्टे सति एता विडम्बना न सन्ति—न संभवन्ति । अतश्च हस्तस्पर्शादिनान्धेन ३१६ पु. इत्युक्तिर्न युक्तिमती । अतश्च यत्नेनानुमितः ३१६ पु. इत्यादिश्लोकोऽपि किञ्चिद्भत्यस्य पठनीय इत्याह—यत्नेनेति । अभियोगः—कलहाह्वानम् ॥ § 2468

द्विविधमित्यादि । अयमर्थः—कानिचिदनुमानानि स्वतस्सर्वेषामनुभवसिद्धानि—यथा धूमाद्वह्न्यनुमानम् । कानिचित्तु अन्येनोपदिष्टे एवमिदं स्यादिति प्रवृत्त्या भवन्ति—यथेश्वराद्यनुमानानि । न हीश्वरानुमानं आबालगोपालसिद्धम्; अत इदं उत्पाद्यप्रतीतिकम् । आद्यं तु उत्पन्नप्रतीतिकं प्रमाणमेव । द्वितीयं तु न प्रमाणम् । एतदेवानन्तरश्लोकैरुपपाद्यते । केन—पुरुषेण, हेतुना वा । अतः—धूमादेः । अस्यानुमानस्योत्पन्नप्रतीतिकत्वमुपपादयति—तार्किकैरिति । अक्षताः—अपीडिताः । पतिं विश्वस्यात्मेश्वरं, यः सर्वज्ञः इति श्रुतिं स्मरन्नाह—आत्मेश्वरेत्यादि । यत्तु ईश्वरपरलोकादिगोचरं अनुमानं, तस्य प्रामाण्यं तत्त्वदर्शिभिर्नेष्टम् । यतस्तद्विषये दुष्टतार्किककुशिक्षणमन्तरा ऋजुमतीनां अनुमितिर्न जायते ॥ § 2469

I.327/KSV

ऋजूनां जायते तस्मात् न तावदनुमेयधीः ।
यावत्कुटिलितं चेतो न तेषां विटतार्किकैः ॥ २३२ ॥§ 2471

## उक्तपक्षनिराकरणम्

एवं तु कथयद्भिस्तैः परं नास्तिक्यमात्मनः ।
ख्याप्यते स्म, जडत्वं वा, नानुमानाप्रमाणता ॥ २३३ ॥§ 2473

न हि सम्बन्धग्रहणोपायवैचित्र्यादप्रमाणता भवितुमर्हति ॥ § 2474

आगमेनानुमानेन तर्कव्युत्पादनेन वा ।
प्रत्यक्षेण गृहीतो वा सम्बन्धो न विशिष्यते ॥ २३४ ॥§ 2476

ईश्वराद्यनुमानानां तत्प्रसङ्गे सविस्तरम् ।
द्रढिमानं च वक्ष्यामः, इत्यलं बहुभाषितैः ॥ २३५ ॥§ 2478

प्रमाणमुपगम्यतां तदनुमानमेवंविधैः
अविप्लुतपराक्रमं भवदुदीरितैर्दूषणैः ।

अनभ्युपगमे पुनर्विगतचेष्टिताः प्राणिनः
भवेयुरुपलोपमा इति हि पूर्वमावेदितम् ॥ २३६ ॥§ 2482

## अनुमानलक्षणपरसूत्रव्याख्यानम्

अथेदानीं सूत्रमनुसरामः । तत्पूर्वकमित्यादि । अनुमानमिति लक्ष्यनिर्देशः । तत्पूर्वकमिति लक्षणम् । तदिति सर्वनाम्ना प्रक्रान्तं प्रत्यक्षमवमृश्यते । तत् पूर्वं—कारणं यस्य तत् तत्पूर्वकम् ॥ § 2483

नास्तिक्यं ईश्वरपरलोकानुमाननिराकरणात् । तेषामनुमानैकगम्यत्वं स्वावसरे निरूप्यते । उपायवैचित्र्यं—एकत्र स्वयंग्रहात्, अन्यत्र तार्किकोपदेशाच्च । उपायवैचित्र्यमेवाह—आगमेनेत्यादि । आगमः—वह्निव्याप्यो धूमः इत्याप्तवाक्यरूपः, न्यायावयवरूपो वा । अनुमानं—धूमः वह्निव्याप्यः यावद्वह्न्यधिकरणवृत्तित्वादित्यादिः । तर्कः—यदि धूमः वह्निव्याप्यो न स्यात् तर्हि वह्न्यभाववद्वृत्तिः स्यात् इत्यादिरूपः । एवंविधैर्दूषणैः इत्यन्वयः । पूर्वं—३१७ पुटे ॥ § 2484

I.328/KSV

एतावत्युच्यमाने निर्णयोपमानादौ तत्पूर्वके प्रसङ्गो न व्यावर्तत इति तद्व्यावृत्तये द्विवचनान्तेन विग्रहः प्रदर्शयितव्यः, ते-द्वे प्रत्यक्षे पूर्वं यस्येति । यदेकं अविनाभाविप्रत्यक्षं व्याख्यातं, यच्च द्वितीयं लिङ्गदर्शनं, ते द्वे प्रत्यक्षे अनुमानस्यैव कारणम्, नोपमानादेः । तत्र प्रतिबन्धग्राहि प्रत्यक्षं स्मरणद्वारेण तत्कारणम्, लिङ्गदर्शनं तु स्वत एव ॥ § 2485

ननु ! प्रत्यक्षमात्रस्य प्रकृतत्वात् प्रकृतावमर्शित्वाच्च सर्वनाम्नः कुतोऽयं विशेषप्रतिलाभः ? उच्यते—उदाहरणसाधर्म्यात् साध्यसाधनं हेतुरिति वक्ष्यते । हेतुरेव चानुमानं—यदिह लक्ष्यं निर्दिष्टम् । न चागृहीतमुदाहरणसाधर्म्यं तद्वैधर्म्यं वा साध्यसाधनं भवतीति तद्ग्रहणोपायोऽपेक्षितव्यः । प्रत्यक्षव्यतिरिक्ततदवगमोपायपरिकल्पने चानवस्थादूषणमसकृदभिहितमिति प्रत्यक्षस्यैव तदुपायत्वम् । अतोऽनुमानकारणभूतप्रत्यक्षापेक्षया प्रत्यक्षमात्रप्रक्रमेऽपि सर्वनाम्ना तद्विशेष आक्षिप्यते—यत् प्रतिबन्धग्राहि प्रत्यक्षम्, यच्च द्वितीयं लिङ्गदर्शनमिति ॥ § 2486

## नेदं लक्षणमतिव्याप्तम्

ननु ! प्रत्यक्षविशेषद्वयपूर्वकत्वमनुमानाभासेष्वपि सव्यभिचारविरुद्धादिषु संभवतीत्यतिव्याप्तिः—मैवम्—हेतुलक्षणेन साध्यसाधनग्रहणेन तत्प्रतिक्षेपात् । प्रतिबन्धस्वरूपं हि तत्रैव § 2487

निर्णयोपमानेति । दूरात् किञ्चित्पश्यन् सामान्यतस्तदवगत्य समीपं गतस्तन्निर्धारयति । तदेतन्निर्धारणं प्रत्यक्षपूर्वकमेव । एवमुपमानमपि सादृश्य-

दर्शनमूलकमेव । प्रसंगः—लक्षणस्येति शेषः, अतिप्रसङ्ग इति यावत् । ते इति । वार्तिकेऽप्येवमेव विगृहीतम् ॥ § 2488

विशेषः—वैलक्षण्यं एतादृशविलक्षणप्रत्यक्षद्वयपूर्वकत्वरूपम् । हेतुरेवेति—परामृश्यमानं लिङ्गं हि करणम् । तदवगमः—साधर्म्यवैधर्म्यावगमः । अतः—प्रकृतत्वात् बुद्धिस्थत्वाच्च ॥ § 2489

हेतुलक्षण इति । उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः इतिसूत्रोक्त इत्यर्थः । हेत्वाभासानां साध्यसाधकत्वं नास्त्येवेति भावः । तत्र— हेतुसूत्र-व्याख्यानावसरे । वस्तुतस्त्वतिव्याप्तिकथनस्यावकाश एव नास्तीत्याह—

निपुणमभिधास्यते; इह तु तद्ग्रहणोपायमात्रमुच्यते । सम्यक्प्रवृत्ते च प्रतिबन्धग्राहिणि प्रत्यक्षे व्याप्तिविप्लवाभावान्नानुमानाभासप्रसङ्गः । सामान्य-लक्षणानुवादेन च विशेषलक्षणे वर्ण्यमाने तत एव प्रमाणाभासव्युदाससिद्धेः केवलमिदानीं समानजातीयोपमानादिव्यवच्छेदो वचनीय इति स एव त-त्पूर्वकपदेनोपात्तः । अर्थोत्पन्नमव्यभिचारि व्यवसायात्मकम् इति फल-विशेषणानां सर्वप्रमाणेष्वनुवृत्तेः ॥

युगपच्च क्वचिन्नास्ति व्यापारः शब्दलिङ्गयोः ।
अतो नाव्यपदेश्यत्वविशेषणमिहार्थवत् ॥ २३७ ॥§ 2492

द्वयोरपि च शब्दलिङ्गयोः ज्ञापकत्वेन स्वरूपग्रहणापेक्षत्वात्, ज्ञानायौग-पद्येन च युगपद्ग्रहणासंभवात् ॥

## नाप्यव्याप्तमिदं लक्षणम्

ननु ! एवं निरस्यतामतिव्याप्तिः; अव्याप्तिस्तु कथं निरसिष्यते ? आग-मादिपूर्वकाणां अनुमानानामसङ्ग्रहात् ॥ सामान्येति । तत एव—सामान्य-लक्षणानाक्रान्तत्वादेव । व्यवच्छेदः केवलमित्यन्वयः ॥ § 2493

ननु अव्यपदेश्यं इत्यस्य कुतोऽत्र नानुवृत्तिरित्यत्राह—युगपदिति । उक्तमेव विवृणोति—द्वयोरिति । अयमर्थः—प्रत्यक्षस्थले इन्द्रियं करणं, इन्द्रियं च न ज्ञातं सत् करणं, किन्तु स्वरूपसदेव । तथा च नामस्मरण—इन्द्रियरूपसामग्रीद्वयमेलनं तत्र संभवतीति पनसोऽयं इत्यादिशब्दविशेष-णकं प्रत्यक्षं युज्यत इति तद्वारणायाव्यपदेश्यपदं प्रत्यक्षलक्षणे आवश्यकम् । अनुमितिशाब्दस्थले तु लिङ्गस्य शब्दस्य चोभयोः ज्ञातयोरेव करणत्वम् । तदा च नामस्मरणरूपं ज्ञानं न भवितुमर्हति, युगपत् ज्ञानद्वयानुत्पत्तेः इति तादृशज्ञानमेव नोत्पद्यत इति तद्विशेषणानुवृत्तिर्मास्तु ॥ § 2494

आगमादीत्यादिना अनुमानपरिग्रहः । न हि तत्स्थले प्रत्यक्षद्वयपूर्वक वमनुमानेऽस्तीत्यर्थः ॥ § 2495

I.330/KSV

तेष्वपि मूलभूतं प्रत्यक्षमेव कारणमिति केचिदाहुः । यथोक्तम् श्लो. वा. १-१-५, अनु. १७०— § 2496

२७ ] शत्व— nyāma-wit_kha

यत्राप्यनुमिताल्लिङ्गाल्लिङ्गिनि ग्रहणं भवेत् ।
तत्रापि मौलिकं लिङ्गं प्रत्यक्षादेव गम्यते इति ॥§ 2498

यद्वा प्राधान्याभिप्रायेण प्रत्यक्षपूर्वकत्वमुच्यते, न नियमार्थमिति नाव्याप्तिः ॥ § 2499

## प्रत्यक्षानुमानागमपूर्वकाण्यप्यनुमानानि सन्ति

तानीति वा पुनः तावदवबोधाय विग्रहः कर्तव्यः । तानि— प्रत्यक्षादीनि पूर्वं यस्येति । यद्यपि प्रत्यक्षमेव लक्ष्यत्वेन प्रस्तुतम्; तथापि व्यवच्छेद्यतयाऽनुमानादीनामपि प्रकृतत्वं न वार्यते ॥ § 2500

## तत्पूर्वकपदार्थशोधनम्

अत्र चोदयन्ति । तदिति करणावमर्शो वा स्यात्, फलावमर्शो वा । करणावमर्शे इन्द्रियादिकरणपूर्वकं ज्ञानं तत्फलं तत्पूर्वकं चानुमानमिति पूर्वशब्दस्य द्विः पाठः स्यात् । स चाश्रुतः § 2501

मौलिकं—मूले भवं, प्राथमिकमिति यावत् ॥ § 2502

ननु यथाकथञ्चित्प्रत्यक्षमूलकत्वं सर्वप्रमाणसाधारणम्; प्रत्यक्षं हि सर्वज्येष्ठम् । अतो नेदमनुमानासाधारणमित्यत आह—यद्वेति । अयमाशयः— तत्पदं यद्यपि प्रत्यक्षपरं, अथापि इतरप्रमाणानामपि तदुपलक्षकं, प्राधान्यात्तु तदुपात्तम् । नात्र तस्य लक्षणेऽपि प्रवेशः ॥ § 2503

लक्षणवाक्यघटकस्य लक्षणघटनमेव वरमित्यत आह—तानीति । तावदवबोधाय—तावद्विवक्षितार्थलाभाय । यद्यपीति । तत्पदं प्रकृतपरामर्शि— तत्र लक्ष्यत्वेन प्रत्यक्षं प्रकृतं, इन्द्रियार्थसन्निकर्षपदव्यवच्छेद्यतयाऽनुमानं प्रकृतं, अव्यपदेश्यपदव्यवच्छेद्यतया शब्दोऽपि प्रकृत इति तत्पदेन तेषां ग्रहणं भवत्येवेति । तथा च तत्पदं बुध्या प्रकृतस्य परामर्शकमित्युक्तं भवति ॥ § 2504

करणेत्यादि—प्रत्यक्षपदं हि करणवाचि, फलवाचि चेति पूर्वमेवोक्तं, प्रकृतत्वमप्युभयोरस्ति । अतस्तत्पदग्राह्यं किमिति भवत्येव संशयः । द्विः पाठ इति । अनुमानं हि व्याप्तिज्ञानं, तच्च इन्द्रियपूर्वकलिङ्गदर्शनपूर्वकम्, न त्विन्द्रियपूर्वकम् । एवं च इन्द्रियपूर्वकपूर्वकमिति पूर्वक पदस्य द्विः पाठ

२३ ] त्वा— nyāma-wit_kha

कल्पनीयः । फलावमर्शे तु प्रत्यक्षफलपूर्वकमनुमानफलं भवेत्, नानुमानमिति तत्पूर्वकशब्दस्य फलवचनस्यानुमानशब्देन करणवाचिना सह सामानाधिकरण्यं न स्यात्—तत्पूर्वकमनुमानमिति । प्रत्यक्षफलेन हि लिङ्ग-दर्शनेन परोक्षार्थप्रतिपत्तिरुपजन्यते; सा चानुमानफलं, नानुमानमिति—उच्यते—उभयथाऽपि न दोषः । करणावमर्शे तावत् इन्द्रियादिकरणपूर्वकं तत्फलं लिङ्गदर्शनं यत् तदेव परोक्षार्थप्रतिपत्तौ करणमनुमानमिति न द्विः पूर्वकशब्दस्य पाठ उपयुज्यते । फलेऽप्यवमृश्यमाने प्रत्यक्षफललिङ्गदर्शन-पूर्वकं यत् अविनाभावस्मरणं तदनुमानं करणमेव, ततः परोक्षार्थप्रतिपत्तेः ॥

यदुक्तं ३०१ पु.—प्रत्युत्पन्नकारणजन्या स्मृतिरनुमानमिति, तत्र स्पष्ट-मेव सामानाधिकरण्यम् ॥

### सौत्रं अनुमानपदं अनुमितिपरं वा

फले वाऽनुमानशब्दं वर्णयिष्यामः—अनुमितिः अनुमानमिति ॥ आव-श्यक इति । अनुमानफलं—अनुमितिः । अनुमितेः प्रत्यक्षपूर्वकत्वव्य-पदेशः सर्वसंप्रतिपन्नः । अतः अनुमानं प्रत्यक्षपूर्वकपूर्वकं इति कथने सामानाधिकरण्यमबाधितम् । प्रत्यक्षपदस्य फलपरत्वे लिङ्गदर्शनस्यैव प्र-त्यक्षपदार्थत्वं वक्तव्यं—तत्पूर्विका चानुमितिरेव, नानुमानमिति तत्पूर्वकम-नुमानं इति बाधितमिति ॥ § 2505

उभयथापीति । अयमर्थः—तत्पदस्येन्द्रियपरत्वे अनुमानपदं लिङ्गदर्शनप-रं, ज्ञायमानलिङ्गस्यानुमितिकरणत्वेन लिङ्गज्ञानस्याप्यनुमितिकरणत्वानपायात् । उक्तं च तथा पु. २८२ । तत्पदस्य प्रत्यक्षज्ञानपरत्वे लिङ्गदर्शनं तत्पदार्थः, तत्पूर्वकं च व्याप्तिस्मरणं, तदेवानुमानपदवाच्यमिति न कश्चिद्दोषः ॥ § 2506

स्पष्टमेवेति । स्मृतेः प्रत्यक्षज्ञानपूर्वकत्वात् ॥ § 2507

व्याप्तिस्मृतेः करणत्वस्य अन्ये तुपक्ष एवोक्तत्वात्, स्वमते परामृश्यमान-लिङ्गस्यैव करणत्वात् प्रत्यक्षपदस्य ज्ञानपरत्वे तत्पूर्वकमनुमानं इति सामानाधिकरण्यहानिः स्वपक्षे—इत्यत आह—फले वेति । भावार्थकप्रत्य

यतश्शब्दं वाऽध्याहरिष्यामः—प्रत्यक्षफलपूर्वकं परोक्षार्थप्रतिपत्तिरूपं फ-लं यतो भवति तदनुमानमिति ॥

### तत्पूर्वकं इत्येतावदेव लक्षणपरम्

अत्र हि प्रथमं लिङ्गदर्शनं, ततः प्रतिबन्धस्मरणं, ततः केषाञ्चिन्मते परामर्शज्ञानं, ततः साध्यार्थप्रतीतिः, ततः प्रत्यक्षलक्षणावसरवर्णितेन क्र-मेण हेयादिज्ञानमितीयति प्रतीतिकलापे यथोपपत्ति कार्यकारणभावो वक्तव्य इत्येवं तत्पूर्वकपदमेव केवलं अनुमानलक्षणक्षममिति गुरवो वर्णयाञ्चक्रुः ॥

### सर्वं सूत्रं लक्षणपरमिति अन्ये

१५--१६ ] मिति— nyāma-wit_kha
१७ ] स्यात्— nyāma-wit_ka
१९ ] का— nyāma-wit_kha

अन्ये पुनः उपमानाद्यतिव्याप्तिव्युदासाय त्रिविधग्रहणं व्याख्यातवन्तः । तत्पूर्वकमनुमानम् इत्युच्यमाने सति उपमानादौ प्रसङ्ग इति त्रिविधग्रहणम् ॥

लिङ्गं वक्ष्यमाणकार्यादिभेदाद्वा त्रिविधं, पक्षधर्मादिरूपत्रययोगाद्वा त्रिरूपं त्रिविधमुच्यते । लिङ्गे च त्रिविधे सति तदालम्बनं ज्ञानमुपचारात् त्रिविधमभिधीयते । तेन प्रत्यक्षपूर्वकं त्रिविधलिङ्गालम्बनज्ञानमनुमानमित्युक्ते सति नातिव्याप्तिः ॥ यान्तत्वेऽनुमानपदमेवानुमितिपरमिति सामानाधिकरण्यमुपपद्यत इति ॥ § 2508

अनुमानपदस्य करणे प्रसिद्ध्यनुरोधादाह—यत इति ॥ § 2509

लिङ्गविषयं ज्ञानं, ज्ञानविषयीकृतं वा लिङ्गं प्रमाणंपु. २८२ इति स्वेन कथनात्—केषाञ्चित् इति । गुरवः—भाष्यकारादयः ॥ § 2510

प्रसङ्गः—अतिप्रसङ्गः । तेषामपि सादृश्यदर्शनमूलकत्वादित्यर्थः ॥ § 2511

कार्यादीति । कार्यानुमानं, कारणानुमानं, सामान्यतोदृष्टानुमानमित्यर्थः । पक्षधर्मेत्यादि । पक्षे सत्त्वं, सपक्षे सत्त्वं, विपक्षेऽसत्त्वमित्यर्थः । नन्वनेन लिङ्गे त्रैविध्य उक्तं, न त्वनुमाने—इति चेदाह—लिङ्गे चेति । तदालम्बनं—तद्विषयकम् । ज्ञायमानलिङ्गस्यानुमानत्वे तु नायं क्लेशः । नातिव्याप्तिः । उपमानस्य लिङ्गाविषयकत्वात् ॥ § 2512
I.333/KSV

## सूत्रादेव हेतोस्त्रिविधत्वलाभः

ननु ! पूर्ववदादिभिः शब्दैः कार्यादिभेदवर्णनं ज्ञास्यामः । पक्षधर्मादिरूपत्रयं तु कथमेभिः शब्दैः प्रतिपाद्यत इति । अत्राहुः— वादादिकथात्रयेऽपि पूर्वमुपादीयमानत्वात् पक्षः पूर्वशब्देनोच्यते; सोऽस्यास्त्याश्रयत्वेनेति पूर्ववत् लिङ्गमित्येवमनेन पदेन पक्षधर्मत्वमुक्तं भवति । पक्षे उपयुक्ते सति शेषः सपक्षो भवति । सोऽस्यास्त्याश्रयत्वेनेति शेषवत् । एवमनेन सपक्षे वृत्तिरुक्ता भवति । सामान्यतोदृष्टमित्यनेन विपक्षात् व्यावृत्तं लिङ्गमुच्यते । कथम् ? अकारप्रश्लेषात् सामान्यतः अदृष्टमिति । तिष्ठतु तावद्विशेषः, सामान्यतोऽपि न दृष्टम् । क्वेति ? पक्षसपक्षयोर्वृत्तेरुक्तत्वात् परिशेषात् विपक्षे सामान्यतोऽपि न दृष्टमित्यवतिष्ठते । इत्थं त्रिरूपं लिङ्गं एभिः शब्दैरुक्तं भवति । तदालम्बनं ज्ञानमनुमानम् ॥ § 2513

## सूत्रस्य सर्वस्यापि लक्षणपरत्वं न युक्तम्

तदेवं लक्षणे कश्चित् सर्वं सूत्रमयोजयत् ।

एवं तु ख्यापितं न स्यात् सूत्रकारस्य कौशलम् ॥ २३८ ॥§ 2515

किञ्च पञ्चलक्षणमिह शास्त्रे अभ्युपगम्यते इति त्रिरूपे तस्मिन् वर्ण्यमाने कालात्ययापदिष्टप्रकरणसमयोः प्रसङ्गो न व्यावर्तत इति । तस्मात् तत्पूर्वकपदमेव लक्षणप्रतिपादनार्थमनवद्यम् ॥ § 2516

ज्ञास्याम इति । पूर्ववदिति कारणेन कार्यानुमानं, शेषवदिति कार्येण कारणानुमानं, एवं कार्यकारणभावरहितस्थले रूपेण रसानुमानादि सामान्यतोदृष्टं—इत्यादिरीत्या भाष्यादिषु तथा वर्णितम् । कथात्रय इति । वादः, जल्पः, वितण्डा चेति कथा त्रिविधा वक्ष्यते । उपयुक्ते—निरूपिते । उक्तादन्यः खलु शेषः । तदर्थलाभप्रकारमाह—तिष्ठत्वित्यादि । विशेषः—पक्षवृत्तित्वादिः ॥ § 2517

सर्वं सूत्रं लक्षणे अयोजयत् इत्यन्वयः । एवं त्वित्यादि । अनुमानप्रभेदादीनां वक्तव्ये, उपमानादिव्यावृत्तेः अस्मदुक्तदिशा सुलभत्वे च तदर्थं एतावत्पदप्रयोगः सूत्रकारस्य न युक्त इत्यर्थः ॥ § 2518

न व्यावर्तत इति । यद्यपि वाचस्पतिमिश्रैः—तात्पर्यटीकायां विपक्षव्यतिरेकात् असत्प्रतिपक्षत्वाबाधितविषयत्वयोः संग्रहो वर्णितः, अथापि

त्रिविधग्रहणं तस्य विभागप्रतिपादकम् ।
भेदाः पूर्ववदित्यादिग्रन्थेन कथितास्त्रयः ॥ २३९ ॥§ 2521

तत्पूर्वकपदोद्गीतनिर्मलन्यायलक्षणः ।
परिम्लानादरोऽन्यत्र सूत्रकृद्वाक्यलाघवे ॥ २४० ॥§ 2523

त्रिविधं इत्युक्तिस्तदा विरुध्येतैव, पञ्चविधत्वात् हेतोः । विधाशब्दश्च विभाग एव स्वरसः । पूर्वोक्तदोषस्तु वर्तत एवेदानीमपि इत्युपेक्षितम् ॥ § 2524

एवं लक्षणपरं तत्पूर्वकपदं व्याख्यातम् । अथ शिष्टे सूत्रे त्रिविधपदं विभागप्रतिज्ञापरं, शिष्टं विभागपरमित्याचष्टे—त्रिविधेति । त्रयः भेदाः कथिता इत्यन्वयः ॥ § 2525

अत्र भाष्यं—विभागवचनादेव त्रिविधमिति सिद्धे त्रिविधवचनं महतो महाविषयस्य न्यायस्य लघीयसा सूत्रेणोपदेशात् परं वाक्यलाघवं मन्वानस्यान्यस्मिन् वाक्यलाघवेऽनादरः । तथा चायमित्थंभूतेन वाक्यविकल्पेन प्रवृत्तः सिद्धान्ते छले शब्दादिषु च बहुलं समाचारः शास्त्रे इति । अयमर्थः—पूर्ववत् शेषवत् सामान्यतो दृष्टं च इति विभागवाक्यादेव अनुमानं त्रिविधं इति स्पष्टमवगम्यमाने त्रिविधं इति संख्यावाचकशब्दग्रहणपूर्वकमभिधानं किमर्थम् ? इति चेत्—अतिक्लिष्टस्यानुमानलक्षणस्य तत्पूर्वकं इति सूक्ष्म-

२७ ] दाद्गीत— nyāma-wit__ka
२७ ] णाः— nyāma-wit__ka

पदेन लक्षणात् तत्स्मरणजहर्षवशात् इदमत्यल्पं गौरवं गौरवत्वेन न मेने सूत्रकारः । एतादृशेन वाक्यविन्यासेनैवास्मिन् शास्त्रे सिद्धान्तादिलक्षणपरेषु समाचारः—विचाररीतिः बहुलं प्रवृत्तो दृश्यते इति । एतत्सर्वमभिप्रेत्याह—तत्पूर्वकेत्यादि । तत्पूर्वक इत्येकेनैव पदेन कथितं निर्मलं—निर्दोषं यत् महतो न्यायस्य—अनुमानाख्यस्य लक्षणं येन, सः सूत्रकृत् अन्यस्मिन् वाक्यलाघवे परिम्लप्रादरः इत्यर्थः ॥ § 2526

एतेन—पूर्ववदादिवाक्यमभ्युपेत्य त्रिविधपदपरित्यागलाघवापेक्षया त्रिविध-पदेनैव विवक्षितार्थलाभे पूर्ववदादिपदपरित्यागलाघवस्य महत्त्वात्, तत्परं भाष्यं व्याचख्युर्वाचस्पतिमिश्राः—त्रिविधमिति विभागवचनादेव त्रिविधे पूर्व-वदादौ सिद्धे किमर्थं पूर्ववदाद्युपादानम् इति—तदेतद्ग्रन्थकारेणोपेक्षितं मन्त-व्यम् । त्रिविधं इत्येतावन्मात्रात् नार्थपूर्तिर्भवेत्—विभागजिज्ञासाया अशान्त-त्वात् । नापि त्रिविधं इतिपदं विभागवाक्यं, किन्तु तत्प्रतिज्ञापरम् । अतो नेदं भाष्यानुगुणमपि—इत्यादिर्हेतुरत्रोह्यः । एवं वैभवेन प्रवृत्तं भाष्यं

विभागवचनात्सिद्धं त्रैविध्यं स्वगिरा भवेत् ।
तथा च शब्दसिद्धान्तच्छलेष्वेवमदीदृशत् ॥ २४१ ॥ § 2529

**पूर्ववदनुमानम्**

पूर्ववदिति । यत्र कारणेन कार्यमनुमीयते—यथा जलधरोन्नत्या भ-विष्यति वृष्टिरिति ॥

**पूर्ववत् पदस्य कारणपरत्वाक्षेपः**

अत्र चोदयति—पूर्वं हि कारणमुच्यते । पूर्वमस्यास्तीति पूर्ववत् कार्यं वक्तुं युक्तम् । तेन कार्यात् कारणानुमानमिहोदाहर्तव्यम्, न कारणात् कार्यानुमानम् ॥

**कारणेन कार्यमनुमातुमप्यशक्यम्**

न च कारणेन कार्यमनुमातुमपि पार्यते । कार्यस्य तावत् पक्षत्वम-युक्तम्; सिद्ध्यसिद्धिविकल्पानुवृत्तेः । सिद्धे हि कार्ये किमन्यदनुमेयम् ! असिद्धे खपुष्पवन्न पक्षत्वम् ॥

अपि च अस्ति—कार्यं—कारणस्यास्तित्वात् इति व्यधिकरणो हेतुः; अनित्यः शब्दः—काकस्य कार्ष्ण्यादितिवत् ॥ उक्त्वा हार्दं भावमाह—विभागेति । विभागवचनात् सिद्धमेव त्रैविध्यं स्वगिरा कण्ठत उक्तं भ-वेत्—अन्यथा इतोऽपि विभागान्तरं स्याद्वा इति संशयानतिवृत्तेः । तथैव सूत्रकारशैल्यपि दृश्यते—आप्तोपदेशः शब्दः स द्विविधः दृष्टादृष्टार्थत्वात्, त-न्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः स च तुर्विधः सर्वतन्त्रप्रतितन्त्राधिक-रणाभ्युपगमसंस्थित्यर्थान्तरभावात्, वचनविघातः अर्थविकल्पोत्पत्त्या छलम् तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति इत्यादौ नियमार्थं त्रिविधादिग्रहणम् ॥ § 2530

२४ ] वक्तुं— nyāma-wit_kha

मेघस्यौन्नत्यं नाम कार्याव्यवहितप्राक्कालीनावस्थाविशेष एव ॥ § 2531

पूर्वं—पूर्वपदार्थः । कार्यं अनन्तरं, कारणं हि पूर्वं भवतीति भावः ॥ § 2532

अत्र कारणस्य सत्त्वात् कार्येणापि भाव्यं इति खलु वक्तव्यम् । अतः कार्यं—अस्तित्ववत् कारणस्य सत्त्वादिति वक्तव्यं, तदपि न संभवतीत्याह— अपि चेति ॥ § 2533

I.336/KSV

सत्तायां च साध्यायां भावधर्मस्य हेतोरसिद्धत्वम्, अभावधर्मस्य विरुद्धत्वम्, उभयधर्मस्यानैकान्तिकत्वमिति कथं साधयितुं शक्यते ? तदुक्तम्— § 2534

नासिद्धे भावधर्मोऽस्ति, व्यभिचार्युभयाश्रयः ।
धर्मो विरुद्धोऽभावस्य, सा सत्ता साध्यते कथम् ? इति ॥ § 2536

न च कारणमात्रस्य हेतुत्वं युक्तम्, विना च प्रतिबन्धादिना व्यभिचारसम्भवात् । कारणविशेषश्च न कश्चिद्विपश्चिताऽपि निश्चेतुं शक्यः । चलदचलविपुलवपुषामुत्पलदलमलीमसत्विषामपि पयोमुचाममुक्तपयसामुपरमदर्शनात् ॥ § 2537

यदि त्वन्त्यदशावर्ति कारणं लिङ्गमिष्यते ।
व्याप्तिस्मरणवेलायां कार्यप्रत्यक्षता भवेत् ॥ २४२ ॥ § 2539

## सौगतमते कारणात्कार्यानुमानसंभवः

ननु ! सौगतैरपि कारणात् कार्यानुमानमङ्गीकृतमेव । § 2540

हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षित्वात् स स्वभावोऽनुवर्णितः ॥ इति प्र. वा. १-८ ॥ § 2542

अथ हेतुदोषानाह—सत्तायामित्यादि । सत्तायाः साध्यत्वेनासिद्धत्वात् सत्तायाः हेतोरपि सत्तारूपत्वात् स्वरूपासिद्धिः । अभावधर्मत्वे तु साध्याभावव्याप्तत्वाद्विरुद्धः । उभयधर्मत्वे साधारणानैकान्त्यम् ॥ § 2543

हेतुभूतं कारणमपि न निर्वक्तुं शक्यमित्याह—न चेति । न हि मृत्पिण्डवत्सु देशेषु सर्वत्र घटस्योत्पत्तिः संभाव्यते । निश्चेतुमशक्यत्वमेवाह— चलदिति । चलदचलवत् विपुलपरिणामवतां नीलरोचिषामपि मेघानां अमुक्तपयसां सतामेवोपरमदर्शनात् । उपरमः—अवर्षणम् । तथा ह्याभाणकोऽपि—अश्वप्लुतं वासवगर्जितं च स्त्रीणां च चित्तं पुरुषस्य भाग्यम् । अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः इति ॥ § 2544

ननु कार्याव्यवहितप्राक्काले कारणं यादृग्रूपविशिष्टं स्यात्, तादृग्रूपविशिष्टस्यैव कारणस्य कार्यानुमापकत्वमिष्टमिति चेत्—तत्राह—यदि त्विति । प्रत्यक्षता भवेत्—तदानीं कार्यस्योत्पन्नत्वात् ॥ § 2545

समग्रेणेति । समग्रात् खलु हेतोरनन्तरस्मिन्नेव क्षणे कार्योऽवर्जनीयः, कारणान्तरानपेक्षणात् । कारणान्तरापेक्षायां हि समग्रत्वमेव न स्यात् ॥ § 2546

I.337/KSV

अग्रन्थज्ञो देवानां प्रियः ! उत्पाद्यतेऽस्मादित्युत्पादो योग्यता कथ्यते । सा चात्रानुमेया; अत एव तस्याः वस्तुनोऽनन्यत्वात् स्वभावानुमानमिदमिष्यते स स्वभावोऽनुवर्णितः इति ॥ § 2547

## सिद्धान्ते कारणात् कार्यानुमानसमर्थनम्

अत्राहुः—सर्वमिदमविदितानुमानप्रयोगक्रमस्य दुर्मतेश्चोद्यम् । न कार्यमत्र पक्षीक्रियते । न सत्ता साध्यते । न व्यधिकरणो हेतुः प्रयुज्यते । अपि तु पयोधरा एव धर्मिणः अदूरकालभाविन्या वृष्ट्या तद्वन्तः साध्यन्ते विशिष्टोन्नतिरूपधर्मादियोगेनेति न पूर्वकथितदोषावसरः ॥ § 2548

यथा अग्निमानयं धूमः बहुलपाण्डुतादिधर्मयोगित्वात्— महानसावधृतधूमवदिति धूम एवाग्निमत्तयाऽनुमीयते । एवं समनन्तरोत्पादितवृष्टयोऽमी जीमूताः, सातिशयोन्नत्यादिधर्मयोगित्वात्, पूर्वोपलब्धपर्जन्यवत् इति जलधरा एव भविष्यद्वृष्टिमत्तयाऽनुमीयन्ते । यथाऽऽह भट्टः—श्लो. वा. १-१-५-४७ § 2549

तस्माद्धर्मविशिष्टस्य धर्मिणः स्यात् प्रमेयता ।

२१ ] ग्रन्थ— nyāma-wit_kha
२२ ] सत्य— nyāma-wit_kha
२१ ] दि— nyāma-wit_ka

सा देशस्याग्नियुक्तस्य, धूमस्यान्यैश्च कल्पिता इति ॥§ 2551

देवानाप्रियः—देवानांप्रिय इति मूर्खे इति निपातः । देवानां क्रीडासक्तत्वेन मूर्खत्वात् तत्प्रियस्यापि मूर्खत्वमिति कैय्यटः । देवानां प्रियस्य छागस्याज्ञत्वाद्वा तथा । योग्यता—सामर्थ्यम् । तस्याः—योग्यतायाः ॥ § 2552

तद्वन्तः—वृष्टिमन्तः, कीदृशवृष्टिमन्तः—अदूरकालभाविन्या वृष्ट्या वृष्टिमन्तः । अनुमानाकारस्त्वनुपदमुच्यते ॥ § 2553

कार्यस्य सिद्धप्रायत्वात्—समनन्तरोत्पादितेति । पूर्वोपलब्धेति । एतत्पूर्वमनुभूतेत्यर्थः । सा देशस्येति । अत्र न्यायरत्नाकरः—सा च देशस्यैव, धर्मित्वादित्याह—सा देशस्येति । नैय्यायिकास्तु धूममेव धर्मीकृत्य तस्यैवाग्निविशिष्टस्यानुमेयतामाहुरित्याह—धूमस्येति ॥ § 2554
I.338/KSV

## कारणात् कार्यानुमानोपपादनम्

यत्तु—पूर्वं कारणमुच्यत इति—तत्सत्यम् । पूर्वमस्यास्तीति पूर्ववत्—कारणगतमुन्नतत्वादिधर्मजातमुच्यते; तदेव लिङ्गमिति ग्रन्थदोषोऽपि न कश्चित् । न च कारणमात्रस्य हेतुत्वं ब्रूमः, येनास्य विधुग्प्रत्ययोपनिपातादिकृतः व्यभिचारः स्यात् । अपि च विशिष्टमेव कारणं हेतुः । न च कारणविशेषो दुरवगमः; § 2555

गम्भीरगर्जितारम्भनिर्भिन्नगिरिगह्वराः ।
रोलम्बगबलव्यालतमालमलिनत्विषः ॥ २४३ ॥§ 2557

तुङ्गत्तटिल्लतासङ्गपिशङ्गोत्तुङ्गविग्रहाः ।
वृष्टिं व्यभिचरन्तीह नैवंप्रायाः पयोमुचः ॥ २४४ ॥§ 2559

अनभ्युपगमे चैवमनुमानस्य जीवितम् ।
न स्यात् धूमविशेषाणामपि बोद्धुमशक्तितः ॥ २४५ ॥§ 2561

कारणगतेत्यादि । पूर्वमस्यास्ति इत्यत्र षष्ठ्याः सम्बन्धसामान्यमर्थः—सम्बन्धश्च धर्मधर्मिणोः । अतश्च धर्मसम्बन्धी यथा धर्मी, तथा धर्मिसम्बन्धी धर्मो भवति । तथा च विशेष्यतया धर्मिविशिष्टः धर्मः पूर्ववत्पदार्थ इति भावः । ग्रन्थदोषः—शब्ददोषः । विधुरप्रत्ययः—विरोधिसामग्री । स्वरूपमात्र-

१ ] त्वङ्ग— nyāma-wit_kha
२ ] नैव प्रायः— nyāma-wit_kha
३ ] मा— nyāma-wit_ka

स्य कारणत्वे हि विरोधिसामग्रीकालेऽपि तस्मात् कार्यं स्यात् । बयं तु न तथा ब्रूमः । कारणमात्रं न फलोपधायकं, अपि तु किञ्चिद्रूपविशिष्टमेवेत्यर्थः । अपि च—अपि तु ॥ § 2562

विशेषस्य सुगमत्वमेवाह—गंभीरेत्यादि । आरंभः—उपक्रमः । कार्ष्ण्ये दृष्टान्ताः—रोलम्बादयः । गबलः—महिषशृङ्गः । तुङ्गत् इति क्विबन्तः, बिजृंभन्त्य इत्यर्थः । अस्य सर्वस्यापि पयोमुचः इति विशेष्यम् । न स्यादित्यादि । धूमाद्वह्न्यनुमानं सर्वानुभवसिद्धम् । धूमोत्पत्त्यनन्तरक्षणे वह्नेर्निर्बाणेऽपि उपरिदेशे धूमोपलंभात् वह्न्यनुमितौ जातायां तत्र वह्नेर्नष्टत्वेन व्यभिचारात् धूमाद्व(?)यनुमितिर्वा कथं भवेत् । अतः कारणान्तरमूलकः क्वाचित्कव्यभिचारः न दोषाबह इति कारणात् कार्यानुमानमपि भवत्येव ॥ § 2563

I.339/KSV

## अनुमेयस्य परोक्षत्वम्

यदपि कार्यप्रत्यक्षत्वमाशङ्कितम् पु. ३५९—तदप्ययुक्तम्— न हि वृष्ट्यनुमानसमय एव शिरसि सलिलकणाः पतन्तः पयोदमुक्ता दृश्यन्ते ॥ § 2564

परोक्षे लिङ्गिनि ज्ञानमनुमानम् इति च विशेषणोपादानात् यत्र तत्र न तदानीमेव वृष्टिः प्रत्यक्षीभवति, तदुदाहरणं भविष्यति ॥ § 2565

अपि च अनुपजातावयवक्रियतयाऽनाशङ्क्यमानविनाशेऽन्त्यतन्तौ जातया क्रियया पटनिष्पत्त्यनुमाने क्रियमाणे न पटप्रत्यक्षता; कालव्यवधानसम्भवात् । तथा हि—एकतस्तावदन्त्यतन्तौ क्रिया- § 2566

पयोदमुक्ताः सलिलकणाः इत्यन्वयः । कालस्यातिसूक्ष्मत्वात् किञ्चिदिव व्यवधानमपि संभाव्यमेवेति भावः ॥ § 2567

वस्तुतस्त्वेतदाशङ्काया अवसर एव नास्तीत्याह—परोक्ष इति । यत्र तत्र—यत्र क्वचित् । यद्वा—यत्र न तदानीमेव वृष्टिः प्रत्यक्षीभवति तत्र इत्यन्वयः । अयमर्थः—न हि स्वशीर्षोपरि मेघं पश्यत एवेदमनुमानं—अनुमानस्य परोक्षविषयकत्वेन दूरोंत्तादृशमेघं दृष्ट्वा वृष्ट्यनुमानात् । अतश्चानुमितिकाले न वृष्टिप्रत्यक्षम् ॥ § 2568

ननु स्वशीर्षोपरि मेघं पश्यतोऽप्यनुमानमनुभवसिद्धम् । मार्गे गच्छन् स्वोपरि कृष्णमेघं पश्यन्, अचिराद्भविष्यद्वृष्टिमनुमिमानः शीघ्रं गच्छति, निवर्तते वा । अनुमानकाले वृष्टेरभावात् तदानीं परोक्षविषयकत्वं निर्बाधम् । अतश्च अनुमानकाले कार्यप्रत्यक्षापत्तिरूपो दोषो दुरपह्नव एव । न चैतद्दोषः प्रथमकल्पेऽनुपदमुक्ते नास्तीति स एवास्त्विति वक्तुं शक्यं; कार्यसमर्थस्य कारणस्य कालक्षेपायोगात् । यदा सामग्री संपूर्णा तदा तदनन्तरक्षणे कार्यं

२३ ] मान— nyāma-wit_ka
२४ ] पट— nyāma-wit_kha
२४ ] काले— nyāma-wit_kha

भवेदेव यावत्पर्यन्तं कार्यं न दृश्यते तावत् सामग्री न मिलितेत्येव वक्तव्यम् । ततश्च व्यवधानपक्षोऽपि न साधीयान्—इति शङ्कायां सदृष्टान्तं तं साधयति— अपि चेत्यादिना । अन्त्यतन्तौ क्रियोत्पत्तावपि अवयव्यन्तरे पटनाशकक्रियोत्पद्येत चेत् पटस्यैव नाशः स्यादित्यतः—अनुपजातेत्यादि । एकतः—

दर्शनम्, अविनाभावस्मरणम्, परामर्शज्ञानम्, अनुमेयप्रतीतिरिति त्रिचत्वारः क्षणाः । अन्यतस्तु—क्रिया, क्रियातो विभागः, विभागात्पूर्वसंयोगनिवृत्तिः, तत उत्तरसंयोगोत्पादः, ततः पटनिष्पत्तिः । निष्पन्ने पटे क्षणान्तरे रूपादिगुणारंभः—रूपादिजन्मनि पटस्य समवायिकारणत्वात् कारणस्य कार्यादवश्यं पूर्वकालभावित्वम्, अतो निष्पन्नोऽपि नूनमेकस्मिन् क्षणे नीरूपः पटो भवतीति न तदैव प्रत्यक्षः—ततः क्षणान्तरे रूपोत्पादात् रूपवद्द्रव्यमिन्द्रियसन्निकर्षात् प्रत्यक्षं भविष्यतीति अतिवहव एते क्षणाः । अतो न कार्यप्रत्यक्षत्वम् ॥ अनुमित्युत्पत्तौ । मध्ये परामर्शाङ्गीकारपक्षे चत्वारः क्षणाः, तदनङ्गीकारे तु त्रयः । अन्यतः—पटप्रत्यक्षोत्पत्तौ । निष्पन्न इति । पटस्य निष्पत्तिमात्रादपि न तत्प्रत्यक्षं, चाक्षुषप्रत्यक्षे रूपस्य कारणत्वेन तत्र रूपोत्पादस्यावश्यकत्वात् इत्यर्थः । क्षणान्तरे—पटोत्पत्त्यनन्तरक्षणे । ननु नेदमनुभवसिद्धम्, पटः उत्पन्नः, तत्र रूपं त्वनिष्पन्नमिति । तादृशस्य पटस्य केनापि कुत्राप्यदर्शनात् । उत्पन्नः खलु पटः पटत्वविशिष्ट इव रूपादिविशिष्ट एवोत्पद्येत । अतः पटोत्पत्त्यनन्तरक्षण एव रूपोत्पत्तिर्न युक्तेत्यत्राह—रूपादिजन्मनीति । अयं भावः—कार्यसामान्यं प्रति द्रव्यं समवायिकारणं, अतश्च पटगतरूपं प्रति पट एव समवायिकारणम् । कारणत्वं च नियतपूर्ववृत्तित्वम् । ततश्च पटरूपोत्पत्तेः पूर्वक्षणे पटेन भाव्यमेव । तादृशस्य पटस्य कुत्राप्यदर्शनात् इत्युक्तिरतिरमणीया ! रूपशून्यं पटं को वा पश्येत् ? ननु पूर्वक्षणे तन्तवः अनन्तरं पटः, अनन्तरं पटे रूपं, अनन्तरं पटेन्द्रियसन्निकर्षः, अनन्तरं पटप्रत्यक्षं इतीयति क्रमे तन्तुकालानन्तरं मध्यकाले पटस्याप्रत्यक्षत्वेऽऽपादिते कः समाधिः । न हि मध्ये किञ्चित्कालं पट एव न दृश्यत इत्यनुभवसिद्धमेतदिति चेत्; एकस्मिन् क्षणे उत्पलपत्रशतभेदन इव कालस्यातिसूक्ष्मत्वेन मध्येऽन्तरालाग्रहणोपपत्तेः । अतः उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठति इति सुष्ठूक्तम् । अतिबहवः—अष्टौ । एवञ्च अनुमितिश्चतुर्थक्षणे जायते, प्रत्यक्षस्तु अष्टमक्षणे जायते । अनुमितिक्षणे पटस्याभावाच्च न तत्प्रत्यक्षापत्तिः । अयमेव न्यायः कार्यस्थले सर्वत्र द्रष्टव्य इति ॥ § 2569

I.341/KSV

नापि विधुरप्रत्ययादिना कार्यानुत्पत्तिः । अनुत्पन्नावयवक्रियत्वविशेषणोपादानेन तद्विनाशाशङ्कनात् । क्रियातश्चोत्तरोत्तरकार्याणामवश्यं भावित्वात् ॥ § 2570

## कारणात् योग्यतानुमानं न साधु

यदपि हेतुना यः समग्रेण इत्यादिना योग्यताऽनुमानं व्याख्यातम्— तदप्यसाधु—स्वभावानुमानस्य निरस्तत्वात् । लोकश्च कारणादविकलात् कार्यमेव कल्पयति, न योग्यतामित्यलं प्रसङ्गेन ॥ § 2571

## शेषवत्पदव्याख्यानम्

शेषवदिति—यत्र कार्येण कारणमनुमीयते—यथा नदीपूरेणोपरितने देशे वृष्टिरिति । अत्रापि वृष्टिमदुपरितनदेशसंसर्गलक्षणो नदीधर्मः तद्धर्मेणैव विशिष्टेन पूर्णतादिनाऽनुमीयते । वृष्टिमत्पृष्ठदेशसंसृष्टा इयं नदी—फेनिलकलुषत्वादिविशिष्टपूरोपेतत्वात्— पूर्वोपलब्धैवंविधधुनीवत् ॥ § 2572

अयं देशो वा वृष्टिविशिष्टदेशान्तरसंसृष्टः विशिष्टनदीपूरवत्त्वेनानुमीयत इति प्राक्तनवैयधिकरण्यादिचोद्यचक्रस्येहापि नास्ति प्रसरः ॥ § 2573

तद्विनाशाशङ्कनादिति । तेन हि विशेषणेन विरोधिसामग्र्यभावः प्रदर्शितः इत्यर्थः । ननु भवता विशेषणदाने किं विरोधिसामग्री बिभ्येत् ? इत्यत्राह—क्रियात् इति । क्रियायाः क्षणचतुष्टयावस्थाननियमेन स्वकार्यस्य चावश्यनिर्वर्तनीयत्वेन मध्ये क्रियान्तरं न प्रविशेत् । एकस्यां हि शाखायां क्रियायामुत्पन्नायां क्रियायाश्चलनरूपत्वेन विभागपूर्वसंयोगनाशोत्तरसंयोगाः अनतिक्रमणीया एव । ननु तत्क्रियाया अव्यवहितपूर्वक्षणे विरोधिक्रियायां सत्यां कः प्रतीकारः ? इति चेत्, विरोधिक्रियाया अपि क्षणचतुष्टयावस्थानेन उक्तयुक्तीनां तुल्यत्वात् ॥ § 2574

अनुमीयते—इत्यनन्तरं तत् शेषवदिति पूरणीयम् । सिद्धे हि कारणे नानुमेयं, असिद्धे खपुष्पवन्नानुमेयं इत्यादिदूषणाभासं स्मरन्नाह—अत्रापीति । तद्धर्मेणैव—नदीधर्मेणैव ॥ § 2575

विशिष्टेति । फेनिलकलुषत्वादिविशिष्टेत्यर्थः ॥ § 2576
I.342/KSV

फलतस्त्वियं वाचो युक्तिः—कार्येण कारणमनुमीयते कारणेन कार्यमनुमीयत इति; परमार्थतस्तु धर्मी धर्मवत्त्वेन धर्मवाननुमीयत इति स्थितिः । यदाह भट्टः श्लो. वा. १-१-५ अनु. २४— § 2577

स एव चोभयात्माऽयं गम्यो गमक एव च ।
असिद्धेनैकदेशेन गम्यः सिद्धेन बोधकः इति ॥§ 2579

१--२ ] इति— nyāma-wit_kha

ननु सूत्रभाष्यादौ, कारणात् कार्यानुमानं पूर्ववत्, कार्यात् कारणानुमानं शेषवत् इति कथ्यते; भवता तत्तद्धर्मविशिष्टस्य धर्मिणः, देशस्य वाऽनुमानं तदित्युच्यत इति कथमिदमिति शङ्कायामाह—फलत इति । धर्मीत्यादि । कश्चिद्धर्मी केनचिद्धर्मेण किञ्चिद्धर्मवाननुमीयत इत्यर्थः । स एवेत्यादि । सोऽयं पक्ष एव उभयात्माहेतुविशिष्टस्वरूपः साध्यवत्स्वरूपश्चेति स एव गम्यः गमकश्च । एकस्यैव कथमुभयमित्यत्राह—असिद्धेनेति । असिद्धेनैकदेशेन—धर्मेण, विशिष्टवस्तुन एकदेशो हि विशेषणम्, सः गम्यः—साध्यः, सिद्धेन चैकदेशेन—धर्मेण सः बोधकः—गमकः । अतश्च एकदेशविशिष्टश्च धर्म्यैवात्रानुमीयते २७ श्लो. ॥ § 2580

अत्र रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् २-२-३७ नैकदेशत्रासससादृश्येभ्योऽर्थान्तरभावात् ३७ इत्यत्र महर्षिणा यदनुमानपरीक्षणं कृतं तदत्रैव प्रसक्तत्वात्प्रदर्श्यते, न हि ग्रन्थकारेण सूत्रक्रम आद्रियते— सूत्रयोश्चायमर्थः—कार्यात् कारणानुमानं न घटते । तद्धि, नदीपूरेण, पिपीलिकाण्डसंचारेण मयूररुतेन वा वृष्ट्यनुमानम् । एतत्सर्वं व्यभिचरितमेव । नदीप्रबाहस्योपरिदेशे सेतुबन्धादिनिरोधादपि वृष्टिशून्यकाले प्रवहेत् नदी । नीडोपघातादपि पिपीलिकाण्डसंचारो दृश्यते । मयूरवत् मनुष्येण कूजनमपि संभवेत् । अतो व्यभिचरितत्वात् कार्येण कारणानुमानं न संभवतीति प्रथमसूत्रार्थः ॥ § 2581

अत्र प्रतिविधीयते द्वितीयसूत्रेण—नेति । कुतः ? प्रकृतानुमानहेतुभूतस्य नदीपूरस्य, पिपीलिकाण्डसंचारस्य, मयूरवाशितस्य च व्यभिचारिभ्यः एकदेशत्रासससादृश्येभ्यो विलक्षणत्वात् । रोधोपघाताज्जातः खलु प्रबाहः एकदेशः—अल्पः, यावान् यथा च प्रभूतवर्षात् नदी प्रवहति न तथा रोधेन । वृष्टेः प्राक् पिपीलिकाण्डसंचारः यादृशः न तादृशः सार्वत्रिकः त्रासात् भवति ।

### कार्यानुमाने दोषोद्धारः

यत्तु सेतुभङ्गहिमविलयनादिनाऽपि नदीपूरोपपत्तिर्दृष्टेति— तत्राप्युच्यते—

आवर्तवर्तनाशालिविशालकलुषोदकः ।
कल्लोलविकटास्फालस्फुरत्फेटच्छटाञ्चितः ॥ २४६ ॥§ 2584

वहद्बहलशैवालवनशाद्वलसङ्कुलः ।
नदीपूरविशेषोऽपि शक्येत न न वेदितुम् ॥ २४७ ॥§ 2586

प्रमातुरपराधोऽयं विशेषं यो न पश्यति ।

७ ] नि— nyāma-wit__kha

नानुमानस्य दोषोऽस्ति प्रमेयाव्यभिचारिणः ॥ २४८ ॥§ 2588

रोधोपघातसादृश्यव्यभिचारनिबन्धनम् ।
अनुमानाप्रमाणत्वमतो वक्तुमसांप्रतम् ॥ २४९ ॥§ 2590

पारंपर्येण वृष्टिश्च नदीपूरस्य कारणम् ।
पतद्घनपयोबिन्दुसन्दोहस्यन्दनक्रमात् ॥ २५० ॥§ 2592

याद‍ृशं मयूरवाशितं, न ताद‍ृशं पुरुषस्य । मन्दमतिमिरेषां वैलक्षण्याग्रहणे पुरुषस्यापराधोऽयं न हेतोः । अतः विलक्षणात् कार्यात् कारणानुमानं युक्तमेवेति द्वितीयसूत्रार्थः ॥ § 2593

तदेतत्सर्वं संगृह्णाति—(?)त्वित्यादि । प्रतिरुद्धस्य जलस्य प्रवहणहेतुः उक्तः—सेतुभङ्गः । एवमन्यदप्यूह्यमित्याह—हिमेत्यादि । सेतुभंगप्राबाहापेक्षया प्रवर्षजवृष्टेर्वैलक्षण्यमाह—आवर्तेत्यादि । वर्तना—स्थितिः । ननु वृष्टेः प्रवाहस्य च कार्यकारणभावो नास्त्येव । वर्षणं नाम आकाशात् जलकणिकापतनम् । तस्य च कथं महाप्रबाहहेतुत्वम् । वृष्टिः खलु भूप्रदेशे । तस्मात्प्रसृतानां कुल्यादीनां नद्यां पतने नदी प्रवहते । अतः उभयोः कार्यकारणभावाभावात् कथमेतदनुमानम् ? इत्यत्राह—पारंपर्येणेति । पारंपरिकत्वमात्रान्न कारणत्वहानिः, व्यवहाराधीनत्वात् कार्यकारणभावस्य । व्यवहरति च तथैव सर्वोऽपि लोक इत्यर्थः ॥ § 2594

I.344/KSV

## सामान्यतोदृष्टपदव्याख्यानम्

सामान्यतोद‍ृष्टं तु—यत् अकार्यकारणभूताल्लिङ्गात् ताद‍ृशस्यैव लिङ्गिनोऽनुमानम्—यथा कपित्थादौ रूपेण रसानुमानम् । रूपरसयोः समवायिकारणमेकं कपित्थादिद्रव्यम्, न तु तयोरन्योन्यं कार्यकारणभावः ॥ § 2595

शाक्यद‍ृष्ट्याऽपि वर्तमानयोः क्षणयोः इतरेतरकार्यकारणता न सम्भवत्येव ॥ § 2596

धर्मिणश्च रूपवत्त्वेन रसवत्ताऽनुमानात् असिद्ध्यादिचोद्यानां पूर्ववदनवकाशो वक्तव्यः ॥ § 2597

## भाष्यप्रदर्शितसामान्यतोदृष्टानुमानविमर्शः

यत्पुनर्भाष्यकारेण भास्करस्य देशान्तरप्राप्त्यागत्यनुमानमुदाहृतं—तदयुक्तम्—देशान्तरप्राप्तेर्गतिकार्यत्वात् कार्येण कारणानुमानं शेषवदेवेदं स्यात् ॥ § 2598

१ ] तल्लि— nyāma-wit_ka
४ ] कारणता— nyāma-wit_ka
८ ] म्रौ— nyāma-wit_ka
९ ] कार्येण— nyāma-wit_ka

तादृशस्य—कार्यकारणभावशून्यस्य ॥ § 2599

शाक्येत्यादि । धर्मधर्मिभावमनभ्युपगच्छतोऽपि बौद्धस्य रूपक्षणरसक्षणयोः परस्परं कार्यकारणभावो न सम्मत इति चेत्, धर्म्यतिरिक्तं धर्मम-भ्युपगच्छतां सैद्धान्तिकानां का कथेति भावः ॥ § 2600

धर्मिण इत्यादि । कश्चिद्धर्मी केनचिद्धर्मेण किञ्चिद्धर्मवानेवानुमीयत् इत्यादि पूर्वमेवोक्तम् ॥ § 2601

गत्यनुमानं—एकस्मिन् देशे दृष्टस्य देशान्तरे दर्शनं तद्वस्तुनः क्रियामनुमापयति । प्रातः पूर्वदिशि दृष्टस्य सूर्यस्य सायं पश्चिमदिशि दर्शनं सूर्यस्य देशान्तरप्राप्तिमूलकं, तच्च गतिपूर्वकमिति—सूर्यः गतिमान् पूर्वकालिकदर्शनावच्छेदकदेशभिन्नदेशावच्छेदेन दर्शनविषयत्वात्—इत्यनुमानं भाष्ये उक्तम् ॥ § 2602

I.345/KSV

अपि च देशान्तरप्राप्तिर्देशान्तरसंयोगः । न च दशशतांशोर्देशान्तरेण शैलादिना संयोगः संभवति । नभसा तु भवन्नपि दिशा वा दुर्लक्ष्यः, प्रत्यक्षेतरवृत्तित्वात्; पवनवनस्पतिसंयोगवत् मातृगर्भसंयोगवद्वा ॥ § 2603

अथ देशान्तरे तरणिदर्शनं हेतुरुच्यते, तस्यापि गतिकार्यता पारम्पर्येण विद्यत एव—गत्या प्राप्तिः, प्राप्त्या च तत्र दर्शनमिति ॥ § 2604

अथ देशान्तरे तपनदर्शनं पक्षीकृत्य दर्शनत्वेन च, दर्शनशब्दवाच्यत्वेन वा तस्य गतिपूर्वकत्वमनुमीयते—देशान्तरे दिवाकरदर्शनं गतिपूर्वकम्, देशान्तरदर्शनत्वात्—तच्छब्दवाच्यत्वाद्वा, देवदत्तदेशान्तरदर्शनवदिति; तथापि पारम्पर्येण गतिकार्यता न निवर्तत एव । न हि दर्शनत्वं गोत्वादिवत् सामान्यमस्ति; किन्तु भावप्रत्ययेनात्र दर्शनोत्पादिका शक्तिरुच्यते । सा च नातीन्द्रिया § 2605

वस्तुतः सूर्यस्य देशविशेषप्राप्तेर्हेतुत्वमेवासंभवीत्याह—अपि चेति । दशशतांशुः—सहस्रकिरणः सूर्यः । उदयाचलाद्यभिप्रायेण—शैलादिनेत्युक्तम् । अयमर्थः—अत्र देशपदार्थः भूविशेषः ? उताकाशः ? उत दिक् ? नाद्यः तयोस्सम्बन्धाभावात् । नान्त्यौ, आकाशदिशोरतीन्द्रियत्वेन संयोगिनोरन्यतरस्यातीन्द्रियत्वे तत्संयोगस्याप्यतीन्द्रियत्वात् । वायुवृक्षसंयोगवत्, मातृगर्भसंयोगवद्वा । तथा च देशान्तरप्राप्तेरतीन्द्रियत्वेन न तेन सूर्यगत्यनुमानं संभवेत् । नभसा दिशा वा तु—इत्यन्वयः ॥ § 2606

अथेति । देशपदार्थः यः कोऽपि भवतु, देशान्तरे दृष्टस्य देशान्तरे दर्शनं तु दुरपह्नवमित्यर्थः ॥ § 2607

---

२५ ] र— nyāma-wit_ka
२७ ] उपवने—ख, तप— nyāma-wit_ka
२८ ] च वा— nyāma-wit_kha

पूर्वोक्तदिशा देशान्तरस्यैवातीन्द्रियत्वे देशान्तरदर्शनमप्यसंभवीत्यतः— दर्शनशब्दवाच्यत्वेनेति । न ह्यत्र गतिपूर्वकत्वस्य दर्शनस्य च कार्यकारणभावोऽस्ति, दर्शनं प्रतीन्द्रियादेरेव कारणत्वादिति भावः । गतिकार्यतेति । हेतुभूतस्य दर्शनत्वस्येति शेषः । पारंपर्येण गतिकार्यत्वं दर्शनत्वस्योपपादयति— न हीति । दर्शनत्वं—देशान्तरे दिनकरदर्शनम् । तथा च ज्ञानत्वं प्रत्यक्षत्वं वा जातिरूपं भवेदपि, देशान्तराधिकरणकदिनकरविषयकचाक्षुषत्वरूपं

नित्या काचित्; अपि तु स्वरूपसहकारिस्वभावैवेति दृश्यमानं स्वरूपमपि शक्तिवर्गे पतति । दृश्यमानं च देशान्तरप्राप्त्यात्मकमिति गतिकार्यम् ॥

एवं दर्शनशब्दवाच्यत्वेऽपि हेतूकृते वक्तव्यम् । गत्या देशान्तरप्राप्तिर्जन्यते, तया तत्र दर्शनम्, तेन शब्दप्रयोगः, स एव वाच्यत्वमिति भावप्रत्ययेनोक्तः । तस्मात् सर्वथा गतिकार्यत्वानपायात् शेषवदेवेदमनुमानम् ॥

तदेतद्भाष्यकारीयमुदाहरणमीदृशम् ।
रूपाद्रसानुमानं तु तस्माद्युक्तमुदाहृतम् ॥ २५१ ॥§ 2610

अकार्यकारणप्रायहेतूनां च प्रदर्शितः ।
भदन्तकलहेऽस्माभिरुदाहरणविस्तरः ॥ २५२ ॥§ 2612

## प्रकारान्तरेण सूत्रव्याख्यानम्

एवं तावन्मतुब्व्याख्यया त्रैविध्यमनुमानस्य वर्णितम् । एतत्तु फल्गुप्रायमिव मन्यन्ते । नियमात्मकसम्बन्धबलादेव लिङ्गस्य गमकत्वमुक्तम्, न कार्यादिस्वरूपेण । तत्किमीदृशत्रैविध्येन दर्शितेनेति वतिप्रत्ययमाश्रित्यान्यथा व्याचक्षते ॥ तादृशदर्शनत्वं तु नीलघटत्वादिवत् न जातिः, अन्यथा देवदत्तदेशान्तरदर्शनत्वादीनामपि जातिरूपताप्रसङ्गः ॥ § 2613

शेषवदेवेति । वाचस्पतिमिश्रोऽप्येवमेवाह । परन्तु सूर्यगतेः नित्यातीन्द्रियत्वेन न कदापि तत्र गतिदेशान्तरप्राप्त्यादीनां कार्यकारणभावः गृहीतुं शक्य इत्येतावन्मात्रेण तस्य सामान्यतोदृष्टत्वमुक्तं भाष्ये । उत्तरत्रापि पु. ३४८ इदं द्रष्टव्यम् ॥ § 2614

भदन्तकलहे—बौद्धमतनिराकरणे पु. ३०७ ॥ § 2615

न कार्यादीति । तादात्म्यतदुत्पत्तिभ्यामनुमानं बौद्धानामेव, तत्तु खण्डितमेवेति वस्तुगस्या सन्नपि कार्यकारणभावः प्रकृतेऽनुपयुक्त एवेत्यर्थः ॥ § 2616

I.347/KSV

२०--२१ ] दृश्यमानं— nyāma-wit_kha

२८ ] क— nyāma-wit_ka

पूर्ववदिति । अत्र सम्बन्धग्रहणकाले लिङ्गलिङ्गिनोः प्रत्यक्षतः स्वरूपमवधार्य पुनस्तादृशेव लिङ्गेन तादृगेव लिङ्गी गम्यते, तत् पूर्वेण तुल्यं वर्तत इति पूर्ववदनुमानम् । यथा—महानसे धूमाग्नी सहचरितौ दृष्ट्वा पुनः पर्वते धूमाग्न्यनुमानम् ॥ § 2617

## पूर्ववत् इत्यत्र वति प्रत्ययोपपादनम्

ननु ! प्रत्यक्षप्रतीत्या विषयगतसकलविशेषसाक्षात्करणक्षमया तुल्या नानुमानिकी मतिरिति कथं क्रियातुल्यत्वम् ? तदभावात् कथं वतिः ? सत्यमेवम्—तथाऽपि वह्नेरेव तादृशस्य वैलक्षण्यापादकविशेषावच्छिन्नस्य लिङ्गेन ग्रहणात् अदूरविप्रकर्षेण क्रियातुल्यत्वमुपपत्स्यते ॥ § 2618

पूर्वेणेति—तथा च तेन तुल्यं क्रिया चेद्वतिः इति हि वतिः ॥ § 2619

ननु क्रिया चेत् इति सूत्रणात् क्रियाप्रयुक्ततौल्यमेव तत्र विवक्षितम् । प्रकृते च प्रत्यक्षस्य विषयप्रकाशनक्रिया यादृशी न तादृशी अनुमानस्य । प्रत्यक्षं हि स्वविषयं विशदतममुपस्थापयेत्, अनुमानं तु विशदतस्मेव । प्रत्यक्षस्यापरोक्षज्ञानत्वात् प्रत्यक्षेण वह्निग्रहणकाले तद्गतपरिमाणरूपस्पर्शसंख्यादिविशिष्टो भासते, न तथाऽनुमाने । अनुमानं हि परोक्षप्रमितिजनकम् । अतस्तुल्यक्रियत्वाभावान्न तुल्यार्थे वतिः प्रकृते युज्यते इति शङ्क्ते—नन्विति । सत्यमिति । अयं भावः—पुरोवस्थितधर्मिणि यावन्तो धर्मा वर्तन्ते ते सर्वेऽपि न प्रत्यक्षेऽपि भासन्ते । अतीन्द्रियाणां गुरुत्वादीनां तत्र भानासंभवात् । ऐन्द्रियिकेष्वपि न सर्वे भासन्ते, किन्तु पुरुषापेक्षानुगुणमेव । न हि वह्निप्रत्यक्षत्वस्थले सर्वत्र तद्गततार्णत्वादिकमपि भासते । एवञ्च यावदपेक्षितधर्मविशिष्टो धर्मी प्रत्यक्षे भासते । अनुमितावपि तादृश एव भासते । प्रत्यक्षदृष्टवह्निसजातीयवह्निः खल्वनुमेयः । एवञ्च प्रत्यक्षानुमानयोरिदमेकमेव परं वैलक्षण्यं, आद्यं अपरोक्षजनकं, द्वितीयं परोक्षजनकम् । एवं स्वरूपवैलक्षण्ये सत्यपि विषयप्रकाशनांशे नात्यन्तवैलक्षण्यम्, संशयविपर्ययाद्यतीतप्रमारूपत्वादुभयोरपि । अतश्च प्रत्यक्षानुमानयोः विप्रकर्षः—वैलक्षण्यं विषयप्रकाशनांशे—नातीव वर्तत इति पूर्ववत्—प्रत्यक्षतुल्यं अनुमानं भवत्येव ॥ § 2620

I.348/KSV

## शेषवत्पदव्याख्यानम्

शेषवन्नाम् परिशेषः । स च प्रसक्तप्रतिषेधे अन्यत्राप्रसङ्गात् शिष्यमाणे संप्रत्ययः । यथा—क्वचित्प्रदेशे धूमेनाग्निमात्रेऽनुमिते, किमिन्धनोऽयमग्निः

१४--१५ ] पूर्व— nyāma-wit__ka
१७ ] क्षात्का— nyāma-wit__ka

इति विमर्शे प्रसक्तानां तृणपर्णकाष्ठादीनां अप्रसङ्गाच्च गोमयेन्धनोऽग्निः परिकल्प्यते । यथा वा—शब्दे द्रव्यकर्मत्वप्रतिषेधात् सामान्यादावप्रसङ्गाच्च गुणत्वानुमानं वक्ष्यते ॥ § 2621

## सामान्यतोदृष्टपदव्याख्यानम्

सामान्यतोदृष्टं तु—यत्र सम्बन्धकालेऽपि लिङ्गिस्वरूपमप्रत्यक्षं—नित्यपरोक्षमेव सामान्यतो व्याप्तिग्रहणादनुमीयते—यथा शब्दाद्युपलब्ध्या श्रोत्रादि करणम् । इन्द्रियाणामतीन्द्रियत्वात् न कदाचित् प्रत्यक्षगम्यत्वम् । अथ च छेदनादिक्रियाणां परश्वधादिकरणपूर्वकत्वेन व्याप्तिग्रहणात् शब्दाद्युपलब्धिक्रियाणां करणपूर्वकत्वमनुमीयते ॥ § 2622

## अनुमानानां प्रत्यक्षपूर्वकत्वेऽपि त्रिविधत्वोपपादनम्

अत्र वतिव्याख्याने चोदयन्ति । पूर्ववदेवमेकमनुमानमुक्तं स्यात्, न त्रिविधम् । यतो न तावदनवगतव्याप्तिकं लिङ्गं § 2623

अग्निमात्रे—अग्निसामान्ये । गोमयं—गोश्च पुरीषे इति मयट् । प्रकृते शुष्कं गोमयं—करीषो विवक्षितः । अयं परिशेषः प्रत्यक्षमूलक एव बहुल इत्यतो दृष्टान्तान्तरमाह—द्रव्येत्यादि । शब्दो गुणः द्रव्यादिषट्कानात्मकत्वे सति पदार्थत्वात् इति परिशेषानुमानम् । तत्र, शब्दो न द्रव्यं, एकद्रव्यसमवेतत्वात्; न कर्म स्वसजातीयशब्दान्तरजनकत्वात्; न सामान्यादिः जातिमत्त्वात् इत्यनुमानं ज्ञेयम् । विस्तरस्तु तत्प्रकरणे वक्ष्यते ॥ § 2624

सम्बन्धकाले—सम्बन्धग्रहणकाले । सम्बन्धः—व्याप्तिः । कदाचित्—कदाचिदपि । छेदनादि परश्वधादि इति निदर्शनार्थम् । तथा च क्रियाणां करणपूर्वकत्वनियमादित्यर्थः । क्रिया—धात्वर्थः ॥ § 2625

एवं—पूर्ववत्पदस्य एवं व्याख्याने । पूर्वोक्तं सर्वमप्यनुमानं

गमकं भवति । विशेषाणामनन्तत्वेन च तदन्वयव्यतिरेकयोर्दुरवगमत्वात् सर्वत्र सामान्येनैव व्याप्तिग्रहणम् । यच्चेत्थं व्याप्तिज्ञानं तत्तुल्यं त्रितयेऽपि । अतः सर्वं पूर्ववदेव स्यात्; वतेः सर्वत्र संभवात् ॥

तदेतदयुक्तम्—अवान्तरविशेषस्य सुस्पष्टस्य भावात् । व्याप्तिपूर्वकमनुमानम् इत्येतावता यद्येकविधमुच्यते—तत्सत्यमेवं प्रकारमेवेदम् । तस्मिन् सत्यपि तु साम्ये भेदान्तरसंभवात् त्रैविध्यमस्य प्रतिपाद्यते ॥

तथा हि—धूमज्वलनयोः पूर्वं प्रत्यक्षेण ग्रहणात् इदानीं तेनैव धूमेन स एवाग्निरनुमीयत इति पूर्ववदिदमनुमानमुच्यते—यत् प्रत्यक्षपूर्वकमिति प्रसिद्धम् ॥ प्रत्यक्षपूर्वकमेव दृष्टम्, पूर्वदर्शनानुरोधेनैवानुमानप्र-

---

१३ ] लिङ्ग— nyāma-wit_kha

१७ ] करणपूर्वकत्वेन व्याप्तिग्रहणात् शब्दाद्युपलब्धिक्रियाणां करण— nyāma-wit_ka

वृत्तेः सर्वं पूर्ववदेवेति इतरे अनुमाने नावशिष्येते इत्यर्थः । ननु पूर्ववदनुमानं वह्निधूमादिव्यक्तिविषयकं, सामान्यतोदृष्टं तु न व्यक्त्याश्रितं, किन्तु सामान्याश्रितमित्यस्ति विशेष इति चेत् तत्राह—विशेषाणामिति । वह्निधूमव्यक्तीनामसर्वज्ञदुर्विज्ञेयत्वेन तत्रापि व्याप्तिः सामान्याश्रितैवोपपादिता पूर्वमेव ॥ § 2626

अवान्तरेत्यादि । अयं भावः—पूर्ववत् पदेन प्रत्यक्षपूर्वकत्वमात्रं नोच्यते; तस्य सामान्यलक्षणरूपत्वेन अनुमानत्रयानुगतत्वात् । किन्तु प्रत्यक्षपूर्वकत्वेऽपि किञ्चित्किञ्चिद्वैलक्षण्यात् विभागः प्रदर्शितः । विभागस्थले सर्वत्रापि खल्वेवमेव । तत्र यज्जातीययोर्व्याप्तिदर्शनं तज्जातीयस्यैव साध्यस्य सिद्धिः पूर्ववदित्युच्यते । महानसे दृष्टजातीयस्यैव वह्नेः पर्वतेऽनुमानात् । नात्र साध्यं सर्वदाऽतीन्द्रियम्; व्याप्तिग्रहणवेलायां, पर्वतसमीपगमने वा प्रत्यक्षमेव तत् । सामान्यतोदृष्टानुमाने तु साध्यं सर्वदाऽतीन्द्रियमेव, दृष्टसजातीयमपि न । न हि वास्यादीनां छेदनकरणत्वं यादृशं तादृशमेव उपलब्धिकरणत्वं श्रोत्रस्य । छेदनक्रियातोऽत्यन्तविलक्षणा हि ज्ञानरूपक्रिया । अतस्तत्र दृष्टसजातीयत्वं नास्त्येव । न हि यो धूमवान् स वह्निमान् इतिवत् यः शब्दसाक्षात्कारः सः श्रोत्रकरणकः इति हेतुसाध्यव्यक्तयोर्व्याप्तिरवगन्तुं शक्यते, श्रोत्रेन्द्रियस्यातीन्द्रियत्वात् । तथा च पूर्ववदनुमाने व्यक्त्योरेव व्याप्तिः, अनुगमकतया तु सामान्यं प्रविशते । सामान्यतोदृष्टानुमाने तु सामान्यमेव पुरतो भाति, आश्रयतया परं व्यक्तिभानमिति अनुभववैलक्षण्यमस्तीति । परिशेषानुमानस्य वैलक्षण्यं तु स्पष्टमेव ॥ § 2627

I.350/KSV

ननु ! धूमान्तरेण वह्न्यन्तरानुमानं किं न प्रत्यक्षपूर्वकम् ? क एकमाह—न पूर्ववदिति ! कथं तर्हीदमुच्यते—तेनैव धूमेनेति ? जात्यभिप्रायमेतदुच्यते, न व्यक्त्यभिप्रायम् ॥ § 2628

ननु ! सामान्यतस्तर्हि तत्परिच्छेदात् सामान्यतोदृष्टमेवेदं स्यात्—न—सामान्यतोदृष्टस्य नित्यपरोक्षानुमेयैकविषयत्वात् ॥ § 2629

प्रसक्तप्रतिषेधादिना च नियतसाध्यपरिच्छेदहेतुः परिशेषानुमानमुच्यते—यथा गोमयेन्धनदहनानुमानमुदाहृतम्, शब्दे वा गुणत्वकल्पनम् ॥ § 2630

सामान्यतोदृष्टं तु नित्यपरोक्षविषयमुदाहृतमेव श्रोत्राद्यनुमानम् । तदेवं भेदसंभवात् त्रिविधमनुमानमिति युक्तम् ॥ § 2631

## एकस्मिन्नपि विषये त्रिविधानुमानसंभवः

आस्तां वा उदाहरणभेदः । एकत्राप्युदाहरणे त्रैविध्यमभिधातुं शक्यते । यथा—इच्छादिकार्यं-आश्रितम्-कार्यत्वात्-घटवत् इत्याश्रयमात्रे साध्ये पूर्ववदनुमानम् । प्रसक्तशरीरेन्द्रियाद्याश्रयप्रति- § 2632

तेनैव धूमेन इत्यादेस्तद्व्यक्तिपरत्वं भ्राम्यन् पृच्छति—नन्विति ॥ § 2633

अत्र आदिपदेन अन्यत्राप्रसङ्गस्य ग्रहणम्, प्रतिषेधमात्रं तु तुच्छस्यापि वर्तते । यथेत्यादि । अयं वह्निः गोमयेन्धनः, तृणाद्यजन्यत्वे सति इन्धनजन्यत्वात्; शब्दः, गुणः, द्रव्याद्यनात्मकत्वे सति प्रमेयत्वात् इत्यादौ हि हेतुसाध्यव्यक्त्योर्व्याप्तिरेव नास्ति, नापि अतीन्द्रियसाध्यकत्वम् । परिशेषत्वरूपं तु तत्प्रकरणे १० आह्निके परीक्ष्यते ॥ § 2634

इच्छादीति । इच्छादिकं आत्माश्रितं आत्मव्यतिरिक्तानाश्रितत्वे सति आश्रितत्वात् इति परिशेषानुमाने विशेष्यासिद्धिवारणाय—इच्छादि, आश्रितं, कार्यत्वात् घटवत् इति प्रयोगे इदं पूर्ववदनुमानम् । अत्र—यदितरानाश्रयत्वे सति आश्रितत्वं यत्र तत्र तदाश्रितत्वं, कपालेतरानाश्रितः आश्रितश्च घटः कपालाश्रितः इति व्याप्तेः प्रयोगात् सामान्यतोदृष्टमपि भवति, विशेषव्याप्तेर्दुर्वचत्वात्, साध्यनिविष्टः आत्मा हि अतीन्द्रियः । यद्यपि तत्तदात्मा तस्य तस्य प्रत्यक्षः, अथापि आत्मसामान्यस्यैव साध्ये निविष्टत्वात्तदती

षेधेन विशिष्टाश्रयकल्पने तदेव परिशेषानुमानम् । अनुमेयस्य नित्यपरोक्षत्वात् तदेव सामान्यतोदृष्टं च ॥

तर्हि परिशेषानुमानस्य सामान्यतोदृष्टस्य च को विशेषः ? उच्यते—परिशेषानुमानप्रवृत्तावन्यः पन्थाः; सामान्यतोदृष्टस्यान्यः । इच्छादिकार्यं देहादिविलक्षणाश्रयम्—शरीरादिषु बाधकप्रमाणोपपत्तौ सत्यां कार्यत्वादिति सामान्यतोदृष्टस्य क्रमः । परिशेषानुमानस्य त्वित्थं प्रवृत्तिः—इच्छादेराश्रयत्वेन प्रसक्तानि शरीरेन्द्रियमनांसि निषिध्यन्ते, दिक्कालादौ च तत्प्रसङ्गो नास्ति, तत्पारिशेष्यादात्मैव तदाश्रय इति । परिशेषानुमाने च सर्वत्र नैष नियमः—साध्यस्यातिपरोक्षत्वमिति;—गोमयाग्निकल्पनादिदर्शनात् । सामान्यतोदृष्टं तु नित्यपरोक्षविषयमेवेति सूक्तं त्रैविध्यम् ॥

## प्रभाकरोक्तसामान्यतोदृष्टानुमानम्

अपरे पुनः अदृष्टस्वलक्षणविषयं शक्तिक्रियानुमानं सामान्यतोदृष्टमुदाहरन्ति; देवदत्तादावपि क्रियायाः परोक्षत्वात् । न्द्रियत्वम् । विशिष्टाश्रयः—आत्मरूपः ॥ § 2635

को विशेष इति । हेतुसाध्यव्यक्त्योर्व्याप्त्यग्रहणेन पूर्ववतो वैलक्षण्यसत्त्वेऽपि सामान्यतोदृष्टान्न विशेषः, अतीन्द्रियसाध्यकस्य तौल्यादित्यर्थः । अन्यः पन्था इत्यादि । प्रसक्तप्रतिषेधः परिशेषानुमानस्यासाधारणं कृत्यम् । तेन शिष्यमाणे संप्रत्ययश्च । सामान्यतोदृष्टे तु अन्यप्रसक्तिरेव न इति विशेषः ॥ § 2636

शबरस्वामिना—तत्तु द्विविधं; प्रत्यक्षतो दृष्टसम्बन्धं, सामान्यतो दृष्टसम्बन्धं च इत्युक्तं भाष्ये । एतद्व्याख्यातृभिः प्रभाकरमिश्रैः बृहत्यां—अदृष्टस्वलक्षणविषयमनुमानमस्ति क्रियादिषु इत्युक्तम् । बृहतीव्याख्यातृभिः शालिकनाथैश्च— क्रियादिषु क्रियायां शक्तौ च इत्यनेन बृहत्युक्तेन आदिप-

२४ ] दृष्टमुच्यते— nyāma-wit_ka nyāma-wit_kha

२५ ] ननु परिशेषस्य—

देन शक्तेस्संग्रहः प्रदर्शितः । प्रकरणपञ्चिकायां च अयमर्थः विस्तरेण निरूपितः । एतत्सर्वमालोच्याह—अपरे पुनरिति । स्वलक्षणं—स्वासाधारणं स्वरूपम् । ननु भाष्ये सामान्यतोदृष्टसम्बन्धं यथा—देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिमुपलभ्यादित्यगतिस्मरणम् इति कथनात् देवदत्तक्रियायाः प्रत्यक्षत्वमुक्तम् । तत् कथं क्रियाया अनुमेयत्वम् ? इत्यत्राह—देवदत्तादावपीति । संख्या

चलतीति प्रत्यये हि न देवदत्तस्वरूपातिरिक्तक्रियातत्त्वप्रतिभासः ॥

य एव देवदत्तात्मा तिष्ठत्प्रत्ययगोचरः ।
चलतीत्यपि संवित्तौ स एव प्रतिभासते ॥ २५३ ॥§ 2639

अविरलसमुल्लसत्संयोगविभागप्रबन्धविषयत्वाच्चलतीतिप्रत्ययस्य न सर्वदा तदुत्पादः ॥

कथं तर्हि नित्यपरोक्षे क्रियास्वलक्षणेऽनुमानं क्रमत इति चेत् ? कार्यस्य कादाचित्कत्वेन कारणपूर्वकत्वात् परिदृश्यमानस्य द्रव्यस्वरूपस्य कारणत्वे सर्वदा कार्योत्पादनप्रसङ्गात् सर्वदा तत्स्वरूपसद्भावात्, न च सर्वदा कार्यमुत्पद्यत इति तदतिरिक्तक्रियानुमानम् ॥ भावात् १-१-२० इति सूत्रभाष्ये बुद्धिकर्मणी इति प्रकृत्य न हि ते प्रत्यक्षे इति स्पष्टं बुद्धेरिव कर्मणोऽप्यप्रत्यक्षत्वमुक्तम् । भाष्यकारोऽपि आद्यानुमाने प्रत्यक्षत इति विशेषयन्निदं द्रढयति । अतश्च प्रकृते देवदत्तक्रियाऽप्यनुमेयैव भाष्यकारसम्मता । लोके सर्वैर्निश्चितत्वात् तस्या दृष्टान्तत्वेनोपादानम् । अत्र च उपलभ्य इति पदं देशान्तरप्राप्तिमात्रेऽन्वेति । धूमाद्वह्निमुपलभ्य इत्यादाविवानुभवसामान्यपरं वा । अतः कर्माप्रत्यक्षमित्येव भाष्यकारसम्मतमिति । ननु लोके क्रियाविषयिणी चलतीत्यादिप्रतीतिर्दृश्यते । भाष्यकारो वा अनुभवविरुद्धं कथं ब्रूयादित्यत्र—कर्मप्रत्यक्षत्वं युक्तिविरुद्धमित्याह—चलतीत्यादि । न हि चलतीति प्रत्ययमात्रेण देवदत्ते उपचयो वाऽपचयो वा कश्चन अतिरिक्तो विशेषो दृश्यते । अतः देवदत्ते कर्म न प्रत्यक्षम् । किन्तु तस्य तद्धस्तादेर्वा देशान्तरप्राप्तिः प्रत्यक्षा, तया च क्रियाऽनुमीयत इति ॥ § 2640

ननु यदि तिष्ठच्चलद्देवदत्तयोर्न कोऽपि विशेषः तर्हि तिष्टत्यपि देवदत्ते चलतीति प्रत्ययापत्तिः—इत्यत्राह—अविरलेति । एकस्यां क्रियायामुत्पन्नायां हि क्रिया, क्रियातो विभागः, ततः पूर्वसंयोगनाशः, तत उत्तरदेशसंयोग इति शृंखलाऽवर्जनीया । अत उक्तं अविरलेति प्रबन्धेतिच । एवञ्च विभागोत्तरदेशसंयोगादिकं परं प्रत्यक्षं, न तु तदतिरिक्ता काचित्क्रिया प्रत्यक्षा । उत्तरदेशसंयोगश्च उत्तरदेशप्राप्तिरेव । अतस्सुष्ठूक्तं देशान्तरप्राप्त्या क्रियाऽनुमीयत इति । नित्यं परोक्षे इत्यर्थः । एवं तर्हि क्रियाया अनङ्गीकारे वा का हानिः—इति भावः । समाधत्ते—कार्यस्येत्यादि । देशान्तरप्राप्तिरूपस्येति शेषः । द्रव्यस्वरूपस्य—द्रव्यस्वरूपमात्रस्य । तथा च उत्तरदेश

एवं शक्तावपि द्रष्टव्यम् । क्रियाशक्तिस्वरूपस्य च नित्यपरोक्षत्वात् त-

ददृष्टस्वलक्षणविषयमनुमानमुच्यते, न तु विशेषविषयम्; विशेषव्याप्तिग्रहण-स्यासंभवादिति ॥

### क्रियायाः प्रत्यक्षत्वम्

तदिदमनुपपन्नम्—परिस्पन्दरूपस्योत्क्षेपणादिभेदवतः कर्मणश्चलत्यादिप्रतीतौ प्रकाशमानत्वेन प्रत्यक्षत्वात् न तस्य नित्यानुमेयत्वम् । संयोगविभागालम्बनत्वे तु संयुज्यते, विभज्यते, इति प्रतीतिः स्यात्, न चलतीति; यथाविषयं प्रत्ययोत्पादात् । संवेदनानुसारिणी च विषयव्यवस्था । अन्यथा घटप्रत्ययेऽपि पटस्यालम्बनता स्यात् । संयोगविभागालम्बनत्वे सति तिष्ठत्यपि चलत्प्रत्ययः प्राप्नोति; तत्रापि संयोगविभागसंभवात् । स्थाणौ च श्येनसंयोगविभागवति चलतीतिप्रतिभासो भवेत् । अविरलतदुपजननप्रबन्धेऽपि भूतभाविनोः संयोगविभागयोः परोक्षत्वात् संयोगविभागादिहेतुतयैव क्रिया सिद्ध्यतीति भावः । क्रियाशक्ति—इत्यत्र दृष्टान्ततया क्रियोपादानम् ॥ § 2641

एवं क्रियाया अतीन्द्रियत्वं प्राभाकरानुसारेण पूर्वपक्षितम् । कुमारिलभट्टैस्तु—प्रत्यक्षदृष्टः सम्बन्धः गतिप्राप्त्योस्तथैव हि १३८ श्लो. इत्यादिना क्रियायाः प्रत्यक्षत्वमुक्तम् । तत्र सुचरितमिश्रैर्बह्व्यो युक्तयः प्रदर्शिताः । तद्रीत्यैव सिद्धान्तेऽपि क्रियायाः प्रत्यक्षत्वं साधयितुमुपक्रमते—तदिदमित्यादि । चलत्यादिप्रतीतौ—चलतीत्यादिप्रतीतौ । संयोगविभागालम्बनत्वे— चलतीतिप्रत्ययस्येति शेषः । घटप्रत्यये—घटोल्लेखिप्रत्यये । तत्रापीति । तिष्ठत्यपि वस्तुनि भूतकालिकयोः संयोगविभागयोस्सत्त्वादित्यर्थः । ननु तयोर्वर्तमानत्वमावश्यकमिति चेत् तदाप्याह—स्थाणाविति । ननु सकृत्तयोरुत्पत्तिमात्रान्न चलतीतिप्रतीतिः, किन्तु निरन्तरतत्परंपरोत्पत्तावेव— इति चेत् तत्राह—अविरलेति । तादृशप्रबन्धे चलतिप्रत्ययविषयत्वेनांगीकृतेऽपीत्यर्थः । अथवा अविरलः तादृशप्रबन्धः—अनुवृत्तिः यस्मिन् इति बहुव्रीहिः । वस्तुनि तयोस्संभवेऽपि अतीतानागतयोर्ग्रहणं न संभवतीति भावः । एतादृशाविरलसंयोगाद्युत्पत्तिरपि सर्वत्र शपथमात्रनिर्णेयेति सूचनाय—अपि

वर्तमानयोर्ग्रहणम् । तौ च चलित्वाऽपि स्थिते देवदत्ते स्त इति तत्रापि कथं न चलतीति प्रत्ययः ॥

निरन्तरं च संयोगविभागश्रेणिदर्शनात् ।
भूमावपि भवेद्बुद्धिः चलतीति मनुष्यवत् ॥ २५४ ॥§ 2644

### क्रिया न संयोगविभागरूपा

अथ मनुषे—यत्क्रियाजन्यत्वं संयोगविभागयोः—तत्रैव चलतीत्यादिबुद्धिः, नान्यत्र । देवदत्तक्रियया च तौ जन्येते, न निष्क्रियया भूम्येति न तस्यां तथा प्रत्ययः । यद्येवं—क्रियान्वयव्यतिरेकानुविधानात् क्रियालम्बन एवायं प्रत्ययः, न संयोगविभागालम्बनः । तदालम्बनत्वे हि तयोर्द्वयवृत्तित्वाविशेषात्

२२ ] पर— nyāma-wit_kha

विशेषे कारणं वाच्यम्; येन पुरुष एवायं प्रत्ययः, न भूमाविति । देवदत्तक्रियाजन्यत्वेन तु न विशेषः; यतः क्रियायाः परोक्षत्वे सति तदेव न विघ्नः—किमसौ देवदत्ताश्रया क्रिया ? किं वा भूम्याश्रितेति ? संयोगविभागकार्यानुमानस्योभयत्रापि तुल्यत्वात् । न च देवदत्ते गच्छति भूमौ, अनवरतवहद्बहलसंयोगविभागवत्यपि वा तरङ्गिणीतीरपाषाणे शब्दः । आस्तां वर्तमानयोरेवेत्यादि । तथा च किं प्रवृते ? इत्यत्राह—तौ चेति । पूर्वं अपिशब्देन सर्वत्र तदसंभवे सूचिते, यत्र संभवेत्तत्र तथास्तु इति वदन्तं प्रत्याह—निरन्तरमिति । असंख्येयजङ्गमवर्गसंकुले भूतले न तद्दुर्लभं, चलतीति प्रतीतिस्तु नास्ति । अतस्तावन्मात्रविषयत्वं न तत्प्रतीतेरिति ॥
§ 2645

प्राणिसंयोगादिना भूम्यादौ चलतीतिप्रत्ययाभावं समर्थयति—अथेत्यादिना । यत्क्रियेति—यदीयक्रियेत्यर्थः । समाधत्ते—यद्येवमिति । द्वयेति । संयोगविभागौ हि द्विनिष्ठौ । विशेषे—देवदत्त एव चलतिप्रत्ययः, न भूमावित्यत्र । ननूक्तं यदीया क्रिया, तत्रैव चलतिप्रतीतिरितीति चेत् तत्राह— देवदत्तेति । अयं भावः—क्रिया ह्यतीन्द्रिया तव, सा च संयोगविभागानुमेया । संयोगविभागौ तु द्विनिष्ठौ । हेतुभूतौ तौ एकत्रैव क्रियामनुमापयतः, न तूभयत्रेत्यत्र न किञ्चिद्विनिगमकम् । क्रियायास्त्वनुमेयत्वान्न विनिगमकत्वम् । अतोऽगत्या क्रियायाः प्रत्यक्षत्वमेवाङ्गीकरणीयमिति । न विघ्नः इत्यत्रोक्तं वेदनं विवृणोति—किमसाविति । तरङ्गिणीत्यादि । नदीप्रवाहाधीनजल

चलतीति प्रत्ययो दृष्टः । तस्मात् क्रियाविषय एव चलतीतिप्रत्ययः, न संयोगविभागालम्बनः ॥

संयोगविभागाग्रहणेऽपि च निरालम्बे विहायसि विहरति विहङ्गमे चलतीति संवेदनं दृश्यते । न च गगनसंयोगः प्रत्यक्षः, प्रत्यक्षेतरवृत्तित्वात्, गन्धवहमहीरुहसंयोगवत् ॥

विततालोकावयव्याकाशः, तत्संयोगश्च पत्रिणः प्रत्यक्ष इति चेत्—नैतदेवम्—

तमालनीलजीमूतसमूहपिहिताम्बरे ।
निशीथे सान्धकारेऽपि चलत्खद्योतदर्शनात् ॥ २५५ ॥§ 2648

न तत्रालोकावयवी कश्चन तिमिरावयवी वा विद्यते इति केन संयोगो गृह्यते ? विभागो वा ? संयोगविभागा हि अनवरतं तत्तीरगते पाषाणे वर्तन्ते ॥ § 2649

अथ चलतीति प्रत्ययस्य संयोगविभागालम्बनत्वमपि न संभवतीत्याह—संयोगेति । संयोगविभागयोर्द्विनिष्ठत्वेन तत्र द्वितीयं वस्त्वेवैन्द्रियिकं नास्तीति सूचनाय—निरालम्ब इत्युक्तम् ॥ § 2650

१८ ] द्वात— nyāma-wit_kha nyāma-wit_kha
७ ] न च कश्चन—

ननु तत्र पक्षिणि क्रिया हि भवतोऽपि सम्मता । क्रियायां जातायां हि विभागसंयोगाववर्जनीयाविति पूर्वं भवतैवोक्तम् । तथा च तत्र संयोगविभागयोरभावो न वक्तुं शक्यते । एवं सति निरालम्बे इति कथमिति चेत्— अस्ति तत्र संयोगादिः आकाशप्रदेशेन सह । परन्त्वाकाशस्यातीन्द्रियत्वेन संयोगप्रत्यक्षासंभवात् संयोगप्रत्यक्षहेतुभूतस्य संयोगाधारस्य प्रत्यक्षद्रव्यस्याभावात् निरालम्बत्वम् । तथा च तत्र क्रियातः संयोगविभागानुमानम्, न तु संयोगविभागाभ्यां क्रियानुमानमिति द्रष्टव्यम् । एतदेवोच्यते— न चेत्यादिना । नन्वस्ति तत्राप्यालोकः प्रत्यक्षः इति शङ्कते—विततेति । परमाणुरूपाणामालोकानामतीन्द्रियत्वेन—अवयवीत्युक्तम् । नक्षत्रालोकस्याप्यसंभवद्योतनाय—तमालेत्यादि । आलोकावयवी—चलत्खद्योतालोकसंयोगाश्रयः । ननु तिमिरेण सहास्ति संयोगः खद्योतप्रकाशस्येति चेत् तत्राह—तिमिरेति । तिमिरं खल्वभावरूपमित्यर्थः ॥ § 2651

I.356/KSV

भूकम्पोत्पाते च जाते चलति वसुमतीति मतिरस्ति; न तत्र संयोगविभागौ गृह्येते, बहुलनिशीथे च न तराम् । तस्मान्न संयोगाद्यालम्बना चलतीति मतिः, अपि तु क्रियालम्बनैवेति ॥ § 2652

न च नित्यपरोक्षा क्रियाऽनुमातुमपि शक्या, कार्यस्य कारणपूर्वकत्वेन भवन्मते सम्बन्धग्रहणानुपपत्तेः । न हि ते द्रव्यस्वरूपं कारणम्; अपि तु क्रियाविशिष्टम् । क्रियायाश्च परोक्षत्वान्न तदाविष्टद्रव्यग्रहणं सुघटमिति कारणत्वाग्रहणात् घटादावपि दुर्घटा व्याप्तिप्रतीतिः ॥ § 2653

आत्माऽनुमाने तु नायं दोषः; घटादेः कार्यस्याश्रितस्य प्रत्यक्षमुपलम्भात् । तस्मान्न कार्यानुमेया क्रिया ॥ § 2654

## संयोगेनापि क्रिया नानुमातुं शक्या

न च संयोगानुमेया; संयोगान्तं कर्म इतिन्यायात् । वर्तमानायाः क्रियायास्तेनानुमातुमशक्यत्वात् । क्रियाऽनुमान- § 2655

ननु आलोकादीनां रूपादिवत् स्वपरनिर्वाहकत्वं सर्वसम्मतम् । न हि दीपप्रत्यक्षे दीपान्तरमपेक्ष्यम् । अतः खद्योतालोकस्यापि स्वपरनिर्वाहकत्वमस्तीति उपपद्यते तत्प्रत्यक्षं इति चेत् तत्राह—भूकम्पेति । भूकम्परूपः उत्पातः—महाभूतविकारः । ननु तत्रापि गृहमहीरुहभेदनादिदर्शनात् संयोगविभागप्रत्यक्षं शक्यशङ्कमित्यत्राह—बहुलनिशीथ इति । कृष्णपक्षरात्रौ, धनान्धकारे वेत्यर्थः ॥ § 2656

तन्मते क्रियाऽनुमानमप्यसंभवीत्याह न चेति । भवन्मते इत्यनेन सूचितं विशेष विशदयति—न हीति । द्रव्यस्वरूपस्य कारणत्वे सर्वदा तदुत्पादप्रसङ्गः इत्यादि पुट ३५२ खलूक्तमित्यर्थः । ननु तर्हि नित्यातीन्द्रियस्यात्मनः कथमनुमानं भवन्मते ? इत्यत्राह—आत्मानुमान इति । न हि तत्र

हेतुसाध्ययोर्व्याप्तिरदृष्टा । आश्रितत्वसामान्यस्य साध्यत्वेन कार्यत्वसामान्यस्य च हेतुत्वेन तयोः घटादौ प्रत्यक्षतस्सहचारदर्शनात् युज्यत आत्मानुमानमिति ॥ § 2657

संयोगविभागात्मकदेशान्तरप्राप्त्या क्रियानुमानं निरस्य केवलसंयोगेन क्रियानुमानं दूषयति—न चेति । संयोगान्तं कर्मेति । उत्तरदेशसंयोगोत्पत्त्यां सत्यां क्रियाकार्यं निर्वृत्तमिति क्रियोपरमः सम्मतः इत्यर्थः । संयोगाननुमेयत्वे हेतुः—वर्तमानाया इति । क्रिया हि संयोगोत्पत्त्या उपरता । वादश्च सामान्यलक्षणे पु. ४५ विस्तरेण निरस्तः ॥

**अतीन्द्रियशक्त्यनुमानमपि न समीचीनम्**

एतेन शक्त्यनुमानमपि व्युदस्तं वेदितव्यम् । पुरा च सविस्तरमतीन्द्रियशक्तिनिराकरणं पु. १०७-११४ कृतमेव ॥

तेनादृष्टक्रियाशक्तिस्वलक्षणमिति क्षमम् ।
नेदं सामान्यतोदृष्टं इति पूर्वोक्तमेव सत् ॥ २५६ ॥§ 2660

इति मतुपि वतौ वा प्रत्यये वर्ण्यमाने
त्रिविधमिदमिहोक्तं युक्तमेवानुमानम् ॥
परकविरचितानां लक्षणानां त्वमुष्मिन्
सति न भवति शोभा भास्वतीवेन्दुभासाम् ॥ २५७ ॥§ 2664

संयोगदर्शनकाले तु क्रिया नास्त्येव । प्रतीतिस्तु चलति इति वर्तमानकालिकीं क्रियां प्रदर्शयतीति भावः । तथा च क्रियाकाले संयोगस्यानुत्पत्तेः संयोगकाले क्रियाया नाशाच्च वर्तमानकालिकक्रियानुमानं दुर्घटम् ॥ § 2665

एतेन—चलतीति प्रतीतिः क्रियाविषयिण्येव, न संयोगविभागविषयिणी । अतश्च न पूर्वोक्त पुट. ३५३ दोषावकाशः । ज्ञानानुमेयत्ववादिनां भाट्टानां मते अहं ज्ञानवान् इति प्रतीतिर्यथाऽनुमितिरूपा तथा चलतीति प्रतीतिरप्यनुमितिरूपैव । अतश्च संयुज्यते इत्यादिप्रतीतितो वैलक्षण्यं उक्तप्रतीतेस्सुलभमिति न कोऽपि दोष इति—निरस्तम्; क्रियाया अनुमेयत्वे चलतीति वर्तमानताप्रतीतेर्दुर्घटत्वात् ॥ § 2666

एतेन—नित्यातीन्द्रियानुमानासंभवोपपादनेन । क्षमम्—समर्थं—निरवद्यं—क्षोदक्षममिति यावत् । मतुपीति—सूत्रघटकपूर्ववत्पद इत्यूह्यम् । लक्षणानां शोभा—इत्यन्वयः ॥ § 2667

एतावता सौत्रमनुमानलक्षणं साङ्गमुपवर्णितम् । अथ प्रत्यक्षपरीक्षायामिवात्रापि परसम्मतान्यनुमानलक्षणानि कुतो न दूष्यन्ते ? इति शङ्कायां आह—

---

२४ ] क्रमम्— nyāma-wit__ka
२५ ] तत्— nyāma-wit__kha
२६ ] वर्त— nyāma-wit__kha

बौद्धोक्तप्रतिबन्धदूषणदिशा तल्लक्षणं दूषितम्
भूयोदृष्टमितान्वयैकशरणं शोच्यं पुनः शाबरम् ।
साङ्ख्यानां तु कुतोऽनुमानघटनोपादानरूपा यतः
तेषां जातिरसौ च तद्विकृतिवद्भिन्नेति दुःस्थोऽन्वयः ॥§ 2672

बौद्धेत्यादि । नान्तरीयकार्थदर्शनं तद्विदोऽनुमानम् इति दिङ्नागः । यमन्तरा यो न भवति स नान्तरीयकः, तादृशार्थविज्ञानं—तद्विदः—तादृशनान्तरीयकत्वज्ञानवतः यज्ञायते तदनुमान मेत्यर्थः । त्रिरूपाल्लिङ्गात् यत् अनुमेये ज्ञानं तदनुमानम् न्या. वि. इति धर्मकीर्तिः । पक्षसत्त्वादिकं त्रैरूप्यं पूर्वमेव वर्णितम् । एतल्लक्षणद्वयमपि अविनाभावगर्भितम् । स च तादात्म्यतदुत्पत्तिभ्यां उक्तः । तादात्म्यतदुत्पत्तिनिबन्धनाविनाभावस्य निरस्तत्वादेव तन्मूलकं तदीयलक्षणमपि निरस्तमेव, पृथक् न दूष्यत इत्यर्थः । भूयोदृष्टं—भूयोदर्शनम् । शावरमिति । अनुमानं ज्ञातसम्बन्धस्य एकदेशदर्शनात् एकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः इति शाबरभाष्यम् । अत्र सम्बन्धश्च व्याप्तिरूपा । भूयोदर्शनगम्या च व्याप्तिः श्लो. वा. । एवं सत्यन्वयव्याप्तिमात्रमुक्तं स्यात् । न चान्वयमात्राद्व्याप्त्यवधारणं संभवति । किन्तु व्यतिरेकोपोद्बलितादन्वयात् इत्युक्तम् ३२१-पु. । अतश्चैतदपि न समीचीनम् । सिद्धान्ते तु तत्पूर्वकं इति सामान्यत उक्तम् । तेन चान्वयव्यतिरेकदर्शने क्रोढीकृते इति न दोषः । सांख्यानामिति । अनुमानघटना कुतः ? सर्वथा न संभवतीत्यर्थः । तत्र हेतुः—यतः तेषां जातिः उपादानरूपा इति । अस्तु तथा । ततः किमित्यत्राह—असौ जातिः तद्विकृतिवत् उपादानजन्यविकृतिवत् भिन्नेति अन्वयः—व्याप्त्यनुगमः दुस्स्थः । एतदुक्तं भवति—व्यक्तीनामननुगतत्वेन व्याप्तेर्दुर्ग्रहत्वे प्राप्ते जातिरेवानुगमिका वक्तव्या । निरूपितं चैतत्पुरस्तादेव । सांख्यमते च जातिर्नाम न काचिदतिरिक्ताऽस्ति । अनुगतव्यवहारश्च उपादानद्रव्यनिबन्धनः तन्मते ॥ § 2673

ननूपादानस्य मृदः ऐक्येऽपि घटशरावादिनानाविधकार्यदर्शनात् घटशरावादिषु एक एवानुगतधर्मः स्यात् । तथा च अयं घटः, अयं शराव इति विविक्तप्रतीतिः कथमिति चेत्; अतिरिक्तजातिवादे वा एकमृत्पिण्डारब्धे घटे शरावे च घटत्वशरावत्वयोः प्रतिनियमः कथमिति वक्तव्यम् । आकृतिभेदादिति चेत्; आकृतिः किं करोति ? इति वक्तव्यम् । कार्यभेदमिति चेत् तदस्माकमपि

## अनुमानं कालत्रयविषयम्

इदमिदानीं चिन्त्यते । यदेतदिन्द्रियादिसन्निकर्षजत्वादिना लक्षितमस्मदादिप्रत्यक्षं तत्किल प्रायशो वर्तमानकालविशिष्टवस्तुविषयम् । एवमिदमनुमानमपि किं तद्गोचरमेव ? किं वा कालान्तरपरिच्छेदेऽपि क्षमम् ? इति । तदुच्यते—त्रिकालविषयमनुमानमिति । कस्मात् ? त्रैकाल्यग्रहणात् । त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते । भूता नदीपूरेण वृष्टिरनुमीयते;

सैव भविष्यन्ती मेघोन्नत्या; धूमेन वर्तमानोऽग्निरिति ॥

अतश्च यन्मीमांसकैरुच्यते—चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं, नान्यत् किञ्च इति—तदयुक्तम्—चोदनावत् प्रमाणान्तरस्याप्येवं जातीयकविषयत्वोपपत्तेः । प्रत्यक्षमपि योगिनां त्रिकालविषयमुक्तम् । अस्मदादीनामपि क्वचित्—इति ॥ तुल्यम् । सुखदुःखमोहात्मकं हि जगत् आहरणधारणादिकार्यभेदविशिष्टमेव दृश्यते । तादृशकार्यानुगमाच्च अनुगतव्यवहारो निर्वहतीति न कापि हानिरिति ॥ § 2674

एवञ्चैतस्मिन् मते सुखदुःखमोहात्मकोपादानद्रव्यमेव जातिस्थानापन्नं वक्तव्यम् । सुखदुःखादिकार्याणां तद्धेतुभूतसत्त्वादिगुणानां च तत्तद्व्यक्तावेव पर्याप्तत्वेन विकृतिवत् नानात्वमेवेति नानुगमकत्वं तेषां संभवतीति अनुगतव्याप्तिग्रहः सर्वथा न संभवत्येवेति ॥ § 2675

सद्विषयं प्रत्यक्षं, सदसद्विषयं चानुमानं । कस्मात् ? त्रैकाल्यग्रहणात् इति भाष्यं स्मरन् परीक्षामुपक्रमते—इदमित्यादि । योगिप्रत्यक्षस्य प्रतिभायाश्च त्रिकालविषयत्वस्य पूर्वं २७७ पु. स्थापितत्वात्—प्रायश्च इति ॥ § 2676

एवमनुमानस्य त्रिकालविषयत्वेन चोदनासूत्रशाबरभाष्यं स्वयं गलितमित्याह—अतश्चेति । शाबरभाष्ये उपरितनवाक्यानन्तरं नेन्द्रियम् इति वर्तते । तच्च नान्यत्किञ्च इत्यस्यैव सनिदर्शनविवरणपरं व्याख्यातं प्रदर्शनार्थमत्रोक्तमिन्द्रियं इत्यनेन भट्टपादैः । तदपि न युक्तमित्याह—प्रत्यक्षमपीति । अतश्च अतीतानागतेऽप्यर्थे सूक्ष्मे व्यवहितेऽपि च । प्रत्यक्षं योगिनामिष्टं कैश्चित् इति पूर्वपक्षवार्तिकोक्तमेव साधीय इत्युक्तं भवति । क्वचित्—प्रतिभायाम् ॥ § 2677

I.360/KSV

## कालसद्भावाक्षेपः

अत्र चोदयन्ति । काले सति त्रैकाल्यग्रहणं चिन्त्यम्; स एव तु दुरुपपादः । तदभावे कस्य वर्तमानादिविभागो निरूप्यते ? § 2678

न तावद्गृह्यते कालः प्रत्यक्षेण घटादिवत् ।
चिरक्षिप्रादिबोधोऽपि कार्यमात्रावलम्बनः ॥ २५९ ॥§ 2680

न चामुनैव लिङ्गेन कालस्य परिकल्पना ।
प्रतिबन्धो हि दृष्टोऽत्र न धूमज्वलनादिवत् ॥ २६० ॥§ 2682

प्रतिभासातिरेकस्तु कथञ्चिदुपपत्स्यते ।

प्रचितां काञ्चिदाश्रित्य क्रियाक्षणपरम्पराम् ॥ २६१ ॥§ 2684

न चैष ग्रहनक्षत्रपरिस्पन्दस्वभावकः ।
कालः कल्पयितुं युक्तः क्रियातो नापरो ह्यसौ ॥ २६२ ॥§ 2686

तदभावे—कालस्यैवाभावे । ननु चिरक्षिप्रादिप्रतीतिरेव काले प्रमाणमित्यत्राह—न तावदिति । रूपवतो घटादेः प्रत्यक्षत्वं युज्यते, न त्वरूपस्य कालस्य । उक्तप्रतीतिस्तु कालोपाधित्वेन भवत्सम्मतकार्यवस्तुविषयतयाऽन्यथासिद्धः । कालाङ्गीकर्तृमतेऽपि विभोः कालस्याखण्डत्वेन उपाधिमन्तरा क्षणादिव्यवहारो न निर्वहेत । ततश्च तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन ? ननु कार्यस्वरूपस्य भानकाले सर्वत्र कालव्यबहाराभावात् ततोऽतिरिक्तं किञ्चित् तादृशव्यवहारनियामकमनुमास्यामः इत्यत्राह—न चामुनेति । चिरक्षिप्रादिव्यबहारः कालविषयकः, कालातिरिक्ताविषयकत्वे सति सविषयत्वात् । स व्यवहारः कालातिरिक्तद्रव्यस्वरूपाद्यविषयकः, परस्परविलक्षणप्रतीतिविषयत्वात्—इत्याद्यनुमानमत्र ग्राह्यम् । धूमेति—नित्यातीन्द्रियेऽनुमानाप्रवृत्तेरित्यर्थः । प्रतीतिस्त्वन्यथासिद्धेत्युक्तम् । ननु स्वरूप-कालप्रतीत्योर्वैलक्षण्यमनुभवसिद्धमित्यत्राह—प्रतिभासेति । तत्तद्विशेषणभेदात् यथा एक एव घटः नीलः, महान्, एकः इत्यादिप्रतिभासहेतुर्भवति तथा प्रकृतेऽपि युज्यते । ननु कोऽयं विशेषणभेदः प्रकृते इति चेत्—सूक्ष्मा क्रियैव । उक्तं खल्वनुपदमेव—तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन कालेन इति । ननु क्रिया क्षणचतुष्टयमात्रपरिमिता । ततोऽधिकव्यवहारः कथमिति चेत्, प्रतिक्षणमुपचीयमानक्रियापरंपरयैवेति गृह्यताम् । काल इति । अतिरिक्त इति

मुहूर्तयामाहोरात्रमासर्त्वयनवत्सरैः ।
लोके काल्पनिकैरेव व्यवहारो भविष्यति ॥ २६३ ॥§ 2689

यदि त्वेको विभुर्नित्यः कालो द्रव्यात्मको मतः ।
अतीतवर्तमानादिभेदव्यवहृतिः कुतः ? ॥ २६४ ॥§ 2691

## कालः प्रत्यक्षगम्यः इति पक्षः

एवमाक्षिप्ते सति—

प्रत्यक्षगम्यतामेव केचित् कालस्य मन्वते ।
विशेषणतया कार्यप्रत्यये प्रतिभासनात् ॥ २६५ ॥§ 2693

क्रमेण, युगपत्, क्षिप्रं, चिरात् कृतमितीदृशाः ।

प्रत्यया नावकल्पन्ते कार्यमात्रावलम्बनाः ॥ २६६ ॥§ 2695

न हि विषयातिशयमन्तरेण प्रतिभासातिशयोऽवकल्पते ॥ शेषः । सूर्यादिग्रहाणां अश्विन्यादिनक्षत्राणां परिस्पन्दाधीनः दिनादिव्यवहारः । तेषां परिस्पन्दो नाम क्रियैव । ततश्चातिरिक्तः कालः कुत्र सिद्ध इति । अतिरिक्त-कालाङ्गीकारेऽपि मूहूर्तादिव्यवहारस्य पूर्ववदेव निर्बाह्यत्वेन भक्षितेऽपि लशुने न शान्तो व्याधिरित्याह—यदि त्विति । कालस्याविभुत्वेऽनेकत्वेऽनित्यत्वे च तदङ्गीकरणमेव निरर्थकमिति भावः । कुत इति । यद्युपाधिभिः, तर्ह्युक्तः भक्षितेऽपि इति न्यायः ॥ § 2696

केचिदिति । कालश्चैको विभुर्नित्य प्रविभक्तोऽपि गम्यते । वर्णवत् सर्वभावेषु व्यज्यते केनचित् क्वचित् इति श्लो. वा. १-१-६ शब्द ३०३ कुमारिलः । अत्र पार्थसारथिः—ननु नायं कालः स्वातन्त्र्येण गम्यते । ततः किमस्य सद्भावे प्रमाणम् ? अत आह—सर्वेति । भावेषु गृह्यमाणेषु तद्विशेषणतया केनचित्पूर्वत्वेनापरत्वेन वा गृह्यते । इदं पूर्वं, इदमुत्तरं इति प्रत्ययः भावमात्रमनालम्बमानः वस्त्वन्तरमवस्थापयति, स एव कालः ॥ § 2697

विषयेति—क्रियादीनां तद्विषयत्वं तूत्तरत्र निराक्रियते ॥ § 2698

I.362/KSV

## अरूपस्यापि कालस्य प्रत्यक्षत्वम्

अरूपो नन्वयं कालः कथं गृह्येत चक्षुषा ?
रूपमेव तवारूपं कथं गृह्येत चक्षुषा ? ॥ २६७ ॥§ 2700

कथं वा रूपवन्तोऽपि परोक्षाः परमाणवः ?
तस्मात् प्रतीतिरन्वेष्या किं निमित्तपरीक्षया ? ॥ २६८ ॥§ 2702

ननु ! द्रव्येऽयं नियमः, न रूपादौ । द्रव्येऽपि नायं नियमः, यत् रूपवत् तत् प्रत्यक्षमिति—येन परमाणूनां तथाभावः स्यात् । किन्तु य-त् प्रत्यक्षं, तत् रूपवदिति । तदुक्तम्—त्रयाणां प्रत्यक्षत्वरूपवत्त्वद्रवत्वादीनि प्रश-भा-द्रव्य इति ॥ § 2703

नेदं दैविकं वचनं—यदनतिक्रमणीयम् । न च वचनेन प्रत्यक्षत्वमप्रत्यक्ष-त्वं वा व्यवस्थाप्यते । प्रत्यक्षत्वं हि ऐन्द्रियिकप्रतीतिविषयत्वमुच्यते । तच्चेदस्ति कालस्य, नीरूपस्यापि प्रत्यक्षता केन वार्यते ! रूपवत्त्वं तद्द्रव्याणामस्तु, तथा दर्शनात् ॥ § 2704

२ ] तथा— nyāma-wit__ka
११ ] पि— nyāma-wit__kha
११ ] द्र— nyāma-wit__ka

अरूपमिति । न हि रूपे रूपान्तरं वर्तते । अथापि तत् प्रत्यक्षमेव । रूपवतामपि परमाण्वादीनां अप्रत्यक्षत्वेन, अरूपाणामपि रूप-संख्यादीनां प्रत्यक्षत्वेन प्रत्यक्षत्वाप्रत्यक्षत्वयोः प्रतीतिरेव शरणीकर्तव्या ॥ § 2705

द्रव्यचाक्षुष एव रूपं कारणं, न तु रूपादिगुणचाक्षुषे इति शङ्कते— नन्विति । परमाण्वाद्यप्रत्यक्षत्वं समर्थयति—द्रव्येऽपीति । धूमवान् वह्निमानिति कथिते—न हि वह्निमान् धूमवान् इत्यपि संभवतीति भावः । उक्तार्थे प्रशस्तपादाचार्यसम्मतिमाह—तदुक्तमिति । अत्र पृथिव्यप्तेजसामेव प्रत्यक्षत्वकथनात् कालादीनामप्रत्यक्षत्वं सिद्धम् । अत्र चात्मादिषु वारणाय प्रत्यक्षपदं बाह्यप्रत्यक्षपरं व्याख्यातं कन्दल्यां श्रीधरेण ॥ § 2706

इदं—प्राशस्तपादिकम् । तद्द्रव्याणां—रूपवद्द्रव्याणां । कार्यकारणभावनिर्णये अनुभव एव हि प्रमाणमित्यर्थः । कालस्य प्रत्यक्षत्वेऽनुभव

न चानुद्घाटिताक्षस्य क्षिप्रादिप्रत्ययोदयः ।
तद्भावानुविधानेन तस्मात् कालस्तु चाक्षुषः ॥ २६९ ॥§ 2709

स्वतन्त्र एव तर्हि घटादिवत् कस्मान्न गृह्यते काल इति चेत्— वस्तुस्वभाव एष न पर्यनुयोगार्हः । रूपिद्रव्यविशेषणतां गतस्य तस्य ग्रहणम्, न दण्डादिवत् स्वतन्त्रस्यापीति । गगनादेस्त्वन्यविशेषणतयाऽपि न ग्रहणमस्तीति तस्याप्रत्यक्षत्वम्, न त्वरूपत्वात् ॥

## प्रत्यक्षे रूपं अप्रयोजकम्

अथ वदेत्—विशेषणस्यापि रूपवत एव दण्डादेः चक्षुषा ग्रहणम्, न कालादेरिति—तदयुक्तम्—अरूपस्यापि सामान्यादेः विशेषणस्य चक्षुषा ग्रहणात् । द्रव्ये नियम इति चेत्; उक्तमत्र, यदेव नयनकरणकावगमगोचरे संचरति तदेव चाक्षुषं रूपवदरूपं वा, द्रव्यमद्रव्यं वेति ॥ माह—न चेति । तद्भावः—चक्षुरिन्द्रियसद्भावः । तथा च कालो यदि न चाक्षुषस्तर्हि निमीलिताक्षस्यापि चिरक्षिप्रादिप्रत्ययापत्तिः ॥ § 2710

ननु यदि कालः प्रत्यक्षः तदा स्वातन्त्र्येण तत्प्रत्यक्षं स्यात् प्रत्यक्षद्रव्यत्वात्, घटादिवत् । न च भूतलं घटवदित्यादौ घटादेरपि विशेषणतयैव भानमस्तीति शंक्यम्; सर्वत्र भूतलभानानियमात् । भूतलभानेऽपि घटप्रत्यक्षं प्रति तद्भानस्याप्रयोजकत्वात् । कालस्तु कदाऽपि न स्वतन्त्रः प्रत्यक्षो दृष्ट इति कालो न प्रत्यक्षद्रव्यमिति शङ्कते—स्वतन्त्र इति । ननु अरूपवतामपि प्रत्यक्षत्वे गगनस्यापि प्रत्यक्षत्वापत्तिरिति शङ्कायां, भवन्मते रूपवतां परमाण्वादीनामप्रत्यक्षत्वाद्रूपवत्वमात्रं यथा न प्रत्यक्षप्रयोजकं तथास्माकं अरूपवत्त्वमपि न प्रत्यक्षप्रयोजकम् । प्रतीतिरेव प्रत्यक्षत्वाप्रत्यक्षत्वे प्रमाणमिति वदति— गगनादेस्त्विति ॥ § 2711

उक्तमिति । अयं भावः—चाक्षुषप्रत्यक्षं प्रति रूपं कारणमित्युक्ते सामान्ये व्यभिचारे आपादिते द्रव्यचाक्षुषं प्रति इति संकोचे किं प्रमाणम्

२७ ] ग्रह— **nyāma-wit__ka**

? यद्यनुभवः, तर्हि कालप्रत्यक्षत्वस्याप्यनुभवात् कालभिन्नद्रव्यचाक्षुषं प्रति इति संकोचः क्रियताम्, न हि भवदिच्छैव नियामिकेति ॥ § 2712
I.364/KSV

एवं गुरु द्रव्यम् इति कार्तस्वरादौ प्रतिभासात् गुरुत्वमपि प्रत्यक्षं, न पतनानुमेयमेव ॥ § 2713

तस्मात् स्वतन्त्रभावेन विशेषणतयाऽपि वा ।
चाक्षुषज्ञानगम्यं यत् तत्प्रत्यक्षमुपेयताम् ॥ २७० ॥§ 2715

अत एव प्रत्यक्षः कालः । एवं समानन्यायत्वात् पूर्वापरादिप्रत्ययगम्या दिगपि प्रत्यक्षा वेदितव्येति ॥ § 2716

## कालस्यानुमेयत्वपक्षः

अन्ये मन्यन्ते—दण्डी देवदत्तः, नीलमुत्पलं इतिवद्विषयातिरेकस्याग्रहणात् प्रत्ययातिशयस्य च परोक्षकालपक्षेऽपि तत्कारणकस्योपपत्तेरनुमेय एव कालः ॥ § 2717

ननु प्रतीतिमात्राद्यदि प्रत्यक्षत्वं तर्हि गुरु द्रव्यम् इत्यादिप्रत्ययात् गुरुत्वमपि प्रत्यक्षं स्यात् इति शङ्कामिष्टापत्त्या परिहरति—एवमिति । एवकारेण प्रत्यक्षत्वमपि कुत्रचिदिति सूचितम् । अतश्च प्राथमिकगुरुत्वग्रहणस्यानुमानाधीनत्वेऽपि असकृदनुभूतस्थले तत्प्रत्यक्षमपि भवतीति सूचितम् । उक्तन्यायं दिश्यप्यतिदिशति—एवमिति । पूर्वस्यां घटः इत्यादिप्रतीतेस्सत्वादिति शेषः ॥ § 2718

स्वसिद्धान्तमाह—अन्य इति । विषयातिरेक इति । केवलदेवदत्तप्रतीत्यपेक्षया दण्डी देवदत्त इत्यादौ देवदत्तस्वरूपातिरिक्तो विषयः दण्डादिर्यथा स्पष्टमवभासते तथा कालादिर्नातिरिक्तः स्पष्टमवभासत इति कालो न प्रत्यक्ष इत्यर्थः । ननु चिरक्षिप्रादिप्रतीतिस्सर्वसिद्धा । नेयं प्रतीतिः स्वरूपमात्रालम्बना, स्वरूपभानकाले सर्वत्र तथाऽनवभासात् । अतश्चातिरिक्तकालविषयकत्वं तादृशप्रतीतीनां सिद्धमिति चेत्; तत्राह—प्रत्ययेति । अयं भावः । अस्ति चिरक्षिप्रादिप्रतीतिविषयः द्रव्यस्वरूपातिरिक्तः कालः । न हि वयं कालमेव निषेधयामः, किन्तु तत्प्रत्यक्षतामेव । स च कालः अनुमेयोऽपि प्रतीतावभसितुमीष्ट एव । न हि प्रत्ययविषयः सर्वोऽपि प्रत्यक्षविषयः । ज्ञातो घटः इत्यादिषु अनुमितस्यापि ज्ञानस्य भानदर्शनात् । अतः कालोऽस्ति, परन्त्वनुमेयस्य इति । तत्कारणकस्य—परोक्षकालकारणकस्य । इदं प्रत्ययातिशयविशेषणम् ॥ § 2719
I.365/KSV

२४ ] त— nyāma-wit_ka

अप्रत्यक्षत्वमात्रेण न च कालस्य नास्तिता ।
युक्ता पृथिव्यधोभागचन्द्रमःपरभागवत् ॥ २७१ ॥ § 2721

अप्रतिभासमानोऽपि कालः संस्कार इवेन्द्रियसहचरितः प्रत्यभिज्ञां क्षिप्रादिप्रतीतिं जनयिष्यति । कृतश्च प्रत्यक्षलक्षणे पु. २१७-२१८ महान् कलिः—किं विषयभेदादेव प्रतिभासभेदः ? उतोपायभेदादपि ? इति । तदलं पुनस्तद्विमर्देन ॥ § 2722

## कालस्यातिरिक्तत्वसाधनम्

प्रमाणमिति निर्णीतं प्रत्यक्षं सविकल्पकम् ।
तस्मान्न कल्पनामात्रं चिरक्षिप्रादिसंविदः ॥ २७२ ॥ § 2724

न चासां परिदृश्यमानकारणविनिर्मितत्वमुपपद्यते; क्रियमाणस्य पटादेः कार्यस्य, तदुत्पादकस्य च तन्तुतुरीवेमशलाकाकुविन्दादिकारणबृन्दस्य साम्येऽपि क्वचित्तूर्णं कृतम्, क्वचिच्चिरेण कृतमिति प्रतिभासभेददर्शनात् निमित्तान्तरं चिन्तनीयम् ॥ § 2725

ननु एकस्मिन्नेव प्रत्यये विशेष्यस्य द्रव्यस्य प्रत्यक्षत्वं, विशेषणस्य कालस्यानुमेयत्वमिति कथं घटतामित्यत्राह—अप्रतिभासमान इति । इन्द्रियसहचरितः संस्कारः प्रत्यभिज्ञामिव इत्यन्वयः । इदमुक्तं भवति—क्षिप्रं गच्छतीति ज्ञानं न सांशं, येन विशेष्यांशः विशेषणांश इति व्यवह्रियेत; किन्तु संस्कार—इन्द्रियजन्यप्रत्यभिज्ञेव विशिष्टमेकं ज्ञानम् । सामग्रीद्वयजन्यं ज्ञानं कथमेकं भवतीत्यादिकं तु पूर्वं पुट. २१८ मेव विचारितम् । कलिः—कलहः ॥ § 2726

द्रव्यकल्पनावत् कालकल्पनाया अपि अप्रमाणत्वेन कालासिद्धिं ब्रुवन्तं सौगतं प्रत्याह—प्रमाणमिति । आसां—चिरक्षिप्रादिसंविदाम् । परिदृश्यमानकारणं—क्रियादिरूपम् । चिरक्षिप्रनिर्वर्त्यमानयोः पटयोः न हि क्रियावर्गे न्यूनाधिकभावः वक्तुं शक्यः, सामग्रीतौल्यात् । अतः चिरक्षिप्रादिप्रतीतिः क्रियातिरिक्तनिबन्धनैव वाच्येति ॥ § 2727

I.366/KSV

## न देवदत्तादिक्रियालम्बनाः चलतीत्यादिप्रत्ययाः

ननु ! परिस्पन्दादिक्रियाभेद एवात्र निमित्तम् । कश्चित्परिस्पन्दश्चतुरः, कश्चिन्मन्थर इति क्वचित् क्षिप्रबुद्धिः, क्वचिच्चिरबुद्धिरिति— नैतच्चारु—परिस्पन्दगतयोरपि चातुर्यमान्थर्ययोर्निमित्तान्तरकार्यत्वात् । परिस्पन्देऽपि—चिरेण गच्छति, शीघ्रं धावतीति चिरक्षिप्रादिप्रतीतिर्दृश्यते ॥ § 2728

२३ ] न च संपरि—
nyāma-wit_kha

## न सूर्यादिपरिस्पन्दालम्बनाः चलतीत्यादिप्रत्ययाः

आह—न देवदत्तादिपरिस्पन्दनिबन्धनाः क्रमाक्रमादिप्रत्ययाः, किन्तु ग्रहनक्षत्रादिपरिस्पन्दनिबन्धनाः । स एव च ग्रहतारादिपरिस्पन्दः काल इत्युच्यते । तत्कृत एवायं यामाहोरात्रमासादिव्यवहारः । तस्य स्वत एव भेदादौपाधिकभेदकल्पनाक्लेशो न भविष्यति । भेदपरिच्छेदे नालिकाप्रहरादिरुपायः—इयती नालिका, इय- § 2729

ननु क्रियावर्गसाम्येऽपि क्रियास्वरूपेऽस्ति विशेषः प्रत्यक्षसिद्धः इति शङ्कते—नन्विति । क्रिययोर्विशेषमुपपादयति—कश्चिदिति । अलसः पुरुषः यावदेकवारं हस्तं चालयति तावत्येव चतुरः चतुःपञ्चवारं हस्तं चालयति । अतश्च क्रियासाम्येऽपि चतुरालसपुरुषाधीनः क्षिप्रचिरादिव्यवहार इति नातिरिक्तकालसिद्धिरित्यर्थः । परिस्पन्देत्यादि । अयमर्थः—सत्यं पुरुषाधीनः चिरक्षिप्रादिभेद इति । परन्त्विदमत्र वदतु भवान् । चतुरः अलस इति पुरुषभेदः किमधीन इति । यावदेकवारं पदं निक्षिपत्यलसः, तावच्चतुःपञ्चवारं पदं निक्षिपति चतुर इति खलु तन्निरूपणीयम् । अत्र यावत्तावच्छब्दार्थः कः ? यदि स्वरूपातिरिक्तः कालो नाम न स्यात् परिमितकाले चतुःपञ्चपदनिक्षेपात् शैघ्र्यं, तावत्येव च काले एकपदनिक्षेपात् चिरत्वं चोपपादनीयं कथमुपपाद्येत ? अतः क्रियातिरिक्तोऽस्ति काल इति ॥ § 2730

ननु भावानभिज्ञो भवान् । चिरक्षिप्रादिप्रतीतानां न परिदृश्यमानक्रियाविषयत्वं ब्रूमः । किन्तु सूर्यादिपरिस्पन्दादिविषयत्वम् । एकस्माद्देशात् देशान्तरं गच्छति सवितरि, तदैव कश्चित् क्रोशमेकं गच्छति । अन्यस्तु क्रोशद्वयमिति चिरक्षिप्रप्रत्ययौ स्यातामिति शङ्कते—आहेति । ननु तर्हि कुतः

न्मुहूर्तम्, इयान् प्रहर इति । तत्रैकस्मिन् मुहूर्ते प्रहरे वा निर्वर्त्यमानेषु बहुषु कार्येषु युगपदिति भवति मतिः; मुहूर्तान्तरापेक्षेषु क्रमेणेति । तस्मात् ग्रहादिपरिस्पन्द एव तैस्तैर्निमित्तैरुपलक्ष्यमाणप्रमाणः काल इति । कालविदश्च ज्योतिर्गणकास्त एवेनं बुध्यन्ते ॥

तदसांप्रतम् चन्द्रादिग्रहपरिच्छेदेऽपि क्रमादिप्रतीतिदर्शनात् ॥

चिरेणास्तं गतो भानुः शीतांशुः शीघ्रमुद्गतः ।
उदिताविव दृश्येते युगपद्व्योमभार्गवौ ॥ २७३ ॥ § 2733

इति दृश्यते प्रतिभासः । न च ग्रहान्तरपरिस्पन्दकारणक एष शक्यते वक्तुं; अनवस्थाप्रसङ्गात् । तस्मान्न ग्रहादिपरिस्पन्दः कालः, किन्तु वस्त्वन्तरम्, यत्कृतोऽयं क्रमाक्रमादिव्यवहारः ॥

## कालः स्वपरनिर्वाहकः

१७--१८ ] प्रहा— nyāma-wit__kha

१० ] क्रिया— nyāma-wit__kha

ननु ! भवत्कल्पितोऽपि कालः किं स्वत एव क्रमाक्रमस्वभावः ? हेत्वन्तराद्वा ? स्वतस्तस्य तत्स्वभावत्वे कार्यस्यैव पटादेः परिदृश्यमानस्य तत्स्वाभाव्यं भवतु ! किं कालेन ? हेत्वन्तरपक्षे त्वनवस्था, तस्यापि हेत्वन्तरापेक्षत्वादिति— कोऽपि क्रियाकालपदौ पर्यायेण न व्यवहरति ? इति शङ्कायामाह— तेस्तैरित्यादि । एकस्यैव प्रदेशस्य पुरुषबुद्धिकल्पितोपाधिभेदैः नल्वक्रोशगव्यूत्यादिविलक्षणव्यवहारवदिति शेषः । ननु कानि तानि निमित्तान्युपाधिभूतानीत्यत्राह—कालविद इति ॥ § 2734

चिरेणेति । वसन्ततौं अहःप्रमाणाधिक्यात् चिरेण सूर्यास्तमयः । हेमन्ततौं रात्रिप्रमाणाधिक्यात् शीघ्रं चन्द्रोदयः ॥ § 2735

अथ इदानीमेकः क्षणः गतः इत्यादौ कालस्यापि कालान्तरसम्बन्धः प्रतीयते । तथा चानवस्था । एकस्यैव स्वपरनिर्वाहकत्वे तत् क्रियादीनामेवास्त्विति शङ्कते—नन्विति ॥ § 2736

I.368/KSV

तदेतद्बालिशचोद्यम्—शुक्लगुणादावप्येवं वक्तुं शक्यत्वात् । गुणस्य स्वतः शुक्लस्वभावत्वे द्रव्यस्यैव तद्भवतु ! किं गुणेन ? गुणान्तरकल्पने त्वनवस्थेति ॥ § 2737

अथ तत्र तथा दर्शनात् नेदं चोद्यम्; तदिहापि समानम् । कार्येषु पटादिषु निमित्तान्तरकृतः क्रमादिव्यवहारः, निमित्तान्तरे निमित्तान्तरं न मृग्यमिति । तस्मादस्ति युगपदादिव्यवहारहेतुः कालः ॥ § 2738

अतश्चैवम्— § 2739

दृष्टः परापरत्वस्य दिक्कृतस्य विपर्ययः ।
युवस्थविरयोः सोऽपि विना कालं न सिद्ध्यति ॥ २७४
॥§ 2741

दूरतरदिगवच्छिन्नो देवदत्तादिः पर इति प्रतिभासते, निकटदिगवच्छिन्नस्तु अपर इति । ते एते दिक्कृते परत्वापरत्वे विपरिवर्तमाने दृश्येते । दूरस्थो हि युवा अपर इत्युच्यते, निकटस्थोऽपि स्थविरः पर इति । तदत्र न कालव्यतिरिक्तं कारणमुपपद्यते इत्यतोऽनुमीयते कालः ॥ § 2742

तथा दर्शनात्—द्रव्यस्वरूपातिरिक्ततया दर्शनात् । कार्यस्यैव स्वपरनिर्वाहकत्वे हेतुमाह—कार्येष्विति । दर्शनस्यान्यथाऽनुपपत्त्या तदुपपादकपदार्थान्तरनिर्णयसमये निर्णीयमानः स पदार्थः सर्वाक्षेपसमाधानसमर्थशक्तिविशेषविशिष्ट एव निर्णीयेत । विनिगमनाविरहात् दृष्टेषु वस्तुषु अतिशयाङ्गीकारासंभवाच्च परिदृश्यमानानां तदुपपादकत्वं न संभवति । यथा ईश्व-

१५ ] क्रमादि— nyāma-wit_kha
१७ ] क्रम— nyāma-wit_kha
२ ] नि— nyāma-wit_ka
८--९ ] तदत्र— nyāma-wit_kha

रानुमानादौ । अतः कार्याणां स्वपरनिर्वाहकत्वं न संभवति । सिध्यंस्तु कालः तादृश एव सिध्यति ॥ § 2743

कालसद्भावे प्रमाणान्तरमप्याह—दृष्ट इति । दिक्कृतस्य परापरत्वस्य विपर्ययः युवस्थविरयोर्दृष्ट इत्यन्वयः । विपर्ययमेवोपपादयति—दूरतरेत्यादिना । दूरस्थ इत्यादि । देशापेक्षया परः युवा कालापेक्षया अपरः । देशापेक्षया अपरोऽपि स्थविरः कालापेक्षया परः । अतः वस्तुस्वरूपाद्व्यतिरिक्तः काल एवितव्य एव ॥ § 2744

I.369/KSV

## कालः एक एव

स चायमाकाशवत् सर्वत्रैकः कालः । यथाऽऽकाशलिङ्गस्य शब्दस्य सर्वत्राविशेषात् विशेषलिङ्गाभावाच्चैकः, तथा ॥ § 2745

सर्वत्र तद्व्यवहाराद्विभुः । अवयवाश्रयानुपलंभात् निरवयवः, अनाश्रितश्च । अनाश्रितत्वादेव द्रव्यम् । अत एवावयवविभागादिनाशकारणानुपपत्तेर्नित्य इति ॥ § 2746

## एकस्यापि कालस्य वर्तमानादिभेदोपपत्तिः

ननु ! एवञ्चैकत्वात् कालस्य कुतो वर्तमानादिविभागः ? तदभावात् कथं त्रिकालविषयमनुमानमुच्यते ?—उच्यते—न तात्त्विकः कालस्य भेदो वर्तमानादिः । किन्त्वसन्नप्यसौ व्यवहारसिद्धये केनचिदुपाधिना कल्प्यते ॥ § 2747

## कालोपाधिः

कः पुनरसावुपाधिः ? क्रियेति ब्रूमः । ननु तस्या अपि न स्वतो वर्तमानादिभेदः; तद्भावे वा सैव तथा भवतु ! किं कालेन ?— मैवम्— उत्पत्तिस्थितिनिरोधयोगिफलावच्छेदेन नानाक्षणपरम्परात्मिका क्रियेत्युच्यते, सा वर्तमानादिभेदवती च । तथा हि— स्थाल्यधिश्रयणात् प्रभृति आतदवतरणादुत्पद्यमानौदनाख्यफला- § 2748

एक इति । कार्यानुरोधादनुमाने एकत्वेऽपि कार्योपपत्ते इति हेतुरूह्यः ॥ § 2749

अवयवाश्रयः—अवयवरूपः आश्रयः । अत एव—अवयवानाश्रितत्वादेव । विभागादि—आदिना नाशपरिग्रहः ॥ § 2750

तदभावात्—विभागाभावात् । तात्त्विकः—तत्त्वकृतः । एक एव क्षणः स्वपूर्वक्षणापेक्षया भविष्यन्निति, स्वापेक्षया वर्तमान इति, अनन्तरक्षणापेक्षया

८ ] वर्त— nyāma-wit__ka

भूत इति च व्यवह्रियते । अतो भूतत्वादिः न स्थिरो धर्मः, किन्तु बुध्यपेक्ष एवेति न काले भेदः ॥ § 2751

तथा—भवदभिमतकालस्थानापन्नः । उत्पत्तीत्यादि । क्रियायामपि अस्ति सूक्ष्मो भेदः । एका ह्युत्पन्ना क्रिया द्वितीयक्षणे विभागं, ततः पूर्वसंयोगनाशं, ततः उत्तरदेशसंयोगं चोत्पाद्य पञ्चमे क्षणे नश्यति । नैतेष्वन्य

वच्छेदात् क्रिया वर्तमानोच्यते पचति इति; तदवच्छेदात् घटाकाशवत् कालोऽपि तावान् वर्तमान इत्युच्यते । अभिनिर्वृत्तफलावच्छेदात्मा परिस्पन्दसन्ततिरतीता भवति—अपाक्षीत् इति; तदवच्छेदात् कालोऽप्यतीत उच्यते । अनारब्धफलावच्छेदात् भविष्यन्ती क्रियोच्यते पक्ष्यति इति; तथा कालोऽपीत्येवमौपाधिकः काले वर्तमानादित्रयव्यवहारः ॥

## वर्तमानकालसमर्थनम्

अतश्च यदुच्यते—वृक्षात् पततः पर्णस्य भूतभविष्यन्ताबध्वानौ दृश्येते, न वर्तमानः । तस्माद्वर्तमानः कालो नास्तीति—तदसम्बद्धम्—अध्वव्यङ्ग्यत्वाभावात् कालस्य । न ह्यध्वव्यङ्ग्यः कालभेदः । किन्तु यथोक्तक्रमेण क्रियाव्यङ्ग्य एवेति । क्रियापरिकल्पितभेदनिबन्धनश्चायं क्षणलवकाष्ठाकलानालिकामुहूर्तयामाहोरात्रमासर्त्वयनसंवत्सरयुगमन्वन्तरकल्पव्यवहार इत्यलं प्रसङ्गेन ॥ तमं परित्युक्तुं शक्यम् । एवञ्च एकस्या एव क्रियायाः स्थितिकाले मध्ये अवान्तरसूक्ष्मभेदात्, ततः—ततः इति अस्ति भेदः । अत एतावती दीर्घशरीरा क्रिया न क्षणोपाधिर्भवितुमर्हति । तत्राप्यवान्तरभेदात् अतीतादिभेदः सहजः । अतः तत्रातीतादिव्यवहारः उपाध्यन्तरेण चेदनवस्था । येन उपाधिना परिच्छिन्ना क्रियेत्युच्येत, तत्स्थाने काल एव भवतु । अतः सर्वत्र एतादृशव्यबहाराय कल्प्यः कालः अखण्डः कल्पयितुं शक्यः । क्रियायास्तु अखण्डत्वं अनुभवविरुद्धम् । अतः सार्वदिकसार्वत्रिकव्यवहारहेतुः कालः अतिरिक्त एव ॥ § 2752

अथ वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः न्या-सू-२-१-४० इतिसूत्रोक्तं विचारं प्रदर्शयति—अतश्चेत्यादि । वृक्षात् इत्यस्य स्थाने वृन्तात् इति भाष्ये क्वचित् पाठः । वृन्तात्प्रच्युतस्य भूमिं प्रत्यासीदतः फलस्य वृक्षस्य च मध्ये यो देशः—अध्वा सः भूतः, फलस्य भूमेश्च मध्ये यो देशः—अध्वा स भविष्यन्, एतदतिरिक्तः देशो न हि कश्चित् तृतीय उपलभ्यते । अतः वर्तमानकाल इति कश्चिन्नास्त्येवेति पूर्वपक्ष्याशयः । नाध्वव्यङ्ग्यः कालः, किं तर्हि ? क्रियाव्यंग्यः इति भाष्यमनुसृत्याह—अध्वेति । भूतभविष्यन्निर्देशश्च

## कालभेदपरिज्ञानस्य प्रयोजनम्

तिथ्यादिभेदावधारणं च वैदिककर्मप्रयोगाङ्गम्, पौर्णमास्यां पौर्णमास्यां यजेत अमावास्यायाममावास्यायां च इति । एवं वसन्ताद्युतुभेदोऽपि तदङ्गम्; वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः, शरदि वैश्यः, वर्षासु रथकारः इति ॥

२५ ] सोपाधिकः काल एव—

nyāma-wit_kha

### ऋत्वादिभेदः

स चायमृतुतिथ्यादिविभागः क्रिययैव ज्योतिश्शास्त्रोपदिष्टविशिष्टराशिसंसृष्टचन्द्रादिग्रहगतया लक्ष्यते, लौकिकेन च लक्ष्मणा तेन तेनेति । तद्यथा—

चञ्चग्रचुम्बितताताम्रचूताङ्कुरकदम्बकैः ।
कथ्यते कोकिलैरेव मधुर्मधुरकूजितैः ॥ २७५ ॥ § 2755

दिवाकरकरालातपातनिर्दग्धवीरुधः ।
मार्गास्समल्लिकामोदा भवन्ति ग्रीष्मशंसिनः ॥ २७६ ॥ § 2757

शिखण्डिमण्डलारब्धचण्डताण्डवडम्बरैः ।
प्रावृडाख्यायते मेघमेदुरैर्मेदिनीधरैः ॥ २७७ ॥ § 2759

मौक्तिकाकारविस्तारितारानिकरचित्रितम् ।
शरत्पिशुनतां याति यमुनाम्भोनिभं नभः ॥ २७८ ॥ § 2761

आयामयामिनीभोगसफलाभोगविभ्रमाः ।
हेमन्तमभिनन्दन्ति सोष्माणस्तरुणीस्तनाः ॥ २७९ ॥ § 2763

मध्यस्थवर्तमानापेक्षयैव । तथा च तादृशफलस्य यो देशः तदपेक्षयैव वर्तमानकालसिद्धिः । अन्यथा वर्तमानकालस्याप्यभावे तयोरप्यभाव एव । न च तर्हि मा स्तां तौ इति शंक्यम्—क्षणभङ्गभङ्गेन वर्तमानमात्रस्यासिद्धेः ॥ § 2764

मेदिनीधराः—पर्वताः । शरत्पिशुनतां—शरत्कालसूचकत्वम् । आयामेति । हेमन्तर्तौ हि रात्रिपरिमाणः अहः परिमाणापेक्षयाऽधिकः । आभोगः—परिपूर्णता ॥ § 2765

I.372/KSV

आस्कन्दनदलत्कुन्दकलिकोत्करदन्तुराः ।
वदन्ति शिशिरं वाताः तुषारकणकर्कशाः ॥ २८० ॥ § 2767

तस्मादेकोऽप्ययं कालः क्रियाभेदाद्विभिद्यते ।
एतेन सदृशन्यायात् मन्तव्या दिक् समर्थिता ॥ २८१ ॥ § 2769

### दिशोऽतिरिक्तत्वम्

२७ ] नारब्धोदण्ड—

nyāma-wit__kha

पूर्वपश्चिमादिप्रत्ययानां केवलवृक्षादिप्रत्ययवैलक्षण्येन कारणान्तरानुमानात् । दिग्लिङ्गाविशेषादेकत्वेऽपि दिशो दशविधाः । प्रदक्षिणावर्तपरिवर्तमानमार्तण्डमण्डलमरीचिनिचयचुम्ब्यमानकाञ्चनाचलकटकसंयोगोपाधिकृतः पूर्वपश्चिमादिभेदः कल्प्यते—पूर्वा, पूर्वदक्षिणा, दक्षिणा, दक्षिणपश्चिमा, पश्चिमा, पश्चिमोत्तरा, उत्तरा, उत्तरपूर्वा, अधस्तनी, ऊर्ध्वा चेति । देवतापरिग्रहवशाच्च पुनरेषैव दिक दशधोच्यते—ऐन्द्री, आग्नेयी, याम्या, नैर्ऋती, वारुणी, वायव्या, कौबेरी, ऐशानी, नागीया, ब्राह्मी चेति ॥ § 2770

## दिक्कालयोरेकत्वे प्रमाणम्

ननु च ! येनैव प्रत्ययेन प्रत्यक्षेण लिङ्गेन वा सता दिक्कालाववगम्येते तेनैव तयोर्भेदग्रहणात्कथमेकत्वम् ? तदवगमसमय एव तथा भेदप्रतिभासात्—उक्तमत्र—सर्वत्र तत्प्रत्ययाविशेषादिति ॥ § 2771

व्यत्ययदर्शनाच्च—यैवैकत्र पूर्वा दिक्, सैवान्यत्र दक्षिणेति गृह्यते—प्राग्भागो यः सुराष्ट्राणां, मालवानां स दक्षिणः—इति ॥ § 2772

कालेऽपि चिरक्षिप्रादिविभागश्चाव्यवस्थित एव दृश्यते—यो हि अनागत इति परिस्फुरति कालः, स एव वर्तमानो भवति, भूतो § 2773

दिग्लिङ्गेति । सर्वत्र हि प्राच्यादिव्यवहार एकरूप एव दृश्यत इत्यर्थः । नागीया—नागसम्बन्धिनी । ब्राह्मी—ब्रह्मसम्बन्धिनी । नागलोको हि सर्वाधस्ताद्वर्तते, ब्रह्मलोकश्च सर्वोपरिष्टादिति पुराणप्रसिद्धिः ॥ § 2774

कालदिशोरेकत्वं धर्मिग्राहकप्रमाणविरुद्धमिति शङ्कते—नन्विति । सर्वत्रेति । न हि दिग्व्यवहारे देशभेदेन वैलक्षण्यं दृष्टमित्यर्थः ॥ § 2775

व्यत्ययेति । तथा च प्राक्त्वादिकस्य प्रतिनियतत्वाभावोऽपि दिगैक्यगमकः ॥ § 2776

I.373/KSV

भवति च । तथ च चिरमपि शीघ्रीभवति, शीघ्रमपि चिरीभवति । तस्मात्तद्भेदोऽप्यौपाधिक इति सिद्धम् ॥ § 2777

समानतन्त्रे दिक्कालौ वैतत्येन विचिन्तितौ ।
तन्नेह लिख्यते, लोके द्वेष्या हि बहुभाषिणः ॥ २८२ ॥§ 2779

सिद्धः कालश्चाक्षुषो लैङ्गिको वा
तन्नानात्वं सिद्धमौपाधिकं च ।
तस्माद्युक्तं निश्चिकाय त्रिकाल-
ग्राहीत्येवं सूत्रकारोऽनुमानम् ॥ २८३ ॥§ 2783

इत्यनुमानपरीक्षा § 2784

## अथोपमानम्

### उपमानलक्षणम्

अनुमानानन्तरमुपमानं विभागसूत्रे पठितमिति तत्क्रमेण तस्य लक्षणमुच्यते— § 2785

**प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ १-१-६ ॥** § 2786

चिरमिति । चतुरपुरुषस्य गमनक्रियापेक्षया मन्दक्रियायाश्चिरत्वेऽपि इयं मन्दतरपुरुषक्रियापेक्षया शीघ्रा भवतीति चिरत्वशीघ्रत्वादि वा अतीतानागतत्वादि वा न प्रतिनियतमिति दिक्कालावेकैकावेव ॥ § 2787

समानतन्त्रे—वैशेषिकदर्शने ॥ § 2788

विभागसूत्र इति । तत्र वा उपमानस्य शब्दात्प्रथमं निर्देशे किं बीजमिति चेत्—अत्र केचित्—सूचीकटाहन्यायेन अल्पग्रन्थत्वादुपमानस्य प्राथम्यम् । न च तावता प्रत्यक्षापेक्षयाऽपि प्रथमं निर्देशापत्तिशङ्कासंभवः; प्रत्यक्षानुमानयोः सर्वप्रमाणमूर्धन्यत्वात्, बहुवादिसम्मतत्वाच्च न तत्र क्रमे विवादः इति वदन्ति । वस्तुतस्तु प्रत्यक्षानुमानयोर्यथोपजीव्योपजीवकभावः क्रमनियामकः स एव प्रत्यक्षोपमानयोः, शब्दोपमानयोरपि । उपमानं हि शक्तिग्राहकं प्रमाणम्, न हि शक्तिज्ञानमन्तरा शाब्दबोधसंभवः । अतः शब्दात्पूर्वं तन्निर्देशः । एवं उपमानप्रवृत्तेः सादृश्यदर्शनादिमूलकत्वात् प्रत्यक्षानुमानोपजीवकत्वमप्यस्तीति तदनन्तरं उपमाननिर्देशः ॥ § 2789

I.374/KSV

अत्र वृद्धनैयायिकास्तावदेवमुपमानस्वरूपमाचक्षते—संज्ञासंज्ञिसम्बन्धप्रतीतिफलं प्रसिद्धेतरयोः सारूप्यप्रतिपादकमतिदेशवाक्यमेवोपमानम् । गवयार्थी हि नागरिकोऽनवगतगवयस्वरूपस्तदभिज्ञमारण्यकं पृच्छति कीदृक् गवयः ? इति । स तमाह यादृशो गौस्तादृशो गवयः इति । तदेतद्वाक्यमप्रसिद्धस्य प्रसिद्धेन गवा सादृश्यमभिदधत्तद्वारकमप्रसिद्धस्य गवयसंज्ञाभिधेयत्वं ज्ञापयतीत्युपमानमुच्यते ॥ § 2790

### उपमानस्य शब्दप्रमाणातिरिक्तत्वम्

ननु ! शब्दस्वभावत्वादस्य आप्तोपदेशः शब्दः इत्यनेन गतार्थत्वान्नेदं प्रमाणान्तरं भवेत् । न च संज्ञासंज्ञिसम्बन्धपरिच्छेदफलत्वेन प्रमाणान्तरता वक्तव्या; फलवैचित्र्येण प्रमाणानन्त्यप्रसङ्गात् । लौकिकानि हि वचनानि वैदिकानि च विधिनिषेधबोधकानि नानाफलान्यपि भवन्ति, न शब्दतामतिक्रामन्ति § 2791

---

१ ] गवय— nyāma-wit_ka

उच्यते—यत्र शब्दप्रत्ययादेव, तत्प्रणेतृपुरुषप्रत्ययादेव वा अर्थतथात्वमुपायान्तरानपेक्षमवगम्यते, स आगम एव; तत एव § 2792

वृद्धनैयायिकाः—भाष्यकाराः। प्रसिद्धेतरयोः—प्रसिद्धस्य गोः, अप्रसिद्धस्य गवयस्य च। तद्द्वारकं—सादृश्यज्ञानोत्पादनद्वारेत्यर्थः॥ § 2793

तद्द्वारकं इत्यनेन सूचितमर्थमजानानाः तस्यागमाबहिर्भावात् श्लो. वा. उप. २. इत्याहुः। तदलङ्करोति—नन्विति। अस्य—अर्थबोधनस्य। प्रमाणानन्त्यप्रसङ्गमेवोपपादयति—लौकिकानीति। हानोपादानादिनानाफलकानि खलु वाक्यानि। अतः फलभेदान्न प्रमाणभेदः॥ § 2794

उच्यत इत्यादि। सत्यं अतिदेशवाक्यस्मरणात् या सादृश्यप्रतीतिः स शाब्दः। उपमितिस्तु तदुत्तरोद्भवा तादृशसादृश्यविशिष्टगवयपिण्डविषयिणी प्रतीतिः। गवयपिण्डस्याननुभूतत्वात् नेयं स्मृतिः। तद्विषये शब्दस्याव्यापृतेः न शाब्दी। शब्दः खलु सादृश्योद्बोधनमात्रे विश्राम्यति। अतः इयं प्रमितिरतिरिक्तैवेति प्रमाणमप्यतिरिक्तमेवेति सारम्। शब्दप्रत्ययादिति स्वतःप्रामाण्यपक्षे। तत्प्रणेतृपुरुषप्रत्ययादिति स्वपक्षे। प्रणेता उच्चारयिता॥ § 2795

I.375/KSV

तदर्थप्रतीतेः। यत्र तु पुरुषः प्रतीत्युपायमपरमुपदिशति, तत्र तत एवोपायात्तदर्थावधारणम्। उपायमात्रावगमे तु शब्दव्यापारः॥ § 2796

यथा परार्थानुमाने—अग्निमानयं पर्वतः, धूमवत्त्वात्, महानसवदिति। अत्र हि न पुरुषोपदेशविश्वासादेव शैलस्य कृशानुमत्तां प्रतिपत्ता निमित्तान्तरनिरपेक्षः प्रतिपद्यते; अपि तु तदवबोधकधूमाख्यलिङ्गसामर्थ्यादेव। तदिह यद्याटविको नागरिकाय गवयार्थिने तदवगमोपायं प्रसिद्धसाधर्म्यं नाभ्यधास्यत्, तर्हि तदुपदेश आगम एवान्तरभविष्यत्। तदुपदेशात्तु तत एव तदर्थावगम इति सत्यपि शब्दस्वभावत्वे प्रमाणान्तरमेवेदम्। प्रतिपत्ताऽपि नागरिको नारण्यकवाक्यादेव तं प्राणिनं गवयशब्दवाच्यतया बुध्यते; किन्तु सारूप्यं प्रसिद्धेन गवा तस्य पश्यति॥ § 2797

किमारण्यकवाक्येन न संप्रत्ययो नागरकस्य—न ब्रूमो न संप्रत्यय इति; किन्तु सारूप्यमुपायान्तरं तदवगतावसावुपदिष्टवानिति ततोऽवगतिर्भवन्ती न निह्नोतुं शक्यत इति न शाब्दी सा प्रतीतिः, अपि त्वौपमानिकीति वचनमपि भवदिदमुपमानं प्रमाणान्तरमिति युक्तम्। भाष्याक्षराण्यपि चैतत्पक्षसाक्ष्यच्छायामिव वदन्ति लक्ष्यन्ते। तानि तु ग्रन्थगौरवभयान्न योज्यन्ते—इत्यलं प्रसङ्गेन॥ § 2798

निमित्तान्तरं—परामर्शादिकम्। नाभ्यधास्यत्, किन्तु विना सादृश्योपदेशं अयं गवयपदवाच्यः इत्यभ्यधास्यत्—इति शेषः॥ § 2799

नारण्यकवाक्यादेव इत्युक्तं शृण्वन् पृच्छति—किमित्यादि। तदवगतौ—संज्ञासंज्ञिसम्बन्धावगतौ—गवयावगतौ वा। ततः—सारूप्यरूपादुपायान्त-

१७ ] ततः— nyāma-wit_kha

रात् शब्दविलक्षणात् । वदन्तीव लक्ष्यन्ते इत्यन्वयः । यथा गौरेवं गवयः इत्युपमाने प्रयुक्ते इत्यादिभाष्यमत्र द्रष्टव्यम् ॥ § 2800

अयं च भाष्यकारपक्षः कुमारिलैः—कीदृग्गवय इत्येवं पृष्टो नागरिकैर्यदि । ब्रवीत्यारण्यको वाक्यं यथा गौर्गवयस्तथा ॥ एतस्मिन्नुपमानत्वं प्रसिद्धम् श्लो. वा. १-१-५ उप. १ इत्यत्रोपपादितः । अनुपदमुच्यमानः वार्तिकपक्षस्तु—श्रुतातिदेशवाक्यानामारण्ये गवये मतिः । या सोपमानं केषाञ्चित् गोसादृश्यानुरञ्जिता ६ इत्यत्रोक्तः ॥ § 2801
I.376/KSV

## उपमानस्वरूपे वार्तिकपक्षः

अद्यतनास्तु व्याचक्षते—श्रुतातिदेशवाक्यस्य प्रमातुरप्रसिद्धे पिण्डे प्रसिद्धपिण्डसारूप्यज्ञानमिन्द्रियजं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिफलमुपमानम् । तद्धीन्द्रियजनितमपि धूमज्ञानमिव तदगोचरप्रमेयप्रमितिसाधनात् प्रमाणान्तरम् । श्रुतातिदेशवाक्यो हि नागरकः कानने परिभ्रमन् गोसदृशं प्राणिनमवगच्छति । ततो वनेचरपुरुषकथितं यथा गौस्तथा गवयः इतिवचनमनुस्मरति; स्मृत्वा च प्रतिपद्यते—अयं गवयशब्दवाच्यः इति । तदेतत्संज्ञासंज्ञिसम्बन्धज्ञानं तज्जन्यमित्युपमानफलमित्युच्यते ॥ § 2802

प्रत्यक्षं तावदेतस्मिन् विषये न कृतश्रमम् ।
वनस्थगवयाकारपरिच्छेदफलं हि तत् ॥ १ ॥§ 2804

अनुमानं पुनर्नात्र शङ्कामप्यधिरोहति ।
क्व लिङ्गलिङ्गिसम्बन्धः ? क्व संज्ञासंज्ञिता मतिः ॥ २ ॥§ 2806

आगमादपि तत्सिद्धिः न वनेचरभाषितात् ।
तत्कालं संज्ञिनो नास्ति गवयस्य हि दर्शनम् ॥ ३ ॥§ 2808

न्यायवार्तिके तट्टीकायां चोक्तं भट्टानूदितपक्षमुपक्षिपति—अद्यतनास्त्विति । अतिदेशवाक्यार्थस्मरणसहकृतं पुरोवर्तिनि गवये यत्सादृश्यप्रत्यक्षं तदुपमानमित्यर्थः । ननु तर्हि तत् सादृश्यदर्शनं प्रमाणफलं, न तु प्रमाणं, इन्द्रियजन्यत्वादित्यत्राह—तद्धीति । तदगोचरेति । धूमज्ञानाविषयेत्यर्थः । तथा च धूमप्रत्यक्षं स्वविषयापेक्षया फलरूपमपि स्वाविषयवह्निप्रतिपत्तौ यथा प्रमाणं तथा प्रकृतेऽपीत्युक्तं भवति ॥ § 2809

अस्मिन् पक्षे—प्रत्यक्षो गवयस्तावत् सादृश्यस्मृतिरत्र तु इत्यनेन भट्टपादोक्तं बौद्धोक्तं च दूषणं प्रत्याह—प्रत्यक्षमिति । न हि गवयप्रमितिं

२८ ] सिद्धे— nyāma-wit_kha
२ ] ज्ञानजन्य— nyāma-wit_ka
३ ] वैतद्— nyāma-wit_kha

फलं वदामः । वनस्थगवयप्रमितिस्तु प्रत्यक्षरूपा । संज्ञासंज्ञिसम्बन्ध परिच्छेदफलं तूपमानमुच्यते । अतो नेदं प्रत्यक्षमित्यर्थः । तत्—प्रत्यक्षम् । वनेचरभाषितात् आगमादित्यन्वयः । तत्कालं वनेचरभाषणकाले । संज्ञिनो गवयस्येत्यन्वयः ॥ § 2810

I.377/KSV

संज्ञासंज्ञिनोश्च परिच्छेदे सति तत्सम्बन्धः सुशको भवति नान्यथा । अत एव प्रत्यक्षपूर्वकं संज्ञाकर्मेत्याचक्षते ॥ § 2811

## उपमानविषये दिङ्नागादिबौद्धानामाक्षेपः

एतदाक्षिपति— § 2812

ननु ! नागरकप्रश्नमनुरुध्य वनेचरः ।
ब्रूतेऽतिदेशकं वाक्यं यथा गौर्गवयस्तथा ॥ ४ ॥§ 2814

अस्यायमर्थः, यस्य त्वं गोसादृश्यं निरीक्षसे ।
तमेव गवयं विद्याः स चायं संज्ञिनो ग्रहः ॥ ५ ॥§ 2816

सम्बन्धकरणं चेह विशेषेषु न युज्यते ।
आनन्त्यात्, किन्तु सामान्ये, तच्चेत्थमवधारितम् ॥ ६ ॥§ 2818

प्रत्यक्षपूर्वकं संज्ञाकर्मेति न हि वैदिकी ।
चोदना, किं त्ववच्छेदः संज्ञिनोऽत्र विवक्षितः ॥ ७ ॥§ 2820

ननु वनेचरभाषणकाले संज्ञिनो गवयस्याप्रत्यक्षत्वेऽपि गवयपदगवययोः संज्ञासंज्ञिपरिज्ञानं कुतो न भवति ? अतीन्द्रियार्थविषयकशब्दप्रयोगः शाब्दयोधश्च सर्वानुभवसिद्धः । अतः उपमानप्रमाणेन किं फलं साधनीयमवशिष्यते ? इत्याशङ्कायामाह—संज्ञेत्यादि । परिच्छेदे—प्रत्यक्षतः परिच्छेदे । एतत्तत्त्वं तु उत्तरत्र ३८९ पुटे व्यक्तीभविष्यति । आचक्षते— तथा च वाचस्पतिमिश्राः—यावदयमसौ गवय इति साक्षात्प्रतीते सम्बन्धिनि संज्ञां न निवेशयति तावदयं परिप्लुतमतिः प्रमाता कश्चित् खलु द्रक्ष्यामि तादृशं पिण्डं, यत्र गवयसंज्ञां प्रतिपत्स्ये इति प्रमोत्सुक एवोदीक्षते इति ॥ § 2821

प्रमाणसमुच्चये दिङ्नागोक्तं अनुवदति—एतदाक्षिपतीति । अस्य— वनेचरवाक्यस्य । स चायमिति । तथा चाप्तवाक्यस्यापि शक्तिग्राहकत्वात् सिद्धः शक्तिग्रहः । शक्तिरेव च सम्बन्धः । अत उपमानस्य कृत्यमेव नास्तीत्यर्थः । ननु वनेचरेण सामान्यतः कथनेऽपि गवयविशेषे सम्बन्धग्रहणं गवयदर्शनकाल एवानुभवसिद्धं, तदेतदुपमानफलमिति चेत्, तत्राह—सम्बन्धकरणमिति । विशेषेषु—व्यक्तिषु । आनन्त्यात्—व्यक्तीनामिति शेषः

। इत्थं—यस्य गोसादृश्यं निरीक्षसे त्वं तमेव गवयं विद्याः इत्यर्थकारण्यकवाक्यात् । वैदिकी चोदना इत्यन्वयः । अवच्छेदः—अवधारणं,

स तु प्रत्यक्षतो वाऽस्तु, प्रमाणान्तरतोऽपि वा ।
स्मर्यमाणेऽपि चार्थेऽस्ति सङ्केतकरणं क्वचित् ॥ ८ ॥§ 2824

योऽसौ तत्र त्वया दृष्टः प्राणी स रुरुरुच्यते ।
क्वचित्तु कैश्चिन्निर्दिश्य परोक्षमुपलक्षणैः ॥ ९ ॥§ 2826

संज्ञिनं व्यहर्तारः तत्र संज्ञां नियुञ्जते ।
दन्तुरो रोमशः श्यामो वामनः पृथुलोचनः ॥ १० ॥§ 2828

यस्तत्र चिपिटग्रीवस्तं चैत्रमवधारयेः ।
एवमत्रापि गोपिण्डसारूप्येणोपलक्षिते ॥ ११ ॥§ 2830

वाच्ये वाचकसम्बन्धबोधनं नैव दुर्घटम् ।
अथ सोपप्लवा वाक्यात् बुद्धिरित्यभिधीयते ॥ १२ ॥§ 2832

उपप्लवोऽपि सम्बन्धे न कश्चिदनुभूयते ।
यस्त्वस्ति गवयाकारं प्रति कीदृगसाविति ॥ १३ ॥§ 2834

सोऽपि प्रत्यक्षतो दृष्टे गवये विनिवर्तते ।
प्रत्यक्षागमसिद्धेऽर्थे तस्मान्मानान्तरेण किम् ? ॥ १४ ॥§ 2836

पूर्वं गृहीतस्यैव दृढीकरणमिति यावत् । किं बहुना ? प्रमाणकोठ्यप्रविष्टया स्मृत्याऽपि सम्बन्धदृढीकरणं दृश्यत इत्याह—स्मर्यमाणोऽपीति । रुरुः— कृष्णसारमृगः । उच्यते इत्यनन्तरं इत्यादौ इति शेषः । एवं अवधारयेः इत्यनन्तरमपि । सर्वथाऽदृष्टचरेऽपि सम्बन्धनिर्णयो युज्यत एवेत्याह— क्वचिदिति । दन्तुरः—उन्नतदन्तः । चिपिटग्रीवः—नतनासाविशिष्टग्रीवः । आरण्यकवाक्यात् सोपप्लवा बुद्धिः, उपमानात्तु निरुपप्लवा भवतीत्येतदपि न युक्तमित्याह—अथेति । यस्त्विति । आरण्यकवाक्यश्रवणात् जातेऽपि संज्ञासंज्ञिनिर्णये गवयाकारं प्रति य उपप्लवः—कीदृगसौ स्यात् इत्युपप्लवोऽस्ति, सः न सम्बन्धविषयकः । किन्तु विस्मयहेतुकदर्शनौत्सुक्यमूलकः । तच्चौत्सुक्यं गवयदर्शने निवर्तते । अतोऽत्र उपमानस्यातिरिक्तस्यावसर एव नास्तीत्यर्थः ॥ § 2837
I.379/KSV

२४ ] माणोऽपि चार्थो— nyāma-wit__kha

२४ ] ते का— nyāma-wit__kha

### उक्ताक्षेपसमाधानम्, उपमानस्य शब्दातिरिक्तत्वं च

अत्राहुः—नाटविकरटितात् वाक्यात् विस्पष्टः संज्ञासंज्ञिसम्बन्धप्रत्ययो भवितुमर्हति, संज्ञिनस्तदानीमप्रत्यक्षत्वात्। यद्यपि गोसारूप्यविशिष्टतया तदवगम उपपादितः; तथाऽपि सोपप्लवैव भवति तदानीं बुद्धिः ॥ § 2838

न निराकाङ्क्षताबुद्धिस्तदानीमुपजायते ।
तदुत्पादनपर्यन्तः शब्दव्यापार इष्यते ॥ १५ ॥§ 2840

न चासौ निर्वहत्यत्र वाच्यसंवित्त्यपेक्षणात् ।
शब्देन तदनिर्वाहात् न स्वकार्यं कृतं भवेत् ॥ १६ ॥§ 2842

सम्बन्धप्रतिपत्तिश्च सामान्ये यद्यपीष्यते ।
तदप्यविदितव्यक्ति न सम्यगवधारितम् ॥ १७ ॥§ 2844

गवयाकारवृत्तिश्च तदानीं बुद्ध्युपप्लवः ।
सम्बन्धेऽपि द्व्यधिष्ठाने दधाति श्यामलां धियम् ॥ १८ ॥§ 2846

आटंबिकः—आरण्यकः । विस्पष्टः—निरुपप्लवः । उपपादितः— आरण्यकवाक्यादिति शेषः ॥ § 2847

निराकाङ्क्षेति। वाक्यजन्यज्ञाने निराकाङ्क्षताबुद्धिर्न जायत इत्यर्थः। तदुत्पादनं—निराकाङ्क्षताबुद्ध्युत्पादनम्। श्यामलां—सकलङ्कां, सोपप्लवामिति यावत् ॥ § 2848

अयमत्र प्रघट्टकार्थः—आरण्यकवाक्यात् सामान्यतः अर्थप्रतिपत्तावपि आकारविषयकजिज्ञासायाः सत्त्वात् निराकाङ्क्षः प्रत्ययो न भवेत्। गवयदर्शनानन्तरं जायते च सः। स च न शब्दकरणकः, शब्दव्यापारः खलु पूर्वमेवोपरतः। नैन्द्रियिकः, गवयस्यैन्द्रियिकत्वेऽपि सम्बन्धनिर्णयस्यानैन्द्रियिकत्वात् । आदौ सामान्यतः शक्तिग्रहेऽपि न स निरुपप्लवः । सामान्यस्याकारव्यञ्ज्यत्वेन आकारजिज्ञासायां सत्यां तदभिव्यञ्ज्यसामान्यस्यापि स्पष्टं प्रतीत्यसंभवात्। सामान्यस्यास्पष्टत्वेन च द्विनिष्ठः संज्ञासंज्ञिसम्बन्धोऽप्यस्पष्ट एव स्यात्। अतः गवयप्रत्यक्षानन्तरमेव निरुपप्लवः सम्बन्धनिर्णयः शक्यः।

प्रत्यक्षपूर्वकं तस्मात् संज्ञाकर्मेति गीयते ।
क्वचित्तदेव प्रत्यक्षं स्मृतिद्वारेण कारणम् ॥ १९ ॥§ 2851

१९ ] त— nyāma-wit_kha
२१ ] वेव— nyāma-wit_kha
१ ] यदि वेष्यते—

nyāma-wit_kha

पूर्वदृष्टे कुरङ्गादौ सम्बन्धो दर्शितो यथा ।
चैत्रे प्रत्यक्षवत् सिद्धिः दन्तुरादिविशेषणैः ॥ २० ॥§ 2853

इह पुनरतिदेशवचनसमये गोसादृश्यमात्रोप (Edtext outside numbered paragraph)देश्ये सत्यपि संज्ञिनि न निवर्तत एवोपप्लवः; प्रमाणान्तरपरिच्छेदसापेक्षकसंज्ञिरूपोपदेशात् ॥

## उपमानस्य प्रत्यक्षाद्वैलक्षण्यम्

यत्र गोसादृश्यं पश्यसीति प्रत्यक्षादेव तर्हि (Edtext outside numbered paragraph)स उपप्लवो विरंस्यतीति चेत्—न—प्रत्यक्षस्येन्द्रियसन्निकर्षादिस्वभावस्य संज्ञासंज्ञिसम्बन्धबोधकरणासमर्थत्वात् ॥

प्रत्यक्षफलमेतत्तु समर्थं, सत्यमिष्यते ।
तस्यैव च वयं ब्रूम उपमानप्रमाणताम् ॥ २१ ॥§ 2855

यथा प्रत्यक्षफलमपि धरणिधरकुहरभुवि धूमदर्शनमनिन्द्रियविषयविभावसुबोधसाधनत्वादनुमानम्, एवं गोसारूप्यविशेषितविपिनगतगवयपिण्डदर्शनमध्यक्षफलमपि तदनवगतसंज्ञा- अतः प्रत्यक्षपूर्वक एव सर्वत्र निरुपप्लवः सम्बन्धनिर्णयः । प्रत्यक्षप्रमितिपूर्वकत्वात् न प्रत्यक्षत्वम् । प्रत्यक्षपूर्वकं ह्यनुमानादि न हि प्रत्यक्षम् । अतः प्रत्यक्षागमाभ्यां विलक्षणमुपमानम् ॥ § 2856

प्रकृते उक्तस्थलद्वयवैलक्षण्यमाह—इहेति । गोसादृश्येत्यादि । गोसादृश्यमात्रं उपदेश्यं यस्य तावन्मात्रपरिज्ञेये सति वस्तुनीत्यर्थः ॥ § 2857

पश्यतीति—एतदर्थकत्वात् अतिदेशवाक्यस्येत्यर्थः ॥ § 2858

ननु यद्यपि इन्द्रियसन्निकर्षादिरूपं प्रत्यक्षं न सम्बन्धबोधने समर्थं, अथापि तत्फलभूतं तज्जन्यं यत् सादृश्यदर्शनं—सादृश्यविशिष्टपिण्डदर्शनं वा तत् संज्ञाकरणसमर्थं—उपप्लवनिराकरणसमर्थं—भविष्यतीति शङ्कते—प्रत्यक्षेति । प्रत्यक्षफलं त्वित्यन्वयः । तत्रेष्टापत्तिमाह—सत्यमिति । विशिष्टमेकं वाक्यं वा । सत्यमित्यर्धाङ्गीकारे । साध्यमंशमाह—तस्यैवेति ॥ § 2859

सर्वांशे अनुमानं दृष्टान्तयन् अतिरिक्तप्रमाणतामुपमानस्याह—यथेत्यादिना । तदनवगतेति । उक्तपिण्डदर्शनानवगतेत्यर्थः ॥ § 2860

I.381/KSV

संज्ञिसम्बन्धबोधविधानादुपमानमुच्यते । यथा च तत्र पूर्वावगतधूमाग्निप्रतिबन्धस्मरणं सहकारितामुपैति, तथेहापि पूर्वश्रुतारण्यकवाक्यार्थस्मरणम् । यथा च तत्र व्याप्तिवेलायामनालीढविशेषा बुद्धिरधुना पक्षधर्मताबलाद्विशेषे व्यवतिष्ठते—अत्राग्निरिति, तथाऽत्राप्यनवगतवाच्यविशेषात् वाक्यात् बुद्धिरि-

२--३ ] न्द्रिय— nyāma-wit_kha
३ ] सुबोध— nyāma-wit_ka

दानीं वाच्यविशेषे दृष्टे निरुपप्लवा जायते—अयं स गवयशब्दाभिधेय इति ॥ § 2861

## उपमानस्यानुमानाद्वैलक्षण्यम्

नैतावताऽनुमानमेवेदमित्याशङ्कनीयम्; अनपेक्षितपक्षधर्मान्वयव्यतिरेकादिसामग्रीकस्य तत्प्रत्ययोत्पादात् ॥ § 2862

तस्मादयं स गवयो नामेत्येवंविधा मतिः ।
उपमानैकजन्यैव, न प्रमाणान्तरोद्भवा ॥ २२ ॥§ 2864

न चैषा नास्ति, सन्दिग्धा, बाध्यते, कल्पनामात्रं वेति । सर्वथैतस्याः प्रमितेः साधनमुपमानं प्रमाणमिति सिद्धम् ॥ § 2865

तदिदमाह—प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ॥ § 2866

एवं सर्वात्मनाऽनुमानसाम्ये तर्ह्यनुमानमेवेदमिति प्रत्यक्षेणाप्रत्यक्षसिद्धेः इत्यादिसूत्रोक्तामाशङ्कामुपक्षिपति—नैतावतेति । नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः इतिसूत्रोक्तं सिद्धान्तमाह—पक्षेत्यादि । पक्षधर्मताज्ञानं, अन्वयव्यतिरेकव्याप्तिज्ञानं चेत्यर्थः । उक्तं भट्टपादैरपि न चैतस्यानुमानत्वं पक्षधर्माद्यसंभवात् इति । उक्तसूत्रस्य चायमर्थः—उपमानस्य प्रमाणार्थं— प्रमाणप्रयोजनं संज्ञासंज्ञिसम्बन्धपरिच्छेदरूपं अप्रत्यक्षे गवये न पश्याम इति । एवञ्च पक्षधर्मताज्ञानाभाव उक्तो भवति ॥ § 2867

ननु वाक्यश्रवणकाले गवयस्याप्रत्यक्षत्वेऽपि गवयदर्शनकाले पक्षधर्मताज्ञानं भवेदिति चेत्—तत्रोक्तं—व्याप्तिज्ञानाभावादिति । न हि तदानीं लिङ्गप्रत्यक्षमस्तीति भावः ॥ § 2868

I.382/KSV

## सूत्रार्थवर्णनम्

प्रसिद्धसाधर्म्यादिति कर्मधारयः, तृतीयासमासः, बहुव्रीहिर्वा । प्रसिद्धं च तत् साधर्म्यं, प्रसिद्धेन गवा वा साधर्म्यं गवयस्य, प्रसिद्धं वा साधर्म्यं यस्य सः प्रसिद्धसाधर्म्यो गवयः—तस्मात् प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् । साध्यः—संज्ञासंज्ञिसम्बन्धः, तस्य साधनं बोधनम्; संज्ञासंज्ञिसम्बन्धज्ञानं वा साध्यं, तस्य साधनं—जननमित्यर्थः । एवं प्रसिद्धसाधर्म्यज्ञानमुपमानं, फलं संज्ञासंज्ञिसम्बन्धज्ञानमित्युक्तं भवति ॥ § 2869

साध्यसाधनशब्देन करणस्य प्रमाणताम् ।
ब्रवीति, एतच्च मन्तव्यं सर्वत्र परिभाषितम् ॥ २३ ॥§ 2871

२४ ] धर्मा— nyāma-wit_kha    १५ ] संज्ञि— nyāma-wit_kha

अत एव मध्ये लिखितमिदं—यदुभयतः प्रमाणलक्षणानि व्याप्स्यतीति ॥ § 2872

कर्मधारय इति । भाष्ये तृतीयासमासः प्रदर्शितः, वार्तिके बहुब्रीहिः । वार्तिके तृतीयासमासस्यानिषेधात् सोऽपीष्ट एव वार्तिककृत इति टीका । एवं समासद्वयेन साकं स्वाभिमतः कर्मधारयोऽपि क्रोडीकृतः । साध्य इति । साध्यपदस्य संज्ञासंज्ञिसम्बन्धपरत्वे तस्य साधनं—बोधनम्; संज्ञासंज्ञिसम्बन्धज्ञानपरत्वे तस्य साधनं—जननमित्यर्थः ॥ § 2873

पदान्तरं विहाय साध्यसाधनपदप्रयोगफलमाह—साध्येति । साधकतमं हि करणमिति भावः । ननु तर्हि इतरप्रमाणलक्षणसूत्रेष्वेवमनिर्देशात् तेषां प्रमाणत्वं न स्यादिति शङ्कायां इदं पदं इतरसूत्रेष्वपि सम्बध्यत इति महर्षिणो मतमित्याह—एतच्चेति । कथमिदमवगम्यत इत्यत्राह— अत एवेति । चतुर्षु प्रमाणेषु मध्यगतमनुमानं, उपमानं च । अनुमानस्य प्रमाणत्वे शाक्यानां न विप्रतिपत्तिरिति उपमानसूत्रे तत्पदं निवेशितम् । तच्च देहलीदीपन्यायेन पूर्वोत्तरतः सम्बध्यत इति भावः ॥ § 2874
I.383/KSV

अत्यन्तप्रायसाधर्म्यविकल्पादिनिबन्धनः ।
क्षिप्तः सूत्रकृता साक्षादुपमानस्य विप्लवः ॥ २४ ॥§ 2876

येन सदृशप्रतीतिर्जन्यते तत्सादृश्यमिति किमत्यन्तसादृश्यादिविकल्पैः ॥ § 2877

## सामान्यमेव न सादृश्यम्

अभिन्नप्रत्यये हेतुर्यथा सामान्यमुच्यते ।
सदृशप्रत्यये हेतुः तथा सादृश्यमुच्यते ॥ २५ ॥§ 2879

## उपमानप्रमाणप्रयोजनाक्षेपः

ननु ! उपमानलक्षणमस्मिन् मोक्षशास्त्रे क्वोपयुज्यते ? आगमात्तावत् आत्मज्ञानं मोक्षसाधनं सेतिकर्तव्यताकमवगम्यते, अनुमानादागमप्रामाण्यनिश्चयः, प्रत्यक्षादनुमानस्य व्याप्तिपरिच्छेद इति त्रयमेवोपदेष्टव्यम् ॥ § 2880

अधिकं सूत्रभाष्ययोर्व्यक्तमित्याह—अत्यन्तेति । अत्र आदिना एकदेशसाधर्म्यविकल्पपरिग्रहः । तथा च सूत्रं अत्यन्तप्रायैकदेशसाधर्म्यादुपमानासिद्धिः इति । अत्र भाष्यम्—अत्यन्तसाधर्म्यादुपमानं न सिध्यति, न चैवं भवति—यथा गौरेवं गौरिति । प्रायसाधर्म्यादुपमानं न सिध्यति,

४ ] कृतः— nyāma-wit_kha
५ ] तत्सदृश— nyāma-wit_kha

न हि भवति यथाऽनड्वानेवं महिष इति । एकदेशसाधर्म्यादुपमानं न सिध्यति— न हि सर्वेण सर्वमुपमीयते, यत्किञ्चित्साधर्म्यस्य सर्वत्र सत्त्वात् इति । अतश्च साधर्म्यं निर्वक्तुमशक्यमिति भावः । अत्र प्रतिबक्ति—प्रसिद्ध-साधर्म्यादुपमानसिद्धेः यथोक्तदोषानुपपत्तिः इति । भाष्यम्—न साधर्म्यस्य कृत्स्नप्रायाल्पभावमाश्रित्योपमानं प्रवर्तते । किं तर्हि ? प्रसिद्धसाधर्म्यात् साध्यसाधनभावमाश्रित्य प्रवर्तते । यत्र चैतदस्ति, न तत्रोपमानं प्रतिषेद्धुं शक्यम् । तस्माद्यथोक्तदोषो नोपपद्यत इति इति । तथा च साधर्म्यैयत्तायां लोक एव प्रमाणमिति भावः ॥ § 2881

सामान्यमेव न सादृश्यम्, विजातीययोरपि मुखचन्द्रयोस्सादृश्यदर्शनात् । न च तत्रान्ततो द्रव्यत्वादिकमेव सामान्यमस्तीति शंक्यम्, मुखघट-योस्सादृश्यादर्शनादित्याह—अभिन्नेति । भिन्नयोरिति शेषः । सदृशेति । न हि सादृश्यप्रतीतिस्थले समानजातिमत्त्वनिर्बन्ध इत्यर्थः ॥ § 2882

I.384/KSV

## उपमानप्रमाणप्रयोजनम्

सत्यमेवम् । उपमानमपि क्वचित् गवयालम्भादिचोदनार्थानुष्ठाने सोप-योगम् । अनवगतगवयस्वरूपे तदालम्भाभावात् । यथा मुद्गस्तम्भः तथा मुद्गपर्णीति मुद्गपर्ण्याद्योषधिपरिज्ञानेऽपि तदुपयोगि भवति ॥ § 2883

सर्वानुग्रहबुद्ध्या च करुणार्द्रमतिर्मुनिः ।
मोक्षोपयोगाभावेऽपि तस्य लक्षणमुक्तवान् ॥ २६ ॥§ 2885

ननु ! एवं सति यागौषधाद्युपयोगि अन्यदपि बहूपदेष्टव्यं स्यात्— न—प्रमाणशास्त्रत्वादस्य ; प्रमाणमेवार्थपरिच्छित्तिसाधनमिहोपदिश्यते । तच्च-तुर्विधमेव, न न्यूनम्, अधिकं वेति निर्णीतम् । प्रमेयं तु मोक्षाङ्गमेवोपदिश्यत इत्यलं प्रसङ्गेन ॥ § 2886

## मीमांसकसम्मतोपमानस्वरूपम्

जैमिनीयास्त्वन्यथोपमानस्वरूपं वर्णयन्ति—यदश्रुतातिदेशवाक्यस्य वने गवयपिण्डदर्शनानन्तरं नगरं गतं गोपिण्डमनुस्मरत एतेन सदृशो गौरिति ज्ञानं—तदुपमानम् । तस्य विषयः संप्रत्यवगम्यमानगवयसादृश्यविशिष्टः प-रोक्षो गौः, तद्वृत्ति वा § 2887

भाष्यसूचितं प्रयोजनमाह—यथा मुद्ग इति । मोक्षोपयोगाभावेऽपीति । साक्षादिति शेषः । अत एवानुपदं यागौषधादि इत्याशङ्कासंगतिः ॥ § 2888

१२ ] यदा— nyāma-wit_kha

एवं सति—साक्षात् मोक्षोपयोगाभावेऽप्युपदेशे । प्रमेयं त्विति । तथा चास्ति व्यवहारः न्यायशास्त्रं प्रमाणशास्त्रम्, वैशेषिकं प्रमेयशास्त्रम् इति अत एवानयोः समानतन्त्रत्वम् ॥ § 2889

जैमिनीया इति । अत्रेदं शाबरभाष्यं—उपमानमपि सादृश्यं असन्निकृष्टेऽर्थे बुद्धिमुत्पादयति, यथा गवयदर्शनं गोस्मरणस्य इति । अश्रुतातिदेशवाक्यस्य—अश्रुतातिदेशवाक्यस्यापि । अत एवेत्थं वार्तिकं—श्रुतातिदेशवाक्यत्वं न चातीवोपयुज्यते । येऽपि ह्यश्रुततद्वाक्याः तेषामेव भवत्ययम् । प्रत्यक्षदृष्टगोत्वानां वने गवयदर्शिनाम् इति । अतश्च अतिदेशवाक्यं न नियतमित्यर्थः । एतेनेत्यादि—तथा च वार्तिकं । तस्माद्यत्स्मर्यते तत्स्यात्

गवयसादृश्यम् । अत एव न तज्ज्ञानं प्रत्यक्षजन्यम्; परोक्षगोपिण्डविषयत्वात् । अश्रुतातिदेशवाक्यस्य भावान्न शाब्दम् ॥

न च स्मरणमेवेदं प्रमेयाधिक्यसंभवात् ।
गवयेन हि सादृश्यं न पूर्वमवधारितम् ॥ २७ ॥§ 2892

भूयोऽवयवसामान्ययोगो यद्यपि मन्मते ।
सादृश्यं, तस्य तु ज्ञप्तिः गृहीते प्रतियोगिने ॥ २८ ॥§ 2894

## उपमानं नानुमानम्

न चानुमानिकमिदं ज्ञानम्; अनपेक्षितपक्षादिधर्मकस्य भावात् । न च गवयगतं सारूप्यं तत्र लिङ्गम्, अपक्षधर्मत्वात् । सादृश्येन विशेषितम् । प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् इति । अत्र न्यायरत्नाकरः—यस्मादेव प्रत्यक्षे गवये न किञ्चिदुपमानस्य प्रमेयमस्ति, तस्मात्स्मर्यमाणैव गौर्गवयसादृश्यविशिष्टा, तद्विशिष्टं वा सादृश्यं उपमानस्य प्रमेयम् इति । तथा च गोसदृशो गवय इति ज्ञानं उपमानं सिद्धान्ते । मीमांसकमते तु गवयसदृशो गौरिति ज्ञानमिति बोध्यम् । अत एव इत्यस्यैव प्रपञ्चः—परोक्षेत्यादि । भावात्—उत्पत्तेः ॥ § 2895

प्रमेयाधिक्यमेवाह—गवयेनेति । गवयनिरूपितसादृश्यविशिष्टगोरेव स्मरणम् । तत्र गवयस्य पूर्वमदृष्टत्वेन तत्सादृश्यविशिष्टत्वेनापूर्वत्वं वर्तत एव । तथोक्तं विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता इति । ननु कथं पूर्वं सादृश्याज्ञानम् ? भवन्मते हि सादृश्यं भूयोऽवयवसामान्ययोगः श्लो. वा. उप. १८ । तच्च गोः प्रत्यक्षकाले गृहीतमेवेत्यत्राह—भूय इत्यादि । तस्येति । तादृशावयवसन्निवेशः गृहीत एव पूर्वं, अथापि सादृश्यस्य सप्रतियोगिकत्वेन गवयापरिज्ञाने गवयसादृश्यं कथमिव गृहीतं स्यादित्यर्थः ॥ § 2896

बौद्धाः पुनः उपमानमनुमानेऽन्तर्भावयन्ति । तदेतन्मतं वार्तिककारः—

२८ ] एवा— nyāma-wit_kha
१ ] स्या— nyāma-wit_kha

न चैतस्यानुमानत्वं पक्षधर्माद्यसंभवात् इत्यादिना निराचकार । तदेतदनुवदति—न चेति । यद्यपि उपमानस्यातिरिक्तत्वं पूर्वमेव प्रसाधितम् । अथापि प्रकारभेदसत्त्वात्पुनरप्याह—अनपेक्षितेत्यादि । पक्षधर्मताज्ञानादिरहितस्येति यावत् । अपक्षधर्मत्वादिति । गवयगतं हि सादृश्यं गवये स्यात्,

नापि गोगतम्; असिद्धत्वात्, प्रतिज्ञार्थैकदेशत्वाच्च । विषाणाद्यवयवजातमपि न गोगतं लिङ्गम्; इदानीं वनस्थस्य तद्ग्रहणाभावात्; अगृहीतस्य च लिङ्गत्वानुपपत्तेः । गवयगतमपि तदलिङ्गमेघ; पूर्ववदपक्षधर्मत्वात् । तस्माद्गवयसादृश्यविशेषितनगरगतपरोक्षगोपिण्डज्ञानं काननवर्तिनः प्रमातुः प्रमाणान्तरं भवतीति अभ्युपगन्तव्यम् ॥

## मीमांसकसम्मतोपमानपरिशीलनम्

तदिदमनुपपन्नम्—एवंविधप्रतीत्यभावात् ॥
प्रसिद्धेन हि सादृश्यं अप्रसिद्धस्य गम्यते ।
गवा गवयपिण्डस्य, न तु युक्तो विपर्ययः ॥ २९ ॥§ 2900

तथा हि—अश्रुतातिदेशको नागरकः कानने परिभ्रमेन्नदृष्टपूर्वं गोसदृशं प्राणिनमुपलभमान एवं बुध्यते; ब्रवीति च—(?')अहो नु न तु गवीत्यर्थः । असिद्धत्वात्—उपमानात्पूर्वमिति शेषः । कथमसिद्धत्वं, भूयोऽवयववत्त्वस्य सादृश्यस्य सिद्धत्वादित्यत्राह—प्रतिज्ञेति । गौः—पुरोवृत्तिपिण्डसदृशा—एतन्निरूपितसादृश्यवत्त्वादित्युक्ते, सादृश्यस्य भूयोऽवयवसामान्ययोगरूपस्य सिद्धत्वेऽपि गवयनिरूपितत्वस्यासिद्धत्वेन हेतुत्वं न संभवतीति । प्रतिज्ञार्यैकदेशत्वादिति बहुब्रीहिगर्भः । ननु तर्हि विशेषणं त्यक्त्वा विषाणादिभूयोऽवयसामान्यवत्त्वमेव हेतुरस्तु । पुरोवर्तिनि पिण्डे दृष्टे नगरस्थे गवि विषाणाद्यवयवस्मरणे च जाते हि सादृश्यप्रतीतिरनुभवसिद्धा । न च विषाणाद्यवयवेषु गवयीयावयवसारूप्यप्रतीतिमन्तरा कथं गवये सादृश्यधीजनकत्वं भूयोवयववत्त्वज्ञानस्येति वाच्यम्—सत्यमस्त्यवयवेषु सारूप्यबुद्धिः । नैतत्साध्यम्, अवयविगतं हि तत् साध्यम् । तथा च गवयवावयवसदृशावयववत्त्वाद्गवयवसादृश्यमनुमीयत इति न कापि हानिरित्यत्राह—विषाणादीति । तद्ग्रहणाभावात्— वनस्थस्य खलु गौः परोक्षः । उपमानस्य स्वार्थत्वेन परार्थानुमानरूपत्वं तु न संभक्त्येवेत्यत्र शेषः ॥ § 2901

गवयपिण्डस्य गवा सादृश्यं लोके प्रसिद्धम् । न तु गवयेन सादृश्यं गोरिति विपर्ययो न युक्तः । श्रुतातिदेशवाक्यस्य कश्चन प्राणी इत्यनिर्धारितविशेषः प्रत्ययो न भवति, किन्तु गवयोऽयं इत्येवेत्यतः—अश्रुतेत्यादि ॥ § 2902

I.387/KSV

२७ ] अप्रसि— nyāma-wit_kha

गवा सदृश एष कश्चन प्राणी(?') इति । न त्वनेन सदृशो गौरिति ज्ञानमभिधानं वा कस्य चिदस्तीति । अतः प्रमितेरेवाभावात् किं प्रमाणचिन्तया ? § 2903

भवतु वैषा बुद्धिः—अनेन सदृशो गौः इति; तथाऽपि स्मृतित्वान्न प्रमाणफलम् ॥ § 2904

## मीमांसकसम्मतमुपमानं स्मरणरूपमेव

ननु ! गोपिण्डमात्रे सत्यं स्मृतिरेवैषा । संप्रत्यवगतगवयसादृश्यविशिष्टत्वं तु तस्य पूर्वमनुपलब्धमधुनैव गम्यते इति न तस्मिन्नेषा स्मृतिः—मैवम्—गवयसादृश्यस्यापि तत्र पूर्वं ग्रहणात् ॥ § 2905

ननु ! अनवगतगवयेन गवि गवयसादृश्यमवगतमिति चित्रम्—न चित्रम्—व्यक्तितिरस्कृतस्य ग्रहणात् ॥ § 2906

ननु ! इदमपि चित्रतरम् । गृहीतं च व्यक्तितिरस्कृतं चेति । व्यक्तिर्हि ग्रहणमेव, तत्तिरस्कारे च नास्त्येव ग्रहणम्—उच्यते— § 2907

गोपिण्डमात्रे—विशेष्यांशमात्रे । तथोक्तं वार्तिके—प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते । विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता इति । पूर्वं ग्रहणादिति । प्रत्यक्षेणावबुद्धेऽपि सादृश्ये इति वदता सादृश्यग्रहणमङ्गीकृतमेवेति भावः ॥ § 2908

ननु गवयगतं गोसादृश्यं प्रत्यक्षमित्युक्तम् । गोगतं गवयसादृश्यं तु उपमानविषय इत्याह—नन्विति । व्यक्तीति । तद्व्यक्त्या तिरस्कृतस्येत्यर्थः । अयं भावः—सादृश्यं नाम भूयोऽवयवसामान्ययोग इति भवन्मतं, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमित्यस्माकम् । उभयथापि वस्तुग्रहणकाले स्वरूपतः सादृश्यं गृहीतमेव । परन्तु तद्ग्रहणस्य व्यक्तिविश्रान्तत्वेन सादृश्यप्रत्ययो न जायते । सादृश्यप्रतीतिर्हि प्रतियोगिग्रहणसापेक्षा । एवं तदा सादृश्यप्रतीत्यभावात् सादृश्यं व्यक्तितिरस्कृतमित्युच्यते । यथा तमसः तेजोऽभावरूपत्वेऽपि तेजोरूपप्रतियोग्युपस्थित्यपेक्षयाऽभावरूपः प्रकाशते, नान्यथेत्युच्यते, तथा प्रकृतेऽपि गृहीतमपि सादृश्यं प्रतियोग्युपस्थित्यपेक्षया तथा व्यवह्रियते । अन्यदा तु स्वरूपत इति सादृश्यमपि पूर्वं गृहीतमेवेति ॥ § 2909

I.388/KSV

नैतदपि चित्रतरम् । तथा हि—वने गवयमालोक्य नागरिको न करेणुमनुस्मरति, न करभम्, न तुरङ्गम्; अपि तु विशिष्टमेव पिण्डम् । न च निर्निबन्धनमेवेदं विशिष्टविषयस्मरणमुत्पत्तुमर्हति । तस्मात् यत्रैव परिदृश्यमानपिण्डसादृश्यं पूर्वमवगतं स एव पिण्डोऽस्मिन् दृश्यमाने स्मरणपथमवतरति, नेतर इति । सादृश्यग्रणमसंवेद्यमानमप्यभ्यस्तविष-

२८ ] नन्वत्र— nyāma-wit_kha
१--२ ] चित्रम्— nyāma-wit_kha

याविनाभावस्मृतिवत् बलात्परिकल्प्यते । पूर्वं च गवयग्रहणाद्विना गवयसदृशीयं गौरिति ग्रामीणस्यानुभवो न भवतीति व्यक्तितिरस्कृतं तत्सादृश्यग्रहणमुच्यत इति न किञ्चिच्चित्रम् । तस्मात् स्मृतिरेवेयम्—तथा हि प्रतीतिः अनेन सदृशो गौर्मया नगरे दृष्टः इति । न तु अद्यैतत्सदृशो गौर्दृश्यते इति बुद्धिः ॥ § 2910

## प्रतियोग्यग्रहणेऽपि सादृश्यग्रहणसंभवः

ननु ! प्रतियोगिग्रहणाद्विना कथं ग्राम्यस्य सादृश्यग्रहणम् ? अत्र भवतैवात्मनः प्रतिकूलमभिहितम् श्लो. वा. उप. ३५— § 2911

सामान्यवच्च सादृश्यं एकैकत्र समाप्यते ।
प्रतियोगिन्यदृष्टेऽपि तस्मात्तदुपलभ्यते ॥ ३० ॥§ 2913

स च भूयोऽवयवसामान्ययोगोऽगृहीतगवयवेनापि नागरकेण ग्रहीतुं शक्यते ॥ § 2914

नागरिकः—अदृष्टपूर्वगवय इति यावत् । एवं सर्वत्र । विशिष्टमिति । विलक्षणावयवसन्निवेशविशिष्टमित्यर्थः । यत्रैव—पिण्ढ इति शेषः । ननु व्यक्तिग्रहणेऽपि सादृश्यप्रतीतिर्न दृश्यत इत्यत्राह—सादृश्येति । भावस्त्वनुपदमेवोक्तः । प्रतीतिः—स्मृतिरिति यावत् ॥ § 2915

किममिहितं प्रतिकूलमित्यत्राह—सामान्यवदिति । एवञ्च प्रतियोग्यज्ञानेऽपि सादृश्यग्रहणं भवतैवोपपादितमित्यर्थः । अतिरिक्ताभावानङ्गीकर्तृमते अन्योन्याभावरूपा जातिः, प्रतियोगिग्रहणे सत्यन्योन्याभावरूपतया, तदभावे च स्वरूपतो गृह्यत इत्युच्यते । सोऽयं न्यायः अत्रापि स्मर्तव्यः ॥ § 2916

I.389/KSV

अथ तदा तद्ग्रहणेऽपि सति न तस्य सदृशप्रत्ययः—न तर्हि भूयोऽवयवसामान्ययोगः सादृश्यम्; किन्तु सदृशप्रत्ययहेतुः सादृश्यम् । यथोक्तम्—सादृश्यं सदृशप्रत्ययहेतुत्वमेव । भूयोऽवयवसामान्ययोगे च तल्लक्षणे चित्रादावव्याप्तिः । अतिव्याप्तिश्च, प्राण्यन्तरेषु विसदृशेष्वपि तदवयवसामान्यानां खुरादीनां भावात् । भूयस्त्वं तु कियत्तेषामिति न विद्मः । यावता सादृश्यप्रत्ययोत्पत्तिरिति चेत्, तर्हि सदृशप्रत्ययहेतुत्वमेव सादृश्यमस्त्विति युक्तम् । तस्मात् गवयदर्शनात्पूर्वमपि गव्यनभिव्यक्तसादृश्यग्रहणोपपत्तेः स्मृतिरेवेयम् ॥ § 2917

---

२२ ] पिण्डे— nyāma-wit_ka
२४ ] स्मृति— nyāma-wit_kha
१५ ] सादृश्यम्— nyāma-wit_kha
१६ ] हेतुत्वमेव सादृश्यम्— nyāma-wit_kha

## मीमांसकसम्मतोपमानस्य फलाभावः

अथ मतं यथा नैयायिकानां अतिदेशवाक्यवेलायां सोपप्लवा संज्ञासंज्ञिसम्बन्धबुद्धिः उपमानान्निरुपप्लवीभवति, एवमियमपि— योऽसौ पूर्वं व्यक्तितिरस्कृता गवि गवयसादृश्यबुद्धिरभूत्, सेदानीं उपमानाद्व्यक्तीभविष्यतीति ॥ § 2918

नैतदस्ति—गवयग्राहिणा प्रत्यक्षेणैव तत्स्पष्टतासिद्धेः । यथा भवद्भिर्नैयायिका उक्ताः श्लो. वा. उप. ९— § 2919

अथ त्वधिकता काचित् प्रत्यक्षादेव सा भवेत् इति—§ 2920
तथा नैयायिका अपि युष्मान् वक्ष्यन्ति ॥ § 2921

सादृश्यस्यान्यादृशत्वेऽपि नास्माकं हानिरित्याह—अथेति । अव्याप्तिरिति । गोगवययोर्निरुच्यमानसादृश्यापेक्षया अव्याप्त्यतिव्याप्ती ज्ञेये । तस्मात्—एवं प्रतियोगिस्मरणमन्तरापि सादृश्यप्रतीतेः संभवात् ॥ § 2922

ननु स्वरूपतः सादृश्यं यद्यपि गृह्यताम् । प्रतियोगिस्मरणवेलायामेव सादृश्याभिव्यक्तिर्भवतीति भवतैवोक्तम् । तर्हि तदेवोपमानप्रयोजनमस्त्विति शङ्कते—अथेति । सोपप्लवा—व्यक्तिविशेषापरिज्ञानात् । स्पष्टतासिद्धेः— व्यक्तिविशेषस्य दृष्टत्वादित्यर्थः । तथेत्यादि । पूर्ववाक्यार्थविज्ञानान्नाधिक्यं गवये यदि । स्मरणादविशिष्टत्वात् सङ्गतेर्न प्रमाणता इति पूर्वतनवार्तिकम् । संगतिः—संवादः—अनुवादः । अतिदेशवाक्यादनधिकार्थत्वे अनुवादरूपत्वाद

ननु ! वनस्थप्रमातुर्गवयविषयं प्रत्यक्षं कथं ग्रामवर्तिनि गवि सादृश्यबुद्धेः स्पष्टतामादधीत ? किं कुर्मः ? तद्दर्शनानन्तरं सुस्पष्टतत्सादृश्यविशिष्टगोपिण्डस्मरणात् ॥

## मीमांसकोक्तोपमानस्य प्रमाणान्तरत्वासंभवः

ननु ! अत एवेदमुपमानं प्रमाणान्तरमुच्यते, प्रत्यक्षस्य सन्निहितगवयस्वरूपमात्रनिष्ठत्वात् । परोक्षे च गवि गवयसादृश्यप्रत्ययस्य विस्पष्टस्यान्यतोऽसिद्धेरिति । उक्तमत्र—स्मृतिरेवेयम्, तथाऽवभासनात् । अनधिगतार्थग्राहि च प्रमाणमुपगच्छन्ति भवन्तः ॥

## मीमांसकोक्तमुपमानमन्ततोऽनुमानमेव

भवतु वा स्मृतिविलक्षणेयं प्रतीतिः । तथाऽप्यनुमानजन्यत्वात् न प्रमाणान्तरमाविशति । स्मर्यमाणो गौः धर्मी, एतत्सदृश इति साध्यो धर्मः, एतदवयवसामान्ययोगित्वात्, सन्निहितद्वितीयगवयपिण्डवत् । तदसन्निधाने सामान्येन व्याप्तिर्दर्शयितव्या— यत्र यदवयवसामान्ययोगित्वं तत्र तत्सादृश्यम्, यथा यमयोरिति । विशिष्टस्य तद्योगस्य हेतुत्वान्नानैकान्तिकत्वम् । सामान्ययोगोऽन्यः, प्रमाणमुपमानं, अधिकार्थत्वे प्रत्यक्षमित्यर्थः ।

२३ ] मानं नि—

nyāma-wit__kha

अयं दोषः भवताऽपि स्मर्तव्य इत्यर्थः ॥ § 2923

साटृश्यबुद्धेः—पूर्वं गवि स्वरूपतोऽवगताया इति शेषः । कथं आदधीत इत्यन्वयः । तथा च इदानीं गोरप्रत्यक्षत्वेऽपि तत्स्मरणादेव पूर्वं गृहीतं साटृश्यं स्पष्टीकृतं भवतीति ॥ § 2924

अत एवेत्यस्यैव विवरणम्—प्रत्यक्षस्येत्यादि ॥ § 2925

इयं प्रतीतिः—अनेन सदृशो गौरिति प्रतीतिः । सन्निहितेति । संप्रतिपन्नेति यावत् । तत् इति द्वितीयपिण्डपरम् । यमयोः—यमलयोर्भ्रात्रोः । ननु गवयगतपादशृङ्गाद्यवयवसामान्ययोगो महिषादावप्यस्तीति व्यभिचरितोऽयं हेतुरिति शङ्कायां, अस्य दोषस्य सर्वमतसाधारण्येन विलक्षणस्यावयवसामान्ययोगस्यैव विवक्षणीयतया न व्यभिचार इत्याह—विशिष्टस्येति । नन्वेवमपि हेतुसाध्ययोरैक्यादसिद्धिस्सिद्धसाधनं वेत्यत्राह—सामान्येति । तादृश

अन्यच्च साटृश्यमित्युक्तत्वात् न प्रतिज्ञार्थैकदेशो हेतुः । अव्युत्पन्नस्य(?') नारिकेलद्वीपवासिनः, बालस्य वा तत्प्रत्ययानुत्पादात् न व्याप्तिनैरपेक्ष्येण सा प्रतीतिरिति वक्तव्यम् । तस्मादित्थमनुमानजन्यत्वात् स्मृतित्वाद्वा पूर्वोक्तादसंभवादेव वा नेयमवगतिरुपमानकार्येति सिद्धम् ॥

**मीमांसकोक्तस्योपमानप्रयोजनस्यानुवादः**

कश्चास्य भवदुपमानस्य स्वतन्त्रोपयोगः ? एवं ह्याहुर्भवन्तः— श्लो. वा. शब्द. ७

अपरीक्षामिषेणापि लक्षणानि वदन्नयम् ।न स्वतन्त्रोपयोगित्वनिरपेक्षाणि जल्पति ॥§ 2927 &

प्रतीतेर्व्याप्तिजन्यत्वे प्रमाणमाह—अव्युत्पन्नस्येति । वृद्धोऽप्यव्युत्पन्नः कश्चित्, व्युत्पन्नोऽपि गवयगन्धरहितदेशान्तरवासी कश्चित्, एतद्देशवास्यपि बालः कश्चित् । एषां तादृशप्रतीत्यनुदयात् न शब्दं, न प्रत्यक्षं, किन्त्वनुमानमेवेदमित्यर्थः ॥ § 2928

स्वतन्त्रः—वेदः । क एवमाह ? वेदोपयोग्येवात्र निरूप्यत इति । अत्राह—अपरीक्षेति । अत्र स्वतन्त्रपदार्थः वेद इति पार्थसारथिमिश्रैः सुचरितमिश्रैश्चाभिहितम् । अत्रेदमितिवृत्तम्—चोदनालक्षणोऽर्थो धर्मः इत्यनेन धर्मस्य श्रुत्येकसमधिगम्यत्वे कथिते, प्रत्यक्षादीनां कुतस्तत्र प्रमाणत्वासंभव इति शङ्कायां प्रत्यक्षादीनामेवंलक्षणकत्वान्न तानि धर्मे प्रमाणीभवितुमर्हन्तीति स्थापनाय प्रत्यक्षादीनां लक्षणानि कथनीयान्यापतितानि । तत्र प्रत्यक्षस्यानुमानस्य च लक्षणं कथितम् । शब्दस्य लक्षणे वक्तव्ये भाष्यकारस्तु शब्दसामान्यस्य लक्षणमनुक्त्वा शब्दविशेषस्य शास्त्रस्यैव लक्षणं वदति—शास्त्रं च शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम् इति । तदिदमसङ्गतम्, शब्दसामान्यलक्षणस्यैव वक्तव्यत्वात् । न च वाच्यं—भाष्यकारः

१६ ] गवय— nyāma-wit_kha
२० ] भवतु— nyāma-wit_kha

ऐदम्पर्येण न प्रमाणविचारे प्रवृत्तवान् । श्रुतेरेव प्रकृतविचारणीयत्वस्थापनाय प्रत्यक्षादीनामपरीक्षणीयत्वं कथनीयं संवृत्तमिति प्रमाणनिरूपणैदम्पर्याभावात् नायं महान् दोष इति-इति शङ्कायामाह— अपरीक्षेत्यादि । यद्यप्यपरीक्षणीयत्वार्थमेव प्रत्यक्षादीनि लक्षितानि । अथापि न भाष्यकारः स्वैरं वदति । किन्तु वेदविचारस्य प्रकृतत्वात् तदुपयोग्येव विषयो निरूपणीयः, नानुपयोगीति शास्त्रलक्षणमुक्तवान् इति । एवञ्चात्र

**मीमांसकोक्तप्रयोजनवर्णनम्**

ननु ! उक्त एवोपयोगः सौर्ये चरौ द्रव्यदेवतासारूप्यादाग्नेयविध्यन्तलाभः । आग्नेयोऽष्टाकपालः इत्युपदिष्टदृष्टादृष्टेतिकर्तव्यताकलापतया निराकाङ्क्षो विधिः । सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः इत्यत्र प्रधानमात्रोपदेशाद्विध्यादिरस्ति, न तु विध्यन्तः—इतिकर्तव्यताऽभिधानम् । न चानितिकर्तव्यताकं कर्म प्रयोगयोग्यम् । अतः किमियमितिकर्तव्यताजातमिह गृह्यतामित्यपेक्षायां चरुपुरोडाशयोर्व्रीह्याद्यौषधसाध्यत्वेन द्रव्यसादृश्यात्सूर्याग्न्योश्च तेजस्वितया देवतयोः सारूप्यादाग्नेयेतिकर्तव्यता सौर्ये क्रियत इत्युपमानाद्गम्यते ॥

अपि च क्वचिच्चोदितद्रव्यादावलभ्यमाने प्रतिनिध्युपादानेन कर्मसमापनात् प्रतिनिधिमात्रोपादाने प्राप्ते व्रीहिसदृशनीवारोपा- वेदोपयोग्येव निरूप्यत इति प्रतिज्ञातम् । तथा चोपमानस्य कः वेदोपयोगः ? इति वक्तव्यम् ॥
§ 2929

विध्यन्तः—अङ्गम् । कर्मस्वरूपबोधकः उत्पत्तिविधिः विध्यादिः । स च अङ्गविधौ निराकाङ्क्षः । अतः अङ्गविधिः विध्यन्तः । जैमिनिसूत्रे विध्यन्तो वा प्रकृतिवत् इत्यादावयं शब्दः प्रयुक्तः । अधिकं भाष्ये द्रष्टव्यम् । इति विधिः इत्यन्वयः । सारूप्यादिति । यस्य लिङ्गमर्थसंयोगात् ऐकार्थ्याद्वा नियम्येत जै. सू. ८-१-२८ इति सूत्रभाष्ययोः अयं न्यायः प्रदर्शितः । पार्थसारथिमिश्रैः शास्त्रदीपिकायां सादृश्यविशेषात्त्वेकदेवत्ये सौर्यादौ एकदेवत्यस्याग्नेयस्य प्रवृत्तिः इत्युक्तम् । खण्डदेवेनापि भाट्टदीपिकायां सौर्यादिषु ओषधद्रव्यकत्वविशिष्टैकदेवताकत्वरूपविशेषसादृश्यादाग्नेयविकारत्वम् इत्युपपादितम् ॥ § 2930

प्रयोजनान्तरमप्याह—अपि चेति । क्वचित्—दर्शपूर्णमासादौ । चोदितद्रव्यं—व्रीह्यादि । प्रतिनिधिः—नीवारादिः । प्रतिनिधिमात्रं—प्रतिनिधिसामान्यम् । अयं च न्यायः—सामान्यं तच्चिकीर्षा हि जै. सू. ६-३-२७ इत्यत्र दर्शितः । अयमर्थः—विहितस्य व्रीह्यादेरलाभे तत्प्रतिनिधित्वेन स्वैरं यत्किञ्चित् गृहीतुं शक्यं, नियामकाभावात् इति चेत्—न—सामान्यं

दानमुपमानात्प्रतीयत इति । तदाह श्लो. वा. उप. ५२, ५३—

---

११ ] दिष्टादृष्टेति— nyāma-wit__kha

० ] साधन— nyāma-wit__kha

भिन्नानुमानादुपमेयमुक्तासौर्यादिवाक्यैर्न सहायि दृष्टम् ।सादृश्यतोऽग्न्यादियुतं कथं नुप्रत्याययेदित्युपयुज्यते नः ॥प्रतिनिधिरपि चैवं ब्रीहिसादृश्ययोगाद्भवति तदपचारे यत्र नीवारजातौ ।तदपि फलमभीष्टं लक्षणस्योपमायाःप्रकृतिरपि च गौणैर्बाध्यते यत्र चान्यैः ॥§ 2932 &

## मीमांसकोक्तोपमानप्रयोजनपराकरणम्

तदेतदसमञ्जसम्—प्रसिद्धेनाप्रसिद्धस्य सादृश्यमवगम्यते इत्येषभवद्भिरुत्सृष्टः पन्थाः । विपर्ययस्त्वाश्रितः ॥

यदप्यदृष्टेन नूतनेनाप्रसिद्धेन गवयेन वाक्यसिद्धस्य गोः सादृश्यमुपमानात् प्रतीयत इति—तदिहापि निर्ज्ञातेतिकर्तव्यताकेन गोवत्प्रसिद्धेनाग्नेयेन सौर्यस्य गवयवदप्रसिद्धस्य सादृश्यमवगम्यते; सादृश्यमेव नियामकं तत्र, यतस्सामान्यविषयिणी हि चिकीर्षा । सर्वेषां शब्दानामाकृतिपरत्वात् । आकृतेरमूर्तत्वेन क्रियान्वयानर्हत्वेन तदाश्रयस्य ब्रीह्यादिद्रव्यस्य ग्रहणम् । तत्र पूर्णावयवसामान्ययोगः ब्रीहौ, ततः किञ्चिन्न्यूनतद्योगः नीवारे । इतरत्र च ततोऽपि न्यूनसामान्ययोगः । एवञ्च नीवाराणां सदृशतमत्वात् तेषामेव ग्रहणम् । अधिकमन्यत्र ॥ § 2933

उक्तार्थद्वयं श्लोकवार्तिकेन संवादयति—तदाहेति । § 2934

उत्सृष्टः—परित्यक्तः । अथवा उत्सर्गेण प्रापितः—उपदिष्टः । अप्रसिद्धगवयसादृश्यं गवि गृह्यते इति खलूपमानफलं भवद्भिरुक्तम् । इदानीं च प्रसिद्धाग्नेयसादृश्यं सौर्ये वर्ण्यत इति विपर्ययः ॥ § 2935

विपर्ययमेवोपपादयति—यदिति । उक्तमिति शेषः । यत् इति यथेत्यर्थकं वा । एवं उत्तरत्र तत् इत्यत्रापि । गवयेन अस्य सादृश्येनान्वयः । एवमुत्तरत्र आग्नेयेन इत्यत्रापि । निर्ज्ञातेति । सम्यक्

न तु गवयेन गोः—सौर्येणाग्नेयस्य । तदिह यस्य विध्यन्तार्थिता; न तत्रोपमानात्सादृश्यावगमः; यत्र वा तदवगमः, न तत्रेतिकर्तव्यताऽर्थित्वम् ॥

## अन्ततः मीमांसकोक्तमुपमानं स्मृतिरेव

ननु ! सौर्ये विध्यन्तार्थिनि प्रतीयमाने द्रव्यदेवतासारूप्यादेराग्नेयः स्मरणपथमवतरतीति तत एवासौ विध्यन्तमधिगच्छतीति— —एवमपि स्मरणमात्रात् सिद्धेऽर्थे किमुपमानेन ? आग्नेयस्मरणादेव तदितिकर्तव्यता सौर्ये उपादास्यते । स्मृतिविशेष एव विषयाधिक्यादुपमानमुच्यते इति चेत्, प्रतिविहितमेतदित्यलं प्रसङ्गेन ॥

## मीमांसकसम्मतोपमानस्य वैयर्थ्यम्

किञ्चोपमानप्रतिपादितार्थः

---

∘ ] ---Note : ख पुस्तके नास्ति ।
∘ ] त— nyāma-wit_ka
∘ ] त— nyāma-wit_ka

न चोदनालक्षणतां बिभर्ति ।
तस्मान्न युज्येत ततोऽधिगन्तुं
आग्नेयविध्यन्तविशेषलाभः ॥ ३१ ॥§ 2940

प्रतिनिधिरपि चैवं नास्ति नीवारजातेः
न हि भवदुपमानात् व्रीहिसादृश्यबुद्धिः ।§ 2942

ज्ञातेत्यर्थः । न तु इत्यनन्तरं भवन्मते इति शेषः । ननु तावता प्रकृते का हानिः ? इत्यत्राह—तदित्यादि । अङ्गापेक्षा हि सौर्येष्टेः—सादृश्यग्रहणं तु आग्नेये, अप्रसिद्धसादृश्यं खलु प्रसिद्धे गृह्यत इति भवन्मतम् ॥ § 2943

ननु सौर्यसादृश्यस्याग्नेये प्रतीतौ तुल्यवित्तिवेद्यतया आग्नेयसादृश्यं सौर्ये उपस्थाप्यत एवेति अङ्गलाभः संभवतीति शङ्कते—नन्विति । विषयाधिक्यादिति । उपपादितमिदं पूर्वं ३८४-३८५ पुटे प्रतिविहितमिति । पूर्वं पुट. ३८५ इति शेषः ॥ § 2944

प्रथमदृष्टान्ते बाधकमप्याह—किञ्चेति । उपमानप्रमाणादेव विध्यन्तलाभे तस्य कथं चोदनैकगम्यत्वमित्यर्थः । ततः—उपमानात् ॥ § 2945

द्वितीयदृष्टान्तस्याप्यसांगत्यमाह—प्रतिनिधिरिति । प्रतिनिधित्वमित्यर्थः । न हीति । अप्रसिद्धसादृश्यं खलु प्रसिद्धे ग्राह्यं भवताम् ।

भवति तु मतिरेषा व्रीहयस्तत्सदृक्षाः
इति, न च फलमस्याः किञ्चिदस्ति प्रतीतेः ॥ ३२ ॥§ 2948

**स्वमतोपसंहारः**

भवत्यङ्गं यागे क्वचन गवयालम्भनमतः
तदाकारज्ञाने प्रतिनिधिविवेके च कृतिनाम् ।
उपायत्वं युष्मत्कथितमुपमानं न भजते;
परिग्राह्यं तस्मात् प्रवरमुनिगीतं सुमतिभिः ॥ ३३ ॥§ 2952

इत्युपमानम्
॥ इति द्वितीयमाह्निकम् ॥

तत्सदृक्षाः—नीवारसदृशाः । नीवारसादृश्यं व्रीहिषु गृह्यते चेत् नीवारप्रति निधित्वेन व्रीहिर्गृह्येत । अधिकावयवसामान्ययोगः व्रीहिषु, ततो न्यूनः नीवारेषु इत्युच्यते । एवं सति व्रीहिसादृश्यमेव नीवारेषु गृह्येत । वर्ण्यते च भवद्भिरुपमान वैपरीत्येनेति ॥ § 2955

अतश्च प्रसिद्धसादृश्यमप्रसिद्धे उपपादयतां सैद्धान्तिकानां मत एव प्रतिनिधिग्रहणादिकं सूपपादमित्युपसंहरति—भवतीत्यादि ॥ § 2956

० ] लम्बन— nyāma-wit_ka

# १.३ तृतीयमाह्निकम्—शब्दपरीक्षा

I.396/KSV

## शब्दलक्षणम्

उपमानानन्तरं शब्दस्य विभागसूत्रे निर्देशात्तस्य लक्षणं प्रतिपादयितुमाह—
§ 2957

**आप्तोपदेशः शब्दः ॥ १-१-७ ॥** § 2958

उपदेशः शब्दः इत्युच्यमाने पर्यायमात्रोच्चारणात् अकारके शब्दमात्रे प्रमाण्यप्रसक्तिरिति तद्विनिवृत्तये पूर्वसूत्रात् साध्यसाधनपदमाकृष्यते । तथाऽपि शब्दान्तरजनके प्रसक्तिरिति प्रत्यक्षसूत्रात् ज्ञानपदस्य, स्मृतिजनकस्य व्यवच्छेदार्थं चार्थग्रहणस्य, संशयविपर्ययजनकनिराकरणाय च व्यवसायात्मकाव्यभिचारिपदयोरनुवृत्तिरित्येवमव्यभिचारादिविशेषणार्थप्रतीतिजनक उपदेशः शब्द इत्युक्तं भवति ॥ § 2959

तदेवंपर्यायमेवोपदेशशब्दं शब्दलक्षणमपेक्षितपूर्वसूत्रोपात्तविशेषणपदं केचिद्व्याचक्षते । आप्तग्रहणं च लक्षणनिश्चयार्थमाहुः । घ्राणरसनत्वक्चक्षुःश्रोत्राणीन्द्रियाणि भूतेभ्यः इत्यत्र भूतग्रहणं वक्ष्यते । एवं ह्यैतिह्यस्य न प्रमाणान्तरता भविष्यति, उपदेशरूपत्वाविशेषादिति ॥ § 2960

क्षुण्णं किञ्चिज्ज्ञयन्तस्य वर्त्म चैतावतैव नः ।
सुदूरमस्ति गन्तव्यं, गच्छामः त्वरितं ततः ॥§ 2962

अकारके—बोधाजनके, घट, कलश, कुम्भ, इत्यादिरूपे । शब्दान्तरजनके—वीचीतरङ्गन्यायेन शब्दान्तरजनके पूर्वशब्दे । ज्ञानपदस्येति । एवं प्रत्यक्षसूत्र इव यतः शब्दोऽप्यध्याहर्तव्यः । एतादृशं ज्ञानं यतः, स शब्द इत्यर्थः ॥ § 2963

एवंपर्यायं—उक्तार्थकम् । लक्षणनिश्चयार्थं—उक्तार्थस्य परिचायकमिति यावत् । वक्ष्यते इति । अष्टमाह्निके तत्सूत्रविवरणवेलायां भूतग्रहणं स्पष्टार्थमिति सहेतुकमुक्तम् । एवं—एवं सत्येव । अन्यथा I.397/KSV

## सूत्रयोजनायां पक्षान्तरम्

अन्ये तु ब्रुवते—युक्तमुपदेशपदमेव शब्दलक्षणम् । युक्तं च तन्निश्चयार्थमाप्तग्रहणम् । पूर्वसूत्रोपात्तविशेषणपदानुवृत्तिस्तु नोपयुज्यते, सामान्यलक्षणानन्तरं विशेषलक्षणप्रक्रमात् । सामान्यलक्षणेन च स्मृत्यादिजनकसकलप्रमाणाभासव्युदासे कृते सजातीयप्रत्यक्षादिव्यदच्छेद एव केवलमिदानीं

---

५ ] प्रत्यक्षसूत्रात्—
nyāma-wit_kha

वक्तव्यः । तत्र च पर्यायतया पर्याप्तमुपदेशपदमेव बुद्ध्यादिपदवदिति किं विशेषणानुवृत्तिक्लेशेन ? इति ॥

**आप्तपदमपि लक्षणघटकमिति पक्षः**

अपर आह—अनवलम्बितसामान्यलक्षणानुसरणदैन्यमनध्याहृतप्राक्तन-विशेषणपदमाप्तोपदेशश्शब्दलक्षणम् । न चाकारकेण शब्दान्तरकारिणा वा स्मृतिजनकेन वा संशयाधायिना वा शब्देन किञ्चिदुपदिश्यत इति निर्व-चनसव्यपेक्षात् उपदेशग्रहणादेव तन्निवृत्तिः सिद्धा । मिथ्योपदेशे तु र-थ्यापुरुषादिवचसि विपरीतप्रतीतिकारिणि प्रसङ्गो न निवर्तत इति तत्प्र-तिक्षेपार्थमाप्तग्रहणम् । ऐतिह्ये यथार्थप्रतीतिहेतावाप्तानुमानान्न प्रमाणान्तर-त्वमिति । तस्माद्यथाश्रुतमेव सूत्रं शब्दलक्षणार्थं युक्तम् ॥ ऐतिह्यस्य अज्ञात-प्रवक्तृकत्वेन आप्तोपदेशरूपत्वाभावात् अतिरिक्तप्रमाणताऽपत्तिः । सूत्रे तु चत्वार्येव प्रमाणानि निर्दिष्टानि । तेन गम्यते आप्तपदं न लक्षणघटकमभिम-तं सूत्रकर्तुरिति भावः ॥ § 2964

अन्ये त्वित्यादि । प्रमाणसामान्यलक्षणेनैव अकारकशब्दादावतिप्रस-ङ्गवारणात् न साध्यसाधनादिपदानामाकर्ष इत्याशयः । पर्यायपदनिर्देशेन कथं लक्षणप्राप्तिः ? इति शङ्कायां सूत्रकारस्येयं शैलीत्यत्र निदर्शनमाह—बुध्यादीति । बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् इतिवदित्यर्थः । शिष्टं बुद्धिप-रीक्षायामेव द्रष्टव्यम् ॥ § 2965

अनवलम्बित—इत्यादिनाऽनुपदोक्तपक्षवैलक्षण्यं, अनध्याहृत—इत्यादिना प्रथममुपपादितपक्षवैलक्षण्यम् । न च उपदिश्यते इत्यन्वयः । प्रसंगः—
I.398/KSV अतिप्रसङ्गः । आप्तानुमानादिति । अत एव खलु वेदोप

**उपदेशपदस्यार्थानुपपत्तिः**

भवत्वेवम् ! उपदिश्यत इति कोऽर्थः ? अभिधानक्रिया क्रियते । केयमभिधानक्रिया नाम ? प्रतीतिरिति चेत्; चक्षुरादेरपि तत्करणत्वादुप-देशत्वप्रसङ्गः ॥

स्वावगतिपूर्विका प्रतीतिरिति चेत्, धूमादेरप्युपदेशताप्रसङ्गः । चक्षुरादेर-पि तत्करणत्वात् उपदेशत्वप्रसङ्गः । स्वसादृश्येन प्रतीतिरिति चेत्, बिम्ब-स्यापि पादाद्यनुमितावुपदेशत्वप्रसङ्गः, शब्दे च तदभावादनुपदेशत्वं स्यात् । शब्दावच्छिन्ना प्रतीतिरिति चेत्, श्रोत्रस्य तज्जनकत्वादुपदेशत्वप्रसङ्गः, शब्दस्य च स्वावच्छेदेन प्रतीतिजनकत्वनिषेधादनुपदेशत्वंभवेत् । नापि शब्दकरणिका प्रतीतिः; अभिधानक्रियाविवक्षायां, आकाशानुमाने वा तस्योपदेशत्वप्रसङ्गा दित्यभिधानक्रियास्वरूपानिश्चयात् न तस्याः करणमुपदेशः ॥ देष्टृतया ईश्वर-साधनम् । ऐतिह्येऽपि यथार्थे सामान्यत आप्तमूलकत्वानुमानाल्लक्षणोपपत्तिः । अयथार्थस्य तु न लक्ष्यतैवेति शेषः ॥ § 2966

---

२८ ] ता— nyāma-wit__kha
३ ] ऐतिह्यं— nyāma-wit__ka
३--४ ] र— nyāma-wit__ka
२०--२१ ] स्वसादृश्येन— nyāma-wit__kha
२४--२५ ] त्वप्रसङ्गा— nyāma-wit__kha

तत्करणत्वात्—प्रतीतिकरणत्वात् । स्वावगतीति । शब्दः किल ज्ञातसन्नेव प्रतीतिकरणं, इन्द्रियं तु अज्ञातमेव स्वरूपसत् । उपदेशपदं च एतादृशविलक्षणार्थकं, प्रयोगरूढ्या इत्यर्थः । धूमादेरिति । ज्ञायमानमेव खलु लिङ्गं अनुमितिकरणम् । स्वसादृश्येनेति । अनुमितौ करणं धूमः, प्रमितिस्तु तद्विजातीयवह्निविषयिणी । शब्दे तु यद्विषयको बोधः, तद्विषयक एव शब्दोऽपीति अभिमानः । बिम्बस्येति । प्रतिबिम्बस्येत्यर्थः । पूर्णप्रतिबिम्बस्थले अनुमानस्याप्रसरात् । यत्र पादादिबिम्बेन गतानामनुमीयते इति शब्द-२८ कुमारिलवचनं च स्मरन् आह—पादादीति । प्रत्युतासंभव एवेत्याह— शब्दे चेति । बोधस्तु घटत्वावच्छिन्नस्य । करणे तु शब्दे, शब्दज्ञाने वा न हि घटत्वं स्थातुमलम् । अतः अत्रापि न सादृश्यलेश इति भावः । शब्दावच्छिन्नेति । अयं पक्षः प्रत्यक्षपरीक्षायां वर्णितः । प्रत्युत असंभव एवेत्याह—शब्दस्य चेति । इदमपि प्रत्यक्षलक्षणे अव्यपदेश्यपदप्रयोजनविचारावसरे प्रतिपादितम् । अभिधानेत्यादि । अभिधानक्रियां प्रत्यपि I.399/KSV

## उपदेशपदस्यार्थः

उच्यते—श्रोत्रग्राह्यवस्तुकरणिका तदर्थप्रतीतिरभिधानक्रिया, इत्थं लोके व्यवहारात् । उक्तः, अभिहितश्च स एवार्थो लोके व्यपदिश्यते, यस्तु तथाविधप्रतीतिविषयतां प्रतिपन्नः । श्रोत्रग्राह्यस्य वर्णराशेरेवार्थप्रतीतिकरणत्वात्; न तु श्रोत्रप्रत्ययविषयः स्फोटत्मा शब्दः । श्रोत्रग्रहणे ह्यर्थे शब्दशब्दः प्रसिद्धः । वर्णा एव च श्रोत्रग्रहणाः । यतोऽर्थप्रतीतिः स शब्द इति तूच्यमाने धूमादिरपि शब्दः स्यात् । अगृहीतसम्बन्धश्च शब्दः शब्दत्वं जह्यात्, अर्थप्रतिपत्तेरकरणात् ॥

## केयं अभिधानक्रिया नाम

ननु ! प्रतीतेः संविदात्मकत्वात् नाभिधानक्रिया नाम काचिदपूर्वा संविदन्या विद्यते । तत्करणस्य चोपदेशतायामतिप्रसङ्ग इत्युक्तम्—सत्यम्—संविदात्मैव सर्वत्र प्रतीतिः । सा चक्षुरादिकरणिका प्रत्यक्षफलम्, लिङ्गकरणिकाऽनुमानफलम्, श्रोत्रग्राह्यकरणिका शब्दफलम् । न हि—दृश्यते, अनुमीयते, अभिधीयत इति पर्यायशब्दाः । तत्प्रतीतिविशेषजनने च शब्दस्योपदेशत्वमुच्यते । आकाशानुमानविवक्षादौ तु तस्य लिङ्गत्वमेवेत्यलं प्रसङ्गेन ॥

## आप्तस्वरूपम्

आप्तो भाष्यकृता व्याख्यातः—आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषाप्रयुक्त उपदेष्टा च इति ॥ शब्दस्य उपदेशरूपत्वप्रसङ्गः । शब्दाश्रयत्वेन आकाशानुमाने, तत्र करणस्य शब्दस्य उपदेशरूपत्वप्रसङ्गः ॥ § 2967

---

१२ ] विषयविशेषः— nyāma-wit_kha
१९--२० ] श्रोत्रग्राह्यकरणिका— nyāma-wit_kha
२१ ] शब्दः— nyāma-wit_kha

श्रोत्रग्रहणे—श्रोत्रग्राह्य इति यावत् । शब्दशब्दः—शब्द इति शब्दः ॥
§ 2968

लिङ्गत्वमेवेति । शब्दकरणकप्रतीतित्वेऽपि तस्य, न हि अभिधीयते इति तत्र व्यवहारः ॥ § 2969

ननु साक्षात्कृतधर्मा इति पदेन धर्मोपदेष्टुरेव आप्तत्वं भाति । एवं सति लौकिकं वाक्यं सर्वमप्रमाणमापतति । एवं अनुमानादिना निर्णीतार्थवक्तरि

I.400/KSV

धर्म इत्युपदेष्टव्यः कश्चिदर्थो विवक्षितः ।
साक्षात्करणमेतस्य यथार्थमुपलम्भनम् ॥ १ ॥§ 2972

न तु प्रत्यक्षेणैव ग्रहणमिति नियमः, अनुमानादिनिश्चितार्थोपदेशिनोऽप्याप्तत्वानपायात् ॥

चिख्यापयिषया युक्त इत्युक्ता वीतरागता ।
उपदेष्टेत्यनेनोक्तं प्रतिपादनकौशलम् ॥ २ ॥§ 2974

वीतरागोऽपि मूकादिरुपदेष्टुमशक्तः किं कुर्यात् ? वक्तुं शक्तोऽपि साक्षात्कृतधर्माऽप्यवीतरागो न वक्ति, तूष्णीमास्त इति ॥

तस्य च प्रतिपाद्येऽर्थे वीतरागत्वमिष्यते ।
सर्वथा वीतरागस्तु पुरुषः कुत्र लभ्यते ॥ ३ ॥§ 2976

ऋष्यार्यम्लेच्छसामान्यं वक्तव्यं चाप्तलक्षणम् ।
एवं हि लोकेऽप्याप्तोक्त्या व्यवहारो न नङ्क्ष्यति ॥ ४ ॥§ 2978

**दोषक्षयः आप्तत्वं इति पक्षविमर्शः**

येऽप्याप्तिं दोषक्षयमाचक्षते—तैरपि दोषक्षयः प्रतिपाद्यार्थेष्वेव वर्णनीयः; अन्यथा लोके दृश्यमानस्याप्तोक्तिनिबन्धनस्य व्यवहारस्य निह्नवः स्यात् ॥ आप्तत्वं न स्यात् इति शंकायामाह—धर्म इति । धर्मपदं उपदेष्टव्यपदार्थसामान्योपलक्षकम् । एवं साक्षात्कारपदं सुदृढप्रमाणसामान्योपलक्षकमिति भावः । वाचस्पतिस्तु धर्माः—पदार्थाः इत्येव व्याख्यातवान् । वीतरागतेति इच्छायामुपाध्यन्तरानुक्तेः । अवीतरागः—चिख्यापयिषाशून्यः ॥
§ 2979

इतीति । एतदुभयमपि आप्तत्वप्रयोजकम् । प्रतिपाद्येऽर्थ इति । प्रतिपाद्यमानेनार्थेन स्वानिष्टादिकं ज्ञात्वा, यद्यन्यथा वदेत्, स कथं आप्तः । अतः प्रतिपाद्यविषये निर्मत्सरत्वं विवक्षितम् । न तु सागसामान्याभावः, तादृशस्य शब्दप्रयोगस्याप्यसंभवात् । अन्ततः लोकानुग्रहेच्छा वा अस्त्येवेति भावः । वस्तुतस्तु—इच्छा अन्या, अन्यश्च रागः । तत्र राग एव कालुष्यापादक इति पूर्णवीतरागाणामपि इच्छया उपदेपसंभव इत्यन्यत्र

विस्तरः ॥ § 2980

प्रतिपाद्येष्वर्थेषु प्रतिपाद्यार्थविषयकपक्षपातादिरूपदोषक्षयः इति भावः ॥ § 2981

I.401/KSV

अथवा वेदप्रामाण्यसिद्ध्यर्थत्वाच्छास्त्रस्य तत्प्रणेतुराप्तस्येश्वरस्य यथाश्रुतमेवेदं लक्षणम्, स साक्षात्कृतधर्मैव, धर्मस्येश्वरप्रत्यक्षगोचरत्वात् ॥ § 2982

## कृपयैव भगवता वेदानामुपदेशः

चिख्यापयिषाप्रयुक्त इति । कारुणिक एव भगवानिति वक्ष्यते । उपदेष्टा च, वेदाद्यागमानां तत्प्रणीतत्वस्य ४ आह्निके समर्थयिष्यमाणत्वात् ॥ § 2983

## शब्दस्यानुमानेऽन्तर्भावाशङ्का

आह—आस्तां तावदेतत् ! इदं तु चिन्त्यताम् ! किमर्थमिदं पुनश्शब्दस्य पृथग्लक्षणमुपदिश्यते ? § 2984

शब्दस्य खलु पश्यामो नानुमानाद्विभिन्नताम् ।
अतस्तल्लक्षणाक्षेपात् न वाच्यं लक्षणान्तरम् ॥ ५ ॥§ 2986

परोक्षविषयत्वं हि तुल्यं तावद्द्वयोरपि ।
सामान्यविषयत्वं च सम्बन्धापेक्षणाद्द्वयोः ॥ ६ ॥§ 2988

अगृहीतेऽपि सम्बन्धे नैकस्यापि प्रवर्तनम् ।
सम्बन्धश्च विशेषाणामानन्त्याददतिदुर्गमः ॥ ७ ॥§ 2990

अथवेत्यादि । ग्रन्थारम्भ एव न्यायशास्त्रस्य परमं प्रयोजनं वेदप्राप्राण्यसंरक्षणमेवेत्युक्तत्वात्, इममर्थमविस्मरन् भाष्यकारः प्रकृतानुगुणतयाऽऽप्तं लिलक्षयिषुः धर्म पदं प्रयुक्तवानितीयं चर्चा वृथैवेति भावः ॥ § 2991

प्रमाणसमुच्चय वार्तिकादौ दिङ्नागधर्मकीर्त्याद्युक्तं संकलय्यानुवदति—आहेति । तल्लक्षणाक्षेपात्—अनुमानलक्षणेनैव आक्षेपात्—स्वतः प्राप्तेः । परोक्षेति । एकसम्बन्धिज्ञानविधयैव हि अनुमानस्य प्रवृत्तिः । शाब्देऽपि अयं क्रम एव सिद्धान्ते । वाच्यवाचकभावाख्यवृत्तेः सम्बन्धरूपता सम्मतैव । सामान्येति । व्याप्तिः शक्तिग्रहश्चेत्युभयं सामान्यद्वारैवेति हि सिद्धान्तः । ननु अविनाभावरूपसम्बन्धः व्याप्तिः, वाच्यवाचकभावलक्षणश्च सम्बन्धः शक्तिः । एवं विलक्षणसम्बन्धमूलयोः कथमैक्यमिति शंकायामाह— सम्बन्धश्चेति ।

४ ] मुपवर्ण्यते— nyāma-wit_kha

I.402/KSV सम्बन्धश्च सर्वत्र नैकरूपो भवतुमर्हति । अन्ततः

यथा प्रत्यक्षतो धूमं दृष्ट्वाऽग्निरनुमीयते ।
तथैव शब्दमाकर्ण्य तदर्थोऽप्यवगम्यते ॥ ८ ॥§ 2994

अन्वयव्यतिरेकौ च भवतोऽत्रापि लिङ्गवत् ।
यो यत्र दृश्यते शब्दः स तस्यार्थस्य वाचकः ॥ ९ ॥§ 2996

पक्षधर्मत्वमप्यस्ति शब्द एव यतोऽर्थवान् ।
प्रकल्पयिष्यते पक्षो धूमो दहनवानिव ॥ १० ॥§ 2998

तत्र धूमत्वसामान्यं यथा वहति हेतुताम् ।
गोत्वादिशब्दसामान्यंतद्वदत्रापिवक्ष्यति ॥ ११ ॥§ 3000

एवं विषयसामग्रीसाम्यादेकत्वनिश्चये ।
न विलक्षणतामात्रं किञ्चिदन्यत्वकारणम् ॥ १२ ॥§ 3002

पूर्ववर्णक्रमोद्भूतसंस्कारसहकारिता ।
पुरुषापेक्षवृत्तित्वं विवक्षानुसृतिक्रमः ॥ १३ ॥§ 3004

इत्यादिना विशेषेण न प्रमाणान्तरं भवेत् ।
कार्यकारणधर्मादिविशेषोऽत्रापि नास्ति किम् ? ॥ १४ ॥§ 3006

यथेष्टविनियोज्यत्वमपि नान्यत्वकारणम् ।
हस्तसंज्ञादिलिङ्गेऽपि तथाभावस्य दर्शनात् ॥ १५ ॥§ 3008

अन्वयव्यतिरेकादिभेदात् व्याप्तेरपि यथा भेदः, तथाऽयमप्येकः सम्बन्धविशेषोऽस्तु । प्रत्यायनक्रमस्तु तुल्य एव । अयमेवार्थः अनन्तरश्लोकैः उपपाद्यते । गोत्वादीति । गकारोत्तरत्वादिरूपं सामान्यं निखिलगोशब्देषुअस्त्येव ॥ § 3009

विलक्षणता—अनुमिनोमि, शाब्दयामि इत्याद्यनुभवरूपं वैलक्षण्यम् । तथा सति हि हस्तचेष्टादीनां अर्थसूचकानामपि प्रमाणान्तरत्वप्रसङ्गः । शब्द । प्रमाणवैलक्षण्यमेवाह—पूर्वत्यादि । एवं सालक्षण्यमप्याह—कार्येत्यादि । यथेष्टेत्यादि । धूमात् वह्न्यनुमानादिकं न पुरुषतन्त्रं, शब्दस्तु पुरुषतन्त्रः । स्वायत्ते शब्दप्रयोगे इत्यादिर्हि न्यायः । तथाभावस्य—स्वायत्तत्वस्य ननु अनुमाने महानसादिदृष्टान्तापेक्षा नियता, न तथा शाब्दबोधे—इति शङ्कायां

३--४ ] तत्र धूमत्वसामान्यं— nyāma-wit_kha

४ ] वक्ष्यते— nyāma-wit_kha

असकृदभ्यस्तविषये अनुमानेऽपि न दृष्टान्तापेक्षा नियता । अनभ्यस्तेतु सा I.403/KSV

दृष्टान्तनिरपेक्षत्वमभ्यस्ते विषये समम् ।
अनभ्यस्ते तु सम्बन्धस्मृतिसापेक्षता द्वयोः ॥ १६ ॥§ 3012

अनेकप्रतिभोत्पत्तिहेतुत्वमपि विद्यते ।
अस्पष्टलिङ्गे कस्मिंश्चिदश्व इत्यादिशब्दवत् ॥ १७ ॥§ 3014

स्फुटार्थानवसायाश्च प्रमाणाभासतो यथा ।
लिङ्गे तथैव शब्देऽपि नानार्थभ्रमकारिणि ॥ १८ ॥§ 3016

अपि च प्रतिभामात्रे शब्दाज्ञातेऽपि कुत्रचित् ।
आप्तवादत्वलिङ्गेन जन्यते निश्चिता मतिः ॥ १९ ॥§ 3018

## शब्दस्यानुमानरूपता समानतन्त्रानुमता

अत एव हि मन्यन्ते शब्दस्यापि विपश्चितः ।
आप्तवादाविसंवादसामान्यादनुमानताम् ॥ २० ॥§ 3020

समानैवेत्याह—दृष्टान्तेति । ननु एक एव अश्वादिशब्दः, श्रोतृप्रतिभानुगुणं, मृगविशेष-श्वोऽभवित्राद्यर्थान् बहून् प्रत्याययति, न तथा धूमः नानाऽर्थान् प्रत्याययति, किन्तु वह्निमेकं । एवं स्फुटार्थत्वास्फुटार्थत्वादिभेदः शब्दे दृश्यते, न धूमादौ । अतः अस्ति महदन्तरं इति शंकायामाह—अनेकेत्यादि । अस्पष्टलिङ्ग इति । धूमधूलीपटलसाधारणाकारज्ञानात्, एकस्य वह्न्यनुमितिः, अपरस्य सेनाद्यनुमितिरिति दृश्यत एव अनुमितावपि प्रतिपत्तिभेदः । इदं च वैभवेन, स्पष्टलिङ्गकेऽपि विवक्षानुगुणं प्रतिपत्तिभेदः दृश्यत एव । यथा धूमात् वह्न्यनुमितिः, तथैव कदाचित् तृणादेः, मनुष्यसद्भावस्य वाऽनुमानं यथाऽपेक्षं भवत्येव । एवं स्पष्टास्पष्टप्रतीत्यादिकमपि यथाऽनुभवं तुल्यमेव । अनुमानापेक्षत्वस्य शब्देऽवर्जनीयतया, ततोऽपि तस्य न स्वतन्त्रप्रमाणतेत्याह— अपिचेति ॥ § 3021

विपश्चितः—कणादप्रशस्तपादादयः । एतेन शाब्दं व्याख्यातम् ९-२-३ इत्यादिसूत्रभाष्य-कन्दल्यादिषु अस्य विस्तरो द्रष्टव्यः । प्रमाणमविसंवादि ज्ञानं इति कथनात्, शब्दस्य प्रामाण्यं यत् अविसंवादरूपं, तत् आप्तत्वमूलमेव वक्तव्यम् । तत्परित्यज्य शब्दो न प्रमाणमेव इति कथं युज्येत ? एवञ्च अनुमानवत् शब्दोऽपि स्वप्रामाण्ये परमुखमेव निरीक्षत इति इदमनुमानमेवेत्यर्थः । यद्यपीयं प्रक्रिया बौद्धानाम्, आप्तवादाविसंबादात् इत्याद्यर्धं च दृश्यते प्रमाणवार्तिके १-२२५-२२८; अथापि विषयतौल्यं

वैशेषिकबौद्धयोरस्मिन् । अथवा विपश्चित इति धर्मकीर्त्यादय एव उच्यन्ते ॥ § 3022

I.404/KSV

## शब्दस्यानुमानान्तर्भावे युक्त्यन्तरम्

किञ्च शब्दो विवक्षायामेव प्रामाण्यमश्नुते ।
न बाह्येः व्यभिचारित्वात् तस्यां चैतस्य लिङ्गता ॥ २१ ॥ § 3024

## शब्दस्यातिरिक्तप्रमाणत्वसाधनम्

तत्राभिधीयते । द्विविधः शब्दः पदात्मा वाक्यात्मा चेति । तत्र वाक्यमनवगतसम्बन्धमेव वाक्यार्थमवगमयितुमलम्; अभिनवविरचितश्लोकश्रवणे सति पदसंस्कृतमतीनां तदर्थावगमदर्शनात् । अतः सम्बधाधिगममूलप्रवृत्तिनाऽनुमानेन तस्य कथं साम्यसंभावना ॥ § 3025

पदस्य तु सम्बन्धाधिगमसापेक्षत्वे सत्यपि सामग्रीभेदात् विषयभेदाच्चानुमानाद्भिन्नत्वम् । विषयस्तावद्भिसदृश एव पदलिङ्गयोः । तद्वन्मात्रं पदस्यार्थ इति च स्थापयिष्यते ५ आह्निके । अनुमानं तु वाक्यार्थविषयम्—अत्राग्निः, अग्निमान् पर्वत इति ततः प्रतिपत्तेः । उक्तं च पु. ३११ तत्र धर्मविशिष्टो धर्मी साध्य इति ॥ § 3026

किञ्चेत्यादि । एतदर्थबोधेच्छया अयं शब्दः प्रयुक्तः इति खलु जानाति लोकः शब्दश्रवणसमनन्तरम् । अनेन शब्दस्य वक्तृगतेच्छाविशेषानुमापकत्वं स्पष्टम् । अतः तादृशेच्छायां शब्दः लिङ्गम् । न तु बाह्ये— घटादौ । अतद्बोधेच्छया उच्चरितेन शब्देन तद्बोधस्यापि जननात् । अतः इच्छानुमानमन्तरा शब्दो न बोधमितुमलम् । इच्छायां चानुमितायां तद्विषयतयाऽर्थप्रतीतिः । अतः शब्दः नार्थांशे प्रमाणम् । इच्छाया आन्तरत्वात् बाह्ये इति पदम् ॥ § 3027

अनवगतसम्बन्धमेवेति, वाक्ये शक्त्यनङ्गीकारात् । तस्य—वाक्यस्य ॥ § 3028

तद्वन्मात्रं—जातिविशिष्टव्यक्तिमात्रम् । मात्रचा परस्परान्वयव्युदासः । स तु संसर्गमर्यादालभ्य इति वक्ष्यते । एवञ्च वाक्यात् अर्थप्रतीतौ तावति शक्तेरभावात् सम्बन्धाभावान्नानुमानप्रसरः । पदेन तु व्यक्तिमात्रं बोध्यते, नान्वयादिः । अतस्तत्रापि पदस्य वाक्यार्थस्य च न कश्चन सम्बन्ध इति नानुमानप्रसर इत्यर्थः ॥ § 3029

I.405/KSV

३ ] अत्रः— nyāma-wit__ka
५ ] गमन— nyāma-wit__kha

## पदानामन्वयबोधकत्वविचारः

ननु पदान्यपि वाक्यार्थवृत्तीनि सन्ति—गोमान्, औपगवः, कुम्भकार इति—सत्यम्—किन्तु तेष्वपि साकाङ्क्षताऽस्त्येव; पदान्तरमन्तरेण निराकाङ्क्षप्रत्ययानुत्पादात् । गोमान् कः ? इत्याकाङ्क्षाया अनिवृत्तेः ॥ § 3030

अपि च पर्वतादिविशेष्यप्रतिपत्तिपूर्विका पावकादिविशेषणावगतिर्लिङ्गादुदेति । पदात्तु विशेषणावगतिपूर्विका विशेष्यावगतिरिति विषयभेदः ॥ § 3031

## शब्दः हेतुरेव, न पक्षः

ननु ! उक्तं—यथाऽनुमाने धर्मविशिष्टो धर्मी साध्यः, एवमिहार्थविशिष्टः शब्दः साध्यो भवतु—मैवम्—शब्दस्य हेतुत्वात् । न च हेतुरेव पक्षो भवितुमर्हतीति ॥ § 3032

## शब्दस्य हेतुत्वेऽपि अनुमानासंभवः

ननु ! यथाऽग्निमानयं धूमः, धूमत्वात् महानसधूमवदित्युक्तं— § 3033

पदानीति । गोमान् इति पदेन हि गोस्वामिरूपः गोविशिष्टपुरुषरूपः विशिष्टोऽर्थः प्रतीयते । तत्र गोपदार्थस्य पुरुषस्य च स्वत्वस्वामित्वादिकमपि तेनैव पदेन प्रत्याय्यम् । अतः पदमपि अन्वितमेवार्थं वाक्यार्थरूपं बोधयत्येव । ततश्च तद्वन्मात्रं पदस्यार्थं, अनुमानं तु वाक्यार्थविषकं इति गतमेवेत्याशयः । इदं च सुप्तिङ्(?)ं पदं इति पदलक्षणामिप्रायेण । शक्तं पदं इति सिद्धान्ते तु गोमान् इति विशिष्टे नैका शक्तिः, अतश्च बोधकत्वमपि न विशिष्टस्येति नायमाक्षेपः ॥ § 3034

अनिवृत्तेरिति । ततश्च न तावन्मात्रं शब्दप्रमाणं, विचारस्तु तदधिकृत्यैव । गोमान् इत्यत्र प्रकृतिप्रत्ययभावात् कथञ्चित् विशिष्टबोधजननेऽपि, अनुमितेः पक्षसाध्यादिविशिष्टप्रतीतिरूपत्वात्, तादृशः बोधः न एकेन पदेन संभवति, वाक्ये तु शक्तिर्नास्तीति पूर्वोक्तं युक्तमेवेति भावः ॥ § 3035

विशेषणेति । पार्ष्णिक एव खलु विशिष्टबोधः ॥ § 3036

अग्निमानिति । व्याप्तेः सम्बन्धरूपत्वात् एवं व्यवहारः पूर्वं पु-३११ मप्युपपादितः । नैय्यायिकास्तु धूममेव धर्मीकृत्य तस्यैवा(?)विशिष्टता I.406/KSV

सा देशस्याग्नियुक्तस्य, धूमस्यान्यैश्चकल्पिताश्लो-वा-अनु-४८ इति । एवं गोशब्द एवार्थवत्त्वेन साध्यताम् ! गोशब्दत्वादित्यादि सामान्यं च हेतूक्रियताम् ! इति—एतदपि दुर्घटम्—शब्दस्य धर्मिणः किं अर्थविशिष्टत्वं वा

२७--१ ] साकाङ्क्षंता— nyāma-wit_kha

७ ] मर्हति— nyāma-wit_kha

२४ ] गोत्वादि— nyāma-wit_ka

साध्यते ? प्रत्यायनशक्तिविशिष्टत्वं वा ? अर्थप्रतीतिविशिष्टत्वं वा ?

न तावदर्थविशिष्टत्वं साध्यम्; शैलज्वलनयोरिव शब्दार्थयोः धर्मधर्मिभावाभावात् ॥

अथार्थविषयत्वाच्छब्दस्यार्थविशिष्टतेत्युच्यते; तदप्ययुक्तम्; तत्प्रतीतिजननमन्तरेण तद्विषयत्वानुपपत्तेः । प्रतीतौ तु सिद्धायां किं तद्विषयत्वद्वारकेण तद्धर्मत्वेन ? यदि तु तद्विषयत्वमूला तद्धर्मत्वपूर्विकाऽर्थप्रतीतिः, अर्थप्रतीतिमूलं तद्विषयत्वम्, तदितरेतराश्रयम् । तस्मान्नार्थविशिष्टः शब्दः साध्यः ॥

नाप्यर्थप्रत्यायनशक्तिविशिष्टः; तदर्थितया शब्दप्रयोगाभावात् ॥

न शक्तिसिद्धये शब्दः कथ्यते श्रूयतेऽपि वा ।
अर्थगत्यर्थमेवामुं शृण्वन्ति च वदन्ति च ॥ २२ ॥§ 3039

नाप्यर्थप्रतीतिविशिष्टः शब्दः पक्षतामनुभवितुमर्हति; सिद्धासिद्धिविकल्पानुपपत्तेः ॥

असिद्धयाऽपि तद्वत्त्वं शब्दस्यार्थधिया कथम् ?
सिद्धायां तत्प्रतीतौ वा किमन्यदनुमीयते ॥ २३ ॥§ 3041

मनुमेयामाहुरित्याह—धूमस्येति इति न्यायरत्नाकरः । अन्तरेणेति न हि शब्दः बुध्यादिवत् सविषयः पदार्थः । सिद्धायामिति । तदेव खल्वद्य विचार्यते । अतः तथा विवक्षा न संभवति । विवक्षायां च अन्योन्याश्रयो जागरूकः । अर्थस्य शब्दधर्मत्वसिद्धौ, बोधसंभवः । बोधे जात एव तन्निबन्धनतद्धर्मत्वसिद्धिः इति । तदर्थितया—तदपेक्षया—तदिच्छया ॥ § 3042

विशिष्ट इति । वैशिष्ट्यं चात्र न जन्यजनकभावरूपं, किन्तु पूर्वोत्तरकालसम्बन्धित्वमात्रम् । तेन अनुपदोक्तात् इतरेतराश्रयग्रस्तपक्षात् विशेषः ॥ § 3043

I.407/KSV

ज्वलनादावपि तुल्यो विकल्प इति चेत्; न हि तत्राग्निर्धूमेन जन्यते, अपि तु गम्यते । इयं त्वर्थप्रतीतिर्जन्यते शब्देनेत्यस्यामेव सिद्धासिद्धत्वविकल्पावसरः । तस्मात् त्रिधाऽपि न शब्दस्य पक्षत्वम् ॥ § 3044

## शब्दस्य पक्षत्वमसम्भवि च

अपि च गोशब्दे धर्मिणि गत्वादिसामान्यात्मकस्य हेतोर्ग्रहणं, ततो व्याप्तिस्मरणम्, ततः परामर्शः, ततोऽर्थप्रतिपत्तिरिति कालद्राघीयस्त्वात् धर्मी तिरोहितो भवेत् । न पर्वतवदवस्थितिः तस्य । अपि तूच्चरितप्रध्वंसित्वं शब्द-

२१ ] यथार्थ— nyāma-wit_ka    nyāma-wit_ka
२३ ] तस्याः— nyāma-wit_ga
३५४.२३--३५५.२४ ] त्वाच्छब्दस्य—

स्य । न च शब्दमर्थवत्त्वेन लोकः प्रतिपद्यते, किन्तु शब्दात् पृथगेवार्थमिति न सर्वथा शब्दः पक्षः । अतो धर्मविशिष्टस्य धर्मिणः साध्यस्येद्वासंभवाच्छब्दलिङ्गयोर्महान् विषयभेदः ॥ § 3045

## शब्दानुमानयोः सामग्रीभेदादपि वैलक्षण्यम्

सामग्रीभेदः खल्वपि—पक्षधर्मान्वयादिरूपसापेक्षमनुमानं व्याख्यातं, शब्दे तु न तानि सन्ति रूपाणि । तथा च शब्दस्य § 3046

ज्वलनादाविति । अग्निविशिष्टधूमस्य पक्षत्वात् साध्यस्य पक्षेऽन्तर्भावः समान एव । न हीति । अग्निवैशिष्ट्यं च धूमे व्याप्यव्यापकभावतः, न तु जन्यजनकभावतः । तादृशं च लिङ्गं अग्नेर्गमकमिति न अन्योन्याश्रयस्य, सिध्यसिद्धिविकल्पस्य वा प्रसक्तिः । प्रकृते तु शब्दाधीनबोधस्य शब्दविशेषणत्वात् दोष एव । अत एव वाच्यवाचकभावसम्बन्धात् अर्थविशिष्टः शब्दः अर्थस्य गमको भवत्विति शंकाऽपि निरस्ता । वाच्यवाचकभावस्यैव गमकत्वरूपत्वात्, तस्यैव विचार्यमाणत्वात् ॥ § 3047

गत्वादि—अत्र आदिना तदुत्तरओत्वआदिग्रहणम् । धर्मी—शब्दः । ननु तर्हि शब्दस्य पक्षत्वं कुत्रापि न स्यात्, ततश्च शब्दानित्यत्वाद्यनुमानानामपि जलाञ्जलिरित्यतः अनुभवविरोधमाह—न चेति । यद्यपि लोकेऽपि अर्थवानयं शब्दः, निरर्थकोऽयं शब्द इत्यादिरस्ति व्यवहारः, अथापीदमभ्युजयदूषणं भवतु, मुख्यदूषणं तु आदावेवोक्तम् ॥ § 3048
I.408/KSV

पक्षत्वप्रतिक्षेपान्न तद्धर्मतया गत्वादिसामान्यस्य लिङ्गता । न चार्थस्य धर्मित्वम्; सिद्ध्यसिद्धिविकल्पानुपपत्तेः । न च तद्धर्मत्वं शब्दस्य शक्यते वक्तुम्; तत्र वृत्त्यभावात् । प्रतीतिजनकत्वेन तद्धर्मतायामुच्यमानायां पूर्ववदितरेतराश्रयः; पक्षधर्मादिवलेन प्रतीतिः, प्रतीतौ च सत्यां पक्षधर्मादिरूपलाभः ॥ § 3049

## शब्दः न सर्वथाऽर्थधर्मः

अपि च यद्यर्थधर्मतया शब्दस्य पक्षधर्मत्वं भवेत्, तदाऽनवगतधूमाग्निसम्बन्धोऽपि यथा धूमस्य पर्वतधर्मतां गृह्णात्येव, तथाऽनवगतशब्दार्थसम्बन्धोऽपि अर्थधर्मतां शब्दस्य गृह्णीयात्; न च गृह्णातीत्यतो नास्ति पक्षधर्मत्वं शब्दस्येति ॥ § 3050

## अनुमानसामग्रीरूपत्वमपि दुर्वचम्

अन्वयव्यतिरेकावपि तस्य दुरुपपादौ; देशे काले च शब्दार्थयोरनुगमाभावात् । न हि यत्र देशे शब्दः तत्रार्थः । यथोक्तं श्रोत्रियैः—मुखे हि शब्दमुपलभामहे, भूमावर्थम् इति । वयं तु कर्णाकाशे श्रोत्रमुपलभामहे—इत्यास्तामेतत् ॥ § 3051

नापि यत्र काले शब्दः तत्रार्थः; इदानीं युधिष्ठिरार्थाभावेऽपि युधिष्ठिरशब्दसद्भावात् । अर्थशब्दार्थयोः अन्वयाभावेऽपि तद्बुद्ध्योरन्वयो ग्रहीष्यते इत्युच्यते । तर्हि वक्तव्यं—किं अर्थबुद्धावुत्पन्नायामन्वयो गृह्यते ? अनुत्पन्नायां वा ? अनुत्पन्नायां तावत् § 3052

ननु गोपदवाच्यः कः ? इति तात्पर्येण कः गौः? इति प्रश्नः, अयं गौः इत्युत्तरं च सर्वानुभवसिद्धम् । अतः कथञ्चित् शब्दार्थयोः सम्बन्ध उपपादनीयः । तमादायैव अर्थस्य पक्षत्वमुपपादयामः—इति शंकायां आह— अपि चेति । उक्तप्रश्नगतगवादिपदानि वाच्यपर्यन्तं उपचरितानि । अन्यथा व्याप्तिमजानतोऽपि, प्रथमं वा धूमवान् पर्वत इतिवत् वाच्यवाचकनामजानतोऽपि अयं गौः इति प्रत्ययः स्यात् । अतः शब्दः नार्थधर्मः ॥ § 3053

चकारः वाऽर्थे । वयं त्वित्यादि । भूमावर्थम् इति तु स्थितमेव ॥ § 3054

I.409/KSV

स्वरूपासत्त्वात् कुतोऽन्वयग्रहणम् ? उत्पन्नायां त्वर्थबुद्धौ किमन्वयग्रहणेनेति नैष्फल्यम् । तत्पूर्वकत्वे तु पूर्ववदितरेतराश्रयम् । एतेन व्यतिरेकग्रहणमपि व्याख्यातम् ॥ § 3055

## शब्दार्थयोरन्वयव्यतिरेकसमर्थनं, तद्दूषणं च

ननु ! आवापोद्वापद्वारेण शब्दार्थसम्बन्धे निश्चीयमाने उपयुज्येते एवान्वयव्यतिरेकौ । यथोक्तम् श्लो. वा. १-१-७-१६०—

यत्र योऽन्वेति यं शब्दमर्थस्तस्य भवेदसौ इति—§ 3057

सत्यमेतत्—किन्तु समयबलेन सिद्धायामर्थबुद्धौ समयनियमार्थाबन्वयव्यतिरेकौ शब्दे; नान्वयव्यतिरेककृता च धूमादेरिवाग्नेः ततोऽर्थबुद्धिः ॥ § 3058

अपि च— § 3059

धूमादिभ्यः प्रतीतिश्च नैवावगतिपूर्विका ।

---

१--२ ] तद्बुद्ध्योः— nyāma-wit__kha

२१ ] काकृता— nyāma-wit__ka

इहावगतिपूर्वैव शब्दादुत्पद्यते मतिः ॥ २४ ॥§ 3061

आवापेत्यादि । आवापोद्वापाभ्यां शक्तिग्रह इति सिद्धान्तेऽपि सम्मतम् । शक्तिग्रहो नाम अयं शब्दः एतदर्थवाचीत्येवंरूपः वाच्यवाचकभावग्रह एव । तथा च तत्र शब्दार्थयोरन्वयव्यतिरेकौ दृष्टावेवेत्यर्थः । समयबलेनेति । गामानय इतिवाक्यश्रवणसमनन्तरं गवानयने प्रवृतिं पश्यतः सामान्यतः इदं गवानयनं एतच्छब्दमूलं इति शक्तिग्रहे सिद्धे कस्य पदस्य गौः अर्थः ? कस्य आनयनम् इत्यनवगमे,—घटं आनय अश्वं बधान इत्याद्यावापोद्वापाभ्यां सामान्यतो गृहीतां शक्तिं विशिष्य जानाति बालः । नात्र शक्तिग्रहः आवापोद्वापात्, किन्तु तेन नियममात्रमिति नानुमानरूपमिति भावः ॥ § 3062

ननु सामान्यशक्तिरपि अन्वयव्यतिरेकाधीनकार्यकारणभावग्रहमूलैव वक्तव्येति चेत्—तर्हि अनुमानात्सामान्यशक्तिग्रहः, ततो नियमज्ञानं, ततश्शक्तिनिश्चयः, ततः शाब्दबोधः कालान्तरेऽपि—इति अनुमानपूर्वकोऽयं शाब्दबोधः नानुमानं भवितुमर्हतीत्याह—अपि चेति ॥ § 3063

I.410/KSV

स्थविरव्यवहारे हि बालः शब्दात् कुतश्चन ।
दृष्ट्वाऽर्थमवगच्छन् तं स्वयमप्यवगच्छति ॥ २५ ॥§ 3065

यत्राप्येवं समयः क्रियते, एतस्माच्छब्दादयमर्थस्त्वया प्रतिपत्तव्य इति—तत्रापि प्रतीतिरेव कारणत्वेन निर्दिष्टा द्रष्टव्या । तस्मादन्यो लिङ्गलिङ्गिनोरविनाभावो नाम सम्बन्धः, अन्यश्च शब्दार्थयोः समयापरनामा वाच्यवाचकभावः सम्बन्धः प्रतीत्यङ्गम् । एवंविधविषयभेदात् सामग्रीभेदाच्च प्रत्यक्षवदनुमानादन्यः शब्द इति सिद्धम् ॥ § 3066

## शब्दानुमानयोर्नावैलक्षण्यम्

यत्तु पूर्ववर्णक्रमापेक्षणादिवैलक्षण्यमाशङ्क्य दूषितम् पु. ४०२ —कस्तत्र फल्गुप्राये निर्बन्धः ॥ § 3067

ननु ज्ञायमानो धूम एव करणमित्युक्तम् ? इति शङ्कायां स्वाशयं विवृणोतिस्थविरेत्यादि । कुतश्चन शब्दात्—इत्यन्वयः । व्यवहाराच्छक्तिग्रहस्यानुमानिकत्वं सर्वसम्मतमेव । तथा च धूमाद्वह्न्यनुमानस्थले महानसादौ प्रत्यक्षादेव धूमवह्न्योः अविनाभावरूपसम्बन्धनिर्णयः प्रकृते तु वृद्धव्यव-

---

१३ ] तत्रा— nyāma-wit_kha
१४--१५ ] अविनाभावो नाम सम्बन्धः अन्यश्च शब्दार्थयोः समयापरनामा वाच्यवाचकभावः सम्बन्धः कारणत्वेन निदिष्टा द्रष्टव्या तस्मादन्यो लिङ्गलिङ्गिनोरविनाभावात्— nyāma-wit_kha
१६ ] स वाच्यवाचकभावः सम्बन्धप्रतीत्यङ्गम्— nyāma-wit_ka

हारकालेऽनुमानात् वाच्यवाचकभावरूपसम्बन्धनिर्णयः । ततश्चानुमानाधीन-प्रवृत्तिकः शब्दः कथं अनुमानं स्यात् ? ननु अनुमानपूर्वकमप्यनुमानं भवितुमर्हति, धूमात् वह्न्यनुमाने, तेन तत्र पुरुषानुमानात् इति चेत्; तथापि अनुमानात् वाच्यवाचकभावस्यैवावगमः । वाच्यवाचकभावश्च नाविनाभावरूपः । शब्दार्थयोरविनाभावः निराक्रियत एवेति । किञ्च धूमवह्न्योः सम्बन्धः न सङ्केतमूलकः, किन्तु स्वाभाविकः ॥ § 3068

प्रतीतिः—तादृशप्रतिपत्तव्यत्वविषयकप्रतीतिः । अन्यः—विलक्षणः । प्रत्यक्षवदिति । यत्किञ्चित्सम्बन्धमूलकत्वमात्रात् क्रोडीकारे इन्द्रियार्थसम्बन्धमूलकं प्रत्यक्षमपि अनुमानं स्यादित्याशयः ॥ § 3069

इत्यादिना विशेषेणपु. ४०२ इति पूर्वपक्षिणैव वैलक्षण्यकथनात् नास्माभिः वक्तव्यमवशिष्यत इत्यभिप्रायेणाह—फल्गुप्राय इति ॥ § 3070

I.411/KSV

## शब्दानुमानयोर्विषयभेदादपि भेदः

यत्पुनरभिहितम् पु. ४०३ श्लो. वा.—१-१-५. शब्द. २३— § 3071

आप्तवादाविसंवादसामान्यादनुमानता § 3072

इति—तदतीव सुभाषितम् ! विषयभेदात् । आप्तवादत्वहेतुना हि शब्दार्थबुद्धेः प्रामाण्यं साध्यते; न तु सैव जन्यते । यदाह श्लो. वा. १-१-७-२४४, २४६ § 3073

अन्यदेव हि सत्यत्वमाप्तवादत्वहेतुकम् ।
वाक्यार्थश्चान्य एवेह ज्ञातः पूर्वतरं च सः ॥§ 3075

ततश्चेदाप्तवादेन सत्यत्वमनुमीयते ।
वाक्यार्थप्रत्ययस्यात्र कथं स्यादनुमानता ॥§ 3077

जन्म तुल्यं हि बुद्धीनामाप्तानाप्तगिरां श्रुतौ ।
जन्माधिकोपयोगी च नानुमायां त्रिलक्षणः इति ॥§ 3079

न च प्रामाण्यनिश्चयाद्विना प्रतिभामात्रं तदिति वक्तव्यम्; शब्दार्थसंप्रत्ययस्यानुभवसिद्धत्वात् ॥ § 3080

साध्यते—निश्चीयते । सैव—अर्थविषकबुद्धिरेव । उक्तमेव उपपादयति कुमारिलवाक्यैः—यदाहेति । इदं वाक्यं सत्यम् ? उत न ? इति संशये

१३ ] श्चान्यत्— nyāma-wit_ka

आप्तोक्तत्वनिश्चये सत्यत्वनिश्चयः । तद्वाक्यात् प्रथमं अर्थप्रतीतिर्जातैव । अतः आप्तोक्तत्वं प्रामाण्यनिश्चयहेतुः, न तु शाब्दवोधहेतुः । आप्तानां अनाप्तानां वा वाक्ये श्रुते शाब्दबोधः अविशेषेण जायत एव । अतः आप्तत्वसंवादात् न बोधजननम् । अनुमायां च त्रिलक्षणो हेतुः जन्माधिकोपयोगी न इत्यन्वयः । तथा च बोधजननं न त्वदुक्तहेतुजन्यमिति शब्दो नानुमानम् । पूर्वपक्षिणः बौद्धस्य दृष्ट्या त्रिलक्षणः इति । तत्—शाब्दानुभवरूपं ज्ञानम् । प्रामाण्यनिश्चयात् पूर्वं जातं ज्ञानं केवलभानमात्रं, न तु वास्तविकमिति वक्तुं न शक्यं, अनुभवविरुद्धत्वात् ॥ § 3081
I.412/KSV

## शब्दः न विवक्षामात्रानुमापकः

एतेन विवक्षाविषयत्वमपि पु. ४०४ प्रत्युक्तम् । न हि विवक्षा नाम शब्दस्य वाच्यो विषयः, किन्त्वर्थ एव तथा ॥ § 3082

विवक्षायां हि शब्दस्य लिङ्गत्वमिह दृश्यते ।
आकाश इव कार्यत्वात् न वाचकतया पुनः ॥ २६ ॥§ 3084

शब्दादुच्चरिताच्च वाच्यविषया तावत्समुत्पद्यते
संवित्तिस्तदनन्तरं तु गमयेत्कामं विवक्षामसौ ।
अर्थोपग्रहवर्जितात्तु नियमात्सिद्धैवमाजीवता
तद्वाच्यार्थविशेषिता त्वविदिते नैषा तदर्थे भवेत् ॥ २७ ॥§ 3088

## शब्दप्रामाण्याक्षेपः

ननु ! सिद्धे प्रमाणत्वे भेदाभेदपरीक्षणम् ।
क्रियते, न तु शब्दस्य प्रामाण्यमवकल्पते ॥ २८ ॥§ 3090

## शब्दानां अर्थासंस्पर्शित्वम्

अर्थप्रतीतिजनकं प्रमाणमिति वर्णितम् ।
विकल्पमात्रमूलत्वात् नार्थं शब्दाः स्पृशन्त्यमी ॥ २९ ॥§ 3092

न वाच्यः विषयः—वाच्यतया न विषय इति भावः । विवक्षायामित्यादि । शब्दस्य कार्यत्वात् समवायिकारणतया यथा शब्दः आकाशानुमाने हेतुर्भ-

१२ ] वर्जिता तु— nyāma-wit_kha

१२ ] जीविता— nyāma-wit_kha

वति, तथा इच्छामन्तरा शब्दप्रयोगासंभवात् तच्छब्दोच्चारणेच्छामनुमापयेत् शब्दः, न त्वर्थम् । शब्दादर्थप्रतीतेरेवाभावे एतदर्थबोधेच्छया उच्चरितः इति कथं वक्तुं शक्यम् । नानार्थकस्थलेऽपि बोधाः प्रथमं जायन्त एव । एषु कः प्रयोक्तुरभिमतः इति संशये परं तात्पर्यापरनामिका इच्छाऽन्वेषणीया प्रकरणादिभिः । अतश्च आप्तोक्तत्ववत् इदमपि न शाब्दबोधहेतुः । शाब्द-बोधजननानन्तरमपेक्षणीयमस्तु कामम् ॥ § 3093

विकल्पेति । नियमेन प्रवृत्तिनिमित्तपूर्विका शब्दप्रवृत्तिः । तेन नाम-जात्यादिकल्पनामूलकत्वमनिवार्यमिति शब्दानां यथार्थविषयत्वं नास्त्येव ॥ § 3094

I.413/KSV

## जात्यादीनां शब्दार्थत्वानुपपत्तिः

अर्थो निरूप्यमाणश्च को वा शब्दस्य शक्यते ?
वक्तुं, न जातिर्न व्यक्तिः न तद्वान्नाम कश्चन ॥ ३० ॥§ 3096

## शब्दार्थयोः संबन्धोऽपि दुर्वचः

सम्बन्धोऽप्यस्य नार्थेन नित्योऽस्ति समयोऽस्थ वा ?
शक्यः, सन्नपि वा बोद्धुमर्थे कथमतीन्द्रिये ? ॥ ३१ ॥§ 3098

## वाक्यानामर्थप्रत्याययकत्वं दुर्वचम्

वाक्यार्थोऽपि न निर्णेतुं पार्यते पारमार्थिकः ।
नियोगभावनाभेदसंसर्गादिस्वभावकः ॥ ३२ ॥§ 3100

तत्प्रतीत्यभ्युपायश्च किं पदार्थः पदानि वा ?
वाक्यं वा व्यतिषक्तार्थं स्फोटो वेति न लक्ष्यते ॥ ३३ ॥§ 3102

सिद्धायामपि तद्बुद्धौ तस्या द्रढिमकारणम् ।
नित्यत्वमाप्तोक्तत्वं वा न सम्यगवतिष्ठते ॥ ३४ ॥§ 3104

न जातिरिति । जातिमात्रस्य शब्दार्थत्वे, व्यक्तिबोधो न स्यात् । व्य-क्तिमात्रस्य तथात्वेऽननुगमात् व्यक्त्यन्तरबोधनं न स्यात् । जातिमान् प-

१४ ] पदार्थाः— nyāma-wit__ka

दार्थस्तु कश्चन नास्त्येव, कृत्स्नैकदेशादिविकल्पदुस्स्थत्वात् ॥ § 3105

समयः—संकेतः शक्त्यपरपर्यायः । स नित्यश्चेत् शब्दस्यापि नित्यत्वप्रसङ्गः । अनित्यश्चेदनवस्थादुस्स्थितिः । अतीन्द्रियेऽर्थे च तादृशसम्बन्धग्रहणं कथम् ? कुत्रापि केनापि अयमस्यार्थः इति प्रदर्शयितुमशक्यत्वात् ॥ § 3106

एवं प्रत्येकं पदानां बोधकत्वासंभवे, विशिष्टवाक्यार्थः नियोगादिरपि न संभवतीत्याह—वाक्यार्थोऽपीति । नियोगः वाक्यस्यार्थ इति प्राचीनमीमांसकाः, भावनेति नवीनाः । परन्तु पदैर्वा, पदवाच्यैरर्थैर्वा, वाक्याद्वा, स्फोटेन वा तादृशार्थः न कस्याप्यनुभवसिद्धः । कथञ्चिद्बोधनेऽपि तादृशवाक्यार्थे प्रामाण्यं कथम् ? नित्यत्वादिकृतं तु दुर्वचमेवेत्यर्थः ॥ § 3107

I.414/KSV

## वेदानां आप्तोक्तत्वकृतं प्रामाण्यमपि दुर्वचम्

पदे नित्येऽपि वैदिक्यो रचनाः कर्तृपूर्विकाः ?
नित्या वा ? कृतकत्वेऽपि कृताः केनेति दुर्गमम् ॥ ३५ ॥§ 3109

कर्ताऽस्ति स च निर्द्वन्द्वः स चैकः स च सर्ववित् ।
स च कारुणिको वेति प्रतिपत्तुं न शक्यते ॥ ३६ ॥§ 3111

## व्याघातादिभिः न वेदाः प्रमाणम्

परस्परविरुद्धाश्च सन्ति भूयांस आगमाः ।
तेषां कस्येश्वरः कर्ता कस्य नेति न मन्महे ॥ ३७ ॥§ 3113

वेदे दोषाश्च विद्यन्ते व्याघातः पुनरुक्तता ।
फलस्यानुपलंभश्च तथा फलविपर्ययः ॥ ३८ ॥§ 3115

कीदृशश्चार्थवादानां विरुद्धार्थाभिधायिनाम् ।
मन्त्राणां नामधेयादिपदानां वा समन्वयः ॥ ३९ ॥§ 3117

## वेदे व्युत्पत्तिरपि दुस्स्थिता

सिद्धकार्योपदेशाच्च वेदे संशेरते जनाः ।
किमस्य कार्ये प्रामाण्यं सिद्धेऽर्थे वोभयत्र वा ? ॥ ४० ॥§ 3119

तेन वेदप्रमाणत्वं विषमे पथि वर्तते ।
जीविकोपायबुद्ध्या वा श्रद्धया वाऽभ्युपेयताम् ॥ ४१ ॥§ 3121

पद इति । पदानां नित्यत्वेऽपि तद्रचनाविशेषरूपाणां वेदवाक्यानां कथं नित्यत्वम् ॥ § 3122

तदप्रामाण्यं अनृतव्याघातपुनरुक्तेभ्यःन्या. सू. २-१-५८ इत्युक्तं संगृह्णाति—परस्परेति । उदिते जुहोति अनुदिते जुहोति इति विरुद्धयोर्मध्ये कस्य ईश्वरः कर्ता ? कस्य न ? अन्यतराप्रामाण्ये तद्दृष्टान्तेनेतराप्रामाण्यं जागर्त्येव । एवं पुत्रेष्टौ कृतायामपि कदाचित्फलं व्यभिचरति इत्यनृतत्वम् । त्रिःप्रथमामन्वाह इत्यादिः पुनरुक्तिः ॥ § 3123

सिद्ध इति । वैदिकेष्वेवास्ति विवादः, किं वेदानां सिद्धपरत्वम् ? उत कार्यपरत्वम् ? इति । एतादृशानवस्थादुस्स्थत्वात् शब्दः न प्रमाणम् । यद्यपि शब्दसामान्याप्रामाण्यसाधन एवोपक्रमः, अथापि वेदप्रामाण्यरक्षण एव शब्दप्रामाण्यसमर्थनस्य परमोद्देश्यतेति ज्ञेयम् ॥ § 3124
I.415/KSV

## वेदप्रामाण्यस्थापनम्

अत्राभिधीयते—सर्व एवैते दोषा यथाक्रमं परिहरिष्यन्त इत्यलभ-समाश्वासेन । सुप्रतिष्ठमेव वेदप्रामाण्यमवगच्छत्वायुष्मान् ॥ § 3125

## शब्दसामान्यस्याप्यर्थाजन्यत्वं स्वभावः

ननु ! अर्थासंस्पर्शित्वमेव तावत्कथं परिह्रियते । न हि बाह्येऽर्थे शब्दाः प्रतीतिमादधति । ते हि दुर्लभवस्तुसंपर्कविकल्पमात्राधीनजन्मानः स्वमहिमानमनुवर्तमानास्तिरस्कृतवाह्यार्थसमन्वयान् विकल्पप्रायान् प्रत्ययानुत्पादयन्तो दृश्यन्ते—अङ्गुल्यग्रे हस्तियूथशतमास्ते इतीतिस्वभाव एव शाब्दानामर्थासंस्पर्शित्वम् ॥ § 3126

## शब्दस्य चक्षुरादिवैलक्षण्यम्

---
१४--१५ ] इत्यलं स—
nyāma-wit__kha

चक्षुरादीनामपि अलीककचकूर्चकादिप्रतीतिकारणत्वमस्ति, न च तेषामर्थासंस्पर्शित्वमिति चेत्; न; तेषांहि तिमिरादिदोषकलुषितवपुषां तथाविधविभ्रमकारणत्वम्, न तु स्वमहिम्नैव । इहापि पुरुषदोषाणामेष महिमा, न शब्दानामिति चेत्, मैवम्; दोषवतोऽपि पुरुषस्य मूकादेरनुच्चारितशब्दस्येदृशविप्लवोत्पादनपाटवाभावात् । असत्यपि च पुरुषहृदयकालुष्ये यथाप्रयुज्यमानान्यङ्गुल्यग्रादिवाक्यानि विप्लवमावहन्त्येवेति शब्दानामेवैष स्वभावः, न वक्तृदोषाणाम् ॥ § 3127

अङ्गुल्यग्रेत्यादि । न ह्यस्मात् वाक्यात् बोध एव न भवतीति वक्तुं शक्यम्, व्युत्पन्नानां तस्यानिवार्यत्वात् । किन्तु जातो बोधः प्रमा वा ? इति विचारः स्यात् । स त्वन्यो विषयः । शब्दास्तु असत्यपि अर्थे बोधमुत्पादयितुमलमिति तु दुरपह्नवम् ॥ § 3128

ननु चक्षुरादिकमपि कदाचिदलीकरजतादौ प्रवर्तत एवेति प्रत्यक्षमपि न प्रमा स्यादित्याशंक्य, शब्द-चक्षुषोर्वैलक्षण्यमाह—चक्षुरादीनामिति । यथा प्रमुज्यमानेति । लीलया, यदृच्छया, प्रमादाद्वेति हेतुः । तथाचान्वय

**बाधकज्ञाने सत्यपि शब्दः प्रवर्तते**

अपि च न चक्षुरादि बाधकज्ञानोदये सति न विरमति; विपरीतवेदनजन्मनः शुक्तिकारजतादिबुद्धिषु विभ्रमस्यापायदर्शनात् । शब्दस्तु शतकृत्वोऽपि बाध्यमानो यथैवोच्चरितः करशाखाशिखरे करेणुशतमास्ते इति तथैव तथाभूतं भूयोऽपि विकल्पमयथार्थमुत्पादयत्येवेति विकल्पाधीनजन्मत्वाच्छब्दानामेवेदं रूपं यत् अर्थासंस्पर्शित्वं नामेति । तदुक्तम्—

विकल्पयोनयः शब्दाः विकल्पाः शब्दयोनयः ।तेषाम-
न्योन्यसम्बन्धे नार्थं शब्दाः स्पृशन्त्यमी इति
॥§ 3130 &

**शब्दानां अर्थासंस्पर्शित्वं न स्वभाव इति सिद्धान्तः**

अत्राभिधीयते—भवेदेतदेवं; यदि न कदाचिदपि यथार्थं शब्दः प्रत्ययमुपजनयेत्, अर्थासंस्पर्शित्वमेवास्य स्वभाव इति गम्येत । भवति तु गुणवत्पुरुषभाषितात् नद्यास्तीरे फलानि सन्ति इति वाक्यात् अतिरस्कृतबाह्यार्थो यथार्थः प्रत्ययः; ततः प्रवृत्तस्य तदर्थप्राप्तेः । न चेयमर्थप्राप्तिरर्थस्पर्शशून्यादपि शब्दविकल्पात् पारंपर्येण मणिप्रभामणिबुद्धिवदवकल्पत इत्युपरिष्टात् वक्ष्यामः ॥

ननु ! गुणवद्वक्तृकादङ्गुल्यादिवाक्यात् दृष्ट एवासमीचीनः प्रत्ययः—मैत्रम्—गुणवतामेवंविधवाक्योच्चारणचपलाभावात् ॥ व्यतिरेकतः शब्दानामयं स्वभावः, अर्थमन्तरापि प्रवृत्तिः इति । शुक्तिरजतादौ अधिष्ठानतया वाऽर्थ-

२२ ] तेषां— nyāma-wit_kha
१२ ] सती— nyāma-wit_ga

संस्पर्शोऽस्तीति अलीककेशादिनः निरधिष्ठानभ्रमविषयत्वेनावगतस्य कथनम् ॥ § 3131

न न विरमति—इत्यन्वयः । अपायः—निवृत्तिः ॥ § 3132

गुणवदिति । गुणाः—प्रमादप्रतारणाद्यभावरूपाः ॥ § 3133

अङ्गुल्यादिवाक्यात्—अङ्गुल्यग्रे हस्तियूथशतमास्ते इत्यादिवाक्यात् । § 3134

I.417/KSV

## अप्रमाणवाक्यानुवादकवाक्यं नाप्रमाणम्

यत्तु आप्तोऽपि कं चिदनुशास्ति—मा भवानभूतार्थं वाक्यं वादीः—अङ्गुलिकोटौ करिघटाशतमास्ते—इति इति, तत्रेतिकरणावच्छिन्नस्य दृष्टान्ततया शब्दपरत्वेनोपादानात्प्रतिषेधैकवाक्यतया यथार्थमेव । अर्थपरत्वे तु निषेधकवाक्यतैव न स्यादिति । तस्मादाप्तवाक्यानामयथार्थत्वाभावान्न स्वतोऽर्थासंस्पार्शिनः शब्दाः । पुरुष दोषानुषङ्गकृत एवायां विप्लवः ॥ § 3135

## वक्तृगुणदोषावेव शब्दस्यार्थसंस्पर्शतदभावयोर्मूलम्

ननु ! आप्तैरेवंविधवाक्याप्रयोगेऽपि सन्दिग्धो व्यतिरेकः— किं शब्दानां तदृशस्वभावाभावादयथार्थप्रत्ययानुत्पादः ? उत वक्तृदोषाभावादिति । नैतदेवम्— § 3136

अनुच्चरितशब्दोऽपि पुरुषो विप्रलंभकः ।
हस्तसंज्ञाद्युपायेन जनयत्येव विप्लवम् ॥ ४२ ॥ § 3138

## चेष्टया शब्दानुमानासंभवः

न च हस्तसंज्ञादिना शब्दानुमानम्, तत्कृतश्च विप्लव इति वक्तव्यम्; इत्थमप्रतीतेः । उत्पन्ने च क्वचिन्नद्यादिवाक्याद्विज्ञाने तरङ्गिणीतीरमनुसरन्नासादितफलः प्रवृत्तबाधकप्रत्ययः पुरुषमेवा- § 3139

दृष्टान्ततयेति—निरर्थकवाक्यदृष्टान्ततयाऽनुवादमात्रमित्यर्थः । न स्यादिति—अर्थपरत्वे सिद्धे निरर्थकवाक्यनिषेधनदृष्टान्तता कथमित्यर्थः । भूतले घटो नास्तीत्यादावपि खलु भूतले घटः इत्येतावान् भागः न स्वपरः, किन्तु निषेध्यसमर्पणपरः ॥ § 3140

१८ ] अर्थ— nyāma-wit_kha    nyāma-wit_kha
१८ ] अवगम्यते—

पूर्वं ४१५ पु दोषवतोऽपि पुरुषस्य मूकादेः इत्युक्तं अन्यथयन् पुरुषगुणदोषयोरेव शब्दानां अर्थाव्यभिचारव्यभिचारयोर्निदानमित्याह— अनुचरितेत्यादि ॥ § 3141

तत्कृतः—शब्दकृतः । तथा च शब्दस्यैवायं दोषः, न पुरुषस्येति भावः । इत्थमप्रतीतेः । चेष्टातः शब्दानुमानाननुभवात् । तद्धेतोरेवतद्धेतुत्वे मध्ये किं तेन, इति न्यायेन अर्थानुमानस्यैव न्याय्यत्वात् । अथवा इत्थं—शब्ददोषत्वेनेत्यर्थः । अस्मिन्नर्थे अनुभवमाह—उत्पन्नेपीति ॥ § 3142
I.418/KSV

षिक्षिपति—धिक् ! हा ! तेन दुरात्मना विप्रलब्धोऽस्मि इति । न शब्दम् । प्राप्तफलश्च पुमांसमेव श्लाघते साधु साधुना तेनोपदिष्टम् इति । अतः पुरुषदोषान्वयानुविधानात् पुरुषदोषकृत एव शब्दाद्विप्लवः, न स्वरूपनिबन्धनः । तदभावकृत एव आप्तेषु तूष्णीमातीनेषु विभ्रमानुत्पाद इति न सन्दिग्धो व्यतिरेकः ॥ § 3143

## अर्थासंस्पर्शः नाप्यप्रामाण्यसाधकः

ननु ! पुरुषदोषास्तत्र किं कुर्युः ! पुरुषस्य हि गुणवतो दोषवतो वा शब्दोच्चारणमात्र एव व्यापारः । ततः परं तु कार्यं शब्दायत्तमेवेति तत्स्वरूपकृत एवायं विभ्रमः ॥ § 3144

हन्त ! तर्हि वक्तरि गुणवति सति सरितस्तीरे फलानि सन्ति इति सम्यक्प्रत्ययेऽपि शब्दस्यैव व्यापारात् पुरुषस्योच्चारणमात्रे चरितार्थत्वान्नैकान्ततः शब्दस्यार्थासंस्पर्शित्वमेव स्वभावः । युक्तंचैतदेव—यद्दीपवत्प्रकाशत्वमात्रमेव शब्दस्य स्वरूपम्; न यथार्थत्वमयथार्थत्वं वा । विपरीतेऽप्यर्थे दीपस्य प्रकाशत्वानतिवृत्तेः । अयं तु विशेषः—प्रदीपे व्युत्पत्तिनिरपेक्षमेव प्रकाशत्वम्, शब्दस्य तु व्युत्पत्त्यपेक्षमिति । प्रकाशात्मनस्तु शब्दस्य वक्तृगुणदोषाधीने
§ 3145

साधुः—ऋजुमतिः । आप्तेषु तूष्णीमासीनेषु इति शब्दव्यतिरेकोपपादनार्थम् ॥ § 3146

किं कुर्युः ? इत्यस्यैव विवरणं—पुरुषस्येत्यादि । ज्ञानस्य प्रमात्वतदभावौ हि करणस्वरूपाधीनौ । शाब्दबोधे च करणं शब्द एव । ततश्च प्रमात्वतदभावौ तदधीनावेव वक्तव्यौ । पुरुषगुणदोषौ तत्र किं कुर्यास्ताम् ? न हि दाहहेतुरग्निः प्रयोजकपुरुषानुगुणं व्यत्यस्यति इति भावः ॥ § 3147

वक्तरीत्यादि । अयमाशयः—सत्यं करणाधीनावेव तौ । परन्तु पुरुषदोषात् करणमपि दुष्टं भवत्येव । न हि एतानि करणानि स्वतन्त्राणि । चक्षुरादावपि हि तुल्यैव रीतिः । अतः बोधजनने शब्दानां साम्येऽपि, प्रमात्वतदभावौ अस्वयव्यतिरेकाभ्यां वक्तृगुणदोषाधीनौ इति शब्दानां आर्थासंस्पर्शित्वं

◦ ] पापवतो— nyāma-wit_ka

न स्वभावकृतम् ॥ § 3148
I.419/KSV

यथार्थेतरत्वे । अत एवाङ्गुलिशिखराधिकरणकरेणुशतवचसि बाधितेऽपि पुनः पुनरुच्चार्यमाणे भवति विभ्रमः; प्रकाशत्वरूपानपायात् । न त्वेष शब्दस्य दोषः ॥ § 3149

पदार्थानां तु संसर्गमसमीक्ष्य प्रजल्पतः ।
वक्तुरेव प्रमादोऽयं न शब्दोऽत्रापराध्यति ॥ ४३ ॥§ 3151

तदुक्तम्—प्रमाणान्तरदर्शनमत्र बाध्यते, न पुनर्हस्तियूथशतमिति शाब्दोऽन्वयः । पुरुषो हि स्वदर्शनं शब्देन परेषां प्रकाशयति । तत्र तद्दर्शनं चे दुष्टं, दुष्टः शाब्दप्रत्ययः । अदुष्टं चेत्, अदुष्ट इति गुणवतः पुरुषस्यादुष्टं दर्शनं भवति, दोषवतो दुष्टमिति । अदृष्टाऽपि वस्तु यदुपदिश्यते सोऽपि बुद्धिदोष एव । तस्मात् पुरुषगतगुणदोषान्वयव्यतिरेकानुविधायित्वात् तत्कृते एव शब्दयथार्थत्वायथार्थत्वे । तदुक्तम्—तत्त्वमपि भवति वितथमपि भवति इति ॥ § 3152

## उपसंहारः

तेनाभिधातृदौरात्म्यकृतेयमयथार्थता ।
प्रत्ययस्येति शब्दानां नार्थासंस्पर्शिता स्वतः ॥ ४४ ॥§ 3154

या तु जात्यादिशब्दार्थपराकरणवर्त्मना ।
अर्थासंस्पर्शिता प्रोक्ता, सा पुरस्तान्निषेत्स्यते ॥ ४५ ॥§ 3156

## प्रामाण्यस्वतस्त्वपरतस्त्वविचारोपक्षेपः

प्रमाणत्वं तु शब्दस्य कथमित्यत्र वस्तुनि ।
जैमिनीयैरयं तावत्पीठबन्धो विधीयते ॥ ४६ ॥§ 3158

प्रामाण्यमप्रामाण्यं वा सर्वविज्ञानगोचरः ।
स्वतो वा परतो वेति प्रथमं प्रविविच्यताम् ॥ ४७ ॥§ 3160

प्रमाणान्तरं—शब्दप्रयोगहेतुभूतं प्रत्यक्षादि । अर्थं बुध्वा हि शब्दरचना ॥ § 3161

० ] चेत्— nyāma-wit_ka
० ] स्पर्शितोच्येत— nyāma-wit_ka
३ ] गोचरम्— nyāma-wit_ka

निषेत्स्यते—पञ्चमाह्निके जातिसमर्थनादिभिः ॥ § 3162

शब्दस्य वस्तुनि प्रमाणत्वं—इत्यन्वयः । अथवा, इत्यत्र वस्तुनि— इत्यस्मिन् विषये । प्रामाण्यमिति । सर्वविज्ञानविषयं इदं तावत्परीक्ष्यताम् ।

### प्रामाण्यविचारप्रसङ्गसमर्थनम्—तत्र पक्षभेदाश्च

ननु ! शब्दप्रामाण्यचिन्तावसरे सकलप्रमाणप्रामाण्यविचारस्य कः प्रसङ्गः ? न स्वातन्त्र्येण परीक्षणम्, अपितु तदर्थमेव, समानमार्गत्वात् । यथाऽन्येषां स्वतः परतो वा प्रामाण्यं, तथा शब्दस्यापि भविष्यतीति । न हि तस्य स्वरूपमिव प्रामाण्यमपि तद्विसदृशमिति ॥

तदुच्यते—किं विज्ञानानां प्रामाण्यप्रामाण्यं चेति द्वयमपि स्वतः ? उत तदुभयमपि परतः ? आहोस्विदप्रामाण्यं स्वतः, प्रामाण्यं तु परतः ? उत स्वित् प्रामाण्यं स्वतः, अप्रामाण्यं तु परतः ? इति ॥

### तत्र सांख्यमतदूषणम्

तत्र द्वयमपि स्वत इति तावदसांप्रतम्, प्रवृत्तस्य विसंवाददर्शनात् । यदि हि प्रामाण्यमितरद्वा स्वत एव ज्ञानस्य गम्येत, तर्हि शुक्तौ रजतज्ञानं प्रमाणतया वा प्रतिपन्नम् ? अन्यथा वा ? प्रमाणत्वाप्रमाणत्वे स्वतः किं परतोऽथवा ? इति श्लो. वा-चोद-३३ भट्टवाक्यं अत्र स्मरणीयम् ॥ § 3163

तदर्थमेवेति । वेदप्रामाण्यसंरक्षणमेवास्य शास्त्रस्य परमं प्रयोजनमिति उपक्रमे पु. ७ उक्तमपि स्मर्तव्यम् । किमित्यादि । आद्यः पक्षः सांख्यानाम् । द्वितीयः सिद्धान्तिनां । तृतीयः सौगतानाम् । चतुर्थः मीमांसकानाम् ॥ § 3164

प्रामाण्यस्य स्वतस्त्वपरतस्त्वकोट्योः उत्पत्तिज्ञप्तिभेदेऽनापि भेदः । प्रामाण्यं स्वतः उत्पद्यते, स्वतः ज्ञायते च; एवं परतः उत्पद्यते, परतः ज्ञायते च इति । ज्ञानोत्पादकसामग्र्यैव प्रामाण्यमपि ज्ञाने उत्पद्यते इति उप्तत्तौ स्वतस्त्वम् । ज्ञानग्राहकसामग्र्यैव प्रामाण्यमपि गृह्यते इति ज्ञप्तौ स्वतस्त्वम् । एवं ज्ञानसामान्यसामाग्र्यपेक्षया विशिष्टसामग्र्या प्रामाण्यं उत्पद्यते इति उत्पत्तौ परतस्त्वम्, ज्ञानग्राहकसामग्र्यतिरिक्तसामग्र्यैव प्रामाण्यं गृह्यत इति ज्ञप्तौ परतस्त्वम् ॥ § 3165

द्वयमपि स्वत इति । अयं भावः सांख्यानां—वृत्तेरेव विषयाकारेण परिणामात् तस्य च भ्रमप्रमास्थले तुल्यत्वात् उभयपि स्वत एवेति ॥ § 3166

I.421/KSV

प्रमाणत्वपरिच्छित्तौविषंवदति तत्कथम् ?
अप्रामाण्यगृहीतौवा तस्मिन् कस्मात् प्रवर्तते ? ॥ ४८ ॥§ 3168

### तत्रबौद्धमतदूषणम्

३ ] अथा— nyāma-wit__kha
६ ] उभय— nyāma-wit__kha
९ ] शाश्वतम्— nyāma-wit__ka
२६ ] च्छिन्नं— nyāma-wit__ka
२७ ] गृहीते— nyāma-wit__ka

एतेन तृतीयोऽपि पक्षः प्रत्युक्तः—यदप्रमाण्यं स्वतः, प्रामाण्यं तु परत इति । स्वतो ह्यप्रामाण्ये निश्चिते प्रवृत्तिर्न प्राप्नोतीति । किञ्च अप्रामाण्यमुत्पत्तौ करणदोषापेक्षम् । निश्चये बाधकज्ञानापेक्षम् । तत् कथं स्वतोभवितुमर्हति ? § 3169

## आप्रामाण्यस्यावस्तुत्वनिरासः

यच्च अप्रामाण्यमवस्तुत्वान्न स्यात् कारणदोषतः श्लोवा. १-१-२-३९ इति कैश्चिदुच्यते, तदपि यत्किञ्चित् । संशयविपर्ययात्मनः अप्रमाणस्य वस्तुत्वात्तद्गतमप्रामाण्यमपि वस्त्वेवेति । परतस्तु प्रामाण्यं यथा नावकल्पते, तथा विस्तरेणोच्यते ॥ § 3170

## प्रामाण्याप्रामाण्ययोः परतस्त्वाऽसंभवाक्षेपः

एवञ्चायं द्वयमपि परत इति द्वितीयपक्षप्रतिक्षेपोऽपि भविष्यति । अर्थतथात्वप्रकाशकं हि प्रमाणमित्युक्तम् । तस्य स्वप्रमेयाव्यभिचारित्वं नाम प्रामाण्यम् । अतश्च परापेक्षायां सत्यां हि परत इति कथयितुमुचितम् । न चास्य परापेक्षा क्वचिद्विद्यते ॥ § 3171

सा हि भवन्ती उत्पत्तौ वा स्यात् ? स्वकार्यकरणे वा ? प्रामाण्यनिश्चये वा ? उत्पत्तौ—कारकस्वरूपमात्रापेक्षा ? § 3172

अप्रामाण्यं स्वतः—अप्रामाण्यं हि प्रामाण्याभावः, अभावस्तु निरुपाख्यः न कारणजन्यः । प्रामाण्यं तु गुण-संवाद-अर्थक्रियाद्यधीनमिति युक्तं परतः । एतेन इत्यस्यैव विवरणं—स्वतो हीत्यादि ॥ § 3173

उच्यते—अनूद्यते । परतस्त्विति । सौगतसम्मतमिति शेषः । § 3174

मीमांसकः प्रत्यवतिष्ठते—एवञ्चेति । स्वकार्यं—अर्थप्रकाशनरूपं प्रमाणफलम् । प्रथमकल्पेऽपि विकल्पं प्रदर्शयति कारकेत्यादि ॥ § 3175

I.422/KSV

तदतिरिक्ततद्गतगुणापेक्षा वा ? कारकस्वरूपमात्रापेक्षायां सिद्धसाध्यत्वम् । असत्सु कारकेषु कार्यस्य ज्ञानस्यात्मलाभाभावात् कस्य प्रामाण्यमप्रामाण्यं वा चिन्त्यते ? § 3176

## गुणानां सद्भावे न किञ्चित्प्रमाणम्

२८ ] प्रामाण्यं— nyāma-wit_kha

३ ] अप्रमाण— nyāma-wit_ga

३ ] त्तस्मा— nyāma-wit_ka

३ ] करण— nyāma-wit_kha

४ ] अप्रामाण्यस्य— nyāma-wit_kha

७ ] स चायं— nyāma-wit_ka

१९ ] पेक्षा— nyāma-wit_ka

कारकातिरिक्ततदधिकरणगुणापेक्षणं तु दुर्घटम् । अप्रामाणिकत्वेन कारणगुणानामाकाशकुशेशयसदृशवपुषां अपेक्षणीयत्वाभावात् ॥ § 3177

न कारणगुणग्राहि प्रत्यक्षमुपपद्यते ।
चक्षुरादेः परोक्षत्वात् प्रत्यक्षास्तद्गुणाः कथम् ? ॥ ४९ ॥§ 3179

लिङ्गं चादृष्टसम्बन्धं न तेषामनुमापकम् ।
यथाऽर्थबुद्धिसिद्धिस्तु निर्दोषादेव कारकात् ॥ ५० ॥§ 3181

## ज्ञानसामान्यसामग्र्याः अन्यतररूपत्वं अवर्जनीयम्

यदि हि यथाऽर्थत्वायथाऽर्थत्वरूपद्वयरहितं किञ्चित् उपलब्ध्याख्यं कार्यं भवेत्, ततः कार्यत्रैविध्यात् कारणत्रैविध्यमवश्यमवसीयेत—यथाऽर्थोपलब्धेः गुणवत्कारकं कारकं, अयथाऽ र्थोपलब्धेः दोषकलुषं कारकं कारकम्, उभयरहितायास्तु तस्याः स्वरूपावस्थितमेव कारकं कारकमिति । न त्वेवमस्ति । द्विविधैव खल्वियमुपलब्धिः—यथाऽर्थत्वयथाऽर्थत्वभेदेन ॥ § 3182

सिद्धसाध्यत्वं—अस्यैवास्मत्सम्मतस्वतस्त्वरूपत्वात् । आत्मालाभः—उत्पत्तिः ॥ § 3183

परोक्षत्वात्—अतीन्द्रियत्वात् । ननु ज्ञानसामान्यसामग्रीमात्राधीनं यदि प्रामाण्यं, तर्हि अप्रमायामपि सामान्यसामग्र्याः सत्त्वात् तदपि स्वत एव स्यादित्यत्राह—यथार्थेति । तथा च दोषाः अप्रामाण्यज्ञाने विशेषसामग्री, अतो न तत् स्वतः । दोषाभावमात्रादेव सामान्यसामग्री प्रमाजनिकेति न दोषः ॥ § 3184

कार्यत्रैविध्यं विशदयति—यथार्थोपलब्धेरित्यादि ॥ § 3185
I.423/KSV

## प्रामाण्यस्य स्वतस्त्वं, अप्रामाण्यस्य परतस्त्व च

तत्रायथाऽर्थोपलब्धिस्तावद्दुष्टकारककार्यैव दृष्टा ॥§ 3186

दृष्टः कुटिलकुम्भादिसंभवो दुष्टकारणात् ।
तथा मानान्तरज्ञातात्तिमिरादेर्द्विचन्द्रधीः ॥ ५१ ॥§ 3188

अयथाऽर्थोपलब्धौ च दुष्टकारककार्यत्वेन सिद्धायामिदानीं तृतीयकार्याभावात् यथाऽर्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारकेभ्योऽवकल्पत इति न गुणकल्पनायै प्रभवति ॥ § 3189

२२ ] मिता— nyāma-wit_kha

अनुमाने च यैव पक्षधर्मान्वयादिसामग्री ज्ञानस्य जनिका सैव प्रामाण्यकारणत्वेन दृष्टा । न च स्वरूपस्थितानि कारणानि कार्यजन्मन्युदासत एव, येन यथाऽर्थोपलब्धिजनेन तेषां गुणकारिता कल्प्येतेत्यतो न सन्ति कारणगुणाः ॥ § 3190

## दोषाभावः न कारककोटौनिविष्टः

नैर्मल्यव्यपदेशस्तु लोचनादेः काचकामलादिदोषापायनिबन्धन एव, न स्वरूपातिरिक्तगुणकृतः । अञ्जनाद्युपयोगोऽपि दोषनिर्हरणायैव, न गुणजन्मने ॥

तस्मादवितथा संवित् स्वरूपस्थितहेतुजा ।
दोषाधिकैस्तु तैरेव जन्यते विपरीतधीः ॥ ५२ ॥§ 3193

§ 3194

ननु ज्ञानद्वैविध्यात् सामग्रीद्वैविध्यमावश्यकमेवेति, अस्मदिष्टसिद्धिरेवेति शंकायां आह—तत्रेति । दुष्टकारणात्—कुलालहस्तदोषादिरूपात् । गुणसद्भावे प्रमाणाभावस्योपपादितत्वात्, तद्वैलक्षण्यार्थं मानान्तरज्ञातादिति ॥
§ 3195

गुणकल्पनायै—यथार्थोपलब्धिकारणत्वेन गुणरूपस्यातिरिक्तकारणामुमानाय । गुणकारिता—गुणकार्यता ॥ § 3196

ननु निर्मलं चक्षुरेव प्रमाजनकं दृष्टम् । अतश्च दोषाभाव एव प्रमाया अतिरिक्ता सामग्री सिद्धेत्यत्राह—नैर्मल्येति । तथा च दोषाभावादिः करणस्वरूपसंरक्षणमात्रोपयोगी, न त्वतिरिक्तातिशयजनम् इति गुणानां न प्रमाहेतुत्वसिद्धिः ॥ § 3197
I.424/KSV

अत एवाप्रमाणत्वं परतोऽभ्युपगम्यते ।
जन्मन्यपेक्षते दोषान् बाधकं च स्वनिश्चये ॥ ५३ ॥§ 3199

तस्मान्नोत्पत्तौ गुणापेक्षं प्रमाणम् ॥ § 3200

## प्रमाकार्येऽपि न कारकान्तरापेक्षा

नापि स्वकार्यकरणे किञ्चिदपेक्षते; अर्थप्रकाशनस्वभावस्यैव तस्य स्वहेतोरुत्पादात् । अर्थप्रकाशनमेव च प्रमाणकार्यम्, प्रवृत्त्यादेः पुरुषेच्छानिबन्धनत्वात् ॥

---

३ ] कस्य्यत इ— nyāma-wit__kha

३ ] येषां— nyāma-wit__ka

नैव वा जायते ज्ञानं जायते वा प्रकाशकम् ।
अर्थप्रकाशने किञ्चित् न तूत्पन्नमपेक्षते ॥ ५४ ॥§ 3203

तथा चोक्तम्— § 3204

मृद्दण्डचक्रसूत्रादि घटो जन्मन्यपेक्षते ।
उदकाहरणे त्वस्य तदपेक्षा न विद्यते इति ॥§ 3206

अथवा— § 3207

सापेक्षत्वं घटस्यापि सलिलाहरणं प्रति ।
यत्किञ्चिदस्ति, न त्वेवं प्रमाणस्योपपद्यते ॥ ५५ ॥§ 3209

न च स्वग्रहणापेक्षं ज्ञानमर्थप्रकाशकम् ।
तस्मिन्ननवबुद्धेऽपि तत्सिद्धेश्चक्षुरादिवत् ॥ ५६ ॥§ 3211

अपेक्षते । प्रमाणज्ञानमिति शेषः । ज्ञानस्य स्वरूपमेव हि तादृशं, अतः तत्र न कारणान्तरोपेक्षा ॥ § 3212

ननु ज्ञानस्य परमं फलं प्रवृत्तिर्वा, निवृत्तिर्वा । तच्च प्रमाणेनैव भवितुमर्हति । न हि ज्ञानसामान्यात् पुरुषः प्रवर्तते इति अस्ति दोषाभावस्याप्यपेक्षेत्यत्राह—प्रवृत्त्यादेरिति । नैवेति । जातं ज्ञानं अर्थप्रकाशरूपमेव जायेत, अथवा न जायेतैव । तस्मादुत्पन्नं ज्ञानमर्थप्रकाशने न स्वरूपसामग्र्यतिरिक्तकारणान्तरमपेक्षते । तदपेक्षा—कारकान्तरापेक्षा ॥ § 3213

ननु तर्हि पुरुषव्यापारमन्तराऽपि घटः उदकमाहरेत् इति शङ्कायामाह— अथवेति । घटस्य जडत्वात् अस्ति जलाहरणे पुरुषाद्यपेक्षा । ज्ञानं तु स्वतः अर्थप्रकाशनसमर्थं तत्र न कारणान्तरमपेक्षते । न चान्ततः ज्ञानं स्वयं गृहीतमेव अर्थप्रकाशकमिति, तत्रास्ति कारणान्तरापेक्षेति वाच्यम्, ज्ञानग्रहणमन्तराऽपि विषयभानोपपत्तेः । भाट्टैस्तयाङ्गीकारात् । प्रकरणं सर्वमिदं श्लोकवार्तिक

उक्तं च—न ह्यज्ञातेऽर्थे कश्चिद्बुद्धिमुपलभते । ज्ञाते त्वनुमानादवगच्छति शा-भा-१-१-५ इति । तस्मात् स्वकार्यकरणेऽपि न स्वग्रहणापेक्षं प्रमाणम् ॥

**प्रामाण्यनिश्चयः न स्वरूपसामग्र्यतिरिक्तकारणाधीनः**

नापि प्रामाण्यनिश्चये किञ्चिदपेक्षते; अपेक्षणीयाभावात् । तथा हि— अस्य कारणगुणज्ञानाद्वा प्रामाण्यनिश्चयो भवेत् ? बाधकाभावज्ञानाद्वा ? संवादाद्वा ?

न तावत्कारणगुणज्ञानात्; कारणगुणानामिदानीमेव निरस्तत्वात् ॥

## गुणज्ञानस्यासंभावः

अपि च न कारणगुणज्ञानमिन्द्रियकरणकम्; अतीन्द्रियकारकाधिकरणत्वेन परोक्षत्वाद्गुणानाम् । अपितूपलब्ध्याख्यकार्यपरिशुद्धिसमधिगम्यं गुणस्वरूपम् । अप्रवृत्तस्य च प्रमातुर्न कार्यपरिशुद्धिर्भवति । तन्नेदानीं प्रामाण्यनिश्चयपूर्विका प्रवृत्तिर्भवेत् । अन्यथा वाऽनिश्चितप्रामाण्यादेव ज्ञानात् प्रवृत्तिसिद्धौ किं पश्चात्तन्निश्चयेन प्रयोजनम् ? निश्चितप्रामाण्यात्तु प्रवृत्तौ दुरतिक्रमः चक्रकक्रकचपातः—प्रवृत्तौ सत्यां कार्यपरिशुद्धिग्रहणम्, कार्यपरिशुद्धिग्रहणात् कारणगुणावगतिः, कारणगुणावगतेः प्रामाण्यनिश्चयः, प्रामाण्यनिश्चयात् प्रवृत्तिरिति ॥ विवरणरूपं अवगन्तव्यम् । विस्तरभयात् श्लोका नोदाहियन्ते । अज्ञातेऽर्थ इति । तथाच ज्ञानाग्रहेऽपि अर्थग्रहो भवितुमर्हत्येव ॥ § 3214

कार्यपरिशुद्धिसमधिगम्यं—ज्ञानप्रामाण्यनिश्चयानुमेयम् । अप्रवृत्तस्येति । सफलप्रवृत्तिजनकत्वात् खलु प्रामाण्यनिश्चयः । इदनीं— अर्थप्रकाशाधीनप्रवृत्तिसमये । एतत्प्रवृत्त्यनन्तरं, फलप्राप्त्या ज्ञानस्य प्रामाण्यमनुमाय, तद्धेतुतया गुणः अनुमेय इति गुणज्ञानं कुत्र उपयुज्यत इति भावः । अन्यथा वा इत्यस्यैवविवरणं अनिश्चितेत्यादि ॥ § 3215

I.426/KSV

## बाधकाभावज्ञानं तु असंभवि

नापि बाधकाभावपरिच्छेदात् प्रामाण्यनिश्चयः । स हि तात्कालिको वा स्यात् ? कालान्तरभावी वा ? § 3216

तात्कालिको न पर्याप्तः प्रामाण्यपरिनिश्चये । § 3217

कूटकार्षापणादौ किञ्चित्कालमनुत्पन्नबाधकेऽपि कालान्तरे तदुत्पाददर्शनात् ॥ § 3218

सर्वदा तदभावस्तु नासर्वज्ञस्य गोचरः ॥ ५७ ॥§ 3219

## संवादादपि न प्रामाण्यनिश्चयः

अथ संवादात्प्रामाण्यनिश्चय उच्यते ? तर्ह्युच्यताम्—कोऽयं संवादो नाम ? किं उत्तरं तद्विषयं ज्ञानमात्रम् ? उतार्थान्तरज्ञानम् ? आहो स्विदर्थक्रियाज्ञानमिति ? § 3220

आद्ये पक्षे कः पूर्वोत्तरज्ञानयोर्विशेषः, यत् उत्तरज्ञानसंवादात् पूर्वं पूर्वं ज्ञानं प्रामाण्यमश्नुवीत ? § 3221

---

३ ] कारक— nyāma-wit__kha
३ ] कारण— nyāma-wit__kha
५ ] तत्रे— nyāma-wit__ka
२७--२८ ] ज्ञानं— nyāma-wit__ka

## यत्र कुत्र वा प्रामाण्यं स्वत इत्यास्थेयमेव

अपि चोत्तरसंवादात् पूर्वपूर्वप्रमाणताम् ।
वदन्तो नाधिगच्छेयुरन्तं युगशतैरपि ॥ ५८ ॥§ 3223

सुदूरमपि गत्वा तु प्रामाण्यं यदि कस्य चित् ।
स्वत एवाभिधीयेत् को द्वेषः प्रथमं प्रति ॥ ५९ ॥§ 3225

यदाह—

कस्य चित्तु यदीष्येत स्वत एव प्रमाणता ।
प्रथमस्य तथाभावे विद्वेषः किंनिबन्धनः ॥§ 3228
श्लो. वा. चोद—७६ इति ॥ § 3229

## समानविषयस्यैव संवादकत्वम्

अथान्यविषयज्ञानमन्यस्य संवाद उच्यते—तदयुक्तम्— अदर्शनात् । न हि स्तम्भज्ञानं कुम्भज्ञानस्य संवादः ॥ § 3230

कालान्तर इति । तथाचेतादृशबाधकज्ञानाभावः अप्रयोजकः ॥ § 3231

कः विशेष इति । तदिदं अन्धेनान्धाय मार्गदर्शनतुल्यमिति भावः ॥ § 3232

I.427/KSV

## संवादः दुरधिगमश्च

अथार्थक्रियाज्ञानसंवादात्प्रथमस्य प्रवर्तकस्य ज्ञानस्य प्रामाण्यमिष्यते, तदपि ह्यनवसितप्रामाण्यं कथमादिमस्य प्रामाण्यमवगमयेत् ? कश्चार्थक्रियाज्ञानस्य पूर्वस्माद्विशेषः, यदेतदायत्तस्तस्य प्रामाण्याधिगमः । अर्थक्रियाज्ञानत्वमेव विशेष इति चेत्, किल सलिलज्ञानमाद्यमविद्यमानेऽपि पयसि पूषदीधितिषु प्रवर्तकं दृष्टमिति न भवति विस्रंभभूमिः ॥ § 3233

## अप्रमाया अपि प्रवर्तकत्वादि समम्

इदं पुनरर्थक्रियासंवेदनं अम्बुमध्यवर्तिनः पानावगाहनादिविषयमुदेतीत्यनवधारितव्यभिचारितया तत्प्रामाण्यनिश्चयाय कल्पत इति—तदसत्—स्वप्ने पानावगाहनस्यापि व्यभिचारोपलब्धेः ॥ § 3234

---

९ ] मप्यस्य— nyāma-wit_kha
१५ ] माद्यस्य— nyāma-wit_ka
१६ ] दधीन— nyāma-wit_ka
१८ ] पीयूव— nyāma-wit_ka
२ ] मपी— nyāma-wit_kha
२ ] चार— nyāma-wit_kha
२ ] तत्प्रामाण्यं— nyāma-wit_ka

## अप्रमाया अपि अर्थक्रियाकारित्वं दृश्यते

किञ्च चरमधातुविसर्गोऽपि स्वप्ने सीमन्तिनीमन्तरेण भवतीति महानेष व्यभिचारः ॥ § 3235

अथ रागोद्रेकनिमित्तत्वेन पित्तादिधातुविकृतिनिबन्धनत्वेन वा तद्विसर्गस्य न स्वसाधनव्यभिचार इत्युच्यते—तदसमञ्जसम्— असकृदनुभूतयुवतिपरिरंभाद्यन्वयव्यतिरेकानुविधायित्वेन तत्कार्यत्वावधारणात् ॥ § 3236

अर्थक्रियेत्यादि । वस्तुनः अर्थक्रियाकारित्वं स्वरूपतः न प्रामाण्यनिश्चयहेतुः, किन्तु तन्निश्चय एव । तत्र च प्रामाण्यं केन निर्णीतम् ? विशेषः—प्रामाण्यस्वरूपांशे । एतदायत्तः—अर्थक्रियाज्ञानाधीनः । किल इति ग्रन्थकारशैली । प्रवर्तकमिति । ज्ञानस्य फलं प्रवृत्तिरित्यनुपदमुक्तम् ॥ § 3237

नेदृशमर्थक्रियाकारित्वं विवक्षितमिति शङ्कते—इदं पुनरिति । एतादृशं त्वित्यर्थः ॥ § 3238

ननु भवदुक्तं पानादिप्रतिभासमात्रं, न तु पानादिकम् । न हि स्वाप्नजलावगाहनेन शरीरं आर्द्रं भवतीतिशङ्कायां, तत्रापि दृष्टान्तमाह—किञ्चेति तत्कार्यत्वं—युवतिपरिरंभकार्यत्वम् । चरमधातुविसर्गस्येति शेषः ॥ § 3239

I.428/KSV

तस्मादर्थक्रियाज्ञानव्यभिचारावधारणात् ।
तत्प्रामाण्यपरीक्षायामनवस्था न शाम्यति ॥ ६० ॥§ 3241

## प्रामाण्यनिश्चयः म प्रवृत्त्यङ्गम्

अथवाऽऽप्तफलत्वेन किं तत्प्रामाण्यचिन्तया ?
प्रथमेऽपि प्रवृत्तत्वात् किं तत्प्रामाण्यचिन्तया ? ॥ ६१ ॥§ 3243

न चेदमर्थक्रियाज्ञानमप्रवृत्तस्य पुंसस्समुद्भवति । तत्र प्रामाण्यावधारणपूर्विकायां प्रवृत्तौ कारणगुणनिश्चयप्रामाण्यचर्चाबद्धचक्रकक्रकचचोद्यप्रसङ्गस्तदवस्थ एव ॥ § 3244

अनिश्चितप्रामाण्यस्य तु प्रवृत्तौ पश्चात्तन्निर्णयो भवन्नपि कृतक्षौरस्य नक्षत्रपरीक्षावत् अफल एवेत्युक्तम् ॥ § 3245

## प्रामाण्यनिश्चयस्य आद्यप्रवृत्तौ अङ्गत्वाक्षेपः

---

८ ] नवधारणात्— nyāma-wit_ka nyāma-wit_kha

२०--२१ ] किं तत्प्रामाण्यचिन्तया—

ततैतत्स्यात्—द्विविधा हि प्रवृत्तिः—आद्या च, आभ्यासिकी च । तत्राद्या यथा—विनिहितसलिलावसिक्तमसृणमृदि शरावे शाल्यादिबीजशक्तिपरीक्षणाय कतिपयबीजकणावापरूपा । ततस्तत्र तेषामङ्कुरकरणकौशलमविकलमवलोकयन्तः कीनाशा निश्शङ्कं केदारेषु तानि बीजान्यावपन्तीति सेयमाभ्यासिकी प्रवृत्तिः । एवमिहापि प्रथमपरीक्षितप्रमाणभावादेव ज्ञानात्कुतश्चित्कश्चिद्विपश्चिदपि व्यवहरंस्तद्व्यवहार परस्तत्तत्फलज्ञाने तस्य प्रामाण्यमवगच्छन् पुनस्तथाविधे जाते सति सुखमेव प्रवृत्त्यादिकं व्यवहारभशङ्कितकालुष्यः करिष्यतीति न सर्वात्मना वैयर्थ्यमिति ॥ § 3246

आप्तफलत्वेन—फलप्राप्त्यनन्तरं प्रामाण्यविचारणेन किं साध्यमितिचेत्—प्राथमिकज्ञानेन प्रवृत्तेर्निष्पन्नत्वेन अनन्तरं वा तद्विचारेण किं साध्यम् ? अतः प्रामाण्यस्य परतस्त्वं निरवकाशम् । एतदेवोपपादयति—म चेदमित्यादिना ॥ § 3247

आद्या—प्राथमिकी । कीनाशाः—कर्षकाः ॥ § 3248

I.429/KSV

## आद्यप्रवृत्तावपि प्रामाण्यनिश्चयः नाङ्गम्

उच्यते—विषमोऽयं दृष्टान्तः— § 3249

तज्जातीयतया बीजं शक्यते यदि वेदितुम् ।
तत्र तन्निश्चयाद्युक्तं निर्विशङ्कं प्रवर्तनम् ॥ ६२ ॥§ 3251

ज्ञाने तथाविधत्वं तु बोधरूपाविशेषतः ।
कार्याद्वा कारणाद्वाऽपि ज्ञातव्यं न स्वरूपतः ॥ ६३ ॥—इति ॥§ 3253

## प्रामाण्यनिश्चयस्य प्रमाणान्तरेण दुस्संपादत्वम्

कारणानां परोक्षत्वात् न तद्द्वारा तदागतिः ।
कार्यं तु नाप्रवृत्तस्य भवतीत्युपवर्णितम् ॥ ६४ ॥§ 3255

तस्माद्वैयर्थ्यचोद्यस्य नायं परिहृतिक्रमः ।
एवं चार्थक्रियाज्ञानात् कीदृक् प्रामाण्यनिश्चयः ॥ ६५ ॥§ 3257

## समर्थकारणज्ञानस्यापि न प्रामाण्यनिश्चायकत्वम्

६ ] परत्वफल— nyāma-wit_ka
२० ] कार्यातु— nyāma-wit_kha

समर्थकारणज्ञानात् योऽपि प्रामाण्यनिश्चयम् ।
ब्रूते सोऽपि कृतोद्वाहस्तत्र लग्नं परीक्षते ॥ ६६ ॥ § 3259

किलातिविकसितकुसुममकरन्दपानमुदितमधुकरकुले कस्मिंश्चिदुद्याने वाद्यमानायां वीणायां निरन्तरलतासन्तानान्तरितवपुषि विदूरादनवलोक्यमाने वादके वीणाध्वनिसंविदि रोलम्बनादसन्देहदूषितायां तदभिमुखमेव प्रतिष्ठमानः श्रोता परिवादके दर्शनपथमवतीर्णे स्वरानुकूलकारणनिश्चयात् तत्प्रतीतौ संशयनिवृत्तेः प्रामाण्यं निश्चिनोतीत्येष समर्थकारणज्ञानकृतः प्रामाण्यनिश्चयः ॥ § 3260

तथाविधत्वं—यथार्थत्वम् । कार्यात्—फलप्राप्त्यादिरूपात् । कारणात्—दुष्टेन्द्रियादिरूपात् ॥ § 3261

तदा—आद्यप्रवृत्तौ । वैयर्थ्य चोद्यं च प्रामाण्यविषयकम् । समर्थकारणज्ञानादित्यादिकं विवृणोति—अतिविकसितेति । इदं च रोलम्बनादसन्देहापादनाय । परिवादके—वीणावादके । समर्थं—तत्कार्यानुकूलसामर्थ्यविशिष्टं

तत्रापि नाप्रवृत्तस्य हेतुसामर्थ्यदर्शनम् ।
एवमेव प्रवृत्तौ तु निश्चितेनापि तेन किम् ॥ ६७ ॥ § 3264

तन्निश्चयात् प्रवृत्तौ वा पुनरन्योन्यसंश्रटम् ।
तन्निश्चयात् प्रवृत्तिः स्यात् प्रवृत्तेस्तद्विनिश्चयः ॥ ६८ ॥ § 3266

## प्रामाण्यस्वतस्त्वोपसंहारः

तदेवं (Edtext outside numbered paragraph)न कुतश्चिदपि प्रामाण्यनिश्चयः चक्रकेतरेतराश्रयानवस्थावैयर्थ्यादिदूषणातीतस्थितिरस्तीत्यतः प्रामाण्यनिश्चयेऽपि न किञ्चिदपेक्षते प्रमाणम् । (Edtext outside numbered paragraph)अतश्चोत्पत्तौ, स्वकार्यकरणे, स्वप्रामाण्यनिश्चये च निरपेक्षत्वादपेक्षात्रयरहितत्वात्स्वतःप्रामाण्यमिति सिद्धम् । तदुक्तम् श्लो. वा. चोद-४७—

स्वतः सर्वप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
न हि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ॥ § 3268

## अप्रामाण्यपरतस्त्वोपसंहारः

अप्रामाण्यं तूत्पत्तौ दोषापेक्षत्वात्, स्वनिश्चये बाधकप्रत्ययादिसापेक्षत्वात् उभयत्रापि परत इत्युक्तमेव । तस्मात् पक्ष (Edtext outside numbered paragraph)त्रयस्यायनुपपत्तेश्चतुर्थ एवायं पक्षः श्रेयान्—प्रामाण्यं स्वतः, अप्रामाण्यं परत इति ॥

### प्रामाण्याप्रामाण्ययोः परतस्त्वशङ्का

ननु ! चोत्पत्तिवेलायां न विशेषोऽवधार्यते ।
प्रमाणेतरयोस्तेन बलाद्भवति संशयः ॥ ६९ ॥§ 3271

यत्कारणं, तदनुमानात् प्रामाण्यमव्यभिचरितं निश्चीयत इति भावः । एवमेव—प्रामाण्यनिश्चयात् पूर्वमेव ॥ § 3272

प्रामाण्यनिश्चयेऽपीति । यदा कुतश्चिदपि प्रामाण्यनिश्चयः असंभवी, अनुभूयते च प्रामाण्यं, ततः तस्य स्वतस्त्वं अर्थबलादेव सिद्धमित्यर्थः ॥ § 3273

प्रमाणेतरयोः—प्रामाण्याप्रामाण्ययोः विशेषः इत्यन्वयः । उक्तमुप

परिच्छित्तिमात्रं प्रमाणकार्यम् । तच्च यथाऽर्थेतरप्रमितिसाधारणं रूपं । साधारणधर्मग्रहणं च संशयकारणमिति प्रसिद्धः पन्थाः । एवं स्थिते च—

प्रमाणान्तरसंवादविसंवादौ विना कथम् ?
प्रमाणेतरनिर्णीतिः, अतश्च परतो द्वयम् ॥ ७० ॥§ 3276

### प्रामाण्याप्रामाण्ययोः परतस्त्वासंभवः

तदेतदचतुरस्रम् । सत्यं, परिच्छित्तिरेव प्रमाणकार्यम् । सा पुनरुपजायमानैव न सन्देहादिदूषिततनुरुपलभ्यते इत्यौत्सर्गिकं प्रामाण्यमेव सा भजते । अर्थपरिच्छेदाच्च प्रवर्तमानः प्रमाता प्रमाणेनैव प्रवर्तितो भवति; न संशयात्प्रवृत्तः । स्थिते चैवमौत्सर्गिके प्रामाण्ये, यत्र तस्यापवादः क्वचिद्भवति तत्राप्रामाण्यम् ॥

### अप्रामाण्यहेतुः

अप्रमाण्ये चावश्यंभाव्यपवादः । द्विविध एवापवादः—वाधकप्रत्ययः, कारणदोषज्ञानं च । तदुक्तं भाष्यकृता शाब.-भा. १-१-५ यत्र दुष्टं करणम्, यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययः; नान्यः इति । वार्तिककारोऽप्याह—श्लो. वा. चोद. ५३

तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।अर्थान्यथात्व-
हेतूत्थदोषज्ञानादपोद्यते इति ॥§ 3278&

१७ ] स्थितिश्चैव—
nyāma-wit__kha

तत्र बाधकज्ञानं पूर्वज्ञानोपमर्दद्वारेणैव तस्मिन् विषये जायत् इति समानविषयत्वात् स्पष्टमेव बाधकम् ॥ पादयति—परिच्छित्तीति । ज्ञेयपरिच्छेद एव हि ज्ञानस्य कृत्यम् । ज्ञेयं तत्र सच्चेत् प्रमा, नो चेत् अप्रमेति ॥ § 3279
संदेहेत्यादि । न हि पुरुषः सर्वत्र ममोत्पन्नं ज्ञानं प्रमा ? न वा ? इति विचिकित्सत इत्यनुभवसिद्धमेव । प्रमाणेनैव—प्रामाण्यविशिष्टज्ञानेनैव ॥ § 3280

I.432/KSV

## असमानविषयत्वेऽपि करणदोषज्ञानत्य बाधकत्वम्

करणदोषज्ञानं तु भिन्नविषयमपि कार्यैक्याद्बाधकतां प्रतिपद्यते । यथा चमसेनापः प्रणयति इति दर्शपूर्णमासाङ्गत्वात् क्रत्वर्थश्चमसः । गोदोहनेन पशुकामस्य प्रणयेत् इति काम्यमानपशुनिर्देशात् पुरुषार्थो गोदोहनमित्येवं क्रत्वर्थपुरुषार्थतया भिन्नविषयत्वेऽपि चमसगोदोहनयोः प्रणयनाख्यकार्यमेकमिति गोदोहनेन निर्वृत्ते तस्मिंश्चमसो निवर्तते । एवमिह कारणदोषज्ञानं दोषविषयमपि दोषाणामयथाऽर्थज्ञानजननस्वभावत्वात्तस्य ज्ञानस्य प्रामाण्यं बाधते । तदुक्तम् श्लो. वा. चोद. ५८— § 3281

दुष्टकारणबोधे तु जातेऽपि विषयान्तरे ।
अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत् इति
॥§ 3283

## बाधकाभावमात्रमेव प्रामाण्यावधारणे अलम्

यत्र पुनरिदमपवादद्वयमपि न दृश्यते, तत्र तदौत्सर्गिकं प्रामाण्यमनपोदितमास्त इति न मिथ्यात्वाशङ्कायां निमित्तं किञ्चित् । यदाह श्लो. वा. चोद. ६०—

दोषज्ञाने त्वनुत्पन्ने नाशङ्क्या निष्प्रमाणता इति ॥§ 3285

तथा हि— § 3286

कश्चिदुत्पन्न एवेह स्वसंवेद्योऽस्ति संशयः ।

---

◦ ] पुरुषार्थगोदोहनेन— मीमांसकपाठः ।
nyāma-wit_kha
◦ ] ---Note: सिद्धेऽपि—इति

स्थाणुर्वा पुरुषो वेति को नामापह्नुवीत तम् ॥ ७१ ॥§ 3288

कार्यैक्यात्—यज्ज्ञाने प्रामाण्यं गृहीतं तस्मिन्नेव अप्रामाण्यनिश्चयाधानात् । यथेत्यादि । पूर्वमीमांसायां तृतीयस्य षष्ठे तृतीयाधिकरणे विचारितमिदम् । निर्वृत्ते इति । प्रणयन इति शेषः ॥ § 3289

मिथ्यात्वं—अप्रामाण्यम् । स्वसंवेद्य इति । उत्पन्नः संशयः स्वयं ज्ञायत एव सर्वैः । चोरो वा ? स्थाणुर्वा ? इति सन्दिहानः न हि उपरि गच्छति । अतः तत्र संशयत्वं स्वसंवेद्यमेव । तद्वत् ज्ञानात् प्रवृत्तेर्दर्शनेन प्रामाण्यमपि गृहीतमित्येव वक्तव्यम् । ननु तर्हि अप्रामाण्यमपि स्वत

हठादुत्पाद्यमानस्तु हिनस्ति सकलाः क्रियाः ।
स्वभार्यापरिरंभेऽपि भवेन्मातरि संशयः ॥ ७२ ॥§ 3292

विनाशी संशयात्मेति पाराशर्योऽप्यभाषत ।
नायं लोकोऽस्ति कौन्तेय ! न परः संशयात्मनः ॥ ७३ ॥
इति ॥§ 3294

**स्थलविशेषे संशयोत्पत्तावपि न प्रामाण्यस्वतस्त्वहानिः**

यत्रापि च क्वचिद्बाधकप्रत्यये संशयो जायते तत्रापि तृतीयज्ञानापेक्षणान्नानवस्था । न च तावता स्वतःप्रामाण्यहानिः । यत्र प्रथमविज्ञानसंवादि तृतीयज्ञानमुत्पद्यते तत्र प्रथमस्य प्रामाण्यमौत्सर्गिकं स्थितमेव । द्वितीयविज्ञानारोपितालीककालुष्यशङ्कानिराकरणं त्वत्य तृतीयेन क्रियते; न त्वस्य संवादात् प्रामाण्यम् ॥ इत्यायास्यतीति चेत्, संशयत्वं—अप्रमात्वमिति न पर्यायः । अतो न दोष इति भावः । ननु सामान्यत उत्पन्नेऽपि ज्ञाने इदं ज्ञानं प्रमा ? न वा ? इति संशयस्य कुत्रचित् दर्शनात्, प्रमात्वे गृहीते तादृशसंशयानुत्पादात्, सर्वत्र संशयः कल्पनीय इति शङ्कां तीक्ष्णोक्तिभिः समाधत्ते—हठादिति । अत्र संशय इत्याकर्षः । मातरि—विषयसप्तमी । भार्यायामिति शेषः । पाराशर्यः—व्यासः । संशयात्मा विनश्यति गी. ४-४० इति क्रमः । नायमिति । नायं लोकोऽस्ति न परः न सुखं संशयात्मनः गी. ४-४० इति प्रायः पाठः ॥ § 3295

बाधकप्रत्यये इति निमित्तसप्तमी । तेन प्रामाण्यस्यैवौत्सर्गिकत्वमुक्तम् । कुतो न हानिः ? इत्यत्राह—यत्रेति । आद्यं रजतज्ञानं, द्वितीयं— ममोत्पन्नं ज्ञानं प्रमा ? न वा ? इति संशयरूपम्, तृतीयं आद्यज्ञानसंवादि रजतमेवेदम् इति । अनेन द्वितीयज्ञानारोपिताप्रामाण्याशङ्कानिवर्तनमात्रं क्रियते, न तु नूतनतया प्रामाण्यग्रहः । यदा च तृतीयं ज्ञानं नेदं रजतं इत्येवंरूपं, तदा तत् बाधकज्ञानरूपमेवेति तेनाप्रामाण्यमेव गृह्यते । अप्रामाण्यस्य परतस्त्ववादिनां तु तदिष्टमेव ॥ § 3296

I.434/KSV

१६ ] मुत्पाद्यते— nyāma-wit_ka

यदि तु द्वितीयज्ञानसंवादि तृतीयं ज्ञानं तदा प्रथमस्याप्रामाण्यम् । तच्च परत इष्टमेव । द्वितीयस्य तु ज्ञानस्य न तृतीयसंवादकृतं प्रामाण्यम्; अपि तु संकल्प्यमानकुशङ्काऽऽचमनमात्रे तस्य व्यापारः । उक्तं च श्लो. वा. १-१-२-६१— § 3297

एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः ।
प्रार्थ्यते, तावतैवैकं स्वतःप्रामाण्यमश्नुते इति ॥ § 3299

## शब्दस्यापि स्वतःप्रामाण्यम्

तदेवं सर्वप्रमाणानां स्वतःप्रामाण्ये सिद्धे समानन्यायतया शब्दस्यापि तथैव प्रामाण्यं भवति । न च नैसर्गिकमर्थासंस्पर्शित्वमेव शब्दस्य स्वरूपमिति परीक्षितमेतत् पु. ४१६ । किन्त्वर्थबोधजनकत्वात्तस्य नैसर्गिके प्रामाण्ये सति पुरुषदोषानुप्रवेशकारितः क्वचिद्धि विप्लवः । तदुक्तम् श्लो. वा. १-१-२-६२— § 3300

शब्दे दोषोद्भवस्तावद्वक्त्रधीन इति स्थितम् इति ॥ § 3301

## लौकिकवैदिकशब्दानां सर्वेषां स्वतः प्रामाण्यम्

तत्र पौरेषेये वचसि गुणवति वक्तरि तद्गुणापसारितदोषतया तत्प्रामाण्यमौत्सर्गिकमनपोदितं भवति । न तु गुणकृतं तत्प्रामाण्यम्, अनङ्गत्वात्प्रामाण्ये गुणानाम् । बोधकत्वनिबन्धनमेव तदित्युक्तम् । § 3302

ननु तृतीयज्ञानेन आद्यज्ञानेऽप्रामाण्ये गृहीते तेन द्वितीयं ज्ञानं प्रमेत्यावेदितं भवत्येव । ततश्च प्रामाण्यमपि परत एवेत्यत्राह—द्वितीयस्य त्विति । प्रथमज्ञानार्थमेवोत्पन्नं तृतीयज्ञानं द्वितीयज्ञाने न व्यापारयेदिति भावः । जन्मनः इति पञ्चमी । तृतीयज्ञानं निर्दुष्टं चेत् तावतैव आद्यज्ञाने प्रामाण्यनिर्णयः । यदि च तृतीयज्ञानेऽपि दोषशङ्का, तदा चतुर्थज्ञानेन द्वितीयं ज्ञानं संरक्ष्यते इति तदुपरि संबादापेक्षा नास्त्येव, यतः पञ्चमज्ञानेन साध्यं द्वितीयेनैव साध्यते । नैसर्गिके—औत्सर्गिके ॥ § 3303

तत्—प्रामाण्यम् । अर्थप्रकाशकत्वे प्राप्ते प्रामाण्यमपि प्राप्यत एवेत्युक्तं

वेदे तु प्रणेतुः पुरुषस्याभावात् दोषाशङ्कैव न प्रवर्तते, वक्त्रधीनत्वाद्दोषाणाम् । न च बाधकप्रत्ययोऽद्य यावद्वेदार्थे कस्य चिदुत्पन्न इति निरपवादं वेदप्रामाण्यम् । आह च श्लो. वा. १-१-२-६८—

५ ] वैके— nyāma-wit__ka

तत्रापवादनिर्मुक्तिर्वक्त्रभावाल्लघीयसी ।
वेदे तेनाप्रमाणत्वं न शङ्कामधिगच्छति इति ॥§ 3306

तदिदमुक्तम्—तत्प्रमाणं बादरायणस्यानपेक्षत्वात् जै. सू. १-१-५ इति ॥

## दोषाभावमात्रं प्रामाण्यप्रयोजकं, न गुणोऽपि

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमिति युक्तं प्रचक्षते ॥ ७४ ॥§ 3309

गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात् ।
पौरुषेयं तु सत्यार्थमित्ययुक्तं तु मन्वते ॥ ७५ ॥§ 3311

न हि पुरुषगुणानां सत्यतासाधनत्वं
वचसि खलु निसर्गादेव सत्यत्वसिद्धिः ।
गुणमपि नरवाचां विप्लवाधायिदोष-
प्रशमनचरितार्थं सङ्गिरन्ते गुणज्ञाः ॥ ७६ ॥§ 3315

—परतः प्रामाण्यसाधनोपक्रमः—

## वेदे प्रामाण्यनिश्चयस्यावश्यकता

अत्राभिधीयते—प्रत्यक्षादिषु दृष्टार्थेषु प्रमाणेषु प्रामाण्यनिश्चयमन्तरेणैव व्यवहारसिद्धेस्तत्र किं स्वतः प्रामाण्यम् ? उत परतः ? इति विचारेण न नः प्रयोजनम्; अनिर्णय एव तत्र श्रेयान् । अदृष्टे पूर्वम् पु. ४२४ । अनपेक्षत्वात्—स्वप्रामाण्ये परापेक्षाभावात् ॥ § 3316

कुतस्तथा मन्वते ? इत्यत्राह—न हीति । गुणमिति । क्वचिदिति शेषः ॥ § 3317

I.436/KSV

तु विषये वैदिकेष्वगणितद्रविणवितरणादिक्लेशसाध्येषु कर्मसु तत्प्रामाण्यावधारणमन्तरेण प्रेक्षावतां प्रवर्तनमनुचितमिति तस्य प्रामाण्यनिश्चयोऽवश्यकर्तव्यः । तत्र परत एव वेदस्य प्रामाण्यमिति वक्ष्यामः ॥ § 3318

## प्रत्यक्षादावपि स्वतः प्रामाण्यं किं उत्पत्तौ ? उत ज्ञप्तौ ?

यच्चेदमियता विस्तरेण स्वतः प्रामाण्यमुपपादितं, तत् व्याख्येयम् । स्वतः प्रामाण्यमिति कोऽर्थः ? किं स्वत एव प्रमाणस्य प्रामाण्यं भवति ? उत स्वयमेव तत् प्रमाणमात्मनः प्रामाण्यं गृह्णाति ? इति ॥ § 3319

१ ] पौरुषेयं तु— nyāma-wit_ga    १ ] तच्चेद— nyāma-wit_ka

## ज्ञप्तौ प्रामाण्यस्य स्वतस्त्वं न संभवति

न तावत् स्वयमेव प्रामाण्यग्रहणमुपपन्नम्; अप्रामाणिकत्वात् । तथा हि—यदेतन्नीलप्रकाशने प्रवृत्तं प्रत्यक्षं तन्नीलं प्रति तावत् प्रत्यक्षं, प्रमाणं तावदिन्द्रियार्थसन्निकर्षोत्पन्नमिति जानीम एवैतत्; किमत्र विचार्यते ? § 3320

प्रामाण्यपरिच्छेदे तु किं तत् प्रमाणमिति चिन्त्यताम् । प्रत्यक्षम् ? अनुमानं वा ? प्रमाणान्तराणामनाशङ्कनीयत्वात् ॥ § 3321

वक्ष्याम इति । अत्रैवाह्निके विपरीतख्यातिसमर्थनानन्तरं वक्ष्यति ॥ § 3322

नीलं प्रतीति । विषयं प्रति प्रकाशरूपं तत्, नात्मानं प्रतीत्यर्थः । ज्ञानानुमेयतावादिनां भाट्टानामेवात्र पूर्वपक्षित्वमिति स्मर्तव्यम् । ज्ञानस्वप्रकाशत्ववादस्तु नवमाह्निके परीक्ष्यते । इन्द्रियार्थसन्निकर्षोत्पन्नत्वात् स्वरूपतः प्रमाणम् । एतदुभयांशे न चर्चा । प्रामाण्यं उत्पत्तावपि परत एवेति आद्यः कल्पः उपरिष्टात् विचार्यते । ग्रहणस्यैव मुख्यत्वात् बुध्या सन्निहितत्वाद्वा एतत्कल्पस्य प्रथमं विचारः ॥ § 3323

प्रमाणान्तराणामित्यादि । उपमानं शक्तिग्राहकं प्रमाणम्, अतिदेशवाक्यमूलकं च । शाब्दस्थले तु परत एव प्रामाण्यमित्यनुपदमुक्तम् ॥ § 3324

I.437/KSV

## प्रत्यक्षेण स्वगतप्रामाण्यग्रहणासंभवः

न तावत् स्वप्रामाण्यपरिच्छेदे तत्प्रत्यक्षं प्रमाणम्, तद्धि ज्ञानस्य वा प्रामाण्यं गृह्णीयात् तत्फलस्य वा । तत्र ज्ञातृव्यापारात्मनो ज्ञानस्य भवन्मते नित्यपरोक्षत्वात्, प्रत्यक्षस्य स्वतः परिच्छेदानुपपत्तौ तत्प्रामाण्यस्यापि कथं प्रत्यक्षेण ग्रहणम् ॥ § 3325

फलस्याप्यर्थप्रकाशनाख्यस्य संवेदनात्मनो नेन्द्रसंसर्गयोग्यता विद्यते, येन तद्गतमपि यथाऽर्थत्वलक्षणं प्रामाण्यमिन्द्रियव्यापारलब्धजन्मना प्रत्यक्षेण परिच्छिद्येत ॥ § 3326

न च मानसमपि प्रत्यक्षं फलगतयथाऽर्थतावसायसमर्थमिति कथनीयम्, तदानीमननुभूयमानत्वात् । न हि नीलसंवित्प्रसवसमनन्तरं यथाऽर्थेयं नीलसंवित्तिरिति संवेदनान्तरमुत्पद्यमानमनुभूयते । अनुभवे वा ततो द्वितीयात्प्रथमोत्पन्ननीलज्ञानयाथार्थ्यग्रहणान्न स्वतःप्रामाण्यनिश्चयः स्यात् । तस्मान्न प्रत्यक्षस्यैष विषयः ॥ § 3327

## अनुमानेन स्वगतप्रामाण्यग्रहणासंभवः

७ ] चिन्त्यम्— nyāma-wit__ka

अनुमानेनापि कस्य प्रामाण्यं निश्चीयते ? ज्ञानस्य ? फलस्य वा ? इति पूर्ववद्वाच्यम् । फलस्य तावत्तन्निश्चये लिङ्गत्वमेव तावन्न कस्यचित्पश्यामः । ज्ञातृव्यापरात्मनो ज्ञानस्य तु स्वकार्यं भवेदपि लिङ्गम्, फलस्य क्रियामात्रव्याप्तिग्रहणात्स्वरूपसत्तामात्र- § 3328

भवन्मते—भट्टमते । ज्ञानसामान्यं अतीन्द्रियं, ज्ञाततालिङ्गकानुमितिग्राह्यमिति मते प्रत्यक्षं आत्मानमप्यगृह्णत् स्वगतं प्रामाण्यं कथं स्वयं गृह्णीयात् ? § 3329

अननुभूयमानत्वात् । ज्ञानानामयौगपद्यात् । ननु ज्ञानायौगपद्येऽपि तद्गर्भत्वादुत्तरस्य मानसप्रत्यक्षस्य तद्गतं प्रामाण्यं गृह्यत एवेति चेत्, तर्हि परतः प्रामाण्यमेवागतमित्याह—अनुभवे वेति ॥ § 3330

फलस्य तावदिति । फलं हि स्वकारणानुमाने लिङ्गं भवितुमर्हति, कार्येण कारणानुमानात् । न तु फलस्यानुमानेऽन्यल्लिङ्गं, भवेत् । स्वकार्यं—उक्तज्ञानफलम् । क्रियामात्रेति । फलेन हि तद्धेतुभूतज्ञानरूपक्रियामात्र

मनुमापयितुमुत्सहते, न यथाऽर्थत्वलक्षणं प्रामाण्यम् । तद्धि फलं निर्विशेषणं वा स्वकारणस्य ज्ञातृव्यापारस्य प्रामाण्यनुमापयेत् ? यथार्थत्वविशिष्टं वा ? आद्ये पक्षे यतः कुतश्चन फलात् तत्प्रामाण्यानुमाने नेदानिं किञ्चिदप्रमाणं भवेत् । उत्तरोऽपि नास्ति पक्षः, फलगतयाथाऽर्थ्यपरिच्छेदोपायाभावादित्युक्तम् ॥

### प्रमाण्यस्य स्वतस्त्वे यथार्थायथार्थज्ञानयोरविशेषापत्तिः

ननु ! स्वानुभव एवात्रोपायः । तद्धि नीलसंवेदनतया फलं स्वत एव प्रकाशते । नीलसंवेदनत्वमेव चास्य यथाऽर्थत्वं, नान्यत्—यद्येवं शुक्तिकायामपि रजतसंवेदने समानो न्यायः । न हि रजतसंवेदनादन्या यथाऽर्थत्वसंवित्तिरिति ॥

### प्रामाण्यग्रहस्यौत्सर्गिकत्वं न युक्तम्

ननु ! तत्र बाधकप्रत्ययोपनिपातेनायथाऽर्थत्वमुपनीयते । नूनं चास्य मिथ्यादर्शनेषु देशान्तरे वा शुक्तिकारजतादिज्ञाने, कालान्तरे कूटकार्षापणादिप्रतीतौ, पुरुषान्तरे वा जाततैमिरिके द्विचन्द्रप्रतीतौ, अवस्थान्तरे पीतशङ्खादिप्रतिभासे भवति बाधक प्रत्ययः । तदसत्त्वे न तच्छङ्का युक्तिमतीत्युक्तमेव ॥ मेवानुमातुं शक्यं, न तु तद्गतप्रामाण्यमपि । एतदेव विशदयति—तद्धीति । निर्विशेषणं फलं—यत्किञ्चित्फलम् । यतःकुतश्च नेति । भ्रमात्मकज्ञानस्यापि तदनुगुणं फलं अस्त्येव । उक्तं, अनुपदमेव ॥ § 3331

नीलसंवेदनतयेति । न हि संवेदनमात्रं फलं; असंभवात्, अप्रयोजकत्वाच्च । शुक्तिकायामपीति । न हि शुक्तिरजतज्ञानसत्यरजतज्ञान-

५ ] द्वाद्यम्— nyāma-wit__kha
५ ] तावतुर्निश्चये— nyāma-wit__ka
६ ] भवदपि— nyāma-wit__ka
१८ ] ज्ञान— nyāma-wit__ka
२३ ] सोऽनुभव— nyāma-wit__kha
२८ ] न यथा— nyāma-wit__ka

योरुत्पत्तिकाले कश्चन विशेषः अनुभवसिद्ध इत्यर्थः ॥ § 3332

ननु यत्रानन्तरं बाधकज्ञानमनुत्पन्नं तत्राप्रामाण्यग्रहः कथम् ? इति शङ्कायां, देशान्तरे, कालान्तरे, पुरुषान्तरे, अवस्थान्तरे वा बाधकप्रत्ययः स्यादेवेत्याह—नूनं चेति । उक्तमेव—दोषज्ञाने त्वन्ने पु-४३२. इत्यादि ॥ § 3333

I.439/KSV

सत्यमुक्तमयुक्तं तु । एवं हि वदता बाधकाभावज्ञानाधीनं प्रामाण्यमभिहितं भवति । तच्च तात्कालिकं ? कालान्तरभावी वा ? इति कल्प्यमानं नोपपद्यत इति दर्शितम् पु-४२६ । तस्मादुत्पद्यमानमेव प्रमाणमात्मनः प्रामाण्यं निश्चिनोतीति न युक्तमेतत् ॥ § 3334

## प्रामाण्यसंशयादेव प्रवृत्तिर्युज्यते

यदि तु प्रसवसमय एव ज्ञानस्य प्रामाण्यं निश्चिनुयामः, तर्हि ततः प्रवर्तमाना न क्वचिदपि विप्रलभ्येमहि; विप्रलभ्यामहे तु । तेन मन्यामहे—न निश्चितं तत्प्रामाण्यं, संशयादेव व्यवहराम इति ॥ § 3335

## प्राथमिकज्ञानं एकतरकोटिकसंशयरूपमेव

ननु ! संशयोऽपि तदा नानुभूयत एव किमिदं रजतम् ? उत न रजतम् ? इति; अपि तु रजतमित्येव प्रतीतिः । न हि संशयानाः प्रवर्तन्ते लौकिकाः; किन्तु निश्चिन्वन्त एव विषयमिति किमननुभूयमान एवारोप्यते संशयः ? § 3336

एकतरग्राह्यप्ययं प्रत्ययः, तन्निश्चयोपायविरहात् संशयकोटिपतित एव बलाद्भवति, यथा—अस्ति कूपे जलमिति भिक्षवो § 3337

प्रसवसमयः—उत्पत्तिक्षणः । पूर्वं हि प्रामाण्यनिश्चयस्य प्रवृत्त्यनङ्गत्वं साधितमेव । तत्रैवं प्रवृत्त्यर्थमपि प्रामाण्यनिश्चयानपेक्षणात्, प्रवृत्त्यनन्तरं तु सुतरां तदनपेक्षणात्, ज्ञानोत्पत्तिकाल एव यदि न गृहीतं प्रामाण्यं, तर्हि कदापि ग्रहणं न स्यादित्यतः प्रामाण्यं स्वत इति सिद्धं—इति खलु तेषां वादः । एवञ्च प्रामाण्यनिश्चयस्य प्रवृत्त्यनङ्गत्वात्, तदानीं तदग्रहणमपि युज्यत एव । तर्हि कदापि तद्ग्रहणं न स्यादित्येतत्तु पृथग्विचारयामः । परन्तु ज्ञानोत्पत्तिकाले प्रामाण्याग्रहणमित्येव युक्तमिति भावः ॥ § 3338

रजतमित्येवेति । न हि तत्र कोट्यन्तरोपस्थितिर्दृश्यते ॥ § 3339

संशयकोटिपतित एवेति । अयमत्र निष्कर्षः—एवं भिक्षवो मन्यन्ते । इति कथने, वाक्यात् कोट्यन्तरानुल्लेखनेऽपि अस्त्येव मानसिकी कोट्य-

---

१६ ] विप्रलभेमहि— nyāma-wit_ka

१८--१९ ] रजतम्— nyāma-wit_kha

न्तरोपस्थितिः । कुत्रचित् अन्यतरकोटेः औत्कट्यादपि कोट्यन्तरानु

मन्यन्ते—इति । एवं रजतमिदमित्येकपक्षग्राह्यपि तदानीं प्रतिभासः वस्तुवृत्तेन संशय एव । यदि हि प्रमाणतयाऽसौ गृह्येत, कथं क्वचिद्विसंवदेत् ? अप्रमाणतया तु गृह्यमाणः कथं पुमांसं प्रवर्तयेत् ?

उभाभ्यामपि रूपाभ्यां अथ तस्यानुपग्रहः ।
सोऽयं संशय एव स्यात् इति किं नः प्रकुप्यसि ? ॥ ७७ ॥§ 3342

**प्राथमिकज्ञानस्य संशयात्मकापर्यवसानम्**

यत्तु नानुभूयते संशय इति—सत्यम्—अननुभूयमानोऽपि न्यायादभ्यस्ते विषयेऽविनाभावस्मरणात् स परिकल्प्यते; निश्चयनिमित्तस्य तदानीमविद्यमानत्वात् । संशयजननहेतोश्च सामग्र्याः सन्निहितत्वात् । तथा हि—यथाऽर्थेतरार्थसाधारणो धर्मो बोधरूपत्वमूर्ध्वत्वादिवत् तदा प्रकाशत एव । न च प्रामाण्याविनाभावी विशेषः कश्चन तदानीमवभाति । तदग्रहणे च समानधर्माधिगमप्रबोध्यमानवासनाधीना तत्सहचरितपर्यायानुभूतविशेषस्मृतिरपि संभवत्येवेतीयतीयं सा संशयजननी सामग्री सन्निहितैवेति कथं तज्जन्यः संशयः न स्यात् ?

**प्राथमिकज्ञाने तत्काले तत्र विशेषग्रहणासंभवः**

ननु ! प्रमाणभूते प्रत्यये जायमान एव तद्गतो विशेषः परिस्फुरतीति कथं विशेषाग्रहणमुच्यते ? ल्लेखः, कुत्रचित्तु कोट्यन्तरानुल्लेखः अवसराभावादपि । इदमेव ज्ञानं संशयक्षमं अनवधारणात्मकं प्राथमिकप्रवृत्तिहेतुः । एतेन कोटिद्वयानवमर्शात् पु-४४१ इति वक्ष्यमाणेन न विरोधः । ४४२ पुटोऽपि द्रष्टव्यः ॥ § 3343

उभाभ्यां—प्रामाण्याप्रामाण्याभ्याम् ॥ § 3344

संशयः—संशयरूपः । अभ्यस्ते—असकृदनुभूते । एतादृशेषु इतरस्थलेषु तथानुभवात् इत्यर्थः । इतरार्थः—अयथार्थः ॥ § 3345

जायमान एवेति । अयमर्थः ४३० पु पूर्वमुपपादितः ॥ § 3346

I.441/KSV

भो महात्मन् ! कथ्यतां सः विशेषः । न हि तं वयमनुपदिष्टं कृशमतयो जानीमः । यदि तावत् स्पष्टता विशेषः; शुक्तिकायामपि रजतावभासः स्पष्ट एव ! न हि तत्रानध्यवसायकालुष्यं किञ्चिदस्ति ॥ § 3347

अथ निष्कम्पता, शुक्तिकायामपि रजतावभासो निष्कम्प एव । न ह्यसौ जायमान एवाङ्गुल्यग्रादिवाक्यकरणबोधवत्कम्पमानो जायते ॥ § 3348

अथ निर्विचिकित्सता, शुक्तिकायामपि रजतावभासो निर्विचिकित्स एव, किंस्विदिति कोटिद्वयानवमर्शात् ॥ § 3349

२० ] वासना— nyāma-wit_ka

अथ यस्मिन् सति बाधा न दृश्यते सोऽस्य विशेष इति, नन्वेतदेव पृच्छामि—कस्मिन् सति बाधा न दृश्यत इति; सर्वावस्थस्य बाधदर्शनात् । न चासौ चिरमपि चिन्तयित्वा विशेषो दर्शयितुं शक्यः ॥ § 3350

अथ स्वविषयाव्यभिचारित्वमेव विशेषः; स तदानीं नावभासत इत्युक्तम् पु ४२७ । अपि च यदि तथाविधोऽपि विशेषः समस्ति, तर्हि यत्र ज्ञानेऽसौ न दृश्यते, ततः किमिति प्रवर्तते ? तद्विशेषदर्शी वा प्रवर्तमानः कथं विप्रलभ्येतेत्युक्तम् ॥ § 3351

## प्राथमिकज्ञानस्यानिर्णयात्मकत्वेऽपि न प्रवृत्त्यादिविरोधः

यदयं स्थाणुपुरुषसंशयवदसंवेद्यमानोऽपि तदानीमस्त्येव बोधे यथाऽर्थेतरत्वसंशयः ॥ § 3352

स्पष्ट एवेति । न हि विषयप्रकाशनांशे वैलक्षण्यं दृश्यते ॥ § 3353

निष्कम्पता—विषयाचाञ्चल्यम्, निष्कम्पप्रवृत्त्यङ्गतोपयुक्तम् ॥ § 3354

निर्विचिकित्सता—असंशयरूपता, इयं च प्रवृत्त्यौत्कट्यप्रतिबन्धिका ॥ § 3355

यस्मन्नित्यादि—बाधदर्शनानर्हतेति यावत् । सर्वावस्थस्येति । वस्तुतः प्रमात्मकमपि ज्ञानं कदाचित् विप्रलंभकवाक्यादिभिः अगृहीतदोषैः बाध्यत एव ॥ § 3356

किमिति—कथम् ? § 3357

आद्यज्ञानविषये ४३९ पुटे टीका पूर्वोक्तं अभिसन्धायाह—स्थाणुपुरुषेत्यादि ॥ § 3358
I.442/KSV

न चासौ कल्प्यमानोऽपि व्यवहारस्य लोपकः ।
तेनैव व्यवहारस्य सिद्धत्वात्सर्वदेहिनाम् ॥ ७८ ॥§ 3360

अतश्च संशयादेव व्यवहारं वितन्वताम् ।
लौकिकानां प्रयोक्तव्याः नाभिशापपरंम्पराः ॥ ७९ ॥§ 3362

## प्राथमिकज्ञानं अनवधारणरूपम्

१० ] विशेषयितुं— nyāma-wit__kha
८ ] स्थाणुर्नपुरुषः— nyāma-wit__kha ---Note : अनन्तरपुटानुवर्ति
१५ ] निश्चय— nyāma-wit__ga

न च सर्वथा संशयसमर्थनेऽस्माकमभिनिवेशः । प्रामाण्यं तु ज्ञानोत्पत्तिकाले गृहीतुमशक्यमिति नः पक्षः । प्रामाण्याग्रहणमेवानध्यवसायस्वभावं संशयशब्देनेह व्यपदेक्ष्यामः । प्रामाण्याग्रहणं च प्रदर्शितम्; प्रत्यक्षेणानुमानेन वा सता प्रमाणेनात्मनः प्रमाणत्वपरिच्छेदायोगात् । तस्मात् स्वयं प्रामाण्यं गृह्यत इत्येष दुर्घटः पक्षः ॥ § 3363

## प्रामाण्यं स्वत उत्पद्यत इति पक्षोऽपि न युक्तः

अथ स्वतः प्रामाण्यं भवतीत्येष पक्ष आश्रीयते, सोऽप्ययुक्तः । कार्याणां कारणाधीनजन्मत्वात्, प्रामाण्यस्य च कार्यत्वात् । अस्ति च प्रामाण्यम्, वस्तु च तत्, न च नित्यम्, इति कार्यमेव तत् । कार्यं च कार्यत्वादेव न स्वतो भवितुमर्हति इति ॥ § 3364

## प्रमाणज्ञानं न ज्ञानसामान्यसामग्रीजन्यम्

अथोत्पत्तौ स्वकारकातिरिक्तगुणानपेक्षित्वमेव प्रामाण्यस्य स्वतोभवनमुच्यते, न पुनरकार्यत्वमेवेति—तदप्यसम्यक्—सम्यग्रूपस्य कार्यस्य गुणवत्कारकव्यतिरेकेणानिष्पत्तेः । द्विविधं कार्यं § 3365

ननु संशयात् प्रवृत्तिः कथमित्यत्राह—न चेत्यादि । तेनैव— अनवधारणात्मकज्ञानेनैव । क्वचिदनधिकव्ययायाससाध्ये, अतादृशेऽपि उत्साहाद्यतिशये सति वा, संशयादपि प्रवृत्तिः लोके दृश्यत इत्यप्यवधेयम् ॥ § 3366

कार्याणामित्यादि । स्वत उत्पद्यते इत्युक्ते शब्दतः कारणसामान्यापेक्षाभावः प्रतीयते इति इदं दूषणमुक्तम् ॥ § 3367

स्वत उत्पद्यते इत्यस्य तत्सम्मतमर्थमनूद्य दूषयति—अथेति । स्वं—ज्ञानम् ॥ § 3368

I.443/KSV

भवति, सम्यगसम्यग्वा । तत्र गुणवता कारणेन सम्यक्कार्यमुत्पद्यते, दोषवता त्वसम्यगिति ॥ § 3369

## सामान्यसामग्रीजन्यं तु कार्यं कुत्रापि न भवति

निर्दोषं निर्गुणं वाऽपि न समस्त्येव कारणम् ।
अत एव तृतीयस्य न कार्यस्यास्ति संभवः ॥ ८० ॥§ 3371

सम्यज्ज्ञानोत्पादकं कारकं धर्मिस्वरूपातिरिक्तस्वगतधर्मसापेक्षं कार्यनिर्वर्तकमिति साध्यो धर्मः, कारकत्वात्, मिथ्याज्ञानोत्पादककारकवत् । सम्यज्ज्ञानं वा धर्मि, स्वरूपातिरिक्तधर्मसम्बद्ध कारकनिष्पाद्यमिति साध्यो

धर्मः, कार्यत्वात्, मिथ्याज्ञानवत् ॥ § 3372

## प्रमाहेतोः गुणस्य सद्भावे प्रमाणम्

आयुर्वेदागमाच्चेन्द्रियगुणान् प्रतिपद्यामहे । यदमी वैद्याः स्वस्थवृत्तेरौषधोपयोगमुपदिशन्ति, तत् गुणोपयोगायैव; न दोषशान्तये । दृश्यते च तदुपदिष्टौषधोपयोगादिन्द्रियातिशयः । तद्विषय § 3373

निर्दोषमित्यादि । निर्विशेषं न सामान्यम् इति हि न्यायः । नीलपीतादियाबद्घटविशेषा एव हि घटसामान्यं नाम । नीलपीतादिविशेषरहितं घटो नाम सामान्यं किञ्चिन्नास्त्येव । अत एव घटोत्पत्तिस्थले नीलाद्यन्यतरविशेषसामग्री आवश्यकी । तत्परित्यज्य घटसामान्यसामग्रीति न काचिदऽस्ति । यद्यपि सामान्यकार्यकारणभावः विशेषकार्यकारणभावः इत्यादिव्यवहारोस्ति, परन्तु इदं निरूपणमात्रम् । विषयदृष्ट्या तु विशेषसामग्रीमन्तरा सामान्यसामग्री न तिष्ठेदेव । न हि नीरूपः कश्चित्कपालः तिष्ठेत् । एवं ज्ञानं प्रमाभ्रमभेदभिन्नं चेत्, तयोस्सामग्रीभेदोऽपि दुरपह्नवः । अतश्च ज्ञानसामान्यसामग्र्यैव प्रमाया उत्पत्तिरिति बालिशभाषितम् ॥ § 3374

सम्यज्ज्ञानेत्यादि । आद्यं अनुमानं सामग्रीपक्षकं, द्वितीयं सामग्र्य कार्य पक्षकम् ॥ § 3375

आयुर्वेदपदं संज्ञाऽत्र । ननु आयुर्वेदः रोगरूपदोषनिवृत्तिमेव वक्ति, न तु गुणमपीति चेत्तत्राह—स्वस्थवृत्तेरिति । रोगनिवृत्त्यनन्तरमपि हि पुष्टयादिगुणलाभायाप्यौषधमुपदिश्यत एव ॥ § 3376

I.444/KSV

एव च लोके नैर्मल्यव्यपदेशः, न दोषाभावमात्रप्रतिष्ठ इत्यलं विमर्देन । तस्मादुत्पत्तौ गुणानपेक्षत्वात् स्वतःप्रामाण्यमिति यदुक्तं तदयुक्तम् ॥ § 3377

## केवलस्य प्रमाणस्य स्वकार्ये न परानपेक्षत्वम्

यदपि च स्वकार्यकरणे प्रमाणस्य परानपेक्षत्वमुच्यते—तदपि व्याख्येयम् । किं प्रमाणं स्वकार्यकरणे निरपेक्षम् ? सामग्री वा ? तदेकदेशो वा ? तज्जन्यं वा ज्ञानमिति ॥ § 3378

तत्र सामग्र्याः सत्यं स्वकार्यजन्मनि नैरपेक्ष्यमस्ति । न तु तावता स्वतः प्रामाण्यम्, तत्परिच्छेदस्य परायत्तत्वात् ॥ § 3379

सामग्र्यन्तर्गतकारकस्य स्वकार्ये परापेक्षत्वमपरिहार्यम्; एकस्मात् कारकात्कार्यनिर्वृत्त्यभावात् ॥ § 3380

---

३ ] कारकधर्मि— nyāma-wit__kha
५ ] सम्बन्धवत्कारक— nyāma-wit__kha
७ ] वैद्याद्य— nyāma-wit__kha

ज्ञानं फलमेव, न प्रमाणमित्युक्तम् पु. १८२ । न च फलात्मनस्तस्य स्वकार्यं किञ्चिदस्ति, यत्र सापेक्षत्वमनपेक्षत्वं वाऽस्य चिन्त्येत । पुरुषप्रवृत्त्यादौ तु तदिच्छाद्यपेक्षत्वं विद्यत एवेति यत्किञ्चिदेतत् ॥ § 3381

## प्रामाण्यनिश्चयस्य पराधीनत्वम्

यदपि प्रामाण्यनिश्चये नैरपेक्ष्यमभ्यधायि पु. ४२५—तदपि न सांप्रतम् । प्रामाण्यनिश्चयस्य हि द्वयी गतिः, नास्तित्वम्, कारणापेक्षिता वा; न पुनरस्ति च प्रामाण्यनिश्चयः, कारणानपेक्षश्चेति § 3382

किं प्रमाणमिति । प्रमाणपदं हि प्रमायां तत्करणे च वर्तते । प्रमाकरणमपि यावत्सामग्रीरूपं, प्रत्येकशोऽपि, प्रत्येकमपि करणत्वानपायात् । तथा च सामग्र्याः स्वकार्यकरणे नैरपेक्ष्यमुच्यते ? उत प्रत्येकं करणस्य तत्त्वमुच्यते ? उत फलरूपप्रमायाः तत्त्वमुच्यते ? इति विकल्पः ॥ § 3383

सत्यं नैरपेक्ष्यमिति । इतरापेक्षायां हि सामग्रीवैकल्यं सिद्धमेव । न त्विति । प्रमासामग्री हि प्रमां जनयेत्, न तु प्रमात्वमवगमयेत् ॥ § 3384

पूर्वं तस्य प्रमाणभावे तु फलं हानादिबुद्धयः पु. १७४ इत्युक्तं स्मरन्नाह—पुरुषेति ॥ § 3385

द्वयी गतिरिति । तृतीया तु गतिः सदातनत्वरूपाऽननुभवपराहता ।

शक्यते वक्तुम् । तत्र प्रथमप्रवर्तकप्रतिभासप्रसवसमये तावन्नास्त्येव प्रामाण्यनिश्चय इत्युक्तम् पु. ४४० । न हि नीलग्राहिणा प्रमाणेन नीलस्वरूपमिव स्वप्रामाण्यमपि तदानीं निश्चेतुं शक्यत इति । कालान्तरे तत्प्रामाण्यनिश्चयः सत्यमस्ति, न तु तत्र नैरपेक्ष्यम्, प्रवृत्तिसामर्थ्याधीनत्वात्तन्निश्चयस्य ॥

## ज्ञानानामस्थिरत्वेऽपि प्रामाण्यं परतोग्रहीतुं शक्यम्

ननु । क्षणिकत्वात्कालान्तरे ज्ञानमेव नास्ति, कस्य प्रामाण्यं निश्चिनुमः ? शिशुचोद्यमेतत्—अप्रामाण्यमपि बाधकप्रत्ययादिना कालान्तरे कस्य निश्चिनुमः ? क्षणिकत्वेन ज्ञानस्यातीतत्वात् । अतिक्रान्तस्यापि स्मर्यमाणस्य ज्ञानस्य, तदुत्पादकस्य वा वर्तमानस्य कारकचक्रस्येति चेत्—प्रामाण्यनिश्चयेऽपि समानोऽयं पन्थाः ॥

## प्रामाण्यस्य परतोग्रहणेऽपि नान्योन्याश्रयादिः

यत्पुनः कालान्तरे तन्निश्चयकरणे दूषणम्—इतरेतराश्रयत्वं वा ? मुण्डितशिरोनक्षत्रान्वेषणवद्वैयर्थ्यं वेति वर्णितम् पु. ४२८— तत्रादृष्टे विषये प्रामाण्यनिश्चयपूर्विकायाः प्रवृत्तेरभ्युपगमान्नेतरेतराश्रयं चक्रकं वा । दृष्टे विषये ह्यनिर्णीतप्रामाण्य एवार्थसंशयात् प्रवृत्तिरूपम्, अनर्थसंशयाच्च निवृत्त्यात्मकं व्यवहारमारभमाणो दृश्यते लोकः । एतदेव युक्तमित्युक्तं पु. ४३९ न प्रामाण्यनिश्चयपुरस्सरं प्रवर्तनमिति कुत इतरेतारश्रयम् ॥

१२ ] पेक्षिता— nyāma-wit__ka
१३ ] कारणता— nyāma-wit__ka

प्रवृत्तीत्यादि । न हि कालान्तरेऽपि पूर्वोत्पन्नप्रमाणसामग्री अवतिष्ठेत ॥ § 3386

अप्रामाण्यमपीति । अप्रामाण्यं परत इति हि तन्मतम् । पूर्णसामग्र्याः सत्त्वे कार्यावश्यंभवात्, कार्यस्य पूर्वमेव निष्पन्नत्वात् वर्तमानस्य कारकचक्रस्येत्युक्तम् ॥ § 3387

अनर्थसंशयात्—बलवदनिष्टानुबन्धित्वसंशयात् । प्रवर्तनं नोक्तं इत्यन्वयः ॥ § 3388

I.446/KSV

वैयर्थ्यं तु दृष्टे विषये सत्यमिष्यते, किन्तु तत्र प्रवृत्तिसामर्थ्येन प्रामाण्यं निश्चिन्वन् आप्तोक्तत्वस्य हेतोः प्रामाण्येन व्याप्तिमवगच्छतीति अदृष्टविषयोपयोगिवेदादिप्रमाणप्रामाण्यपरिच्छेदे पारंपर्येणोपायत्वात् स्वविषये व्यर्थोऽप्यसौ तत्र सार्थकतामवलम्बत इत्यदोषः ॥ § 3389

## प्रवृत्तिसामर्थ्यं नाम अर्थक्रियाज्ञानमेव

किं पुनरिदं प्रवृत्तिसामर्थ्यं नाम ? यतः प्रामाण्यनिश्चयमाचक्षते नैय्यायिकाः—उच्यते—पूर्वप्रत्ययापेक्षोत्तरा संवित् प्रवृत्तिसामर्थ्यं, विशेषदर्शनं वेति पूर्वाचार्यैस्तत्स्वरूपमुक्तम् । तत्पुनर्नातीव हृदयङ्गममिति भाष्यकृतैव—समीहा प्रवृत्तिरित्युच्यते, सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः इति वदताऽर्थक्रियाख्यफलज्ञानमेव प्रवृत्तिसामर्थ्यमिति निर्णीतम् ॥ § 3390

## अर्थक्रियाज्ञाने प्रामाण्यगवेषणमनपेक्षितम्

यत्पुनः अर्थक्रियाज्ञानस्यापि पूर्वस्मात् को विशेषः ? तस्यापि चान्यतः प्रामाण्यनिश्चयापेक्षायामनवस्थेत्युक्तम् पु. ४२७— तदपि सकलप्राणभृत्प्रतीतिसाक्षिकव्यवहारविरोधित्वादसम्बद्धाभि § 3391

ननु तर्हि लोकोऽपि कुत्रचित् दृश्यमानायाः प्रामाण्यनिश्चयार्थप्रवृत्तेः का गतिः ? इति चेत्, न सर्वथा वैय्यर्थ्यमित्याह—किन्त्विति । आप्तोक्तत्वस्य—आप्तोक्तत्वरूपस्य ॥ § 3392

आचक्षते—प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् इति उपक्रमभाष्यम् । पूर्वप्रत्ययेत्यादि । संवादरूपेति यावत् पूर्वं । पु. ४२७ उपपादितदिशा संवादात् प्रामाण्यग्रहः दुर्घट इत्यतः—विशेषदर्शनं वेति । अर्थक्रियाज्ञानस्यापि विशेषदर्शनविशेषत्वात् तादृशं स्वसम्मतमेव । परन्तु संशयोत्तरस्तले

२४ ] स्मर्यमाणस्य— nyāma-wit_ka; nyāma-wit_kha
३१--३२ ] तदुत्पादस्य— nyāma-wit_kha
३२ ] लीन— nyāma-wit_kha
२५ ] नान्यन्तः— nyāma-wit_ka

संशयनिवर्तकं यत् विशेषधर्मदर्शनं, तत्तु न साक्षात् प्रामाण्यनिश्चायकम्, अपितु अर्थक्रियाज्ञानद्वारैवेति अस्यैव प्रामाण्यनिश्चायकत्वं युक्तमित्यभिप्रायेण—अतीवेति ॥ § 3393

I.447/KSV

धानम्; अपरीक्षणीयप्रामाण्यत्वादर्थक्रियाज्ञानस्य। प्रवर्तकं न सर्वज्ञानं प्रवृत्तिसिद्धये परीक्षणीयप्रामाण्यं वर्तते। फलज्ञाने तु सिद्धप्रयोजनत्वात् प्रामाण्यपरीक्षापेक्षैव नास्तीति कुतोऽनवस्था ? § 3394

## अर्थक्रियाज्ञानस्य साक्षादनुभवरूपत्वेन प्रामाण्यनिश्चयानपेक्षत्वम्

संशयाभावाद्वा तत्प्रामाण्यविचाराभावः। प्रवर्तकं हि प्रथममुदकज्ञानमविद्यमानेऽपि नीरे मिहिरमरीचिषु दृष्टमिति तत्र संशेरते जनाः। अर्थक्रियाज्ञानं तु सलिलमध्यर्तिनां भवत् तदविनाभूतमेव भवतीति न तत्र संशयः। तदभावान्न तत्र प्रामाण्यविचारः, विचारस्य संशयपूर्वकत्वात् ॥ § 3395

## अर्थक्रियाज्ञानं विशेषदर्शनरूपं च

विशेषदर्शनाद्वा फलज्ञाने प्रामाण्यनिश्चयः। कः पुनरयं विशेष इति चेत्, योऽयं शौचाचमनमज्जनामरपितृतर्पणपटक्षालनश्रमतापनोदनविनोदनाद्यनेकप्रकारनीरपर्यालोचनप्रबन्धः, न ह्ययमियान् कार्यकलापो मिथ्याज्ञानात्प्रवृत्तस्य क्वचिदपि दृष्टः ॥ § 3396

## स्वाप्निकार्थक्रियाज्ञानात् जाग्रदर्थक्रियाज्ञानं विलक्षणम्

स्वप्नेऽप्यस्य प्रबन्धस्य दर्शनमस्तीति चेत्—न—स्वप्नदशाविसदृशविस्पष्टजाग्रदवस्थाप्रत्ययस्य संवेद्यत्वात्। एषोऽस्मि, § 3397

प्रामाण्यापेक्षानपेक्षयोः संभावितं विनिगमकमाह—प्रवर्तकमिति। बहुवित्तव्ययायाससाध्ये यागादौ प्रवर्तकज्ञानं प्रामाण्यमपेक्षत एवेत्यनुपदमुक्तत्वात्—सर्वपदम्। सिद्धप्रयोजनत्वात्—पिपासाशान्त्यादेः स्पष्टं अनुभवात् ॥ § 3398

प्रवर्तक-फलज्ञानयोर्वैषम्यमेवोपपादयति प्रकारान्तरेण—संशयाभावाद्वेति। तदविनाभूतं—अर्थाविनाभूतं; न हि मरीचिकाजलेन पिपासाशान्तिः, शरीरक्लेदो वा संभाव्येतेत्याशयः ॥ § 3399

स्वप्नदशाविसदृशेति। स्वाप्निकजलादिना स्वाप्निकशरीरक्लेदादिरनुभूयत एव। जाग्रत्कालिकशरीरक्लेदस्तु नास्त्येवेति अस्ति महत् वैलक्षण्यम्। यद्यपि चरमधातुविसर्गोऽपि स्वप्ने सीमन्तिनीमन्तरेण भवति इत्युक्तम् पु.

४२७; अथापि, अधीरप्रकृतीनां रज्जौ सर्पज्ञानमेव यथा भय-कम्प

जागर्मि, न स्वपिमि—इति स्वप्नविलक्षणमनिद्रायमाणमानसः प्रत्यक्षमेव जाग्रत्समयं सकलो जनश्चेतयते । न च तस्मिन्नवसरे सलिलमन्त्रेणैताः क्रियाः प्रवर्तमाना दृश्यन्त इति तद्विशेषदर्शनात् सुज्ञानमर्थक्रियाज्ञानप्रामाण्यम् ॥

### कारणदोषाभावाच्च अर्थक्रियाज्ञाने प्रामाण्यम्

कारणपरीक्षातो वा तस्मिन् प्रामाण्यं निश्चेष्यामः । यथोक्तं भवद्भिरेव—प्रयत्नेनान्विच्छन्तो न चेद्दोषमवगच्छेम तत्प्रमाणाभावात्, अदुष्टमिति मन्येमहि शा. भा १-१-५ इति । तथा हि— विषयस्य चलत्वसादृश्यादिदोषविरहः, आलोकस्य मलीमसत्वादिकारणवैकल्यं, अन्तःकरणस्य निद्राद्यदूषितत्वम्, आत्मनः क्षुत्प्रकोपाद्यनाकुलत्वम्, ईक्षणयुगलस्य तिमिरपटलादिविकलत्वमित्यादि स्वयं च कार्यद्वारेण, परोपदेशेन च सर्वं सुज्ञानम् । अतो निरवद्यकारणजन्यत्वात् प्रमाणमर्थक्रियाज्ञानमिति विद्मः ॥

### प्राथमिकज्ञानेऽपि कारणदोषाभावनिश्चये प्रामाण्यं गृह्येत एव

यद्येवं प्रथमे प्रवर्तक एव प्रत्यये कस्मात् कारणपरीक्षेवेयं न क्रियते ? किमर्थं क्रियाज्ञाने ? न—आयुष्मन् ! आद्येऽपि ज्ञाने कारणपरीक्षायां क्रियमाणायां कः प्रमादः ? किमेवं सति स्वतः प्रामाण्यं सिद्ध्यति तव ? मम वा परतः प्रामाण्यमपहीयते ? किन्तु लोकः प्रवर्तकज्ञानानन्तरं फलप्राप्तिं प्रति यथा सोद्यमो दृश्यते, न मरणादिहेतुर्भवति, तथाऽत्रापि तादृशानुभव एव तत्कारणम् । अनुभवश्च सत्य एव । न हि कश्चित् मम सर्पज्ञानमेव न जातम् इति मनुते; किन्तु अकाण्ड एव तज्ज्ञानं जातम्(?') इत्येव । अतश्च ज्ञानमेव स्थलविशेषे अर्थक्रियाकारीति न दोषः । अधिकं ९ आह्निके ॥ § 3400

कारणदोषानेवाह—तथा हीति । अप्रगल्भानां—परोपदेशेन चेति । चकारः वाऽर्थे ॥ § 3401

क्रियाज्ञाने—अर्थक्रियाज्ञाने । अस्तु परतः प्रामाण्यं, तथाऽपि प्राथमिकज्ञाने कारणदोषाभावनिश्चयेनाऽपि प्रामाण्यनिश्चयस्य प्रतिषेद्धुमशक्यत्वे

तथा तत्कारणपरीक्षां प्रति । फलज्ञानमेवेत्थं परीक्ष्यते । आद्यस्य हि ज्ञानस्य फलज्ञानादेव प्रामाण्यसिद्धिः । कश्च नाम निकटमुपायमुपेक्ष्य दूरं गच्छेदिति !

### प्रकारान्तरेण प्राथमिकज्ञाने प्रामाण्यनिश्चयोपपादनम्

अथ वा संशयोत्पत्तिसामर्थ्यादेव यथार्थेतरत्वनिश्चयः फलज्ञानेन लप्स्यते । संशयो हि नाम द्वैविध्यदर्शनाद्विना न भवत्येव । न हि स्थाणुपुरुषसाहचर्यमूर्ध्वताख्यस्य धर्मस्य यो न जानाति, स तं दृष्ट्वा स्थाणुर्वा स्यात् ? पुरुषो वा ? इति संशेते । एवमूर्ध्वत्ववद्बोधरूपत्वस्य व्यभिचारित्वाव्य-

१४ ] माणः— nyāma-wit__kha  nyāma-wit__kha
१६ ] वर्तमाना—

भिचारित्वाभ्यां सहदर्शनमवश्यमाश्रयणीयम्, अन्यथा तद्विषयसंशयानुत्पादात् । अतः पूर्वमव्यभिचारित्वदर्शने सिद्धे यस्तदा तत्परिच्छेदोपायः, स पश्चादपि भविष्यतीति सर्वथा सिद्ध्यत्यव्यभिचारित्वनिश्चयः ॥ फलज्ञानादेव इति शपथः कुतः ? इत्यत्राह—कश्चेति । यद्यप्यस्मत्सिद्धान्तभङ्गभीत्या फलज्ञानादेव इति न वदामः । किन्तु तत्त्वस्थितिमनुरुध्यैव । पुरोवर्तिवस्तुनि दृष्टे, मनुष्यस्य प्रवृत्तिः प्रथमं जायते । फलप्राप्त्यप्राप्तिभ्यां तु उत्पन्नज्ञाने प्रामाण्यतदभावौ निश्चिनोति इत्युत्सर्गः । प्राथमिकज्ञाने डोलायमानरूपे सति यदि तत्र प्रामाण्यनिश्चयमपेक्षते, तदाऽपि, किं चर्चया ? समीपमुपसर्प्यैव निर्णेष्यामः इति अर्थक्रियाज्ञानार्थमेव प्रवर्तते, न तु क्लेशसाध्ये दोषाभावनिश्चये इत्यप्युत्सर्ग एव इत्याशयः । गत्यन्तरविरहे तु अस्तु तथैव । परतः प्रामाण्यं तु अनपोह्यमेवेति च भावः ॥ § 3402

संशयोत्पत्तिसामर्थ्यात्—प्राथमिकज्ञाने इदं प्रमा ? न वा ? इति संशयोत्पादनक्षमत्वात् इति यावत् । साहचर्यं—साधारण्यम् । सहदर्शनं—साधारण्यज्ञानम् । अयं भावः—प्राथमिकं ज्ञानं तु संशयक्षममिति अनुभवसिद्धम् । संशयश्च कोटिद्वयसाधारणधर्मज्ञानात् । प्रमात्वतदभावरूपकोटिद्वयसाधारणबोधत्वरूपधर्मज्ञानमेव तत्र संशयहेतुः वाच्यः । तेन च पूर्वं कदाचित् बोधत्वस्य व्यभिचरितज्ञाने, अव्यभिचरितज्ञाने च परिचयः आवश्यकः । तदा च अनवस्थादिभिया फलज्ञानमूल एव अव्यभिचरितत्व

### अनिश्चितप्रामाण्यमपि फलज्ञानं आद्यज्ञाने प्रामाण्यनिश्चायकम्

अनिश्चितप्रामाण्यादपि वा फलज्ञानात् प्रवर्तकस्य प्रामाण्यनिश्चयो युक्तः, न तु स्वतः; उत्पत्तौ प्रमाणतदाभासयोर्विशेषाग्रहणात् । फलज्ञाने च तद्विशेषप्रतिभासात् ॥

### परतः प्रामाण्ये अनवस्थादोषपरिहारः

यत्तु—विशेषज्ञानं निश्चितप्रामाण्यमनिश्चितप्रामाण्यं वेति विकल्प्यानवस्थापादनं, अप्रतिपत्तिप्रहतताकथनं वा ४३४-४३६ पु.— तत् दृष्टविरुद्धत्वात् प्रलापमात्रमित्यलमलीकोक्तविकल्पकलापनिर्मथनोदितदुरामोदास्वादनेन ॥

### प्रामाण्याप्रामाण्ययोः परतस्त्वोपसंहारः

स्थितमेतत्—अर्थक्रियाज्ञानात्प्रामाण्यनिश्चय इति । तदिदमुक्तम्—प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम् न्या. भा. १-१-१ इति । तस्मादप्रामाण्यवत्प्रामाण्यमपि परापेक्षमित्यतो द्वयमपि परत इत्येष एव पक्षः श्रेयान् ॥

### प्रामाण्यग्रहणविषये जैनमतप्रतिक्षेपः

यत्तु कश्चित्प्राज्ञमानी वदति—अभ्यस्ते विषये स्वतःप्रामाण्यम्, अनभ्यस्ते तु परतः—इति, सोऽयं अभ्यस्ते विषये इति च ब्रवीति, निश्चयो वाच्यः । एवञ्च पूर्वं फलज्ञानेनैव अव्यभिचरितत्वरूपप्रामाण्यनिश्चयस्य अनुभव-

१२ ] द्राध— nyāma-wit_kha

सिद्धत्वात् सर्वत्रापि तथैव प्रामाण्यनिश्चय इति सिध्यतीति ॥ § 3403

अनिश्चितेति । अगृहीताप्रामाण्यादपीति बोध्यम् । प्रवर्तकस्य, ज्ञानस्येति शेषः । इदं रजतं इति प्राथमिकानुभवो हि शुक्तिरजतसत्यरजतस्थले च एकरूप एवोपलभ्यते । फलज्ञाने, सतीति शेषः । तद्विशेषः—प्रमात्वतद-भावरूपः ॥ § 3404

विद्यानन्दिना तत्त्वार्थवार्तिके तत्राभ्यासात् प्रमाणत्वं निश्चितं स्वत एव नः । अनभ्यासे तु परतः १-१०-१२५ इत्युक्तम् । तदनुसृत्यान्येऽपि माणिक्यनन्दिप्रभृतयः । तदेतदनूद्य दूषयति—यत्त्विति ॥ § 3405

I.451/KSV

स्वतश्च प्रामाण्यं मन्यत इति स्वयमेवात्मानं वञ्चमानं न चेतयते । अभ्यासो हि नाम पुनःपुनः प्रयोगः क्रियाया अभ्यावृत्तिः ; विषयस्य चाभ्यस्त-ता भूयोभूयः प्रवृत्तिः । अतश्च स्वशरीरग्रहे, निजगृहकुड्यस्तम्भादिप्रतिभासे वा सहस्रकृत्वः प्रवृत्त संवादज्ञानजन्मना प्रामाण्यनिश्चय उक्तो भवति । स्वतः अभ्यस्तत्वं चान्यथा न भवेदिति यत्किञ्चिदेतत् । तस्मात् परतः प्रामाण्यमिति सिद्धम् ॥ § 3406

## प्रामाण्यविचारस्यानुपयुक्तत्वनिरासः

यत्पुनः कैश्चिच्चोद्यते—प्रमाणानां न परीक्षणमुपपद्यते । तद्धि प्रमाणैः क्रियेत ? अप्रमाणैर्वा ? प्रमाणैरपि परीक्षितैः ? अपरीक्षितैर्वा ? § 3407

तत्र न नाम अप्रमाणैः प्रमाणपरीक्षणं शक्यक्रियम् ॥ § 3408

प्रमाणैरप्यपरीक्षितैः तत्करणे, वरं व्यवहार एव तादृशैः क्रियताम् ! किं परीक्षणेन ? § 3409

परीक्षितैस्तु तत्परीक्षाकरणमपर्यवसितम् ; अनवस्थाप्रसङ्गात् इत्यादि ॥ § 3410

तदप्युक्तेन न्यायेन परिहृतं भवति । दृष्टे विषये प्रमाणपरीक्षां विनैव व्यवहारात् । अदृष्टे तु परीक्षाया अवश्यकर्तव्यत्वादुपपत्तेश्चेति ॥ § 3411

तस्माददृष्टपुरुषार्थपदोपदेशि
मानं मनीषि भिरवश्यपरीक्षणीयम् ।
प्रामाण्यमस्य परतो निरणायि चेति
चेतःप्रमाथिभिरलं कुविकल्पजालैः ॥ ८१ ॥§ 3415

३३ ] विशेष— nyāma-wit_kha
१ ] पर्यन्तता— nyāma-wit_ka
७ ] प्रामाण्यमपि— nyāma-wit_kha
७ ] परोक्ष— nyāma-wit_kha
२१ ] वाच्यमानं— nyāma-wit_kha
२४ ] नासहस्र— nyāma-wit_ka
२४ ] प्रवृत्ति— nyāma-wit_kha
३ ] प्रमाणैः प्रमाण— nyāma-wit_ka

## अख्यातिसाधनोपक्रमः

सुशिक्षितास्त्वाचक्षते—युक्तं, यदमी मीमांसकपाशाः काशकुसुमराशय इव शरदि मरुद्भिरतिदूरात्समुत्सार्यन्ते दुष्टतार्किकैः । § 3416

सुशिक्षिताः—गुरवः । अमी मीमांसकाः—भाट्टाः । के ते मीमांसकाः ? इत्यत्राह—ये हीति । अख्यातिवादिनो हि गुरवः यथार्थं

ये हि किलाभ्युपयन्ति च विपरीतख्यातिवादं अकृतास्त्वाः, प्रामाण्यं च स्वत इति च वदन्ति, तेषां कुतः कौशलम् ? विपरीतख्यातावभ्युपगम्यमानायां बाध्यबोधसन्दर्भसुभिक्षे सति तत्साधर्म्यादनुत्पन्नबाधकेऽपि बोधे दुष्परिहरः संशयः । संशये च संवादाद्यन्वेषणमपि ध्रुवमवतरतीति परतः प्रामाण्यमनिवार्यम् ॥

**बाध्यस्य ज्ञानस्यैवानङ्गीकारे तु प्रामाण्यं स्वत एव स्यात्**

यदा तु न बाध्यो नाम जगति कश्चिदपि बोधः, तदा किंसाधर्म्यात् संशेरतां प्रमातारः ? असंशयानाश्च किमिति परमपेक्षन्ताम् ? अनपेक्षमाणाः कथं परतः प्रामाण्यं प्रतिपद्यन्तामिति निश्चलं स्वत एव प्रामाण्यमवतिष्ठते ॥

कथं पुनर्बाध्यो नाम नास्ति बोधः ? शुक्तिकादौ रजतादिप्रत्ययाः प्राचुर्येण बाध्यमाना दृश्यन्ते—अनभिज्ञो भवान् बाधस्य—न हि ते बाध्याः प्रत्ययाः ॥

## बाधपदार्थः

इदं हि निरूपप्यताम्—क इवोत्तरज्ञानेन पूर्वज्ञानस्य बाधः ? बाधार्थमेव न विद्मः । यदि तावन्नाश एव बाधः, स न तेषामेव; बुद्धेर्बुद्ध्यन्तराद्विरोध इति सकलबोधसाधारणत्वात् ॥ सर्वमेवेह विज्ञानं प्र. प. नय—१ इति वदन्ति । अतस्तन्मते बोधत्वं अप्रमाप्रमासाधारणं वक्तुमशक्यमिति तज्ज्ञानात् संशयो दुरुपपादः । अन्यथाख्यातिवादिनः भट्टस्य मते तु बाधस्य बाध्याबाध्यज्ञानसाधारणत्वात् संशयः अनिवार्य इति, तत्परिहाराय परत एव प्रामाण्यं बलादङ्गीकर्तव्यम् । अकृतास्त्वाः—अशिक्षिततर्काः, तर्काकुशला इति यावत् ॥ § 3417

भट्टमतात् स्वगुरुमतवैलक्षण्यमाह—यदा त्विति । किंसाधर्म्यात्—कीदृशसाधारणधर्मज्ञानात् । परं—प्रामाण्यनिश्चायकप्रमाणान्तरम् ॥ § 3418

त्वरया गच्छतः क्वचिद्रथ्यादृष्टशुक्तिरजतज्ञानस्य बाधाऽप्रसक्त्या प्राचुर्येणेति । बाधस्य अनभिज्ञः—बाधपदार्थानभिज्ञः ॥ § 3419

तेषां—शुक्तिरजतज्ञानानाम् । बुद्धेरिति । योग्यविभुविशेषगुणा हि स्वोत्तरोत्पन्नतादृशगुणनाश्याः ॥ § 3420

I.453/KSV

अथ सहानवस्थानम्, तदपि समानम्; अबाधितानामपि ज्ञानानां सहावस्थानासंभवात् ॥ § 3421

२१ ] संवादा— nyāma-wit__ka

अथ संस्कारोच्छेदो बाधः, सोऽपि तादृगेव; संयक्प्रत्ययोपजनितसंस्कारस्याप्युच्छेददर्शनात् । कश्चिद्भवदभिमतबाध्यबोधाऽहितोऽपि संस्कारः सत्यपि बाधकप्रत्यये नोच्छेदमुपगच्छति; कालान्तरे तत्कारणकतद्विषयस्मरणदर्शनात् ॥ § 3422

अथ विषयापहारो बाधः, सोऽपि दुर्घटः । प्रतिभातत्वेन विषयस्यापहर्तुमशक्यत्वात् । न हि बाधकं ज्ञानमित्थमुत्तिष्ठति— यत् प्रतिभातं तन्न प्रतिभातमिति ॥ § 3423

अथ तदभावग्रहो बाधः—स तात्कालिकः ? कालान्तरभावी वा ? कालान्तरभावितदभावग्रहणस्य बाधकत्वे प्रागवगतमुद्गरदलितघटाभावग्राहिणोऽपि विज्ञानस्य तद्बाधकत्वप्रसङ्गः । तदैव तु तदभावग्रहणे प्रत्ययद्वयसमर्पितरूपद्वितययोगादुभयात्मकमेव तदस्तु वस्तु ! किं कस्य बाध्यं बाधकं वा ? § 3424

अथ फलापहारो बाधः, सोऽपि न संभवति; संविदः प्रमाणफलस्य उत्पन्नत्वेनानपहरणीयत्वात् । न हि यदुत्पन्नं तदनुत्पन्नमिति वदति बाधकः ॥ § 3425

अथ हानादिफलापहारो बाधः, न, तस्य प्रमाणफलत्वाभावात् ॥ § 3426

हानादिव्यवहारो हि पुरुषेच्छानिबन्धनः ।
न तेनापहृतेनापि प्रमाणं बाधितं भवेत् ॥ ८२ ॥§ 3428

तस्मान्न बाधो नाम कश्चित् ॥ § 3429

सहानवस्थानासंभवात्—अत्र युगपत् ज्ञानद्वयस्य उत्पादासंभवःहेतुः ॥ § 3430

तादृक्—सकलबोधसाधारणः । वस्तुतस्तु सोऽपि नास्ति मम पूर्वं शुक्तौ रजतज्ञानं जातं इत्येवं कालान्तरे स्मरणदर्शनादित्याह—कश्चिदिति । अस्य संस्कारः इत्यनेनान्वयः ॥ § 3431

न हीत्यादि । रजतस्य तत्राभावात् न त्वन्यादृशः अपहारः वक्तुं शक्यः ॥ § 3432

घटाभावसंपादनाय—मुद्गरदलितेति । तद्बाधकत्वं—घटवत्ताबुद्धिबाधकत्वम् । किमिति । अन्यथा कथमुभयोरेकदा ग्रहणम् ? § 3433

अभिमतं फलपदार्थं स्फुटयति—हानादीति । पुरुषेच्छेति । यद्यपि

### प्रकारान्तरेणापि बाध्यज्ञानासंभवोपपादनम्

इतश्च नास्ति । स हि समानविषययोर्वा ज्ञानयोरिष्यते ? भिन्नविषययोर्वा ? न समानविषययोः, धारावाहिज्ञानेष्वदृष्टत्वात् । नापि भिन्नविषययोः, स्तम्भकुम्भोपलम्भयोस्तदनुपलम्भात् । यदि चोत्तरेण ज्ञानेन पू-

१६ ] बोधाभि— nyāma-wit__ka
१९ ] विषयस्या— nyāma-wit__kha
११ ] भास— nyāma-wit__kha
२४--२५ ] प्रत्यय— nyāma-wit__ka
१ ] पहते— nyāma-wit__ka

र्वज्ञानगृहीतादर्थादर्थोऽन्य इदानीं गृहीतः, तत्पूर्वज्ञानं किमिति बाधितमुच्यते ?

अपि च पूर्वस्मिन् प्रत्यये प्राप्तप्रतिष्ठे सति आगन्तुरुत्तरः प्रत्ययः बाधितुं युक्तः, न पूर्वः; न चैवं दृश्यते । तस्मान्न बाध्यं नाम विज्ञानमस्ति । तदभावान्न तत्साधर्म्यनिबन्धनः संशयः । तदभावात्संवादाद्यनन्वेषणान्न परतः प्रामाण्यम् ॥

## अख्यात्यवतारः

ननु ! एवं बाधे निराक्रियमाणे किममी शुक्तिकारजतादिग्राहिणो विपरीतप्रत्यया अबाधिता एवासताम् ?—आः कुमते ! नामी विपरीतप्रत्ययाः । न हीदृशानां विपर्ययाणामुत्पत्तौ किमपि कारणमुत्पश्यामः ॥ पूर्वं पु. १७४ तस्य प्रमाणभावे तु फलं हानादिबुद्धयः इत्युक्तम्, अथापि हानादिप्रवृत्तिः पुरुषेच्छामन्तरा न भवत्येव । यदि च पुरुषः उदासीनः, तदा हानस्य वा, उपादानस्य असंभवेन तदधीनः बाधोऽपि दुरुपपादः । सः—बाध्यबाधकभावः । तदनुपलंभात्—बाध्यबाधकभावादर्शनात् ॥ § 3434

प्राप्तप्रतिष्ठ इति । पूर्वं हि ज्ञानं तदुत्पत्तिकाले कस्यापि बाधकस्याभावात् उत्पन्नमेव । द्वितीयं तु ज्ञानं सञ्जातविरोधित्वात् उत्पत्तुमेव नालम् । न चोत्तरत्वमेव बाधकत्वप्रयोजकम्, तदा उत्तरत्वाविशेषात् सर्वं सर्वत्र बाधकं भवेदिति न किमपि प्रतिष्ठितं भवेत् । उत्तरज्ञानस्य प्रमात्वं न सार्वत्रिकम् । अतः पूर्वज्ञानमेवोत्तरं प्रति बाधकं भवेत् । तत्साधर्म्यनिबन्धनः—बाध्यज्ञानेन सह यत् साधर्म्यं बोधत्वादि, तत्कृतः ॥ § 3435

I.455/KSV

न तावदिन्द्रियमेवंविधबोधविधायि भवितुमर्हति, सर्वदा तदुत्पादप्रसङ्गात् ॥ § 3436

नापि दोषकलुषितं, दुष्टं हि कारणं स्वकार्यकरण एव कुण्ठितशक्ति जातमिति तदेव मा जीजनत्, विपरीतकार्यकरणस्य किं वर्तते ? न हि दुष्टानि शालिबीजानि यवाङ्कुरकरणकौशलमवलम्बेरन् । तस्मात् कारणाभावादपि न विपरीतप्रत्ययास्ते ॥ § 3437

## भ्रमस्थले ज्ञानद्वयमेव, नैकं ज्ञानम्

तत्किं सम्यक्प्रत्यय एव शुक्तिकायां रजतप्रतिभासः ?—अयि मूढ ! नायमेकः प्रत्ययः—इदं रजतमिति; किन्तु द्वे एते ग्रहणस्मरणे । इदमिति पुरोऽवस्थितभास्वराकारधर्मिप्रतिभासः, रजतमिति तु भास्वररूपदर्शनप्रबोध्यमानसंस्कारकारणकं तत्साहचर्यादवगतरजतस्मरणम् ॥ § 3438

---

१७ ] ज्ञानेन— nyāma-wit_kha
२४ ] बाधेऽपि— nyāma-wit_kha

## भ्रमस्थले धर्मज्ञानस्य स्मृतिरूपत्वे युक्तिः

अतश्चेदं स्मरणं—यतः प्रागनवगतरजतस्य न जायते, विदितरजतस्यापि रजन्यामन्यदा वा सादृश्यदर्शनाद्विना न भवतीति ॥ § 3439

न तावदित्यादि । विपरीतप्रत्ययोत्पादनमेवेन्द्रियस्य स्वभावश्चेत्, कदाऽपि सत्यप्रमितिर्न स्यात् ॥ § 3440

दोषकलुषितं, इन्द्रियमिति वर्तते । दुष्टानि—स्वाङ्कुरजनन एवासमर्थानि ॥ § 3441

द्वे इति । इन्द्रियसंयोगस्तु शुक्त्या सह । ज्ञानं तु रजतविषयकम् । कथमिदं प्रत्यक्षरूपं एकं ज्ञानं स्यात् ? अतः विशेष्यांशे इन्द्रियमेव कारणं, विशेषणांशस्तु स्मृत्यैवोपस्थापनीय इति बलात् वक्तव्यम् । ततश्च प्रत्यक्षस्मरणरूपं ज्ञानद्वयमेव इदं रजतम् इति ॥ § 3442

ननु सत्यं रजतं दृष्ट्वा यादृशः प्रत्ययः तदुत्पत्तिकाले अनुभूयते, तदविशेषमेव शुक्तिं दृष्ट्वा जातोऽपि अनुभूयत इति कथं रजतस्मरणमुच्यते ? इत्यत्राह—

## धर्मस्मरणस्य स्मृतित्वेन ख्यातिर्नास्ति

स्मरणमपि भवदिदमात्मानं तथा न प्रकटयतीति प्रमुषितमुच्यते । स्वरूपेण चाप्रतिभासमानायां स्मृतावनुभवस्मरणयोर्विवेको न गृहीतो भवतीत्यग्रहणमख्यातिरुच्यते ॥

## भ्रमस्थले वादिविप्रतिपत्तयः

तथा हि भ्रान्तबोधेषु प्रस्फुरद्वस्तुसंभवात् ।
चतुष्प्रकारा विमतिरुदपद्यत वादिनाम् ॥ ८३ ॥§ 3445

विपरीतख्यातिः, असत्ख्यातिः, आत्मख्यातिः, अख्यातिरिति ॥

## अन्यथाख्यातेः असत्ख्यातावेव पर्यवसानोपपादनोपक्रमः

तत्र विपरीतख्यातिस्तावत्कारणाभावादेव निरस्ता । अपि च विपरीतख्यातौ त्रयी गतिः—रजतं वाऽन्यदेशकालमत्रालम्बनम् ? शुक्तिका वा निगूहितनिजाकारा सती परिगृहीतरजताकारा च ? अथवा अन्यदालम्बनं अन्यच्च प्रतिभाति ?

## शुक्तिरजतज्ञानं न रजतविषयकम्

तत्र यदि रजतमालम्बनं, तदियमसत्ख्यातिरेव; न विपरीतख्यातिः, असतस्तत्र रजतस्य प्रतिभासात् ॥

---

१४ ] दिना— nyāma-wit__kha
३ ] रुपपद्येत— nyāma-wit__kha

अथान्यदेशकालं तत् अस्त्येवेत्यभिधीयते ।
इहासन्निहितस्यास्य तेन सत्त्वेन को गुणः ? ॥ ८४ ॥§ 3447

स्मरणमिति । भवदपि इत्यन्वयः । विपरीतख्यातिपक्षेऽपि हि स्मरणमेव रजतोपस्थापकं इष्टं; न हि एतत् अनुभवसिद्धम् । यदि च स्मरणं विषयमात्रं समर्पयति, न त्वात्मानमपि स्मरणत्वेन प्रकाशयति—इत्युच्यते; तर्हि अस्मन्मतमेव तत् । कुतस्तर्हि एतत्सोपानमतीत्य विपरीतख्यातिकल्पनम् ? § 3448

तथाहीत्यादि । भ्रान्तिस्थले इयमत्र समस्या—इन्द्रियान्वयव्यतिरेकानुविधानात्, साक्षात्करोमीत्यनुव्यवसायदर्शनाच्च शुक्तिरजतज्ञानस्य प्रत्यक्षत्वं वक्तव्यम् । इन्द्रियशुक्तिसन्निकर्षस्तु वर्तते, ज्ञानं तु रजतविषयकं जायते ! कथमिदम् ? अन्येन सन्निकर्षः, अन्यस्य ज्ञानम् ? § 3449

I.457/KSV

अपि च—देशकालावपि किं सन्तौ प्रतिभासेते ? उतासन्तौ ? इति । यदि सन्तौ, तर्हि तद्देशकालमेवेदं रजतमवभातमिति न भ्रान्तिरेषा स्यात् । असन्तौ तूभावपि रजतवत् नालम्बनं भवितुमर्हतः ॥ § 3450

## स्मृत्याख्यसन्निकर्षेणैव रजतभानं तु न संभवति

अथ स्मृत्यारूढं रजतमस्यां प्रतीतौ परिस्फुरतीत्युच्यते, तर्हि स्मृत्युपारूढमिति कोऽर्थः ? स्मरणमपि ज्ञानमेव, तदपि कथमसदर्थविषयं स्यात् । स्मृतेरनर्थजत्वमेव स्वरूपमिति चेत्; अस्तु कामम् ! तत्सामान्यादत्राप्येवं प्रयोग इत्येतदपि तावन्न ब्रूमः । तथा त्वनर्थजन्यया स्मृत्या सोऽर्थः कथमिह सन्निधापयितुं पार्यते । सा हि न स्पृशत्येवाऽर्थम् । तस्मादसन्निहितरजतालम्बना विपरीतख्यातिरसत्ख्यातेर्न विशिष्यत एव ॥ § 3451

## शुक्तिरजतज्ञानं न शुक्तिविषयकम्

अथ स्थगितनिजवपुरुषगृहीतरजतरूपा शुक्तिकाऽत्र प्रकाशत इति नेयमसत्ख्यातिरुच्यते; तदिदमपूर्वं किमपि नाटकं, इयमस्मिन् कृत्या सीता प्रवृत्तेति । तथा हि—किमत्रशुक्तिरिति प्रतीतिः ? उत रजतमिति ? शुक्तिकाप्रतीतौ तु शुक्तौ शुक्तिरेव प्रतीयते, न रजतं इति भ्रमार्थःकः ? रजतप्रतीतौ तु शुक्तिरसावित्यत्र किं § 3452

---

१६ ] उद्देश— nyāma-wit_ka
१० ] शुक्तीति— nyāma-wit_kha

११ ] शुक्तिरेव— nyāma-wit_ka; nyāma-wit_kha

११ ] रजतभ्रमार्थः— nyāma-wit_ka ; रजतमत्र— nyāma-wit_kha

एतत्समस्यापरिहाराय दार्शनिकाः यथायथं प्रयतन्ते—पुरोवर्तिशुक्तिसंयुक्तं चक्षुः रजतस्मरणसहकृतं सत् इदं रजतं इति विशिष्टवैशिष्ट्यावगाहिज्ञानं जनयतीति विपरीतख्यातिवादिनः नैय्यायिकाः, भाट्टाश्च । विपरीतमेव मया गृहीतम् इति बाधानन्तरं अनुसन्धानात् तथा व्यवहारः ॥ § 3453

तथात्विति । स्वयं अर्थसंस्पर्शशून्या कथं तदा अर्थमुपस्थापयेदित्यर्थः ॥ § 3454

कृत्या सीता—माया सीतेति यावत् । श्रीमद्रामायणे युद्धकाण्डे इन्द्रजिता मायासीताप्रदर्शनं कृतं, तद्वदत्र किमिदं कापट्यमित्यर्थः । असौ—विषयः । किंप्रमाणमिति । यदा रजतं प्रतीयते, तदा रजतविषयकं ज्ञानमित्य

प्रमाणम् ? बाधकप्रत्ययादेवमवगतं इति चेत्, मैवम्—न हि ज्ञानान्तरेणास्याः प्रतीतेर्विषयो व्यवस्थापयितुं युक्तः । बाधकेन हि ज्ञानेन पूर्वज्ञानगृहीतस्य वस्तुनोऽसत्त्वं नाम ख्याप्यताम्, न तु तस्य विषयो निरूप्यते । अनर्थित्वाद्वा, कदाचिदप्रवृत्तस्य पुंसो बाधकानुत्पत्तौ वा कोऽस्याः प्रतीतेर्विषयं व्यवस्थापयिष्यति । तस्माद्यदेवास्यां चकास्ति, तदेव रजतमस्या विषय इति युक्तं वक्तुम् । शुक्तिस्तु निगूहितनिजवपुरिति दुर्विदग्धवाचोयुक्तिरियम् ॥

## शुक्तिः विषयः, रजतस्य प्रतीतिरिति तु उपहास्यम्

ये त्वालम्बनतां शुक्तेः रजतस्यावभासनम् ।
वदन्त्यस्मिन् भ्रमज्ञाने तेषामतितरां भ्रमः ॥ ८५ ॥§ 3457

न ह्यालम्बनता युक्ता सन्निधाननिबन्धना ।
तत्रैव भूप्रदेशस्य तथाभावप्रसङ्गतः ॥ ८६ ॥§ 3459

तदेवालम्बनं बुद्धेर्यदस्यामवभासते ।
अन्यदालम्बनं चान्यद्भातीति भणितिर्न वा ? ॥ ८७ ॥§ 3461

अतो रजतमेवैतद्बुद्धिग्राह्यमसच्च तत् ।
एवं विपर्ययख्यातिरसत्ख्यातेर्न भिद्यते ॥ ८८ ॥§ 3463

## असत्ख्यातिनिरासः

तत्किमसत्ख्यातिरेव साधीयसी ? तामेवाभ्युपगच्छामः ?— मैवम्—साऽपि नोपपद्यत एव । असत्ख्यातिरिति कोऽर्थः ? प्रकम्प्यम् । ततश्च तस्य शुक्तिविषयत्वं कथम् ? शुक्त्या सहैव हि इन्द्रियं संयुक्तं इति चेत्, न हि तदा शुक्तेर्भानम् । बाधानन्तरं तत् ज्ञायेतेति चेत्—यः प्रतीयते स एव तत्र विषयः इत्येव लोको मन्यते । न तु अत्र प्रमाणान्तरापेक्षा । बाधादर्शनस्थले तु शुक्तेरेव विषयत्वे प्रमाणं दुर्वचमेव तरां । अतो रज-

तविषयकत्वे सिद्धे तत्रासतः रजतस्य भानात् असत्ख्यातावेव विश्रान्तिः । अनर्थित्वात्—ज्ञानस्य स्वविषयनिर्णये ज्ञानान्तरानपेक्षणात् । अप्रवृत्तस्य—उदासीनस्य ॥ § 3464

तथाभावप्रसङ्गतः—आलम्बनत्वप्रसङ्गतः । तदेवेति । यत् भासतेतदेवालम्बनं युक्तं । न तु अन्यदालम्बनं, अन्यस्य प्रतिभास इति ॥ § 3465
I.459/KSV

किमेकान्तासत एवार्थस्य प्रथमम् ? अथ देशान्तरादौ विद्यमानस्येति ? उत्तरस्मिन् पक्षे विपरीतख्यातिरेवैषा, परैरपि तत्र रजतस्य सत्वानभ्यु पगमात् । देशान्तरादौ तु तत्सत्तायास्त्वयाऽपि प्रतिपन्नत्वात् । एकान्तासतस्त्वस्य ख्यातिरिति न पेशलम्; आकाशनलिनीपल्लवादेरप्रतिभासनात् । वासनाभ्यासादसतामपि प्रतिभासा भविष्यन्तीति चेत्, न, अर्थमन्तरेण वासनाया अप्यनुपपत्तेः । अर्थानुभवसमाहितो हि संस्कारो वासना कथ्यते । सा कथमसदर्थप्रतिभासहेतुः स्यात् ॥ § 3466

भवत्वन्या वा भवदभिमता काचन वासना, साऽपि त्वसत्त्वाविशेषे किमिति रजतमतिमुपजनयति, न गगननलिनप्रतीतिमिति कुतस्त्यो नियमः ? तदलमनया ! § 3467

नात्यन्तमसतोऽर्थस्य सामर्थ्यमवकल्पते ।
व्यवहारधुरं वोढुमियतीमनुपप्लुताम् ॥ ८२ ॥§ 3469

अपि च सत्त्वेन प्रतिभातीति असत्ख्यातिरपि न विपरीतख्यातिमतिवर्तते ॥ § 3470

एकान्तासतः—शशशृङ्गादितुल्यस्य । ननु देशकालान्तरवर्तित्वेऽपिपुरतोऽभावात् असत्ख्यातिरेवैषा, न तु विपरीतख्यातिरिति शङ्कायामाह—परैरिति । निरुपाधिकतया असतः ख्यातिरिति वक्तुमशक्यत्वात्, न सर्वथाऽसत्ख्यातिः संभवति । ननु तर्हि शशशृङ्गादिप्रतीतेर्वा असत्ख्यातित्वमङ्गीकरणीयमिति चेत्—तादृशस्यानुभवस्य कस्याप्यदर्शनात् । यत्र क्वचन दृष्टस्यान्यत्र कुत्रचिद्भानस्यैव सर्वानुभवसिद्धत्वात् ॥ § 3471

असतां—सर्वथाऽसतां केशोण्ड्रकादीनाम् । तथोक्तं—अयेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते । तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत् प्र. वा. ३.३३१ इति । § 3472

अनुपप्लुतां—असंकीर्णां इयतीं व्यवहारधुरं वोढुं अत्यन्तासतोऽर्थस्य सामर्थ्यं नावकल्पते ॥ § 3473

---

२२ ] सत्त्वाभ्यु— nyāma-wit_ka
२८ ] वासनाऽपि— nyāma-wit_kha
२८ ] सत्ता— nyāma-wit_ka
२९ ] मिति— nyāma-wit_ka; nyāma-wit_kha
४ ] असत्त्वेन— nyāma-wit_ka
४ ] अख्याति— nyāma-wit_kha

वस्तुतस्त्वियमसत्ख्यातिः विपरीतख्यातिरेवेत्याह—अपि चेति । सत्त्वेन, पुरत इति शेषः ॥ § 3474
I.460/KSV

## आत्मख्यात्युपपादनम्

तस्माद्वरमात्मख्यातिरस्तु— § 3475

विज्ञानमेव खल्वेतत् गृह्णात्यात्मानमात्मना ।
बहिर्निरूप्यमाणस्य ग्राह्यस्यानुपपत्तितः ॥ ९० ॥§ 3477

बुद्धिः प्रकाशमाना च तेन तेनात्मना बहिः ।
उद्वहत्यर्थशून्यांपि लोकयात्रामिहेदृशीम् ॥ ९१ ॥§ 3479

## आत्मख्यातिनिरासः

उच्यते—नात्मख्यातिरपि युक्तिमती । विज्ञानात्मनो हि प्रतिभासे अहं रजतम् इति प्रतीतिः स्यात्, न इदं रजतम् इति । किञ्च—यदन्तर्ज्ञेयरूपं हि वहिर्वदवभासते प्र-स इत्यभ्युपगमादियमपि विपरीतख्यातिरेव स्यात् । असत्ख्यातिरपि चेयं भवत्येव, बहिर्बुद्धेरसत्त्वात् । बुद्धिरस्त्येवेति चेत्, बहिष्ट्वं तर्हि चिन्त्यं—सत् ? असद्वा ? इति । न तावत् सत्, बुद्धेर्बाह्यत्वाभावात् । असत्त्वे त्वसत्ख्यातिरित्युक्तम् ॥ § 3480

तस्मात् ख्यातित्रयेऽप्यस्मिन् अन्योऽन्यानुप्रवेशिनि ।
युक्त्या विरुध्यमाने च श्रेयस्यख्यातिरेव सा ॥ ९२ ॥§ 3482

## अख्यातिः सर्वैर्वादिभिरप्रत्याख्येया

ख्यातित्रयवादिभिरपि चेयमप्रत्याख्येया नूनमख्यातिः । आत्मख्यातौ तावत् आत्मतया विज्ञानस्य ख्यातिर्नास्ति, विच्छेदप्रतिभासादित्युक्तत्वात् ॥ § 3483

तस्मात्—विपरीतख्यातेः, असत्ख्यातेश्च परस्परसांकर्यादिभिः दुर्निरूपत्वात् । § 3484

अहमिति । आत्मा हि अहंप्रत्ययगोचर इति सर्वेषामनुभवः । विज्ञानरूपस्य तस्यैव रजतात्मना भाने तत्र आत्मन एवाधिष्ठानत्वात् अहं रजतं इत्येवानुभवः स्यात् । ननु प्रत्यक्त्वांशस्यापि संवृत्त्याऽऽवरणात् इदं इति

२३ ] तद्वह— nyāma-wit__kha nyāma-wit__kha
५ ] सदसत्त्वादिति—

पराक्त्वेन भानमित्यत्राह—किश्चेति । बहिष्ट्वं—पराक्त्वम् ॥ § 3485

आत्मतया—प्रत्यक्तया । विच्छेदः—विच्छित्तिविशेषः । इदं इति पराक्त्वमिति यावत् ॥ § 3486

I.461/KSV

असत्ख्यातावपि असत्त्वमर्थस्य नैव प्रतिभासते, प्रवृत्त्यादिव्यवहारोच्छेदप्रसङ्गात् ॥ § 3487

विपरीतख्यातावपि रजतस्य सन्निहितस्य ज्ञानजनकत्वम्, अजनकस्य च प्रतिभासो नेष्यत एव । अतः तत्र रजतस्मृत्युपस्थापितं रजतमवगतिजनकमुपगतम् । अतश्च रजतस्मृतिरपरिहार्या । सा च रजतस्मृतिर्न तदा स्वेन रूपेण प्रकाशते, स्मरामि इति प्रत्ययाभावात् ॥ § 3488

तस्मात् प्रमुषितामेनां स्मृतिमिच्छन्ति तार्किकाः ।
अभ्यस्ते विषये लिङ्गप्रतिबन्धस्मृतिं यथा ॥ ९३ ॥ § 3490

सोऽयं स्मृतिप्रमोषः तत्त्वाग्रहणं अख्यातिरुच्यते ॥
एवं सतीयमख्यातिरिष्यते सर्ववादिभिः ।
तथा प्रकटयद्भिस्तु पीतं प्राभाकरैर्यशः ॥ ९४ ॥ § 3493

ज्ञानजनकत्वं नेष्यत एव इत्यन्वयः । असन्निहितत्वमेव हेतुः । असन्निहितत्वात् ज्ञानजनकत्वे असंभाविते सति, ज्ञानाजनकत्वात् रजतस्य प्रतिभासोऽपि न स्यात् । प्रतिभासते तु रजतं । अतस्तत्र रजतस्य सान्निध्यं उपपादनीयम् । तच्च तत्र स्मृत्यैवोपपादनीयमिति भावः । स्वेन रूपेण—स्मृतित्वेन रूपेण ॥ § 3494

एनां—रजतभासनां । प्रमुषितां अगृहीतस्मृतित्वधर्मिकां स्मृतिं— स्मृतिरूपां इच्छन्ति तार्किकाः—तर्ककुशलाः । न तु नैय्यायिकाः । अयमेव स्मृतिप्रमोषवादः । तत्र दृष्टान्तः—अभ्यस्त इति । असकृदभ्यस्ते भोजनादौ तृप्तिसाधनत्वे पुरत ओदनदर्शनमात्रेणैव पूर्वद्युरनुभूतेष्टसाधनत्वनिश्चयात् पुरोवर्तिन्यपि इष्टसाधनत्वं प्रत्यक्षेणैव गृहीतमिव भासते । अथापि तत्र इष्टसाधनत्वस्मृतिरेवास्ति । स्मृतित्वं तु असकृदभ्यासात् तिरोहितमभूत् । तादृशस्मृतिमिवेत्यर्थः । तत्त्वाग्रहणं—स्मृतित्वाग्रहणम् ॥ § 3495

असत्ख्यातिपदं यथा सर्वथाऽसदर्थख्यातिपरं व्याख्यातं, तथा अख्यातिपदमपि सर्वथा ख्यात्यभावपरमेवेति मन्वान आक्षिपति

### अख्यातिपदार्थः

ननु ! रजतमिति स्मृतेः स्वरूपोल्लेखो मा भूत् ! इदमित्यत्र पुरोऽवस्थितधर्मिप्रतिभासात् कथमख्यातिः । उच्यते—न पुरोऽवस्थितधर्मो शुक्तिकेयमिति स्पष्टतया गृह्यते, तथाचाभ्युपगमे भ्रमाभावप्रसङ्गात् ।

२७ ] विषये— nyāma-wit_kha nyāma-wit_kha
२७ ] प्रतिबन्धां—

किन्तु तेजस्वितादिविपरीतं धर्मिमात्रमवभासते । धर्मसारूप्याच्च तदानीं रजतं स्मर्यते । ते एते ग्रहणस्मरणे विविक्ते अपि विविक्ततया न गृह्येते इति विवेकाग्रहणमख्यातिः; न तु सर्वेण सर्वात्मनाऽप्रतिपत्तिरेव । व्यधिकरणयोश्च ग्रहणस्मरणयोर्वैयधिकरण्यं चेन्न गृहीतं, किमन्यदस्तु सामानाधिकरण्यम्; । न तु यदेवेदं, तदेव रजतमिति सामानाधिकरण्येन ग्रहणमस्ति । सा हि विपरीतख्यातिरेव स्यात्—वैय्यधिकरण्यानुपग्रहादेव प्रमातुः प्रवृत्तिः । अविवेकात्साधारण्याभिमानेन प्रवृत्तिरिति फलत इयं वाचोयुक्तिः ॥

> सामानाधिकरण्येन केचित्तत्पृष्ठभाविनम् ।
> परामर्शमपीच्छन्ति तन्न श्रद्दध्महे वयम् ॥ ९५ ॥§ 3498

> अख्यातिपक्ष एवं हि हीयेतैकत्ववेदनात् ।
> वक्रैश्च वितथाख्यातिः अक्षरैः कथिता भवेत् ॥ ९६ ॥§ 3500

नन्विति । स्वरूपोल्लेखः—स्मृतित्वाग्रहणम् । विविक्ते—समुच्चयानात्मके । व्यधिकरणयोः—भिन्नविषयकयोः । ननु तयोः विशेषणविशेष्ययोः न वैयधिकरण्याग्रहणमात्रं, सामानाधिकरण्यमपि गृह्यत एवेति चेत्तत्राह—नन्विति ॥ § 3501

वैय्यधिकरण्येत्यादि । यद्यपि सामानाधिकरण्यमपि भासत इवैवानुभवः, परन्तु सः वैयधिकरण्याग्रहणकृत एव; भारापगमे सुख्यहम् इत्यादौ दुःखापगममात्रात् सुखीतिवदिति भावः ॥ § 3502

केचित्—एकदेशिनः । तत्पृष्ठभाविनं—स्मृतिप्रमोषानन्तरभवं परामर्शं—विशिष्टवैशिष्ट्यावगाहिज्ञानम् । एकत्ववेदनात्— ज्ञानद्वय इति शेषः । वक्रैः अक्षरैः—पर्यायशब्दैः । वितथाख्यातिः— अन्यथाख्यातिः ॥ § 3503

I.463/KSV

## अख्यातिपक्षे बाधकज्ञानकृत्यम्

ननु ! एवमख्यातिपक्षे प्रतिष्ठाप्यमाने नेदं रजतम् इति पूर्वावगतरजतप्रतिषेधबोधी बाधकप्रत्ययो दृश्यमानः कथं समर्थयिष्यते ? अप्रतीतिज्ञो देवानां प्रियः । न ह्यनेन रजतनिषेधो विधीयते; किन्तु प्रागगृहीतो विवेकः प्रख्याप्यते । न इदं रजतं; यदेवेदं, तदेव रजतमित्येतन्न; इदमिदं रजतं इति ॥ § 3504

---

२४ ] सर्वेण सर्वा— nyāma-wit__kha

२४ ] पद्यत एव— nyāma-wit__ga

२५ ] चेति— nyāma-wit__ka

२५--२६ ] करण्यात्— nyāma-wit__ka; nyāma-wit__kha

१३ ] प्रतिबोध— nyāma-wit__kha

१३ ] इष्यते— nyāma-wit__kha

एतदुक्तं भवति—इदमन्यत्, रजतमन्यदिति सोऽयं विवेकः ख्यापितो भवति ॥ § 3505

## स्वाप्नानुभवस्यापि ग्रहणस्मरणात्मकत्वम्

ननु ! एवं, इदं रजतम् इत्यादौ स्मरणानुभवयोर्भवतु विवेकाग्रहणम्; स्वप्ने तु कथमेतद्भविष्यति । भीरो ! किं जातं स्वप्ने ? § 3506

विवेकेन न गृह्येते स्मरणानुभवौ क्वचित् ।
स्वप्ने तु स्मृतिरेवैका तथात्वेन न गृह्यते ॥ ९७ ॥§ 3508

सदृशदर्शनाद्विना स्मृतिरेव कुतस्त्येति चेत्—न—नानाकारणकत्वात्स्मरणस्य निद्राकषायितमप्यन्तःकरणं स्मरणकारणं भवत्येव ॥ § 3509

## द्विचन्द्रभ्रमादीनामपि अख्यातिरूपत्वम्

यद्येवं द्विचन्द्रतिक्तशर्करादिप्रत्ययेषु कथं स्मृतिप्रमोषः ? आः कुण्डशेखर ! कथमसकृदभिहितमपि न बुध्यसे— § 3510

स्वप्ने त्विति । जाग्रदवस्थायां, सत्यरजतमिथ्यारजतयोरनुभवः उक्तरीत्या युज्यते । स्वप्नस्तु सर्वोऽपि भ्रम एव । तत्र स्वप्नदर्शनं किमधिष्ठानकम् ? किंविषयकम् ? कथमख्यातिः ? इति प्रश्नार्थः । समाधत्ते—विवेकेनेति । क्वचित्— जाग्रत्काले । स्मृतिरेकैवेति । स्वप्ने एकैव स्मृतिः स्मृतित्वेन न गृह्यते । अदृष्टविशेषवशात् दर्शनसमानाकारतां चापद्यते । अतश्चाख्यातिरेव । स्वाप्नानुभवस्य स्मृतिरूपत्वे स्मृतिहेतोः संस्कारस्योद्बोधकं किमिति पृच्छति— सदृशेति । नानेति । अन्ततः अदृष्टादिकमेव उद्बोधकम् ॥ § 3511

कुण्डशेखर—अमृते जारजः कुण्डः, जारजापशब्देति यावत् ।

न सर्वत्र स्मृतेरेव प्रमोषोऽभ्युपगम्यते ।
किन्त्वख्यातिः, अतश्चासौ कथञ्चित्कस्य चित्क्वचित् ॥ ९८ ॥§ 3514

भवति, अनुभवस्मृत्योर्विवेकाग्रहणं क्वचित् ।
क्वचित्तु स्मर्यमाणस्य तथात्वेनानुपग्रहः ॥ ९९ ॥§ 3516

द्विधा कृता क्वचिद्वृत्तिर्नेत्रस्य तिमिरादिना ।
न हि ग्रहीतुमैक्येन शक्नोति शिशिरत्विषम् ॥ १०० ॥§ 3518

१७ ] ख्यातितो—
nyāma-wit_kha

क्वचिद्रसनसंपृक्ते पित्ते तिक्तत्ववेदनात् ।
परिच्छेत्तुं न शक्नोति माधुर्यं शर्करागतम् ॥ १०१ ॥§ 3520

गृह्णाति यत्तु तिक्तत्वं वस्तुतः पित्तवर्ति तत् ।
तथा तु न विजानाति निगिरन्नेष शर्कराम् ॥ १०२ ॥§ 3522

एतेन पीतशङ्खादिख्यातयोऽपि व्याख्याताः ॥

## अख्यातिवादोपसंहारः तत्प्रयोजनकथनेन

तदेवं सति सर्वत्र सम्यगग्रहणं भ्रमः ।
न मिथ्याप्रत्ययः कश्चिदस्ति शङ्कानिबन्धनम् ॥ १०३ ॥§ 3524

अजातमिथ्याशङ्कश्च न संवादमपेक्षते ।
तस्मान्न कश्चित् परतः प्रामाण्यमधिगच्छति ॥ १०४ ॥§ 3526

एवं स्वतः प्रमाणत्वे सिद्धे वेदेऽपि सा गतिः ।
अंपवादद्वयाभावः वक्तव्यश्चात्र पूर्ववत् ॥ १०५ ॥§ 3528

कचित्—शुक्तिरजतभ्रमादौ । क्वचित्तु—स्वप्ने तु । तथात्वेन—स्मर्यमाणत्वेन । न हीति । एकश्चन्द्र इति ज्ञानवतामपि अङ्गुल्यवष्टंभादिनाद्वौ चन्द्रौ इति प्रतीतिर्दुरतिक्रमा । अतः द्विचन्द्रज्ञाने अन्ततः भिन्नदेशत्वाभावाग्रह एव । पित्ते— पित्तदोषे । तथाचात्र तिक्तत्वे पित्तवृत्तित्वाग्रहः सर्वेषामपि पीतः शङ्खः इत्यत्रापि पीतिम पित्तगतं, तद्गतत्वेन न गृह्यते ॥ § 3529

सम्यगिति । सम्यक्त्वं—यथावस्थितत्वम् । एवमख्यातिवादाङ्गीकारस्य मूलहेतुं प्रकटयति—न मिथ्येत्यादि । शङ्कानिबन्धनं—इदं प्रमा ? न वा ? इतिशङ्कानिदानम् । अपवादद्वयं—पूर्वं पु. ४३१ प्रतिपादितम् ॥ § 3530

I.465/KSV

## अख्यातिनिराकरणम्

### शुक्तिरजतज्ञानं न ज्ञानद्वयरूपम्

अत्र प्रतिविधीयते । यदुक्तं—इदं रजतमितिस्मरणानुभवस्वभावे विवेकेनागृह्यमाणे द्वे एते ज्ञाने इति—तदसांप्रतम्— प्रत्यभिज्ञावदेकत्वेनैव संवेद्यमानत्वात् । यदेवेदं पुरोऽवस्थितं भास्वररूपाद्यधिकरणं धर्मिसामान्यं, तदेव रजतमिति विशेषतः प्रतिपाद्यते; यदिदमग्रतः स्थितं, तद्रजतमिति सत्यरजतप्रतीतिवत् । अनुभूततया हि न रजतमत्र प्रकाशते, किन्त्वनुभूयमानतया । अनुभूतताग्रहणं च स्मरणमुच्यते, नानुभूयमानताग्रहणम् ॥ § 3531

## अख्यातिरपि विपरीतख्यातौ पर्यवस्यति

स्वप्रकाशा च संवित्तिरिति भवतां दर्शनम् । तत्रैषां रजतसंवित्तिः केन रूपेण प्रकाशतामिति चिन्त्यम् । यदि स्मरणात्मना, कः प्रमोषार्थः ? अथानुभवात्मना, तदियं विपरीतख्यातिरेव । स्मृतेरनुभवत्वेन, शुक्तेरिव रजतत्वेन प्रतिभासात् ॥ § 3532

## अख्यातिः दुरुपपादा च

अथ संविन्मात्रतयैव प्रकाशते, तदपि न युक्तम्—रजतविषयोल्लेखात् । स्मरणानुभवविशेषरहितायाश्च विषयसंवित्तेरनु- § 3533

प्रत्यभिज्ञावदिति । प्रत्यभिज्ञाया अपि ग्रहणस्मरणात्मकत्वे क्षणिकवादावतारप्रसङ्ग इति तत्प्रकरणे ७ आह्निके विशदीभविष्यति ॥ § 3534

नानुभूयमानताग्रहणम् । न च तत्र अनुभूतत्वाग्रहणमात्रं, तावतैव अनुभूयमानताग्रहणमिव भवतीति वक्तुं शक्यम्; सत्यरजतप्रतीत्यपेक्षयां वैलक्षण्याननुभवात् । तत्रापि वर्तमानतायामगृहीतायां प्रवृत्तिरेव न स्यात् । अवर्तमानत्वाग्रहणमात्रात्प्रवृत्त्युपपादने च, अन्ततः भ्रमप्रमाविभागोऽपि दुर्वच एव स्यात् ॥ § 3535

प्रकाशतां—इति तिङन्तम् । कः इत्यधिक्षेपे ॥ § 3536

ननु न केवलं संविन्मात्रतया प्रकाशते, अपि तु रजतसंवित्त्वेनेत्यत्राह—स्मरणेति । निर्विशेषं न हि सामान्यम् । ननु पुरोवर्तित्वांशे प्रत्यक्षत्व

पपत्तेः । न चेयमप्रतिपत्तिरेवेति वक्तुमुचितम्; मदमूर्छादिदशाविसदृशस्वप्रकाशसंवेदनानुभवात् । यथा इदमित्यंशे स्वप्रकाशं संवेदनं, तथैव रजतमित्यत्रापि ॥

## इदमंशस्य प्रत्यक्षत्वं रजतांशस्य स्मृतित्वं च दुर्वचम्

अपि च द्वयोश्चांशयोः समाने संवेदने तत्रैकं प्रत्यक्षलब्धं, अपरं स्मरणफलमिति कुतस्त्यो विभागः ? इदमित्यत्र च किमवभासत इति निरूप्यताम् । यदि शुक्तिकाशकलं, सकलस्वगतविशेषखचितमवभाति, तदा तद्दर्शने सति रजतस्मरणस्य कोऽवसरः ? भवदपि वा सादृश्यकृतं स्मरणं न तदविवेकाय कल्पते, देवदत्तदर्शनानन्तरोद्गततत्सदृशपुरुषान्तरस्मरणवत् ॥

अथ धर्मिमात्रं इदमितिप्रत्यये प्रतिभाति, न शुक्तिशकलं; तद्बाढमिष्यते । तदेव चेदं सामान्यधर्मग्रहणवशविरुद्धसंस्कारोपनिबन्धनविरुद्धविशेषस्मरणकारणकं इदं रजतमिति सामान्योपक्रमे विशेषपर्यवसानं ज्ञानम्; यदिदं तद्रजतमिति सामानाधिकरण्यावमर्शात् । रजतानुभवाभिमानेनैव च रजतार्थी तत्र प्रवर्तते ॥

## अख्यातिवादः बौद्धमतमूलकः

१९--२० ] प्रतिभासात्—
nyāma-wit_kha

ननु ! स्मरणानुभवयोर्विवेकमप्रतिपद्यमानः प्रवर्तत इत्युक्तम्— श्रुतमिदम्, यदत्र भवद्भिः धर्मकीर्तिगृहादाहृतम्—दृश्यविकल्पावर्थावेकीकृत्य प्रवर्तते इति ॥ गृह्यत एवेति, तदुपरागमात्रात् रजतांशेऽपि स्मृतित्वाग्रहणेऽपि मूर्छादिवैलक्षण्यं सिद्धमित्यत्राह—यथेति ॥ § 3537

सामान्यधर्मेत्यादि । सामान्यधर्मग्रहस्य वशः—अधीनं; तदुद्बुद्धः इत्यर्थः; यः विरुद्धसंस्कारः, तदुपनिबन्धनं यत् विरुद्धविशेषस्मरणं तत्कारणकं ज्ञानमित्यन्वयः । विरोधश्चात्र असामानाधिकरण्यम् । रजतानुभवाभिमानेनैव, न तु शुक्तित्वाज्ञानमात्रात् ॥ § 3538

I.467/KSV

किञ्च चौर्यमपीदं न कथञ्चन स्वार्थं पुष्णाति । यावद्धि दृश्यं गृहीतम् इति न जातः प्रत्ययः, तावत् कथं दृश्यार्थिनस्तत्र प्रवृत्तिः । एवमिहापि यावत् रजतं गृहीतम् इति न जातः प्रत्ययः, तावत् कुतस्तदर्थिनां प्रवृत्तिः ? तस्मादस्ति रजतग्रहणम्; न तु तत्स्मरणप्रमोषमात्रम् ॥ § 3539

## रजतस्मरणं च रजततया ग्रहणार्थमपेक्षितम्

ननु ! रजतस्मरणं विपरीतख्यातिवादिभिरप्यङ्गीकृतमित्युक्तम् । सत्यम्—रजतगतविशेषस्मरणमभ्युपगतम् । यथा हि पुरोऽवस्थिते धर्मिण्यूर्ध्वत्वादिसाधारणधर्मग्रहणात् स्थाणुपुरुषगतविशेषाग्रहणादुभयविशेषस्मृतेः संशयो भवति, एवमिहापि तेजस्वितादिसामान्यधर्मग्रहणाद्विशेषाग्रहणात् रजतगतविशेषस्मृतेश्च तस्मिन् धर्मिणि रजतप्रत्ययो भवति विपर्ययात्मकः । संशये ह्युभयविशेषस्मरणं कारणम्; इह त्वन्यतरविशेषस्मरणमिति विशेषः । अत एव चागृहीतरजतस्येदं ज्ञानं नोत्पद्यते, सदृशाग्रहणे वा निशीथादाविति ॥ § 3540

## रजतस्मरणमात्रात् न शुक्तिरजतप्रतीतिः

न त्वेतावता स्मरणमात्रमेवेदमितीयति स्थातव्यम्; स्मरणजन्यस्य विपर्ययप्रत्ययस्यापि संवेदनात् । अत एव तत्पृष्ठभावि- § 3541

कारणकार्ययोर्विवेकमजानानः पृच्छति—नन्विति । सत्यमित्यादि । पुरतः शुक्तेरेव सत्त्वात् विशेषोपस्थापनाय रजतस्मृतिरपेक्ष्यते । नेयं स्मृतिरेव भ्रमपदवाच्यः, किन्तु भ्रमकारणम् । एवं रजतत्वोपस्थित्या पुरोवर्तिनमपि तादृशं विश्वसिति पुरुषः । नात्र स्मृतिप्रमोषः, स्मृतेः कारणावस्थायां विरमात्, इदं रजतं इति ज्ञानस्य ततो भिन्नत्वात् । अगृहीतेति—पूर्वमपरिचितेत्यर्थः । निशीथादौ तेजस्वितादिग्रहणात् सदृशाग्रहणे तादृशः भ्रमः

१४ ] कुतस्ते— nyāma-wit_kha   २--३ ] र्ध्वता— nyāma-wit_ka

नोत्पद्यते ॥ § 3542

एवं कारणभूता स्मृतिः, न कार्यभूतविपर्ययपदवाच्या इत्यनुपदोक्तमेवोपपादयति—न त्विति । तत्पृष्ठभाविपरामर्शः—तादृशस्मृतिजन्यविशिष्ट परामर्शवादिनो वरं सत्यवाचः । ते हि प्रतिभासं न निह्नुवते ॥

## अन्यथाख्यातौ कारणोपपादनम्

यत्तु विपर्ययावगतेः कारणं विकल्पितम्, तत्रोक्तमेव प्रामाणिकैः—

कार्यं चेदवगम्येत किं कारणपरीक्षया ?
कार्यं चेन्नावगम्येत किं कारणपरीक्षया ? इति ॥§ 3545

कार्याकस्मिकताऽनुपपत्तेश्च कल्प्यतां कारणम् ! तच्च क्लृप्तमेव दोषसहितमिन्द्रियम्—यथा संस्कारसहकारि प्रत्यभिज्ञायामिति ॥

## दुष्टं इन्द्रियमेव भ्रमकारणम्

सुवते शालयो दुष्टा न यद्यपि यवाङ्कुरम् ।
शालिकार्यं त्वपूपादि जनयन्त्येव कल्मषम् ॥ १०६ ॥§ 3548

तस्माद्दोषकलितादिन्द्रियात् पुरोऽवस्थितधर्मिगतत्रिकोणत्वादिविशेषावमर्शकौशलशून्यात् सामान्यधर्मसहचरितपदार्थान्तरगतविशेषस्मरणोपकृताद्भवति विपरीतप्रत्ययः । सम्यग्ज्ञानापेक्षया च तद्दुष्टमुच्यते । स्वकार्ये तु विपर्ययज्ञाने तत्कारणमेव न दुष्टम् । तस्मात् रजतमित्यनुभव एव, न प्रमुषितस्मृतिः ॥ वैशिष्ट्यावगाहि ज्ञानम् । वरं—श्रेष्ठाः । अत्र हेतुः—सत्यवाच इति । प्रतिभासं—रजतभानम् ॥ § 3549

कार्यमित्यादि । अनुभवसिद्धे किं वृथा चर्चया ? तदनुगुणं समर्थकारणं कल्पतामिति भावः । आकस्मिकता—हेत्वनधीनता । संस्कारसहकारि, इन्द्रियमित्यनुकर्षः ॥ § 3550

न हि दुष्टानि इत्याद्युक्तं पु. ४५५ समाधत्ते—सुवत इति । कल्मषं बीजाननुरूपं कार्यमित्यर्थः । बीजं ह्यङ्कुरजननाय क्लृप्तम् । त्रिकोणत्वादिधर्माः शुक्तिगताः । ननु काचादिदुष्टं चक्षुर्न स्वकार्यक्षमं दृष्टं; तत् कथं दुष्टं इन्द्रियं भ्रमहेतुः ? इति शङ्कां—दोषवैचित्र्यात् परिहरति—सम्यगिति । तदेव कारणं इत्यन्वयः । एवं स्मृत्यपेक्षायामपि प्रत्यभिज्ञावत् भ्रमः प्रत्यक्षानुभव एवेति निगमयति—तस्मादिति ॥ § 3551

I.469/KSV

## बाधस्वरूपपर्यालोचनया शुक्तिरजतभ्रमे रजतभानोपपादनम्

अपि च, नेदं रजतमिति बाधकज्ञानं पूर्वानुभवविषयीकृतरजतनिषेधमधिगमयदुत्पद्यते । नेदं रजतमिति—यदहमद्राक्षं तद्रजतं न भवति इति ।

प्रसक्तस्य चायं निषेधः । अननुभूतं त्वप्रसक्तमपि प्रतिषिध्यमानं, रजतमिव कनकमपि किमिति न प्रतिषिध्यते ? § 3552

## अख्यातवाद्युक्तस्य बाधज्ञानकृत्यस्य निरसनम्

यत्तु व्याख्यातम् पु. ४६३—प्रागनवगतस्मरणानुभवविवेकप्रतिपादकं बाधकज्ञानमिति—तत् व्याख्यानमात्रमेव, तथाऽननुभवात् । न ह्येवं बाधकमुत्पद्यते यदविविक्तं तद्विविक्तं इति । अतो यत्किञ्चिदेतत् । तस्मान्न रजतस्मरणं, रजते वा कदाचिदनुभवोऽभूदिति स्मरणमभिधीयमानं नात्यन्तमलौकिकम् ॥ § 3553

## स्वप्नानुभवस्य अख्यातिरूपत्वासंभवः

स्वप्ने तु स्वशिरच्छेदादेः अत्यन्ताननुभूतस्य स्मृतिरिति कथ्यमानमेव त्रपाकरम् । जन्मान्तरे निजमस्तकलवनमनुभूतमनेनेति चेत्, इदमपि सुभाषिततरम्—यत् जन्मान्तरानुभूतं स्मर्यते । तत्र च कुतस्त्य एष नियमः—यत् कदाचिदेव स्मर्यते, न सर्वदा सर्वमिति ॥ § 3554

## स्वप्नोऽपि नासद्विषयकः

ननु ! भवताऽपि असत्ख्यातिं निरस्यता स्वप्नज्ञानेषु तादृक्षु किं वक्तम् ? यद्वक्तव्यं, तत् तत्रैव श्रोष्यसि ९ आह्निके । असन्न प्रतिभातीत्युच्यते, न त्वननुभूतमिति ॥ § 3555

नेदं रजतम् इत्यस्यैव विवरणं, तद्रूपानुभवो वा—यदहमित्यादि । अपिः यद्यर्थकः । अथवा—प्रतिषिध्यमानं—प्रतिषिध्यते चेत् ॥ § 3556

प्रागनवगत इत्यस्य विवेकेऽन्वयः । रजते इति विषयसप्तमी । अलौकिकं नेति न—लोकानुभवविरुद्धमेवेत्यर्थः ॥ § 3557

I.470/KSV

## स्वेनाननुभूतस्यापि वस्तुनः सत्त्वं युक्तमेव

ननु ! अननुभूतं सत् कथं जानीषे ? सदिति चेत् ज्ञानं; तदनुभूतमिति—मैवम्—मया तन्नानुभूतं, अन्येनानुभविष्यते । परानुभूतं च सदिति शक्यते वक्तुम् । परानुभूते तु स्मरणमघटमानमिति नावयोरत्र वस्तुनि समानयोगक्षेमत्वम् ॥ § 3558

---

२१ ] कमपि— nyāma-wit__ka
२२ ] मुद्घाट्यते— nyāma-wit__kha
२३ ] रजतमिति— nyāma-wit__ka
३ ] स्व— nyāma-wit__kha
३ ] मसारम्— nyāma-wit__kha
६ ] तत्रैव— nyāma-wit__kha
१४ ] अवस्तुनि— nyāma-wit__ka

## स्वप्नस्य विपरीतख्यातिरूपत्वं अनिवार्यम्

अपि च भवन्मते स्वप्नस्मृतेः स्मृतित्वेनाग्रहणे, केन रूपेण ग्रहणमिति चिन्त्यम् । रूपान्तरेण ग्रहणे विपरीतख्यातिः । सर्वात्मना त्वग्रहणे स्वप्न-सुषुप्त्योरविशेषप्रसङ्गः । अनुभवप्रत्ययश्च स्वप्ने संवेद्यते, न स्मरणानुल्लेख-मात्रमिति दुरभिनिवेश एव स्मृतिप्रमोषसमर्थनं नामेति ॥ § 3559

## द्विचन्द्रज्ञानादीनां अख्यातिरूपत्वासंभवः

द्विचन्द्रादिप्रत्ययेषु कथमख्यातिः ? § 3560

ननु ! उक्तं पु. ४६४—तिमिरसीमन्तिता नयनवृत्तिः एकत्वेन गृहीतुं न शक्नोति शशाङ्कं—इति । भोः श्रोत्रिय ! तादृशी दृशो वृत्तिः एकत्वमिन्दोर्मा ग्रहीत्; द्वित्वानुभवं तु भान्तं क्व प्रच्छादयामः ॥ § 3561

ननु चक्षुर्वृत्तौ तद्वित्वं, तद्गतत्वेन तु यत्तस्याग्रहणं स एव भ्रमः—नैत-देवम्—नेत्रवृत्तेः सर्वत्र परोक्षत्वात् ॥ § 3562

किमेकचन्द्रबोधेऽपि वृत्त्येकत्वं प्रतीयते ?
इयं ह्यगृह्यमाणैव चक्षुर्वृत्तिः प्रकाशिका ॥ १०७ ॥§ 3564

नन्विति । यद्यननुभूतं भाति, तर्हि कथं तस्य सत्त्वमवगतम् ? यदि च सत्त्वज्ञानं तदा, तर्ह्यनुभूतमेव तत्, नाननुभूतमित्युभयथाऽपि दोष इत्यर्थः । स्मरणं, स्वस्येति शेषः । वस्तुनि—विषयदृष्टेति यावत् ॥ § 3565

अपि चेत्यादि । संविन्मात्रतया भानं तु पूर्वमेव पु. ४६५ निरस्तम् ॥ § 3566

तिमिरसीमन्तिता—तिमिरेण दोषेण प्रत्येकं कृतमर्यादा ॥ § 3567
I.471/KSV

एवमुच्यमाने च एकचन्द्रग्रहणेऽपि वृत्त्येकत्वाग्रहणादख्यातिरेव भवेत् ॥ § 3568

## तिक्तशर्कराप्रत्ययस्याप्यख्यातिरूपत्वासंभवः

यदपि—तिक्तशर्करादिप्रत्ययेष्वख्यातिसमर्थनकदाशया पित्तवृत्तेस्तिक्त-त्वस्य संवेद्यमानस्य तत्स्थत्वेनाग्रहणमुपवर्णितम्—तदपि कुशकाशावलम्बन-प्रायम् ॥ § 3569

मोहात् पित्तगतत्वेन तिक्तता चेन्न गृह्यते ।

२ ] सुविरभिन्ना— nyāma-wit_kha

४ ] भ्रान्तं— nyāma-wit_kha

मा ग्राहि, शर्करायां तु किंकृता तिक्ततामतिः ? ॥ १०८ ॥§ 3571

सामानाधिकरण्येन हि तिक्ता शर्करा इति तदधिकरणा तिक्तताप्रतीतिरुपजायते । पित्तं त्विन्द्रियस्थं तिमिरवदगृह्यमाणमपि भ्रममुपजनयति, शरीरस्थमिव ज्वरं शिरोऽर्त्यादिरोगमित्यलं प्रसङ्गेन ॥ § 3572

## अख्यातिसाधनमात्रेण न स्वतःप्रामाण्यसिद्धिः

एवं सर्वत्र नाख्यातिर्निर्वहन्तीव लक्ष्यते ।
न चैतयाऽपि परतःप्रामाण्यमुपहन्यते ॥ १०९ ॥§ 3574

रजतेऽनुभवः किं स्यात् ? उत प्रमुषिता मतिः ?
द्वैविध्यदर्शनादेवं भवेत्तत्रापि संशयः ॥ ११० ॥§ 3576

ननु अत एव द्वित्वं तद्गतत्वेन न गृह्यत इति वदाम इति चेत्, तर्हि एतादृश्यख्यातिः प्रमायामपि सुलभेत्याह—एवमिति ॥ § 3577

शर्करायां—शर्करागतत्वेनेति भावः । तदधिकरणातिरिक्तता— पित्तभिन्नशर्करावृत्तिता । शरीरस्थं ज्वरं यथा शिरोवेदनामुपजनयति तथेत्यर्थः । यद्यपि ज्वरं सर्वं न सर्वथाऽतीन्द्रियं, अथापि अस्ति तादृशमपि ज्वरं क्वचित् ॥ § 3578

रजते—रजतविषयिणी मतिरित्यन्वयः । सर्वस्यापि ज्ञानस्य वस्तुगत्या यथार्थत्वेऽपि शुक्तिरजताद्यनुभवस्य सत्यरजतानुभवापेक्षया वैलक्षण्यं वक्तव्यमेव । एवञ्चानुभवद्वैविध्यदर्शनात्, प्रमाभ्रमपदार्थत्वस्य यादृशतादृशत्वेऽपि संशयः अनतिक्रमणीय एव । अतः संवादाद्यपेक्षायाः सत्येन परतः प्रामाण्यं दुष्परिहरम् ॥ § 3579
I.472/KSV

संशयानश्च संवादं नूनमन्वेषते जनः ।
तदपेक्षाकृतं तस्मात् प्रामाण्यं परतो ध्रुवम् ॥ १११ ॥§ 3581

## शून्यवादनिरासाय सर्वेषां ज्ञानानां यथार्थत्वं न वक्तव्यम्

न चैष शून्यवादस्य प्रतीकारक्रियाक्रमः ।
अनर्थजा हि निर्दग्धपित्रादौ भवति स्मृतिः ॥ ११२ ॥§ 3583

---

२२--२३ ] पित्तं त्विन्द्रियस्थं— nyāma-wit__kha

२ ] मप— nyāma-wit__kha

दृष्टान्तीकृत्य तामेव शून्यवादी समुत्थितः ।
भ्रमापह्नवमात्रेण प्रतिहन्तुं न शक्यते ॥ ११३ ॥§ 3585

## एवं परतःप्रामाण्यखण्डनेन शून्यवादिनिरासो न भवति

अथास्ति काचित्परतः प्रामाण्यस्य निषेधिका ।
शून्यवादस्य या युक्तिः सैव वाच्या किमेतया ? ॥ ११४ ॥§ 3587

तस्माद्यथार्थमस्याः संश्रयणं तन्न निषिद्धमख्यातेः ।
संविद्विरोध एव प्रकटित इति धिक् प्रमादित्वम् ॥ ११५ ॥§ 3589

तदुक्तम्— § 3590

कृतश्च शीलविध्वंसः न चानङ्गश्च सङ्गतः ।
आत्मा च लाघवं नीतः तच्च कार्यं न साधितम् इति ॥§ 3592

## अन्यथाख्यातेः असत्ख्यातावपर्यवसानम्

यत्पुनर्विपरीतख्यातौ पक्षत्रयमाशङ्क्य दूषितम् पु. ४५६— तदपि न युक्तम्—अस्तु तावदयमेव आद्यः पक्षः रजतमालम्बनं, तदेव चास्यां प्रतीतौ परिस्फुरति इति ॥ § 3593

ननु पुरतः अविद्यमानस्यैव रजतादेर्भानाङ्गीकारे, एवं अर्थमन्तरेव सर्वोऽपि प्रत्यय उत्पन्नो भवतीति वदन् शून्यवादी कथं निरसितुं शक्यः ? इत्यत्राह—न चेति । शुक्तिरजतभ्रममादायैव न शून्यवादः प्रसञ्जितः । किन्तु अर्थमन्तराऽपि स्मृतेर्दर्शनात् तद्दृष्टान्तेनैव । अधिकं परस्तात् ९ आह्निके अतः शून्ययादिनो भीत्या नाख्यातिरङ्गीकरणीया ॥ § 3594

अथेति । शून्यवादस्य निषेधिकेत्यनुकर्षः । यदि परतः प्रामाण्यनिषेधेन शून्यवादो निरस्यः, तदा सफलः प्रयासः । तत्तु न । अतः किमेतया चर्चया

२० ] वादे— nyāma-wit_kha
१ ] वान्या— nyāma-wit_ka
२ ] तत्— nyāma-wit_kha
४ ] शूल— nyāma-wit_kha
५ ] परीता— nyāma-wit_ka

‖ § 3595

I.473/KSV

ननु ! अत्र चोदितं पु. ४५६ असत्ख्यातिरेव सा भवेत् इति; नैतत् साधु । देशान्तरादौ रजतस्य विद्यमानत्वात् । असत्ख्यातिपक्षे हि एकान्तासतोऽर्थस्य प्रतिभानमङ्गीक्रियते । इह तु देशान्तरादौ विद्यमानस्येति महान् भेदः ‖ § 3596

ननु ! तत्रासतोऽर्थस्य किं देशान्तरचिन्तया ?
किं कुर्मः ? तादृशस्यैव वस्तुनः ख्यातिदर्शनात् ‖ ११६
‖§ 3598

यस्तु देशान्तरेऽप्यर्थो नास्ति कालान्तरेऽपि वा ।
न तस्य ग्रहणं दृष्टं गगनेन्दीवरादिवत् ‖ ११७ ‖§ 3600

अयमेव च द्वयोरसत्त्वयोर्विशेषः, यत् एकस्य ग्रहणं दृष्टं, इतरस्य न दृष्टमिति ‖ § 3601

## तत्रासतोऽपि भानसंभवोपपादनम्

ननु ! उक्तं पु. ४५९ तत्र असतोऽर्थस्य कथं ज्ञानजनकत्वम् ? अजनकस्य वा कथं प्रतिभासः ? § 3602

उक्तमत्र पु. ४५७ सदृशपदार्थदर्शनोद्भूतस्मृत्युपस्थापितस्य रजतस्यात्र प्रतिभासनमिति । न चास्योपस्थापनं पशोरिव रज्ज्वा संयम्य ढौकनम्, अपि तु हृदये परिस्फुरतोऽर्थस्य बहिरवभासनम् । न चैतावतेयमात्मख्यातिः, असत्ख्यातिर्वेति वक्तव्यम्; विज्ञानात् विच्छेदप्रतीतेः, अत्यन्तासदर्थप्रतिभासाभावाच्चेति ‖ § 3603

## शुक्तिरजतभ्रमे शुक्तेरालम्बनत्वेऽपि न क्षतिः

अथवा पिहितस्वाकारा परिगृहीतपराकारा शुक्तिकैवात्र प्रतिभातीति भवतु(?)द्वितीयः पु. ४५७ पक्षः ‖ § 3604

तत्रासत इति । तत्र यदि नास्ति, तर्हि देशान्तरस्थितिः कुत्रोपयुज्यते । तत्रासत्तु भासत एवेति पूर्वार्धस्य भावः । सर्वथाऽसतः कुत्राप्यभानात् देशान्तरावस्थितिरेव प्रकृतभानप्रयोजिकेति समाधानम् । एकस्य— तत्रासतः । ग्रहणं, अन्यत्रेति शेषः । न दृष्टं, क्वापीति शेषः ‖ § 3605

---

१७--१९ ] असत्ख्यातिपक्षे हि— nyāma-wit_kha

१ ] तत्रैकान्ता— nyāma-wit_kha

१४ ] अत एव— nyāma-wit_kha

ढौकनं—ढौकृगताविति धातुः । विच्छेदप्रतीतेः—ज्ञानं तु अन्तर्मुखतया भाति, विषयस्तु बहिष्ट्वेन ॥ § 3606
I.474/KSV

ननु ! उक्तं पु. ४५७ कृत्यासीतावत् किमिदं वेशभाषापरिवर्तन-म् ? कथं च रजतज्ञाने शुक्तिकावभासितुमर्हतीति— श्रुतमिदं नाट-कम्—न तु वयमत्रोपहासपात्रम् । शुक्तिकेति वस्तुस्थितिरेषा कथ्यते । पुरोऽवस्थितं धर्मिमात्रं भास्वररूपादिसादृश्योपजनितरजतविशेषस्मरण-मत्र प्रतिभातीति ब्रूमः—यदेतत्पुरः किमपि वर्तते तद्रजतम् इत्यनुभवात् । वस्तुस्थित्या तु शुक्तिरेव सा त्रिकोणत्वादिविशेषग्रहणाभावाच्च निगूहित-निजाकारेत्युच्यते, रजतविशेषस्मरणाच्च परिगृहीतरजताकारेति ॥ § 3607

## भ्रमद्वैविध्यम्

एतच्च विषयेन्द्रियादिदोषप्रभवेषु शुक्तिकारजतावभासभास्करकिरणज-लावगमजलदगन्धर्वनगरनिर्वर्णनरज्जुभुजगग्रहणरोहिणीरमणद्वयदर्शन-शङ्खश-र्करापीततिक्ततावसाय-केशकूर्चकालोकनादिविभ्रमेष्वभ्युपगम्यते । म-नोदोषनिबन्धनेषु तु मिथ्याप्रत्ययेषु निरालम्बनेषु स्मृत्युल्लिखित एव आकारः प्रकाशत इति ॥ § 3608

## शुक्तिरालम्बनं, भानं तु रजतस्येति पक्षेऽपि न दोषः

यस्तु तृतीयः पक्षः पु. ४५८ अन्यदालम्बनं, अन्यश्च प्रतिभाति इति कैश्चिदाश्रितः—तत्रापि न सन्निहितस्यालम्बनत्वमुच्यते, येन भूप्रदेशस्यापि तथात्वमाशङ्क्येत ॥ § 3609

नापि जनकस्यालम्बनत्वम्, यच्चक्षुरादावपि प्रसज्येत । किन्तु इदमित्य-ङ्गुल्या निर्दिश्यमानं कर्मतया यज्ज्ञानस्य जनकं, तदालम्बनमित्युच्यमाने न कश्चिद्दोषः ॥ § 3610

## देशकूर्चादिभ्रमेषु आलम्बनकथनम्

ननु ! केशोण्ड्रकज्ञाने किमालम्बनकारणम् ? किञ्चित्तु तिमिरं रोम-राजिरिव नयनधाम्नो मध्य एवास्ते । तेन द्विधाकृता नयनवृत्तिः § 3611

पुरोऽवास्थतमिति । यदवलम्ब्य ज्ञानमुत्पद्यते, तदेवालम्बनमिति शुक्त्य-वष्टम्भेनैव रजतभानात् शुक्तिरेवालम्बनं वाच्यमित्यर्थः ॥ § 3612

१ ] भवेषु— nyāma-wit__ka
४ ] निराकारः— nyāma-wit__kha
९ ] आलम्बनस्याजनकत्वम्— nyāma-wit__kha

निरालम्बनेषु—बाह्यालम्बनशून्येषु ॥ § 3613

किञ्चित्तु—विलक्षणं, यादृशं तिमिरं चाक्षुषप्रत्यक्षविरोधि च न स्यात् ॥ § 3614

I.475/KSV

द्वित्वेन चन्द्रमसं गृह्णाति । किञ्चित्तु तिमिरं तत्र विवरवदन्तराऽन्तरा तिष्ठति चक्षुषः । तेन विरलप्रसृता नयनरश्मयः सूक्ष्माः सूर्यांशुभिरुपहन्यमानाः केशकूर्चकाकारा भवन्तीति तदेवालम्बनम् । अनुदितेऽस्तमिते वा सवितरि केशोण्ड्रकप्रत्ययस्यानुत्पादात् ॥ § 3615

गन्धर्वनगरज्ञाने जलदाः पाण्डुरत्विषः ।
आलम्बनं गृहाट्टलप्रकाराकारधारिणः ॥ ११८ ॥§ 3617

तस्मात् विपरीतख्यातौ पक्षत्रयमपि निरवद्यम् ॥ § 3618

## ख्यातिसाङ्कर्यपरिहारः

यः पुनः इतरेतरसङ्करः ख्यातीनामुदाहारि पु. ४६०—तत्र आत्मख्यात्यख्याती अपवर्गाह्निके ९तमे वयमपि विज्ञानाद्वैतमपाकरिष्यन्तः पराकरिष्याम इति किं तच्चिन्तया ? विपरीतख्यातौ तु तत्साङ्कर्यं परिहृतम् ॥ § 3619

## अख्यातेः विपरीतख्यातिहेतुत्वम्

यत्पुनरवादि—सर्ववादिभिः स्मृतिप्रमोषोऽभ्युपगत एव । प्राभाकरैस्तुयशः पीतम् इति पु. ४६०—तत्र वाद्यन्तराणि तावत् यथा भवन्ति, तथा भवन्तु । वयं तु स्मृत्युपारूढरजताद्याकारप्रतिभासमभिवदन्तो बाढं स्मृतिप्रमोषमभ्युपगतवन्तः । किन्तु न तावत्येव विश्राम्यति मतिः । अपि तु रजताद्यनुभवोऽपि संवेद्यत इति न स्मृतिप्रमोषमात्र एव विरन्तव्यम् । अतो विपरीतख्यातिपक्ष एव निरवद्य इति स्थितम् ॥ § 3620

निरवद्य इति । यद्यपि तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन ? इति न्यायात् विपरीतख्यातिहेतुनैव अख्यात्या भ्रमनिर्वाहे सोपानान्तरारोहणं गौरवग्रस्तम्—परन्तु रजतप्रतीतेरनुभवसिद्धत्वेन न गौरवलाघवचर्चाया अवकाशः । यथोक्तमभियुक्तैः—स्वारस्यमन्यथाख्यातावख्यातौ लाघवं स्थितम् । न्या. प. १-१ इति ॥ § 3621

I.476/KSV

## विषयापहारस्यैव बाधरूपत्वम्

३ ] विपरीता— nyāma-wit__ka

यस्तु बाधप्रकारः प्राग्विकल्पितः—तत्र सहानवस्थानसंस्कारोच्छेदादिपक्षा अनभ्युपगमेनैव निरस्ता इत्यस्थाने कण्ठशोष आयुष्मताऽनुभूतः । विषयापहारस्तावदस्तु बाधः । विषयस्य च न प्रतिभातत्वमपह्रियते, किन्तु प्रतिभातस्यासत्त्वं ख्याप्यत इत्यपहारार्थः । असत्त्वमपि नेदानीमुपनतस्य ख्याप्यते, येन पूर्वदृष्ट द्रघणभग्नकुम्भाभावप्रतिभासवदबाधः स्यात् । न च तदानीमप्यभावग्रहणे वस्तुनो द्व्यात्मकत्वमाशङ्कनीयम्; पूर्वावगताकारोपमर्दद्वारेण बाधकप्रत्ययोत्पादात्; यन्मया तदा रजतमिति गृहीतं तद्रजतं न भवति, अन्यदेव तद्वस्त्विति ॥ § 3622

## प्रतीतयः न वर्तमानमात्रविषयिण्यः

ननु ! स्वकालनियतत्वात् ज्ञानानां कथमुत्तरस्य ज्ञानस्य पूर्वज्ञानोत्पादकालावच्छिन्नतद्विषयाभावग्रहणसामर्थ्यम् ?—किं कुर्मः ? तथा प्रत्ययोत्पादात् । न भग्नघटवदिदानीं तन्नास्तिता गृह्यते, अपि तु तदैव तदसदिति प्रतीतिः । यथा च न वर्तमानैकनिष्ठा एव विषयप्रतीतयस्तथा क्षणभङ्गभङ्गे ९ आह्निकं वक्ष्यामः ॥ § 3623

## फलापहारस्य बाधत्वपक्षोऽपि युक्तः

अथवा फलापहारो भवतु बाधः । प्रमाणफलत्वं च हानादिबुद्धीनां प्रत्यक्षलक्षणे वर्णितमिति पु. १७४ तदपहरणात् प्रमाणं बाधितं भवत्येव । किंकुर्वता बाधकेन प्रमाणफलमपहृतमिति चेत्— § 3624

इदानीं—बाधप्रत्ययकाले उपनतस्य, असत्त्वस्येति शेषः । न हि कालभेदेन सत्त्वासत्त्वयोर्विरोधः । तदानीं—भ्रमकाले । द्व्यात्मकत्वमिति । भ्रमकाले सत्त्वेनैव भानात्, तदानीमेवासत्त्वस्यापि भानाच्चेति भावः । पूर्वेत्यादि । तदानीमसत्त्वं न हि तदानीमेव भातम्, येन द्व्यात्मकता स्यात् इति भावः ॥ § 3625

स्वकालेत्यादि । ज्ञानं हि वर्तमानैकविषयं, प्रत्युत ऐन्द्रियिकम् । अतीतादिविषयकं तु स्मृतिरेव । अतश्च प्रत्यक्षं वर्तमानैकग्राहीति अनन्तरकालिकः बाधप्रत्ययः पूर्वकालिकासत्त्वं कथमवगमयेदित्यर्थः ॥ § 3626

I.477/KSV

गायता नृत्यता वाऽपि जपता जुह्वताऽपि वा ।
तच्चेत् कार्यं कृतं तेन किमवान्तरकर्मणा ? ॥ ११९ ॥§ 3628

तदभ्युपगमे वाऽपि तत्किं विदधता कृतम् ?

२० ] दृष्टपूर्व— nyāma-wit_kha

तच्च किं कुर्वतेत्येवमवधिः को भविष्यति ? ॥ १२० ॥§ 3630

तदलममुनाऽवान्तरप्रश्नेन । सर्वथा बाधकप्रत्ययोपजनने सति हानादिरूपं पूर्वप्रमाणफलं निवर्तत इति तेन तद्बाधितमुच्यते ॥ § 3631

## बाधकज्ञानस्य विषयकथनम्

समानासमानविषयविकल्पोऽपि पु. ४५४ न पेशलः—एकस्मिन् विषये विरुद्धाकारग्राहिणोर्ज्ञानयोर्बाध्यबाधकभावाभ्युपगमात् । चित्रादिप्रत्यये कथं न बाध इति चेत्; पूर्वज्ञानोपमर्देनोत्तरविज्ञानानुत्पादात् ॥ § 3632

अत एव एकत्रापि धर्मिणि बहूनां धर्माणामितरेतरानुपमर्देन वेद्यमानानामस्त्येव समावेशः ॥ § 3633

## पूर्वज्ञानेनोत्तरज्ञानस्य न बाधसंभवः

पूर्वोपमर्देनोत्तरविज्ञान जन्मतश्च एतदपि प्रत्युक्तं भवति, यदुक्तं पु. ४५४—पूर्वस्मिन् प्रत्यये प्राप्तप्रतिष्ठे सत्यागन्तु ज्ञानमुत्तरं बाध्यताम् इति—यतः पूर्वोपमर्देनैव तदुत्तरं ज्ञानमुदेति; विषयसहायत्वात्, प्रमाणान्तरानुगृह्यमाणत्वाच्च उत्तरमेव ज्ञानं बाधक- § 3634

बाधकं ज्ञानं किं करोति ? इति प्रश्नः—गाति इत्युक्ते, तत्र किं कृत्वा गातीति प्रश्नतुल्य इत्याह—गायतेति । उत्तरत्रोत्तरत्र क्रियान्तरान्वेषणे अनवस्थाप्रसङ्गः ॥ § 3635

अत एव—परस्परानुपमर्देनोत्तरविज्ञानोत्पादादेव । एकत्रापीत्यादि । घटोऽयं नीलः, महान्, एकः, पटसंयुक्तश्च इत्यादिप्रतीतिः अत्र प्रमाणम् ॥ § 3636

यत इत्यादि । पूर्वज्ञानं असञ्जातविरोधित्वात् प्रबलमिति चेत्, सत्यम् । परन्तु ज्ञानस्य करणाधीनत्वेन पुरुषतन्त्रत्वाभावात् जायमानं ज्ञानं पूर्वमुपमृद्यैव जातमिति ततोऽपि उत्तरं ज्ञानमेव प्रबलम् । अन्यथासिद्धात् पूर्वात् परमेव ह्यनन्यथासिद्धं प्रबलम् । अङ्गगुणविरोधन्यायस्यासञ्जातविरोधन्या

मिति युक्तम् । तस्मादस्ति ज्ञानानां बाध्यबाधकभावः । स चायं बाधव्यवहारो विपरीतख्यातिपक्ष एव सामर्थ्यमस्खलितं दधातीति स एव ज्यायान् ॥

## भ्रमे अलौकिकरजतादिभानपक्षः

अज्ञः कोऽपि नाम मीमांसकस्त्वाह—येयं शुक्तिकायां रजतप्रतीतिर्विपरीतख्यातिरिति तद्वादिनामभिमता, सा तथा न भवतीति, सत्यरजतप्र-

---

२१ ] सर्वत्र— nyāma-wit_kha
२२ ] निवर्तयत— nyāma-wit_ka
१ ] नेतर— nyāma-wit_kha
१ ] नाजननाच्चैतदपि— nyāma-wit_kha

तीतिवदत्राप्यवभास्यरजतसद्भावात् । लौकिकालौकिकत्वे तु विशेषः । रजतज्ञानावभास्यं हि रजतमुच्यते, तच्च किञ्चित् व्यवहारप्रवर्तकं, किञ्चिन्नेति । तत्र व्यवहारप्रवर्तकं लौकिकमुच्यते, ततोऽन्यदलौकिकमिति । यच्च शुक्तिकाशकलमिति भवन्तो वदन्ति, तदलौकिकं रजतम् । रजतज्ञानावभास्यत्वात् रजतं तत्, व्यवहाराप्रवृत्तेरलौकिकमिति ॥

### भ्रमे अलौकिकरजतभानपक्षनिरासः

तदेतदपरामृष्टसंवेदनेतिवृत्तस्याभिनवपदार्थसर्गप्रजापतेरभिधानम् । बाधकप्रत्ययेन तत्र रजताभावस्य ख्यापनात् । नेदं रजतमिति हि रजतं प्रतिषेधत्येष प्रत्ययः, न विद्यमानरजतस्यालौकिकत्वमवद्योतयति इति ॥

अथ नेदं लौकिकमिति व्याख्यायते; हन्त ! वाक्यशेषः क्रियतां संयजत्रैरङ्गानि इतिवत् । सोऽयं श्रोत्रियः स्वशास्त्रवर्तनी- यापवादत्वं मीमांसकैकौस्तु. ३-३-१रप्यङ्गीकृतमेव । विपरीतख्यातिपक्ष एवेति । अख्यातिपक्षे ज्ञानद्वयस्यापि यथार्थत्वेन नेदृशं बाधनं स्वरसतो वर्णितुं शक्यमित्यर्थः ॥
§ 3637

किं नाम लौकिकत्वमलौकिकत्वं च ? कश्च तयोस्साधारणो धर्मः ? इत्यग्राहरजतज्ञानेत्यादि । व्यवहारः—कटकनिर्माणादिः । वदन्ति इत्यत्र बाधकाल इति शेषः । प्रतीतिकाले तु रजतमित्येव भानात् रजतज्ञानावभास्यत्वरूपं रजतत्वसामान्यं तत्रास्त्येव । न्यायकन्दल्यामप्ययं पक्षः पु. १८१प्रदर्शितः ॥ § 3638

रजतं—रजतसामान्यम् । विद्यमानस्य तदानीं भातस्येति भावः ॥ § 3639

व्याख्यायते, बाधकप्रत्यय इति शेषः । संयजत्रैरित्यादि । अननुषङ्गाधिकरण२-१-४९विषयोऽयम् । सं ते प्राणो वायुना गच्छतां

मिहापि न तां त्यजति; न तु तस्या अयमवसरः । अगृह्यमाणे तु रजताख्येऽन्यधर्मिणि कथं तद्धर्मत्वेन लौकिकत्वं गृह्यते ? रजताभावग्रहणे त्वेष न दोषः । भावतदभावयोः धर्मधर्मिभावाभावात् । स्मर्यमाणप्रतियोग्यवच्छिन्नो हि अभावो गृह्यत एव । तस्मादत्र मास्त्येव रजतं, न पुनरलैकिकं तदस्ति ॥

### लौकिकालौकिकरजतसामान्यं न प्रामाणिकम्

न च रजतज्ञानावभास्यत्वमात्रं रजतलक्षणम्; अपि तु अबाधितरेजतज्ञानगम्यत्वम् ॥

### वस्तुनि लौकिकालौकिकविभागोऽप्यप्रामाणिकः

अपि च लौकिकालौकिकप्रविभागः प्रतिभासनिबन्धनो वा स्यात् ? व्यवहारसदसद्भावनिबन्धनो वा ? न तावत् प्रतिभासनिबन्धनः, तथा प्रतीत्यभावात् । क्वचिद्धि रजतं, क्वचिच्च तदभावः प्रतीयते; न तु लौकिकत्वमलौकिकत्वं वा ॥

अथ व्यवहारप्रवृत्त्यप्रवृत्तिभ्यां लौकिकालौकिकत्वे व्यवस्थाप्येते—तद्वक्तव्यं कोऽयं व्यवहारो नामेति । ज्ञानाभिधानस्वभावो हि व्यवहारः; स च

तद्विषयो नास्तीत्युक्तम् । तदर्थक्रियानि- संयजत्रैरङ्गानि इत्यत्र हे पशो ते प्राणो वायुना संगच्छतां, अङ्गानि यजत्रैः— यागविशेषैः संगच्छन्ताम्(?') इत्यर्थे वर्णनीये गच्छतां इत्यस्यैवानुषङ्गः वचनविपरिणामेन युक्तः—इति पूर्वपक्षे, गच्छतां इत्यस्यैकवचनान्तत्वेन श्रौतं पदं नानुषक्तुं शक्यं, किन्तु गच्छन्तां इति लौकिको वाक्यशेषः कर्तव्यः इति सिद्धान्तितम् । लौकिकत्वं कथं गृह्यते, अग्रहणे कथं तस्य निषेधः ? इति तात्पर्यम् । ननु भवन्मते वा रजतनिषेधः कथम् ? पूर्वं रजतं न गृहीतमेव, भसत्वात् । अगृहीतस्य च निषेधो न भवत्येवेत्यत्राह—भावतदभावयोरिति । निषेधस्तु अविद्यमानस्यैव, नागृहीतस्येति सारम् । न पुनः—न तराम् ॥ § 3640

तथा—लौकिकत्वेनालौकिकत्वेन वा ॥ § 3641

ज्ञानाभिधाने—ज्ञानं व्यवहारश्च । तद्विषयः—रजतादिविषयः । तदर्थक्रियेति । तत्संपाद्यार्थक्रियेत्यर्थः । अर्थक्रियायाः—जलाहरणादिरूपायाः ॥ § 3642

I.480/KSV

वर्तनं व्यवहार इति चेत्, तर्हि स्वप्ने परिरभ्यमाणाया योषितः, कूटकार्षापणस्य च लौकिकत्वं प्राप्नोति । उत्पद्य नष्टे घटे अर्थक्रियाया निवृत्तेरलौकिकत्वं स्यात् ॥ § 3643

अपि च यः शुक्तिकायां रजतव्यवहारं न करोति, स रजताभावमेव बुध्वा; न रजतस्य सतस्तस्यालौकिकताम् ॥ § 3644

## अलौकिकरजतभानमतेऽपि अन्यथाख्यातिरवर्जनीया

यदि चेदमलौकिकं रजतं तत् किमर्थमिह तदर्थक्रियार्थं प्रवर्तते ? अलौकिकं लौकिकत्वेन गृहीत्वेति चेत्—सैवेयं तपस्विनी विपरीतख्यातिरायाता । तस्मात् विपरीतख्यातिद्वेषेण कृतमीदृशा । अत्रापि लोकसिद्धैव प्रतीतिरनुगम्यताम् ॥ § 3645

## स्वतःप्रामाण्यसाधनायाख्यातिवादः न पर्याप्तः

न वा मीमांसका एते स्वभार्यामपि वेश्मतः ।
निस्सारयितुमिच्छन्ति स्वतःप्रामाण्यतृष्णया ॥ १२१ ॥§ 3647

न चैवमपि तत्सिद्धिः बुद्धिद्वैविध्यदर्शनात् ।

१० ] न— nyāma-wit_ka nyāma-wit_kha
१२ ] त्वेव— nyāma-wit_ka
२०--२१ ] यथाप्रतीति—
२४ ] स— nyāma-wit_kha

संशये सति संवादसापेक्षत्वं तथैव तत् ॥ १२२ ॥§ 3649

क्लेशेन तदमुनाऽपि स्वार्थस्तेषां प्रसिध्यति न कश्चित् ।
यद्भवति दैवगत्या राजपथेनैव तद्भवतु ॥ १२३ ॥§ 3651

अपि चेत्यादि । भ्रान्तः यां शुक्तिं दृष्ट्वा रजतं जानाति, तदैव तां अभ्रान्तो रजततया न व्यवहरतीत्यत्र, तेन तथाऽज्ञानमेव हि हेतुर्वाच्यः, न तु तत्रालौकिकरजतसत्तां जानन्नेव लौकिकरजताभावं निश्चित्य तां शुक्तिकां व्यवहरति । अतः अलौकिकरजतभानं अनुभवविरुद्धम् ॥ § 3652

ईदृशा द्वेषेण कृतं—अलमित्यर्थः ॥ § 3653

न वा इच्छन्ति इति काकुः । स्वतःप्रामाण्यव्यामोहेन अलौकिकमेव व्यवहरन्तीति कृत्याकृत्यमपि न जानन्तीति वा उपहासः । बुद्धिद्वैविध्यं प्रमाभ्रमभेदेन । स्वार्थः—स्वाभिमतम् । यद्भवतीत्यादि । यत्तु सर्वथाऽनिवार्यं, तत् हार्दमेव स्वीकुर्मः । न तु दौर्बल्येन अपथे गन्तव्यमिति भावः ॥ § 3654
I.481/KSV

## ख्यातिवादोपसंहारः

नात्मख्यातिर्बाह्यतयाऽर्थप्रतिभासात्
नासत्ख्यातिर्न ह्यसतां धीविषयत्वम् ।
उक्तोऽख्यातौ दूषणमार्गो विपरीत-
ख्यातिस्तस्मादाश्रयणीया मतिमद्भिः ॥ १२४ ॥§ 3658

## वेदानां प्रामाण्यं परत एव

स्थिते च तस्मिन् विपरीतवेदने
तदीयसाधर्म्यकृतोऽस्ति संशयः ।
तदा च संवादमुखप्रतीक्षणात्
भजन्ति बोधाः परतः प्रमाणताम् ॥ १२५ ॥§ 3662

प्रत्यक्षादिप्रमाणानां तद्यथाऽस्तु तथाऽस्तु वा ।
शब्दस्य हि प्रमाणत्वं परतो मुक्तसंशयम् ॥ १२६ ॥§ 3664

## वेदे प्रामाण्यनिश्चयमन्तरा तद्विहितेषु न प्रवृत्तिसंभवः

१८ ] चैव— nyāma-wit_kha    ९ ] वेदाः— nyāma-wit_kha

दृष्टे हि विषये प्रामाण्यनिश्चयमन्तरेणैव लघुपरिश्रमेषु कर्मसु प्रवृत्तिरिति तदुपयोगिप्रत्यक्षादिप्रमाणप्रामाण्यनिश्चये दुरुपपादे कोऽभिनिवेशः ? शब्दे पुनः अदृष्टपुरुषार्थपथोपदेशिनि प्रामाण्यमनिनिश्चत्य महाप्रयत्ननिर्वर्त्यानि ज्योतिष्टोमादीनि न प्रेक्षापूर्वकारिणो यज्वानः प्रयुञ्जीरन्नित्यवश्यं निश्चेतव्यं तत्र प्रामाण्यम् । तच्च परत एवेति ब्रूमः ॥ § 3665

## शब्दानां परतःप्रामाण्ये हेतुः

शब्दस्य वृद्धव्यवहाराधिगतसम्बन्धोपकृतस्य सतः प्रतीतिजनकत्वं नाम रूपमवधृतम् । तत्तु नैसर्गिकशक्त्यात्मकसम्बन्ध- § 3666

अस्ति संशयः—बोधत्वरूपसाधारणधर्मकृतः सर्वत्रापि ज्ञाने इदं प्रमाण न वा ? इति भवत्येव । मुक्तसंशयं इति क्रियाविशेषणम् ॥ § 3667

अदृष्टपुरुषार्थोपदेशिनि शब्दे—वेदे । दृष्टार्थविषयकलौकिकशब्दस्य तु अनुपदोक्तप्रत्यक्षतुल्या गतिरिति भावः ॥ § 3668

I.482/KSV

महिम्ना वा, पुरुषघटितसमयसम्बन्धवलेन वेति विचारयिष्यामः ४ आह्निकम् । प्रकाशकत्वमात्रं तु दीपादेरिव तस्य रूपम् । यथा हि दीपः प्रकाशमानः शुचिमशुचिं वा यथासन्निहितमर्थमवद्योतयति, तथा शब्दोऽपि पुरुषेण प्रयोज्यमानः श्रवणपथमुपगतः सत्येऽनृतेऽवा, समन्वितेऽसमन्विते वा, सफले निष्फले वा, सिद्धे कार्ये वाऽर्थे प्रमितिमुपजनयतीति तावदेवास्य रूपम् । अयं तु दीपाच्छब्दस्य विशेषः—यदेष सम्बन्धव्युत्पत्तिमपेक्षमाणः प्रमामुत्पादयतीति, दीपस्तु तन्निरपेक्ष इति ॥ § 3669

## वक्तृगुणदोषाधीने एव शब्दप्रामाण्याप्रामाण्ये

तस्याः शब्दजनितायाः प्रमितेः यथार्थेतरत्वं पुरुषदर्शनाधीनम्—सम्यग्दर्शिनि शुचौ पुरुषे सति सत्यार्था सा भवति प्रतीतिः, इतरथा तु तद्विपरीतेति । तत्र यथा नैसर्गिकमर्थसंस्पर्शित्वं शब्दस्य रूपं इति समर्थितं, एवमस्य स्वाभाविकं सत्यार्थत्वमपि न रूपम् । एवमभ्युपगम्यमाने विप्रलम्भकवचासि विसंवाददर्शनं न भवेत् । तस्मात्पुरुषगुणदोषाधीनावेव शाब्दे प्रत्यये संवादविसंवादौ ॥ § 3670

## शब्दे गुणदोषयोः सौलभ्यम्

४ ] तथा— nyāma-wit__kha
६ ] सत्योऽनृतो— nyāma-wit__kha
१० ] तस्यास्तु— nyāma-wit__ka
१० ] पुरुषाधीनं— nyāma-wit__kha

न चेन्द्रियादाविव तत्र दुर्भणा गुणाः—रागादयो दोषाः, करुणादयो गुणाः पुरुषाणामतिप्रसिद्धा एव । पुरुषगुणा एव शब्दस्य गुणाः न स्वशरीरसंस्थाः चक्षुरादेरिवेति । तत्र यदि पुरुषगुणानां प्रामाण्यकारणता नेष्यते, दोषाणामपि विप्लवहेतुता मा भूत् ॥ § 3671

अयं तु विशेष इति । इदमुपलक्षणम्—प्रत्यक्षे चक्षुरेव करणम्, दीपस्तु सहकारी । अत्र शब्द एव करणम्, शाब्दबोधः खल्वयम् ॥ § 3672

पुरुषदर्शनाधीनं—शब्दप्रयोक्तृपुरुषदर्शनानुगुणम् । शुचौ— विप्रलम्भकत्वादिदोषरहिते । एवमभ्युपगम्यमाने—यथार्थत्वमपि शब्दस्य स्वाभाविकमित्यङ्गीक्रियमाणे सति ॥ § 3673

पूर्वं ४२२ पु. उक्तं स्मरन् समाधत्ते—न चेत्यादिना । स्वशरीरसंस्थाः—शब्दस्वरूपनिष्ठाः । दुर्भणाः—दुर्वचाः ॥ § 3674

I.483/KSV

## गुणज्ञानं दोषाभावनिश्चयायैवेत्यप्ययुक्तम्

यत्तु दोषप्रशमनचरितार्था एव पुरुषगुणाः प्रामाण्यहेतवस्तु न भवन्तीति पु. ४३५—अत्र शपथशरणा एव श्रोत्रियाः । न च बाधानुत्पत्तिमात्रेण वैदिक्याः प्रतीतेः प्रामाण्यं भवितुमर्हति, पक्ष्मलाक्षीलक्षमभिरमयेत् विद्याधरपदकामः इत्यादावपि प्रामाण्यप्रसङ्गात् । उक्तं च केन चित्— § 3675

यथा हि स्वप्नदृष्टोऽर्थः कश्चिद्वीपान्तरादिषु ।
असंभवद्विसंवादः श्रद्धातुं नैव शक्यते ॥§ 3677

तथा चोदनयाऽप्यर्थं बोध्यमानमतीन्द्रियम् ।
असंभवद्विसंवादं न श्रद्दधति के चन इति ॥§ 3679

तत्र स्वप्नज्ञाने हेतुः निद्रादिदोषोऽस्तीति दुष्टकारणज्ञानादप्रामाण्यमिति चेत्—लोलाक्षीलक्षवाक्ये किं वक्ष्यसि ? प्रभवस्तस्य न ज्ञायत इति चेत्—न तरामसौ वेदेऽपि त्वन्मते ज्ञायत इति को विशेषः ? महाजनादिपरिग्रहोऽस्य नास्तीति चेत्—अन्वेषणीयं तर्हि प्रामाण्यकारणम्, न बुद्ध्युत्पादकत्वादेवौत्सर्गिकं प्रामाण्यमिति युक्तम् ॥ § 3680

साक्षाद्दृष्टनरोक्तत्वं शब्दे यावन्न निश्चितम् ।
बाधानुत्पत्तिमात्रेण न तावत्तत्प्रमाणता ॥ १२७ ॥§ 3682

## अपौरुषेयत्वाद्वेदस्य दोषाभावप्राप्त्या स्वतः प्रामाण्यमित्यपि न

४ ] दर्शनात्— nyāma-wit_ka nyāma-wit_kha
८ ] असंवाद वि—

यदपि वेदे कारणदोषनिराकरणाय कथ्यते श्लो. वा. १-२-६३—

यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः[§ 3684]

इति—तदप्यसांप्रतम्—असति वक्तरि प्रामाण्यहेतूनां गुणानामप्यभावेन तत्प्रामाण्यस्याप्यभावात् । न च वेदे वक्तुरभावः सुवचः—तथा ह्येतदेव तावद्विचारयामः, किं वेदे वक्ता विद्यते न वेति ॥ [§ 3685]

असंभवद्विसंवादः—अप्राप्तविसंबादोऽपि । तस्य प्रभवः—तद्वाक्यस्य मूलम् । त्वन्मते—अपौरुषेयः खलु चेदस्तव ॥ [§ 3686]
I.484/KSV

## वेदानां परमेश्वरप्रणीतत्वम्

ननु वेदे प्रमाणान्तरसंस्पर्शरहितविचित्रकर्मफलगतसाध्यसाधनभावोपदेशिनि कथं तदर्थसाक्षाद्दर्शी पुरुष उपदेष्टा भवेत् ? उच्यते— [§ 3687]

वेदस्य पुरुषः कर्ता न हि यादृशतादृशः ।
किन्तु त्रैलोक्यनिर्माणनिपुणः परमेश्वरः ॥ १२८ ॥[§ 3689]

स देवः परमो ज्ञाता नित्यानन्दः कृपान्वितः ।
क्लेशकर्मविपाकादिपरामर्शविवर्जितः ॥ १२९ ॥[§ 3691]

## ईश्वरसद्भावाक्षेपः

अत्राह—किं ब्रूषे ? त्रैलोक्यनिर्माणनिपुणमतिरिति ! अहो तव सरलमतित्वम् ! न हि तथाविधपुरुषसद्भावे किश्चन प्रमाणमस्ति ॥ [§ 3692]

## ईश्वरः न प्रत्यक्षः

तथा हीश्वरसद्भावो न प्रत्यक्षप्रमाणकः ।
न ह्यसावक्षविज्ञाने रूपादिरिव भासते ॥ १३० ॥[§ 3694]

न च मानसविज्ञानसंवेद्योऽयं सुखादिवत् ।
योगिनामप्रसिद्धत्वात् न तत्प्रत्यक्षगोचरः ॥ १३१ ॥[§ 3696]

## ईश्वरः नानुमानिकः

प्रत्यक्षप्रतिषेधेन तत्पूर्वकमपाकृतम् ।
अनुमानं, अनिर्ज्ञाते तस्मिन् व्याप्त्यनुपग्रहात् ॥ १३२ ॥§ 3698

यादृशतादृशः—यः कश्चित्सामान्यशक्तिमान् ॥ § 3699

अत्राहेति । नात्र विशिष्य कश्चित् पूर्वपक्षी, प्रमाणचतुष्टयोपन्यासात् । किन्तु मीमांसकैः ईश्वरनिराकर्तॄणां चार्वाकबौद्धजैननैयायिकादीनां वादान् संगृह्य उपन्यस्तः पूर्वपक्षः प्रकृतानुगुणमनूदितः ॥ § 3700

सुखादिवदिति । स्वात्म-तत्समवेतगुणा एव हि मनोग्राह्या इति भावः । योगिनामिति । यद्यपि योगिप्रत्यक्षं पूर्वं पु. २६८ प्रसाधितम्; तदनभ्युपगमेनात्राक्षेपः ॥ § 3701

I.485/KSV

## घटादिदृष्टान्तेन जगतः सकर्तृकत्वं नानुमातुं शक्यम्

न च सामान्यतो दृष्टं लिङ्गमस्यास्ति किञ्चन ।
क्षित्यादीनां तु कार्यत्वमसिद्धं सुधियः प्रति ॥ १३३ ॥§ 3703

शैलादिसन्निवेशोऽपि नैष कर्त्रनुमापकः ।
कर्तृपूर्वककुम्भादिसन्निवेशविलक्षणः ॥ १३४ ॥§ 3705

दृष्टः कर्त्रविनाभावी सन्निवेशो हि यादृशः ।
तादृङ्गादौ नास्तीति कार्यत्ववदसिद्धता ॥ १३५ ॥§ 3707

## सकर्तृकत्वसाधककार्यत्वहेतुः तृणादौ व्यभिचरितः

सिद्धत्वेऽपि न हेतुत्वं अनैकान्त्यात्तृणादिभिः ।
अकृष्टजातैः, कर्तारमन्तरेणाप्तजन्मभिः ॥ १३६ ॥§ 3709

तेषामुत्पत्तिसमयप्रत्यक्षत्वेन लभ्यते ।
कर्तुर्दृश्यत्वमपि, एवं अभावोऽनुपलब्धितः ॥ १३७ ॥§ 3711

## दृष्टातिरिक्तं कारणं कुत्रापि कल्पयितुं न शक्यम्

---

१४ ] अविज्ञाते— nyāma-wit__kha
७ ] न सिद्धत्वं— nyāma-wit__kha
९ ] समये प्रत्यक्षत्वं— nyāma-wit__kha
९ ] लक्ष्यते— nyāma-wit__kha
१० ] मित्येवं— nyāma-wit__ka

न च क्षितिजलप्रायदृष्टहेत्वतिरेकिणः ।
कस्यापि कल्पनं तेषु युज्यतेऽतिप्रसङ्गतः ॥ १३८ ॥§ 3713

नैष कर्त्रनुमापकः इत्यत्र साभिप्रायविशेषणं शैलसन्निवेशस्य कर्तृपूर्वकेत्यादि । सन्निवेशः—अवयवसंस्थानम् । वैलक्षण्यमेवोपपादयति—दृष्ट इत्यादि । तथा च घटादिसन्निवेशसाम्यस्यैव नगादावसिध्या, तेन कार्यत्वमपि न सिध्यति ॥ § 3714

अकृष्टजातैः—कर्षणमन्तरापि जातैः । तेषां—सकर्तृकाणां कुम्भादीनाम् । तेषां सकर्तृकत्वं यदा येन प्रमाणेनावगतं, तदा तेनैव कर्तुर्दृश्यत्वमपि । प्रकृते तथाऽनुपलब्धेः कर्तुरभाव एवेत्यर्थः । अथवा तेषां—तृणादीनां उत्पत्तिसमयप्रत्यक्षत्वं यतो न लक्ष्यते, तथा कर्तुरपि दृश्यत्वं न लक्ष्यत इति अनुपलब्धेः कर्तुरभावः । ४९५ पुटो द्रष्टव्यः ॥ § 3715

क्षितिजलेति । तृणादीनां कारणं हि क्षेत्रं, जलं इत्यादि यत् दृष्टं तदेवालं हेतुत्वे । अन्यथा कुत्रापि कार्यकारणभावानिर्णयः, प्रत्यक्षस्य

तेन कर्तुरभावेऽपि सन्निवेशादिदर्शनात् ।
अनैकान्तिकता हेतोः विप्रत्वे पुरुषत्ववत् ॥ १३९ ॥§ 3718

## घटादिदृष्टान्तेन कुलालतुल्य एवेश्वरः स्यात्

किञ्च व्याप्त्यनुसारेण कल्प्यमानः प्रसिद्ध्यति ।
कुलालतुल्यः कर्तेति स्याद्विशेषविरुद्धता ॥ १४० ॥§ 3720

व्यापारवानसर्वज्ञः शरीरी क्लेशसंकुलः ।
घटस्य यादृशः कर्ता तादृगेव भवेद्भवः ॥ १४१ ॥§ 3722

विशेषसाध्यतायां वा साध्यहीनं निदर्शनम् ।
कर्तृसामान्यसिद्धौ तु विशेषावगतिः कुतः ? ॥ १४२ ॥§ 3724

## ईश्वरः सशरीरः ? उताशरीरः ?

अपि च सशरीरो वा जगन्ति रचयेदीश्वरः ? शरीररहितो वा ? (Edtext outside numbered paragraph)शरीरमपि च तदीयं कार्यं ? नित्यं वा भवेत् ? सर्वथाऽनुपपत्तिः ॥

अशरीरस्य कर्तृत्वं दृश्यते न हि कस्य चित् ।
देहोऽप्युत्पत्तिमानस्य देहत्वाच्चैत्रदेहवत् ॥ १४३ ॥§ 3726

दूरीकृतत्वादित्यर्थः । तेन—एतादृशाकर्तृकतृणादिदृष्टान्तेन । अविप्रे पुरुषत्ववदिति अकर्तृके कार्यत्वस्य दृष्टान्तः ॥ § 3727

विशेषविरुद्धतेति । विशेषः—साध्यं हेतुर्वा । साध्यं हेतुर्वा यादृशं लोके दृष्टं, तादृशमेव पक्षे तेन हेतुना तादृशं सिद्ध्येत् । नो चेत् तादृशविशेषविरुद्धता । ततश्च घटादौ यादृशं सकर्तृकत्वं दृष्टं, तादृशमेव नगादावपि सिद्ध्येत् । अन्यथा तु विरोध एव । यद्यपि विशेषविरुद्धताया हेत्वाभासता निराकरिष्यते ११ आह्निकेक्१>, अनुमानसामान्योच्छेदप्रसङ्गादिति; अथापि पूर्वपक्षिणस्तस्येष्टत्वात् स दोषस्तस्य सम्मतः । क्लेशकर्मविपाकाशयापरामृष्टः इति पूर्वं ४८४ पु कथनात् शरीरक्लेशसंकुलः इत्युक्तम् । विशेषसाध्यतायां—तादृशकर्तृविशेषस्य साधने । विशेषः—क्लेशाद्यपरामर्शः ॥ § 3728

अशरीरस्येति । तथाच अनित्यशरीरवत्त्वपक्ष एव शिष्टः । स कार्यमपीश्वरशरीरं तत्कर्तृकं वा स्यात् ? ईश्वरान्तरकर्तृकं वा ? तत्र—

स्वयं निजशरीरस्य निर्माणमिति साहसम् ।
कर्त्रन्तरकृते तस्मिन्नीश्वरानन्त्यमापतेत् ॥ १४४ ॥ § 3731

भवतु, को दोषः ? इति चेत्—प्रमाणाभाव एव दोषः । एकस्यापि तावदीश्वरस्य साधने पर्याकुलतां गताः; किं पुनरनन्तानाम् ?

## ईश्वरः सव्यापारः ? उत निर्व्यापारः ?

किञ्च व्यापारेण वा कुलालादिरिव कार्याणि सृजेदीश्वरः ? इच्छामात्रेण वा ? द्वयमपि दुर्घटम्—

व्यापारेण जगत्सृष्टिः कुतो युगशतैरपि ।
तदिच्छां चानुवर्तन्ते न जडाः परमाणवः ॥ १४५ ॥ § 3733

## ईश्वरः प्रयोजनमुद्दिश्य जगत्सृजति ? उत अनुद्दिश्य ?

अपि च किं किमपि प्रयोजनमनुसन्धाय जगत्सर्गे प्रवर्तते प्रजापतिः ? (Edtext outside numbered paragraph)एवमेव वा ? निष्प्रयोजनायां प्रवृत्तावप्रेक्षापूर्वकारित्वादुन्मत्ततुल्योऽसौ भवेत् । (Edtext outside numbered paragraph)पूर्वोऽपि नास्ति पक्षः—

अवाप्तसर्वानन्दस्य रागादिरहितात्मनः ।

---

२ ] तत्कर्तृकं वा—
nyāma-wit__ka

जगदारम्भमाणस्य न विघ्नः किं प्रयोजनम् ॥ १४६ ॥§ 3735

एवानन्तरं निरस्यते । तत्कर्तृकं—तच्छरीरस्वामीश्वरकर्तृकम् । ईश्वरान्तरेति । न हि ईश्वरस्य शरीरं मादृशैः कर्तुं शक्यमिति भावः ॥ § 3736

साहसं—सशरीरः स्वशरीरं सृजति ? उताशरीरः ? आद्ये आत्माश्रयादिः । अन्त्ये पूर्वोक्तदोषाणां पुनः प्राप्तिः ॥ § 3737

कुत इति । सृज्यानामानन्त्यं हेतुः । जडाः—न वा परमाणवः ईश्वरशरीरं इत्यर्थः ॥ § 3738

एवमेव वा इति । सृष्टेनानेन जगता यथा न किञ्चित्प्रयोजनं भवदीश्वरस्येदानीं पश्यामः तथैव सृष्टादावपि वेत्यर्थः ॥ § 3739

I.488/KSV

## दयया जगत्सृजतीश्वर इत्यप्ययुक्तम्

अनुकम्पया प्रवर्तत इति चेत्—मैवम्— § 3740

सर्गात् पूर्वं हि निश्शेषक्लेशसंस्पर्शवर्जिताः ।
नास्य मुक्ता इवात्मानो भवन्ति करुणास्पदम् ॥ १४७ ॥§ 3742

परमकारुणिकानामपि दुस्सहदुःखदहनदन्दह्यमानमनसो जन्तूनवलोकयतामुदेति दया, न पुनरपवर्गदशावत् अशेषदुःखशून्यानिति ॥ § 3743

करुणामृतसंसिक्तहृदयो वा जगत्सृजन् ।
कथं सृजति दुर्वारदुःखप्राग्भारदारुणम् ? ॥ १४८ ॥§ 3745

## सर्वज्ञस्य सर्वशक्तस्येश्वरस्य करुणया सुखमयजगत्सृष्टिरेव युक्ता

अथ केवलं सुखोपभोगप्रायं जगत् स्रष्टुमेव न जानाति, सृष्टमपि वा न चिरमवतिष्ठते—इत्युच्यते—तदप्यचारु—निरतिशयस्वातन्त्र्यसीमनि वर्तमानस्य स्वेच्छानुवर्तिसकलपदार्थस्थितेः परमेश्वरस्य किमसाध्यं नाम भवेत् ? § 3746

## कर्मणां वैषम्यादिकारणत्वे ईश्वर एव माऽस्तु

नानात्मगतशुभाशुभकर्मकलापापेक्षः स्रष्टा प्रजापतिरिति चेत्; कर्माण्येव हि तर्हि सृजन्तु जगन्ति, किं प्रजापतिना ! § 3747

## कर्मप्रेरणार्थमपि नेश्वरापेक्षा

५ ] वदेषा— nyāma-wit__kha

अथाचेतनानां चेतनानधिष्ठितानां स्रष्टृत्वमघटमानमिति तेषामधिष्ठाता चेतनः कल्प्यत इति चेत्—न—तदाश्रयाणामात्मनामेव चेतनत्वात् त एवाधिष्ठातारो भविष्यन्ति, किमधिष्ठात्रन्तरेणेश्वरेण ? § 3748

सर्गात्पूर्वमिति । यथा सुदीप्तात् पावकात् विष्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षरात् विविधाः सोम्य ! भावाः प्रजायन्ते तत्र चैवापियन्ति मुण्डक-२-१-१ इति हि सृष्टादौ ईश्वरसकाशात् तत्सदृशानामेव सृष्टिरुक्तेति भावः ॥ § 3749

दर्शनमात्रेणैव दुःखाबहत्वसूचनाय—प्राग्भार इति ॥ § 3750

I.489/KSV

## जीवकर्मानुरोधेनैव जगत्सृष्टौ ईश्वरस्य स्वातन्त्र्यभङ्गः

तस्यापि तादृशा परकीयकर्मान्तरापेक्षासङ्कोचितस्वातन्त्र्येण किमैश्वर्येण कार्यम् ? राज्यमिव मन्त्रिपरवशमैश्वर्यं क्वोपयुज्यते तादृक् ? यत्रापरनिरपेक्षं रुच्यैव न रच्यतेऽभिमतम् । अन्येनाप्युक्तम्— § 3751

किमीश्वरतयेश्वरो यदि न वर्तते स्वेच्छया
न हि प्रभवतां क्रियाविधिषु हेतुरन्विष्यते इति ॥§ 3753

## लीलया जगत्सृजतीश्वर इति न तरामयुक्तम्

अथ क्रीडार्था जगत्सर्गे भगवतः प्रवृत्तिः, ईदृशा च शुभाशुभरूपेण जगता सृष्टेन क्रीडति परमेश्वर इत्युच्यते—तर्हि क्रीडासाध्यसुखरहितत्वेन सृष्टेः पूर्वं अवाप्तसकलानन्दत्वं नाम तस्य रूपमप हीयेत ॥ § 3754

न च क्रीडाऽपि निश्शेषजनताऽऽतङ्ककारिणी ।
आयासबहुला चेयं कर्तुं युक्ता महात्मनः ॥ १४९ ॥§ 3756

तस्मान्न जगतां नाथ ईश्वरः स्रष्टा संहर्ताऽपि भवति ॥ § 3757

## ईश्वरस्य जगत्संहर्तृत्वमपि न घटते

१४ ] अचे— nyāma-wit_ka
६ ] गव— nyāma-wit_kha

न ह्यस्य ध्रियमाणेषु पूर्यते जन्तुकर्मसु ।
सकृत् समस्तत्रैलोक्यनिर्मूलनमनोरथः ॥ १५० ॥§ 3759

ननु अज्ञानां जीवानां स्वीयकर्मज्ञानस्यासंभवेन, न तत्प्रेरकत्वं तेषां संभवीति चेत्—तत्राह—तस्येति । तस्य—ईश्वरस्य । प्रभवतां—सर्वज्ञ-क्तानाम् ॥ § 3760

परेषामातङ्ककारित्वेऽपि स्वस्य किमायातमित्यतः—आयासेति । अन-न्तकोटियुगकालं अनन्तसाधनगर्भां क्रीडामविच्छेदेन को वा कुर्यात् ? § 3761

ध्रियमाणेषु—अनुवर्तमानेष्विति यावत् । अस्य मनोरथ इत्यत्रान्वयः । कर्मफलोपभागस्यापि सृष्टुद्देश्यत्वात् विचित्रकर्मणां युगपदुपरमासंभवादिति भावः ॥ § 3762

I.490/KSV

कर्मोपरमपक्षे तु पुनः सृष्टिर्न युज्यते ।
न कर्मनिरपेक्षो हि सर्गवैचित्र्यसंभवः ॥ १५१ ॥§ 3764

## सृष्टिप्रलययोः ईश्वरकृतत्वासंभवः

अथ ब्राह्मेण मानेन संवत्सरशतनिष्ठामधितिष्ठति परमेष्ठिनि महेश्वरस्य संजिहीर्षा जायते । तया तिरोहितस्वफलारम्भशक्तीनि कर्माणि संभवन्तीति संपद्यते सकलभुवनप्रलयः । पुनश्च तावत्येव रात्रिप्राये काले व्यतीते सिसृक्षा भवति भगवतः । तयाऽभिव्यक्तशक्तीनि कर्माणि कार्यमारभ्भते इति—तदप्ययुक्तम्— § 3765

उद्भवाभिभवौ तेषां स्यातां चेदीश्वरेच्छया ।
तर्हि सैवास्तु जगतां सर्गसंहारकारणम् ॥ १५२ ॥§ 3767

किं कर्मभिः ? एवमस्त्वितिचेत्—न —ईश्वरेच्छावशित्वपक्षे हि त्रयो दुरतिक्रमा दोषाः । तस्यैव तावन्महात्मनो निष्करुणत्वं— अकारणमेव दारुणसर्गकारिणः । तथा वैदिकीनां विधिनिषेधचोदनानामानर्थक्यम्—ईश्व-रेच्छात एव शुभाशुभफलोपभोगसंभवात् । अनिर्मोक्षप्रसङ्गश्च—मुक्ता अपि प्रलयसमय इव जीवाः पुनरीश्वरेच्छया संसरेयुः । तस्मान्नेश्वराधीनो जगतां सर्गः, संहारो वा ॥ § 3768

## उपमानं तु नेश्वरसाधकम्

१० ] पूर्यन्ते— nyāma-wit__kha
११ ] रथाः— nyāma-wit__kha
९ ] सर्व— nyāma-wit__ka
१० ] चेत्— nyāma-wit__ka

इत्यनन्तरगीतेन नयेनेश्वरसाधने ।
नानुमानस्य सामर्थ्यमुपमाने तु का कथा ? ॥ १५३ ॥§ 3770

संवत्सरशतेति । सहस्रयुगपर्यन्तमहर्यत् ब्रह्मणो विदुः । रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ८-१७ इति गीता ॥ § 3771

मुक्ता अपीति । इच्छायां कर्माद्युपाधेरनङ्गीकारात् ईशः मुक्तान् संसारेण न योजयेत्, किन्तु संसारिजीवानेवेति विनिगमकस्य दुर्वचत्वादिति हेतुः ॥ § 3772

का कथेति । उपमानं हि केवलं शक्तिग्राहकं प्रमाणम् ॥ § 3773
I.491/KSV

## वेदोऽपि ईश्वरसद्भावं बोधयितुं नालम्

अगमस्यापि नित्यस्य तत्परत्वमसांप्रतम् ।
तत्प्रणीते तु विस्रंभः कथं भवतु मादृशाम् ? ॥ १५४ ॥§ 3775

किञ्चागमस्य प्रामाण्यं तत्प्रणीतत्वहेतुकम् ।
तत्प्रामाण्याच्च तत्सिद्धिरित्यन्योन्याश्रयं भवेत् ॥ १५५ ॥§ 3777

अन्यथाऽनुपपत्त्या तु न शक्यो लब्धुमीश्वरः ।
न हि तद्दृश्यते कार्यं तं विना यन्न सिध्यति ॥ १५६ ॥§ 3779

तस्मात् सर्वसद्विषयप्रमाणानवगम्यमानस्वरूपत्वादभावएवेश्वरस्येति सिद्धम् ॥ § 3780

## लोकव्यवहारमात्रान्नेश्वरसिद्धिः

न च प्रसिद्धिमात्रेण युक्तमेतस्य कल्पनम् ।
निर्मूलत्वात्तथा चोक्तं प्रसिद्धिर्वटयक्षवत् ॥ १५७ ॥§ 3782

अत एव निरीक्ष्य दुर्घटं
जगतो जन्मविनाशडम्बरम् ।
न कदाचिदनीदृशं जगत्
कथितं नीतिरहस्यवेदिभिः ॥ १५८ ॥§ 3786

—ईश्वरे प्रमाणोपपादनम्—

## अनुमानमेवेश्वरे प्रमाणम्

अत्र वदामः—यत्तावदिदमगादि—नगादिनिर्माणनिपुणपुरुषपरिच्छेददक्षं प्रत्यक्षं न भवतीति—तदेवमेव । प्रत्यक्षपूर्वकमनुमान- § 3787

नित्यस्य—अपौरुषेयस्य । शब्दप्रामाण्यं वक्तृप्रामाण्याधीनमित्युक्तं प्राक् पु. ४८२ । मादृशां—ईश्वरमेवानभ्युपगच्छताम् । अन्यथाऽनुपपत्त्या— थ-रापत्त्या—तादृशूपतर्केणेति वाऽर्थः । योग्यानुपब्धेरेव ईश्वारासत्वे प्रमाणत्वात् योग्यतोपपादनाय—सर्वसद्विषयेत्यादि ॥ § 3788

अनीदृशं—यादृशं दृश्यते, तद्विलक्षणं—ईश्वरकर्तृकमिति यावत् । नीतिः—चार्वाकतन्त्रम्, नीतिः—नयः तर्कः । ब्रह्मणस्तर्कागोचरत्वरूपरह-स्यसूचनाय वा एवमुक्तिः ॥ § 3789

I.492/KSV

मपि तेनैव पथा प्रतिष्ठितमिति—तदप्यास्ताम् । सामान्यतोदृष्टं तु लिङ्ग-मीश्वरसत्तायामिदं ब्रूमहे—पृथिव्यादिकार्यं धर्मि, तदुत्पत्तिप्रकारप्रयोजनाद्य-भिज्ञकर्तृपूर्वकमिति साध्यो धर्मः, कार्यत्वात् घटादिवत् ॥ § 3790

## पृथिव्यादीनां कार्यत्वम् दुरपह्नवम्

ननु ! कार्यत्वमसिद्धमित्युक्तम् । क एवमाचष्टे ? चार्वाकः ? शाक्यः ? मीमांसको वा ? § 3791

चार्वाकस्तावत् वेदरचनाया रचनान्तरविलक्षणाया अपि कार्यत्वमभ्युप-गच्छति यः, स कथं पृथ्व्यादिरचनायाः कार्यत्वमपह्नुवीत ? § 3792

मीमांसकोऽपि न कार्यत्वमपह्नोतुमर्हति, यत एवमाह— येषामप्य-नवगतोत्पत्तीनां रूपमुपलभ्यते, तन्तुव्यतिषक्तजनितोऽयं पटः, तद्व्यतिषङ्ग-विमोचनात् तन्तुविनाशाद्वा नङ्क्ष्यतीति कल्प्यते इति । एवमवयवसंयोग-निर्वर्त्यमानवपुषः क्षितिधरादेरपि नाशसंप्रत्ययः संभवत्येव । दृश्यते च क्व-चिद्विनाशप्रतीतिः, प्रावृषेण्यजलधरधारासारनिर्लुठित एव पर्वतैकदेशे पर्वत-स्य खण्डः पतितः इति । वस्तुगतयोश्च कार्यत्वविनाशित्वयोः समव्याप्तिकता वार्तिककृताऽप्युक्तैव श्लो. वा. १-१-५ अनु. ९— § 3793

तेन यत्राप्युभौ धर्मौ व्याप्यव्यापकसम्मतौ ।
तत्रापि व्याप्यतैव स्यादङ्गं न व्यापितामतिः § 3795

१५ ] मगादि— nyāma-wit__ka
१६ ] पू— nyāma-wit__ka

इति वदता । तस्माद्विनाशित्वेनापि कार्यत्वानुमानात्तन्मतेऽपि न कार्यत्वमसिद्धम् ॥ § 3796

शाक्योऽपि कार्यत्वस्य कथमसिद्धतामभिदधीत ? येन नित्यो नाम पदार्थः प्रणयकेलिष्वपि न विषह्यते । तस्मात् सर्ववादिभिः अप्रणोद्यं पृथिव्यादेः कार्यत्वम् ॥ § 3797

ईश्वरनिराकर्तारः त्रिविधाः—प्रत्यक्षातिरिक्तप्रमाणाभावात्तन्निरासवादिनः, वेदप्रामाण्यानभ्युपगमात्तदसिद्धिवादिनः, वेदप्रामाण्याभ्युपगमेऽपि युक्त्या तन्निरासवादिनश्च इति मत्वाऽऽह—क एवमित्यादि ॥ § 3798

तेनेत्यादि । उभयोस्समव्याप्तत्वेऽपि हेतौ व्याप्यत्वमेव गमकं, न तु व्यापकत्वमित्यर्थः ॥ § 3799

नित्यो नामेति । यद्यपि नित्यवस्तुवादिनोऽपे केचित् बौद्धास्सन्तीति

**सन्निवेशविशेषवत्त्वाद्वा पृथिव्यादीनां कार्यत्वम्**

अथवा सन्निवेशविशिष्टत्वमेव हेतुमभिदध्महे; यस्मिन् प्रत्यक्षत उपलभ्यमाने सर्वापलापलम्पटा अपि न केचन विप्रतिपत्तुमुत्सहन्ते । तस्मान्नासिद्धो हेतुः ॥

**घटभूधरयोः सन्निवेशभेदात् तेन कार्यत्वानुमानाक्षेपः**

ननु ! कर्त्रविनाभावितया यथाविधस्य सन्निवेशस्य शरावादिषु दर्शनं, तादृशमेव सन्निवेशं उपलभ्य क्वचिदनुपलभ्यमानकर्तृके कलशादौ कर्त्रनुमानमिति युक्तम् । अयं त्वन्य एव कलशादिसन्निवेशात् पर्वतादिसन्निवेशः । नात्र सन्निवेशसामान्यं किञ्चिदुपलभन्ते लौकिकाः । सन्निवेशशब्दमेव साधारणं प्रयुञ्जते । न च वस्तुनोरत्यन्तभेदे सति शब्दसाधारणतामात्रेण तदनुमानमुपपद्यते । न हि पाण्डुतामात्रसाधारणत्वेन धूमादिव कक्कोलरजोराशेरपि कृशानुरनुमातुं शक्यत इति । तदुक्तम् प्र-वा-२-११, १२—

> सिद्धं यादृगधिष्ठातृ भावाभावानुवृत्तिमत् ।सन्निवेशादि तत्तस्मात्
> युक्तं यदनुमीयते ॥§ 3801&
> वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः ।न युक्ताऽनुमितिः
> पाण्डुद्रव्यादिव हुताशने इति ॥§ 3802&

सर्वार्थसिध्यादितः १-८ अवगम्यते, तथापि बौद्धैरेवास्य पक्षस्य खण्डितत्वात् न गणना । तथा ह्युक्तं शान्तरक्षितेन—केचित्तु सौगतंमन्या अप्यात्मानं प्रचक्षते श्लो. ३३६ इत्यादिना । कमलशीलोऽपि तत्पञ्जिकायां— केचित्—वात्सीपुत्रीयाः । ते हि सुगतसुतमात्मानं मन्यमाना अपि... वितथाऽऽत्म-

---

१० ] धूमादिवन्मुकुल— nyāma-wit_kha
१३ ] भेद— nyāma-wit_kha
१३ ] हुताशनः— nyāma-wit_ka

दृष्टिमभिनिविष्टाः इत्याद्याह ॥ § 3803

कक्कोलेति । किञ्चित्पीतश्वेतवर्णवत्फलविशेषः । पाण्डुद्रव्यादिव इति प्रमाणवार्तिकोक्तस्य विवरणतयेदमुक्तम् । शब्दसाम्यादिति । येन केनापिसाम्यं पर्याप्तं चेत्, रूपसाम्यमादायातिप्रसङ्ग इति भावः ॥ § 3804
I.494/KSV

## घटभूधरयोः सन्निवेशगतं सामान्यमस्त्येव

उच्यते—यादृगिति न बुद्ध्यामहे । धूमो हि महानसे कुम्भदासीफूत्कारमारुतसन्धुक्ष्यमाणमन्दज्वलनजन्मा कृशप्रायप्रकृतिरुपलब्धः । स यदि पर्वते प्रवलसमीरणोल्लसितहुतवहप्लुष्यमाणमहामहीरुहस्कन्धेन्धनप्रभवो बहुलबहुलः खमण्डलमखिलमाक्रामन् उपलभ्यते, तत्किमिदानीमनलप्रमितिं मा कार्षीत् ॥ § 3805

## हेतौ विद्यमानविशेषाकारणां न गमकाङ्गत्वम्

अथ विशेषरहितं धूममात्रमग्निमात्रेण व्याप्तमवगतमिति ततस्तदनुमानं; इहापि सन्निवेशमात्रं कर्तृमात्रेण व्याप्तमिति ततोऽपि तदनुमीयताम् ॥ § 3806

## घटभूधरसन्निवेशयोः न शब्दसाम्यमात्रम्

ननु ! सन्निवेशशब्दमात्रसाधारण्यमत्र, न वस्तुसामान्यं किञ्चिदस्ति—भिक्षो ! धूमोऽपि भवद्दर्शने किं वस्तुसामान्यमस्ति ॥ § 3807

मा भूद्वस्तुसामान्यम्, आकाशकालादिव्यावृत्तिरूपं तु संव्यवहारकारणमस्त्येव—हन्त ! तर्हि प्रकृतेऽपि असन्निवेशव्यावृत्तिरूपं भवतु सामान्यम्, आकाशकालादिविलक्षणरूपत्वात् पृथिव्यादेः ॥ § 3808

कुम्भदासी—परिचारिका । दासी तु चेटिका चेटा वडबा कुम्भधारिका इति बैजयन्ती । कुम्भधारिकैव कुम्भदासी । तत्किमिति । अस्ति महदन्तरं माहानसाग्निप्रभवधूमदावाग्निप्रभवधूमयोः । अथापि अनुमितिरनुभवसिद्धा । तथा घटभूधरसन्निवेशयोरत्यन्तान्तरवत्त्वेऽपि कार्यत्वानुमानं युज्यत एव ॥ § 3809

विशेषरहितं—अल्पत्वबहलत्वादिरहितम् ॥ § 3810

भवद्दर्शन इति । सामान्यनिषेधकाः खलु बौद्धाः ॥ § 3811

आकाशेति । आकाशः, कालश्च यथा तुच्छः, न तथा धूमादिः । अतः धूमादिविषयकः व्यवहारः—संव्यवहारः । आकाशादिव्यावृत्तत्वमेव स-

---

∘ ] वस्तुमात्र— nyāma-wit__ka
∘ ] अन्य— nyāma-wit__ka

त्वादिरूपं सामान्यमित्यर्थः । अन्यव्यावृत्ति इति पाठे तु सुलभोऽर्थः ॥
§ 3812

I.495/KSV

## धूमत्वादिवत् सन्निवेशत्वसामान्यमप्यस्त्येव

ननु ! तत्र धूमो धूम इत्यनुवृत्तविकल्पबलेन कल्पितमपोहस्वभावं सामान्यमभ्युपगतम्—इहापि सन्निवेशविकल्पानुवृत्तेः त्वत्प्रकल्पितमपोहरूपमेव सामान्यमिष्यताम् ! § 3813

## गोपुरादिषु घटदृष्टान्तेन सकर्तृकत्वसाधकसन्निवेशत्वं सर्वसम्मतम्

अपिच, सकर्तृकत्वाभिमतेष्वपि संस्थानेषु न सर्वात्मना तुल्यत्वं प्रतीयते । न हि घटसंस्थानं चतुश्शालसंस्थानं च सुसदृशमिति । संस्थानसामान्यं तु पर्वतादावपि विद्यत एवेति सर्वथा यादृगित्यवाचको ग्रन्थः ॥ § 3814

## तृणादिकमपि सकर्तृकमेव

यदपि व्यभिचारोद्भावनं अकृष्टजातैः स्थावरादिभिरकारि पु. ४८५—तदपि न चारु—तेषां पक्षीकृतत्वात् । पक्षेण च व्यभिचारचोदनायां सर्वानुमानोच्छेदप्रसङ्गः ॥ § 3815

## तृणादीनां सकर्तृकत्वं अनुपलब्धिहतमित्याक्षेपः

ननु च पृथिव्यादेरुत्पत्तिकालस्य परोक्षत्वात् कर्ता न दृश्यत इति पु. ४८५ तदनुपलब्ध्या तदसत्त्वनिश्चयानुपपत्तेः कामं संशयोऽस्तु ! वनस्पतिप्रभृतीनां तु प्रसवकालमद्यत्वेन वयमेवपश्यामः । न च यत्नतोऽप्यन्वेषमाणाः कर्तारमेषामुपलभामहे । तस्मादसौ दृश्यानुपलब्धेर्नास्त्येवेत्यवगच्छामः ॥
§ 3816

## तृणादीनां पक्षकोटिप्रवेशनमप्ययुक्तम्

अपि च येन येन वयं व्यभिचारमुद्भावयिष्यामः तं तं चेत्पक्षीकरिष्यति भवान् सुतरामनुमानोच्छेदः, सव्यभिचाराणामप्येवमनुमानत्वानपायात् ॥
§ 3817

असौ—तृणादिकर्ता । दृश्यानुपलब्धेः—योग्यानुपब्धेः ॥ § 3818

---

◦ ] त्वत्क— nyāma-wit_kha
◦ ] मद्यत्वे— nyāma-wit_ka
◦ ] मान— nyāma-wit_kha

सव्यभिचाराणां—अयं विप्रः पुंस्त्वात्; घटः नित्यः प्रमेयत्वात्

**योग्यानुपलब्ध्यभावात् तृणादीनां सकर्तृकत्वाभावः न सिध्यति**

उच्यते—स्थावराणामुत्पत्तिकालप्रत्यक्षत्वेऽपि कर्तुरदृश्यत्वमेव, अशरीरत्वनिश्चयात्। अशरीरस्य तर्हि तदुत्पत्तावव्याप्रियमाणत्वात् कर्तृत्वमपि कथमिति चेत्; एतदग्रतो निर्णेष्यते पु. ५०७। अदृश्यस्य च कर्तुरनुपलब्धितो नास्तित्वनिश्चयानुपपत्तेः नाकृष्टजातबनस्पतीनामकर्तृकत्वमिति न विपक्षता॥

**दृष्टकारणैरेव तृणाद्युत्पत्त्यसंभवः**

यत्तूक्तं परिदृश्यमानक्षितिसलिलादिकारणकार्यत्वात् स्थावराणां किमदृश्यमानकर्तृकल्पनयेति—तदपेशलम्—परलोकवादिभिरदृश्यमानानां कर्मणामपि कारणत्वाभ्युपगमात्। बार्हस्पत्यानां तु तत्समर्थनमेव समाधिः॥

**कर्मणामधिष्ठातृतयेश्वरसिद्धिः**

अथ जगद्वैचित्र्यं कर्मव्यतिरेकेण न घटत इति कर्मणामदृश्यमानानामपि कारणत्वं कल्प्यते तत्र; यद्येवमचेतनेभ्यः कारकेभ्यश्चेतनानधिष्ठितेभ्यः कार्योत्पादानुपपत्तेः कर्ताऽपि चेतनस्तेषामधिष्ठाता कल्प्यताम्। तस्मात् स्थावराणामकर्तृकत्वाभावात् न विपक्षतेति न तैर्व्यभिचारः॥

**तृणादीनां पक्षत्वाङ्गीकारे नानुमानोच्छेदः**

यदप्युक्तम्—येन येन व्यभिचार उद्भाव्यते, स चेत्पक्षेऽन्तर्भावयिष्यते, क इदानीमनुमानस्य नियम इति—एतदपि न साधु— यदि हि भवान् निश्चिते विपक्षे वृत्तिमुपदर्शयेत् कस्तं पक्षेऽन्तर्भावयेत्। न हि विप्रत्वे पुंस्त्वस्य, नित्यतायां वा प्रमेयत्वस्य व्यभिचारे इत्युक्ते अविप्रे, अघटे वा व्यभिचारापादने कृते, यदि तयोरपि पक्षत्वमुच्येत तदा कः समाधिरिति भावः॥ § 3819

तत्समर्थनं—परलोकसमर्थनम्। इदं च ७ आह्निके स्पष्टीभविष्यति॥ § 3820

तत्र—जगत्सृष्टौ। कारकेभ्यः—तादृशकर्मभ्यः॥ § 3821

I.497/KSV

चोद्यमाने वेधसाऽपि विपक्षः पक्षीकर्तुं शक्यः, वादीच्छया वस्तुव्यवस्थाया अभावात्। इह तु स्थावरादौ कर्त्रभावनिश्चयो नास्तीत्युक्तम्॥ § 3822

## प्रसङ्गात् सपक्षविपक्षातिरिक्तस्य पक्षस्यावश्यकत्वकथनम्

ननु! स्थावरेषु पक्षीकृतेष्वपि व्यभिचारो न निवर्तत एव। न हि सपक्षविपक्षव्यतिरेकेण तात्त्विकः पक्षो नाम कश्चिदस्ति, वस्तुनो द्वैरूप्यानुपपत्तेः। वस्तुस्थित्या सकर्तृकाश्चेद्वनस्पतिप्रभृतयः सपक्षा एव ते। नो चेत्तर्हि

---

∘ ] मुत्पत्ति— nyāma-wit_kha
∘ ] शरीरस्य— nyāma-wit_ka
∘ ] विपक्षता— nyāma-wit_kha

विपक्षा एव । न राश्यन्तरं समस्तीति— उच्यते—पक्षाभावे सपक्षविपक्ष-वाचोयुक्तिरेव तावत्किमपेक्षा ? पक्षानुकूलो हि सपक्ष उच्यते, तत्प्रतिकूलश्च विपक्ष इति ॥ § 3823

## पक्षसपक्षविपक्षाणां स्वरूपम्

यद्येवं, वक्तव्यं तर्हि कोऽयं पक्षो नामेति— § 3824

साध्यधर्मान्वितत्वेन द्वाभ्यामप्यवधारितः ।
सपक्षः, तदभावेन निश्चितस्य विपक्षता ॥ १५९ ॥ § 3826

विमतो यत्र तु तयोः तं पक्षं संप्रचक्ष्महे ।
वस्तुनो द्व्यात्मकत्वं तु नानुमन्यामहे वयम् ॥ १६० ॥ § 3828

वादिबुद्ध्यनुसारेण स्थितिः पक्षस्य यद्यपि ।
तथाऽपि व्यवहारोऽस्ति वस्तुतस्तन्निबन्धनः ॥ १६१ ॥ § 3830

पक्षीकृतेषु—पक्षत्वेनाभिमतेष्विति भावः । न हीत्यादि । सपक्षश्च निश्चित-साध्यवान् । तृणादिषु अकर्तृकत्ववत् सकर्तृकत्वमपि न निश्चितम् । अतश्च तेषां सपक्षत्वासंभवे, तृतीयराश्यभावात् विपक्षत्वं सिद्धमेवेति व्यभिचारः वर्तत एवेत्यर्थः ॥ § 3831

द्वाभ्यां—वादिप्रतिवादिभ्याम् । ननु वस्तुनोऽद्व्यात्मकत्वात्, विमतः पक्षः इत्युक्ते साध्यवत्त्वेन स वादिनो निश्चित इति सपक्ष एव । प्रतिवादिनश्च साध्याभाववत्त्वेनैव निश्चितत्वात् विपक्ष एव । ततश्च पक्षः कुत्रावशिष्यते इति चेत् तत्राह—वादीत्यादि । यद्यपि वाद्युक्तमेवान्ततः पर्यवस्यति,

सन्दिग्धे हि न्यायः प्रवर्तते, नानुपलब्धे न निर्णीत इत्युक्तमेतत् । सन्दिह्यमान एव चार्थः पक्ष उच्यते । किञ्चित्कालं तस्य पक्षत्वं, यावन्निर्णयो नोत्पन्नः । तदुत्पादे तु नूनं सपक्षविपक्षयोरन्यतरत्रानुप्रवेक्ष्यत्यसौ । अतश्च पक्षावस्थायां तेन व्यभिचारोद्भावनमसमीचीनम् ॥

## व्यभिचारसंशयस्यादोषत्वम्

ननु ! निश्चितविपक्षवृत्तिरिव सन्दिग्धविपक्षवृत्तिरपि न हेतुरेव । तदेवं वीरुधादिषु सन्दिग्धेऽपि कर्तरि सन्निवेशस्य दर्शनादहेतुत्वम्—नैतत्सारम्—सदसत्पावकतया पर्वते सन्दिग्धे विपक्षे वर्तमानस्य धूमस्याहेतुत्वप्रसङ्गात् । सर्व एव च साध्यांशसंशयाद्विपक्षा एव जाता इति पक्षवृत्तयो हेतव इदानीं विपक्षगामिनो भवेयुरित्यनुमानोच्छेदः ॥

## सपक्षे व्याप्तिनिश्चय एव अनुमानाङ्गम्

अथ पक्षीकृतेऽपि धर्मिणि सदसत्साध्यधर्मतया सन्दिग्धेऽपि वर्तमानो

∘ ] सपक्ष— nyāma-wit_ka
∘ ] न— nyāma-wit_kha
∘ ] वस्तुन— nyāma-wit_kha

धूमादिः अन्यत्र व्याप्तिनिश्चयात् गमक इष्यते, तर्हि सदसत्कर्तृकतया सन्दिग्धेऽपि वसुन्धरावनस्पत्यादौ वर्तमानं कार्यत्वमन्यत्र व्याप्तिनिश्चयात् गमकमिष्यताम् । विशेषो वा वक्तव्यः ॥

### भूधरादीनां अकर्तृकत्वं व्याप्तिग्रहणवेलायामेव सिद्धमित्याक्षेपः

अन्ये मन्यन्ते—किमकृष्टजातस्थावरादिव्यभिचारस्थानान्वेषणेन, पृथिव्यादिभिरेवात्र व्यभिचारः, अस्य व्याप्तिग्रहणस्य प्रतिघातात् । तथापि व्यवहारकाले वादिप्रतिवादिविप्रतिपत्तिनिबन्धनः पक्षव्यव्यवहारोऽपि वस्तुतोऽस्त्येव । एतदेवोपपादयत्यनन्तरवाक्यैः ॥ § 3832

सन्दिग्धे विपक्षे—सन्दिग्धविपक्षरूपे पर्वते । सर्व इति । सन्दिग्धे हि न्यायः प्रवर्तत इत्यनुपदमुक्तम् ॥ § 3833

अन्यत्र—महानसादौ । अन्यत्र—घटादौ । विशेषः—उक्तानुमानयोः वैलक्षण्यम् ॥ § 3834

I.499/KSV

व्याप्तिर्हि गृह्यमाणा सकलसपक्षविपक्षक्रोडीकारेण गृह्यते । इत्थं च तस्यां गृह्यमाणायामेव यद्यत्सन्निवेशविशिष्टं, तत्तद्बुद्धिमत्कर्तृकं इत्यस्मिन्नेवावसरे सन्निवेशवन्तोऽपि कर्तृशून्यतया शैलादयश्चेतसि स्फुरन्ति । यथा कृतकत्वेन वह्नेरनुष्णताऽनुमाने यद्यत् कृतकं तत्तदनुष्णम् इति व्याप्तिपरिच्छेदवेलायामेव वह्निरुष्णोऽपि कृतक इति हृदयपथमवतरति । तद्वर्जं तु व्याप्तौ गृह्यमाणायां ततो हेतोः षण्डादिव पुत्रजननमघटमानमेव साध्यानुमानमिति ॥ § 3835

### व्याप्तिग्रहणे अधिकरणविशेषभानानपेक्षणादुक्ताक्षेपनिरासः

तदेतदनुपपन्नम्—विशेषोल्लेखरहितसामान्यमात्रप्रतिष्ठितस्य व्याप्तिपरिच्छेदस्यानुमानलक्षणे निर्णीतत्वात् पु. ३१९ । अग्न्यनुष्णताऽनुमाने हि न व्याप्तिग्रहणप्रतीघातादप्रामाण्यम्, अपि तु प्रत्यक्षविरोधादित्युक्तमेतत् ॥ § 3836

### पृथिव्यादीनां सकर्तृकत्वं यदि नानुमातुं शक्यं, तर्हि इन्द्रियाणामप्यसिद्धिः

अपि चायं पृथिव्यादौ कर्त्रनुमाननिरासप्रकारः, शब्दाद्युपलब्धयः, करणपूर्विकाः, क्रियात्वात्, छिदिक्रियावत् इत्यत्र श्रोत्रादिकरणानुमानेऽपि समानः । प्रतिबन्धावधारणवेलायामेव करणशून्यानां शब्दाद्युपलब्धिक्रियाणां अवधारणात् ताभिरेव व्यभिचारात् । पक्षेण च पृथिव्यादिना व्यभिचारचोदनमत्यन्तमलौकिकम् ॥ § 3837

२० ] सन्दिग्धे— nyāma-wit__kha

१० ] रुष्णोऽ— nyāma-wit__kha

१० ] तत्र ह्यति— nyāma-wit__kha

## कर्त्रनुमानं करणानुमानतुल्यमेव

ननु ! वस्तुस्थित्या पर्वतादयोऽपि विपक्षा एव; त्वया तु तेषां पक्ष इति नाम कृतम् । न च त्वदिच्छया वस्तुस्थितिर्विपरिवर्तते ॥ § 3838

विपक्षेति—व्यतिरेकसहचारग्रहणाय । इदमपि अन्वयदार्ढ्यायेत्युक्तम् ॥ § 3839

अपि त्विति । वह्नौ औष्ण्यस्य पूर्वं प्रत्यक्षसिद्धत्वादेव हि व्याप्तिग्रहवेलायां स्वयं तस्य वर्जनम्, प्रकृते तु न तथा भूधरादौ अकर्तृकत्वं पूर्वं सिद्धम् ॥ § 3840

I.500/KSV

नन्वेवं शब्दाद्युपलब्धयोऽपि वस्तुस्थित्या विपक्षा एव; तासामपि पक्ष इति नामकरणमेव स्यात्—न—तासां करणाभावनिश्चयानुत्पादान्न विपक्षत्वम् ॥ § 3841

पर्वतादावपि कर्त्रभावनिश्चयानुत्पादान्न विपक्षत्वम् ॥ § 3842

तेषु कर्ता नोपलभ्यत इति चेत्; शब्दाद्युपलब्धिक मपि नोपलभ्यत एव ॥ § 3843

करणमदृश्यमानत्वादेव नोपलभ्यते, न नास्तित्वात् इति चेत्; कर्ताऽप्यदृश्यत्वादेव नोपलभ्यते, न नास्तित्वात् ॥ § 3844

अनुमानात् करणमुपलभ्यते, तद्व्यतिरेकेण क्रियाऽनुपपत्तेरिति चेत्; कर्ताऽप्यनुमानादुपलप्स्यते, कर्तारमन्तरेण कार्यानुपपत्तेः ॥ § 3845

## पृथ्व्यादेः सकर्तृकत्वानुमानं धूमाद्वह्न्यनुमानतुल्यम्

तेनानुमानगम्यत्वान्न कर्तुर्नास्तिताग्रहः ।
तदभावाद्विपक्षत्वं क्षित्यादेरपि दुर्भणम् ॥ १६२ ॥§ 3847

लिङ्गात्पूर्वं तु सन्देहो दहनेऽपि न वार्यते ।
तथा सति प्रपद्येत धूमोऽप्यननुमानताम् ॥ १६३ ॥§ 3849

अथास्य लिङ्गाभासत्वं क्षित्यादौ कर्त्रदर्शनात् ।
धूमेऽपि लिङ्गाभासत्वं तत्र देशेऽग्न्यदर्शनात् ॥ १६४ ॥§ 3851

ननु तं देशमासाद्य गृह्यते धूमलाञ्छनः ।

---

५ ] करणभाव— nyāma-wit_kha

१० ] कारण— nyāma-wit_kha

८ ] कारण— nyāma-wit_kha

अनयैव धिया, साधो ! वर्धस्व शरदां शतम् ॥ १६५ ॥§ 3853

यत्पश्चाद्दर्शनं तेन किं लिङ्गस्य प्रमाणता ?
अनर्थित्वाददृष्टे वा कृशानौ किं करिष्यसि ? ॥ १६६ ॥§ 3855

तस्मात्सर्वथा नायमनैकान्तिको हेतुः ॥ § 3856

तद्व्यतिरेकेण—करणमन्तरा । क्रिया—उपलब्धिरूपा ॥ § 3857

लिङ्गं—अनुमानम् । तत्र देशे—दूरात् धूमदर्शनदेशे । अनयैवेति । कार्यं पश्यन्, तत्कारणमनुमाय, कारणदेशं गतः कारणमुपलभते नरः । एवं जगत्कारणभूतं वस्तु तथैव तद्देशे द्रष्टुं अनवरतं यतस्व । प्रकृतमनुसरति—यदिति । पश्चाद्वह्निदर्शनेनैव पूर्वमुत्पन्नमनुमानं प्रमाणमिति न हि कस्यापि सम्मतमित्यर्थः । अत्रापि हेतुमाह—अनर्थित्वादिति । वह्न्यनपेक्षत्वादित्यर्थः ॥ § 3858

I.501/KSV

## विशेषविरुद्धत्वस्य हेत्वाभासत्वाभावः

यदपि विशेषविरुद्धत्वमस्य प्रतिपा(?) पु. ४८६—तदप्यसमीक्षिताभिधानम्—विशेषविरुद्धस्य हेत्वाभासस्याभावात् ११ आह्निके । अभ्युपगमे वा सर्वानुमानोच्छेदप्रसङ्गात् । श्रोत्राद्यनुमानेऽपि यथोदाहृते शक्यमेवमभिधातुम् । यादृगेव लवनक्रियायां दात्रादिकरणं काठिन्यादिधर्मकमवगतं तादृगेव श्रोत्रादि स्यात् । तद्विलक्षणकरणसाध्यतायां तु साध्यविकलो दृष्टान्तः, छेदनादिक्रियाणामतीन्द्रियकरणकार्यत्वादर्शनादिति ॥ § 3859

## यावद्विरोधमेव विशेषाणामनुगमः

अथ क्रियामात्रं करणमात्रेण व्याप्तमवगतमिति तावन्मात्रमनुमापयति, तदिहापि सन्निवेशमात्रमधिष्ठातृमात्रेण व्याप्तमुपलब्धमिति तावन्मात्रमेवानुमापयतु । विशेषाणां तु न तल्लिङ्गं, अस्ति यत्र बाधकम् । अनित्यः शब्दः कृतकत्वादित्ययमपि श्रावणत्वादि शब्दस्य विशेषजातं बाधत एव । धूमोऽपि पर्वताग्निविशेषान् कांश्चिन्महानसाग्नावदृष्टानपहन्त्येव । तस्माद्यथानिर्दिष्टसाध्यविपर्ययसाधनमेव विरुद्धो हेतुः, न हि विशेषविपर्ययावहः । प्रकृतहेतुश्च साध्यविपर्ययस्याकर्तृपूर्वकत्वस्य न साधकः, अश्वोऽयं विषाणित्वादितिवत् । तस्मात् न विरुद्धः ॥ § 3860

## भूभूधरादिसकर्तृकत्वानुमानस्य बाधाभावः

२१ ] चरस्व— nyāma-wit__kha
१६ ] यन्न— nyāma-wit__kha
२० ] प्रकृतश्च— nyāma-wit__ka

नापि कालात्ययापदिष्टः, प्रत्यक्षागमयोर्बाधकयोरदर्शनात् । प्रत्युतागममनुग्राहकमिहोदाहरिष्यामः ॥ § 3861

## भूभूधरादिसकर्तृकत्वानुमाने सत्प्रतिपक्षत्वाभावः

नापि सत्प्रतिपक्षोऽयं हेतुः, संशयबीजस्य विशेषाग्रहणादेरिह हेतुत्वेनानुपादानात् ॥ § 3862

तेजस्वित्वादिविशेषाणां वह्न्या समं भानात्—अस्ति यत्र बाधकमिति । श्रावणत्वादीति । न हि दृष्टान्ते घटादौ श्रावणत्वादिकमस्ति । पर्वताग्निविशेषान्—अन्ततः पर्वतीयत्वादीन् । यथानिर्दिष्टं—वह्नित्वावच्छिन्नम् ॥ § 3863

I.502/KSV

## नापीदमनुमानं प्रतितर्कपराहतम्

नाप्ययमप्रयोजको हेतुः, यथा परमाणूनामनित्यत्वे सति मूर्तत्वमभिधास्यते । न हि मूर्तत्वप्रयुक्तमनित्यत्वम् । इह तु कार्यत्वप्रयुक्तमेव सकर्तृकत्वं तत्र तत्रोपलब्धमिति । अत एवानुमानविरोधस्येष्टविघातकृतश्च न कश्चिदिहावसरः । प्रयोजके हेतौ प्रयुक्ते तथाविधपांसुप्रक्षेपप्रयोगानवकाशात् । तस्मात्परोदीरिताशेषदोषविकलकार्यानुमानमहिम्ना नूनमीश्वरः कल्पनीयः ॥ § 3864

सकललोकसाक्षिकमपि चानुमानप्रामाण्यमपीक्षणीयम् । अनुमानप्रामाण्यरक्षणे च कृत एव परिकरबन्धः प्रागिति २ आह्निके सिद्ध एवेश्वरः ॥ § 3865

## ईश्वरसाधकानुमानान्तरे

अन्यदपि तदनुमानमन्यैरुक्तम् । महाभूतादि व्यक्तं चेतनाधिष्ठितं सत् सुखदुःखे जनयति, रूपादिमत्त्वात्; तूर्यादिवत् । तथा, पृथिव्यादीनि भूतानि चेतनाधिष्ठितानि सन्ति धारणादिक्रियां कुर्वन्ति, युग्यादिवदिति । अत्रापि दोषाः पूर्ववदेव परिहर्तव्याः ॥ § 3866

## आगमादेव जगत्स्रष्टु इतरचेतनवैलक्षण्यसिद्धिः

१३ ] मनुमान— nyāma-wit_kha

यत्पुनरवादि पु. ४८६—कर्तृसामान्यसिद्धौ वा विशेषावगतिः कुतः ? इति— § 3867

तत्र केचिदागमाद्विशेषप्रतिपत्तिमाहुः विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति संपतत्रैः द्यावाभूमी जनयन् देव एकः ते. ना-३-२ इति । तथा अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति सर्वं न हि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् श्वे-३-१९ इति श्रुतौ पठ्यते । ततः सर्वस्य कर्ता सर्वज्ञ ईश्वरो ज्ञाप्यते ॥ § 3868

न हीति । किन्तु हेत्वधीनत्वप्रयुक्तमिति शेषः । कल्पनीयः—अनुमेयः ॥ § 3869

I.503/KSV

## सिद्धेऽपि वस्तुनि वेदानां प्रामाण्यम्

न च कार्य एवार्थे वेदाः प्रमाणमिति मन्त्रार्थवादानामतत्परत्वमभिधातुमुचितम्; कार्य इव सिद्धेऽप्यर्थे वेदप्रामाण्यस्य वक्ष्यमाणत्वात् ४ आह्निके । न चेतरेतराश्रयम् पु. ४९१; आगमैकशरणत्वाभावादीश्वरसिद्धेः ॥ § 3870

## परिशेषानुमानात् ईश्वरस्येतरचेतनवैलक्षण्यसिद्धिः

अन्ये तु—अन्वयव्यतिरेकिहेतुमूलकेवलव्यतिरेकिबलेन विशेषसिद्धिमभिदधति । देहादिव्यतिरिक्तात्मकल्पनमिव सुखदुःखादिगतेन कार्यत्वेन वर्णयिष्यते—पृथिव्यादिकार्यं अस्मदादिविलक्षणसर्वज्ञैककर्तृकम्, अस्मदादिषु बाधकोत्पत्तौ सत्यां कार्यत्वादिति ॥ § 3871

## पक्षधर्मताबलात्तदनुगुणविशेषाः ईश्वरे स्वयं सिध्यन्ति

अपरे—पक्षधर्मताबलादेव विशेषलाभमभ्युपगच्छन्ति । न हीदृशं परिदृश्यमानमनेकरूपमपरिमितमनन्तप्राणिगतविचित्रसुखदुःखसाधनं भुवनादिकार्यं अनतिशयेन पुंसा कर्तुं शक्यमिति ॥ § 3872

यथा चन्दनधूममितरधूमविसदृशमवलोक्य चन्दन एव वह्निरनुमीयते, तथा विलक्षणात् कार्यात् विलक्षण एव कर्ताऽनुमास्यते ॥ § 3873

कार्य एवेति—वृद्धव्यवहाराच्छक्तिग्रहे तत्र आनयनादिकार्यान्वित एव शक्तिग्रहात्, सिद्धार्थबोधकवाक्यानां न स्वार्थे प्रामाण्यमिति मीमांसकाः ।

---

२३ ] मति संबाहुभ्यां— nyāma-wit__kha

४ ] वेदः— nyāma-wit__kha

अयं घटः इत्यादिसिद्धपरवाक्यैरपि बोधानुभवात् सिद्धपरवाक्यान्यपि स्वार्थे प्रमाणानीति सिद्धान्तः ॥ § 3874

अन्ये त्विति । हेत्वसिद्धिपरिहाराय कार्यत्वादीनामप्यनुमानेन साधनीयत्वात्, कार्यत्वानुमानस्यान्वयव्यतिरेकित्वात् तन्मूलकं परिशेषानुमानम् । सुखदुःखादीति । इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् १-१-१० इति सूत्रम् । ७ आह्निके इदं व्याख्यास्यते । अस्मदादौ बाधकोत्पत्तिश्च प्रत्यक्षादेव ॥ § 3875

विलक्षण एव कर्तेति । निखिलजगद्धेतुतया सिध्यन् हीश्वरः तदनुगुणज्ञानशक्त्यादिविशिष्ट एव खलु सिध्येत् । अतः धर्मिग्राहकेनानुमानेनैव ईश्वरस्येतरचेतनवैलक्षण्यसिद्धिः ॥ § 3876

I.504/KSV

यथा प्रावरकेभ्य इव तत्कुशलः कुविन्दः, यथा च कुलालः सकलकलशादिकार्यकलापोत्पत्तिसंविधानप्रयोजनाद्यभिज्ञो भवंस्तस्य कार्यचक्रस्य कर्ता, तथेयतस्त्रैलोक्यस्य निरवधिप्राणिसुखदुःखसाधनस्य सृष्टिसंहारसंविधानं सप्रयोजनं बहुशाखं जानन्नेव स्रष्टा भवितुमर्हति महेश्वरः । तस्मात्सर्वज्ञः ॥ § 3877

## परमात्मनः सर्वज्ञत्वं स्वतस्सिद्धम्

अपि च यथा नियतविषयवृत्तीनां चक्षुरादीन्द्रियाणामधिष्ठाता क्षेत्रज्ञः तदपेक्षया सर्वज्ञः, एवं सकलक्षेत्रज्ञकर्मविनियोगेषु प्रभवन्नीश्वरः तदपेक्षया सर्वज्ञः । तथा चाह व्यासः गी. १५-१६, १७— § 3878

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥§ 3880

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥§ 3882

मन्त्रश्च तदर्थानुवादी पठ्यते मु. ३-१-१ श्वे. ४-६— § 3883

४ ] सुचेलरकेभ्य—
nyāma-wit__kha

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति इति ॥§ 3885

अतश्च सर्वज्ञ ईश्वरः ॥ § 3886

प्रावरकं—यवनिकादि । सप्रयोजनमिति । वक्ष्यते चानुपदमेव प्रयोजनं सृष्टिसंहारादेः ॥ § 3887

तदपेक्षया—तच्छरीरापेक्षया । द्वाविमावित्यादि । उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः । परमात्मेति चाप्युक्तः देहेऽस्मिन् पुरुषः परः गी—१३-२२ इत्यादेरपीदमुपलक्षणम् । तदर्थानुवादी—तदुपबृंहितार्थः । तथा च व्यासः—इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । विभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति म-भा. आ. १-२६५ इति ॥ § 3888

I.505/KSV

## जीवानामज्ञत्वे परमात्मनः सर्वज्ञत्वे च निदानम्

पुंसामसर्वविल्वं हि रागादिमलबन्धनम् ।
न च रागादिभिः स्पृष्टो भगवानिति सर्ववित् ॥ १६७ ॥§ 3890

इष्टानिष्टार्थसंभोगप्रभवाः खलु देहिनाम् ।
रागादयः कथं ते स्युर्नित्यानन्दात्मके शिवे ॥ १६८ ॥§ 3892

मिथ्याज्ञानमूलाश्च रागादयो दोषाः; ते कथं नित्यनिर्मलज्ञानवतीश्वरे भवेयुः ? § 3893

## ईश्वरस्य नित्यसर्वज्ञत्वम्

नित्यं तज्ज्ञानं कथमिति चेत्—तस्मिन् क्षणमप्यज्ञातरि सति तदिच्छाप्रेर्यमाणकर्माधीननानाप्रकारव्यवहारविरमप्रसङ्गात् । प्रलयवेलायां तर्हि कुतस्तन्नित्यत्वकल्पनेति चेत्—मैवम्—आप्रलयात्सिद्धे नित्यत्वे तदा विनाशकारणाभावात् अस्य आत्मन इव तज्ज्ञानस्य नित्यत्वं सेत्स्यति । पुनश्च सर्गकाले तदुत्पत्तिकारणाभावादपि नित्यं ज्ञानम् ॥ § 3894

## ईश्वरज्ञानस्य एकत्वे प्रमाणम्

१० ] प्रभवः— nyāma-wit__ka nyāma-wit__kha
१८ ] नित्यत्वं तज्ज्ञानानाम्—

एवञ्च तदतीतानागतसूक्ष्मव्यवहितादिसमस्तवस्तुविषयं, न भिन्नम्; क्रमयौगपद्यविकल्पानुपपत्तेः । क्रमाश्रयणे क्वचिदज्ञातृत्वं स्यादिति व्यवहारलोपः । यौगपद्येन सर्वज्ञातृत्वे कुतस्त्यो ज्ञानभेदः ? § 3895

मिथ्याज्ञानमूला इति । भाष्यमपि ज्ञातारं हि रागादयः प्रवर्तयन्ति पुण्ये, पापे वा । यत्र मिथ्याज्ञानं तत्र रागद्वेषौ १-१-१८ इति ॥ § 3896

अज्ञातरि—ज्ञानशून्ये । पुनश्चेति । धाता यथापूर्वमकल्पयत् तै-ना-१२ इत्यादौ यथापूर्व पदात् सृष्टिप्रलयौ स्त एव । यद्यपि प्रलये कर्माधीननानाव्यवहाराभावात् तत्प्रेरणार्थं ज्ञानापेक्षाऽपि न, अथापि पुनः सृष्ट्यर्थं तेषां परिपाकादिज्ञानं सृष्टेः पूर्वमेवावश्यकमिति प्रलयकालेऽपि ईशः सर्वज्ञ एव ॥ § 3897

I.506/KSV

## ईश्वरज्ञानस्य इन्द्रियाजन्यत्वेऽपि प्रत्यक्षत्वम्

प्रत्यक्षसाधर्म्याच्च तज्ज्ञानं प्रत्यक्षमुच्यते, न पुनरिन्द्रियार्थसन्निकर्षोत्पन्नत्वमस्यास्ति; अजनकानामेवार्थानां सवितृप्रकाशेनेव तेन ग्रहणात् ॥ § 3898

## ईश्वरगुणानां सर्वेषां नित्यत्वम्

ज्ञानवदन्येऽप्यात्मगुणा येऽस्य सन्ति, ते नित्या एव; मनस्संयोगानपेक्षजन्मत्वात् । दुःखद्वेषास्तस्य तावन्न सन्त्येव । भावनाख्येन संस्कारेणापि न प्रयोजनम्; सर्वदा सर्वार्थदर्शित्वेन स्मृत्यभावात् । अत एव न तस्यानुमानिकं ज्ञानमिष्यते । धर्मस्तु भूतानुग्रहवतो वस्तुस्वाभाव्याद्भवन्न वार्यते । तस्य च फलं परार्थनिष्पत्तिरेव । सुखं त्वस्य नित्यमेव, नित्यानन्दत्वेनागमात् प्रतीतेः । असुखितस्य चैवंविधकार्यारम्भयोग्यताऽभावात् ॥ § 3899

## ईश्वरेच्छाया नित्यत्वेऽपि सृष्टिप्रलयाद्युपपत्तिः

ननु ज्ञानानन्दवदिच्छाऽपि नित्या चेदीश्वरस्य, तर्हि सर्वदा तदिच्छासम्भवात् सर्वदा जगदुत्पत्तिरिति जगदानन्त्यप्रसङ्गः । सर्गेच्छानित्यत्वाच्च संहारो न प्राप्नोति । संहारेच्छाया अपि नित्यत्वाभ्युपगमेन नक्तंदिनं प्रलयप्रबन्धो न विरमेदेव जगतामिति— § 3900

न पुनरिति । अन्यथा तस्यानित्यत्वप्रसङ्गः । ननु विषयाणां प्रत्यक्षकारणत्वात् यदि ईश्वरज्ञानं सविषयकं, तदा विषयजन्यत्वमनिवार्यमित्यत्राह— अजनकानामिति । सवितृप्रकाशेनेवेति । नूतनतयोत्पन्नोऽपि घटः यथा

७ ] ग्रहणात्— nyāma-wit_kha
१२ ] परमार्थ— nyāma-wit_kha
१४ ] न— nyāma-wit_ka

सूर्यप्रकाशेन क्रोडीक्रियते तथेत्यर्थः । ज्ञानं नाम अर्थविषयकः प्रकाश इत्युक्तम् ॥ § 3901

न वार्यते इत्यनेन तदनभ्युपगमे हान्यभावः सूचितः । भूतानुग्रहस्य स्वभावत्वात् न धर्मस्य तत्रापेक्षा । आगमात्—विज्ञानमानन्दं ब्रह्म इत्यादेः । एवं विधेति । परार्थैकफलेत्यर्थः ॥ § 3902

I.507/KSV

नैष दोषः—अनात्ममनस्संयोगजत्वादिच्छा स्वरूपमात्रेण नित्याऽपि कदाचित्सर्गेण कदाचित्संहारेण वा विषयेणानुरज्यते । सर्गसंहारयोरन्तराले तु जगतः स्थित्यवस्थायां अस्मात्कर्मण इदमस्य संपद्यतामितीच्छा भवति प्रजापतेः ॥ § 3903

प्रयत्नस्तस्य सकल्पविशेषात्मक एव । तथा चागमः—सत्यकामः सत्यसङ्कल्पः छा-ड-८-१-५ इति । कामः इतीच्छा उच्यते, संकल्पः इति प्रयत्नः । § 3904

## ईश्वरस्य आत्मविशेषरूपत्वम्

तदेवं नवभ्य आत्मगुणेभ्यः पञ्च ज्ञानसुखेच्छाप्रयत्नधर्माः सन्तीश्वरे । चत्वारस्तु दुःखद्वेषाधर्मसंस्कारा न सन्तीत्यात्मविशेष ऐवेश्वरो न द्रव्यान्तरम् । आह च पतञ्जलिः—क्लशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः यो-सू-१-२४ इति । सोऽयमागमात्, अनुमानात्, पक्षधर्मतो वा विशेषलाभ इति स्थितम् ॥ § 3905

## अशरीर एवेश्वरः

यत्पुनर्विकल्पितं पु ४८६—(?')सशरीर ईश्वरः सृजति जगत् ? अशरीरो वा ? इति—तत्राशरीरस्यैव स्रष्टृत्वमभ्युपगच्छामः ॥ § 3906

## अशरीरस्यापीश्वरस्य कर्तृत्वं युज्यते

ननु ! क्रियाऽऽवेशनिबन्धनं कर्तृत्वं, न पारिभाषिकम् । तत् अशरीरस्य क्रियाविरहात् कथं भवेत् ? कस्य च कुत्राशरीरस्य कर्तृत्वं दृष्टमिति—उच्यते—ज्ञानचिकीर्षाप्रयत्नयोगित्वं कर्तृत्वमा § 3907

अनात्ममनस्संयोगजत्वात्—आत्ममनस्संयोगाजन्यत्वात् । अनुरज्यते—संयुज्यते ॥ § 3908

संकल्पेति । संकल्पः कर्म मानसम् । यद्यपि मनोऽपेक्षा नास्ति । अथापि इदं कुर्याम् इत्याकारकः कश्चन धर्मः अस्त्येव, प्रत्यक्षवत् । अत एव विशेष पदम् ॥ § 3909

आहेति । पुरुषविशेष पदं प्रयुञ्जान इति शेषः ॥ § 3910

ज्ञानेति । यद्यपि कृतिमत्त्वमात्रं कर्तृत्वम्, अथापि तादृशकृतिहेतुत्वे चक्षते । तच्चेश्वरे विद्यत एवेत्युक्तमेतत् । स्वशरीरप्रेरणे च दृष्टमशरीरस्याप्यात्मनः कर्तृत्वम् ॥

**जगत्सर्गे ईश्वरस्य क्लेशाभावः**

इच्छामात्रेण च तस्य कर्तृत्वात् अनेकव्यापारनिर्वर्तनोपात्तदुर्वहक्लेशकालुष्यविकल्पोऽपि प्रत्युक्तः ॥

**अशरीरस्यापीश्वरस्य परमाणुप्रेरणं सङ्गच्छते**

ननु ! अत्रोक्तम् पु. ४८७—

कुलालवच्च नैतस्य व्यापारो यदि कल्प्यते ।अचेतनः कथं
भावः तदिच्छामनुवर्तते ? इति ॥§ 3912&

अस्माभिरप्युक्तमेव—

यथा ह्यचेतनः कायः आत्मेच्छामनुवर्तते ।
तदिच्छामनुवर्त्स्यन्ते तथैव परमाणवः ॥ १६९ ॥§ 3915

**स्वप्रयोजनं विनाऽपि ईश्वरस्य स्रष्टृत्वम्**

यस्तु प्रयोजनविकल्पः—किमर्थं सृजति जगन्ति भगवान् ? इति—सोऽपि न पेशलः । स्वभाव एवैष भगवतः—यत् कदाचित् सृजति, कदाचिच्च संहरति विश्वमिति ॥

कथं पुनर्नियतकाल एषोऽस्य स्वभाव इति चेत्—आदित्यं पश्यतु देवानांप्रियः ! यो नियतकालमुदेत्यस्तमेति च । प्राणिकर्मसापेक्षमेतद्विवस्वतो रूपमिति चेत्—ईश्वरेऽपि तुल्यः समाधिः ॥ नाविनाभावात् ज्ञानचिकीर्षे अपि क्रोडीकृते । जानाति, इच्छति, यतते इति किल क्रमः ॥ § 3916

अचेतनः—जडः भावः—पदार्थः—परमाणुः ॥ § 3917

प्राणिकर्मसापेक्षमिति । प्राणिनां तत्तत्कर्मानुभवाय आदित्यादयः स्वस्वकृत्यं कुर्वन्ति चेत्, ईश्वरोऽपि तथैव । एतस्य फलं त्वनुपदं स्पष्टीभविष्यति ॥ § 3918

I.509/KSV

**लीलयाऽपि जगत्सृष्टिरुपपद्यते**

क्रीडार्थेऽपि जगत्सर्गे न हीयेत कृतार्थता ।
प्रवर्तमाना दृश्यन्ते न हि क्रीडासु दुःखिताः ॥ १७० ॥§ 3920

---

७ ] क्रियार्थता—

nyāma-wit_kha

## दययैव वा जगत्सृष्टिः

अथवा अनुकम्पयैव सर्गसंहारावारभतामीश्वरः ॥ § 3921

## दयया जगत्सर्गेऽपि सुखदुःखादिवैषम्योपपत्तिः

नन्वत्र चोदितम् पु. ४८८ न तथाविधाः प्राणिनोऽनुकम्प्या भवन्ति । केवलसुखस्वभावा वा सृष्टिरनुकम्पावता क्रियेतेति— सत्यं चोदितम्— अनुपपन्नं तु; अनादित्वात्संसारस्य ॥ § 3922

## सृष्टिसंहारयोः परमं फलम्

शुभाशुभसंस्कारानुविद्धा एवात्मानः । ते च धर्माधर्मनिगडसंयतत्वादप-वर्गपुरद्वारप्रवेशमलभमानाः कथं नानुकम्प्याः ? अनुपभुक्तफलानां कर्मणां न प्रक्षयः । सर्गमन्तरेण च तत्फलोपभोगासंभव इति शुभफलोपभोगाय स्वर्गादिसर्गं, अशुभफलोपभोगाय नरकादिसृष्टिमारभते दयालुरेव भगवान् । उपभोगप्रबन्धेन परिश्रान्तानामन्तराऽन्तरा विश्रान्तये जन्तूनां भुवनोप-संहारमपि करोतीति सर्वमेतत्कृपानिबन्धनमेव ॥ § 3923

कृतार्थता—अवाप्तसमस्तकामत्वम् । अवाप्तसमस्तकामैरेव क्रीडारसः अनुभवितुं शक्यते । आयासबहुला चेयं पु. ४८९ इत्यस्योत्तरं— उत्तरार्धम् । न च क्रीडाऽपि निश्चेष पु. ४८९ इत्यस्योत्तरं तु सृष्टेर्दयामूलकत्वसाध-नावसरे स्वयं प्राप्येतेति अत्र नोक्तम् ॥ § 3924

निगडः—अथ शृङ्खला । अन्दुको निगडोऽस्त्री स्यात् । न प्रक्षय इति । नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । यद्यपि प्रायश्चित्तादिनाऽप्यस्ति नाशः, एवं ब्रह्मज्ञानादपि; अथापि तद्व्यतिरिक्तविषयं वचनम् ॥ § 3925

I.510/KSV

## सृष्टिप्रलयोपपत्तिः

ननु च युगपदेव सकलजगत्प्रलयकरणमनुपपन्नम्, अविनाशिनां क-र्मणां फलोपभोगप्रतिबन्धासंभवादिति चोदितम् पु. ४८९—न युक्तमेतत्— ईश्वरेच्छाप्रतिबद्धानां कर्मणां स्तिमितशक्तीनामवस्थानात् । तदिच्छाप्रेरितानि कर्माणि फलमादधति । तदिच्छाप्रतिबद्धानि च तत्रोदासते । कस्मादेवमिति चेत्—अचेतनानां चेतनानधिष्ठितानां स्वकार्यकरणानुपलब्धेः ॥ § 3926

---

१--३ ] अनुपपन्नं तु— nyāma-wit_kha

४ ] संवृत— nyāma-wit_kha

६--७ ] तत्फलभोगाय— nyāma-wit_kha

## जीवानां कर्माधिष्ठातृत्वासंभवः

ननु ! तेषामेव कर्मणां कर्तार आत्मानश्चेतना अधिष्ठातारो भविष्यन्ति । यथाह भट्टः श्लो. वा. १-१-५ सम्ब-परि ७५— § 3927

कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम् इति— § 3928

नैतदेवम्—नैतेऽधिष्ठातारो भवितुमर्हन्ति; बहुत्वात्, विरुद्धाभिप्रायत्वाच्च । तथा ह्येक एव कश्चित् स्थावरादिविशेषो राजादिविशेषो वा प्राणिकोटीनामनेकविधसुखदुःखोपभोगस्य हेतुः, स तैर्बहुभिरव्यवस्थिताभिप्रायैः कथमारभेत ? तेषामेकत्र संमानाभावात् । मठपरिषदोऽपि क्वचिदेव सकलसाधारणोपकारिणि कार्ये भवत्यैकमत्यम्, न सर्वत्र । महाप्रासादाद्यारंभे बहूनां तक्षादीनामेकस्थपत्याश्रयानुवर्तित्वं दृश्यते । पिपीलिकानामपि मृत्कूटकरणे तुल्यः कश्चिदुपकारः प्रवर्तकः, स्थपतिवत् एकाश्रयानुवर्तित्वं वा कल्प्यम् । इह तु तत्स्थावरं शरीरं केषाञ्चिदुपकारकारणं, इतरेषा- § 3929

कर्मभिरित्यादि । सर्वजीवानामपि तत्सिद्धेः जगत्कर्तृत्वसिद्धेः । कर्मभिः द्वारभूतैः । सम्मानं—सम्मतिः, ऐकमत्याभावादित्यर्थः । मठपरिषदः—मठीयपरिषदः । सर्वत्र—यदुद्देशेन प्रवृत्तो मठः, परिषद्वा, तद्व्यतिरिक्तविषये । मृत्कूटं—वल्मीकादिः । स्थपतिवदिति । अस्ति वल्मीकादौ नियामकः कीटराजः, राज्ञी वा; यदधीनाः सर्व एवेतरे कीटाः स्वस्वकार्येषु असंकीर्णा व्यापृण्वन्ति, यस्मिंश्च मृते सर्वे स्वैरं चरन्तः नश्यन्तीति प्रत्यक्षसिद्धमेव ॥ § 3930

I.511/KSV

मपि भूयसामपकारकारणमिति कथं तैः संभूय सृज्यते । अनधिष्ठितानान्त्वचेतनानामारम्भकत्वमयुक्तमेव । तस्मादवश्यमेकस्तेषां कर्मणामधिष्ठाता कल्पनीयः, यदिच्छामन्तरेण भवन्त्यपि कर्माणि न फलजन्मने प्रभवन्ति ॥ § 3931

## ईश्वरस्य एकत्वम्

अत एवैक ईश्वर इष्यते, न द्वौ, बहवो वा; भिन्नाभिप्रायतया लोकानुग्रहोपघातवैशसप्रसङ्गात् । इच्छाविसंवादसंभवेन च ततः कस्यचित् सङ्कल्पविघातद्वारकानैश्वर्यप्रसङ्गात् इत्येक एवेश्वरः । तदिच्छया कर्माणि कार्येषु प्रवर्तन्ते इत्युपपन्नः सर्गः । तदिच्छाप्रतिबन्धात् स्तिमितशक्तीनि कर्माण्युदासत इत्युपपन्नः प्रलयः ॥ § 3932

६--७ ] मारभ्येत— nyāma-wit__kha

७ ] शठ— nyāma-wit__kha

## सर्गप्रलयसद्भावः

एवञ्च यदुक्तं श्लो. वा. १-१-५ सम्ब-परि ११३—

तस्मादद्यवदेवात्र सर्गप्रलयकल्पना ।
समस्तक्षयजन्मभ्यां न सिद्ध्यत्यप्रमाणिका § 3935
इति—एतदपि असांप्रतम् ॥ § 3936

## सृष्टिप्रलयाभावेऽपि स्थितेरपीश्वरायत्तत्वम्

तिष्ठतु वा सर्गप्रलयकालः ! अद्यत्वेऽपि यथोक्तनयेन तदिच्छामन्तरेण प्राणिनां कर्मविपाकानुपपत्तेरवश्यमीश्वरोऽभ्युपगन्तव्यः, इतरथा सर्वव्यवहारविप्रलोपः । तदुक्तम् म. भा. वन. ३०-२८— § 3937

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा इति ॥ § 3939

भवन्ति—वर्तमानानि ॥ § 3940

वैशसं—व्यसनम् । सृष्टिविषयाणामनिष्टमुक्त्वा तत्कर्तॄणामपि तदाह—इच्छेति ॥ § 3941

तिष्ठतु—माऽस्त्विति यावत् । अद्यत्वेऽपि—इदानीमपि ॥ § 3942
I.512/KSV

## कर्मणामावश्यकत्वम्

ननु ! एवं तर्हि ईश्वरेच्छैव भवतु कर्त्री संहर्त्री च । किं कर्मभिः !—मैवम्—कर्मभिर्विना जगद्वैचित्र्यानुपपत्तेः । कर्मनैरपेक्ष्यपक्षेऽपि त्रयो दोषा दर्शिता एव पु. ४९०—ईश्वरस्य निर्दयत्वं, कर्मचोदनानर्थक्यम्, अनिर्मोक्षप्रसङ्गश्चेति । तस्मात् कर्मणामेवनियोजने स्वातन्त्र्यमीश्वरस्य, न तन्निरपेक्षम् ॥ § 3943

## कर्मानुगुणं जगत्सर्जनेऽपि ईश्वरस्य न स्वातन्त्र्यहानिः

४ ] न सांप्रतम्— nyāma-wit_ka    nyāma-wit_kha

१४ ] निर्दयकर्म—

किं तादृशैश्वर्येण प्रयोजनमिति चेत्—न—न प्रयोजनानुवर्ति प्रमाणं भवितुमर्हति । किं वा भगवतः कर्मापेक्षिणोऽपि न प्रभुत्व मित्यलं कुतर्कलवलिप्तमुखनास्तिकालापपरिमर्दन ! § 3944

## ईश्वरवादोपसंहारः

तस्मात् कुतार्किकोद्गीतदूषणाभासवारणात् ।
सिद्धस्त्रैलोक्यनिर्माणनिपुणः परमेश्वरः ॥ १७१ ॥§ 3946

## निरीश्वरवादिसंभाषणस्यापि पापत्वम्

ये त्वीश्वरं निरपवाददृढप्रमाण-
सिद्धस्वरूपमपि नाभ्युपयन्ति मूढाः ।
पापाय तैस्सह कथाऽपि वितन्यमाना
जायेत नूनमिति युक्तमतो विरन्तुम् ॥ १७२ ॥§ 3950

यस्येच्छयैव भुवनानि समुद्भवन्ति
तिष्ठन्ति यान्ति च पुनर्विलयं युगान्ते ।
तस्मै समस्तफलभोगनिबन्धनाय
नित्यप्रबुद्धमुदिताय नमः शिवाय ॥ १७३ ॥§ 3954

किं वेति । कुतो वेत्यर्थः । तक्ष्णः तक्षणादिव्यापारेषु वास्याद्यपेक्षायाः सत्वेऽपि न हि स्वातन्त्र्यभङ्गः । अन्यथा तक्षा कर्तैव न स्यात् । स्वतन्त्रः खलु कर्ता । अतः सापेक्षत्वमात्रं न स्वातन्त्र्यभञ्जकम् ॥ § 3955

एवं निरीश्वरवादिभिस्सह कथायाः पापत्वेन, तत्प्रायश्चित्ततया भगवन्तं स्मरति—यस्येति । निबन्धनाय—हेतवे । नित्यप्रबुद्धमुदिताय— नित्यज्ञानानन्दस्वरूपाय ॥ § 3956

I.513/KSV

## —वेदपौरुषेयत्वसाधनप्रकरणम्—

## ईश्वरस्य जगत्स्रष्टृत्वेऽपि वेदानां तत्कृतत्वाक्षेपः

ननु ! त्रैलोक्यनिर्माणनिपुणे परमेश्वरे ।
सिद्धेऽपि तत्प्रणीतत्वं न वेदस्यावकल्पते ॥ १७४ ॥§ 3958

पदे शब्दार्थसम्बन्धे वेदस्य रचनासु वा ।
कर्तृत्वमस्याशङ्क्येत तच्च सर्वत्र दुर्वचम् ॥ १७५ ॥§ 3960

वर्णराशिः क्रमव्यक्तः पदमित्यभिधीयते ।
वर्णानां चाविनाशित्वात् कथमीश्वरकार्यता ॥ १७६ ॥§ 3962

सम्बन्धोऽपि न तत्कार्यः स हि शक्तिस्वभावकः ।
शब्दे वाचकशक्तिश्च नित्यैवाग्नाविवोष्णता ॥ १७७ ॥§ 3964

रचना अपि वैदिक्यो नैताः पुरुषनिर्मिताः ।
कविप्रणीतकाव्यादिरचनाभ्यो विलक्षणाः ॥ १७८ ॥§ 3966

एवं च वेदे स्वातन्त्र्यमीश्वरस्य न कुत्रचित् ।
कामं तु पर्वतानेष विदधातु भिनत्तु वा ॥ १७९ ॥§ 3968

स्वतःप्रामाण्यसिद्धौ तु वेदे वक्त्रनपेक्षताम् ।
वदामो न तु सर्वत्र पुरुषद्वेषिणो वयम् ॥ १८० ॥§ 3970

अनपेक्षत्वमेवातो वेदप्रामाण्यकारणम् ।
युक्तं, वक्ताऽपि वेदस्य कुर्वन्नपि करोतु किम् ? ॥ १८१ ॥§ 3972

## शब्दस्यानित्यत्वे प्रमाणाभावः, नित्यत्वे च प्रमाणम्

कथं पुनरमी वर्णाः श्रुतमात्रतिरोहिताः ।
नित्या भवन्तु, कोऽयं वा शब्दस्वातन्त्र्यदोहदः ? ॥ १८२ ॥§ 3974

सर्वत्र—त्रिष्वपि । वर्णानां नित्यत्वात्—क्रमव्यक्त इति । सर्वत्र—पौरुषेयवाक्येषु । अनपेक्षत्वमिति । तत्प्रमाणं बादरायणस्य, अनपेक्षत्वात् जै. सू. १-१-५ इति हि सूत्रम् । एवं इतरानपेक्षतयैव तेन स्वप्रामाण्ये संरक्षिते वेदस्येश्वरकृतत्वेन किं साधनीयमित्यर्थः ॥ § 3975

सिद्धान्तिच्छाययाऽऽक्षिपति—कथमिति । श्रुतमात्रतिरोहिताः— श्रवणसमनन्तरं नश्यन्तः । एवं वर्णाः पुरुषप्रयत्नोत्पाद्यमानाः श्रूयन्ते, प्रयत्नविरतौ च विरमन्ते । अथापि ते न पुरुषाधीनाः, किन्तु स्वतन्त्राः— नित्या इति किमिदमित्याश्चर्यद्योतनाय—शब्दस्वातन्त्र्यदोहद इति । § 3976
I.514/KSV

उच्यते— § 3977

> शब्दस्य न ह्यनित्यत्वे युक्तिःस्फुरति काचन ।
> प्रत्यक्षमर्थापत्तिश्च नित्यतां त्वधिगच्छतः ॥ १८३ ॥§ 3979

### शब्दस्यानित्यत्वसाधनानुवादः

तथा हि—अनित्यत्वहेतव इमे किल कथ्यन्ते, प्रयत्नानन्तरमुपलब्धेः कार्यः शब्द इति । कार्यत्वानित्यत्वयोः परस्पराविनाभावात् एकतरसिद्धावन्यतरसिद्धिर्भवत्येवेति क्वचित् किञ्चित् साधनमुच्यते प्रयत्नप्रेरितकौष्ठ्यमारुतसंयोगविभागानन्तरमुपलभ्यमानः शब्दस्तत्कार्य एवेति गम्यते । उच्चारणादूर्ध्वमनुपलब्धेः अनित्यः शब्दः । न ह्येनमुच्चरितं मुहूर्तमप्युपलभामहे । तस्माद्विनष्ट इत्यवगच्छामः ॥ § 3980

### व्यवहारादपि शब्द अनित्यः

करोतिशब्दव्यपदेशाच्च कार्यः ब्दः । शब्दं कुरु, शब्दं मा कार्षीः इति व्यवहर्तारः प्रयुञ्जते । ते नूनमवगच्छन्ति कार्यः शब्द इति ॥ § 3981

### अनेकदेशेषु उपलम्भात् शब्दस्य नानात्वानित्यत्वे

नानादेशेषु च युगपदुपलम्भात् तेषु तेषु देशेषु शब्देन व्यवहारात् सर्वत्र युगपदुपलभ्यते शब्दः । तदेकस्य नित्यस्य सतोऽनुपपन्नम् । कार्यत्वे तु बहूनां नानादेशेषु क्रियमाणानामुपपद्यतेऽनेकदेशसम्बन्ध इति ॥ § 3982

अधिगच्छतः—अधिगमयतः ॥ § 3983

पूर्वमीमांसायाः प्रथमाध्यायाद्यपादे षष्ठाधिकरणोक्तरीत्या शब्दनित्यत्वं निरूपयिष्यन् पूर्वपक्षसिद्धान्तौ तदधिकरणसूत्रभाष्यवार्तिकोक्तौ अनुवदति तथा हीत्यादि । कथ्यन्त इति । आदिमत्त्वादैन्द्रियकत्वात्कृतकवदुपचाराच्च न्या-सू-२-२-१३ इत्यादिष्विति शेषः । ताल्वादौ कोष्ठे भवः—कौष्ठ्यः ॥ § 3984

एकत्त्येति । यदा नित्यः सार्वत्रिकश्च शब्दः, तदा गगनादिवदेक एव स्यात् । नित्यस्य सतः अनेकत्वं तु अनवस्थादिग्रस्तम् ॥ § 3985
I.515/KSV

### विकारित्वाच्चानित्यः शब्दः

२३ ] न हि— nyāma-wit_kha
२३ ] स्फुटति— nyāma-wit_kha
१०--१२ ] तेषु तेषु देशेषु— nyāma-wit_kha

८ ] देशत्वाच्च— nyāma-wit_ka

शब्दान्तरविकार्यत्वाच्चानित्यः शब्दः । दध्यत्रेति इकार एव यकारीभवतीति सादृश्यात् स्मृतेश्चावगम्यते । विकार्यत्वाच्च द्राक्षेक्षुरसादिवदनित्यत्वमस्येति ॥ § 3986

### वृद्धिह्रासभाक्त्वाच्चानित्यः शब्दः

कारणवृद्ध्या च वर्धमानत्वात् । बहुभिर्महाप्रयत्नैरुच्चार्यमाणो महान् गोशब्द उपलभ्यते, अल्पैरल्पप्रयत्नैरुच्चार्यमाणोऽल्प इत्येतच्च तन्तुवृद्ध्या वर्धमानः पट इव शब्दोऽपि हेतुवृद्ध्या वर्धमानः कार्यो भवितुमर्हतीति ॥ § 3987

### शब्दानित्यत्वहेतूनामसाधकत्वम्

त एते सर्व एवाप्रयोजका हेतवः । तथाहि—प्रात्यभिज्ञातः सिद्धे नित्यत्वे प्रयत्नानन्तरमुपलंभात् अभिव्यक्तिः प्रयत्नकार्या शब्दस्य, नोत्पत्तिरिति गम्यते । तदेवं व्यङ्ग्योऽपि प्रयत्नानन्तरमुपलम्भसंभवादनैकान्तिकत्वम् । अभिव्यञ्जकानां च पवनसंयोगविभागानामचिरस्थायित्वान्न चिरमुच्चारणादूर्ध्वमुपलभ्यते शब्दः ॥ § 3988

प्रयोगाभिप्रायश्च करोतिशब्दव्यपदेशोऽस्य भविष्यति, गोमयानि कुरु, काष्ठानि कुर्वितिवत् । तस्मात्सोऽपि नैकान्तिकः ॥ § 3989

नानादेशेषु युगपदुपलम्भनं एकस्य स्थिरस्यापि शब्दस्य विवस्वत इव सेत्स्यति ॥ § 3990

स्मृतिः—व्याकरणं इको यणचि इत्यादिरूपम् ॥ § 3991

महानिति । महत्त्वाल्पत्वे बहुदूरश्राव्यत्वाश्राव्यत्वे ॥ § 3992

प्रात्यभिज्ञातः—स्वार्थिकः प्रत्ययः । स एवायं ककारः इति प्रत्यभिज्ञा ॥ § 3993

गोमयानि कुर्विति । गोमयैरग्निमिन्धयेत्यर्थः । एवमुत्तरत्रापि ॥ § 3994

नानादेशेष्विति । युगपत्सर्वैरनुपलम्भोऽपि अभिव्यक्तितदभावाभ्यामेवोपपन्नः ॥ § 3995

I.516/KSV

### वर्णानामविकारित्वम्

विकार्यत्वं त्वसिद्धमेव, शब्दान्तरत्वात् । दधिशब्द इकारान्तः संहिताव्यतिरिक्तविषयवृत्तिः । यकारस्त्वयमन्य एव अचि परतः संहिताविषये प्रयुज्यमानः । न पुनरिकार एवायं यकारीभूतः क्षीरमिव दधिभूतमुपलभ्यते । न हीचुयशास्तालव्या इति स्थानसादृश्यमात्रेण तद्विकारत्ववर्णनमुचितम्, अप्र-

३--४ ] पटः ज्ञातः— nyāma-wit_kha

९ ] शब्दस्य— nyāma-wit_ka

कृतिविकारयोरपि नयनोत्पलपल्लवयोः सादृश्यदर्शनात् । इको यणचि इति पाणिनिस्मृतेरपि नायमर्थः—इकारो यकारीभवति, क्षीरमिव दधीभवतीति । किन्त्वास्मिन् विषयेऽयं वर्णः प्रयोक्तव्यः, अस्मिन्नयमिति सूत्रार्थः । सिद्धे शब्देऽर्थे सम्बन्धे च तच्छास्त्रं प्रवृत्तमिति ॥ § 3996

अपि च क्षीरं दधित्वमुपैति, न तु दधि क्षीरताम् । इह तु यकारोऽपि क्वचिदिकारतामुपैति—विध्यतीति संप्रसारणे सति । तस्मादसिद्ध एव वर्णानां प्रकृतिविकारभावः ॥ § 3997

## वृद्धिह्रासभाक्त्वमपि शब्दस्य नास्ति

नापि कारणवृद्ध्या वर्धते शब्दः । बलवताऽप्युच्चार्यमाणानि, बहुभिश्च, तावन्त्येवाक्षराणि । ध्वनय एव तथा तत्र प्रवृद्धा उपलभ्यन्ते, न वर्णा इति ॥ § 3998

अन्य एव, न तु इकार एव तथा विकृत इत्यर्थः । नयनेत्यादि । बाले ! तव मुखाम्भोजे चक्षुरिन्दीवरद्वयम् इत्यादाविदं दृष्टम् । क्षीरं दधीभवतीव इत्यन्वयः । सिद्ध इत्यादि । सिद्धे शब्देऽर्थे सम्बन्धे च लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः इतिवार्तिकसङ्ग्रहोऽयम् । अर्थेनात्मप्रत्यायनाय प्रयुक्तः—अर्थप्रयुक्तः इति प्रदीपः । धर्माय नियमः, धर्मार्थो वा नियमः, धर्मप्रयोजनो वा नियमः—धर्मनियमः इति भाष्यम् । धर्मः—विधिः ॥ § 3999

विध्यतीति । ग्रहिज्यावयिव्यधि—इत्यादिना यकारस्य संप्रसारणसंज्ञायां, संप्रसारणाच्च इति पूर्वरूपे व्यधधातो रूपम् ॥ § 4000

ध्वनय एवेति । तथा च वृद्धिह्रासादिकं वर्णेन सहगतस्य नादविकारस्य ध्वनेरेव धर्मः ॥ § 4001

I.517/KSV

## शब्दनित्यत्वम्

तस्मादनित्यताऽसिद्धिः नैवं प्रायैरसाधनैः ।
शब्दस्य नित्यतायां तु सैषाऽर्थापत्तिरिष्यते ॥ १८४ ॥§ 4003

शब्दस्योच्चारणं तावदर्थगत्यर्थमिष्यते ।
न चोच्चारितनष्टोऽयमर्थं गमयितुं क्षमः ॥ १८५ ॥§ 4005

सर्वेषामविवादोऽत्र शब्दार्थव्यवहारिणाम् ।

२५ ] भवति— nyāma-wit_kha
१ ] शब्दे— nyāma-wit_ka

यदविज्ञातसम्बन्धः शब्दो नार्थस्य वाचकः ॥ १८६ ॥§ 4007

वेद्यमानः स सम्बन्धः स्थविरव्यवहारतः ।
द्राघीयसा न कालेन विना शक्येत वेदितुम् ॥ १८७ ॥§ 4009

## वृद्धव्यवहारात् शब्दार्थसम्बन्धावधारणक्रमः

तथा हि—गां शुक्लामानय इत्येकवृद्धप्रयुक्तशब्दश्रवणे सति चेष्टमानमितरं वृद्धमवलोकयन् बालस्तटस्थः तस्यार्थप्रतीतिं तावत्कल्पयति—आत्मनि तत्पूर्विकायाश्चेष्टाया दृष्टत्वात्, प्रमाणान्तरासन्निधानादेतद्वृद्धप्रयुक्तशब्दसमनन्तरं च प्रवृत्तेः तत एव शब्दात् किमप्यनेन प्रतिपन्नमिति मन्यते । ततः क्षणान्तरे तमर्थं तेन वृद्धेनानीयमानमुपलभमान एवं बुध्यते—अयमर्थोऽमुतश्शब्दादनेनावगत इति । स चार्थोऽनेकगुणक्रियाजातिव्यक्त्यादिरूपसंकुल उपलभ्यते । शब्दोऽप्यनेकपदकदम्बकात्मा श्रुतः । तत्कतमस्य वाक्यांशस्य कतमोऽर्थांशो वाच्य इत्यावापोद्वापयोगेन बहुकृत्वः § 4010

अर्थगतिः—अर्थज्ञानम् । उच्चारितनष्टः—अकिञ्चित्कुर्वन्निति यावत् । तर्हि शब्दः किं करोतीत्यत्राह—सर्वेषामिति । कुत्राविवाद इत्यत्राह— यदिति । एवञ्च सम्बन्धस्मरणद्वाराऽर्थावगतिः शब्दोच्चारणफलम् ॥ § 4011

चेष्टमानं—गवानयनाय चलन्तम् । इतरं—मध्यमम् । अर्थप्रतीतिं—चलनहेतुभूतं यत्किञ्चिदर्थज्ञानम् । आत्मनि—स्वस्मिन् । तत्पूर्विकायाः—ज्ञानपूर्विकायाः । अनेन—मध्यमवृद्धेन ॥ § 4012

I.518/KSV

शृण्वन् गुणक्रियादिपरिहारेण गोत्वसामान्यमस्मन्मते, त्वन्मते वा तद्वन्मात्रं गोशब्दस्याभिधेयं निर्धारयतीति ॥ § 4013

एवं दीर्घाध्वसापेक्षसम्बन्धाधिगमावधि ।
शब्दस्य जीवितं सिद्धमिति नाशुविनाशिता ॥ १८८ ॥§ 4015

## शब्दनित्यत्वाभावे शाब्दबोध एव न घटेत

भवतु वा विनश्वरस्यापि शब्दस्य सम्बन्धग्रहणम् । तथापि तस्मिन् गृहीतसम्बन्धे शब्दे विनष्टे सति कथमनवगतसम्बन्धादभिनवादिदानीमन्यस्माच्छब्दादर्थप्रतिपत्तिः ॥ § 4016

अन्यस्मिन् ज्ञातसम्बन्धे यद्यन्यो वाचको भवेत् ।

---

२३ ] यदि— nyāma-wit_kha
५ ] वृद्धेनानुमीय— nyāma-wit_ka
१९ ] नश्वर— nyāma-wit_kha

वाचकाः सर्वशब्दाः स्युरेकस्मिन् ज्ञातसङ्गतौ ॥ १८९ ॥§ 4018

न च वक्ता व्यवहरमाणः तदेव शब्दं चोच्चारयति, सम्बन्धं करोति च, एवं च व्युत्पादयति, परं च व्यवहारयतीति । न हि युगपदिमाः क्रिया भवितुमर्हन्ति; एवमदर्शनात् ॥ § 4019

## सर्वेषु शब्देषु साजात्यात् न शक्तिग्रहणसंभवः

अथ आदौ सम्बन्धग्रहणे वृत्ते, तस्मिन् विनष्टेऽपि गोशब्दे, तत्सदृशमभिनवकृतमपि शब्दमुपश्रुत्यार्थं प्रतिपत्स्यन्ते व्यवहर्तार इत्युच्यते—तदपि न चतुरश्रम्—सादृश्यस्याग्रहणात् । न हि गोशब्द इवायमिति प्रतीतिर्दृष्टा, अपि तु गोशब्द एवेति । न च § 4020

तद्वन्मात्रं—जातिविशिष्टव्यक्तिमात्रम् । जातिस्तु अनुगमिकैवेति पक्षाभिप्रायेणेदम् ॥ § 4021

ननु शब्दस्य नाशेऽपि नष्टशब्दमूलकत्वं तच्छब्दकालिकव्यवहारस्य अनुमातुं शक्यमिति चेत्, एवं शक्तिनिर्धारेऽपि अनित्यात् शब्दात् बोधः न भवत्येवेत्युपपादयति—भवतु वेत्यादिना । अन्यस्मात् शब्दात्-कालान्तरपुरुषान्तरप्रयुक्तात् गां शुक्लामानय इत्यादेः । न चेत्यादि । एकदैवोच्चरितेन शब्देन न हि सर्वे स्वपरव्यवहारादयः निर्वोढुं शक्या इत्यर्थः ॥ § 4022

I.519/KSV

भूयोऽवयवसामान्ययोगरूपं सादृश्यं वर्णानामनवयवानामुपपद्यते । अभिनवस्य शब्दस्य स्वयमर्थवत्त्वानवधारणात् कथमयममुतः श्रोता प्रतिपद्येत इति शङ्कमानो वक्ता कथं प्रयोगं कुर्यात् ? § 4023

## सादृश्यमूलकशक्तिग्रहणेऽतिप्रसङ्गश्च

अथ सोऽप्यर्थवत्सदृशमेव प्रयुङ्क्ते, नार्थवन्तं; तर्हि यत्सदृशमसौ प्रयुङ्क्ते तस्याप्यन्यसादृश्यादेवार्थवत्तेति जगत्सर्गकालकृतस्य मूलभूतस्यार्थवतः शब्दस्य स्मरणं स्यात्, तन्मूलत्वाद्व्यवहारस्य । न चैवमस्ति । न च ततःप्रभृत्यद्ययावत् सादृश्यमनुवर्तते; तत्सादृश्यकल्पनायां मूलसादृश्यविनाशात् । विशेषतस्तु शब्दानाम् ॥ § 4024

## वर्णेषु सादृश्यमेवातिप्रसक्तम्

२३ ] जात— nyāma-wit_kha
१--४ ] गोशब्दः स एवेति— nyāma-wit_kha
१५ ] स्तमसौ— nyāma-wit_kha
१५--१६ ] तस्याप्यन्य— nyāma-wit_kha
१७ ] स्मरणं— nyāma-wit_kha
१८ ] तत्सदृशसदृश— nyāma-wit_kha

भिन्नैर्वक्तृमुखस्थानप्रयत्नकरणादिभिः ।
न निर्वहति सादृश्यं शब्दानां दूरवर्तिनाम् ॥ १९० ॥§ 4026

अनवयवानामिति । मीमांसकानां तु वर्णा नित्याः, सिद्धान्ते तु गुणाः । जातिः खलु आकृतिव्यङ्ग्या । आकृतिश्चावयवसंस्थानमेव । यद्यपि रूपत्वादि सामान्यं रूपाद्याकृतिव्यङ्ग्यम्; अतश्च निरवयवेऽपि संस्थानमस्त्येव । अन्यथा हि आत्मत्वजातिरपि न स्यात्—तथाऽपि निरवयवस्य संस्थानासंभवपक्षाभिप्रायेणेदम् ॥ § 4027

अर्थवत्सदृशं—गृहीतीर्थकशब्दतुल्यम् । अर्थवन्तं—गृहीतार्थकम् । मूलसादृश्यविनाशादिति । स्वभावविलक्षणेषु वस्तुषु सत्यामपि सादृश्यपरंपरायां स्तोकस्तोकभेदेनैव दूरमागतस्य मूलसादृश्यमत्यन्तमेव नश्येत् । विशेषतस्तु शब्दे—स्तोकविशेषादेवार्थान्यत्वं भवति, स्वरभेदादेव बहुब्रीहितत्पुरुषार्थभेदात् । किं पुनर्व्यञ्जन-मात्रा-क्रमादिभेदात् इति पार्थसारथिः १-१-६-२६८ ॥ § 4028

भिन्नैरित्यादि । ताल्वादिवैचित्र्यात् प्रतिपुरुषं उच्चरितेषु वर्णेष्वपि महदन्तरं प्रत्यक्षसिद्धम् । एवं परस्परं असन्निहितानामपि यत्किञ्चित्सादृश्यमादायार्थप्रतीतिनिर्वाहे च नीहारादपि वह्न्यनुमानं प्रमाणं स्यात् ॥ § 4029

I.520/KSV

सादृश्यजनितत्वे च मिथ्यैवार्थगतिर्भवेत् ।
धूमानुकारिनीहारजन्यज्वलनबुद्धिवत् ॥ १९१ ॥§ 4031

तस्मात् सादृश्यनिबन्धनार्थप्रतीत्यनुपपत्तेः गोशब्द एव स्थायीत्यभ्युपगमनीयम् ॥ § 4032

## गकाराद्यनुगतं गोशब्दत्वादिसामान्यं तु नास्त्येव

ननु ! यथा धूमव्यक्तिभेदेऽपि धूमत्वमतिमवलम्ब्य सम्बन्धग्रहणादिव्यवहारनिवहनिर्वहणं, एवमिह गकारादिवर्णव्यक्तिभेदेऽपि सामान्यनिबन्धनस्तन्निर्वाहः करिष्यत इति— § 4033

मैवं तत्र हि धूमत्वसामान्यं विद्यते ध्रुवम् ।
शब्दत्वं व्यभिचार्यत्र गोशब्दत्वं तु दुर्घटम् ॥ १९२ ॥§ 4035

भिन्नैरयुगपत्कालैरसंसृष्टैर्विनश्वरैः ।
वर्णैर्घटयितुं शक्यो गोशब्दावयवी कथम् ? ॥ १९३ ॥§ 4037

अनारब्धे च गोशब्दे गोशब्दत्वं क्व वर्तताम् ?
पटत्वं नाम सामान्यं न हि तन्तुषु वर्तते ॥ १९४ ॥§ 4039

## गत्वादिजातिनिरासः

ननु ! मा भूत् गोशब्दत्वं सामान्यं, भिन्नाकारगकारादिव्यक्तिवृत्तिभिरेव वा गत्वादिजातिभिः कार्यं पूर्वोक्तमुपपद्यते—एतदपि नास्ति—गत्वादिजातीनामनुपपत्तेः । भेदाभेदप्रत्ययप्रतिष्ठो हि व्यक्तिजातिप्रविभागव्यवहारः । इह चायमभेदप्रत्ययो वर्णैक्य- § 4040

दुर्घटं—तदा हि नीलधूमत्वमपि जातिः स्यात् । गोत्वं तु वस्तुगतं, न शब्दगतम् । ननु गोशब्दत्वं नाम नाखण्डः धर्मः, किन्तु गकाराद्यवयवसमुदायरूपं तदित्यत्राह—भिन्नैरित्यादि । गोशब्दावयवी—गोशब्दरूपावयवी । अनारब्धे—निरवयवे ॥ § 4041

भेदाभेदेति । भेदप्रत्ययप्रतिष्ठो व्यक्तिव्यवहारः, अभेदप्रत्ययप्रतिष्ठो जातिव्यवहारः । अभेदप्रत्ययश्च यदा अन्यथासिद्धः, तदा न जातेः सिद्धिः ॥ § 4042

I.521/KSV

निबन्धन एव, न जातिकृतः । भेदप्रतिभासस्तु व्यञ्जकभेदाधीन इति कुतो जातिव्यक्तिव्यवहारः ? § 4043

## गोत्वजातेः गत्वादेश्च वैलक्षण्यम्

गोत्वादिजातिनिराकरणेऽप्येष प्रकारः समान इति चेत्—न— व्यक्तिभेदस्य सुस्पष्टसिद्धत्वेन व्यञ्जकाद्युपाधिनिबन्धनत्वानुपपत्तेः । परस्परविभक्तस्वरूपतया हि शाबलेयबाहुलेयपिण्डाः प्रत्यक्षमुपलभ्यन्ते । स्थिते च व्यक्तिभेदे सर्वत्र गौरिति तदभेदप्रत्ययस्यानन्यविषयत्वादिष्यत एव गोत्वजातिः । इह पुनः— § 4044

गकारव्यक्तयो भिन्नाः शाबलेयादिपिण्डवत् ।
क्व नाम भवता दृष्टाः येनासां जातिमिच्छसि ? ॥ १९५ ॥§ 4046

शिशौ पठति वृद्धे वा स्त्रीजने वा शुकेऽपि वा ।
वक्तृभेदं प्रपद्यन्ते न वर्णव्यक्तिभिन्नताम् ॥ १९६ ॥§ 4048

तथा च गर्गः पठति, माठरः पठतीत्युच्चारयितृभेद एव प्रतीयते, अमुं गविशेषमेष पठतीति नोच्चार्यमाणभेदः ॥ § 4049

२ ] वृत्तिभिरेव— nyāma-wit_kha

१२ ] भासस्य— nyāma-wit_kha

१२--१५ ] भेदधीसुस्पष्ट— nyāma-wit_kha

१५ ] त्वोपपत्तेः— nyāma-wit_kha

२२ ] वर्णा— nyāma-wit_ka

एकवक्तृप्रयोगेऽपि तस्यैवोच्चारणं पुनः ।
गङ्गागगनगर्गादौ न रूपान्तरदर्शनम् ॥ १९७ ॥§ 4051

द्रुतादिभेदबोधोऽपि नादभेदनिबन्धनः ।
न व्यक्तिभेदजनितः शाबलेयादिबोधवत् ॥ १९८ ॥§ 4053

## गत्वजात्यङ्गीकर्तृभिरपि द्रुतादिभेदात् न गादिभेदः वक्तुं शक्यः

अभ्युपगतेऽपि गत्वसामान्ये तस्य द्रुतादिभेदप्रतिभासे सत्यपि न भिन्नत्वमेषितव्यम् । औपाधिक एव तस्मिन् भेदप्रतिभासो § 4054

शाबलेयबाहुलेयशब्दौ कर्बुरनीलरूपवद्वाचकौ व्यक्तिभेदपरिचायकौ ॥ § 4055

ननु उच्चारयितृभेदात् गादिभेदे, एकोच्चरितेषु गकारेषु भेदप्रतीतिः कथमित्याशङ्कां, उच्चारणभेदबोधनायैव उच्चारयितृभेद उक्त इति समाधत्ते— एकेत्यादि ॥ § 4056

I.522/KSV

वर्णनीयः । सोऽयं गकारव्यक्तावेव कथं न वर्ण्यते—तस्या एवै- कत्वादेकप्रत्ययः, भेदभ्रमस्तु व्यञ्जकाधीन इति । एवं हि कल्पना लघीयसी भवति । तस्मान्न नानागकारवृत्तिगत्वसामान्यं नाम किञ्चिदस्ति ॥ § 4057

## व्यञ्जनानां ह्रस्वदीर्घरूपाणां स्वरोपाधिकभेदवत् स्वरभेदोऽप्यौपाधिक एव

अपि च गोगुरुगेहादौ भिन्नाजुपश्लेषकारित एव व्यञ्जनेषु बुद्धिभेदः परोपाधिरवधार्यते । सोऽयमक्ष्वपि परोपाधिरेव भवितुमर्हति, वर्णाश्रितत्वात्, व्यञ्जकभेदप्रत्ययवदिति । तस्मात् गत्ववत् अत्वसामान्यमपि नास्ति ॥ § 4058

## अष्टादशविधस्वरभेदा औपाधिका एव

यत्पुनः अष्टादशभेदं अवर्णकुलमुच्यते—तदौपाधिकमेव; ह्रस्वदीर्घप्लुतसंवृतविवृतादिबुद्धीनां ध्वनिभेदानुविधायित्वात् ॥ § 4059

विवृतः संवृतादन्यो न गकाराद्गकारवत् ।
अपि त्वकार एवासौ प्रतिभाति यथा तथा ॥ १९९ ॥§ 4061

१ ] कर्तृ— nyāma-wit__kha
४ ] जनिता— nyāma-wit__ka
४ ] भेदवत्— nyāma-wit__kha
१२ ] एव— nyāma-wit__ka
१५ ] भिन्नान्या— nyāma-wit__ka
२० ] ना— nyāma-wit__ka

तस्याः—गकारव्यक्तेः । तथा च जगत्येक एव गकारादिः, भेदस्त्वौपाधिक एव ॥ § 4062

गोगुरुगोहादाविति । ग-गा-गि-गी-इत्यादिष्वित्यर्थः । भिन्नाजुपश्लेषः—अ-आ-इ-ई इत्यादिसम्बन्धः । अक्षु—अकोरादिस्वरेषु । अच्छब्दस्य सुपि रूपम् । परोपाधिः—उच्चारणभेदाधीनः । सः—बुद्धिभेदः ॥ § 4063

अष्टादशभेदमिति । एकैकोऽपि ह्रस्वदीर्घप्लुतभेदेन त्रिविधः । सोऽपि ह्रस्वादिः प्रत्येकं उदात्तानुदात्तस्वरितस्वरभेदेन भिन्नः । सोऽपि पुनः अनुनासिकाननुनासिकभेदेन भिन्नः । एवञ्च एक एव अकारः अनुनासिकोदात्तह्रस्वरूपः, अननुनासिकोदात्तह्रस्वरूपः—इत्येवंक्रमेण अष्टादशविधः । संवृतविवृतेति । एक एव ह्रस्वः अकारः प्रयोगकाले संवृत इति, प्रक्रियायां विवृत इति च संज्ञाभेदं प्रतिपद्यत इति संप्रतिपन्नत्वात् दृष्टान्तत्वेनोपन्यासः । इदमेव स्पष्टीकरोति—विवृत इत्यादि ॥ § 4064

I.523/KSV

## अकारयोः ध्वनिभेदादेवार्थभेदः

कथं तर्हि शब्दभेदाभावे भिन्ने अर्थप्रतिपत्ती—अरण्यं आरण्यमिति; ध्वनिकृते एव ते भविष्यतः । अशब्दधर्मस्य दीर्घत्वादे कथमर्थप्रतीत्यङ्गत्वमिति चेत्; तुरगवेगवद्भविष्यति ॥ § 4065

यथा तुरगदेहस्थो वेगः पुंसोऽर्थसिद्धये ।
परधर्मोऽपि दीर्घादिरेवं तस्योपकारकः ॥ २०० ॥§ 4067

## अत्वादिजातिनिरासः

इतश्चैतदकारसामान्यमनुपपन्नम् । अत्वं हि न दीर्घप्लुतयोरनुगतं भवति, आत्वं न ह्रस्वप्लुतयोः, आत्वं न ह्रस्वदीर्घयोरिति । तस्मादेकत्वाद्वर्णानां नावान्तरजातयः संभवन्ति । शब्दत्वं तु नियतार्थप्रतिपत्तौ व्यभिचारीत्यतो नात्र धूमादिन्यायः ॥ § 4068

## शब्दादर्थबोधान्यथाऽनुपपत्त्या शब्दनित्यत्वसाधनम्

तेनार्थप्रत्ययः शब्दादन्यथा नोपपद्यते ।
न चेन्नित्यत्वमित्यस्मिन् अर्थापत्तेः प्रमाणता ॥ २०१ ॥§ 4070

२० ] अत्वं— nyāma-wit_kha

## अर्थापत्तेरनुमानरूपत्वे, अनुमानेन शब्दनित्यत्वसिद्धिः

अनुमानादन्यथात्वमर्थापत्तेर्न दृश्यते ।
तेनानुमानमप्येतत्प्रयोक्तुं न न शक्यते ॥ २०२ ॥§ 4072

ननु यदि ह्रस्वदीर्घादिभेदः अकारे नास्ति, तर्हि अरण्य-आरण्यशब्दयोः कथं वाच्यभेदः ? ताभ्यां बोधभेदो वा इति शङ्कते—कथमिति । परधर्मः—ध्वनिधर्मः ॥ § 4073

अत्वं—ह्रस्वगतम् । आत्वं—दीर्घगतम् । आत्वं—प्लुतगतम् । नात्र जातिभेदः, एकस्यैव अकारस्य अष्टादशभेदवर्णनात् । तस्मात्— ह्रस्वदीर्घादिभेदः ध्वनिकृत एव, न जातिभेदकृत इति सिद्धिः । शब्दत्वमिति । यद्यपि शब्दत्वं जातिः, परन्तु तत् सर्वसाधारणं इति न विलक्षणबोधोपयोगि ॥ § 4074

तेनेति । शब्दस्य नित्यत्वं न चेत्, अन्यथा—प्रकारान्तरेण, गत्वादिसामान्यद्वारेण शब्दादर्थप्रत्ययः नोपपद्यते इत्यन्वयः ॥ § 4075

I.524/KSV

तदिदमुच्यते—शब्दो धर्मी, नित्य इति साध्यो धर्मः, सम्बन्धग्रहणसापेक्षार्थप्रतिपादकत्वात्, धूमादिजातिवत् । तदिदमुक्तं नित्यत्वं तु स्याद्दर्शनस्य परार्थत्वात् जै. सू. १-१-१८ इति । एवं सम्बन्धग्रहणात्प्रभृति आर्थप्रतिपत्तेरवस्थितस्य विनाशहेत्वभावादात्मादिवन्नित्यत्वम् ॥ § 4076

## निरवयवत्वात् शब्दः न नश्यति

न ह्ययमवयवविनाशान्नश्यति शब्दः, निरवयवत्वात् । तदेव कथमिति चेत्—उच्यते— § 4077

स्वल्पेनापि प्रयत्नेन यदि वर्णः प्रयुज्यते ।
यदि वा नानुभूयेत, शकलो नानुभूयते ॥ २०३ ॥§ 4079

सावयवे हि वस्तुनि द्विधा अवयवा दृश्यन्ते, आरब्धकार्याश्चानारब्धकार्याश्चेति । इह पुनरारब्धकार्या अनारब्धकार्या वा § 4080

नित्यत्वमिति । शब्दस्येति शेषः । दर्शनं—उच्चारणं; तत् परार्थं—परं अर्थं प्रत्याययितुम् । उच्चरितमात्रे हि विनष्टे शब्दे न चान्योऽन्यान् अर्थं प्रत्याययितुं शक्नुयात् इति शाबरं भाष्यम् । अत्र नित्यस्तु इति भाष्यादिपाठः । ननु तर्हि शब्दस्यार्थबोधनपर्यन्तमवस्थानेनाप्यलं, कुतो नित्यत्वम् ? इत्यत्राह—एवमिति । सम्बन्धग्रहणात् प्रभृतीति । अयमाशयः— शक्तिग्रहणकाले यः गवादिशब्दः श्रुतः स एव कालान्तरे गवादिबोधं जनयितुं श-

२ ] ततोऽ— nyāma-wit__ka
२१ ] वा— nyāma-wit__ka

क्तः, न त्वन्यः, अगृहीतशक्तिकत्वात् । गत्वादिजातीनां च निरासात् न जातिद्वारा सर्वेषु गवादिशब्देषु पूर्वमेव शक्तिग्रहसंभवः । अतश्च बोधपर्यन्तमपि स एव शब्दो वर्तत इत्यङ्गीकार्यम् । शक्तिग्रहणकाले श्रुतस्य, मध्यकाले अश्रूयमाणस्यापि गवादिशब्दस्य बोधकाले पुनः श्रवणपर्यन्तं अवस्थानं सिद्धमेव । तेन च अश्रूयमाणा अपि शब्दाः सदा वर्तन्त एव, तदा तदा तूच्चारणादभिव्यक्तिरेवेत्यवशादङ्गीकर्तव्यमिति शब्दनित्यत्वसिद्धिः ॥ § 4081

नानुभूयेत । यावता हि प्रयत्नेन एको घटो निष्पाद्यः, तावति प्रयत्ने अकृते न हि घटनिष्पत्तिः, दर्शनं वा उपलभ्यते । ननु सर्वथाऽनुपलब्धिः नापादयितुं शक्या, स्वल्पस्य प्रयत्नस्य कृतत्वादित्यत्राह—शकल इति । अक्षरैकदेशः इत्यर्थः ।

पटे तन्त्वादय इव वर्णे न क्वचिदवयवा उपलभ्यन्ते । न चानुमीयन्ते, लिङ्गाभावात् ॥

### अश्रयविनाशात् शब्दविनाशासंभवः

नाप्यश्रयविनाशाद्विनाशः, शब्दस्य आत्मादिवदनाश्रितत्वात् । आकाशाश्रितपक्षे वा तन्नित्यत्वात् । न चान्यः कश्चन शब्दनाशस्य हेतुरस्ति ॥

क्षयो यथोपभोगेन शस्त्रादिच्छेदनेन वा ।
संभाव्यते पटादीनां नैवं शब्दस्य कर्हि चित् ॥ २०४ ॥§ 4084

तस्मात्तिरोहितोऽप्यास्ते, यदि शब्दः क्षणान्तरम् ।
मृत्योर्मुखादपक्रान्तः पुनः केनैष हन्यते ? ॥ २०५ ॥§ 4086

### सङ्ख्याभावाच्च शब्दः नित्यः

इतश्च नित्यः शब्दः—सङ्ख्याभावात् जै. सू. १-१-२० । अष्टकृत्वो गोशब्द (Edtext outside numbered paragraph)उच्चारित इति वदन्ति, न त्वष्टौ गोशब्दा इति शा. भा. १-१-२० । तेनैकत्वमवगम्यते । योऽयं क्रियाभ्यावृत्तिगणने विहितः कृत्वसुच्प्रत्ययः, स क्रियावतामभेदे भवति । तेनोच्चारणावृत्तिमात्रम् । तदुक्तम् श्लो. वा. १-१-६-३६७—

क्रियावतामभेदे हि क्रियाऽऽवृत्तिषु कृत्वसुच् ।
तत्प्रयोगात् ध्रुवं तस्य शब्दस्यावर्तते क्रिया इति ॥§ 4088

१५ ] न चान्यः— nyāma-wit_kha
१६--१८ ] तेस्मात्तिरोहितो— nyāma-wit_kha
१९ ] दुःखा— nyāma-wit_kha
१९ ] केनैव— nyāma-wit_ka
१९ ] मभेदो— nyāma-wit_kha

क्रियाभ्यावृत्तिसत्तायामभेदे च क्रियावताम्
संख्याभिधायिनः शब्दात् कृत्वसुच्प्रत्ययं विदुः ॥ २०६ ॥§ 4091

पटे तन्त्वादय इवेति । पार्थिवशरीरे जलादिरिवेति अनारम्भकावयवदृष्टान्तोऽप्यूह्यः । अयमंशः ८ आह्निके स्पष्टीभविष्यति ॥ § 4092

मीमांसकमते शब्दस्य निरवयवद्रव्यत्वात्—आत्मादिवदित्युक्तम् ॥ § 4093

तस्मात्—उक्तहेतोः । अयमाशय इत्यादिना टीकायामनुपदमिद विवृतम् ॥ § 4094

क्रियावतामिति । दशकृत्वः देवदत्त आगतः इत्यादाविदं दृष्टम् । संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् पा. सू. ५-४-१७ ॥ § 4095
I.526/KSV

## प्रत्यभिज्ञाबलादपि शब्दनित्यत्वसिद्धिः

तदनेन प्रकारेण प्रत्यभिज्ञानमुच्यते ।
प्रमाणं शब्दनित्यत्वे सकलश्रोतृसाक्षिकम् ॥ २०७ ॥§ 4097

तथा ह्यस्ति स एवायं गोशब्द इति वेदनम् ।
श्रोत्रं करणकालुष्यबाधसन्देहवर्जितम् ॥ २०८ ॥§ 4099

## सोऽयं गकारः इत्यादिप्रत्यभिज्ञाया अनन्यथासिद्धत्वम्

श्रोत्रेन्द्रियव्यापारान्वयव्यतिरेकानुविधानात् श्रौत्रमिदं विज्ञानम् । न चैतज्ज्ञनकस्य करणस्य किमपि दौर्बल्यमुपलभ्यते । न च किंस्विदिति कोटिद्वयसंस्पर्शितया इदं विज्ञानमुपजायते । न च नैतदेवमिति प्रत्ययान्तरमस्मिन् बाधकमुत्पश्यामः । इदानींतनास्तित्वप्रमेयाधिक्यग्रहणाच्चेदमनधिगतार्थग्राह्यपि भवितुमर्हति । भवन्मते च गृहीतग्राहित्वेऽपि प्रत्यभिज्ञायाः प्रामाण्यमिष्यते । न हि तदप्रामाण्यं वक्तुं शक्यते; शाक्यैरिव भवद्भिः क्षणिकपदार्थानभ्युपगमात् ॥ § 4100

## सोऽयं गकारः इति प्रत्यभिज्ञा न साजात्यमूला

१ ] संख्यावताम्—
nyāma-wit_kha

न सादृश्यनिमित्तत्वं वक्तुं तस्याश्च युज्यते ।
सामान्यविषयत्वं वा द्वयस्यापि निषेधनात् ॥ २०९ ॥§ 4102

कैश्चित्तिरोहिते भावादित्यप्रामाण्यमुच्यते ।
तदसत्तत्प्रतीत्यैव तिरोधाननिषेधनात् ॥ २१० ॥§ 4104

ननु अनधिगतार्थगन्तृत्वरूपप्रामाण्यवादिनस्तव कथं प्रत्यभिज्ञाप्रामाण्यमित्यत्राह—इदानींतनेति । वर्तमानकालसम्बन्ध इति यावत् । तदुक्तम् कालश्चैकोविभुर्नित्यः प्रविभक्तोऽपि गम्यते । वर्णवत्, सर्वभावेषु व्यज्यते केन चित्क्वचित् श्लो. वा. १-१-६-३०३ इति ॥ § 4105

द्वयस्य—सादृश्यस्य, जातेश्च । निषेधनात्, अनुपदमेवेति शेषः । तिरोहिते—विनष्ट इति भावः । ज्ञानकर्मणोः द्वित्रक्षणावस्थानेऽपि ज्ञानक्रियान्तरोत्पत्तावपि प्रत्यभिज्ञा दृश्यत इत्यर्थः । बुद्धिकर्मणी अपि प्रत्यभिज्ञायेते शा. भा. १-१-६ इत्याद्यत्रानुसन्धेयम् । तत्प्रतीत्यैव—तादृशप्रत्यभिज्ञयैव । अयं भावः—प्रत्यभिज्ञा हि वस्त्वैक्यविषयिणी जात्यैक्यविषयिणी वा दृश्यत एव । सोऽयं गकारः इत्यादौ जात्याद्यनालम्बनतायाः उक्तत्वात्,

जीवति त्वन्मतेऽप्येष शब्दस्त्रिचतुरान् क्षणान् ।
प्रत्यभिज्ञा च कालेन तावता न न सिद्ध्यति ॥ २११ ॥§ 4108

एकक्षणायुषि त्वस्मिन् प्रतीतिरतिदुर्लभा ।
न खल्वजनकं किञ्चित् वस्तु ज्ञानेन गृह्यते ॥ २१२ ॥§ 4110

इति क्षणभङ्गभङ्गे ९ आह्निके वक्ष्यते ॥

### ग्रहणात्पूर्वमपि शब्दा वर्तन्त एव

अपि च—

यथा निशीथे रोलम्बश्यामलाम्बुदडम्बरे ।
प्रत्यभिज्ञायते किञ्चित् अचिरद्युतिधामभिः ॥ २१३ ॥§ 4112

तथाऽविरतसंयोगविभागक्रमजन्मभिः ।
प्रत्यभिज्ञायते शब्दः क्षणिकैरपि मारुतैः ॥ २१४ ॥§ 4114

### शब्दनित्यत्वे तस्य ग्रहणनियमासंभवाक्षेपः

अत्राह श्लो-वा-१-१-६-५१—मारुतैरित्युपोद्धातेन साधु स्मृतम् । तिष्ठ-तु तावत्प्रत्यभिज्ञानम् ! प्रथममेव शब्दस्य यन्नियतग्रहणं, तदभिव्यक्तिपक्षे दुर्घटम् ॥

नित्यत्वात् व्यापकत्वाच्च सर्वे सवत्र सर्वदा ।
शब्दाः सन्तीति भेदेन ग्रहणे किं नियामकम् ? ॥ २१५ ॥§ 4116

ध्वनयो हि नाम संयोगविभागविशेषिता वायवः, बाधकाभावाच्च वस्त्वैक्यमेव विषयः । उक्तप्रत्यभिज्ञायाः क्वचित् त्वयाऽपि वस्त्वैक्यालम्बनत्वमङ्गीकार्यमित्याह—जीवतीति । त्रिचतुरानिति । अयं विषयः अग्रे सिद्धान्ते स्पष्टीभविष्यति । ननु क्षणिकवादे साजात्यालम्बनत्वमेव वक्तमित्यत्राह—एकक्षणेति । ज्ञानक्षणे विषयस्यैवाभावादिति हेतुः ॥ § 4117

शब्दस्य ग्रहणप्रकारं विचारयिषुः, तदुपक्षेपार्थं कादाचित्केनापि व्यञ्जकेन पूर्वतनस्यैव व्यञ्जनं मेघान्धकारशर्वर्यां विद्युज्जनितदृष्टिवत् श्लो. वा. १-१-६-४१ इत्युक्तमुपपादयति—अपि चेत्यादिना । प्रत्यभिज्ञायते— विद्यमान एव ज्ञायते—अभिव्यज्यत इति यावत् ॥ § 4118

भेदेन—कालदेशपुरुषभेदेन भिन्नतया । ध्वनयः—नादाः । संयोग वायुवृत्तयो वा संयोगविभागाः । ते हि शब्दस्य व्यञ्जका इष्यन्ते । तैश्च करणं वा संस्क्रियते ? कर्म वा ? द्रव्यं वा ? सर्वथा च प्रमादः ॥

**अभिव्यञ्जकसामग्र्या श्रोत्रसंस्कारासंभवः**

करणे संस्कृते तावत् सर्वशब्दश्रुतिर्भवेत् ।
गकारायैव संस्कार इत्येष नियमः कुतः ? ॥ २१६ ॥§ 4121

अपिच—स्तिमितसमीरणापसरणमेव करणस्य संस्कारः । स चायं तद्देशव्यवस्थितसकलतद्विषयसाधारण एव ॥

यथा जवनिकाप्रायप्राप्तप्रसरमीक्षणम् ।
रङ्गभूमिषु तद्देशमशेषं वस्तु पश्यति ॥ २१७ ॥§ 4123

तथा प्रसरसंरोधिसमीरोत्सारणे सति ।
श्रोत्रं तद्देशनिःशेषशब्दग्राहि भविष्यति ॥ २१८ ॥§ 4125

**श्रोत्रसंस्कारपक्षे श्रोत्रनियमश्च दुर्वचः**

आकाशं च श्रोत्रमाचक्षते भवन्तः । तच्च विभु निरवयवं चेति क्वचिदेव तस्मिन् संस्कृते सति सर्वे च तदेव संस्कृतकरणाः संपन्ना इति सर्व एव शृणुयुः इति बधिरेतरव्यवस्था दुस्थिता ॥ विभागाः नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जयन्तः नादशब्दवाच्याः शा-भा१-१-१७, वायवीया हि ध्वनयः अभिव्यञ्जकाः न्या-रा-१-१-६-४१ । साधारणवायोः ध्वनिरूप-

त्वासंभवात् वायुवृत्तयो वेति । करणं वेत्यादि । विद्यमान एव शब्दः, एतावताऽगृह्यमाणोऽपि इदनीमेव गृह्यत इत्यनुभवसिद्धम् । तत्र एतावता कालेन तादृशशब्दग्रहणाशक्तं श्रोत्रं, इदानीमेव व्यञ्जकसामग्रीप्रभावात् संस्कृतं सत् इदानीं शब्दं ग्रहीतुं समर्थमभूदित्युच्यते ? उत इन्द्रियं तथैवावतिष्ठते, किन्तु शब्द एव आरोपितातिशयः इदानीं गृह्यते ? उत श्रोत्रे, शब्दे च अतिशयः प्रापय्यते ? § 4126

सर्वशब्देति । यदा च श्रोत्रं संस्कृतं, तदा तेन गकार एव गृह्येत, न तु चकार इति कथं नियमः ? न हि घटग्रहणायोन्मीलितं चक्षुः पटं न गृह्णीयात् ! ननु संस्कार एव प्रत्यक्षरं भिन्नः स्यादित्यत्र, तथा न वक्तुं शक्यमित्याह— अपि चेति । स्तिमितः—निश्चलः—प्रतिबन्धकीभूत इति यावत् न्या-र१-१-६-१२३ । इदमेवोपपादयति—यथेति ॥ § 4127
I.529/KSV

## शब्दसंस्कारपक्षस्याप्ययुक्तता

विषये तु संस्क्रियमाणे तस्यानवयवस्य व्यापिनश्च संस्कृतत्वात् सर्वत्र श्रवणमिति मद्रेष्वभिव्यक्तो गोशब्दः कश्मीरेष्वपि श्रूयेत । न हि तस्याधारद्वारकः संस्कारः, आकाशवदनाश्रितत्वात् । आकाशाश्रितत्वपक्षेऽपि तदेकत्वात् । नापि भागशः संस्क्रियते गोशब्दः, तस्य निरवयत्वात् । उक्तं हि श्लो-वा-१-१-५-स्फोट-१०— § 4128

अल्पीयसा प्रयत्नेन शब्देमुच्चरितं मतिः ।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम् इति ॥§ 4130

## श्रोत्र-शब्दसंस्कारपक्षस्याप्यसंभवः

उभयसंस्कारपक्षे तु दोषद्वयस्याप्यनतिवृत्तिः—सर्वेषां ग्रहणं, सर्वत्र श्रवणमिति । न च समानदेशानां समानेन्द्रियग्राह्याणां च भावानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमुपलब्धम् ॥ § 4131

गृहे दधिघटीं द्रष्टुं आनीतो गृहमेधिना ।
अपूपानपि तद्देशान् प्रकाशयति दीपकः ॥ २१९ ॥§ 4133

तस्मात् कृतकपक्ष एव नियतदेशं शब्दस्य ग्रहणं परिकल्पते, नाभिव्यक्तिपक्ष इति ॥ § 4134

१६ ] मुच्चारितं— nyāma-wit_kha

## शब्दनित्यत्वपक्षे तीव्रमन्दविभागाद्यसंभवश्च

अपि च—अभिव्यक्तिपक्षे तीव्रमन्दविभागः, अभिभवश्च शब्दस्य शब्दान्तरेण न प्राप्नोति । न हि शब्दस्तीव्रो मन्दो वा कश्चित्, स्वतस्तस्य भेदाभावात् । संस्कारस्य च तदभिव्यक्तिहेतोः न काचन तीव्रता, मन्दता वा; यदनुसारेण विषये तथा बुद्धिः स्यात् ॥ § 4135

सर्वत्रेति । वार्तिकन्यायरत्नाकरयोः १-१-६-५१-६४ शब्दसंस्कारपक्षेऽपि सर्वैः ग्रहणमप्युक्तम् ॥ § 4136

स्वत इति । शब्दो हि नित्यः, एकः, विभुश्चेति तन्मतम् ॥ § 4137
I.530/KSV

## तीव्रत्वमन्दत्वादेः वायुधर्मत्वासंभवः

पवनधर्मो वा तीव्रादिर्भवन् कथं श्रोत्रेण गृह्येत ? सावयवे हि वस्तुनि सकलविशेषग्रहणाग्रहणसंभवात् तदपेक्षया प्रतीतिभेदो भवेत् । इह तु निरवयवे शब्दे न तथोपपद्यते इति । तस्मात् कृतकपक्ष एव श्रेयामिति ॥ § 4138

## शब्दनित्यत्वेऽपि श्रोत्रसंस्कारपक्षः युक्त एव

अत्रोच्यते—करणसंस्कारपक्ष एव तावदस्तु । तच्च करणं किञ्चिदेव मरुद्भिरुपाहितसंस्कारं कञ्चिदेव शब्दं गृह्णाति ॥ § 4139

यथा ताल्वादिसंयोगविभागा भवतां मते ।
उत्पादकतयेष्यन्ते केचिद्वर्णस्य कस्यचित् ॥ २२० ॥§ 4141

तथा तद्वायुसंयोगविभागाः केचिदेव नः ।
कस्यचिद्ग्रहणे शक्ताः श्रोत्रं कुर्वन्ति संस्कृतम् ॥ २२१ ॥§ 4143

यथा च तेषामुत्पत्तौ सामर्थ्यनियमस्तव ।
तथैवेषामभिव्यक्तौ सामर्थ्यनियमो मम ॥ २२२ ॥§ 4145

व्यञ्जकानां नियमो न दृष्ट इति चेत्—क एवमाह सहस्राक्षः ? तथा हि—पृथिव्यामेव वर्तमानो गन्धः समानदेशो भवति, समानेन्द्रियग्राह्यश्च; घ्राणेकविषयत्वात् । तस्य च नियतव्यञ्जकव्यङ्ग्यता दृश्यत एव ॥ § 4146

---

१४--१६ ] विभागाः केचिदेव नः— nyāma-wit__kha
१७ ] शक्तं— nyāma-wit__kha
२२ ] नियतस्तद्व्यजक— nyāma-wit__kha

कथमिति । पवनधर्मा हि त्वचा गृह्येरन्, न श्रोत्रेण । प्रतीतिभेदः—कतिपय-यावदवयवग्रहणानुरोधेन तीव्रमन्दत्वादिभेदप्रत्ययः ॥ § 4147

ताल्वादीति । इचुयशानां तालव्यत्वेऽपि इकारोच्चारणाय प्रवृत्तः न हि चकारमुच्चारयति । अतः स्थानसाम्यं स्थूलदृष्ट्या, भेदस्त्वस्त्येव सूक्ष्मः । तथा प्रकृतेऽपि ॥ § 4148

गृहे दधिघटीं द्रष्टुं इत्यादि समाधत्ते—व्यञ्जकानामित्यादि । समानेन्द्रियेति । सर्वेषामपि हि घ्राणेन्द्रयं पार्थिवमेव, गन्धश्च पृथिवीनिष्ठः । अथापि ग्रहणनियमोऽस्त्येव ॥ § 4149

I.531/KSV

क्वचित्पावकसंपर्कादर्कांशुस्पर्शतः क्वचित् ।
क्वचित्सलिलसंसेकात् गन्धोऽभिव्यज्यते भुवः ॥ २२३ ॥ § 4151

न च स्तिमितपवनापनोदनमात्रं करणस्य संस्कार इष्यते, यः सर्वसाधारणः स्यात्; किन्तु अन्य एव नियतः प्रतिविषयं योग्यतालक्षणः ॥ § 4152

## श्रोत्रस्याकाशरूपत्वेऽपि ग्रहणनियमः

यत्पुनरभ्यधायि—नभसि श्रोत्रेऽभ्युपगम्यमाने सर्वप्राणिनामेकमेव श्रोत्रं भवेदिति—तदप्यसाधु—धर्माधर्मयोर्नियामकत्वात् । आकाशस्यापि घटाकाशवदन्यावच्छेदोपपत्तेः धर्माधर्मनिबन्धन एव बधिरेतरविभागः ॥ § 4153

## मीमांसकानां आकाश एव न श्रोत्रम्

अपि च भवतामेवैष दोषः, येषामाकाशमेव श्रोत्रमित्यभ्युपगमनियमः । मीमांसकानां तु नावश्यमाकाशमेव श्रोत्रम्, कार्यार्थापत्तिकल्पितं तु किमपि करणमात्रं प्रतिपुरुषनियतं श्रोत्रमिति नातिप्रसङ्गः । तथा च भर्तृमित्रः पवनजनितसंस्कारमेव श्रोत्रं मन्यते ॥ § 4154

क्वचिदिति । सर्जरसादौ पावकसंयोगात्, मरीच्यादौ सूर्यमरीचिसम्बन्धात्, उशीरादौ सलिलसंसेकाच्च गन्धाभिव्यक्तिः दृश्यते । अन्यः—कार्यैकोन्नेयः ॥ § 4155

धर्माधर्मौ किं कुरुतः ? इत्यत्र, तत्तत्पुरुषप्रतिनियतं कर्णशष्कुल्याद्युपाधिमुत्पाद्य विषयव्यवस्थां कुरुत इत्याह—आकाशेति ॥ § 4156

नावश्यमिति । नावश्यं श्रोत्रमाकाश्वस्त्वन्तरं अमस्मामिश्चाभ्युपेयते १-१६-६६ तेनाकाशैकदेशो वा यद्वा भवेत् । कार्यार्थापत्तिगम्यं नः श्रोत्रं

१४ ] प्राणिनामेव—
nyāma-wit_ka
२० ] संस्कारपक्षो भवतु—

nyāma-wit_kha ---Note: अनन्तरपुटानुवर्ति

प्रतिनरं स्थितम्(?') ६८ इति वार्तिकम् । किमपीति । चक्षुरादिवदतिरिक्त-मेवेत्यर्थः । भर्तृमित्र इति । केचित्तु पण्डितम्मन्याः श्लो. वा. १-१-६-१३१ इति वार्तिकव्याख्याने न्यायरत्नाकरे अत्र भर्तृमित्रो वदति, ध्वनिजन्यः संस्कारः श्रोत्रमिति इत्युक्तम् ॥ § 4157
I.532/KSV

## शब्दसंस्कारपक्षोऽपि साधीयान्

अथ वा विषयसंस्कारपक्षो भवतु, तथाऽपि नातिप्रसङ्गः; नियतदेश-स्यैव तत्र संस्कारात् । न चास्य भागशः संस्कारः निरवयवत्वात् । तथाऽपि जातिवदस्य ग्रहणनियमो भविष्यति । तथाच भवतामेव पक्षे— § 4158

यथा सर्वगता जातिः पिण्डदेशैव गृह्यते ।
न च कार्त्स्न्यगृहीताऽपि पिण्डेऽन्यत्र न दृश्यते ॥ २२४ ॥§ 4160

तथा सर्वगतः शब्दः नाददेशेषु गृह्यते ।
कार्त्स्न्येन च गृहीतोऽपि पुनरन्यत्र गृह्यते ॥ २२५ ॥§ 4162

पिण्डोऽभिव्यञ्जको जातेः शब्दस्य व्यञ्जको ध्वनिः ।
आश्रितानाश्रितत्वादि विशेषः क्वोपयुज्यते ॥ २२६ ॥§ 4164

## तीव्रत्वमन्दत्वादयः ध्वनिधर्माः, न शब्दधर्माः

सर्वगतत्वनिरवयवत्वाविशेषात् तीव्रमन्दत्वादयश्च ध्वनिधर्मा अपि भवन्तः शब्दवृत्तितयाऽवभान्ति । यथा स्थूलत्वकृशत्वादय; पिण्डधर्मा अपि जाति-वृत्तित्वेन क्वचित् गृह्यन्तो दृश्यन्ते, अगृहीतशाबलेयादिविशेषस्य कृशा गावः इत्यादिप्रतिभासदर्शनात् ॥ § 4165

पिण्डदेशः—बहुव्रीहिसमासः । एकस्मिन् घटे कार्त्स्न्येन गृहीतमपि घटत्वं घटान्तरेऽप्युपलभ्यत एव । पटादौ तु न गृह्यत एव । एवमनुभ-वानुरोधेन प्रकृतेऽपि ग्रहणनियमादिः । नाददेशेष्विति । तथैव यत्समीपस्थैः नादैः स्याद्यस्य संस्कृतिः । तैरेव श्रूयते शब्दः नादा हि प्रादेशिकाः स्व-देशावच्छिन्नमेव तस्य विभोरपि संस्कारं कुर्वन्ति इति वार्तिकं १-१६-८५ व्याख्या च । आश्रितेत्यादि । जातिः किञ्चिदाश्रिता, शब्दस्तु स्वतन्त्रः इति

५ ] संस्कारपक्षो भवतु— nyāma-wit_kha ---Note: पूर्वपुटात्

१० ] शेषेषु— nyāma-wit_kha

१६ ] गृह्यन्ते— nyāma-wit_kha

वैलक्षण्यं ग्रहणविषये न किञ्चित्करम् ॥ § 4166

सर्वगतत्वादिकं शब्द इव ध्वनावप्यङ्गीक्रियते । एवमौपाधिकग्रहणे दृष्टान्तमाह—यथेति । गोत्वपुरस्कारेण व्यवहारोपपादनाय—अगृहीतेत्यादि ॥ § 4167

I.533/KSV

### तीव्रत्वमन्दत्वादयः बुद्धिकल्पिता एव वा

यद्वा न तीव्रमन्दादेः वर्णधर्मतया ग्रहः ।
बुद्धिरेव तथोदेति व्यञ्जकानुविधायिनी ॥ २२७ ॥§ 4169

तावन्त एव ते वर्णाः प्रचयापचयस्पृशः ।
एवं चाभिभवोऽप्येषां स्वतो नास्ति परस्परम् ॥ २२८ ॥§ 4171

मरुद्भिरभिभूयन्ते मारुता इव दुर्बलाः ।
तेजोभिरिव दीप्तांशोः दिवा दीपप्रभादयः ॥ २२९ ॥§ 4173

### श्रोत्र-शब्दसंस्कारपक्षोऽप्यदुष्टः

द्वयसंस्कारपक्षोऽप्येवं समाहितो भवति, उभयेषामपि दोषाणामुत्सारणात् । तस्मात् प्रत्यभिज्ञाप्रत्ययप्रभावसिद्धनित्यत्वस्य शब्दस्य अभिव्यक्तिरेव साधीयसी ॥ § 4174

### शब्दनित्यत्वानित्यत्वपक्षयोः गौरवलाघवविमर्शः

इदं चालोच्यतामार्याः ! कार्याभिव्यङ्ग्यपक्षयोः ।
शब्दस्य ग्रहणे गुर्वी लघ्वी वा कुत्र कल्पना ? ॥ २३० ॥§ 4176

तथा हि भवन्तः, वैशेषिकाः, सांख्याः; जैनाः, सौगताश्च कार्यशब्दवादिनः । चार्वाकास्तु वराकाः, कस्यैवंविधासु गोष्ठीषु स्मृतिपथमुपयान्ति ! § 4177

संस्कारानुकृतेः सोऽपि महत्त्वाद्यवबुध्यतेश्लो. वा. १-१-५. स्फोट. ४०यो हि वैशेषिकः गकारादिषु व्यक्ति-जातिभेदमिच्छति, सोऽपि शब्देषु महत्त्वाल्पत्वयोः गुणतां नाभ्युपैति, निर्गुणत्वात् गुणानां, शब्दस्य च गुणत्वात् । अतः यथा तत्राविद्यमानमेव महत्वादिकं ध्वनिसंस्कारानुसारिण्या बुध्या गृह्यते, तथा द्रुतत्वादिकमपि इत्यादिवार्तिकव्याख्यानयोरुक्तं स्मरन्नाह—य-

द्वेत्यादि ॥ § 4178

वार्तिके १-१-६-८८ प्रतिपादितं विचारमुपक्षिपति—इदमिति । पक्षद्वये प्रतिप्रादितयोः शब्दग्रहणप्रकारयोः कुत्र कल्पनालाघवगौरवे ? § 4179

I.534/KSV

## नैय्यायिकवैशेषिकमतयोः शब्दग्रहणप्रकारानुवादः

तत्र भवतां, वैशेषिकाणां च शब्दस्य श्रवणे तावदेषा तुल्यैव कल्पना । संयोगाद्वा विभागाद्वा शब्द उपजायते । जातश्चासौ तिर्यगूर्ध्वमधश्च सर्वतोदिक्कानि कदम्बगोलककारेण सजातीयनिकटदेशानि शब्दान्तराण्यारभते, तान्यपि तथेत्येवं वीचीसन्तानवृत्त्यारम्भप्रबन्धप्राप्तोऽन्त्यः श्रोत्राकाशजन्मा शब्दः तत्समवेतस्तेनैव गृह्यते इति ॥ § 4180

## वीचीतरङ्गन्यायेन शब्दात् शब्दान्तरोत्पत्तिरित्यस्य निरासः

तदियं तावदतिघर्घरा कल्पना ॥ § 4181

शब्दः शब्दान्तरं सूत इति तावदलौकिकम् ।
कार्यकारणभावो हि न दृष्टस्तेषु बुद्धिवत् ॥ २३१ ॥§ 4183

जन्यन्तेऽनन्तरे देशे शब्दाः स्वसदृशाश्च ते ।
तिर्यगूर्ध्वमधश्चेति केयं वः श्रद्दधानता ? ॥ २३२ ॥§ 4185

शब्दान्तराणि कुर्वन्तः कथं च विरमन्ति ते ?
न हि वेगक्षयस्तेषां मरुतामिव कल्प्यते ॥ २३३ ॥§ 4187

कुड्यादिव्यवधाने च शब्दस्याकरणं कथम् ?
व्योम्नः सर्वगतत्वाद्धि कुड्यमध्ये व्यवस्थितिः ॥ २३४ ॥§ 4189

भवतामिति । आदिमत्त्वादैन्द्रियकत्वात् न्या. सू. २-२-१३ इत्यादिसूत्रभाष्यवार्तिकादिष्विदमुपपादितम् । वृत्त्यारम्भः—विस्तरारम्भः । तत्समवेतेन—श्रोत्रसमवेतेन ॥ § 4190

निरस्तश्चायं शब्दसन्तानः ज्ञानसन्ताननिराकरणन्यायेनन्या. र. १-१-६-९५ इत्युक्तं स्मरन्नाह—बुद्धिवदिति । मरुतामिवेति । वायोर्द्रव्यत्वेन वेगादिकमुपपद्यते, न तु गुणस्य शब्दस्य ॥ § 4191

---

४ ] वैशेषिकाणां— nyāma-wit_kha
५ ] संयोगात्— nyāma-wit_kha
१२ ] शब्दैः— nyāma-wit_kha
१३ ] वा— nyāma-wit_kha
१५ ] कल्पते— nyāma-wit_kha
१६ ] वरणं— nyāma-wit_kha

I.535/KSV

अथावरणात्मककुड्यादिद्रव्यसंयोगरहितमाकाशं शब्दजन्मनि समवायिकारणमिष्यते, तदत्र प्रमाणं विशेषे वक्तव्यम् ॥ § 4192

तुल्यारम्भे च तीव्रेण मन्दस्य जननं कथम् ?
श्रूयते चान्तिकात्तीव्रः शब्दो मन्दस्तु दूरतः ॥ २३५ ॥§ 4194

वीचीसन्तानतुल्यत्वमपि शब्देषु दुर्वचम् ।
मूर्तिमत्त्वक्रियायोगवेगादिरहितात्मसु ॥ २३६ ॥§ 4196

### शब्दो द्रव्यमेव, न गुणः

यदप्युच्यते—सजातीयजनकः शब्दः गुणत्वात्, रूपादिवदिति—तदिदमसिद्धमसिद्धेन साध्यम्, गुणत्वस्यासिद्धत्वात् ॥ § 4197

न शब्दः पारतन्त्र्येण कदाचिदुपलभ्यते ।
द्रव्यस्थ इव रूपादिरतोऽस्य गुणता कुतः ? ॥ २३७ ॥§ 4199

अपि च— § 4200

न शब्दान्तरारम्भकः शब्दो गुणत्वात् रूपवत् । शब्दं नारभते शब्दः शब्दत्वाच्छ्रोत्रशब्दवत् ॥ § 4201

न संयोगविभागौ शब्दस्य जनकौ, संयोगविभागत्वात्, अन्यसंयोगविभागवदित्यादयः प्रतिहेतवोऽप्यत्र सुलभा इति यत्किञ्चिदेतत् ॥ § 4202

विशेषे—आकाशमात्रं न कारणं, किन्तु आकाशविशेष इत्यत्र । तुल्यारम्भ इति । कारणतुल्येन हि कार्येण भाव्यम् । क्रियायोगः—क्रियावत्त्वम् ॥ § 4203

पारतन्त्र्येणेति । परतन्त्रैकस्वभावत्वं गुणलक्षणम् । रूपवदिति । आरम्भवाद एव हि कारणगतरूपं कार्यगतरूपजनकम् । मीमांसकास्तु अवस्थाभेदवादिनः । तन्तुगुणा एव हि तन्तुषु पटीभूतेषु पटगुणतां भजन्ते न्या-र-१-१-६-१०३ इति ह्युक्तम् । अतः रूपमपि न रूपान्तरजनकम् । तथा च दृष्टान्त एवासिद्धः । प्रत्यनुमानमप्याह—शब्दमिति । शब्दं नारभते शब्दः शब्दत्वात् अन्त्यशब्दवत् १-१-६-१०५ इति वार्तिकसदृशं वाक्यमिदम् । अन्यसंयोगविभागवत्—तन्त्वादिसंयोगविभागवत् ॥ § 4204

I.536/KSV

### साङ्ख्योक्तशब्दग्रहणप्रकारदूषणम्

कापिलास्तु ब्रुवते—श्रोत्रवृत्तिः शब्ददेशं गच्छति, सा शब्देन विक्रियत इति—तत्र श्रोत्रस्य व्यामिश्रत्वान्निकटदेशेनैव शब्देन तद्वृत्तिर्विक्रियते, न दूरदेशेनेत्यत्र को नियमः ? नियमाभावाच्च कान्यकुब्जप्रयुक्तो गोशब्दः गौरमूलकेऽपि श्रूयेत । अमूर्ता च श्रोत्रवृत्तिः प्रसरन्ती न मूर्तैः कुड्यादिभिरभिहन्तुं शक्यत इति व्यवहितस्यापि शब्दस्य श्रवणं स्यात् ॥ § 4205

वायौ शब्दानुकूले च न तस्य श्रवणं भवेत् ।
गच्छन्त्याः प्रतिकूलो हि श्रोत्रवृत्तेः स मारुतः ॥ २३८ ॥§ 4207

दूरेऽपि अनुवातं शब्दस्य श्रवणं यद्दृष्टं, प्रतिवातं च निकटेऽपि यदश्रवणं, तदस्मिन् पक्षे विपरीतं स्यात् ॥ § 4208

वृत्तिवृत्तिमतोर्भेदो नास्तीतीन्द्रियवद्भवेत् ।
व्यापिका वृत्तिरित्येवं कथं सर्वत्र न श्रुतिः ॥ २३९ ॥§ 4210

## जैनोक्तशब्दग्रहणप्रकारदूषणम्

आर्हतास्त्वादुः—सूक्ष्मैः शब्दपुद्गलैरारब्धशरीरः शब्दः स्वप्रभवभूमेः निष्क्रम्य प्रतिपुरुषं कर्णमूलमुपसर्पतीति—तदेतदतिसुभाषितम्— § 4211

वर्णस्यावयवाः सूक्ष्माः सन्ति केचन पुद्गलाः ।
तैर्वर्णोऽवयवी नाम जन्यते पश्य कौतुकम् ॥ २४० ॥§ 4213

तेषामदृश्यमानानां कीदृशो रचनाक्रमः ।
केन तत्सन्निवेशेन कः शब्द उपजायताम् ? ॥ २४१ ॥§ 4215

सा—श्रोत्रवृत्तिः । वृत्तेः विषयसमानाकारतापत्तिमेव प्रमाणं मन्वते ते । व्यामिश्रत्वात्—सर्वसम्बन्धत्वात् । आकाशाप्यायनकृतैव हि वृत्तिः, आकाशश्च सर्वसम्बद्ध एव । गौरमूलकं—ग्रन्थकारग्रामनाम । शब्दानुकूले— शब्दग्रहणायानुकूले । उक्तमुपपादयति—दूरेऽपीति । शब्दोत्पत्तिदेशात् पुरुषदेशाभिमुखतया वायौ आगच्छति शब्दस्य शीघ्रश्रवणं, विपरीते वैपरीत्यं च दृश्यते । यदा च श्रोत्रवृत्तिः शब्ददेशं गच्छति, तदा श्रोत्रवृत्तेः तदभिमुखत्वात् व्याहतिः, बिलम्बश्च स्यादेव । ततश्च सर्वं विपरीतं स्यात् ॥ § 4216

**I.537/KSV**

लघवोऽवयवाश्चैते निबद्धा न च केनचित् ।
न चैनं कठिनं कर्तुं वर्णावयविनं क्षमाः ॥ २४२ ॥§ 4218

कृशश्च गच्छन् स कथं न विक्षिप्येत मारुतैः ।

दलशो वा न भज्येत वृक्षाद्यभिहतः कथम् ? ॥ २४३ ॥§ 4220

प्रयाणकावधिः कश्च गच्छतोऽस्य तपस्विनः ।
एकश्रोत्रप्रविष्टो वा स श्रूयेतापरैः कथम् ? ॥ २४४ ॥§ 4222

निष्क्रम्य कर्णादेकस्मात् प्रवेशः श्रवणान्तरे ।
यदीष्येत कथं तस्य युगपद्बहुभिः श्रुतिः ॥ २४५ ॥§ 4224

श्रोतृसंख्यानुसारेण न नानावर्णसंभवः ।
वक्तुस्तुल्यप्रयत्नत्वात् श्रोतृभेदतदैक्ययोः ॥ २४६ ॥§ 4226

तदलं परिहासस्य महतो हेतुभूतया ।
नग्नक्षपणकाचार्यप्रज्ञाचातुर्यचर्चया ॥ २४७ ॥§ 4228

## बौद्धोक्तशब्दग्रहणप्रकारदूषणम्

शाक्यप्रायास्त्वाचक्षते—अप्राप्त एव शब्दः श्रोत्रशक्त्या गृह्यत इति—तदेतदतिव्यामूढभाषितम्—अप्राप्तितुल्यतायां दूरव्यवहितादीनामश्रवणकारणाभावात् । प्राप्यकारिताख्यकर्मधर्माप्रसङ्गाच्च । न च चार्वाकवदपरीक्षित एवायमर्थ उपेक्षितुं युक्तः ॥ § 4229

इति कार्यत्वपक्षेऽमूः श्रुतास्तार्किककल्पनाः ।
अथाभिव्यक्तिपक्षेऽस्य शृणु श्रोत्रियकल्पनाम् ॥ २४८ ॥§ 4231

## शब्दनित्यत्वपक्षे लाघववर्णनम्

विवक्षापूर्वकप्रयत्नप्रेर्यमाणस्तावद्वेगवत्तया क्रियावत्तया च कौष्ठ्यो बहिर्निस्सरति समीरण इति सुस्पष्टमेतत् । प्रत्यक्षनिकटपवनवादिनां पक्षे पवनसमये वक्तृवदननिकटनिहितहस्तस्पर्शेनैव § 4232

प्रत्यक्षनिकटपवनवादिनां—त्वक्सन्निकृष्टपवनप्रत्यक्षत्ववादिनामित्यर्थः ॥ § 4233

I.538/KSV

स उपलभ्यते । अनुमेयमारुतपक्षेऽपि तदानीमास्यसमीपसन्निधापिततूलककर्मणा सोऽनुमीयते ॥ § 4234

---

७ ] श्रोतृभेदे तदत्यये— nyāma-wit_kha
११ ] अप्रास्या— nyāma-wit_kha
१७ ] प्रत्यक्ष— nyāma-wit_kha

स गच्छन् सर्वतोदिक्कः स्तिमितानिलनोदनम् ।
करोति, कर्णाकाशे च प्रयाति श्रुतियोग्यताम् ॥ २४९ ॥§ 4236

स च प्रयत्नतीव्रत्वमन्दत्वेन तदात्मकः ।
शब्दे तथाविधज्ञप्तिहेतुतामवलम्बते ॥ २५० ॥§ 4238

स चैष गच्छन्नुद्दामवेगयोगाहितक्रियः ।
शरवद्वेगशान्त्यैव न दूरं गन्तुमर्हति ॥ २५१ ॥§ 4240

स मूर्तः प्रसरन्मूर्तैः अपरैः प्रतिबध्यते ।
कुड्यादिभिरतो नास्य श्रुतिर्व्यवहितात्मनः ॥ २५२ ॥§ 4242

स वेगगतियोगित्वात् आगच्छति यतो यतः ।
श्रोता ततस्ततः शब्दं आयान्तमभिमन्यते ॥ २५३ ॥§ 4244

स तु शङ्खादिसंयोगप्रेर्यमाणः समीरणः ।
शब्दस्यावर्णरूपस्य भवति व्यक्तिकारणम् ॥ २५४ ॥§ 4246

शब्दो यद्यपि वर्णात्मा श्रोत्रग्राह्यो न विद्यते ।
तथाऽपि तत्र शब्दत्वं श्रवणेन ग्रहीष्यते ॥ २५५ ॥§ 4248

तदिह न कदाचिदस्माभिरधिका कल्पना कृता, मारुतगतेरस्याः सर्वलोकप्रसिद्धत्वात् । कर्णाकाशसंस्कारमात्रमदृष्टं कल्पितम् । तदपि कार्यार्थापत्तिगम्यत्वान्नापूर्वमिति ॥ § 4249

तदात्मकः—तीव्रमन्दात्मकः । मूर्तः—शब्दो हि द्रव्यम् । यतो यतः —यद्यद्दिशः । अवर्णरूपस्य—ध्वनिरूपस्य । शब्द इति । ध्वनिपदवाच्यः नाद एव श्रोत्रग्राह्यः । तदारूढत्वात् कौष्ठ्यमारुताभिव्यक्तः वर्णोऽपि श्रोत्रग्राह्य इवाभाति इति वार्तिकतद्व्याख्ययोः स्पष्टम् १-१-६. २२३-२२४ । द्विविधो हि शब्दः—वर्णः ध्वनिश्च । द्वयोरनुगतं शब्दत्वम् । वर्णत्वं ध्वनित्वं च तत्सामान्ये । वर्णविशेषाः गकारककारादयः, ध्वनिविशेषाः शङ्खघोषादयः । ध्वन्यात्मकश्च शब्दः वायुगुणः । स एव च वर्णात्मकानां ककारादीनामभि

अपक्षपातिनः सभ्याः सत्यमुत्पत्त्यपेक्षया ।
शब्दस्य कल्पनामाहुः अभिव्यक्तौ लघीयसीम् ॥ २५६ ॥§ 4252

१३ ] यद्वा— nyāma-wit_kha
१३ ] अवर्णात्मा— nyāma-wit_ka
२५ ] पतिताः— nyāma-wit_ka

तदेवमभिव्यक्तिपक्षे नियतग्रहणोपपत्तेः प्रत्यभिज्ञाप्रत्ययप्रामाण्यात् नित्यत्वमेवोपगन्तव्यम् ॥

## सोऽयंगकार इत्यादिप्रत्यभिज्ञायाः अनन्यथासिद्धत्वम्

या त्वनैकान्तिकत्वोक्तिः धीकर्मप्रत्यभिज्ञया ।
प्रत्यक्षे चोद्यमानाऽसौ दर्शयत्यतिमूढताम् ॥ २५७ ॥§ 4254

व्यञ्जकः । स च कदाचित् वर्णरहितः केवलो गृह्यते शङ्खघोषादिषु, कदाचित् वर्णानभिव्यञ्जयन् तदुपश्लिष्टः प्रतीयते श्लो. वा. व्या. १-१-५ स्फोठ ३९ इति पार्थसारथिवाक्यान्यपि अत्राबधेयानि ॥ § 4255

बुद्धि-कमर्णी अपि प्रत्यभिज्ञायेते । ते अपि नित्ये प्राप्नुतः । नैष दोषः । न हि ते प्रत्यक्षे । अथ प्रत्यक्षे नित्ये एवशा. भा. १-१-६. २० इत्याद्यनुवदति—या त्विति । न हि ते प्रत्यक्षे । अथ प्रत्यक्षे नित्ये एव इति सिद्धान्तभाष्यस्याशयमाह—प्रत्यक्ष इति । शब्दस्तु प्रत्यक्षः । बुद्धिकर्मणी त्वतीन्द्रिये । अतश्च तत्र प्रत्यभिज्ञा न प्रत्यक्षरूपा, किन्तु अनुमानरूपैव वाच्या । कालद्वयविषयकमनुमानं भवितुमर्हत्येव । तथा च परोक्षेयं प्रत्यभिज्ञा न स्वदृष्टान्तेन शब्दविषयप्रत्यभिज्ञाप्रत्यक्षं बाधितुं समर्थम् । शब्दवदेव तयोरपि यदि स्यात् प्रत्यभिज्ञाप्रत्यक्षं, तदा स्यातां कामं ते अपि नित्ये—इति समाधानभाष्याशयः ॥ § 4256

कुमारिलस्तु—अथ प्रत्यक्षे, नित्ये एव इति भाष्यं प्रत्यक्षत्वमात्रं नित्यत्वापादनक्षमपरं भाति । तत्तु प्रत्यक्षे घटादौ नित्यत्वाभावात् व्यभिचरितम् । अतो भाष्यमिदं यथाश्रुततयाऽसम्बद्धमिव—इत्याक्षिप्य; नात्र प्रत्यभिज्ञया शब्दनित्यत्वं साध्यते, येन बुद्धिकर्मणोः व्यभिचारः स्यात् । किन्तु शब्दानित्यत्वे प्रत्यभिज्ञाविरोध एव । एवञ्च तर्हि बुद्धिकर्मणोरपि तथा प्रत्यभिज्ञानात् अनुभवसिद्धमनित्यत्वं विहाय नित्यत्वमेवाङ्गीकर्तव्यं स्यात् इति सिद्धान्तिसम्मतार्थन्तरदूषणे कृते, शब्दस्य प्रत्यक्षत्वात् तन्नित्यत्वमपि प्रत्यक्षमेव । अतस्तस्यानित्यत्वे उक्ते प्रत्यभिज्ञाविरोधः । बुद्धिकर्मणी तु

तेनानुमानदोषेण प्रत्यक्षं न हि दूष्यते ।
सिद्धान्तान्तरचिन्ता तु भवेत् भृशमसङ्गता ॥ २५८ ॥§ 4259

निर्बाधं प्रत्यभिज्ञानमस्ति चेत् बुद्धिकर्मणोः ।
तयोरप्यस्तु नित्यत्वं नो चेत् का शब्दतुल्यता ॥ २५९ ॥§ 4261

तस्मान्नित्यः प्रत्यभिज्ञाप्रभावात्

२ ] प्रत्यक्ष— nyāma-wit__ka

सिद्धः शब्दः पश्यतां तार्किकाणाम् ।
अर्थापत्तिः पूर्वमुक्ता च तस्मिन्
अस्थायित्वे युक्तयश्च व्युदस्ताः ॥ २६० ॥§ 4265

अस्ति च वेदे वचनं सिद्धामनुवदति यद्ध्रुवां वाचम् ।
तल्लिङ्गदर्शनादपि नित्यः शब्दोऽभिमन्तव्यः ॥ २६१ ॥§ 4267

शिक्षाविदस्तु पवनात्मकमेव शब्दं
आचक्षते तदसमञ्जसमप्रतीतेः ।
अर्हन्मतप्रथितपुद्गलपर्युदास-
नीत्या च वाय्ववयवा अपि वारणीयाः ॥ २६२ ॥§ 4271

येऽपि स्थूलविनाशदर्शनवशाद्ब्रूयुः क्षणध्वंसिनः
भावांस्तेऽपि न शक्नुवन्ति गदितुं शब्दस्य विध्वंसिताम् ।
अन्ते हि क्षयदर्शनात् किल तथा तेषां भ्रमोऽस्मिन् पुनः
शब्दे नान्तपरिक्षयाविति कथं कुम्भादिवद्भङ्गिता ? ॥ २६३ ॥§ 4275

स्वरूपतोऽनुमेये । अतश्च तयोर्नित्यत्वानित्यत्वेऽपि अनुमानविचार्ये एव । अतस्तद्दृष्टान्तोऽत्र विषमः इति सिद्धान्तभाष्याशयः—इति व्याख्यातवान् श्लो. वा. १-१-६-३७५—३७८, ३८९—३९२ । स एष वृथा क्लेशः, अस्मदुक्तरीत्या सुव्याख्यत्वादित्याह—सिद्धान्तान्तरेति । सिद्धान्तान्तरं— सिद्धान्तिसम्मतमर्थान्तरमित्यर्थः ॥ § 4276

पश्यतां तार्किकाणां इत्यनादरे षष्ठी उपहासार्था ॥ § 4277

लिङ्गदर्शनाच्चजै. सू. १-१-६-२३ इति सूत्रभाष्योक्तमनुवदति— अस्ति च वेद इति । वाचा विरूपनित्यया इति वचनं विवक्षितम् ॥ § 4278

प्रख्याभावाच्च योगस्यजै. सू. १-१-६-२२ इति सूत्रभाष्योक्तमनुवदति—शिक्षाविद इति ॥ § 4279

I.541/KSV

## —शब्दानित्यत्वसिद्धान्तः—

### शब्दनित्यत्वे प्रत्यक्षार्थापत्त्योरप्रमाणत्वप्रतिज्ञा

अत्र ब्रूमहे—न खलु भवदभिहितमेत् प्रमाणद्वयमपि शब्दनित्यतां प्रसाधयितुमर्हति ॥ § 4280

४ ] सिद्ध— nyāma-wit__ka

## अर्थापत्त्या शब्दनित्यत्वसिद्धिदूषणम्

यावता यदर्थापत्तिरवादि पु. ५१७—दर्शनस्य परार्थत्वादिति—सा क्षीणैव, अर्थप्रतीतेरन्यथाऽप्युपपन्नत्वात् ॥ § 4281

## गत्वादिजातिद्वारैव शक्तिग्रहः बोधश्च

तत्र सादृश्यमप्यनभ्युपगतमेव दूषित पु. ५१८ मित्यस्थाने क्लिष्टा भवन्तः ॥ § 4282

गत्वादिजातीराश्रित्य सम्बन्धग्रहणादिकः ।
अर्थावगतिपर्यन्तः व्यवहारः प्रसेत्स्यति ॥ २६४ ॥§ 4284

## गत्वादिजातिसिद्ध्यसिद्ध्यधीनत्वं शब्दानित्यत्वनित्यत्वयोः

ननु गत्वं प्रतिक्षिप्तं एतदेव परीक्ष्यताम् ।
अस्मिन् समाप्यते वादः मर्मस्थानमिदं च नः ॥ २६५ ॥§ 4286

प्रतिक्षिप्ते च गत्वादौ नार्थसंप्रत्ययोऽन्यथा ।
प्रत्यभिज्ञानभूमिश्च नान्याऽस्तीति वयं जिताः ॥ २६६ ॥§ 4288

सिद्धे तु गत्वसामान्ये तत एवार्थवेदनम् ।
तदेव प्रत्यभिज्ञेयमिति यूयं पराजिताः ॥ २६७ ॥§ 4290

अन्यथा—शब्दनित्यत्वमन्तराऽपि । नित्यत्वाङ्गीकारेऽपि हि यावद्बोधं शब्दः श्रोत्रे परिचङ्क्रममाणो न ह्यनुभूयते ॥ § 4291

प्रतिक्षिप्त इत्यादि । अन्यस्मिन् गोशब्दे शक्तिग्रहः, अन्यस्माच्च बोध इत्यनुपपत्तिः गत्वादिजातिमूलैव परिहरणीया । तथा सोऽयं गकारः इति प्रत्यभिज्ञाऽपि साजात्यमूलैव हि निर्वाह्या । प्रत्यभिज्ञेयं—प्रत्यभिज्ञाविषयः ॥ § 4292

I.542/KSV

तेनान्यत्सर्वमुत्सृज्य वादस्थानकडम्बरम् ।
गत्वादिजातिसिद्ध्यर्थमथातः प्रयतामहे ॥ २६८ ॥§ 4294

## गत्वस्य जातित्वसाधने उपोद्घातरचनम्

८ ] धर्म— nyāma-wit_ka

तत्रेदं विचार्यताम्—य एष गकारभेदप्रतिभासः, स किं व्यञ्जकभेदकृतः ? उत वर्णभेदविषयः ? इति ॥ § 4295

व्यञ्जकभेदकृते तस्मिन् एकत्वाद्गकारस्य किंवृत्ति गत्वसामान्यंस्यात् ? § 4296

वर्णभेदविषयत्वे तु तद्भेदसिद्धेरभेदप्रत्ययस्य विषयो मृग्य इति तद्ग्राह्यमपरिहार्यं गत्वसामान्यम् ॥ § 4297

## गकारादिभेदप्रतिभासः न व्यञ्जकभेदकृतः

तदुच्यते—नायं व्यञ्जकभेदकृतः गकारभेदप्रत्ययः । यदि हि व्यञ्जकभेदाधीन एष भेदप्रतिभासः, तर्हि यरलवादिवर्णभेदप्रत्ययोऽपि तत्कृत एव किमिति न भवति ? ततश्च सकलवर्णविकल्पातीतमेकमनवयवं शब्दब्रह्म वैयाकरणवदभ्युपगन्तव्यम् ॥ § 4298

## यरलवादिभेदवत् गकाराणामप्युच्चारणभेदात् भेद एव

अथ मनुषे—यरलवादीनामितरेतरविभक्तस्वरूपपरिच्छेदाद्विषयभेदकृत एव भेदप्रत्ययः, नोपाधिनिबन्धन इति—तर्हि गङ्गागगनगर्गादौ गकारभेदप्रतिभासोऽप्येष न व्यञ्जकभेदाधीनो भवितुमर्हति, तत्रापि परस्परविभिन्नगकारस्वरूपप्रतिभासात् । शुकसारिकामनुष्येषु हि वक्तृभेदे सति व्यञ्जकनानात्वसंभावनया § 4299

एकत्वादिति । बहूनामनुगमाय किल जातिः । अत एव एकव्यक्तिवृत्तेर्न जातित्वम् ॥ § 4300

तद्ग्राह्यं—अभेदग्रहविषयः । सैवेयं दीपज्वाला इत्यादिः दृष्टान्तः ॥ § 4301

ननु उक्तमेवासकृत् शब्दो यद्यपि वर्णात्मा श्रोत्रग्राह्यो न विद्यते पु ५३८ इति, इतिचेत्तत्राह—ततश्चेति । ततश्च स्पोटनिरासस्तव अर्थरहित एव ॥ § 4302

I.543/KSV

वर्णभेदप्रत्ययस्य तत्कृतत्वं काममाशङ्क्येतापि । वक्त्रेकत्वे तु गगनादौ कुतः तत्कृतो भेदः ? § 4303

## गकाराणामुच्चारणभेदौपाधिकः भेद इत्यपि न युक्तम्

ननु ! तत्रापि मरुतो भिन्ना एव व्यञ्जकाः, मुखं त्वेकं भवतु ! किं तेन ? तदपि वा भिन्नमित्येके । उच्यते—स तर्हि मरुतां भेदः यरलवादिष्वपि तुल्य इति मा भूत्तेषामपि भेदः ॥ § 4304

१ ] एव— nyāma-wit_kha
९ ] शब्दतत्त्वं— nyāma-wit_kha
११--१४ ] प्रतिभासात्—

nyāma-wit_kha

## यरलवादिभेदाभावेऽपि गकारद्वयभेदः घटद्वयभेदवत् प्रत्यक्षसिद्धः

ननु ! यरलवानां विशेषप्रतीतिरस्ति, गकारे तु सा नास्तीत्युक्तं, पु. ५३५ उच्चारणस्यैव तत्र भेदः, नोच्चार्यस्येति । नैतत् सारम्— मा भूदेष विशेष इति प्रतीतिः, भेदबुद्धिस्तु विद्यत एव । अन्या च विशेषबुद्धिरुच्यते, अन्या च भेदबुद्धिरिति । विशेषाप्रतिभासेऽपि क्वचिद्विच्छेदप्रतीतिविशेषात् ॥ § 4305

## जात्यैक्येऽपि व्यक्तिभेदः गृह्यत एव

ननु ! अत्रोच्यते पु ५२१— § 4306

दृश्यते शाबलेयादिव्यक्त्यन्तरविलक्षणा ।
बाहुलेयादिगोव्यक्तिः तेन भेदोऽस्ति वास्तवः ॥ २६९ ॥§ 4308

गगनादौ—गगनपदादौ । तत्र हि गकारद्वयं एकेनैवोच्चरितम् । तत्कृतः—व्यञ्जकभेदकृतः ॥ § 4309

भिन्ना मरुत इति । प्रत्युच्चारणं व्यञ्जकावायवाः भिद्यन्त एव । तदपि—मुखमपि । यादृशसन्निवेशविशेषविशिष्टोऽवयवसमुदायात्मा मुखपदवाच्यः शब्दमभिव्यञ्जयति, तादृशसन्निवेशविशेषाः प्रत्युच्चारणं भिद्यन्त एव हि ॥ § 4310

एष विशेष इति । गकारद्वयश्रवणे यरलवानां श्रवण इव अत्रायं विशेषः इति विशेषस्य सुनिरूपत्वाभावेऽपि समानयोर्घटयोरिव व्यक्तिभेदप्रतीतिस्तु वर्तत एव । किञ्चित्साजात्यं तु शषसानामप्यस्त्येव । अन्येति । विशेषो हि व्यावर्तकाकारः घटत्वपटत्वादिः । भेदस्तु घटयोरपि विद्यमानः तद्व्यक्तित्वरूपः ॥ § 4311

I.544/KSV

न तु द्रुतादिभेदेन निष्पन्ना संप्रतीयते ।
गव्यक्त्यन्तरविच्छिन्ना गव्यक्तिरपरा स्फुटा ॥ २७० ॥§ 4313

इति—नैतद्युक्तम्—शाबलेयादौ प्रतिव्यक्ति सास्नाखुरककुदाद्यवयववर्तिनो विशेषाः प्रतिभासन्ते । ते च स्थूलत्वात् सुगमा भवन्ति । यत्र तु तिलतण्डुलकुलत्थादौ प्रतिसिक्थं विशेषा न प्रतिभासन्ते, तत्र विशेषप्रतीत्यभावेऽपि विच्छेदप्रतिभासो विद्यत एव, सिक्थात् सिक्थान्तरत्वेन प्रतिभासात् । एवमिहाप्येष गकारविशेष इति प्रतिभासाभावेऽपि विच्छेदग्रहणात् गकारनानात्वम् ॥ § 4314

## व्यक्तिभेदग्रहणे असाधारणाकारापेक्षाऽपि नास्ति

---

४ ] दर्शनात्— nyāma-wit_kha

ननु ! तण्डुलादावपि सिक्थात् सिक्थान्तरे विशेषाः प्रतिभासन्त एव । तदप्रतिभासे भेदस्यापि ग्रहीतुमशक्यत्वात्—मैवं वादीः—यत्ने सति चतुरश्रत्रिकोणवर्तुलत्वादिविशेषा अप्यमुत्र प्रतिभासिष्यन्ते । एवं गकारेष्वपि । प्रयत्नं विनाऽपि तु प्रथमाक्षनिपात एव विच्छेदबुद्धिरुत्पद्यत इति तयैव नानात्वसिद्धिः ॥ § 4315

## असाधारण्यग्रहणाभावेऽपि भेदग्रहणोपपत्तिः

ननु ! नैवानधिगतविशेषस्य विच्छेदबुद्धिरुत्पत्तुमर्हतीति विशेषबुद्धिरेव विच्छेदबुद्धिः—नैतदेवम्—भ्रमणादिकर्मक्षणानां सूक्ष्मविशेषाप्रतिभासेऽपि विच्छेदप्रतिभासात् ॥ § 4316

गव्यक्तिः—एको गकारः । सिक्थं—अपक्वः पुलाकः । स्थालीपुलाकवत् इत्यादौ द्रष्टव्यम् । प्रतिसिक्थं—तण्डुलानामेव परस्परम् ॥ § 4317

विशेषाः—तत्तद्व्यक्त्यसाधारणाः आकाराः । एतादृशा विशेषाः गकारेष्वपि परस्परं सन्त्येव सूक्ष्ममतिग्राह्याः । नेदानीमस्मामिरिदमुच्यते । तण्डुला हि दर्शनमात्रेणैव पृथक्पृथग्भिन्ना एवोपलभ्यन्ते; न तु सर्वे तण्डुला एकत्वेनेति समाधत्ते—यत्ने सतीति ॥ § 4318

भ्रमणादीति । भ्रमणरेचनस्पन्दनोर्ध्वज्वलनतिर्यक्पतननमनोन्नमनादयः गमनविशेषाः, न जात्यन्तराणि प्र-भा-कर्म इति भ्रमणादीनां परस्परभेदप्रतीतिः दृष्टैव ॥ § 4319

I.545/KSV

## तद्व्यक्तित्वरूपविशेषस्तु गकारद्वयेऽप्यस्त्येव

ननु ! तत्रापि विशेषग्रहणं कल्प्यते, अन्यथा विच्छेदप्रतीत्यनुपपत्तेः । यद्येवं वर्णेष्वपि गगनादौ विच्छेदप्रतीतिदर्शनात् कल्प्यतां विशेषग्रहणम् ॥ § 4320

## गकारद्वयगततद्व्यक्तित्वस्यानौपाधिकत्वम्

ननु ! अस्त्येव तत्, किन्त्वौपाधिकं स्फटिके रक्तताप्रत्ययवत्— विषमो दृष्टान्तः । स्फटिकस्य शुद्धस्य दृष्टत्वाल्लाक्षाद्युपाधिनिमित्तको भवतु रक्तताप्रत्ययः । वर्णानां तु नित्यमेवोदात्तादिविशेषवतां प्रतिभासात्, तद्रहितानामनुपलब्धेश्च नैसर्गिक एवायं भेदः । तद्यथा बुद्धीनां घटपटादिविषयविशेषशून्यानामसंवेदनात् प्रतिविषयं नानात्वं, तथा वर्णानामपि प्रत्युदात्तादिविशेषं

४ ] प्रथमाक्षर— nyāma-wit__ka
७ ] भेद— nyāma-wit__ka
१८ ] विच्छिन्न— nyāma-wit__ka

नानात्वम् । न च बुद्धिरेकैव नित्या च, विषयभेदोपाधिनिबन्धनस्तद्भेद इति साम्प्रतम्—स्वयमेव बुद्धिजन्म प्रत्यक्षम् जै. सू. १-१-५ इत्यभिधानात् । अस्माभिश्च बुद्धिनित्यताया उपरिष्टान्निराकरिष्यमाणत्वात् ८ आह्निके ॥
§ 4321

विषयभेदाच्च तद्भेदाभिधाने विषयस्यापि कुत इदानीं भेदः ? बुद्धिभेदादिति चेत्—इतरेतराश्रयप्रसङ्गः । तदिमाः स्वत एव भेदवत्यो बुद्धयः, विषयाणामपि स्वत एव भेदो भवति; स तु बुद्धिभिः ज्ञायत इत्यलमर्थान्तरगमनेन ॥ § 4322

ननु भ्रमणरेचनयोः गतिभेदरूपविशेषग्रहणमस्त्येवेति चेत्, गकारेऽपि प्रत्युच्चारणं तथाविशेषः भासत एवेत्याह—तत्रापीत्यादि ॥ § 4323

औपाधिकं—उच्चारणभेदप्रयुक्तव्यञ्जकवायुभेदाधीनम् । असंवेदनात्—अननुभवात् ॥ § 4324

इदानीं—विषयभेदस्यानिर्णयकाले ॥ § 4325
I.546/KSV

## शुक्लादिगुणभेदवत् गकारादिभेदः

यथा च शुक्लगुणस्य भास्वरधूसरादिभेदवतो नानात्वं, तथा वर्णस्याप्युदात्तादिभेदवतः । शुक्लगुणोऽप्येक एव, आश्रयभेदात्तु तद्भेद इति चेत्; अहो रससमारूढो भट्टः ! § 4326

कर्मैकं बुद्धिरप्येका जगत्येकः सितो गुणः ।
तच्चैतन्नित्यमित्येताः स्त्रीगृहे कामुकोक्तयः ॥ २७१ ॥§ 4328

## गकारभेदाभावे आत्मभेदोऽपि न स्यात्

अपि च एकात्मवादोऽप्येवमेवावतरेत्, सुखिदुःख्यादिभेदस्य शरीरभेदेनाप्युपपत्तेः । अद्वैतस्य च नातिदवीयानेष पन्था इत्यलमलीकविकत्थनेन ॥ § 4329

तस्मात् बुद्ध्यादिवत् सर्वदा सविशेषाणामेव वर्णानां ग्रहणान्नानात्वम् ॥
§ 4330

## गगनपदादिषु अज्ुपश्लेषभेदाधीनः गकारभेदः न वक्तुं शक्यः

२२ ] रक्तता— nyāma-wit_kha
१ ] ननु— nyāma-wit_ka
२ ] शान्तम्— nyāma-wit_ka
७ ] स च— nyāma-wit_kha
१८ ] तैश्च— nyāma-wit_kha

तत्रैतत्स्यात्—गगनादावकारोपश्लेषकृत एव भेदप्रत्ययः, न स्वरूपभेद इति पु. ५२२—तदयुक्तम्—अकारस्यापि भवन्मते § 4331

भास्वरधूसरेति । शुक्लरूपवतोः द्वयोः पटयोः भेदे दृष्टे तद्गतशुक्लगुणस्यापि दृश्यमानः भेदः दुरपह्नवः । न च शुक्लरूपे भेद एव नास्ति; अन्ततः दीप-पट-गतयोर्वा शुक्लयोर्भेदावश्यम्भावात् । कामुकोक्तयः— अस्वाधीनबुद्धिकस्योक्तयः । कामुको हि स्त्रियं वशीकर्तुं स्वैरं प्रलपति पुण्यपापादिविभागादिकमपलपन् ॥ § 4332

अपि चेत्यादि । आत्मनां हि नानात्वं नित्यत्वं च आत्मवादे श्लो. १-१-५ स्थापितं तैरपि ॥ § 4333

गगनादौ—गगनं इत्यादिपदे । अकारस्यापीति । गोगुरुगेहादौ भिन्नाः स्वराः सन्ति, न तु गगनपदे इति भावः । अकारोपश्लेषमन्तरा

भेदाभावात् । अविद्यमाने च तदुपश्लेषे दिगजः, दिग्गज इति भेदेन प्रतिभासो भवत्येव । तथा च समदः—सम्मदः, पटः—पट्टः, आसनं—आसन्नं, मलः—मल्लः, अविकः—अविक्कः, पतिः—पत्तिः, पतनं— पत्तनं इत्यादावपि वर्णभेदप्रतीतिः । अर्थप्रतीतिभेदोऽपि दिगजदिग्गजादौ शब्दान्तरनिमित्तको भवितुमर्हति, न द्विरुच्चारणकृतः । ग्रन्थाधिक्यादर्थाधिक्यम्, नोच्चारणभेदात्; शतकृत्वोऽपि प्रयुक्ते गोशब्दे सास्नादिमदर्थव्यतिरिक्तवाच्यसंप्रत्ययाभावात् । तथा च दिग्गज इति द्विगकारको निर्देश इत्याचक्षते शब्दविदः, न द्विर्गकार उच्चारित इति ॥

**गकारादिभेदस्यौपाधिकत्वे घटादिभेदस्याप्यौपाधिकत्वापत्तिः**

ननु ! गोगुरुगिरिगेहादावज्भेदेऽपि गकारप्रत्ययानुवृत्तेरेक एवायं गकारः—मैवं वोचः—एष एव हि भेदप्रत्ययः अस्माभिरुपदर्शितः । विनाऽपि च अजुपश्लेषं दिग्गजादौ भेदप्रत्ययो वर्णितः । न च वयमभेदप्रत्ययमपह्नुमहे, किन्तु भेदप्रत्ययस्याप्यबाधितस्य भावात्, अनन्यथासिद्धत्वाच्च गवादिवत् सामान्यविशेषरूपतां ब्रूमः । व्यञ्जकभेदनिबन्धनत्वं तु यत्त्ववादावपि वक्तुं शक्यमित्युक्तमेव ॥ उच्चारणमेव न भवतीति नेत्याह—अविद्यमान इति । ननु दिग्गजः इत्यादावपि गकारस्य द्विरुच्चारणात् उच्चारणभेद एव, न तु वर्णभेद इति चेत्, तत्राह—अर्थप्रतीतिभेदोऽपीति । ग्रन्थः—गकाररूपः ॥ § 4334

गो-गुरु-गेहादिपदेषु अज्भेदात् भेदस्यानुभवसिद्धत्वमपि निराकरोति—नन्वित्यादिना । एष एवेत्युक्तं विवृणोति—विनाऽपीति । ननु स एवायं गकारः इत्यभेदप्रत्ययोऽप्यस्त्येवेति भेद एव कुतोऽन्यथासिद्धो न स्यादिति शङ्कायां, अस्ति प्रतीतिद्वयमपि । किन्तु भेदे सत्यभेदप्रतीतेः साजात्याद्यालम्बनत्वेनास्ति बहुला दृष्टान्ताः; न तथा अभेदे भेदप्रत्यये । अन्यथा गवादिष्वपि भेद औपाधिकः स्यादित्याह—न चेत्यादिना । सामान्यविशेषः—सामान्यं ह्यभिन्नम्, विशेषश्च भिन्न एव ॥ § 4335

I.548/KSV

अपि च शावलेयादिभेदप्रत्ययस्यापि व्यञ्जकभेदनिबन्धनत्वात् एक एवासौ स्यात् ॥ § 4336

### गोत्वगत्वजात्योरविशेषः

ननु ! तत्र को व्यञ्जकः, यद्भेदकृतः पिण्डभेदप्रत्यय इष्यते ? आह च श्लो. वा. १-१-५. स्फोट. ३६— § 4337

न पिण्डव्यतिरेकेण व्यञ्जकोऽत्र ध्वनिर्यथा ।
पिण्डव्यङ्ग्यैव गोत्वादिजातिर्नित्यं प्रतीयते इति ॥§ 4339

तदयुक्तम्—गोत्वजातेः गत्ववदिदानीं अविवादास्पदीभूतत्वात् । पिण्डभेदप्रत्ययस्य चक्षुर्व्यापारभेदादप्युपपत्तेः ॥ § 4340

### गकारादिभेदप्रतीतेः गवादिभेदप्रतीत्यविशेषः

ननु ! सकृदपि व्यापृतलोचनस्य परस्परविभक्तपिण्डप्रतिभासो भवति—मैवम्—तदानीं गोमात्रप्रतीतिः । एष शाबलेयः, एष बाहुलेयः इति तु विशेषग्रहणे चक्षुर्व्यापारभेदोऽपरिहार्यः ॥ § 4341

### प्रत्यक्षेणैव गवि गकारादौ च विशेषस्य ग्रहणम्

यदि च आद्यगोपिण्डभेदे प्रथमाक्षसन्निपातजा बुद्धिः सुभगतां गता—गकारभेदे तर्हि किं कृतमस्या दौर्भाग्यम् ? तत्रापि प्रथमश्रोत्रव्यापारवेलायामनवगतव्यञ्जकविभागस्यापि गगन-गङ्गादौ गकारभेदः प्रतिभासत एवेत्यलं प्रसङ्गेन ॥ § 4342

व्यञ्जकः—यथा शब्दे ध्वनिः । न पिण्डेति । अत्र—शब्दे । एवञ्च जातिव्यञ्जकस्य पिण्डस्याप्यभेदे भेदप्रतीतेरालम्बनमेव दुर्वचम् । अतः पिण्डैक्यमसम्भवि । तथा च शब्दनानात्वे पिण्डनानात्वं न दृष्टान्तीभवितुमर्हति इति भावः । उभयोर्भेदस्य प्रत्यक्षसिद्धत्वात् तावन्मात्रे दृष्टान्तत्वमित्याह—गोत्वजातेरिति ॥ § 4343

मात्र पदेन विशेषव्यावृत्तिः । सामान्यमगृहीत्वा विशेषः कथं गृह्येत ॥ § 4344

वस्तुस्थितिमनुसृत्याह—यदीत्यादि । सुभगतां—अबाधितताम् ॥ § 4345
I.549/KSV

१ ] गोः— nyāma-wit__ka
४ ] ना— nyāma-wit__ka
५ ] विवादा— nyāma-wit__kha

## गोत्वादिवत् गत्वादिसामान्यसाधनोपसंहारः

तदयं वस्तुसंक्षेपः—उपेक्ष्यतां वा सर्वत्र सामान्यविशेषव्यवहारः ! इष्यतां वा गोत्वादिवत् गकारभेदवृत्ति गत्वसामान्यम् ॥ § 4346

## अत्वादिकमपि गत्वादिवत् जातिरेव

अत्वमपि गत्ववदप्रत्याख्येयम्; इतरेतरविलक्षणानामकाराणां ह्रस्वदीर्घप्लुतादिभेदेन प्रतिभासात् । यः पुनः आकारेऽप्यकारप्रत्यभिज्ञानं ब्रूयात्, तस्य ईकारोकारप्रतीतिष्वपि अकारस्यैव ग्रहणप्रसक्तिः, अच्त्वाविशेषात् ॥ § 4347

अथ तदविशेषेऽपि अवर्णात् इवर्णस्य भेदः इष्यते, स तर्ह्याकारस्य न निह्नोतव्यः । एवञ्च सति अरण्यारण्यशब्दाभ्यां भिन्नार्थप्रतीतिरुपपत्स्यते ॥ § 4348

उदात्तानुदात्तस्वरितसंवृतविवृतादिभेदोऽपि शब्दविदां प्रत्यक्ष एव, गीतज्ञानामिव स्वरग्रामभाषाविभागः । तस्मात् अष्टादशभेदं § 4349

ह्रस्वदीर्घेति । अकारादयः प्रत्येकमष्टादशधा पूर्वमुक्ताः । यः पुनरिति । अयं च आकारः न अकारः दीर्घः, किन्तु तदतिरिक्त एवेत्याशयः वस्तुतस्तु—यद्यपि अकारस्यैव प्रभेदः आकारः पु. ५२२; तथाऽपि वर्णमालायां आकारस्य पृथग्ग्रहणात् आत्वं अत्वात् भिन्नमित्याशयः । ईकारेति । अकारस्यैवायं प्रपञ्चः सर्वेऽपि वर्णा इत्यविवादमेव । ओकारादौ अकार-उकारद्वयरूपत्वं प्रत्यक्षत एव सिद्धम् ॥ § 4350

एवं अकार-आकारयोर्भेदसाधनस्य फलमाह—एवञ्च सतीति ॥ § 4351

उदात्तेत्यादि । उदात्तादिभेदात् अर्थभेदः इन्द्रशत्रुपदादिषु स्पष्ट एव । इन्द्रस्य शत्रुरिति विवक्षायां हि अन्तोदात्तः, इन्द्रः शत्रुः यस्येति विवक्षायां तु आद्युदात्तः । ग्रामः—स्वरसमूहविशेषः ॥ § 4352

I.550/KSV

अकारमाचक्षते । अत्वं च तत्सामान्यं अवर्णकुलशब्देन व्यवहरन्तीति ॥ § 4353

## ह्रस्वदीर्घत्वादयो वर्णधर्मा एव, न ध्वनिधर्माः

यत्तु ध्वनिधर्मस्यापि दीर्घादेः अर्थप्रतिपत्त्यङ्गत्वं तुरगवेगवदुक्तम् पु. ५२३—तदप्यहृदयङ्गमम् । शब्दादर्थं प्रतिपद्यन्ते लोकाः, न मरुद्भ्यः ॥ § 4354

---

४ ] अकारे— nyāma-wit_kha nyāma-wit_kha
२२--२५ ] व्यवहरन्तीति—

अथ मरुतामपि तथा व्युत्पत्तेः अर्थप्रतीतिहेतुत्वं, तर्हि व्युत्पत्तिरेव प्रमाणं स्यात्, न शब्दः; व्युत्पत्तेरव्यभिचारात्, शब्दस्य च व्यभिचारात् इत्यास्तामेतत् ॥ § 4355

तस्मात् गत्वादिसामान्यैः अर्थसंप्रत्ययात्मनः ।
कार्यस्य परिनिष्पत्तेः न वर्णव्यक्तिनित्यता ॥ २७२ ॥§ 4357

## शब्दत्वजात्यसिद्धिशङ्का

अपर आह—तिष्ठतु तावत् दूरत एव गत्वाद्यपरसामान्यम्, महासामान्यमपि शब्दत्वं वर्णेषु नोपपद्यते ॥ § 4358

व्यक्त्यन्तरानुसन्धानं यत्रैकव्यक्तिदर्शने ।
तत्रैकरूपसामान्यं इष्यते तत्कृतं च तत् ॥ २७३ ॥§ 4360

गकारश्रुतिवेलायां न वकारावमर्शनम् ।
बाहुलेयपरामर्शः शाबलेयग्रहे यथा ॥ २७४ ॥§ 4362

प्रमाणं—अर्थप्रतीतिजनकम् । अर्थसंप्रत्ययात्मनः कार्यस्य इत्यन्वयः । अत्र अस्मिन् समाप्यते वादः मर्मस्थानमिदं च नः इत्युक्तं पु. ५४१ अनुसन्धेयम् ॥ § 4363

व्यक्त्यन्तरेत्यादि । यदा एकं घटं पश्यति, तदा देशान्तरकालान्तरदृष्टं घटान्तरं स्मरेत् चेत्, तत् किन्निबन्धनम् ? इति शङ्कायां हि अनुगतधर्मसिद्धिर्वाच्येत्यर्थः । तत्—व्यक्त्यन्तरानुसन्धानम् । तत्कृतं—सामान्यकृतम् ।

शब्दः शब्दोऽयमित्येवं प्रतीतिस्त्वप्रयोजिका ।
एषा हि श्रोत्रगम्यत्वं उपाधिमनुरुध्यते ॥ २७५ ॥§ 4366

## शब्दत्वजातिसिद्धिः

तदेतन्निरनुसन्धानस्याभिधानम् । अनुसन्धानप्रत्ययस्य सामान्यसिद्धावप्रयोजकत्वात् । अनुसन्धानं हि सारूप्यात् विजातीयेष्वपि भवति, गवयग्रहणसमये गोपिण्डानुसन्धानवत् । तस्मात् अबाधितैकरूपप्रत्ययप्रतिष्ठ एव सामान्यव्यवहारः ॥

समानबुद्धिग्राह्येऽपि सामान्येऽवस्थिते, क्वचित् ।
भवत्यन्यानुसन्धानं, क्वचिद्वा न भवत्यपि ॥ २७६ ॥§ 4369

तदस्ति खण्डमुण्डादौ पिण्डसारूप्यकारितम् ।
गकारादिषु वर्णेषु तदभावात्तु नास्ति तत् ॥ २७७ ॥§ 4371

—न तु सामान्याभावात् ॥

## सामान्यं न सारूप्यमात्रम्

न च सारूप्यमेव सामान्यं साङ्ख्यवदभिधातुं युक्तम्; विजातीयेष्वपि गोगवयादिषु तस्य दृष्टत्वात् ॥

यदि च शब्दः शब्दः इत्यनुवृत्तबुद्धेः श्रोत्रगम्यत्वोपाधिकृतत्वमुच्यते, तर्हि गवादावप्येकबुद्धेः वाहदोहाद्येकार्थक्रियाकारित्व- अप्रयोजिकेति । रामसुग्रीवयोरैक्यं देव्येवं समजायत रा. सु. ३५-५२ इत्यादौ हि ऐकमत्यप्रयुक्तमपि ऐक्यं दृश्यते, तथेति भावः ॥ § 4372

निरनुसन्धानस्य—अविमर्शकस्य । सारूप्यात् इति । किञ्चिदित्यादिः । विरोधादिनिबन्धनमपि स्मरणं कंसस्मरणे कृष्णस्येव दृष्टमत्र ग्राह्यम् । अवस्थितेऽपि इत्यन्वयः । अन्येति । व्यक्त्यन्तरेत्यर्थः । तदभावात्—सारूप्याभावात् ॥ § 4373

विजातीयेष्वपीति । घटपटयोः सारूप्याभावेऽपि पृथिवीत्वद्रव्यत्वादिसामान्यं दृश्यत एव । यदि च तत्र तदनुगुणं सारूप्यमुपपाद्यते, प्रकृतेऽपि तच्छक्यम् । एवमनभ्युपगमे कुत्रापि सामान्यं न सिध्येदिति बौद्धविजयप्रसङ्गः ॥ § 4374

I.552/KSV

निबन्धनत्वात् गोत्वादिजातिनिह्नवः बौद्धवन्मन्तव्यः । न चैतदेवम्; तत् गोत्ववत् शब्दत्वमपि न प्रत्याख्येयम् ॥ § 4375

## ब्राह्मणत्वादिजातीनां प्रत्यक्षगम्यत्वम्

एतेन ब्राह्मणत्वादिसामान्यमपि समर्थितं वेदितव्यम्, उपदेशसहायप्रत्यक्षगम्यत्वात् । न चोपदेशापेक्षणात् अप्रत्यक्षत्वं तस्य भवितुमर्हति; गोत्वादिप्रत्ययस्यापि सम्बन्धग्रहणकाले तदपेक्षत्वदर्शनात् । उक्तं च न हि यत् गिरिशृङ्गमारुह्य गृह्यते तत् अप्रत्यक्षम् इति ॥ § 4376

## ब्राह्मणत्वादिकं न औपाधिकम्

न चौपाधिकः पैठीनसिपैप्पलादिप्रभृतिषु ब्राह्मणप्रत्ययः, उपाधेरग्रहणात् । औपाधिकत्वस्य गोत्वादावपि वक्तुं शक्यत्वात् ॥ § 4377

अपि च उपदेशनिरपेक्षमपि चक्षुः क्षत्रियादिविलक्षणां सौम्याकृतिं ब्राह्मणजातिमवगच्छति—इत्येके । तदलमनया कथया ॥ § 4378

## शब्दानित्यत्वेऽप्यर्थबोधोपपत्तिः

प्रकृतमुच्यते—गत्वादिभिर्जातिभिरेव अर्थसंप्रत्ययोपपत्तेः, यदुक्तं दर्शनस्य परार्थत्वात् इति पु. ५२४—एतदयुक्तम् ॥ § 4379

एतेन सर्वत्र यौगपद्यादित्येतदपि प्रत्युक्तम्, सम्बन्धनियमस्य गत्वादिभ्य एव सिद्धेः ॥ § 4380

### शब्दभेदप्रतीतिः न उच्चारणभेदावलम्बना

यदपि सङ्ख्याभावात् कृत्वसुच्प्रयोगदर्शनमुदग्राहि—पु. ५२५ तदपि व्यभिचारि— § 4381

गिरिशृङ्गेति । तादृशोन्नतस्थानारोहणं हि प्रत्यक्षसहकारि । तद्वदेवात्रोपदेशोऽपीत्यर्थः ॥ § 4382

वस्तुतस्तु ब्राह्मणत्वं न केवलशरीरनिष्ठम्, कर्तृत्वादीनामप्येवं प्रसङ्गात् । एवं नात्ममात्रनिष्ठम्, आत्मनि विशुद्धे तादृशजात्यादीनामसंभवात् । अत उभयगतं विलक्षणमिदं ब्राह्मणत्वादिकं आत्मापरोक्षज्ञान्येकगम्यमित्ययं विचारोऽतिसूक्ष्म इत्याशयेनाह—अलमिति ॥ § 4383

I.553/KSV

कृतं कान्तस्य तन्वङ्ग्या त्रिरपाङ्गविलोकनम् ।
चतुरालिङ्गनं गाढं अष्टकृत्वश्च चुम्बनम् § 4385

इति—तद्भेदेऽपि दर्शनात् ॥ § 4386

अथ तत्र स्त्रीपुंसयोरभेदे चुम्बनादिक्रियामात्रभेद एवेत्युच्यते— तथाऽप्यपूर्वेषु ब्राह्मणेषु भुक्तवत्सु पञ्चकृत्वो ब्राह्मणा भुक्तवन्तः इति व्यवहारो दृश्यते ॥ § 4387

### शब्दभेदस्य प्रत्यक्षसिद्धत्वम्

एवं शब्देऽपि तत्सङ्ख्याव्यवहारो हि दृश्यते ।
कविना सदनुप्रासे निबद्धेऽक्षरडम्बरे ॥ २७८ ॥ § 4389

गकारो बहवो दृष्टाः इति व्यवहरन्ति हि ।
यदपि प्रत्यभिज्ञानं तद्वारकमुदाहृतम् ॥ २७९ ॥ § 4391

---

१६--१७ ] दृश्यते—
nyāma-wit_kha

तस्यापि सिद्धे प्रामाण्ये जात्यालम्बनता भवेत् ।
नृत्ताभिनयचेष्टादिप्रत्यभिज्ञानतो वयम् ॥ २८० ॥§ 4393

न शब्दप्रत्यभिज्ञानमुत्तारयितुमीश्महे ।
विशेषं प्रत्यभिज्ञाने न पश्यामो मनागपि ॥ २८१ ॥§ 4395

तद्भेदेऽपि—संख्याश्रयवस्तुभेदेऽपि । दर्शनात्, कृत्वसुच्प्रत्ययस्येति शेषः ॥ § 4396

ननु उच्चारणकर्मीभूतस्य शब्दस्यैक्यात् यथा अष्टकृत्व उच्चरितः शब्दः इति व्यवहारः, तथा चुम्बनकर्मीभूतस्यैक्यादेवात्रापि कृत्वसुच्प्रयोग इत्याशंक्य समाधत्ते—अथेति । अपूर्वेषु—प्रतिवारं भिन्नेषु ॥ § 4397

तद्वारकं—ऐक्यद्वारकम् । पूर्वमुच्चरितो गकारः नष्टः, अन्योऽयं पुनरुच्चरितः इत्येव सूक्ष्ममतीनां अनुभवात्—सिद्धे प्रामाण्य इति । ह्यो यदौषधं दत्तं, तदेवाद्यापि दत्तम् इत्यादौ तथा दर्शनादित्यर्थः । केश्चित्तिरोहिते भावात् पु. ५२६ इत्यादि समाधत्ते—नृत्तेति । उत्तारयितुं—विवेचयितुम् । अत्र हेतुमाह—विशेषमिति । तथा च शब्द-बुद्धि-क्रियाणां प्रत्यभिज्ञासु नास्ति कश्चिद्विशेष इति एतेऽनित्या एव । एवं तर्हि प्रत्यभिज्ञा

स्तम्भादिप्रत्यभिज्ञासु न तदेव विनाशधीः ।
क्षणभङ्गप्रतीकारं तेन ताः कर्तुमीशते ॥ २८२ ॥§ 4400

शब्दस्य प्रत्यभिज्ञानवेलायामेव दृश्यते ।
शब्दरूपस्य विध्वंसः इति तन्नित्यता कुतः ॥ २८३ ॥§ 4402

## स्तम्भादिप्रत्यभिज्ञायाः शब्दप्रत्यभिज्ञायाश्च विशेषः

यद्यपि क्षणभङ्गभङ्गे प्रत्यभिज्ञाप्रामाण्यमस्माभिरपि समर्थयिष्यते —तथापि स्तम्भादिप्रत्यभिज्ञायाः शब्दप्रत्यभिज्ञाया एष एव विशेषः, यदत्र ध्वस्तः शब्दः इति तदैव प्रत्ययो जायते । अत एव तिरोहितेऽपि भावादियं अप्रमाणं प्रत्यभिज्ञेत्याहुः ॥

## शब्दप्रत्यभिज्ञायाः वस्त्वैक्यालम्बनत्वासंभवः

यद्यपि ध्रियतेऽस्माकं शब्दो द्वित्रानपि क्षणान् ।
प्रत्यभिज्ञा तु कालेन तावता नावकल्पते ॥ २८४ ॥§ 4404

४ ] मनागपि— nyāma-wit_kha
---Note : उत्तरपुटेऽनुवर्तते.

१७ ] Correction : ; [२] (sic !)

तथाहि—शब्द उत्पद्यते तावत् । ततः स्वविषयं ज्ञानं जनयति, अजनकस्य प्रतिभासायोगात् । ततः तेन ज्ञानेन शब्दो गृह्यते । ततः संस्कारबोधः । ततः पूर्वज्ञातशब्दस्मरणम् । ततस्तत्सचिवं श्रोत्रं, मनो वा शब्दप्रत्यभिज्ञानं जनयिष्यति । तदा शब्दो ग्रहीष्यत सामान्यस्याप्येवं निर्वाहे कथं क्षणभङ्गभङ्गः ? इत्यत्राह—स्तम्भादीति । तदैव—प्रत्यभिज्ञाकाल एव । तेन—तस्मात् । तथा च केवला प्रत्यभिज्ञा एकस्य वस्तुनः नित्यतां, अनित्यतां वा न साधयितुमलम् । किन्त्वबाधितैव । शब्दप्रत्यभिज्ञायामस्ति तदैव बाधः, न स्तम्भप्रत्यभिज्ञायाम् । एवञ्च न क्षणभङ्गवादस्याप्यवसर इति भावः ॥ § 4405

क्षणभङ्गभङ्गे—इति निमित्तसप्तमी । तत्प्रकरण इति वा ॥ § 4406

जीवति त्वन्मतेऽपिपु. ५२७ इत्यादि समाधत्ते—यद्यपीति । द्वित्रानपि इत्यनास्थायाम् ॥ § 4407

I.555/KSV

इतीयत् कुतोऽस्य दीर्घमायुः ? प्रत्यभिज्ञाप्रामाण्यादेव तावदायुस्तस्य कल्प्यत इति चेत्; सत्यं कल्प्येत, यदि विनाशप्रत्ययः तदैव न स्यात् ॥ § 4408

अपि च गोशब्दोऽयम् अश्वशब्दोऽयम् इति तदभिधानविशेषोल्लेखात्— § 4409

नानानुस्मरणं तस्य तदैवावश्यमापतेत् ।
विज्ञानायौगपद्याच्च कालो दीर्घतरो भवेत् ॥ २८५ ॥§ 4411

## ग्रहणात् पूर्वं शब्दस्थित्यसंभवः

यदप्युदितमुद्दाममेघश्यामासु रात्रिषु ।
साम्यं सौदामिनीधामजन्यया प्रत्यभिज्ञया ॥ २८६ ॥§ 4413

तदसत्, कालदैर्घ्येण तदवस्थित्यसंभवात् ।
विद्युद्दृष्टे च वृक्षादौ नाशसंवित्त्यसंभवात् ॥ २८७ ॥§ 4415

## प्रत्यभिज्ञायाः ऐन्द्रियकत्वपक्षः

प्रत्यभिज्ञा नाम स्मर्यमाणानुभूयमानसामानाधिकरण्यग्राहिणी संस्कारसचिवेन्द्रियजन्या प्रतीतिरिति केचित् ॥ § 4416

## प्रत्यभिज्ञायाः केवलमानसत्वपक्षः

३ ] ज्ञान— nyāma-wit_ka
४ ] तथा— nyāma-wit_kha
२१ ] स्थिति— nyāma-wit_kha

अन्ये मन्यन्ते—स्मर्यमाणपूर्वज्ञानविशेषितार्थग्राहित्वात् प्रत्यभि- § 4417

शब्दप्रत्यभिज्ञाने न केवलमक्षरमात्रानुसन्धानापेक्षा, अपि तु अर्थ-स्यापीति, सर्वथा तावत्कालं शब्दासत्त्वात् प्रत्यभिज्ञा नैक्यावगाहिनीत्याह—अपि चेति । नानेति । वाच्यसम्बन्धादीत्यर्थः । विज्ञानायौगपद्यात् इति प्रायोवादाभिप्रायम् । स्मृतेः संभवात् ॥ § 4418

यथा निशीथेपु. ४२७ इत्यादि समाधत्ते—यदपीति । कालदैर्घ्येण—चिरकालपर्यन्तमिति यावत् । तदवस्थितिः—शब्दस्थितिः ॥ § 4419

स्मर्यमाणं—पूर्वकालदेशसम्बन्धादि । अनुभूयमानं—एतत्कालदेशसम्ब-न्धादि ॥ § 4420

स्मर्यमाणेत्यादि । सोऽयं इत्यत्र हि तच्छब्देन पूर्वकालविशिष्टं

ज्ञायाः, तद्विशेषणस्य च अर्थस्य बाह्येन्द्रियग्राह्यत्वानुपपत्तेः स्तम्भादावपि मानसी प्रत्यभिज्ञेति ॥

निर्बन्धस्त्विह नास्माकं, सा यथाऽस्तु तथाऽस्तु वा ।
शब्दे विनाशज्ञानात्तु न सा नित्यत्वसाधिका ॥ २८८ ॥§ 4423

## ऐक्यप्रत्यभिज्ञापेक्षया विनाशप्रत्यक्षं प्रबलम्

बाध्यबाधकभावे तु नियमो ननु किंकृतः ?
शब्दस्य प्रत्यभिज्ञानविनाशप्रतिभासयोः ॥ २८९ ॥§ 4425

उच्यते, प्रत्यभिज्ञानमन्यथाऽप्युपपद्यते ।
गत्वादिजातिविषयं, यद्वा सादृश्यहेतुकम् ॥ २९० ॥§ 4427

## शब्दविनाशप्रत्यक्षस्य अन्यथासिद्धत्वासंभवः

नन्वभिव्यञ्जकध्वंसात् नाशधीरपि सेत्स्यति ।
तदसावपि बाध्याऽस्तु, यद्वा भवतु संशयः ॥ २९१ ॥§ 4429

मैवं; विनाशिताबुद्धिः भेदबुध्युपबृंहिता ।
सा चेयं चान्यथासिद्धे इति वक्तुमसांप्रतम् ॥ २९२ ॥§ 4431

वस्तु साक्षान्न वाच्यः; गतस्य तस्य तदाऽभानात् । किन्तु पूर्वोत्पन्न-तादृशज्ञानविषयत्वेनैव । एवञ्च प्रथमपक्षे पूर्वकालसम्बन्धो विशेषणं, द्वितीय-पक्षे च तद्विषयकज्ञानं इति विशेषः । अधिकं परस्तात् । पक्षद्वयं चेदं

१९ ] न त्वभि— nyāma-wit_kha

२१ ] विनाशता— nyāma-wit_ka

सप्तमाह्निके विस्तरशः विचारयिष्यते इत्यभिप्रायेणाह—निर्बन्ध इत्यादि ॥ § 4432

ननु विनाशप्रत्यय एवान्यथासिद्धः कुतो न स्यादित्यत्राह—बाध्यबाधकभाव इति ॥ § 4433

नन्वित्यादि । दृश्यते हि वाय्वभिव्यञ्जिकायाः व्यजनक्रियाया नाशे वायुनाशप्रतीतिः । न केवलं विनाशप्रत्ययमात्रात् शब्दस्य नानात्वं ब्रूमः । किन्तु प्रतीतिकाले शब्दः पूर्वश्रुतगकाराद्भिन्नतयैव भासत इति नानात्वस्यानपह्नवत्वे, तन्मूलतया विनाशोऽपि अनपह्नव एवेत्याह—मैवमिति । ननु नानात्वमप्यौपाधिकं कुतो न स्यादिति तु, अनवस्थाऽन्योन्याश्रयादिग्रस्तं तदित्याह—सा चेत्यादि ।

प्रत्यभिज्ञा च सापेक्षा निरपेक्षा त्वभावधीः ।
तेनैवमादौ विषये प्रत्यभिज्ञैव बाध्यते ॥ २९३ ॥§ 4436

शब्दाभावस्य (Edtext outside numbered paragraph)झगिति ग्रहणात् । (Edtext outside numbered paragraph)तत्प्रत्यभिज्ञायाश्च पूर्वानुसन्धानादिसव्यपेक्षत्वात् ॥

## प्रत्यभिज्ञाया अन्यथासिद्धिरेवौत्सर्गिकी

अपि च प्रत्यभिज्ञा (Edtext outside numbered paragraph)व्यभिचरन्ती कर्मादिषु गृह्यते । तेनास्यां शब्देऽप्यभावप्रत्ययोपहतवपुषि कः समाश्वासः ? न चेदं प्रत्यक्षेऽपि अनैकान्तिकत्वोद्भावनम्; अपि तु (Edtext outside numbered paragraph)विनाशकप्रत्ययप्रतिहतप्रभावा प्रत्यभिज्ञा नित्यत्वं, कर्मादिष्विव, शब्देऽपि न साधयितुं प्रभवतीति (Edtext outside numbered paragraph)दृष्टान्त एष प्रदर्श्यते ॥

## प्रत्यक्षस्थलेऽपि दृष्टान्तापेक्षा

ननु प्रत्यक्षेऽपि दृष्टान्तस्य कोऽवसरः ? सत्यम्— (Edtext outside numbered paragraph)ग्राहकास्तु भवादृशाः स्वयमनवबुध्यमाना एवं बुध्यन्ते ॥

## बुद्धिकर्मणोः सर्वथा नित्यत्वासंभवः

यत्तु प्रवृद्धरभसतया बुद्धिकर्मादावपि नित्यत्वसमर्थनम्— तत् अत्यन्तमलौकिकमित्युक्तम् ॥

किं नाम शब्दनित्यत्वसमर्थनतृषाऽऽतुरः ।
जङ्गमं स्थावरं चैव सकलं पातुमिच्छसि ॥ २९४ ॥§ 4438

तस्मादलमतिरभसप्रवृत्ताभिः बुद्धिकर्मादिनित्यत्वसमर्थनकथाभिः ॥ विनिगमकान्तरमप्याह—प्रत्यभिज्ञा चेति ॥ § 4439

नन्वेवं तर्हि प्रत्यक्षं सर्वमपि एवमेवेति किं तव सम्मतम् ? इति चेन्नेत्याह—न चेदमिति ॥ § 4440

एवं—दृष्टान्तमुखेन ॥ § 4441

I.558/KSV

## शब्दनित्यत्वे नियतग्रहणसमर्थनं न युक्तिमत्

यत्पुनः अभिव्यक्तिपक्षे—शब्दस्य ग्रहणे नियमाभावमाशङ्क्य, श्रोत्रसंस्कारेण, विषयसंस्कारेण, उभयसंस्कारेण वा नियतं ग्रहणमुपवर्णितम् पु. ५३०-५३३—तद्वचनामात्रम्—समानदेशानां समानेन्द्रियग्राह्याणां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वादर्शनात् ॥ § 4442

## शब्दनित्यत्वे ग्रहणनियमासंभवः

ये पुनरत्र गन्धा उदाहृताः पु. ५३०—ते समानेन्द्रियग्राह्या भवन्ति, न समानदेशाः ॥ § 4443

एकभूम्याश्रितत्वेन तुल्यदेशत्वकल्पने ।
भवेत् समानदेशत्वं हिमवद्विन्ध्ययोरपि ॥ २९५ ॥§ 4445

एकत्वेऽपि भुवो भान्ति पदार्थाः पार्थिवाः पृथक् ।
व्यज्यन्ते तदधिष्ठानाः गन्धास्तैस्तैर्निबन्धनैः ॥ २९६ ॥§ 4447

भवन्त्वनाश्रिताः शब्दाः, यदि वाऽऽकाशसंश्रिताः ।
सर्वथा भिन्नदेशत्वं एषां वक्तुं न शक्यते ॥ २९७ ॥§ 4449

## औपाधिकाकाशभेदादपि ग्रहणनियमासंभवः

ननु यथैकत्वेऽपि नभसः तद्भागकल्पनया प्रतिपुरुषं श्रोत्रेन्द्रियभेदः, एवं तद्भागकल्पनयैव शब्दानामपि असमानदेशत्वात् नियतव्यञ्जकव्यङ्ग्यता भविष्यति—नैवमुपपद्यते—यत्रैव वक्तृमुखाकाशदेशे, श्रोतृश्रोत्राकाशदेशे वा गोशब्द उपलब्धः तत्रैवाश्वशब्द इदानीमुपलभ्यते; न पुनरतिमुक्तकुसुमे य उपलब्धो गन्धः, स बन्धूके, मधूके वा कदाचिदुपलभ्यत इति ॥ § 4450

तस्मात् समानदेशत्वात् न व्यक्तौ नियमो भवेत् ।
उत्पत्तौ तु व्यवस्थायां तद्भेद उपपद्यते ॥ २९८ ॥[§ 4452]

न समानदेशाः । न हि गकारादिः यथा नित्यः, एकश्च; तथा गन्धोऽपि । यदि वा—यदि च ॥ [§ 4453]

तत्रैवेति । न हि शब्दोत्पत्तेः, श्रवणस्य वा देशस्य भेदः अत्रास्ति । अतिमुक्तः पुण्ड्रकः स्यात् वासन्ती माधवी लता । एवं बन्धूकादयोऽपि पुष्पभेदाः । उत्पत्तौ तु इति तुकारेण तन्मते तदसंभवः द्योत्यते ।

नादैः संस्क्रियतां शब्दः श्रोत्रं वा द्वयमेव वा ।
सर्वथा नियमो नास्ति व्यञ्जकेष्विति निश्चयः ॥ २९९ ॥[§ 4456]

व्यवस्था व्यञ्जकानां चेत् उच्यतेऽदृष्टकारिता ।
उत्पत्तौ दृश्यमानायां दृष्टमप्यविरोधकम् ॥ ३०० ॥[§ 4458]

**श्रोत्रसंस्कारपक्षः न युक्तः**

न च स्तिमितमारुतापनयनव्यतिरिक्तः कश्चन श्रोत्रसंस्कारो विद्यते । तत्र चातिप्रसङ्ग उक्तः । एतदतिरिक्तसंस्कारकल्पनायां तु अदृष्टकल्पना । स्थिरे च शब्दसंस्कारग्राहिणि सति पुनरभिव्यक्तस्यापि गोशब्दस्य श्रवणं स्यात्; तद्ग्रहणहेतोः संस्कारस्य स्थिरत्वात् । तत्क्षणिकत्वे तु शब्दक्षणिकतैव साध्वी, प्रतीयमानत्वात् ॥

**श्रोत्रेन्द्रियस्य संस्काररूपत्वासंभवः**

यत्तु भर्तृमित्रः तमेव संस्कारं श्रोत्रेन्द्रियमभ्युपैति, पु. ५३१ तदिदमपूर्विकं किमपि पाण्डित्यम् । इन्द्रियस्य हि संस्कार्यस्य संस्कारः, न संस्कार एवेन्द्रियम्; लोकागमविरुद्धत्वात् । प्रतिपुरुषं यावच्छब्दं भिन्नस्य क्षणिकस्य चेन्द्रियस्य कल्पनमनुपपन्नम् । अनश्वरत्वे तु शश्वदेव शब्दकोलाहलप्रसङ्ग इति यत्किंचिदेतत् । भट्टेनैव सोपहासमेष दूषितः पक्ष इति किमत्र विमर्दन !

**भट्टोक्ता भर्तृमित्रनिराकरणप्रक्रिया न साधीयसी**

यदपि भट्ट आह श्लो. वा. १-१-६-१४९—

यदि त्ववश्यं वक्तव्यः तार्किकोक्तिविपर्ययः ।
ततो वेदानुसारेण कार्या दिक्श्रोत्रतामतिः ॥ इति;[§ 4461]

दृश्यमानायामिति प्रकृतहेतुसंपादकम् ॥ [§ 4462]

---

११ ] एवातिरिक्त— nyāma-wit__kha
२० ] ग्रहणमिति— nyāma-wit__kha
२१ ] स्थितत्वात्— nyāma-wit__ka
२५--२७ ] संस्कार्यस्य— nyāma-wit__ka
१ ] त्ववश्य— nyāma-wit__ka

सिद्धान्ते आकाशस्यैव श्रोत्रत्वात् तदभिप्रायेण—न पुरुषभेदमात्रात् इन्द्रियभेदः स्यात्, किन्तु क्षणभेदादपीत्यभिप्रायेण वा—प्रतिपुरुषमिति । केचित्तु पण्डितंमन्याः इत्येतत्स्मरन्नाह—सोपहासमिति ॥ § 4463

नैय्यायिकं निराकुर्वन्तं भर्तृमित्रं प्रत्युक्तिः—यदि त्ववश्यमित्यादि । वेदः—दिशः श्रोत्रम् तै. ब्रा. ३-६-६ इत्यादिः ॥ § 4464

I.560/KSV

—तदप्यसांप्रतम्— § 4465

दिशां कार्यान्तराक्षेपात् आगमान्यपरत्वतः ।
आहोपुरुषिकामात्रं दिग्द्रव्यश्रोत्रकल्पनम् ॥ ३०१ ॥§ 4467

इन्द्रियाणां भौतिकत्वस्य साधयिष्यमाणत्वात् । दिशश्च अमूर्तत्वात् नेन्द्रियप्रकृतित्वम् । व्यापकत्वाविशेषे वा कालात्मनोरपि तथाभावप्रसङ्गः । तयोरन्यत्र व्यापारकत्वात् नेन्द्रियप्रकृतित्वमिति चेत्; दिग्द्रव्येऽपि तुल्यमेतत् । आगमस्त्वन्यपर एव । यथा हि सूर्यं चक्षुर्गमयतात् ।...दिशः श्रोत्रम् तै. ब्रा. ३-६-६ इति पठ्यते, एवं अन्तरिक्षमसुम् तै. ब्रा. ३-६-६ इति च पठ्यत एव । न चासवोऽन्तरिक्षप्रकृतिकाः, पवनात्मकत्वात् । तस्मात् कृतं दिशा । आकाशदेश एव कर्णशष्कुल्यवच्छिन्नः शब्दनिमित्तोपभोगप्रापकधर्माधर्मोपनिबद्धः श्रोत्रमित्युक्तम् ॥ § 4468

## नित्यशब्दाभिव्यक्तिव्यवस्था न धर्माधर्माधीना युक्ता

ननु ! धर्माधर्मकृतश्रोत्रनियमवत् अभिव्यक्तिनियमोऽपि शब्दस्य तत्कृत एव भविष्यति । किमिति तदनियमो नित्यत्वपक्षे चोद्यत इति ? नैतद्युक्तम्—चक्षुरादीन्द्रियाणां वैकल्यं अदृष्टनिबन्धनं अन्धकारप्रभृतिषु दृश्यते, न पुनः पदार्थस्थितिरदृष्टवशात् विपरिवर्तते । व्यञ्जकधर्मातिक्रमे हि हिममपि शैत्यं स्वधर्ममतिक्रामेत् । व्यञ्जकेषु नियमो न दृष्ट इत्युक्तम् । दृष्टे च वर्णभेदे नियतोपलब्धिहेतौ संभवति सति किमयमदृष्टमस्तके भार आरोप्यते ? § 4469

आहोपुरुषिका—आहोपुरुषिका तावत् गर्वादात्मनि गौरवम् इति वैजयन्ती । ननु दिगाकाशयोरुभयोः व्यापकत्वाद्यविशेषात् श्रोत्रं दिक्प्रकृतिकमेव भवतु इत्यत्राह—व्यापकत्वेत्यादि । अन्यत्र—अन्यस्मिन् कार्ये । तुल्यम्, दिशोऽपि दैशिकपरत्वापरत्वनिर्वाहकतयैव सिद्धेः । तत्तत्प्रकृतिकत्वाभावेऽपि अभिप्रायान्तरादिभिस्तथा व्यपदेशो बहुलं दृश्यत इत्याह—यथा हीति । असवः—प्राणाः ॥ § 4470

श्रोत्रनियमवदिति । विभु आकाशं हि श्रोत्रं सिद्धान्ते । नैतद्युक्तमित्यादि । न हि व्यापकं आकाशं वयं श्रोत्रं ब्रूमः, किन्तु कर्णशष्कुल्युपहितमेव ।

न हि तव शब्दे तथा, पदार्थस्थितेः अदृष्टाधीनत्वाभावात् । तद्ग्रहणादिकं

### शब्दनित्यत्वे तीव्रमन्दादिविभागः दुर्निर्बहः

कथं चाभिव्यक्तिपक्षे तीव्रमन्दविभागः ? पु. ५३२ । तीव्रतादयो हि वर्णधर्मा वा स्युः ? ध्वनिधर्मा वा ? वर्णधर्मत्वे तीव्रात् गकारात् अन्यत्वं मन्दस्येत्यस्मन्मतानुप्रवेशः ॥

ध्वनिधर्मत्वपक्षे तु श्रोत्रेण ग्रहणं कथम् ?
न हि वायुगतो वेगः श्रवणेनोपलभ्यते ॥ ३०२ ॥§ 4473

### तीव्रत्वमन्दत्वादेः ध्वनिधर्मत्वासंभवः

यत्तु व्यक्तिधर्माः कृशत्वस्थूलत्वादयः जाताबुपलभ्यन्ते इति दर्शितम् पु. ५३२—तत् काममुपपद्येतापि । जातेः, व्यक्तेः, तद्धर्माणां च समानेन्द्रियग्राह्यत्वात् ॥

इह तु स्पर्शनग्राह्यः पवनोऽतीन्द्रियोऽथ वा ।
तद्धर्माः श्रवणे शब्दे गृह्यन्त इति विस्मयः ॥ ३०३ ॥§ 4475

### तीव्रत्वमन्दत्वादेः बुद्धिधर्मत्वाभावः

यत्तु बुद्धिरेव तीव्रमन्दवतीति पु. ५३३—तदतीव सुभाषितम्; असति विषयभेदे बुद्धिभेदानुपपत्तेः ॥

किञ्च नित्यपरोक्षा ते बुद्धिरेवं च नादवत् ।
तदग्रहे न तीव्रादितद्धर्मग्रहसंभवः ॥ ३०४ ॥§ 4477

कामं अदृष्टायत्तोपाध्यादिवशादिति युक्तम् । अदृष्टादेव साक्षात् व्यवस्था तु दुरुपपादेवेति ॥ § 4478

वायुगत इति । द्विविधो हि शब्दः वर्णो ध्वनिश्च । द्वयोरनुगतं शब्दत्वम् । वर्णत्वं ध्वनित्वं च तदवान्तरसामान्ये । वर्णविशेषाः गकारादयः, ध्वनिविशेषाः शङ्खघोषादयः । ध्वन्यात्मकश्च शब्दः वायुगुणः इति न्यायरत्नाकरे १-१-५, स्फोट. ३९ वर्णितं द्रष्टव्यम् ॥ § 4479

नित्यपरोक्षेति । प्राकट्येनानुमेयं हि ज्ञानं तेषां मते ।

अहो तीव्रादयस्तीव्रे प्रपाते पतिता अमी ।
यो गृह्यते, न तद्धर्मा; यद्धर्मा, स न गृह्यते ॥ ३०५ ॥§ 4482

१ ] तीव्र— nyāma-wit_kha    nyāma-wit_kha
१६ ] तदग्रहात्—

### शब्दनित्यत्वे तीव्रेण मन्दस्याभिभवोऽपि पु. ५३३ दुर्निरूपः

यश्चाभिभववृत्तान्तः त्वन्मते मरुतामसौ ।
अनिले चाभिभूतेऽपि शब्दो न श्रूयते कथम् ? ॥ ३०६ ॥§ 4484

दीपेऽभिभूते रविणा न हि रूपं न गृह्यते ।
नियतव्यञ्जकत्वं तु प्रतिक्षिप्तमदर्शनात् ॥ ३०७ ॥§ 4486

### ध्वनौ वायुगुणे शब्दत्वग्रहणासंभवः

यत्तु शङ्खादिशब्दानां श्रोत्रग्राह्यत्वसिद्धये ।
शब्दत्वं तत्र तद्ग्राह्यं इत्यवादि पु. ५३८ तदप्यसत् ॥ ३०८ ॥§ 4488

सत्यं वदत दृष्टं वा श्रुतं वा क्वचिदीदृशम् ।
आश्रयस्य परोक्षत्वे तत्सामान्योपलम्भनम् ॥ ३०९ ॥§ 4490

शब्दो न तेऽस्त्यवर्णात्मा न शङ्खो वर्णसम्भवः ।
न नादवृत्ति शब्दत्वं इति तद्ग्रहणं कथम् ? ॥ ३१० ॥§ 4492

यो गृह्यत इति । शब्दस्तु गृह्यते, परन्तु तीव्रत्वादिर्न तद्धर्मः; तीव्रत्वादिधर्मास्तु बुद्धेः, सा तु न गृह्यते ॥ § 4493

दीप इति । व्यञ्जकस्य दीपस्य सूर्यप्रभयाऽभिभवेऽपि न हि व्यङ्ग्यं रूपं न गृह्यत इत्यर्थः । ननु तत्र उभयव्यङ्ग्यं रूपं एकमेव । अतः एकस्याभिभवेऽपि न रूपाग्रहणप्रसङ्गः । प्रकृते तु तत्तदनिलाभिव्यङ्ग्ययोः शब्दयोरपि तदनुगुणं भिन्नत्वात् तत्राप्यभिभवो युज्यत एवेत्याशंक्य—तर्हि उभयोस्समाने मेलने किं कस्याभिव्यञ्जकं इत्यादिनियमः दुर्निरूप इति पूर्वमेवोक्तमित्याह—नियतव्यञ्जकत्वमित्यादि ॥ § 4494

आश्रयस्य—शब्दस्य । नाद एव हि तेषां श्रोत्रग्राह्यः, न तु शब्दः । अथापि शब्दत्वं नादे श्रोत्रेण गृह्यत इति ते वदन्ति । एतदेवोच्यतेऽनन्तरश्लोकेन ॥ § 4495

ननु तर्हि सिद्धान्ते आकाशस्याप्रत्यक्षत्वेऽपि तदाश्रितस्य शब्दस्य प्रत्यक्षत्वं कथमिति चेत्; आकृतिव्यङ्ग्यत्वाज्ञातेः तत्रैवायं नियमः, नान्यत्र; तथाऽनुभवात् ॥ § 4496
I.563/KSV

## शब्दनित्यत्वपक्षे लाघवोपपादनमप्रयोजकमेव

यत्पुनः संप्रधारितं व्यङ्ग्यकार्यपक्षयोः क्व शब्दग्रहणे गुर्वी कल्पना भवति ? क्व वा लघ्वी ? इति पु. ५३३—तदपि मौलप्रमाणविचारसापेक्षत्वात् अप्रयोजकम् ॥ § 4497

यदि मौलप्रमाणेन साधिता नित्यशब्दता ।
त्वदुक्ता कल्पना साध्वी मदुक्ता तु विपर्यये ॥ ३११ ॥§ 4499

## शब्दनित्यत्वपक्षे शब्दस्य सर्वदिक्षु ग्रहणासंभवः

कौष्ठ्येन बहिः प्रसरता समीरणेन सर्वतः स्तिमितमारुतापसरणं क्रियते पु. ५३७ इत्येतदेव तावदलौकिकं कल्पितम् । अग्नेरूर्ध्वज्वलनं, वायोस्तिर्यग्गमनं, अणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि वै. सू. ५-२-१४ इति मरुतां तिर्यग्गमनस्वभावत्वात् ऊर्ध्वमधश्च शब्दश्रवणं न भवेत् ॥ § 4500

यावन्न वेगिनाऽन्येन प्रेरितो मातरिश्वना ।
तावन्नैसर्गिको वायुः न तिर्यग्गतिमुज्झति ॥ ३१२ ॥§ 4502

अधोमुखप्रयुक्तोऽपि शब्द ऊर्ध्वं प्रतीयते ।
उत्तानवदनोक्तोऽपि नाधो न श्रूयते च सः ॥ ३१३ ॥§ 4504

कदम्बगोलकाकारशब्दारम्भो हि संभवेत् ।
न पुनर्दृश्यते लोके तादृशी मरुतां गतिः ॥ ३१४ ॥§ 4506

आकण्ठानद्धनीरन्ध्रचर्मावृतमुखोदितः ।
शब्दो यः श्रूयते तत्र न कौष्ठ्यानिलसर्पणम् ॥ ३१५ ॥§ 4508

मौलप्रमाणेति । मूलभूतप्रमाणेत्यर्थः । अप्रयोजकत्वमेवाह— यदीति ॥ § 4509

यावदित्यादि । दृश्यते हि जलेऽपि प्रवाहद्वयसंघट्टनया ऊर्ध्वगतिः अकण्ठेत्यादिकं कौष्ठ्येन समीरणेन स्तिमितमारुतापसरणासंभवोपपादनाय ॥ § 4510

I.564/KSV

कुड्यादिप्रतिबन्धेन बायोरप्रसरणं भवद्भिरपि कथितमेव । निर्विवरचर्मपुटोपरुद्धोऽप्यसौ न प्रसरेत् ॥ § 4511

---

४ ] सन्धारितं— nyāma-wit_kha

### कौष्ठ्यमारुतस्य शब्दाभिव्यञ्जकत्वासंभवः

अपि च सर्वतोनिरुद्धसर्वद्वारस्यापि जठरे गुरगुराशब्दो मन्दाग्नेः श्रूयते । अत्र कुतो व्यञ्जकानां कौष्ठ्यपवनानां निस्सृतिः ? रोमकूपनिस्सृतानामपि सूक्ष्मतया स्तिमितबाह्यवाय्वपसरणसामर्थ्याभावः ॥ § 4512

### कौष्ठ्यमारुतस्य बाह्यवाय्वपसरणे शक्तिरपि न भवति

किञ्च मनागपि बहिर्वायौ वाति न शब्दश्रवणं स्यादिति । दुर्बलोऽपि बाह्यः पवनः प्रबलादपि कौष्ठ्यवायोः बलीयान् भवतीति कथं तेनापसार्येत ? § 4513

### प्रसिद्धबाह्यवाय्वपेक्षया विलक्षणाः शब्दावारकवायवो न सन्त्येव

अन्य एव सूक्ष्मा वायवः शब्दावरणकारिणः, न पुनरेते परिदृश्यमानाः श्यामाकलतालास्योपदेशिनः मातरिश्वान इति चेत्—न—विशेषे प्रमाणाभावात् । यं च सूक्ष्मा अपि वायवः तिरोदधति, तं सुतरां बलीयांसोऽपि विवृणुयुरिति यत्किञ्चिदेतत् ॥ § 4514

### सिद्धान्तोक्तशब्दग्रहणप्रकार एव साधीयान्

तस्मात् सजातीयशब्दसन्तानारम्भपक्ष एव युक्त्यनुगुणः । तथाहि—सजातीयगुणारम्भिणः गुणास्तावद्दृश्यन्त एव रूपादयः । अमूर्तोऽपि च बुद्धिः बुद्ध्यन्तरमारभमाणा दृश्यते । देशान्तरेऽपि सैव कार्यमारभते, पथि गच्छतो देवदत्तादेः एकस्मादात्मप्रदेशात् प्रदेशान्तरे बुद्ध्युत्पाददर्शनात् । कार्यारम्भविरतिरपि भवति; अदृष्टाधीनसंसर्गाणां सहकारिणामनवस्थानात् ॥ § 4515

भवद्भिः कथितमिति । आरम्भप्रतिबन्धोऽस्य न च कुड्यादिभिर्भवेत् श्लो. बा. १-१-६. १६ इत्यादौ तथोक्तं तैः ॥ § 4516

श्यामाकलतालास्योपदेशिनः—तासां ईषच्चलनहेतवः ॥ § 4517

शब्दः शब्दान्तरं सूते इति तावदलौकिकम् इत्याद्युक्तं पु. ५३४ समाधत्ते—तथाहीत्यादि । सैव—पूर्वोत्पन्नैव बुद्धिः । पथि गच्छत इत्यादि ।

तीव्रेणापि शनैरेवं अतीव्रारम्भसम्भवः ।
सीदत्सचिवसामर्थ्यसापेक्षक्षीणवृत्तिना ॥ ३१६ ॥§ 4520

वीचीसन्तानदृष्टान्तः किञ्चित्साम्यादुदाहृतः ।
न तु वेगादिसामर्थ्यं शब्दानामस्त्यपामिव ॥ ३१७ ॥§ 4522

### निरावरणमेवाकाशं शब्दोत्पत्तिकारणम्

यत्तु कुड्यादिव्यवधाने किमिति विरमति शब्दसन्तानारम्भ इति पु. ५३४—नैष दोषः—निरावरणस्य हि व्योम्नः शब्दारम्भे समवायिकारणत्वं तथादर्शनात् कल्प्यते, नाकाशमात्रस्येति ॥

### शब्दस्य आश्रितत्वात् गुणत्वसाधनपक्षः, तन्निराकरणं च

यदपि गुणत्वमसिद्धं शब्दस्येति पु. ५३४—तत्र केचित् अश्रितत्वात् गुणत्वमाचक्षते—तदयुक्तम्—

आश्रितत्वं गुणत्वे हि न प्रयोजकमिष्यते ।
षण्णामपि पदार्थानां आश्रितत्वस्य संभवात् ॥ ३१८ ॥§ 4524

दिक्कालपरमाण्वादिनित्यद्रव्यातिरेकिणः ।
आश्रिताः षडपीष्यन्ते पदार्थाः कणभोजिना ॥ ३१९ ॥§ 4526

न च व्योमाश्रितत्वमपि शब्दस्य प्रत्यक्षम्; अप्रत्यक्षे नभसि तदाश्रितत्वस्याप्यप्रत्यक्षत्वात् ॥

### आकाशाप्रत्यक्षत्वेऽपि शब्दप्रत्यक्षत्वमुपपद्यते

कथमाधारपारोक्ष्ये शब्दप्रत्यक्षतेति चेत् ।
यथैवाऽऽत्मपरोक्षत्वे बुद्ध्यादेरुपलम्भनम् ॥ ३२० ॥§ 4528

एतदेवासिद्धमिति चेत्; अलं बादान्तरगमनेन । उपरिष्टान्निर्णेष्यमाणत्वात् ७ आह्निके ॥ विभोरात्मनः देहदेशावच्छेदेनैव हि ज्ञानमुत्पद्यते । सचिवाः—सहकारिणः ॥ § 4529

षण्णामपीति । (?')द्रव्याश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः प्र. भा. इति हि काणादाः ॥ § 4530

एतदेव—आत्मनोऽप्रत्यक्षत्वेऽपि तद्गुणानां प्रत्यक्षत्वमित्येतदेव ॥ § 4531
I.566/KSV

किमेतर्हि शब्दस्य गुणत्वे प्रमाणम् ? परिशेषानुमानमिति ब्रूमः । प्रसक्तयोः द्रव्यकर्मणोः प्रतिषेधे सामान्यादावप्रसङ्गाच्च गुण एवावशिष्यते शब्दः ॥ § 4532

### शब्दस्याद्रव्यत्वम्

कथं पुनः ? न द्रव्यं शब्दः, एकद्रव्यत्वात् । अद्रव्यं वा भवति द्रव्यं, आकाशपरमाण्वादि-अनेकद्रव्यं वा—द्व्यणुकादि कार्यद्रव्यम् । एकद्रव्यं तु शब्दः, एकाकाशाश्रितत्वात् । तस्मान्न द्रव्यम् ॥ § 4533

## शब्दस्य कर्मादिभिन्नत्वम्

नापि शब्दः कर्म, शब्दान्तरजनकत्वात् । कर्मणो हि समानजात्यारम्भकत्वं नास्ति ॥ § 4534

सत्ताशब्दत्वादिसामान्यसम्बन्धाच्च सामान्यादित्रयप्रसङ्गोऽस्य नास्तीति पारिशेष्यात् गुण एव शब्दः ॥ § 4535

## शब्दस्य गुणत्वसाधनम्

ननु ! गुणत्वसिद्धौ सत्यां आकाशाश्रितत्वं शब्दस्य भविष्यति; गुणस्य द्रव्यानाश्रितस्यादर्शनात् पृथिव्यादीनां च शब्दाश्रयत्वानुपपत्तेः । ततश्च गुणत्वे सति एकद्रव्यत्वं, एकद्रव्यत्वे सति गुणत्वमितीतरेतराश्रयत्वम् ॥ § 4536

तथा च समानजातीयारम्भकत्वमपि गुणत्वसिद्धिमूलमेव । गुणत्वे सति शब्दस्याकाशाश्रितत्वात् तदात्मकेन श्रोत्रेण ग्रहणम् । तच्च देशान्तरगतसंयोग-विभागप्रभवस्य शब्दस्य सन्तानमन्तरेण श्रोत्रदेशप्राप्त्यभावात् न सिध्यतीति गुणत्वसिद्धिमूला § 4537

एकद्रव्यत्वादित्यस्योपपादनं—अद्रव्यमिति । द्रव्यासमवायिकारण-कमित्यर्थः ॥ § 4538

समानजात्यारम्भकत्वं—समानजाति इत्यत्र बहुव्रीहिः । यद्यपि द्रव्यं द्रव्यान्तरमारभते, अथापि जातिभेद एव घटकपालादौ कार्यकारणताव-च्छेदकः ॥ § 4539

इतरेतराश्रयत्वान्तरमप्याह—तथा चेति ॥ § 4540
I.567/KSV

सन्तानकल्पना, सन्तानकल्पनायां च समानजात्यारम्भकत्वात् कर्म-व्यवच्छेदे सति गुणत्वसिद्धिरितीतरेतराश्रयत्वमेव ॥ § 4541

उच्यते—नोभयत्राप्येष दोषः । श्रोत्रग्राह्यत्वादेव शब्दस्याकाशाश्रितत्वं क-ल्प्यते, समानजातीयारम्भकत्वं च गुणत्वात् । आकाशैकदेशो हि श्रोत्र-मिति प्रसाधितमेतत् । प्राप्यकारित्वं चेन्द्रियाणां वक्ष्यते आह्निके ८ । न चाकाशानाश्रितत्वे शब्दस्य श्रोत्रेण प्राप्तिर्भवति; न चाप्राप्तस्य ग्रहणमिति तदाश्रितत्वं कल्प्यते ॥ § 4542

एवं समानजातीयारम्भकत्वमपि तत एव श्रावणत्वात् दूरवर्तिनः शब्दस्य श्रवणे सति कल्प्यते, न तु गुणत्वादिति नेतरेतराश्रयम् ॥ § 4543

६ ] त्रये— nyāma-wit__ka

## शब्दस्य कार्यत्वादप्याकाशाश्रितत्वं साधयितुं शक्यम्

कार्यत्वादाकाशाश्रितत्वं कल्प्यत इत्येके ॥ § 4544

ननु ! कार्यत्वादप्याकाशाश्रितत्वकल्पनायां तदवस्थमेवेतरेतराश्रयम्; कार्यत्वादाकाशाश्रितत्वम्, आकाशाश्रितत्वे सति नियतग्रहणपूर्वं पूर्वरीत्या कार्यत्वमिति—नैतदेवम्—भेदविनाशप्रतिभासाभ्यामेव कार्यत्वसिद्धेः ॥ § 4545

किमर्थस्तर्हि नियतग्रहणसमर्थनाय अयमियान् प्रयासः क्रियते ? नियतग्रहणमपि कार्यपक्षानुगुणमिति दर्शयितुम्, न पुनरेषैव कार्यत्वे युक्तिरित्यलं सूक्ष्मेक्षिकया ॥ § 4546

## शब्दस्य कर्मभिन्नत्वं प्रत्यक्षसिद्धमिति पक्षः

अपर आह—परिस्पन्दविलक्षणत्वस्य प्रत्यक्षत्वात् अकर्मत्वं शब्दस्य साध्यते, न समानजात्यारम्भकत्वात् इतीतरेतराश्रयस्पर्शोऽपि नास्तीति । तस्मात् सर्वथा परिशेषानुमानात् शब्दस्य गुणत्वसिद्धिः ॥ § 4547

उभयत्र—गुणत्वे सजातीयारम्भकत्वे च ॥ § 4548

भेदेति । अभेदे सति आकाशादिवत् नित्यत्वं स्यात् । भेदे सत्यपि परमाण्वादिवत् नित्यत्वं तु न संभवति, विनाशप्रतिभासात् ॥ § 4549

I.568/KSV

## शब्दस्य गुणत्वेऽपि महान्, अल्पः इत्यादिव्यवहारः नायुक्तः

कथं तर्ह्यस्य महत्त्वादियोगः ? निर्गुणा गुणाः इति हि काणादाः । अस्ति हि प्रतीतिः महान् शब्दः इति—समानजातीयगुणाभिप्रायं तत् कणादवचनमिति न दोषः । तस्मादाकाशगुणः शब्दः ॥ § 4550

अपि च— § 4551

> यथाऽऽत्मगुणता हीच्छाद्वेषादेरुपपत्स्यते ।
> शब्दो नयेन तेनैव भविष्यति नभोगुणः ॥ ३२१ ॥§ 4553

## शब्दस्य शब्दान्तरजनकत्वं युक्तमेव

ये तु समानजातीयशब्दारम्भकत्वनिषेधहेतवः, शब्दत्वात् इत्यादयः परैरुपन्यस्ताः पु. ५३५—तेषामप्रयोजकत्वात् न साधनत्वम् ॥ § 4554

> इत्थं सन्तानवृत्त्या च शब्दग्रहणसम्भवे ।

१ ] इत्यन्ये— nyāma-wit_ka

कल्पनाऽल्पतराऽस्माकं न शब्दव्यक्तिवादिनाम् ॥ ३२२
॥§ 4556

शाक्यकापिलनिर्ग्रन्थग्रथितप्रक्रियां प्रति ।
यत्तु दूषणमाख्यातं अस्माकं प्रियमेव तत् ॥ ३२३ ॥§ 4558

समानजातीयेति । तेषां गुणरहितत्वं स्वात्मनि गुणान्तरानारम्भकत्वात् । तदनारम्भकत्वं च रूपादिषु रूपाद्यन्तरानुपलब्धेः, अनवस्थानाच्च इत्येव श्रीधरेण कन्दल्यां पु. ९४ युक्तिकथनात् रूपे रूपं नास्तीत्येवमङ्गीकारेऽपि संख्याद्यङ्गीकारे न हानिरिति भावः । ननु तर्हि गुणोऽपि द्रव्यवत् समवायिकारणं स्यात् इति चेत्—इष्टापत्तिः । अथवा इदं वैभवेनोक्तम् । महत्त्वादिकं शब्दोत्पत्तिहेतुभूताभिघाताख्यसंयोगौपाधिकं स्यात्, तथैवानुभवात् ॥ § 4559

एवमनङ्गीकारे आकाशवत् आत्माऽपि न सिध्येदित्याह—अपि चेति ॥ इच्छाद्वेषादयो हि शरीरेन्द्रियाद्युपाधिका एव दृष्टा इति आत्माऽपि आकाशवदन्यथासिद्धः स्यात् ॥ § 4560

अप्रयोजकत्वादिति । पूर्वोक्तदिशा शब्दस्य शब्दान्तरजनकत्वस्यानिवार्यत्वात्, अन्यथा आत्मगुणानामपि ज्ञानादीनां तथात्वप्रसङ्गादित्यर्थः । आत्मगुणानां तु तथात्वं तत्प्रकरणे साधयिष्यते ॥ § 4561

I.569/KSV

तस्मात् कार्यपक्षे नियतग्रहणोपपत्तेः, अभिव्यक्तिपक्षे च तदभावात् कार्य एव शब्द इति स्थितम् ॥ § 4562

तदिदमुक्तं सूत्रकृता— § 4563

आदिमत्त्वादैन्द्रियकत्वात् कृतकवदुपचाराच्चानित्यः शब्दःन्या. सू. २-२-१३ इति ॥ § 4564

आदिमत्वादिति संयोगविभागादीनां शब्दे कारकत्वं, न व्यञ्जकत्वमिति दर्शितम् । अतश्च न प्रयत्नानन्तरीयकत्वं अनैकान्तिकम् ॥ § 4565

ऐन्द्रियकत्वादिति कार्यपक्ष एव शब्दस्य नियतं ग्रहणमित्युक्तम् । प्रतिपुरुषं प्रत्युच्चारणं च शब्दभेदस्यैन्द्रियकत्वादिति वा हेत्वर्थः । तेन प्रत्यभिज्ञादुराशा श्रोत्रियाणामपाकृता भवति ॥ § 4566

कृतकवदुपचारादिति तीव्रमन्दविभागाभिभवादिव्यवहारादर्शनात् सुखदुःखादिवदनित्यः शब्द इति दर्शितम् ॥ § 4567

तथा— § 4568

प्रागूर्ध्वमुच्चारणादनुपलब्धेः आवरणानुपलब्धेश्च न्या. सू. २-२-१८ § 4569

इत्यनेन सूत्रेण शब्दाभावकृतमेव तदग्रहणमित्युक्तम् । न हि स्तिमिता वायवः शब्दमावरीतुमर्हन्ति । मूर्तं हि मूर्तेन व्यवधीयते, नामूर्तं, आकाशादिवत् । न च प्रकृत्यैवाकाशादिवदतीन्द्रियः शब्दः । तस्मात् क्षणिकप्रतीतेस्तत्कालमेव शब्दस्यावस्थानमिति अस्थानहेतोरपि नान्यथासिद्धत्वम् ॥ § 4570

प्रागूर्ध्वमिति । उच्चारणात् प्राक्, उच्चारणादूर्ध्वं इत्यन्वयः ॥ § 4571

अस्थानहेतोरिति । अस्थानात् जै. सू. १-१-७ इति पूर्वपक्षसूत्रे— उत्पन्नस्य शब्दस्य अवस्थित्यदर्शनात् विनष्टः शब्दः इत्यनित्यत्वमुक्तम् । अस्य समाधानं सतः परमदर्शनं विषयानागमात् जै. सू. १-१-३३ इति । विद्यमानस्यैव शब्दस्याग्रहणं इन्द्रियदेशाप्राप्त्यैव, न त्वविद्यमानत्वात् ।

**वार्तिकोक्तशब्दानित्यत्वसाधनप्रकारः**

वार्तिककृता शब्दानित्यत्वे साधनमभिहितं अनित्यः शब्दः, जातिमत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वात्, घटवत् न्या. वा. २-२-१४ इति ॥

**कुमारिलोक्तवार्तिकदूषणस्योद्धारः**

यत्तु अत्र जातीनामपि जातिमत्त्वादनैकान्तिकत्वमुद्भावितम् —एकार्थसमवायेन जातिर्जातिमती यतः हि वः श्लो. वा. १-१-६-३-३९ इति— तत् अत्यन्तमनुपपन्नम्—निस्सामान्यानि सामान्यादीनीति सुप्रसिद्धत्वात् । न हि घटे घटत्वपार्थिवत्वे स्तः इति घटत्वसामान्येऽपि पार्थिवत्वसामान्यमस्तीति शक्यते वक्तुम्, अतो निरवद्य एवायं हेतुः ॥ शब्दस्तु नित्यः, वायवीयसंयोगविभागाभिव्यङ्ग्यः । ततश्च ताल्वादिसंयोगविभागात् वायौ सूक्ष्माः संयोगविभागा जायन्ते । ते च क्रमशः श्रोत्रं प्राप्य तत्रापि शब्दमभिव्यञ्जयन्ति । श्रोत्रेण च वायुस्संयुक्तः, तत्समवेतश्च ध्वन्यात्मकः शब्दः । स एव च वर्णानामभिव्यञ्जकः । तथा च संयुक्तसमवायात् शब्दग्रहणम् न्या. र. स्फोट. ३९ + शब्दानित्य-३४ । एवञ्च शब्दाभिव्यञ्जकवायवीयसंयोगविभागानां श्रोत्रदेशाप्राप्त्या शब्दस्याग्रहणम्, न तु अस्थानात् । यथा वा सत एवाकाशस्य कूपरूपस्य मृत्पूरणेऽग्रहणं तिरोधानादेव, न त्वस्थानात् तथेति कूपपूरणयत्नेन खं तिरोधीयते यदा । अस्थानादित्ययं हेतुः तदाऽनैकान्तिको भवेत् श्लो. वा. १-१-६-३८ इत्युक्तं न युक्तम्—इत्यर्थः ॥ § 4572

जातिमत्त्वे सति इति सामान्यादिवारणाय । आत्मवारणाय बाह्यपदम् ॥ § 4573

न हीत्यादि । एकार्थसमवायो हि सामानाधिकरण्यविशेषः । सामानाधिकरण्यसम्बन्धश्च न विशिष्टवैशिष्ट्यव्यवहारहेतुः । तर्हि एकभूतलवृत्तित्वमात्रादपि दण्डी इत्यादिव्यवहारापत्तिः । यद्यपि एकं रूपम् इत्यादौ सामानाधिकरण्यस्यापि तथात्वमङ्गीकृतम्, अथापि जातिद्वयस्य तथात्वं तु न भवत्येव । जातिर्हि विलक्षणप्रतीतिनिर्वाहकतया सिद्धा । यदि एका

१७ ] सामान्यानीति—

nyāma-wit__ka

जातिः अन्यत्रापि सामानाधिकरण्येन स्यात्, तर्हि कथं वैलक्षण्यनिर्वाहः इत्याद्यूह्यम् ॥ § 4574
I.571/KSV

तेन यदुच्यते—श्लो. वा. १-१-५, अनु. २१

जातिमत्त्वेन्द्रियत्वादि वस्तुसन्मात्रबन्धनम् ।
शब्दानित्यत्वसिध्यर्थं को वदेत् ? यो न तार्किकः ॥§ 4577

इति—तदविदिततार्किकपरिस्पन्दस्य व्याहृतम् ॥ § 4578

## मीमांसकोक्तशब्दनित्यत्वहेतूनामेवाप्रयोजकत्वम्

इह त्वप्रयोजका हेतवो भवन्ति— § 4579

ह्यस्तनोच्चारितस्तस्मात् गोशब्दोऽद्यापि वर्तते ।
गोशब्दज्ञानगम्यत्वात् यथोक्तोऽद्यैष गौरिति ॥ ३२४ ॥§ 4581

विज्ञानग्राह्यता नाम वस्तुस्वाभाव्यबन्धना ।
नित्यत्वे कृतकत्वे वा न खल्वेषा प्रयोजिका ॥ ३२५ ॥§ 4583

अप्रयोजकता चैवंप्रायाणां चैवमुच्यते ।
स्वयं चैते प्रयुज्यन्ते हेतुत्वेनेति किं न्विदम् ॥ ३२६ ॥§ 4585

## शब्दानित्यत्वविचारनिगमनम्

एवं नित्यत्वे दुर्बलो युक्तिमार्गः
तस्मान्मन्तव्यः कार्य एवेति शब्दः ।
वाचोयुक्तित्वे वैदिको योऽनुवादः
न्याये प्रत्युक्ते किंफलस्तत्प्रयोगः ॥ ३२७ ॥§ 4589

कृतकत्वसावयवत्वादिप्रयुक्तेऽनित्यत्वे वक्तव्ये, वस्तुसत्तामात्रनिबन्धनं सर्ववस्तुसाधारणं जातिमत्त्वेन्द्रियकत्वादि तार्किकादन्यः को वदेत्—इत्युपहासः । अविदितेत्यादि । परिस्पन्दः—व्यवहार इति यावत् । न हि तार्किकाः जातिमत्त्वं, ऐन्द्रियकत्वं वा सर्ववस्तुसाधारणं वदन्ति ॥ § 4590

वस्तुस्वाभाव्यबन्धनेति । ज्ञेयत्वं हि केवलान्वयि; न तु जाति मत्वादि ॥ § 4591

I.572/KSV

१७ ] प्रयुक्ते— nyāma-wit_kha

### शब्दस्यास्थिरत्वोपसंहारः

क्षणभङ्गिभावस्याभावादपि शब्दस्य क्षणिकतां न वक्तुमलम् । स्थूल-विनाशभावादिति यदुक्तं पु. ५४०—तदप्यनृतम्— § 4592

सूक्ष्मविनाशापेक्षी नाशः स्थूलस्थिरस्य कुम्भादेः ।
* प्रकृतितरलस्य नाशः शब्दस्य स एव हि स्थूलः ॥ ३२८ ॥ § 4594

सत्त्वाद्यदि क्षणिकतां कथयेत्, पुरा वा
शब्दस्तदैष कथमक्षणिकोऽभिधेयः ।
युक्त्यन्तराद्यदि तदेव हि तर्हि चिन्त्यम्
* किं प्रौढिवादबहुमानपरिग्रहेण ॥ ३२९ ॥ § 4598

अलमतिविततोक्त्या त्यज्यतां नित्यवादः
कृतक इति नयज्ञैः गृह्यतामेष शब्दः ।
सति च कृतकभावे तस्य कर्ता पुराणः
कविरविरलशक्तिः युक्त एवेन्दुमौलिः ॥ ३३० ॥ § 4602
इति श्रीजयन्तभट्टकृतौ न्यायमञ्जर्यां तृतीयमाह्निकम्

## १.४ चतुर्थमाह्निकम्—शब्दपरीक्षा

I.573/KSV

### वेदानां पौरुषेयत्वानुमानम्

एवं कृतकत्वे वर्णानां साधिते सति वर्णात्मनः पदात् प्रभृति * सर्वत्र पुरुषस्य स्वातन्त्र्यं सिद्धं भवति ॥ § 4604

---

२ ] तदपि नृत्तम्—
nyāma-wit_kha

---

४ *] प्रकृतीति । निरवयवस्य शब्दस्य नाशः न ह्यवयवनाशाधीन इत्यर्थः ॥
८ *] स्थूलविनाशभावादित्येतत् अंगीकृत्यवाद इति चेत्, तत्राह— किमिति ॥ --- इति न्यायसौरभे तृतीयमाह्निकम्
१ *] सर्वत्र—वाक्यादिषु । वर्णानामेवानित्यत्वे वाक्यानां अनित्यत्वं कैमुतिकसिद्धमिति भावः ॥

*पदनित्यत्वपक्षेऽपि वाक्ये तद्रचनात्मके ।
कर्तृत्वसंभवात् पुंसः, वेदः कथमकृत्रिमः ॥ १ ॥§ 4606

तथा च वैदिक्यो रचनाः कर्तृपूर्विकाः, रचनात्वात्, लौकिकरचनावत् । एष च पञ्चलक्षणो हेतुः, प्रयोजकश्चेति गमक एव, न हेत्वाभासः ॥ § 4607

## वेदपौरुषेयत्वानुमाने दूषणोद्धारः

न तावदयमसिद्धो हेतुः; शन्नो देवीरभिष्टये अथ. सं. १-६-१ इत्यादिषु वेदवाक्यसन्दर्भेषु पदरचनाया स्वरक्रमादिविशेषवत्याः प्रत्यक्षत्वेन पक्षे हेतोः वर्तमानत्वात् ॥ § 4608

नापि विरुद्धः; कर्तृपूर्वकत्ववति सपक्षे कुमारसम्भवादौ रचनात्वस्य विद्यमानत्वात् ॥ § 4609

नाप्यनैकान्तिकः; कर्तृरहितेषु गगनादिषु, गगनकुसुमादिषु वा रचनाया अदृष्टत्वात् ॥ § 4610

एतदाह्निके टिप्पणीस्थलानां विरलत्वात् सुज्ञानार्थं तानि चिह्नैर्योजितानि § 4611

I.574/KSV

नापि कालात्ययापदिष्टः; प्रत्यक्षेण, आगमेन वा वेदे वक्त्रभावनिश्चयानुत्पादात् ॥ § 4612

नापि सत्प्रतिपक्षः; *प्रकरणचिन्ताहेतोः स्थाणुपुरुषविशेषानुपलब्धेरिव हेतुत्वेनानभिधानात् ॥ § 4613

नापि परमाण्वनित्यतायामिव मूर्तत्वं अप्रयोजकमिदं साधनम्; रचनाव्यापाराणां कर्तृव्यापारसाध्यत्वावधारणात् । *यथा धूमस्य ज्वलनाधीन आत्मलाभः; ज्ञप्तिस्तु धूमादग्नेः—तथा कर्त्रधीना रचनानामभिनिर्वृत्तिः, प्रतीतिस्तु ताभ्यः कर्तुरिति । तस्मात् प्रयोजक एवायं हेतुः ॥ § 4614

## वेदपौरुषेयत्वानुमानस्य ससत्प्रतिपक्षत्वाशङ्कानिरासः

---

८ ] कर्तृत्व— nyāma-wit__kha
१० ] गगनादिषु— nyāma-wit__ka

---

१ *] पदेत्यादि । यद्यपि वर्णनित्यत्वपक्षेऽपि इति वक्तुमुचितम्; परन्तु मीमांसकैः, औत्पत्तिकसूत्रे शब्दार्थयोस्सम्बन्धस्य सहजत्वं स्थापितम् । तत्र प्रसक्तः शब्दः पदरूप एव । अतश्च तदनन्तरे शब्दनित्यताधिकरणे पदात्मकस्यैव नित्यत्वं साधितमिति एवमुक्तम् ॥
४ च] पञ्चलक्षणः—पक्षसत्त्वादि पु. २८२ युक्तः ॥
१६ *] प्रकरणचिन्तेति । यस्मात्प्रकरणचिन्ता स प्रकरणसमः न्या. सू. १-२-७ सौत्रलक्षणानुरोधेन एवमुक्तिः । प्रकरणं—पक्षप्रतिपक्षौ, तावधिकृत्य चिन्तेत्यर्थः ॥
१९ *] ननु कर्तृपूर्वकत्वे रचनात्वं हेतुरिति कथम् ? रचनायां हि कर्ता हेतुः, न तु कर्तरि रचना हेतुरित्यत्राह—यथेति । तथा च कारकहेतोः, कार्यं ज्ञापकहेतुर्भवतीत्यर्थः ॥

ननु ! सत्प्रतिपक्षत्वे विवदन्ते । तथा च मीमांसकैः प्रतिहेतुरिह गीयते श्लो. वा. १-१-७-३६६—

*वेदस्याध्ययनं सर्वं गुर्वध्ययन पूर्वकम् ।
वेदाध्ययनवाच्यत्वात् अधुनाऽध्ययनं यथा§ 4617

इति—नैतद्युक्तम्—एवंप्रायाणां प्रयोगाणामप्रयोजकत्वात् । न हि * तच्छब्दवाच्यत्वकृतं अनादित्वमुपपद्यते ॥ § 4618

I.575/KSV

अनैकान्तिकश्चायं हेतुः, भारतेऽप्येवमभिधातुं शक्यत्वात् । भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकम्, भारताध्ययनवाच्यत्वात्, इदानींतनभारताध्ययनवत् इति ॥ § 4619

## वेदस्यापौरुषेयत्वे भारतादेरप्यपौरुषेयत्वप्रसङ्गः

ननु ! भारते कर्तृस्मृतिरविगीता विद्यते; यद्येवं वेदेऽपि प्रजापतिः कर्ता स्मर्यत एव ॥ § 4620

* अथ वैदिकमन्त्रार्थवादमूलेयं प्रजापतिकर्तृत्वस्मृतिः; प्रजापतिना चत्वारो वेदा असृज्यन्त, चत्वारो वर्णाः चत्वार आश्रमाः इति तत्र पाठादिति—उच्यते—हन्त तर्हि भारतेऽपि तत्रत्यवचनमूलैव पाराशर्यस्मृतिरिति शक्यते वक्तुम् ॥ § 4621

## पौरुषेयत्वापौरुषेयत्वयोः वेदभारतयोस्तौल्यम्

यथा प्रजापतिर्वेदे तत्र तत्र प्रशस्यते ।
भारतेऽपि तथा व्यासः तत्र तत्र प्रशस्यते ॥ २ ॥§ 4623

अथ प्रणेता वेदस्य न दृष्टः केनचित् क्वचित् ।

---

१ ] विवदन्ते च— nyāma-wit_kha
१२ ] स्मृतिः— nyāma-wit_kha
१३ ] असृजन्त— nyāma-wit_ka
१४ ] तत्र वचन—ख. प्रवचन— nyāma-wit_ga

---

३ *] वेदस्येत्यादि । नन्वेतावताऽपि कथं वेदनित्यत्वसिद्धिरिति चेत्, एवमेव सर्वेषामध्ययनानां तत्तदध्ययनपूर्वकत्वे सिद्धे महाप्रलयानङ्गीकारात् संसारस्यानादित्वसिध्या वेदानादित्वसिद्धिः ॥
५ *] तच्छब्दः—वेदाध्ययनशब्दः ॥
११ र्ता] स्मर्यते । तथा च प्रदर्शयिष्यत्युत्तरत्र ॥
१२ *] अथेति । मन्त्राणामर्थवादानां च न स्वप्रतिपाद्यार्थे प्रामाण्यम् । अपि च मन्वादिस्मृतयो हि वेदानुसारादेव प्रमाणानि । वेदस्तु स्वविषये स्वयं कथं प्रमाणं भवेत् । न हि विप्रतिपत्तिस्थले विप्रतिपन्नवाक्यमेव प्रमाणीकर्तुं शक्यमिति भावः ॥ ---
तत्रत्येति । भारतस्थेत्यर्थः ॥

द्वैपायनोऽपि किं दृष्टः भवत्पितृपितामहैः ॥ ३ ॥§ 4625

सर्वेषामविगीता चेत् स्मृतिः सत्यवतीसुते ।
प्रजापतिरपि स्रष्टा लोके सर्वत्र गीयते ॥ ४ ॥§ 4627

I.576/KSV

## वेदपौरुषेयत्वासंभवपूर्वपक्षः

आह—किमिति सदसद्विवेकविकलशाकटिकादिप्रवादविप्रलब्धः एवं भ्राम्यसि ? किल स्वल्पमपि कर्म पित्रा मात्रा वोपदिश्यमानं तद्वचनप्रत्ययादनुष्ठीयते । तदयमियान् अनेकक्लेशवित्तव्ययादिनिर्वर्त्यो वैदिकः कर्मकलापः एवमेव तदुपदेशिनमाप्तं संस्मृत्यैव क्रियते इति महान् प्रमादः ॥ § 4628

* एवञ्च सति उच्चावचकविरचितजरत्पुस्तकलिखितकाव्यवत् अस्मर्यमाणकर्तृकेण वेदेन व्यवहारानुपपत्तेः अवश्यस्मरणीयः तत्र कर्ता स्यात् । न च कदाचन वेदेषु व्यवहारविच्छेदः संभाव्यते, येन तत्कृतं जरत्कूपारामादिष्विव तेषु कर्त्रस्मरणं स्यात् । तस्मादवश्यं स्मर्येत कर्ता । न च संस्मर्यते, स्मर्तुं शक्यते वा ? स्मृतिर्हि भवन्ती तदनुभवमूला भवति । न च मूलेऽपि कर्त्रनुभवः कस्यचिज्ज्ञातः, सर्गादेरभावात् । भावे वा कर्तुरशरीरत्वेन दर्शनयोग्यत्वाभावात् ॥ § 4629

## वेदानां पौरुषेयत्वेऽप्यनादित्वमवर्जनीयम्

सशरीरत्वपक्षे वा पुरुषः कोऽपि तादृशः ।
तदानीं दृश्यमानोऽपि वेदं कुर्वन्न दृश्यते ॥ ५ ॥§ 4631

* अधीयमाने दृष्टेऽस्मिन् तदा संशेरते जनाः ।
किमेष रचयेद्वेदं उत वाऽन्यकृतं पठेत् ? ॥ ६ ॥§ 4633

I.577/KSV

---

१५--१६ ] न चासां—
nyāma-wit__ka

---

४ ल ] शाकटिकः—शकटेन जीवतीत्यर्थे ठक्, पामर इति यावत् ॥
७ लापः ] एवमेवेति । न ह्येवं लोके दृश्यते, संभवि वेत्याशयः ॥
९ * ] एवञ्च सति—वेदस्य सकर्तृकत्वेऽङ्गीकृते सति ॥
११ येन ] तत्कृतं—विच्छेदकृतम् ॥
१८ * ] अधीयमान इति । लटः शतृशानचौ इति शानच् । आदिपुरुषे वेदं पठति सतीत्यर्थः ॥

यत्कृतं वा पठेदेषः तस्मिन्नपि हि संशयः ।
भङ्ग्या चेदमनादित्वं उन्मीलदिव दृश्यते ॥ ७ ॥§ 4635

*असत्यादिप्रमाणे च कर्तृताऽनुभवं प्रति ।
स्मृतिः प्रबन्धसिद्धाऽपि स्पृशत्यन्धपरम्पराम् ॥ ८ ॥§ 4637

योगिभिर्ग्रहणं कर्तुः इत्येतदपि दुर्वचम् ।
कर्तृता हृदि दुर्बोधा कथं गृह्येत तैरपि ? ॥ ९ ॥§ 4639

योगिभिस्सा गृहीतेति वयमेतन्न मन्महे ।
अमन्वानाश्च गच्छेम विस्रब्धास्तत्पथं कथम् ? ॥ १० ॥§ 4641

वेदात् कर्त्रवबोधे तु स्पष्टमन्योन्यसंश्रयम् ।
ततो वेदप्रमाणत्वं वेदात् कर्तुश्च निश्चयः ॥ ११ ॥§ 4643

तस्मात् पौर्वापर्यपर्यालोचनारहितयथाश्रुतमन्त्रार्थवादमूला भ्रान्तिरेषा, न पुनः परमार्थतः कश्चित् कश्चित् वेदस्य कर्तारं स्मरति । तस्मात् अकृतका वेदाः; अवश्यस्मरणीयस्यापि कर्तुः अस्मरणात् । न च व्यधिकरणो हेतुः; अस्मर्यमाणकर्तृकत्वादित्येवं साधनप्रयोगात् ॥ § 4644

## अस्मर्यमाणकर्तृकत्वात् न वेदानादित्व सिद्धिः

अत्रोच्यते—अपि तत् गुर्वध्ययनपूर्वकत्वं साधनमुपेक्षितं याज्ञिकैः ! अयमभिनवो हेतुः अस्मर्यमाणकर्तृकत्वात् इति प्रयुक्तः ! § 4645

I.578/KSV

तस्मादस्तु नाम ! नैनान् हेत्वन्तरोपन्यासिनः निगृह्णीमः । *अक्षुदकथेयं प्रस्तुता ॥ § 4646

अयमपि अस्मर्यमाणकर्तृकत्वादिति हेतुः किं स्वतन्त्र एवाकर्तृकत्व-सिद्धये प्रयुज्यते ? उत अस्मदुपरचितरचनात्वप्रतिघाताय ? इति ॥ § 4647

२ ] प्रयोज्यते— nyāma-wit__kha

२ ] चरित— nyāma-wit__kha

२ नादित्वं ] उन्मीलदिव—अङ्कुरायमाणमिव ॥
३ *] असति इति पदविभागः ॥
६ र्तृता ] हृदि दुर्बोधा—मनसाऽपि प्रतिपत्तुमशक्या ॥
७ गृहीतेति ] वयं—अयोगिनः इतरे ॥
११ भ्रान्तिरेषा ] एषा—वेदपौरुषेयत्वस्मृतिः ॥
१३ च ] व्यधिकरण इति । कर्तुः अस्मरणादित्युक्ते हि स्मरणाभावो हेतुः प्राप्तः । स च चेतनगतः, न तु पक्ष इति हेतुसाध्ययोर्वैयधिकरण्यम् ॥
१६ वो ] अभिनव इति हेत्वन्तररूपनिग्रहस्थानोपपादकम् ॥
१७ *] अक्षुद्रा—महती उपहासोऽयम् ॥
१९ किं ] स्वतन्त्रः—रचनात्वहेतुकसकर्तृकत्वानुमानवत् स्वसाध्यसाधनक्षमः ॥
२० उत ] अस्मदित्यादि । अस्माभिर्वर्णिते रचनात्वहेतौ सप्रतिपक्षत्वसंपादनायेत्यर्थः ॥

## अनुमानस्य अनुमानेन बाधासंभवः

*तत्र न तावदनुमानं अनुमानान्तरपरिपन्थि कथयितुमुचितम्; *प्रत्यक्षागमवत् अनुमानस्याप्यनुमानबाधकत्वानुपपत्तेः । न हि तुल्यबलयोः अनुमानयोः बाध्यबाधकभावः, तुल्यबलत्वादेव । अतुल्यबलत्वे तु यत्कृतं अन्यतरस्य दौर्बल्यं, तत एव तदप्रामाण्यसिद्धेः किमनुमानबाधया ? § 4648

I.579/KSV

तद्विडम्बनार्थं तदभिधानमिति चेत्; तदप्ययुक्तम् । एकत्र धर्मिणि युगपदितरेतरविरोधिधर्मद्वयप्रयोजकहेतुद्वयोपनिपातायोगात् । न हि द्व्यात्मकानि वस्तूनि भवितुमर्हन्ति इत्यवश्यमन्यतरः तत्राप्रयोजकहेतुः । अप्रयोजकत्वादेव तस्यागमकत्वे किं विडम्बनार्थेन हेत्वन्तरेण प्रयुक्तेन । विरुद्धाव्यभिचार्यपि नाम न कश्चिद्धेत्वाभास इति वक्ष्यामः ११ आह्निके ॥ § 4649

## सत्प्रतिपक्षस्थलेऽपि नानुमानेनानुमानस्य बाधः

प्रकरणसमोऽपि न यः कश्चित् सत्प्रतिपक्षो हेतुरिष्यते, अपि तु संशयबीजभूतः अन्यतरविशेषानुपलम्भः भ्रान्त्या हेतुत्वेन प्रयुज्यमानः तथोच्यत इति दर्शयिष्यामः ११ आह्निके । तस्मात् परोदीरितं हेतुं निराचिकीर्षता वादिना तद्गतपक्षवृत्तितादिधर्मपरीक्षणे मनः खेदनीयम् । न हि प्रतिहेत्वन्वेषिणा वृथाऽटाट्या कर्तव्या ॥ § 4650

---

९ ] तथा— nyāma-wit__kha
१३ ] लम्भे— nyāma-wit__kha
१--२ ] चिकीर्षिता— nyāma-wit__kha
३ ] हेतुत्वा— nyāma-wit__kha

---

१ *] सूचीकटाहन्यायेन द्वितीयकल्पं निराकरोति—तत्रेति ॥
१ *] प्रत्यक्षागमवत् इति व्यतिरेकदृष्टान्तः ॥
३ तु] यत्कृतमिति । प्रत्यक्षविरोधात्
nI.579/KSV वह्न्यनुष्णत्वानुमानं, आगमविरोधात् नरशिरःकपालशौचाद्यनुमानं च दुर्बलं वक्तव्यम् । तथा च प्रत्यक्षं आगमश्चेति द्वयमेव बाधकं, न त्वनुमानं अनुमानस्य, तौल्यादिति सिद्धम् । ननु तर्हि शुक्तिरजतप्रत्यक्षस्य नेदं रजतमिति प्रत्यक्षं बाधकं सर्वसम्मतम् । एवं शब्देऽपि अपरीक्षकवाक्यस्य परीक्षकवाक्यं बाधकं दृष्टम् । प्रत्यक्षत्वाद्यविशेषे कथमन्यतरस्य बाधकत्वं बाध्यत्वं वेति चेत्; न हि वयं प्रत्यक्षत्वं शब्दत्वं वा बाधकत्वे बाध्यत्वे वा प्रयोजकं वदामः । निरवकाशं यत् तत् बाधकं, सावकाशं चेत् बाध्यमित्येव निष्कर्षः । ननु तर्हि अनुमानेऽपि कुतस्तथा नास्तीति चेत्, अनुमानस्य सावकाशत्वनिरवकाशत्वे हि प्रत्यक्षागमाधीने एव दृष्टे । दृष्टे विषये प्रत्यक्षं, अदृष्टे आगमश्चेति द्वयमेव स्वतन्त्रं प्रमाणम् ।अनुमानं तु तत्पूर्वकं इति निर्दिष्टमेव । अतश्च अनुमानस्य बाधकत्वं यादृशप्रत्यक्षागममूलकत्वकृतं, तादृशप्रत्यक्षागमयोरेव पूर्वानुमानबाधकत्वमिति अनुमानेन नानुमानबाधसंभव इत्याशयः ॥
९ इति] वक्ष्याम इति । पूर्वमपि पु. २९३-२९४ इदं सामान्यतो विचारितम् ॥
१३ णे] मनः खेदनीयं—परिश्रमः करणीय इति भावः । अधिकं तु ११ आह्निके स्पष्टीकृतं द्रष्टव्यम् ॥

## रचनात्वहेतुकानुमानस्याप्रयोजकत्वासंभवः

ननु ! कतरदनयोः साधनयोरप्रयोजकं—रचनात्वात्, अस्मर्यमाणकर्तृकत्वादिति च—उच्यते—रचनात्वमेव प्रयोजकम् । न हि पुरुषमन्तरेण क्वचिदक्षरविन्यास इष्टव्य ॥ § 4651

भो भगवन्तः सभ्याः ! क्वेदं दृष्टं क्व वा श्रुतं लोके ।
यद्वाक्येषु पदानां रचना नैसर्गिकी भवति ॥ १२ ॥§ 4653

I.580/KSV

यदि स्वाभाविकी वेदे पदानां रचना भवेत् ।
*पटे हि हन्त तन्तूनां कथं नैसर्गिकी न सा ? ॥ १३ ॥§ 4655

शन्नो देवीरभिष्टयेअथ. सं. १-६-१, नारायणं नमस्कृत्यम. भा. आ. १-१, अस्त्युत्तरस्यां दिशि देवतात्माकुमारसं. १-१ इति तुल्ये रचनात्वे क्वचित् कर्तृपूर्वकत्वं, अपरत्र तद्विपर्यय इति महान् व्यामोहः । एवं हि धूमोऽपि कश्चित् अनग्निक इत्यपि स्यात् ॥ § 4656

## वेदस्य पौरुषेयत्वेऽपि न लौकिककाव्याद्यवैलक्षण्यम्

किमिदानीं कुमारसंभवतुल्योऽसौ वेदः संपन्नः ? अहो ! *सर्वास्तिकधुर्येण वेदप्रामाण्यं साधितं नैयायिकेन ! § 4657

अलमुपहासेन ! रचनामात्रमेव तुल्यं वेदस्य कुमारसंभवेन, नान्यत् । न चेयतोपहसितुं युक्तम् । किमस्य शब्दत्वसामान्यं शङ्खशब्दसाधारणं नास्ति ? सत्तासामान्यं वा सर्वसाधारणमिति ॥ § 4658

## वेदस्य पौरुषेयत्वासंभवशङ्का

ननु ! याः कालिदासादिरचनाः कर्तृपूर्विकाः ।
ताभ्यो विलक्षणैवेयं रचना भाति वैदिकी ॥ १४ ॥§ 4660

इहाध्ययनवेलायां रूपादेव प्रतीयते ।
अकृत्रिमत्वं वेदस्य भेदैस्तैस्तैरनन्यगैः ॥ १५ ॥§ 4662

---

१३ ] एवं— nyāma-wit_kha
१८ ] शब्दत्वं— nyāma-wit_kha

---

५ ना] नैसर्गिकी—पुरुषनिरपेक्षा ॥
७ *] प्रत्यक्षापलापोऽयमित्याशयेनाह—पट इत्यादि ॥

१२ *] सर्वास्तिकेत्यादि । वेदप्रामाण्यरक्षणं नैयायिकानामेव भारः इति ह्युक्तं पु. ७-१० इति भावः ॥

नामाख्यातोपसर्गादिप्रयोगगतयो नवाः ।
स्तुतिनिन्दापुराकल्पपरकृत्यादिगीतयः ॥ १६ ॥§ 4664
I.581/KSV

*शाखान्तरोक्तसापेक्षविक्षिप्तार्थोपवर्णना ।
इत्यादयो न दृश्यन्ते लौकिके सन्निबन्धने ॥ १७ ॥§ 4666

तेनाध्येतृगणाः सर्वे रूपात् वेदमकृत्रिमम् ।
मन्यन्त एव लोके तु पीतं मीमांसकैर्यशः ॥ १८ ॥§ 4668

वेदा न पठिता यैस्तु त्वादृशैः कुण्ठबुद्धिभिः ।
कार्यत्वं ब्रुवते तेऽस्य रचनासाम्यमोहिताः ॥ १९ ॥§ 4670

## वेदानां पौरुषेयत्वं दुरपह्नवम्

उच्यते—मीमांसकाः यशः पिबन्तु ! पयो वा पिबन्तु ! बुद्धिजाड्यापनयनाय ब्राह्मीघृतं वा पिबन्तु ! वेदस्तु पुरुषप्रणीत एव, नात्र भ्रान्तिः ॥
§ 4671

यथा घटादिसंस्थानात् भिन्नमप्यचलादिषु ।
संस्थानं कर्तृमत् सिद्धं वेदेऽपि रचना तथा ॥ २० ॥§ 4673

यच्चात्र किञ्चिद्वक्तव्यं, तत् पूर्वमेव पु. ४९१ सविस्तरमुक्तम् ॥ § 4674

## वेदानां रचनावैलक्षण्यात् तत्कर्ताऽपि विलक्षण एव

अपि च यद्विलक्षणेयं रचना, तद्विलक्षण एव कर्ताऽनुमीयताम् ! न पुनस्तदपलापो युक्तः इत्यप्युक्तम् पु. ५०३ ॥ § 4675

याश्चैताः निर्विवादसिद्धकर्तृकाः कालिदासादिरचनाः चमत्कारिण्यः, तासामन्योन्यविसदृशं रूपमुपलभ्यत एव ॥ § 4676
I.582/KSV

---

६ ] नीतयः— nyāma-wit__kha
७ ] वर्णनम्— nyāma-wit__kha
३ ] रचनाः— nyāma-wit__kha

---

१ यो ] नवाः—लोके अपरिचिताः ॥
३ *] शाखान्तरेत्यादि । एकं वा रूपसंयोग चोदनाख्याऽविशेषात् जै. सू. २-४-९, सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ब्र. सू. ३-३-१ इत्यादौ हि शाखान्तरोक्तार्थानामप्युपसंहारादिर्निरूपितः
। अल्पबुद्धिमतां वाक्यं नैतावद्विस्तृतं भवेत्
। अत एव—सन्निबन्धने इत्युक्तिः ॥
१२ टादिसंस्थानात् ] भिन्नं—विलक्षणम् । रचनासु वैलक्षण्यमात्रेण कथमकर्तृकत्वसिद्धिरित्यर्थः ॥

अमृतेनेव संसिक्ताः चन्दनेनेव चर्चिताः ।
चन्द्रांशुभिरिवोन्मृष्टाः कालिदासस्य सूक्तयः ॥ २१ ॥§ 4678

प्रकटरसानुगुणविकटाक्षररचनाचमत्कारितसकलकविकुलाः बाणस्य वाचः । प्रतिकाव्यं च तानि तानि वैचित्र्याणि दृश्यन्त एव । नामाख्यातादिवैचित्र्यमात्रेण कर्त्रभावो वेदे रूपादेव प्रतीयत इति नूतनेयं वाचोयुक्तिः ॥ § 4679

## अनित्यवस्तुसंयोगादपि वेदाः न नित्याः

अपि च यदि रूपे समाश्वसिति भवतो मनः—तदा आदिमदर्थाभिधानमपि वेदस्य रूपं कथं न परीक्षसे ? बबरः प्रावाहणिरकामयत तै. सं. ७-१-१०, कुसुरबिन्द औद्दालकिरकामयत तै. सं. ७-२-२, (?')पुरूरवो मा प्रपतः ऋ. १०-९५-१५ इति ॥ § 4680

## प्रतिसर्गं वेदानां भिन्नत्वं स्मृत्युक्तम्

प्रतिसर्गं पुनस्तेषां भावात् अनादित्वमिति चेत् प्रतिसर्गं तर्हि वेदान्यत्वमपि भविष्यति । यथोक्तम्— § 4681

प्रतिमन्वन्तरं चैषा श्रुतिरन्याऽभिधीयते इति ।
*रूपादकृत्रिमत्वे च कल्पना कल्पितैव सा ।
आदिमद्वस्तुबुद्धिस्तु वाचकैरक्षरैः स्फुटैः ॥ २२ ॥§ 4684

*तेषामन्यथाव्याख्यानं तु व्याख्यानमेव । पठन्त एव ह्यध्येतारः तत आदिमतोऽर्थान् बहून् अवगच्छन्तीति नानादिर्वेदः । तस्मान्न रचनात्वमप्रयोजकम् ॥ § 4685

I.583/KSV

## वेदे कर्त्रस्मरणमसिद्धमेव

६ ] ह्मृष्टाः— nyāma-wit_kha
७ ] प्रकृत— nyāma-wit_ka
१७ ] मन्वन्तरे— nyāma-wit_kha
१८ ] रूपाद्य— nyāma-wit_ga
१८ ] मत्वं— nyāma-wit_kha

११ स्तेषां ] भावात्—अभिव्यक्तेः ॥
१४ *] रूपादिति । अनित्यवस्तुसम्बन्धात् किल अनित्यत्वं, तानि वस्तूनि नित्यान्येव यदि, तदा को दोष इति चेत्; सा कल्पना कल्पितैव—सर्वथा न साधीयसी । यतः अनित्यवस्तुसंयोगश्च स्वरसत एव प्रतीयते ॥
१६ *] तेषां—उक्तवाक्यानाम् । अन्यथा—अभिव्यक्तिपरत्वादिना ॥

कर्त्रस्मरणमेव त्वप्रयोजकम्, *असिद्धत्वात् । सिद्धमपि वा वेदे कर्त्रस्मरणमन्यथासिद्धम् । वेदकरणकालस्य अतिदवीयस्त्वात्, तत्प्रणेतुश्च पुंसः सकलपुरुषविलक्षणत्वात्, नियतशरीरपरिग्रहाभावात् इदन्तयाऽस्य पाणिनिपिङ्गलादिवत् स्मरणं नास्ति; न तु स नास्त्येव । अनुमानागमाभ्यां तदवगमात् कथं पक्षधर्मतया ग्रहीतुं शक्यते कर्त्रस्मरणम् ? § 4686

* तद्ध्येकपुरुषसम्बन्धि व्यभिचरति । सर्वपुरुषसम्बन्धि तु दुरवगमम् । * सर्वे पुमांसः कर्तारं वेदस्य न स्मरन्तीति कथं जानाति भवान् ? न हि तव सकललोकहृदयानि प्रत्यक्षाणि; सर्वज्ञत्वप्रसङ्गात् । न च यत् त्वं न जानासि, तत् अन्योऽपि न जानातीति युक्तम्; * अतिप्रसङ्गात् । तस्मादस्मर्यमाणकर्तृकत्वं दुर्बोधमेव ॥ § 4687

## वेदे कर्तृस्मरणमन्तरा प्रामाण्यमेव न निश्चीयेत

अपि च कर्तुरस्मरणे सति सुतरां वेदार्थानुष्ठानं प्रेक्षावतां शिथिलीभवेत् । न ह्यकर्तृक एवोपदेशः संभवति । संभवन्नपि वा प्रामाण्यनिश्चयनिमित्ताभावात् कथं विस्रंभभूमिरसौ भवेत् । बाधकाभावमात्राच्च न प्रामाण्यनिश्चयो वचसामित्युक्तं प्राक्पु. ४८३ । तस्मात् आप्तप्रत्ययादेव
I.584/KSV निर्विचिकित्सं वेदार्थानुष्ठानं सप्रतिष्ठानं संभवति, नान्यथेति । तस्मान्न कर्त्रस्मरणस्य रचनात्वप्रतिपक्षतयोपन्यासः उपपन्नः ॥ § 4688

## कर्त्रस्मरणमात्रात् न वेदस्याकर्तृकत्वसिद्धिः

*नापि स्वतन्त्रमेवेदं कर्त्रभावसाधनं भवितुमर्हति । अनुपलब्धिरियमनेन प्रकारेण किलोच्यते । साऽनुपपन्ना, अनुमानेन कर्तुरुपलम्भात् । *अनुमानेनापि यदुपलब्धं तदुपलब्धमेव भवति ॥ § 4689

---

६ ] इदन्तया— nyāma-wit__ka
९ ] तद्ध्येतत्पुरुष—
nyāma-wit__kha
१८ ] सप्रतिष्ठानं—
nyāma-wit__kha
२ ] मानेन— nyāma-wit__kha

---

१ *] असिद्धत्वात्—रचनात्वेन सामान्यतः कर्तुरनुमानेन तत्स्मरणसत्वात् । सिद्धमपि—इति तु, न हि लोके कोऽपि कमपि वेदकर्तारं निर्दिश्य व्यवहरतीत्यभिप्रायेण । समाधानवाक्येष्वयमर्थः स्पष्टः । दृश्यते लोकेऽपि बहूनि वस्तूनि अज्ञानकर्तृकाणि ॥
६ *] तत्—कर्त्रस्मरणम् । व्यभिचरति, अन्येत स्मरणसंभवात् ॥
७ *] दुरवगमत्वस्यैवोपपादनं—सर्व इत्यादि ॥
९ *] अतिप्रसङ्गादिति । एतादृशोऽतिप्रसङ्गः पूर्वपु. २६७मप्युक्तः ॥
१७ *] पूर्वपु. ५७८मुक्तं प्रथमविकल्पं प्रत्याह—नापीति । कर्तुः अस्मरणं नाम स्मरणाभावः । तथा च स्मरणाभावः अनुपलम्भे विश्राम्यति । स च बाधितः इत्यर्थः ॥
१९ *] अनुमानेनेति । अन्यथा हि धूमात् पर्वते वह्न्यनुमानकाले पर्वते वह्नेः इन्द्रियेणानुपलंभमादायानुमानस्यैवानुत्थितिर्वक्तव्या स्यात् । अतोऽत्र उपलंभपदं अनन्यथासिद्धज्ञानसामान्यपरमेव ॥

## वेदसकर्तृकत्वानुमानस्याबाधितत्वम्

*ननु कर्त्रभावस्मरणबाधितत्वात् अनुमानमिदं अयुक्तम्— इतरेतराश्रयप्रसङ्गात्—* अनुपलब्धौ सिद्धायां अनुमाननिरासः, अनुमाननिरासे च सति अनुपलब्धिसिद्धिः ॥ § 4690

अनुमानप्रामाण्येऽपि समानो दोष इति चेत्—न—तस्य *प्रतिब- I.585/KSV
न्धमहिम्ना प्रामाण्यसिद्धेः । न हि तस्यानुपलब्धिनिरासापेक्षं प्रामाण्यम् ॥ § 4691

## सकर्तृकत्वानुमानेन कर्त्रस्मरणं बाध्यत एव

*तत्रैतत् स्यात्—न वयं कर्त्रभावे प्रामाण्यं ब्रूमः । सकललोकपदार्थव्यवहारिणो हि मीमांसकाः । परं तु वेदस्य पौरुषेयतां ब्रुवाणं प्रमाणं पृच्छामः । तच्चास्य नास्तीति बलादनुपलब्ध्या तदभावनिश्चयो व्यवतिष्ठत इति—स्यादेतदेवम्—यद्यनुमानं न स्यात् । उक्तं च रचनात्वात् इत्यनुमानम् ॥ § 4692

## रचनात्वहेतोः सकर्तृत्वसाधने पर्याप्तत्ववर्णनम्

---

१ *] ननु सकर्तृकत्वं च रचनात्वहेतुमूलम् । कर्त्रस्मरणं तु स्वतस्सर्वेषां सिद्धम् । अतः अनुमानोत्थितिः कथम् ? वह्न्यनुमानस्थले तु नैवं वह्न्यभावस्योपस्थितिः, पर्वते वह्नेः सन्दिग्धत्वेन तदभावानिर्णयात् । अन्ततस्तस्यैव वह्नेः समीपस्थेनो पलंभाच्च । अतः अनुमानेन अस्मरणबाधकथनमयुक्तम् । प्रत्युतास्मरणेनैवानुमानबाधो युक्त इति शङ्कते—नन्विति ॥

२ *] अनुपलब्धौ—कर्त्रभावनिर्णये ॥

२ ब्धौ] सिद्धायां-निश्शङ्कं जातायाम् । अस्त्यत्रापि पर्वते वह्नेरिव संशय इत्यर्थः ॥

४ प्रामाण्येऽपि] समानो दोष इति । सकर्तृकत्वानुमानस्य प्रामाण्ये सकर्तृकत्वसिद्धिः सकर्तृकत्वाबाध एव च अनुमानप्रामाण्यमित्यन्योन्याश्रय इत्यर्थः ॥

४ *] प्रतिबन्धमहिम्ना—व्याप्तिबलेन । अन्यथा तु एतादृशदोषः धूमात् वह्न्यनुमानेऽपि समान इत्यर्थः । --- अथवा—सकर्तृकत्वानुमानस्य प्रामाण्ये कर्त्रस्मरणस्य बाधः, कर्त्रस्मरणस्य बाधे सिद्ध एव तादृशानुमानप्रामाण्यमित्यन्योन्याश्रयः । प्रतिबन्धेत्यादि । अनुमानप्रामाण्यं तु अनौपाधिकसम्बन्धाधीनम् । सम्बन्धश्च साध्यहेत्वोरेव । अनुपलंभस्तु साध्यस्य पक्षे वक्तव्या । अतश्चेयमनुपलब्धिः न व्याप्तिग्रहं उपरोद्धुमलम् । ननु तर्हि ह्रदे धूमेन वह्नेः साधने कथं बाधस्य दोषत्वमिति चेत्—तत्रानुपलम्भः अप्रत्यक्षरूपः, न तु अस्मरणादिरूपः । अतः तेन तत्र पक्षे बाधे पर्यवसानम् । नैवमत्र वेदे कर्त्रनुपलंभः कस्यचिद्वर्तते । अत एव खलु भवताऽप्यस्मरणमेव हेतूकृतम् । अस्मरणं तु अन्यथासिद्धमित्युपपादितमेव । अत इयमनुपलब्धिः न व्याप्तिं निरोद्धुमलमिति भावः ॥

७ *] जानीमो वयमिदम् । न हि वयं धूमात् वह्न्याद्यनुमानमेव निराकुर्मः । किन्तु वेदस्य पौरुषेयत्वे प्रमाणाभावात्, कर्तुरस्मरणाच्च वेदपौरुषेयत्वं स्वतःसिद्धं वदाम इत्याशयवान् शङ्कते—तत्रेत्यादि ॥

७ यं] कर्त्रभावे—कर्त्रभावनिर्णये सत्येव । यदधीना अन्योन्याश्रयादिप्रसक्तिरुक्ता ॥

यत्पुनरवादि—वेदेषु पुरुषस्य कर्तृत्वमशक्यं ग्रहीतुमिति पु. ५१३—तदप्यसाधु—परोक्षस्य कुविन्दादेरभिनवप्रावरकपटादौ कार्ये कथं कर्तृताऽवगम्यते ? § 4693

I.586/KSV

पटादिरचनां दृष्ट्वा तस्य चेत् साऽनुमीयते ।
वेदेऽपि रचनां दृष्ट्वा कर्तृत्वं तस्य गम्यताम् ॥ २३ ॥§ 4695

## ईश्वरस्य सशरीरस्य वेदोपदेष्टृत्वेऽपि न काऽपि हानिः

शरीरपरिग्रहमन्तरेण प्राणिनामुपदेशस्य कर्तुमशक्यत्वात् *कदाचिदीश्वरः शरीरमपि गृह्णीयादिति कल्प्यते । *नियतशरीरपरिग्रहाभावाच्च व्यासादिवदसौ न स्मर्यते । ततश्च— § 4696

*अद्य सद्यः कविः काव्ये यथा कर्तेति मीयते ।
तथा तत्कालजैः पुंभिः सोऽपि कर्तेति मास्यते ॥ २४ ॥§ 4698

यथा परकृता शङ्का तस्मिन् काव्ये व्यपैति ते ।
वेदेऽप्यन्यकृता शङ्का तथा तेषां व्यपैष्यति ॥ २५ ॥§ 4700

*परोक्षमनुमानेन यच्च बुध्यामहे वयम् ।
प्रत्यक्षं योगिनां तच्चेत्युक्तं प्रत्यक्षलक्षणे ॥ २६ ॥§ 4702

प्रत्यक्षमनुमानं च तदेवं कर्तृतामितौ ।
मूलप्रमाणमस्तीति स्मृतौ नान्धपरंपरा ॥ २७ ॥§ 4704

मन्त्रार्थवादमूलत्वं तत एव न तत्स्मृतेः ।
यथोदितानुमानादिप्रमाणान्तरसंभवात् ॥ २८ ॥§ 4706

I.587/KSV

---

७ ] स्तवरक— nyāma-wit__kha
---Note : पु. ५०४.

४ ] निन्दा— nyāma-wit__kha

---

६ *] कदाचित्—सृष्ट्यादौ, धर्मग्लान्यादौ वा ॥
७ *] नियतेति । दिव्यमानुषादिप्रतिनियतेत्यर्थः ॥
९ *] अद्येत्यादि । दृश्यन्ते हीदानीमपि काश्चिद्रचनाः अज्ञातकर्तृकाः पौरुषेयत्वेन च संप्रतिपन्नाः प्रपञ्चहृदयाद्याः ॥
११ ङ्का ] तस्मिन्—तत्पुरतो रचिते ॥
१२ था ] तेषां—सर्गाद्यकालिकानां पुंसाम् ॥
१३ *] वेदानामीश्वरकृतत्वे प्रत्यक्षमप्यस्तीत्याह—परोक्षमिति ॥
१६ स्तीति ] स्मृतौ—पौरुषेयत्वे इति शेषः कर्तृस्मृताविति वा ॥

## ईश्वरस्यानुमानिकत्वेन नान्योन्याश्रयादिः

यदपि इतरेतराश्रयमभाषि पु. ४९१—पुरुषोक्ते वेदेप्रामाण्यं, वेद-प्रामाण्यात् पुरुषसिद्धिरिति—तदपि न सम्यक्; पूर्वं पु. ५०३ परिहृतत्वात् । अनुमानात् प्रसिद्धे कर्तरि वेदवाक्यैः तत्प्रतीतेरुपोद्बलनमिष्यते, न त्वाग-मैकशरण एव कर्त्रवगमः । उक्तं च पूर्वमपि पु. ४९१ पृथिव्यादिना कार्येण कर्तुरनुमानम् ॥ § 4707

## जगत्कर्तुरेव वेदोपदेष्टृत्वम्

किं येनैव कर्त्रा पृथिव्यादिकार्यं निर्मितं, तेनैव वैदिक्यो रचना निर्मिताः ? इति चेत्—ओमित्युच्यते । किमत्र प्रमाणम् ? इति चेत्— § 4708

उच्यते, तर्हि सर्वज्ञः स्रष्टुं प्रभवतीदृशम् ।
विचित्रं प्राणिभृत्कर्मफलभोगाश्रयं जगत् ॥ २९ ॥§ 4710

तत्कर्मफलसम्बन्धविदा तदुपदेशिनः ।
तेनैव वेदा रचिताः इति नान्यस्य कल्पना ॥ ३० ॥§ 4712

* एकेनैव च सिद्धेऽर्थे द्वितीयं कल्पयेम किम् ?
अनेककल्पनाबीजं न हि किञ्चन विद्यते ॥ ३१ ॥§ 4714

## वेदोपदेष्टुः एकत्वम्

जगत्सर्गे तावत्, एक एवेश्वर इष्यते न द्वौ, बहवो वा । भिन्नाभिन्नाश-यकल्पने, *एकत्र वैयर्थ्यात् । *इतरत्र व्यवहारवैशसप्रसङ्गेन, तत एक-स्येश्वरत्वविघातात् । तथा हि— § 4715

अनेकेश्वरवादो हि नातीव हृदयङ्गमः ।
ते चेत् सदृशसङ्कल्पाः, कोऽर्थो बहुभिरीश्वरैः ? ॥ ३२ ॥§ 4717

I.588/KSV

संकल्पयति यदेकः शुभमशुभं वाऽपि सत्यसङ्कल्पः ।

---

३ वाक्यैः ] तत्प्रतीतेः—अनुमानप्रमितेश्वरप्रतीतेः ॥
१० विदा ] तदुपदेशिनः वेदाः इत्यन्वयः ॥
१२ *] एकेनैव ईश्वरेण ॥
१५ *] उपस्थितिसामीप्यात् । व्युत्क्रमेण समाधानमाह—एकत्रेति । अभिन्नाशयत्वे इत्यर्थः ॥
१५ *] इतरत्र—आशयभेदे । अस्यैव विवरणं—तथा हीत्यादि ॥

तत्सिध्यति तद्विभवात् इत्यपरस्तत्र किं कुर्यात् ॥ ३३ ॥§ 4719

भिन्नाभिप्रायतायां तु कार्यविप्रतिषेधतः ।
नूनमेकः स्वसङ्कल्पविहत्याऽनीश्वरो भवेत् ॥ ३४ ॥§ 4721

एकस्य किल सङ्कल्पः राजाऽयं क्रियतामिति ।
हन्यतामिति चान्यस्य तौ समाविशतः कथम् ॥ ३५ ॥§ 4723

राज्यसङ्कल्पसाफल्ये विहता बधकामना ।
तस्याः सफलतायां वा राज्यसङ्कल्पविप्लवः ॥ ३६ ॥§ 4725

तेन चित्रजगत्कार्यसंवाहानुगुणाशयः ।
एक एवेश्वरः स्रष्टा जगतामिति साधितम् ॥ ३७ ॥§ 4727

एवं जगत्सर्गवत् स एव वेदानामप्येकः प्रणेता भवितुमर्हति । नानात्वकल्पनायां प्रमाणाभावात्, कल्पनागौरवप्रसङ्गाच्च ॥ § 4728

तेन यदुच्यते— § 4729

नन्वेकः सर्वशाखानां कर्तेत्यवगतं कुतः ?
*बहवो बहुभिर्ग्रन्थाः कथं न रचिता इमे ? ॥ ३८ ॥§ 4731

इति—तत्परिहृतं भवति ॥ § 4732

## वेदानामेककर्तृकत्वे प्रमाणान्तरम्

अतश्च एककर्तृका वेदाः, यतः परस्परव्यतिषक्तार्थोपदेशिनो दृश्यन्ते । I.589/KSV * एकमेव हि कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतैरप्येकार्थ समवायिभिरङ्गैः अन्वितं प्रयुज्यते । तत्र हि हौत्रं ऋग्वेदेन, यजुर्वेदेनाध्वर्यवं, औद्गात्रं सामवेदेन, ब्रह्मत्वमथर्ववेदेन च क्रियते । पैप्पलादिशाखाभेदोपदिष्टं च तत्तदङ्गजातं तत्र तत्रापेक्ष्यते । तत्र सर्वशाखाप्रत्ययं एकं कर्मेत्याहुः । एतच्च अदूर एव अग्रे पु. ५९० निर्णेष्यते ॥ § 4733

एकाभिप्रायबद्धत्वं तेन सर्वत्र गम्यते ।
भवेद्भिन्नाशयानां हि कथमेकार्थमीलनम् ? ॥ ३९ ॥§ 4735

---

१० एवं] जगत्सर्गस्येव—जगत्सर्गवत् ॥
१४ *] बहव इति । बहुभिः कृताः वेदा अपि न एकग्रन्थरूपा इत्यर्थः । कर्तृभेदेऽपि कादम्बर्यादौ ऐकग्रन्थ्यदर्शनादेवमुक्तम् । सिद्धान्ते ईश्वरकृतत्वात्सर्वदोषपरिहारः ॥
१७ *] एकमेवेत्यादि । एकं वा संयोगरूपचोदनाख्याऽविशेषात् जै. सू. २-४-९ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ब्र. सू. ३-३-९ इत्यादौ शाखाभेदेऽपि कर्मणः उपासनस्य च ऐक्यं साधितमेव पूर्वोत्तरमीमांसकैः । संयोगः—फलसंयोगः । रूपं—स्वरूपम् । चोदना— विधिः । आख्या—नाम । एतेषामविशेषात् एकमेव कर्मेत्यर्थः ॥

## समस्यापूरणादावपि कर्त्रैक्यमेव

काव्यसमस्यापूरणे का वार्ता ? इति चेत्— § 4736

तत्रापि प्रथमस्यैव कवेस्तद्वस्तुदर्शनात् ।
तदभिप्रायवेदी तु सोऽन्यस्तमनुवर्तते ॥ ४० ॥§ 4738

अन्यथाऽनन्वितं काव्यं स्याद्विश्ववसुकाव्यवत् ।
अन्वितत्वे तु सा नूनं आद्यस्यैव कवेर्मतिः ॥ ४१ ॥§ 4740

* इहाप्येकाशयाभिज्ञद्वितीयेश्वरकल्पने ।
एकाभिप्रायतैव स्यात्, किं च तत्कल्पने फलम् ? ॥ ४२ ॥§ 4742

तस्मादेक एव कर्ता सर्वशाखानाम् । काठकादिव्यपदेशस्तु * प्रकृष्टाध्ययननिबन्धनो भविष्यतीति भवद्भिरप्युक्तम् ॥ § 4743
I.590/KSV

## सर्वशाखाप्रत्ययन्यायस्य युक्तत्वकथनम्

* अपि च यथा तरोर्विक्षिप्ताः शाखा भवन्ति, न च कृत्स्नं पुष्पफलपत्रमेकस्यां शाखायां सन्निहितं भवति, किन्तु कस्याञ्चित्कस्याञ्चित्; एवं वेदस्यापि शाखाः पृथगङ्गकर्मोपदेशिन्यो विक्षिप्ताश्च ॥ § 4744

* तासां च वृक्षशाखानां एकस्माज्जन्मबीजतः ।
तथैव सर्वशाखानां एकस्मात् पुरुषोत्तमात् ॥ ४३ ॥§ 4746

## वेदा ईश्वरोपदेशरूपाः

---

१५ ] किं स्यात्— nyāma-wit__kha

२ ] कस्यचि— nyāma-wit__ka

---

२ वे] तद्वस्तु—पूरणीयं वस्तु । एवञ्च समस्यापूरणे द्वितीयेन प्रथमाभिमतार्थप्रकटनमात्रं, न तु नूतनार्थकल्पनमित्यर्थः ॥
४ स्या] विश्ववसुः—कश्चित्कविः ॥
६ *] वेदेऽपि तादृशा एव वा बहवः कुतो न स्युरित्यत्र, तथाऽवश्यकता नास्तीत्याह—इहापीति ॥
८ *] प्रकृष्टेति । दृश्यते हि लोकेऽपि पूर्वमेव स्थितस्य ग्रामस्याभिवर्धनादिभिरेव कृष्णराजनगरम् इत्यादिराजनाम्ना व्यपदेशः ॥
१० *] अपि चेत्यादि । आम्रवृक्षे हि एकस्यां शाखायां पुष्पमात्रोद्गमः । अपरस्यां च फलदर्शनम् । अथापि तत्रैक्यं यथा तथेत्यर्थः ॥
१३ *] ननु तत्र मूलस्य बीजस्यैक्यादैक्यमिति चेत्, तत् वेदेऽपि तुल्यमित्याह—तासामिति ॥

कर्ता य एव जगतामखिलात्मवृत्ति-
कर्मप्रपञ्चपरिपाकविचित्रताज्ञः ।
विश्वात्मना तदुपदेशपराः प्रणीताः
तेनैव वेदरचना इति युक्तमेतत् ॥ ४४ ॥§ 4750

आप्तं तमेव भगवन्तमनादिमीशं
आश्रित्य विश्वसिति वेदवचस्सु लोकः ।
तेषामकर्तृकतया न हि कश्चिदेवं
विस्रम्भमेति मतिमानिति वर्णितं प्राक् ॥ ४५ ॥§ 4754

एवञ्च पदवाक्यरचनादौ तावत् वेदेषु पुरुषापेक्षित्वमुपपादितम् ॥ § 4755

## शब्दार्थसंकेतकरणार्थमीश्वरापेक्षाऽस्त्येव

I.591/KSV * यदपि सम्बन्धकरणे पुरुषानपेक्षत्वमुच्यते—चित्रभानोरिव दहनशक्तिः शब्दस्य नैसर्गिकी वाचकशक्तिः । व्युत्पत्तिस्तु वृद्धेभ्य एव व्यवहरमाणेभ्य उपलभ्यत इति किमत्र पुरुषः करिष्यति ? इति—तदप्यघटमानम्—पुरुष-परिघटितसमयसम्बन्धव्यतिरेकेण शब्दादर्थप्रत्ययानुपपत्तेः ॥ § 4756

## प्रसङ्गात् शब्दार्थयोः सम्बन्धाक्षेपः

ननु ! नैव शब्दस्यार्थेन सम्बन्धः कश्चिदस्ति । कस्येदं पुरुषसापेक्षत्वं वा, निरपेक्षत्वं वा चिन्त्यते ? § 4757

न हि शब्दार्थयोः कुण्डबदरयोरिव संयोगस्वभावः, तन्तुपटयोरिव समवायात्मा वा सम्बन्धः प्रत्यक्ष उपलभ्यते । तन्मूलत्वाच्च सम्बन्धान्तराण्यपि न सन्ति । तदुक्तं मुखे शब्दमुपलभामहे, भूमावर्थम् इति ॥ § 4758

नाप्यनुमीयते शब्दस्यार्थेन सम्बन्धः; क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणानुपलम्भात् । न च शब्ददेशे अर्थः संभवति, न चार्थदेशे शब्दः; स्थानकरणप्रयत्नानां तद्धेतूनां घटाद्यर्थप्रदेशेऽनुपलम्भात् । व्यापकत्वं तु शब्दस्य प्रतिषिद्धमेव ॥ § 4759

## शब्दार्थयोस्सम्बन्धे विकल्पाः

४ ] प्रत्यक्षं— nyāma-wit_kha
८ ] देशे— nyāma-wit_kha

३ ना ] तदुपदेशपराः—स्वोपदेशपरा इति यावत् ॥
१० * ] वेदाख्यशब्दस्य स्वरूपे पुरुषापेक्षाभावान्नित्यत्वमित्यंशो निरस्तः । अथ शब्दार्थयोः सम्बन्धस्यापि नित्यत्वेन सङ्केतकरणार्थमपि पुरुषापेक्षा नास्तीत्यपौरुषेयत्वं सम्बन्धभाष्यवार्तिकादिषूक्तं शा. भा. १-१-५ अनूद्य दूषयति—यदपीति ॥

उच्यते—न संश्लेषलक्षणः शब्दार्थसम्बन्धः अस्माभिरभ्युपगम्यते । * तत् किं कार्यकारणनिमित्तनैमित्तिकाश्रयाश्रयिभावादयः शब्दस्यार्थेन सम्बन्धाः ? एतेऽपि न तराम् ॥ § 4760

न तर्हि तस्य कश्चिदर्थेन सम्बन्धः ? न नास्ति शब्दस्यार्थेन सम्बन्धः, प्रत्ययनिमित्तहेतुत्वात्; धूमादिवत् ॥ § 4761

तत् किं शब्दार्थयोरविनाभावः सम्बन्धः ? सोऽपि नास्ति; एवं हि शब्दोऽनुमानमेव स्यात् ॥ § 4762

कस्तर्हि ? समय इति ब्रूमः ॥ § 4763
I.592/KSV

## समयाख्यशब्दार्थसम्बन्धस्वरूपशोधनम्

कोऽयं समयो नाम ? अभिधानाभिधेयनियमनियोगः समय उच्यते ॥ § 4764

* यद्येवं किमनाशङ्कनीयसंश्लेषपरिचोदनेन ? तद्दूषणेन च ?— उच्यते—शब्दार्थभेदवादिनां हि वैयाकरणानां एष संश्लेषरूपः सम्बन्धो बलादापततीति त एव प्रतिक्षेप्यन्ते ॥ § 4765

## शब्दार्थयोरविनाभाव एव सम्बन्ध इत्याक्षेपः

आह—यदि वैयाकरणवर्णितो न संश्लेष उपपत्तिमान्, समयोऽयमनुपपन्न एव । स हि पुरुषकृतः सङ्केतः । न च पुरुषेच्छया वस्तुनियमोऽवकल्पते, तदिच्छाया अव्याहतप्रसरत्वात् ॥ § 4766

*अर्थोऽपि किमिति वाचको न भवति, शब्दश्च वाच्यः । न चैवमस्ति—दहनमनिच्छन्नपि पुरुषः धूमात् न तं प्रत्येति; जलं वा तत इच्छन्नपि

---

२१--१ ] सश्लेष उपपत्तिमान्— nyāma-wit_kha
१ ] वैयाकरणवत्— nyāma-wit_ga
४ ] न भवति— nyāma-wit_kha

---

१ *] तत्किं इत्यादौ पूर्ववाक्यमाक्षेपपरं, उत्तरं च समाधानपरम् ॥
११ *] यद्येवमित्यादि । यदि समय एव शब्दार्थयोः सम्बन्धः, तर्हि वृथा किमर्थः अप्रसक्तसंश्लेषादिपक्षविचारोपक्षेपः—इति शङ्काऽऽशयः । अस्ति कश्चन पक्षः तादृश इति नाप्रसक्तनिराकरणमिति समाधानाशयः ॥
१२ न्धो] बलादिति । शब्दार्थयोस्तैरविनाभाववर्णनात् ॥
१४ न] संश्लेषः—तादात्म्यम् । शब्दविवर्तवादिनो हि ते ॥
१६ दिच्छाया] अव्याहतप्रसरत्वात्—उच्छृङ्खलत्वादिति भावः ॥
१७ *] अर्थोऽपीति । पुरुषेच्छाया उच्छृङ्खलत्वादेव । न चेष्टापत्तिः, नियमस्य लोके दर्शनात् । नियम एव च व्याप्तिः, स एव च अविनाभावः । ततश्च शब्दार्थयोः सम्बन्धः अविनाभाव इति स्वयमापतितमित्याशयः ॥

प्रतिपद्यते । तत्र यथा धूमाग्न्योः नैसर्गिक एवाविनाभावो नाम सम्बन्धः, ज्ञप्तये तु भूयोदर्शनादि निमित्तमाश्रीयते एवं शब्दार्थयोः सांसिद्धिक एव शक्त्यात्मा सम्बन्धः, तद्व्युत्पत्तये तु वृद्धव्यवहारप्रसिद्धिसमाश्रयणम् ॥ § 4767

I.593/KSV

## शब्दस्य ज्ञातस्य सतः अर्थबोधजनकत्वम्

स्वाभाविके सम्बन्धे सति दीपादिवत् किं तद्व्युत्पत्त्यपेक्षणेनेति चेत्—न—शब्दस्य ज्ञापकत्वात् । ज्ञापकस्य धूमादेः एतत् रूपं, यत् सम्बन्धग्रहणापेक्षं स्वज्ञाप्यज्ञापकत्वम् । उद्योतादयस्तु *प्रत्यक्षसामग्र्यन्तर्गतत्वात् न व्युत्पत्त्यपेक्ष्या भवन्ति । शक्तिस्तु नैसर्गिकी यथा रूपप्रकाशिनी दीपादेः, तथा शब्दस्यार्थप्रतिपादने । तस्मात् न समयमात्रात् अर्थप्रतिपत्तिः ॥ § 4768

## समयस्य अर्थनिष्ठत्वाभावेन शब्दार्थसम्बन्धत्वासंभवः

अपि च अभिधानाभिधेयनियमनियोगरूपः समयः ज्ञानमेव, न ततोऽर्थान्तरम् । ज्ञानं चात्मनि वर्तते, न च शब्दार्थयोरिति न तयोः सम्बन्धः स्यात् ॥ § 4769

## समयेन शाब्दबोधनिर्वाहासंभवः

किञ्च समयः क्रियमाणः, प्रत्युच्चारणं वा क्रियते ? प्रतिपुरुषं वा ? सर्गादौ वा सकृदीश्वरेण ? इति ॥ § 4770

प्रत्युच्चारणं प्राक्तन एव क्रियते ? नूतनो वा ? § 4771

नवस्यतावत् क्रियमाणस्य कथमर्थप्रत्यायनसामर्थ्यमवगम्यते ? तदवगतौ वा किं तत्करणेन ? पूर्वकृतस्य तु कृतत्वादेव पुनः करणमनुपपन्नम् । एकस्य वस्तुनः ज्ञप्तिरसकृदावर्तते, नोत्पत्तिः ॥ § 4772

प्रतिपुरुषमपि सम्बन्धः भिन्नः ? अभिन्नो वा क्रियते ? § 4773

I.594/KSV

---

७ ] तद्व्युत्पत्तये— nyāma-wit__ka nyāma-wit__kha
९ ] चेत्— nyāma-wit__ka
११ ] तद्योग्यतादयस्तु— nyāma-wit__kha
११--१२ ] व्युत्पत्त्यपेक्षा— nyāma-wit__kha
१--२ ] वा— nyāma-wit__ka
४--५ ] तदवगमे— nyāma-wit__ka
५ ] तदा— nyāma-wit__kha

---

६ *] प्रत्यक्षसामग्रीति । प्रत्यक्षस्थल एवेन्द्रियादेः स्वरूपसत एव कारणत्वम् । परोक्षस्थले तु लिङ्गादेः ज्ञातस्य सत एव कारणत्वमित्यनुभवबलादङ्गीकर्तव्यम् ॥
१५ स्य ] कथमिति । नूतनत्वमेवात्र हेतुः ॥
१६ वा ] किं तत्करणेनेति । नूतनेनैतावताऽनवगतेन यद्यर्थप्रतीतिः, तर्हि केवलेन शब्देनैव तथा बोधोऽस्त्वित्यर्थः ॥

भेदपक्षे कथमेकार्थसंज्ञानम्—गोशब्दस्य सास्नादिमानर्थः, केसरादिमानश्वशब्दस्य ? इति ॥ § 4774

अभेदेऽपि तथैव कृतस्य करणायोगात् ज्ञानमेव सम्बन्धस्य करणम् ॥ § 4775

सर्गादावपि सकृत्सम्बन्धकरणमयुक्तम्; तथाविधकालासम्भवादेव । न हि शब्दार्थव्यवहाररहितः कश्चित्काल उपपद्यते । तस्मान्नित्यस्यैव सम्बन्धस्य लोकतो व्युत्पत्तिः, न पुनः करणम् ॥ § 4776

## शब्दार्थयोः स्वाभाविकसम्बन्धपक्षस्य निर्दुष्टत्वम्

व्युत्पत्तिपक्षं च न करणपक्षाभिहिता दोषाः स्पृशन्ति, प्रत्यक्षसिद्धत्वात् । प्रत्यक्षं हीदमुपलभ्यते । वृद्धानां हि स्वार्थे व्यवहरमाणानां उपशृण्वन्तो बालाः ततस्ततः शब्दात् तं तमर्थं प्रतियन्ति । तेऽपि वृद्धा यदा बाला आसन्, तदा अन्येभ्यः वृद्धेभ्यः तथैव प्रतिपन्नवन्तः । तेऽप्यन्येभ्य इति नास्त्यादिस्संसारस्यति ॥ § 4777

## समयपक्षेऽपि शब्दार्थयोस्सम्बन्धस्य स्वाभाविकत्वमवर्जनीयम्

अपि च समयमात्रशरणः शक्तिशून्यः शब्दः कथमक्षिनिकोचहस्तसंज्ञादिभ्यः भिद्येत ? स हि तदानीं कशाङ्कुशप्रतोदाभिघातस्थानीय एव भवेत् । तथा च शब्दादर्थं प्रतिपद्यामह इति लौकिको व्यपदेशो बाध्येत, समयादर्थं प्रतिपद्यामह इति स्यात् । समयपक्षे च यदृच्छाशब्दतुल्यत्वं सर्वशब्दानां प्राप्नोति । तेन गवाश्वादिशब्दानां नियतविषयत्वं न स्यात् ॥ § 4778

I.595/KSV

## देशभेदेनार्थभेदः न समयाधीनः

यत्पुनरुच्यते—जातिविशेषे चानियमात् न्या. सू. २-१-५७ समयरूपः सम्बन्ध इति—*जातिशब्देनात्र देशो विवक्षितः । किल क्वचिद्देशे कश्चिच्छब्दः

---

२ ] गवाश्वादीनां—
nyāma-wit__kha

---

१ थ] एकार्येति । द्वयोरपि परस्परं शब्दभेदात् कृतसमयभेदात् द्वाभ्यां परस्परं एकवस्तुविषयकशब्दव्यबहारः कथमित्यर्थः ॥

१३ थ] अक्षिनिकोचः—अक्षिचेष्टाविशेषः ॥

१४ दानीं] कशाङ्कुशेत्यादि । ध्वन्यादिवदिति भावः । भयङ्करध्वन्यादिश्रवणे दृश्यत एवापसर्पणादिकम् ॥

१६ च] यदृच्छाशब्दः—ध्वन्यादिवत् रूढः शब्दः ॥

२० *] उक्तस्यैव विवरणम्—जातीत्यादि ॥

२० ब्देनात्र] वक्ष्यमाणविवरणानुसारेण—देशो विवक्षित इति ॥

देशान्तर प्रसिद्धमर्थमुत्सृज्य ततोऽर्थान्तरे वर्तते । यथा चोरशब्दस्तस्करवचनः, ओदने दाक्षिणात्यैः प्रयुज्यते । एतच्च समयपक्षे युज्यते, नित्ये तु सम्बन्धे कथं तदर्थव्यभिचार इति—तदप्ययुक्तम्—सर्वशब्दानां सर्वार्थप्रत्यायनशक्तियुक्तत्वात् क्वचिद्देशे केनचिदर्थेन व्यवहारः ॥ § 4779

अत एव चानवगतसम्बन्धे श्रुते सति सन्देहो भवति—कमर्थं प्रत्याययितुमनेनायं शब्दः प्रयुक्तः स्यात् इति । असत्यां हि शक्तौ अकृतसमये निरालम्बना प्रत्यायकत्वाऽऽशङ्केति ॥ § 4780

## आर्यप्रसिद्धार्थस्यैव ग्रहणं युक्तम्

अथवा आर्यदेशप्रसिद्ध एव शब्दानामर्थः, इतरस्तु म्लेच्छजनसम्मतोऽनादरणीय एव । तस्मात् समयपक्षस्यातिदौर्बल्यात् अकृत्रिम एव शब्दार्थयोः सम्बन्ध इति न तत्र पुरुषस्य प्रभविष्णुता । § 4781

## शब्दार्थयोः सम्बन्धः समयातिरिक्तः वक्तुं न शक्यः इति सिद्धान्तः

अत्रोच्यते—न नित्यः सम्बन्ध उपपद्यते; शब्दवत् अर्थवच्च तृतीयस्य तस्य प्रत्यक्षादिना प्रमाणेन अप्रतीयमानत्वात् ॥ § 4782

## शक्तेः शब्दार्थसम्बन्धरूपत्वासंभवः

ननु ! शक्तिरूपः सम्बन्ध इत्युक्तम् । शक्तिश्च तदाश्रितेति कथं धर्म्यन्तरवत् पृथक्तया प्रतीयेत ?—नैतत्सांप्रतम्—स्वरूपसह कारिव्यतिरिक्तायाः शक्तेः सूक्ष्मायाः प्रागेव पु. १०७-११४ विस्तरतः प्रतिक्षिप्तत्वात् । न च शक्तिः प्रत्यक्षगम्या; द्रव्यस्वरूपवदनुपलम्भात् । नानुमेया; कार्याणामन्यथाऽपि घटमानत्वात् । कल्पयित्वा च शक्तिं अपरिहार्यः समयः; समयमन्तरेणार्थप्रतिपत्तेरसिद्धेः । सिद्धे च समये तत एवार्थसिद्धेः किं नित्यसम्बन्धाश्रयणेन ? § 4783

(I.596/KSV)

## समयस्य सम्यन्धत्वे अव्यवस्थापरिहारः

६ ] प्राप्तप्रसिद्ध— nyāma-wit__kha
६ ] चोर— nyāma-wit__kha
८ ] एतद— nyāma-wit__ka
२ ] प्रतीयते— nyāma-wit__kha

१ था] चोरशब्द इति । यद्यपि केचन शोर् इति वदन्ति, परन्तु चोर् इत्यपि वदन्ति केचन, विशिष्य केरलीयाः । हिन्दीभाषायां अन्त्याक्षरस्यार्धाक्षरत्वेनैव उच्चारणम् ॥

१७ किं] अपरिहार्य इति । शक्तेरतीन्द्रियत्वेन इदं पदमत्र शक्तं इति समयेनैव शक्तिपरिज्ञानसंभवात् ॥

यत्तूक्तम्—समयस्य पुरुषेच्छाधीनत्वात्, तस्याश्च अव्याहतप्रसरत्वात् वाच्यवाचकव्यत्ययः स्यात् इति पु. ५९२—तदयुक्तम्— *शक्त्यभावे शब्दस्यैव वाचकत्वे योग्यत्वात् । का पुनः शक्त्यभावे योग्यताऽस्येति चेत्; योऽयं गत्वादिजातियोगः क्रमविशेषोपकृतः । *गत्वौत्वादिसामान्यसम्बन्धो हि यस्य भवति स वाचकत्वे योग्य इति, इतरस्तु वाच्यत्वे । यथा द्रव्यत्वाद्यविशेषेऽपि वीरणत्वादिसामान्यवतां कटनिष्पत्तौ, तन्तुत्वादिसामान्यवतां च पटनिष्पत्तौ । न च तत्र शक्तिरस्तीत्युक्तम् । न च कारणे कार्यं सदिति साङ्ख्यैरिव भवद्भिरिष्यते । तस्यामसत्यामपि शक्तौ सामान्यविशेषसम्बन्धस्य नियामकत्वात् न वाच्यवाचकयोर्व्यत्यय इति न शक्तिरूपः शब्दार्थयोः सम्बन्धः ॥ § 4784

### शब्दार्थयोः सम्बन्धस्याविनाभावरूपत्वासंभवः

न च तयोरविनाभावो धूमाग्न्योरिव सम्बन्धः । तत्र हि सम्बन्धः प्रतीयमानः एवं प्रतीयते धूमोऽग्निं विना न भवति इति । इह पुनः अयमस्मात् प्रतीयते इति । एतावत्येव व्युत्पत्तिपर्यवसानम् । अत एव अवग- I.597/KSV
तिपूर्विकैवावगतिरिहेत्यनुमानात् शब्दस्य भेद उक्तः ॥ § 4785

प्रकाशकत्वमपि शब्दस्य समयप्रसादोपनतमेव, न स्वाभाविकम् । सांसिद्धिके हि तथात्वे भ्रमित्वादिप्रयुक्तात्, अन्यतो वा यतः कुतश्चित् अभिनवादपि दीपादिव शब्दादर्थप्रतीतिः स्यात् ॥ § 4786

### शब्दार्थसम्बन्धस्य व्याप्त्याख्यसम्बन्धाद्विलक्षणत्वम्

यत्तु नैसर्गिकेऽपि प्रकाशकत्वे शब्दस्य धूमादेरिव ज्ञापकत्वात् सम्बन्धग्रहणसापेक्षत्वमुक्तम् पु. ५९३—स एष विषम उपन्यासः । न हि धूमादेः प्रत्यायकत्वं स्वाभाविकम्, अनलाविनाभावित्वं तु तस्य निजं बलम् । तत्र चागृह्यते तस्मिन् प्रतीतिरेव न जायते इति युक्तं तद्ग्रहणं प्रतीत्यर्थम् । इह तु प्रतीतिशक्तिरेव स्वाभाविकी भवताऽभ्युपगम्यते । सा चेत् स्वाभाविकी, किं व्युत्पत्त्यपेक्षणेन ? *इति ॥ § 4787

---

१२--१३ ] तन्तुत्वादि— nyāma-wit_ka
१३ ] पट— nyāma-wit_ka
१८ ] भावे— nyāma-wit_kha
२० ] एतावदेव— nyāma-wit_kha

---

२ *] शक्त्यभाव इति । शक्तिपक्षे सा शक्तिः शब्द एव वर्तते, न त्वर्थे इति अनुभवेनैव हि निर्णयः । शक्त्यभावे च वाचकत्वं शब्द एवास्तु, तथाऽनुभवात् ॥
४ *] गत्वौत्वादि—गकारोत्तरौकारादि ॥
१३ एव] अवगतिपूर्विकेति । धूमवह्न्योर्ह्यविनाभावः न पुरुषकल्पितः, किन्तु सहजः । शब्दार्थयोस्तु सम्बन्धः न तथा सहजः, किन्तु कल्पितः । ततश्च अस्मात् पदादयमर्थो बोद्धव्यः इत्याकारकस्य संकेतस्य परिज्ञानमन्तरा न शाब्दबोधसंभव इति भावः ॥
२३ *] किं व्युत्पत्त्यपेक्षणेनेति । अनुपदमेवोक्तः दीपादिर्दृष्टान्तः ॥

## शब्दार्थसम्बन्धस्य अर्थात् समयरूपत्वे पर्यवसानम्

यदि चोच्यते—प्रत्यायक इति प्रत्ययं दृष्ट्वाऽवगच्छामः, न प्रथमश्रवण इति । यावत्कृत्वः श्रुतेन इयं संज्ञा, अयं संज्ञी इत्यवगम्यते, तावत्कृत्वः श्रुतादर्थावगम इति—सोऽयं समयोपयोग एव कथितो भवति । संज्ञासंज्ञिसम्बन्धो हि समय एवोच्यते । तदुपयोगमन्तरेण प्रत्यायकत्वानवगमात् न स्वाभाविकी शक्तिः ॥ § 4788

## समयस्य विषयनिष्ठत्वोपपत्तिः

I.598/KSV यत्त्वभ्यधायि—समयस्य ज्ञानात्मकत्वात् आत्मनि वृत्तिः, न शब्दार्थयोरिति पु. ५९३—एतदप्यचतुरश्रम्—तदाश्रयत्वाभावेऽपि ज्ञानस्य तद्विषयत्वोपपत्तेः ॥ § 4789

## शाब्दबोधस्य समयाधीनत्वेऽपि शब्दस्यैव तत्र हेतुत्वम्

यदप्यभाषणे—समयमात्रशरणे सृणिप्रतोदनोदननिर्विशेषे शब्दे शब्दादर्थं प्रतिपद्यामह इति व्यपदेशः न स्यादिति पु. ५९४—तदपि यत्किञ्चित् । नैसर्गिकशक्तिपक्षेऽपि शक्तेरर्थं प्रतिपद्यामहे, न शब्दात् इति व्यपदेशः स्यात् । *अविनाभावादग्निं प्रतिपद्यामहे, न धूमात् इति स्यात् । *तदङ्गत्वादविनाभावादेः न तथा व्यपदेश इति चेत्; तदितरत्रापि समानम् ॥ § 4790

धूमे हि व्याप्तिपूर्वत्वं शब्दे समयपूर्वता ।
नानयोस्तदपेक्षायां करणत्वं विहन्यते ॥ ४६ ॥§ 4792

## समयस्य शब्दार्थसम्बन्धत्वे लोकव्यवहारोऽपि प्रमाणम्

---

१० ] यच्चोच्यते—
nyāma-wit__kha
११ ] न किञ्चित्—
nyāma-wit__kha

१--२ ] न धूमात्—
nyāma-wit__kha

---

१ इति ] प्रत्ययं दृष्ट्वेति । तथा च प्रत्यायनशक्तेः कार्यानुमेयत्वेन न दीपादितौल्यम् ॥
७ स्य ] तद्विपयत्वोपपत्तेः—ज्ञानात्मकत्वेऽपि विषयतासम्बन्धेनार्थनिष्ठत्वात् ॥
९ णे ] सृणीति । अङ्कुशोऽस्त्री सृणिः स्त्रियाम् इत्यमरः ॥

१२ *] इष्टापत्ताबाह—अविनाभावादित्यादि ॥
१२ *] तदङ्गत्वात्—धूमाङ्गत्वात् । अविनाभावः खलु सम्बन्धः । स चाश्रयमपेक्षत एवेति न धूमपरित्यागसंभव इति चेत्, तत् शब्देऽपि समानमित्यर्थः ॥

अपि च लौकिको व्यपदेशः समयपक्षसाक्षितामेव भजते । देवदत्तेवोक्तं अमुतः शब्दादमुमर्थं प्रतिपद्यस्वेति इत्येवं हि व्यपदिशति लोकः । तस्मात् समय एव ॥ § 4793

अतश्चैवं देशान्तरे सङ्केतवशेन तत एव शब्दादर्थान्तरप्रतिपत्तिः ॥ § 4794
I.599/KSV

## सर्वशब्दानां सर्वार्थप्रत्यायनशक्तिमत्त्वं न घटते

ननु ! अत्रोक्तं सर्वे शब्दाः सर्वार्थप्रत्यायनशक्तियुक्ता इति केनचिदर्थेन क्वचिद्व्यवहार इति पु. ५९५—तदेतदयुक्तम्—शक्तीनां भेदाभेदविकल्पानुपपत्तेः । न शब्दस्वरूपात् भिन्नाः शक्तयः; तथाऽनवभासात् । अव्यतिरेके च एकस्माच्छब्दादनन्यत्वात् परस्परमव्यतिरेकस्तासां स्यात् । न च भिन्नकार्यानुमेया भिन्नाः शक्तयः; कार्यभेदस्यान्यथाऽप्युपपत्तेः । सर्वशक्तियोगे च सर्वार्थप्रत्ययप्रसङ्गः । समयोपयोगो नियामक इति चेत्; स एवास्तु किं शक्तिभिः ? § 4795

## सादृश्यमेवार्थसंदेहकारणम्, न तु पदानां सर्वशक्तिमत्त्वम्

यदप्यगादि—शब्दश्रवणे सति सर्वार्थविषयसन्देहदर्शनात् सर्वत्र तस्य शक्तिः कल्प्यत इति पु. ५९५—तदप्यसारम्—न हि शक्तिकृतः सन्देहः, किन्तु गत्वादिवर्णसामान्यनिबन्धनः । तथा च गत्वादिजातिमतां वर्णानां अर्थे वाचकत्वमवगतम् । अमी तज्जातियोगिनो वर्णाः कस्यार्थस्य वाचकाः स्युः ? इति भवति सन्देहः ॥ § 4796

## म्लेच्छजनप्रसिद्धार्थस्यापि कुत्रचित् ग्रहणं मीमांसकसम्मतम्

यत्पुनरवादि—स एव शब्दस्यार्थः, यत्रैनमार्याः प्रयुञ्जत, न म्लेच्छजनप्रसिद्ध इति पु. ५९५—तदेतत् कथमिव शपथमन्तरेण प्रतिपद्येमहि । न हि म्लेच्छदेशेऽपि तदर्थप्रत्ययो न जायते, बाध्यते वा, सन्दिग्धो वेति कथं न शब्दार्थः ? § 4797

आर्यप्रसिद्धिर्बाधिकेति चेत्; आर्यप्रसिद्धेरपि म्लेच्छप्रसिद्धिः कथं न बाधिका ? *अक्षादिवच्च विकल्प्यमानार्थोपपत्तेः व्यवस्थितविषय एव विकल्पो

---

७ ] मिव— nyāma-wit__kha

४ ] यस्यार्थस्य— nyāma-wit__ka

---

४ शेन ] तत एव—देशान्तरीयसङ्केतवशादेव ॥

४ एव ] शब्दात्—चोरादिशब्दात् ॥

८ स्यात् ] तासां स्यादिति । तथा च देशभेदेनार्थभेदो न स्यात् ॥

९ स्या ] अन्यथाऽपि—शक्तिभ्रमादिनाऽपि ॥

१० च ] सर्वार्थप्रत्ययप्रसङ्गः इत्यत्र सर्वशब्दात् इति शेषः ॥

२ * ] अक्षादिवदिति । अक्षशब्दः इन्द्रियवाची द्यूतविशेषवाची च ॥

भविष्यति ॥ § 4798

I.600/KSV

*पिकनेमतामरसादिशब्दानां च भवद्भिः म्लेच्छप्रयोगात् अर्थनिश्चय आश्रित एव । अवेष्ट्यधिकरणे जै. सू. २-३-३ राजशब्दं *आन्ध्रप्रसिद्धेऽर्थे वर्णितवन्तो भवन्त इति अलमवान्तरचिन्तनेन । तस्मात् समय एव सम्बन्ध इति युक्तम् । तदुक्तं जातिविशेषे चानियमात् न्या. सू. २-१-५७ इति ॥ § 4799

## सर्गादौ सकृदेव शब्दानां समयकरणम्

अथ यदुक्तं—समयः प्रत्युच्चारणं, प्रतिपुरुषं, सर्गादौ सकृत् क्रियते ? इति पु. ५९३—प्रत्युच्चारणं, प्रतिपुरुषं च तत्करणं अनभ्युपगतमेव दूषितम् । सर्गादौ सकृदेव समयकरणमिति नः पक्षः ॥ § 4800

अत एव न सर्वशब्दानां यदृच्छातुल्यत्वम् । केषाञ्चिदेव शब्दानां अस्मदादिभिरद्यत्वे सङ्केतकरणात् तत एव यदृच्छाशब्दा उच्यन्ते । सर्गादिश्च समर्थित एव पु. ५१० । ईश्वरसिद्धावप्यविकलमनुमानमुपन्यस्तम् पु. ४९१-५१२ ॥ § 4801

## पूर्वपक्षिसिद्धान्तिनोः विशेषः

एष एव चावयोर्विशेषः—यदेष शब्दार्थसम्बन्धव्यवहारः तवानादिः, मम तु जगत्सर्गात् प्रभृति प्रवृत्त इति । अद्यत्वे तु शब्दार्थसम्बन्धव्युत्पत्तौ तुल्य एवावयोः पन्थाः । तत्रापि त्वयं विशेषः— यत् तव शक्तिपर्यन्ता व्युत्पत्तिः, मम तु तद्धर्जमिति ॥ § 4802

I.601/KSV

## शक्तेः शब्दार्थसम्बन्धत्वे लोकानुभवविरोधः

१४ ] राज्य— nyāma-wit__kha
१८--१९ ] प्रतिपुरुषं—
nyāma-wit__kha
१९ ] तत्कारणं—
nyāma-wit__kha
३ ] विकल्प— nyāma-wit__kha

४ *] पिकेत्यादि । पिकनेमाधिकरणे १-३-५ अविरोधे सति म्लेच्छप्रसिद्धिरपि ग्राह्येति सिद्धान्तितम् । पिक इति कोकिलो ग्राह्यः, नेमोऽर्धं, तामरसं पद्मं, सत इति दारुमयं पात्रं, परिमण्डलं शतच्छिद्रम् इति शाबरभाष्यम् १-३-५ ॥
५ *] आन्ध्रप्रसिद्ध इति । जनपदपुरपरिरक्षणवृत्तिमनुपजीवत्यपि क्षत्रिये राजशब्दमान्ध्राः प्रयुञ्जते । आन्ध्राणां प्रयोगो न विरोत्स्यते इति तत्रत्यं शाबरं भाष्यम् ॥
१९ तु] तद्धर्जमिति । अर्थपर्यन्तैव हि व्युत्पत्तिः, तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इतिन्यायात् मध्ये शक्तिकल्पनं व्यर्थम् ॥

तथा चेयमियती व्युत्पत्तिः लोके दृश्यते—यत् अयमस्य वाच्यः, अयमस्य वाचक इति, न पुनः शक्तिपर्यन्ता व्युत्पत्तिंरस्ति । तथा हि—यत्र शृङ्गग्राहिकया शब्दमर्थं च निर्दिश्य सम्बन्धः क्रियते, तत्रेयन्तमेवैनं क्रियमाणं पश्यामः—अयमस्य वाच्यः, अयमस्य वाचक इति ॥ § 4803

यत्रापि च वृद्धेभ्यः व्यवहरमाणेभ्यः व्युत्पद्यते, तत्रापीयदेवासौ जानाति—अयमर्थः अमुतः शब्दात् अनेन प्रतिपन्न इति, न त्वन्याऽस्य काचिच्छक्तिरस्तीति । इयत्यैव च व्युत्पत्त्या शब्दादर्थप्रत्ययोपपत्तेः, अस्याश्चापरिहार्यत्वात्, अधिककल्पनाबीजाभावाच्च न नित्यः शब्दार्थसम्बन्धः ॥ § 4804

## सम्बन्धग्रहणविषये सिद्धान्तस्य मीमांसकमताद्विशेषः

अत एव च सम्बन्धः त्रिप्रमाणकः श्लो. वा. १-१-५ सम्ब. परि. १४१ इति यत् त्वयोच्यते तदस्माभिर्न मृष्यते । शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति इति सत्यम् । श्रोतुश्च प्रतिपन्नत्वं अनुमानेन चेष्टया इत्येतदपि सत्यम् । अन्यथाऽनुपपत्त्या तु वेत्ति शक्तिं द्वयात्मिकाम् इत्येतत्तु न सत्यम्; अन्यथाऽप्युपपत्तेरित्युक्तत्वात् । तस्मात् द्विप्रमाणकः सम्बन्धनिश्चयः, न त्रिप्रमाणकः ॥ § 4805

तदेवं शब्दस्य नैसर्गिकशक्त्यात्मकसम्बन्धाभावात् ईश्वरविरचितसमयनिबन्धनः शब्दार्थव्यवहारः नानादिः ॥ § 4806

I.602/KSV

## शब्दार्थयोस्सम्बन्धस्यानित्यत्वेऽनवस्थापरिहारः

ननु ! ईश्वरोऽपि सम्बन्धं कुर्वन् अवश्यं केनचित् शब्देन करोति; तस्य केन कृतः सम्बन्धः ? शब्दान्तरेण चेत्, तस्यापि केन कृतः ? तस्यापि केन ? इति न कश्चिदवधिः । तस्मादवश्यमनेन सम्बन्धं कुर्वता वृद्धव्यवहारसिद्धाः केचित् अकृतसम्बन्धा एव शब्दा अभ्युपगन्तव्याः । *अस्ति चेत्, *व्यवहारसिद्धिः; किमीश्वरेण ? किं वा तत्कृतेन समयेन ? इत्यनादिपक्ष

२१--१ ] सत्यम्—
nyāma-wit__ka
१ ] इत्यनाद्य— nyāma-wit__kha

१० च ] त्रिप्रमाणक इति । इदं च प्रकरणं पूर्वमेव पु. २२३ विचारितम् । तत्र यद्यपि भाट्टपक्षः स्वसम्मतत्वेनोक्त इव; अथापि सम्बन्धाधिगमस्य नानाप्रमाणगम्यत्वमात्रे सम्मतिः पूर्वं प्रदर्शितेति मन्तव्यम् ॥
१४ स्मात् ] द्विप्रमाणक इति । प्रत्यक्षानुमानप्रमाणकः, न त्वर्थापत्तिरपेक्ष्यत इत्यर्थः ॥

२१ *] अस्ति चेत्—अवशात्तादृशशब्दसत्त्वमंगीक्रियत इति चेत् ॥
१ *] व्यवहारसिद्धिरिति । अस्य भवत्सप्रयमन्तराऽपीत्यादिः । एतदनन्तरं च ततश्च इत्यप्यध्याहार्यम् ॥

एव श्रेयान्— § 4807
उच्यते— § 4808

अस्त्वमायुष्मता ज्ञातं विषयस्तु न लक्षितः ।
अस्मदादिषु दोषोऽयं ईश्वरे तु न युज्यते ॥ ४७ ॥§ 4810

नानाकर्मफलस्थानं इच्छयैवेदृशं जगत् ।
स्रष्टुं प्रभवतस्तस्य कौशलं को विकल्पयेत् ॥ ४८ ॥§ 4812

इच्छामात्रेण पृथिव्यादेरियतः कार्यस्य करणमस्मदादीनां यन्मनोरथपदवीमपि नाधिरोहति, तदपि यतः संपद्यते, तस्य कियानयं प्रयासः । तदत्रेश्वरसद्भावे परं विप्रतिपत्तयः । तस्मिंस्तु सिद्धे क एवं विकल्पानामवसरः ? उक्तं च तत्सिद्धौ निरपवादमनुमानम् । वयं तु न कर्तार एव सम्बन्धस्य, यत एवमनुयुज्येमहि ॥ § 4813

अङ्गुल्यग्रेण निर्दिश्य कश्चिदर्थं पुरःस्थितम् ।
व्युत्पादयन्तो दृश्यन्ते बालानस्मद्विधा अपि ॥ ४९ ॥§ 4815

तस्मात् ईश्वरविरचितसम्बन्धाधिगमोपायभूतवृद्धव्यवहारलब्धतद्व्युत्पत्तिसापेक्षः शब्दः अर्थमवगमयतीति सिद्धम् ॥ § 4816
I.603/KSV

## शब्दार्थयोः सम्बन्धस्यानित्यत्वेऽपि न शब्दानामर्थासंस्पर्शित्वम्

* न च नित्यसम्बन्धाभावेऽपि शब्दस्यार्थासंस्पर्शित्वं, समयबलेनार्थप्रत्ययस्याबाधितस्य सिद्धेरित्युक्तत्वादित्यलं विस्तरेण ॥

तस्मात् पदे च वाक्ये च सम्बन्धे च स्वतन्त्रता ।
पुरुषस्योपपन्नेति वेदानां तत्प्रणीतता ॥ ५० ॥§ 4819
तस्मादाप्तोक्तत्वादेव वेदाः प्रमाणम्, न नित्यत्वात् ॥ § 4820

## वेदानामाप्तोक्तत्वनिश्चयासंभवशङ्का

३ ] स्पर्शित्वं— nyāma-wit_kha

५ दादिषु ] अयं दोषः—शब्दान्तरेण सङ्केतकरणेऽनवस्थादिः । कुतो नास्ति—इत्यत्रैवोत्तरं अनन्तरश्लोकः । तथा च इच्छयैव सङ्केतकरणमिति नानवस्था ॥
१७ *] न चेत्यादि । शब्दार्थयोः सम्बन्धस्यानित्यत्वे अर्थमन्तराऽपि शब्दस्य स्थितिसंभवेन अर्थशून्योऽपि शब्दः कश्चिदङ्गीकर्तव्यः—इत्याक्षेपाशयः । सम्बन्धानित्यत्वेऽपि शब्दस्यापि तथात्वेन शब्देन साकमेव समयसिद्ध्या नार्थशून्यत्वं शब्दानामिति समाधानाशयः ॥

ननु ! आप्तोक्तत्वस्य हेतोः पक्षधर्मत्वं कथमवगम्यते ? न प्रत्यक्षेण क्षोणीधरधर्मत्वमिव धूमस्य वेदानामाप्तप्रणीतत्वमवगम्यते; श्रवणयुगलबललब्धजन्मनि प्रत्यये वेदाख्यशब्दराशेरेव प्रतिभासात् । न चोदात्तादिवत् वर्णधर्मत्वेन आप्तोक्तत्वं गृह्यते ॥ § 4821

नाप्यनुमानमस्मिन्नर्थे; लिङ्गाभावात् । प्रामाण्ये हि वेदस्य आप्तोक्तत्वं लिङ्गम् । आप्तोक्तत्वानुमितौ तु न लिङ्गान्तरमुपलभामह इति कुतस्त्यः पक्षधर्मत्वनिश्चयः— § 4822

## अनुमानादेव वेदानामाप्तोक्तत्वनिश्चयः

उच्यते—अलं सरस्वतीक्षोदेन ! उक्त एव पक्षधर्मत्वनिश्चयोपायः । तथा हि— § 4823

शब्दस्य साधितं तावदनित्यत्वं सविस्तरम् ।
रचनाः कर्तृमत्यश्च रचनात्वादिति स्थितम् ॥ ५१ ॥§ 4825

कर्ता सर्वस्य सर्वज्ञः पुरुषोऽस्तीति साधितम् ।
कार्येणानुगुणं कल्प्यं निमित्तमिति च स्थितम् ॥ ५२ ॥§ 4827

I.604/KSV

प्रत्यक्षादिविसंवादः वेदे परिहरिष्यते ।
व्याघातपौनरुक्त्यादिदोषाश्च वचनान्तरे ॥ ५३ ॥§ 4829

विध्यर्थवादमन्त्राणां उपयोगश्च वक्ष्यते ।
न मात्रामात्रमप्यस्ति वेदे खिञ्चिदपार्थकम् ॥ ५४ ॥§ 4831

शब्दब्रह्मविवर्तादिकल्पनाश्च पुरोदिताः ।
सर्वाः परिहरिष्यन्ते कार्यत्वस्य विरोधिकाः ॥ ५५ ॥§ 4833

इत्थं च स्थिते किमन्यदवशिष्टं वेदेष्वाप्तोक्ततानिश्चयस्य ? सोऽयं सकलशास्त्रार्थस्थितौ सत्यां पक्षधर्मत्वनिश्चयः हेतोः आप्तोक्तत्वस्य गीयते ॥ § 4834

यत्तु प्रत्यक्षमनुमानं वा तन्निश्चयानिमित्तमिति विकल्पितम् पु. ५७५—तत्र प्रत्यक्षमास्ताम् ! अनुमानादीनि च यानि रचनात्वादीन्युक्तानि, यानि च परदर्शनद्विंषि वक्ष्यन्ते, तानि सर्वाण्याप्तोक्ततायाः पक्षधर्मतासिद्ध्यौपयिकानीत्यलं विस्तरेण ॥ § 4835

---

९ ] करण— nyāma-wit_kha

---

१ हेतोः ] पक्षधर्मत्वं—वेदरूपपक्षवृत्तित्वम् ॥
१४ वेदे ] परिहरिष्यते—अत्रैवाह्निके उपरिष्टात् ॥

१ च ] परदर्शनद्विंषि—परपक्षासम्मतानि । आयुर्वेदादिदृष्टान्तैरयमर्थः समनन्तरमेव वक्ष्यते ॥

## वेदे आप्तोक्तत्वहेतोः व्याप्तिग्रहणप्रकारः

व्याप्तिः पुनरस्य हेतोः आयुर्वेदादिवाक्येषु निश्चीयते । पिप्पलीपटोलमूलादेरप्यौषधस्य इत्थमुपयोगात् इदमभिमतमासाद्यते । *अस्य च क्षीरचुक्रादिविरोध्यशनस्य परिहारादिदमनिष्टमुपशाम्यतीत्यादिष्वायुर्वेदशास्त्रेषु प्रत्यक्षेण तस्यार्थस्य तथा निश्चयात् अर्थाविसंवादित्वं नाम प्रामाण्यं प्रतिपन्नं; तच्चेदमाप्तवादप्रयुक्तम् । अतः यत्राप्तवादत्वं तत्र प्रामाण्यमिति व्याप्तिर्गृह्यते ॥ § 4836

I.605/KSV

तथा मन्त्राणां प्रयोगे वृश्चिकभुजगदष्टस्य भक्षितविषस्य वा निर्विषत्वं, अपस्मारपिशाचरूपिकागृहीतस्य तदुन्मोचनं, अतिरभसोज्झितहानेषु दुष्टमेघेषु सस्यरक्षणमित्येवमुपलब्धम् । अतस्तेषां विषभूताशनिशमनकुशलानां आप्ता उपदेष्टार इति तत्रापि तथैव व्याप्तिनिश्चयः ॥ § 4837

## आयुर्वेदादीनां प्रामाण्यमाप्तोक्तत्वमूलमेव

ननु ! आयुर्वेदादौ प्रामाण्यं प्रत्यक्षादिसंवादात् प्रतिपन्नम्, नाप्तप्रामाण्यात् । अतः कथमाप्तोक्तत्वस्य तत्र व्याप्तिग्रहणम् ? नैतदेवम्—प्रत्यक्षादिसंवादात् तन्निश्चीयतां नाम प्रामाण्यम् ! * उत्थितं तु तत् आप्तोक्तत्वात् । प्रत्यक्षादावप्यर्थक्रियाज्ञानसंवादात् प्रामाण्यस्य ज्ञप्तिः । उत्पत्तिस्तु गुणवत्कारककृत्येत्युक्तम् पु. ४४२ ॥ § 4838

नद्यादिवाक्यानि च विप्रलम्भकपुरुषभाषितानि विसंवदन्ति लोके दृश्यन्ते । तेनाप्तप्रणीतत्वमेव तेषां प्रामाण्यकारणम्, कारणशुद्धिमन्तरेण सम्यक्प्रत्ययानुत्पादात् । निश्चयोपायस्तु प्रत्यक्षं भवतु, न तु तत्कृतमेव प्रामाण्यम् । अतः युक्तमाप्तोक्ततायाः आयुर्वेदादौ व्याप्तिग्रहणम् ॥ § 4839

## आयुर्वेदादौ संवादादेव प्रामाण्यमित्याशङ्का

ननु ! एवमपि न युक्तम्, आप्तोक्तत्वस्य तत्र परिच्छेत्तुमशक्यत्वात् । अन्वयव्यतिरेकमूलमेव आयुर्वेदवाक्यानां प्रामाण्यम्, नाप्तकृतम् । अन्वयव्यतिरेकौ च यावत्येव दृश्येते, तावत्येवार्थे प्रामाण्यम्—यथा हरीत-

१७ ] इदमपि— nyāma-wit__ka
१८ ] विरोधा— nyāma-wit__ka
२० ] यतः— nyāma-wit__kha
१ ] शयनिशमन— nyāma-wit__ka

४ *] अस्येत्यादि । उक्तस्यौषधस्य पथ्योपदेशोऽयम् ॥
५ क्षीर ] चुक्रं—तिन्त्रिणीकं च चुक्रं च इत्यमरः ॥
१५ *] उत्थितमिति । आप्तोक्तत्वज्ञानादेव हि तादृशौषधसेवनादौ प्रवर्तते पुरुषः । फलप्राप्त्या च तद्वार्क्यं भवति । न त्वाप्तोक्तत्वज्ञानमेव संवादाधीनम् ॥

क्यादिवाक्यार्थे । यत्र तु तयोरदर्शनं तत्राप्रामाण्यम्—यथा सोमराज्युपयोगे समाः सहस्रं जीव्यते इति । आप्ते तु कल्प्यमानेऽर्धजरतीयं स्यात् । अर्धे तस्याप्तत्वम्, अर्धे च कथमनाप्तत्वमिति ॥ § 4840
I.606/KSV

## आयुर्वेदादौ संवादस्य दुरधिगमत्वनिरूपणम्

तदिदमनुपपन्नम्—अन्वयव्यतिरेकयोः ग्रहीतुमशक्यत्वात् । तौ हि स्वात्मनि वा ग्रहीतुं शक्येते ? व्यक्तयन्तरे वा ? व्यक्त्यन्तरेऽपि, सर्वत्र ? क्वचिदेव वा व्यक्तिविशेषे ? सर्वथा संकटोऽयं पन्थाः । व्याधीनां, तन्निदानानां, तदुपचयापचयानां तदुपशमोपायानां, औषधानां, तत्संयोगवियोगविशेषाणां, तत्परिमाणानां, तद्रसवीर्यविपाकानां, देशकालपुरुषदशाभेदेन शक्तिभेदस्य एकेन जन्मना ग्रहीतुमशक्यत्वात् । जन्मान्तरानुभूतानां च भावानां अस्मरणात् ॥

जनोऽनन्तस्तावन्निरवधिरिह व्याधिनिवहः
न संख्यातुं शक्या बहुगुणरसद्रव्यगतयः ।
विचित्राः संयोगाः परिणतिरपूर्वेति च कुतः
चिकित्सायाः पारं तरति युगलक्षैरपि नरः ॥ ५६ ॥§ 4845

यदेव द्रव्यमेकस्य धातोर्भवति शान्तये ।
योगान्तरात्तदेवास्य पुनः कोपाय कल्पते ॥ ५७ ॥§ 4847

या द्रव्यशक्तिरेकत्र पुंसि नासौ नरान्तरे ।
* हरीतक्यापि नोद्भूतवातकुष्ठे विरेच्यते ॥ ५८ ॥§ 4849

शरद्युद्रिक्तपित्तस्य ज्वराय दधि कल्पते ।
तदेव भुक्तं वर्षासु ज्वरं हन्ति दशान्तरे ॥ ५९ ॥§ 4851

न चोपलक्षणं किञ्चित् अस्ति तच्छक्तिवेदने ।
येनैकत्र गृहीताऽसौ सर्वत्रावगता भवेत् ॥ ६० ॥§ 4853

२१ ] तदुपचयानां—
nyāma-wit_kha

४ था ] सोमराजी—अवल्गुजः सोमराजी सुवल्लिः सोमवल्लिका इत्यमरः ॥
७ हि ] स्वात्मनि—येन तदौषधं सेवितं तादृशे स्वस्मिन् ॥
२१ * ] हरीतकीति । हरीतक्याः विरेचकत्वं प्रसिद्धम् ॥

यो वा ज्ञातुं प्रभवति पुरुषः तत्सामर्थ्यं निरवधिविषयम् । स्यात् सर्वज्ञः स इति न विमतिः तस्मिन् कार्या स्ववचनकथिते ॥ § 4854
I.607/KSV

## अनादिपरम्परासिद्धत्वमात्रान्नायुर्वेदादिप्रामाण्यनिर्णयः

अथोच्येत—अनादिरेवैषा चिकित्सकस्मृतिः, व्याकरणादिस्मृतिवत् । संक्षेपविस्तरविवक्षयैव चरकादयः कर्तारः, न तु ते सर्वदर्शिनः । न च स्मृतावन्धपरंपरादोषः, समूलत्वात् । यथा व्याकरणस्मृतेः शिष्टप्रयोगो मूलं, एवमिहान्वयव्यतिरेकौ । शिष्टविरोधे सति यथा मूलविरोधिनी पाणिन्यादिस्मृतिरप्रमाणम्, तथा चाहुः इह न भवत्यनभिधानात् वार्तिकम् इति । एवं वैद्यस्मृतिरपि अन्वयव्यतिरेकविरुद्धा न प्रमाणमिति—तदेतदयुक्तम्— अन्वयव्यतिरेकयोर्यथोक्तनयेन परिच्छेदासम्भवेन तन्मूलत्वानुपपत्तेः ॥ § 4855

## क्वाचित्कसंवादात् सर्वांशे प्रामाण्यं न निर्णेतुं शक्यम्

यदि ह्यन्वयव्यतिरेकाभ्यां अशेषद्रव्यशक्तीर्निश्चित्य चरकादिभिर्विरचितं शास्त्रमितीदृशमन्वयव्यतिरेकित्वमुच्यते—तदप्ययाकृतम्—अद्यत्वे यावन्तावन्वयव्यतिरेकौ वयमुपलब्धुं शक्नुमः, तावद्भ्यां ताभ्यां एकदेशसंवादात् प्रामाण्यकल्पनात् * तत्र प्रवर्तताम्; न तु तौ तावन्तौ शास्त्रस्य मूलं भवितुमर्हतः; सर्वैरस्मदादिभिस्तादृशशास्त्रप्रणयनप्रसङ्गात् ॥ § 4856

## आयुर्वेदादीनां वेदवत् नानादित्वम्

अनादित्वमपि शास्त्राणां वेदवदनुपपन्नम्; चरकादिकर्तृस्मृतेः कालिदासादिस्मृतिवदविगीतत्वात् । न च चिकित्सास्मरणप्रबन्धएवायमनादिः; तथात्वे अन्धपरंपरा, कारणानवधारणात् । न च तदुक्तं उन्मूलं भवितुमर्हति, व्युदस्तत्वात् । तस्मात् सर्वज्ञप्रणीत एवायुर्वेदः ॥ § 4857
I.608/KSV

---

१७ ] कथितेः— nyāma-wit__kha

१८ ] अथोच्यते— nyāma-wit__kha

१ ] परिच्छेद— nyāma-wit__ka

१ ] उन्मूलत्वा— nyāma-wit__ka

४ ] अद्य तु— nyāma-wit__ka

६ ] कल्पना— nyāma-wit__ka

६ ] प्रवर्तनम्— nyāma-wit__kha

९ ] एव— nyāma-wit__kha

१० ] तन्मूलं— nyāma-wit__kha

---

४ कार्या ] स्ववचनेति । भवतैवोच्यते तादृशः कश्चित् स्यात् पुरुषः इति, निषिध्यते चेश्वरः, किमिदं विचित्रम् ! यतः स एवेश्वरो नः ॥

१६ * ] तत्र—तात्रत्येव एकदेशे ॥

१६ न्तौ ] शास्त्रस्येति । कृत्स्नस्येति शेषः ॥

४ स्मात् ] सर्वज्ञः—तत्तच्छास्त्रोपयोगियावदर्थसाक्षात्कारवान्
॥

## आयुर्वेदादिकर्तॄणां तदुपयोग्यर्थदर्शनं प्रत्यक्षमेव

ननु अविदुषामुपदेशो नावकल्पत इति विद्वांसः चरकादयः कल्प्यन्ताम् । ते तु प्रत्यक्षेणैव सर्वं विदितवन्त इत्यत्र किं मानम् ? उच्यते—अन्वयव्यतिरेकयोर्निरासात् नानुमानस्यैष विषयः । वेदमूलत्वमपि मन्वादिस्मृतिवत् अयुक्तं कल्पयितुम्, *कर्तृसामान्यासंभवादिति वर्णयिष्यामः पु. ६३२ । पुरुषान्तरोपदेशपूर्वकत्वे चरकेणव किमपराद्धम् ? उपमानमनाशङ्कनीयमेवास्मिन्नर्थे । अर्थापत्तिस्तु न प्रमाणान्तरम् । अप्रामाण्यं तु नास्ति, बहुकृत्वः संवाददर्शनात् । अतः परिशेषात् प्रत्यक्षीकृतदेशकालपुरुषदशाभेदानुसारिसमस्तव्यस्तपदार्थसार्थशक्तिनिश्चयाः चरकादयः इति युक्तं कल्पयितुम् ॥ § 4858

## आयुर्वेदाद्युक्तफलेषु व्यभिचाराद्यप्रसक्तिः

यद्येवं कथं तर्हि सोमराज्यादिवाक्येषु व्यभिचारः ? व्यभिचारे चार्धजरतीयमित्युक्तम्—नैष दोषः—कर्मकर्तृसाधनवैगुण्यात् एषु व्यभिचारो भविष्यति । वैदिकेषु च कर्मसु मीमांसकस्य समानो गुणः ॥ § 4859

कारीर्यादौ का ते वार्ता ? यस्यां न स्यादिष्टौ वृष्टिः ।
वैगुण्यं चेत् कर्त्रादीनां, अत्राप्येवं शक्यं वक्तुम् ॥ ६२ ॥§ 4861

I.609/KSV

यदि विधुरमभुक्तं कर्म शास्त्रीयमन्यत्
फलविघटनहेतुः कल्प्यते सोऽपि तुल्यः ।
क्वचिदथ फलसंपत् दृश्यते तत्प्रयोगे
तदिह दृढशरीराः सन्ति दीर्घायुषश्च ॥ ६३ ॥§ 4865

---

४ ] सामर्थ्य— nyāma-wit_ka

८ ] दोषः— nyāma-wit_kha

---

६ तु] प्रत्यक्षेणैवेति । तादृशशास्त्रप्रणयनोपयोगिज्ञानं प्रत्यक्षरूपमेवेति कुत इत्यर्थः ॥
८ *] कर्तृसामान्यासंभवादिति । ये वैदिकधर्माधिकारिणः, त एव मन्वादिस्मृत्युक्तार्थाधिकारिण इति उभयविधधर्मकर्त्रोः साधारणत्वात् मन्वादिस्मृतीनामपि वेदमूलत्वं कल्प्यते । न ह्येवमायुर्वेदादौ वक्तुं शक्यं, विषयस्यैव विलक्षणत्वादित्यर्थः ॥

१६ स्य] समानो गुणः—समानो योगक्षेम इति भावः । वस्तुतस्तु शतसहस्रादिपदानि बहुपर्यायान्येवेति सोमराज्युपयोगवचनमपि न बाधितम् ॥
१ दि] विधुरं—फलविकलम् । यदि विधुरं इति आक्षेपवाक्यम् । एतावताऽदत्तफलस्य तस्य तत्समये फलौन्मुख्येन प्रकृतफलविघटनं मद्युच्यते, तर्हि प्रकृतेऽपि तुल्यम् ॥

आयुर्वेदस्तस्मात् आप्तकृतो नान्यमूल इति सिद्धम् ।
एवंफलवेदादौ प्रकाशमाप्तप्रणीतत्वम् ॥ ६४ ॥§ 4867

तस्मात् आप्तोक्तत्वस्य सिद्धमायुर्वेदादौ व्याप्तिग्रहणम् । व्याप्तिप्रदर्शनायैव सूत्रकृता— § 4868

स द्विविधो दृष्टादृष्टार्थत्वात् न्या. सू. १-१-८ § 4869

इत्युक्तम् । दृष्टार्थशब्दे गृहीताविनाभावं आप्तोक्तत्वं अदृष्टार्थेऽपि प्रामाण्यं साधयतीति । अत एवोक्तं— § 4870

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्न्या. सू. २-१-६९ इति ॥ § 4871

### आयुर्वेदादिकर्तॄणामतीतत्वेऽपि व्याप्तिग्रहसंभवः

* नन्वत्रापि न वैद्यकं विरचयन् दृष्टो मुनिः सर्ववित्
तद्व्याप्तिग्रहणं जने यदि, वृथाऽऽयुर्वेदसंकीर्तनम् ।
सत्यं, किन्तु दृढा तथापि चरकाद्याप्तस्मृतिर्वैद्यके
नासौ चान्यनिबन्धनेति कथिता तस्येह दृष्टान्तता ॥ ६५ ॥§ 4875

I.610/KSV

इत्यायुर्वेदवाक्यप्रभृतिषु भवति व्याप्तिराप्तोक्ततायाः
पूर्वोक्तेन क्रमेण स्फुटमकथि तथा पक्षधर्मत्वमस्याः ।
न प्रत्यक्षागमाभ्यामपहृतविषया नानुमानान्तरेण
व्याधूता वेति सैषा भजति गमकतां पञ्चरूपोपपत्तेः ॥ ६६ ॥§ 4879

---

१५ ] श्च तस्मात्— nyāma-wit__kha
२० ] आप्तोक्तत्वात्— nyāma-wit__ka
५ ] प्तिस्मृते— nyāma-wit__ka
६ ] चार्य— nyāma-wit__kha

---

६ वेदादौ ] प्रकाशं—स्पष्टम् ॥
१४ *] नन्वित्यादि । चरकादीनामतीतत्वात्, इदानीं तादृशपुरुषादर्शनात् कथं व्याप्तिग्रहः ? अतीतचरकादिविषयिण्येव यदि व्याप्तिः, तदाऽतीतवस्तुज्ञानात् वयमपि सर्वज्ञा जाता इति, अस्माकं परमुखनिरीक्षणं व्यर्थमिति आयुर्वेदादिदृष्टान्तकथनं वृथेति चेत्; न—अतीतानां चरकादीनां इदानीमप्रत्यक्षत्वेऽपि तेषां ज्ञानं शब्दात् अनुमानेन वा भवत्येव । अनुमानं हि त्रिकालविषयम् । अतः आप्तोक्तत्वव्याप्तिस्सुगमैव ॥
४ तां ] पञ्चरूपाणि पूर्वपु. २८३मुक्तानि ॥

अनपेक्षतया न वेदवाचां घटते निष्प्रतिमः प्रमाणभावः ।
क्व गिरामयथार्थतानिवृत्तिः पुरुषप्रत्ययमन्तरेण दृष्टा ॥ ६७
॥§ 4881

तत्प्रत्ययात् बहुतरद्रविणव्ययादि-
साध्येषु कर्मसु तपस्सु च वैदिकेषु ।
युक्तं प्रवर्तनमबाधनकेन नैव
तत्सिद्धिरित्यलमसम्मत एष मार्गः ॥ ६८ ॥§ 4885

तस्मादाप्तोक्तत्वादेव वेदाः प्रमाणमिति सिद्धम् ॥ § 4886

## मीमांसकमते वेदप्रामाण्यवर्णनप्रकारः

* अन्ये तु अन्यथा वेदप्रामाण्यं वर्णयन्ति । तस्य हि प्रामाण्ये अभ्युपगतपरलोकः, अनभ्युपगतपरलोको वा परो विप्रतिपद्यते ? § 4887

तत्रानभ्युपगतपरलोकं प्रति तावत् आत्मनित्यतादिन्यायपूर्वकं परलोकसमर्थनमेव विधेयम् ॥ § 4888

I.611/KSV

परलोकवादिनां तु मते यदेतत् सुखिदुःख्यादिभेदेन जगतो वैचित्र्यं दृश्यते, तदवश्यं कर्मवैचित्र्यनिबन्धनमेव । कर्माणि चाननुष्ठितानि नात्मानं लभन्ते । अलब्धात्मनां च नभःकुसुमनिभानां कुतो विचित्रसुखदुःखादिफलसाधनत्वम् ? तस्मात् अनुष्ठानमेषामेषितव्यम् । अनुष्ठानं च नाविदितस्वरूपाणां कर्मणामुपपन्नम् । अजानन् पुरुषः तपस्वी किमनुतिष्ठेत् ? तदवश्यं ज्ञात्वाऽनुष्ठेयानि कर्माणि ॥ § 4889

तदिदानीं तेषां परिज्ञाने कोऽभ्युपायः ? § 4890

न प्रत्यक्षं अस्मदादीनां स्वर्गाद्यदृष्टपुरुषार्थसाधनानि कर्माणि दर्शयितुं प्रभवति ॥ § 4891

नाप्यनुमानम्; अन्वयव्यतिरेकाभ्यां तृप्तिभोजनयोरिव स्वर्गयागयोः साध्यसाधनसम्बन्धानवधारणात् ॥ § 4892

नाप्यर्थापत्तिः; जगद्वैचित्र्यान्यथाऽनुपपत्त्या तु विचित्रं * कारणमात्रमनुमीयते । न च तावताऽनुष्ठानसिद्धिः । उक्तं च श्लो. वा. १-४-१०५—

११ ] निष्प्रतिभः— nyāma-wit__ka

१५ ] मात्रकेण— nyāma-wit__ka

९ केन ] अबाधनकेन—बाधादर्शनमात्रेण । अयमर्थः पूर्वमेव पु. १५ आर्तो हि भिषजं दृष्ट्वा इत्यादावुपपादितः ॥
१० ल ] असम्मतः—सतामिति शेषः । यद्वा, असन्मतः—सताममतः ॥
१२ * ] शावरभाष्यसूचितां, श्लोकवार्तिकपोषितां प्रक्रियामनुवदति—अन्ये त्विति ॥
१७ नुष्ठितानि ] नात्मानं लभन्ते—स्वरूपनिष्पत्तिरेवानुष्ठानमन्तरा न भवतीत्यर्थः ॥
७ * ] कारणमात्रं—कारणसामान्यम् । न तु विशेषसिद्धिरित्यर्थः ॥

§ 4893

अधर्मे धर्मरूपे वाऽप्यविभक्ते फलं प्रति ।
किमप्यस्तीति विज्ञानं नराणां क्वोपयुज्यते ? इति
॥§ 4895

उपमानं त्वत्र शङ्क्यमानमपि न शोभते ॥ § 4896

नापि परस्परमुपदिशन्तो लौकिकाः कर्माणि परलोकफलानि जानीयुरिति वक्तुं युक्तम्; अज्ञात्वा उपपादयतां आप्तत्वायोगात् । ज्ञानं तु लौकिकानां दुर्घटम्; प्रमाणाभावादित्युक्तत्वात् । एवमेव हि पुरुषोपदेशपरंपराकल्पनायां अन्धपरंपरान्यायः स्यात् । तस्मादवश्यं अभ्युपगतपरलोकैः I.612/KSV परलोकफलानि कर्माणि कुर्वद्भिः शास्त्रात् कर्मावबोधोऽभ्युपगन्तव्यः । शास्त्रं च वेदा एवेति सिद्धं तत्प्रामाण्यम् ॥ § 4897

## लोकप्रसिद्ध्या धर्माधर्मस्वरूपावगमः न संभवेत्

ननु ! लोकप्रसिद्धित एव धर्माधर्मसाधनानि कर्माणि शास्यन्ते; किं शास्त्रेण ? उपकारापकारौ हि धर्माधर्मयोर्लक्षणमिति प्रसिद्धमेवैतत् । तथाऽऽह व्यासः—

इदं पुण्यमिदं पापं इत्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणां अल्पं शास्त्रप्रयोजनम् ॥§ 4900

इति—नैतद्युक्तम्—लोकप्रसिद्धेर्निर्मूलायाः प्रमाणत्वानुपपत्तेः । लोकप्रसिद्धिर्नाम लौकिकानामविच्छिन्ना स्मृतिः । स्मृतिश्च प्रभवन्ती प्रमाणान्तरमूला भवति, न स्वतन्त्रेत्यवश्यमस्या मूलमन्वेषणीयम् । तच्च प्रत्यक्षादि नोपपद्यते इति नूनं शास्त्रमूलैव लोकप्रसिद्धिः । विरुद्धानेकप्रकारत्वाच्च लोकप्रसिद्धेः न तस्यां स्वतन्त्रायां समाश्वसिति लोकः ॥ § 4901

न चोपकारापकारकमात्रलक्षणावेव धर्माधर्मौ वक्तुं युज्येते; जपशीधुपानादौ तदभावात् । गुरुदारगमनादौ च विपर्ययादित्यवश्यं शास्त्रशा-

---

१८ ] चोपकारक—
nyāma-wit__kha

---

१० राणां ] क्वोपयुज्यत इति । फलविशेषकर्मविशेषाणां, अधिकारानधिकारादीनां ज्ञाचमन्तरा प्रवृत्तेरसंभवादिति हेतुः ॥
१६ च ] वेदा एवेति । वेदाच्छास्त्रं परं नास्ति म. भा. अनु. इति प्रसिद्धमेव ॥
५ प ] शीधुः—मैरेयमासवः शीधुः इत्यमरः ॥
५ च ] विपर्ययादिति । उपकारापकारयोः पुरुषबुध्यैव निर्णये अपकारेऽपि उपकारत्वबुद्धिः स्यात् कस्यचित् । इन्द्रेण दूषिता हि अहल्या कृतार्थाऽस्मि रा. बा. ४८-२० इति वदति । शास्त्रादेवोपकारापकारनिर्णये अस्मदिष्टसिद्धिः ॥

रणावेव तावेषितव्यौ ॥ § 4902

## वैदिकधर्माधर्मनिर्णयः न लोकतो भवितुं शक्यः

अपि च इदमिष्टिमन्त्रादिकं एवंफलम्, अयमस्मिन् अधिकृत इति; इयमितिकर्तव्यता, एष देशः, एष कालः, इमे ऋत्विजः इत्यादि किं I.613/KSV
लोकप्रसिद्धेरधिगन्तुं शक्यते ? तस्मादवश्यं शास्त्राधीन एव विशिष्टकर्मावबोध एषितव्यः । शास्त्रं च वेद एवेत्युक्तम् । अतस्तस्य निर्विवादसिद्धमेव प्रामाण्यमिति ॥ § 4903

## सिद्धान्त्युक्तवेदप्रामाण्यप्रक्रियैव युक्ततरा

एवं तु वर्ण्यमाने संसारानादित्वं तावदुक्तं स्यात् । वेदस्यानादित्वं कर्मज्ञानानादित्वात् । ततश्च मीमांसकवर्त्मनैव प्रमाणता सिध्यति, नाप्तवादात् । तस्माद्यथोदाहृत एव मार्गः प्रमाणतायामनुवर्तनीयः ॥ § 4904

## वेदानामनादित्वं प्रवाहत एव, न स्वरूपतः

अथवा—

वयमपि न न शिष्मो ऽनादिसंसारपक्षं
युगपदखिलसर्गध्वंसवादे तु भेदः ।
अकथि च रचनानां कार्यता तेन सर्गात्-
प्रभृति भगवतेदं वेदशास्त्रं प्रणीतम् ॥ ६९ ॥§ 4909

अनादिरेवेश्वरकर्तृकोऽपि सदैव सर्गप्रलयप्रबन्धः । सर्गान्तरेष्वेव च कर्मबोधः वेदान्तरेभ्योऽपि जनस्य सिध्येत् ॥ *अन्यत्वे किं प्रमाणं ? ननु तव, सुमते ! किं तदैक्ये प्रमाणं ? § 4910

ध्वस्तं तावत् समस्तं भुवनमिति तदा वेदनाशोऽप्यवश्यम् । एकस्त्वीशोऽविशिष्टः स च रचयति वा प्राक्तनं संस्मरेद्वा वेदे स्वातन्त्र्यमस्मिन् नियतमुभयथाऽप्यस्ति चन्द्रार्धमौलेः ॥ § 4911

एकस्य तस्य मनसि प्रतिभासमानः

---

२२ ] देशः— nyāma-wit__kha
५ ] विशिष्मो— nyāma-wit__kha
११ ] तदैक्य— nyāma-wit__kha
१३ ] वशिष्टः— nyāma-wit__kha
१३ ] मस्मात्— nyāma-wit__kha

---

१६ पि ] न शिष्म इति न—शासु अनुशिष्टौ, लटः उत्तमपुरुषबहुवचनम् ॥
२ * ] अन्यत्वे—पूर्वकल्पगतवेदात् एतत्कल्पगतवेदस्य भेदे ॥
६ त ] उभयथाऽपि स्वातन्त्र्यं इत्यन्वयः ॥

वेदस्तदा हि कृतकान्न विशिष्यतेऽसौ ।
प्रत्यक्षसर्वविषयस्य तु नेश्वरस्य
युक्ता स्मृतिः, * करणमेव ततोऽनवद्यम् ॥ ७२ ॥§ 4915

I.614/KSV

तेनाप्तनिर्मिततयैव निरत्ययार्थ-
संप्रत्ययोपजननाय जनस्य वेदे ।
शास्त्रं सुविस्तरक्षपास्तकुतर्कमूल-
मोहप्रपञ्चमकरोत् मुनिरक्षपादः ॥ ७३ ॥§ 4919

## अथर्ववेदस्य चतुर्थवेदत्वाक्षेपः

अत्र कश्चिदाह—युक्तमितरेतरव्यतिषक्तार्थोपदेशित्वेनैककर्तृकत्वानुमान-द्वारकं त्रिवेद्याः प्रामाण्यम् । अथर्ववेदस्य तु * त्रय्याम्नातधर्मोपयोगानुपलब्धेः त्रयीबाह्यत्वेन न तत्समानयोगक्षेमत्वम् ॥ § 4920

## अथर्ववेदस्य स्वतन्त्रप्रमाणत्वासंभवः

अनपेक्षत्वलक्षणप्रामाण्यपक्षेऽपि पु. ४३५ विक्षिप्तशास्त्रान्तरोपदिष्ट-विशिष्टज्योतिष्टोमाद्यनेककर्मानुप्रविष्टहौत्राध्वर्यवादिव्यापारव्यतिषङ्गदर्शनात् त-दर्था त्रय्येव यथा प्रमाणभावभागिनी भवितुमर्हति, न तथा पृथग्व्यवहारा आथर्वणश्रुतिः ॥ § 4921

## वेदानां त्रित्वमेव श्रुतिसम्मतम्

तथा च लोके चतस्र इमा विद्याः प्राणिनामनुग्रहाय प्रवृत्ताः— आन्वीक्ष-की, त्रयी, वार्ता, दण्डनीतिरिति प्रसिद्धिः । श्रुतिस्मृती अपि तदनुगुणार्थे एव दृश्येते । श्रुतिस्तावत्—ऋग्भिः प्रातर्दिवि देव ईयते । यजुर्वेदेन तिष्ठति मध्येऽह्नः । सामवेदेनास्तमेति । वेदैरशून्यस्त्रिभिरेति सूर्यः तै. ब्रा. ३-१२-९ इति । तथा (?')प्रजापतिरकामयत बहुस्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवमिति । तान् लोकानभ्यतपत् तेभ्यस्त्रीणि ज्योतींष्यजायन्त । अग्निरेव पृथिव्या अजायत वायुरन्तरिक्षात् दिव आदित्य इति । तानि ज्योतींष्यभ्यतपत् । § 4922

३ ] तत्समान— nyāma-wit__kha

१० *] करणं—नूतनतया रचनम् ॥
१६ *] त्रय्याम्नातेति । शान्तिकपौष्टिकाभिचारादिप्रधानः खलु अथर्ववेदः ॥
२० था] पृथग्व्यवहारा—इतरनिरपेक्षेति यावत् ॥

I.615/KSV

तेभ्यस्त्रयो वेदा अजायन्त । अग्नेर्ऋग्वेदः । वायोर्यजुर्वेदः । आदित्यात्सामवेदः(?') शत. ब्रा. ११-४-११ । तथा सैषा विद्या त्रयी तपति नारा. १२-२ इति ॥ § 4923

## स्मृतिष्वपि वेदानां त्रित्वमेव कीर्त्यते

स्मृतिरपि मानवी—प्रतिवेदं द्वादशवार्षिकब्रह्मचर्योपदेशिनी दृश्यते मनुस्मृ. ३-१—

षट्त्रिंशद्वार्षिकं चर्यं गुरौ त्रैवेदिकं व्रतम् इति ॥§ 4925

श्राद्धप्रकरणेऽपि मनुस्मृ. ३-१४५—

यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्युं छन्दोगं वा समाप्तिगम् ॥§ 4928

इति त्रिवेदपारगानेव श्राद्धभुजः ब्राह्मणान् दर्शयति, नाथर्ववेदाध्यायिनः । प्रत्युत निषेधः क्वचिदुपदिश्यते—तस्मादाथर्वणं न प्रवृञ्जयात् कल्पसू. इति ॥ § 4929

## अथर्वणो वेदत्वं भट्टमतरीत्या

एवमाक्षेपे सति केचिदाचक्षते तं. वा. १-३-२— § 4930

यदि यज्ञोपयोगित्वं नेहास्त्याथर्वणश्रुतेः ।
अर्थान्तरे प्रमाणत्वं केनास्याः प्रतिहन्यते ?
शान्तिपुष्ट्यभिचारार्थाः एकब्रह्मर्त्विगाश्रिताः ।
क्रियास्तया प्रमीयन्ते त्रयी वात्मीयगोचरः इति ॥§ 4934

## स्वपक्षेण अथर्वणः वेदत्वसमर्थनम्

१ ] त्रैवेद्यकं— nyāma-wit_kha
६ ] दाथर्वणेन— nyāma-wit_kha
११ ] त्रय्येवा— nyāma-wit_kha

१९ न] प्रवृञ्ज्यादिति । वृजि वर्जने इति धातुः । प्रवर्गे आथर्वणं न नियोजयेदित्यर्थः ॥

३ भिचारार्थाः] एकब्रह्मेत्यादि । एक एव ब्रह्मा ऋत्विक् च शान्तिकपौष्टिकाभिचारिकेषु ॥

एतत्तु सर्वं न साध्वभिधीयते । तथा हि—तत्प्रमाणं बादरायणस्यानपेक्षत्वात् I.616/KSV जै. सू. १-१-५ इति य एष वेदप्रामाण्याधिगतौ जैमिनिना निरदेशि पन्थाः, यो वा अक्षपादेन, कणादेन च प्रकटितः—तद्वचनादाम्नायप्रामाण्यम् वै. सू. १०-२-९ इति, मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात् न्या. सू. २-१-६९ इति, स चतुर्ष्वपि वेदेषु तुल्यः । तत्र विशेषतुषोऽपि न कश्चिदतिप्रयत्नेनान्विष्यमाणः प्राप्यते । न हि मीमांसकपक्षे एवं वक्तुं शक्यते— त्रय्येवानादिमती, नाथर्वश्रुतिः; तस्यां कर्तृस्मरणसंभवादिति ॥ § 4935

नापि नैयायिकपक्षे एवं वक्तुं शक्यम्—आप्तप्रणीताः त्रयो वेदाः, चतुर्थस्तु नाप्तप्रणीत इति । तेन प्रामाण्याधिगमोपायाविशेषात् समानयोगक्षेमतया चत्वारोऽपि वेदाः प्रमाणम् ॥ § 4936

व्यवहारो हि सर्वेषां सारेतरविचारचतुरचेतसां चतुर्भिरपि वेदैः, चतुर्णां वर्णानामाश्रमाणां, चतसृषु दिक्षु, चतुरब्धिमेखलायामवनौ प्रसिद्ध इति कोऽयमत्रान्यथात्वभ्रमः ? § 4937

श्रुतिस्मृतिमूलश्चार्यावर्तनिवासिनां भवति व्यवहारः । ते च श्रुतिस्मृती चतुरोऽपि वेदान् समानकक्ष्यानभिवदतः । ऋग्यजुस्सामवेदेष्वपि अथर्ववेदाशंसीनि भूयांसि वचांसि भवन्ति । तद्यथा शतपथे अथ तृतीयेऽहन् शत. ब्रा. १३-४-३-७ इत्युपक्रम्य अश्वमेधे पारिप्लवाख्याने सोऽयमाथर्वणो वेदः इति श्रूयते । छान्दोग्योपनिषदि च ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थः छा. उ. ७-१-४ इति पठ्यते ॥ § 4938

## अथर्ववेदस्य इतिहासपुराणतुल्यत्वनिरासः

ननु ! इतिहासपुराणः पञ्चमः छा. उ. ७-१-४ इति तत्र पठ्यत एव ॥ § 4939

I.617/KSV

किञ्चातः ? किमियताऽथर्वणश्चतुर्थो न भवति वेदः ? § 4940

* चतुर्थशब्दोपादानात् इतिहासादितुल्योऽसौ, न वेदसमानकक्ष्य इति चेत्; *केयं कल्पना ? चतुर्थशब्दोपादानादप्राधान्ये त्रयो वेदा असृज्यन्त

११ ] एवं तत्तु— nyāma-wit__kha

१२ ] क्रमस्य— nyāma-wit__kha

१६ ] दस्ति— nyāma-wit__kha

५ इति ] यः पन्थाः—अनपेक्षत्वहेतुक इत्यर्थः ॥
८ त्र ] विशेषतुषोऽपि—विशेषलेशोऽपि ॥
१५ र्वेषां ] सारेतरेति । सारासारेत्यर्थः । चतुर्भिरपि वेदैः व्यवहारः प्रसिद्ध इत्यन्वयः ॥
१७ कोऽय ] अत्र—अथर्ववेदे ॥
२१ वाख्याने ] सोऽयमिति । अर्थानुवादोऽयम् । एवमन्यत्रापि दृश्यते ॥
६ * ] चतुर्थशब्दोपादानादिति । ऋग्वेदादौ संख्याया अनिर्देशात्, इतिहासपुराणयोः पञ्चमपदोपादानाच्चेति शेषः ॥
७ * ] संख्यानिर्देशमात्रं तस्य जघन्यतां न गमयेदित्याशयेन समाधत्ते—केयमिति ॥

शत. ब्रा. ११-४-११ इत्यादौ त्रित्वसंख्योपादानात् तेऽपि न प्रधानताम-धिगच्छेयुः । इतिहासादिभिर्वा सह परिगणनं अप्राधान्यकारणं यदुच्यते, * तदपि सर्ववेदसाधारणमिति यत्किञ्चिदेतत् ॥ § 4941

## अथर्ववेदस्य वेदत्वे श्रुतिसम्मतिः

तथा शताध्ययनेऽपि ऋचो वै ब्रह्मणः प्राणाः इत्यभ्युपक्रम्य आथर्वणो वै ब्रह्मणः समानः इति पठ्यते ॥ § 4942

तथा येऽस्य प्राञ्चो रश्मयः ता एवास्य प्राच्यो मधुनाड्यः, ऋच एव पुष्पम् छा. उ. ३-१-२ इत्युपक्रम्य पठित—अथ येऽस्योदञ्चो रश्मयः ता एवास्योदीच्यः मधुनाड्यः अथर्वाङ्गिरस एव मधुकृतः छा. उ. ३-४-१ इति ॥ § 4943

तथा तैत्तरीये तस्माद्वा एतस्मात् प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः तै. उ. २ इति प्रस्तुत्य तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा तै. उ. २ इति पठ्यते ॥ § 4944

I.618/KSV

तथाऽन्यत्र ऋचां प्राची महती दिगुच्यते । दक्षिणामाहुर्यजुषाम् । साम्नामुत्तराम् । अथर्वणामङ्गिरसां प्रतीची महती दिगुच्यते तै. ब्रा. ३-१२-९ इति ॥ § 4945

शतपथे ब्रह्मयज्ञविधिप्रक्रमे मध्यमे पय आहुतयो ह वा एता देवानां यदृचः शत. ब्रा. ११-५-६-४ इत्युपक्रम्य, मेद आहुतयो ह वा एता देवानां यदथर्वाङ्गिरसः स य एवं विद्वानथर्वाङ्गिरसोऽहरहः स्वाध्यायमधीते मेद आहुतिभिरेव तद्देवान् स तर्पयति त एनं तृप्तास्तर्पयन्ति शत. ब्रा. ११-५-६-७ इति ॥ § 4946

## मन्त्रवर्णोऽपि अथर्वणो वेदत्वगमकः

मन्त्रा अपि तदर्थप्रकाशनपरा अनुश्रूयन्ते त्वामग्ने पुष्करादध्यथर्वा निर-मन्थत तै. सं. ३-५-११ इत्यादयः । न चैषां अथर्वा नाम कश्चिदृषिरित्येवंप्र-कारं व्याख्यानं युक्तम्; * अन्यत्राप्यसमाश्वासप्रसङ्गात् । इत्येवञ्जातीय-कास्तावदुदाहृताः श्रुतिवाचः ॥ § 4947

३--४ ] येऽत्योदञ्चो—
nyāma-wit_kha

९ *] तदपीति । इतिहासपुराणौ द्वौ यथा समु(?)तौ, न तथा ताभ्यां अथर्ववेदः, किन्तु स पृथगेव परिगणितः । ननु त्रयीनिर्देशानन्तरं चतुर्थत्वेनास्य पृथङ्गिर्देशस्तर्हि कुत इति चेत्, त्र(?)पेक्षया किञ्चिद्वैलक्षण्यात्तथा निर्देशः । वैलक्षण्यं च वक्ष्यति पु. ६२५ ॥

९ *] अन्यत्रापि—यजुरादिपदेष्वपि ॥

## अथर्वणो वेदत्वे स्मृतिवाक्यानि

स्मृतिवाक्यानि खल्वपि । मनुस्तावत् मनुस्मृ. ११-३३—

श्रुतीरथर्वाङ्गिरसीः कुर्यादित्यविचारयन्§ 4949
इति श्रुतिशब्देन त्रयीवदिह व्यवहरति ॥ § 4950

याज्ञवल्क्यः चतुर्दशविद्यास्थानानि गणयन् याज्ञ. स्मृ. १-३—

पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश§ 4953

इति चतुर एव वेदानावेदयते; नान्यथा हि चतुर्दशसंख्या पूर्यते ॥ § 4954

I.619/KSV *स्मृत्यन्तरे च स्पष्टमेवोक्तम्—

अङ्गानि वेदाश्चत्वारः मीमांसान्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश इति ॥§ 4957

अन्यत्राप्युक्तम् पुराणं धर्मशास्त्रं मीमांसा न्यायः चत्वारो वेदाः षडङ्गानीति चतुर्दश विद्यास्थानानि इति ॥ § 4958

शातातपोऽप्याह— § 4959

ऋक्सामयजुरङ्गानां अथर्वाङ्गिरसामपि ।
अणोरप्यस्य विज्ञानात् योऽनूचानः स नो महान् इति ॥§ 4961

तथाऽन्यत्र चत्वारश्चतुर्णां वेदानां पारगाः धर्मज्ञाः परिषत् इत्युक्तम् ॥ § 4962

शङ्खलिखितौ च ऋग्यजुस्सामाथर्वविदः षडङ्गवित् धर्मवित् वाक्यवित् नैयायिको नैष्ठिको ब्रह्मचारी पञ्चाग्निरिति दशावरा परिषत् इत्यूचतुः ॥ § 4963

प्राचेतसे चत्वारो वेदविदः धर्मशास्त्रविदिति पञ्चावरा परिषत् इत्युक्तम् ॥ § 4964

२५ ] त्रयीवत्— nyāma-wit_kha

१९ *] स्मृत्यन्तर इति । इतिहासपुराणयोरपि विवक्षया स्मृतित्वमस्त्येव । अथवा समानानुपूर्वीकं स्मृत्यन्तरमेव वेदम् ॥

तथा च पङ्क्तिपावनप्रस्तावे चतुर्वेदषडङ्गवित् ज्येष्ठसामगोऽथर्वाङ्गिरसोऽप्येते पङ्क्तिपावना गण्यन्ते । तदयमेवमादिवेदचतुष्टयप्रतिष्ठाप्रगुण एव प्राचुर्येण धर्मशास्त्रकाराणां व्यवहारः ॥ § 4965

## अथर्वणः वेदत्वं शास्त्रकाराणामपि सम्मतम्

अन्येऽपि शास्त्रकाराः तथैव व्यवहरन्तो दृश्यन्ते । तथा च महाभाष्यकारो भगवान् पतञ्जलिः अथर्ववेदमेव प्रथममुदाहृतवान् शन्नो देवीरभिष्टये अथर्वसं. १ इति ॥ § 4966

मीमांसाभाष्यकारेणापि वेदाधिकरणे काठकं कालापं मौद्गलं पैप्प-
लादकम् शा. भा. १-१-८ इति यजुर्वेदादिवत् अथर्ववेदेऽपि पैप्पलादक- I.620/KSV
मुदाजह्रे । सर्वशाखाधिकरणेऽपि शा. भा. २-८-२ वेदान्तरशास्त्रान्तरवत्
मौद्गलपैप्पलादकाख्ये अथर्वशाखे अप्युदाहृत्य विचारः कृतः । तथा च
प्रथमयज्ञो नाम चतुर्षु न कश्चिदस्ति इत्यधिकरणान्त एव लिखितम् ।
एवं श्रुतिस्मृतिविशिष्टाचारव्यवहारविदां अत्र विप्रतिपत्तिसंभावनैव नास्ति ॥
§ 4967

## त्रय्यां अथर्वणः अगणनं तस्य नावेदत्वं गमयेत्

आह—न ब्रूमः अथर्ववेदो न प्रमाणमिति, किन्तु त्रयीबाह्य इति—उच्यते—त्रय्यपीयं अथर्ववेदबाह्यैव । न केवलमेवं, त्रय्यामपि परस्परबाह्यत्वमस्त्येव—ऋक्सामबाह्यानि यजूंषि, यजुस्सामबाह्या ऋचः, ऋग्यजुर्बाह्यानि सामानीति कियानयं दोषः ? *सर्वभावानामितरेतरसाङ्कर्यसहितत्वात् । ये हि शब्दात्मानः ग्रन्थसन्दर्भस्वभावाः, ये च तदभिधेया अर्थस्वभावाः, ते सर्वेऽन्योन्यसंमिश्रितात्मान एव । न च परेणात्मानं संमिश्रयन्तोऽपि ते स्वरूपमपहारयन्तीति ॥ § 4968

## सर्वशाखाप्रत्ययन्यायः अथर्ववेदमपि क्रोडीकरोत्येव

१ ] यथा— nyāma-wit_kha
१२ ] त्रयीयं— nyāma-wit_kha
१४ ] रहित— nyāma-wit_ka
१६ ] न्योन्या— nyāma-wit_ka
१७ ] मपि— nyāma-wit_kha

९ च ] पङ्क्तिपावनेति । अथर्वाङ्गिरसोऽध्येता इत्युपक्रम्य एते वै पङ्क्तिपावनाः पाद्म. स्वर्ग. ३५ शङ्ख. १४-७ इत्यादि तत्र तत्र पठ्यत एव ॥
११ नाम ] चतुर्ष्विति । त्रय्या एव वेदत्वे चतुर्षु इति निर्देशः कथमित्यर्थः ॥
४ * ] सर्वभावानामिति । जगत एव पाञ्चभौतिकत्वात् सर्वं सर्वत्र वर्तत एव । अथापि सर्वाण्यपि वस्तूनि परस्परविलक्षणान्येव । एतत् तस्मिन्नान्तर्भवति । तद्वा न एतस्मिन् ॥
७ ते ] स्वरूपं—स्वस्य रूपम् । अपहारयन्ति—प्रच्यावयन्तीति यावत् ॥

अथोच्येत—नेदृशं त्रयीबाह्यत्वमथर्ववेदे विवक्षितम्, अपि तु यदेव न त्रयीप्रत्ययं कर्मोपदिशति, न तत्सम्बद्धं किंचिदिति, तदस्य त्रयीबाह्यत्वमिति—एतदपि न साधूपदिष्टम्—इष्टिपश्वेकाहाहीनसत्रादिकर्मणां तत्रोप-
I.621/KSV देशदर्शनात् । सर्वशाखाप्रत्ययमेकं कर्म इति न्यायात् । त्रय्युपदिष्टेऽपि कर्मणि सम्बद्धमथर्ववेदात् किमपि लभ्यत एव ॥ § 4969

## अथर्ववेदापेक्षत्वं त्रय्या अस्त्येव

ननु ! भवति सर्वशाखाप्रत्ययमेकं कर्म । तत्पुनः त्रिवेदीसम्बद्धसर्वशाखाप्रत्ययमेव, नाथर्वशाखाप्रत्ययं; यतः सोमयागादिकर्मणां ऋग्वेदेन हौत्रं, यजुर्वेदेनाध्वर्यवं, समावेदेनौद्गात्रं क्रियते, नाथर्ववेदेन किंचिदिति—तदयुक्तम्—अथर्ववेदेन ब्रह्मत्वस्य करणात् । तथा च गोपथब्राह्मणम्—प्रजापतिस्सोमेन यक्ष्यमाणो वेदानुवाच । कं वो होतारं वृणीयमिति गो. ब्रा. २-२४ इति प्रक्रम्य, तस्मादृग्विदमेव होतारं वृणीष्व, स हि हौत्रं वेद, यजुर्विदमेवाध्वर्युं वृणीष्व, स हि आध्वर्यवं वेद, सामविदमेवोद्गातारं वृणीष्व, स हि ओद्गात्रं वेद, अथर्वाङ्गिरोविदमेव ब्रह्माणं वृणीष्व, स हि ब्रह्मत्वं वेद गो. ब्रा. २-२४ इत्यभिधाय, पुनराह अथ चेन्नैवंविधं होतारं अध्वर्युमुद्गातारं ब्रह्माणं वा वृणुते पुरस्तादेव वैषां यज्ञो रिच्यत इति तस्मादृग्विदमेव होतारं कुर्यात्, यजुर्विदमेवाध्वर्युं, सामविदमेवोद्गातारं, अथर्वाङ्गिरोविदमेव ब्रह्माणम् गो. ब्रा. २-२४ इति । तथा यदूनं च विरिष्टं च यातयामं च करोति तदथर्वणां तेजसा प्रत्याप्याययेत् गो. ब्रा. १-२२ इति, *नर्ते भृग्वङ्गिरोभ्यः सोमः पातव्यः गो. ब्रा. १-२८ इति ॥ § 4970

## अथर्ववेदस्य त्रयीरूपत्वम्

नन्वेताः श्रुतीः अथर्वाण एवाधीयते; नान्ये त्रयीविदः । ते त्वेवं पठन्ति
(?')यदृचा हौत्रं क्रियते यजुषाऽऽध्वर्यवं साम्ना औद्गात्रं अथ केन ब्रह्मत्वं I.622/KSV
क्रियते इति त्रय्या विद्ययेति ब्रूयात्(?') इति । तथा च यदृचैव हौत्रमकुर्वत यजुषाऽऽध्वर्यवं साम्नौद्गात्रं यदेव त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वम्

२२ ] सम्बन्ध— nyāma-wit__kha

१ ] सम्बन्ध— nyāma-wit__kha
८ ] ब्राह्मणं— nyāma-wit__kha
१० ] रिव्यतीति— nyāma-wit__kha
११ ] ङ्गिरसी— nyāma-wit__kha
१३ ] प्रत्वा— nyāma-wit__ka
१३ ] (?)— nyāma-wit__ka; nyāma-wit__kha

९ न] त्रयीप्रत्ययं—वेदत्रयप्रतिपाद्यम् ॥
१२ वेदात्] किमपीति । तत्किमित्यत्र उत्तरं समनन्तरमेव वक्ष्यति ॥
२१ राह] अथ चेत् इत्यादिकमाहत्यार्थानुवादः ॥
४ *] नर्ते—न ऋते इति । पदविभागः ॥

इति—उच्यते— वयमप्येवमादीनि वाक्यानि न नाधीमहि । किं त्वेषामयमेवार्थः—अथर्वाङ्गिरोविदेव ब्रह्मेति । कथम् ? यतो न त्रयी नाम किमपि वस्त्वन्तरम्; अपि तु त्रयाणां वेदानां समाहार इति । समाहारश्च समाह्रियमाणनिष्ठो भवति । समाह्रियमाणाश्च ऋग्वेदादयः त्रयः हौत्रादिपरत्वेन चरितार्थाः, न पुनस्तत्र भेदमर्हन्ति । एकैकशः चरितार्थानां समुदायोऽपि चरितार्थ एव । समुदायबुद्धौ हि विभज्यमानायां समुदायिन एव स्फुरन्ति, नावयविवदर्थान्तरम्, ते चान्यत्र व्यापृताः ॥ § 4971

## ऋग्वेदाद्यध्येतॄणां ब्रह्मत्वेऽनधिकारः

किं नु खलु ऋग्वेदादीनां ब्रह्मत्वं कुर्वतामतिभारो भवति ? न ब्रूमः अतिभार इति । किन्तु त्र्यात्मकत्वेन ब्रह्मत्वकर्तव्यतोपदिश्यते । त्र्यात्मकश्चान्यतमोऽपि तेभ्यो न भवति वेदः । अथर्ववेदस्तु त्र्यात्मक एव । तत्र हि ऋचो यजूंषि सामानीति त्रीण्यपि सन्ति । तेन ब्रह्मत्वं क्रियमाणं त्रय्या कृतं भवति ॥ § 4972

ननु ! यस्त्रीन् वेदानधीते, तेन चेत् ब्रह्मत्वं क्रियेत, तत्किं त्रय्या न कृतं भवति ? बाढमित्युच्यते—सोऽपि एकस्मै वा कामायाऽन्ये यज्ञक्रतवः समाधीयन्ते, सर्वेभ्यो ज्योतिष्टोमः, सर्वेभ्यो दर्शपूर्णमासौ इति श्रुतावपि
I.623/KSV योगसिद्ध्यधिकरणन्यायेन जै. सू. ४-३-११ अस्यतममेव बुद्धावाधाय विदध्यात्, न समुदायं बुद्धावारोपयितुं शक्नुयात् इत्येकेनैव तत्कृतं भवति, न त्रय्येति ॥ § 4973

## अथर्वशाखिनां इतरशाखितुल्यत्वम्

ननु ! *अन्येऽपि त्र्यात्मका वेदाः—यद्येवं सुतरामथर्ववेदो न पृथक्करणीयः, सर्वेषां रूपाविशेषात् । तेषां पृथक्प्रतिष्ठैः स्वैः स्वैः ऋगादिभिरेव व्यपदेश इति न ते समुदायशब्दव्यपदेश्याः ॥ § 4974

---

११ ] नानधी— nyāma-wit__ka
२२ ] परत्वे— nyāma-wit__kha
६ ] तेषां— nyāma-wit__kha
१ ] तया— nyāma-wit__kha
१३ ] न— nyāma-wit__kha

---

१२ वेदानां] समाहार इति—ऋक्त्वादि nI.623/KSV हि न साङ्केतिकम् । वक्ष्यति च तेषां निर्वचनम् ६२५ पु. । एवञ्चाथर्ववेदस्यापि त्रय्यन्तर्भावः सुवच एव । तत्र हौत्रादिषु ऋग्वेदादीनां चरितार्थत्वात् अथर्ववेदस्य ब्रह्मत्वपरत्वं स्वतःसिद्धमिति भावः ॥
२ ण] योगसिध्यधिकरणन्यायेनेति । अश्वमेधस्य सर्वफलकत्वेन सकृदनुष्ठानमात्रेण सर्वफलसिद्धिर्भवत्वित्याशङ्क्य, फलकामनाया एवाधिकारसंपादकत्वेन निर्विशेषं न सामान्यम् इति न्यायेन सर्वफलकामनाया असंभवेन तत्तत्फलकामनया पृथक् पृथगेवानुष्ठेयो याग इति सिद्धान्तितम् ॥
५ *] अन्येपि—ऋगादयोऽपि । ऋग्वेदादावपि वक्ष्यमाणलक्षणकब्राह्मणादिवाक्यानां दर्शनादिति भावः ॥

## अथर्ववेदस्य त्रयीसारत्वम्

यत्तु वाक्यान्तरे त्रय्यै विद्यायै शुक्रं, तेन ब्रह्मत्वम् इति; तत्रेयं चतुर्थी षष्ठ्याः स्थाने प्रयुक्ता । शुक्रमिति सारमाचक्षते । तेन त्रयीविद्यायाः सारेण ब्रह्मत्वं क्रियत इत्युक्तं भवति । न च त्रय्येव त्रय्याः शुक्रं भवति । न चात्यन्तं ततोऽर्थान्तरमेव । तेनेदमथर्ववेदात्मकमेव त्रय्याः शुक्रं इति मन्यामहे । त्र्यात्मकत्वादिति मन्यामहे । त्र्यात्मकत्वादिति शुक्रमिति च गुह्यमाहुः । अथर्वशब्दोऽपि रहस्यवचनः । यज्ञाथर्वाणं वैदिकस्या इष्टयः इति । तेन त्रयी शुक्ररूपेणाथर्ववेदेन ब्रह्मत्वमितीत्थमथर्ववेदस्य न त्रयीबाह्यत्वम् । इत्थं सर्वशाखाप्रत्ययमेकं कर्म इत्यत्र न सर्वशब्दः सङ्कोचितो भवति ॥ § 4975

## अथर्ववेदः ब्रह्मवेदः

अत एव ब्रह्मवेदः अथर्ववेद इति पूर्वोत्तरब्राह्मणे पठ्यते— ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेदः गो. ब्रा. ३-२-१६ इति । तथा च काठकशताध्ययने ब्राह्मणे ब्रह्मौदने श्रूयते (?')ब्रह्मवादिनो वदन्ति पुरोधा औद्दाल-
I.624/KSV किरारुणिमुवाच ब्रह्मणे त्वा प्राणाय जुष्टं निर्वपामि ब्रह्मणे त्वा व्यानाय जुष्टं निर्वपामि(?') इत्युपक्रम्य, आथर्वणो वै ब्रह्मणःसमानोऽथर्वणमेवैतज्जुष्टं निर्वपति चतुश्शरावो भवति चत्वारो हीमे वेदाः तानेव भागिनः करोति मूलं वै ब्रह्मणो वेदाः वेदानामेतन्मूलं यदृत्विजः प्राश्नन्ति तद्ब्रह्मौदनस्य ब्रह्मौदनत्वम् इति ॥ § 4976

तथा सामवेदे पृष्ठ्यस्य चतुर्थेऽहन्यार्भवे पवमाने अथर्वणे साम्नो गानं यत्, तद्विधाने श्रूयते चतुर्विधमाथर्वणं भवति चतूरात्रस्य वृत्त्वै चतुष्पदामानुष्टुभाऽनुष्टुभमेवैतदहर्यश्चतुर्थं भेषजं वाऽथर्वणं तद्धि भेषज्यमेव तत्करोत्याथर्वणानि यागभेषजानि सा. ब्रा. १-३ इत्येतदालम्बनेयं स्तुतिः । अत एव प्रागुक्तं यज्ञे यदूनं च विरिष्टं च यातयामं च करोति तदथर्वणां तेजसाऽऽप्याययति गो. ब्रा. १-२२. इति । तस्मादाथर्वण एव ब्रह्मेति । एतच्च शास्त्रान्तरे विस्तरेणाभियुक्तैः युक्तिभिरुपपादितमिति नेहात्यन्ताय प्रतायते ॥ § 4977

## आथर्वणः अपरिहरणीयत्वम्

यत्तु—नाथर्वणेन प्रवृञ्ज्यात् इति, तत् कल्पसूत्रवाक्यत्वात् वेदविरुद्धमित्यनादृतम् । अथापि श्रौतमिदं वाक्यं, तदाऽपि, *प्रकरणाधीतं चेत्,

२१ ] यतो— nyāma-wit__ka
२१--१ ] शुक्रं— nyāma-wit__kha
२२ ] तदपि— nyāma-wit__ka
२२ ] धीनं— nyāma-wit__ka

२० ] ---Note : प्रत्याव्यते.

१२ *] प्रकरणाधीतं—प्रकरणविशेषेऽधीतम् ॥

तत्रैव क्वचित्कर्मणि निवेक्ष्यते । *अनारम्यवादपक्षेऽपि पूर्वोक्तवाक्यविसदृशार्थत्वात् अथर्ववेदस्य च त्रय्यबाह्यत्वेन संपर्कपरिहारानर्हत्वात् नियतविषयमेव व्याख्यास्यते ॥ § 4978

## उच्चैस्त्वादयो मन्त्रधर्माः, न वेदधर्माः

यदप्युच्यते—उच्चैरृचा क्रियते उच्चैस्साम्नोपांशु यजुषा इतिवत् अथर्वधर्मोऽपि न कश्चिदाम्नात इति—तदप्यसारम्— मंत्रधर्मो ह्ययमुपदिश्यते, न वेदधर्मः । मन्त्रब्राह्मणसमुदायस्वभावा हि चत्वार इमे वेदग्रन्थाः । I.625/KSV
मन्त्रास्तु वस्तुतो गद्यपद्यभेदात् द्विविधा एव । गद्यबन्धो यजुरुच्यते, पद्यबन्धः ऋगिति । गीतिनिबन्धनं तु भेदान्तरं सामेति । अत एव जैमिनिना मन्त्रविभागं प्रस्तुत्य—तेषामृग्यत्रार्थवशेन पादव्यवस्था जै. सू. २-१-३५, गीतिषु सामाख्या ३६, शेषे यजुश्शब्दः ३७, इत्थमेव तेषां त्रैविध्यमुपपादितम् । तेषामेव चायमुच्चैस्त्वादिधर्मः, न वेदशब्दवाच्यानां मन्त्रब्राह्मणसमुदायात्मनां ग्रन्थानाम् । अथर्ववेदेऽपीयं त्रिविधैव मन्त्रजातिरिति तत्रापीदं धर्मजातमुपदिष्टं भवति ॥ § 4979

मन्त्रविभागकृत एवायं त्रयीव्यपदेश इति । अतश्च सैषात्रयी विद्या तपति इत्याद्यपि न विरोत्स्यते । एवं ऋग्यजुस्सामसमुदायात्मकमन्त्रोपबन्धात् त्रय्यन्तर्गतश्चाथर्ववेदः । पृथग्व्यवस्थितग्रन्थसन्दर्भस्वभावत्वाच्च भिन्नः स इति सिद्धम् ॥ § 4980

## अथर्वणः ऋग्वेदत्वपक्षः

अन्ये पुनः—ऋक्प्रचुरत्वात्, प्रविरलयजुर्वाक्यत्वात्, अगीयमानसाममन्त्रतावशाच्च ऋग्वेदमेवाथर्ववेदमाचक्षते । अयमपि पक्षोऽस्तु, *न कश्चिद्विरोधः ॥ § 4981

## अथर्वणः वेदत्वेन व्यवहारे विप्रतिपत्त्यभावः

---

२४ ] (?)— nyāma-wit_kha
२४ ] र्हत्वात्— nyāma-wit_kha
१--२ ] अर्थ— nyāma-wit_kha
४ ] ते— nyāma-wit_kha
४ ] द्विधैव— nyāma-wit_kha
८ ] रादि— nyāma-wit_kha
११ ] तच्च— nyāma-wit_kha
१३ ] श्च भाव— nyāma-wit_kha

---

१३ *] अनारम्यवादः—सामान्यवादः । सामान्यतः कथनेऽपि विषयानुरोधात् विषयविशेषे नियन्तव्यमित्यर्थः ॥

७ *] न कश्चिद्विरोधः, प्रामाण्ये वेदत्वे चेति शेषः ॥

यत्पुनरभिधीयते—वेदशब्दः त्रयाणामेव वाचकः, न चतुर्थस्येति—सोऽयमत्युत्कटो द्वेषः । वृद्धव्यवहारो ह्यत्र प्रमाणम् । वेदोऽयम्, ब्राह्मणोऽयम् इति तत्र तत्र वेदशब्दे उच्चारिते चत्वारोऽपि प्रतीयन्ते । वेदो मयाऽधीतः इति वदन्तं पृच्छन्ति व्यवहर्तारः कतमस्त्वयाऽधीतो वेदः इति । स आह अथर्ववेदः इति । न तमेवमाक्षिपन्ति नासौ वेदः, यस्त्वया पठितः इति । सोपपदोऽथर्ववेदे वेदशब्द इति चेत्, वेदान्तरेष्वपि तुल्य-
I.626/KSV मेतत् ऋग्वेदः, यजुर्वेदः, सामवेदः इति । निरुपपदोऽपि तेषु वेदशब्दः, प्रयुज्यत इति चेत्, तदितरत्रापि समानमित्युक्तम् । चतुर्वेदाध्यायी भरद्वाज इति च प्रसिद्धमेव । सर्वथा तु सोपपद एवायुर्वेदादिषु वेदशब्द इति न तत्तुल्यकक्ष्यताऽधिक्षेपक्षेत्रतामथर्ववेदो नेतव्यः ॥ § 4982

## ब्रह्मयज्ञे अथर्ववेदविनियोगः सर्वसम्मतः

ब्रह्मयज्ञविधिश्च श्रौतः चतुर्ष्वप्यविशिष्ट इत्युक्तम् । स्मार्तोऽपि तथाविध एवास्ति । यथाऽऽह याज्ञवल्क्यः या. स्मृ १-४४—

भेदसा तर्पयेद्देवान् अथर्वाङ्गिरसः पठन् ।
पितॄंश्च मधुसर्पिर्भ्यां अन्वहं शक्तितो द्विजः § 4985

इति । सांप्रदायिकमध्यापनाध्ययनादि सर्वमभिन्नमेवेत्यलं प्रसङ्गेन ॥
§ 4986

तेन प्रमाणतायां, वेदस्वाध्यायशब्दवाच्यत्वे, पुरुषार्थसाधनविधावपि चत्वारः समा वेदाः ॥ § 4987

## अथर्ववेदस्यैवेतरवेदापेक्षया श्रैष्ठ्यम्

यदि पुनः औत्तराधर्येण विना न परितुष्यते, तत् अथर्ववेद एव प्रथमः, ततः परमस्य मंत्रस्य ब्रह्मणः प्रणवस्याभिव्यक्तेः । तथा च श्रुतिः—ब्रह्म ह वा इदमग्र आसीत् गो. ब्रा. १-१ इत्युपक्रम्य, आथर्वणं वेदमभ्यश्राम्यदभ्यतपत् समतपत्तस्माच्छ्रान्तात् तप्तात् सन्तप्तात् ओमिति मन एवोर्ध्वमक्षरमुदक्रामत् गो. ब्रा. १-५ इत्यादि । तथा महाव्याहृतीनां शाखान्तरप्रसिद्धानां, अप्रसिद्धानां च बृहदित्यादीनां तत् एवोत्थानम् ॥ § 4988

२२ ] नानासौ— nyāma-wit__ka nyāma-wit__kha
३ ] सर्वदा— nyāma-wit__ka
५ ] स्मार्ते— nyāma-wit__ka
९ ] दियजनादि—
१६ ] सन्तप्तात्— nyāma-wit__kha

१७ च ] प्रसिद्धमेवेति । तैत्तरीयकाठकान्ते अयमर्थः स्पष्टः ॥

५ पुनः ] औत्तराधर्येण—उच्चनीचभावेन ॥

## अथर्ववेदाध्ययनस्य प्रत्येकोपनयनाधिकारिकत्वम्

अथर्ववेदकृतोपनयनसंस्कारस्य वेदान्तराध्ययनमविरुद्धम् । *अन्य-
वेदोपनीयमानस्य तु नाथर्वणोपनयनसंस्कारमप्रापितस्याथर्व वेदाध्यय- I.627/KSV
नेऽधिकारः । तदुक्तम् भृग्वङ्गिरोविदा संस्कृतोऽन्यान् वेदानधीयीत, नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीत गो. ब्रा. १-२९ इति । त्रय्येकशरणैरपि चैतदवश्याश्रयणीयं अथर्ववेदविहितं स्वकर्मभ्रंशे प्रायश्चित्तमाचरद्भिरित्यथर्ववेद एव ज्यायान् ॥ § 4989

## अथर्वणो वेदत्वे स्मृतयो न प्रतिकूलाः

यत्तु मानवं वाक्यमुदाहृतं षट्त्रिंशदाब्दिकं, तत् त्रिवेदाध्ययनविषयं वैकल्पिकम् । वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् मनुस्मृ. ३-२ इति एकस्मिन् वेदे द्वादशवर्षाणि व्रतम्, द्वयोः चतुर्विंशतिः, त्रयाणां षट्त्रिंशदिति । यस्तु चतुरो वेदानधीते, तस्य अष्टचत्वारिंशद्वर्षं वेदब्रह्मचर्यमुपासीत इति स्मृत्यन्तरमस्ति, न च तदार्यैर्नादृतम् । तत्र त्रिवेदाध्यायिनामेव प्रतिवर्षं षोडशवर्षाणि व्रतं चरेदिति व्याख्यानमसङ्गतम्, उपक्रमविरोधात्, अनुपयोगाच्च । तेन वेदान्तराध्ययनकृत एवायं विकल्पविधिः, न द्वादशषोडशवर्षापेक्ष इत्यनादरोऽप्यस्यां स्मृतौ कृष्णकेशोऽग्नीनादधीत इति श्रुतिविरोधकृतः, नाथर्ववेदाध्ययननिषेधगर्भ इति ॥ § 4990

त्रैवेदिकब्रह्मचर्यस्मृतिरपि चेयं अथर्ववेदाध्ययनपर्युदासमेव विषयीकरोति, न च वेदान्तराध्ययननिषेधमिति अत्रापि न विशेषहेतुरस्ति । त्रिषु वेदेष्विदं व्रतम्, न पुनरेष्वेव त्रिष्विति नियामकं वचनमस्ति ॥ § 4991

## अथर्वविदः श्राद्धभोजनेऽधिकारः अस्त्येव

यदपि श्राद्धप्रकरणे यत्नेन भोजयेत् इति त्रिवेदीपारगपरिकीर्तनं पु. ६१५ तत् वेदपारगम् इति, शाखान्तगम् इति, समाप्तिगम् इति विशेषणपदपर्यालोचनया ऋग्वेदाद्येकदेशाध्यायिनामनधिकारमेव श्राद्धे सूचयति । अथर्वणस्तु अथर्वशिरोऽध्ययनमात्रलब्धपङ्क्तिपावनभावस्यैकदेशपाठिनोऽपि
I.628/KSV तत्राधिकार उपपद्यते । दर्शितं चाथर्वशिरोध्ययनमात्रादपि पङ्क्तिपावनत्वम् । पङ्क्तिपावनश्च श्राद्धभोजनेऽनधिकृत इति विप्रतिषिद्धम् ॥ § 4992

## इतरवेदैकदेशाध्यायिनः श्राद्धभोजनेऽनधिकारः

---

१३ ] त्रिवेद— nyāma-wit_kha

---

११ *] अन्यवेदेति । एतेनेतरवेदापेक्षयाथर्ववेदस्यैव श्रैष्ठ्यमुक्तं भवतीत्यर्थः ॥

७ शिरो ] अध्ययनमात्रेति । अध्ययनैकदेशेत्यर्थः ॥

यस्तु ज्येष्ठसामगस्त्रिमधुस्त्रिसुपर्णिकः इति वेदान्तरैकदेशाध्यायिनामपि श्राद्धभोजनाभ्यनुज्ञानं तत् अनुकल्परूपमिव भाति, * प्रथमकल्पेन समग्रवेदाध्ययनोपदेशादिति । तस्मात् नाथर्वनिषेधार्थमेतद्वाक्यमिति ॥ § 4993

## अथर्वप्रामाण्ये कुमारिलोक्तं न हृदयङ्गमम्

तदेवमवस्थिते यत् वार्तिककारेण भयादिव, द्वेषादिव, मोहादिव, सानुकम्पमिव वा इदमुच्यते यदि यज्ञोपयोगित्वम् इत्यादि पु. ६१५—तदहृदयङ्गमम्—अथर्ववेदे पूर्वोत्तरब्राह्मणे विस्पष्टं इष्टिपश्वाहाहीनसत्राणामुपदेशात् । वेदान्तरेषु तच्चोदनाभावात् किमथर्ववेदे तदुपदेशेनेति चेत्—सुभाषितमिदम्—एवमपि हि वक्तुं शक्यं—अथर्ववेदे तच्चोदनाया दर्शनात् किं वेदान्तरेषु तदुपदेशेन ? इति ॥ § 4994

न च जाने कस्यैष पर्यनुयोगः ? किं नित्यस्य वेदस्य ? किं वा तत्प्रणेतुरीश्वरस्य ? इति । द्वावपि तावपर्यनुयोज्यावित्युक्तम् । अर्थान्तरशान्तिपुष्टयभिचारादि वेदान्तरेष्वपि न न दृश्यते । श्येनो हि सामवेद उत्पन्नः; अद्भुतशान्त्यादयश्च यजुर्वेद इति तदपि समानम् ॥ § 4995

## एकब्रह्माश्रितत्वं आथर्वणकर्मणामिति न क्षोदक्षमम्

एकब्रह्मर्त्विगाश्रिता इत्येतदपि न सत्यम् । यत एवं तत्र पठ्यते—द्वे यज्ञवृत्ती भवतः वैहारिकी च पाकयज्ञवृत्तिश्चेति । तत्र वैहारिकी नाम अनेकर्त्विगाश्रितानां एकक्रियाणामुपदेशः श्रुतौ । एकब्रह्मर्त्विगाश्रितास्तु शान्त्यादिक्रियाः स्मृतावित्यभूमिज्ञोक्तिरेषा ॥ § 4996

I.629/KSV

## वेदचतुष्टयेऽपि वैदिकानामभिमानः सम नः

त्रय्येव आत्मीयगोचरेत्येतदपि परममाध्यस्थ्यम् । न ह्यात्मीयः परकीयो वा कश्चिदस्ति वेदार्थः, सर्वशाखाप्रत्ययत्वादेकस्य कर्मणः । तस्मात् समानयोगक्षेमत्वात् सर्ववेदानां एकस्य ततः पृथक्करणं वेदनिन्दाप्रायश्चित्तनिर्भयधियामेव चेतसि परिस्फुरति, न साधूनामित्युपरम्यते ॥ § 4997

## अथर्ववेदप्रामाण्योपसंहारः

---

११ *] प्रथमकल्पः—मुख्यकल्पः ॥
१५ वेदे] पूर्वोत्तरब्राह्मणे—गोपथस्य पूर्वब्राह्मणे उत्तरब्राह्मणे च ॥
१ एवं] तत्र—अथर्ववेदे ॥

इति तुल्यप्रभावर्द्धिवर्धमानोचितस्तवाः ।
विविधाभिमतस्फीतफलसंपादनोद्यताः ॥ ७४ ॥§ 4999

चत्वारोऽपि पराक्षेपपरिहारस्थिरस्थितिम् ।
भजन्ति वेदाः प्रामाण्यलक्ष्मीं हरिभुजा इव ॥ ७५ ॥§ 5001

चतुस्स्कन्धोपेतः प्रथितपृथगर्यैरवयवैः
कृतान्योन्यश्लेषैः उपचितवपुः वेदविटपी ।
प्रतिस्कन्धं शाखाफलकुसुमसन्दर्भसुभगाः
प्रकाशन्ते तस्य द्विजमुखनिपीतोत्तमरसाः ॥ ७६ ॥§ 5005

## आगमप्रामाण्याक्षेपविकल्पः

आह—

किमेतदित्थं प्रामाण्यं वेदानामेव साध्यते ।
उतागमान्तराणां वा सर्वेषामियमेव दिक् ॥ ७७ ॥§ 5008

किश्चातः ? § 5009

आद्ये पक्षे परेष्येवं ब्रुवाणेषु किमुत्तरम् ?
उत्तरत्र तु मिथ्या स्युः सर्वेऽन्योन्यविरोधिनः ॥ ७८ ॥§ 5011

I.630/KSV

## आगमद्वैविध्यम्

कानि पुनरागमान्तराणि चेतसि विधायैवं वत्सः पृच्छति ? पुराणेतिहास-धर्मशास्त्राणि वा ? शैवपाशुपतपञ्चरात्रबाद्धार्हतप्रभृतीति वा ? § 5012

## मन्वाद्यागमानां वेदमूलत्वात् प्रामाण्यम्

२ ] विटपः— nyāma-wit_kha
७ ] तन्त्रा— nyāma-wit_kha

१२ क्ष्मीं ] हरिभुजा इव—हरेर्हि चत्वारो भुजाः ॥
१६ स्य ] द्विजाः—ब्राह्मणाः, पक्षिणश्च ॥
१९ राणां ] दिक् वा—इत्यन्वयः ॥
१ क्षे ] परेषु—वेदबाह्येषु ॥

२ र्वेऽन्यो ] अन्योन्येति । यद्यपि वैदिकेष्वप्यागमेषु परस्परविरोधः प्रतीयत इव परन्तु नास्ति वास्तविको विरोध इत्याशयः ॥

तत्र शैवादीनि तावन्निरूपयिष्यामः । मन्वादिप्रणीतानि धर्मशास्त्राणि वेदवत् तदर्थानुप्रविष्टविशिष्टकर्मोपदेशीनि प्रमाणमेव । कस्तेषु विचारः ? तेषां तु प्रमाणत्वं वेदमूलत्वेनैव केचिदाचक्षते ॥ § 5013

तथा हि—न तावन्मन्वादिदेशनाः भ्रान्तिमूलाः संभाव्यन्ते, बाधकाभावात् । अद्ययावदपरिम्लानादरैः वेदविद्भिः तदर्थानुष्ठानात् ॥ § 5014

नाप्यनुभवमूलाः, प्रत्यक्षस्य त्रिकालानवच्छिन्नकार्यरूपधर्मपरिच्छेददशासामर्थ्यासंभवात् ॥ § 5015

न च पुरुषान्तरोपदेशमूलाः, पुरुषान्तरस्यापि तदवगमे प्रमाणाभावात् । भावे वा मनुना किमपराद्धम् ? असति हि मूलप्रमाणे पुरुषवचनपरंपरायामेव कल्प्यमानायां अन्धपरंपरास्मरणतुल्यत्वं दुर्निवारम् ॥ § 5016

न च विप्रलम्भका एव भवन्तो मन्वादयः एवमुपदिशेयुरिति युक्ता कल्पना; बाधकाभावात्, साधुजनपरिग्रहाच्चेत्युक्तम् ॥ § 5017

तस्मात् पारिशेष्यात् वेदाख्यकारणमूला एव भवितुमर्हन्ति मन्वादिदेशनाः, तद्ध्यनुगुणं समर्थं च कारणमिति । तदाह भट्टः तं. वा. १-३-२—
§ 5018

*भ्रान्तेरनुभवाद्वाऽपि पुंवाक्याद्विप्रलंभकात् ।
दृष्टानुगुण्यसामर्थ्यात् चोदनैव लघीयसी इति ॥§ 5020

I.631/KSV

## मन्वाद्यागमानां वेदमूलकत्वे पक्षभेदाः

तत्र केचित् परिदृश्यमानमन्त्रार्थवादबलोन्नीतविधिमूलत्वं मन्यन्ते । अन्ये विप्रकीर्णशाखामूलत्वम् । अपरे पुनः उत्सन्नशाखामूलत्वमिति ॥ § 5021

अनेन च विशेषविवरणेन न नः प्रयोजनम् । सर्वथा यथोपपत्ति वेद एव तत्र मूलं प्रकल्प्यताम्, न मूलान्तरम्, अप्रमाणकत्वात् । वेदमूलत्वपक्षेऽपि चेयमखिलजगद्विदिता स्मृतिसमाख्याऽनुगृहीता भविष्यति । प्रत्यक्षमूलत्वे हि वेदवदत्रापि कः स्मृतिशब्दार्थः ? § 5022

---

१० मूलाः] अनुभवमूलाः इत्यादौ संभाव्यन्ते इत्यस्यानुवृत्तिः ॥
१९ *] भ्रान्तेरित्यादि । स्मृतीनां दर्शनानुगुण्यमेव यतः सामर्थ्यं, ततः स्मृतिमूले किञ्चित्कल्पनीये साधकाभावात् भ्रान्तेः, प्रत्यक्षस्य च धर्माग्राहकत्वात् पौरुषेयवाक्यस्याविश्वसनीयत्वात्, विप्रलंभमूलकत्वेऽपि प्रमाणाभावात् एतेषां चतुर्णामपि अष्टकादिस्मृतिमूलत्वासंभवे चोदनामूलकत्वमेव वक्तव्यमित्यर्थः ॥
५ द्विदिता] स्मृतिसमाख्येति । तथा च वेदाः अनुभवमूलाः, स्मृतयस्तु वेदमूलाः इति भावः ॥

## श्रुतिस्मृतिविरोधे श्रुतेः प्राबल्यम्

किञ्च वेदमूलत्वे सति स्मृतेः श्रुतिविरोधे सति तदतुल्यकक्ष्यत्वात् बाध्यत्वं सुवचं भवति । क्लृप्तमेकत्र मूलं, *इतरत्र कल्प्यम् । यावदेव भवान् स्मृतेः श्रुतिं कल्पयितुं व्यवस्यति, तावदेतद्विरोधिनी प्रत्यक्षश्रुता श्रुतिरवतरति हृदयपथमिति कथं तदा मूलकल्पनायै स्मृतिः प्रभवेत् । तदाह तं. वा. १-३-३— § 5023

सोऽयमाभाणको लोके यदश्वेन हृतं पुरा ।
तत्पश्चात् गर्दभः प्राप्तुं केनोपायेन शक्नुयात् ? इति
॥§ 5025

## श्रुतिस्मृत्योः साम्यमिति पक्षान्तरम्

अपर आह—विकल्प एवात्र युक्तः । किल द्विविधो वेदः— श्रूयमाणः, अनुमीयमानश्च । श्रूयमाणश्च श्रुतिरित्युच्यते । अनुमीयमानश्च स्मृतिरिति । द्वावपि चैतावनादी इति किं केन बाध्यते ? व्यक्ताव्यक्तो हि वेद I.632/KSV एवासौ । अत एव न मन्त्रार्थवादादिमूलकत्वकल्पनं युक्तम्, स्मर्यमाणस्य वेदस्यानादित्वात् ॥ § 5026

## मन्वादिस्मृतिबाह्यस्मृत्योर्वैलक्षण्यम्

ननु ! एवं वेदमूलत्वेन प्रामाण्ये वर्ण्यमाने बाह्यस्मृतीनामपि प्रामाण्यं वदन्तः प्रवादुकाः कथं प्रतिवक्तव्याः ? उच्यते—प्रत्युक्ता एव ते तपस्विनः । उक्तं हि भगवता जैमिनिना—अपि वा कर्तृसामान्यात् प्रमाण मनुमानं स्यात् जै. सू. १-३-२ इति ॥ § 5027

कर्तृसामान्यादिति कोऽर्थः ? एकाधिकारावगमादिति । य एव वेदार्थानुष्ठानेऽधिकृताः कर्तारः, त एव स्मृत्यर्थानुष्ठाने । आचमनादिस्मार्तपदार्थसंब-

१ ] पुरः— nyāma-wit_ka
८ ] प्रावादुकाः— nyāma-wit_kha

८ क्लृप्त ] एकत्र—वेदे ॥
८ * ] इतरत्र—मन्वादिस्मृतौ ॥
१५ न ] मन्त्रार्थवादादि इत्यादेः, मन्वादिस्मृतीनामिति शेषः ॥
३ माण ] अनुमानं—अनुमिता श्रुतिः । सैव स्मृतेः मूलं प्रमाणमित्यर्थः ॥

लिततयैव वेदिस्तरणादिवैदिकपदार्थप्रयोगदर्शनात् । *न ह्वेवमेकाधिकाराव-गमो बाह्यस्मृतिषु विद्यते । तस्मात् मन्वादिस्मृतय एव प्रमाणं, न बाह्य-स्मृतयः ॥ § 5028

## सिद्धान्ते तु मन्वादिस्मृतीनां प्रत्यक्षमूलकत्वादेव प्रामाण्यम्

ननु ! मन्वादिस्मृतयोऽपि वेदमूलत्वात् प्रमाणं, नान्यत इति — अत्रोच्यते—तदेतद्वेदमूलतया प्रामाण्यं योगिप्रत्यक्षं धर्मग्राहकममृष्यमाणाः किलाचक्षते भवन्तः । एतच्च न युक्तम्—यथा हि भगवानीश्वरः सर्वस्य कर्ता, सर्वस्येशिता, सर्वदर्शी, सर्वानुकम्पी च वेदानां प्रणेता समर्थितः, तथा योगिप्रत्यक्षमपि धर्मग्रहणे निपुणमस्मदादिप्रत्यक्षविलक्षणं प्रत्यक्षलक्षणे पु. २६८ समर्थितमेव । तस्मात् तन्मूला एव मन्वादिदेशनाः भवन्तु ॥ § 5029

I.633/KSV

## धर्मस्यापि प्रत्यक्षत्वसंभवः

यत्तु त्रिकालानवच्छिन्नः कथं प्रत्यक्षगम्यो धर्मः स्यादिति पु. ६३० चोदनैव तत्र प्रमाणमुच्यते—प्रतिविहितं तत् ईश्वरप्रत्यक्षसमर्थनेन । साध्य-साधनसम्बन्धस्य स्वर्गाग्निहोत्रादिगतस्य यथा ग्राहकमीश्वरप्रत्यक्षं, एवं अष्ट-कादिगतस्य तस्य ग्राहकं मन्वादिप्रत्यक्षं भविष्यतीति किमत्र त्रिकालानव-च्छेदेन, अवच्छेदेन वा कृत्यम् ? § 5030

## वेदानां स्मृतीनां च वैलक्षण्यम्

यद्येवं अष्टकादिकर्मणां धर्मत्वाग्रहणात् असर्वज्ञ ईश्वरः स्यात् । ज्ञात्वा वाऽनुपदिशत् अकारुणिको भवेत्—नैष दोषः— सर्वं जानात्येव भगवान् । किंचित् स्वयमुपदिशति, किंचित् परानुपदेशयति । ते हि स्वानुग्राह्या

१३ ] नन्वेव— nyāma-wit__ka
९--१० ] प्रत्यक्षं यथाऽग्निहोत्रादेर्धर्मत्वस्य ग्राहकं— nyāma-wit__kha
११ ] यागे— nyāma-wit__kha
१३ ] ग्राहित्वात्— nyāma-wit__kha

७ *] न ह्वेवमित्यादि । तथा च आचमनादिस्मार्तकर्मणां, वेदिस्तरणादिश्रौतकर्मणां च परस्परसंबलनदर्शनात् वैदिकमन्वादिविरचितत्वमेव बाह्यस्मृत्यपेक्षया वैलक्षण्यं पर्याप्तमित्यर्थः ॥
१० योऽपि] वेदमूलत्वादिति । तथा च तेषां धर्मे प्रामाण्यवर्णनमुपहास्यं इत्याशयः ॥
१७ तु] त्रिकालेत्यादि । वर्तमानैकविषयं प्रत्यक्षं त्रिकालानवच्छिन्नं धर्मं कथं गृह्णीयादित्यर्थः ॥
१ तीति] किमत्रेति । त्रिकालावच्छेदानवच्छेदादिकं न प्रत्यक्षत्वे प्रतिबन्धकं प्रयोजकं वा ॥

भगवतः । तेषां च तदनुग्रहकृतेव तथाविधज्ञानप्राप्तिः । मन्वादीनां प्रत्यक्षो धर्म इति वेदेऽपि पठ्यते ॥ § 5031

## श्रुतिस्मृत्योः प्रत्यक्षमूलकत्वाविशेषात् न कुत्रापि तयोर्बाध्यबाधकभावः

ननु ! एवं प्रत्यक्षमूलत्वाविशेषात् श्रुतिस्मृत्योर्विरोधे विकल्पः प्राप्नोति, *बृहद्रथन्तरविध्योरिव; न बाध्यबाधकभावः । न हीश्वर प्रत्यक्षस्य योगिप्रत्यक्षस्य च प्रामाण्ये कश्चिद्विशेषः । *नैसर्गिकाहार्यकृतस्तु भविष्यति । किं तेन ? § 5032 I.634/KSV

उच्यते—भवतु विकल्पः । को दोषः ? वेदमूलत्ववादिभिरपि कश्चिद्विकल्पो व्याख्यात एव । विषयविभागेन वा विकल्पो व्याख्यास्यते । न च श्रुतिस्मृतिविरोधोदाहरणं किञ्चिदस्तीति स्वाध्यायाभियुक्ताः । तस्मादाप्तप्रत्यक्षमूलत्वेन वेदानामिव धर्मशास्त्राणामपि प्रामाण्यम् ॥ § 5033

## इतिहासपुराणानामपि साक्षादेव प्रामाण्योपपादनम्

एतेन इतिहासपुराणप्रामाण्यमपि निर्णीतं वेदितव्यम् । इतिहासपुराणं हि पञ्चमं वेदमाहुः । उक्तं च—म. भा. आ. १-२६५ § 5034

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदः मामयं प्रतरिष्यति इति ॥ § 5036

## सर्वस्मृतीनां वेदमूलकत्वेनैव प्रामाण्यमिति पक्षः

अथवा किमस्माकं दुरभिनिवेशेन ? वेदमूलत्वात् स्मृतीनां, स्मृतिवत् पुराणानामपि भवतु प्रामाण्यम् । प्रामाण्ये तावदविवादः । सदाचारस्याप्यनुपनिबद्धस्य वेदमूलत्वादेव भवतु प्रामाण्यम् ॥ § 5037

---

८--१० ] हि पञ्चमं—
nyāma-wit__kha
१२--१३ ] प्रामाण्यम्—
nyāma-wit__kha

---

७ वेदेऽपि ] पठ्यत इति । यद्वै किञ्च मनुरवदत् तद्भेषजम् तै. सं. २-२-१० इति श्रुतिः । मनूक्तत्वेनैव तद्वचनस्य प्रामाण्यमुच्यते, न त्वन्यापेक्षयेत्याशयः ॥

९ *] बृहदिति । बृहद्वा साम, रथन्तरं वा साम भवति ? इत्यत्र विकल्पः प्रतिपादितः ॥

१० *] नैसर्गिकेति । विशेष इत्यनुवर्तते । ईश्वरप्रत्यक्षं नैसर्गिकम्, योगिनां तु आहार्यं—तपःप्रभावसंपाद्यम् ॥

१३ ल्पो ] व्याख्यात एवेति । तन्त्रवार्तिके वैष्टुतं वै वासः इति शाठ्यायनिब्राह्मणोदाहरणपूर्वकं ततश्च श्रुतिमूलत्वात् बाध्योदाहरणं न तत् । विकल्प एव हि न्याय्यस्तुल्यकक्ष्यप्रमाणतः तं. वा. १-२-४ इत्युक्तम् ॥

३ स्या ] अनुपनिबद्धस्य—स्मृतिरूपनिबन्धाविषयस्य—तद्विषयकस्मृतिरहितस्य ॥

## विद्यास्थानेषु षण्णां प्राधान्यं, इतरेषामङ्गत्वम्

सर्वथा तावत् वेदाश्चत्वारः, पुराणं, स्मृतिरिति षडिमानि विद्यास्थानानि साक्षात्पुरुषार्थसाधनोपदेशीनि पूर्वोक्तरीत्या प्रमाणम् । व्याकरणादीनि तु I.635/KSV षडङ्गानि अङ्गत्वेनैव तदुपयोगीनि, न साक्षाद्धर्मोपदेशीनि । कल्पसूत्रेष्वपि विक्षिप्तकर्मक्रमनियमसंग्रहमात्रम्, नापूर्वोपदेशः । मीमांसा वेदवाक्यविचारात्मिका । वेदप्रामाण्यनिश्चयहेतुश्च न्यायविस्तर इत्यामुख एवोक्तम् पु. ७-१० । तदिमानि चतुर्दशविद्यास्थानानि प्रमाणम् । कानिचित् साक्षादुपदेशीनि, कानिचित् तदुपयोगीनीति सिद्धम् ॥ § 5038

## आगमद्वैविध्यम्

यानि पुनरागमान्तराणि परिदृश्यन्ते, तान्यपि द्विविधानि— कानिचित् सर्वात्मना वेदविरोधेनैव प्रवर्तन्ते, बौद्धादिवत् । कानिचित् तदविरोधेनैव कल्पितव्रतान्तरोपदेशीनि, शैवादिवत् ॥ § 5039

## शैवागमानां प्रामाण्यम्

तत्र शैवागमानां तावत् प्रामाण्यं ब्रूमहे ; तदुपजनितायाः प्रतीतेः सन्देहबाधकारण-कालुष्यकलापस्यानुपलम्भात् । ईश्वरकर्तृत्वस्य तत्रापि स्मृत्यनुमानाभ्यां सिद्धत्वात् । मूलान्तरस्य लोभमोहादेः कल्पयितुमशक्यत्वात् । न हि तत्र इदंप्रथमता स्मर्यते । वेदवदेकदेशसंवादाश्च भूम्ना दृश्यन्त इति कुतो मूलान्तरकल्पनावकाशः ॥ § 5040

## शैवागमा अपि वैदिकधर्मप्रतिपादका एव

न च वेदप्रतिपक्षतया तेषामवस्थानम् ; वेदप्रसिद्धचातुर्वर्ण्यादिव्यवहारापरित्यागात् ॥ § 5041

*मन्वादिचोदनान्यायः स यद्यपि न विद्यते ।
शैवागमे तथाऽप्यस्य न न युक्ताऽप्रमाणता ॥ ७९ ॥ § 5043

---

२ ] साक्षात्कृतपुरुषार्थ— nyāma-wit__ka

२ ] देशीनि— nyāma-wit__kha
१९ ] ननु— nyāma-wit__kha

---

१२ पुन] पूर्वं पु. ६३० मन्वादिस्मृतीनामागमत्वेन निर्देशात् आगमान्तराणीति ॥
१८ त्र] इदं प्रथमतेति । अनादिपरंपराप्राप्तेः ते आगमा इत्यर्थः ॥

३ *] ननु मन्वाद्युक्तशौचाचमनादीनां वैदिकधर्मैः संबलनदर्शनात्, आगमोक्तधर्मेषु त्रयीबाह्यानामप्यधिकारात् अप्रामाण्यमेव शैवपाञ्चरात्राद्यागमानां इति शंकायां तं. वा. १-३-४ आह—मन्वादीति ॥

I.636/KSV

सर्वोपनिपदामर्थाः निःश्रेयसपदस्पृशः ।
विविच्यमाना दृश्यन्ते ते हि तत्र पदे पदे ॥ ८० ॥§ 5045

ये च वेदविदामग्र्याः कृष्णद्वैपायनादयः ।
प्रमाणमनुमन्यन्ते तेऽपि शैवादिदर्शनम् ॥ ८१ ॥§ 5047

## पञ्चरात्रप्रामाण्यम्

*पञ्चरात्रेऽपि तेनैव प्रामाण्यमुपवर्णितम् ।
अप्रामाण्यनिमित्तं हि नास्ति तत्रापि किञ्चन ॥ ८२ ॥§ 5049

तत्र च भगवान् विष्णुः प्रणेता कथ्यते । स चेश्वर एव ॥ § 5050

## शैववैष्णवकलहस्य निर्मूलत्वम्

*एकस्य कस्यचिदशेषजगत्प्रसूति-
हेतोरनादिपुरुषस्य महाविभूतेः ।
सृष्टिस्थितिप्रलयकार्यविभागयोगात्
ब्रह्मेति विष्णुरिति रुद्र इति प्रतीतिः ॥ ८३ ॥§ 5054

## शैवपञ्चरात्रोक्तधर्माणां वैदिकम्

वेदे च पदे पदे एक एव रुद्रोऽवतस्थे न द्वितीयः अथ. ३, इदं विष्णुर्विचक्रमे तै. सं. १-२-१३, ऋ. सं. १-२२-७ इति रुद्रो विष्णुश्च पठ्यते । तद्योगाश्च तदाराधनोपाया वेदेऽपि चोदिता एव । शैवपञ्चरात्र-
I.637/KSV योस्तु तद्योगा एवान्यथोपदिश्यन्ते । न चैष एव वेदविरोधः; वैकल्पिकत्वादुपायानाम् । अतः आप्तप्रणीतत्वात्, वेदाविरुद्धत्वाच्च न तयोरप्रामाण्यम् ॥ § 5055

---

४ ] दर्शनात्— nyāma-wit__ka

---

८ न्ते ] तऽपीति । सांक्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः म. भा. शा. ३५०-६३ ॥
९ * ] पञ्चरात्र इति । वैखानसागमे विवादाभावादकथनम् । व्याससूत्रेऽपि हि तर्कपादे पाशुपतपञ्चरात्रस्पर्शेऽपि न वैखानसस्पर्श इत्यवधेयम् ॥
१२ * ] सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवान् एक एव जनार्दनःवि. पु. १-२-६६ इत्याद्यप्यत्र द्रष्टव्यम् ॥
३ द्योगाश्च ] तद्योगाः इत्यस्यैव विवरणं—तदाराधनोपाया इति ॥
४ एवा ] अन्यथा—प्रकारान्तरेण । आहुश्च शंकरभगवत्पादा अपि—अभिगमनोपादानेज्यास्वाध्याययोगरूपपञ्चकर्मणां ईश्वराराधनरूपत्वं श्रौतत्वं च शं. भा. २-२-४२ ॥

## बौद्धागमानामप्रामाण्यम्

ये तु सौगतसंसारमोचकागमाः पापकाचारोपदेशिनः, कस्तेषु प्रामाण्यमार्योऽनुमोदते ? § 5056

बुद्धशास्त्रे हि विस्पष्टा दृश्यते वेदबाह्यता ।
*जातिधर्मोचिताचारपरिहाराबधारणात् ॥ ८४ ॥§ 5058

संसारमोचकाः पापाः प्राणिहिंसापरायणाः ।
मोहप्रवृत्ता एवेति न प्रमाणं तदागमः ॥ ८५ ॥§ 5060

निषिद्धसेवनप्रायं यत्र कर्मोपदिश्यते ।
प्रामाण्यकथने तस्य कस्य जिह्वा प्रवर्तते ? ॥ ८६ ॥§ 5062

*ततो यद्यपि सिद्धिः स्यात् कदाचित् कस्यचित् क्वचित् ।
ब्रह्महत्यार्जितग्राम्यभोगवन्नरकाय सा ॥ ८७ ॥§ 5064

निषिद्धाचरणोपात्तं दुष्कृतं केन शाम्यति ?
अतः कालान्तरेणापि नरके पतनं पुनः ॥ ८८ ॥§ 5066

## बौद्धवैदिकागमयोर्वैलक्षण्यम्

यत्त्वत्र चोदितम् पु. ६२९—परेषु पूर्वोक्तक्रमेण बुद्धाद्याप्तकल्पनां कुर्वत्सु किं प्रतिविधेयमिति—तत्रोच्यते—महाजनप्रसिद्ध्यनुग्रहे हि सति सुवचमाप्तोक्तत्वं भवति, नान्यथा ॥ § 5067

## वैदिकागमानां महाजनपरिग्रहात् प्रामाण्यम्

महाजनश्च वेदानां, वेदार्थानुगामिनां च पुराणधर्मशास्त्राणां, वेदाविरोधिनां च केषांचिदागमानां प्रामाण्यमनुमन्यते; न वेद विरुद्धानां बौद्धाद्यागमानामिति I.638/KSV कुतस्तेषामाप्तप्रणीतत्वम् ? मूलान्तरं हि तत्र सुवचं अज्ञानलोभादि—इत्येवमभिधाय वेदस्पर्धिनो बौद्धादयः निषेद्धव्याः ॥ § 5068

## कोऽयं महाजनो नाम ?

---

१० *] वेदबाह्यत्वमेवोपपादयति—जातीत्यादि ॥
१५ *] ततः—बौद्धाद्यागमोक्तमार्गानुष्ठानात् । श्रूयन्ते च बौद्धार्हतादिषु बहुविधसिद्धिमन्तः ॥

आह— § 5069

कोऽयं महाजनो नाम ? किमाकारः ? किमास्पदः ?
किंसंख्यः ? किंसमाचारः ? इति व्याख्यातुमर्हसि ॥ ८९ ॥§ 5071

अपि च बौद्धादयो बुद्धादीनाप्तान् स्वागमप्रामाण्यसिद्धये वदन्ति ते महाजनमपि निजम् । * तत्सिद्धये बन्दकादिकं वदेयुरेव । कस्तत्र प्रतीकारः ? उच्यते—चातुर्वर्ण्यं, चातुराश्रम्यं च यदेतदार्यदेशप्रसिद्धं, स महाजन उच्यते । आकारस्तु तस्य कीदृशं पाणिपादम् ? कीदृशं शिरोग्रीवं वा ? कियती तस्य संख्या ? इति पुरुषलक्षणादीनि गणयितुं न जानीमः ॥
§ 5072

चातुर्वर्ण्यचातुराश्रम्यरूपश्चैष महाजनः वेदपथप्रवृत्तः आगमान्तरवादिभिरप्रत्याख्येय एव । तथा चैते बौद्धादयोऽपि— दुरात्मानः वेदप्रामाण्यनियमिता एव चण्डालादिस्पर्शं परिहरन्ति । निरस्ते हि जातिवादाबलेपे कः चण्डालादिस्पर्शे दोषः ? § 5073

येऽपि अन्ये केचित् अशुचिभक्षणागम्यागमनादिनिर्विकल्पदीक्षाप्रकारमकार्यमनुतिष्ठन्ति, तेऽपि चातुर्वर्ण्यमहाजनभीताः तत्कर्म रहसि कुर्वन्ति, न प्रकाशम् । निर्विशङ्कं हि तच्छास्त्रप्रत्यये किमिति चौर्यवत् तदर्थानुष्ठानम् ? अत एव न निजो महाजनः उत्थापयितुं शक्यते वन्दकादिः, किं त्वयमेव चातुर्वर्ण्यादिर्महाजनः । स चैष महाजनः वेदविरुद्धमागमं परिहरत्येव, नानुमोदते ॥ § 5074 I.639/KSV

संसारमोचकं स्पृष्ट्वा शिष्टाः स्नान्ति सवाससः ।
बौद्धैरपि सहैतेषां व्यवहारो न कश्चन ॥ ९० ॥§ 5076

वेदधर्मानुवर्ती च प्रायेण सकलो जनः ।
वेदवाह्यस्तु यः कश्चित् आगमो वञ्चनैव सा ॥ ९१ ॥§ 5078

---

५ ] वृन्दादिकं— nyāma-wit__kha
१० ] प्रथम— nyāma-wit__kha
१२ ] क्व— nyāma-wit__kha
१५ ] तं तं— nyāma-wit__kha
१७ ] वृन्दकादिः— nyāma-wit__kha

---

९ *] निजमिति । वदन्तीत्यनुकर्षः ॥
९ ये] वन्दकादि—वन्दा वृक्षादिनीइत्यमरः । स्वार्थे कुत्सायां वा कन् । वृक्षोपरि यदृच्छया जातः वृक्षः । प्रक्षिप्तवचनादीत्यर्थः । अथवा वन्दका—भिक्षुकी । तादृशं जनं स्वागमप्रामाण्यसिद्धये महाजनं वदेयुरेवेत्यर्थः ॥
१४ वृत्तः] आगमान्तरेत्यादि । वैदिकैरुक्तानेव धर्मान् प्रकारान्तरेण तेऽप्यङ्गीकुर्वन्त्येवेत्यर्थः ॥
२२ मेव] चातुर्वर्ण्येति । तथा च वर्णाश्रमधर्मनिष्ठा एव महाजना इति निश्चितम् ॥

## वेदबाह्या अपि वैदिकाभासा एव

ईदृशश्चायं अनन्यसामान्यविभवो महाभागो वेदनामा ग्रन्थराशिः, यदन्ये बाह्यागमवादिन एवमेव स्पर्धन्ते । ते हि स्वागमप्रामाण्यमभिवदन्तः, वेदरीत्याऽभिदधति । वेदे यथातथा प्रवेष्टुमीहन्ते ॥ § 5079

वैदिकानर्थान् अन्तराऽन्तरा स्वागमेषु निबध्नन्ति । वेदस्पर्शपूतमिवात्मानं मन्यन्ते । तेषामप्यन्तर्हृदये ज्वलत्येव वेदप्रामाण्यम् । अत एवंविधाया महाजनप्रसिद्धेः आगमान्तरेष्वदर्शनात् न तेषामाप्तप्रणीतत्वम् ॥ § 5080

## महाजनपरिग्रहाद्वेदप्रामाण्येऽपि न्यायशास्त्रस्यावश्यकता

आह— § 5081

महाजनप्रसिद्ध्यैव वेदप्रामाण्यनिश्चयात् ।
किमर्थः कण्ठशोषोऽयं इयानार्येण संश्रितः ? ॥ १२ ॥§ 5083

वेदप्रामाण्यसिद्ध्यर्थं हि इदं शास्त्रमारब्धमिति गीयते । वेदप्रामाण्यस्य च महाजनप्रसिद्ध्यैव सिद्धत्वात् किं शास्त्रेण ? § 5084

अलं क्षुद्रचोद्यैरीदृशैः ! § 5085

I.640/KSV

महाजनप्रसिद्धिं हि केचिद्विप्लावयन्त्यपि ।
अतस्तदुपघाताय शास्त्रमन्त्रं प्रयुज्यते ॥ १३ ॥§ 5087

तस्मात् पूर्वोक्तानामेव प्रामाण्यमागमानां, न वेदबाह्यानामिति स्थितम् ॥ § 5088

## सर्वागमप्रामाण्यपक्षः

अन्ये सर्वागमानां तु प्रामाण्यं प्रतिपेदिरे ।
सर्वत्र बाधसन्देहरहितप्रत्ययोदयात् ॥ १४ ॥§ 5090

सवत्र वेदवत् कर्तुः आप्तस्य परिकल्पना ॥
दृष्टार्थेष्वेकदेशेषु प्रायः संवाददर्शनात् ॥ १५ ॥§ 5092

---

५ ] ज्वलतीव— nyāma-wit__kha
११ ] सिद्ध्यैव— nyāma-wit__kha
१३ ] प्रसिद्धं— nyāma-wit__kha

---

१४ र्थः ] अयं कण्ठशोषः—एतावता वेदप्रामाण्यस्थापनार्थं कृतः श्रमः ॥
१८ हि ] केचित्—मन्दमतयः, हैतुका वा ॥
२ त्र ] बाधेत्यादि—तत्तदधिकारिणामिति शेषः । दृश्यन्ते हि बौद्धजैनेष्वपि विचित्रसिद्धिमन्तः पुरुषाः ॥

## आगमानां न परस्परं विरोधः

यत्पुनरत्रोक्तम्—सर्व एवागमाः परस्परविरुद्धार्थोपदेशित्वादप्रमाणं स्युरिति—तत्रोच्यते—आप्तप्रणीतत्वेन तुल्यकक्ष्यत्वात् अन्यतमदौर्बल्यतिमित्तानुपलम्भाच्च न कश्चिदागमः किञ्चित् बाधते । विरोधमात्रं त्वकिञ्चित्करम्, प्रमाणत्वाभिमतेषु वेदवाक्येष्वपि परस्परविरोधदर्शनात् । पुरुषशीर्षस्पर्शनसुराग्रहगवालम्भादिचोदनासु वचनान्तरविरुद्धमर्थजातमुपदिष्टमेव ॥ § 5093

## अधिकारिभेदेन सर्वागमानां यथाकथञ्चित् श्रेयस्साधनत्वम्

किञ्चानमानां विरोधोऽपि नातीव विद्यते, प्रमाणे पुरुषार्थे वा सर्वेषामविवादात् ॥ § 5094

नानाविधैरागममार्गभेदैः आदिश्यमाना बहवोऽभ्युपायाः ।
एकत्र ते श्रेयसि संपतन्ति सिन्धौ प्रवाहा इव जाह्नवीयाः ॥
९६ ॥§ 5096

I.641/KSV

## उपायोपेयविषये सर्वागमानामैककण्ठ्यम्

तथा ह्यपवर्ग उपेषः सर्वशास्त्रेषु निर्दिश्यते । तदुपायः सर्वत्र ज्ञानमुपदिश्यते । ज्ञानविषये तु विवदन्ते । तत्रापि प्रायशः आत्मविषयतायां बहूनामविप्रतिपत्तिः ॥ § 5097

प्रकृतिपुरुषविवेकज्ञानपक्षे तु प्रकृतेर्विविक्ततया पुरुष एव ज्ञेयः ॥ § 5098

नैरात्म्यवादिनस्तु आत्मशैथिल्यजननाय तथोपदिशन्ति । स्वच्छं तु ज्ञानतत्त्वं यत्तैरिष्यते; तत् स्वातन्त्र्यात्, अनाश्रितत्वात् आत्मकल्पमेव । *कूटस्यनित्यचे प्रवाहनित्यत्वे च विशेषः ॥ § 5099

## क्रियासु अनैककण्ठ्यं न दोषाय

१ ] पदेश— nyāma-wit__kha
६ ] प्रमाणानां— nyāma-wit__kha

१०--११ ] निर्दिश्यते— nyāma-wit__kha
१४ ] (?)दिशन्ति— nyāma-wit__kha

१ स्तु ] आत्मशैथिल्येति—अहंकारादिकलुषितस्यात्मनः शथिल्यं—अहंकारग्रन्थिविश्लेषणम् ॥
२ * ] कूटस्थेत्यादि । कूटस्थनित्यः—स्वतः स्वरूपत एव एकरूपः आत्मा वैदिकानाम् । बौद्धादीनां तु क्षणिकत्यादात्मनः प्रवाहतः नित्य आत्मा । शून्यवादिनान्त्वनिर्वचनीय एवेति न चर्चाविषय आत्मा ॥

एवं प्रधानयोस्तावत् उपायोपेययोरविवादः । क्रिया तु विचित्रा प्रत्यागमं भवतु नाम । भस्मजटापरिग्रहो वा, दण्डकमण्डलुग्रहणं वा, रक्तपटधारणं वा, दिगम्बरता वाऽवलम्ब्यताम् ! कोऽत्र विरोधः ? वेदेऽपि किमल्पीयांसः पृथगितिकर्तव्यताकलापखचिताः स्वर्गोपायाश्चोदिताः ? तस्मात् परस्परविरोधेऽपि न प्रामाण्यविरोधः ॥ § 5100

## आगमप्रवक्तॄनां सर्वज्ञत्वं समानम्

अतश्च यदुच्यते—

कपिलो यदि सर्वज्ञः सुगतो नेति का प्रमा ?
अथोभावपि सर्वज्ञौ मतभेदस्तयोः कथम् ?§ 5103

I.642/KSV इति—तदपास्तं भवति—प्रधाने सति भेदाभावात् । क्वचिच्च तद्भावे प्रामाण्याविरोधात् । न च हृदयक्रोशनहेतुकर्मोपदेशात् आगमान्तराणामप्रामाण्यम्; तस्याप्रामाण्यतायां अप्रयोजकत्वात् ॥ § 5104

*विचिकित्सा हि नृशिरःकपालाद्यशनेषु या ।
साऽप्यन्यदर्शनाभ्यासभावनोपनिबन्धना ॥ ९७ ॥§ 5106

तथा च शान्तचित्तानां सर्वभूतदयावताम् ।
वैदिकीष्वपि हिंसासु विचिकित्सा प्रवर्तते ॥ ९८ ॥§ 5108

## हिंसोपदेशमात्रात् नाप्रामाण्यम्

अभिचारादिहिंसायां वैदिक्यामपि भवतु हृदयोत्कम्पः । *करणांशोपनिपातिनी हिंसेति लिप्सातस्तस्यां प्रवृत्तिः ॥ § 5109

या तु अग्निषोमीयादिपशुहिंसा इतिकर्तव्यतांशस्था, यस्यां क्रत्वर्थो हि शास्त्रादवगम्यते इति वैधी प्रवृत्तिः, तस्यामपि कारुणिको लोकः सविचिकित्सो भवति । वदति च यत्र प्राणिवधो धर्मस्त्वधर्मः तत्र कीदृशः ? इति । न चैतावता वेदस्याप्रामाण्यम् । एवमागमान्तरेष्वपि भविष्यति ॥ § 5110

१० ] क्रोशन— nyāma-wit__kha
१८ ] वत्तु— nyāma-wit__kha
१९ ] वैदी— nyāma-wit__kha

१३ च] हृदयक्रोशनं—हृदयस्याक्रन्दनम् । श्रूयते हि कुत्रचिदागमेषु नरबल्यादिकमपि ॥
१५ *] विचिकित्सेत्यादि । अस्मदनभ्यासमात्रात् इतरेष्वाचारेषु यद्यपि विचिकित्सा भवेत् । अथापि नाप्रामाण्यं तदागमस्य । अन्यथा वैदिकस्यापि मृदुलमतेः यज्ञीयपशुहिंसायामपि हृदयं आक्रन्दत एवेत्यप्रामाण्यं स्यात् ॥
१ *] करणांशेति । सोमप्रकृतिके श्येते पशुहिंसनं शत्रुहिंसायाः साधनम् । अग्नीषोमीयादौ तु याग एव साधनं, पशुहिंसा तु इतिकर्तव्यतान्तर्गतेति विशेषः ॥

## विधिनिषेधादिकं तत्तदागमप्रतिनियतम्

यत्तु आगमान्तरेभ्यः कौलादिभ्यः खेचरताद्यर्थसिद्धावपि निषिद्धाचरण-
कृतः कालान्तरे प्रत्यवायोऽवश्यंभावीत्युक्तम्—तदपि न युक्तम्—तस्यार्थ- I.643/KSV
स्य तदागमनिषिद्धत्वाभावात् । आगमान्तरनिषिद्धत्वेऽपि वैकल्पिकत्वकल्प-
नोपपत्तेः । पुरुषार्थप्राप्त्युपायत्वाच्च तस्य तस्मिन् सिद्धे कुतः प्रत्यवा(?)ः ?
§ 5111

## निषिद्धकर्मोपदेशमात्रं नाप्रामाण्यहेतुः

भवतु वा कालान्तरे ततः प्रत्यवायः ! तथाप्यधिकारिभेदेन तत्फले कर्मणि चोद्यमाने श्येनादाविव नागमप्रामाण्यमत्र हीयते । श्येनेनाभिचरन् यजेत इत्यत्र अभिचरन् इति शता लङ्घितनिषेधमधिकारिणमाचष्टे । तस्य च श्येनयागः चोदितः । स च तत्प्रयोगात् कृतबधः प्रत्यवैत्येव, न च वेदस्याप्रामाण्यम् । उक्तं च उभयमिह चोदनया लक्ष्यते अर्थोऽनर्थश्च शा. भा. १-१-२ इति । अधिकारभेदाच्च विचित्रकर्मचोदना नानुपपन्ना । मरणकामस्य *सर्वस्वारः चोदितः, आयुष्कामस्य कृष्णलचरुः । तस्मादेतदपि नाप्रामाण्यनिमित्तम् ॥ § 5112

## बौद्धागमस्य वर्णाश्रमधर्मनिषेधे न तात्पर्यम्

यदपि बौद्धागमे जातिवादनिराकरणं, तदपि सर्वानुग्रहप्रवणकरुणातिशयप्रशंसापरं न च यथाश्रुतमवगन्तव्यम् । तथा च तत्रैतत्पठ्यते न जातिकार्यदुष्टान् प्रव्राजयेत् इति । तस्मात् सर्वेषामागमानां आप्तैः कपिलसुगतार्हत्प्रभृतिभिः प्रणीतानां प्रामाण्यमिति युक्तम् ॥ § 5113
I.644/KSV

## सर्वागमानामपीश्वरकृतत्वपक्षः

---

८ ] शत्रा— nyāma-wit__ka
१६ ] काय— nyāma-wit__kha

---

१० स्य ] तदागमेति । कौलाद्यागमेत्यर्थः । आगमान्तरनिषेधः आगमान्तरोक्तधर्मे नाधर्मत्वमावहेदिति भावः ॥
१५ इति ] शता—शतृप्रत्ययः । शतृप्रत्ययेन वर्तमानकालबोधनात् तदानीं अभि[illegible] I.644/KSV प्रवृत्तत्वसिद्ध्या लङ्घितनिषेधशास्त्रः पुरुषः लभ्यते ॥
१९ * ] सर्वस्वारः । क्रतुविशेषः ज्योतिष्टोमप्रकृतिकः । मरणकामो ह्येतेन यजेत यः कामयेतानामयः स्वर्गं लोकमियामिति शा. भा. १०-२-५२ ॥
१ ण ] करुणातिशयेति । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः गी. ५-१८, (?')मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः । (?) वैश्यास्तथा शूद्रः तेऽपि यान्ति परां गतिम्(?') गी. ९-४०क्१>, अपि चेत् सुदुराचारः भवते मामनन्यभाक् । साधुरेव स मन्तव्यः गी. ९-४२ इत्यादिवदित्यर्थः ॥

अन्ये मन्यन्ते—सर्वागमानामीश्वर एव भगवान् प्रणेतेति । स हि सकलप्राणिनां कर्मविपाकं अनेकप्रकारमबलोकयन् करुणयाताननुग्रहीतुं अपवर्गप्राप्तिमार्गं बहुविधमुत्पश्यन् आशयानुसारेण केषांचित् क्वचित् कर्मणि योग्यतामवगम्य तं तमुपायमुपदिश्यति । स्वविभूतिमहिम्ना च नानाशरीरपरिग्रहात् स एव संज्ञाभेदानुपगच्छति । अर्हन्निति, कपिल इति, सुगत इति स एवोच्यते भगवान् । नानासर्वज्ञकल्पनायां यत्नगौरवप्रसङ्गात् ॥
§ 5114

## बुद्धस्य भगवदवतारत्वम्

ननु ! बुद्धः शुद्धोदनस्यराज्ञोऽपत्यम् स कथमीश्वरो भवेत् ? परिहृतमेतत् भगवता कृष्णद्वैपायनेन गी. ४-७— § 5115

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् इति
॥§ 5117

शरीरमेव शुद्धोदनस्यापत्ये, नात्मा । अतः प्रतियुगं विष्णुरेव भगवान् धर्मरूपेणावतरतीत्यागमविदः प्रतिपन्नाः ॥ § 5118

## वैदिकबौद्धाद्यागमयोर्विशेषः

ननु ! वेदसमानकर्तृकेषु आगमान्तरेषु कथं तादृशो महाजनसंप्रत्ययो नास्ति ? एवं नास्ति—तेन वर्त्मना भगवता कतिपये प्राणिनः अनुगृहीताः, येषां तादृश आशयो लक्षितः । वैदिकेन तु वर्त्मना निस्संख्याकाः I.645/KSV
प्राणिनोऽमुगृहीताः इति तत्र महानादरः, आगमान्तरेषु कृश इति ॥ § 5119

एककर्तृके परस्परविरोधः कथमिति चेत्, वेदैरेवात्र वर्णितः समाधिः । तेष्वपि भूम्नः परस्परविरोधस्य दर्शनादित्युक्तम् । तस्मादीश्वरप्रणीतत्वादेव सर्वागमानां प्रामाण्यम् ॥ § 5120

## सर्वागमानां वेदमूलत्वात् प्रामाण्यमिति पक्षः

८ ] (?)त्यम्— nyāma-wit_kha

१५ वान्] धर्मरूपेणेति । रामो विग्रहवान् धर्मः रा. अर. ३८-९३, कृष्णं धर्मं सनातनम् इत्याद्यत्र स्मर्तव्यम् ॥

१ र्तृकेषु] आगमान्तरेषु—बौद्धाद्यागमेषु ॥
१ थं] तादृशः—यादृशो वेदस्य तादृशः ॥

अपरे पुनः वेदमूलत्वेन सर्वागमप्रामाण्यमभ्युपागमन् । यो हि मन्वादिदेशनानां वेदमूलतायां न्योय उक्तः—तं. वा. १-३-२

भ्रान्तेरनुभवाद्वाऽपि पुंवाक्याद्विप्रलम्भकात् ।
दृष्टानुगुण्यसामर्थ्यात् चोदनैव लघीयसी ॥§ 5123

इति—स सर्वागमेषु समानः । न च मन्वादिस्मृतीनां मूलभूता श्रुतिः उपलभ्यते । अनुमानेन तु तत्कल्पनमागमान्तरेष्वपि तुल्यम् ॥ § 5124

## बौद्धागमानामपि वेदमूलकत्वसंभवः

ननु च ! उक्तं अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् जै. सू. १-३-२ इति—*तच्चेह नास्ति, इति कथं श्रुत्यनुमानम् ? नैष दोषः— § 5125

एकाधिकारावगमः न प्रामाण्ये प्रयोजकः ।
*मिश्रानुष्ठानसिद्धौ तु कामं भवतु कारणम् ॥ ९९ ॥§ 5127

I.646/KSV

न च पृथगनुष्ठीयमानमपि कर्म न प्रमाणमूलं भवति, *र्णाश्रमभेदानुष्ठेयकर्मवत् ॥ § 5128

कर्तृसामान्यशून्यत्वात् अथ मूलान्तरोदयः ।
तदसत्, बाधकाभावात्, भ्रान्त्यादिप्रतिषेधनात् ॥ १०० ॥§ 5130

प्रत्यक्षमूलताया तु गुर्वी भवति कल्पना ।
वेदस्त्वनन्तशाखत्वात् मूलं तत्र सुसंगतम् ॥ १०१ ॥§ 5132

## सर्वागमानामपि श्रुतिमूलत्वम्

---

२ ] देशनायां— nyāma-wit__ka nyāma-wit__kha
१७ ] स्वसंगतम्—

---

१४ उक्तं] अपि वेति । अपि वेति सिद्धान्तसूचनाय । अनुमानं—स्मृतिः कर्तृसामान्यात्—वेदोक्तानां स्मृत्युक्तानां च धर्माणां कर्तुः साधारणत्वात्, ये वैदिककर्माधिकारिणः, त एव स्मृत्युक्तकर्मण्यपीति स्मृतिः प्रमाणम् ॥
१५ *] तत्—एकाधिकारिकत्वम् ॥
१८ *] मिश्रानुष्ठानसिद्धौ—वेचित् केवलवैदिकाः, वेचित् केवलस्मार्ताः, केचित्तु उभयरूपा इति विषये ॥
१९ *] वर्णाश्रमेति । एकेन वर्णेन एकेनाश्रमिणा वाऽनुष्ठीयमाने कर्मणि न ह्यन्येषामधिकारः ॥
१ अथ] मूलान्तरोदयः—भ्रान्त्यादिमूलकत्वकल्पना ॥

नन्वत्र वेदमूलत्वे द्वेषो वेदविदां कथम् ?
गत्वा त एव पृच्छयन्तां साक्षर्यं यदि विद्यते ॥ १०२ ॥§ 5134

*गोवधे वा कथं तेषां द्वेषः सुस्पष्टवैदिके ?
प्रत्युक्तं च विरुद्धत्वं, शाखानन्त्याच्च दुर्गमम् ॥ १०३ ॥§ 5136

किमियद्वेदसर्वस्वं यावदस्मन्मुखे स्थितम् ?
शाखान्तराद्वा संवादः न लभ्येतेति का प्रमा ? ॥ १०४ ॥§ 5138

तथा च सांख्यशास्त्रप्रसिद्धत्रिगुणात्मकप्रकृतिसूचनपरं अजामेकां लोहितशुक्लकृष्णां तै. ना. ९-२, श्वे. ४-५ इति वैदिकं लिङ्गमुपलभ्यते ॥ § 5139

I.647/KSV

*निर्ग्रन्थकथिततपस्सचिवतत्त्वज्ञानशंसी चायमनुवादो दृश्यते मुनयो वातरशनाः तै. आ. २-७ इति । एवं रक्तपटपरिग्रहभस्मकपालधारणादिमूलमप्यभियुक्ता लभन्त एव ॥ § 5140

मन्वादिस्मृतिवत् कर्तृसाम्यस्यासंभवेऽप्यतः ।
प्रमाणं वेदमूलत्वात् वाच्या सर्वागमस्मृतिः ॥ १०५ ॥§ 5142

ततश्च—

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः§ 5145

इत्यत्र यथा मनुग्रहणं गौतम-यम-आपस्तम्ब-संवर्तकादिस्मृतिकारोपलक्षणम्, एवं अर्हत्-कपिल-सुगताद्युपलक्षणपरमपि व्याख्येयम् ॥ § 5146

## लोकायतमतस्य अनुपादेयत्वम्

२ ] येषां द्वेषादि—
nyāma-wit__kha
१० ] वचसः चित्त—
nyāma-wit__kha
१४ ] सर्वागमा—
nyāma-wit__kha
१८ ] संवर्तकातिकादिस्मृत्यन्तरोप—
nyāma-wit__kha

५ न्व ] अत्र—बौद्धाद्यागमे द्वेषः इत्यन्वयः ॥
६ त्तां ] साक्षर्यं—साक्षरस्य भावः, पाण्डित्यमिति यावत् ॥
७ * ] गोवध इति । श्रूयते हि अश्वालंभं गवालंभं सन्यासं पलपैतृकम् । देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत् इति वैदिकस्यापि (?)यागोपदेशः । अतः न तावन्मात्रात् अप्रामाण्यम् ॥
१४ * ] निर्ग्रन्थाः—जैनाः ॥
१४ ते ] वातरशनाः—वाताशनाः—तपस्विनः ॥

ननु च ! लोकायताद्यागमेऽप्येवं प्रामाण्यं प्राप्नोति । विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्ति बृ. ४-४-१३ इति वेदमूलदर्शनात् । ततश्च लोकायतदर्शने प्रमाणीभूते सति स्वस्ति सर्वागमेभ्यः ! उच्यते— § 5147

* न हि लोकायते किञ्चित् कर्तव्यमुपदिश्यते ।
वैतण्डिककथैवासौ न पुनः कश्चिदागमः ॥ १०६ ॥§ 5149

ननु च ! यावज्जीवं सुखं जीवेत् इति तत्रोपदिश्यते । एवं न स्वभावसिद्धत्वेत, अत्रोपदेशवैफल्यात्, धर्मो न कार्यः, तदुपदेशेषु न प्रत्येतव्यम् I.648/KSV इत्येवं वा यदुपदिश्यते, तत् प्रतिबिहितमेव, पूर्वपक्षवचनमूलत्वात् लोकायतदर्भनस्य । तथा च तत्र उत्तरब्राह्मणं भवति न वा अरे अहं मोहं ब्रवीमि अविनाशी वा अरेऽप्रमात्मा मात्रासंसर्गस्त्वस्य भवति बृ. ४-४-१२-१३ इति । तदेवं पूर्वपक्षवचनमूलत्वात् लोकायतशास्त्रमपि न स्वतन्त्रम् । उत्तरवाक्यप्रतिहतत्वात्तु तन्नादरणीयम् ॥ § 5150

## बौद्धाद्यागमवार्वाकमतयोर्वैलक्षण्यम्

शास्त्रान्तराणां तु पूर्वपक्षवाक्यमूलत्वकल्पनं अयुक्तम् । समनन्तरमेव तत्प्रतिपक्षवचनानुपलब्धेः इत्यतः वेदमूलत्वात् सर्वागमाः प्रमाणम् ॥ § 5151

## प्राचीनागमानां कल्पितागमानां च वैलक्षण्यम्

सर्वागमप्रमाणत्वे नन्वेवमुपपादिते ।
अहमप्यद्य यत्किञ्चित् आगमं रचयामि चेत् ॥ १०७ ॥§ 5153

तस्यापि हि प्रमाणत्वं दिनैः कतिपयैर्भवेत् ।
तस्मिन्नपि न पूर्वोक्तन्यायो भवति दुर्वचः ॥ १०८ ॥§ 5155

१ ] वागमो— nyāma-wit_kha
३ ] प्रमाण— nyāma-wit_kha
७ ] न— nyāma-wit_kha
१५ ] सर्वागमः— nyāma-wit_kha

११ *] न हीत्यादि । तथा च पारलौकिककर्तव्यानुपदेशात् लोकावतं न प्रमाणमित्यर्थः । ननु यस्तु अतिमन्दाधिकारी पारलौकिककर्मानधिकृतः, स तु ऐहिकाद्वा न प्रच्युतो भवेदिति करुणयैव लोकायतोपदेश इति कुतो न स्यादिति वेत्, अस्तु कामं तथैव । न तावता इतराप्रामाण्यम् ॥
४ न] पूर्वोक्तन्यायः—शाखान्तराद्वा संवादः इत्याद्यनुपदमेवोक्तः ॥

जगत्पुस्तकलिखितं यदपि तदपि किञ्चिदिदानीं केनापि धूर्तेन प्रख्याप्यते—मह नयमागम इति । तत्राप्याप्त एव प्रणेता कल्प्यताम् ! यादृशं तादृशं वैदिकं वचनमुच्यतां मूलभूतमिति— § 5156

*नैतदस्त्यविगीतां ये प्रसिद्धिं प्रापुरागमाः ।
कृतश्च बहुभिर्येषां शिष्टैरिह परिग्रहः ॥ १०९ ॥§ 5158

अद्य प्रवर्तमानाश्च नापूर्वा इव भान्ति ये ।
येषां न मूलं लोभादि येभ्यो नोद्विजते जनः ॥ ११० ॥§ 5160

I.649/KSV

तेषामेव प्रमाणत्वं आगमानामिहेष्यते ।
न मृष्यते तु यत्किञ्चित् प्रमाणं कुट्टनीमतम् ॥ १११ ॥§ 5162

तथा हि— § 5163

अमितैकपटनिवीतानियतस्त्रीपुंसविहितबहुचेष्टम् ।
नीलाम्बरव्रतमिदं किल कल्पितमासीत् विटैः कैश्चित् ॥ ११२ ॥§ 5165

तदपूर्वमिति विदित्वा निवारयामास धर्मतत्त्वज्ञः ।
राजा शङ्करवर्मा न पुनर्जैनादिमतमेवम् ॥ ११३ ॥§ 5167

## वेदागमप्रामाण्योपसंहारः

इत्याप्तोक्तत्वहेतोः परिमुषितपरोदीरिताशेषदोषात्
एषां वेदागमानां सुदृढमुपगते मानभावे प्ररोहम् ।
उन्मूलत्वात्तथात्वं पुरुषवचनतो वाऽस्तु शास्त्रान्तराणां
*तद्द्वारेणापि वक्तुं न खलु कलुपता शक्यते वेदवाचाम् ॥§ 5171

१--३ ] प्रख्याप्यते— nyāma-wit__kha
४ ] महाजनसमूहे ये— nyāma-wit__kha
९ ] कुट्टिनी— nyāma-wit__kha
१७ ] तन्मूल— nyāma-wit__kha
१८ ] वाच्यम्— nyāma-wit__ka

८ *] नैतदित्यादि । अयमाशयः—प्राचीनो वा नवीनो वा आगमः विषयानुगुणो यः स एव स्वयं प्रतिष्ठितो भवति, अननुगुणश्च स्वयं नश्यत्वेति अनाद्यनुभवसिद्धेऽस्मिन् विषये नास्माभिर्भेतव्यं किञ्चिदिति ।
२ भावे ] प्ररोहं—अप्रतिरो(?)मिति भावः ॥
३ थात्वं ] पुरुषवचनतः—पौरुषेयवाक्यत्वात् ॥
४ *] तद्द्वारेणापीति । न हि सिद्धान्ते पौरुषेयत्वं अप्रामाण्यहेतुः, किन्तु दोषमूलत्वमेव ॥

## अनृतव्याघातादिभिः वेदप्रामाण्याक्षेपः

*ननु ! नाद्यापि वेदस्य प्रामाण्यं सुव्यवस्थितम् ।
स्वदेहसंभवैरेव दोषैरनृवतादिभिः ॥ ११५ ॥§ 5173

चित्रया यजेत पशुकामः, पुत्रकामः पुत्रेष्ट्या यजेत इति श्रूयते । न चेष्ट्यनन्तरं पुत्रपश्वादिफलमुपलभ्यते । तस्मात् असत्याः चित्रादिचोदनाः ॥ § 5174

I.650/KSV

## चित्रादिकर्मणां फलव्यभिचारसमर्थनम्

ननु च ! यः पशुकामः स इष्टिं कुर्यात्—इतीयानेव वाक्यार्थः । तत्र यागात् पशवो भवन्तीत्येतदेव दुरुपपादम् । ते च भवन्तोऽप्यनन्तरमेव भवन्तीत्येतत् दुरुपपादतरम् । अतः कथं न सत्यार्थत्वं चित्रादिचोदनानाम्—उच्यते—यावज्जीवं यजेत यावज्जीवं जुहुयात् इति जीवनवत् असाध्यमानपशुकामनैव नाधिकारिविशेषणं भवितुमर्हति । पशूनां ततः कर्मणः सिद्धिमनवबुध्यमानस्य तत्राधिकार एव न संप्रवर्तते इति निर्णेष्यते एतत् ॥ § 5175

*आनन्तर्यमपि कर्मस्वभावपर्यालोचनेनैव गम्यते, समनन्तरफलत्वेन कर्मणां दृष्टत्वात् । *आह च यदा तावदियं विद्यमानाऽऽसीत्, तदा फलं न दत्तवती; यदा फलमुत्पद्यते, तदाऽसौ नास्ति, असती कथं फलं दास्यति ? इति ॥ § 5176

अपि च कालान्तरे फलस्यान्यत् प्रत्यक्षं कारणमुपलभ्यते— * सेवादि । तस्मिंश्च कारणे दृष्टे सति को नाम सूक्ष्मदृष्टिः अदृष्टं चित्रादि कारणं

---

१ ] सु(?)— nyāma-wit__kha
७ ] तावदुपपाद्यम्— nyāma-wit__kha
८ ] न भवन्ती— nyāma-wit__ka
८ ] पादनम्— nyāma-wit__kha
११ ] एव इति— nyāma-wit__kha

---

५ *] तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यःन्या. सू. २-१-५८ इत्याद्युक्तं विचारं प्रदर्शयति—ननु नाद्यापीत्यादिना ॥
११ देव] दुरुपपादमिति । न हि तत्र यागस्य पशुसाधनत्वं अक्षरतो लभ्यते । (?)र्थिकत्वे च जन्मान्तरीयमपि फलं भवितुमर्हतीति कथं व्यभिचार इत्यर्थः ॥
१३ त्] असाध्यमानेति । जीवनवत् पशुः न हि सिद्धः, किन्तु साध्यः । अतः साध्यमानपशुकामनैव विशेषणं, न त्वसाध्यमानपशुकामना । यतश्च पशुस्साध्यमानः, यतश्च तत्कामनावताऽनुष्ठीयते, तत एव यागस्य पशुसाधनत्वं सिद्धमित्यर्थः ॥
२ *] अस्तु साध्यसाधनभावः । स तु कालान्तरफलेनापि घटत इत्यत्राह—आनन्तर्यमपीति । न हि जन्मान्तरपशूद्देशेन यज्ञामनुतिष्ठन्तीति भावः ॥
३ *] आह चेति । लोक इति शेषः ॥
६ स्या] अन्यत् कारणं इत्यन्वयः ॥
६ *] सेवा—राजसेवा ॥

I.651/KSV कल्पयेत् ? तस्मादसत्याः चित्रादिचोदनाः, प्रत्यक्षा दिप्रमाणपरिच्छेद-योग्यार्थोपदेशित्वे सत्यपि तत्संवादशून्यत्वात्; एवंविधविप्रलंभकवाक्यवत् ॥ § 5177

## चित्रादिदृष्टान्तेन अग्निहोत्रादीनामप्यफलत्वं सिध्यति

चित्रादिवचसामेवं अपचारस्य दर्शनात् ।
अनाश्वासोऽग्निहोत्रादिचोदनास्वपि जायते ॥ ११६ ॥§ 5179

अग्निहोत्रचोदना, मिथ्या—वेदैकदेशत्वात्, चित्रादिचोदनावत् । तदत्र तावदसंवादात् अप्रामाण्यम् ॥ § 5180

एवं पुत्रकामः पुत्रेष्ट्या यजेत इत्येवमादावपि असंवादोद्रष्टव्यः ॥ § 5181

## कुत्रचित् विसंवादश्च

विसंवादोऽपि क्वचित् दृश्यते । प्रमीते यजमाने पात्रचयनाख्यं कर्मोप-दिश्य एवमादिदेश वेदः स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकमेति इति । तत्र एषः इति तावत् आत्मनो निर्देशः क्लिष्ट एव, *परोक्षत्वात्, स्फ्य-कपालादियज्ञायुधसंबन्धाभावाच्च कायस्त्वेष निर्दिश्यते, स न स्वर्गं लोकं याति—इति; तद्विपरीतभस्मीभावोपलंभादिति विसंवादः । एवञ्च असंवाद-विसंवादाभ्यां अप्रमाणं वेदः ॥ § 5182

## वेदवाक्येषु परस्परव्याहतिश्च

व्याघाताच्च—उदिते होतव्यम्, अनुदिते होतव्यम्, समयाध्युषिते होत-व्यम् इति होमकालत्रयमपि विधाय निन्दार्थवादैः तदेव निषेधति—श्यामो वा अस्याहुतिमभ्यवहरति, य उदिते जुहोति । शबलो वा अस्याहुतिमभ्य-वहरति, योऽनुदिते जुहोति । श्यामशबलावस्याहुतिमभ्यवहरतः, यः सम-याध्युषिते जुहोति ॥ § 5183

न चार्थवादमात्रमेतदिति वक्तव्यम्; यतः— § 5184

विधानं कल्प्यते स्तुत्या निन्दया च निषेधनम् ।
विधिस्तुत्योः समा वृत्तिः तथा निन्दानिषेधयोः ॥ ११७ ॥§ 5186

२३ ] कस्पतं— nyāma-wit_kha

१६ मीते ] यजमानः—आहिताग्निः । दशमे जै. सू. १० इद चिन्तितम् ॥
१८ * ] परोक्षत्वादिति । एषः इति हि प्रस्यक्षवन्निर्दिश्यते ॥

८ मा ] वृत्तिः—व्यापारः । तथा च स्तुत्या विधेः, निन्दया निषेधस्य च प्रतीतौ सिद्ध एव व्याघातः ॥

I.652/KSV

न हि निन्दा निन्दितुमुपादीयते, किन्तु निन्दितादितरत् प्रशंसितुमित्यवमपि प्रकारोऽत्र न संभवति; कालत्रयस्याप्यत्र निषेधात् कस्यान्यस्य तन्निन्दया प्रशंसा विधीयते ? तस्मात् परस्परविरुद्धार्थोपदेशलक्षणात् व्याघातात् अप्रमाणं वेदः ॥ § 5187

## पौनरुक्त्यं च वेदे दृश्यते

पौनरुक्त्याच्च—त्रिः प्रथमामन्वाह त्रिरुत्तमाम् इत्यभ्यासचोदनायां प्रथमोत्तमयोः सामिधेन्योः त्रिर्वचनात् पौनरुक्त्यम् । सकृदनुवचनेन तत्प्रयोजनसंपत्तेः अनर्थकं त्रिर्वचनम् । तस्मात् इत्थममृतव्याघातपुनरुक्तदोषकलुषितत्वात् अप्रमाणं वेदः । तदाह सूत्रकारः— § 5188

*तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः पुत्रकामेष्टिहवनाभ्यासेषुन्या. सू. १-२-५६ इति ॥ § 5189

## वेदप्रामाण्यविरोधिदोषपरिहारः

अत्र समाधिमाह— § 5190

न कर्मकर्तृसावनवैगुण्यात्न्या. सू. १-२-५७ इति ॥ § 5191

अयमाशयः—अप्रामाण्यसाधनं अनृतत्वं परैरुक्तम् । अनृतत्वे च साधनं फलादर्शनम् । एतच्चानैकान्तिकम्, अन्यथाऽपि फलादर्शनोपपत्तेः । किं वेदस्यासत्यार्थत्वादत्र फलादर्शनम् ? उत कर्त्रादिवैगुण्यात् ? इति न विशेषहेतुरस्ति ॥ § 5192

I.653/KSV

## करीर्वादौ प्रत्यक्षादेव फलनिश्चयः

ननु ! न कदाचिदपि कर्मसमनन्तरमेव फलमुपलब्धमिति, तददर्शनमेव तदनृतत्वकारणम्, न कारणवैगुण्यमिति—तदयुक्तम्— भविगुणायां कारीर्यां प्रयुक्तायां सद्य एव वृष्टेर्दर्शनात् । न च तत् काकतालीयम्; आगमेन, अन्वयव्यतिरेकाभ्यां च तत्कारणत्वदर्शनात् ॥ § 5193

---

९ ] तत्राह— nyāma-wit_kha

---

१७ *] तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः इत्येतावदेव प्रसिद्धः सूत्रपाठः ॥

८ च] तत्कारणत्वदर्शनात्, कारीर्या इति शेषः ॥

पुत्रादिस्त्वैहिकमपि फलं वस्तुस्वभावपर्यालोचनयैव न सद्यो भवितुमर्हति । न हि नभसस्तदानीमेव वृष्टिरिव निपतति पुत्रः, *स्त्रीपुससंयोगकारणान्तरसव्यपेक्षत्वात् तदुपत्तेः । पश्वादिप्राप्तिस्तु कस्यचित् अदूरकालेऽपि दृश्यते, प्रतिग्रहादिना । तथा (?)स्मत्पितामह एव ग्रामकामः सांग्रहणीं कृतवान् । स इष्टिसमाप्तिसमनन्तरमेव गौरमूलकं ग्राममवाप ॥ § 5194

## यागजन्यफलस्य दृष्टकारणकत्वं न वक्तुं शक्यम्

ननु ! एवं तर्हि प्रतिग्रहाद्येव दृष्टं कारणमस्तु पश्वादेः । पुत्रस्य च स्त्रीपुंसयोगः । किमिष्टेः कारणत्वकल्पनया ? इति— मैवं वोचः—*सत्स्वपि च दृष्टेषु कारणेषु तददर्शनात् इष्टिप्रयोगानन्तरं चैतद्दर्शनात् इष्टिकृतं स्त्रीपुंसयोगादिकारणत्वमिति निश्चीयते । किञ्च— § 5195

सेवाध्ययनकृष्यादिसाम्येऽपि फलभेदतः ।
वक्तुं न युक्ता तत्प्राप्तिः दृष्टकारणमात्रजा ॥ ११८ ॥§ 5197

I.654/KSV

* भूतस्वभाववादादि पुरस्तात् प्रतिषिध्यते ।
तस्मान्नूनमुपेतव्यं अत्रान्यदपि कारणम् ॥ ११९ ॥§ 5199

तदुक्तं—तच्चैव हि तत्र कारणम्, शब्दश्च शा. भा. १-१-५ इति ॥ § 5200

## फलादर्शनस्थले प्रतिबन्धकं उह्यते

यत्र पुनः अविगुणेऽपि कर्मणि प्रयुज्यमाने कालान्तरेऽपि पुत्रपश्वादिफलं न दृश्यते, तत्र तीव्रं किमपि प्राक्तनं कर्म प्रतिबन्धकं कल्पनीयम् । यथोक्तम् श्लो. वा. १-१-५ चित्रा. परि.— § 5201

---

७ ] उत्पत्तेः— nyāma-wit_ka
७ ] उत्तर— nyāma-wit_kha
११ ] पुंयोगः— nyāma-wit_ka
१३ ] मिति— nyāma-wit_ka
१४ ] कृष्यध्ययनादि— nyāma-wit_ka

---

१० *] स्त्रीपुंसेति । अचतुरविचतुरस्त्रीपुंस इति निपातः ॥
१३ वाप] ग्राममवाप, प्रतिग्रहादिति शेषः । गौरमूलमिति ग्रामनाम ॥
१५ *] सत्स्वपीति । इष्ट्यनुष्ठानपर्यन्तं यानि कारणानि दृष्टान्यासन्, तैः फलादर्शनात्, इष्ट्यनुष्ठानानन्तरं तैरेव फलदर्शनाच्च प्रतिग्रहस्थले इष्टिकृतः ग्रामदातुः तादृशबुद्धिसंयोग इत्येव वक्तव्यमित्यर्थः ॥
१६ नात्] इष्टिकृतं—इष्टिसमनन्तरकृतम् ॥
१ *] भूतस्वभाववादः—वस्तुस्वभाववादः—कार्याकस्मिकतावादः ॥
३ हि] तत्र—कालान्तरीणपश्वादिफले चित्रैव कारणम्; चित्राविधिरेवात्र प्रमाणमित्यर्थः ॥

फलति यदि न सर्वं तत्कदाचित्तदेव
ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते इति ॥§ 5203

* कर्मादिवैगुण्यग्रहणमुपलक्षणार्थं ऋषिणा प्रयुक्तम् । न तु वेदस्याप्रामाण्यकल्पना साध्वी, साद्गुण्ये कर्मणः प्राचुर्येण फलदर्शनात् ॥ § 5204

अपि च—चित्रातः पशवो भवन्ति—इत्येतावानेव शास्त्रार्थः । * आनन्तर्ये तु न किञ्चित्प्रमाणमस्ति । तदयं प्रत्यक्षादिविसंवादः आनन्तर्यविषयः । चित्रादिचोदना तु अनिर्दिष्टकालविशेषविषयेति विषयभेदान्न सा तेन बाध्यते । तदाह भट्टः श्लो. वा. १-१-५ चित्रा. परि. ४— § 5205

आनन्तर्यविसंवादः नाविशेषप्रवर्तिनीम् ।
चोदनां बाधितुं शक्तः स्फुटाद्विषयभेदतः इति ॥§ 5207

I.655/KSV

## क्रियाफलविधिफलयोर्विशेषः

यत्तु कर्मस्वभावपर्यालोचनया चित्रादेरनन्तरफलत्वमुक्तं, यत्कालं हि मर्दवं, तत्कालं मर्दनसुखमिति—तदेतदत्यन्तमनभिज्ञस्याभिधानम्—विधिफलानां क्रियाफलतुल्यत्वानुपपत्तेः । इह किञ्चित् विधिफलं भवति, किञ्चित् क्रियाफलम् । कृष्यादौ तु भूमिपाटनादि क्रियाफलम्; सस्यसम्पत्तिस्तु विधिफलम् ॥ § 5208

---

७ ] संवादः— nyāma-wit_kha
९ ] मानन्तर्याद्य— nyāma-wit_kha
१ ] पाटबादि— nyāma-wit_kha

---

८ *] ननु अनृतदोषे आपादिते कर्मवैगुण्यादिकथनेन किं साधितम् ? पूर्वपक्षोक्तवैफल्यमङ्गीकृतमेव खल्विति शङ्कायामाह—कर्मादीति । कस्यार्थस्योपलक्षणमित्यत्राह—न त्वित्यादि । अनुपदोक्तप्रतिबन्धकदृष्ट्या प्राचुर्येणेति ॥
१० *] आनन्तर्ये—समनन्तरभावित्वे । तेन—प्रत्यक्षविसंवादेन ॥
१ त्तु] कर्मस्वभावः—कर्मणां समनन्तरफलकत्वस्वभावः मर्दनादौ दृष्टः ॥
४ तु] भूमिपाटनादीति । कृषधातुर्हि कर्षणार्थः । यदि च यावद्धान्यप्राप्ति व्यापार एव कृषिपदार्थः, पाकादिवत् पु. ५०, तदा फलमपि दृश्यत एव । तथा च विधिः—परमापूर्वतुल्यः प्रकृते । न हि पाको नाम एका क्रिया, किन्तु क्रियासमुदायः ॥

कः पुनः कृष्यादौ विधिः ? अस्ति वार्ताविद्यायां, वृद्धोपदेशो वा कश्चिद्विधिः । अन्वयव्यतिरेकौ वा तत्र विधिस्थानीयौ भविष्यतः ॥ § 5209

लोकेऽपि वेतनकामः पचति इत्यादौ पाकक्रियाफलं ओदनः, विधिफलं तु वेतनम् । तत्र क्रियाफलानामेवैष नियमः, यत् क्रियानन्तरभावित्वम् । विधिफलानां तु वेतनादीनां नास्ति कालनियमः । इष्टावपि हविर्षिकारादि क्रियाफलं सद्यो भवत्येव । पशुपुत्रादि तु विधिफलं अनवच्छिन्नकालम् । अत एव मर्दनसुखं क्रियाफलमिति सद्यो भवति । मृद्गतस्तु पुंसः सेवाफलमनियतकालम् ॥ § 5210

ग्रामकामो महीपालं सेवेतेत्येवमादिषु ।
लौकिकेषु विधिष्वस्ति न कालनियमः फले ॥ १२० ॥§ 5212

आयुर्वेदोपदिष्टानामप्यौषधविधीनां न क्रियावत् सद्य एव फलदर्शनम् । अपि तु कालापेक्षमेवेति न फलानन्तर्ये किञ्चित्प्रमाणम् ॥ § 5213
I.656/KSV

## पुरुषेच्छानुगुणा फलसिद्धिर्न भवति

यत्तु पशुविरहकृतकदशनादिदोदूयमानाधिकारिस्वरूपपर्यालोचनया सद्यःफलत्वमुच्यते—तदपि न सांप्रतम्—पुरुषेच्छामात्रमेतत्, न प्रमाणवृत्तम् ॥ § 5214

## ऐहिकानामपि फलानां न क्रियासमनन्तरभावित्वनियमः

अपि च ऐहिकत्वं फलस्य तावता सेत्स्यति; न पुनः क्रियाफलवत् सद्यस्त्वम् । सन्ति चैहिकफलान्यपि कालान्तरसव्यपेक्षाणि कर्माणि । यथा—ब्रह्मवर्वसकामस्य कार्यं विप्रस्य पञ्चमे इति । न तत्र पञ्चमवर्षे उपनीतमात्र एव माणवकः ब्रह्मवर्चससंपन्नो भवति, कालान्तरे तु भवतीति । एवं वीर्यकामादिष्वपि द्रष्टव्यम् । तस्मात् विधिफलानां आनन्तर्यनियमाभावात् न तद्विसंवादो दोषाय । कालान्तरेऽपि यत्र फलादर्शनं, तत्र क्रियावैगुण्यकर्मान्तरप्रतिबन्धादि कारणमित्युक्तम् ॥ § 5215

---

३ ] पदेशो— nyāma-wit__kha
४ ] न तत्र— nyāma-wit__ka
६ ] फलाक्रियाना— nyāma-wit__ka
८--९ ] भवति— nyāma-wit__kha
१० ] फलम्— nyāma-wit__kha
१५ ] कृतकदशनादि दोष— nyāma-wit__ka

---

८ लोकेऽपि ] वेतनमिति । तदुद्देशेनैव पाककरणात् । भोजनोद्देशेन करणे तु भोजनमेव विधिफलम् ॥
१८ त्तु ] पशुविरहेति । पश्वभावकृतं यत् कदशनं-कुत्सितं अशनं—कदन्नं, तेन दूयमानः चित्रेष्ट्यधिकारी । दधिक्षीराद्यभावेन समीचीनभोजनाभावखिन्नमनसः पश्वर्थं चित्रायां प्रवृत्तिः ॥
५ एवं ] वीर्यकामादिष्विति । राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे इति मनुः २-३७ । ईहा—कृष्यादिव्यापारः वैश्यधर्मः ॥

## मीमांसकोक्तानृतत्वपरिहारक्रमः

अन्ये कर्त्रादिवैगुण्यकल्पनाननुमोदिनः ।
इहाफलस्य चित्रादेः फलमामुत्रिकं जगुः ॥ १२१ ॥§ 5217

सर्वाङ्गोपसंहारेण काम्यकर्मप्रयोगात् कोऽवसरः कर्मवैगुण्यकल्पनायाम् ? जन्मान्तरे तु तत्फलमिति युक्ता कल्पना ॥ § 5218

## फलकालभेदात् कर्मणां त्रिविधत्वम्

तथा च त्रिविधं कर्म—किञ्चिदैहिकफलमेव, किञ्चिदामुष्मिकफलमेव, किञ्चिदनियतफलमेव—इहामुत्र वा तत्फलप्रदम्—इति कल्पना ॥ § 5219

I.657/KSV

तत्र कारीर्यादि तावत् ऐहिकफलमेव । तद्धि सकलजनपदसन्तापकारिणि महत्यवग्रहे प्रस्तूयते । वृष्टिलक्षणं च तत्फलं स्वभावत एव सकललोकसाधारणम् । आसन्नतयैव तदभिलषणीयमिति सद्य एव भवितुमर्हति । वचनानि च तत्र तादृंश्येव दृश्यन्ते—यदि वर्षेत्, तावत्येवेष्टिं समापयेत् । यदि न वर्षेत् श्वोभूते जुहुयात्—इति ॥ § 5220

आमुष्मिकफलं तु कर्म ज्योतिष्टोमादि फलस्वभावमहिम्नैव पारलौकिकं भवति ॥ § 5221

स्वर्गो निरुपमा प्रीतिः देशो वा तद्विशेषणः ।
भोक्तुं नोभयथाऽप्येषः देहेनानेन शक्यते ॥ १२२ ॥§ 5223

चित्रादि तु अनियतफलं कर्म, तत्फलस्य पश्वादेः इह वा परत्र वा लोके सम्भवात् ॥ § 5224

## चित्रादीनां जन्मान्तरीयपश्वादिफलकत्वं युक्तमेव

अवश्यं चैतदेवं विज्ञेयम् । तथाहि—अकृतचित्रायागानामपि इह जन्मनि पशवो दृश्यन्ते । ते परिदृश्यमानसेवाप्रतिग्रहादिकारणका एवेति कथ्यमाने कर्मनिमित्तत्वहानेः बृहस्पतिमतानुप्रवेशप्रसङ्गः । कर्मनिमित्तकत्वे तु तेषां पशूनामुपपादकं किं कर्म ? इति निरूपणीयम् । न हि ब्रह्मवर्च-

११ ] (?)— nyāma-wit_kha
१२--१३ ] किञ्चिदनियतफलमेव
किञ्चिदामुष्मिकफलमेव—
nyāma-wit_kha

१५ एव ] सकललोकेति । तत्कर्तृमात्रस्य वृष्टिफलभाक्त्वाभावात् जन्मान्तरीयं वृष्ट्यादि फलं न कल्पयितुं शक्यमित्यर्थः ॥
६ माने ] कर्म—प्राचीनं कर्मा परिदृश्यमानसेवादिमात्रफलकत्वे सर्वत्रैवं प्राचीनकर्मापलापसंभवेन चार्वाकमतप्रवेशः स्यात् ॥

सादिफलात् कर्मणः पशवो निष्पद्यन्ते । चित्रा च पशुफला इह जन्मनि तैर्न कृतैव । पूर्वजन्मकृता तु तस्मिन्नेव जन्मनि फलं दत्तवतीति नियतैहिकफलाभ्युपगमादिति कुतः पशुसंपत् ? § 5225

## ज्योतिष्टोमादिकर्मशेषफलत्वं ऐहिकपश्वादीनां न युक्तम्

I.658/KSV ननु ! गौतमवचनप्रामाण्यात् पूर्वकृतभुक्तशिष्टज्योतिष्टोमादि कर्मनिमित्तकः स पशुलाभो भविष्यति । यथोक्तम्—*वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय पतन्तः ततश्शेषेण *विशिष्टदेशश्रुतवृत्तवित्तादियुक्तं जन्म प्रतिपद्यन्ते गौ-ध-सू-११-३१ । नैतत् यथाश्रुतं बोद्धुं युक्तम्— § 5226

न ह्यन्यफलकं कर्म दातुमीष्टे फलान्तरम् ।
साध्यसाधनभावो हि नियतः फलकर्मणाम् ॥ १२३ ॥§ 5228

तस्मात् समूहापेक्षा शेषवाचोयुक्तिर्व्याख्येया—बहूनि हि कर्माणि वर्णा आश्रमाश्च कृतवन्तः । ततः कर्मसमूहात् ज्योतिष्टोमादिफलं प्रेत्यानुभूयते । ततः शेषेण चित्रादिना कर्मणा विशिष्टं जन्म प्रतिपद्यन्त इत्यर्थः । तस्मात् पूर्वजन्मकृतचित्रादिनिबन्धनः इह जन्मनि पशुलाभः, नाकर्मनिमित्तकः, नान्यकर्मनिमित्तक इत्येवमनियतफलत्वात् चित्रादेरिह जन्मनि फलादर्शनेऽपि नानृतत्वं तच्चोदनानाम्, जन्मान्तरे हि ता इष्टयः फलं दास्यन्तीति ॥ § 5229

## पूर्वोक्तकर्मत्रैविध्यासंभवसिद्धान्तः

अत्रोच्यते—किं वाचनिकमेतत् कर्मणां त्रैविध्यम् ? उत पुरुषेच्छाधीनम् ? इति ॥ § 5230

तत्र वचनं तावत् त्रिविधविभागप्रतिपादकं नास्ति— कारीरीं निर्वपेत् वृष्टिकामः, ज्योतिष्टोमेन स्वर्गकामो यजेत, *चित्रया पशुकामः इत्येतावन्मात्रश्रवणम् । न ह्यत्र ऐहिकत्वं, पारलौकिकत्वं, अनियतत्वं वा क्वचित् फलस्य पठितम् ॥ § 5231

---

१ ] पशुलाभो— nyāma-wit__kha

१ ] वर्णाश्रमाश्च— nyāma-wit__kha

१० ] फल— nyāma-wit__kha

१० ] शेषेण— nyāma-wit__kha

१४ ] बहूनि— nyāma-wit__kha

४ ] यजेतेति— nyāma-wit__kha

६ ] पठितव्यम्— nyāma-wit__kha

---

१२ *] वर्णा आश्रमाश्च—अर्शआद्यजन्तः—तत्तद्वर्णिनः, तत्तदाश्रमिणश्च । एवमुत्तरत्रापि ॥

१३ *] विशिष्टेति—उत्तमेति यावत् ॥

४ *] चित्रयेति । यजेतेत्यस्यानुवृत्तिः । विधिसच्छायानि ग्रन्थकर्तुरेवेमानि वाक्यानि ॥

I.659/KSV

* विधिवृत्तमपि इयदेव—यत् सप्रत्ययप्रवर्तनं नाम। तत्र इदमेवंकामेन कर्तव्यमित्येतावान् लिङर्थः । *अपुरुषार्थरूपे तु व्यापारे प्रवर्तकत्वलक्षणस्वव्यापारनिर्वहणमनधिगच्छन् विधिः *अधिकारिविशेषणस्य कामस्य, काम्यमानस्य स्वर्गादेः, भावार्थस्य च यागादेः साध्यसाधनसम्बन्धमेव अवबोधयति; न काम्यमानस्य सद्यः, कालान्तरे वा निष्पत्तिमाक्षिपतीति ॥
§ 5232

फलस्वरूपपर्यालोचनया तु सत्यं स्वर्गस्य पारलौकिकत्वमवगम्यते, न तु पश्वादेरनियमः ॥ § 5233

पुरुषेच्छा तु पुरुषेच्छैव, न तया शास्त्रार्थो व्यवस्थापयितुं शक्यः । तस्मात् निष्प्रमाणकं त्रैविध्यम् ॥ § 5234

## चित्रायाः फलकालानियमे कारीर्या अपि तथैव स्यात्

यस्तु चित्रादीनामनियतफलत्वे न्याय उक्तः श्लो-वा-१-१-५चित्रा-परि-१५

चित्रादीनां फलं तावत् क्षीणं तत्रैव जन्मनि§ 5236
इत्यादिः—स कारीर्यामपि निश्चितैहिकफलायां योजयितुं शक्यः ॥
§ 5237

अद्याकृतायां कारीर्या न हि देवो न वर्षति ।
जन्मान्तरकृता तत्र कारीरी किं न कारणम् ? ॥ १२४
॥§ 5239

I.660/KSV

* तस्मात् साऽप्यनियतफला भवतु ॥ § 5240

## चित्राकारीर्योः न कश्चन विशेषः

७ ] सत्प्रत्यय— nyāma-wit_kha
९ ] विशेषणस्य— nyāma-wit_kha
१०--११ ] सम्बन्धमाक्षिपति— nyāma-wit_kha
१४ ] नियमः— nyāma-wit_kha
२ ] कारीरी किं नु— nyāma-wit_ka

७ *] विधिवृत्तं—विधेः स्वभावः ॥
७ त्] सप्रत्ययं—सश्रद्धम् ॥
८ *] अपुरुषार्थेति । पुरुषार्थपर्यवसायि हि शास्त्रम् । शास्त्रं—शासनं, विधिरेव ॥
९ *] अधिकारिविशेषणं—कामनावतः अधिकारे कामना तत्र विशेषणम् ॥
१८ त्] क्षीणं, तज्जन्मनियतफलकत्वे इति शेषः । तथा च इदानीमकृतचित्राणामपि पशुदर्शनात् पूर्वजन्मन्यदत्तफलं चित्रादि कल्प्यमिति तस्या अनियतकालफलकत्वसिद्धिरित्यर्थः ॥
५ *] तस्मात्—तुल्यन्यायत्वात् ॥
५ स्मात्] सापि—कारीर्यपि ।

* अथ सस्यसंपत्संपाद्यसुखसंभोगसाधनभूतादृष्टनिमित्ता वृष्टिः अद्याकृतायामपि कारीर्यामिति मन्यसे; तर्हि दधिक्षीरादिभक्षणसुखाक्षेपिकर्मनिमित्तकः पशुलाभो भविष्यति अकृतचित्रायागानाम् । *कारीर्यधीन ओदनः, चित्राधीनं दधीति, दध्योदनभोजनसुखसाधनादृष्टकारिता पशुवृष्टिसृष्टिर्भवतु ॥ § 5241

## चित्राकारीर्योः वैलक्षण्यशङ्का, समाधानं च

अथ शृङ्गग्राहिकया पशुफला चित्रेष्टिरुपदिश्यते, तेन न सुखसामान्याक्षेपककर्मनिबन्धनः पशुलाभः; एवं तर्हि वृष्टावपि शृङ्गग्राहिकया कारीरी पठ्यत एवेति वृष्टिरपि सामान्यादृष्टनिबन्धना मा भूत् ॥ § 5242

## कारीरीष्टेः नियतकालत्वेऽपि सर्वेषां तथा न वक्तुं शक्यम्

अथ न यदि वर्षेत्, श्वोभूते जुहुयात् इत्यादिवचनपर्यालोचनया त-
स्यामैहिकफलत्वमुच्यते; यद्येवं यत्र तादृशं वचनं नास्ति यो वृष्टिकामः स
सौभरेण स्तुवीत ता. ब्रा. ८-८-१८ (?')यदि कामयेत वर्षुकः पर्ज- I.661/KSV
न्यः स्यादिति(?') * नीचैः सदो मिनुयात् मै. सं. ३-८-९ इत्यादौ, तत्र पारलौकिकफलत्वं स्यात् । * यदि च श्वोभूते जुहुयात् इति वचनमहिम्नैव फले सद्यस्त्वमात्रमधिकं, भवतु, *न तु तादृशवचनरहितानां कर्मणां विस्पष्टसिद्धमप्यैहिकफलत्वं निवर्तते ॥ § 5243

## बहुसाधारणत्वमपि वृष्टिपश्वोः समानम्

४ ] कारीरीष्टिः— nyāma-wit__kha
७ ] चित्रादीनां— nyāma-wit__kha
१० ] क्षेपकर्म— nyāma-wit__kha
२ ] भवतु— nyāma-wit__kha

६ *] वृष्टेः अदृष्टविशेषवशाल्लाभो वक्तुं शक्यते, वृष्टेः देशसामान्यफलत्वात् । चित्रा तु न तथेति शङ्कते—अथेति ॥
७ ण] सुखाक्षेपीति । तादृशसुखान्यथानुपपत्तिप्राप्तेति यावत् । सुखप्रापकेति वा ॥
८ *] किमुत ! एकादृष्टाधीनत्वमपि पशुवृष्ट्योर्भवितुमर्हतीत्याह—कारीरीति । कारीरीसाध्यः यः ओदनः, स इत्यर्थः । एवमुत्तरत्रापि ॥
११ अथ] शृङ्गग्राहिकया—ऐदंपर्येण ॥
४ *] नीचैर्मिनुयात्—किञ्चिन्नीचैःप्रमाणकं कुर्यात् ॥
५ *] यदि च इत्यादिः यदि न वर्षेत् इत्यादिः पूर्वोक्तवाक्यस्य पु. ६५७ स्वकल्पितः संग्रहः । एवमुत्तरत्रापि यथायथं ग्राह्यम् ॥
६ *] सद्यस्त्वमात्र इत्यत्र मात्रपदार्थस्यैव विवरणं—न त्वित्यादि । कारीर्यां परं यागसमनन्तरमेव वृष्टिरिति वचनबलात् भवतु । परं तु तादृशवचनाभावमात्रात् चित्रादीनां अनियतफलकत्वं तु न कल्पयितुं शक्यमित्यर्थः ॥

यत्पुनः बहुसाधारणत्वेन वृष्टेरैहिकत्वमुच्यते—तदपि पश्वादौ समानम्—न ह्यात्मम्भरिरेव यजमानो भवति; तस्यापि * स्ववासिनीकुमारातिथिभृत्यादिभोजनपूर्वकस्वभोजननियमोपदेशात्। बहुतरोपकारकत्वं तु वृष्टेरित्यलं तुलया ॥ § 5244

## प्रत्यासन्नत्वमपि फलद्वयस्य समानम्

यदपि प्रत्यासन्नत्वेन काम्यमानत्वात् वृष्टेरैहिकत्वं कथ्यते— तदपि तादृगेव—पश्वादेरपि तथैव काम्यमानत्वात् । तत्रावग्रह विहितसन्तापतया प्रत्यासन्नत्वेन वृष्टिरभिलष्यते; इहापि दौर्गत्यो द्वेगात् आसन्नतयैव पशवः I.662/KSV
काम्यन्ते। तस्मात् वारिदः तृप्तिमाप्नोति सुखमक्षयमन्नदः इत्यादिवचनोपदिष्टसामान्यसुखसाधनादृष्टनिबन्धनैवेयं इहाकृतकर्मणां वृष्टिपश्वादिसंपत्तिरिति न बृहस्पतिमतवत् अकर्मनिमित्तं फलम् । *नापि कर्मफलसाध्यसाधनभावनियमव्यबहारोल्लङ्घनमिति ॥ § 5245

## कारीर्या अपि अनियतकालफलकत्वमेव

यच्च कारीर्याः क्वचित्फलविसंवादे समाधानमुक्तं श्लो-वा-चित्रापरि-१-१-५— § 5246

फलति यदि न सर्वं तत्कदाचित्तदेव
ध्रुवमपरमभुक्तं कर्म शास्त्रीयमास्ते इति § 5248

तेन साऽप्यनियतफलैव स्यात्। न हि तत्कर्मान्तरं *आसंसारं प्रतिबन्धकं भवति । फलोपभोगाद्धि तस्यावश्यं क्षयेण भवितव्यम् । प्रतिबन्धके च क्षीणे कारीर्या स्वफलं तदा दातव्यमेव । साऽप्यदत्तफला न क्षीयत एवेत्येवं जन्मान्तरे तत्फलसंभवात् तस्या अपि अनियतफलत्वम् ॥ § 5249

---

५--६ ] स्ववासिनः— nyāma-wit_ka
८ ] रैहिककारित्वं— nyāma-wit_ka
१२ ] संपदिति— nyāma-wit_kha
६ ] तस्या— nyāma-wit_kha

---

९ रिरेव ] यजमानः—चित्रायजमानः ॥
९ *] स्ववासिनी—चिरण्टी तु स्ववासिनी—माप्तयौवना पितृगेहस्था कन्या ॥
१० क ] नियमोपदेशात्—एकः स्वादु न भुञ्जीत, पुत्रैदरिश्च भृत्यैश्च स्वगृहे परिवारितः । स एको मृष्टमश्न(?)तु रा. . ७५-३४
इति एकाकिभोजननिषेधो दृश्यते ॥
१७ *] न ह्यन्यफलकं कर्मपु. ६५८ इत्यादेः समाधानं—नापीति ॥
३ *] आसंसारं—आप्रलयमिति यावत् । तदा—प्रतिबन्धकक्षये ॥

अनेन च प्रकारेण चित्रादेरप्यनियतफलत्वं अस्माभिरिष्यत एव, यत्र सम्यक्प्रयुक्तायामपीष्टौ कर्मान्तरप्रतिबन्धादेव पशूनामनुपलम्भः कल्प्यते । *सर्वथा सद्यःफलत्वमात्रवर्जं समानयोगक्षेमा कारीर्या चित्रेष्टिः ॥ § 5250

## ऐहिकफलानां सर्वेषामप्यनियतकालफलकत्वमेव

एतेन ब्रह्मवर्चसवीर्यान्नाद्यग्रामादिकामेष्टयोऽपि व्याख्याताः । तस्मात् यथाश्रुतं गौतमं बोद्धव्यम् ॥ § 5251

I.663/KSV

## समग्राङ्गोपसंहारेऽपि कर्मणां वैगुण्यसंभवः

यदप्यभ्यधायि—समग्राङ्गोपसंहारेण काम्यकर्मप्रयोगात् कुतः कर्मणो वैगुण्यावसर इति—तदप्यसारम्—सर्वाङ्गोपसंहारेण प्रवृत्तावपि प्रमादात् असंवेद्यमानवैगुण्यसंभवात् । स च विचित्रः *भाष्यकारेण प्रदर्शितः । * तस्मात् पूर्वोक्त पु. ६५२ एव प्रतिसमाधानमार्गः श्रेयान् ॥ § 5252

## सिद्धान्ते धर्माधर्मस्वरूपनिर्णयः

यत्पुनः पूर्वपाक्षिकेण कथितम्—कालान्तरे कर्माभावात् कुतः फलमिति पु. ६५०—तदपि न सम्यक्— § 5253

यद्यप्याफलनिष्पत्तेः कर्मणो नास्त्यवस्थितिः ।
तथाप्यस्त्येव संस्कारः पुरुषस्य तदाहितः ॥ १२५ ॥§ 5255

कर्मजन्यो हि संस्कारः पुंसो बुद्ध्यादिवद्गुणः ।
तस्य चाफलसंयोगात् अवस्थितिरुपेयते ॥ १२६ ॥§ 5257

यथेन्द्रियादिसंयोगात् आत्मनो बुद्धिसंभवः ।
तथा यागादिकर्मभ्यः तस्य संस्कारसंभवः ॥ १२७ ॥§ 5259

---

९ *] सर्वथेत्यादि—कारीरी सद्यः फलप्रदा, चित्रा तु अन्ततः एतज्जन्मनि इत्येतावानेव विशेषः, न तु अनियतफलत्वादिकमित्यर्थः ॥
१० स्मात्] यथाश्रुतं—अक्षोदक्षमम् । जन्मान्तरकृतचित्रादिभिरेव तत्तत्फललाभादिति हेतुः । गौतमसूत्रे कर्मपदं कर्मसामान्यपरमिति वा ॥
१४ *] भाष्यकारेणेति । कर्मवैगुण्यं—समीहाभ्रेषः । कर्तृवैगुण्यं—अविद्वान् प्रयोक्ता, कपूयाचरणश्च । साधनवैगुण्यं—हविरसंस्कृतम् न्या-भा२-१-५९ इत्यादिष्विति शेषः ॥
१५ *] ननु चित्राया अनियतफलत्वनिराकरणे तदनृतत्वं कथं परिहरणीयमित्यत्राह—तस्मादिति ॥
६ स्य] आफलसंयोगात्—इति पदम् ॥

बुद्धिस्तु भङ्गुरा तस्य संस्कारस्तु फलावधिः ।
साध्यसाधनभावो हि नान्यथा फलकर्मणोः ॥ १२८ ॥§ 5261

स्मृतिबीजं तु संस्कारः तस्यान्यैरपि मृष्यते ।
तथैव फलसंयोगबीजं सोऽस्य भविष्यति ॥ १२९ ॥§ 5263

I.664/KSV

* स यागदानहोमादिजन्यो धर्मगिरोच्यते ।
ब्रह्महत्यादिजन्यस्तु सोऽधर्म इति कथ्यते ॥ १३० ॥§ 5265

## इतरदार्शनिकरीत्या धर्माधर्मस्वरूपम्

कापिलास्तु अन्तःकरणस्य बुद्धेः वृत्तिविशेषं धर्ममाहुः । आर्हताः पुण्य-पुद्गलान् धर्मत्वेन व्यपदिशन्ति । शाक्यभिक्षवः चित्तवासनां धर्ममाचक्षते । * वृद्धमीमांसकाः यागादिकर्मनिर्वर्त्यं अपूर्वं नाम धर्ममभिवदन्ति । यागादिक-मेैव शाबरा ब्रुवते । वाक्यार्थ एव नियोगात्मा अपूर्वशब्दवाच्यः, धर्मशब्देन च स एवोच्यते इति प्राभाकराः कथयन्ति ॥ § 5266

## पुद्गलादिवादानां असामञ्जस्यम्

तत्र पुण्यपुद्गल-वृत्तिपक्षयोः कपिलार्हद्ग्रन्थकथितयोः तन्मतनिरासादेव निरासः ॥ § 5267

आत्मनश्च समर्थयिष्यमाणत्वात् तस्यैव वासना, न चेतस इति सौग-तपक्षोऽप्ययुक्तः ॥ § 5268

स्वर्गयागान्तरालवर्तिनश्चस्थिरस्य निराधारस्यापूर्वस्य निष्प्रमाणकत्वात् जरज्जैमिनीयप्रवादोऽप्यपेशलः । अपि च फलस्य वा काचिदुत्पत्स्यमानदशा, यागस्य वा शक्तिः अपूर्वशब्देनोच्यते ॥ § 5269

I.665/KSV

---

६--७ ] अपि च—
nyāma-wit_ga

---

११ संस्कारः ] तस्य—आत्मनः ॥
१३ *] सः—संस्कारः ॥
१६ *] वृद्धमीमांसकाः—जैमिनिप्रमुखाः ॥
१८ मैव ] शाबरा इति ।
द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते श्लो. वा. १-९-२-१३ इति वार्तिकम् ॥
१९ इति ] प्राभाकराः—प्रकरणपञ्चिकायां वाक्यार्थमातृकाप्रकरणे विस्तरेणेदं निरूपितम् ॥
५ स्य ] निराधार इति । अपूर्वः खलु नात्मधर्मस्तन्मते । आत्मधर्मत्वे तु अस्मत्सिद्धान्त एव । अपूर्वं स्वतंत्रमेव तन्मते । एतदेवोपपादयत्यनन्तरवाक्येन ॥
६ काचि ] उत्पत्स्यमानदशा—नैयायिकानां प्रागभाव एव सः ॥

न च नियोगः वाक्यार्थ एव अपूर्वशब्दवाच्यः; तस्योपरिष्टादपाकरिष्यमाणत्वात् ५ आह्निके ॥ § 5270

नापि—यो यागमनुतिष्ठति, तं धार्मिक इत्याचक्षत इति यागादिसामानाधिकरण्येन प्रयोगात् स एव धर्मशब्दवाच्य इति युक्तं वक्तुं; तस्य क्षणिकत्वेन कालान्तरे फलदातृत्वानुपपत्तेः । सामानाधिकरण्यप्रयोगोऽपि चैकान्ततो नास्त्येव ॥ § 5271

यागदानादिना धर्मो भवतीत्यपि लौकिकाः ।
प्रयोगाः सन्ति ते चामी संस्क्रियापक्षसाक्षिणः ॥ १३१ ॥§ 5273

एवं यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् तै. सं. ३-५-३६ इति वैदिकोऽपि प्रयोगः तद्विषय एव व्याख्येयः; तस्य स्थायित्वेन कालान्तरे फलदानयोग्यतोपपत्तेः ॥ § 5274

संस्कारो नृगुणः स्थायी तस्माद्धर्म इति स्थितम् ।
तस्माच्च फलनिष्पत्तेः न चित्रादौ मृषार्थता ॥ १३२ ॥§ 5276

## यज्ञायुधिवाक्ये विसंवादपरिहारः

यदपि यज्ञायुधिवाक्ये प्रत्यक्षविरुद्धत्वमुपपाद्यते स्म—भस्मीभावोपलम्भात् कायस्येति पु. ६५१—तदप्यसमीचीनम्—एष इति शरीराभेदोपचारेण आत्मन एव निर्देशात् । तस्य च स्वर्गगमनं भवत्येव । गमनं च तदुपभोग एव तस्योच्यते—यथा शरीरादियोगवियोगौ जन्ममरणे इति । न तु व्यापिनः परिस्पन्दात्मकक्रियायोग उपपद्यते । *ज्ञानचिकीर्षाप्रयत्नसमवायश्च तस्य कर्तृत्वमिति वर्णयिष्यते ९ आह्निके । यज्ञायुधसम्बन्धोऽपि स्वस्वामिभावादिः तस्यैव व्यापकत्वाविशेषेऽपि व्यवस्थयोपपद्यत इति न I.666/KSV
कश्चिदत्र विरोधः । तस्मात् सर्वत्र निरवकाशमनृतत्वादिदूषणम् ॥ § 5277

## हवनवाक्यविरोधपरिहारः

योऽपि हवनकालविधौ व्याघातदोषो दर्शितः पु. ६५१— सोऽपि न दोष एव ॥ § 5278

८ ] न चानियोगः—
nyāma-wit_kha

१७ योगः ] तद्विषयः—स्थायिसंस्कारविषयः । तथा च तादृशधर्मसाधनत्वात् यज्ञादीनामपि धर्मत्वव्यपदेश इत्याशयः ॥
१ *] ननु यदि आत्मनः क्रियैव नास्ति, तर्हि कथं करोतीत्यादिव्यपदेश इत्यत्राह—ज्ञानेति ॥
३ त्वाविशेषेऽपि ] व्यवस्थया—तत्तद्धर्माधर्माधीनयेति शेषः ॥

तत्रानुष्ठानभेदेन कालत्रितयचोदना ।
यो यस्य चोदितः कालः लङ्घनीयो न तेन सः ॥ १३३ ॥§ 5280

ततश्चान्यतमं कालं अभ्युपेत्यैनमुज्झतः ।
निन्देति न विरोधोऽत्र कश्चिद्विधिनिषेधयोः ॥ १३४ ॥§ 5282

## पुनरुक्तदोषपरिहारः

अभ्यासे पौनरुक्त्यं च कार्यार्थत्वाददूषणम् ।
संपाद्यं पाञ्चदश्यं हि सामिधेनीषु चोदितम् ॥ १३५ ॥§ 5284

इममहं पञ्चदशारेण वज्रेणापबाधे योऽस्मान् द्वेष्टि यं च वयं द्विष्मः इति श्रूयते । एकादशसामिधेन्य ऋचस्तु पठ्यन्ते । तत्राभ्यासमन्तरेण पाञ्चदश्यं नावकल्पत इत्येवमवश्यकर्तव्योऽभ्यासः । स चायमनियमेन प्राप्तः वचनेन नियम्यते—प्रथमोत्तमे ऋचौ त्रिरुच्चारणीये—इति । तस्मात् तत्प्रयोजनार्थत्वात् न पुनरुक्ततादोषः ॥ § 5285
I.667/KSV

अभ्यासे फलरहिते हि पौनरुक्त्यं
दोषः स्यादिह तु न तस्य निष्फलत्वम् ।
व्याघातानृतपुनरुक्ततादि तस्मात्
वेदस्य श्लथयति न प्रमाणभावम् ॥ १३६ ॥§ 5289

इयं च वाक्यार्थविचारणाऽपि प्रामाण्यसिध्यौपयिकीति मत्वा ।
चक्रे स्वशास्त्रे मुनिनेह वेदप्रामाण्यनिर्वाहणदीक्षितेन ॥ १३७ ॥§ 5291

## अर्थवादवाक्यानामप्रामाण्याक्षेपः

---

७ ] चोदनात्— nyāma-wit_kha

---

७ भेदेन ] अनुष्ठानभेदेनेति । न ह्येकोद्देशेन वाक्यत्रयं प्रवृत्तम्, किन्तु अधिकारिभेदेन । अतो न विरोध इत्यर्थः ॥
१६ प्राप्तः ] वचनेन—त्रिः प्रथमामन्वाह त्रिरुत्तमाम् इति वचनेन । तथा च पञ्चदशत्वं प्राप्तं, तस्य च शत्रुनाशकत्वात् पञ्चदशारेण वज्रेण इत्युक्तिः । इदं च
१०-५-८ अधिकरणे चिन्तितम् ॥
१८ अभ्यासे ] फलरहित इति । लोकेऽपि हि त्वरादिविवक्षया गच्छ गच्छ इत्याद्यभ्यासो दृश्यते ॥
५ शास्त्रे ] मुनिना—गौतमेन । सूत्राणि च पूर्वमेव प्रदर्शितानि ॥

* ननु ! नाद्यापि वेदस्य भवद्भिर्निपुणैरपि ।
स्वदेहसंभवा दोषाः निखिलाः परिपिञ्जिताः ॥ १३८ ॥§ 5293

तथाहि—सोऽरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वम् तै. सं. १-५-१, प्रजापतिरात्मनो वपामुदक्खिदत् । तामग्नौ प्रागृह्णात् । ततोऽजस्तूपर उदगात् तै. सं. २-१-१, देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् तै. सं. ६-१-५ इत्येवमादीनामर्थवादानां किं यथाश्रुतवस्तुपरत्वम् ? उत तेभ्यः कार्यरूपार्थोपदेशपरिकल्पनम् ? उत लिङादियुक्तवाक्यान्तरप्रतिपाद्यमान-कार्यरूपार्थोपयिकत्वम् ? इति चिन्त्यम् ॥ § 5294

I.668/KSV

## अर्थवादानां स्वार्थे प्रामाण्यासंभवः

सर्वथा च प्रमादः । स्वरूपपरत्वे तावत् प्रमाणान्तरविरुद्धार्थोपदेशात् अप्रामाण्यमेवावतरति, रोदनवपोत्खेदनदिङ्मोहादेरर्थस्य तथात्वे निश्चयाभावात् ॥ § 5295

## अर्थवादानां विरुद्धार्थप्रतिपादकत्वादप्रामाण्यम्

किञ्च स्तेनं मनोऽनृतवादिनी वाक् इत्येवञ्जातीयकानामर्थवादवाक्यानां विस्पष्टमेव प्रमाणान्तरविरुद्धार्थप्रतिपादकत्वम् । न हि निसर्गत एव सर्वप्राणिनामनृतवादिनी वाक् भवति, स्तेनं वा मनः ॥ § 5296

अपि च धूम एवाग्नेर्दिवा ददृशे नार्चिः । तस्मादर्चिरेवाग्नेर्नक्तं दृश्यते न धूमः तै. ब्रा. २-१-२ इति प्रत्यक्षविरुद्धमभिधीयते, नक्तं दिनं द्वयोरपि इन्द्रियार्थसन्निकर्षे सति ग्रहणात् ॥ § 5297

किञ्च एतन्न विद्मः यदि ब्राह्मणाः स्मोऽब्राह्मणा वा गो. ब्रा. ५-२१ इति ब्राह्मणजातेरुपदेशसहायप्रत्यक्षगम्यत्वात् तद्विरुद्ध एषोऽर्थवादः ॥ § 5298

---

७ ] पु(?)ताः— nyāma-wit__ka
२ ] प्रत्याय— nyāma-wit__kha
४ ] तस्मात्— nyāma-wit__ka
६ ] अक्षा— nyāma-wit__ka
७ ] एतत्— nyāma-wit__ka
८ ] विरुद्ध— nyāma-wit__ka

---

६ *] आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्जै. सू. १-२-१ इत्याद्युक्तं विचारं प्रकृतानुगुणरीत्योपक्षिपति—नन्वित्यादि । एतत्प्रकरणोदाहृतानां श्रुतिवाक्यानामानुपूर्व्यां ग्रन्थकृता नैर्भर्यं न स्वीकृतमिति द्रष्टव्यम् ॥
७ निखिलाः] परिपिञ्जिताः—पिजि हिंसायाम् । परिहृता इति यावत् ॥
९ र] तूषरः—अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूपरौ इत्यमरः ॥
११ किं] यथाश्रुतेति । किमेतेषां स्वार्थ एव पर्यवसानम् ? उत तेभ्यो विधिकल्पनम् ? उत विधिवाक्यशेषत्वमिति विकल्पत्रयार्थः ॥
१५ स्य] तथात्वे—रुद्रादिसम्बन्धित्वे ॥
५ दिनं] द्वयोः—अग्निधूमयोः ॥
८ हाय] प्रत्यक्षगम्यत्वादिति । पूर्वमेव पु. ५५२ प्रतिपादितमिदम् ॥

शास्त्रविरोधोऽप्यस्ति—को हि तद्वद यद्यमुष्मिंल्लोकेऽस्ति वा न वा तै. सं. ६-१-१ इति । शास्त्रे स्वर्गादिफलानां ज्योतिष्टोमादिकर्मणां उपदेशात् केयमनवक्लृप्तिः ॥ § 5299

अपि च गर्गत्रिरात्रब्राह्मणमधिकृत्य श्रूयते—शोभतेऽस्य मुखं य एवं वेद ता. ब्रा. २०-१६-६ इति । न हि कस्यचित् एवंविदतः मुखं शोभत इति प्रत्यक्षविरोधः ॥ § 5300

अन्यकर्मानर्थक्यशंसी च कश्चिदर्थवादो भवति—पूर्णाहुत्या सर्वान् कामान् अवाप्नोति, पशुबन्धयाजी सर्वान् लोकानभिजयति, तरति मृत्युं I.669/KSV तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते यश्चैवं वेद इति । यदि पूर्णाहुत्यैव सर्वकामावाप्तिः, पशुबन्धयागेनैव सर्वलोकजयः, अश्वमेधवेदनेनैव तत्फलावाप्तिः, तत्किमर्थमन्यकर्मोपदेशः ? उपदिष्टान्यपि तानि बहुक्लेशसाध्यानि कर्माणि व्यर्थानि भवेयुः, *अनेनैव लघुनोपायेन तत्फलप्राप्तेर्दर्शनात् ॥ § 5301

अपि च न पृथिव्यामग्निश्चेतव्यः नान्तरिक्षे न दिवि तै. सं. ५-२-७ इति वेदे चयननिषेध एवात्र भङ्ग्या भवेत् । दिवि चान्तरिक्षे च तावत् चयनप्रयोग एव नास्ति, किं तन्निषेधेन ? पृथिवीचयननिषेधार्थं च यद्वाक्यं, तत् चयनप्रतिषेधार्थमेव भवेत्, अपृथिव्यधिकरणकस्य चयनस्यानुपपत्तेः ॥ § 5302

अपि च यजमानः प्रस्तरः तै. सं. २-६-५क्१>, आदित्यो यूपः तै. ब्रा. २-१-५ इत्येवंजातीयकानां प्रत्यक्षविरुद्धार्थाभिधायिनां अर्थवादानां का परिनिष्ठेति । तस्मान्न स्वरूपपरत्वं तेषामुपपद्यते ॥ § 5303

## अर्थवादेभ्य एव विधिकल्पनमपि न संभवति

नापि तेभ्य एव कार्यरूपार्थपरिकल्पनं उपपन्नम्, अशक्यत्वात् । सोऽरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वं तै. सं. १-५-१ इत्यत्र कार्यं कल्प्यमानमेवं कल्प्येत—रुद्रः किल रुरोद, अतोऽन्येनापि रोदितव्यम् इति—तच्चाशक्यम् —प्रियविप्रयोगजनितसन्तापवशेन हि बाष्पमोचनं रोदनमुच्यते । न तत् चोदनोपदेशात् कर्तुं शक्यते ॥ § 5304

प्रजापतिरात्मनो वपामुदखिदत्; तस्मादन्योऽप्येवमुत्खिदेत् आत्मनो वपामिति दुरनुष्ठानोऽयमर्थः । को हि नाम आत्मनो वपामुत्खिदेत् ? कस्य वा वपाहोमे सति समनन्तरमेव हुतभुजः पशुस्तूपर उद्गच्छेत् ? इति ॥

---

८ ] अजः— nyāma-wit_kha

---

११ क्लृप्तिः ] अनवक्लृप्तिः—अनिर्णयः ॥
२० *] अनेन—पूर्णाहुत्यादिना ॥
२३ वेदे ] चयननिषेध इति । तथा च चयनविधिविरोधः ॥

४ म् ] अशक्यमिति । रोदनादिकं हि विषयाधीनं, न तु विध्यधीनम् ॥
८ मेव ] हुतभुज इति पञ्चमी ॥

§ 5305

I.670/KSV

देवा दिशो नाज्ञासिषुः, अतः अन्योऽपि न जानीयात् इति अशक्योपदेशः; न हि दिङ्मोहो नाम उपदेशात् कर्तुं शक्यः ॥ § 5306

न च सर्वस्मादर्थवादात् विधिः कल्पयितुं शक्य इति मध्यमोऽपि न सत्पक्षः ॥ § 5307

## अर्थवादानां विधिशेषतया प्रामाण्यमपि न

नापि तृतीयः पक्षः संभवति—वाक्यान्तरविहितकार्यरूपार्थौपयिकत्वं हि तदुपयोगिद्रव्यदेवतादिविधानद्वारकं भवति—यथा अग्निहोत्रं जुहोति तै. सं. १-५-९ इत्यत्र दध्ना जुहोति, पयसा जुहोति इति द्रव्यविनियोगविधेः, यदग्नये च प्रजापतये च सायं जुहोति तै. ब्रा. २ इति देवताविधेर्वा । न चायमर्थवादेषु प्रकारः संभवति । न चैभिः ब्रीहीनवहन्ति, ब्रीहीन् प्रोक्षति इतिवत् दृष्टाऽदृष्टा वा काचिदितिकर्तव्यतोपदिश्यते । तस्मात् न तेषां तदौपयिकत्वम् ॥ § 5308

## प्रवृत्त्युत्तंभनरूपफलमप्यर्थवादानां न समस्ति

ननु ! *प्रेक्षावतां प्ररोचनातिशयकरणेन प्रवृत्त्युत्साहमाबहन्तः अर्थवादाः तदुपयोगिनो भविष्यन्ति—नैतदपि सम्यक्—प्रवृत्त्युत्साहो हि केषांचिन्मते निरपेक्षशब्दप्रत्ययादेव सिध्यति । अस्मन्मते तु तत्प्रणेतृपुरुषप्रत्ययादिति किं प्ररोचनया ? एवंकाम इदं कुर्यात् इत्युक्ते, यस्तत्र न प्रवर्तते, स प्ररोचनयाऽपि न प्रवर्तेतेवेति यत्किञ्चिदेतत् ॥ § 5309

तदेवं प्रकारत्रयेणापि अर्थवादपदानामनन्वयात् एकदेशाक्षेपेण *सर्वाक्षेप एव क्रियत इति अप्रमाणं वेदः ॥ § 5310

I.671/KSV

## अर्थवादानामप्रामाण्ये तद्दृष्टान्तेन वेदसामान्याप्रामाण्यसिद्धिः

ननु ! यावत्येव प्रमाणान्तरविरुद्धत्वमुपलभ्यते, तावत्येवाप्रामाण्यमस्तु । सर्वत्र तु कुतस्त्या तदाशङ्का ? इति—मैवम्— तत्सामान्यात् अन्य-

६ ] तावत्— nyāma-wit__ka

१२ च ] सर्वस्मादिति । वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता तै. सं. २-१-१ इति अर्थवादस्य विधिशेषत्वं स्पष्टं प्रतीयते । न हि तत्र अर्थवादे पृथग्विधिकल्पनं शक्यमित्यर्थः ॥

२१ * ] प्रेक्षावतां—अनुन्मत्तानाम् ॥

२२ हि ] केषाञ्चित्—मीमांसकानाम् । निरपेक्षत्वमेवास्याः प्रामाण्यप्रयोजकमित्युक्तं प्राक् पु. ४३५ ॥

२ * ] सर्वाक्षेपः—निखिलवेदानामपि एतद्दृष्टान्तेनाप्रामाण्याक्षेपः ॥

त्राप्यनाश्वासः । मीमांसकपक्षे हि अर्थवादरहितकेवलवेदग्रन्थानुपलम्भात्, तदनुषङ्गेण सर्वत्र सापेक्षत्वमवतरति । नैयायिकमते तु वेदप्रणेतुरीश्वरस्य क्वचित् वितथवादित्वे दृश्यमाने, कथमन्यत्र सत्यवादितायां दृढः प्रत्ययो भवेत् ? इत्यप्रामाण्यं सर्वत्रेति ॥ § 5311

## अर्थवादानां विध्येकवाक्यत्वात्प्रामाण्यस्थापनम्

अत्राभिधीयते—विध्येकवाक्यतयैव भूम्ना तावदर्थवादपदानि पठ्यन्ते—वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति तै. सं. २-१-१ इति । तेषां तदेकवाक्यत्वादेव प्रामाण्यम् । वायुर्वै क्षेपिष्ठा देवता इत्यतः यद्यपि क्रिया नावगम्यते, नापि तत्सम्बद्धः कश्चिदर्थः; तथाऽपि विध्युद्देशेनैकवाक्यत्वं तस्य प्रतीयते । भूतिकामः इत्येवमन्तो विध्युद्देशः । तेनैकवाक्यभूतो वायुर्वै क्षेपिष्ठा इत्येवमादेः ॥ § 5312

## अर्थवादानां स्तुतिरूपत्वम्

* कथमेकवाक्यभावः ? पदानाम् साकाङ्क्षत्वात् ॥ § 5313

ननु ! भूतिकामः इत्येवमन्तेन वाक्येन विधेयं विहितम्; उत्पादितं प्रतिपत्तुरनाकाङ्क्षत्वम्; कृतश्च शब्दकर्तव्यमिति, *किमन्येन—क्षेपिष्ठाइत्यादिना प्रयोजनम् ?—तदर्थस्यैव स्तुतिरिति ब्रूमः ॥ § 5314

I.672/KSV

## सार्थवादविधेरेव प्रेरकत्वम्

ननु ! स्तुत्याऽपि किं प्रयोजनम् ? स्तुतोऽस्तुतश्च *तावानेव सोऽर्थः—मैवम्—सस्तुतिपदे हि वाक्ये स्तुतिपदसहितं विधायकं विधायकं भवति ॥ § 5315

१३--१५ ] देवता— nyāma-wit__kha
१६--१७ ] प्रतीयते— nyāma-wit__kha
२ ] किमनेन— nyāma-wit__kha
४ ] स्तुत्या— nyāma-wit__kha
४ ] स्तुतस्तुत्या— nyāma-wit__ka
४ ] नोऽर्थः— nyāma-wit__ka
५ ] विधायकं— nyāma-wit__ka

६ न्था ] अनुपलंभादिति । विधिवाक्यानि हि अत्यन्तं विरलानि ॥
१४ द्धः ] कश्चिदर्थः—द्रव्यदेवतादिः ॥
१७ * ] कथमेकवाक्यभाव इत्याक्षेपः । पदानां इत्यादि समाधानम् ॥
१९ * ] किमन्येनेति । उक्तार्थानुपयोगिनेत्यर्थः । उक्तेऽर्थे सर्वोऽपि शास्त्रार्थः परिसमास एवेत्याशयः ॥
१ * ] तावानेवेति । न हि स्तुतो गर्दभः अश्वो भवेत्, अस्तुतो वाऽश्वः गर्दभो भवेत् ॥
२ हितं ] विधायकं—विधिवाक्यम् ॥

किमिदानीं केवलं लिङादियुक्तं वाक्यं न विधायकमुच्यते— यदि स्तुतिपदानि न श्रूयन्ते तत् बाढं भवति विधायकम् । एतेषु च सत्सु तत्सहितं तद्विधायकं भवति, न केवलम्; तथा प्रतीतेः । स्तुतिपदसम्बन्धे सति भिन्नवाक्यता मा भूदिति विधिपदेन स्तुतिपदेन च संभूयार्थो विधीयते; तथाऽवगमात् । अन्यथा हि प्रतीयमानः पदार्थान्वयः त्यज्येत; वाक्यभेदो वा कल्प्येत । तस्मान्न स्तुतिपदानामानर्थक्यम् ॥ § 5316

## अर्थवादवाक्यप्रयोजनाक्षेपः, समाधानं च

ननु ! केवलस्यापि विधिवाक्यस्य सामर्थ्यात् किमर्थं स्तुतिपदानि प्रयुञ्जते ? इति—उच्यते—अपर्यनुयोज्यो जैमिनीयानां मते शब्दः; अस्माकं च भगवानीश्वरः । उक्ते सति प्रतिपत्तारो वयं वेदस्य; न कर्तारः । प्रतिपत्तौ च क्रमो दर्शितः ॥ § 5317

## द्रव्यदेवताद्यसमर्पकत्वेऽप्यर्थवादानां नानर्थक्यम्

एवञ्च यद्यपि द्रव्यदेवतेतिकर्तव्यताविधानद्वारकं अङ्गविधिवदर्थवादवाक्यानां कार्योपयिकत्वं नास्ति; तथापि प्रतीत्यङ्गत्वं न निवार्यते ॥ § 5318

I.673/KSV

## अर्थवादानामावश्यकता

अत एव प्रमाणोपयोगित्वमेषामाचक्षते, न प्रमेयोपयोगित्वम् । केवलविधिपदश्रवणे हि न तदाद्रियन्ते यज्वानः । तत्र विधिविभक्तिरवसीदति । तां निमज्जन्तीमिव अर्थवादजनितकर्मप्राशस्त्यप्रत्ययः उत्तभ्राति । सर्वजिता यजेत इत्यतः न तथाविधः श्रद्धातिशयो भवति; यथाविधः सर्वजिता वै देवाः सर्वमजयन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेन सर्वं जयति ता. ब्रा. १६-७-२ इत्यर्थवादपदेभ्यः । लोकेऽपि इयं गौः क्रेतव्या इत्यतः न तथा क्रेतारः प्रवर्तन्ते, यथा एषा बहुस्निग्धक्षीरासुशीला, सापत्या, अनघप्रजा च इत्येवमादिभ्यः स्तुतिभ्यः । स्वानुभवसाक्षिकोऽयमर्थः ॥ § 5319

## अर्थवादाश्रवणस्थलेऽपि अर्थवादकल्पनम्

१ ] प्रामाण्यो— nyāma-wit__kha
१ ] माचक्षते— nyāma-wit__kha
२ ] विभक्तेः शक्ति— nyāma-wit__kha
७ ] अनव— nyāma-wit__kha

१२ रः ] ईश्वर इति । अपर्यनुयोज्य इत्यस्यानुवृत्तिः ॥
१५ थापि ] प्रतीतिः—विधिवाक्यप्रतिपन्नयागकर्तव्यत्वबुद्धिः ॥
१७ ति ] अवसीदति—क्लेशसाध्यत्वादिज्ञानेन, न निरङ्कुशा भवति ॥

अत एव केचित् अश्रुतार्थवादकेऽपि विधिवाक्ये तत्कल्पना मिच्छन्ति, *यथा क्वचित् अर्थवादात् विधिकल्पनमिति । यथोक्तम् तं. वा. १-४-१३—
§ 5320

विधिस्तुत्योः सदा वृत्तिः समानविषयेष्यतेइति । *अनधिगम्यमानविधिसम्बन्धाच्च अर्थवादात् विधिरुन्नीयते, न गम्यमानसम्बन्धात् ॥
§ 5321

I.674/KSV

## अर्थवादैः स्तुतिप्राप्तिप्रकारः

अत एव च सोऽरोदीत् इत्येवमादिभ्यः (?')न रोदितव्यम् इत्यादिविधिकल्पनमिष्यते । मुधैव पूर्वपक्षिणा तदाशङ्कितम् । विध्यन्तरेणैकवाक्यत्वं हि प्रत्यक्षमिहोपदिश्यते । * बर्हिषि रजतं न देयम् तै. सं. १-५-१ इत्यस्य विधेः शेषोऽयं सोऽरोदीत् इत्यादिः—रुद्रो रुरोद । तस्य यदश्रु अशीर्यत, तद्रजतमभवत् । यो हि बर्हिषि रजतं ददाति, पुराऽस्य संवत्सरात् गृहे रोदनं भवति इति । तस्मात् वर्हिषि रजतं न देयम् इति ॥ § 5322

प्राजापत्यमजं तूपरमालभेततै. सं. २-१ इत्यस्य विधेः शेषः प्रजापतिरात्मनो वपामुदक्खिदत् इति । वपाहोममाहात्म्यप्रदर्शनार्थमुच्यते—अग्नौ वै प्रगृहीतमात्रायां वपायां अजस्तूपर उदगादिति ॥ § 5323

आदित्यः प्रायणीयश्चरुःतै. सं. ६-१-५ इत्यस्य विधेः शेषोऽयं देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् तै. सं. ६-१-५ इति; व्यामोहानामादित्यश्चरुर्नाशयिता, यथा दिङ्मोहस्येति । एवं तत्र तत्र विधिशेषत्वं अर्थवादानां वेदितव्यम् ॥ § 5324

## अर्थवादानामसत्यार्थकत्वनिरासः

कथं पुनरिदमसत्यमेवोच्यते ? रुद्ररुदितात् रजतमजायत, प्रजापतिहोमसमिद्धादग्नेः अजस्तूपर उदगात् इति—उच्यते— नेदमसत्यम्, य-

---

१२ ] अनधि— nyāma-wit_kha
१३ ] विधिवाक्य— nyāma-wit_kha

१ ] इति स—क, इत्थं— nyāma-wit_kha

---

८ *] क्वचित्—प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति इत्यादौ । विधिः, रात्रिसत्रस्येति शेषः ॥
१० वृत्तिः ] समानेति । यत्र केवलं विधिः, तत्रार्थवादेनापि भाव्यम् । यत्र केवलमर्थवादः, तत्र विधिनापि भाव्यम् ॥

१० *] ननु तर्हि वायुर्वै क्षेपिष्ठा देवता इत्यादावपि विधिः कल्पनीय स्यादित्यत्राह—अनधिगम्यमानेति ॥
१५ *] बर्हिः—यज्ञः ॥
१ आदित्यः ] प्रायणीय इति इष्टेर्नाम जै. सू. ९-४-३२ ॥

दस्य वाक्यस्य प्रतिपाद्यं, तत्र सत्यार्थमेवेदम् । न चास्य यथा(?)तोऽर्थः प्रतिपाद्यः, किन्तु विधेयो निषेध्यो वा कश्चिदर्थः । इहान्वाख्याने द्वयमापतति—यच्च वृत्तान्तज्ञानम्, यच्च कस्मिंश्चिदर्थे प्ररोचना द्वेषो वा । तत्र वृत्तान्तज्ञानं न प्रवर्तकम्, न निवर्तकमिति प्रयोजनाभावात् अनर्थकमनादरणीयम् । प्ररोचना द्वेषौ प्रवृत्तिनिवृत्त्यङ्गत्वात् तदर्थौ गृहीत्वा प्ररोचनायाः प्रवर्तेत, द्वेषान्निवर्तेतेति । तत्र तत्प्रतिपाद्यसत्यार्थ एवार्थवादः ॥ § 5325

I.675/KSV

## अर्थवादानामर्थविरोधे गौणार्थकत्वम्

यत्तु अरुदति रुद्रे कथं तद्रोदनवचनम् ? अरोदनप्रभवे वा रजते कथं तदुद्भवताऽभिधानम् ? इति—गुणवादमात्रम्—गौण एष वादः श्वेतवर्णसारूप्यादिना रोदनप्रभवं रजतं निन्दितुमुच्यते ॥ § 5326

एवं पशुयागे वपाहोमप्रशंसायै प्रजापतिरात्मनो वपामुदक्खिदत् इति वृत्तान्ताख्यानं योजनीयम् ॥ § 5327

आदित्यचरुप्रशंसायै देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् इति ॥ § 5328

## सिद्धान्ते अर्थवादानां यथाश्रुतार्थत्वे न विरोधः

अथवा नैयायिकानामनेकप्रकारपुरुषातिशयवादिनां यथाश्रुतेऽप्यर्थे नात्यन्तमसंभवः । रुद्रस्य रुदितात् रजतजन्म, प्रजापतेर्वपोत्खेदः, तद्धोमात् तूपरपशूद्गमः, देवानां देवयजनाध्यवसाने दिङ्मोह इत्येवंजातीयकमपि सत्यमस्तु ! को दोषः ? तत्सर्वथा नार्थवादा न प्रमाणम् ॥ § 5329

## अर्थवादेषु प्रत्यक्षादिविरोधपरिहारः

एवं स्तेनं मनोऽनृतवादिनी वाक् इति गौण एष वादः । * प्रच्छन्नतया स्तेनं मन उच्यते । बाहुल्याभिप्रायेण चानृतवादिनी वाक् इति ॥ § 5330

I.676/KSV

१६ ] द्वेषौ— nyāma-wit_kha
१८ ] प्रवृत्त्य— nyāma-wit_kha
१ ] प्रकारः— nyāma-wit_ka
४ ] अर्थवादानां प्रामाण्यम्— nyāma-wit_kha

८ इहान्वाख्याने ] अन्वाख्यानं—अर्थवादरूपानुवादवाक्यम् ॥
१० नाभावात् ] अनर्थकमिति प्रकृतस्तुतिनिन्दाभिप्रायम् । वक्ष्यति च पु. ६७७ तयोरपि फलम् ॥
२० कार ] पुरुषातिशयेति । सर्वैरपि कर्मभिः पुरुष एव कश्चनातिशयः धर्माधर्माख्यः आधीयते इति सिद्धान्तः । ततश्च तदनुगुणतया विचित्राश्शक्तयः क्रियाश्च सुलभतया निर्वोढुं शक्यन्त इत्यर्थः ॥
३ *] प्रच्छन्नतयेति । स्वमनस्यन्तः किमस्तीति स्वेनापि हि न ज्ञातुं शक्यते । एवं अङ्गुल्यग्रे हस्तियूथशतमास्ते इति वचने न हि जिह्वा विशीर्यते ॥

धूम एवाग्नेर्दिवा ददृशे नार्चिरर्चिरेवाग्नेर्नक्तं ददृशे न धूमःते. ब्रा. २-१-२ इति दूरभूयस्त्वाभिप्रायेण कस्मैचित् प्रयोजनाय सायंप्रातर्होमदेवतास्तुतये कथ्यते ॥ § 5331

न चैतद्विद्मो यदि ब्राह्मणाः स्मः, अब्राह्मणा वागो. ब्रा. ५-११ इति प्रवरानुमन्त्रणप्रशंसार्थे संशय इव दर्शितः । अब्राह्मणोऽपि यजमानः प्रवरानुमन्त्रणेन ब्राह्मणः स्यादिति ॥ § 5332

*को हि वै तद्वेद, यदमुष्मिंल्लोकेऽस्ति वा न वाते. सं. ६-१-१ इति अदृष्टफलं किमपि कर्म स्तोतुमुच्यते ॥ § 5333

शोभतेऽस्य मुखं य एवं वेदता. ब्रा. २०-१६-६ इति विद्याप्रशंसैषा शोभत इति शिष्यैरुद्वीक्ष्यमाणस्य मुखमिति ॥ § 5334

सर्वान् कामानाप्नोति इति सर्वत्वं प्रकृताऽपेक्षम् । स्तुत्यर्थं चाश्वमेधाध्ययने तत्फलवचनम् ॥ § 5335

हिरण्यं निधाय चेतव्यम् इति स्तुत्यर्थतया दिव्यन्तरिक्षे पृथिव्यां च चयनं प्रतिषिध्यते । अनुपहितहिरण्यायां पृथिव्यां अग्निर्न चेतव्यः, न पुनर्न चेतव्य एव तस्यामिति ॥ § 5336

आदित्यो यूपःते. ब्रा. २-१-५इति अञ्जने सति तेजस्वितया यूपस्य आदित्यरूपता स्तुतये कथ्यते ॥ § 5337

तत्कार्यकारित्वाच्च यजमानः प्रस्तर उच्यते । न हि मुख्ययैव वृत्त्या लोके शब्दाः प्रवर्तन्ते; गौण्याऽपि वृत्त्या तद्व्यवहार दर्शनात् । एवं वेदेऽपि I.677/KSV तेषां तथा प्रयोगो भविष्यति । * इत्थं च मन्त्रेष्वपि ऐन्द्र्या गार्हपत्योपस्थानमविरुद्धम् ॥ § 5338

## परकृतिपुराकल्परूपार्थवादानामपि प्रामाण्यम्

एवं स्तुतिनिन्दास्वरूपास्तावदर्थवादाः विध्येकवाक्यत्वेन प्रमाणम् । * परकृतिपुराकल्पस्वरूपा अपि तथैव योज्याः ॥ § 5339

---

१ ] इत्यमञ्जने— nyāma-wit_kha nyāma-wit_kha
४ ] व्यवहार— nyāma-wit_kha
८ ] पराकृति— nyāma-wit_ka;
८ ] योग्याः— nyāma-wit_ka

---

६ इति ] दूरभूयस्त्वेति । दूरस्थैः दिवा धूम एव गृह्यते रात्रौ तु अर्चिरित्यस्त्यनुभवः ॥
११ *] को हीति । अत्रानवक्लृप्तिसूचनं च विप्रकृष्टकालफलत्वात् ॥
१९ एव ] तस्यां—पृथिव्याम् ॥
२० इति ] अञ्जने—घृतेन लेपने ॥
२३ नात् ] दर्शनात्—अग्निर्माणबकः इत्यादौ ॥
२४ *] इत्थं च—वेदेऽपि गौणप्रयोगसत्वाच्च । इन्द्रपदं रूड्या इन्द्रवाचकमपि, ऐश्वर्यविशेषविवक्षया गार्हपत्यवाचकमपि स्यात् ॥
१ *] परकृतीत्यादि । स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः न्या. सू. २-१-६५ इति सूत्रम् । अर्थवादाश्चतुर्विधाः । तत्र दृष्टान्ता भाष्य एवं प्रदर्शिताः—स्तुतिः—सर्वजिता वै देवाः सर्वमयजन् सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ता. ब्रा. १६-७-२ इत्यादि । अनिष्टफलवादो निन्दा वर्जनार्था—स एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमो य एतेनानिष्ट्वाऽन्येन

## कुत्रचित् अर्थवादैः विधिकल्पनमपि दृश्यते

क्वचित्पुनः अर्थवादेनैव कश्चिदंशः पूर्यत इति न तु प्रतीत्यङ्गत्वमेव तस्य, कार्याङ्गत्वमपि भवति । यथा—प्रतितिष्ठन्ति ह वा य एता रात्रीरुपासते तै. सं. ७-३-१० इति अश्रूयमाणाधिकारस्य रात्रिसत्रविधेः अधिकारांशोऽर्थ-वादादेव लभ्यते । यथोक्तं—फलमात्रेयो निर्देशात्* जै. सू. ४-३-१८ इति । तत्र हि—प्रतिष्ठाकामाः सत्रमासीरन्—इत्यर्थवादवशात् गम्यते वाक्यार्थः ॥ § 5340

I.678/KSV

## क्वचिदर्थवादानां संशयनिवर्तकत्वम्

क्वचित् विधिवाक्यस्यार्थसन्देहे अर्थवादात्मकात् वाक्यशेषात् तन्निश्चयो भवति । यथा—अक्ताः शर्करा उपदधाति तै. ब्रा. ३-१२-५ इत्यञ्जन-द्रव्ये घृततैलवसादिभेदेन संदिह्यमाने तेजो वै घृतम् तै. ब्रा. ३-१२-५ इत्यर्थवादात् घृतेनाक्ताः शर्करा उपधेया इति गम्यते ॥ § 5341

## अर्थवादविचारोपसंहारः

इत्यर्थवादा विधिनैक्यभावात्
* तद्वत्प्रमाणत्वममी भजन्ते ।
अस्ति प्रतीत्यन्वयिता हि तेषां
*क्वचिच्च कार्यान्वयिता तु दृष्टा ॥ १३९ ॥ § 5345

यद्वा स्वरूपपरतामपि संस्पृशन्त
प्रामाण्यवर्त्म त इमे न परित्यजन्ति ।

---

९ ] संस्पृशन्ति— nyāma-wit__kha

१० ] वर्म— nyāma-wit__kha

---

nI.678/KSV यजते गर्ते पतत्ययमेवैतज्जीर्यते वा प्रमीयते वा इत्येवमादि । अन्यकर्तृकस्य व्याहतस्य विधेर्वादः परकृतिः—हुत्वा वपामेवाग्रेऽभिघारयन्ति, अथ पृषदाज्यं, तदु ह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्ति, अग्नेः प्राणाः पृषदाज्यमित्येवमभिदधति इत्येवमादि । ऐतिह्यसमाचरितो विधिः पुराकल्प इति—तस्माद्वा एतेन ब्राह्मणा बहिष्पवमानं सामस्तोममस्तौषन् योने यज्ञं प्रतनवामहे इत्येवमादि ॥

६ *] फलं—प्रतिष्ठारूपं इदं अर्थवादवाक्यं विवक्षत्येव, तत्र तत्फलस्यनिर्देशात्, अप्राप्तत्वाच्चेत्यर्थः । आत्रेयग्रहणं पूजार्थम् ॥

१० अक्ताः ] शर्कराः—इष्टकाः ॥

२ *] तद्वत्—विधिवाक्यवत् ॥

४ *] क्वचित्—प्रतितिष्ठन्ति ह वै इत्यादौ ॥

नैयायिका हि पुरुषातिशयं वदन्तः
वृत्तान्तवर्णनमपीह यथार्थमाहुः ॥ १४० ॥§ 5349

आदित्ययूपवचनादिषु तु स्वरूप-
याथार्थ्यमित्थमुपपादयितुं न शक्यम् ।
गौणीं तु वृत्तिमवलम्ब्य कृता तदर्थ-
व्याख्येति तेष्वपि न विप्लवनावकाशः ॥ १४१ ॥§ 5353

I.679/KSV

## मन्त्रवाक्यविचारः

* अथेदानीं मन्त्रा विचार्यन्ते—किं अर्थप्रकाशनद्वारेण विध्यर्थोपयोगिता तेषाम् ? उतोच्चारणमात्रेण ? * इति ॥ § 5354

## मन्त्रवाक्यविचारस्याप्रकृतत्वशङ्का, समाधानश्च

ननु ! उभयथाऽपि प्रामाण्याविशेषात् किं तद्विचारेण ? न हीदं शास्त्रं वेदस्यार्थविचाराय मीमांसावत् प्रवृत्तम्; अपि तु प्रामाण्यनिर्ण-यायैवेति—सत्यम्, प्रामाण्यनिर्णयायैवेदं शास्त्रं प्रवृत्तम्— अविवक्षितार्थत्वे तु मन्त्राणां अप्रतिपादकत्वलक्षणमप्रामाण्यमेव भवेत् । * सामान्यात् वेद-ब्राह्मणवाक्यानामपि तथाभावप्रसङ्ग इति वेदस्य कर्मावबोधार्थत्वं हीयेत । न च संशयविपर्ययजननमेवाप्रामाण्यम्; * अज्ञानजनकत्वमप्यप्रामाण्यमेव ॥ § 5355

## उच्चारणमात्रादेव सार्थक्यं मन्त्राणामिति पूर्वपक्षः

तदुच्यते—उच्चारणमात्रोपकारिणो मन्त्राः, कुतः ? तथा विनियोगोप-देशात्—उरु प्रथा उरु प्रथस्व इति पुरोडाशं प्रथयति वा. सं. १-२२ इति । यद्यर्थप्रकाशनोपकारिणो मन्त्राः, सामर्थ्यादेव प्रथनोपयोगी मंत्रोऽयमिति किमर्थं प्रथने विनियुज्यन्ते वचनेन ? यथा *साक्षः पुरुषः परेण चेन्नीयते,

३ ] निर्णयायेदं— nyāma-wit__kha

९ ] प्रथयति— nyāma-wit__kha

७ हि ] पुरुषातिशयेति । अदृष्टविशेषाधीनदेवताविग्रहाद्यङ्गीकारात् तदंशे स्वरूपपरत्वेऽपि न हानिरित्यर्थः ॥
१३ *] तदर्थशास्त्रात्जै. सू. १-२-३१ इत्याद्युक्तं विचारं संगृह्णाति—अथेत्यादि ॥
१४ *] उच्चारणमात्रेणेति । विध्यर्थोपयोगिता इत्यावर्तते ॥
१८ *] सामान्यात्—वेदत्वसाम्यात् ॥
२० *] अज्ञानजनकत्वं—ज्ञानाजनकत्वम् ॥
४ *] साक्षः—अक्षशब्दोऽत्र चक्षुर्गोलकपरः ॥

नूनमक्षिभ्यां न पश्यतीति गम्यते ॥ § 5356

अग्नीदग्नीन् विहर इति च करोत्येवासौ ऋत्विक् अग्निविहरणम्, किं वचनेन ? उच्चारणमात्रोपकारिणि मन्त्रे तदुच्चारणादेवादृष्टं किञ्चित् उपकारजातं कल्प्यते ॥ § 5357

I.680/KSV

वाक्यक्रमनियमाच्चाविवक्षितार्थान् मन्त्रानवगच्छामः । नियतपदक्रमा हि मन्त्राः पठ्यन्ते । यद्यर्थप्रतिपादनेनोपकुर्युः, नियतक्रमाश्रयणमनर्थकं स्यात्, क्रमान्तरेणापि तदर्थावगमसंपत्तेः ॥ § 5358

## मन्त्राणामर्थविवक्षाऽपि क्वचित् न संभवति

इतश्चाविवक्षितार्था मन्त्राः । अविद्यमानार्थप्रकाशिनो हि केचिद्दृश्यन्ते । यथा चत्वारि शृङ्गाः त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यानाविवेश तै. ना. १०-१ इति । न हि चतुःशृङ्गं त्रिपादं द्विशिरस्कं सप्तहस्तं किञ्चिद्यज्ञसाधनमस्ति, यदनेन प्रकाश्येत ॥ § 5359

## अचेतने चेतनवद्व्यवहारः विरुद्धः

इतश्चैवम् । अचेतनप्रैषप्रदर्शनात्—ओषधे त्रायस्वैनम् तै. सं. १-१-२ इति । न ह्योषधिर्बुध्यते—त्राणाय नियुक्ताऽस्मीति । शृणोत ग्रावाणः तै. सं. १-३-१३ इति चोदाहरणम् । न ह्यचेतनाः ग्रावाणः श्रोतुं नियुज्यन्ते ॥ § 5360

## अर्थविप्रतिषेधश्च क्वचित्

अपि च अदितिर्द्यौरदितिरन्तरिक्षम् तै. आ. १-१३ इति विप्रतिषिद्धमभिवदन्ति मन्त्राः । कथं सैव द्यौः, तदेवान्तरिक्षं भवितुमर्हति ॥ § 5361

## क्वचिन्मन्त्राणामर्थ एव नास्ति

---

२३ ] प्रकाश्यते— nyāma-wit__ka

१ ] अत— nyāma-wit__kha

---

६ ऋत्विक्] अग्निविहरणं—अग्नीन्धनादि । एतदेव कार्यं अग्नीधः—ऋत्वि(?)विशेषस्य ॥ १५ किञ्चि] यज्ञसाधनं—द्रव्यं, देवता वा ॥ १७ न] प्रैषः—नियोग इति वक्ष्यति पु. ६८४ ॥

केषाञ्चिच्च मन्त्राणां अर्थो ज्ञातुमेव न शक्यते । ते कथमर्थप्रकाशनेनोपकुर्युः ? अम्यक्सात इन्द्र ऋष्टिः ऋ. सं. २-८ इति । सृण्येव जर्भरीतुर्फरीतु ऋ. सं. ८-६-२ इति । इन्द्रः सोमस्य काणुका ऋ. सं. ३-३-९१ इति च । तस्मादविवक्षितार्था मन्त्राः ॥ § 5362
I.681/KSV

## मन्त्राणामुच्चारणस्यावर्जनीयत्वात्तावदेव तेषां फलम्

अपि च उच्चारणमुभयथाऽपि कर्तव्यं मन्त्राणां; अदृष्टाय वा ? अर्थप्रत्यायनाय वा ? यतोऽर्थमपि नानुच्चरिताः शब्दाः प्रत्याययितुमुत्सहन्ते । तदवश्यकर्तव्येऽस्मिन्नुच्चारणे तत एव यज्ञोपकारे सिद्धे किं अर्थप्रतिपादनद्वारपरिग्रहेण प्रयोजनमिति ? § 5363

## मन्त्राणामर्थप्रत्ययार्थत्वसिद्धान्तः

तत्रोच्यते—किं मन्त्रेभ्योऽर्थप्रतीतिरेव नास्ति ? किं वा भवन्त्यपि निर्निमित्ताऽसौ ? उत सन्निमित्ताऽपि ग्रहैकत्वप्रतीतिवत् अविवक्षिता ? इति ॥ § 5364

## मन्त्रैरर्थप्रतीतिर्न संभवतीति न युक्तम्

न तावत् प्रतीतिरेव नास्ति; शब्दार्थसम्बन्धव्युत्पत्तिसंस्कृतमतीनां बर्हिर्देवसदनं दामि मै. सं. १-१-२ इत्येवमादिमन्त्रश्रवणे सति तदर्थप्रतीतेः स्वसंवेद्यत्वात् ॥ § 5365

नाप्यसौ निर्निमित्ता; लोकवत् पदानामेवात्र निमित्तत्वात् । व्युत्पत्तिरपि न नास्ति; *य एव लौकिकाः शब्दाः, त एव वैदिका, त एव तेषामर्था इति लोकव्यवहारतस्तद्व्युत्पत्तिसंभवात् ॥ § 5366

नापि भवन्त्यपि मन्त्रेभ्योऽर्थप्रतीतिः ग्रहैकत्वप्रतीतिवदविवक्षिता भवितुमर्हति; अविवक्षानिबन्धनस्य क्वचिदप्यभावात् । ग्रहादिवचनान्तर-

---

८ ] अस्य क्षात— nyāma-wit_kha
९ ] कारका— nyāma-wit_kha
१२ ] अर्थमपि— nyāma-wit_ka
१३ ] तस्माद— nyāma-wit_kha
१० ] संभव— nyāma-wit_kha

---

७ थाऽपि ] उभयथा—अर्थप्रत्यायकत्वेऽप्रत्यायकत्वे च ॥
१२ पि ] निर्निमित्ता—मन्त्रघटकपदाजन्या, यादृच्छिकीति यावत् ॥ nI.682/KSV
१२ न्निमित्ताऽपि ] ग्रहैकत्वेति । ग्रहं सम्मार्ष्टि इत्यत्र एकत्वमविवक्षितमिति ग्रहैकत्वाधिकरणे जै. सू. ३-१-७ सिद्धान्तितम् ॥
१८ *] य एवेति । लोकवेदाधिकरणे जै. सू. ३-१-७ सिद्धान्तितमिदम् ॥
२ तीतिः ] ग्रहः—सोमरसाधारपात्रविशेषः । ग्रहं संमार्ष्टि इत्यत्र एकवचनसत्त्वेऽपि विषयदृष्ट्या पात्रबहुत्वात् एकवचनमविवक्षितमिति जै. सू. ३-१-७ सिद्धान्तितम् ॥

I.682/KSV निर्ज्ञातसंख्यत्वात् सोमावसेकनिर्हरणस्य च सम्मार्गकार्यस्य सर्वग्रहसाधारणत्वात् ग्रहं इतिविभक्तेश्च कर्मकारकसमर्पणमात्रेणापि सार्थक्योपपत्तेः युक्तमेकत्वमविवक्षितमिति कथयितुम् । इह तु बर्हिर्देवसदनं दामि इत्येवमादिवाक्यक्रियमाणक्रतूपयोगिद्रव्यादिप्रकाशनस्य विध्यपेक्षितत्वात् मन्त्रेण स्मृतं * कर्म करोति । तथा क्रियमाणं अभ्युदयकारि भवतीति न यज्ञाङ्गप्रकाशनमविवक्षितम् । अतो नोच्चारणमात्रोपकारिणो मन्त्राः ॥ § 5367

## केषाञ्चित्तु मन्त्राणामुच्चारणमात्रे चारितार्थ्यम्

जपमन्त्राणां तु पावमानीं जपेत्, वैष्णवीं जपेत् इति विधिनैव तावन्मात्राक्षेपणात् नार्थेन प्रकाशितेन प्रयोजनमिति किं तत्र क्रियते ? यत्र तु जपेत् इति विधिर्न श्रूयते, न तत्र तदर्थः प्रतीयमानः, अपेक्ष्यमाणश्चोपेक्षितुं युक्तः ॥ § 5368

## स्वाध्यायविधेस्त्वर्थज्ञानपर्यन्ताध्ययनपरत्वमेव

ननु ! यदि जपेत् इति विधेः वैष्णव्यादिषु नार्थः विवक्ष्यते, तर्हि स्वाध्यायोऽध्येतव्यः इति अक्षरग्रहणमात्रविधानात् सर्वस्यैव वेदस्याविवक्षितार्थत्वं स्यात्—मैवम्—स्वाध्यायाध्ययनविधेः *दृष्टो हि तस्यार्थः कर्मावबोधनमिति दृष्टार्थत्वेन विवक्षितार्थत्वात् । एतच्च शास्त्रान्तरे जै. सू. १-१-१ विस्तरतो निर्णीतम् । इह तु वितन्यमानं अस्माकमवान्तरविचारवाचालतामाविष्करोतीति न प्रतन्यते ॥ § 5369

## मन्त्राणामर्थविवक्षाऽस्त्येव

यत्तु तदर्थविनियोगोपदेशादिति अविवक्षितार्थत्वमुक्तम्— तत्र उरु प्रथा उरु प्रथस्व वा. सं. १-२२ इति लिङ्गादेव प्रथन विनियोगे मन्त्रस्य I.683/KSV सिद्धे, कामं तद्विधायकं वचनं अनर्थकं भवतु, प्राप्तानुवादकत्वात्; न तु प्रतीयमानः मन्त्रादर्थः त्यक्तुं युक्तः । तत्किं वचनमनर्थकमेव ? नानर्थकम्, प्रतिपन्नार्थविषयं तु तत् ॥ § 5370

---

१५ ] क्रियमाणं— nyāma-wit__kha
१५ ] प्रकाशनं तस्य— nyāma-wit__kha
१८ ] जपेत्— nyāma-wit__kha
३--४ ] एतच्च— nyāma-wit__kha
८ ] विनियोग— nyāma-wit__kha
९ ] सिद्धेः— nyāma-wit__kha

---

८ *] कर्म—बर्हिस्सादनादिकम् ॥
१६ *] दृष्टो हीति । दृष्टे संभवत्यदृष्टफलकल्पनाया अन्याय्यत्वात् अध्ययनस्यार्थज्ञानपर्यन्तत्वं साधितम् जै. सू. १-१-१ ॥
३ कं] वचनं—इति पुरोडाशं प्रथयति इति वाक्यम् ॥

अर्थवादार्थं वा तद्वचनम्; यज्ञपतिमेव तत् प्रथयति इति । यदनेन मन्त्रेण पुरोडाशं प्रथयति, तद्यज्ञपतिं यजमानमेव प्रजया पशुभिः प्रथयतीति ॥ § 5371

क्वचित्तु गुणार्थविधानम् । यथा—*तां चतुर्भिरादत्ते तै. सं. ५-१-१ इति । एवं अग्नीदग्नीन् विहर इत्यादावपि द्रष्टव्यम् ॥ § 5372

## मन्त्राणामुच्चारमात्रार्थत्वं न युक्तम्

यत्तु नियतपदक्रमत्वात् उच्चारणमात्रोपयोगिनो मन्त्रा इति— तदप्यसाधु—मीमांसकानामनादित्वाद्वेदस्य, तत्क्रमलङ्घनानुपपत्तेः । यथोक्तम् श्लो. वा. १-१-३-१५०— § 5373

*अन्यथाकरणे चास्य बहुभ्यः स्यान्निवारणम् इति ॥ § 5374

अस्माकमपि यादृक् ईश्वरप्रणीतः, *तदन्यथाकरणे किमध्येतॄणां स्वातन्त्र्यमस्ति ? तस्मान्नार्थविवक्षायै मन्त्रक्रमः प्रभवति ब्राह्मणवाक्यक्रमवत् ॥ § 5375

## चत्वारि शृङ्गाः इत्यादिमन्त्राणामर्थः

यदपि चत्वारि शृङ्गाः इत्यविद्यमानार्थवचनमाशङ्कितम्— तदप्यनभिज्ञ- I.684/KSV
तया—यज्ञस्य वैष गुणवादेन संस्तवः । *चत्वारि शृङ्गा इति वेदा उक्ताः, त्रयोऽस्य पादा इति सवनानि, द्वे शीर्षे इति दम्पतीयजमानौ, सप्तहस्तास इति छन्दांसि, त्रिधा बद्ध इति मन्त्रब्राह्मणकल्पैः निबद्धः, वृषभ इति कामान् वर्षति, रोरवीतीति स्तोत्रशस्त्रप्रयोगबाहुल्यात् शब्दायमानः, महो देवो मर्त्यानाविवेशेति मनुष्यकर्तृक इत्येवमेष यज्ञः स्तुतो भवति । तद्यथा चक्रवाकमिथुनस्तनी, हंसदन्तावली, शैबालकेशी, काशवसनेति नदी स्तूयते ॥ § 5376

१२--१३ ] प्रथयति— nyāma-wit__kha
१५ ] राघत्ते— nyāma-wit__kha
१० ] महादेवो— nyāma-wit__ka
१० ] त्वेनैव— nyāma-wit__kha
११ ] वसनीति— nyāma-wit__kha

९ *] तां चतुर्भिरिति । अत्र चतुष्ट्वरूपगुणलाभार्थं तथा विधानम् । एवं अग्नीदग्नीन् विहर इत्यत्र संस्कारोद्बोधनार्थत्वमुक्तम् जै. सू. १-२-३७ ॥
१४ *] अन्यथेत्यादि । वेदस्य एकपुरुषाधीनत्वे तत्तेन कदाऽप्यन्यथाऽपि क्रियेत । बह्वधीनत्वे तु एकेनान्यथा पाठेऽपि इतरे तत्परिहरेयुः । अतः वेदः अनादिपरंपरया बहुभिः पठ्यत इत्यनादिर्वेदः ॥
१५ *] तदन्यथाकरणे—क्रमान्यथाकरणे ॥
१९ *] गोपथब्राह्मणोक्तविवरणमनुसृत्य शबरेण शा. भा. १-२-३८ विवृतोऽर्थोऽनूदितः ॥

ओषधे त्रायस्वैनम्तै. सं. १-१-२ इति चेतनवन्नियोग तस्याः स्तुत्यर्थः ॥ § 5377

शृणोत ग्रावाणःतै. सं. १-३-१३ इति प्रातरनुवाकस्तुतिः। इत्थं नामैषः प्रातरनुवाकः प्रशस्यः, यदचेतना ग्रावाणोऽपि शृणुयुः इति ॥ § 5378

अदितिर्द्यौरदितिरन्तरिक्षम्तै. आ. १-१३ इति गुणवादादप्रतिषेधः। तद्यथा लोके—त्वमेव मे माता, त्वमेव मे पिता, त्वमेव मे भगिनी, त्वमेव मे भ्रातेति ॥ § 5379

## अप्रसिद्धार्थकमन्त्राणामर्थप्रत्यायनक्रमः

यत्तु केषाञ्चिन्मन्त्राणामर्थो न ज्ञायत इति—स पुरुषापराधः संभवति, न मन्त्रापराधः। अर्थावगमोपायेषु बहुषु सत्स्वपि तदन्वेषणालसः पुरुषः नार्थमवगच्छति; न पुनर्मन्त्रोऽत्रापराध्यति; ब्राह्मणवाक्यवत् उपायतस्तद-र्थावगमदर्शनात्। उपायश्च प्रथमस्तावत् वृद्धव्यवहार एव, तुल्यत्वाल्लोक-वेदशब्दार्थानाम्। य एव लौकिकाः शब्दाः, त एव वैदिकाः; त एव चैषामर्था इति ॥ § 5380

I.685/KSV

## य एव लौकिकाः शब्दाः त एव वैदिकाः

* यद्यपि च अग्निर्वृत्राणि जङ्घनत् तै. ब्रा. ३-५-६ इति वेदे कृतणत्वं अग्निशब्दं पठन्ति। उत्ताना वै देवगवा बहन्ति आ. श्रौ. सू. ११-७-६ वन-स्पते हिरण्यपर्ण प्रदिवस्ते अर्थम् इति लौकिकवैदिकयोः शब्दयोः, अर्थयोश्च नानात्वमिवाशङ्क्यते; तथाऽपि तथात्वप्रत्यभिज्ञानेनावधार्य, ईषद्विकृतास्त एव वेदे इति लौकिक्येव व्युत्पत्तिः ॥ § 5381

* लोकप्रसिद्धिविप्रतिषेधे तु शास्त्रवित्प्रसिद्धिः प्रमाणीक्रियते। यथा यवमयश्चरुः, वाराही उपानहौ तै. सं. १-७-९ वैतसे कटे प्राजापत्यान् सञ्चिनोति इति यववराहवेतसशब्दाः दीर्घशूकसूकरवञ्जुलकेषु शिष्टप्रसिद्ध्या नियम्यन्ते, न प्रियङ्गुकृष्णशकुनिजम्बूष्विति ॥ § 5382

---

२०--२१ ] पुरुषापराधः— nyāma-wit__kha
१--२ ] लोके वेदे— nyāma-wit__kha
६ ] अर्थश्च— nyāma-wit__ka
७ ] तथात्वं— nyāma-wit__kha

---

८ शृणुयुः ] किं पुनर्विद्वांसो ब्राह्मणा इति शेषः ॥
१८ *] प्रसङ्गतः लोकवेदाधिकरणजै. सू. १-३-९विषयमपि संगृह्य प्रदर्शयितुमुपक्षिपति—यद्यपीति ॥
१ *] प्रकृतोपयोगित्वात् यववराहाधिकरणजै. सू. १-३-४मपि संगृह्णाति—लोकेति ॥

* यत्र तु शिष्टप्रसिद्धिर्नास्ति, तत्र म्लेच्छेभ्वोऽपि तदर्थव्युत्पत्तिराश्रीयते । यथा—पिकनेमतामरसशब्देषु ॥ § 5383

## सृण्येव जर्भरी इतिमंत्रार्थः

* म्लेच्छप्रसिद्धेरप्यभावे निगमनिरुक्तव्याकरणवशेन धातुतः अर्थः परिकल्पनीयः । तेन आश्विनसूक्तप्रक्रमात् जरणभरणनिमित्तौ जर्भरीतुर्फरीत् इति द्विवचनान्तसरूपावेतौ शब्दौ *अश्विनोर्वाचकाविति गम्यते । एवमन्यत्राप्युत्प्रेक्षणीयम् ॥ § 5384
I.686/KSV

## मन्त्रवाक्यविचारोपसंहारः

तदनेनापि निमित्तेन न मन्त्राणामविवक्षितार्थत्वं वक्तव्यम् ॥ § 5385

अमी तस्मादर्थप्रकटनमुखेनैव दधति
क्रियार्थत्वं मन्त्रा न तु पठनमात्रेण जपवत् ।
न तद्द्वारेणापि श्लथयितुमतः शक्यत इदं
प्रमाणत्वं वेदे सकलपुरुषार्थामृतनिधौ ॥ १४२ ॥§ 5389

## नामधेयविचारः

* इदमिदानीं परीक्ष्यते । उद्भिदा यजेत तां. ब्रा. १९-७-३, चित्रया यजेत पशुकामः तै. सं. २-४-६ अग्निहोत्रं जुहुयात्स्वर्गकामः, श्येनेनाभिचरन् वजेत षड्विं. ब्रा. ३-८ वाजपेयेन स्वाराज्यकामो यजेत इति श्रूयते । तत्र किं उद्भिदेति, चित्रयेति, अग्निहोत्रमिति, श्येनेनेति, वाजपेयेनेति गुणविधय एते ? तत्तत्कर्मनामधेयानि ? इति ॥ § 5390

किमनेन परीक्षितेन प्रयोजनम् ? उभयत्रापि प्रामाण्यं नोपपद्यत इति तदर्थमेवेदं परीक्ष्यते ॥ § 5391

---

१६ ] मरण— nyāma-wit__kha

---

५ *] प्रकृतोपयोगित्वादेव यववराहाधिकरणजै. सू. १-३-५मपि संगृह्णाति— यत्र त्विति । पिकनेमतामरसपदानां कोकिल-अर्ध—पद्मपरत्वं ग्राह्यम् ॥

७ *] एवं प्रसङ्गं समाप्य प्रकृतमनुसरति—म्लेच्छेत्यादि ॥

९ *] अश्विनोरिति । सृणिः—अङ्कुशः, तमर्हन्तौ सृण्यौ—कुञ्जरौ ।ताविव अत्यर्थं जृम्भमाणौ—जर्भरी । तुर्फरीतू—हिसन्तौ इति तन्त्रवार्तिके १-२-४१ व्याख्यातम् । एवं अम्यक्सात पु. ६८० अमा इति साहित्यार्थकमव्ययम् । अमा अञ्चतीति—अम्यक् । रिष्टिः—आयुधविशेषः । इन्द्रं सम्बुध्येयमुक्तिः । एवं सोमस्य पूर्णानि पात्राणि इन्द्रः काणुका—कामयमानः—इति तृतीय ऋगर्थः ॥

nI.686/KSV

१ *] प्रसङ्गात् नामधेयविचारमपि जै. सू. १-४-१ संगृह्णाति—इदमित्यादिना ॥

## उद्भिदादिवाक्यानां गुणविधित्वं न संभवति

यदि तावत् व्रीहिभिर्यजेत, दध्ना, जुहोति इतिवत् गुणः कश्चिदुद्भिदादिप- I.687/KSV दैर्विधीयते—अनेन द्रव्यविशेषेण यागः कर्तव्य इति—तदा भावार्थस्य यज्यादेः अन्यतोऽवगतिर्मृग्या, अनवगतार्थे भावार्थे गुणविधानस्यानुपपन्नत्वात् । आग्नेयोऽष्टाकपालो भवति तै. सं. २-६-३, अग्निहोत्रं जुहोति तै. सं. १-५-९ इति विध्यन्तरेण भावार्थे चोदिते, तत्र व्रीहिभिर्यजेत, दध्ना जुहोति इति ॥ § 5392

## उद्भिदादिवाक्यानां विशिष्टविधित्वे वाक्यभेददोषः

* ननु ! वाजपेयेन स्वाराज्यकामो यजेत इत्यनेनैव वाक्येन यागाख्यो भावार्थः चोदयिष्यते, गुणश्च तस्मिन् वाजपेयाख्यो विधास्यते इति को दोषः ? § 5393

कथं न दोषः ? अर्थद्वयविधानेन वाक्यभेदप्रङ्गात्— वाजपेयेन स्वाराज्यं कुर्यात् इत्येकोऽर्थः, वाजपेयेन गुणेन यागं कुर्यात् इति द्वितीयोऽर्थः । न च सकृदुच्चरितं वाक्यं अर्थद्वयविधानाय प्रभवति ॥ § 5394

I.688/KSV

## वाक्यभेदस्य दोषत्वोपपादनम्

८ त् ] गुण इति । अत्र आद्यवाक्यत्रयविषयकाणां त्रयाणामप्यधिकरणानां गुणविधित्वपूर्वपक्षसाम्यात्तानि क्रोडीकृत्यात्र एकपूर्वपक्षः प्रदर्शितः । तत्र उद्भिद्यते भूमिरनेनेति उद्भित्—खनित्रम् । प्रकरणप्राप्तं ज्योतिष्टोममनूद्य खनित्रगुणविधिरिति पूर्वपक्षः । एवं अग्नीषोमीयपशुमनूद्य चित्रात्वस्त्रीत्वरूपगुणविधिरिति द्वितीयाधिकरणपूर्वपक्षः । एवं अग्नये होत्रं अस्मिन्निति अग्निहोत्रपदेन अग्निदेवतारूपो गुणः दर्विहोममनूद्य विधीयत इति तृतीयाधिकरणपूर्वपक्षः ॥

९ दा ] भावार्थः—यजिधात्वर्थः । यजिः—यज्ञः, ईक्षणस्य ईक्षतिपदेन निर्देशवत् ॥

१३ इति ] इति गुणविधिः यथा प्रवर्तत इति शेषः ॥

१४ * ] एवमधिकरणत्रयमपि क्रोडीकृत्य पूर्वपक्षवर्णनात्, एतदधिकरणत्रयोपर्याक्षेपेण प्राप्तं वाजपेयाधिकरणं १-४-६ त्रयसाधारणतया प्रदर्शयति— नन्विति । गुण इति । वाजं—अन्नं, पेयं—सुरा । तदुभयमित्यर्थः ॥

१५ इति ] को दोष इति । तथा च उद्भिदादिस्थलेऽपि गुणविशिष्टयागविधिरेवास्त्विति पूर्वपक्षाशयः ॥ nI.687/KSV

१ विधानेन ] यागस्याप्राप्तत्वात् यागोऽप्यनेनैव वाक्येन वाजपेयेन यागेन स्वर्गं भावयेत् इति विधेयः । एवं वाजपेयाख्यगुणस्याप्यप्राप्तत्वेन वाजपेयेन यागं भावयेत् इति अनेनैव वाक्येन गुणोऽपि विधेयः । यजेत इति पदं तु सकृदेव श्रूयते । सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति न्यायेन यजतिधात्वर्थस्य स्वर्गसाधनत्वं वा वाच्यं, वाजपेयसाध्यत्वं वा वाच्यम् । पुनरावृत्तिकरणे च वाक्यद्वयं स्वतन्त्रमेवेषितव्यम् । वाक्यप्रवृत्तिशैली तु नात्रानुकूलेति भावः ॥

* ननु ! यजेत इति रूपसाम्यात् उभयत्रापि सम्बध्यते यजेत स्वाराज्यकामः वाजपेयेन च इति तुल्यमस्योभयत्रापि रूपम्—न—रूपसाम्यस्यासिद्धत्वात् । स्वाराज्यं प्रति यजिरप्राप्तत्वात् विधीयते, गुणं च प्रति प्राप्तत्वात् अनूद्यते । अनवगते च कर्मणि गुणविधानमघटमानमिति अवश्यं गुणविधिपक्षे गुणं प्रति यजिः प्राप्तत्वादुद्देश्यो भवति, प्रधानं च । स एव स्वाराज्यं प्रति विधेयत्वात् उपादेयो गुणश्चेति विरुद्धरूपापत्तेः, न यजिरुभाभ्यां युगपत् सम्बद्धुमर्हति । यः स्वाराज्यं साधयितुमिच्छेत्, स यजेतेत्यन्यद्रूपम्; यद्यजेत, तत् वाजपेयेनेत्यन्यद्रूपम् । तस्मात् भावार्थप्राप्तौ प्रमाणान्तरापेक्षणात् गुणविधिपक्षे तत् अप्रमाणं वचनम् ॥ § 5395

## उद्भिदादिपदानां नामधेयत्वे वैफल्यम्

अथैष दोषो मा भूदिति नामधेयपक्ष आश्रीयते; तदैषामुद्भिदादिपदानां विस्पष्टमेवानर्थक्यम् । यावदेवोक्तं भवति यजेत इति, तावदेव वाजपेयेन यजेत इति । एवमानर्थक्यात् अन्यत्राप्यसमाश्वासः ॥ § 5396

I.689/KSV

## उद्भिदादिपदानां नामधेयत्वसिद्धान्तः

अत्रोच्यते—गुणविधिपक्षे यथा भवानाह, तथैव । नामधेयपक्ष एव तु श्रेयान् इत्यभ्युपगम्यते । तथा हि—भावार्थस्य फलं प्रति करणत्वात् तत्सामानाधिकरण्येन तृतीया प्रयुज्यते । तत्र वाजपेयेन इति, साध्यश्च भवन् भावार्थः करणभावमनुभवतीति । साध्यत्वापेक्षया तत्सामानाधिकरण्येन क्वचित् द्वितीयाऽपि प्रयुज्यते— अग्निहोत्रं जुहोति इति ॥ § 5397

## उद्भिदादिनाम्नां न विधानम्

२--३ ] वाजपेयेनेति— nyāma-wit_kha

६ ] युज्यते— nyāma-wit_ka

४ *] ननु यजतीत्यत्रास्ति अंशद्वयम्—धातुः, आख्यातश्च । भूतार्थवाचिना धातुना सिद्धः यागः स्वर्गसाधनत्वेन बोध्यते । आख्यातेन च भाव्यत्वेन स एव बोध्यत इति गुणान्वयसंभव इति न दोष इति शङ्कते—नन्विति । रूपसाम्यात्, शब्दस्वरूपस्यैक्यप्रयुक्तात् । असिद्धत्वमेवोपपादयति—स्वाराज्यमित्यादिना । यदा च यागः स्वर्गार्थं विधीयते, तदा तत्र अपूर्वत्वं, विधेयत्वं, प्राधान्यं इति त्रयो धर्माः संभवन्ति । यदा च वाजपेयगुणविधानं, तदा यागे प्राप्तत्वं, अनुवाद्यत्वं, अप्राधान्यं=गुणत्वं इति त्रयो धर्माः तत्रैव भवन्ति । एते च परस्परविरुद्धा इति स्वरूपत एव ज्ञायते । अतः एकदा स्वरूपविधिः, गुणविधिः इत्युभयमपि सर्वथा न संभवत्येव ॥

१४ म] आनर्थक्यम्—न हि नामधेयनिर्देशमात्रात् यागस्वरूपे कश्चन अतिशयः प्राप्नोति ॥

१५ क्यात्] अन्यत्र—इतरवैदिकवाक्येष्वपि एवमेवानर्थत्वशङ्काप्रसङ्गः ॥

ननु ! गुणवन्नामापि विधातव्यमेव, अनभिहितस्यानवगमात् । ततश्च गुणविधिपक्षस्पृशः वाक्यभेदादिदोषाः तदवस्था एव— नैतदेवम्—*न ह्यस्य कर्मणः इदं नाम वेदितव्यमिति संज्ञासंज्ञिसम्बन्धं वेदो विदधाति । योगेन तु केनचित् प्रवर्तमानं नामधेयमवगम्यत एव । उद्भेदनमनेन पशूनां क्रियत इति उद्भिदिदम् ॥ § 5398

दधिमधुपयोघृतं धानास्तण्डुला उदकं तत्संसृष्टं प्राजापत्यम् इति नानाविधविचित्रद्रव्यसाध्यत्वात् चित्रा ॥ § 5399

अग्नये होत्रमस्मिन्नित्यग्निहोत्रम् ॥ § 5400

यथा वै श्येनो निपत्यादत्ते, एवमनेन द्विषन्तं भ्रातृव्यमादत्तेषड्विं. ब्रा. ३-८इत्यर्थवादात् श्येन इव श्येनो यागः ॥ § 5401

वाजं—अन्नं पीयते अस्मिन्निति वाजपेयो यागः । तस्मात् कर्मनामान्येतानि ॥ § 5402

I.690/KSV

## नामधेयपरत्वे पूर्वोक्तानर्थक्यशङ्कानिरासः

यत्तु नामधेयपक्षे नैरर्थक्यमाशङ्कितं—तदपि न चारु—नामापि गुणफलोपलब्धेः अर्थवदित्यभियुक्तैः परिहृतत्वात् । एवंनामेदं कर्मेत्यवगम्यते । तत्र गुणः द्रव्यदेवतादिः । फलं च तस्य स्वर्गः पश्चादवगम्यत इति । तस्मान्नामधेयपदानामविरुद्धोऽन्वयः ॥ § 5403

## क्वचित् वाक्यभेदपरिहाराय विशिष्टविधिः

क्वचित्पुनरप्राप्ते भावार्थे सगुणमेव तत्कर्म चोद्यते । यथा— *आग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाऽच्युतो भवति तै. सं.

१८ ] इत्यर्थवादाः—
nyāma-wit__ka

७ *] न हीति । अत्रेदं शाबरं भाष्यं—न नामधेयं विधायिष्यते । अनुवादा ह्युद्भिदादयः । कुतः प्राप्तिरिति चेत्—उच्छब्दसामर्थ्यात् मिच्छब्दसामर्थ्याच्चोद्भिच्छब्दः क्रियावचनः । उद्भेदनं—प्रकाशनं पशूनामनेन क्रियत इत्युद्भित् यागः शा. भा. १-४-१ इति । अयमेव न्याय उत्तरत्रापि योजनीयः ॥

१९ भियुक्तैः ] अभियुक्तैरिति । नामापि गुणफलोपबन्धेनार्थवत् शा. भा. १-४-१ इति भाष्यम् । एवंनामकोऽयं यागः, एतद्गुणकः, एतत्फलकः—इति रीत्या गुणफलाद्यन्वयार्थत्वेन नाम्नः सार्थक्यम् । यदि नामैव न स्यात्, तदा कस्य को गुणो विधेयः स्यात्, फलं वा ॥

२ *] आग्नेय इति । अत्र आग्नेयपदं किं गुणपरम् ? उत कर्मनामधेयमिति संशय्य, अप्राप्ते शास्त्रमर्थवत् इति न्यायमनुरुध्य—तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः जै. सू. १-४-९ इतिन्यायेनोभयविधिरिति सिद्धान्तितम् । एवं एतस्यैव रेवतीषु इत्यत्र एतस्यैवेति प्रकरणप्राप्तं अग्निष्टुतमनूद्य पशुफलाय रेवतीऋक्सम्बन्धिवारवन्तीयसामगुणकत्वं विधीयते ? उत तादृशगुणविशिष्टः अपूर्वः यागः विधीयत इत्याशंक्य, तादृशगुणविशिष्टं कर्मान्तरमेव विधीयत इति सिद्धान्तितम् जै. सू. २-२-१२ ॥

२-६-३ इति । यथा वा एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत ता. ब्रा. १७-७-१ इतीत्यलं श स्त्वान्तरोद्गारगहन-कथाविस्तरेणेति नास्ति नामधेयद्वारेणापि प्रमाणताऽऽक्षेपः । सर्वप्रकारेणापि सिद्धं वेदप्रमाणत्वमिति ॥ § 5404

वेदप्रामाण्यसिध्यर्थमित्थमेताः कथाः कृताः ।
* न तु मीमांसकच्छातपारमिथ्याभिधानतः ॥ १४३ ॥§ 5406

I.691/KSV

## पदानां कार्य एवार्थे व्युत्पत्तिः ? उत सिद्धेऽपि

ननु ! एवं विध्यर्थवादमन्त्रनामधेयानां कार्योपयिकत्वदर्शनात् कार्य एवार्थे वेदः प्रमाणमित्युक्तं स्यात् । ततः किम् ? § 5407

सिद्धेऽर्थे तस्य प्रामाण्यं हीयते ? § 5408

ततोऽपि किम् ? § 5409

भूयान् भूतार्थाभिधायिग्रन्थराशिरुपेक्षितो भवेत् । सकलस्य च वेदस्य प्रामाण्यं प्रतिष्ठापयितुमेतत् प्रवृत्तं शास्त्रम् ॥ § 5410

## कार्य एव पदानां व्युत्पत्तिरिति मीमांसकरीत्या पूर्वपक्षः

अत्र केचिदाहुः—सर्वस्यैव वेदस्य कार्येऽर्थे प्रामाण्यम्— तथा हि— गृहीतसम्बन्धः शब्दः अर्थमवगमयति । सम्बन्धग्रहणं चास्य वृद्धव्यवहारात् । वृद्धानां च व्यवहारः पानीयमानय, गां बधान, ग्रामं गच्छ इति कार्यप्रतिपादकैरेव शब्दैः प्रवर्तत इति तत्रैव व्युत्पद्यन्ते बालाः । प्रयोजनोद्देशेन हि वृद्धा वाक्यानि प्रयुञ्जते । न च सिद्धार्थाभिधायिना प्रवृत्तिनिवृत्ती अनुपदिशता शब्देन किञ्चित् प्रयोजनमभिनिर्वर्तत इति तस्य न प्रयोगयोग्यत्वम् । अप्रयुज्यमानस्य च न सम्बन्धग्रहणम् । अगृहीतसम्बन्धस्य च न प्रतिपादकत्वम् । अप्रतिपादकस्य च न प्रामाण्यम् ॥ § 5411

---

८ ] न्तरोक्त— nyāma-wit__kha
९ ] प्रामाण्या— nyāma-wit__kha
१२ ] ख्यातिं प्राप्ताऽस्मीत्यभिमानतः— nyāma-wit__kha
९ ] गम्यत्वम्— nyāma-wit__ka

---

८ *] न त्वित्यादि । छातं—छिन्नं पारं येन, सः छातपारः, भिन्नमर्याद इत्यर्थः । मीमांसकेषु अयं मर्यादोल्लङ्घीति मिथ्याभिधानतः इत्यर्थः । मीमांसकानां मर्यादां भेत्तायमिति वृथाख्यात्यर्थं न कथाः कृता इति यावत् ॥
१३ भूयान्] भूतार्थः—सिद्धार्थः । कार्यं—भव्यं, सिद्धं—भूतमिति व्यवहारः ॥
१४ म्] एतच्छास्त्रं—न्यायशास्त्रम् ॥
२ गृहीत] सम्बन्धः—शक्तयाख्यः ॥
५ सिद्धार्थाभिधायिना] प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयतेश्लो. वा. १-१-५, शब्द. ४ इति भट्टः ॥
८ च] न प्रामाण्यमिति । प्रमाकरणं हि प्रमाणम् ॥

## क्रियारहितं वाक्यं प्रयोक्तुं नार्हम्

अपि च आख्यातपदोच्चारणमन्तरेण निराकाङ्क्षप्रत्ययानुत्पादात् अव- I.692/KSV श्यमाख्यातयुक्तं वाक्यं प्रयोक्तव्यम् । आख्यातपदेन च साध्यरूपोऽर्थ उच्यते । नामपदेन च सिद्धः । भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति वाक्यस्य साध्यार्थनिष्ठतेति न भूतार्थविषये तस्य प्रामाण्यम् । अतश्च कार्येऽर्थे शब्दस्य प्रामाण्यम्, यतश्च कार्यरूपोऽर्थः शब्दस्यैव विषय इति तत्र शब्दः प्रमाणतां लभते । सिद्धोऽर्थः प्रसिद्धत्वादेव प्रमाणान्तरपरिच्छेदयोग्य इति तत्प्रतिपादने तत्प्रमाणान्तरसव्यपेक्षः शब्दो भवति । ततश्च तद्ग्राहिणः प्रमाणान्तरस्यैव तत्र प्रामाण्यं स्यात्, न शब्दस्य । शब्दश्च तदुपस्थापनमात्र एव निष्ठः स्यात् । तस्मात् शब्दप्रामाण्यमिच्छता कार्य एवार्थे तत्प्रामाण्यमङ्गीकर्तव्यमिति ॥ § 5412

## सिद्धेऽपि पदानां व्युत्पत्तिरिति सिद्धान्तः

अत्रोच्यते—यत् ब्रूषे कार्य एवार्थे वाक्यस्य व्युत्पत्तिरिति— तदयुक्तम् । *एवं हि सिद्धरूपोऽयं तस्यार्थः इति कथं त्वयोच्यते ? न ह्यलब्धव्युत्पत्तेः शब्दात् अर्थप्रत्ययो युज्यते । अर्थप्रतीतिश्च ततो दृश्यते, व्युत्पत्तिश्च तत्र नास्तीति चित्रम् ! § 5413

न च कार्यपरैरेव शब्दैः लोके व्यवहारः; वर्तमानोपदेशकेभ्योऽपि नद्यादिवाक्येभ्यः व्यवहारप्रवृत्तेः तत्रापि व्युत्पत्तिर्भवत्येव ॥ § 5414
I.693/KSV

## कार्योपदेशाभावेऽपि व्युत्पत्तिः

अपि च अङ्गुल्यादिना पुरोऽवस्थितमर्थं निर्दिश्य यदा कश्चित् कथयति अस्येदं नाम इति तदा कार्योपदेशमन्तरेणापि भवत्येव व्युत्पत्तिः ।

१३ ] पदेन— nyāma-wit_kha
१४ ] नामधेय— nyāma-wit_kha
१७ ] न च— nyāma-wit_kha
१७ ] लभते— nyāma-wit_ka
५--६ ] पदेशकेभ्यः— nyāma-wit_kha

११ णे ] भूतं भव्यायेति । घटमानय इत्यादौ हि घटपदं आनयनरूपक्रियाशेषभूतमेव । आनयनं न सिद्धं, अतः तत् साध्यं—भव्यं च । घटस्तु पूर्वमेव सिद्धः—भूतश्च ॥
१४ त्वादेव ] प्रमाणान्तरं—प्रत्यक्षादि ॥
१७ श्च ] तदुपस्थापनं—आनयनशेषतया घटसमर्पणम् ॥
२० * ] एवं हीत्यादि । घटः सिद्धः इति यदा उच्यते, तदा तस्य वाक्यस्य सिद्धवस्तुबोधकत्वं सिद्धमेव ॥
३ भ्योऽपि ] नद्यादिवाक्यम् । नद्यास्तीरे फलानि सन्ति इति वाक्यम् ॥

अस्माच्छब्दादयमर्थः प्रतिपत्तव्यः इति कार्योपदेश एवासाविति चेत्—न, तादृशानामक्षराणामश्रवणात् । अस्येदं नाम इति हि श्रूयते, न अस्मादयं प्रतिपत्तव्यः इति । अस्येदं नाम इत्येषामेवाक्षराणां एषोऽर्थ इति चेत्—न—अपदार्थस्य क्यार्थत्वायोगात् । न चैवं कल्पयितुमपि शक्यते, अस्येदंन म इत्येतावतैव तत्प्रतिपत्तिसिद्धेः प्रतिपत्तिकर्तव्यताऽभिधानस्य निष्प्रयोजनत्वात् ॥ § 5415

कार्यपरादपि शब्दात् व्युत्पत्तिर्भवन्ती न वाक्यार्थमात्रपर्यवसायिनी भवति; *किन्त्वेकैकपदावापोद्वापद्वारकपदार्थपर्यन्ता सा भवति । पदार्थव्युत्पत्तिसंस्कृतमतेश्च अभिनवकविविरचितवर्तमानोपदेशश्लोकश्रवणेऽपि वाक्यार्थप्रतीतिर्दृश्यत एवेति नाव्युत्पत्तिकृतमप्रामाण्यम् ॥ § 5416

न चासौ भूतार्थप्रतिपादकशब्दजनिता प्रतीतिः बाध्यते, सन्दिग्धा वा; येन प्रत्यक्षादिप्रमाणान्तरकरणकप्रतीतिवत् प्रमाणफलमेव सा भवितुमर्हति ॥ § 5417

## शब्दस्य प्रमाणान्तरसापेक्षत्वम् गुण एव

यत्पुनरभ्यधायि—कार्येऽर्थे प्रमाणान्तरनिरपेक्षतया प्रमाणं भवति शब्दः, भूतार्थे तु नेति—तदसत्—शब्दस्य प्रमाणान्तरसापेक्षत्वानपायात् ।
I.694/KSV प्रमाणान्तरेणानवगते ह्यर्थे शब्दः प्रवर्तयितुमेव न शक्नोति इत्यवोचाम पु. ४८१ । वक्ष्यामश्च वाक्यार्थचिन्तायामपि ५ आह्निके । प्रमाणान्तरसापेक्षत्वं तस्य *प्रत्युत प्रामाण्यमावहति, न प्रतिहन्ति ॥ § 5418

## प्रमाणान्तरसापेक्षत्वं नाप्रामाण्यावहम्

* किञ्चेदं सापेक्षत्वमिति वक्तव्यम् । किं सिद्धार्थाभिधायिनः शब्दस्य उत्पत्तावेव प्रमाणान्तरसापेक्षत्वम् ? उत तद्विषयस्य प्रमाणान्तरपरिच्छेदयोग्यत्वम् ? इत्युभयथाऽतिप्रसङ्गः । उत्पत्तौ प्रमाणान्तरसव्यपेक्षतया यद्यप्रामाण्यं वर्ण्यते हन्त ! हतमनुमानम्, तस्योत्पत्तौ प्रत्यक्षादिसापेक्षत्वात् ।

---

९ ] चेत्— nyāma-wit__kha
११ ] न चार्थ— nyāma-wit__ka
६०९.२--६१०.३ ] न सिद्धऽर्थे प्रमाणान्तरसापेक्षत्वादिति तदसत्— nyāma-wit__kha
५ ] आवहति— nyāma-wit__kha

---

११ स्य ] निष्प्रयोजनत्वात्—प्रमाणतन्त्रं हि ज्ञानं, न पुरुषतन्त्रम् । अतः जानीहि इति विधिमात्रेण न ज्ञानमुत्पद्येत ॥
१४ * ] किन्त्वित्यादि । प्रत्येकं पदैरर्थोपस्थित्यनन्तरं हि वाक्यार्थः जायेत । तदा प्रत्येकं सिद्धपदेनापि बोधः अनुभूयत एव ॥
१५ चित ] वर्तमानोपदेशेति । सिद्धार्थप्रतिपादकेत्यर्थः ॥
१८ येन ] प्रत्यक्षं—इन्द्रियम् । तत्करणकः संशयादिः न प्रमाणम् ॥
३ * ] प्रमाणान्तरावगतमेव यदा बोधयति, तदा संवादयत् प्रामाण्यं दृढीभवति ॥
४ * ] किं—कीदृशम् ॥

वर्णितं च तत्पूर्वकं त्रिविधमनुमानम् न्या. सू. १-१-५ इति । तद्विषयस्य प्रमाणान्तरग्रहणायोग्यतायां तु तदप्रामाण्ये, प्रत्यक्षादीनां सर्वेषां अप्रामाण्यं प्राप्नोति, *प्रमाणसंप्लवस्य प्राक् पु. ८७ प्रतिपादितत्वात् ॥ § 5419

## विधिवाक्यानां कार्यपरत्वमसंभवि

अपि च विधियुक्तेष्वपि वैदिकेषु लौकिकेषु वाक्येषु अधीष्व, गां वधान, ग्रामं गच्छ इत्येवमादिषु अन्वयव्यतिरेकाभ्यां हिताहितप्राप्तिपरिहारसाधनसामर्थ्यावगमेन प्रवृत्तिसिद्धेः विनियोगमात्रनिष्ठ एव विधिर्भव-
I.695/KSV ति । अप्रवृत्तप्रवर्तनात्मकनिरपेक्षनिज व्यापारवैधुर्यात् कार्यपरत्वानुपपत्तेः अनुवादमात्रं विधिवचनमिति कार्यार्थप्रामाण्यवादिनां सर्वमेव लौकिकं वाक्यं अप्रमाणं स्यात् ॥ § 5420

## सिद्धपरवाक्येषु विधिकल्पनमपि न युक्तम्

ये तु भूतार्थवादिषु लौकिकवाक्येषु प्रवृत्तिनिवृत्तिकारिषु विधिनिषेधौ कल्पयन्ति ते नितरामृजवः—श्रूयमाणोऽपि विधिः अनुवादीभवति यत्र, तत्राश्रुतः कल्प्यत इति किमन्यदतः परमार्जवम् ? प्रवृत्तौ तु तत्र विधिरप्रयोजक एव; अन्वयव्यतिरेकाभ्यां पुरुषार्थसाधनसामर्थ्यावगमात्, *पुरुषप्रत्ययाद्वा लोकेषु प्रवृत्तिसिद्धेः ॥ § 5421

## शब्दात् वक्तृतात्पर्यानुमानपक्षनिराकरणम्

तत्रैतत्स्यात्—लौकिकवाक्यानां विवक्षापरत्वात् न कार्यार्थत्वम् । यथोक्तं—अपि च पौरुषेयाद्वचनात् एव मयं पुरुषो वेदेति भवति प्रत्ययः, नैवमर्थतेति । वैदिकानि पुनः मपौरुषेयतया कार्यपराण्येव वाक्यानि इति—एतदपि न पेशलम्—अपौरुषेयस्य वचसः प्रतिक्षिप्तत्वात् । वेदेऽपि कर्तुरीश्वरस्य साधितत्वात् ॥ § 5422

---

१ ] प्रवृत्ति— nyāma-wit__kha
६--७ ] अपि च— nyāma-wit__kha
८ ] मर्थप्रती— nyāma-wit__kha

---

१० *] प्रमाणसंप्लवस्येति । तथा च प्रत्यक्षमपि प्रमाणान्तरप्रहणयोग्यं गृह्णात्येव ॥
१३ वृत्तिसिद्धेः] विनियोगमात्रेति । न हि शतशः विधिश्रवणमात्रेण पुरुषः स्वेष्टसाधनत्वानिष्टनिवारकत्वज्ञानमन्तरा प्रवर्तते । अतः विधिः न साक्षात्प्रवर्तयितुमलमिति कार्यपरत्वेऽपि तदंशेऽनुवादकत्वमेव ॥
१८ वः] ऋजवः इति उपहासोक्तिः ॥
२० *] पुरुषप्रत्ययात्—वक्तुः पुरुषस्याप्तत्वज्ञानात् ॥
२ एव] अयं पुरुषः—शब्दप्रयोक्तृपुरुषः । एतादृशार्थयोधनेच्छया इमं शब्दं अयं प्रयुक्तवानिति ह्यस्ति व्यवहारः ॥

न च पुरुषवचनमपि विवक्षापरमिति दर्शितम् । तथा हि— न विवक्षा वाक्यार्थः, देवदत्त ! गामभ्याज कृष्णां दण्डेन इति पदग्रामे विवक्षावाचिनः पदस्याश्रवणात् । *अपदार्थस्य वाक्यार्थत्वानुपपत्तेः । न च विषयभक्षण-वाक्यस्येव परगृहे भोजननिवृत्तौ, पौरुषेयवचसः विवक्षायां तात्पर्यशक्तिरपि I.696/KSV
प्रभवति । न हि सर्वात्मनाऽभिधात्रीं शक्तिमवधीर्यैव तात्पर्यशक्तिः प्रसरति इति न विवक्षापरत्वम् ॥ § 5423

## अनुमानादेव वक्तृतात्पर्यनिश्चयः

कथं तर्हि पुरुषवचनादुच्चारितात् विवक्षावगम इति चेत्, अनुमानादिति ब्रूमः । कार्यत्वात् पदरचनायाः पुरुषेच्छापूर्वकत्वमनुमीयते । अर्थावगम-पुरस्सरं च पुरुषवचनात् विवक्षानुमानं— एवमयं वेद, एवमयं विवक्षति इति । अर्थोपरागरहितस्य विवक्षामात्रस्य *जीवतां निसर्गत एव सिद्धेः । अयमर्थोऽस्य विवक्षितः इत्यर्थोपरज्यमाना तु विवक्षा न शक्या अर्थेऽनव-गतेऽवगन्तुम् । अर्थश्चेत् प्रथममवगतो वाक्यात्, न तर्हि तत् विवक्षापरम्, अर्थपरमेव भवितुमर्हति । लोकवाक्यानां विवक्षापरत्वे बाह्येऽर्थे सम्बन्ध-ग्रहणासंभवात् वेदादपि वाक्यार्थावगमो न स्यादित्यलं प्रसङ्गेन ॥ § 5424

तस्मान्न कार्यपरत्वेनैव शब्दस्य प्रामाण्यम् ॥ § 5425

## कार्यान्वयरहितवाक्यानामप्यस्ति प्रामाण्यम्

यत्पुनरभाणि—नाख्यातशून्यं वाक्यं प्रयोगार्हम् । तेन विना नैराकाङ्क्ष्यानुपपत्तेः । आख्यातस्य च भव्यरूपः अर्थः, न नाम्न इव भूतः । भूतभव्यसमुच्चारणे च भूतं भव्यायोपदिश्यत इति सर्वत्र कार्यपरत्वमिति—त-
I.697/KSV दपि न सांप्रतम्—पुत्रस्ते जातः, कन्या ते गर्भिणी इति सुखदुःखकारिणां अनुपदिष्टप्रवृत्तिनिवृत्तिकानां अनाख्यातानामपि वाक्यानां लोके प्राचुर्येण प्रयुज्यमानत्वात् ॥ § 5426

१६ ] इति— nyāma-wit__ka
१ ] मात्र— nyāma-wit__ka
१ ] निसर्ग— nyāma-wit__ka
२ ] मर्थो— nyāma-wit__kha
२ ] न— nyāma-wit__ka

८ *] पदैस्तथाऽबोधनेऽपि आहत्य वाक्येनास्त्वत्यत्राह—अपदार्थस्येति ॥
८ च] परगृहे भोजनतो विषभक्षणमेव वरम् इति वाक्येन हि विषभक्षणं न विधेयम्, किन्तु परगृहभोजननिषेध एव । स च न पदा[illegible] nI.696/KSV [illegible]पिवाक्यैर्बोध्यत इति कथमिति चेत्—न हि तत्र पदैरर्थप्रतीतिरेव न भवति । पदसंघातरूपात्तु वाक्यात् तावानेव हि बोध्येत । विवक्षाज्ञानं तु पार्ष्णिकमेवानुमानादिति समनन्तरमेव वक्ष्यते ॥
१५ *] जीवतां—चेतनानामिति यावत् । शब्दे श्रुते सति अयं किञ्चिद्विवक्षति इति सामान्यत एव विवक्षाऽनुमातुं शक्या, न तु अर्थोपरागेण । अर्थस्य शाब्दबोधाधीनत्वेन, तत्पूर्वं अर्थोपरागासंभवादित्यर्थः ॥
१८ बाह्येऽर्थे] लोकतोऽवगतपदपदार्थव्युत्पत्तिकाः खलु वेदादप्यर्थं प्रतिपद्येयुः ॥

## प्रमाणतन्त्रस्य ज्ञानसुखादेर्न विधिसंभवः

अथ सुखी भव, दुःखी भव इति तत्र कार्यपरत्वं व्याख्यायते—तदपि न युक्तम्—ईदृशानामक्षराणामश्रवणात्; कल्पनायाश्च निष्फलत्वात् । न हि सुखी भव इत्युपदेशात् असौ सुखी भवति; सुखीभवितुं वा क्वचित् प्रवर्तते । *उपाये पूर्वमेव प्रवृत्तत्वात् । * उपेये च प्रवृत्त्यनुपपत्तेः । किन्तु पुत्रजन्मश्रवणत एवासौ सुखीभवति ॥ § 5427

तथा कस्यचित् उत्तरीयावगुण्ठिततनोः निद्रायमाणस्य क्वचित् केनचित् केलिना रज्जुवेष्टितवपुषः, पश्चात्प्रबोधसमये सहसा सरीसृपवलितमात्मानं मन्यमानस्य भयादनुन्मीलितचक्षुषः केनचित्प्रयुज्यमानं रज्ज्वा वेष्टितोऽसि इति वचः श्रवणपथमवतरति, तत् सिद्धार्थबोधकमपि प्रमाणम् । न च तत्र मा भैषीः इति प्रयोगकल्पनायाः प्रयोजनम्; रज्जुवेष्टनप्रत्ययादेव भय-निवृत्तेः सिद्धत्वात् ॥ § 5428

तथा च विषमविषधराधिष्ठितोऽयमध्वा, निधियुक्तोऽयं भूभागः इति भूतार्थख्यापकं वचो दृश्यते; न च तदप्रमाणम् । न च तत्र मा गाः त्वम-नेनाध्वना, निधिं गृहाण इति विधिनिषेधपरत्वं युक्तम्, एषां पदानामश्रवणात् ॥ § 5429

## सर्वत्र कार्यपदाध्याहारः नापेक्षितः

ननु ! वक्तुः प्रेक्षापूर्वकारितया निष्प्रयोजनवचनानुच्चारात् अवश्यं मा गाः, गृहाण इति कार्याक्षराणि हृदये परिस्फुरन्ति । कथञ्चिदालस्यादिना I.698/KSV नोच्चरितानीति—नैतद्युक्तम्—*प्रेक्षापूर्वकारि त्वादेव वक्तुः यथाऽवस्थितव-स्तुस्वरूपभात्रख्यापकवचनोच्चारणमेव युक्तम्; अर्थात् प्रवृत्तिनिवृत्त्योः सिद्ध-त्वात्; पराभिप्रायस्य चानवस्थितत्वेन नियतोपदेशानुपपत्तेः । सर्पबन्धजीविनो हि सपन्नग एव पन्था उपादेयतयाऽवभाति । वीतरागस्य च ब्रह्मविदः वित्तेष-णाव्युत्थितस्य गोविन्दस्वामिन इव निधिरपि हेयतया परिस्फुरतीति कस्मै किमुपदिश्यताम् ? वस्तुस्वरूपे तु कथिते यथाहृदयवर्तिरागद्वेषानुवर्तनेन कश्चित्तत्र प्रवर्तताम् ! कश्चित्ततो निवर्तताम् ! इति भूतार्थकथनमेव लोके प्रेक्षावान् करोति, न विधिनिषेधौ प्रयोक्तुमर्हतीति ॥ § 5430

---

१० ] संपन्न— nyāma-wit__ka

---

१० *] उपायः—सुखदुःखहेतुवाक्यश्रवणम् ॥

nI.698/KSV १० *] उपेयं—फलं सुखं दुःखं वा । नैतत् विधेयम्, पुरुषानधीनत्वात् ॥

२४ *] प्रेक्षापूर्वकारित्वादेवेति । कदा कार्यपदं प्रयुक्तं चेत् सफलं भवेत् ? कदा च प्रयोगाप्रयोगयोरविशेषः ? इत्यादिज्ञानवत्त्वादेव तादृशस्थले न कार्यपदं प्रयुङ्क्त इत्यर्थः । न चान्ततः तत्र सन्ति इति वा क्रियापदमध्याहार्यमिति वाच्यम्; सत्तायाः सिद्धत्वेन क्रियात्वाभावात् । सन्तीति प्रयोगस्तु अनुवाद एव, असत्त्वशङ्कावारणायैव, नान्या क्रिया तत्र बोध्यत इति ॥

## सर्वत्र ज्ञानविधानपक्षोऽपि अत एव निरस्तः

येऽपि ब्रुवते—*सर्वत्र प्रतिपत्तिकर्तव्यताविधानमेवादौ वेदितव्यम्; अविधिकस्य वाक्यस्य प्रयोगानर्हत्वादिति—तेऽपि न साधु बुध्यन्ते—विदित-शब्दार्थसम्बन्धस्य पुंसः शब्दश्रवणे सति प्रतिपत्तेः स्वतः सिद्धत्वेन अनुप-देश्यत्वात् । असिद्धायां वा प्रतिपत्तौ प्रतिपत्तिकर्तव्यताऽपि कुतः प्रतीयेत ?
§ 5431

## कार्यद्वारैव पदार्थानां सम्बन्धभानमिति न नियमः

ननु ! कार्यार्थप्रतिपादकं पदमन्तरेण पदान्तराणि संसर्गमेव *न भजन्ते, कार्याकाङ्क्षानिबन्धनत्वात् सम्बन्धस्य । तेन सर्वत्र कार्यं परत्वम्—उच्य- I.699/KSV
ते—नैष नियमः, कार्याकाङ्क्षागर्भ एव सर्वत्र सम्बन्ध इति; वर्तमानाप-देशकानामपि प्रेक्षापूर्वकारिवाक्यानां इतरेतरसंसृष्टार्थप्रतीतिजनकत्वदर्शनात् । न हि दशदाडिमादिवाक्यसदृंशि वर्तमानापदेशीनि वचांसि भवन्ति । कार्यनिबन्धने हि सम्बन्धे तद्रहितानामनन्वय एव स्यात् । दर्शितश्चान्वयः पूर्वोदाहृतवाक्यानाम् ॥ § 5432

## कार्यवाक्येऽपि सर्वेषां पदानां न क्रियान्वयनियमः

अपि च लिङन्तपदयुक्तेऽपि वाक्ये पदान्तरार्थानां परस्परमन्वयो दृश्यत एव । स कथं समर्थयिष्यते ? § 5433

कार्याकाङ्क्षानिबन्धने हि कार्ये सर्वेषामन्वयः, न परस्परमिति ब्रुव-न् ब्रूयात्—सर्वथा कार्यसंबन्धे प्रथममवगते सति पश्चादरुणैकहाय-नीन्यायेन वाक्यीयः परस्परान्वयोऽपि सेत्स्यतीति—हन्त तर्हि परस्परान्वये

---

१०--११ ] अथ ब्रूयात्—
nyāma-wit__kha

---

८ *] सर्वत्रेति । उक्तक्रमेण प्रेक्षावतः तावत्येव प्रवृत्तेः सर्वत्र तावन्मात्रं विधेयमित्यर्थः ॥

१३ *] न भजन्त इति । प्रत्ययमन्तरा पदं न प्रयुज्यत एव । प्रत्ययाश्च सुबादयः सप्तविधाः तत्तत्कारकपदोपरि भवन्ति । कारकत्वं च क्रियानिर्वर्तकत्वमेव । तथा चैकक्रियान्वयोद्देशेनैव सप्तविधकारकाणि प्रवृत्तानीति कथं कार्यपरित्यागः । परित्यागे वा कथं तेषां कारकत्वमित्याक्षेपः । अन्ततः साधुत्वार्थमपि विभक्तिप्रयोगदर्शनात्, तत क्रियायाः सर्वथाऽप्रतीतेः न कार्यान्वयो नियत इति समाधानाशयः ॥ nI.699/KSV

१७ हि ] दशदाडिमादीति । परस्परानन्वितार्थकानीत्यर्थः ॥

१ वाक्ये ] पदान्तरार्थानां—नीलघटमानयेत्यादौ नीलादिपदार्थानाम् ॥

५ नीन्यायेन ] अरुणैकहायनीन्यायेनेति । अरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति इत्यत्र प्रथमं अरुणया क्रीणाति, एकहायन्या क्रीणाति, पिङ्गाक्ष्या क्रीणाति इतिक्रमेणैव बोधः । विशिष्टबोधस्तु पाष्णिकः इति तैरङ्गीकृतः ॥

कार्याकाङ्क्षाकारणम् ! तर्हि अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति इति द्रव्यगुणयोः विभक्त्या सोमक्रयं प्रति युक्तत्वात्, प्रथमं क्रयसंबन्ध एव तयोर्गम्यते । यश्च पाश्चात्यः परस्परान्वयः, तत्र कार्यपारतन्त्र्यापादिका विभक्तिः अकारणम्; असत्यामपि तस्यां शुक्लः पटः इति सामानाधिकरण्यप्रयोगेणान्वयसिद्धेः । तस्मात् कार्यैक्यनिबन्धनोऽन्वय इति नियमो य उच्यते; स कल्पनामात्रप्रभवः, न प्रमाणवृत्तगम्य इति ॥ § 5434
I.700/KSV

## सिद्धस्य साध्यशेषत्वनिर्बन्धोऽपि नास्ति

यत्तु भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति—अयमपि न सार्वत्रिको नियमः; *विपर्ययस्यापि व्रीहीन् प्रोक्षति इत्यादौ दर्शनात् ॥ § 5435

*अलं वा दर्शपूर्णमासप्रकरणनिवेशानुज्झितकार्यमुखप्रेक्षणदैन्येन व्रीहिप्रोक्षणोदाहरणेन ! आत्मा ज्ञातव्यः इति तु सिद्धपर एव साध्योपदेशः । न ह्यत्र कर्म किञ्चित्साध्यं प्रधानमुपदिश्यते, * अधिकाराश्रवणात् । न च विश्वजिदादिवत् अधिकारकल्पना काचिदुपपद्यते । न च कर्मप्रवृत्तिहेतुत्वं आत्मज्ञानस्येति वक्ष्यामः ९ आह्निके ॥ § 5436

## आर्थवादिकं फलमात्मज्ञानस्य न संभवति

* अर्थवादस्त्वर्थवाद एव, नाधिकारिकल्पनाय प्रभवति । तस्मात् अपहतपाप्मादिगुणयुक्तात्मस्वरूपनिष्ठत्वमेव तत्रावतिष्ठते । तस्मिन्नवगते पुरुषान्त- I.701/KSV

---

१८ ] व्यवस्था— nyāma-wit__kha

२ ] विपर्ययस्येत्यपि— nyāma-wit__ka

३ ] अथवा— nyāma-wit__ka

६ ] दिश्यते— nyāma-wit__kha

---

९ क्तिः ] अकारणमिति । प्राथमिकान्वयबोधजननेनैव हि विभक्तिश्चरितार्था ॥
९ पि ] तस्यां—क्रियायाम् । प्रातिपदिकार्थलिङ्गवचनमात्रे हि प्रथमा ॥
१३ *] विपर्ययस्येति । प्रोक्षणं हि व्रीह्युद्देश्यकम् ॥
१४ *] ननु सर्वेषामपि परमापूर्वरूपकार्यनिष्पत्त्यर्थत्वात् प्रोक्षणं न व्रीह्यङ्गमित्याशङ्क्याह—अलं वेति ॥
१६ *] अधिकाराश्रवणात्—फलकामनावान् ह्यधिकारी । न ह्यत्र फलं किञ्चिदस्ति ॥
१७ च ] कर्मप्रवृत्तीति । शरीरातिरिक्तनित्यात्मज्ञानमन्तरा स्वर्गाद्यर्थकर्मसु प्रवृत्तिर्न हि संभवेत् ॥

१ *] अर्थवाद इति । सर्वमायुरेति, नास्यापरपुरुषाः क्षीयन्ते, य एवं वेद छा. ४-११-२ इत्यादिः आनुषङ्गिकफलपरः । आत्मोपासनस्य फलं हि मोक्ष एव । ननु तर्हि मोक्षकामनावानेवाधिकारी लब्धः—इति चेत्— मोक्षस्य स्वस्वरूपरूपत्वेन साध्यत्वाभावात् । उपासना तु प्रतिबन्धकनिवृत्तावेव पर्यवसन्ना । प्रतिबन्धकनिवृत्तिस्तु न पुरुषार्थ इति आत्मोपासनवाक्यं स्वरूपपरमेव । अधिकमत्राप्रस्तुतम् ॥
२ ते ] पुरुषान्तरं—इन्द्राग्न्यादि । आत्मविद्विषये हि स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति तै. उ. १-५ इति श्रूयते ॥

रप्रार्थनादैन्यानुपपत्तेः स एव ह्युत्तमः पुरुषार्थः । स च सिद्ध एव, न साध्यः । यत्नस्तु कृतबुद्धीनां अविद्योपरमायैवेति व्याचक्षते ॥ § 5437

## आत्मज्ञानस्याविधेयत्वम्

ज्ञातव्यः इति प्रतिपत्तिकर्तव्यतापरोऽयं विधिरिति चेत्—न— प्रतिपत्तेः प्रमितित्वात् । प्रमितेश्च प्रमेयनिष्ठत्वात् । ज्ञातव्यः इति च कर्मणि कृत्यप्रत्ययनिर्देशात् । कर्मणश्च ईप्सिततमत्वात् *तत्परत्वमेवावगम्यते । विधिस्तत्र प्रसरन्नपि क्व प्रसरेत् ? फलं तावत् विधेः न विषय एव । यथाऽऽह भट्टः श्लो. वा. १-१-२-२२२— फलांशे भावनायाश्च प्रत्ययो न विधायकः इति । उपायस्तु ज्ञानमेव । ज्ञानं च ज्ञेयनिष्ठमित्युक्तम् ॥ § 5438

## आत्मज्ञानाङ्गोपदेशोऽपि प्रतिबन्धकनिवृत्तिपर्यवसाय्येव

यस्तु यमनियमादिप्रतिपत्तीतिकर्तव्यताप्रकारोपदेशः, सोऽपि त- I.702/KSV
थाविधात्मरूपाधिगतये सत्यासत्यस्वभावनामरूपप्रपञ्चविलापनद्वारेण तत्रोपयुज्यत इति सिद्धसाध्यम् ॥ § 5439

## सर्वेषामपि कर्मणां आत्मज्ञानाङ्गत्वम्

तिष्ठतु वा यमनियमप्राणायामप्रत्याहारधारणाद्यात्मज्ञानोपयोगीतिकर्तव्यताविधिः ! अन्येऽपि ज्योतिष्टोमादिविधयः तन्निष्ठा एवेति वेदान्तवादिनः । * साध्यस्य सर्वस्य क्षयित्वेनानुपादेयत्वात्, सिद्धस्य ब्रह्मण एव अनाद्यविद्यातीतस्यानपायिनः पुरुषार्थत्वात्, स्तोकस्तोकप्रपञ्चविलापनद्वारेण उत्तमाधिकारयोग्यत्वापादनात् ब्रह्मप्राप्त्यौपयिका एव सर्वविधयः । तथा च मनुः—म. स्मृ. २-२५ § 5440

---

१३ ] इति कर्मणि च— nyāma-wit_kha
१५ ] प्रसरन्— nyāma-wit_kha
४ ] द्वारा— nyāma-wit_kha
७ ] वेदान्तिनः— nyāma-wit_kha

---

६ मितेश्च ] प्रमेयनिष्ठत्वात्—प्रमेयाधीनत्वात्, पुरुषानधीनत्वादिति यावत् ॥
७ * ] तत्परत्वं—आत्मपरत्वम् । आत्मा खल्वीप्सिततमः ॥
१० च ] ज्ञेयनिष्ठमिति । तथा चेदं वाक्यं न कार्यपरमिति सिद्धम् ॥
११ स्तु ] यमेत्यादि । यदि न किञ्चिद्विधेयं, तर्हि—शान्तो दान्तः बृ. ४-४-२३ इत्यादिना उपासनाङ्गविधानं, यमनियमासनप्राणायाम यो. सू. २-२९ इत्याद्यङ्गोपदेशश्च किमर्थः ? किमुद्दिश्यैतानि विधीयन्ते ? इति चेत्, प्रतिबन्धकनिवृत्त्यर्थमेवेत्यर्थः ॥
१२ ये ] सत्यासत्येति—जगतः स्वरूपतः सत्यत्वं, विकारतः असत्यत्वं च वेदान्तिभिः समर्थितम् ॥
२ वादिनः ] वेदान्तवादिन इति । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा बृ. ४-४-२२ इत्यादिना निष्काममनुष्ठितकर्मणां ब्रह्मज्ञानोपयोगित्वमुक्तम् ॥
३ * ] साध्यस्य—प्रयत्नसाध्यस्य ॥

स्वाध्यायेन व्रतैर्होमैः त्रैविद्येनेज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः इति ॥§ 5442

## सर्वविधीनामपि ब्रह्मप्राप्तिपर्यवसायित्वम्

तदेवं सिद्ध एवार्थे वेदस्याहुः प्रमाणताम् ।
सर्वा हि विधयो ब्रह्मप्राप्तिपर्यवसायिनः ॥ १४४ ॥§ 5444

आस्तां वाऽयं विषयः बहु वक्तव्यः, प्रमाणता तु गिराम् ।
सिद्धे कार्ये चार्थे तुल्यैव प्रमितितुल्यत्वात् ॥ १४५ ॥§ 5446

I.703/KSV

## वेदविचारोपसंहारः

* किं तन्त्रता भवति कस्य तयोरितीयं
चर्चा चिराय न महत्युपयुज्यते नः ।
संतोषवृत्तिमवलम्ब्य वयं हि वेद-
प्रामाण्यमात्रकथनाय गृहीतयत्नाः ॥ १४६ ॥§ 5450

प्रामाण्यसाधनविधावुपयोगि यच्च
वक्तव्यमत्र तदवादि यथोपयोगम् ।
वक्तव्यमिष्टमपि किञ्चिदिहाभिदध्मः
तच्छ्रूयतां यदि न धीः परिखिद्यते वः ॥ १४७ ॥§ 5454

---

१--४ ] प्रमाणताम् । सर्वस्तावद्विषयो बहुवक्तव्यः प्रमाणता तु गिराम् nyāma-wit__kha

२ ] आस्तां वाऽयं विषयो— nyāma-wit__ga
१२ ] वा— nyāma-wit__ka

---

७ ज्ञैश्च ] ब्राह्मी—ब्रह्मसम्बन्धिनी ॥
११ * ] किं तन्त्रतेति । भूतं भव्याय वा, भव्यं भूताय वेति इयं चर्चा नातीवप्रयोजना, व्यवहारस्यैतदनधीनत्वात् । तयोः—सिद्धसाध्ययोर्मध्ये कस्य

किन्तन्त्रतेति चिराय चर्चा महति फले नोपयुज्यत इत्यन्वयः ॥ --- इति पण्डितरत्नेन विदुषा वरदार्येण विरचिते न्यायसौरभे चतुर्थमाह्निकम्

इति श्रामज्ञयन्तभट्टकृतौ न्यायमञ्जर्था चतुर्थमाह्निकम्

# २ भागः २ : द्वितीयसंपुटः

II.3/KSV

## २.१ पञ्चममाह्निकम्—शब्दपरीक्षा : जात्यङ्गीकाराक्षेपः

*प्रपन्नाय विपन्नानां दुःखितानां सुखात्मने ।
संपूर्णाय दृढाशानां नमः कारणबन्धवे ॥§ 5457

अथ यदुक्तं प्र. सं. ४१२ पु. वास्तवस्य शब्दार्थस्याविद्यमानत्वाद-र्थासंस्पर्शिनः शब्दा इति—तत् प्रतिविधीयते ॥ § 5458

II.4/KSV

### शब्दः द्विविधः

द्विविधः शब्दः—पदं, वाक्यं च । तत्र पदार्थपूर्वकत्वात् वाक्यार्थस्य प्रथमं पदार्थो निर्दिश्य निरूप्यते ॥ § 5459

### पदमपि द्विविधम्

१ ] स— nyāma-wit_gha

१ *] प्रपन्नायेति । कर्मणि क्तः । विपन्नानामिति कर्तरि शेषे वा षष्ठी । अथवा सर्वत्र ऐकरूप्येण विपन्नानामित्यादौ—निर्धारणे षष्ठी । दृढाशानां— अपूर्णानामिति यावत्र । आशा हि अपूर्णैव । विपन्नानां जीवानां मध्ये तैः रक्षकत्वेन प्रपन्नः । विपन्नकर्तृकप्रपत्तिकर्मीभूत इत्यर्थः । नित्यापूर्णानामिति यावत् । अपूर्णैव आशानिदानम् । विपन्नानां, दुःखितानां, दृढाशानां इतिपदैः जीवानां निर्देशेन—प्रपन्नाय, सुखात्मने, संपूर्णाय इति पदैः परमात्मनश्च निर्देशेन जीवपरमात्मनोश्चेतनत्वेन साम्येऽप्यत्यन्तवैलक्षण्यमभिहितम् । जीवानां दृढाशत्वादेव दूःखित्वम्, दुःखित्वादेव विपन्नत्वं च सूचितम् । तथा ईश्वरस्यापि संपूर्णत्वादेव सुखात्मत्वं, तत एव च प्रपन्नत्वं च सूचितम् । परमात्मनि सुखसद्भावः जयन्तभट्टसंमतः ॥
कारणबन्धवे—जगत्कारणभूतबन्धवे । nII.4/KSV
अथवा समोऽहं सर्वभूतेषु इति वदन्नपीश्वरः ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् इति भक्त्याख्यकारणेन चेतनानां बन्धुर्भवतीति सः कारणबन्धुः । अन्यथा हि लोकवैय्याकुली । तथोक्तं—सर्वज्ञोऽपि च देवेशः सदा कारुणिकोऽपि सन् । संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते इति ॥

पदं च द्विविधं—नाम, आख्यातं च । *उपसर्गनिपातकर्मप्रवचनीयानामपि नामस्वेवावन्तर्भावमाचक्षते । *तदुक्तं सुप्तिङन्तं पदम् पा. सू. १-४-१४ इति । इहापि सूत्रकृदाह ते विभक्त्यन्ताः पदम् न्या. सू. २-२-६० इति । तत्र तिङन्तपदार्थचिन्ता वाक्यार्थविचारावसर एवकरिष्यते, *तदौपयिकत्वात् । सुबन्तानां त्वर्थोऽयमुच्यते ॥ § 5460
II.5/KSV

## नामपदानि चतुर्विधानि

ते च चतुर्विधाः सुबन्ताः पदात्मानः शब्दा भवन्ति—जातिशब्दाः, क्रियाशब्दाः, गुणशब्दाः, *द्रव्यशब्दाः इति ॥ § 5461

तत्र गवादिजातिशब्दानां गोत्वादिजात्यवच्छिन्नं व्यक्तिमात्रमर्थः, *यस्तद्वानिति नैय्यायिकगृहे गीयते ॥ § 5462

## गवादिपदानां जातिवाचकत्वाक्षेपः

ननु ! शुक्लादिगुणाधिकरणं क्रियाश्रयश्च द्रव्यं व्यक्तिः, सास्नाद्यवयवसन्निवेशात्मिका आकृतिः, शाबलेयादिसकलगोपिण्डसाधारणं रूपं जातिरिति व्यक्त्याकृतिजातिसन्निधाने समुच्चारित एष गोशब्दः कथमितरतिरस्कारेण तद्वन्मात्रवचनतामवलम्बेत ? § 5463

---

२ ] र्था— nyāma-wit_ga
६ ] न्न— nyāma-wit_ga
१० ] च— nyāma-wit_gha

---

३ *] उपसर्गाः—क्रियायुक्ताः प्रादयः । निपाताः—चादयः । कर्मप्रवचनीयाः—अनुर्लक्षणे पा. सू. १-४-८४ इत्याद्युक्ताः अनु इत्यादयः ॥ तथा च पदार्थो द्विविदः—सिद्धः साध्यश्च । तत्र सिद्धार्थवाचकं नामपम्, साध्यार्थ वाचकं आख्यातपदमिति वस्तुस्थितिः । तेन चत्वारि पदजातानि, नामाख्यातोपस र्गनिपातभेदेन इति यास्कवचनमापातत इत्युक्तं भवति ॥
४ *] पदद्वैविध्ये वृद्धसम्मतिमाह—तदुक्तमिति—तथा च निपातादीनां सुबन्ता परपर्यायनामपदेष्वेवान्तर्भाव इत्याशयः ॥ यद्यपिः शक्तं पदम् इति प्रसिद्धं पदलक्षणम्; अथापि ते विभक्त्यन्ताः पदम् इति गौतमोक्तेः न तत् प्रत्याख्यातुं शक्यम् । अन्यथा घटम् इत्यादीनामपि वाक्यत्वेन व्यवहारप्रसङ्गः । अतः शक्तं पदम् इति परीक्षकानां शास्त्रीयं लक्षणम् । विभक्त्यन्तं पदम् इति च लौकिकानां व्यावहारिकं लक्षणमिति व्यवस्था ज्ञेया ॥
७ *] तदौपयिकत्वात्—वाक्यार्थोपयुक्तवात । क्रियायां हि वाक्यं समाप्यते ॥
९ *] द्रव्यशब्दाः—एत एव संज्ञाशब्दाः यदृच्छा शब्दा इत्युच्यन्ते । यथा प्राचां घटादिशब्दाः । नव्यानां डित्थादिशब्दाः ।
१० *] तद्वान्—जातिमान् । तथा च अनुगमार्थमेव जात्यपेक्षेति भावः ॥ तथा च जात्यादिवाचकत्वं प्रवृत्तिनिमित्ततया विवक्षितम् । गोशब्दाः जातिं, शुक्लशब्दाः गुणं, पाचकादिशब्दाः क्रियां, डित्थादिशब्दाः द्रव्यं संज्ञां च निमित्तीकृत्य प्रवृत्ताः इत्यर्थः ॥
३ न्निधाने] सन्निधानं—उपस्थापनम् । त्रीणि ह्येतानि पदेन प्रतिपत्तुं शक्यानि ॥ एवं सति कथं पदानि व्यक्तिवचनानीति निष्कर्षः ?

## जातिविचारोपक्षेपः

आह—वितता खल्वियं कथा; चर्चयिष्यते तावत् । इदं तु चिन्त्यताम्—जातेरेव प्रमाणातीतत्वेन शशशृङ्गवदविद्यमानत्वात् कथं तद्वान् पदार्थो भविष्यति ? § 5464

II.6/KSV

## जातिः न प्रत्यक्षादिप्रमाणसिद्धा

तथाहि—न तावत् सामान्यग्रहणनिपुणमक्षजं ज्ञानं भवितुमर्हति, तस्य पूर्वापराननुस्यूतस्वलक्षणमात्रपरिच्छेदपरिसमाप्तव्यापारत्वात् ॥ § 5465

समानवृत्तिता नाम सामान्यस्य निजं वपुः ।
कथं स्पृशति सापेक्षं अनपेक्षाऽक्षजा मतिः ॥ २ ॥§ 5467

## जातेः प्रत्यक्षत्वासंभवः

समानेष्वाकलितेषु तद्वृत्तिसाधारणरूपमवधाय सामान्यं गृह्यत इति सापेक्षं तत्स्वरूपग्रहणम् । इयं च प्रथमनयनसन्निपादसमुद्भूता मतिः पूर्वापरानुसन्धानबन्ध्या निरपेक्षा कथं तद्ग्रहणाय प्रभवेत् ? § 5468

तत्पृष्ठभाविनस्तु विकल्पाः स्वभावत एव वस्तुसंस्पर्शकौशलशून्यात्मान इति तद्विषयीकृतस्यापि सामान्यस्य न परमार्थसत्त्वं भवितुमर्हति ॥ § 5469

## अनुमानं, शब्दो वा न जातौ प्रमाणं भवेत्

न चानुमानं, शब्दो वा सामान्यस्वरूपवास्तवत्वव्यवस्थापनसामर्थ्यमश्नुते, शब्दलिङ्गयोर्विकल्पविषयत्वेन वस्तुग्राहित्वासंभवात् । तत्प्राप्त्यादिव्यवहारस्तु प्रकारान्तरेण दर्शयिष्यते पु. २७-३२ ॥ § 5470

II.7/KSV

---

१२ ] वर्त— nyāma-wit_kha
५ ] र्णि— nyāma-wit_ga
५ ] म— nyāma-wit_gha
६ ] त— nyāma-wit_kha
१० ] पर— nyāma-wit_ka
११ ] वि— nyāma-wit_ka; nyāma-wit_gha

---

५ ल्वियं] इयं कथा—पदानामर्थः किं व्यक्तिः, उताकृतिः, उत जातिः, उत द्वयं, त्रयं वा इति विचारः ॥
८ जं] अक्षजमित्यादि—स्वलक्षणापरपर्यायं निर्विकल्पकमित्यर्थः । प्रथमसंपुटस्य २३६-२५७ पुटा द्रष्टव्याः ॥
११ ति] सापेक्षमिति—सामान्यग्रहणं तु त्रैकालिकवस्तुस्फुरणसापेक्षम् । इन्द्रियं वर्तमानैकविषयकम् । ततश्च कथं इन्द्रियेण सामान्यग्रहणमिति सारम् । अनपेक्षा—पूर्वापरवस्तुग्रहणनिरपेक्षा ॥
३ रेण] दर्शयिष्यत इति—अनादरे । वस्तुतस्तु दर्शितमिदं पूर्वमपि ॥ प्र. सं. ६२ पु.

## जतिव्यक्त्योः पृथगनुपलंभाच्चाभेदः

अतश्च न व्यक्तिव्यतिरिक्तं सामान्यं, भदेनानुपलं भात् । तथा हि कुवलयामलकबिल्वादीनि करतलवर्तीनि पृथगवलोक्यन्ते, न जातिव्यक्ती इति न तयोर्भेदः ॥ § 5471

## जतिव्यक्त्योस्समानदेशत्वाच्चाभेदः

*देशभेदस्य चाग्रहणात् । यतः खलु यतोऽतिरिक्तं, तत् तदधिष्ठि, तद्देशव्यतिरिक्तदेशाधिष्ठानमवधार्यते, घटादिव पटः; न चैवं जातिव्यक्ती इति न तयोर्भेदः ॥ § 5472

## जातिव्यक्त्योः भिन्नबुद्ध्यविषयन्वाच्चाभेदः

अतश्चैवं—तदग्रहे तद्बुध्यभावात् । यद्धि यतो व्यतिरिक्तं, तत् तस्मिन्नगृह्यमाणेऽपि गृह्यते, घटादिव पटः । न च व्यक्तावनुपलभ्यमानायां जातिरूपलभ्यते । तस्मान्न ततोऽसौ भिद्यते ॥ § 5473

## जातेः वृत्त्यनुपपत्तिः

तद्वृत्तित्वात्सामान्यस्य तदग्रहे तदनुपलब्धिरिति चेत्—न—वृत्त्यनुपपत्तेः । किं प्रतिपिण्डं कार्त्स्न्येनवर्तते जातिः ? उतैकदेशेन ? इति । द्वयमपि चानुपपन्नम् ॥ § 5474

*पिण्डे सामान्यमेकत्र यदिकात्स्न्येन वर्तते ।
तत्रैवास्य समाप्तत्वात् न स्यात्पिण्डान्तरे ग्रहः ॥ ३ ॥§ 5476

एकदेशेन वृत्तौ तु गोत्वजातिर्न कुत्रचित् ।
समग्राऽस्तीति, गोबुद्धिः प्रतिपिण्डं कथं भवेत् ॥ ४ ॥§ 5478

II.8/KSV

## जातेः अनुगतत्वानुपपत्तिः

१३ ] क्तं— nyāma-wit__ka
१३ ] य— nyāma-wit__ka
१ ] व्यति— nyāma-wit__gha
१० ] मन्यत्र— nyāma-wit__kha
११ ] ष्य— nyāma-wit__gha

७ *] यद्यपि—अवयवावयव्यादिषु नास्ति देशभेदः, तथापि तैरवयवी नाङ्गीक्रियते इति स्मर्तव्यम् ॥
१६ *] एकत्र—एकस्मिन् पिण्डे इत्यन्वयः । समाप्तिः—अपरिशेषः ॥
३ वेत् ] पटैकदेशभूततन्तौ न हि पटबुद्धिः प्रामाणिकी । अभ्युपगम्येदं दूषणम् ॥

जातेश्च निरवयवत्वात् न केचिदेकदेशाः सन्ति, यैरेषा प्रतिपिण्डं वर्तेत न चैकत्र पिण्डे समाप्य वर्तमाना पिण्डान्तरे समाप्यैव वर्तितुमर्हति; समाप्तस्य पुनरुत्पत्तिं विना समाप्त्यन्तरानुपपत्तेः । तथाभूतस्य च वृत्तिप्रकारस्य क्वचिदप्यदर्शनात् ॥ § 5479

### जातिव्यक्त्योः समवायासंभवः

या च समवायात्मिका पिण्डेषु वृत्तिः सामान्यस्य औलूक्यैरुच्यते, तामपि न बुध्यामहे वयम् । अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध इहप्रत्ययहेतुः स समवायः प्र. भा. द्रव्ये—इति यदुच्यते— तद्विप्रतिषिद्धम् । अयुतसिद्धता च, सम्बन्धश्चेति कथं सङ्गच्छेत ? पृथक्सिद्धे हि वस्तुनी कुण्डबदरवत् अन्योन्यं सम्बन्ध्येते, स्त्रीपुंसवद्वा । अयुतसिद्धत्वे तु तदेकत्वात् किं केन सम्बध्येत? न ह्यहं मयैव सम्बध्ये ॥ § 5480

### द्रव्यगुणयोरपि सम्बन्धासंभवः

द्रव्यगुणयोरपृथक्सिद्धयोरपि सम्बन्धो विद्यत एवेति चेत्, तदिदमुन्मत्तस्योन्मत्तसंवर्णनम्, गुणिनोऽपि गुणव्यतिरिक्तस्यानुपलम्भात् । अयं गुणी रूपादिभ्यो अर्थान्तरत्वेन नात्मानमुपदर्शयति, व्यतिरेकं च तेभ्यो वाञ्छतीति चित्रम् ॥ § 5481

II.8a/KSV

### युतसिद्धिशब्दार्थनिर्णयः

यदपि नित्यानित्यविभागेन युतसिद्धेः स्वशास्त्रे परिभाषणं कृतं— नित्यानां परमाणूनां पृथग्गतिमत्त्वं युतसिद्धिः । अनित्यानां तु युताश्रयसमवायित्वम् । विभूनां परस्परमाकाशादीनां सम्बन्ध एव नास्ति प्र, भा, गुण इति तद-

१५ ] स्यैव— nyāma-wit__gha
२ ] मा— nyāma-wit__kha
५ ] सिद्धे— nyāma-wit__ka
६ ] ते— nyāma-wit__kha
११ ] अयुत— nyāma-wit__gha
१२ ] यि— nyāma-wit__kha

६ स्य ] उत्पत्तिः—स्वरूपावाप्तिः । एकस्मिन् घटे परिसमाप्तं चेत् घटत्वं, नूतनतयोत्पद्यमाने घटे घटत्वं तेनव सह लब्धस्वरूपं सत् तत्र वर्तत इति वक्तव्यम् । ततश्च सामान्यं, अनित्यं अननुगतं च स्यादिति भावः ॥
१२ तु ] तदेकत्वादिति—अन्यथा हि युतसिद्धतैव स्यात् कुण्डबदरयोरिव । अयुतसिद्धे हि वस्तुनी समानदेशेसभ्यते । समानदेश समानकाल च सम्मते । समानदेशकालयोस्तु वस्तुनोः न वास्तविकभेदः, किन्तु शब्दादिभेदमात्रम् । अस्ति हि वस्त्वैक्येपि शब्दभेदः, घटः कुंभ इत्यादि । ततश्च सम्बन्धासंभवः । अधिकमन्यत्र ॥
२ तु ] युतेति—युतेष्वाश्रयेषु समवायः इति कन्दली । तथा च आश्रयमन्तरा पृथगनवस्थानं अयुतसिद्धिरिति भावः ॥

पि प्रक्रियामात्रम्—नानात्वेन सिद्धिः—निष्पत्तिः, ज्ञप्तिर्वा युतसिद्धिरित्युच्यते । तद्विपर्ययादयुतसिद्धिः—ऐक्येन सिद्धिरवतिष्ठते । तथा च सति सम्बन्धो दुर्वचः ॥ § 5482

## अवयवावयविनोरपि समवायासंभवः

अवयवावयविनोरपि समवायात्मा सम्बन्ध एवमेव परिहर्तव्यः । यथाऽऽह भट्टः—श्लो. वा. १-१-४-१४६ § 5483

*नानिष्पन्नस्य सम्बन्धः निष्पत्तौ युतसिद्धता इति ॥§ 5484

परमाण्वाकाशयोः, परमाणुकालयोश्च सम्बन्ध इष्यते, नाकाशकालयोरन्योन्यं—इति प्रक्रियैवेयमिति अलमवान्तरचिन्तनेन । तस्मान्न जातिव्यक्त्योः काचित् वृत्तिरुपपद्यते ॥ § 5485

## जातिव्यक्त्योः स्वरूपमपि न संबन्धः

*सुशिक्षितास्तु—रूपरूपिलक्षणमाचक्षते जातिव्यक्त्योः सम्बन्धम् —सोऽपि नोपपद्यते । रूपशब्दः किं शुक्लादिवचनः ? आकारवचनः ? स्वभाववचनो वा ? § 5486

II.8b/KSV

शुक्लादिवचनत्वे नीरूपाणां पवनमनःप्रभृतीनां द्रव्याणां गुणकर्मणां च सामान्यशून्यता स्यात् ॥ § 5487

आकारवचनत्वेऽपि अवयवसन्निवेशरहितानां तेषामेव गुणादीनां सामान्यवत्ता न प्राप्नोति ॥ § 5488

*(?स्वा)भाववचनत्वे तु जातिजातिमतोरव्यतिरेक एव भवेत् ॥ § 5489

अवभाति हि भेदेन स्वभावो न स्वभाविनः ।
शब्दातिरिक्ततैवेयं न तु वस्त्वतिरिक्तता ॥ ५ ॥§ 5491

---

१४ ] रु— nyāma-wit_gha
५ ] ति— nyāma-wit_kha
५ ] कि— nyāma-wit_ka
१३ ] त्तां— nyāma-wit_gha
१५ ] हि— nyāma-wit_gha

---

९ *] अवयवी यदा न निष्पन्नः तदा संबन्धः कयोः ? यदि निष्पन्नः तर्हि स्वातन्त्र्यमागतमिति तयोर्युतसिद्धिरेव वक्तव्या ॥
१३ *] सुशिक्षिताः—प्राभाकरा इति चक्रधरः । परंतु प्रकरणपंचिकादौ समवायोऽङ्गीकृतः । अतः प्राचीनैर्मीमांसकैरतिरिक्ततया स नाङ्गीकृत इति ज्ञेयम् ॥
१ *] संबन्धस्य वस्त्वभिन्नत्वे संबन्धिन्या जातेरपि वस्त्वभिन्नत्वमावश्यकमिति जातिरिति, घटः कलशः इत्यादिवत् शब्दभेदमात्रं, न तु तस्या अतिरिक्तत्वसिद्धिः ॥

### स्वरूपस्य संबन्धरूपत्वासंभवः

किंचेदं रूपं नाम ? किं वस्त्वेव ? वस्तुधर्मः ? वस्त्वन्तरं वा ? वस्त्वन्तरं तावन्न प्रतिभातीत्युक्तम् ॥ § 5492

वस्तुधर्मोऽपि तद्व्यतिरिक्तया स्थितः न चकास्त्येव । *अव्यतिरेके च सम्बन्धवाचोयुक्तिरनुपपन्नेत्युक्तम् ॥ § 5493

न च रूपरूपित्वलक्षणः सम्बन्धः संयोगसमवायव्यतिरिक्तः कोऽपि श्रोत्रियैः विविच्य व्याख्यातुं शक्यते—यथा ईदृगिति । तस्मात् वाचोयुक्तिनूतनतामात्रमिह कृतम्, न त्वर्थः कश्चिदुत्प्रेक्ष्यत इत्यलं प्रसङ्गेन ॥ § 5494

### प्रकारान्तरेण वृत्त्यनुपपत्तिः

अपि चेयं जातिः— § 5495

*सर्वसर्वगता वा स्यात् पिण्डसर्वगताऽपि वा ।
सर्वसर्वगतत्वे स्यात् कर्कादावपि गोमतिः ॥ ६ ॥ § 5497

II.8c/KSV

अश्वधीः शाबलेयादौ उष्ट्रबुद्धिर्गजादिषु ।
पदार्थसङ्करश्चैवं अत्यन्ताय प्रसज्यते ॥ ७ ॥ § 5499

### जातेरतिरिक्तत्वे साङ्कर्यं दुर्वारम्

अथापि व्यक्तिसामर्थ्यनियमान्नैष सङ्करः ।
न हि कर्कादिपिण्डानां गोत्वादिव्यक्तिकौशलम् ॥ ८ ॥ § 5501

मैवं, खण्डाद्यभिव्यक्तमपि गोत्वमनंशकम् ।
सर्वत्रैव प्रतीयेत न वा सर्वगतं भवेत् ॥ ९ ॥ § 5503

तद्देशग्रहणे तस्य न हि किञ्चिन्नियामकम् ।

११ ] तौ— nyāma-wit_gha
३ ] दं— nyāma-wit_gha
१० ] नाशंक्यं— nyāma-wit_gha

६ *] किं वस्त्वेव इति कल्पस्योत्तरमिदम् ॥
१२ *] प्रमाणवार्तिकादौ १, ४०-१६३ श्लो विस्तरेणोक्तं संगृह्णाति—सर्वेत्यादि ॥ सर्वसर्वगता—सर्वस्मिन्नपि व्याप्ता ॥ कर्कः—सिताश्वः ॥ शाबलेयः—चित्रगौः ॥
१ अथापि ] व्यक्तिसामर्थ्यं—अभिव्यञ्जनसामर्थ्यम् ॥
३ म् ] खण्डगोपिण्डेन अभिव्यक्तं गोत्वं पूर्णश्रृङ्गवि कथं स्यात् ? यदि स्यात्, तर्हि गोभिन्नेऽपि कुतो न स्यात् ?

दीपवद्व्यंजकः पिण्डः न तु तत्पिण्डवृत्तितत् ॥ १० ॥§ 5505

सर्वत्रागृह्यमाणं च सर्वत्रास्तीति को नयः ?
सर्वसर्वगतं तस्मात् न गोत्वमुपपद्यते ॥ ११ ॥§ 5507

पिण्डसर्वगतत्वे तु काममेतददूषणम् ।
किन्तु नैवाद्य जातायां गवि गोप्रत्ययो भवेत् ॥ १२ ॥§ 5509

## जातौ अनुपपत्त्यन्तराणि

पिण्डे नासीदसंजाते जातिः, जाते च विद्यते ।
संक्रामति न चान्यस्मात् पिण्डादन्यत्र निष्क्रिया ॥ १३ ॥§ 5511

आयात्यपि न तं पिण्डं अपोज्झति पुरातनम् ।
न चांशैर्वर्तते तत्र कष्टा व्यसनसन्ततिः ॥ १४ ॥§ 5513

II.8d/KSV

## भट्टोक्तजातिवादः

भाट्टास्तु ब्रुवते—भिन्नाभिन्नमेकं वस्तु अनुयायि च व्यावृत्तं च । यत् तस्यानुगामि रूपं, तत् सामान्यम्; यत् व्यावृत्तं, स विशेषः । तथा हि श्लो. वा. १-१-५-आकृति. ५— § 5514

सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका ।
जायते द्व्यात्मकत्वेन विना सा च न सिध्यति ॥§ 5516

१४ ] कः— nyāma-wit_ka
१५ ] मेऽन्वयः— nyāma-wit_kha
१ ] तं तत्र— nyāma-wit_ka

७--८ ] मेकं— nyāma-wit_kha
९ ] वस्तुबुद्धिर्हि सर्वत्र— nyāma-wit_kha

६ पिण्डः ] न त्विति—पिण्डसर्वगतापि वा इति किल द्वितीयः विकल्पः ॥ न तु तत्पिण्डवृत्ति तत् इत्यत्र सर्वगतत्वमेव हेतुः ॥

४ विना ] सा च बुद्धिरित्यनुकर्षः—वस्तुनः द्व्यात्मकत्वं—अनुवृत्तिव्यावृत्त्यात्मकत्वं—सामान्यविशेषात्मकत्वं विना तादृशी बुद्धिः न भवेत् ॥

केवलविशेषात्मकपदार्थपक्षे सामान्यप्रतीतेरनालम्बनत्वं, सामान्यमात्रवादे च विशेषबुद्धेरनुपपत्तिः ॥—श्लो. वा. १-१-५-आकृति. ७ § 5517

*न चाप्यन्यतरा भ्रान्तिः उपचारेण वेष्यते ।
दृढत्वात् सर्वदा बुद्धेः भ्रान्तिः स्याद्भ्रान्तिवादिनाम् ॥§ 5519

न हि मिहिरमरीचिनिचयनीरप्रतीतिवत् सामान्यप्रत्ययोपमर्देन विशेषप्रतीतिः, विशेषप्रत्ययोपमर्देन वा सामान्यप्रतीतिरुदेति; किन्तु अविरोधेनैव युगपदुभयावभासः । अत एव निर्विकल्पबोधेन द्व्यात्मकस्यापि वस्तुनो ग्रहणमुपेयते ॥ § 5520

## भट्टोक्तजातिवादविनिरासः

तदेतदभिधीयमानमेव न मनोज्ञमिवाभाति । § 5521

नानारूपत्वमेकस्याविरुद्धं वदता स्वयम् ।
*दूषणाख्यानमौखर्यमस्माकमपवारितम् ॥§ 5523

II.9/KSV

तदेव सामान्यं, स एव विशेषः, तदेवैकं, तदेव नाना, तदेव नित्यं, तदेवानित्यं, तदेवास्ति, तदेव नास्ति इति जैनोच्छिष्टमिदमुच्यते । उच्यमानमपि न शोभते— § 5524

दृष्टत्वान्न विरोधश्चेत् न तथा तदवेदनात् ।
*उक्तं हि नानुवृत्तार्थग्राहिणी नेत्रधीरिति ॥§ 5526

विचित्रविकल्पप्रबन्धविप्रलुब्धबुद्धयः खल्वेवं मन्यन्ते । भवन्तु ते । न त्वेकं वस्तु बहुरूपं भवितुमर्हति ॥ § 5527

---

१ ] गम्यते— nyāma-wit__kha
२ ] विषय— nyāma-wit__ka
७ ] पं त्वयैकस्य— nyāma-wit__kha
८ ] दा— nyāma-wit__kha
१० ] नेति चादृष्ट— nyāma-wit__kha
१० ] न्न— nyāma-wit__gha
१४ ] कल्पन— nyāma-wit__kha

---

५ *] अन्यतरा—बुद्धिरित्यनुकर्षः । अनुवृत्तव्यावृत्तबुद्ध्योरन्यतरायाः भ्रमत्वं गौणत्वं वा न वक्तुं शक्यं, कदापि बाधकप्रत्ययाद्यभावात् ॥
८ एव ] निर्विकल्पेति—अयं विषयः पूर्वसंपुटे २५२ पुटे द्रष्टव्यः ॥
१ *] मौखर्यं—मुखरस्य भावः । दुर्मुखे मुखराबद्धमुखौ ॥
६ *] उक्तं—पूर्वसंपुटे २५१ पुटे द्रष्टव्यम् ॥

## वस्तूनामद्व्यात्मकत्वम्

एकं हि वस्तुनो रूपं, इतरत् कल्पनामयम् ।
नानुवृत्तविकल्पेषु विस्रंभ उचितः सताम् ॥§ 5529

*द्रागितो ह्यन्यसंस्पर्शनैरपेक्ष्येण दृश्यते ।
स्वलक्षणं, अतो भदः तात्त्विकोऽनुगमो मृषा ॥§ 5531

दृढादृढत्वमक्षुण्णमपरीक्ष्यैव संविदाम् ।
द्वयप्रतीतिमात्रेण द्वयाऽभ्युपगमो भ्रमः ॥§ 5533

*न नेति प्रत्ययादेव मिथ्यात्वं केवलं धियाम् ।
किन्तु युक्तिपरीक्षापि कर्तव्या सूक्ष्मदर्शिभिः ॥§ 5535

## निर्विकल्पकं न द्व्यात्मकंगोचरम्

न चैकं शबलं वस्तु निर्विकल्पकगोचरः ।
व्यक्त्यन्तरानुसन्धानाद्विनाऽनुगमधीः कुतः ॥§ 5537

II.10/KSV

येष्वनुगतं, तेषु बुद्ध्याऽननुसन्धीयमानेषु तद्वृत्तिसामान्यग्रहणासंभवात् । न चानुसन्धानसामर्थ्यं बुद्धेरस्ति ॥ § 5538

*अत एव न ते सम्यगध्यक्षजज्ञानवेदिनः ।
अभेदवृत्ति प्रत्यक्षं आहुरद्वैतवाञ्छया ॥§ 5540

तस्मात् भेदाविषयत्वात् प्रत्यक्षस्य न तद्गम्यं सामान्यम् ॥ § 5541

## अनुवृत्तप्रतीतीनां विकल्परूपत्वम्

२ ] त्तं— nyāma-wit__ka
१५ ] तं— nyāma-wit__kha

११ *] इतः—विकल्पात् प्रागेव प्रत्यक्षेण व्यावृत्तं स्वलक्षणमात्रं गृह्यते । तदेव तात्त्विकम् । अधिकं पूर्वसंपुटु एव द्रष्टव्यम् ॥
१५ *] नेति प्रत्ययादेव मिथात्वमिति न । यत्राकस्मात् बाधकप्रत्ययो नोत्पन्नः, तत्र तस्य सत्यत्वप्रसंगात् ॥
१ चैकं ] शबलं—संकीर्णं—द्व्यात्मकमिति यावत् ॥
४ स्ति ] ज्ञानस्य स्वलक्षणमात्रग्रहणसमर्थत्वादिति हेतुरूह्यः ॥
५ *] ये अद्वैतवाञ्छया प्रस्यक्षं सामान्यविषयकमाहुः, ते प्रत्यक्षस्वरूपं न सम्यग्ज्ञा नन्तीति भावः । अधिकं पूर्वसंपुटे २५१ पुटे द्रष्टव्यम् ।

ननु ! एवमपह्नूयमाने सामान्ये गोगौरिति शाबलेयादिषु योऽयमनु वृत्तः प्रत्ययः, स कथं समर्थयिष्यते ? § 5542

उक्तमत्र पूर्वसंपुटे २४० पुटे—विकल्पमात्रमेष प्रत्ययः । विकल्पाश्च नार्थाधीनजन्मान इति । तथा च परपरिकल्पितेषु सत्तादिसामान्येष्वपि सामान्यमित्यनुवृत्तविकल्पाः प्रवर्तन्त एव । न च सामान्येषु सामान्यान्तराणि संभवन्ति; निस्सामान्यानि सामान्यानि इत्यभ्युपगमात् ॥ § 5543

*औपाधिक एष सामान्येष्वनुगतविकल्प इति चेत्—आयुष्मन् ! गवादिष्वपि कं चिदुपाधिविशेषमबलम्ब्य गोगौरित्यनुस्यूतबिकल्पो भविष्यति ॥ § 5544

II.11/KSV

## अनुवृत्तबुद्धेरौपाधिकत्वम्

कः पुनरसावुपाधिरिति चेत्—एकार्थक्रियाकारित्वमिति ब्रूमः ॥ § 5545

यदेव वाहदोहादि कार्यमेकेन ज न्यते ।
गोपिण्डेन, तदेवान्यैः इति तेष्वनुवृत्तधीः ॥§ 5547

## अननुगतस्याप्यनुगतप्रतीतिजनकत्वमस्त्यव

ननु ! प्रतिव्यक्ति कार्यं भिन्नमेव—सत्यम्—भेदबुध्यभावाच्च तदेकमित्युपचर्यते ॥ § 5548

*कर्कादिकार्यादन्यत्वं यथा ह्येतस्य दृश्यते ।
न तथा खण्डकार्यस्य मुण्डकार्याद्विभिन्नता ॥§ 5550

---

५--६ ] सामान्यानि— nyāma-wit_kha
७ ] एषु— nyāma-wit_kha
८ ] लेश— nyāma-wit_ga
१० ] यः— nyāma-wit_gha
१३ ] बुद्धिभयात्— nyāma-wit_kha

---

११ ल्पितेषु ] सत्ताद्रव्यत्वापृथिवीत्वादिषु, घटत्वादिषु व्याप्यव्यापकभावाना पन्नेस्षु च जातिषु जातिः इत्यनुगतव्यवहारे सत्यपि न हि तत्र जातित्वं नाम अनुगता काचिज्ज्ञातिरंगीक्रियते; प्रकृतेपि तथैव ॥
१४ *] औपाधिकः—नित्यत्वे सत्यनेकसमवेतत्वादिरत्र उपाधिः । स च नानुगतः ॥
१५ पि ] कं चिदिति—अन्ततः बुद्धिविशेषविषयत्वादिरेव उपाधिः ॥
२ दोहादि ] गोविशेषेण अनडुहा बाहः, धेन्वा दोहः ॥
४ कार्यं ] कार्यं भिन्नम्—कार्यस्वरूपं ह्यननुगतमेव । कथं तेनानुगतधीः ?
६ *] खण्डः—खण्डश‍ृङ्गः गौः, मुण्डः—श‍ृङ्गरहिता गौः—गवाश्वयोः यथा कार्यभेदः, न तथा खण्डमुण्डयोः ॥

ननु ! *तथा मा भूत् । न त्वभिन्नमेव खण्डमुण्डयोः कार्यम् । बाढम् । *दर्शनमेव तर्हि तयोरेकं भविष्यति ; तच्चाभिन्नम् ॥ § 5551

## एकाकारानुव्यवसायजनकत्वमेवानुगतव्यवहारनियामकम्

ननु ! दर्शनमपि प्रतिव्यक्ति भिन्नमेव । सत्यम् ! स्वपृष्ठभावि प्रत्यवमर्शाख्यकार्यैक्यादेकमित्युच्यते । यथैव शाबलेयादिपिण्डदर्शने सति गौरित्यनन्तरमवमर्शः, तथैव बाहुलेयपिण्डदर्शनेऽपि गौरित्येवावमर्श इति तदेकत्वमुच्यते । तदुक्तम् प्र. वा. १-११०— § 5552
II.12/KSV

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता इति ॥§ 5554

तस्मादौपाधिकत्वादनुवृत्तबुद्धेः न सामान्यं किंचिद्वास्तवमस्तीति ॥ § 5555

## अतिरिक्तसामान्याभावेऽप्यनुमानशब्दयोः प्रवृत्तिर्युज्यते

तत्राह— § 5556

अनिष्यमाणे सामान्ये ननु शब्दानुमानयोः ।
कथं प्रवृत्तिः सम्बन्धग्रहणाधीनजन्मनोः ॥§ 5558

न हि व्यक्तिषु सम्बन्धः गृहीतुमिह शक्यते ।
स हि व्यक्तिषु गृह्येत सर्वास्वेकत्र वा क्वचित् ॥§ 5560

न सर्वासु ; देशकालादिभेदेन तदानन्त्यादशक्यत्वात् । नैकस्यां ; व्यभिचारात् । ततोऽन्यत्रापि स शब्दः प्रवर्तमानो दृश्यते । अगृहीतःसम्बन्धे च न शब्दलिङ्गे प्रतीतिमुत्पादयितुमुत्सहेते ।— § 5561
—उच्यते—स्यादेतदेवं, यदि प्रत्यक्षविषये स्वसक्षणे शब्दलिङ्गयो प्रवृत्तिः स्यात् ॥ § 5562

१ ] व न— nyāma-wit__ka
१--२ ] द— nyāma-wit__kha
४ ] ऽपि— nyāma-wit__kha
४--५ ] त्येवा— nyāma-wit__kha
७ ] द— nyāma-wit__gha
१२ ] द्यादिषु— nyāma-wit__gha
२ ] येन— nyāma-wit__ka

८ *] तथा—अश्वकार्यात् गोकार्यस्य मा स्वभेदः । खण्डमुण्डयोरपि कार्यं भिन्नमेव हि । कथं तर्ह्यैक्यव्यवहार इत्याक्षेपाशयः ॥
९ *] दर्शनं—ज्ञानं एकरूपमेव खलु ॥
३ वृत्तिः ] सम्बन्धः—अनुमितौ व्याप्त्याख्यः, शब्दे शक्त्याख्यः ॥
७ भिचारात् ] यस्यां व्यक्तौ शक्तिग्रहः, व्याप्तिग्रहो वा, तदितरव्यक्तौ वा शब्दानुमानयोः प्रवृत्तिदर्शनात् ।

## शब्दानुमानयोरवस्तुविषयत्वम्

ननु ! प्रत्यक्षविषये तयोर्वृत्तावनिष्यमाणायां अनवस्थादिदोषोपघाताद-प्रवृत्तिरेव स्यात्—मैवं वोचः—कथमसकृदभिहितमपि पूर्वसंपुटे ८८ पुटे न बुद्ध्यसे ? § 5563

II.13/KSV

विकल्पविषये वृत्तिरिष्टा शब्दानुमानयोः ।
अवस्तुविषयाश्चैते विकल्पा इति वर्णितम् ॥§ 5565

## अपोहेनव शब्दानुमाननिर्वाहः

ननु ! विकल्पानामपि विषयः यद्यनुगामी कश्चिन्नेष्यते, तदुत्सीदेतामेव शब्दानुमाने—बाढमस्ति विकल्पानामनुस्यूतो विषयः; स तु न वास्तवः । § 5566

कः पुनरसाविति चेत्; उच्यते— § 5567

अतद्रूपपरावृत्तिस्वभावमबहिर्गतम् ।
बहिस्स्थमिव सामान्यं आलम्बन्ते हि निश्चयाः ॥§ 5569

या च भूमिर्विकल्पानां स एव विषयो गिराम् ।
अत एव हि शब्दार्थं अन्यापोहं प्रचक्षते ॥§ 5571

## विकल्पानामन्यापाहविषयत्वम्

तथा हि—न विकल्पा वस्तु स्पृशन्ति । कुतः ? § 5572

*एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न दृष्टो भागः स्यात् यः प्रमाणैः परीक्ष्यते ॥§ 5574

प्र. वा. १-४४ § 5575

---

११ माणायां] अनवस्थादीत्यादिना—तन्मूलकशक्तिग्रहव्याप्तिग्रहासंभवः ग्राह्यः ॥

१ म्] अबहिर्गतं—स्वलक्षणाख्यवस्तुनः अनतिरिक्तं । अन्यथा हि अतिरिक्तजातिरिव अतिरिक्तापोहांगीकारः स्यात् । अत एव बहिस्थमिव ॥

५ *] एतस्येत्यादि—अयं विषयः पूर्वसंपुटे २३९ पुटे द्रष्टव्यः ॥

तस्मात् भ्रमनिमित्तसमारोपिताकारान्तरनिषेधाय तेषां प्रवृत्तिः । यथा रूपसाधर्म्यसमारोपितरजताकारनिबारणाय शुक्तौ प्रमाणान्तरं प्रवर्तते नेदं रजतम् इति; तथेहापि शाबलेयादिस्वलक्षणे निर्विकल्पेन सर्वात्मना प-
II.14/KSV रिच्छिन्ने कुतश्चिन्निमितादारोपितमगोरूपमिव व्यवच्छितिदं विकल्पाः अगौर्न भवति इति; न तु गोः स्वलक्षणग्रहणे तेषां व्यापारः, प्रागेव गृहीतत्वात् ॥ § 5576

## विकल्पानामपूर्ववस्तुविषयकत्वं न संभवति

अथ ब्रूयात्—नानाविशेषनिकरकल्माषितवपुषस्तस्यार्थस्य किंचिद्विशेषणं प्रागगृहीतं विकल्पैर्गृह्यत इति—तदप्ययुक्तम्—नानाविशेषणनिकररूषित-स्यापि वस्तुनः तद्विशेषणोपकारशक्तिव्यतिरिक्तात्मनीऽनुपलम्भात् । तद-भेदे सति तद्विशेषणोपकार्यवस्तुस्वरूपग्रहणवेलायामेव तत्खचितग्रहणसिद्धेः विकल्पान्तराणामानर्थक्यमेव । तदुक्तम्— § 5577

यस्यापि नानोपाधेर्धीर्ग्राहिकार्थस्य भेदिनः ।
तस्यापि नानोपाध्यात्तशक्तिर्न ह्यतिरिच्यते ॥§ 5579

नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे ।
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः इति
॥§ 5581

तस्मादपोहविषयाः शब्दाः विकल्पाश्चेति ॥ § 5582

## भट्टोक्तं अन्यापोहदूषणम्

३ ] यथार्थ— nyāma-wit__gha
५ ] नापि— nyāma-wit__gha
६ ] मे— nyāma-wit__gha
७ ] गोस्व— nyāma-wit__gha
१४ ] तस्यापि... nyāma-wit__ka; nyāma-wit__kha; nyāma-wit__gha

११ णे] तेषां—विकल्पानाम् । प्रागेव—निर्विकल्पकाल एव ॥
१ स्तुनः] तद्विशेषणेत्यादि—विशेषणं हि विशेष्यं इतरस्माद्यावर्तयति । अतश्च विशेष्यस्वरूपमेव विशेषणेन परिवर्त्यत इति वक्तव्यम् । उपयन्नपयन् धर्मः विकरोति हि धर्मिणम् इति हि न्यायः । एवञ्च विशेषणेन विशेष्यस्य कश्चन उपकारः विशेष्येऽतिशयाधानरूपः वक्तव्यः । तेन च विशेषणे तदनुगुणशक्तिः, विशेष्येऽपि अतिशयस्वीकारानुगुणा शक्तिश्च स्वीकार्या । तथा च विशेषण—उपकार— शक्तीनां द्रव्याद्भेदेऽनवस्था । अभदे पूर्वोत्तरग्रहणयोर्विषयाधिक्यं न स्यात् ॥

ननु ! अपोहवादविषये, महतीं दूषणवृष्टिमुत्ससर्ज भट्टः । तथाहि— अपोहो नाम व्यावृत्तिः—अभाव इष्यते । न चाभावः *स्वतन्त्रतया घट- II.15/KSV वदवगम्यते । तदयमन्याश्रितो वक्तव्यः । कश्च तस्याश्रय इति चिन्त्यम् ॥
§ 5583

## अपोहस्याश्रयानुपपत्तिः

न तावत् गोस्वलक्षणमाश्रयः, *तस्य विकल्पभूमित्वाभावात् । *नाप्यवान्तरसामान्यं शाबलेयत्वादि तदाश्रयः, तस्यापि हि सामान्यात्मत्वेन अपोहस्वभावत्वात् । अभावस्य चाभावाश्रयत्वानुपपत्तेः । *न च शाबलेयसामान्यमगोनिवृत्तेराश्रयः, तद्धि अशाबलेयनिवृत्तेराश्रयतां प्रतिपद्येत । न ह्येवमुपपद्यते, अशाबलेयो न भवतीति गौः, किन्तु शाबलेयोऽशाबलेय इति । अशाबलेयव्यावृत्तिर्हि गोष्वपि बाहुलेयादिष्वस्ति ॥ § 5584

## अपोहस्य स्वलक्षणावृत्तित्वम्

अथ शाबलेयादिस्वलक्षणसमुदायं अगोव्यावृत्तेराश्रयं ब्रूयुः; सोऽप्यघ-
II.16/KSV टमान एव, समुदायिव्यतिरेकेण तस्यानुपलंभात् । समुदायिनां च स्वलक्षणानां देशकालादिभेदेनानन्त्यात् *वर्गीकरणं पुरुषायुषशतेनापि न शक्यक्रियमिति समुदायोऽपि न तदाश्रयः । तस्मात् सर्वसाधारणं प्रतिपिण्डं परिसमाप्तं किमपि नूतनं अगोव्यावृत्तेरधिकरणं अभिधातव्यम् । तच्च गोत्वमेव, तस्मिन्नङ्गीकृते वा किमगोव्यावृत्तिकल्पनायासेन ! § 5585

## प्रतियोग्यग्रहाच्च अपोहग्रहणासंभवः

२ ] वि— nyāma-wit_gha
६ ] अश्ववि— nyāma-wit_gha
७ ] पि— nyāma-wit_gha
८ ] अ— nyāma-wit_gha
१ ] च— nyāma-wit_gha
४ ] न— nyāma-wit_gha
४ ] सः— nyāma-wit_cha

८ *] स्वतन्त्रतयेति । यद्यपि गुणक्रियादीनामपि नियमेन द्रव्याश्रितत्वात् नास्ति स्वातन्त्र्यम्, अथापि नात्र तादृशः स्वातन्त्र्याभावः अभावस्योच्यते । स्वरूपलाभ एव अभावः परतन्त्रः, गुणादिस्तु न तथा । अभावो हि प्रतियोगिनिरूप्यः ॥
११ *] तस्येति । नो चेत् स्वलक्षणज्ञानमपि विकल्पः स्यात् ॥
११ *] अवान्तरत्वं शाबलेयत्वादेः गोत्वापेक्षया व्याप्यत्वात्, व्यक्त्यपेक्षया व्यापकत्वात् ॥
१ *] अभ्युपगमेपि प्रकृते नोपयोग इत्याह—न चेति । तद्धि—शाबलेयत्वं हि । गौः अशाबलेयो न भवति इति इत्यन्वयः ॥
३ इति] अत्रापि न भवति इत्यनुकर्षः ॥ गौः अशाबलेयो न भवति इत्यस्यासम्भवे हेतुमाह—अशाबलेयेत्यादि ॥ बाहुलेयः खलु गौः अशाबलेय एव भवति । अतः तन्निषेधः कथंकारं गवि भवेदित्यर्थः ॥
५ अथ] शाबलेयादि । आदिना बाहुलेयादीनां स्वलक्षणविशेषाणां ग्रहणम् ॥
७ *] वर्गीकरणं—अनुगमकरणम् । स्वलक्षणानां व्यावृत्तस्वरूपत्वादिति हेतुः ॥
८ न] तदाश्रयः—अगोव्यावृत्तेराश्रयः ॥

अपि च न केवलमाश्रयाभावात्तदग्रहणम्, किन्तु य एव ते केचि दपोह्या अगोरूपास्तुरगादयः तदग्रहणेऽपि तदपोहो दुर्ग्रह एव। न च तेषामानन्त्यात् ग्रहणं संभवति । नापि वर्गीकरणनिमित्तमेषां किञ्चि दस्ति । अश्वादयश्च विधिरूपतया भवन्मते न गृह्यन्ते, किन्त्वन्यव्यवच्छेदेनैवेति, तेषामपि व्यवच्छेदग्रहणे सैव वार्तेति नेदानीं विकल्पैः क्वचिदपोहो विषयीकर्तुं शक्यते । निर्विकल्पेन च न कश्चिद्व्यवहार इति सकलयात्रोत्सादप्रसङ्गः ॥ § 5586

## अपोहवादे पदानां पर्यायत्वप्रसङ्गः

किंच य एते शाबलेयादिशब्दाः, ते सर्वे एवापोहवाचित्वाविशेषात् पर्यायाः स्युः । अपोह्यभेदाददोष इति चेत्—न—अपोहानां भेदाभावात् । भिद्यमानत्वे वा स्वलक्षणवदेषां वस्तुत्वप्रसक्तिः ॥ § 5587
II.17/KSV

## जातिवादे नोक्तदोषः

भवत्पक्षेऽपि सामान्यमात्रवाचित्वाविशेषात् पर्यायत्वं समानो दोष इति चेत्—न—सामान्यानां विधिरूपत्वात् परस्परविरहितस्वभावतया नानात्वावगमात् । *अपोहस्तु अभावमात्ररूपाविशेषात् न परस्परं भिद्यते ॥ § 5588

## अपोहानामनुगतत्वासंभवः

कर्कादिशाबलेयाद्याधारभेदादपोहभेद इति चेत्—न—तेषामाधारत्वस्य निरस्तत्वात् । आधारभेदेन वा तद्भेदाभ्युपगमे प्रतिस्वलक्षणं अपोहभेदप्रसङ्गः । ततश्च सामान्यात्मताऽस्य हीयेत ॥ § 5589

## अपोहभेदस्यौपाधिकत्वमेव स्यात्

५ ] दयोग्या— nyāma-wit__ka
८ ] गृ— nyāma-wit__gha
८--९ ] व्यवच्छेद्य—
nyāma-wit__ka
११ ] वादित्वा— nyāma-wit__ka
१५ ] संकरविरहित—
nyāma-wit__ka
१६ ] रूपविशेषात्—
nyāma-wit__kha
२ ] तद्भेद— nyāma-wit__kha

१३ मेषां ] एषां—अगोरूपाणां तुरगादीनां । समानाकृतिष्वपि गोत्वसामान्यं विना अनुगमस्यासंभवे भिन्नाकृतीनां तुरगमहिषादीनां का वार्तेत्यर्थः ॥
१५ नेदानीं ] विकल्पैः—सविकल्पज्ञानैः ॥
१६ ल ]
यात्रा—लोकयात्रा—लोकव्यवहारः ॥
३ वा ] अनुवृत्तं अपरमार्थं, व्यावृत्तमेव परमार्थसदिति हि तन्मतम् ॥
६ * ] भावो हि स्वस्वरूपेण गृह्येत नाभावः ; प्रतियोग्यनुयोगिग्रहणसापेक्षत्वात् अबावस्य, तन्मते तुच्छत्वाच्च ॥

अथ अपोह्यभेदेनापोहभेदमवधार्य पर्यायता पराणुद्यते—तदप्यसारम्—तदाप्यपोह्य-भेदाद्भेदो न पर्यायत्वमपहन्ति । *भाक्तो ह्यसौ न मुख्यः ॥
§ 5590

## अपोह्यभेदेनापोहभेदो दुरुपपादः

न चापोह्यभेदाद्भेदोऽपि अपोहस्यावकल्पते । यो हि संभाव्यमानसंसर्गैराधारैरपि न भेत्तुं पार्यते, स दूरवर्तिभिरलब्धसम्बन्धैरतिबाह्यैर पोह्यैः कथंभिद्येत ? § 5591

II.18/KSV

अभ्युपगम्यापि ब्रूमः—यद्यपोह्यभेदात् अपोहभिन्नत्वं, अपोह्यैक्या त्तर्हि तदैक्येनापि भवितव्यम् । अतश्च गवाश्वयोरन्यापोहेन व्यवस्थाप्यमानयोः अगावोऽनश्वाश्च हस्त्यादयः अपोह्यास्तुल्या भूयांसो भवन्ति । असाधारणस्तु एकः गौरश्वे, गवि चाश्वोऽतिरिच्यते । तत्रैकापोह्यभदात् गवाश्वयोर्भेदो भवतु ! भूयसामपोह्यानामभेदादभेदो वा भवतु ! इति विचारणायां, विप्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वं इत्यभेद एव न्याय्यो भवेत् ॥
§ 5592

## अपोहानां सांकर्यं दुर्वारम्

*अथासाधारण्यात् अश्वापोह एव गोऽपोह इष्यते, स तर्हि सिंहादावप्यस्तीति सोऽपीदानीं गौर्भवेत् ॥ § 5593

---

५ ] भवन्नपोह्य— nyāma-wit__kha

५ ] भेदाद्भेदे— nyāma-wit__ka
७ ] द्भेदो— nyāma-wit__kha
८--९ ] बाह्यैः कथं— nyāma-wit__kha
१० ] यद्यप्यपोह्य— nyāma-wit__ka

१३ ] तत्रेहा— nyāma-wit__kha
१५ ] धर्मस्य— nyāma-wit__kha
१ ] अथ साधारणादश्वापोह—ख अथासाधारणाश्वापोह nyāma-wit__ka

१ ] गोऽपोहेन व्यवङ्थाप्य— nyāma-wit__kha

---

११ *] अपोहानां न स्वतो भेदः, किन्त्वपोह्यानां भेदादेवेति कथनात् ॥
१४ पि] अनुपदमेव, पुट. १५ अपोहानामाश्रयानुपपत्तिः वर्णिता ॥
२ श्व] गवाश्वयोरित्यादि । गवाश्वोभयविषयकं एकं जानं जदा यातं, तदा तदुभयातिरिक्तं हस्त्यादिकं सर्वं अपोह्यं भवति । वस्तुदृष्ट्या गोः अपोह्यः अश्वः अश्वस्यापोह्यः गौश्च तत्र अपोह्यसमुदाये न निविष्टौ भवतः । एतदुभयापेक्षया अपोह्यानां बहुत्वात् हस्त्याद्यपोहः गवि अश्वे च वर्तमानः एक एव भवेत् । तेन गवाश्वयोरभेदः एकजातीयत्वं सिद्ध्येत् इति प्रघट्टकार्थः ॥
८ *] असाधारण्यं हस्त्याद्यपोहापेक्षया ॥
८ स] सः—अश्वापोहमात्रम् ॥

अथाश्वादिविशेषोद्घोषरहितमगोरूपं व्यवच्छेद्यमुच्यते, तत् प्रत्येकं ग्रहीतुमशक्यं, आनन्त्यात् । वर्गीकरणकारणं च किञ्चिन्नास्त्येव । न हि सर्वेषामगवामश्वादीनामेकदेशत्वं, एककालत्वं वा समस्ति ॥ § 5594
II.19/KSV

## अपोहकल्पनावैयर्थ्यम्

अथ गोप्रतिषेध एव वर्गीकरणहेतुरिष्यते, हन्त तर्हि गोः पूर्वसिद्ध एषितव्यः, यत्प्रतिषेधेनागावः प्रतीयेरन् । पूर्वसिद्धे च गवि लब्धे किमगोभिः, किं वा तदपोहेन प्रयोजनम् ? § 5595

पूर्वसिद्धं गोस्वलक्षणमस्त्येवेति चेत्—न—तेन व्यवहाराभावात् । गोसामान्ये तु पूर्वसिद्धे मुधाऽपोहप्रयत्न इत्युक्तम् ॥ § 5596

## अपोहवादेऽन्योन्याश्रयः

अथ गोसामान्यमगोप्रतिषेधेन सिद्ध्यति, तदा दुस्तरमितरेतराश्रयम् अगोनिषेधेन गोसिद्धिः, गोसिद्ध्या चागोनिषेधसिद्धिरिति । तस्मादपोह्यस्यैव निरूपयितुमशक्यत्वात् न तद्भेदादपोहभेदः सिद्ध्यति ॥ § 5597

## अश्वादीनामपोह्यत्वमप्यसंभवि

अपि चाश्वादयः सामान्यरूपेण वाऽपोह्येरन् ? तद्विशेषात्मना वा ? § 5598

न विशेषात्मना; तदनन्तत्वात्, अशब्दवाच्यत्वाच्च ॥ § 5599

सामान्यात्मना तु तेषामप्यपोहरूपत्वादभावरूपत्वम् । कथं चा भावस्यैवाभावः क्रियेत । करणे वा प्रतिषेधद्वययोगात् विधिरवतिष्ठत इति वि-

---

३ ] मागोरूप्यं— nyāma-wit__kha

५ ] सकल— nyāma-wit__ka
७--८ ] किं— nyāma-wit__kha
९ ] व्यवहारात्— nyāma-wit__ka
११ ] मपोह— nyāma-wit__ka
१२ ] दपोहस्सैव— nyāma-wit__kha
१ ] विशेष— nyāma-wit__kha
३ ] तदनङ्गत्वात्— nyāma-wit__kha
५ ] क्रियते— nyāma-wit__kha

---

१० त्] प्रत्येकमित्यादि । गोभिन्ना हि अश्वगजादयः परस्परं विलक्षणाः अननुगताः ॥
१३ अथ] गोप्रतिषेधः—गोभिन्नत्वमिति यावत् । अस्यानुगमकत्वं वक्तव्यं चेत्, गवि अश्वादिभिन्नत्वं पूर्वमवगन्तव्यम् । नो चेत्, अश्वोऽपि गौः स्यात् । एवञ्च गवि विलक्षणे प्रथममेव गृहीते अनन्तरं अपोहेन किं साधनीयम् ?
१ सिद्धं] व्यावृत्तं स्वरूपमेव हि स्वलक्षणमित्युच्यते । तत्र व्यावृत्तत्वज्ञानं तु अपोहेन भवतीति न वैयर्थ्यमिति भावः ॥
१० वा] प्रतिषेधद्वयेत्यादि—अपोह्यस्य सामान्यरूपत्वे, अतिरिक्तसामान्यानङ्गीकारात् तदपोहरूपमेव स्यात् । तस्य व्यावृत्तिः गवि भासमाना अभावाभावरूपा अर्थात् भावरूपैव स्यादिति सिद्धं भावात्मकं सामान्यम् ॥

धिरूपः शब्दार्थः स्यात् ॥ § 5600

II.20/KSV

अपोहात्मनश्च तुरगादेः योऽपोहः, स तस्माद्विलक्षणः ? अन्यथा वा ? वैलक्षण्ये तस्य भावात्मता भक्ते । अवैलक्षण्ये तु, यादृश एवापोह्यः तादृश एव तदपोह इति गौरप्यगौः स्यात् ॥ § 5601

## अपोहवादे सामानाधिकरण्यानुपपत्तिः

किंच अपोहशब्दार्थपक्षे नीलमुत्पलमित्यादौ विशेषणविशेष्यभावसामानाधिकरण्यादिव्यवहारा विलुप्येरन् । *न हि एकस्मिन्नर्थे द्वयोरपोहयोर्वृत्तिरुपपद्यते । *न चैकः कश्चिदर्थोऽस्ति, यत्र तयोर्वृत्तिः ; स्वलक्षणस्याशब्दार्थत्वात्, अन्यस्य चासंभवात् । न च वृत्तिरपि का चिदस्ति ॥ § 5602

## सदादिपदानामवाचकत्वप्रसङ्गः

सद्ज्ञेयादिशब्दानां अपोह्यनिरूपणासंभवात् नापोहवाचित्वम् । न ह्यसदज्ञेयं वा किंचिदवगतम्, यत् व्यवच्छिद्येत । ज्ञातं चेत्सदेव तत्, ज्ञेयं चेति । अतः कथं सच्छब्देन सदेव, ज्ञेयशब्देन च ज्ञेयमेवापोह्यते । अज्ञातं तु न नितरामपोह्यम् । कल्पितं तु तत् वक्तुमशक्यम्, कल्पनयैव सत्त्वात्, ज्ञेयत्वाच्च ॥ § 5603

## अपोहपदस्यार्थो दुर्वचः

II.21/KSV अपोहशब्दस्य किं वाच्यमिति चिन्त्यम् । *अनपोहो न भवती त्यपोहः । कश्चायमनपोहः ? कथं वाऽसौ न भवति ? अभवन् वा किमवशिष्यते ? इति सर्वमवाचकम् ॥ § 5604

## अपोहस्य पदार्थत्वासंभवः

---

१२ ] तेन चैकः— nyāma-wit__ka

१४ ] असदूज्ञेयादि— nyāma-wit__ga

१४ ] अपोह— nyāma-wit__kha

१५ ] व्यवच्छिद्यते— nyāma-wit__kha

१६ ] ज्ञेयं चेच्छब्देन— nyāma-wit__ka

१७ ] नितरा— nyāma-wit__kha

---

१६ *] न हीत्यादि—स्वेतरख्यावृत्तिरूपत्वादपोहस्य, स्वेतरत्वेन सर्वस्यापि ग्रहणात् एकस्मिन् अपोहद्वयस्य न संभवः ।

१७ *] न चैक इत्यादि—धर्मद्वयाश्रयस्यैकस्यानङ्गीकारत् ॥

६ *] अनपोह इत्यादि—गौरित्युक्ते अगोभिन्नेतिवत्, अपोह इत्युक्ते अनपोह भिन्न इति खलु वक्तव्यम् ॥

प्रतिषेधवाचिनां च नञादिपदानां का वार्ता—अत्र न भवतीति ? नेति कोऽर्थः ? *उपसर्गनिपातानां च कथमपोहविषयत्वम् ? आख्यातशब्दानां च पचतीत्यादीनामपोहो दुरुपपादः ॥ § 5605

नाम्नामेव जातिशब्दानां अपोहविषयत्वमिष्यते, येषां भवन्तो जातिवाचित्वं, तद्वद्वाचित्वं वा प्रतिपद्यन्त इति चेत्—ततोऽन्येषां तर्हि का वार्ता ? *बाह्यार्थवाचित्वे जातिशब्देषु को द्वेषः ? निरालम्बनत्वे, ज्ञानांशावलम्बनत्वे वा जातिशब्दानामपि तदेवास्तु, किमपोहवादप्रमादेन ? § 5606

यथैव प्रतिभामात्रं वाक्यार्थ इति कल्पितः ।*
पदार्थोऽपि तथैवास्तु किमपोहाग्रहेण वः ॥ § 5608

इत्यादिदूषणौदार्यं अपोहे बहुदर्शितम् ।
अतः शब्दार्थतामस्य वदेयुः सौगताः कथम् ? ॥ § 5610

## —बौद्धैः भट्टोक्तदूषणोद्धारः—

## अपोहस्य विलक्षणत्वम्

उच्यते—तदेतदविदितबौद्धसिद्धान्तानामभिधानम् ॥ § 5611
II.22/KSV

अपोहो यदि भावात्मा बहिरभ्युपगम्यते ।
ततो भवति भावत्कं वाग्जालं, न त्वसौ तथा ॥ § 5613

किन्तु खल्वयमान्तरो ज्ञानात्मा सौगतानामपोहः सम्मतः ॥ § 5614

* तथाऽभ्युपगमे चेयमपोहवाचोयुक्तिः ? स्वांशविषयं पदार्थज्ञानानामित्येतावदेव वक्तुमुचितम् ॥ § 5615

एतदपि नास्ति; नायमान्तरः, न बाह्योऽपोहः । किन्तु ज्ञानार्थाभ्यामन्य एव ॥ § 5616

---

८ ] तद्वद्वाच्यत्वं— nyāma-wit__ka nyāma-wit__ka; nyāma-wit__gha
११ ] उप— nyāma-wit__kha
१२ ] किमपोह— nyāma-wit__ka
५ ] मित्येतदेव— nyāma-wit__kha

१ ] यद्य— nyāma-wit__gha
१ ] रप्युपगम्यते—

---

९ दानां ] का वार्ता—स्वय तैः अभावरूपार्थस्यैव बोधनात् ॥
१० *] उपसर्गनिपाताख्यातानि हि अद्रव्यवाचीनि ॥
१४ *] बाह्यार्थवाचित्वे—विज्ञानातिरिक्तवस्तुवाचित्वे ॥
१६ *] एतदाह्निकस्यान्ते अयं पक्षः विचारितः ॥
५ *] तथौ त्यादि—ज्ञानस्य कथमपोहपदवाच्यत्वमित्याक्षेपः । ज्ञानविशेषः स इति समाधानम् । वस्तुतस्तु उभयविलक्षणोऽयमिति विवरणम् ॥

## शब्दार्थस्यावास्तवत्वम्

ननु यद्विद्यते नान्तः न बहिः परमार्थतः ।
*तन्न विद्यत एवेति कथं शब्दार्थ उच्यते ॥§ 5618

*पारमार्थिकशब्दार्थसमर्थनपिपासिताः ।
नेहागताः स्मो येनैवं अनुयुज्येमहि त्वया ॥§ 5620

यत एव तन्नान्तर्बहिरस्ति, तत एव मिथ्येति काल्पनिकमिति च गीयते । किं पुनस्तत् ? आरोपितं किंचिदाकारमात्रं विकल्पोपरंजकम् ॥ § 5621

## अपोहस्यावस्तुत्वम्

ननु ! बाह्यार्थव्यतिरेकेण किमीय आकारः आन्तरस्य ज्ञानस्यो परंजक
II.23/KSV उच्यते—दृश्यच्छायैवानुरंजिका विकल्पानां, न दृश्योऽर्थः । व्यावृत्तं हि वस्तु दर्शनानां विषयः । तच्च स्प्रष्टुमक्षमा विकल्पा इत्युक्तम् प्र. सं. २४० ॥ अथ तच्छायामबलम्बमाना विकल्पा व्यावृत्तस्याग्रहणात् व्यावृत्तिविषया उच्यन्ते ॥ § 5622

## विकल्पविषयस्य व्यावृत्तेरवस्तुत्वम्

ननु ! व्यावृत्तितद्वतोरभेदात् या व्यावृत्तिः, यच्च व्यावृत्तं स्वलक्षणं तदेकमेवेति व्यावृत्तिग्राहिभिर्विकल्पैर्व्यावृत्तमपि गृहीतं स्यादिति *दर्शनतुल्या एव ते भवेयुः—नैतदेवम्—न विकल्पैर्व्यावृत्तं वस्तु गृह्यते । न च पारमार्थिकी व्यावृत्तिः; अपि तु कश्चिदारोपित आकारः । वास्तवत्वे हि व्यावृत्तेः, वस्तुसंस्पर्शिन एते दोषाः प्रादुष्युः । न त्वसौ तथेत्युक्तम् ॥ § 5623

---

९ ] न तु— nyāma-wit_kha
१४ ] आन्तरान्तरस्य— nyāma-wit_kha
१५ ] दृश्यतयैवा— nyāma-wit_kha
१५ ] विकल्पनां नेदृश्योऽर्थः— nyāma-wit_kha
१८ ] इत्युच्यन्ते— nyāma-wit_kha
१ ] व्यावृत्तिः— nyāma-wit_kha
३ ] भवेयुः— nyāma-wit_kha
३ ] विकल्पै— nyāma-wit_ka
५ ] स्पर्शिन— nyāma-wit_ka
५ ] एव— nyāma-wit_kha
५ ] प्रादुष्युः— nyāma-wit_ka

---

१० *] तन्नेत्यादि—तृतीयप्रकाराभावादिति हेतुः ॥
११ *] शब्दस्य परमार्थवस्तुबोधकत्वं नास्त्येव, शाब्दबोधस्तु विकल्परूपः । निर्विकल्पमेव हि वस्तुविषयकम् ॥
१ तिरेकेण] किमीयः—किंसम्बन्धी ॥
७ *] दर्शनं—निर्विकल्पः । ते—सविकल्पाः ॥

## निर्विकल्पविषयस्य वस्तुत्वम्

अत एव यत् के चन पर्यचूचुदन् किल, व्यावृत्तग्रहणपक्षे त्रितयग्रहणं प्राप्नोति—यत् व्यावृत्तं, येन च निमित्तेन व्यावृत्तं, यतश्च व्यावृत्तमिति । न च त्रितयग्रहणमस्तीत्यतः कथं व्यावृत्तग्रहणमिति—तदप्यपास्तं भवति —यदि हि व्यावृत्तं गृह्णीम इत्येवमुल्लेखो भवेत् व्यवहर्तृजनस्य, तदैवमसौ पर्यनुयुज्येत, न त्वेवमस्तीत्यचोद्यमेतत् ॥ § 5624

## विकल्पानामारोपिताकारविषयत्वम्

नन्वेवमारोपिताकारविषया एव विकल्पा उक्ता भवन्ति । व्यावृत्तिविषयत्ववाचोयुक्तिरनन्वितेत्युक्तम्—समाहितमेतत् प्र—सं— दर्शनपृष्ठभाविभिः II.24/KSV
गौरित्यादिविकल्पैः अतत्कार्यपरावृत्ता आकारा उल्लिख्यन्ते । न हि गोविकल्पैरतत्कार्याणामश्वादीनामुल्लेखः, स्वलक्षणं च स्पृश्यते । सामान्यं च वास्तवं नास्ति । तस्मादतत्कार्यपरावृत्तिविषयत्वमेव विकल्पानामवतिष्ठते—इत्येवं युक्त्या तेषामपोहविषयत्वमुच्यते, *न प्रतिपत्तितः ॥ § 5625

## विकल्पनिर्विकल्पवैलक्षण्यम्

ननु ! अतत्कार्यपरावृत्तमिव सजातीयव्यावृत्तमपि दृश्यस्वरूपम् । तत्र सजातीय विजातीयव्यावृत्तमप्याकारमुल्लिखेयुः । *न हि सजातीयविजातीयव्यावृत्ती, स्वलक्षणं चान्यत् । न चैकतराकारोल्लेखननियमन हेतुमुत्पश्यामः ॥ § 5626

धीमन् ! मैवं मंस्थाः । निश्चयात्मानो निर्विकल्पाः । सजातीयविजातीयव्यावृत्ताकारोल्लेखे च सर्वात्मना तन्निश्चयात् विकल्पान्त-

---

७ ] येन— nyāma-wit__kha
८ ] त्रितय— nyāma-wit__kha
११ ] विषया— nyāma-wit__kha
११ ] युक्ता— nyāma-wit__kha
१२ ] रन्विते— nyāma-wit__ka
१३ ] परावृत्त आकार उल्लिख्यते— nyāma-wit__kha
१४ ] न स्पृश्यते— nyāma-wit__kha
२--३ ] विजातीयव्यावृत्तिः— nyāma-wit__kha
५--६ ] सजातीय— nyāma-wit__ka; nyāma-wit__gha

---

११ क्षे] छिन्नं इत्युक्ते, छेदनक्रिया, तत्कर्म, तत्साधनं इति त्रितयमावश्यकम् ॥
१४ मुल्लेखो] निर्विकल्पेन गृह्यमाणं वस्तु व्यावृत्तस्वरूपं, न तु तत् तदा व्यावृत्तत्वेन गृह्यते । सविकल्पेनैव तु व्यावृत्तिर्गृह्यते ॥
३ ल्पैः] अर्थक्रियाकारित्वं हि सत्त्वम् । तच्च प्रतिवस्तु भिन्नम् ॥
६ *] प्रतिपत्तितः—स्वरूपप्रतिपत्तितः— विधिमुखप्रतीतितः ॥
८ *] न हीत्यादि—निर्विकल्पे व्यावृत्तं वस्तु भासते इत्युक्ते; गौः इति निर्विकल्पे, अश्वादिव्यावृत्तिवत्, इतरगोव्यक्तिभ्योऽपि व्यावृत्तिः गृह्यते, तद्व्यक्तिमात्रविषयत्वान्निर्विकल्पस्य ॥

राणां शब्दान्तराणां चाप्रवृत्तिः स्यात् । तथा च गौरिति शब्दादुत्पद्यमानो विजातीयव्यावृत्ताकारोल्लेख्येव विकल्पः संवेद्यते,* न सजातीयव्यावृत्तोल्लेखी । तुल्यविषयाश्च विकल्पैः शब्दा इत्यन्यापोहविषयास्त उच्यन्ते ॥ § 5627

सोऽयमारोपिताकारो न बहिः, आरोपितत्वादेव । नान्तः, अबोधरूपत्वात् । अतश्चासौ न किंचिदेव । न किंचिदपि भवन् अपोह इति *फलत II.25/KSV
उपचर्यते । अतश्च बाह्यमपोहमाश्रित्य दूषणोपन्यासे कण्ठ शोषमनुभवन् अस्थाने क्लिष्टो देवानांपियः ॥ § 5628

## बाह्यस्य विकल्पविषयस्य अवस्तुत्वम्

अपि च विकल्पभूमिः अर्थः विकल्पान्तरसन्निधापितभावाभावाक्षेपी नियतरूपो बाह्यसदृशश्च प्रतीयते । न चेदं रूपत्रयमपि बाह्ये वस्तुनि युज्यते । बाह्यस्य हि वस्तुनः स्वरूपेणावगतस्य न विकल्पान्तरोपनीतभावसम्बन्ध उपपद्यते, वैयर्थ्यात् । नाप्यभावसम्बन्धः, विप्रतिषेधात् । नियतरूपता च विकल्पविषयस्य गौरेव, नाश्वः इत्येवमवगम्यमाना वस्त्वन्तरव्यवच्छेदमन्तरेण नावकल्पत इति बलात् व्यवच्छेदविषयत्वम् । अन्यथा नियमपरिच्छेदासंभवात् । सन्दिग्धं च वस्तु न गृह्यते ॥ § 5629

एवं बाह्यवस्तुविषयत्वे च निरस्ते विकल्पानां एकस्यार्थस्वभावस्य इति न्यायेन पु. १४ पौनरुक्त्यादबाह्यविषयत्वं ख्याप्यम् । अबाह्यं चारोपितं रूपम् । तच्च बाह्यवदवभासते । न च व्यावृत्तिच्छायमपहाय बाह्यारोपितयोः सादृश्यमन्यदस्तीति व्यावृत्तिविषया एव विकल्पाः फलतो भवन्ति ॥ § 5630

## विकल्पानां व्यावृत्तिविषयत्वम्

यद्यपि विधिरूपेण गौरश्च इति तेषां प्रवृत्तिः ; तथापि नीतिविदोऽन्यापोहविषयानेव तान् व्यवस्थापयन्ति । *यथोक्तं व्याख्यातारः खल्वेवं विवेचयन्ति, न व्यवहर्तारः इति । सोऽयं नान्तरः, न बाह्यः ; अन्य एव कश्चिदारोपित आकारो व्यावृत्तिच्छायायोगादपोहशब्दर्थ उच्यते —इतीयमसत्ख्यातिवादगर्भा सरणिः ॥ § 5631

(II.26/KSV at margin of line "विषयानेव तान् …")

---

८ ] ल्लेखीव— nyāma-wit_kha
९ ] विषया— nyāma-wit_kha
१२ ] बाह्यमभावात्मक— nyāma-wit_kha
१२ ] दूषणो— nyāma-wit_kha
१२ ] कार्यापोह— nyāma-wit_ka
१४ ] भावापेक्षी— nyāma-wit_ka
१९ ] नियत— nyāma-wit_gha
२ ] अबाह्यान्तरारोपितं— nyāma-wit_kha
६ ] विवेदयन्ति— nyāma-wit_kaya

---

१४ *] शब्दःखलु सामान्यविषयः, अतस्तेन सजातीयव्यावृत्तिः न बोध्येत ॥
१७ *] फलतः—अर्थात् व्यवहारतः ॥
२ चेदं] त्रिरूपं—भावरूपं, अभावरूपं, नियतरूप च ॥
९ त्वं] अबाह्यविषयत्वं—बाह्याविषयत्वम् ॥
१० हाय] बाह्यारोपितयोः—बाह्यस्य आरोपितस्य च ॥
१३ *] प्रमाणवार्तिकस्वोपज्ञवृत्तौ ॥
न्या—म—ग्र—भ

## अपोहस्य ज्ञानकारविशेषत्वपक्षः

अथवा विकल्पप्रतिबिम्बकं ज्ञानाकारमात्रकमेव तदबाह्यमपि विचित्रवासनाभेदोपाहितरूपभेदं बाह्यवदवभासमानं लोकयात्रां बिभर्ति । व्यावृत्तिच्छायायोगाच्च तदपोह इति व्यवह्रियते । सेयमात्मख्यातिगर्भा सरणिः ॥ § 5632

## विकल्पानामवस्तुविषयत्वेऽपि प्रवृत्त्युपपत्तिः

ननु ! उभयथाऽपि वस्तुविषयत्वाभावे विकल्पानां कथं वस्तुनि व्यवहर्तारः प्रवर्तन्ते ? *दृष्टेऽपि क्वचिद्वस्तुनि तृणादौ प्रवृत्त्यभावात् । अर्थित्वं तु प्रवृत्तेः कारणम् ॥ § 5633

## अपोहपक्षे प्रवृत्त्युपपादनम्

ननु ! अर्थितावत् दर्शनमपि कारणमेव । अर्थिनोऽप्यपश्यतस्तत्र प्रवृत्त्यभावात् । अपोहपक्षे च प्रवृत्तस्य वस्तुप्राप्तिः कथमिति वक्तव्यम् — उच्यते—प्रवृत्तिस्तावत् दृश्यविकल्प्ययोः एकीकरणनिबन्धना प्र-सं. ६९ । दृश्यदर्शनानन्तरमुत्पन्ने विकल्पे विकल्पतया न प्रतिपद्यते प्रमाता । दर्शनानन्तर्यविप्रलब्धस्तु दृश्यमेव गृहीतं मन्यते । तदभिमानेन च प्रवर्तते । इदं तदेकीकरणमाहुः, दृश्यविकल्प्ययोर्भेदेन वस्तुनो दृश्यात् विकल्पो यन्न गृह्यते; न पुनः भिन्नयोरभेदाध्यवसाय एकीकरण मिष्यते । दृश्याद्विभिन्न- II.27/KSV
स्य विकल्प्यस्य शुक्तेरिव रजतस्य निर्देष्टुमशक्यत्वात् । अभेदाध्यवसाये चोपायाभावात् । नाभेदाध्यवसाये दर्शनमुपायः, विकल्पाविषयत्वात् । न विकल्पः, दृश्यविषयत्वात् । तस्मात् भेदानध्यवसायादेव प्रवृत्तिः ॥ § 5634

## विकल्पस्य अर्थप्रापकत्वप्रकारः

१४--१५ ] व्यावहाराः— nyāma-wit_kha
१७--१८ ] कथमिति— nyāma-wit_kha
१ ] एककारण— nyāma-wit_ga
२ ] विकल्प्य तेन— nyāma-wit_kha
३ ] विप्रलम्भस्तु— nyāma-wit_ga
४--५ ] विकल्पयो र्भेदो यन्न दृश्यते— nyāma-wit_kha
६ ] विकल्पस्य— nyāma-wit_kha
७ ] चोभया— nyāma-wit_kha
७ ] न भेदा— nyāma-wit_kha
८ ] दृश्याविषयत्वात्— nyāma-wit_kha
८ ] भेदाध्यव— nyāma-wit_ka; nyāma-wit_gha

२२ *] दृष्टेऽपि—इत्यादिः समाधानग्रन्थः ॥

प्राप्तिरपि दृश्यस्यैवार्थक्रियाकारिणो वस्तुनः, पारंपर्येण तन्मूलत्वात्कार्यप्रबन्धस्य । दृश्याद्दर्शनं, ततो विकल्पः, ततः प्रवृत्तिरिति । अर्थं हि मूलवर्तिनमुपलभ्य प्रवर्तमानस्तमाप्नोति । *अपवरकनिहितमणिप्रसृतायां कुञ्चिकाविवरनिर्गतायामिव प्रभायां मणिबुध्या प्रवर्तमानः । यत्र तु मूलेऽप्यर्थो नास्ति, तत्र व्यामोहात् प्रवर्तमानः विप्रलभ्यत एव, दीपप्रभायामिव तथैव मणिबुद्ध्या प्रवर्तमानः ॥ § 5635

## अर्थप्राप्त्यादीनामाभिमानिकत्वम्

एवं च बाह्यवस्तुसंस्पर्शशून्येष्वपि विकल्पेषु समुल्लिखितेषु बाह्योऽर्थो मया प्रतिपन्नः, तत्र चाहं प्रवृत्तः, स च मया प्राप्तः, इत्यभिमानो भवति लौकिकानाम् । न त्वयमर्थाध्यवसायमूलः । तदुक्तं यथाऽध्यवसायमतत्त्वात्, यथा तत्त्वं चानध्यवसायात् इति । स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायात् प्रवृत्तिः इत्यत्रापि ग्रन्थे अर्थाध्यवसायः भेदानध्यवसाय एव व्याख्येयः । एवं दृश्यविकल्प्यावर्थौ एकीकृत्य प्रवर्तते, प्राप्नोति चार्थमिति ॥ § 5636

II.28/KSV

तदेवमेव लोकस्य व्यवहारोऽवकल्पते ।
*विवेकिनापि बोढव्या लोकयात्रा च लोकवत् ॥§ 5638

## अपोहवादोपसंहारः

तस्माद्विकल्पप्रतिबिम्बकस्य
शब्दार्थतामाहुरपोहनाम्नः ।
प्रतीतिमार्गस्त्वविविच्यमानः
जनस्य जातिभ्रममातनोति ॥§ 5642

१० ] दर्शनान्तर— nyāma-wit_ka; nyāma-wit_gha
१० ] ततोऽपि— nyāma-wit_ka; nyāma-wit_gha
१३ ] विप्रलभ्यते— nyāma-wit_kha
१५ ] समुल्लसितेषु— nyāma-wit_kha
१ ] ध्यवसायेन— nyāma-wit_ka; nyāma-wit_gha
३ ] विकल्पा— nyāma-wit_kha
५ ] विवेकेनापि— nyāma-wit_ka; nyāma-wit_kha
६ ] बिम्बनस्य— nyāma-wit_kha

१३ *] प्रथमसम्पटस्य ६२ पुटटिप्पणी दृष्टव्या ॥
८ *] एतत्सर्वं जानताऽपि पुरुषेण, लोकवदेव लोकव्यवहारोऽपि निर्बोढव्यः, सक्ताः कर्मण्यविद्वांसः यथा कुर्वन्ति भारत । कुर्याद्विद्वांस्तथा गी इतिवत् ॥

यावांश्च कश्चिंन्नियमप्रकारः
प्रवर्तते जातिषु वृत्त्यवृत्त्योः ।
तावानपोहेष्वपि तुल्य एव
भवत्यवस्तुत्वकृतस्तु भेदः ॥§ 5646

तुल्येऽपि भेदे, *शमने ज्वरादेः
काश्चिद्यथैवौषधयः समर्थाः ।
सामान्यशून्या अपि तद्वदेव
स्युर्व्यक्तयः कार्यविशेषशक्ताः ॥§ 5650

II.29/KSV

*विशेषणादिव्यवहारक्लृप्तिः
तुच्छेऽप्यपोहे न न युज्यते नः ।
अतश्च मा कारि भवद्भिरेषा
जात्याकृतिव्यक्तिपदार्थचिन्ता ॥§ 5654

—सिद्धान्तः— § 5655

## अपोहस्याप्रामाणिकत्वम्

अत्राभिधीयते—किं जात्यादेर्बाह्यस्य शब्दार्थस्यासत्त्वात् अपोहपक्षपातः ? उत प्रतीतिबलादेव ? इति ॥ § 5656

प्रतीतिस्तावत् अपोहविषया भवद्भिरेव नाङ्गीकृतेति किमत्र कलहेन ॥ § 5657

## जातेः प्रत्यक्षसिद्धत्वम्

नापि जात्यादेरसत्त्वम्, इन्द्रियार्थसन्निकर्षोत्पन्नबाधसन्देहरहितप्रत्य य-गम्यत्वात्, स्वलक्षणवत् ॥ § 5658

आद्यमेव हि विज्ञानं अर्थसंस्पर्शि चाक्षुषम् ।
न तदुत्तरभावीति किमिदं राजशासनम् ॥§ 5660

१५ ] यथा वौषधयः— nyāma-wit__kha
१७ ] युक्तः— nyāma-wit__kha
३ ] रेषु— nyāma-wit__ka
८ ] भवद्भिरेवाङ्गीकृतेति— nyāma-wit__kha

१३ कारः ] नियमप्रकारः—जातिव्यवस्था, असांकर्यादिकं च ॥
१७ *] ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा । दृष्टा यथैवौषधयः भिन्नत्वेऽपि न चापराःप्र. वा. ॥ विजातीयेष्वपि हि पदार्थेषु एककार्योपयोगिनी एकशक्तिः वर्तते ॥
३ *] सामानाधिकरण्यव्यवहारः ॥
१० द्भिरेव ] नाङ्गीकृतेति—प्रमाणतयेति अध्याहायम् ॥

### जातेः निर्विकल्पकविषयत्वे अविरोधः

तदेवास्तु प्रमाणं वा, तेनापि ह्यवगम्यते ।
व्यावृत्तं वस्तुनो रूपं नानुगामीति का प्रमा ?§ 5662

तथाहि—निर्विकल्पककालस्यातिसूक्ष्मत्वात् किं प्रतिभासते ? किं न प्रतिभासते ? इति कथमेष कलिरावयोरुपशाम्यतु ! भवान् ब्रूते— II.30/KSV
व्यावृत्तमेव भातीति । अहं ब्रुवे—अनुवृत्तमपि प्रतिभातीति । एवं कलहायमानयोरावयोः कः परिच्छेदः ? न खलु शपथस्य, क्रोशपातस्य वैषविषयः । तस्मात् निर्विकल्पकानन्तरोत्पन्नस्थूलकालकार्यपर्यालोचनया *तद्व्यवस्था कर्तव्या ॥ § 5663

### निर्विकल्पस्य स्वलक्षणविषयत्वासंभवः

तत्र च— § 5664

भवेद्यदि विशेषैकविषयं निर्विकल्पकम् ।
सामान्याध्यवसायोऽयं अकस्मात्कथमुद्भवेत् ॥§ 5666

शाब्द एष विकल्प इति चेत्—*मैवम्— § 5667

पश्यत्यनुगतं रूपं अविज्ञातेऽपि वाचके ।
दाक्षिणात्य इवाकस्मात् पश्यन्नुष्ट्रपरंपराम् ॥§ 5669

अनवगतशब्दार्थसम्बन्धोऽप्यभिनवानेकपदार्थसन्निधाने तेषामनुगतं च व्यावृत्तं च पश्यत्येव रूपम् ॥ § 5670

### निर्विकल्पकस्य विशेषमात्रविषयकत्वमनुभवविरुद्धम्

अपि च प्रथमाक्षिसन्निपात एवाङ्गुलिचतुष्टयमवलोक्यमानं अन्यो न्यगामिना च रूपेणावगम्यते । तत्कथं केवलविशेषावलम्बी चाक्षुषः प्रत्ययः ? § 5671

---

१६ ] निर्विकल्प— nyāma-wit_kha
१९ ] शपमानस्य—ख, क्रोशमानस्य— nyāma-wit_ka
३ ] तत्कथं भवेत्— nyāma-wit_kha
४ ] शब्द— nyāma-wit_kha

---

१९ मेष] कालिः—कालिस्त्री कलिकायां, ना शूराजिकलहे युगे मेदिनी ॥
३ *] तद्व्यवस्था—निर्विकल्पकविषयव्यवस्था ॥
८ *] मैवमित्यादि—अर्थं बुद्धा हि शब्दरचना । यद्यर्थभेद एव पूर्वं न गृहीतः, तर्हि शब्दविकल्पस्य को वाऽवसरः । अतश्च विकल्पविषयाणां जात्यादीनामपि निर्विकल्पकविषयत्वमावश्यकम् ॥

## निर्विकल्पकस्य जात्यादिविषयत्वे अनुभवः प्रमाणम्

अपि च पुराणशाबलेयपिण्डमवलोकयतः कालान्तरे बाहुलेयं पिण्डं II.31/KSV पश्यतः पूर्वदृष्टशाबलेयपिण्डविषयं स्मरणमुत्पद्यमानं संवेद्यते । तस्मात् सामान्यानवगमो नोपपद्यते । अन्यस्मिन्नसाधारणे स्वलक्षणे दृष्टेऽन्यस्मारणस्य किं वर्तते ? अस्ति च तत् । तेन मन्यामहे दृष्टमुभयानुगत रूपमिति ॥ § 5672

## अनुवृत्तप्रत्ययोऽपि प्रत्यक्षस्य जात्यादिविषयत्वे प्रमाणम्

*किंच व्यक्त्यन्तरदर्शनेऽपि स एवायं गौरिति प्रत्यभिज्ञायते । तस्याश्च प्रामाण्यं दर्शितम्; दर्शयिष्यते च विस्तरतः क्षणभङ्गभङ्गे । तस्मात् अनुगतरूपविषयैव सा प्रत्यभिज्ञा, व्यक्तिभेदस्य विस्पष्टसिद्धत्वात् ॥ § 5673

## राश्यादिदर्शनानां सामान्यविषयकत्वमेव स्वरसम्

यत्र च लघुतरपरिमाणतिलमुद्गादिप्रचयसन्निधाने विच्छिन्न *सिक्थस्वलक्षणं नास्ति, तत्रानुवृत्तमेव रूपमिन्द्रियेण गृह्यते । अतः निर्विकल्पकवेलायामेव व्यावृत्तवत् अनुगतरूपावभासान्न सामान्यापह्नवो युक्तः । प्रथमाक्षसन्निपातेऽपि तुल्यत्वमवगम्यते नानात्वं चेति सामान्य भेदौ द्वावपि वास्तवौ ॥ § 5674

## सामान्यग्रहणे तदाश्रयनिखिलव्यक्तिग्रहणमपेक्षितम्

१५ ] चैतत्— nyāma-wit__ka
१८ ] भङ्गे(?)— nyāma-wit__kha
४--५ ] वास्तवौ द्वावपि— nyāma-wit__kha

१ ] स्निग्ध— nyāma-wit__gha

१ *] किंचेत्यादि—सदृशपिण्डस्मरणं प्रमाणतया पूर्वमुक्तम् । अत्र तु एकपिण्डदर्शनसमनन्तरं सजातीयपिण्डान्तरमपि यदा सन्निहितम्, तदा उभयोरपि दर्शने अयमपि गौः इत्येवं रीत्या प्रतिसन्धानं प्रमाणीकृतम् । अत्र हि व्यक्तिद्वयं प्रत्यक्षमीक्ष्यते, अनुवृत्तप्रत्ययश्च भवति ॥
४ *] सिक्थं—प्रातिस्विकव्यक्तिः ॥
७ चेति ] सामन्यभेदौ—सामान्यं विशेषश्च ॥

*सामान्यमिदमित्येवं कुतस्तत्रानुपग्रहः ?
व्यावृत्तमिदमित्येवं किं वा बुद्धिः स्वलक्षणे ?§ 5676

II.32/KSV

समानवृत्तिसापेक्षं न च सामान्यवेदनम् ।
तत्र सन्निहितत्वात्तु व्यक्तिवन्नानुपग्रहः ॥§ 5678

समानवृत्त्यपेक्षत्वात् सामान्यस्यानुपग्रहे ।
विशेषोऽपि हि मा ग्राहि व्यावृत्तिं स ह्यपेक्षते ॥§ 5680

अनुवृत्तिर्हि येष्वस्य का तेषां ग्रहणे गतिः ?
व्यावृत्तिरपि येभ्योऽस्य या तेषां ग्रहणे गतिः ॥§ 5682

**व्यावृत्त्यनुवृत्त्यो रुभयोरपि ग्राह्यत्वम्**

अथानुवृत्तिव्यावृत्तिनैरपेक्ष्येण केवलम् ।
वस्त्वेव गृह्यते कामं, कीदृक् तदिति कथ्यताम् ॥§ 5684

निर्विकल्पकवेलायां निर्देष्टुं तन्न शक्यते ।
तदुत्थास्तूभयत्रापि साक्ष्यं ददति निश्चयाः ॥§ 5686

६ ] स च तत्रा— nyāma-wit__kha
९ ] वाचा— nyāma-wit__kha
११ ] स हि चेक्षते— nyāma-wit__kha
१३ ] यान्यस्य— nyāma-wit__kha

१ ] निरपेक्षं न— nyāma-wit__kha
२ ] कार्यं— nyāma-wit__kha
२ ] तदिह— nyāma-wit__kha

९ *] सामान्यमित्यादि—तत्र—तद्व्यक्तौ । समानानां भावः किल सामान्यम् । तस्य स्वतन्त्रवस्तुत्वे एकपिण्डदर्शनेऽपि सामान्यं गृह्येत इत्याक्षेपाशयः । व्यावृत्तमित्यादि प्रतिबन्द्युत्तरम् । समानेत्यादि समाधानम् । एकपिण्डदर्शनेऽपि सामान्यं गृत्यत एवेत्यर्थः । समान्याश्रयनिखिलव्यक्तिदर्शनाभावेऽपि तद्वृत्तित्वेन तद्ग्रहणे न विरोधः । अत एव कालन्तरे सदृशव्यक्तयन्तरदर्शने प्रत्यभिज्ञानम् । अन्यथा व्यावृत्तेरपि प्रतियोगिग्रहणसापेक्षत्वात् निर्विकल्प तदग्रहणप्रसङ्गः । अनुवृत्तिरित्यादिः आक्षेपः । गतिः—उपायः ।

समाधानं—व्यावृत्तिरित्यादि ॥ --- अथेत्यादि काममित्यन्तं परमतानुवादः । इदं समाधानं सिद्धान्तेऽपि सममित्याशयः उत्तरवाक्यानाम् । उभयत्रापि—अनुवृत्तव्यावृत्तयोरुभयोरपि ग्रहणे, यौ ब्रूत इत्यत्रापि । अयमंशः प्रथमसम्पुटे २५१ पुटे द्रष्टव्यः । प्राज्ञाः—कुमारिलादयः ॥ --- सामान्यमेव सत्यं, व्यावृत्तं मिथ्येति वेदान्त्येकदेशिनः । व्यावृत्तमेव सत्यं सामान्यं मिथ्येति वैभाषिकादयः । उभयं मिथ्येति शून्यवादिनः । उभयं सत्यमिति सिद्धान्तिनः । इदमेव यौ ब्रूतः इत्यनुपदमुक्तम् ॥

वस्तुनोऽङ्गीकृता प्राज्ञैः अत एवोभयात्मता ।
यौ ब्रूतस्त्वेकरूपत्वं तावुभावपि बालिशौ ॥§ 5688

II.33/KSV

## एकत्र सामान्यविशेषयोस्समावेशे विरोधाभावः

यदप्यभिहितम्—इतरेतरविरुद्धरूपसमावेश एकत्र वस्तुनि नोपपद्यत इति—तदपि न सम्यक् ॥ § 5689

परस्परविरोधोऽपि नास्तीह तदवेदनात् ।
एकबाधेन नान्यत्र धीः शुक्तिरजतादिवत् ॥§ 5691

यत्र हि विरोधो भवति, तत्रैकतररूपोपमर्देन रूपान्तरमुपलभ्यते । प्रकृते तु नैवमिति को विरोधार्थः ? § 5692

छायातपावपि यद्येकत्र दृश्येते, किं केन विरुद्धमभिधीयेत ? अदर्शनात्तु तद्विरुद्धमुक्तम् । न चैवमिहादर्शनमित्यविरोधः ॥ § 5693

## सामान्यविशेषयोस्सत्यत्वम्

अत एवेह मिथ्यात्वं एति नान्यतरा मतिः ।
न ह्यन्योन्योपमर्देन बुद्धिद्वितयसंभवः ॥§ 5695

तथा चाह—श्लो. वा. १-१-५, आकृतिवादे, श्लो. ५७ § 5696

यथा कल्माषवर्णस्य यथेष्ट वर्णनिश्चयः ।
चित्रत्वात्, वस्तुनोऽप्येवं भेदाभेदावधारणा इति ॥§ 5698

इत्येवमविरोधेन भेदाभेदावधारणात् ।
उभयात्मकतैवास्तु वस्तूनां भट्टपक्षवत् ॥§ 5700

एतत्तु वृत्तिविकल्पादिभ्यः बिभ्यतेवाभ्युपरतं तत्रभवतेति तिष्ठतु तावत्, किमत्र विमर्देन ! § 5701

II.34/KSV

१५ ] एव हि— nyāma-wit_kha
१ ] निग्रहः— nyāma-wit_ga

१५ नास्तीह ] तदवेदनात्—विरोधासंवेदनात् ॥
५ तैवास्तु ] अस्तु इत्यभ्युपगमवादसूचकम् । इदमुत्तरत्र स्पष्टम् ॥

६ तं ] तत्रभवता—कुमारिलेन । वृत्तिविकल्पादिरनुपदं परिह्रियते ॥

## भाट्टवत् न वस्तूनामुभयात्मकत्वम्

व्यक्तिव्यतिरिक्तैव जातिः व्यक्तिषु वर्तत इति ब्रूमः ॥ § 5702

यच्च वृत्तिविकल्पादिदूषणं तत्र वर्णितम् ।
तत् प्रत्यक्षमहिम्नैव सर्वं प्रतिहतं भवेत् ॥§ 5704

## विशेषातिरिक्तसामान्यग्रहणसम्भवः

यत्तावदवादि—भेदेन कुवलयामलकादिवत् अनवभासनादिति—तत्र प्रतीतिभेदो दर्शित p. 7 एव ॥ § 5705

## सामान्यविशेषयोस्समानदेशत्वं नान्यतरापलापकम्

यत्तु देशभेदेनाग्रहणात्, तदग्रहे तद्बुध्यभावादिति p. 7 तत्र तदाश्रितत्वं कारणं जातेः, न त्वसत्त्वम् । व्यक्तिवृत्तित्वाज्जातेः पृथग्देशतयाऽनुपलम्भः, तदग्रहे तदग्रहो वा; न पुनस्तवतिरिक्ताया अभावादेवेति ॥ § 5706

## जातेर्वृत्त्यनुपपत्तिपरिहारः

यदप्युक्तं p. 7 वृत्त्यनुपपत्तेरिति, तत्राप्युच्यते—प्रतिपिण्डं कार्त्स्न्येन जातिर्वर्तत इति । पिण्डान्तरे तदुपलम्भो न स्यादिति चेत्, किं कुर्मः ? कमुपलभामहे ? पिण्डान्तरेऽपि तदुपलम्भोऽस्त्येव । कथं च भवन्तमेनं निह्नुमहे ? एकदेशास्तु जातेर्न सन्त्येव, यैरस्या वर्तनं ब्रूमः ॥ § 5707

क्वेदमन्यत्र दृष्टं चेत्, अहो निपुणता तव !
दृष्टान्तं याचसे यस्त्वं प्रत्यक्षेऽप्यनुमानवत् ॥§ 5709

II.35/KSV

## सामान्यविषयकवृत्तिव्यवहारप्रदर्शनम्

---

६ ] व्यतिरिक्तैव— nyāma-wit__kha
११ ] भवादितः— nyāma-wit__ka; nyāma-wit__gha
१३ ] तदग्रहो— nyāma-wit__ka; nyāma-wit__kha; nyāma-wit__gha
५ ] क्वेदमन्यत्र चेत्— nyāma-wit__kha
६ ] यस्यात्पक्षेप्रत्यनुमानवत्—क-ग यस्त्वं प्रत्यनुमानवत्— nyāma-wit__kha

---

३ अभावादेवेति ] अन्यथा समानदेशत्वात् किं सामान्यं निषिध्यते, उत विशेषः ? इति विनिगमकाभावात् न त्वदिष्टसिद्धिः ॥
६ च ] भवन्तं—उत्पद्यमानं, उपलंभमिति शेषः । गोत्वं हि प्रतिपिण्डं समग्रमेव दृश्यते, न तु लेशतः ॥

किंनामधेयैषा वृत्तिरिति चेत्, *न नामधेयं अस्या जानीमः । पिण्डसमवेता जातिरित्येतावदेव प्रचक्ष्महे ॥ § 5710

## समवायस्य दुरपह्नवत्वम्

ननु ! अयुतसिद्धयोः सम्बन्धः समवायः । स च विप्रतिषेधादेव निरस्तः p. 8—न शक्यते निरसितुम्— § 5711

प्रतीतिभेदाद्भेदोऽस्ति देशभेदस्तु नेष्यते ।
तेनात्र कल्प्यते वृत्तिः समवायः स उच्यते ॥§ 5713

अवयवावयविनोः, गुणगुणिनोश्चेयमेव वृत्तिः । तयोरर्थान्तरत्वमुपरिष्टाद्दर्शयिष्यते । दर्शितं च अमुनैव मार्गेण देशभेदश्च तयोर्नास्तीति विस्पष्टमयुतसिद्धत्वम् ॥ § 5714

## जातिव्यक्त्योस्सम्बन्धोपपादनम्

यदप्युच्यते p.-8a—

नानिष्पन्नस्य सम्बन्धः, निष्पत्तौ युतसिद्धता§ 5716

इति—तदपि परिहृतमाचार्यैः जातं च सम्बद्धं चेत्येकः कालः इति वदद्भिः । सर्वं चैतदबाधितप्रतीतिबलात् कल्प्यते, न स्वशास्त्रपरिभाषया ॥ § 5717

## विभुद्वयसम्बन्धासम्भवः

विभूनामपि सम्बन्धः परस्परमसंभवादेव नेष्यते, न स्वशास्त्र परिभाषणात् । न संयोगः, तेषामप्राप्तेरभावात् । अप्राप्तिपूर्विका हि प्राप्तिः संयोगः । न समवायः, *तदाश्रितस्य तस्यानुपलंभादित्यलं प्रसङ्गेन ! § 5718
II.36/KSV

## जातिव्यक्त्योस्सम्बन्धस्य विलक्षणत्वम्

---

१--२ ] परिभाषणात्—
nyāma-wit_kha

---

१० *] न नामधेयमित्यादिरुपहासः ॥
३ माचार्यैः ] व्योमशिवः इति चक्रधरः ॥
८ *] तदाश्रितस्य—विभुद्वयाश्रितस्य । उभयोरपि द्रव्यत्वेन अवयावयविभावमन्तरा न समवायसंभवः । अस्तु तर्हि तयोरस्वरूपमेव संबन्धः, असंबद्धत्वापेक्षयाऽस्य वरत्वादिति चेत्, एवमुक्त्या यदि तृप्यसि, उच्यतां कामम्, न नोहानिरिति ॥

*ये चेह वृत्ती स्रक्सूत्रभूतकण्ठगुणादिषु ।
जात्यादीनामनंशत्वात् ताभ्यां वृत्तिर्विलक्षणा ॥§ 5720

तस्मात् वृत्त्यनुपपत्तेरित्यदूषणम् ॥ § 5721

## जातेराश्रयविकल्पानुपपत्तिपरिहारः

यदपि सर्वगतत्वं पिण्डगतत्वं च विकल्प्य दूषितम् p. 8b तदपि यत्किञ्चित् । यथा प्रतीतिरादिशति भगवती, तथा वयमभ्युपगच्छामः ॥ § 5722

सर्वसर्वगता जातिरिति तावदुपेयते ।
सर्वत्राग्रहणं तस्याः व्यंजकव्यक्त्यसन्निधेः ॥§ 5724

व्यक्तिर्व्यंजकतामेति जातेर्दृष्ट्यैव नान्यथा ।
दृष्टिर्यत्र यदा व्यक्तेः तदा तत्रैव तन्मतिः ॥§ 5726

सर्वत्र विद्यते जातिः न तु सर्वत्र दृश्यते ।
तदभिव्यंजिका यत्र व्यक्तिस्तत्रैव दृश्यते ॥§ 5728

## जातेस्सर्वसर्वगतत्वे प्रमाणम्

व्यक्तेरन्यत्र सत्त्वे ऽस्य किं प्रमाणं ? तदुच्यते ।
इहाप्यानीयमानायां गवि गोत्वोपलम्भनम् ॥§ 5730

गोपिण्डेन सहैतस्याः न चागमनसंभवः ।
*देहेनेवात्मनस्तस्मात् इहाप्यस्तित्वमिष्यताम् ॥§ 5732

II.37/KSV

४ ] कण्ठे— nyāma-wit__ka; nyāma-wit__ga
५ ] मनीशत्वात्— nyāma-wit__ka; nyāma-wit__ga
८ ] मप्युप— nyāma-wit__kha
१ ] स्यात्— nyāma-wit__ka; nyāma-wit__kha; nyāma-wit__gha

९ *] सक्सूत्रकण्ठयोः, द्रव्यगुणयोश्च यादृशी वृत्तिः, तद्विलक्षणैव जातिव्यक्त्योः ॥
८ *] देहेनेवेत्यादि—आत्मानो हि विभवः । अथापि तत्तदेहावच्छेदेनैव तस्य तस्य अहं इत्यनुभवः, सुखदुःखाद्यनुभवश्च । एवमेव सर्वजातीनां सर्वत्र सत्त्वेऽपि न सर्वसाङ्कर्यम्, न वा सर्वत्रोपलब्धिप्रसङ्गः । किन्तु तत्तपिण्ड एव तत्तज्ज्ञातेरुपलब्धिः । वस्तुतस्तु—आत्मनां द्रव्यत्वेन परिमाणस्यावश्यकत्वात् विभुत्वरूप परिमाणस्य सर्वगतत्वपर्यायस्य संभवः । जातेस्तु अद्रव्यत्वेन न तादृशस्यापि सर्वगतत्वस्य संभवः । अद्रव्यत्वादेव जातौ वृत्तिप्रश्न एव न घटते । तथा परिमा प्रश्नश्च । निरवयवद्रव्याण्यपि

### जातेस्सर्वगतत्वेऽपि न सर्वत्र सर्वदा तत्प्रतीतिः

अभिव्यक्तिस्तु तत्काला यत्कालं व्यक्तिदर्शनम् ।
तस्मात् सकृदभिव्यक्ता नान्यदाऽपि प्रतीयते ॥[§ 5734]

अभिव्यक्तिश्च तद्देशा यद्देशा व्यक्तिरीक्ष्यते ।
तस्मात्तस्मादभिव्यक्ता न देशेऽन्यत्र दृश्यते ॥[§ 5736]

व्यक्तिसर्वगतत्वेऽपि स्वयूथ्यैः कैश्चिदाश्रिते ।
भविष्यत्यद्य जातायां गवि गोधीस्तथा ग्रहात् ॥[§ 5738]

जायमानैव हि व्यक्तिः जायते प्रतियोगिनी ।
एक एव हि कालोऽस्याः जातेः सम्बन्धजन्मनोः ॥[§ 5740]

नेह जातेः पुरोऽस्तित्वं न च संक्रान्तिरन्यतः ।
किन्तु स्वहेतोः सा व्यक्तिः तादृश्येवोपजायते ॥[§ 5742]

II.38/KSV

### वस्तूनां स्वरूपस्वभावविशेषाः प्रश्नातीताः

कथमेतदितीदं च ये वा पर्यनुयुंजते ।
इदमप्यपरं, हन्त ! तेन पर्यनुयुज्यताम् ॥[§ 5744]

वृषः पिशङ्गो गौः कृष्णा सा च नीलतृणाशिनी ।

---

१२ ] जाति— nyāma-wit__ka; nyāma-wit__gha
३ ] यो वा पर्यनुयुज्यते— nyāma-wit__kha
४ ] इतरस्य परं हेतु— nyāma-wit__kha

---

अवृत्तिपदार्थाःइत्युच्यन्ते । द्रव्येष्वेव एवंत्वे रूपादीनां गुणानां परिमाणादिप्रश्नः यथा न युज्यते, तथैव अद्रव्यायाः जातेरपि । अतश्च, यथा पटे शौक्ल्यं दीर्घं वा, ह्रस्वं वा ? इत्यादिप्रश्नाः इव सर्वेऽपि वालिशप्रश्नाः । तर्हि कथं एते ज्ञेयाः, व्यवहर्तव्याश्च इति चेत्—यथेदानीमपि ज्ञायन्ते, व्यवह्रियन्ते च तथैवेति गृह्यताम् । न हि लोके कस्यापि जातिज्ञानमेव नास्ति, न वा न जातिव्यवहारः । किन्तु व्यवहारविषयभूता जातिः किंरूपा ? किंलक्षणा ? अतिरिक्ता, अनतिरिक्ता वा इति विचार्यते । न तु व्यवहार एव निह्नूयते । अतश्च यथानुभवं व्यवह्रियताम् । अन्यत्र कुत्राप्यदृष्टावपि पावकौष्ण्यवत् तत्तद्वस्तुस्वभावा धर्मिग्राहकप्रमाणसिद्धा अपर्यनुयोज्याः, यथानुभवं अङ्गीकार्या इति सङ्क्षेपः । अयमर्थः समनन्तरश्लोकेषु स्पष्टः ॥
५ ते ] प्रतियोगिनी—जात्या संबद्धैव ॥

ताभ्यायुत्पादितो वत्सः कथं भवति पाण्डरः ?§ 5746

यथा रूपादिसम्बद्धा सा व्यक्तिरुपलभ्यते ।
तथैव जातियुक्तेति का ते व्यसनसन्ततिः ?§ 5748

अगोव्यावृत्ततायां वा नैष प्रश्नो निवर्तते ।
*कस्मादगोनिवृत्तं तत् अद्य जातं स्वलक्षणम् ॥§ 5750

तस्माद्वस्तुस्वभावस्य विदित्वाऽननुयोज्यताम् ।
चोद्यचुञ्चुत्वमुत्सृज्य प्रतिपत्तिर्निरूप्यताम् ॥§ 5752

प्रतिपत्तिश्च विशेषेष्विव सामान्येषु च निरपवादा दर्शितैव । तस्मात् विशेषवत् अप्रत्याख्येयं सामान्यम् ॥ § 5753

## व्यक्तिभिरेवानुवृत्तिज्ञानानिर्वाहः

तत्रैतत्स्यात्—विशेषात्मन एव वस्तुनः सामान्यज्ञानजननशक्तियुक्तत्वात् किं सामान्यकल्पनयेति—तदयुक्तम्—विशेषवत् प्रत्यक्षत्वात् सामान्यस्य कः
II.39/KSV कल्पनार्थः ? यदि हि कार्यानुमेयं सामान्यं कल्पयेम, तत एवमनुयुज्येमहि; कार्यस्याप्यन्यथासिद्धेः किं तत्कल्पनयेति । प्रत्यक्षे तु सामान्ये कोऽयमनुयोगः ? § 5754

का चेयमनुवृत्तिज्ञानोत्पादिका शक्तिः ? विशेषेभ्योऽव्यतिरिक्ता; व्यतिरिक्ता वा ? नित्या; अनित्या वा ? इति विकल्प्यमाना वाचोयुक्त्यन्तरेण जातिरेव कथिता भवति, न वा किंचिदिति यत्किंचिदेतत् ॥ § 5755

## व्यक्तिग्रहणवेलायामेव जातेरपि ग्रहणमावश्यकम्

---

७ ] संबन्धात्— nyāma-wit_gha
७ ] न— nyāma-wit_kha
१० ] तदन्यं— nyāma-wit_gha
११ ] स्वभावस्य— nyāma-wit_ka
१--२ ] विशेषवत्— nyāma-wit_kha

---

१६ *] अद्य जातमपि स्वलक्षणं वस्तु गवादि, कस्मात्कारणात् स्वेतरसकलवस्त्वात्मकं न जातं, किन्तु सकलव्यावृत्तमेव । प्रथमं व्यक्तिरुत्पद्यते, अनन्तरमेव इतरव्यावृत्तिर्भवतीति न हि वक्तुं शक्यम्, उत्पत्तिकाले तस्या व्यक्तेः सर्वात्मकत्व प्रसङ्गात् । अतः उत्पद्यमानमेव वस्तु इतरव्यावृत्त्यात्मकधर्मविशिष्टमेव जायत इत्येव वक्तव्यम् । अतः सर्वमुभयोस्समानमेव ॥
५ स्तुनः ] सामान्यज्ञानं—अनुवृत्तत्वज्ञानम् ॥
१० नुवृत्तिज्ञानोत्पादिका ] शक्तिः,—व्यक्तिष्विति शेषः ॥

ननु ! यथा गोत्वादिजातिः नियतास्वेव व्यक्तिषु वर्तते, नासामंजस्येन, तथा काभिश्चिदेव व्यक्तिभिः काचिद्गवादिबुद्धिर्जन्यते इति— नैतदेवम्—विषयातिशयव्यतिरेकेण प्रत्ययातिशयानुपपत्तेः । *उपायातिशये तु प्रत्ययातिशयकारिणीष्यमाणे विषयातिशयं प्रति को द्वेषः ? सिद्धे च विषयातिशये दुरपह्नवं सामान्यम् ॥ § 5756

## गवादिप्रत्ययानां सेनावनादिप्रत्ययवैलक्षण्यम्

ननु च ! अनुवृत्तिबुद्धिः विनाऽपि सामान्यान्तरेण सामान्यान्तरेषु दृश्यत एवेति p. 10 कोऽत्र विस्रंभः ? उच्यते—न चाशेषेण पंचाशद्भवितुमर्हति । यदि हि सेनावनादिप्रत्ययाः करितुरगधवखदिरादिव्यतिरिक्तमर्थमनपेक्ष्य जायमाना मिथ्या भवन्ति, किमेतावता घटादि प्रत्ययैरपि मिथ्याभवितव्यम् । बाधकसदसद्भावनिबन्धना हि वैतथ्या वैतथ्यस्थितिः प्रत्ययानाम् । त- II.40/KSV
त्र सत्तादौ सामान्यान्तरविरहान्मिथ्या प्रत्ययाः, उपाधिना केन चित्प्रवर्तन्ते, न त्वेवं गवादाविति यत्किञ्चिदेतत् । तदुक्तम् श्लो-वा-१-१-५-आकृ-२४—
§ 5757

तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धनः ।
सामान्यशब्दस्सत्तादौ एकधीकरणेन वा इति ॥§ 5759

## अनुगतबुद्धीनामौपाधिकत्वासंभवः

ननु ! इहाप्येकार्थक्रियाकारित्वोपाधिनिबन्धन एकाकारप्रत्ययः सेत्स्यतीत्युक्तम् p. 11—सत्यमुक्तम्—अयुक्तं तु, एकार्थक्रियाकारित्वस्यैवासिद्धेः ॥ § 5760

---

१४ ] वृत्तिः— nyāma-wit__kha
१६ ] संभावनादि— nyāma-wit__ka
२ ] सद्भावनिबन्धनं हि वैतथ्यं— nyāma-wit__kha
२ ] Correction : ; ³ (sic !)
२० ] यदुक्तम्— nyāma-wit__ka

---

१३ गोत्वादिजातिः ] न हि सर्वत्र जातिव्यवहारो दृश्यते । अतः जातिमन्तरापि व्यवहारो निर्वहत्येवेत्याक्षेपाशयः । व्यवहारोऽन्यः, ग्रहणमन्यत् । यथापेक्षं हि व्यवहारः । यथावस्तु च ग्रहणम् । जातेर्ग्रहणं तु वर्तत एव पूर्वमपि । अन्यथा प्रतीत्यवैलक्षण्यप्रसङ्गेन सर्वसाङ्कर्यं स्यादिति समाधानस्याशयः ॥
१५ *] उपायातिशयः—सन्निकर्षादिः ॥
१ म्] सेनावनादिप्रत्ययाः किलापेक्षिकाः, न नियतविषया वा । गोघटादिप्रत्ययास्तु नैवमित्यर्थः । अन्यथा सविकल्पदृष्टान्तेन निर्विकल्पमप्यप्रमाणं स्यात् ॥
६ त्तादौ ] एकधीकरणं—अनुगतप्रतीत्युत्पादनम् ॥
७ स्यैवासिद्धेः ] असिद्धेः—न हि सर्वासां सजातीयानां व्यक्तीनां समानकार्यकारित्वं प्रत्यक्षसिद्धम् ॥

## प्रतीतीनां सादृश्यमपि सामान्याधीनम्

यत्तूक्तं— § 5761

## एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी p. 12§ 5762

इति—तदप्यसांप्रतम्; प्रत्यवमर्शस्याप्येकत्वानुपपत्तेः । न हि बहुभिर्दर्शनैरेको विकल्पः संभूय साध्यते, अपि तु नानादर्शनानन्तरं तत्सामर्थ्यलब्धजन्मानो विकल्पा अपि भेदेनैवोल्लसन्ति । न च तेषां किमपि कार्यान्तरमस्ति, येन ते एकतामधिगच्छेयुः ॥ § 5763

केन च विकल्पानामेकत्वं गृह्यते ? न दर्शनेन, तस्य दृश्यविषयत्वात् । न विकल्पान्तरेण, सर्वविकल्पानामारोपितार्थपर्यवसितत्वेन, स्वाकारविषयत्वेन वा परस्परभेदाभेदपरिच्छेदसामर्थ्यासंभवात् ॥ § 5764

II.41/KSV

## ज्ञानव्यक्तीनां भेदादेकत्वमप्यसंभवि

ब्रूयात्—विकल्पोल्लिख्यमानाकारभेदानवगमाद्विकल्पानामैक्यम् । यादृश एव एकशाबलेयादिस्वलक्षणदर्शनान्तरभुवाऽपि विकल्पेनोल्लिखित आकारः गौरिति, तादृश एव गोपिण्डान्तरदर्शनान्तरजन्मनापीति विषयाभेदात्तदैक्यमुच्यते । तदुल्लिख्यमाने हि विषये भेदो न प्रति भासते इत्यत एष विकल्पो भिन्नान्यपि दर्शनानि मिश्रीकरोति, दर्शनोपा रूढस्य भेदस्याग्रहणादिति— § 5765

तदेतदपि न हृदयंगममभिधीयते । विकल्पास्तावद्विज्ञानक्षणस्वभावत्वादन्योन्यं भिन्ना एव भवन्ति ॥ § 5766

---

९ ] विषयत्वात्— nyāma-wit__ka
१० ] विकल्पिताना— nyāma-wit__kha
३ ] दर्शनानन्तर— nyāma-wit__gha
३--४ ] विषय— nyāma-wit__ka
४ ] बोधो— nyāma-wit__ka
५ ] दर्शनापोहं च— nyāma-wit__ka
७ ] लक्षण— nyāma-wit__ka

---

१ स्य ] विकल्पा हि दृशिरूपाः, न दृश्याः । विकल्पविषयकविकल्पान्तराङ्गीकारेऽपि विकल्पानामसद्विषयत्वेन नार्थनिश्चायकत्वम् ॥
११ न्योन्यं ] एक एव घटः कालभेदेन यदा द्विवारं ज्ञानेन विषयीक्रियते, तदा विषयस्यैक्येऽपि ज्ञानव्यक्तिभेदः अनिवार्य एव । एवं सति नानाघटविषयकनानाज्ञानानामप्येकत्वं ज्ञानत्वाख्यानुगतजातिमन्तरा कथ व संभवेत् ?

## ज्ञानस्य तदकारस्य च भेदः, उताभेदः ?

यस्तु विकल्पोल्लिखित आकारोऽनुपलभ्यमानभेदः, स तेभ्यो व्यतिरिक्तः ? अव्यतिरिक्तो वा ? व्यतिरिक्तश्चेत्, सामान्यमेवेदं नामान्तरेणोक्तं भवति। अवास्तवत्वकृतो विशेष इति चेत्—न—अवास्त वत्वे युक्त्यभावात् ॥ § 5767

अव्यतिरिक्तश्चेत् स आकारः, तर्हि विकल्पस्वरूपवद्भिद्यत एवेति कथं तदैक्यम् ? कथं वा तदैक्येन भिन्नानामपि दर्शनानां मिश्रीकरणमव कल्पते ? § 5768

II.42/KSV

## एकाकारावमर्शहेतुत्वादपि विकल्पैक्यं दुर्वचम्

अपि च रे मूढ ! सामान्यानभ्युपगमे कुतस्त्य एकाकारविकल्पोत्पादः ? इति पर्यनुयुक्तेन त्वया, यदि विकल्पैक्यादित्युच्यते—तदेतरेतराश्रयं भवति—कार्यैक्याच्च विकल्पैक्यं, विकल्पैक्याच्च कार्यैक्य मिति ॥ § 5769

विकल्पैक्यं कार्यैक्यमिति तु सुतरां, अनन्तरं विकल्पैक्यं विकल्पैक्यादेवेत्युक्तं भवति। कथं चैवमनुन्मत्तो ब्रूयात् ! तस्मात्—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी§ 5771
ति व्यामूढभाषितम् ॥ § 5772

## विकल्पानामपूर्वविषयकत्वाभावेऽपि प्रामाण्यम्

यदपि विकल्पानां शब्दानां चान्यापोहविषयत्वसिद्धये प्रलपितम् एकस्यार्थस्वभावस्य इत्यादि p. 13—तदपि यत्किंचिदेतत्— § 5773

सर्वात्मना हि दृष्टोऽर्थः पुनर्न हि न दृश्यते।
प्रदर्शितं हि प्रामाण्यं गृहीतग्राहिणामपि ॥§ 5775

क्षणभङ्गे निरस्ते च देशकालादिभेदतः।
गृहितस्यापि भावस्य ग्रहणं न न युज्यते ॥§ 5777

## विकल्पानामपूर्वविषयकत्वसंभवः

९ ] आकारोप— nyāma-wit__ka
९ ] तेभ्यो— nyāma-wit__kha
१६--१९ ] कार्यैक्यादिकल्पैक्या— nyāma-wit__kha

१४ कृतो ] विशेषः—ज्ञानस्वरूपादिति शेषः ॥
४ रां ] कार्यमिति विकल्प एवोच्यते यदि, आत्माश्रयः ॥

अपि चास्मन्मते भिन्नैः धर्मैर्युक्तस्य धर्मिणः ।
धर्मोऽस्य केन चित्कश्चित् प्रत्ययेन ग्रहीष्यते ॥§ 5779

II.43/KSV

*विचित्रसहकार्यादिशक्तिभेदश्च धर्मिणः ।
नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मता कुतः ?§ 5781

## प्रामाण्यं न प्रयोजनाधीनम्

यदि च नाम निर्विकल्पकेन सर्वात्मना परिच्छिन्नं वस्तु पुनः परिच्छिन्दन्ति विकल्पान्तराणि वैफल्यमश्नुवीरन्, किमेतावता तेषामप्रतीयमानार्थग्राहिता कल्पयितुं शक्यते ? न हि विरतपिपासस्य हिमकर पटलमफलमिति, तदेव रजतमिति कल्पयितुं पार्यताम् । तस्मात् दुराशामात्रमेतत् ॥ § 5782

इत्थं चान्यापोहनिषेधात्मनि बाह्ये विकल्पानां शब्दानां च विषय इष्यमाणे भट्टकुमारिलोपन्यस्तदुस्तरदूषणासारवारणकारणं न हि किंचिदुत्पश्यामः ॥ § 5783

## विकल्पानामारोपितविषयकत्वनिरासः

यदपि तद्दूषणापनिनीषया विकल्पप्रतिबिम्बकमारोपिताकारमात्रव्यावृत्तिच्छायोपरक्तं किमपि परिकल्पितं p. 32—तदपि न व्यवहार् पदवीमवतरितुमुत्सहते ॥ § 5784

विकल्पो नाम बोधात्मा स च स्वच्छः स्वभावतः ।
नासावितरसंपर्कादृते कलुषतामियात् ॥§ 5786

नूनमभ्युपगन्तव्यं किंचिदस्योपरंजकम् ।
आन्तरं वासनारूपं बाह्यं वा विषयात्मकम् ॥§ 5788

II.44/KSV

---

१० ] धर्मस्य— nyāma-wit__ka
१ ] निरात्मनि— nyāma-wit__kha
न वारणकरणं— nyāma-wit__ga
८ ] रामा— nyāma-wit__ka

२ ] दूषणानामुद्धरणकरणं—ख, दूषणानां

---

१६ *] सर्वधर्मविशिष्टं वस्तु युगपदेव कुतो न गृह्यत इत्यत्राह—विचित्रेत्यादि ॥
४ देव] रजतेन प्रयोजनलाभात् रजतमिति इत्युच्यते ॥
७ माणे] श्लोकवार्तिके अपोहवाद इति शेषः ॥

## अपोहस्य बाह्यान्तरोभयरूपत्वाभावनिरासः

यत्पुनर्विद्यते नान्तः न बहिः, तेन रज्यते ।
विज्ञानमिति p. 23 मायैषा महती धूर्तनिर्मिता ॥§ 5790

विषया एव बुद्धीनां आंजस्येनोपरंजकाः ।
वासनाविषयज्ञानजन्यत्वान्न तथोदिताः ॥§ 5792

## सामान्यस्य वस्तुत्वमावश्यकम्

तस्मात् तत्र देशान्तरादौ वसता केनचिदर्थेन बुद्धयो रज्यन्ताम् ! एकान्तासता तु केनचिदारोपितेन तदुपरंजनमघटमानं मनोरथप्रायम् । न चैकान्तासन्नाकार आरोपयितुमपि शक्यते ॥ § 5793

## विकल्पानां वस्तुसंस्पर्शित्वम्

अपि च दर्शनपृष्ठभाविनो विकल्पाः तद्व्यापारकारिणः, व्यावृत्तं स्प्रष्टुमसमर्था व्यावृत्तिमात्रमबलम्बन्त इति यदुच्यते—तत्र दृश्यस्य सजातीयविजातीयव्यावृत्तत्वात् उभयव्यावृत्तिरस्तीति, *तां स्पृशन्तो विकल्पाः कथं विजातीयव्यावृत्तिमेव स्पृशेयुः ? § 5794

उभयावमर्शे सत्येषां पौनरुक्त्यादानर्थक्यमिति चेत्—नानर्थक्यम्— प्रमाणवर्गे निपतन्तः *काममनर्थका भवन्तु, अर्थान्तरं वाऽऽलम्बन्ताम् ! व्यावृत्तिं त्वबलम्बमाना अंशतो नेति न श्रद्दध्महे ॥ § 5795
II.45/KSV

## विकल्पे सामान्यविषयकत्वमावश्यकम्

सजातीयविजातियव्यावृत्त्योर्न च भिन्नता ।
यतोऽन्यतरसंस्पर्शो विकल्पे नप्रकल्पते ॥§ 5797

---

२--३ ] दृश्यस्य सजातीय—क, दृश्यसजातीयविजातीय— nyāma-wit__kha
३--४ ] उभयेऽपि व्यावृत्ति मेव स्पृशेयुः nyāma-wit__kha
६ ] निपतति— nyāma-wit__ka
९ ] विकल्पानां— nyāma-wit__ka

---

१ रादौ ] वसता—इत्यनेन वस्तुत्वं सामान्यस्योच्यते ॥
६ *] तां—व्यावृत्तिम् ॥
९ *] काममित्यादि—स्वकारणानुरोधि प्रमाणम्, न प्रयोजनानुरोधि ॥

सजातीयविजातीयव्यावृत्त्यवमर्शे तु दर्शनवदसाधारणग्राहिण एव विकल्पाः स्युरिति सामान्यनिबन्धनसंबन्धग्रहणादिव्यवदाराभावात् शब्दानुमाने प्रलयं प्रतिपद्येयाताम् ॥ § 5798

## अपोहस्य बाह्यत्वमान्तरत्वं वाऽऽवश्यकम्

व्यावृत्तिरपि बाह्या चेत्; तदवस्था कौमारिलदूषणाशनिः । आन्तरत्वे तु न तया विकल्पोपरागः कर्तुं शक्यः । नान्तः, न बहिरिति तु भणितिभङ्गीमात्रम् ॥ § 5799

## व्यावृत्तेर्वस्तुत्वमावश्यकम्

तत्तादृशं किंचित् ? न किंचिद्वा ? न किंचिच्चेत् न—*तेन विकल्पा नामनुरंजनस्योपपादयितुमशक्यत्वात् । अत्यन्तमसतश्च खरविषाणादेः व्यवहारविषयत्वाभावात्, असत्ख्यातिनिरसननीतिमेवात्रोत्तरं करिष्यामः ॥ § 5800

किंचिच्चेत्, नूनमन्तः, बहिर्वा तेन भवितव्यमेव । अतः कुमारिलादिष्टदूषणापनिनीषया योऽयमुत्प्रेक्षितः पन्था नूतनः—सोऽपि सङ्कटः । तस्मात् यथाऽध्यवसायमेव तत्त्वमिति युक्तम् ॥ § 5801
II.46/KSV

## सामान्यस्य पदार्थान्तरसंसर्गित्वोपपत्तिः

बाह्ये च वस्तुनि शब्दान्तरोपनीयमानभावाभावसम्बन्धाद्यपि न न युज्यते । सर्वस्य गौरित्यादिशब्दजनितस्य ज्ञानस्यास्तित्वाद्यनपेक्ष्य सामान्यमात्रविषयत्वात् । आकाङ्क्षानिराकरणाय अस्तिनास्तिपदान्तरं प्रयुज्यमानं सम्बन्ध्यते । नियतरूपता निश्चितनिजरूपे वस्तुनि वस्त्वन्तरस्य व्यवच्छेदनिबन्धना सिध्यत्येव; घटो घट एव, न पट इति । नैतावता तदपोह एव प्रत्याय्यो भवतीत्यलमतिक्षोदेन ! § 5802

१० ] व्यावृत्तविमर्शे— nyāma-wit_kha
४ ] मेवमिति— nyāma-wit_kha
५ ] न युज्यते— nyāma-wit_kha
८--९ ] नमिष्यते एव— nyāma-wit_kha
९ ] तदपोह्य— nyāma-wit_kha
९ ] प्रत्ययो— nyāma-wit_kha

१४ नुमाने ] प्रलयमित्यादि—अतः व्यावृत्त्यपेक्षयाऽधिकस्य सामान्यस्य विकल्पविषयत्वमावश्यकम् ॥
१७ तु ] भणितिभङ्गीमात्रं—तृतीयप्रकाराभावात् ।
१ * ] तेन—तुच्छेन ॥
९ पेक्ष्य ] शब्दानुमाने हि सामान्यमुखेनैव प्रवर्तेते ॥
११ ना ] निबन्धना नियतरूपता—इत्यन्वयः ॥

## जातिसमर्थनोपसंहारः

बाह्यार्थविषय एवं व्यवहारो घटत इत्ययं कस्मात् ?
दृश्यविकल्प्यावर्थावेकीकृत्य प्रवर्तते पुरुषः ॥§ 5804

एकीकारश्च कीदृक् ? यदि पृथगपतिः, तर्हि मूर्छाद्यवस्था-
साम्यं, तत्र प्रवृत्तिः कथमथ किमपि प्रस्फुरत्यर्थरूपम् ।
तत् दृश्यं चेत्, अपोहव्यवहृतिरफलाऽथ द्वितीयं चकास्ति
स्वेनाकारेण तस्मिन् सति सुनिपतिते चेष्टते कः सचेताः
?§ 5808

स्फुरति यदि विकल्प्यं दृश्यरूपेण कामं
स भवति विपरीतप्रत्ययो नाविवेकः ।
न वितथमतिबीजं विद्यते चेह किंचित्
न च रविकरनीरज्ञप्तिबद्धाधिका धीः ॥§ 5812

II.47/KSV

अर्थप्राप्तिरतः सदर्थविषयज्ञानप्रबन्धोद्गता
साक्षादेव मणिप्रभामणिमतिन्यायेन किं कथ्यते ।
प्रामाण्ये सविकल्पकस्य कथिते बाह्यार्थसिद्धिः स्थिता
तद्व्यक्त्याकृतिजातिवाच्यकलने तावत्प्रवर्तामहे ॥§ 5816

—इत जातिवादः— § 5817

## पदशक्तिः कुत्र

एवं सिद्धे बाह्येऽर्थे, निरस्तेषु तदपहारिषु तथागततस्करेषु अधुना विचार्यते गोशब्दः किमाकृतेर्वाचकः ? उत व्यक्तेः ? अथ जातेः ? इति ॥ § 5818

## आकृतिपदस्यार्थः

---

१४ ] स्यात्प्रवृत्त्यर्थरूपम्— nyāma-wit_kha
२ ] प्रबन्धाद्गता—क, प्रबन्धाहता— nyāma-wit_gha
७ ] वाङ्गो— nyāma-wit_kha
८ ] विद्यते— nyāma-wit_ka; nyāma-wit_gha
८ ] अथ जातेः— nyāma-wit_kha

---

१४ य ] एवं—कल्पितेनैवापोहेन ॥

तत्राकृतिपदेनेह संस्थानमभिधीयते ।
*सूत्रे पृथगुपादानात् न जातिर्जैमिनीयवत् ॥§ 5820

जैमिनिर्हि आकृतिस्तु क्रियार्थत्वात् जै. सू. ९-३-३३ इत्याकृतिं जातिमुपदिशति । भाष्यकारोऽपि सास्नादिविशिष्टाऽऽकृतिरिति ब्रूमः शा. भा. १-१-५ इति ब्रुवाणः तथैव व्यवहरति । वार्तिककृताऽपि व्याख्यातम् श्लो. वा. १-१-५, आकृति-वाद ३— § 5821

जातिमेवाकृतिं प्राहुः व्यक्तिराक्रियते यया ।
सामान्यं तच्च पिण्डानां एकबुद्धिनिबन्धनम् इति
॥§ 5823

## जात्याकृत्योभदः

इह तु व्यक्त्याकृतिजातयस्तु पदार्थः गौ. सू. २-२-६८ इति सूत्रकारः II.48/KSV पृथगाकृतिं जातेरवोचदिति संस्थानमेवाकृतिं मन्यते । लोकोऽपि अवयवसन्निवेशात्मिकामाकृतिं व्यपदिशति—यत्राकृतिस्तत्र गुणा वसन्ति इति । तस्मादवयवसन्निवेश एव आकृतिरुच्यते ॥ § 5824

तस्याश्च शब्दार्थतोपपद्यते, न वा ? इति परीक्षार्हत्वमस्त्येव, न जैमिनीयवदुपेक्षितुं सा युक्तेति । तद्व्यक्त्याकृतिजातिसन्निधौ प्रयोगात् गोशब्दस्य कोऽर्थ इति विचार्यते ॥ § 5825

## आकृतिशक्तिवादोपक्षेपः

तत्राकृतिवादिनस्तावदाहुः—प्रयोगप्रतिपत्तिभ्यां किल शब्दार्थनिश्चयः । वृद्धाः स्वार्थे तद्व्यवहरन्तः यस्मिन्नर्थे गोशब्दं प्रयुंजते, श्रोतारश्च यमर्थं ततः प्रतिपद्यन्ते, स तस्यार्थः ॥ § 5826

तत्र, यदि गोशब्दः केसरादिमति न प्रयुज्यते, सास्नादिमति च प्रयुज्यते, तदसाधारणसन्निवेशविषय एवावगम्यते । प्रत्यक्षविषये गौरित्यादिपदं प्र-

१ ] कारो जातेः— nyāma-wit_kha
२ ] कृतिवचो वदति— nyāma-wit_kha
९ ] स्वार्थेन— nyāma-wit_kha
११ ] यदेव— nyāma-wit_gha

१५ *] सूत्रे—व्यक्त्याकृतिजातायस्तु पदार्थः इत्यत्र ॥
१ ते] आक्रियते—निरूप्यत इत्यर्थः इति न्यायरत्नाकरः ॥
७ दुपेक्षितुं] सा—अवयवसन्निवेशविशेषात्मिका आकृतिः ॥

युज्यते । प्रत्यक्षं चाकृतिविषयम् । अश्वपिण्डसन्निवेशाद्विलक्षणो हि गोपिण्ड-सन्निवेश इन्द्रियेण प्रतीयते । तत्कृतमेव वस्तूनामितरेतरवैलक्षण्यम् । अतः प्रत्यक्षविषये पदं प्रवर्तमानं आकृतामेव वर्तितुमर्हति । प्रेषणादिक्रियायोगश्च व्यक्तिद्वारक आकृतेर्भविष्यतीति यदुक्तं— § 5827

## आकृतिशक्तिवादनिरासः

तदयुक्तं प्रतिव्यक्ति भिन्नसंस्थानदर्शनात् ।
आनन्त्यव्यभिचाराभ्यां सम्बन्धज्ञप्त्यसंभवात् ॥ § 5829

II.49/KSV

न नियतस्य शाबलेयसन्निवेशस्य गोशब्दो वाचकः, *तदभावेऽपि बाहुलेयसन्निवेशदर्शनात् । न च त्रैलोक्यान्तर्गतसकलगोपिण्डगतसन्निवेश-वचनत्वमवगन्तुं शक्यम्, आनन्त्यात् । ततश्च नाकृतिः शब्दार्थः, तस्यां क्रियाऽनुपपत्तेः । न हि प्रेषणादिक्रियासाधनं सन्निवेशः, अपि तु व्यक्तिः ॥ § 5830

न च गामानयेत्युक्तः सत्यामपि तदाकृतौ ।
चित्रप्रस्थमयं किंचित् गामानयति बुद्धिमान् ॥ § 5832

## आकृतेश्शब्दार्थत्वेऽतिप्रसङ्गः

ननु ! जातिवाच्यत्वपक्षेऽपि गोत्वजातेः सर्वगतत्वात् किमिति मृद्गवानयनं नानुष्ठीयते ?—उच्यते—हस्ती तर्हि कथं नानीयते ? सर्वगतत्वाज्जातेः । अथ सर्वत्रास्तित्वेऽपि व्यंजकव्यक्तिनियमेनापह्नूयते— हन्त ! तर्हि सास्नादिमत्प्राणी गोत्वजातेरभिव्यंजकः, न मृद्गव इति नातिप्रसङ्गः । सन्निवेशस्य च तत्र भावात् तद्वाच्यत्ववादिनः नैनमतिप्रसङ्गमतिक्रामन्ति ॥ § 5833

## शब्दानामाकृतिवाचकत्वे शुक्लादिशब्दसामानाधिकरण्यासंभवः

१६ ] तदुक्त— nyāma-wit__kha
२० ] पिण्ड— nyāma-wit__kha
१ ] मनुगतं— nyāma-wit__kha
२ ] व्यक्तिः— nyāma-wit__ka
५ ] मृत्स्नामयीं कश्चित्— nyāma-wit__kha
७ ] किं— nyāma-wit__kha

३ *] तदभावेऽपि—शाबलेयसन्निवेशाभावेऽपि । अनेन व्यभिचारः प्रदर्शितः । समनन्तरवाक्येनानन्त्यं प्रदर्श्यते ॥
११ त्वाज्जातेः ] जातेः—गोत्वादिजातेः ॥

किंचाकृतिवचनत्वे गोशब्दस्य शुक्लादिगुणवाचिभिः पदान्तरैः सामानाधिकरण्यं न प्राप्नोति । न हि शुक्लादिगुणा आकृतिवृत्तयः, अपि तु व्यक्तिवृत्तयः । तत्सामानाधिकरण्यादिबलवत्तया वरं व्यक्तिः शब्दार्थ इष्यताम् ॥ § 5834

II.50/KSV

## आकृतेश्शब्दार्थत्वं निरर्थकम्

व्यक्तौ तावत् क्रियायोगः जातौ सम्बन्धसौष्टवम् ।
नाकृतौ द्वयमप्येतत् इति तद्वाच्यता कुतः ?§ 5836

जातिव्यक्त्योरतः कार्या वाच्यत्वे संप्रधारणा ।
तत्र व्यक्त्यभिधेयत्ववादिभिस्तावदुच्यते ॥§ 5838

## व्यक्तेश्शब्दार्थत्वे सौलभ्यम्

प्रयोगचोदनासामंजस्यात् व्यक्तिः शब्दार्थः । आलंभनविंशनप्रोक्षणादिचोदनाः जातौ न संगता भवन्ति । न हि जातिरालभ्यते विशस्यते, प्रोक्ष्यते वा ॥ § 5839

अपि च षट् देयाः, द्वादश देयाः, चतुर्विंशतिर्देया इति न जातिः, षडादिसंख्याभिर्युज्यते; अपि तु व्यक्तिः । तस्मात् सैव शब्दार्थः ॥ § 5840

## जातेश्शब्दार्थत्वेऽनुपपत्तिः

अपि च यदि पशुरुपाकृतः पलायेत, अन्यं तद्वर्ण तद्वयसमालभेत इति यदि जातिः शब्दार्थः स्यात्, अन्यस्यालंभो नावकल्पेत, अन्यस्यानीय मानस्य पशुद्रव्यस्य सैव जातिः । तत्रान्यत्वसम्बन्धो व्यक्तेरवकल्पते, न जातेरित्यतोऽपि व्यक्तिः शब्दार्थः ॥ § 5841

## व्यक्तेश्शब्दार्थत्वं स्वरसम्

१२--१३ ] वृत्तयः—
nyāma-wit_kha
१३ ] तस्मात् सामा—
nyāma-wit_ka

७ ] अन्यस्यापनीय—
nyāma-wit_kha

१६ प्राप्नोति ] आकृतेरपि शौक्ल्यवत् व्यक्तिविशेषणत्वात् ॥
१ जातौ ] संबन्धः—शब्दार्थसंबन्धः । तत्र सौष्टवं अनुगमसौलभ्यम् ॥

५ स्यात् ] चोदनायास्सामञ्जस्यमेवानन्तरवाक्येषु वर्ण्यते ॥

चयापचयसङ्घातस्वस्वामित्वादिकल्पनाः ।
यान्ति व्यक्त्यभिधेयत्वपक्षे झडिति सङ्गतिम् ॥§ 5843

II.51/KSV

न व्यक्तिर्लक्षणाद्वारं इयत्कार्यं च युज्यते ।
वक्रः पन्था न गन्तव्यः प्रष्ठे वहति वर्त्मनि ॥§ 5845

*उपलक्षणमाश्रित्य जातिसम्बधवेदनम् ।
प्रसेत्स्यतीति नानन्त्यव्यभिचारकृतो ज्वरः ॥§ 5847

किंच प्रत्यक्षविषये वृत्तिः पदस्येष्टा परैरपि ।
निष्कृष्टं न च सामान्यमात्रं प्रत्यक्षगोचरः ॥§ 5849

व्यक्तेरेव पदार्थत्वं तस्मादभ्युपगम्यताम् ।
तथाच बुद्धिस्तत्रैव श्रुतशब्दस्य जायते ॥§ 5851

## व्यक्तेश्शब्दार्थत्वे मीमांसकाक्षेपः

तदेतज्जैमिनीयैर्न क्षम्यते । तथाहि—व्यक्तिमात्रं वा शब्दार्थ इष्यते ? *विशिष्टा वा व्यक्तिः ? न तावत् व्यक्तिमात्रम्; न हि यस्यां कस्यांचिद्व्यक्तौ गोशब्दं वक्तारः प्रयुँजते । न च यां कांचिद्व्यक्तिं गोशब्दात् श्रोतारः प्रतिपद्यन्ते ॥ § 5852

अथ गोत्वविशिष्टव्यक्तिः शब्दार्थ इत्युच्यत, गोत्वमेव हि तर्हि गोशब्दार्थः, न व्यक्तिः । कथम् ? श्रूयताम—यदि हि व्यक्तिः शब्दार्थो भवेत्, व्यक्त्यन्तरेषु न प्रयुज्येत । अथ व्यक्त्यन्तरेऽपि प्रयुज्यते, सर्वव्यक्तिसाधारणस्तर्हि तस्यार्थः, न व्यक्तिः ॥ § 5853

II.52/KSV

## जातेरनुगमकत्वमात्रान्न निर्वाहः

१३ ] स्पष्टे— nyāma-wit_ka
१५ ] नान्त्यस्य— nyāma-wit_ka
६--७ ] व्यक्तयन्तरे— nyāma-wit_kha
७--८ ] स्तस्यार्थ— nyāma-wit_kha

१ *] केवलव्यक्तेश्शब्दार्थत्वे आनन्त्यं व्यभिचारश्च दुर्वार इत्याशङ्कां परिहरति— उपलक्षणमित्यादिना ॥
८ *] विशिष्टा—जातिविशिष्टा ॥

ननु ! व्यक्त्यन्तरमपि व्यक्तिरेव । सोऽयं व्यक्तौ गोशब्दः प्रयुक्तः, न सामान्ये—मैवम्—व्यक्तौ चेत् गोशब्दः प्रयुज्यते, कर्कादिव्यक्तावपि प्रयुज्येत । यत्र प्रयोगोऽस्य दृष्टः, तत्र प्रयुज्यत इति चेत्; अद्य जातायां गवि मा प्रयोजि, न हि तत्र प्रयोगोऽस्य दृष्ट इति । तस्माद्दर्शनमकारणम्, प्रतिव्यक्ति तस्यासंभवात् ॥ § 5854

व्यक्तौ शब्दार्थे इयं वा गौः, इयं वा गौः इति प्रतिपत्तिः स्यात्, *न तु इयमपि गौः इति । भवति चैवं प्रतीतिः । न चायमविद्यमाननियन्तृक एव यदृच्छाशब्दप्रयोगः प्रवर्तत इति नियामकमस्य चिन्त्यम् ॥ § 5855

गोत्वमेव नियामकमिति चेत्, आयुष्मन् ! साधु बुध्यसे । किन्तु तद्गोत्वमवगतमनवगतं वेति वक्तुमर्हसि । नानवगतम्, अतिप्रसङ्गात् । अवगतं चेत्, कुतस्तदवगच्छामः ? शब्दात्, अन्यतो वा ? नान्यतः; प्रमाणान्तरासन्निधानात् । शब्दाचेत्, तर्हि शब्दः प्रथमतरं गोत्वे वर्तितुमर्हति, नागृहीतविशेषणा विशिष्टे बुद्धिः इति न्यायात् ॥ § 5856

## जातेर्व्यक्तिविशेषणतया शब्दार्थत्वासंभवः

ननु ! जातिं विशेषणत्वेन, व्यक्तिं च विश्येष्यत्वेन वक्ष्यति गोशब्दः; § 5857

II.53/KSV

न शक्नोति वक्तुं, अतिभारप्रसङ्गात् । न च व्यक्त्यवगतौ गतिरन्या नास्ति, यत इयन्तं शब्दे भारमारोपयेम । न हि वयं व्यक्तिप्रतिपतिं भवन्तमपह्नुमहे । नापि भवन्तीं जातिप्रतिपत्तिमपह्नुमहे, उभयप्रतीतेः प्रत्यात्मवेदनीयत्वात् । उभयत्र चाभिधात्री शक्तिरतिभारा शब्दस्य, अन्यतरप्रतीत्या चान्यतरप्रतीतिसिद्धेः । तत्र किं जातौ वर्तमानः शब्दः व्यक्तिं, आहोस्विद्व्यक्तौ वर्तमानः जातिमाक्षिपत्विति विचारणायां—*जातेर्विशेषणत्वात्पूर्वतरं प्रतिपत्तिरिति सैव शब्दस्यार्थो भवितुमर्हति । तस्यां च शब्दादवगतायां तत एव व्यक्त्यवगमः सेत्स्यतीति नोभयत्र शाब्दो व्यापारः ॥ § 5858

---

२१ ] विशेष्ये— nyāma-wit__ka
७ ] वर्तमानः— nyāma-wit__kha
९ ] शब्दार्थो— nyāma-wit__kha

---

१८ स्मा ] दर्शनं—यत्र प्रयोगोऽस्य दृष्टः इत्यवोक्तं दर्शनम् । असंभवात्—जगति विद्यमानसर्वगवां केनापि द्रष्टुमशक्यत्वात् ॥
२० * ] न त्वित्यादि । व्यक्तिद्वयानुगमिकायाः जातेश्शब्दार्थत्वाभावात् । नियन्तृकः—नियामकः ॥
५ ब्दः ] प्रथमतरं—गोरुपस्थापनात्प्रागिति यावत् ॥
१४ * ] जातेरित्यादि—इदमत्र तत्त्वं—प्रत्यक्षं व्यक्तिद्वारा जातिं गृह्णाति । शब्दस्तु जातिद्वारा व्यक्तिम् । तत्र प्रत्यक्षस्थले प्रापकान्तराभावात्, उभयत्रापि सन्निकर्षसत्त्वाच्च प्रत्यक्षमेव प्रमाणम् । शाब्दस्थले तु लक्षणायाः, अर्थापत्तेर्वा संभवात् न व्यक्तिबोधनव्यापारभारः शब्दस्योपरि निक्षेप्तुं युक्त इति जातिरेव पदार्थः, व्यक्तिस्तु वाक्यार्थः स्यात्कामम् । पदादनुपस्थितस्यापि शाब्दबोधे भानसंभवादिति ।

## गवादिपदानां दण्ड्यादिपदवैलक्षण्यम्

ननु ! दण्डिशब्दादिव विशेषणं च जातिं, विशेष्यां च व्यक्तिं गोशब्दादेव प्रतिपत्स्यामहे । कोऽस्यातिभारः ? § 5859

विषमोऽयं दृष्टान्तः । तत्र हि प्रकृतिप्रत्ययविभागेन द्वयप्रतीतिरवकल्पते । दण्डशब्दः प्रकृतिर्विशेषणमभिवदति । मत्वर्थीयप्रत्ययश्च विशेष्यमिति । गोशब्दे तु नैष न्यायः संभवति । तत्र न विशेषणे दण्डिशब्दो वर्तते, न च विशेष्ये दण्डशब्दः । इह तु गोशब्द एक एव विशेषणे विशेष्ये वा II.54/KSV
वर्तते । विशेष्ये वर्तमानो विशेषणे प्रमाणान्तरमपेक्षते । विशेषणे तु वर्तमानः तदवगमय्य, विशेष्यमप्याक्षिपतीति न कश्चिद्दोषः ॥ § 5860

## शब्दाद्व्यक्तिबोधानुभवः अन्यथासिद्धः

तदिदमात्मप्रत्यक्षं, यत् शब्दे उच्चरिते व्यक्तिरवगम्यत इति । सा किं शब्दात्, उत जातेः ? इति विवेको न प्रत्यक्षः । स युक्त्याऽवगम्यते । शब्दस्य द्वयाभिधाने यत्नगौरवात्, विरम्यव्यापारस्य चासंवेदानात्, अन्तरेणापि च शब्दं जात्यवगमे व्यक्तिप्रतीतिदर्शनात् जातित एवैषा व्यक्तिप्रतीतिः; जातिप्रतीतिश्च शब्दादिति निश्चीयते । भवद्भिरपि च विशेषणज्ञानपूर्विका विशेष्यावगरतिरङ्गीकृतैव । यथाऽऽह कणव्रतः—समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते कार्यकारणभूते वै. सू. ८-१-९ इति ॥ § 5861

## शब्दात् व्यक्तिबोधनैयत्यं नास्ति

यत्पुनरभिहितम्—आलंभनविशसनप्रोक्षणादिक्रियायोगात् व्यक्तिः शब्दार्थ इति—तदप्यनैकान्तिकम्—जातावपि क्वचित् क्रियायोगदर्शनात्—श्येनचितं चिन्वीत इति ॥ § 5862

## व्यक्तेः कुत्रचित् क्रियान्वयायोगः

---

१७ ] वर्तेत— nyāma-wit_kha
१८ ] माक्षिपतीति— nyāma-wit_kha
१९ ] स— nyāma-wit_kha
२ ] जात्यवगमात्— nyāma-wit_kha

---

२१ न] विशेषणे—केवले इति शेषः । इह त्वित्यादि । विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इतिवत्, विशेष्ये क्षीणशक्तिश्च नैव गच्छेद्विशेषणम् इत्यपि तुल्यन्यायात्समानमिति भावः ॥
४ क्षं] आत्मप्रत्यक्षं—स्वानुभवः । शब्दे श्रुते व्यक्तिबोधः न निह्नूयते । कार्यमनुभवसिद्धं, न कारणमित्यर्थः ॥
७ ब्दं] शब्दं इत्यस्य व्यक्ति—इत्यादिना संबन्धः ॥

ननु ! अत्रापि व्यक्तेरेव कार्याङ्गता, नामूर्ताया जातेः— मैवम्—न ह्यत्र श्येनः साधनत्वेन निर्दिश्यते पशुना यजेत इतिवत् । *कर्मण्य- II.55/KSV ग्न्याख्यायाम् पा-सू-३-२-९२ इति त्वभियुक्तस्मरणात् चयननिर्वर्त्यः श्येन इति शब्दार्थोऽवगम्यते । न च येनव्यक्तिः चयनेन निर्वर्तयितुं पार्यते । अग्न्याख्यायां इति हि स्मर्यते । न हीष्टकानिचयेन पतत्री अभिनिर्वर्तते । तदाकारस्त्वग्निरभिनिर्वर्त्यत इति अत्र जातेः क्रियाङ्गत्वं न व्यक्तेः ॥ § 5863

## सादृश्यं जातिमूलकमेव, न व्यक्तिमूलकम्

ननु ! व्यक्त्या सादृश्यं संपादयिष्यते—न शक्यते संपादयितुम्, व्यक्त्यन्तरवैसादृश्यस्यापि संभवात् । यो ह्येकया व्यक्त्या सदृशः, सोऽन्यैर्विसदृशोऽपि भवति ॥ § 5864

## अमूर्तानामपि साधनत्वसंभवः

यत्तु अमूर्ताया जातेर्न क्रियाङ्गत्वमिति—नैष दोषः । अमूर्तानामपि गणकर्मणां साधनभावोपपत्तेः—अरुणया क्रीणाति अभिक्रामं जुहोति इति । व्यक्त्याक्षेपद्वारेण चालंभनविशसनप्रोयोगचोदनासु साधनत्वं जातेरुपपत्स्यते ॥ § 5865

*लक्षितव्यक्तिसाध्यं तु तत्साध्यं कार्यमिष्यते ।
यथा भूतेन्द्रियोत्पाद्यं आत्मकर्तृकमुच्यते ॥§ 5867

II.56/KSV

आत्मा तावत् सर्वकर्मस्वधिकृतः, कर्ता च । स चामूर्तत्वात् देहेन्द्रियद्वारेण औदुम्बरीसंमार्जनाज्यावेक्षणादीनि कार्याणि निर्वर्तयन् कर्ता तेषु भवति । एवं जातिरपि व्यक्तिवर्त्मना तन्निर्वर्तयन्ती साधनतां लप्स्यते ॥ § 5868

## जात्यादीनां क्रियाङ्गत्वं सद्वारकम्

२ ] साधनतयोपपत्तेः—
nyāma-wit_kha

१५ *] कर्मणीत्यादि—अनेन अग्न्याधानस्थानवाचकात् चिञ्चयने इति धातोः क्विप् विहिता । श्येन इव चितः श्येनचित् इति दृष्टान्तः । तथा च श्येनचित् इत्यत्र श्येनशब्दः श्येनसदृशे लाक्षणिकः । श्येनाकृतिकमग्न्याधानस्थानमित्यर्थः ॥

८ *] पशुपदेन लक्षितया व्यक्त्या आलम्भनविशसनाद्युपपत्तिः, यथा हस्तेन कृते कार्ये पुरुषेण कृतं इति, चक्षुरादौ पश्यति पुरुषः पश्यति इति च व्यवहारः ॥

अतश्च जातिरेवाङ्गं इति मीमांसका जगुः ।
तस्याश्चेदं क्रियाङ्गं अन्यद्वारकमात्मवत् ॥§ 5870

एवं षड्वेयाः इति, अन्यं तद्वर्णमालभेत p. 50 इति च तद्वारकमेव योज्यम् । एतेनोपचयापचयसंघाताद्यपि व्याख्यातम् ॥ § 5871

सम्बन्धग्रहणादिकार्यं च जातिपक्ष एव सूपपादम्, आनन्त्यव्यभिचारादिचोद्यानवकाशात् ॥ § 5872

## प्रत्यक्षस्य व्यक्तिविषयकत्वेऽपि न तत्र शब्दशक्त्यावश्यकता

यत्पुनरभ्यधायि p. 53—प्रत्यक्षविषये पदं वर्तते । न च प्रत्यक्षस्य सामान्यमात्रं विषय इति—परिहृतं तत् वार्तिककृता । प्रत्यक्षस्य हि चित्रात्मकं वस्तु विषयः ॥ § 5873

न च तत्तादृशं किंचित् शब्दः शक्नोति भाषितुम् ।
सामान्यांशानपोद्धृत्य पदं सर्वं प्रवर्तते§ 5875

श्लो. वा. आकृ. ६२ इति ॥ § 5876

न हि नानाधर्मनिचयखचितचित्राकारवस्तुसमर्पणनिपुणमेकं किमपि पदमुपपद्यते । न च तत्र सम्बन्धग्रहणं सुकरमिति सामान्यांशनिष्ठमेव पदं युक्तम् । तस्माज्जातिरेव शब्दार्थ इति ॥ § 5877

II.57/KSV

## व्यक्तेः शब्दवाच्यत्वसिद्धान्तः

अत्राभिधीयते—न जातिः पदस्यार्थो भवितुमर्हति । पदं हि विभक्त्यन्तो वर्णसमुदायः, न प्रातिपदिकमात्रम् । तत्र च प्रकृतिप्रत्यया वितरेतरान्वितमर्थमभिदधाते इति स्थितम् । द्वितीयादिश्च विभक्तिः प्रातिपदिकादुच्चरन्ती प्रातिपदिकार्थगतत्वेन स्वार्थमाचष्टे । युगपच्च त्रितयं विभक्त्यर्थः—कारकं,

---

१३ ] इत्यन्तं—क, इत्यन्यं— nyāma-wit_kha
१४ ] वक्तव्यम्— nyāma-wit_kha
२ ] रचित— nyāma-wit_kha
७ ] धत्ते— nyāma-wit_kha

---

५ मेकं ] एकमिति—व्यक्तिस्तु अनेकधर्मविशिष्टा । पदं तु एकैकधर्मविशिष्टमेव बोधयेत्, न समग्रां व्यक्तिम् । नीलः इत्युक्ते रूपमात्रं, महान् इत्युक्ते परिमाणमात्रं बोध्यते । अतः न पदं व्यक्तिवाचकम् ॥

लिङ्गं, सङ्ख्या च । न चैतत्त्रितयं प्रातिपदिकार्थे जातावन्वेति । न जातिः कारकम् । न च जातेः स्त्रीपुंनपुंसकविभागः । न चास्या द्वित्वादियोग इति ॥ § 5878

## लक्षणया न व्यक्तिबोधनिर्वाहः

ननु ! व्यक्तिलक्षणया सर्वमुपपत्स्यते इत्युक्तम्—न च युक्तमुक्तम् —सकृत्प्रयुक्तं पदमंशेन कंचिदर्थमभिवदति । ततोऽर्थान्तरं लक्षयति । तद्गतत्वेन पुनः लिङ्गसङ्ख्याद्यभिधत्ते इति न प्रातीतिकोऽयं क्रमः ॥ § 5879

साक्षात्तदन्वितत्वेन कथ्यमानं त्वसङ्गतम् ।
तद्भवेदग्निना सिंचेत् इत्यादिविधिसन्निभम् ॥§ 5881

## प्रत्ययार्थस्य सद्वारकान्वयनिरासः

ननु ! पुंसीव सामान्ये कारकत्वं भविष्यति p. 62 । § 5882
कक्ष्यान्तरितमित्येषः युक्तो वैभक्तिकोऽन्वयः ॥ § 5883
II.58/KSV

प्रातिपदिकार्थसामान्यगतत्वेनैव विभक्त्या स्वार्थोऽभिधीयते, न लक्षितव्यक्तिवृत्तित्वेन; यतोऽभिधानवैषम्यं स्यात् । स तु विभक्त्यर्थो जातौ साक्षादसंभवत् कक्ष्यान्तरितो भविष्यति—नैतत्—*आत्मनो ज्ञानप्रयत्नादियोगित्वेन कारकत्वोपपत्तेः । जातेस्तु साक्षान्न मनागपि व्यापारलेशसंस्पर्श इति स्वतो दुर्लभं तस्याः कारकत्वम् । अतः कथं तत्र विभक्त्यर्थान्वयः ? § 5884

## संख्यादेर्व्यक्तिगतत्वेनैव लोकानुभवः

यदन्वितं च सङ्ख्यादि, तत्स्थत्वेन न कथ्यते ।
कथ्यते यद्गतत्वेन, न तत्तेन समन्वितम् ॥§ 5886

---

१ ] लिङ्गसंख्ये च— nyāma-wit_ka
१३ ] दधति— nyāma-wit_kha
१६ ] मन्वितम्— nyāma-wit_ka
१ ] स्त्रीपुंस— nyāma-wit_ka
१ ] कथंनैव— nyāma-wit_kha
२ ] व्यत्तय— nyāma-wit_kha
५ ] आजन्मनो— nyāma-wit_ka
९ ] यत्स्थत्वेन तु कथ्येत— nyāma-wit_ka

---

१७ मः ] अपितु पदश्रवणसमनन्तरमेव पशुना इत्यादौ करणत्वपुंस्त्व-एकत्वविशिष्टा व्यक्तिरेवावगम्यत इति शेषः ॥
१ त्वेन ] जात्यन्वितत्वेन लिङ्गसंख्यादिबोधनमत्यन्तविरुद्धम् ॥
७ त् ] कक्ष्या—व्यक्तिरूपा ॥
७ * ] अन्ततः पुरुषाधिष्ठानमन्तरा हि चक्षुः न पश्येत् ॥
१० ते ] पदैरितिशेषः ।

न च व्यवहितव्यक्तिप्रतीतिं मन्यते जनः ।
नान्यथाऽनुपपत्त्याऽपि क्रमसंवेदनं क्वचित् ॥§ 5888

*जनयन्तीं च पश्यामः व्यक्तिं जात्यनुरंजिताम् ।
सङ्ख्यादियोगिनीं चेति सा वै धत्ते पदर्थताम् ॥§ 5890

## आकृतेरपि शब्दवाच्यत्वम्

जातेः कार्यान्वयः श्येनचितमित्यभ्यधायि यत् ।
तत्र संस्थाननिर्देशात् न जातेः काचिदङ्गता ॥§ 5892

II.59/KSV

श्येनव्यक्त्या चेत् सादृश्यमिष्टकाकूटस्य नास्ति, व्यक्त्यन्तरेण व्यभिचारात् p. 55; न तराममूर्तया जात्या सादृश्यमाकाशेनेव तस्यावकल्पत इति स्पर्धोदाहरणमात्रमेतत् ॥ § 5893

## जात्याश्रयव्यक्तेः पदवाच्यत्ववर्णनम्

अन्येषु तु प्रयोगेषु गां देहीत्येवमादिषु ।
तद्वतोऽर्थक्रियायोगात् तस्यैवाहुः पदार्थताम् ॥§ 5895

पदं तद्वन्तमेवार्थं आंजस्येनाभिजल्पति ।
न च व्यवहिता बुद्धिः, न च भारस्य गौरवम् ॥§ 5897

*सामानाधिकरण्यादिव्यवहारोऽपि मुख्यया ।
वृत्त्योपपाद्यमानः सन् नान्यथा योजयिष्यते ॥§ 5899

तस्मात् तद्वानेव पदार्थः ॥ § 5900

## जात्याश्रयनिरूपणम्

१३ ] योगिनी— nyāma-wit_kha
१७ ] नितरा— nyāma-wit_kha
१७ ] न तस्या— nyāma-wit_kha
५ ] हारस्य— nyāma-wit_ka
६ ] प— nyāma-wit_kha

१४ *] जनयन्तीं—बोधयन्तीम् ॥
९ च] भारस्य—यः तादृशविशिष्टबोधनशक्तिमान्, तस्य कथं गौरवम् । अशक्तस्य तु गौरवम् ॥
१० *] नीलो घटः इत्यादिसामानाधिकरण्यं शब्दस्य व्यक्तिवाचकत्व एव घटेत ॥

ननु ! कोऽयं तद्वान्नाम ? तत् अस्यास्तीति तद्वान् इति विशेष एव सामान्यवानुच्यते ॥ § 5901

विशेषवाच्यत्वे चानन्त्यव्यभिचारौ तदवस्थौ । सामान्यं तु शब्दे नानुच्यमानं नोपलक्ष्यमाणं भवति । उभयाभिधाने च शब्दस्यातिभार इत्युक्तम्—उच्यते—नेदन्तानिर्दिश्यमानः शाबलेयादिविशेषः तद्वान् । न च सर्वस्त्रैलोक्यवर्ती व्यक्तिव्रातस्तद्वान् । किन्तु सामान्याश्रयः कश्चिदनुल्लिखितशाबलेयादिविशेषः तद्वानित्युच्यते । सामान्याश्रयत्वाच्च नानन्त्यव्यभिचारयोस्तत्रावसरः ॥ § 5902 II.60/KSV

## व्यक्तिवाचकत्वेऽपि गौरवाभावः

न च विशेषणमनभिधाय विशेष्यमभिदधाति शब्द इत्यभ्युपगच्छामः, येनैनमतिभारेण पीडयेमहि । सामान्याश्रयमात्रे सङ्केतग्रहणात् तावन्मात्रं वदतः शब्दस्य कोऽतिभारः ? § 5903

एवं—तद्वतो नास्वतन्त्रत्वात् इत्यादिदूषणं परिहृतं भवति ॥ किंच— § 5904

प्रत्यक्षं न हि निष्कृष्टजात्यंशपरिवेष्टितम् ।
तद्गोचरप्रवृत्तश्च शब्दस्तं कथयेत् कथम् ?§ 5906

तस्मात् प्रत्यक्षविषये प्रवर्तमानं तत्समानविषयमेव भवितुमर्हति पदम्, न सामान्यमात्रनिष्ठम् ॥ § 5907

## सामान्यविशेषयोः युगपद्ग्रहणाक्षेपः

युगपन्ननु संवित्तिः विशेषणविशेष्ययोः ।
प्रत्यक्षेऽपि न दृष्टैव न च युष्माभिरिष्यते ॥§ 5909

*कार्यकारणभावो हि तद्धियोर्भवतां मते ।

१६ ] मभिधाय— nyāma-wit_ka
१६ ] वदति— nyāma-wit_ka
१७ ] पीड्येमहि— nyāma-wit_kha

४ एवं ] तद्वतो नास्वतन्त्रत्वादुपचारादसंभवात् । वृत्तिरूपस्य भिन्नत्वात् राज्ञि भृत्योपचारवत् इति प्रमाणसमुच्चयस्य श्लोकः । शब्दः न जात्याश्रयवाचकः । तत्र हेतुः अस्वतन्त्रत्वादित्यादि ॥
१२ *] विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वात् प्रथमं विशेषणमात्रविषयकमेव प्रत्यक्षं सिद्धान्तेऽप्यङ्गीकृतम्—इत्याक्षेपाभिप्रायः । समाधानन्तु—तत्तु विशेषणज्ञानं निर्विकल्पकं, अतीन्द्रियम् । सविकल्पके तु जातिविशिष्टमेव वस्तु इन्द्रियेण गृह्यति इति प्रत्यक्षं विशिष्टविषयकमेवेति ॥

तस्माद्विशेषणे जातौ पूर्वमिन्द्रियजा मतिः ॥§ 5911

II.61/KSV

पदादपि तदायत्तसम्बन्धज्ञस्यपेक्षिणः ।
तत्रैव बुद्धिरित्येव न व्यक्तेरपि वाच्यता ॥§ 5913

## प्रत्यक्षस्येव शब्दस्यापि विशिष्टनिष्ठत्वम्

उच्यते—प्रत्यक्षे तावत् द्वयोरपि विशेषणविशेष्ययोः इन्द्रियविषयत्वम् । सामान्येऽपि संयुक्तसमवायादिन्द्रियं प्रवर्तमानं विशेषणवत् विशेष्यमपि विषयीकरोति । न हि सामान्यं प्रत्यक्षं, विशेषोऽनुमेय इति व्यवहारः । एवं गुणमात्रग्राहिणीन्द्रिये गुणिनोऽनुमेयत्वं स्यात् । न चैवमस्ति । तस्माद्विशेष्य-पर्यन्तं प्रत्यक्षम् । तथा पदमपि तत्तुल्यविषयं, न तु सामान्यमात्रनिष्ठमिति युक्तम् ॥ § 5914

## व्यक्तिवाचकत्वे आनन्त्यादिपरिहारः

यत्तु—सामान्यांशानपोद्धृत्य पदं सर्वं प्रवर्तते p. 56 इति— तत् केव-लव्यक्त्यभिधाने सति आनन्त्यव्यभिचारभयादुच्यते । तद्वदभिधाने तु तद्द्वयं नास्तीति न शुद्धजात्यभिधायितया शब्दः संकोचनीयः ॥ § 5915

## शब्दप्रत्यक्षयोर्वैलक्षण्योपपादनम्

ननु ! न सर्वात्मना प्रत्यक्षतुल्यविषयः शब्दः, प्रतिपत्तिसाम्यप्रसङ्गात् । न च शब्दात् इन्द्रियाच्च तुल्ये प्रतिपत्ती भवतः । तदुक्तं— § 5916

अन्यथैवाग्निसम्बन्धात् दाहं दग्धोऽभिमन्यते प्र. सं p. 82 § 5917

इत्यादि—उच्यते—पूर्वमेवैतत्परिहृतम् । सकलविशेषग्रहणाग्रहणाभ्यां प्रतिपत्तिविशेषसिद्धेः । धर्म्यभिप्रायेण च संप्लवस्योक्तत्वात् । नैतावता सामान्यमात्रे निष्ठः शब्दो भवति ॥ § 5918 II.62/KSV

## शब्दस्य जातिमात्रवाचकत्वानुपपत्तिः

अपि च निष्कृष्टसामान्यांशवचनत्वे पदस्येष्यमाणे गोशब्दात् गोत्वशब्दाच्च तुल्ये प्रतिपत्ती स्याताम् । गौः शुक्लः इतिवच्च गोत्वं शुक्लं इति बुद्धिः स्यात् । चातुर्वर्ण्यादिवच्च स्वार्थं एव गोशब्दात् भावप्रत्ययः त्वतलादिः स्यात् ॥ § 5919

अथ मन्येथाः—आक्षिप्तव्यक्तिकां जातिं गोशब्दो वक्ति । भावप्रत्ययान्त-स्तु निष्कृष्टस्वरूपमात्रनिष्ठामिति—तदनुपपन्नम्—अनाक्षिप्तव्यक्तिकाया जा-तेः कदाचिदप्यदर्शनात् ॥ § 5920

११ ] तदा यत्तु— nyāma-wit_kha
३ ] अस्तीति— nyāma-wit_ka
४ ] न तु— nyāma-wit_kha
६ ] दाहो दग्धोऽय— nyāma-wit_ka

## गो—गोत्वपदयोर्वैलक्षण्यम्

अथ गोशब्दश्रवणवेलायां व्यक्तिसंस्पर्शवती जातिरवगम्यते । भावप्रत्ययान्ते तु गोशब्दे श्रुते तच्छून्याऽसौ प्रतीयत इति—यद्येवं आगतोऽसि मदीयं पन्थानम्—आश्रयवती चेज्जातिरुच्यते शब्देन जात्याश्रय उक्त एव भवति । नान्यथा हि साश्रयवत्युक्ता स्यात् । तदाश्रय परिहारेणाश्रयिसामान्यमात्रविवक्षायां त्वतलादयः प्रयुज्यन्ते । तथा चाहुः—*यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशः, तदभिधाने त्वतलादयः म-भा-५-१-२-११९ इति । गुण-
II.63/KSV स्य हि भावात् द्रव्ये शब्द निवेशः इति तद्वद्वाच्यत्वपक्षसाक्षीण्यक्षराणि । सामानाधिकरण्यं च तत्रैवोपपद्यत इत्युक्तमेतत् । तस्मात्— § 5921

*यथा विध्यन्तपर्यन्तो वाक्यव्यापार इष्यते ।
तथैव व्यक्तिपर्यन्तः शब्दव्यापार इष्यताम् ॥§ 5923

अनुपरतव्यापारे शब्दे तदवगमात् ॥ § 5924

## अन्विताभिधानवादे व्यक्तिबोधावश्यकता

येनान्विताभिधानं च पदानामभ्युपेयते ।
सुतरां तेन वक्तव्या व्यक्त्यन्ता पदतो मतिः ॥§ 5926

न हि व्यक्त्यनपेक्षाणां जातीनामितरेतरम् ।
अन्वयोऽनन्वितानां च नाभिधानमिति स्थितिः ॥§ 5928

गङ्गायां घोष इत्यादौ यथा सामीप्यलक्षणा ।
नैवं गौः शुक्ल इत्यादौ गम्यते व्यक्तिलक्षणा ॥§ 5930

प्रयोगप्रतिपत्तिभ्यां वृद्धेभ्योऽध्यवसीयते ।
तस्मात् गवादिशब्दानां तद्वानर्थ इति स्थितम् ॥§ 5932

## जात्याकृतिव्यक्तिषु शक्तिवादोपसंहारः

---

१६ ] शून्या— nyāma-wit__ka; nyāma-wit__gha
१८ ] आश्रयवत्युक्ता स्यात् तदाश्रय— nyāma-wit__ka
१९ ] साश्रयपरिहारेण— nyāma-wit__ka
२ ] उच्यते— nyāma-wit__ka
४ ] अनवरत— nyāma-wit__kha

---

१ *] गुणं—अप्रधानं गुणजातिक्रियादिः । यादृशं प्रवृत्तिनिमित्तमादाय शब्दः प्रवृत्तः, तं भावप्रत्ययः अभिधत्ते ॥
५ *] वाक्यव्यापारः नियोगः विध्यादिः । सः अङ्गं—विध्यन्तं विना न निष्पाद्य इति विध्यन्तविशिष्टस्यैव यथा आत्मलाभः, तथाऽत्रापि ॥

II.64/KSV तदिदमुक्तं सूत्रकृता—व्याक्त्याकृतिजातयस्तु पदार्थः p. 47 इति । तुशब्दो विशेषणार्थः । किं विशेष्यते ? गुणप्रधानभावस्या नियमेन शब्दार्थत्वम् । स्थितेऽपि तद्वतो वाच्यत्वे क्वचित्प्रयोगे जातेः प्राधान्यं, व्यक्तेरङ्गभावः—यथा गौर्न पदा स्प्रष्टव्या इति सर्वगवीषु प्रतिषेधोऽवगम्यते । क्वचिद्यक्तेः प्राधान्यं, जातेरङ्गभावः—यथा गां मुंच गां बधान इति नियतां कांचिव्द्यक्तिमुद्दिश्य प्रयुज्यते । क्यचिदाकृतेः प्राधान्यं, व्यक्तेरङ्गभावः, जातिर्नास्त्येव—यथा पिष्टमय्यो गावः क्रियन्ताम् इति सन्निवेशचिकीर्षया प्रयोग इति । सर्वसर्वगतत्वेऽपि जातेर्न मृदगवादौ विशिष्टा वृत्तिरित्युक्तम् । तदेवं गवाश्वादिशब्दानां तावत् तद्वानर्थ इति सिद्धम् ॥ § 5933

## जातिरहितपदार्थस्थले गतिप्रदर्शनम्

येषामर्थेषु सामान्यं न संभवति, तैः पुनः ।
उच्यते केवला व्यक्तिराकाशादिपदैरिव ॥§ 5935

एवं डित्थादिशब्दानां संज्ञात्वविदितात्मनाम् ।
अभिधेयस्य सामान्यशून्यत्वाद्यक्तिवाचिता ॥§ 5937

एव हि द्रव्यशब्दा इत्युच्यन्ते ॥ § 5938

ये पुनः कल्पितानेकभेदवृत्तिं प्रचक्षते ।
वाच्यं तत्रापि सामान्यं अतीव ग्राहिकास्तु ते ॥§ 5940

न हि डित्थत्वसामान्यं दृश्यते गगनत्ववत् ।
कल्पनायास्तु नो भूमिः काचिदस्ति विपश्चिताम् ॥§ 5942

II.65/KSV

## गुणवाचिशब्देषु विशेषः

१४ ] विशिष्यते— nyāma-wit_kha
१४ ] भावस्य— nyāma-wit_kha
१६ ] प्रतिषेधो— nyāma-wit_kha
४ ] वाच्यता— nyāma-wit_ka
७ ] दृश्यते गगनत्ववत्— nyāma-wit_ga

३ जातेर्न ] मृदा निर्मितगोप्रतिमादौ ॥
१० पुनः ] कल्पिताः—अनुमिताः, भेदाः—व्यक्तिभेदाः । कल्पान्तरादिगगनव्यक्तीरादाय गगनत्वादीनामपि सामान्यत्वसंभवेऽपि डित्थादौ न तथेत्याशयः ॥ ये प्रचक्षते ते अतीव ग्राहिकाः इति नर्मोक्तिः ॥

*गुणशब्दास्तु केचित् स्वजात्यवच्छिन्नं गुणमभिधाय तावत्येव विरमन्ति। केचित्तु गुणमभिधाय द्रव्यमप्याक्षिपन्ति, तत्सामानाधिकरण्य प्रयोगदर्शनात् ॥ § 5943

गुणैकनियतास्तावत् गन्धरूपरसादयः ।
गन्धत्वादिव्यवच्छिन्नगन्धादिगुणवाचिनः ॥§ 5945

तेषां न द्रव्यपर्यन्ता वृत्तिः क्वचन दृश्यते ।
न गन्धः पद्मं इत्यस्ति सामानाधिकरण्यधीः ॥§ 5947

न ह्येवं वक्तारो भवन्ति चन्दनं गन्धः आम्रं रसः इति ॥ § 5948

गुणं शुक्लादिशब्दास्तु कथयन्तस्तदाश्रयम् ।
द्रव्यमप्याक्षिपन्त्येव शुक्लोंऽशुरिति दर्शनात् ॥§ 5950

शुक्लादयोऽपि शब्दाः गुणपदोपबन्धसंकोचितशक्तयः भावप्रत्ययान्तपदवत् गुणमात्राभिधान एव पर्यवस्यन्ति—शुक्लो गुणोऽश्वः शौक्ल्यमश्वः इति सामानाधिकण्यप्रयोगादर्शनात् ॥ § 5951

## क्रियावाचिशब्दानां शक्तिप्रकारः

क्रियाशब्दाश्च द्विविधा भवन्ति—केचित् कर्तरि कर्मणि करणे वा प्रयुज्यन्ते, केचिद्भावमात्रवचना एव। कर्त्रादिवाचिनस्तावन्निमित्तीकृत्य कांचन क्रियां तद्योगिद्रव्ये वर्तन्ते, पाचकादयः ॥ § 5952

II.66/KSV

यत्रापि तत्क्रियायोगः तदानीं नोपलभ्यते ।
तत्रापि योप्यतां दृष्टवा शब्दं तज्ज्ञाः प्रयुंजते ॥§ 5954

न हि पाचकः लावकः इति प्रवृत्तक्रिय एवोच्यते, अन्यदाऽपि तथा तथा व्यवहारात् ॥ § 5955

*अन्ये पूर्वापरीभूतस्वभावपरिहारतः ।
सिद्धरूपतया प्राहुः शब्दाः पाकादयः क्रियाम् ॥§ 5957

११ ] द्रव्यमा— nyāma-wit_kha
१६ ] पद्म— nyāma-wit_kha
१७ ] ओदनं— nyāma-wit_kha
२ ] शुक्ले शुक्ल इति— nyāma-wit_kha
४ ] गुणोऽश्वे— nyāma-wit_kha

१४ *] नीलादिपदानि गुणवाचीनि, गुणिनि लाक्षणिकानि । रूप-गन्धादिपदानि तु केवलगुणवाचकानि ॥
५ न्त्येव] अंशुः—अंशुकः, तन्त्ववयवः, सूर्यो वा ॥
१६ *] अन्ये पाकादयः शब्दा इत्यन्वयः ॥ प्र. सं p.-५०

तदुक्तम्—कृदभिहितो भावः द्रव्यवद्भवति, क्रियावच्च इति । न चैकान्तेन परिहृतसाध्यमानावस्थैव तैः क्रियोच्यते; यत आह क्रियावच्च* इति ॥ § 5958

## प्रवृत्तिनिमित्ताभिधेययोर्भेदः

अन्यत्प्रवृत्तौ शब्दस्य निमित्तमवगम्यते ।
अभिधेयं तु तस्यान्यत् इत्ययं प्रथमः क्रमः ॥§ 5960

पाचकादिब्शदानां हि प्रवृत्तौ निमित्तं क्रिया । अभिधेयास्तु कर्त्रादयः ॥ § 5961

क्वचित्पुनर्यदेवास्य स्यात् प्रवृत्तिनिबन्धनम् ।
तस्यैव वाच्यता भावप्रत्ययान्तपदेष्विव ॥§ 5963

इत्येवं लेशतस्तावत् नाम्नां वृत्तिरुदाहृता ।
आख्यातानां तु वाच्योऽर्थः पुरस्ताच्चर्चयिष्यते ॥§ 5965

II.67/KSV

## उपसर्गादीनां वाच्यार्थनिर्णयः

उपसर्गनिपातानां नाम्नामिव विभागतः ।
प्रयोगप्रतिपत्तिभ्यां अनेकार्थोऽवगम्यते ॥§ 5967

उपसर्गाः प्राचुर्येण क्रियायोगे वर्तन्ते—उपसर्गाः क्रियायोगे पा-सू. ९-८-५९ इति स्मारणात् ॥ § 5968

केचित्तु नामभिरभिसम्बध्यते—यथा ईषदर्थवाचिनः आपिङ्गः इत्यादयः । अन्ये क्रियागर्भतया नाम्ना सम्बध्यन्ते । यथा—प्रगतं वयः यस्य सः प्रवया इति ॥ § 5969

अन्ये धातोर्विचित्रार्थतामापादयन्तः तद्विशेशणत्वेन सम्बध्यन्ते । यथोक्तम्— § 5970

---

२० ] प्रवृत्तिनिमित्तं— nyāma-wit__kha
५ ] नाम्नामप्य— nyāma-wit__kha
९--१० ] यथा प्रगतं— nyāma-wit__kha
१२ ] तद्विशेषणत्वं— nyāma-wit__kha

---

१९ *] चकारात् द्रव्यवदित्यस्य ग्रहणम् ॥
१५ सः ] प्रवयाः स्थविरो वृद्धः इत्यमरः ॥

उपसर्गवशाद्धातुरर्थान्तरविलासकृत् ।
प्रहाराहारसंहारविहारपरिहारवत् ॥§ 5972

## उपसर्गाणां क्वचिद्विरुद्धार्थाभिधायित्वम्

ननु च ! क्वचिदुपसर्गो धात्वर्थमेव बाधमानो दृश्यते । यथा प्रस्थितः इति गतिनिवृत्तिवाची धातुः प्रवृत्तगतिवचनतां नीतः प्रशब्देन । न चेदृशं विशेषणं भवितुमर्हति ॥ § 5973

*येन स्वार्थाविरोधेन विशेष उपजन्यते ।
विशेषणं तदेवेष्टं न तु यत् स्वार्थनाशनम् ॥ इति ॥§ 5975

II.68/KSV

नैष दोषः—*अर्थान्तराभिधानसामर्थ्यापादनमेव धातोर्विदधदुपसर्गो विशेषणं भवितुमर्हति । अनेकार्थाभिधानशक्तिश्च धातुरुपसर्गेण नियतेऽर्थेऽवस्थाप्यत इति तस्य तद्विशेषणता ॥ § 5976

## उपसर्गाणां वाचकत्वम् ? उत द्योतकत्वम् ?

उपसर्गाः किमर्थस्य वाचका द्योतका इति ।
प्रकृतानुपयोगित्वात् इहैतन्न विचार्यते ॥§ 5978

अन्वयव्यतिरेकाभ्यां तदर्थो ह्यवधार्यते ।
तदागमे तत्प्रतीतेः तदभावे तदग्रहात् ॥§ 5980

ते तु किं वाचकास्सन्तः तदवगतिमुपदधति ? किं वा द्योतकाः ? इति किमनेन ॥ § 5981

एवं समुच्चयादिवाचिनां चादिनिपातानां, वृक्षं प्रति द्योतते इति कर्मप्रवचनीयानां च अर्थः प्रयोगप्रतिपत्तिभ्यामवधारणीय इत्यलं प्रसङ्गेन ॥ § 5982

## पदशक्तिविचारोपसंहारः

१५ ] प्रत्युत— nyāma-wit_gha
१५ ] प्रतिपद्यते—

nyāma-wit_gha

४ *] विशिनष्टि इति विशेषणं इति खलुव्युत्पत्तिः ॥
६ *] विहरतीत्यादौ न हि धात्वर्थे विशेषः

उपसर्गेण बोध्यते, किन्तु विलक्षण एवार्थः । तच्च वैलक्षण्यं क्वचिद्विरोधरूपमप्यस्तु ॥

अयमस्य पदस्यार्थ इति किं चिन्तितेत वा ।
योऽर्थः प्रतीयते यस्मात् स तस्यार्थ इति स्थितिः ॥§ 5984

स्पष्टामपि तु ये बुद्धिं निरूपयितुमक्षमाः ।
तान् बोधयितुमस्माभिः दिङ्मात्रमुपदर्शितम् ॥§ 5986

इति प्रमाणत्वसमर्थनाय
शब्दस्य किंचिद्वयमुक्तवन्तः ।
पदाभिधेयार्थनिरूपणं तु II.69/KSV
*शास्त्रान्तरे विस्तरतः प्रणीतम् ॥§ 5990

तत्क्षोदनेन न नः प्रयोजनमतिद्राधीयसी सा हि भूः
अन्यामेव दिशं परीक्षितुमतोऽस्माभिर्गृहीतः क्षणः ।
जात्याद्यर्थसमर्थनेन कथिता बाह्यार्थसंस्पर्शिता
शब्दानामियतैव नन्ववसरेऽमुष्मिन् कृतार्था वयम् ॥§ 5994

## वाक्यार्थविचारोपक्षेपः

एवं पदार्थे निर्णीते वाक्यार्थश्चिन्त्यतेऽधुना ।
तत्र विप्रतिपत्तिश्च बहुरूपा विपश्चिताम् ॥§ 5996

केचिदाचक्षते—बाह्यस्य वाक्यार्थस्यासंभवात् पदार्थसंसर्गनिर्भासं ज्ञानमेव वाक्यार्थ इति ॥ § 5997

अन्ये तु—वास्तवः पदार्थानां परस्परसंसर्गो बाह्य एव वाक्यार्थ इत्याहुः ॥ § 5998

*अन्यव्यवच्छेदो वाक्यार्थ इत्यपरे, शुक्लादिपदान्तरोच्चारणे कृष्णादिनिवृत्तेरवगमात् ॥ § 5999

अपरे संगिरन्ते—संसर्गस्य दुरपह्नवत्वात् तस्य च गुणप्रधानभावगर्भत्वात् गुणीभूतकारकनिकरनिर्वर्त्या प्रधानभूता क्रिया वाक्यार्थ इति ॥ § 6000

---

१५ ] के चित्स तेन— nyāma-wit__kha
१६ ] स्मृतिः— nyāma-wit__kha
९ ] वाक्यार्थस्य संभवाय— nyāma-wit__ka
११ ] संस्पर्शो— nyāma-wit__kha

---

५ *] शास्त्रान्तरे—व्याकरणनिरुक्तादौ ॥
१६ *] शुक्लो गौःइत्युक्ते अशुक्लव्यवच्छेदः गवि भासते । स एव वाक्यस्य अर्थः ॥
१८ च] न हि वाक्यघटकपदानि विशकलितस्वतन्त्रार्थबोधकानि ॥

अन्ये मन्यन्ते—*भाव्यनिष्ठः पुरुषव्यापारः करोत्यर्थो भावनाशब्दवाच्यो वाक्यार्थः । लिङादिशब्दव्यापारवाच्यस्तु शब्दभावनाख्यः पुरुषस्यार्थभावनानुष्ठाने प्रवर्तकः स विधिरुच्यत इति ॥ § 6001

II.70/KSV

अन्ये ब्रुवते—*द्वयाभिधाने लिङादेः प्रत्ययस्य भारगौरवत् विधिरेव वाक्यार्थः, स एवानुष्ठेयः प्रवर्तकश्चेति ॥ § 6002

तत्रापि द्वयी विमतिः—केश्चित् प्रेषणात्मकत्वं शब्दस्याभ्युपगतम्, लिङादिशब्देभ्यस्तथा तदवगमात्, कार्यान्तरानवगमात्, भावार्थमात्रकार्यत्वपक्षस्य चातिदौर्बल्याद्विधिरेवानुष्ठेय इत्यर्थात् तस्य कार्यत्वम् ॥ § 6003

अन्यैस्तु—कार्यत्वेन नियोगप्रतीतेः अर्थात्तस्य प्रेरकत्वमिति संश्रितम् । कार्यमवगतं स्वसिद्धये पुरुषं नियुङ्क्ते—ममेदं कार्यं इत्यवगते हि तत्सिद्धये पुरुषः प्रवर्तत इति ॥ § 6004

अपरे पुनः—अभिनवं वाक्यार्थं उद्योगं नाम वर्णयांबभूवुः—इत्य नेकशाखा विप्रतिपत्तिः । तदत्र किं तत्त्वमिति ॥ § 6005

## वाक्यार्थस्याबाह्यत्वं, ज्ञानस्यैव वाक्यार्थत्वं इति बौद्धपक्षः

अत्रैके तावदाहुः—वाक्यार्थो नाम पारमार्थिको बहिर्नास्त्येव । स हि पदार्थेभ्यो व्यतिरिक्तो वा स्यात् ? अव्यतिरिक्तो वा ? न व्यति रिक्तः—भेदानुपलम्भात् । गौः शुक्ला आनीयतां इत्यत्र पदग्रामे जातिगुणक्रियादिपदार्थव्यतिरेकेण कोऽसौ वाक्यार्थः ? स न दर्शयितुं शक्यते । अव्यतिरेके तु पदार्था एव वाक्यार्थः प्रत्येकं वा स्यात् ? सामस्त्येन वा ? न प्रत्येकं, तथाऽनवगमात्; न हि गौरिति पदार्थ एव वाक्यार्थो भवति ॥ § 6006

सामस्त्यं तु न तेषामस्ति । तद्धि सत्तया भवेत् प्रतीत्या वा ? सत्तया न सामस्त्यमशेषपदार्थराशेरस्तीति न नियतः कश्चन वाक्यार्थोऽवधार्यते ।

II.71/KSV प्रतीत्या तु सामस्त्यमधटमानम्, युगपद्भावित्वेन ज्ञानानां एकपदार्थप्रतीतिसमये पदार्थान्तरप्रतीत्यसंभवात् । पदार्थप्रतित्युपायाश्च वर्णाः । तऽपि न युगपद्भाविनः । कुतः प्रतीतिकृतं सामस्त्यम् ? § 6007

अपि च पदार्थसमुदायः किमितरेतरसंस्टो वाक्यार्थः ? अन्यथा वा ? न तावदन्यथा—गौरश्वः पुरुषो हस्ती इत्येवमादावदर्शनात् । संसर्गस्तु

१८ ] व्यापारस्तु— nyāma-wit_kha
१३ ] पदार्थ एव— nyāma-wit_kha
१३--१४ ] सत्तया— nyāma-wit_gha
१८ ] पदार्थ— nyāma-wit_gha
—Note: cont.

२० *] भाव्यनिष्ठः—भाव्ययागाद्याश्रितः, तद्विषयकः ॥
२० र्थो ] भावना—अर्थभावना ॥
१ *] द्वयं—पुरुषव्यापाररूपार्थभावना, शब्दव्यापाररूपशब्दभावना च ॥

दुरुपपादः । स ह्यपेक्षा गतो भवति । न चार्थोऽर्थान्तरमाकाङ्क्षति, अचेतनत्वात् । बुद्धीनामपि क्षणिकत्वात् अन्योन्यं नाकाङ्क्षा । न च तत्कृतः सम्बन्धः ॥ § 6008

## पदार्थसंसर्गस्यापि वाक्यार्थत्वासंभवः

अत एव न संसर्गो वाक्यार्थः । न ह्यसौ अर्थानां ज्ञानानां वा यथोक्तनीत्याऽवकल्पते ॥ § 6009

व्यवच्छेदोऽप्येवमेव निराकार्यः । सोऽपि हि न ज्ञानानामुपपद्यते । तदुक्तम्—श्लो. वा. वाक्या-१४ § 6010

यदि ध्रियेत गोबुद्धिः शुक्लबुद्धिजनिक्षणे ।
ततोऽन्याभ्यो निवर्तेत संसृज्येताथवा तया इति ॥§ 6012

न चापेक्षायां सत्यामपि सम्बन्धः कश्चिदुपलभ्यते । यथोक्तम्— श्लो. वा. वाक्या-२२ § 6013

*अपेक्षणेऽपि सम्बन्धो नैव कश्चित् प्रतीयते ।
कार्यकारणसंयोगसमवायादिलक्षणः ॥§ 6015

II.72/KSV

एकार्थवृत्तिप्रायस्तु सम्बन्धोऽतिप्रसज्यते इति ॥§ 6016

अर्थानां तु कचिदपि भवन् सम्बन्धः शब्दैरनभिधीयमानत्वात् असत्कल्प एव, न च भेदसंसर्गयोर्वाचकं किंचित्पदमस्ति, अश्रवणात् । असति च तद्वाचिनि पदे न तयोः पदार्थत्वम् । अपदार्थस्य च न वाक्यार्थत्वम् ॥ § 6017

---

२० ] गर्भो— nyāma-wit_kha
४ ] एकार्थसमवायोऽपि सर्वेषां व्योम्नि तुल्यता— nyāma-wit_ka
६ ] न चाभेद— nyāma-wit_ka
६ ] असति— nyāma-wit_kha

---

३ मेव ] पदार्थेभ्यः व्यतिरेकाव्यतिरेकादिविकल्पदुःस्थत्वादेव ॥
४ दि ] ध्रियेत—तिष्ठेत । वस्तूनां क्षणिकत्वादिति हेतुरत्र ॥
६ * ] अपेक्षणेऽपीत्यादि—संबन्धस्य अपेक्षामूलत्वात् ॥
१० न ] तयोः—भेदसंसर्गयोः ॥

श्रुतेऽपि तद्वाचिनि पदे सुतरामसङ्गतिः—गौः शुक्ल आनीयतां संसर्गः इति कोऽर्थः । तस्मात् बाह्यस्य वाक्यार्थस्य सर्वप्रकारमसंभवात् पदार्थ-सर्गनिर्भासं ज्ञानगात्रं वाक्यार्थः, तेनैव लोकव्यवहार इति ॥ § 6018

## बाह्यार्थस्यैव वाक्यार्थत्वं, ज्ञानस्य तत्त्वनिरासश्च

तदिदमनुपपन्नम्—बाह्यार्थस्यानन्तरमेव विस्तरेण प्रसाधितत्वात् । न च संसर्गनिर्भासं ज्ञानं वाक्यार्थो भवितुमर्हति । स्थापयित्वा हि बाह्यमर्थं वाक्यार्थचिन्तामुपक्र न्तोवन्तो वयम् । अतः कोऽवसरो विज्ञानमांत्रवाक्यार्थ-त्ववर्णनस्य ॥ § 6019

## पदार्थवाक्यार्थयोर्वैलक्षण्यम्

न च पदार्थव्यतिरिक्तो नास्ति वाक्यार्थः । इदं तावद्भवान् पृष्टो व्याचष्टाम् । किं गौः इति पदाद्यादृशी प्रतिपत्तिः, तादृश्येव गौः शुक्ल आनीयताम्(?') इति वाक्यात् ? उत भिन्ने एते प्रतिपत्ती ? इति ॥ § 6020

तत्र तुल्यत्वं तावत्प्रतिपत्त्योरनुभवविरुद्धम् । वैलक्षण्ये तु प्रतीत्योः व-
II.73/KSV षयवैलक्षण्यमपि बलादुपनतम्, असति विषयभेदे प्रतीतिभेदानुपपत्तेः । यश्च तदतिरिक्तो विषयः, स वाक्यार्थः । एवं केवलगुणक्रियापदोच्चारणेऽपि योजनीयम् । तदुक्तं—यदाधिक्यं स वाक्यार्थः इति ॥ § 6021

संसर्गोऽपि पदानां न न प्रतीयते । न हि गौरश्वः पुरुषो हस्ती इत्यसंसृष्टपदार्थप्रतीतिवत् गौः शुक्ल आनीयताम् इति प्रतीतिः । यथा च संसर्गः प्रतीयते, यश्च प्रतीत्युपायः, तत्सर्वं विस्तरतो निर्णेष्यते । तस्मात् बाह्य एव वाक्यार्थः ॥ § 6022

## व्यवच्छेदस्य वाक्यार्थत्वनिराकरणम्

बाह्य एव भवन् न व्यवच्छेदो वाक्यार्थः, विधिरूपत्वेनावगमात् । संस-र्गमन्तरेण चान्यव्यवच्छेदस्यापि दुरुपपादत्वात् । न हि शुक्लपदेनासंसृष्टः गोपदार्थ कृष्णादिभ्यो व्यावृत्त इत्यवगम्यते ॥ § 6023

गोशब्दात् सर्वगवीषु बुद्धिरुपसर्पन्ती पदजनिता शुक्लपदसन्निधानात् अन्यतः कृष्णादेरपसर्पतीति व्यवच्छेदो वाक्यार्थ इति चेत्—मैवम् —तत्स-

११ ] भवितुमर्हति तेनैव— nyāma-wit_kha
१ ] प्रसाधितत्वात्— nyāma-wit_kha
१६ ] बाह्योऽपि— nyāma-wit_kha
१९ ] शब्द— nyāma-wit_kha

१२ श्रुतेऽपि ] तद्वाचिनि—भेदसंसर्गवाचिनि शेषः ॥
१७ संसृष्टः ] असंसृष्टः—शुक्लपदार्थेनेति ॥

म्बन्धावगमपूर्वकत्वात् तदितरव्यावृत्तेः । तत्सम्बन्धावबोधेनैव सिद्धे वाक्यस्यार्थवत्त्वे पाश्चात्यः कृष्णादिव्यवच्छेदावगमो यदि भवति, भवतु कामं, न त्वसौ वाक्यार्थ इति ॥ § 6024

## क्रियायाः वाक्यार्थत्वपक्षः

तदेवं विधिरूपे बाह्ये च शब्दार्थेऽवस्थिते सति क्रियामेव केचिद्वाक्यार्थं वर्णयन्ति । अयमेषामाशयः— § 6025
II.74/KSV

पदार्थाः किल वाक्यार्थभावमायान्ति संहताः ।
अपेक्षानुगुणान्योन्यव्यतिषङ्गविशेषतः ॥§ 6027

न च गुणप्रधानभावमन्तरेण संसर्गः पदार्थानामवकल्पते । न चाख्यातरहितं वाक्यं किंचत्प्रयोगयोग्यम् । अनुच्चारिते तस्मिन् आकाङ्क्षाया अनिवृत्तेः । श्रोत्राकाङ्क्षानिवृत्तये च वाक्यानां लोके प्रयोगः । लोकवच्च वेदादप्यर्थोऽवसीयते । आख्याताच्च पूर्वापरीभूतः साध्यरूपोऽर्थोऽवगम्यते, न सिद्धरूपः । सिद्धसाध्यसमुच्चारणे कस्य किंतन्त्रतेति चिन्तायां साध्यसिद्धये सिद्धमुपात्तमिति प्रतीयते ॥ § 6028

साध्यं च साध्यमानत्वात् प्रधानमवगम्यते ।
तस्मात्तदेव वाक्यार्थः क्रियातो नापरं च यत् ॥§ 6030

## सर्वेषां क्रियाप्रधान्ये निदर्शनानि

क्रिया हि प्रतीयमाना स्वनिष्पत्तये साधनान्याक्षिपति, तैश्च योग्यैः संबध्यते । तानि च कानिचित् पदान्तरोपात्तानि भवन्ति । कानिचित् वाक्यान्तरोपनीतानि । कानिचित् प्रकरणान्तरपाठलभ्यानि । *कानिचिदारादुपकारकाणि । कानिचित्सन्निपत्योपकारकाणि, *कानिचिदन्तिकोपनिपतितान्यपि योग्यताविरहात् परिहरति । *कानिचिदतिदूर वर्तीन्यपि योग्यानि स्वसंपत्त्यर्थमाहरति । इत्येवं दृष्टादृष्टोपकारकानेक कारककलापसंपाद्यमानस्वरूपा क्रियैव वाक्यार्थः ॥ § 6031 II.75/KSV

---

१३--१४ ] केश्चित्—
nyāma-wit_kha

---

२३ वाक्यार्थ ] अपि तु आर्थिक इत्यर्थः ॥
३ ताः ] संहताः—क्रियायामिति तात्पर्यम् ॥
८ आख्याताच्च ] पूर्वोत्तरावधिमानिति यावत् ॥
१५ *] साक्षाफलान्वयीनि आरादुपकारकाणि, साधनस्वरूपनिष्पादनद्वारा तादृशानि सन्निपत्योपकारकाणि ॥
१६ *] पूषानुमन्त्रणादीनि ॥
१७ *] यथा प्रकरणान्तरगतान्यपि पूषानुमन्त्रणादिनि पौष्णचरुकर्मणि ॥

यजेत दद्याज्जुहुयात् अधीयीतेति चोदितः ।
क्रियां साध्यतया वेत्ति तां च लोकोऽनुतिष्ठति ॥§ 6033

## कतुरपि क्रियाशेषत्वमेव

अधिकारिपदमपि क्रियापेक्षितकर्तृसमर्पणेन तदुपयोगितामेवावलम्बते—अस्यां क्रियायामयं कर्ता, अनेनेयं क्रिया संपद्यते—इति । तत्र च न क्रिया स्वप्राधान्यमुज्झति । न हि क्रिया कर्त्रर्था, कर्ता तु क्रियार्थः । स हि तां निर्वर्तयन्नुपलभ्यते । शब्दोऽपि तथैवोपदिशति एष इदं कुर्यात् इति ॥ § 6034

## कर्तुरप्राधान्येऽपि प्रवृत्त्युपपत्तिः

किमथ पुनरसौ क्रियामनुतिष्ठतीति चेत्, शब्दप्रामाण्यादेवेति ब्रूमः । शब्देन हि चोदितः त्वयेदं कर्तव्यम् इति । स चेन्नियुक्तो नानुतिष्ठन् चोदनामतिक्रामेत् । शास्त्रप्रत्ययाच्च क्रियामनुतिष्ठति । विरतफलाभिलाषः कर्मसंस्कारादेव परिपक्वकषायः स्तोकस्तोकप्रपंचप्रविलापनद्वारेणोत्तमाधिकारमारूढः तत एव ज्ञातास्वादः तमेव परमपुरुषार्थमासादयतीति दीर्घा सा कथा; तिष्ठतु ! किमनया ? सर्वथा क्रियाप्राधान्यात् सैव वाक्यार्थ इति । तदुक्तम् द्रव्यगुणसंस्कारेषु बादरिः जै-सू. ३-१-३ इति ॥ § 6035
II.76/KSV

एतदुक्तं भवति—द्रव्यादीनामेव क्रियां प्रति शेषत्वमनुगम्यते, न क्रियाया अन्यशेषत्वमिति ॥ § 6036

## फलस्यैव वाक्यार्थत्वं युक्तम्

अत्रोच्यते—कुत इदं क्रियायाः प्राधान्यमुपेयते ? वस्तुवृत्तेन वा ? शब्दप्रत्ययमहिम्ना वा ? § 6037

फलस्य वस्तुतस्तावत् प्राधान्यमवगम्यते ।
न सचेताः क्रियां कांचित् अनुतिष्ठति निष्फलाम् ॥§ 6039

---

२--३ ] कर्ता क्रियासु—
nyāma-wit__kha

१० ] पुरुषार्थं प्रतिपाद—
nyāma-wit__kha

---

१० एव ] प्रपञ्चभ्रमनिवृत्त्या संसारबन्धविगमेन ज्ञातस्वरूपसुखः ॥ इदं च कर्मब्रह्मकाण्डयोरैकशास्त्यवादिप्राचीनवेदान्तिनां मतम्

॥
१४ मिति ] भूतं—सिद्धं भव्याय—साध्याय उपदिश्यते इति न्यायः ॥

वेदाद्गुरुनियोगाद्वा शासनाद्वा महीभुजः ।
न वै फलमपश्यन्तः क्रियां विदधते जनाः ॥§ 6041

बालो माणवकोऽप्येषः चपेटामात्रहानये ।
मोदकाद्याप्तये वाऽपि करोति गुरुशासनम् ॥§ 6043

## क्रियायां शब्दप्राधान्यस्याप्यसंभवः

अथोच्यते—न *वस्तुतः प्राधान्यमिहाश्रीयते, अपि तु शब्दतः । शब्दप्रमाणका वयम् । यत् शब्द आह, तदेवास्माकं प्रमाणम् । तद्यथा राजपुरुषः इति । वस्तुवृत्ते राजा जगतामीशिता प्रधानम्, पुरुषस्तपस्वी तदिच्छानुवर्तनेन जीवति । शब्दस्तु पुरुषप्राधान्यमाचष्टे, उत्तरपदार्थप्रधानत्वात् तत्पुरुषस्येति । एवमिहापि यजेत दद्यात् जुहुयात् इति क्रियां प्राधान्येनोपदिशति शब्दः । स्वर्गकामः इत्यपि क्रियां प्रति कर्तुरुपदेशः । वस्तुवृत्तेन तु क- II.77/KSV
र्मणि क्रियमाणे कर्मस्वाभाव्यात फलं चेद्भवति, भवतु तत् ! पुरुषोऽपि प्रीयतां नाम फलेन, न तु शब्दः फलोपदेशनिष्ठ । आह च तस्मिंस्तु कृते स्वयमेव तद्भवति शा-भा-३-१-३ इति । स्वयमेवेति कोऽर्थः ? न शब्दः फलपारतन्त्र्यं क्रियायाः प्रतिपादयतीति ॥ § 6044

तदेतदयुक्तं—एवं वर्ण्यमाने स्वर्गकामो यजेत इति स्वर्गकामपदस्यान्वयो दुरुपपादः ॥ § 6045

## फलस्य वाक्यार्थत्वे आक्षेपः

ननु ! कर्तृपदमेतत् । कर्ता च क्रियार्थः, न कर्त्रर्था क्रियेत्युक्तम्— § 6046

न कर्तृपदं स्वर्गकाम इति, किन्त्वधिकारिपदमेतत् । न हि जात्यैव कश्चित् स्वर्गकामो नाम कुत्रचित् पुरुषोऽवगम्यते, योऽत्र कर्तृत्वेन नियुज्येत । स्वर्गे कामो यस्यासौ स्वर्गकामः, स्वर्गं वा कामयति स्वर्गकामः । उभयथाऽपि स्वर्गकामनाविशिष्टः पुरुषस्तस्मात्पदादवगम्यते । तदत्र काम्यमानः

---

२० ] न वैफल्य— nyāma-wit__kha
१ ] अत्रोच्यते— nyāma-wit__kha
७ ] स्वाभाव्यं— nyāma-wit__kha
८ ] प्रयततां— nyāma-wit__kha

---

२१ कोऽप्येषः ] तथाचानिष्टपरिहार एत कुत्र चित्फलम् ॥
१ *] वस्तुतः—वस्तुस्वरूपतः ॥
६ ति ] कर्ता नाम क्रियानिर्वर्तकः । अतः सोऽपि क्रियाशेष एव ॥

स्वर्गः कथं यागक्रियया संबध्यते ? दृष्टेन, अदृष्टेन वोपकारेण ? यदि हि चन्दनं स्वर्गः, षोडशवर्षदेशीया अङ्गनाः स्वर्गः इति चन्दनाङ्गनादि द्रव्यसामानादिकरण्यप्रयोगात् द्रव्यवचनः स्वर्गशब्दः, तदा द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः जै-सू-६-१-१ इति दध्यादिवत् साधनत्वेन स्वर्ग उपकरोति क्रियायाः । *कामनाऽपि द्रव्याहरणाङ्गत्वादुपकारिणी, यत् तया II.78/KSV
द्रव्यमानेतुं यतत इति दृष्टोपकारित्वम् ॥ § 6047

## फलस्य वाक्यार्थत्वसमर्थनम्, स्वर्गपदार्थश्च

तच्चैतदसारम्—स्वर्गशब्दस्य द्रव्यवाचित्वाभावात् । प्रीतिवचनोह्येष स्वर्गशब्दः, न द्रव्यवचनः । तदेव चन्दनं शीतातुरेण, अग्रीष्मोपहतेन वा न स्वर्ग इति व्यपदिश्यते । सैवाङ्गना विरतायां सुरततृषि न स्वर्ग इत्युच्यते । तदेवमेष स्वर्गशब्दः प्रीतिं न व्यभिचरति, द्रव्यं तु व्यभिचरति । एवमद्रव्यत्वात् स्वर्गस्य न क्रियाङ्गत्वम् ॥ § 6048

अथापि निरतिशयसुखप्रतीत्यन्यथाऽनुपपत्तितः परिकल्पितः कनकगिरिशिखरादिर्देशः स्वर्गः; सुतरां तस्य न क्रियासाधनत्वमवकल्पते, *दध्यादिवदुपादातुमशक्यत्वात् ॥ § 6049

अथापि अदृष्टेनैव द्वारेण समुद्रं मनसा ध्यायेते इतिवत् स्वर्गकामना तत्रोपकारिणी—तदपि क्लिष्टकल्पनामात्रम्—प्रीतिर्हि निरतिशया स्वर्गः । प्रीतेश्चानन्यार्थत्वं युक्तम् । प्रीत्यर्थमन्यत्, नान्यार्था प्रीतिः । तस्मान्न यागाय स्वर्गः, अपितु स्वर्गाय यागः । इत्थं च क्रियासाधनानुपदेशात् न कर्तृसमर्पकत्वेन स्वर्गकामपदं समन्वेति ॥ § 6050

## स्वर्गकामादिपदानां अन्वयक्रमः

कथं तर्ह्यस्यान्वयः ? अधिकारिवाचित्वेन ब्रूमः । कोऽयमधिकारी नाम ? कर्मणः स्वामी । ईस्वरवचनो ह्यधिकृतशब्दः ॥ § 6051

ननु कर्तैव कर्मणः स्वामी, नान्यः—मैवम्—स्वामी सन् कर्ता, न कर्ता सन् स्वामीति ॥ § 6052

---

१९ ] क्रियया— nyāma-wit_kha

१९ ] दृष्टादृष्टेन— nyāma-wit_kha

२० ] ङ्गरागादि— nyāma-wit_ga

२१ ] द्रव्यशब्द— nyāma-wit_kha

२३ ] क्रियां— nyāma-wit_kha

२ ] न स्वर्ग इति ग्रीष्मो— nyāma-wit_kha

२ ] स्वर्ग— nyāma-wit_kha

७ ] मेरुः— nyāma-wit_kha

९ ] मनो— nyāma-wit_kha

---

२३ *] फलस्य कथं क्रियायामुपयोगः ? इत्यत्राह—कामनापीति ॥

७ *] दध्यादिवत्—इति व्यतिरेकदृष्टान्तः ॥

II.79/KSV

ननु क्रियाकारकसम्बन्धव्य तिरिक्तः कोऽन्यः कर्मणः पुरुषस्य च सम्बन्धः ? उच्यते—ममेदं कर्तव्यम् अहमत्र स्वामी इति स्वस्वामिभावमवगत्य पाश्चात्यः क्रियाकारकसम्बन्धोऽवगम्यते ॥ § 6053

## अधिकारिणः कर्तुश्च विशेषः

ननु त्वयाऽपि क्रियाकारकसम्बन्धौ नापह्नूयत एव, जातिवादिनेव व्यक्तिप्रतीतिः । स तु पाश्चात्य इन्यत्र किं प्रमाणम् ? उक्तमत्र अनुपादेयविशेषण विशिष्टस्य पुंसः निर्देशादिति । कारकत्वानुगुणविशेषणयोगिनो ह्यस्य कर्तृतया योग्यः संबन्धः । तद्विपर्यये त्वधिकारित्वेनेति । तस्मादधिकृतस्य कर्तृत्वम्, न कर्तुरधिकारः ॥ § 6054

इत्थं च स्वर्गकामस्याधिकृतत्वं निर्वहति । यदि हि तत्कर्म स्वर्गाय स्यात्, स्वर्गो मे भोग्यो भवेत् । कथमहं स्वर्गं प्राप्नुयाम् इत्येवं साध्यत्वेन स्वर्गमिच्छन् स्वर्गकाम इत्युच्यते । यदि च न स्वर्गसाधनं तत्कर्म, तद्विरुद्धमेवेदमापतति—स्वर्गं कामयते, यागं करोतीति—अन्यदिच्छति, अन्यत् करोतीति हि स्यात् । अतः कर्मणः काम्यमानसाधनतामप्रतिपद्यमानः स्वर्गकामः तत्र नैवाधिक्रियते ; न चानधिक्रियमाणस्तत्र संबध्यते ॥ § 6055

तदेवमधिकृतत्वेन स्वर्गकामस्य कर्मणि संबन्धात् स्वर्गयागयोश्च साध्यसाधनभावावगममन्तरेण तस्याधिकारनिर्वाहासंभवात् अवश्यंक्रियायाः साधनत्वं, स्वर्गस्य च साध्यत्वमभ्युपगन्तव्यम् । अतश्च क्रियायाः फलं प्रति गुणभावान्न प्राधान्यम् । अप्राधान्याच्च न वाक्यार्थत्वम् । तदुक्तम्—(?')कर्मण्यपि जैमिनिः फलार्थत्वात् जै-सू-३-१-४ इति ॥ § 6056

II.80/KSV

## क्रियाया अपि फलशेषत्वमेव

का चेयं क्रिया वाक्यार्थ इत्युच्यते ? य एष यागादिः भावार्थे धातुवाच्यः ? उत प्रत्ययार्थः कश्चित्तदतिरिक्तः ? इति ॥ § 6057

तत्र भावार्थस्य काम्यमानसाधनत्वात् अप्राधान्यमुक्तमेव । प्रत्ययार्थेऽपि काम्यमानभावार्थगतसाधनभावापरित्यागेनैव प्रतीयमानो वाक्यार्थतामेति,

---

६८४.२२--६८५.१ ] विशेषणं—
nyāma-wit_kha

१८ ] वाक्यार्थोऽपि—
nyāma-wit_ka

---

२१ याऽपि ] अहं इदं एभिस्साधनैः मम सुखाय अस्माद्धेतोः अत्रेदानीं करोमि इति व्यवहारे सर्वकारकाणां क्रियाकारकसम्बन्धः प्रतीयते ।
२२ त्र ] अनुपादेयविशेषणं स्वर्गः । द्वितीयं तु लोहितोष्णीषादयः ॥
१७ उत ] प्रत्ययः—अख्यातम् । तदर्थः पुरुषव्यापारः, भावना वा ॥

*नान्यथेति । स चायं परेषामपि पक्षः । तस्मान्न क्रियामात्रपर्यवसायी वाक्यार्थ इति सिद्धम् ॥ § 6058

## फलस्यापि वाक्यार्थत्वासंभवः, पुरुषस्य वाक्यार्थत्वविमर्शश्च

किमिदानीं फलस्यैव वाक्यार्थत्वं प्रचक्ष्महे ? तद्धि प्रधानं साध्यम् । एतदर्थो ह्यखिलः श्रमः—एतदपि नास्ति—क्रियार्थ एव तावद्वाक्यार्थत्वं कथमुत्सृष्टम् ? अप्राधान्यादिति चेत्—फलेऽपि समानम् । फलमपि पुरुषार्थत्वादप्रधानम् । न हि स्वर्गः स्वतन्त्र एव सत्तां लभतां इति यतते पुरुषः, किन्तु स्वोपभोग्यतयैव सर्वमभिलषतीत्यतस्तस्यापि तदर्थत्वान्न प्राधान्यम् । आह च फलं च पुरुषार्थत्वात् जै-सू-३-१-५ इति ॥ § 6059

हन्त ! तर्हि पुरुष एव वाक्यार्थो भवतु । स ह्यनन्यनिष्ठः, स्वतन्त्रत्वात्—उच्यते—पुरुषोऽप्यौदुम्बरीसंभारादिषु विनियुज्यत एव । यजमानसंमिता औदुम्बरी भवति इति तस्यापि तदर्थत्वम् । उक्तं च पुरुषश्च कर्मार्थत्वात् जै-सू-३-१-६ इति ॥ § 6060
II.81/KSV

यद्येवं, संकटे पतिताः स्मः । न विद्मः किं विदध्महे । क्रिया हि फलार्था, फलं च पुरुषश्च क्रियार्थ इति परिवर्तमाने चक्रे कस्य प्राधान्यं शिष्मः ? कस्य वाक्यार्थत्वम् ? § 6061

## पुरुषस्यापि वाक्यर्थत्वासंभवः

उच्यते—पुरुषस्तावन्न वाक्यार्थः; आख्यातवाच्यत्व एव तस्य *विवदन्ते, का कथा वाक्यार्थत्वस्य ? § 6062

ननु कर्तरि लकारः इति स्मरणात् कथं नाख्यातवाच्यः कर्ता ? कोऽयं लकारो नाम ? *स हि वर्तमाने लट्—इति विधाय, कर्तरि शप् —युष्मदि मध्यमः—अस्मद्युत्तमः—शेषे प्रथमः—तिप्तस्झि—इति, बहुषु बहुवचनम्—द्व्येकयोर्द्विवचनैकवचने—इति वाक्यान्तरैर्विभज्य विवृतः । तदेतानि कारकसंख्याविभक्तिविधायीनि सूत्राणि एकवाक्यतया व्याख्येयानि, एकार्थविषयत्वात् । एको हि पचति इत्यादिः शब्दः तैर्व्याक्रियते । तदेवमेष वाक्यार्थो भवति—कर्तुबहुत्वे बहुवचनं झि इति । सेयं कर्तृसंख्याऽऽख्यातवाच्या भवति, न कर्ता—इति कुतस्तस्य वाक्यार्थत्वम् ? अलं चानया शास्त्रान्तरगर्भया द्राधीयस्या कथया । पुरुषस्तावन्न वाक्यार्थः ॥ § 6063

---

२२--२३ ] वाक्यार्थत्वं— nyāma-wit_kha
१ ] योग्य— nyāma-wit_kha
४ ] संमार्जनादिषु— nyāma-wit_kha

---

२० *] नान्यथा—स्वतन्त्रतया, स्वयंपुरुषार्थत्वेन ॥
९ *] विवदन्ते—भावना, कृतिर्वा आख्यातार्थ इति किल मन्यन्ते ॥
१२ *] स हीति—एभिस्सर्वैर्मिलित्वैव लकारस्वरूपं ज्ञातव्यम् ॥

## भावनाया वाक्यार्थत्वपक्षः

फलमपि न वाक्यार्थः, सिद्धासिद्धविकल्पानुपपत्तेः । सिद्धस्य तावत् फलस्याभिधानमेव नास्ति, साध्यमानत्वेन निर्देशात् ॥ § 6064
II.82/KSV

साध्यमानत्वपक्षे तु साक्षात्तत्सिद्धिवेदनात् ।
व्यापार एव तन्निष्ठः तद्धि वाक्यार्थ उच्यताम् ॥§ 6066

अत एव हि वाक्यार्थं भावनां प्रतिजानते ।
यथोचितफलाढ्यां च त्रयसम्बन्धबन्धुराम् ॥§ 6068

## भावनास्वरूपविवरणम्

केवं भावना नाम ? भाव्यनिष्ठो p. 75 भावकव्यापारो भावना । भाव्यं हि स्वर्गादि फलं, साध्यमानत्वात् । साध्यत्वं चास्य भवनक्रियाकर्तृत्वात् । भवनक्रियायां च कर्तृत्वं उत्पत्तिधर्मकस्य वस्तुनो दृष्टम्; न नित्यं भूतस्य, नापि नित्यमभूतस्य । यथाऽऽह—तं. वा. २-१-१ § 6069

नित्यं न भवनं यस्य यस्य वा नित्यभूतता ।
न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव इति ॥§ 6071

स्वर्गादिश्च काम्यरूपोऽर्थः खतत्पुष्पाभ्यां विलक्षण इति भाव्यो भवति । तन्निष्ठस्तदुत्पादकश्च पुरुषव्यापारो यः, स भावना । सा ण्यन्तेन भवतिनोच्यते । प्रकृत्यर्थस्य भवतेः कर्ता यः स्वर्गादिः, स एव ण्यन्तस्य तस्य कर्मतां प्रतिपद्यते । कर्ता त्वस्य प्रयोजकः पुरुषः । णेश्चार्थः प्रयोजकव्यापारः । पुरुषो हि भवन्तं स्वर्गादिमर्थं स्वव्यापारेण भावयति— संपादयति । स तत्संपादको व्यापारो भावनेत्युच्यते ॥ § 6072
II.83/KSV

---

२२ ] काम्यमान— nyāma-wit__kha
१ ] त्तसिद्ध्य— nyāma-wit__kha
१२ ] कर्तृत्वस्य— nyāma-wit__ka
१२ ] णेश्चार्थःणिज्वाच्यः— nyāma-wit__kha

---

२२ तु ] साक्षात—व्यापारान्तरापेक्षां विनैव ॥
४ चास्य ] भवति इत्युक्ते हि फले भवनक्रियाकर्तृत्वं प्रतीयते । अतश्चात्र कर्तृत्वं आश्रयत्वे, तच्च विषयत्वे, तच्च साध्यत्वे विश्राम्यति ॥
९ एव ] गतिबुद्धि इत्यादिना अत्र कर्मत्वप्रतीतेः ॥

## भावना न क्रियारूपा

ननु व्यापारः क्रियैव, तदतिरिक्तस्य व्यापारस्यासंभवात् । क्रियावाक्यार्थपक्षश्च प्रतिक्षिप्तः—उच्यते—न क्रियामात्रं भावना । अपि तु परिदृश्यमानपूर्वापरीभूतयज्यादिभावस्वरूपातिरिक्तः पुरुषव्यापारः *प्रत्ययात् प्रतीयमानो भावना । यथाऽऽह— § 6073

*न सा केनचिदुत्पाद्या जनिका सा न कस्यचित् ।
केवलं जननी ह्येषा जन्यस्य जनकस्य च इति
॥§ 6075

क्रियाकारकादिविलक्षणैव हि सा शब्दात् प्रतीयत इत्यर्थः ॥ § 6076

## भावनायाः आख्यातवाच्यत्वम्

ननु च यजत इत्यत्र प्रकृत्यर्थो यागादिः किया । प्रत्ययार्थस्तु प्रेरणारूपो विधिः, कर्तृसंख्यादिश्च; न तु धात्वभिधीयमानव्यापारव्यतिरिक्तो भावनाख्यः पुरुषव्यापारः प्रत्ययात् प्रतीयते । न हि भावनावाचिनीं कांचिद्विभक्तिं स्मरति पाणिनिः, लिङादिमिव विध्यादौ । तस्मान्न भावना वाक्यार्थः—उच्यते—भावनाऽपि प्रतीयत एवाख्यातात् यदि नैपुण्येन शाब्दी प्रमितिरवमृश्यते ॥ § 6077

आस्तां विधिपदं तावद्वर्तमानापदेशिनः ।
शब्दात् यजत इत्यादेः भावना न न गम्यते ॥§ 6079

पचतिगच्छति इत्यतो यथा पाकादिर्धात्वर्थः प्रतीयते, तथा सर्वानुगतः
II.84/KSV कर्तृव्यापारोऽपि, *पाकाद्युपजननापायेऽपि व्यापारप्रतीतेरन पायात् । यथा हि औपगवः कापटवः औपमन्यवः इत्युपगुप्रभृतीनामुद्धारे च निक्षेपे च प्रत्ययार्थोऽनुवर्तते तद्धितान्तेषु, तथाऽऽख्यातेष्वपि सोऽनुवर्तमानो दृश्यते ॥ § 6080

---

२ ] व्यापार— nyāma-wit__kha
३ ] भावनार्थ— nyāma-wit__ka
१४ ] पचति पठति— nyāma-wit__kha

---

१५ *] धात्वर्थः क्रिया, तदतिरिक्ता भावना अख्यातार्थः ॥
१ *] भावना धत्वर्थवत् न कारकनिष्पाद्या, नापि कारकवत् धात्वर्थनिष्पादिका । अपि तु उभयोरपि प्राणप्रदात्री ॥
१२ *] आदिपदेन गमनादिपरिग्रहः । अत्र धात्वर्थस्तु भिद्यते, न त्वाख्यातार्थः ॥

अपि च पचति इत्याख्यातपदस्य यदाऽर्थो व्याचिख्यासितो भवति, तदा पाकं करोति इति वाक्यं व्याख्यातारः प्रयुंजते—पचति इति कोऽर्थः ?—पाकं करोति इति पाकशब्देत द्वितीयान्तेन साध्यं धात्वर्थं व्याचक्षते । कर्तृव्यापारात्मकं प्रत्ययार्थं करोति इतिपदेन ॥ § 6081

किं च किं करोति देवदत्तः ? इति पृष्टास्सन्तः द्वये वक्तारो भवन्ति करोति पाकं इति, पचतीतिवत् । तदिदमुभयरूपमप्युत्तरमेकार्थम्; अन्यथा न तेन प्रष्टा प्रत्याय्येत । तस्मात् पाकं करोतीति पदद्वयस्य योऽर्थः, स एवार्थः एकस्य पचतीति पदस्य । अत्रापि पचत्यर्थादन्यः करोत्यर्थः प्रतीयत एव । योऽसावन्यः करोत्यर्थः, सा भावना ॥ § 6082

## भावनायाः अतिरिक्तत्वानतिरिक्तत्वे

आह—न कर्तृसंख्यादिव्यतिरेकेण प्रत्ययात् धात्वर्थातिरिक्तं व्यापारं प्रतिपद्यन्ते । प्रतिपद्येरंश्चेत् करोतीत्यतोऽपि शब्दात् प्रतिपद्येरन् । न च करोतीत्यत्र प्रकृतिप्रत्ययवाच्ये क्रिये विभज्य दर्शयितुं शक्येते—उच्यते —नेदं साधु बुध्यसे ॥ § 6083

II.85/KSV

यश्च पाकं करोतीति व्यवहारो विभागतः ।
स एव समुदायेन प्रोक्तः पचतिना यथा ॥§ 6085

तथा कार्यं करोतीति प्रतीतिर्नास्ति लौकिकी ।
प्रत्ययार्थः करोत्यर्थे पचत्यादौ तु वर्तते ॥§ 6087

कर्तृसंख्याप्रतीतौ च न विवादोऽस्ति कस्यचित् ।
तावता निह्नवः कार्यो न तु व्यापारसंविदः ॥§ 6089

करोतीत्यादिशब्देभ्यश्च यथा न भवितव्यविशिष्टेभ्यः तत्प्रतीतिरिष्यते, न तथा सर्वेभ्यः ॥ § 6090

के पुनस्ते विशिष्टाः शब्दाः, ये भावनामभिदधति ? उच्यते— § 6091

१ ] यथार्थो— nyāma-wit_ka
२--३ ] करोति—
nyāma-wit_kha
१४--१६ ] करोतीति—
nyāma-wit_kha
२० ] शब्दाभिधेययाऽनया—
nyāma-wit_kha

५ द्येरंश्चेत्] करोतीति—पाकं करोति इति व्यवहारात् यदि आख्यातार्थविवरणं करोतिना क्रियेत, तर्हि करोति इति व्यवहारे व्यापारस्यैव धात्वर्थत्वात् आख्यातार्थः कः अतिरिक्तः वक्तव्य इत्याक्षेपार्थः ॥

८ हारो] पाकः, तदनुकूलव्यापारश्चेति विभागतः । पाकं पचति इति निरर्थकः शब्दः प्रयुज्येत चेत्, न तत् विषयव्यवस्थापकम् ॥

भावार्थाः कर्मशब्दा ये तेभ्यो गम्येत भावना ।
यजेतेत्येवमादिभ्यः स एवार्थो विधीयते ॥§ 6093

भवन्ति केचित् भावार्थाः, न कर्मशब्दाः—यथा—भावः भवनं भूतिः इति । भवन्ति केचित् कर्मशब्दाः, न भावार्थाः—यथा—*श्येनैकत्रिकादयः कर्मनामधेयतया प्राक् समर्थिताः । ये तु भावार्थाः सन्तः कर्मशब्दाः यजते ददाति जुहोति इत्येवमादयः, तेभ्यः भावनाख्या क्रिया गम्यते । तैरेव लिङादिविभक्त्यन्तैः सोऽर्थोऽभिधीयते यजेत दद्यात् जुहुयात् इति । तदुक्तं—यज्याद्यर्थश्चातोऽवगम्यते भावयेदिति च इति शा. भा-२-१-१ ॥
§ 6094

II.86/KSV

करोतिशब्दादपि केवलात् कर्तृव्यापारो न नासाववगम्यते; यत्र यागादिकर्मणाऽननुरक्तेन प्रयोगयोग्यतां प्रतिपद्यत इति विशिष्टेभ्य एव यजत्यादिशब्देभ्यो भावनाख्योऽनुष्ठेयः पुरुषव्यापारः प्रतीयत इति सिद्धम् ॥
§ 6095

## अख्यातार्थवस्तुस्वरूपे पक्षभेदाः

क्रियाविशेष एवायं व्यापारो ज्ञातुरान्तरः ।
स्पन्दात्मकबहिर्भूतक्रियाक्षणविचक्षणः ॥§ 6097

इत्येवं केचित् ॥ § 6098

पुरुषस्य प्रयत्नो वा भावनेत्यभिधीयते ।
औदासीन्यदशापायं पुमान् येन प्रपद्यते ॥§ 6100

स यत्नो यागहोमादिक्रियानिर्वृत्तिकारणम् ।
तस्य तद्व्यतिरिक्तत्वं प्रायः सर्वेऽनुमन्यते ॥§ 6102

स चायमात्मधर्मोऽपि न विभुत्वादिसन्निभः ।
साध्यरूपाभिसम्बन्धात् धत्ते विषयतां विधेः ॥§ 6104

इत्यपरे ॥ § 6105

---

३ ] ये न— nyāma-wit_kha
८ ] यद्यर्थःशान्तो— nyāma-wit_kha
१५ ] विलक्षणः— nyāma-wit_kha
२२ ] विभोः— nyāma-wit_kha

---

२० *] एकत्रिकेण यजेत इत्युक्तः यागविशेषः । लोकेऽपि पाकादिशब्दाः केवल धात्वर्थाः । प्रयत्नादिशब्दाः केवलव्यापारवाचिनः । पचतीत्यादयः उभयपराः ॥

१४ औदासीन्य ] दशपायः—दशाविगमः ॥
१६ स्य ] तद्व्यतिरिक्तत्वं—धात्वर्थक्रियावैलक्षण्यम् ॥

## भावनायाः धात्वर्थानुगतत्वपक्षः

अन्ये धात्वर्थसामान्यं भावनामभ्युपागमन् ।
यागदानाद्यनुस्यूतं रूपं गोत्वादिजातिवत् ॥§ 6107

II.87/KSV

यथा हि शाबलेयादिष्वनुगतं च गोरूपमवभासते, व्यावृत्तं च शाबलेयादिरूपं, एवमिहापि यागादिकर्मणामनुगतं च व्यापाररूपं प्रतिभासते परस्परविभक्तं च यागादिरूपम् । यत् तदनुगतं व्यापाररूपं, सा भावना । यथा च शाबलेयाद्यननुरक्तं पृथक्त्वेन गोत्वं दर्शयितुमशक्यम् । तदुपरक्तत्वेन तस्य सर्वदाऽवगमात् । न चैतावता तस्य नास्तित्वम्, *सुख-दुःखाद्यवस्थानुगतस्येवात्मनः ॥ § 6108

तथा च किं करोति, इत्यनवगतविशेषव्यापारसामान्यप्रश्ने सति, पचति पठति इति तद्विशेषोत्तरवचनं अनुगुणं भवतीति । तच्च सामान्यरूपमपि न गोत्वादिवत्, क्रियात्ववद्वा सिद्धतयाऽवभासते, येन विधेरविषयः स्यात् ॥ § 6109

अपि च यजते दद्यात् जुहुयात् इति सर्वत्रापरित्यक्तपूर्वापरी भूतस्वभावं तद्व्यापारसामान्यमवगम्यते । तेन विधेश्च विषयतां प्रतिपद्यते । तदिदं सकलधात्वर्थसाधारणं साध्यमानावस्थं व्यापारसामान्यं भावनेत्युच्यते । तस्मिंश्च पक्षे धातुवाच्यत्वमपि भावनाया वक्तुं शक्यते ॥ § 6110

पाकादिशब्देभ्यो धातौ सत्यपि तदप्रतीतेः न धातुवाच्यत्वं भावनाया इति चेत्, भवत्यादौ तर्हि सत्यति प्रत्यये तदप्रतीतेः प्रत्ययवाच्यत्वमपि न स्यात् । तदलमनेन निर्धारणप्रयत्नेत । सर्वथा धातोर्वा प्रत्ययाद्वा भावनाऽवगम्यत इति सिद्धम् ॥ § 6111

II.88/KSV

## भावनाया अंशत्रयविशिष्टत्वम्

सा धातोः प्रत्ययाद्वाऽपि भावनाऽवगता सती ।
अपेक्षतेंऽशत्रितयं किं केन कथमित्यदः ॥§ 6113

भावयेत् इत्यवगते नूनमपेक्षात्रयं भवति—किं भावयेत् ? केन भावयेत् ? कथं भावयेत् ? इति ॥ § 6114

१३ ] सर्वत्र— nyāma-wit_kha

१९ ] निर्वारण— nyāma-wit_ka

५ *] आत्मनः सुखादुःखादिसंबन्धमन्तरा प्रत्येकं भानस्य वेदान्तिव्यतिरिक्तैः अनङ्गीकारेऽपि न नास्तित्वं यथा, तथा ॥

१५ ब्देभ्यो ] धातौ सत्यपि—धात्वर्थे प्रतीयमानेऽपि । भवत्यादौ इत्यत्र आदिना करोत्यादिपरिग्रहः ॥

तत्र किमित्यपेक्षा स्वर्गकामपदेन पूर्यते—किं भावयेत् ? स्वर्गं इति ॥ § 6115

ननु ! स्वर्गकामः इति पुरुषनिर्देशोऽयं, न फलनिर्देशः—सत्यम्, स्वर्गपरस्त्वयं निर्देशः । उक्तं हि निरतिशयप्रीतिवचनः स्वर्गशब्दः । प्रीतिश्च यान्नार्थेत्यप्युक्तम् । साध्यत्वेन च स्वर्गः काम्यत इति स एव हि किमित्यंशे निपतति स्वर्गं भावयेत् इति । स्वर्गं कामयते इति च व्युत्पत्तौ विस्पष्टमेव तस्य साध्यत्वम् । बहुव्रीहावपि तस्यैव साध्यत्वं विधिवृत्तपर्यालोचनयाऽवधार्यते ॥ § 6116

## करणाकाङ्क्षाविवरणम्

एवं स्वर्गं भावयेत् इत्यवगते केन भावयेत् इत्यपेक्षायां, यागेनेति सम्बध्यते ॥ § 6117

ननु ! यागेन इति न श्रूयते, किन्तु यजेत इति । तच्चाख्यातपदं प्रकृतिप्रत्ययात्मकसमुदायरूपम् । तत्र ङिप्रत्ययस्य भावना वाच्येत्युक्तम् । यज् इति धातुमात्रमवशिष्टम् । तस्य कृदन्तस्य तृतीयान्तस्य यागेनेति
II.89/KSV योऽर्थः स कथमेकाकिना तेन प्रत्याय्येत—उच्यते—भावना चेत् प्रत्ययार्थ इति सोढमायुष्मता, यागेनेत्यभिसम्बन्धः सोढव्य एव । यो हि तस्यां यथा सम्बद्धुं योग्यः तमसौ तथा प्रत्येष्यति, नान्यथेति करणाकाङ्क्षापरिपूरणेन सम्बन्धयोग्यो यजिरिति तथैवेष भावनयाऽभि सम्बध्यते ॥ § 6118

## यागस्य करणत्वं शब्दसामर्थ्यलभ्यम्

अप्रातिपदिकत्वाद्धि तृतीया तत्र मा स्म भूत् ।
शब्दसामर्थ्यलभ्या तु नूनं कारणता यजेः ॥§ 6120

कस्य पुनश्शब्दस्य सामर्थ्यमेतत् ? भावनावाचिन इति—ब्रूमः— तृतीययैव कारणत्वमभिधानीयमिति नेयं राजाज्ञा । *ततस्तदवगतेस्तु तथाऽभ्युपगम्यते । एवमिहापि स्वर्गकामो यजेत इति तथाऽवगतिर्भवन्ती किमिति न मृष्यते ? § 6121

आख्यातात् साध्यता या च धात्वर्थस्यावगम्यते ।
द्वितीया श्रूयते तत्र किं वा तदभिधायिनी ?§ 6123

---

११ ] इत्यवगम्यते— nyāma-wit_ka
१४ ] प्रत्ययार्थस्य— nyāma-wit_kha
१८ ] प्रतीक्षते— nyāma-wit_kha
२४--२५ ] मृष्यते— nyāma-wit_ka

---

९ मेकाकिना ] तेन—केवलधातुगा ॥
१६ * ] ततः—यत्र तृतीया श्रूयते, ततः ॥

## यागस्य करणत्वौचित्यम्

ननु एवं तर्हि धात्वर्थस्य साध्यताऽवगतेः किमित्यंशे यजिना पतितव्यम्—किं भावयेत् ?; यागम् । केनेत्यपेक्षिते वाक्यान्तरसमर्पितं व्रीहिभिः इत्यादि सम्बध्यताम्; न पुनर्यजेः साध्यरूपव्यापाराभिधायिप्रत्ययोपसर्जनीभूतकर्मतां अतिप्रत्यासन्नामनारुह्य दूरवर्तिनीं करणतामधिरोढुमर्हति—उच्यते—स्यादेतदेवं, यदि हि स्वर्गकामः इति न श्रूयेत । तस्मिंस्तु श्रुते नैवं भवितुमर्हति । कुतः ? § 6124

II.90/KSV

स्वर्गादिसाध्यसंबन्धादलब्ध्वा साध्यताऽन्वयम् ।
यजिस्तदानुगुण्येन करणांशेऽवतिष्ठते ॥§ 6126

स्वर्गस्य हि काम्यमानत्वेन प्रीत्यात्मकत्वेन चानन्यार्थत्वात् साध्यतायां, योग्यत्वात् किमित्यंशोपनिपाते सिद्धे तत्रालब्धनिवेशो यजिः तदपेक्षितां करणतामेव योग्यत्वादवलम्बते ॥ § 6127

*सामानाधिकरण्यं च ज्योतिष्टोमादिभिः पदैः ।
एवं सत्युपपद्येत करणत्वानुवादिभिः ॥§ 6129

कर्मनामधेयत्वं च ज्योतिष्टोमादीनां शब्दानामुक्तम् ॥ § 6130

## साध्यस्य भागस्य करणत्वसंभवः

ननु साध्यत्वपक्षसाक्षितामपि कर्मनामधेयानि भजन्ते—अग्निहोत्रं जुहोति इति—नैषदोषः—साध्य एव भवन् भावार्थः साधनतामवलम्बते । तत्रापि हि स्वर्गभावनायामग्निहोत्राख्यो होमः करणमेव, अन्यथा स्वर्गकामपदानन्वयप्रसङ्गात् इत्युक्तम् । नामधेयपदं तु कर्मतामनुवदति किंचित् करणताम्; अग्निहोत्रं इत्यादि, ज्योतिष्टोमेन इति । तस्मात् यजेः करणत्वेनैवान्वय इति सिद्धम् ॥ § 6131

यत्तु प्रत्यासन्नत्वात् साध्यांशोपनिपातितेत्युच्यते—तदयुक्तम्— योग्यत्वविरोधिनी प्रत्यासत्तिः संबन्धकारणम्, न तद्विपरिता । योग्यत्वं च स्वर्गस्यैव साध्यतायां, यजेश्च करणतायामित्युक्तम् ॥ § 6132

II.91/KSV

४ ] समाहिते— nyāma-wit__kha
९ ] स्वर्गे साध्यत्व— nyāma-wit__ka
११ ] मानत्वात्— nyāma-wit__kha
२१--१ ] कारण— nyāma-wit__kha
३ ] प्रतिपत्ति— nyāma-wit__kha

१२ *] सामानाधिकरण्यं—ज्योतिष्टोमेन इति हि तृतीया स्पष्टं श्रूयते ॥
१७ था] अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यादौ ॥

## कर्थभावाकाङ्क्षाविवरणम्

एवं यागेन भावयेत् इत्यवगते, कथम् ? इत्यपेक्षायां इति कर्तव्यत तद्वाक्यपठिता, वाक्यान्तरनिवेदिता वा संबध्यते ॥ § 6133

तद्वाक्योपात्ता तावत्—यथा एतस्यैव रेवतीषु वारवन्तीयमग्नि ष्टोम साम कृत्वा पशुकामो ह्येतेन यजेत इति ॥ § 6134

वाक्यान्तरोपात्ता—व्रीहीनवहन्ति तण्डुलान् पिनष्टि समिधो यजति बर्हिर्यजति तनूनपातं यजति इति ॥ § 6135

इतिकर्तव्यता हीष्टा दृष्टादृष्टप्रयोजना ।
प्रायः सर्वत्र भावार्थे कथमंशोपपादिनी ॥§ 6137

दृष्टोपकारद्वारेण सम्बद्धा पेषणादिका ।
इतिकर्तव्यता ज्ञेया सन्निपत्योपकारिणी ॥§ 6139

भावार्थमनुगृह्णाति या त्वदृष्टेन वर्त्मना ।
समिदाद्यात्मिकामाहुः तामारादुपकारिणीम् ॥§ 6141

एवमंशत्रयाश्लेषलब्धानुष्ठानयोग्यताम् ।
भावनामीदृशीं प्राप्य वृत्तिविधिनिषेधयोः ॥§ 6143

दर्शपूर्णमासाभ्यां यजेत स्वर्गकामःज्योतिष्टोमेन स्वर्गकामो यजेत इत्यत्र अनन्तरोक्तरीत्या एष वाक्यार्थो जातः—दर्शपूर्णमासेन यागेन स्वर्गं (?)ववेत् अनयाऽग्न्याधानादिकयेतिकर्तव्यतयेति ॥ § 6144
II.92/KSV

## विधिप्रत्ययस्यावश्यकता

*किमर्थं पुनर्विधिराश्रीयते ? वर्तमानापदेशिष्वप्याख्यातेषु—भावना प्रतीयत इति दर्शितवान् भवान् । अतः किं विधिना ? तस्य ह्यीश्वयणं स्वर्गयागयोः साध्यसाधनभावबोधनाय; प्रवृत्तिनिवृत्तिलिद्धये वा ? साध्यसाधनसम्बन्धस्तावत् आकाङ्क्षा-सन्निधि-योग्यता-पर्यालोचनया *वर्तमानापदेशिनोऽप्याख्यातात् भावनावगमे सति भवत्येवान्तरेणापि वधिम् ॥ § 6145

---

९--१० ] यजति— nyāma-wit_kha
१३ ] संबन्धे— nyāma-wit_kha
३ ] साधना— nyāma-wit_kha

---

३ तीषु] वारवन्तीयसाम करणं उत्पत्तिवाक्य एव शिष्टम् ॥
१८ *] यदि भावना आख्यातार्थः पुरुषप्रेरिका, तर्हि जुहुयात् इत्यादि विधिप्रत्ययस्य का आवश्यकता इत्यर्थः ॥
२१ *] लडाख्यातात् ॥

प्रवृत्तिरपि पुरुषेच्छानिबन्धना स्वर्गस्य साध्यत्वे, यागस्य साधनत्वेऽवधारिते, यः स्वर्गमिच्छेत् स तत्सिद्धये प्रवर्ततैव। यस्तु नेच्छेत् तस्य विधिरपि किंकुर्यात् ? न ह्यप्रवर्तमानस्य पुंसः विधिर्गले पाशं निदधातिः रज्वा वा बाहू बध्नाति । निषेधाधिकारेऽपि सुरापानब्राह्मणहननादे, प्रत्यवायसाधनत्वावधारणात् तत्परिजिहीर्षया निवृत्तिर्भवति, न विधितः । यस्तु प्रत्यवायान्न बिभेति, स विधावपि श्रुते न निवर्तत एवेति । तस्मात् प्रवृत्तिनिवृत्त्योर्न कारणं विधिरिति तदर्थमपि तदाश्रयणमसांप्रतम् ॥ § 6146

### विधिस्वरूपविमर्शः

कश्चायं विधिर्नामेत्येतदपि न विद्मः । ननु चाहुः— § 6147

विधेर्लक्षणमेतावदप्रवृत्तप्रवर्तनम् ।
*अतिप्रसङ्गदोषेण नाज्ञातज्ञापनं विधिः ॥§ 6149

II.93/KSV

बाढं श्रुतोऽयं श्लोकः । किन्तु कोऽसावप्रवृत्तप्रवर्तक इति न जानीमः; प्रवर्तकस्वरूपे हि संशेरते प्रवादुका इति ॥ § 6150

### प्रवर्तकत्वं कस्येति विमर्शः

किं लिङादिः शब्द एव प्रवर्तकः ? तद्व्यापारो वा ? तदर्थो (?) नियोगः ? फलं वा स्वर्गादिः ? श्रेयस्साधनत्वं वा ? रागादिर्वा ? प्रवर्तकस्वरूपानवधारणाद्विधेरप्यनधारणमिति ॥ § 6151

यत्तावदुक्तं किं विध्याश्रयणेनेति—तत्रोच्यते— § 6152

यदयं साधनत्वेन यजेरभिहितोऽन्वयः ।
स्वर्गस्य च फलत्वेन स एव महिमा विधेः ॥§ 6154

विधिवचनमन्तरेण हि स्वर्गकामो यजेत इति पुरुषलक्षणार्थस्वर्गकामशब्दः, *शुक्लो होतेतिवत् स्यात् । तदा चैकपदोपादानलक्षण प्रत्यासत्तिसम्बन्धनिसर्गघटितपूर्वापरीभूतस्वभावधात्वर्थसाध्यतातिक्रमेण दूरात् स्वर्गस्य साध्यत्वं अन्यत्रोपसर्जनीभूतस्य कथं कल्पयितुं शक्यते ? तस्मादेष विशिष्टः साध्यसाधनसम्बन्धः विधिप्रसादलभ्य एव भवति, नान्यथेति विधिराश्रयणीयः ॥ § 6155

---

८ ] र्निगडे पदं—
nyāma-wit__kha
१०--११ ] पुरुषो निवर्तेतेति प्रवृत्ति—
nyāma-wit__kha

१८ ] विनियोगः—
nyāma-wit__kha

---

१० *] ज्ञातेऽप्यर्थे राजाज्ञादिना प्रवृत्तिदर्शनात् ॥
१९ इति ] स्वर्गकामपदस्य बहुव्रीहित्वात् लक्षणया पुरुषः अर्थः ॥

२० *] ऋत्विजां मध्ये शुक्लवर्णः होतुः यथा क्वचित् ज्ञापकः, तथा ॥
२२ त्वं ] अन्यत्र—कामनायाम् ॥

## विधेरावश्यकता

कथं पुनर्विधिरप्यमुं साध्यसाधनभावं बोधयति ? इत्थं बोधयति —स II.94/KSV हि सप्रत्ययप्रवर्तकस्वभावः । न चापुरुषार्थरूपे व्यापारे पुरुषः प्रयत्नश-तप्रेर्यमाणोऽपि सप्रत्ययः प्रवर्तते । प्रवर्तमानेऽपि पुंसि प्रवर्तकत्वाख्यनिज-स्वरूपसंकोचमाशङ्कमानः विधिः पुरुषार्थस्वभावं स्वर्गं साध्यतया व्यवस्थाप-यति, यागं चास्य साधनतयेति । एवं ह्यवबोधयतोऽस्य प्रवर्तकत्वं निर्वहति ॥ § 6156

## फलोपदेशमात्रान्न प्रवृत्तिः

यत्तु दर्शितेऽपि स्वर्गादौ फले न प्रवर्तते चेत्पुरुषः किं विधिः कुर्यादिति—तदप्युक्तम्—न हि वाय्वादिवत् पुरुषस्य प्रवर्तको विधिः । वाय्वादिः खलु सप्रत्ययमपि तदितरमपि प्रवर्तयति । विधिस्तु सप्रत्ययस्यैव प्रवर्तकः । सप्रत्ययस्य चैतावत् प्रवर्तनं, यत् प्रवर्तितोऽहमिति ज्ञानजननम् । न च फलमदर्शयता विधिना सप्रत्ययस्येदृशं ज्ञानं जनयितुं शक्यम् । फले तु दर्शिते सति तदस्य ज्ञानं जनितमेव । अनेन जनितं चेत् ज्ञानं प्र-माणवृत्तेन प्रवर्तित एवासौ विधिना पुरुषः । आलस्यादिनाऽनर्थित्वेन वा बहिःप्रवृत्तिपर्यन्ततया चेन्न प्रवर्तेत—मा प्रवर्तिष्ट ! विधिना तु स्वकर्तव्यं कृतम्, प्रवर्तितोऽहमिति ज्ञानजननात् । अन्यो हि प्रवर्तनावगमः, अन्यश्च बाह्यो व्यापारः ॥ § 6157

## विधेरेव साध्यसाधनभावावगमः

एवं विधिवशादेव साध्यसाधनभावधीः ।
सा हि प्रथमनिर्वृत्तप्रेरणाज्ञानपूर्विका ॥§ 6159

II.95/KSV

यजेत इति प्रेरणा प्रतीयमाना साध्यसाधनसम्बन्धमनवबोधयति विधौ न निर्वहतीति तत्कृतस्तदवबोध उच्यते । निषेधे च न हन्यात् इति निषेध्य-

---

१०--११ ] पुरुषः— nyāma-wit_kha
११ ] प्रवर्तमानेऽपि— nyāma-wit_kha
१९ ] सप्रत्ययस्य— nyāma-wit_kha
२० ] जनिते ज्ञाने— nyāma-wit_kha
२२ ] प्रज्ञप्ति— nyāma-wit_gha
१ ] प्रवर्तितः पुरुषः— nyāma-wit_ka; nyāma-wit_gha
५ ] बोधयन्ती— nyāma-wit_kha

---

२ हि ] सप्रत्ययः—ज्ञानादिमान् ॥
४ रूप ] साध्यसाधनाद्यनवबोधे हि प्रवर्तकत्वं संकुचितमेव भवेत् ॥
१६ श्च ] बाह्यः—शारीरकः ॥

मानस्य भावार्थस्यानर्थतामनवबोधयन् विधिः न रागतःप्रवर्तमानं पुमांसं निरोद्धुमुत्सहत इति विधेयवन्निषेध्येऽपि तस्यैव व्यापार इत्यवश्याश्रयणीयो विधिः ॥ § 6160

यश्चैष पर्यनुयोगः—किमर्थं विधिराश्रित इति—स तु खलु सरलम-तिकृत इव लक्ष्यते । न हि वयमद्यकृतविधिमाश्रयेम, जहीमो वा । प्रतिपत्तारो हि वयं वेदस्य, न कर्तारः । तत्र च सविधिकानि यजेत स्वर्गकामः इति प्रभृतीनि श्रूयन्ते । तेषां मीमांस्यमानोऽर्थ ईदृगवतिष्ठते । स्वर्गः साध्यः, यागः साधनमिति । स चायं विधिसामर्थ्यलभ्य इति युक्तं विधेराश्रयणम् ॥ § 6161

## कस्य प्रवर्तकत्वं युक्तम्, फलस्य, तद्ज्ञानस्य वा ?

यत्तु प्रवर्तकस्वरूपानिश्चयाद्विधेरनिश्चय इति—तत्राप्युच्यते—फलं तावन्न प्रवर्तकम्, सिद्ध्यसिद्धिविकल्पानुपपत्तेः । सिद्धस्य फलस्याप्रवर्तकत्वं सिद्ध-त्वादेव । न हि यत् यस्यास्ति, स तदर्थं यतते । नाप्यसिद्धस्य खरविषाण-प्रख्यस्य फलस्य प्रवर्तकत्वं युक्तम्, अदृष्टत्वात् ॥ § 6162

अथ कामनाविषयीकृतं फलं प्रवर्तकमिष्यते—सेयं कामनैव प्रवर्तिका भवति, न फलम् । तस्माद्रागादिः प्रवर्तक इत्याहुः ॥ § 6163
II.96/KSV

## श्रेयस्साधनत्वस्य प्रवर्तकत्वपक्षः

एतदपि न पेशलम् । उपजातप्रवृद्धतररागस्या पिकाम्यमनोपायप-रिच्छेदमन्तरेण प्रवृत्त्यनुपपत्तेः न हि स्वर्गकामः सांग्रहिणीमनुतिष्ठति । तद्वरं श्रेयस्साधनत्वं प्रवर्तकम् । लोकेऽपि चैवमेव व्यवहारो दृश्यते । हरीत-क्यादीनामारोग्यसाधनतां वैद्याचार्यचोदनातोऽवगत्य तदुपयोगादा वातुरजनः प्रवर्तते । तृप्तिसाधनतामोदनस्य मन्यमानः तद्भक्षणाय बुभुक्षितः प्रवर्तते—इति श्रेयस्साधनत्वमेव प्रवर्तकम् ॥ § 6164

## विधिप्रत्ययादेः प्रवर्तकत्वपक्षः

---

२१ ] न फलम्— nyāma-wit_kha
१ ] उपनात— nyāma-wit_kha
३ ] स्साधनं— nyāma-wit_kha
४ ] तदुपायादा— nyāma-wit_kha

---

९ म्] मातापितृसहस्रेभ्योऽपि हि वत्सलतरं शास्त्र पुरुषं न कदाऽपि विप्रलम्भयेदित्ययमंशः विधिश्रवणेन दृढीक्रियत इति विधिरावश्यक इति सारम् ॥

१६ पि] अयमेवात्रोपाय इति निश्चयः उपायपरिच्छेदः ॥

एतदपि न चतुरस्रम्—श्रेयस्साधनत्वं ह्यनवगतमवगतं वा प्रवर्तकं भवेत् ? नानवगतम्, अव्युत्पन्नस्य प्रवृत्तेरदर्शनात् । यो हि हरीतकीनामारोग्य-हेतुतां न कुतश्चिदधिगतवान्, नासौ तदर्थ्यपि तामुपयुङ्क्ते । तस्मात् तद्बोधहेतुः प्रवर्तकः । स च दृष्टे विषयेऽन्वयव्यतिरेकादेरपिसंभवति, किं तेन ? अदृष्टे तु विषये श्रेयस्साधनाधिगमः शब्दैकनिबन्धन इति तदधिगमोपायः शब्द एव प्रवर्तकः । अत एव शब्दोऽपि न स्वरूपमात्रेण प्रवर्तकः, वाय्वादितुल्यत्व-प्रसङ्गात् । यदि हि पवन इव, पिशाच इव, कुनृप इव शब्दः प्रवर्तको भवेत्, अनवगतशब्दार्थसम्बन्धोऽपि श्रवणपरवशः प्रवर्तेत, न चैवमस्ति । तस्मादर्थप्रतीतिमुपजनयतः शब्दस्य प्रवर्तकत्वम् ॥ § 6165
१ II.97/KSV

## लिङादेः प्रवर्तकत्वप्रकारः

न च नाम पदप्रतीतौ वर्तमानापदेशकाख्यातात्पदार्थप्रतीतौ च सत्यां सप्रत्ययोऽप्रवर्तमानः कश्चित् दृश्यत इति लिङादिरेव शब्दः प्रवर्तकाभिधान-द्वारेण प्रवर्तको भवितुमर्हति । शब्दस्य च ज्ञापकत्वात् चक्षुरादि कारक-वैलक्षण्ये सत्यपि प्रतीतिजन्मनि करणत्वमपरिहार्यम् । करणं च कारकं च न निर्व्यापारं स्वकार्यनिर्वृत्तिक्षममिति व्यापारस्तस्यावश्यंभावी । लिङादेश्च शब्दस्य न प्रतीतिजन्ममात्रे व्यापारः, किन्तु पुरुषप्रवृत्तावपि, तथाऽवगमात् । लिङा अर्थावगमे सति प्रवृत्तिर्दृश्यत इति तत्रापि लिङव्यापारः प्रभवति । स चायं लिङादिव्यापारः शब्दभावनानामधेयो विधिरित्युच्यते । स एव प्रवर्तकः ॥ § 6166

## भावनाया द्वैविध्यम्

इह हि लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते—शब्दभावना, अर्थ-भावना चेति ॥ § 6167

तत्र अर्थभावना तावत् धात्वर्थातिरिक्तप्रयोजकव्यापारात्मिका दर्शितैव । यो भवनक्रियाकर्तृविषयः प्रयोजकव्यापारः पुरुषस्थः, यत्र भवनक्रियायाः कर्ता स्वर्गादिः कर्मतामापद्यते, सोऽर्थभावनाशब्देनोच्यते । व्याख्यातश्चासौ ॥ § 6168

---

१. लडाख्यातादेः ॥

---

९ ] भुक्त— nyāma-wit_ka
११--१२ ] शब्द एव— nyāma-wit_ka
१६--१७ ] ननु नाम—

nyāma-wit_kha
१ ] लिङर्था— nyāma-wit_kha

---

३ स्मात् ] श्रेयस्साधनत्वबोधे हेतुः विधिरूपः शब्दः ॥ स्वर्गो हि यागेन भवति ॥
२३ क्रियायाः ] कर्तृत्वं चात्राश्रयत्वरुपम् ।

## भावनाद्वयस्वरूपम्

यस्तु शब्दगतः प्रयोजकव्यापारः, यत्र पुरुषप्रवृत्तिः साध्यतां प्रतिपद्यते, सा शब्दभावना । तथा ह्युक्तम्— § 6169
II.98/KSV

*अभिधां भावनामाहुरन्यामेव लिङादयः इति ॥§ 6170

लिङन्तशब्दश्रवणे हि यथा यज्यादवच्छिन्नं स्वव्यापारं पुरुषोऽधिगच्छति, तथा तदनुष्ठाने प्रेरितोऽहम् इत्यपि प्रतिपद्यते । तेनानुष्ठेयार्थप्रतिपादन इव प्रेरणायामपि शब्दस्य सामर्थ्यात् भावनाद्वयप्रतिपादकं लिङादियुक्तं वाक्यमिष्यते । ततः पुरुषव्यापारश्चार्थभावना, शब्दव्यापारश्च शब्दभावनाऽवगम्यते । शब्दव्यापारात्मकत्वाच्च शब्दभावनाशब्देनाभिधीयते । अनवगता च सती न कार्याङ्गमिति शब्देन साऽभि धीयतेऽपि । तदुक्तं अभिधत्ते करोति च इति ॥ § 6171

## शब्दभावनाया अंशत्रयवर्णनम्

ननु ! शब्दभावनाऽपि भावनात्मकत्वादर्थभावनावदंशत्रयमेपक्षत एवेति तदस्या दर्शयितव्यम्—उच्यते—भाव्यांशे तावदस्याः पुरुषप्रवृत्तिरुपनिपतीति उक्तमेव । पुरुषप्रेरणात्मको हि विधिः शब्दभावनेति तत्साध्या पुरुषप्रवृत्तिरेव तत्र भाव्यतां प्रतिपद्यते । करणांशे तु तस्याः नियोज्यविषयसमर्पकपदव्यापारो निविशते । यथा हि यज्यादिना स्वर्गादिर्भाव्यः संपद्यत इत्यर्थभावनायामसौ तत्करणतामबलम्बते, एवमिहापि नियोज्यपुरुषप्रवृत्तिविषयाद्यवगमात् संपद्यत इति तदभिधायकशब्दव्यापारस्तत्र करणतां प्रतिपद्यते । इतिकर्तव्यांशे तु अर्थवादपदव्यापारोऽस्या अवतिष्ठते । केवलं विधिपदश्रवणे हि सति न तथा प्रवर्तयितुमुत्सहन्ते श्रोतारः, यथा अर्थवादजनितबहुप्रकारकर्मप्राशस्त्यज्ञानपरिपोषित हृदयाः सन्तः—इति अर्थवादाः II.99/KSV
प्रवृत्त्यतिशयहेतवः । तेन तद्व्यापार इतिकर्तव्यतांशमस्याः पूरयतीति ॥ § 6172

१२--१३ ] शब्दस्य— nyāma-wit_ka
२ ] भव्यांशे— nyāma-wit_kha
४--५ ] समर्पक— nyāma-wit_kha
९ ] अनुष्ठातारः— nyāma-wit_ka

२ *] अन्यां—अर्थभावनातो विलक्षणाम् । शब्दव्यापारत्वात् तस्या अभिधां इत्युक्तिः ॥ लिङश्रवणेन हि अयं मां प्रेरयति इति मन्यते पुरुषः ॥
१३ व्यापारो ] लिङादिपदज्ञानादिरूपः ।

एवं नियोज्यव्यापारो भाव्यः, विषयादिसमर्पकपदव्यापारः करणं, अर्थ-वादपदव्यापारः इतिकर्तव्यतेति सेयं त्र्यंशा शब्दभावना । सैव च विधिः ॥
§ 6173

## विधेः भावनायाश्च सम्बन्धवर्णनम्

न च विधेर्वाक्यार्थानन्वयलक्षणो दोष आशङ्कनीयः; एकप्रत्ययो पादान-लक्षणया प्रत्यासत्या तदन्वितत्वावगमात् । आहुश्च— श्लो-वा-वाक्य-७९
§ 6174

विधिभावनयोस्त्वेकप्रत्ययग्राह्यताकृतः ।
धात्वर्थात् प्रथमं तावत् संबन्धो व्यवसीयते इति
॥§ 6176

विधिर्भावनायां पुरुषं नियुङ्क्ते । यथाऽऽह— § 6177

स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यते तं-वा-२-२-९
इति ॥§ 6178

तयोः कथमन्वयः स्यात् ? § 6179

## विधेः प्रेरकत्वप्रकारः

ननु च त्वयैवोक्तं धात्वर्थात् पूर्वतरं तद्भावनाया विधेश्च संबधोऽव ग-म्यते । एकपदोपादानेऽपि धात्वर्थस्तावत् प्रकृत्यंशाभिधेयः । विधिभाव-
II.100/KSV ने तु द्वे अपि प्रत्ययांशेनाभिधीयेते इति । अतश्च स्वच्छैव भावना विधिना स्पृश्यते, न विषयाद्यनुरक्ता । स्वच्छा च न प्रयोगयोग्या भ-

१६ ] तदन्विता—
nyāma-wit__kha

५ च ] लिङबोध्यविधेः, आख्यातबोध्यभावनायाश्च विशकलिततयैवोपस्थितत्वेन, प्रकृतिप्रत्ययभावाद्यभावात् आकांक्षाविरहेण कथं तयोर्वाक्यार्थेऽन्वय इत्याक्षेपः ॥

७ ताकृतः ] एकेनैव प्रत्ययेन लिङत्वेन विधिः, आख्यातत्वेन भावना चाभिधीयते ॥
११ श्च ] स्वच्छा—केवला धात्वार्थाननुरक्ता ॥

वति । यथा च फलकरणेतिकर्तव्यतांशपरिपूर्तिप्रस्थिता प्रयोगयोग्या, न तां विधिः स्पृष्टवान् । अविधिस्पृष्टेषु च धात्वर्थकारकादिषु किमिति सचेताः पुरुषः प्रवर्तेतेति—उच्यते—यद्यपि विधिः अनधिगतधात्वर्थानुरागतया स्वच्छामेव भावनां एकाभिधानत्वात् प्रथममाक्रामति; तथापि तादृशि तस्यां सप्रत्ययप्रवर्तनात्मकनिजस्वरूपनिर्वहणमलभमानो न तावत्येव विरमति, किन्तु परिणीतबालकन्यको वर इव तावद्विलम्बमानः प्रसारितहस्त आस्ते—यावत् सर्वाङ्गसुन्दरी प्रयोगयोग्या भावना भवति । आह च—श्लो. वा. वाक्य-१७१ § 6180

*यद्यप्यंशैरसंस्पृष्टां विधिः स्पृशति भावनाम् ।
तथाप्यशक्तितो नासौ तन्मात्रे पर्यवस्यति ॥§ 6182

अनुष्ठेये हि विषये विधिः पुंसां प्रवर्तकः ।
अंशत्रयेण चापूर्णां नानुतिष्ठति भावनाम् ॥§ 6184

तस्मात् प्रक्रान्तरूपोऽपि विधिस्तावत् प्रतीक्षते ।
यावद्योग्यत्वमापन्ना भावनाऽन्यानपेक्षिणी ॥ इति§ 6186

## भावनायाः वाक्यार्थे अन्वयप्रकारः

सा हि वाक्यान्तरोपात्तमप्यपेक्षते, प्रकरणान्तराधीतमपि वांछति । प्रकृतिवद्भावलभ्यमपि याचते । *अर्थसामर्थ्यगम्यं प्रमाणमपि स्पृहयति—इत्येवंविध एष शब्दप्रमाणमहिमेति ॥ § 6187

II.101/KSV

स चायं व्युत्पादनक्रम ईदृशो व्याख्यातृभिरुपदिश्यते—इत्थमस्यान्वयः, इत्थमस्येति । वाक्यार्थः पुनर्भावनात्माऽवगम्यमानः एकयैव

६ ] प्रवेश— nyāma-wit__ka
७--८ ] स चेत्— nyāma-wit__kha
९ ] माक्षिपति तथाहि— nyāma-wit__kha
१० ] मानात्मक— nyāma-wit__kha
१ ] सर्वानु— nyāma-wit__ka; nyāma-wit__gha
३ ] गम्यमपि— nyāma-wit__kha
४ ] इत्येक— nyāma-wit__kha
५--६ ] इत्थमस्येति— nyāma-wit__kha

८ *] अंशैः—फलकरणेतिकर्तव्यताभिः ॥
१४ *] स्रुवेणावद्यति इत्यत्र अर्थसामर्थ्यात् पुरोडाशाद्यवदानाङ्गत्वं लभ्यते ॥ तथा च शब्दार्थानामाकाङ्क्षा बहुप्रकारेण शाम्यति ॥

बुद्ध्याऽनेकजातिगुणद्रव्यक्रियाद्यङ्गकलापकल्माषिततनुरवगम्यते तादृश्येकैवेयं वाक्याद्वाक्यार्थबुद्धिः । यथाह—श्लो-वा-वाक्य-३२७ § 6188

भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया ।
अनेकगुणजात्यादिकारकार्थानुरंजिता ॥§ 6190

एकयैव च बुद्ध्याऽसौ गृह्यते चित्ररूपया ।
पदार्थाहितसंस्कारचित्रपिण्डप्रस्तया इति ॥§ 6192

## भावनायाः पूर्णस्वरूपम्

एक एवायमतिदीर्धः क्रमविकस्वरः सकलाङ्गपरिपूरितभावनातत्त्व विषयः प्रतिभासः । यथा हि स्थाल्यधिश्रयणात् प्रभृति आनिराकाङ्क्षौदननिष्पत्तेरेकैवेयं पाकक्रिया—सलिलावसेकतण्डुलावपनदर्वीविघट्टनास्रावणाद्यनेकक्षणसमुदायस्वभावा, तथा प्रथमपदज्ञानात् प्रभृति आनिराकाङ्क्षवाक्यार्थपरिच्छेदादेकैवेयं शाब्दी प्रमितिः । आह च— § 6193

पदात् प्रभृति या चैषा प्रज्ञा ज्ञातुर्विजृम्भते ।
पुष्पिता सा पदार्थेषु वाक्यार्थेषु फलिष्यति§ 6195

इति कृतमतिविस्तरेण ॥ § 6196
सोऽयं वाक्यार्थः भावनानामधेय कर्तृव्यापारः स्वर्गयागादिरर्थः यस्तु व्यापारः प्रेषरूपो लिङादेर्वाच्यः कार्ये वा, तं विधिं सङ्गिरन्ते ॥ § 6197
II.102/KSV

## शब्दभावनायाः वाक्यार्थत्वविचारः

१३ ] निष्पत्तावे— nyāma-wit__ka

१ ] प्रतीतिः— nyāma-wit__ka

३ ] रुक्तः— nyāma-wit__ka
४ ] प्रेषण— nyāma-wit__kha

९ मितिः ] भावनाया

अखण्डत्वसंपादनायायं क्लेशः वर्णितः ॥

तदेतदननुमन्यमाना अन्ये प्रचक्षते—योऽसौ शब्दभावनाख्यः शब्दव्यापारः शब्दस्य कार्योऽभिधेयश्च, तमभिदधतः कुर्वतो वा शब्दस्य व्यापारान्तरमस्ति, न वा ? § 6198

यदि तावन्नास्ति, तदेष व्यापारान्तरनिरपेक्षस्वव्यापारमिवार्थमपि वदतु, विश्राम्यतु व्यापारकल्पना । अस्ति चेदस्य तदभिधाने व्यापारान्तरं, तदाऽनवस्थाप्रतीकारः कश्चिदन्वेषणीयः । न जासौ दूरादपि लभ्यते । भूतपरिस्पन्दव्यतिरिक्तव्यापारनिरासश्च प्रमाणसामान्यलक्षणे विस्तरेण कृतः इत्यसौ मार्गः इहाप्यनुसरणीयः ॥ § 6199

यश्चासौ व्यापारः क्रियते चाभिधीयते च, स किं पूर्वमभिधीयते, ततः क्रियते ? पूर्वं वा क्रियते, पश्चादभिधीयते ? युगपदेव वा करणाभिधाने इति ॥ § 6200

न तावत् पूर्वमभिधीयते ततः क्रियते—अनुत्पन्नस्याभिधानानुपपत्तेः । न ह्यजाते पुत्रे नामधेयकरणम् । अर्थासंस्पर्शी च तथा सति शब्दः स्यात् ॥ § 6201

अत एव न युगपदुभयम्, अनुत्पन्नत्वानपायात् प्रयत्नगौरवप्रसङ्गाच्च । नापि कृत्वाऽभिधानम्, विरम्यव्यापारासंवेदनात् ॥ § 6202

## लिङादिभिः शब्दभावनाप्रतीत्यसंभवः

अपि चायं तपस्वी लिङादिः प्रत्ययः सत्यपि गोबृन्दारकत्वे कथममुमतिबृहन्तं भारं वक्ष्यति ? कर्तारं च तत्संख्यां चाख्यास्यति ? भावनाम- II.103/KSV
भिधास्यते ? शब्दभावनां च करिष्यति ? तां च वदिष्यति ? इति दुर्वहोऽयं भारः ॥ § 6203

## शब्दभावनायाः वाक्यार्थे अन्वयासंभवः

कश्चायं शब्दभावनानामधेयस्य विधेर्वाक्यार्थे भावनायामन्वय इति वक्तव्यम् ॥ § 6204

ननु उक्त एव एकप्रत्ययाभिधेयत्वलक्षणः संबन्ध इति—न ब्रूम आभिधानिकः संबन्धो नोक्त इति । किन्तु पुरुषव्यापारात्मिकाया अर्थभावनायाः प्रधानत्वेन वाक्यार्थत्वात्, तदपेक्ष्यमाणफलकरणेतिकर्तव्यतांश पूरणेन स्वर्गकामादिपदान्तराभिधेयोऽर्थः समन्वेति, *गुणत्वेन । शब्दव्यापारस्तु तद-

१ ] चेद— nyāma-wit_kha
१६ ] धीयते— nyāma-wit_kha
१ ] प्रधानत्वात्— nyāma-wit_ka
१ ] परिपूरणेन— nyāma-wit_ka

५ तु ] व्यापारः—शब्दभावनाख्यः ॥
६ जासौ ] असौ—अनवस्थापरिहारः ॥
१७ पि ] गोबृन्दारकः—वृषभश्रेष्ठः ॥
२१ विधेर्वाक्यार्थे ] विधिवाच्यार्थभावनया साकं कथमन्वयः ?
२६ *] गुणत्वेन—तदङ्गत्वेन ॥

पेक्षितमन्यतममपि नांशं पूरयितुमलमिति तत्र न गुणतामवलम्बते । न च द्वयोः प्रधानयोः घटः पट इतिवद्वा, पचति पठतीतिवद्वा संबन्ध उपलभ्यते ॥ § 6205

## भावनयोः गुणप्रधानभावसंभवः

अथार्थभावना शब्दभावनाख्यविधेर्विषयसमर्पणेन गुणतामवलम्बते; विधिस्तर्हि वाक्यार्थः, न भावना, तस्या अप्राधान्यात् । अतो भावनाद्वयं प्रत्ययार्थ इति न हृदयंगममेतत् ॥ § 6206

एकाभिधानाभिधेयत्वं च न भावनयोरन्योन्यसमन्वये कारणम्; अक्षाः—पादाः—माषा इत्यादावदर्शनात् ॥ § 6207

II.104/KSV

## भावनाद्वयसद्भावे न प्रमाणमस्ति

किंच कस्यानुरोधेन द्वे भावने प्रत्ययवाच्ये इष्येते ?—उच्यते—लिङादिशब्दश्रवणे सति कार्ये च, प्रेरणायां च बुद्धिरुत्पद्यत इति ॥ § 6208

यद्येवं एक एव तादृशोऽसौ लिङर्थो भवतु । तदेकत्वाच्च न परस्परसमन्वयः चिन्तयिष्यते । न च प्रत्ययेऽप्यतिभार आरोपयिष्यते ॥ § 6209

## नियोगवाक्यार्थविचारः

ननु ! एकस्यापि लिङर्थस्य यदि शब्दः कार्यत्वं, प्रेरणां च ब्रवीति, ततस्तदवस्थ एवातिभारः । कश्चासावेकः कार्यात्मा, प्रेरणात्मा च तस्यार्थः ? उच्यते—यो लिङादिप्रत्ययादवगम्यते, यमभिवदतो न तस्यातिभारः, यत्र न तद्व्यतिरेकेण प्रमाणान्तरं क्रमते, स नियोगो नामावाक्यार्थः । तथा हि—वृद्धव्यवहारतः शब्दानामर्थे व्युत्पत्तिरित्यत्र तावदविवाद एव । व्यवहारे च वाक्यार्थे वाक्यस्य व्युत्पत्तिः, वाक्येन सर्वत्र व्यवहारात् । तत्र यजेत इत्यादितिङन्तपदयुक्तेषु पदान्तराणामर्थस्तावदास्ताम् । आख्यातार्थे ह्यवगते तदानुगुण्येनासौ स्थास्यति । आख्यातस्य च यजेत इत्येवमादेरर्थः परीक्ष्यमाणः प्रेरणात्मक एवावतिष्ठते; यतः पदान्तरसन्निधाने सत्यपि न प्रेरणाबुद्धिरुपजायते । आख्यातपदश्रवणे च सति सा जायते । तस्मात् तस्यैव प्रेरणात्मकोऽर्थः । तत्रापि तु जुहोत्यादिधात्वन्तरोपजननापायपर्यालोचनया धातोस्तत्प्रतीतौ व्यभिचारात्, प्रत्ययस्य चाव्यभिचारात् तस्यैव सोऽर्थ इति गम्यते ॥ § 6210

II.105/KSV

---

२० ] द्विरुत्पद्यते मतिः— nyāma-wit__kha
३ ] शिष्यते— nyāma-wit__kha
५ ] शब्द— nyāma-wit__kha

---

२ च ] द्वयोः—पुरुषव्यापारशब्दव्यापारयोः ॥
१६ स ] तथा च कार्यरूपत्वात् प्रेरणारूपत्वाच्च नियोगस्य न गौरवम् ॥

## विधिरूपनियोगस्य लिङर्थत्वम्

कः पुनरसावर्थः ? यस्मिन् सति नियुक्तोऽहमत्र इति प्रतिपद्यते पुरुषः, सोऽसावर्थः । स एव विधिरित्युच्यते । विधौ हि लिङादिप्रत्ययं स्मरति पाणिनिः, न धात्वर्थे यागादौ, न कर्तृव्यापारे भावनायाम् । विधिश्च नाम प्रेरणात्मक एव । अत एव वर्तमानापदेशिकाख्यातजनितप्रतीतिविलक्षणेयं प्रतीतिः यजेत इति । अत्र हि प्रैषप्रैष्ययोः संबन्धोऽवगम्यते । अन्य एवायं क्रियाकर्तृसंबन्धात् प्रैषप्रैष्यसंबन्धः ॥ § 6211

## अख्यातेन प्रेरणायाः प्राधान्येनोपस्थितिः

ननु यजेत इति क्रियाकर्तृसंबन्धोऽवगम्यते ?—न ब्रूमः नावगम्यत इति; किन्तु प्रैषप्रैष्यलक्षणोऽपि संबन्धः प्रथममवगम्यते । प्रेषितो हि क्रियां कर्तुमुद्यच्छतीति ॥ § 6212

ननु ! क्रियासंबन्धितयैवासौ प्रेष्यते यजतां भवान् इति—सत्यम् — क्रियासंबन्धितयैव प्रेष्यते । प्रेष्यते तु सः । प्रेष्यते चेदयमन्यं तर्हि संबन्धः । क्रियासंबन्धात्तु उभयसंबन्धितामस्य राजगवीक्षीरवत् अवगमिष्यामः । यथा गौः राज्ञा च संबध्यते, क्षीरेण च—या राजसंबन्धिनी, सा क्षीरसंबन्धिनी, या क्षीरसंबन्धिनी; सा राजसंबन्धिनीति । एवमिहापि पुरुषः प्रेषितेन च संभन्त्स्यते, क्रियया च । यः प्रेष्यते स करोति; अथ यः करोति, प्रेष्यते स इति ॥ § 6213

## प्रेरणाया अतिरिक्तत्वम्

ननु ! नेदमुभयं भवति—प्रैषोऽपि क्रियैव । प्रवर्तनं हि कुर्वन् प्रवर्तयति इत्युच्यते । सोऽयं क्रियासम्बन्ध एव भवति । न ततोऽन्यः प्रैषप्रैष्यसंब- II.106/KSV
न्ध इति—स्यादेतदेवम्, यदि वाय्वादिवत् प्रवर्तने कर्ता लिङादिः स्यात् । प्रेरितोऽहमत्रः इति तु ज्ञानजनकत्वं विधेः प्रवर्तकत्वम् । स एष प्रवर्तनं ज्ञापयति, *न करोतीति अन्य एवायं क्रियाकर्तृसंबन्धात् प्रैषप्रैष्यसंबन्धः ॥ § 6214

## ज्ञानस्य क्रियाविलक्षणत्वम्

---

१८--२० ] किमन्यश्चात्र क्रियाकर्तृसंबन्धो—

nyāma-wit__kha
७ ] प्रेषप्रेष्य— nyāma-wit__ka

---

६ न्धात्] प्रेर्यप्रेरकभावरूपः संबन्धः ॥
१४ पुरुषः] प्रेषितं—प्रेषणा ॥

२१ *] प्रवर्तनमित्यनुवर्तते ॥

ननु ! ज्ञानमपि क्रियैव । तत्करणे च पुनरपि स एवायं क्रियाकर्तृसंबन्धः—मैवम्—कारकज्ञापकयोर्भेदस्य सुप्रसिद्धत्वात् । इह च योऽयं यागपुरुषयोः क्रियाकर्तृसंबन्धः, ततोऽन्यं प्रैषप्रैष्यसंबन्धमुपदर्शयितुं प्रवृत्ताः स्मः । स ततो विलक्षणः प्रदर्शित एव । वैलक्षण्येऽपि तस्य यथाकथंचित् नाम क्रियमाणं न वारयामः ॥ § 6215

## प्रेरणायाः प्रथमं प्रतीतिः

भवत्वयमन्यः प्रैषप्रैष्यसंबन्धः । स तु प्रथममवगम्यत इत्येष कुतो निश्चयः ? उक्तमत्र—प्रेषितोऽहम् इति हि विदित्वा क्रियायां प्रवर्तते । आचार्यचोदितः करोमि इति हि दृश्यते । यजेत इति श्रुते नियुक्तोऽहम् इति प्रथममवगच्छति । ततो यजते । तेनायमाद्यः संबन्धः । पाश्चात्यस्तु क्रियाकर्तृसंबन्धः । तत् योऽयं लिङर्थः प्रथममवगम्यते, प्रैषो नाम, सा प्रेरणा, स नियोगः, स वाक्यार्थः ॥ § 6216

## विधिनिमन्त्रणादीनां वैलक्षण्यम्

ननु ! विधाविव निमन्त्रणादिषु लिङलोटावपि स्मर्येते एव—सत्यम्
II.107/KSV —ते तु प्रेरणाया एवौपाधिका अवान्तरभेदाः । सम-हीन-ज्यायोविषय एव प्रयोगोपाधिनिबन्धन एष प्रेषणा ध्येषणादिभेदव्यवहारः । प्रेषणा तु सर्वत्रानुस्यूताऽवगम्यते । तदुक्तम् प्रवर्तकत्वं तु शब्दार्थः, सर्वत्रापरित्यागात् इति । स चायं लिङादीनामर्थः प्रैषो णिजर्थविलक्षणः प्रतीयते ॥ § 6217

## णिजर्थवैलक्षण्यं लिङर्थस्य

ननु ! प्रयोजकव्यापारे णिच् विधीयते । प्रयोजकव्यापारश्च प्रैषः । प्रैषे च लोडादयो विधीयन्ते इति णिजर्थ एव लोडर्थः । तथा च कुरु, कुरु इति यो ब्रूते, स कारयतीत्युच्यते—न—प्रतीतिभेदात् । अन्या हि करोतु कुर्यात् इतिप्रतीतिः, अन्या च करोति कारयति इति प्रतीतिः । प्रयोजकव्यापारो हि णिजर्थः, ज्ञापकव्यापारस्तु लिङर्थः । प्रवृत्तक्रियाविषयश्च प्रयोजकव्यापारो णिजर्थः, इहतु तद्विपरीतः । तत्र हि कार्यं *पश्यतः

१६ ] तन्नाम— nyāma-wit_kha
३ ] प्रेरणा— nyāma-wit_kha
५ ] लिङर्थ— nyāma-wit_kha
९ ] कारयति— nyāma-wit_kha

१३ एवौपाधिका ] विधिनिमन्त्रणामन्त्रणाध्येषणानां प्रेरणारूपत्वेऽपि चतुर्णां पृथगुपादानं प्रपञ्चार्थमिति वैय्याकरणा अपि । तत्र विधिः हीने निमन्त्रणं ज्यायसा । आमन्त्रणं समे । अध्येषणं ज्यायसि यथासंभवं इत्युत्सर्गः ॥
२२ तु ] अप्रवृत्तप्रवर्तने हि विधिः ॥
२२ * ] न ह्यज्ञातकार्ये णिच्प्रयोगसंभवः ॥

प्रवर्तनम्, इह तु प्रवतितस्य कार्यदर्शनं इति महान् भेदः ॥ § 6218

तत्र यथा कुर्वन्तं कारयति, तथैवेहापि प्रैषः प्रवर्तमानं प्रेरयति, नाप्रवर्तमानं स्थावरमिति । न हि वनस्पतिरुच्यते यजस्व इति—न—स्थावरादेरयोग्यत्वात् । ब्राह्मणादिस्तु यः प्रेर्यते, असा, वप्रवृत्तक्रिय एव । न हि यजमान एव यजेत इति चोद्यते, किन्तु अप्रवृत्तक्रिय एवेति सर्वथा णिजर्थाद्विलक्षणो लिङर्थः ॥ § 6219

II.108/KSV

## नियोगे व्युत्पत्तिप्रदर्शनम्

आह—भवत्वयं विलक्षणोऽर्थः । स तु प्रमाणान्तरावगम्यश्चेत्, तदुपदर्श्यताम् अयमसावेवंरूप इति । प्रमाणान्तरानवगम्यश्चेत्, कथं शब्दैकगोचरे तत्र संबन्धव्युत्पत्तिः—उच्यते—शब्दैकगोचरस्तु नियोगः, व्युत्पत्तिश्च तत्र सूपपादैव । यो हि यजेत दद्यात् जुहुयात् इति लिङादिभ्यो विधिः प्रतीयते, कथमसौ लिङादीनामगम्य इष्येत ? व्युत्पत्तिश्चास्य व्यवहरादवकल्पते । गच्छ अधीष्व इति शृण्वन् वृद्धः चेष्टमानो दृश्यते । चेष्टा च स्वात्मनि प्रवर्तिकाऽवगमपूर्विका दृष्टा । प्रत्यक्षदृष्टे चाम्रादौ सुखसाधनतयाऽन्वयव्यतिरेकाभ्यामवगते, तदनुस्मरणात् प्रवर्तमानः कस्मिंश्चिदात्माकूते समुपजाते सति भौतिकं व्यापार मारभते । स चात्मधर्मः आत्मेव स्वसंवेद्यः ॥ § 6220

## आत्मनः स्वप्रकाशत्वम्

अहंप्रत्यगम्यो ह्यात्मा; नासौ परस्मै दर्शयितुं शक्यते । न च न चर्चयितुं शक्यते । एतावता नानुभूयत इति न शक्यते वक्तुम् । परोऽपि ह्येनमहंप्रत्ययेनानुभवत्येव । तथाऽयमपि भौतिकव्यापारहेतुरात्माकूतविशेषो न प्रमाणान्तरवेद्यो भवति । न च न वेद्यते, तत्संवेदने सति चेष्टाया दृष्टत्वात् । तस्मात्परमपि गच्छ अधीष्व इति शब्दश्रवणे सति चेष्टापन्नं दृष्ट्वा तस्यापि तादृक्प्रेरणावगमोऽनुमीयते । स च शब्दान्तरश्रवणे सत्यप्यदृश्यमानः, लिङादिश्रवणे च सति दृश्य मानः तदर्थ एवेत्यन्वयव्यतिरेकाभ्यामवगम्यते इतीयतीयं व्युत्पत्तिः ॥ § 6221

---

१८--१९ ] स तु— nyāma-wit__kha
१ ] नपास्य दर्श्यते— nyāma-wit__gha
७ ] दर्शयितु— nyāma-wit__ga
७ ] शक्यते— nyāma-wit__kha
९--१० ] चेष्टा यद्वन्तं— nyāma-wit__kha
११ ] सत्यपि— nyāma-wit__kha

---

५ हि ] यागे प्रवृत्तः यजमानः, पूर्वं तु न यजमानः ॥
१४ णात् ] प्रवर्तमानः—इत्येतदनन्तरं प्रथमं इति पूरणीयम् ॥ अकूतं—अभिप्राय विशेषः ॥

II.109/KSV

तदेतदात्मप्रत्यक्षम् । लिङादिश्रवणे सति प्रेरणावगतिः भवति, प्रथमश्रुताच्च लिङादेरसौ न भवति । न च प्रमाणान्तरेण सोऽर्थो दर्शयितुं शक्यते, कुर्यात् इत्यस्यार्थः कुर्यादित्यनेनैव प्रतिपाद्यते, न प्रकारान्तरेणेत्येवं व्युत्पत्तौ संभवन्त्यामपि येरगृहीतसम्बन्ध एव लिङादिः स्वरूपसामर्थ्येनैव प्रेरक इष्यते, तेऽत्यन्तभीरव इत्युपेक्षणीयाः ॥ § 6222

## लिङादिनैव नियोगप्रतीतिः

ननु ! यदि लिङादिव्यतिरेकेण नान्यतो नियोगोऽवगम्यते, कथमसौ *नियोगशब्दात् प्रतीयते ? कथं वा नियोशब्दस्य नाम्नोऽप्यर्थः प्रमाणान्तरगोचरः स्यात् ? § 6223

अयि साधो ! न नियोगः निपूर्वेण युजिना घञतेन बोधयितुं शक्यते । व्यवहारमात्रमेतत्स्वरूपमाख्यातुमाश्रीयते; यथा तु यजेत इत्येवमादिभ्यः शब्देभ्यः सोऽवगम्यते, तथा नान्यत इत्यत एव न प्रमाणान्तर गोचरो धर्म इत्याहुः ॥ § 6224

लिङर्थो हि नियोगो वाक्यार्थः । स एव धर्मः । स च न प्रमाणान्तरगम्य इति ॥ § 6225

## नियोगस्यैव प्रेरकत्वं, कार्यत्वं च

ननु ! लिङर्थः प्रेरणात्मकोऽयं व्याख्यातः कार्यात्मा चायमनुष्ठेयो धर्मः

II.110/KSV । स एव च वाक्यार्थो युक्तः । कार्येऽर्थे वेदस्य प्रामाण्य मिति हि मीमांसकाः । तस्मात् पुनरपि भाट्टपक्षवत् द्वयमापतति— प्रेरकश्च विधिः, कार्यरूपश्चानुष्ठेयोऽर्थ इति—*सुखैधितो निरनुसन्धान इवायुष्मानेवं व्यवहरति । न ह्यन्यः प्रेरकः, अन्यश्चानुष्ठेय इत्युक्तम् । नियोग एव प्रेरकः, नियोग एव चानुष्ठेयः ॥ § 6226

## प्रेरकत्वकार्यत्वयोरविरोधः

१६ ] प्रमाणा— nyāma-wit__kha
२१ ] स— nyāma-wit__kha
३ ] लिङधर्मो हि— nyāma-wit__kha
५ ] न च— nyāma-wit__kha
५ ] व्यापारः कार्यमाचष्टे यो— nyāma-wit__kha
८ ] सुखशायितो— nyāma-wit__kha

७ *] नियोगः इति नामपदात् ॥
११ त] अन्यतः—यागः इत्यादिपदेन ॥
१८ *] अशिक्षितः अलस इति नर्मोक्तिः ॥

कथं द्वैरूप्यमस्य शब्दो वदतीति चेत्—मैवम्—प्रेरकत्वमेवशब्दार्थः; आर्थं तु कार्यत्वम् । यतो विधिरेवानुष्ठेयतयाऽवगम्यते आचार्याज्ञां करोमि राजाज्ञां करोमि इति ॥ § 6227

किमर्थं तर्हि विषयानुष्ठानमिति चेत्—न ह्याज्ञा घटादिवत् स्वरूपेण कर्तुं शक्या, अपि तु विषयद्वारकं तत्संपादनम् । कमण्डलुं बिभृहि इत्याचार्येणाज्ञप्तः कमण्डलुं भृत्वाऽऽचार्याज्ञां कृतां मन्यते । कटकं गच्छ इति राज्ञाऽऽप्तः कटकं गत्वा राजाज्ञां कृतां मन्यते । सोऽयं नियोग एवानुष्ठेयः ॥ § 6228

ननु ! राजाज्ञया करोमि इत्यपि व्यपदेशो दृश्यते । स चाननुष्ठेयामेवाज्ञां दर्शयति—मैवम्—तत्राप्याज्ञैवानुष्ठेया । प्रेषाणाभिप्रायेण तृतीयानिर्देश इत्येवं केचित् ॥ § 6229

## नियोगस्यैव शाब्दत्वम्

अन्ये तु शाब्दं कार्यत्वं नियोगस्य, प्रेरकत्वं त्वर्थादित्याचक्षते ॥ § 6230

अनुष्ठेयता हि तस्य निजं रूपम् । स्वसिद्धये स तु नियोज्यं नियुंजानः प्रेरक इत्युच्यते । तदिदं कार्यत्वं अपरित्यक्तप्रेरकभावमस्याव गम्यते । प्रेरकत्वं चापरित्यक्तकार्यभावमित्यन्यतरदत्र शाब्दं रूपं, अन्यतरच्चार्थं रूपमिति न भाट्टैरिवास्माभिः प्रत्यये गुरुर्भार आरोपितः ॥ § 6231 II.111/KSV

## नियोगस्य विषयाधिकारादिकथनम्

स चायं नियोगः प्रतीयमानः यजेत स्वर्गकामः इत्यनुबन्धद्वयावच्छिन्नः प्रतीयते । *यज्यादिनास्य विषयानुबन्धो धातुनोच्यते । स्वर्गकामः इत्यधिकारानुबन्धः पदान्तरेणार्प्यते । तत्र च स्वर्गकामस्यैवाधिकारो निर्वहति । यदि भावार्थस्य स्वर्गं प्रति साधनत्वमवगम्यते; एवं तर्हि स्वर्गकामेनैवासौ कृतो भवतीति स्वर्गकामपदान्वये प्राक्तन एव मार्गोऽनुमन्तव्यः, न पुनः स्वर्गादिफलप्रदर्शनपूर्वकं विधेः प्रवर्तकत्वम्, *अस्वातन्त्र्यप्रसङ्गात् । न हीदृशं शास्त्रस्य दैन्यम्—यत् फलं विना पुंसः प्रवर्तयितुं न शक्नोतीति । अन्यथा यावज्जीवं यजेत इत्यादावप्रवर्तकं शास्त्रं स्यात् ॥ § 6232

## नियोगस्य फलशेषत्वाभावः

११ ] कथमस्य द्वैरूप्यमन्ये वदन्तीति— nyāma-wit_kha
१९--२० ] चानुष्ठेया— nyāma-wit_kha
४--५ ] रूप— nyāma-wit_kha

९ स] अननुष्ठेयां—अनुष्ठेयभिन्नाम् ॥
१८ *] यज्यादिना धातुना—इत्यन्वयः ॥
२२ *] अस्वातन्त्र्यं—विधेः फलशेषत्वम् ॥

किं यावज्जीवं इत्यादिचोदनाः फलशून्या एव ? ओमित्युच्यते । न हि विधिः फलमाकाङ्क्षति, अपि तु नियोज्यं, विषयं च—कस्य नियोगः ? कुत्र नियोगः ? इति । ते एते उभे अप्याकाङ्क्षे परिपूर्णे । तत्र—जीवतो नियोगः, यागे च नियोग इति । अतः परं फलकल्पनं पुरुषबुद्धिप्रभवं भवति, न शास्त्रीयम् । कामाधिकारे तु नियोज्यतैव अन्यथा स्वर्गकामस्य नोपपद्यत II.112/KSV इति स्वर्गस्य साध्यत्वमभ्युपगतम्, न पुनर्विधेः फलार्थत्वात् । अत एव न तत्र वैधी प्रवृत्तिः, लिप्सयैव प्रवृत्तत्वात् । आह च तस्य लिप्साऽर्थलक्षणा जै. सू. ४-१-२ इति । साध्यसाधनभावप्रतिपादनपर्यवसितो हि तत्र विधिव्यापारः, न प्रयोगपर्यवसित इति ॥ § 6233

## श्येनादेरधर्मत्वे कारणम्

अत एव श्येनादेरधर्मत्वम् । तत्र हि अभिचरन् इति शत्रा शत्रुं वैदिकेनोपायेन जिघांसुरधिकारी दर्शितः तस्य । न तत्र शास्त्रं प्रवर्तकम् । जानात्येवासौ मयैतत् कर्तव्यम्, उपायं तु न वेद इत्येवम् । उपायमात्रमस्योपदिश्यते श्येनः । श्यनं कुरु इति तु न विधिः प्रभवति, जिघांसाया एव तत्र प्रवर्तकत्वात् । *अतः श्येनादेरधर्मत्वात् तद्व्युदासार्थपदोपादानं चोदनालक्षणोऽर्थो धर्मः जै-सू-१-१-२ इति ॥ § 6234

कामाधिकारेषु हीतिकर्तव्यतांशे शास्त्रीया प्रवृत्तिः । यथोक्तं— *क्रत्वर्थो हि शास्त्रादवगम्यते शा-भा-४-१-२ इति । भावार्थमात्रस्य हि करणत्वमवगतम् । इतिकर्तव्यतांशस्तु न करणत्वावगतिबेलायामुपनिपतित इति तत्र लिप्साया अभावात् शास्त्रमेव प्रवर्तकम् ॥ § 6235
II.113/KSV

## अग्नीषोमीयादिर्हिंसाया अधर्मत्वाभावः

अत एव अग्नीषोमीयहिंसाया नाधर्मत्वम् । न हिंस्यात् सर्वा भूतानि इति निषेधः सामान्यशास्त्रम् । सामान्यशास्त्रं च विशेषशास्त्रक्रोडीकृतविषयपरिहारेण प्रवर्तत इति अग्नीषोमीयहिंसायाः शास्त्रीयत्वात् न निषेधविधिः

१७ ] परं— nyāma-wit_ka
२० ] लिप्सा— nyāma-wit_kha
२ ] शास्त्रं— nyāma-wit_ka
४ ] दिश्यते— nyāma-wit_kha
५ ] प्रवृत्तत्वात्— nyāma-wit_kha
९ ] कारण— nyāma-wit_kha

७ च ] तस्य—स्वर्गादेः लिप्सा अर्थलक्षणा—वस्तुस्वभावनिबन्धना । तस्य किमर्थं विधिरित्यत्राह—साध्येत्यादि । प्रयोगः—प्रवर्तनम् ॥
१० इति ] शत्रा—शतृप्रत्ययेन ॥
१४ *] अतः—कामनाया अप्रवर्तकत्वात् । न हि श्येनः काम्यकर्म ॥
१६ *] क्रतूपकारकः अर्थः, इतिकर्तव्यता ॥

अनर्थतां बोधयेदिति ॥ § 6236

ननु ! श्येनेऽपि शास्त्रीया प्रवृत्तिः । प्रवर्तकत्वं हि विधेः स्वरूपं प्रमाणान्तरविलक्षणम् । नान्वयव्यतिरेकवत्साध्यसाधनप्रतीतिमात्रपर्यन्तो हि विधिव्यापारो भवितुमर्हतीति सर्वत्र विधेः प्रयोक्तृत्वानपायात् । एव मेवचेयं प्रवृत्तिः श्येनेन यजेतेति ॥ § 6237

उच्यते—प्रवर्तितोऽहं इति ज्ञानजननं विधेः प्रेरकत्वम् । तत सत्यं सर्वत्र तुल्यं करणे च श्येने, इतिकर्तव्यतायां अग्नीषोमीये । बाह्ये तु प्रवृत्तिलक्षणे भौतिके व्यापारे यत्र लिप्सादि प्रकारान्तरमस्ति, तत्र भवन्त्यपि विधेः प्रयोक्तृशक्तिरुदास्ते, पशुपुरोडाशप्रयाजवत् । तत्रोदासीने विधौ निषेधशास्त्रमवतरति न हिंस्यात् इति ॥ § 6238

## श्येनज्योतिष्टोमादेर्वैलक्षण्यम्

यदि तु सर्वत्रैव प्रयोक्तृशक्तिरुदासीना भवेत्, तदा ज्योतिष्टोमान्न विशिष्येत श्येनः ; शास्त्रीयायां प्रवृत्तौ अग्नीषोमीय इव निषेधशास्त्रस्यानवकाशात् ॥ § 6239

II.114/KSV

ज्योतिष्टोमेऽनुल्लंघितनिषेधोऽधिकारी, स्वर्गस्यानिषिद्धत्वात् । श्येने तु हिंसायाः प्रतिषिद्धत्वात् उत्क्रान्तनिषेधोऽधिकारीति चेत्— मैवम्— अधिकारिदशायामपि भवन्मते विधेः प्रयोक्तृत्वानपायात् न निषेधशास्त्रमवकाशं लभत इति श्येनेऽपि नावधीरितनिषेधोऽधिकारी स्यात् ॥ § 6240

ननु ! न विधिः फले प्रयोज्यं प्रेरयति फलं कुरु इति । कर्मणि त्वेनं प्रवर्तयति यजस्व इति । तेनाधिकारिदशायामप्रतिहतो निषेधशास्त्रावकाशः—आयुष्मन् ! अस्मत्पक्षमेवाश्रितोऽसि । फले चेन्न प्रवर्तयति विधिः पुरुषं, फलार्थित्वादेवैनमुपाये प्रवर्तमानं तत्रापि न प्रेरयेत् । उपायानभिज्ञस्य तु उपायमेव दर्शयेत् । यावदप्राप्तं हि विधेर्विषयः । तदुक्तं—जानात्येवासौ मयैतत् कर्तव्यं, उपायं तु न वेद इति । प्रतीतिरपीयमीदृशी अभिचरन् यजेत् इति । यदि त्वं शास्त्रीयेनोपायेन वैरिणं हन्तुमुद्यतः, श्येनेन जहि, श्येनस्तवोपायः इत्यर्थः । तदलमतिप्रसङ्गेन ॥ § 6241

कामाधिकारेषु तावत् न फलाकाङ्क्षी विधिः । फलं त्वधिकारे हेतुरिति स्थितम् ॥ § 6242

---

१८ ] प्रतीतिः— nyāma-wit_ka; nyāma-wit_gha
२३ ] मुदाहरति— nyāma-wit_ka

२ ] निषेधवत्— nyāma-wit_ka

१० ] स्थितोऽसि— nyāma-wit_kha
१४ ] त्वशास्त्रीयोपायो न वैरिणं हन्तुमुपायः— nyāma-wit_kha

---

७ तुल्यं ] तथा च फलभूता हिंसा श्येनादौ । अग्नीषोमीयादौ तु इतिकर्तव्यतायाम् । इतिकर्तव्यताविषयकप्रवृत्तिस्तु शास्त्रादेवेत्युभयोर्वैलक्षण्यम् ॥

## निषेधस्थले विध्यर्थः

*प्रतिषेधाधिकारेऽपि प्रत्यवायो न कल्पते ।
निषेध्याद्विषयादेव लब्धत्वादधिकारिणः ॥§ 6244

II.115/KSV

तत्रासौ कल्प्यमानोऽपि नरकादिफलोदयः ।
अवैधत्वं प्रपद्येत न ह्याकाङ्क्षेदृशी विधेः ॥§ 6246

विधेरपेक्षे द्वे एव नियोज्यविषयौ प्रति ।
तत्पूरणेन तृप्तस्तु न वांछति ततोऽधिकम् ॥§ 6248

नियोज्यस्तावदेतावान् क्रुद्धोऽरिहननोद्यतः ।
विषयस्तन्निवृत्तिश्च नियोगो यत्र गम्यते ॥§ 6250

## निषेधस्थले निर्वाहक्रमः

ननु ! एतावन्न विबुध्यामहे निषेधविधेः को विषय इति । भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेत जै-सू-२-१-१ इति स्थिते नञर्थस्तावत् *पूर्वापरीभूतत्वाभावात् न विधेर्विषयः, *अनन्विताभिधानाच्च । न हि नञोऽनन्तरं लिङविभक्तिः श्रूयते, अपि तु हन्तेः । हननमपि न विधेर्विषयः, तस्य धर्मत्वप्रसङ्गात्, नञ्प्रयोगस्य वैयर्थ्यप्रसक्तेः । हनने च पुरुषस्य स्वतः प्रवृत्तेश्च । नञ्विशिष्टोऽपि न हन्त्यर्थोऽस्य विषयः, तयोर्विशेषणविशेष्यभावाभावात् ॥ § 6251

युक्तं दध्ना जुहोतीति होमे दध्यनुरक्तता ।
*हन्तेः स्वरूपनाशात्तु न नञर्थानुरक्तता ॥§ 6253

पुरुषप्रयत्नोऽपि न केवलो विधेर्विषयः, स्वतास्सिद्धत्वात् । नापि नञर्थानुरक्तः, कुत्रापि नञर्थस्य विशेषणत्वानुपपत्तेः ॥ § 6254

II.116/KSV

११ ] निषेध्यविष— nyāma-wit__kha
१ ] विषयं— nyāma-wit__ka
३ ] देवान्यः— nyāma-wit__ka
१५ ] तत्रापि— nyāma-wit__kha

१ *] श्येनविधिः न प्रत्यवायं बोधयति, न हिंस्यात् इति निषेध एव श्येनस्यं प्रत्यवायरूपत्वं वदति ॥
६ म्] अधिकं—प्रत्यवायहेतुत्वम् ॥
११ *] यागादिवत् क्रियाप्रतीतेस्तत्राभावात् किं विषयकस्तत्र विधिः ?
११ *] धातुविधिप्रत्ययार्थयोर्मध्ये कथं नञर्थस्य निवेशसंभवः ?
१७ *] हननस्य ध्वंसरूपस्य नञर्थे एवान्वये वस्तुन उन्मज्जनमेव प्राप्नोति ॥

## न हिंस्यादित्यस्य पर्युदासत्वासंभवः

अथायमब्राह्मणादिन्यायेन हन्तौ पर्युदस्ते भावार्थान्तरे नियोगः कल्प्यते—न हन्यात् इति कोऽर्थः ? अन्यत् किमपि कुर्यादिति; तर्हि किं तद्भावान्तरमिति न विचारयितुं शक्यम् । यत्किंचिदिति चेत्— न—तस्य स्वतस्सिद्धत्वेन विध्यनर्हत्वात् । अवश्यं जीवन् पुमान् किंचित् करोति, पठति, गच्छति, भङ्क्ते च ॥ § 6255

अथ विषयांशं परिहृत्य प्रमाणांशे नञ् निविशते, सा हि प्रवर्तमान पुमांसं रुणद्धि, यद्धन्यात् तन्नेति—तदप्यनुपपन्नम्—*अन्विताभिधानेन विधिविभक्तेर्हन्तिनाऽवरुद्धत्वात् । प्रेरणशक्तिस्वभावो विधिः स्थितः । यस्तु निषेधात्मा नञ् पार्श्वे स्थितः, तत्र न विधिः संक्रामति । संक्रान्तावपि नञश्च संबन्धे सति विधेः स्वरूपनाशोऽवगम्यते । स्वभानो ह्येष नञः, यदयं येन येन संबध्यते तस्य तस्याभावं बोधयतीति । अतो विधिसंबन्धे नञ इष्यमाणे एतावान् वाक्यार्थोऽवतिष्ठते हननविधिर्नास्तीति । ततश्च हननस्य विधित्वं च स्यात् ॥ § 6256

## निषेधवाक्यार्थसिद्धान्तः

अत्रोच्यते—दध्ना जुहोति इति होमस्य वचनान्तरचोदितत्वात् विधिविभक्तिशक्तिरुपपदं संकामतीति यथा वर्णितं, एवमिहापि हनने स्वतः प्रवृत्तत्वेन विधिवैफल्यात् नञश्च श्रूयमाणस्यानर्थक्यप्रसङ्गात् विधायिका शक्तिः नञर्थमेव स्पृशतीति किं नेष्यते ? § 6257

१ II.117/KSV

ननु ! उक्तमत्र भावार्थाः कर्मशब्दाः इति । तत्र दध्यनुरक्तो होम एव विधीयत इति फलतो दधि विहितं भवति, न प्रमाणतः । इह तु नञस्तदुपमर्दस्वभावत्वात् संसर्गो दध्यादेरिव कल्पते ॥ § 6258

मैवम्—निवृत्तिमेव कुर्वन् विशेषणीभवति । सेयं नञुपहिते हन्तौ श्रुते हनननिवृत्तिर्गम्यते । यथा सिद्धरूपदध्यनुप्रवेशेऽपि न होमस्य साध्यमानाऽवस्था निवर्तते, तथा नञनुविद्धहन्त्यर्थावगतो न पूर्वापरीभावबुद्धिर्निव-

१. हननस्य साक्षाद्विधिनैवान्वयात् ॥

११ ] विध्यानर्थक्यात्— nyāma-wit__kha
२ ] तेनेति— nyāma-wit__ka; nyāma-wit__gha
४ ] त्मनः— nyāma-wit__ka; nyāma-wit__gha
८ ] निषिद्धत्वं— nyāma-wit__ga
९--१० ] विधि— nyāma-wit__kha
१७ ] तयानु— nyāma-wit__ka

७ *] प्रत्ययानां प्रकृत्या साकमन्वयस्य प्रथममेव प्रतीतेः ॥

र्तते । न ह्यब्राह्मणवत् न हन्यात् इति सिद्धरूपबुद्धिः । सोऽयं हनननिवृत्तिरूपः पूर्वापरीभूतोऽर्थो विधिविषयो भवति ॥ § 6259

## प्रकारान्तरेण निषेधवाक्यार्थः

अथवा विभक्त्यर्थेन नञ्, संभन्त्स्यति । शुद्धस्य लिङादेरर्थः प्रवर्तकः, नञुपहितस्य तस्यार्थो निवर्तक इति शब्दशक्तिरेवैषा वाऽपर्यनुयोज्येति ॥ § 6260

यत्तु साक्षात् नञोऽनन्तरं विधिविभक्तिर्नोत्पद्यते, तत् तस्याधातुत्वात् धातोः परे तिङादयः प्रत्यया भवन्ति, नान्यस्मादिति । योग्यतया तु नञर्थेन तस्य संबन्धः । *न च तत्रायमर्थोऽवतिष्ठते हननविधिर्नास्तीति । किन्तु नञुपहितो विधिरौदासीन्ये पुरुषं नियुङ्क्ते । *तदवच्छेदकश्च हन्तिः, अन्यथा सर्वक्रियौदासीन्यं प्रतीयेतेत्यलमतिविमर्देन । निषेधविधेरपि सिद्धोऽनुबन्धद्वययोगः ॥ § 6261

II.118/KSV

## निषेधस्थले फलविमर्शः

एवं नियोगव्यापारे समाप्ते फलकल्पना ।
नृबुद्धिप्रभवैव स्यात् अतः सापेक्षता भवेत् ॥§ 6263

कथं नरो निवर्तेत प्रत्यवायभयाद्विना ।
मा निवर्तिष्ट विधिना तावदुक्तं निवर्तनम् ॥§ 6265

प्रवृद्धतररागान्धः प्रत्यवायेऽपि कल्पिते ।
न निवर्तेत इत्येवं किं विधेरप्रमाणता ॥§ 6267

फलं भवतु मा वा भूत् पुरुषोऽपि प्रवर्तताम् ।
मा प्रवर्तिष्ट वा स्वे तु नास्त्यर्थे खण्डना विधेः ॥§ 6269

---

१ ] संपत्स्यति— nyāma-wit_kha nyāma-wit_ka

१२ ] प्रत्ययापायतो विना—

---

१ ते] प्रवृत्तिवत् निवृत्तेरपि क्रियारूपत्वात् ॥

१ बुद्धिः] तत्र पर्युदासानाश्रयणादिति हेतुः ॥

८ *] हननस्य विधित्वप्रसक्तिं पूर्वोक्तां वारयति—न चेत्यादिना ॥

९ *] अवच्छेदकः—अवधिः, औदासीन्यप्रतियोगी ॥

११ योगः] विषयानुबन्धः, अधिकारानुबन्धश्च द्वयम् ॥

१९ तु] विधेः स्वे अर्थे खण्डना तु नास्ति ॥

प्रवर्तनावगामजनने हि विधिव्यापार इत्यसकृदुक्तम् । तत्र चास्य न किंचिद्वैकल्यम् ॥ § 6270

## फलाभावेऽपि विधिसंभवः

ननु ! विधेः फलापेक्षा नास्ति चेत्, किं तर्हि अश्रूयमाणफलेषु विश्वजिदादिषु स्वर्गादिफलं कल्प्यते ? अनभिज्ञो देवानांप्रियः—न तत्र विधेः फलापेक्षा । न च फलं तत्र कल्प्यते । किन्तु अश्रूयमाणत्वा दधिकारानुबन्धस्य, निरधिकारस्य च विधेर्विधित्वानिर्वाहात् अधिकारानुबन्धः कल्प्यते । तत्र सर्वान् प्रत्यविशिष्टत्वात् स्वर्गकामः चोदनाशेषभावेन नियोज्यः कल्प्यते । न चेयं पौरुषी कल्पना, श्रुत्येकदेशः स इति हि तद्विदः । तदियमधिकारानुबन्धकल्पना, न फलकल्पना इति सोऽयमनुबन्धद्वयावच्छिन्नो नियोगो वाक्यार्थः ॥ § 6271

II.119/KSV

## नियोगस्यैव प्राधान्यम्

वाक्यार्थत्वं चास्य प्रधानत्वात् । अन्यो हि यज्यादिरर्थोऽवगम्यमानः तदनुप्रवेशेन प्रतीयत इति गुणो भवति । नियोगस्तु स्वमहिमाक्षिप्तदृष्टोपकारानेकक्रियाकारककलापोपबृंहितस्वरूपः प्रतीयत इति प्राधान्यमबलम्बते । कार्यं चेत् प्रधानमुच्यते नियोग एव कार्यम् । फलं चेत् प्रधानमुयते, तदपि न सिद्धम्, अपि तु साध्यम् । साध्यत्वं चास्य नियोगाधीनमिति नियोग एव प्रधानम् । पुरुषस्तु नियोज्यमानत्वादप्रधानमिति ॥ § 6272

## नियोगस्य चतुर्विधत्वम्

एवं नियोग एव प्रधानत्वात् वाक्यार्थः । स च प्रतीतिभेदपर्यालोचनया चतुरवस्थ उच्यते । उत्पत्तिविधिः, विनियोगविधिः, प्रयोग विधिः, अधिकारिविधिरिति ॥ § 6273

उत्पत्तिविधिः अग्निहोत्रं जुहोति इति; अग्निहोत्राख्यकर्मस्वरूपोत्पादव्यतिरेकेणार्थान्तरानवगमात् ॥ § 6274

विनियोगविधिः दध्ना जुहोति इति, उत्पत्तिविधितः प्रतिपन्ने भावार्थे तत्र दध्यादिगुणविनियोगावगमात् ॥ § 6275

---

१९ ] द्वैक्लव्यम्— nyāma-wit__ka
२--३ ] किंच— nyāma-wit__kha
१६--१८ ] उत्पत्तिविधिः— nyāma-wit__kha
२० ] भावेऽर्थे— nyāma-wit__kha

---

१४ एव ] वस्तुतस्तु नियोग एवमुख्यं कार्यम् । फलमपि तत्रैवान्तर्भूतम् । लोकव्यवहारसिद्धं तु कार्यं गौणम् ॥
१५ चास्य ] अस्य—फलस्य ॥

अधिकारिविधिः अग्निहोत्रं जुहुयात् स्वर्गकामः इति; निर्ज्ञाते कर्मणि तत्राधिकृतस्य पुंसस्ततोऽवगमात् ॥ § 6276

II.120/KSV

प्रयोगविधिस्तु यः क्रमपर्यन्तं प्रयोगे पदार्थानवगमयति । अयं चाधिकारविधेरेव व्यापारविशेष इति तदेवास्योदाहरणम् अग्निहोत्रं जुहुयात् स्वर्गकामः इति ॥ § 6277

क्वचिदेकस्मिन्नेव वाक्ये रूपचतुष्टयं विधेरवगम्यते, न तत्र पृथगुदाहरणमपेक्ष्यते । यथा एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोम साम कृत्वा पशुकामो ह्येतेन यजेत इति ॥ § 6278

## नियोगस्य रूपान्तराणि

अन्यान्यपि नियोगस्य रूपाणि व्यापारभेदादवगम्यन्ते । स हि भावार्थसिध्यर्थं तत्समर्थमर्थमाक्षिपतीति तत्प्रयोजक उच्यते । यथा माणवकस्थस्याध्ययनस्याचार्यकरणविधिः ॥ § 6279

क्वचिदन्याक्षिप्ते वस्तुनि लब्धे सति तत्राप्रयोजको विधिर्भवति— यथा क्रयनियुक्तैकहायिन्या लाभे सति, न पादपांसुग्रहणार्थं अन्यामेकहायनीमाक्षिपति विधिरिति । प्रकरणपठितपदार्थपटलपरिग्रहाच्च ग्राहक इति विधिरुच्यते ॥ § 6280

*क्वचित् प्रकरणपठितस्यापि तेनागृहीतस्य द्वादशोपसदादेः प्रकरणादुत्कर्षदर्शनात् अत एव नियोगगर्भो विनियोग इत्याचक्षते ॥ § 6281

II.121/KSV

क्वचिद्विनियोजकश्रुत्यादिप्रमाणविरहेऽपि पश्चेकत्वाद्युपादानं शेषीकुर्वन्नुपादायक इत्युच्यते । पशुना यजेत इति विभक्त्या हि प्रातिपदिकार्थो विनियुक्तः । तत्स्थं त्वेकत्वं उक्तमेव, न विनियुक्तं, एकेन इत्यश्रवणात् पशुरुपादीयमानो न संख्यारहित उपादातुं शक्यते । श्रुतसंख्यापरित्यागकारणाभावाच्च एकत्वविशिष्टः पशुरुपादीयत इत्युपादानतशेषीकृतमेकत्वम् ॥ § 6282

## नियोगवादोपसंहारः

१ ] नामवगम इति— nyāma-wit__kha

१२ ] गहश्च— nyāma-wit__kha

११ विधिः ] संमाननोत्सर्जनाचार्यकरण इत्यादिना आत्मनेपदप्राप्त्या अष्टवर्षं बाह्मणमुपनयीत, तमध्यापयीत इति आचार्यकरणं विहितम् । तच्चमाणवकस्याध्ययन मन्तरा न संभवतीत्यार्थादध्य(?)नलाभः ॥

१३ न ] सप्तमं पदमभिगृह्णाति इति सप्तमपदात्पांसुं गृहीत्वा हविर्धानशकटाक्षमार्जनं विहितम् ॥

१६ *] द्वादशोपसत्ताऽहीनस्येति श्रवणेऽपि, तिस्र उपसदो भवन्ति इति वचनेन उपसत्त्रयस्य प्राप्तिः ॥

वैकृतस्तु सौर्यादिविधिः प्राकृतमितिकर्तव्याताजातमाकर्षञ्चो दक इत्युच्यते । तदिदमेकस्यैव भगवतो लिङर्थस्य प्रयोक्तृशवित—ख-चितात्मनः प्रचुरव्यापारवैचित्र्यमुपदर्शितमिति अलमनया महामतिमानसव-त्या मीमांसार्थकथया । सोऽयमीदृशो नियोगो वाक्यार्थः ॥ § 6283

तस्य द्वादशलक्षण्यां तत्तद्रूपं प्रकाशितम् ।
तन्नेह लिख्यतेऽस्माभिः ग्रन्थगौरवभीरुभिः ॥§ 6285

दिङमात्रं त्वेतदाख्यायि नियोगस्य यथाऽऽगमम् ।
अमुष्मन्नपि वाक्यार्थे विवदन्ते मनीषिणः ॥§ 6287

## नियोगवाक्यार्थनिरासः

लिङादेरवगम्यमानः कार्यरूपः प्रेरणात्मा च वाक्यार्थो नियोग इत्युक्तम् । न चासावेवंरूपोऽपि परिदृश्यमानभावार्थादिव्यतिरिक्तोऽवगम्यते ॥ § 6288

क्रियैव तावत् कार्यात्मा, प्रेरणात्मा फलार्थिता ।
प्रतीयते ततोऽन्यस्तु नियोगो नोभयात्मकः ॥§ 6290

II.122/KSV

ननु ! अन्य एव क्रियाकर्तृसंबन्धात् प्रैषप्रैष्यसम्बन्धो हि दर्शितः । न युक्तोऽसौ ॥ § 6291

कुर्यादित्यादिशब्देभ्यः क्रियादिव्यतिरेकिणः ।
नार्थान्तरस्य संवित्तिः कस्य चित् प्रेरणात्मनः ॥§ 6293

## नियोगस्यातिरिक्तत्वनिरासः

किमिदानीं करोति कुर्यात् इत्यादि च तुल्ये एते प्रतिपत्ती ? अभिन-वमिदं शब्दज्ञत्वमायुष्मतः । न ब्रूमो न भिन्ने एते प्रतिपत्ती इति । करोति इति प्रवृत्तक्रिय उच्यते, वर्तमानकालावच्छिन्नश्च । किं त्वसौ प्रैषः ततोऽव-गम्यमानोऽपि प्रेरको न भवति, न च कार्य इति ब्रूमः ॥ § 6294

२--३ ] वेदिता— nyāma-wit_kha

९ ] त्मको— nyāma-wit_ka

१० ] भावनादि— nyāma-wit_kha

१८ ] व्युत्पत्तिमत्त्व— nyāma-wit_kha

५ द्रूपं ] वाक्यशास्त्रं हि मीमांसाशास्त्रं नियोग निरूपण एव पर्यवस्यति ॥

ननु ! प्रेरकत्वेनैवावगम्यमानः कथं प्रेरको न भवेत् । एतदेवास्य प्रैषत्वम्, यत् प्रेरकत्वम्—सत्यम्—प्रेरकत्वेनैवासौ गम्यते । *न त्वसौ तथा भवति । व्यवहारमात्रमेतत् राजाज्ञया करोमि इति । कार्यत्वमप्यस्य प्रक्रियामात्रं राजाज्ञां करोमि इति ॥ § 6295

## फलस्यैव प्रेरकत्वं, न नियोगस्य

आज्ञा हि नाम नैवान्या संपाद्यत्वेन गम्यते ।
नानुष्ठातुरियं बुद्धिः आज्ञा संपाद्यतामिति ॥§ 6297

एवं हि यस्य कस्यापि प्रवर्तेत स आज्ञया ।
न चेह वालोन्मत्तादिवचनात् फलवर्जितात् ॥§ 6299

सत्यपि प्रेरणाज्ञाने प्रवर्तन्ते सचेतसः ।
भयं नाशङ्क्यते यस्मात् फलं वाऽपि समीहितम् ॥§ 6301

II.123/KSV

तथाविधस्य राज्ञोऽपि नाज्ञाऽनुष्ठीयते जनैः ।
*वर्तमानापदेशेऽपि फलं यत्रावगम्यते ॥§ 6303

तत्र प्रवर्तते लोकः लिङादिष्वश्रुतेष्वपि ।
भवत्यारोग्यसंपत्तिः भुंजानस्य हरीतकीम् ॥§ 6305

तत्कामो भक्षयेच्चेति को विशेषः प्रवर्तने ?
अन्वयव्यतिरेकाभ्यां तदेवमनुमन्यते ।
प्रेरकत्वं फलस्यैव न नियोगात्मनः पुनः ॥§ 6308

## वेदे फलस्य प्रवर्तकत्वासंभवशंका

तत्रैतत् स्मात्—लोके भवतु फलार्थित्वात् प्रवर्तनं, आरिराधयिषते, प्रेरकातिशयानुवर्तने वा तस्य पारंपर्येण फलहेतुत्वात् । वेदे तु वक्तुरभावात् प्रेरणावगमादेव प्रवृत्तिः ॥ § 6309

४ ] क्रिया— nyāma-wit__kha
५ ] न्य— nyāma-wit__kha
८ ] यत्व— nyāma-wit__kha
१८ ] आराधयिष्यते— nyāma-wit__kha
१९ ] का— nyāma-wit__kha

२ *] वास्तविकं प्रेरकत्वं तु तस्य नास्ति ॥
१२ *] लडादिप्रयोगेऽपि ॥

उन्मत्तवाक्यादपि लिङादियुक्तात् न प्रेरणावगमो नास्ति ? भवन्नपि दोषदर्शनात् उपेक्ष्यते, उन्मत्त एवं प्रलपतीति । वेदे पुनः यजेत इत्यत्र प्रेरणावगमात् परित्यागकारणाभावात् तत एव प्रवर्तनम् । प्रवर्त नाभावेऽपि न वेदस्याप्रामाण्यम्, प्रमाणव्यापारस्य तेन निर्वर्तितत्वादित्युक्तम् ॥ § 6310

## वेदेऽपि फलस्यैव प्रवर्तकत्वम्

उच्यते—वेदेऽपि वक्ताऽस्ति । तदाशयवशेन तत्रापि फलार्थिनां प्रवर्तनमिति संभवदपीदमुत्तरं नाचक्ष्महे, कथान्तरप्रसङ्गात् । किन्त्विदंब्रूमः-प्रेषणावगमादेव प्रवृत्तिसिद्धौ स्वर्गकामपदं बादरिवदन्यथाव्याख्याय ताम् । II.124/KSV
अधिकारानुबन्धाभिधाने पुरुषविशेषणमात्रमेतत् भवतु, किं स्वर्गसाध्यकत्वकल्पनया । *विशेषणत्वमेवान्यथा न निर्वहतीति चेत्; आयातं तर्हि फलस्य साध्यत्वम् । तच्चेत् साध्यत्वेनावगम्यते, तस्यैव सामर्थ्यसिद्धं लोकानुगुणमव्यभिचारि च प्रवर्तकत्वमुत्सृज्य न प्रेरणावगमस्य तद्वक्तुमर्हसीति ॥ § 6311

नियोगादथनिष्पत्तिः फलस्येत्यभिधीयते ।
फलं प्रत्यङ्गभूतत्वात् अवाक्यार्थत्वमापतेत् ॥ § 6313

## विध्यर्थस्य फलार्थत्वात्, वाक्यार्थद्वयापत्तिः

ननु ! विध्यर्थो न भावार्थवत् फले करणं, येनास्य तदङ्गत्वं स्यात् । आक्षेपकत्वात्तु तस्य फलार्थत्वमुच्यते । प्रयोक्तृत्वं हि तस्य निजं रूपम्—यद्येवं भावार्थ एव साध्यो भवतु । विध्यर्थस्य तु किमनुष्ठेयत्वमुच्यते ? § 6314

सोऽपि भावार्थसिद्ध्या संपद्यते, कृतो मया स्वामिनियोगः इति व्यवहारादिति चेत्— § 6315

भावार्थात्तर्हि निष्पत्तिः नियोगस्य फलस्य च ।
इत्येकत्र पदग्रामे वाक्यार्थद्वयमापतेत् ॥ § 6317

## नियोगस्यापि फलशेषत्वम्

३ ] फला— nyāma-wit_kha
५ ] प्रवर्ति— nyāma-wit_ka
२१ ] तस्य— nyāma-wit_ka

७ वृत्तिसिद्धौ ] फलस्य कर्मशेषत्वं नास्तीति बादरेर्मतं पूर्वमीमांसायां ३-१-३ निरूपितम् । तेन फलस्य प्राधान्यं सिद्धमिति तज्ज्ञानमेव प्रवर्तकम् ॥
९ * ] विशेषणत्वं—पुरुषविशेषणत्वम् ॥

किंचान्विताभिधानेन विषयत्वावधारणात् ।
नियोगस्यैव भावार्थनिष्पाद्यत्वं प्रतीयते ॥§ 6319

स तु भावार्थतः सिद्धः फलाय यदि कल्प्यते ।
परार्थत्वादवाक्यार्थो भवेदित्युपवर्णितम् ॥§ 6321

II.125/KSV

भावार्थस्तु द्वयं कुर्यात् युगपद्वा क्रमेण वा ।
युगपन्नास्य सामर्थ्यं समत्वं च द्वयोर्भवेत् ॥§ 6323

## नियोगसिद्ध्यसंभवः

नियोगश्च शब्दैकगोचरत्वात् मा दर्शि; फलं तु स्वर्गपश्वादि तेन सह निष्पद्यमानं किमिति न गृह्यते ? क्रमपक्षे पूर्वं वा नियोगः, पश्चात् फलम्; पूर्वं वा फलं पश्चाद्वा विनियोगः सिद्ध्येदिति । यदि पूर्वं नियोगः, तदा नियोगस्यासंपाद्यत्वात् तद्विषयलिप्साया अनुपपत्तेः करणांशेऽपि वैधी प्रवृत्तिस्स्यात् ॥ § 6324

यथा नियोगनिष्पत्तिः प्रयाजादिकृतेन तु ।
ततः प्रवृत्तिः शास्त्रीया भावार्थेऽपि तथा भवेत् ॥§ 6326

इष्यत एवेति चेत्— § 6327

नन्वेवं तस्य लिप्सार्थलक्षणेत्यभ्यधायि यत् ।
श्येनादीनामधर्मत्वं वर्णितं तद्विरुध्यते ॥§ 6329

अथ पूर्वं फलसिद्धिः, ततो नियोगसिद्धिः; तर्हि फलस्य तदानीं दर्शनं भवेत्, सिद्धत्वात् ॥ § 6330

न च भावार्थवेलायां पुत्रपश्वादि दृश्यते ।
अदृश्यमानमप्येतत् सिद्धविमितिविस्मयः ॥§ 6332

II.126/KSV

१० ] सिद्धेनिर्विषयाया अनुपपत्ते— nyāma-wit__kha
१० ] धी— nyāma-wit__kha
१३ ] तत्र— nyāma-wit__kha
१५ ] त्यभिधायकम्— nyāma-wit__ka

५ स्तु ] द्वयं—नियोगं, फलं च ॥
७ श्वादि ] तेन सहेति—उभयोरपि भावार्थसाध्यत्वात् ॥
१० दा ] नियोगस्य स्वतः पुरुषार्थत्वाभावात् असंपाद्यत्वम् ॥
१६ ते ] इतिकर्तव्यतायामेव विधिर्युक्ता । धात्वर्थेऽपि विध्यङ्गीकारे श्येनस्यापि विहितत्वप्राप्त्या अधर्मत्वं न स्यात् ॥

## फलस्य नियोगशेषत्वनिरासः

अतश्च यत् केश्चिदुच्यते—*स्वर्गसिद्धिमवान्तरव्यापारीकृत्य नियो गमेव भावार्थः संपादयतीति—तदप्यपास्तम्—अवान्तरव्यापारस्य ज्वलनादेरिव प्रधानव्यापारात् पूर्वं दर्शनप्रसङ्गादिति ॥ § 6333

अथोच्यते—स्वर्गकामस्य स्वर्गं साधयितुमुद्यच्छतो यागे नियोगः यः संपाद्यः श्रूयते, *स चेत् संपन्नः शब्दवृत्तेन फलमपि संपन्नमेव। आनुभाविकी तु स्वर्गादिसिद्धिः कालान्तरे भविष्यतीति—एतदयक्तम्— सिद्धिद्वयानुपलंभात् । न ह्येका शाब्दी सिद्धिः, अन्या चानभाविक्री फलसिद्धिः कुतस्त्येति चिन्त्यम् ॥ § 6334

कालान्तरे च भावार्थः क्षणिकत्वान्न विद्यते ।
शक्त्यादिरूपं चापूर्वं न भवद्भिरुपेयते ॥§ 6336

भवन्तो ह्यपूर्वशब्देन धर्मशब्देन च नियोगमेवोपचरन्ति । न च नियोगः शक्तिवत् आत्मसंस्कारवद्वा कालान्तरस्थायी भवती । स हि प्रेरणात्मकः, कार्यरूपो वा, नोभयथाऽपि स्थैर्यमवलम्बते ॥ § 6337

## नियोगस्य फलाक्षेपकत्वं न संभवति

तत्रैतत् स्यात्—नियोगसिद्धिः आक्षित्तफलसिद्धिर्भवति । विषयाद्यनुब-
न्धावच्छिन्नो ह्यसावेवानुष्ठेयः । तत्र यथा तेन तेन कारकचक्रेण क्रियाक- II.127/KSV
लापेन विना संपत्तिमलभमानः तत्तदाक्षिपति, तथाऽधिकारानुबन्धबन्ध्योऽपि नासौ संपत्तिमधिगच्छतीति तमप्याक्षिपति । यश्चायमधिकारानुबन्धाक्षेपः, स एवायं फलाक्षेपेण तु विधेः फलाक्षेपि तेत्युक्तम् । एतदयुक्तम्— § 6338

यो हि येन दिना कामं न सिद्ध्येत् स तमाक्षिपेत् ।
नियोज्यमात्राक्षेपे तु नियोगो न फलात्मकः ॥§ 6340

---

१ ] नियोगमनेन— nyāma-wit__kha
४ ] यागेन योग— nyāma-wit__kha
७ ] सिद्धि— nyāma-wit__kha
११ ] भेवाप— nyāma-wit__kha
१६ ] प्रबन्धो— nyāma-wit__ka
१७ ] न्धः— nyāma-wit__kha
१८ ] क्षेपोत— nyāma-wit__kha
१८ ] पेक्षि— nyāma-wit__kha

---

१ *] नियोगः स्वसिद्धये फामपि संपादयति । यागश्च नियोगम् ॥
३ ङ्गादिति ] तथा च स्वर्गस्य पूर्वमेव अनुभवप्रसङ्गः ॥
५ *] सः—नियोगः ॥
१३ ते ] यागं नर्वर्तयन् नियोगश्चरितार्थः । तथा च कालान्तरे कथं फलम् ?
१७ तीति ] तं—अधिकारं—फलम् । तथा च फलसिद्धावेव नियोगसिधिः पूर्णा । अत एव अपूर्ववृद्धिरेव स्वर्गः इत्यप्युच्यते ॥

नियोज्यः चण्डालस्पर्शनेनेव स्वर्गकामनोत्पादमात्रेण नियोज्यतां प्रतिपन्न इति कथं नियोज्याक्षेप एव फलाक्षेपः ॥ § 6341

ननु च स्वर्गकामोऽत्र नियोज्यो नान्यथा भवेत् ।
यदि स्वर्गस्य संपत्तिं नाधिगच्छेत् स्वकर्मणः ॥§ 6343

नैतदेवम्— § 6344

नरेच्छामात्रमेवेदं न शब्दस्त्वियति क्षमः ।
नियोज्यः स्वर्गकामो हि भवेज्जीवनवानिव ॥§ 6346

## यागस्वर्गयोः साध्यसाधनभावः कथमवगम्यते ?

ननु ! लोके काम्यमानस्य साध्यत्वं दृष्टम् हरीतकीं भक्षयेदारोग्यकामः
II.128/KSV इति । तेन वेदेऽपि यजेत स्वर्गकामः इति स्वर्गस्य साध्यत्वमव भोत्स्यामहे । साधो ! लोकेऽपि कथमेतदवगतम् आयुष्मता ? नियोज्यसमर्पकपद-वाच्यपर्यालोचनेन ? विधिवृत्तपरीक्षया वा ? § 6347

पदार्थस्तावदेतावान् ? एवंचातो ह्यसाविति ।
इदं तु सिद्ध्यत्येतस्मादिति तस्य न गोचरः ॥§ 6349

विधेरेष स्वभावश्चेत्, आयुष्मन् ! साधु बुद्ध्यसे ।
भाट्टैः किमपराद्धं ते नित्येऽपि फलवादिभिः ॥§ 6351

## नित्येष्वपि फलसद्भावः

अधिकार्यनुपादेयविशेषणविशेषितः ।
जीवन् वा स्वर्गकामोऽपित्समानः काम्यनित्ययोः ॥§ 6353

विधिवीर्यप्रभावस्तु द्वयोरपि तथाविधः ।
सप्रत्ययप्रेरकतां विधिर्नोपैति निष्फलः ॥§ 6355

ननु ! कामनाधिकारे स्वर्गः श्रूयते, नित्याधिकारे त्वसौ न श्रूयते । आश्रूयमाणः कस्यानुरोधेन कल्प्यते ? विधेरेवेति ब्रूमः । स्वर्गेण श्रुतेनापि किं

---

१८ ] कृमे— nyāma-wit_kha

---

१ नियोज्यः ] पुरुषविशेषणस्य चण्डालस्पर्शस्य स्नाने निमित्तत्वमात्रेण यथा चारितार्थ्यं, तथा स्वर्गस्यापि यागे प्रवर्तनामात्रेण ॥

४ च्छेत् ] स्वकर्मण इति पञ्चमी ॥
२० सौ ] असौ—प्रत्यवायपरिहारः ॥

करिष्यति, यद्यसौ विधिना नापेक्ष्यत, घृतकुल्या अस्य भवन्ति इत्यादिवत् अश्रुतोऽपि चासौ विधिनाऽऽकृष्यत एव । तस्मात् विधिरेवात्र प्रमाणं, न श्रवणाश्रवणे इति काम्यवन्नित्येऽपि फलमभ्युपगन्तव्यम्; न वा क्वचिदपीति ॥ § 6356

## निषेधस्थलेऽपि फलसद्भावः

प्रतिषेधाधिकारेऽपि विधिवृत्तपरीक्षया ।
एवं नरकपातादिफलयोगो न दुर्भणः ॥§ 6358

II.129/KSV

येन हि दुर्विषहक्लेशद्वेषकलुषितमनसा ब्राह्मणहननं सुखसाधनमिति कर्तव्यमिति गृहीतम्, निरर्गलरागरसिकेन सुरापानं सुखसाधनमिति गृहीतम्, स ततो विधिना वार्येत, यदि तदसुखसाधनमिति ज्ञाप्यते । तस्मान्नित्येषु प्रत्यवायपरिहार इव, उपात्तदुरितक्षव इव वा प्रतिषिध्यमानेषु कर्मसु नरकपातः फलमित्यभ्युपगमनीयम् । इतरथा ह्यर्थानर्थविवेको न सिद्ध्यति ॥ § 6359

*एवं च ब्रह्महत्यादेरपि नैवास्त्यधर्मता ।
किं पुनः श्येनवज्रादेरित्यर्थग्रहणं वृथा ॥§ 6361

## करणेतिकर्तव्यतयोरविशेषः

करणांशेऽपि लिप्सातः प्रवृत्तिर्यद्युपेयते ।
इतिकतव्यतांशे तु शास्त्राद्यदि तदप्यसत् ॥§ 6363

न हि तत्करणं शुद्धं स्वफलायोपकल्पते ।
सेतिकर्तव्यताकं हि करणं करणं विदुः ॥§ 6365

अवान्तरविभाग एवैषः करणेतिकर्तव्यतालक्षणः । सकलाङ्गो बृंहितस्वरूपस्तु भावार्थः काम्यमानोपायतां प्रतिपद्यते, नैकेनाप्यंशेन न्यूनाः । अत एव काम्यानां कर्मणां सर्वाङ्गोपसंहारेण प्रयोगमिच्छन्ति । तस्मात्

१ ] नापेक्ष्यते— nyāma-wit_kha

९ ] वार्यते— nyāma-wit_kha

२ विधिरेवात्र ] अत्र—फलसाधनत्वे ॥
१० स्मान्नित्येषु ]
प्रत्यवायपरिहारः—अकरणे यो भवेत्तस्य परिहरणं—प्रागभावसंरक्षणम् ।
उपात्तदुरितक्षयः—जातस्य तस्य ध्वंसः ॥

१३ *] एवं च—विधिसद्भावादेव । वज्र इति च श्येनवत् हिंसाफलको यागविशेषः ॥

करणवदितिकर्तव्यतायामपि लिप्सात एव प्रवृत्तिः स्यात् ॥ § 6366

उभयत्रापि लिप्सातः सति चैवं प्रवर्तने ।
अग्नीषोमीयहिंसादेः श्येनादिवदधर्मता ॥§ 6368

II.130/KSV

## कामाधिकारे विध्यर्थः

यदप्युक्तं—कामाधिकारेषु काम्यमानभावार्थयोरुपायोपेयभावमात्रप्रतिपा(?)पर्य(?)सितो विधिव्यापार इति—तदपि न सम्यक्—विधिपुरुषयोर्हि प्रेर्यप्रेरकभावलक्षणः संबन्धः । तत्र यागादयो विषयत्वेन प्रतीयन्ते, नेष्यमाणोपायत्वेन । साध्यसाधनमात्रप्रतिपादनपर्यवसितव्यापारस्तु विधिः विनियोगपर एव स्यात् । ततश्चाप्रवृत्तप्रवर्तकं नाम निजं रूपं जह्यात् ॥ § 6369

*विधेश्चतुरवस्थत्वं फलतः किल कथ्यते ।
प्रेरकत्वं च तद्रूपं सर्वावस्थानुगामि यत् ॥§ 6371

कार्यात्मताऽपि विध्यर्थे प्रेरणाज्ञप्तिपूर्विका ।
प्रेर्येणैव सता पुंसा तत्कार्यमवधार्यते ॥§ 6373

लिङादिश्रुतितश्चादौ प्रेरणैव प्रतीयते ।
साध्यसाधनसंबन्धबुद्धिस्तद्बुद्धिपूर्विका ॥§ 6375

नन्वेवं काम्येषु विधितः प्रवृत्ताविष्यमाणायां अप्रवर्तमानः प्रत्यवेयात्, विध्यतिक्रमात्—मैवम्—स्वर्गं सिषाधयिषोः तत्राधिकारात् । अन्यस्त्वनधिकृत एव, क्षत्रियादिरिव वैश्यस्तोमे । नासावकुर्वन् प्रत्यवायमर्हति । स्वर्गार्थी तु विधितः प्रवर्तत एव । लिप्सया तु करणांशे प्रवृत्तिरिष्यमाणा क्रत्वर्थमितिकर्तव्यतांशमपि मैवं स्पृशेत् । क्रतूपकारकामो हि तत्र प्रवर्तते इत्येवं सर्वत्र विधिरुत्सीदेदेवेत्यलं प्रसङ्गेन ॥ § 6376

II.131/KSV

## नियोगे व्युत्पत्त्यसंभवः

७ ] पयोगित्वेन— nyāma-wit_gha

२० ] मैव— nyāma-wit_kha

१० *] प्रेरकत्वस्य समानत्वेऽपि फलद्वारकमेव चतुरवस्थत्वं नित्यनैमित्तिककाम्यप्रतिषेधस्थलेषु ॥

२० स्पृशेत्] अतस्साङ्ग एव करणे विध्या प्रवृत्तिः ॥

अपि च— § 6377

प्रमाणान्तरसंपर्कविकले भवतः कथम् ।
नियोगात्मनि वाक्यार्थे व्युत्पत्तिर्व्यवहारतः ? ॥§ 6379

ननु उक्तमाकूतविशेषपूर्विकां चेष्टामात्मनिष्ठां दृष्ट्वा परत्रापि तथाऽनुमानमिति—अयुक्तमिदम्—स्वात्मन्यपि प्रेरणावगमनिमित्ताभावात् । न ह्यात्मेव, संविदिव प्रेरणावगमनिमित्ताभावात् प्रेरणा स्वप्रकाशा । प्रेरणासंवित् स्वप्रकाशेति चेत्—तदुत्पादे तर्हि निमित्तं तावत् मृग्यम् । न तावच्छब्दः, तदानीं व्युत्पत्त्यभावात् । स्वात्मनि प्रेरणावगमपूर्विकां हि चेष्टामुपलब्धवतः ते परत्र चेष्टादर्शनात् तदनुमानं सेत्स्यति । तन्निमित्तं लिङादिश्शब्द इति भोत्स्यते, स पुनर्व्युत्पत्तिकाले स्वात्मन्येव प्रेरणावगमश्चिन्त्यो वर्तते । प्रमाणान्तरात्तु तदवगम इति चेत्—उत्तिष्ठ, असिद्धं शब्दैकगोचरत्वम् ॥
§ 6380

या चेयं पूर्वावधारितसुखसाधनभावे कपित्थादौ स्वात्मनि प्रवृत्ति रुपलब्धा, तत्र प्रेरकत्वेन फलार्थिता निर्ज्ञाता, नान्या कचित् प्रेरणा । तदुक्तम् प्र-वा-भा-२-४-१८३ । § 6381

स्मरणादभिलाषेण व्यवहारः प्रवर्तते§ 6382

इति । फलविषया हीच्छा तत्र स्वसंवेद्या ॥ § 6383

अतश्च प्रेरकज्ञानं शब्दादपि परस्य यत् ।
कल्प्यते कल्प्यतां तत्र प्रेरिका सैव सुन्दरी ॥§ 6385
II.132/KSV

चपेटापरिहाराय मोदकप्राप्तयेऽपि वा ।
प्रवर्तते वटुर्नासौ जुहुधीति नियोगतः ॥§ 6387

कथं तर्ह्येवमाचष्टे आचार्यचोदितोऽहं जुहोमि इति ? अस्त्वयं व्यपदेशः । आचार्यचोदना तु न तत्र कारणम्; अपि तु हिताहितप्राप्ति परिहारार्थित्वमेवेत्यतः फलं प्रवर्तकं युक्तम्, अनुभवसाक्षिकत्वात् ॥ § 6388

४ ] क्रमा—क, अनुक्रमा— nyāma-wit__gha
६--७ ] स्वप्रकाशा प्रेरणा— nyāma-wit__kha
७ ] मृग्यम्— nyāma-wit__kha
११ ] सिद्धं— nyāma-wit__gha

१७ प्रेरिका ] सैव—फलविषयकेच्छैव ॥

## शब्दप्रयोक्त्राशयस्यापि प्रेरकत्वं न युक्तम्

येऽप्याहुः—प्रयोक्त्राशयस्य प्रवर्तकत्वम्, यतोऽननुविधेयस्य वचनात् न प्रवर्तमानः कश्चिद्दृश्यते । अनुविधेयस्य पुंसः किंचिदब्रुवतोऽपि भ्रूभङ्गादिनाऽऽशयमवगम्य प्रवर्तत इति—एतदप्ययुक्तम्—यतः प्रयोक्त्राशयानुमानेन स्वार्थसंभावनया लोकः प्रवर्तते । न पुनः प्रयोक्तैव प्रीयतामिति । तत्प्रीतिरपि स्वप्रीतिहेतुत्वेनार्थ्यते, न तत्प्रीतित्वेन । बुद्धोऽपि हि नाम सकलसत्त्वहितंप्रतिपन्नः परार्थं स्वप्रयोजनतयैव संपादयति । परार्थसंपादनद्वारकं तु तत् । तस्मात् स्वप्रीतिरेव प्रवर्तिका । प्रयोक्त्रा शयस्य च प्रवर्तकत्वे वेदार्थप्रयोक्त्राशयानवधारणात् अप्रवृत्तिरेव प्राप्नोति । तस्मात् फलमेव प्रवर्तकम् ॥ § 6389

यत्पुनः फलस्य प्रेरकत्वे दूषणमभ्यधायि—सिद्ध्यसिद्धविकल्पानुपपत्तेरिति—तदप्ययुक्तम्—इच्छाविषयीकृतस्य प्रवर्तकत्वाभ्युपगमात् । असिद्धे कथं कामनेति चेत्—असिद्धत्वादेव । इदानीं च तदसिद्धं; नैकान्तासिद्धस्वरूपमेव, खपुष्पवत् ॥ § 6390

II.133/KSV

सुखे दुःखनिवृत्तौ वा पुंसां भवति कामना ।
न पुनर्व्योमपुष्पादि कश्चित् कामयते नरः ॥§ 6392

## रागादेः प्रवर्तकत्वनिरासः

येऽपि रागादेः प्रवर्तकत्वमभ्युपगतवन्तः, तैरपि कामनाविषयीकृतं फलमेव प्रवर्तकमभ्युपगतम् । *इच्छाविशेषा एव हि रागादयः ॥ § 6393

यदपि श्रेयस्साधकत्वं प्रवर्तकमुच्यते, तदपि न चारु; सत्यामपि श्रेयस्साधनतायां अनर्थित्वेन प्रवृत्त्यभावात् ॥ § 6394

ननु ! अर्थिनोऽपि नानियतविषया प्रवृत्तिः, अपितु निर्ज्ञातश्रेयस्साधनभावे भावार्थे । तस्मात् तत्साधनतावगमः प्रवर्तकः—सत्यम्—द्वये सत्यपीच्छैव प्रवर्तिका वक्तुं युक्ता, तस्यां सत्यामेव प्रवृत्तिदर्शनात् । प्रवृत्तिर्हि

२ ] दकुर्वतोऽपि— nyāma-wit_gha
१२ ] नेति— nyāma-wit_kha
१८ ] साधकं— nyāma-wit_kha
२१ ] भावेऽर्थे— nyāma-wit_kha

६ येव ]

आकाशस्य स्थितिर्यावत्
यावच्च जगतः स्थितिः ।
तावन्मम स्थितिर्भूयाल्लोक-
पापानि निघ्नतः

इति किल बुद्धवाक्यम् ॥
१७ *] फलविषयिणी उत्कटेच्छा रागः ॥

नाम प्रयत्नः । प्रयत्नश्चेच्छाकार्य इति काणादाः । *विषयनियमे तु श्रेयस्साधनत्वं कारणं, न प्रवृत्त्युत्पादे ॥ § 6395

किंच भावनावगतं श्रेयस्साधनत्वं प्रतर्तकमिष्यते तैः । तच्च न पृथगभिधातुं युक्तम् । भवनायाः त्र्यंशत्वेन तत्स्वरूपानगमसमये एतदंशयोः स्वर्गयागयोः साध्यसाधनभावावगतिसिद्धेः । न चांशद्वयावच्छिन्नस्य व्यापारस्य श्रेयस्साधनत्वं रूपं वक्तुमुचितम्, अनिष्पन्नस्य तस्य तादृूप्याभावात् । न ह्यनिष्पन्ने, गवि तदेकदेशसास्नादौ गोत्वरूपं सामान्यं निविशते । न चांशत्रयपूरणमन्तरेण भावनाख्यव्यापारनिष्पत्तिरिति ॥ § 6396

II.134/KSV

## शब्दस्यापि प्रेरकत्वासंभवः

यत्तु लिङादेश्शब्दस्य तद्व्यापारस्य वा प्रेरकत्वमुच्यते—तत् प्रागेव प्रतिक्षिप्तम् । विधिरपि स्वमहिम्ना वा प्रेरकः स्यात् ? साध्यसाधनभावसंबन्धावबोधनेन वा ? स्वमहिम्ना प्रेरकत्वमस्य पूर्वमेव निरस्तम् । साध्यसाधनभावसंबन्धावबोधनपुरस्सरे तु तस्य प्रवर्तकत्वे फलस्यैव प्रवर्तकत्वमिदमनक्षरमभिहितं भवति ॥ § 6397

यस्त्वाह प्रेरकत्वं चेत् फलं दर्शयतो विधेः ।
प्रत्यक्षादिसमानत्वात् स्वातन्त्र्यं तस्य हीयते ॥§ 6399

स वाच्यः फलशून्यत्वे सुतरामस्वतन्त्रता ।
यद्रिक्तमर्थं मूढोऽपि न कश्चिदनुतिष्ठति ॥§ 6401

को हि नाम निष्फलमर्थं प्रेक्षावाननुतिष्ठेत् ? § 6402

ननु फलेऽपि दर्शिते केचित्तत्र न प्रवर्तन्त एव । किंचातः ? काम मा प्रवर्तिषत । न हि कारको विधिः, अपितु ज्ञापक इत्युक्तम् ॥ § 6403

ननु फलमप्रदर्शयन्नपि ज्ञापयेत्—न ज्ञापयितुमुत्सहते, प्रेक्षावान् हि ज्ञाप्यते, न च फलं विनाऽसौ तथा ज्ञापितो भवति इत्यलं बहुभाषिकया ॥ § 6404

## फलस्यैव प्रवर्तकत्वोपसंहारः

११--१२ ] न प्रेरकः—
nyāma-wit__kha
१८ ] यच्छिष्ट— nyāma-wit__ka;
nyāma-wit__gha

१ *] विषयनियमः—प्रवृत्तिविषयव्यवस्था ॥
१५ त्वात् ] प्रत्यक्षं वस्तु प्रदर्शयति । प्रवृत्तिस्तु इच्छयैव । एवं च विधेः स्थानमेव न लभ्येत ॥

फलस्यैवेष्यमाणस्य पश्यन् प्रेरकतामतः ।
यमर्थमधिकृत्येति सूत्रं व्यधित सूत्रकृत् ॥§ 6406

II.135/KSV

तस्मात् पुंसः प्रवृत्तौ प्रभवति न विधिः नापि शब्दो लिङादिः
व्यापारोऽप्येतदीयो न हि पटुरभिधा भावनानामधेया ।
न श्रेयस्साधनत्वं विधिविषयगतं नापि रागादिरेवं
तेनाख्यत् काम्यमानं फलममलमतिः प्रेरकं सूत्रकारः ॥§ 6410

—इति वाक्यार्थविमर्शः— § 6411

## वाक्यार्थस्वरूपवर्णनम्

आह— § 6412

परपक्षान् प्रतिक्षिप्य प्रेरकं कथितं फलम् ।
एवं परमतद्विष्टैः वाक्यार्थः स्वयमुच्यताम् ॥§ 6414

उच्यते—यमर्थमधिकृत्य पुरुषः प्रवर्तते तत् प्रयोजनम् न्या-सू-१-१-२४ इति वदता सूत्रकृता फलं प्रवर्तकमिति प्रदर्शितम् । प्रमाणेन खल्वयं ज्ञाताऽर्थमुपलभ्य तमीप्सति, जिहासति वा । तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरुच्यते । सामर्थ्यं पुनरस्याः फलेनाभिसंबन्धः इति च ब्रुवाणो भाष्यकारोऽपि फलेप्सां प्रवर्तिकां प्रादीदृशदिति तदीयां सरणिमनुसरद्भिरस्माभिरपि तथैव तत्कथितम् ॥ § 6415

## विद्यास्थानानां विविक्तविषयकत्वम्

वाक्यार्थस्तु न क्वचिदपि सूत्रकारभाष्यकाराभ्यां सूचित इति कुतः शिक्षित्वा वाक्यार्थस्वरूपं वयमाचक्ष्महे । किमिति ताभ्यामसौ न सूचितः *
II.136/KSV इति चेत्, *पृथक्प्रस्थाना हीमा विद्याः । प्रमाणविद्या चेयमान्वीक्षकी, न वाक्यार्थविद्येति ॥ § 6416

यद्येवं पदार्थोऽपि कस्मादिह दर्शितः व्यक्त्याकृतिजातयस्तु पदार्थः इति—स्थाने प्रश्नः—स तु शब्दानामर्थासंस्पर्शितां, वदन्तं रुदन्तं च शमयितुं शब्दप्रामाण्यसिद्धये सूत्रकृता यत्नः कृतः ॥ § 6417

---

१७--१९ ] इति चेत्— nyāma-wit_kha

२३ ] सूत्र— nyāma-wit_gha

---

१८ *] उपलंभः—ज्ञानं, न तु प्रत्यक्षम् ।
१९ *] गोपदं गोत्वावच्छिन्नवाचकम् । परन्तु गामानय इति वाक्यस्थं न यत्किञ्चिद्गोवाचकम् । किन्तु विशिष्य किञ्चिद्व्यक्तिवाचकम् ॥

## पदार्थानामेव वाक्यार्थत्वम्

यद्येवं वाक्यार्थमपि बाह्यं वास्तवमन्तरेण शास्त्रस्य प्रमाणता न प्रतिष्ठां लभत इति तत्रापि प्रयत्नः कर्तव्य एव—सत्यम्—पदार्थप्रतिपादनयत्नेनैव तु कृतेन तत्र यत्नं कृतं मन्यते सूत्रकारः, यदयं पृथक्पदार्थेभ्यो न वाक्यार्थमुपदिशति स्म । तस्मादयमस्याशयः—पदार्थ एव वाक्यार्थः इति ॥ § 6418

तत्किममुमेव पक्षं अनुमोदामहे पदार्थ एव वाक्यार्थ इति । बाढं ब्रूमः । किंतु नैकः पदार्थो वाक्यार्थः, अनेकस्तु पदार्थो वाक्यार्थः ॥ § 6419

## पदार्थवाक्यार्थयोः विशेषः

ननु ! अनेकोऽपि भवन् पदार्थ एवासौ । न च पदार्थो वाक्यार्थो भवितुमर्हति । *सामान्ये हि पदं वर्तते, विशेषे वाक्यम् । अन्यच्च सामान्यम्, अन्यो विशेषः । अन्यत्राप्युक्तम्—यदत्राधिक्यं स वाक्यार्थः इति । तस्मादन्यः पदार्थः, अन्यश्च वाक्यार्थः—उच्यते— यदेतदुक्तमस्माभिः अनेकः पदार्थो II.137/KSV वाक्यार्थः, न पुनरेकः इति, तन्न बुद्धीतमायुष्मता ॥ § 6420

## वाक्यार्थस्यापूर्वत्वम्

एतदुक्तं भवति—परस्परसंसृष्टपदार्थसमुदायो वाक्यार्थ इति संसर्ग एवाधिक इति यदत्राधिक्यं इत्युच्यते । न चानाक्षिप्तविशेषत्वेन संसर्ग उपपद्यते इति विशेषो वाक्यार्थ इत्युच्यते । संसर्गस्तु स्वरूपतो न वाक्यार्थः, अपदार्थत्वात् । गौः शुक्ल आनीयताम् इति पदग्रामे संसर्ग वादिनः पदस्याश्रवणात् । श्रवणेऽपि सुतरामनन्वयात् । गौः शुक्ल अनीयतां संसर्गः इति कोऽस्यार्थः ? तस्मात् संसृष्टो वाक्यार्थः, न संसर्गः । तदुक्तं— व्यतिषक्ततोऽवगतेर्व्यतिषङ्गस्य इति । न च तन्तुभिरिव पटः, वीरणैरिव कटः तदतिरिक्तोऽवयविस्थानीयः पदार्थो निर्वर्त्यमानो वाक्यार्थ उपलभ्यते । जातिगुणक्रियावगमेऽपि अवयविबुद्धेरभावात् । न च पदार्थावयवी वाक्यार्थः । तेन पृथग्वाक्यार्थं नोपदिष्टवानाचार्यः ॥ § 6421

## वाक्यार्थः न पदार्थातिरिक्तः

७ ] एको— nyāma-wit__kha
१३ ] विषयत्वेन— nyāma-wit__ka; nyāma-wit__gha
१५ ] पदार्थ— nyāma-wit__kha
१५ ] वाचिनः— nyāma-wit__kha

८ *] व्याकरणं पदशास्त्रम् । मीमांसा च वाक्यशास्त्रम् । इदं च प्रमाणशास्त्रम् ॥
१३ चानाक्षिप्त ] संसर्गस्य व्यक्तिविशेषगतत्वात् ॥

ननु ! गुणप्रधानभावमन्तरेण न संसर्गोऽवकल्पते । न चैकस्मिन् वाक्ये बहूनि प्रधानानि भवन्ति; प्राधान्यमेव हि तथा सति न स्यात् । गुणास्तु बहवो भवन्ति । यदिदमनेकगुणोपरक्तं एकं किंचित्प्रधानं, स वाक्यार्थ
II.138/KSV इति तद्विषयेयमेकस्वभावा बुद्धिः—सत्यम्—तथापि त एव संसृष्टाः पदार्था अवभासन्ते, न तदारब्धः कश्चिदेकः । संसर्गसिद्धिकृतस्तु गुणप्रधानभावोऽभ्युपेयते ॥ § 6422

स च गुणप्रधानभावो न नियतः, येन एकमेवेदं प्रधानमिति व्यवस्थाप्येत । क्वचित् कारकं प्रधानम्, क्रिया गुण; द्रव्यस्य चिकीर्षितत्वेनावगमात्—व्रीहीन् प्रोक्षति इति ॥ § 6423

सिद्धतन्त्रं क्वचित् साध्यं तत्तन्त्रमितरत् क्वचित् ।
शब्दप्रयोगतात्पर्यपर्यालोचनया भवेत् ॥ § 6425

## संसर्गविशिष्टपदार्थानां वाक्यार्थत्वम्

तस्मात् गुणप्रधानभावानियमात् अन्योन्यसंसृष्टः पदार्थसमुदायो वाक्यार्थ इति एतावदेव श्रेयः । संसर्गावगमे च सर्ववादिनाम विवादः ॥ § 6426

वाक्यार्थं मन्वते येऽपि नियोगं भावनां क्रियाम् ।
तैरप्यन्योन्यसंसृष्टः पदार्थग्राम इष्यते ॥ § 6428

## अन्यव्यवच्छेदः न वाक्यार्थः

ननु संसर्गवदन्यव्यवच्छेदोऽपि गम्यते । गौः शुक्ल आनीयताम् इति श्रुते कृष्णाश्वादिव्यवच्छेदप्रतीतिदर्शनात्—सत्यम्—संसर्गपूर्वकस्तु व्यवच्छेदः । शुक्लगुणसंसृष्टो हि गौः कृष्णादिभ्यो व्यवच्छिद्यते । अन्यापोहस्तु न पदार्थ इत्युक्तम् । तस्मान्न भेदो वाक्यार्थः ॥ § 6429
II.139/KSV

## संसर्गस्य अशब्दार्थत्वम्

४ ] मेकगुण— nyāma-wit_gha
११ ] क्वचित्— nyāma-wit_kha
१६--१८ ] श्रुते— nyāma-wit_kha
१८--१९ ] शब्दार्थ— nyāma-wit_ka

७ न] गुणप्रधानभावः आपेक्षिक एव सर्वत्र । अपेक्षा च देशकालकार्यानुरोधेन बहुप्रकारा । स्वदेशे राजाप्रधानन् । शिशोर्नामकरणे शिशुः प्रधानम् । पाककार्ये पाचकः प्रधानम् ॥

ननु ! संसर्गोऽपि न शब्दार्थः—सत्यम्—स हि शब्दस्याभिधेयो न भवति, न तु ततो न प्रतीयते । अनभिधेयः कथं प्रतीयत इति चेत्—*एतदग्रे निर्णेष्यते । व्यवच्छेदे तु न सा गतिः । तस्मात् संसृष्टाः पदार्थाः वाक्यार्थ इति स्थितम् ॥ § 6430

## फलरूपप्रधानार्थस्यैव वाक्यार्थत्वम्

अथवा गुणीभूतेतरपदार्थानुगृहितः एक एव प्रधानभूतः पदार्थो वाक्यार्थ इत्येकाकारप्रतीतिबलादुपेयताम् । एकस्त्वयमसावर्थ इति न निर्णेतुं शक्यते । यदि त्ववश्यमेकस्य कस्यचिदभिषेककलशो दातव्यः, तत् फलस्यैव दीयताम् । न हि निष्प्रयोजनं किंचिद्वाक्यमुच्चर्यते ॥ § 6431

क्वचित् साक्षात्पदोपात्तं क्वचित् प्रकरणागतम् ।
क्वचिदालोचनालभ्यं फलं सर्वत्र गम्यते ॥§ 6433

सकलेन च कारककलापेन क्रिया निर्वर्त्यते । क्रियया च फलम् । न तु फलेनान्यत् किमपि निर्वर्त्यत इति प्रधानत्वात् फलमेव वाक्यार्थः ॥ § 6434

## फलस्यैव प्राधान्यपक्षः

ननु ! फलमपि पुरुषार्थमिति पुरुषः प्रधानं स्यात्—नैतदेवम्—फलं सुखात्मकत्वात् पुरुषाश्रितं भवति, सुखादीनामात्मगुणत्वात् । न चैतावता पुरुषः प्रधानम् । *सोऽपि हि फलार्थमेव यतते । भावना तावत् फलनिष्ठ II.140/KSV एव व्यापारः । नियोगस्यापि फलं विना न प्रवर्तकत्वमित्युक्तम् । क्रियाया अपि केवलाया वाक्यार्थत्वमपास्तम् ॥ § 6435

तस्मात् फलस्य साध्यत्वात् सर्वत्र तदवर्जनात् ।
क्रियादीनां च तादर्थ्यात् तस्य वाक्यार्थतेष्यते ॥§ 6437

## क्रयाया अपि फलशेषत्वम्

६ ] इति— nyāma-wit_gha

३ *] अग्रे—समनन्तराह्निके ॥
१६ *] क्रियामयत्वाल्लोकस्य, फलस्यैव क्रियया साधनात् तस्यैव लोकदृष्टवा प्राधान्यम् । वस्तुदृष्टया तु पुरुषस्य स्यान्नाम प्राधान्यम् ॥

ननु ! फलस्य स्वर्गादेः निसर्गतः सिद्धरूपत्वात् कारकैस्सह संबन्धो प(?)प्राप्नोति । सिद्धस्य च कः संबन्धः ? क्रियागर्भ इति चेत्—तर्हि फलमपि, कारकाण्यपि—क्रियया संबध्यन्ते, को विशेषः ? सत्यम्—परं तु कारकाणि साधनत्वेन, फलं तु साध्यत्वेन । क्रियया हि फलं साध्यते न फलेन क्रियेत्यतः फलस्यैव प्राधान्यमिति सिद्धम् ॥ § 6438

अन्योन्यसंगतिविशेषित एव यस्मात्
वाक्यार्थभावमुपयाति पदार्थपुंजः ।
एतच्च चेतसि निधाय ततो न भिन्नं
वाक्यार्थमभ्यकधित च कश्चन सूत्रकारः ॥§ 6442

प्राधान्ययोगादथवा फलस्य
वाक्यार्थता तत्र सतां हि यत्नः ।
प्रयोजनं सूत्रकृता तदेव
प्रवर्तकत्वेन किलोपदिष्टम् ॥§ 6446

## उद्योगस्य वाक्यार्थत्वपक्षः

अपरे पुनः लिङादिशब्दश्रवणे सति समुपजायमानमात्मस्पन्दविशेषं उद्योगं नाम वाक्यार्थमाचक्षते । तत्स्वरूपं तु वयं न जानीमः, कोऽयमात्म स्पन्दो नामेति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारा हि नव आत्मनो गुणा विशेषगुणा भवन्ति, नान्ये । तत्रायमात्मस्पन्दः बुद्धिर्वा स्यात्, प्रयत्नो वा, इच्छाद्वेषयोरन्यतरो वा ? अन्ये तु विकल्पयितुमपि न युक्ताः । तत्र यदि बुद्धिरात्मस्पन्द उच्यते—तर्हि प्रतिभा वाक्यार्थ इत्युक्तं भवति; न नूतनं किंचिदुत्प्रेक्षितमेतत् ॥ § 6447

II.141/KSV

अथ प्रयत्न आत्मस्पन्दः, तर्हि भावनाया नामान्तरकरणमुद्योगेति ॥ § 6448

अथ इच्छाद्वेषयोरन्यतरोऽसौ—तर्हि सुखेच्छा, दुःखजिहासा वा वाक्यार्थ इति अक्षपादपक्ष एवायं, नापूर्वं किंचित् ॥ § 6449

अथापि भाट्टपरिकल्पितो व्यापार आत्मास्पन्दः,—सोऽपि भावनैव, नार्थान्तरम् ॥ § 6450

अथानुष्ठेयः प्रेरकः कश्चिदर्थ उद्योगः—स तर्हि नियोग एव; *उपसर्गान्यत्वमिदं, न वस्त्वन्यत् ॥ § 6451

३--४ ] फलं— nyāma-wit_xx
२७ ] दयं— nyāma-wit_gha

१ तः ] क्रियैव साध्या । स्वर्गश्च न क्रियारूपः । अतः न साध्यः किन्तु सिद्धः, घटादिवत् ॥
२७ * ] उत्, नि इति उपसर्गभेदमात्रम् ॥

तस्मादश्रुतपूर्वेण कृतमुद्योगपर्वणा ।
स भारतमनुष्याणां गोचरो न तु मादृशाम् ॥§ 6453

### वाक्यपदीयोक्तः प्रतिभाया वाक्यार्थत्वपक्षः

अन्यैस्तु प्रतिभा वाक्यार्थ इष्यते । तत्पक्षस्तु संसर्गनिर्भासज्ञाननिराकरणेन प्रागेव प्रतिक्षिप्यः ॥ § 6454

प्रतिभा खलु विज्ञानं तच्च शब्देन जन्यते ।
न तु शब्दस्य विषयः रूपधीरिव चक्षुषः ॥§ 6456

बाह्यस्य विषयस्याभावात् सैव विषय इति चेत्, न तस्य समर्थितत्वात् ॥ § 6457

II.142/KSV

### प्रकृतविचारस्य शब्दप्रामाण्योपयोगित्वम्

योऽपि व्याघ्र आयातः इत्युक्ते शूरकातरनराधिकरणनानाकारकार्योत्पादः—स बाह्येऽर्थे व्याघ्रागमनादौ प्रतिपन्ने वासनानुसारेण भवन् न प्रतिभामात्रहेतुको भवति । तस्य हि ज्ञायमानोऽर्थः करणम्, न तद्ज्ञानमात्रम् । अर्थस्तदानीं नास्तीति चेत्—विप्रलम्भवाक्यमिदं असत्यार्थं भविष्यति, न त्वबाह्यविषयं तत् । यथाऽवस्थिते वनितात्मनि बाह्येऽर्थे वासनानुसारेण कुणप इति, कामिनीति, भक्ष्यमिति प्रतिभा भवन्ति—तथाशब्दार्थेऽपि व्याघ्रागमनेऽवगते शूराणामुत्साहः, कातराण भयमित्यादि कार्यं भवति । न त्वेतावता प्रतिभा शब्दार्थो भवितुमर्हति । तस्मात् वाक्यप्रयोजनत्वेन वा यदि प्रतिभा वाक्यार्थः कथ्यते; कथ्यतां नाम, न त्वसौ शब्दस्याभिधेया । अनभिधेयाऽपि संसर्गवत् वाक्यार्थ इति चेत्—तत्राप्युक्तम् । संसृष्टा वाक्यार्थः, न संसर्गः । एवमिहापि प्रतिभावन्तोऽर्था वाक्यार्थः, न प्रतिभेति ॥ § 6458

शब्दस्य च प्रत्यक्षवत् वर्तमानार्थनिष्ठत्वाभावात् अनागताद्यर्थाभिधायिनोऽर्थासन्निधानेन प्रतिभापरत्वं यदुच्यते—तदप्ययुक्तम्—अनागतादिविषयत्वेऽपि तस्यार्थविषयत्वं प्रसाधितमिति कृतं विस्तरेण ॥ § 6459

### वाक्यार्थः परमार्थ एव तदयं नो कल्पनानिर्मितः

---

९ ] धिकार— nyāma-wit_gha
१३--१४ ] तथा—
nyāma-wit_ka;
nyāma-wit_gha

---

२ स ] भारतमनुष्याणां, उद्योगर्वेत्यादिः नर्मोक्तिः ॥
१२ दानीं ] तदानीं—शब्दोच्चारणकाले ॥

तद्वानप्युदितः पदस्य विषयस्तेनार्थसंस्पर्शिना ।
अप्रामाण्यमतश्च बाह्यविषयाभावेन यद्वर्ण्यते
तत्, शब्दस्य निरस्तमित्यकलुषं प्रामाण्यमस्य स्थितम् ॥§ 6463
इति श्रीजयन्तभट्टकृतौ न्यायमञ्जर्यां पञ्चममाह्निकम्

## २.२ षष्ठमाह्निकम्—शब्दपरीक्षा : पदवाक्यस्वरूपविमर्शः

II.143/KSV

ननु नाद्यापि शब्दस्य निरणायि प्रमाणता ।
*बीजं पदार्थवाक्यार्थबुद्धेर्न हि निरूपितम् ॥§ 6466

उच्यते—किमत्र निरूपणीयम् ? यदनन्तरं हि यद्भवति तत्तस्य निमित्तम् । पदवाक्यश्रवणे सति पदार्थवाक्यार्थसंप्रत्ययो भवतीति ते एव तत्र निमित्तम् ॥ § 6467

किं पुनरिदं पदं नाम ? किंच वाक्यमिति । उक्तमत्र वर्णसमूहः पदम्, पदसमूहो वाक्यमिति ॥ § 6468

### स्फोटवादोपक्षेपः

ननु ! एतदेव न क्षमन्ते । न हि वर्णानां समूहः कश्चिदस्ति वास्तवः । तेन कुतस्तत्समूहः पदं भविष्यति ? तदभावाच्च न तरां पदसमूहो वाक्यमवकल्पते । न च वर्णानां व्यस्तसमस्तविकल्पोपहतत्वेन वाचकत्वमुपपद्यते । तस्मादन्य एव स्फोटात्मा शब्दोऽर्थप्रतिपादक इति प्रतिजानते ॥ § 6469

II.144/KSV

### स्फोटवादस्य नैयायिकप्रतिकूलत्वम्

ननु ! एवमस्तु । स्फोटोऽन्य एवार्थप्रतिपादको भवतु । का क्षतिर्नैयायिकानाम् ? कथं न क्षतिः ! आप्तप्रणीतत्वेन हि शब्दस्य प्रमाण्यं तैरुक्तम् । स्फोटस्य च नित्यत्वेन नाप्तप्रणीतत्वम् । अतश्च यस्यानित्यत्वं वर्णात्मनः शब्दस्य साधितम्, नासावर्थप्रतीतिहेतुः । अतो न प्रमाणम् ।

९ ] नितरां— nyāma-wit_ka

१२ ] पदार्थ— nyāma-wit_ka

२ *] बीजं—कारणम् । पदस्वरूपस्य, वाक्यस्वरूपस्य, तेषां अर्थप्रत्यायन प्रकारस्य च दुर्निरूपत्वात् शब्दप्रामाण्यं दुरवस्थमेवेत्यर्थः ॥

यश्चार्थप्रतीतिहेतुः स्फोटात्मा शब्दः, तस्य नानित्यत्वम्, न चाप्तप्रणीतत्वमिति अस्थाने नैयायिकाः क्लिष्टा भवेयुः । तस्मादनित्यानां वर्णानामेव वाचकत्वं प्रतिष्ठापनीयम् । पराकरणीयश्च स्फोट इति ॥ § 6470

## वर्णा एवार्थप्रत्यायका इति प्रतिज्ञा

तदुच्यते—गकारादिवर्णावगमे सत्यर्थप्रतीतेर्भावात्, तदभावे चाभावात् तेषामेवार्थप्रत्यायनसामर्थ्यम् । त एव च श्रवणकरणकावगमगोचरतया शब्दव्यपदेशभाज इति न प्रतीत्यनुपारूढः स्फोटो नाम शब्दः कश्चित् प्रत्यक्षानुमानातीतः परिकल्पनीयः ॥ § 6471

## अनित्यानां वर्णानामर्थप्रत्यायकत्वाक्षेपः

आह—कथमेवं भविष्यति ? दूरापेता इमे मनोरथाः । कुतो वर्णानामर्थप्रत्यायकत्वम् ? ते हि वर्णा गकारादयः अर्थं प्रतिपादयन्तः समस्ताः प्रतिपादयेयुः ? व्यस्ता वा ? न तावद्व्यस्ताः; एकैकवर्णाकर्णने सत्यप्यर्थप्रतीतेरनुत्पादात् । सामस्त्यं वर्णानां नास्त्येव । तद्धि सत्ता मात्रेण वा स्यात् II.145/KSV ? प्रतीयमानत्वेन वा ? नैयायिकपक्षे तावत् सत्तया यौगपद्यमविद्यमानम्, आशुविनाशिनः शब्दस्य दर्शितत्वात् ॥ § 6472

## वर्णानां नित्यत्वेऽपि अर्थप्रत्यायकत्वासंभवः

अथापि मीमांसकमतेन नित्यः शब्द इष्यते, तत्रापि सत्तया यौगपद्यस्य सकलवर्णसाधारणत्वात् केन वर्णसमुदायेन कोऽर्थः प्रत्याय्येतेति नावधार्यते ॥ § 6473

अथोच्यते—न चक्षुरादीनामिव वर्णानां कारकत्वम्, येनागृही तानामेव सतां यौगपद्यमात्रमर्थप्रत्यायनाङ्गं स्यात् । *ज्ञापकत्वात्तेषां गृहीतानां सतां धूमादिवत् प्रत्यायकत्वमिति प्रतीतावेव सामस्त्यमुपयुज्यते इति ॥ § 6474

एतदप्यघटमानम् । *प्रतीतिसामस्त्यं हि किमेकवक्तृप्रयुक्तानां वर्णानाम् ? उत नानापुरुषभाषितानाम् ? तत्र—एकदा अनेकपुरुषभाषितानां

---

१ ] चेश— nyāma-wit_ka
४ ] भावा— nyāma-wit_gha
१७ ] येन— nyāma-wit_gha

---

१ मिति ] शब्दनित्यत्ववत् स्फोटनित्यत्वादिकमपि न वेदप्रामाण्योपपादकम् । इतर व्यावृत्तमीश्वरोपदिष्टत्वमेव तदुपपादकं भवेत् । वेदप्रामाण्यसमर्थनमेव हि न्याय शास्त्रस्य परम उद्देशः ॥
१५ त्वात् ] वर्णानां नित्यत्वं सर्वगतत्वं चात्र हेतुः ॥
१७ र्णानां ] कारकत्वं—अज्ञातत्वेऽपि स्वरूपत एव कार्यनिर्वर्तकत्वम् ॥
१८ *] शाब्दबोधस्य ज्ञानरूपस्य आत्ममनस्संयोगादिरेव कारकहेतुः । वर्णस्तु ज्ञातस्सन्नेव हेतुः ॥
२० *] प्रतीतिः—वर्णानां ग्रहणम् ॥

कोलाहलस्वभावत्वेन स्वरूपभेद एव दुरवगम इति कस्य सामस्त्यमसामस्त्यं वा चिन्त्येत ? सत्यपि वा तथाविधे सामस्त्ये नास्त्येवार्थप्रतीतिः ॥
§ 6475

एकवक्तृप्रयुक्तानां तु प्रयत्नस्थानकरणक्रमापरित्यागात् अवश्यंभावी क्रमः । क्रमे च सत्येकैकवर्णकरणिकार्थप्रतीतिः प्राप्नोति । न चासौ दृश्यत इति व्यस्तसमस्तविकल्पानुपपत्तेः न वर्णा वाचकाः ॥ § 6476
II.146/KSV

वर्णविषया अपि बुद्धयस्तथैव विकल्पनीयाः । ता अपि न युगपत्संभवन्ति । क्रमे च सति एकैकवर्णबुद्धेरर्थसंप्रत्ययः प्रसज्येतेति ॥ § 6477

## अन्तिमवर्णस्याप्यर्थप्रत्यायकत्वासंभवः

यदप्युच्यते—पूर्वपूर्ववर्णजनितसंस्कारसहितः—अन्त्यवर्णः प्रत्यायक इति—तदप्ययुक्तम्—संस्कारो हि नाम यदनुभवजनितः, तद्विषयमेव स्मरणमुपजनयति, न पुनरर्थान्तरविषयं ज्ञानमिति । स्मृतिद्वारेणासौ तर्ह्यर्थप्रत्यायकोऽसौ भविष्यतीति चेत्—एतदपि नास्ति, ज्ञानयौगपद्यप्रसङ्गात् । अन्त्यवर्णज्ञानानन्तरं हि पूर्ववर्णस्मरणमिव समयस्मरणमपि तदैवापतति । ततश्च ज्ञानयौगपद्यम् ॥ § 6478

न च क्रमोत्पादे किंचित्कारणमुत्पश्यामः । अथापि तेन क्रमेण भवेताम्, तथापि तदानीमन्त्यवर्णज्ञानमुपरतमिति कस्य साहाय्यकं पूर्वं वर्णस्मृतिर्विदधातीति ॥ § 6479

एतच्चानेकपूर्ववर्णविषयामेकां स्मृतिमभ्युपगम्योक्तम् । न पुन रेका सर्ववर्णगोचरा स्मृतिः । कुतः ? § 6480

भिन्नोपलंभसंभूत वासनाभेदनिर्मिताः ।
भवेयुः स्मृतयो भिन्नाः न त्वेकाऽनेकगोचराः ॥§ 6482

## वर्णसंकलनाज्ञानमप्यर्थप्रत्यायकं न

अथ वदेत्—*संकलनाज्ञानमेकं सदसद्वर्णगोचरं भविष्यति । त-
II.147/KSV द्रूपारूढाश्च वर्णाः अर्थं प्रत्याययिष्यन्तीति—तदपि दुराशामात्रम्—तथाविधज्ञानोत्पत्तौ कारणाभावात् । न चेन्द्रियमतीतवर्णग्रहणसमर्थम् । न

१--२ ] स्त्येनार्थप्रतीतिः— nyāma-wit_gha

२२ ] त्य— nyāma-wit_ka

२० संभूत ] वासना—संस्कारः । कारणानां संत्काराणामनेकत्वे सति तज्जन्यस्मृतेः एकत्वं कथं संभवेदित्याशयः ॥

२२ *] संकलनाज्ञानं—तावद्वर्णविषकमेकं समूहालम्बनात्मकं, समुच्चयात्मकं वा ज्ञानम् । सदसत् इति तत्कालदृष्ट्या ॥

संस्कारो वर्तमानग्राही भवति । न च युगपदिन्द्रियं संस्कारश्चेमां बुद्धिं जनयतः; संस्कारस्य सहचारदर्शनाद्याहितप्रबोधस्य सतः, स्मरणमात्रजन्मनि निर्ज्ञातसामर्थ्यस्येन्द्रियेण सह व्यापाराभावात् । तस्मात् न वर्णा वाचकाः ॥ § 6483

अतश्चैवम्—यदि ते वाचका भवेयुः, *विपरीतक्रमप्रयुक्ता अप्यर्थं गमयेयुः । क्रमश्चेदपेक्ष्यते, स व्यतिरिक्ताव्यतिरिक्ततया चिन्तनीयः । अव्यतिरेके त एव ते वर्ण इति कथं न बोधकाः ? व्यतिरेके तु किमप्यधिकं वाचकं अभ्युपगतं भवतीति मत्पक्षमाजिगमिषति भवान् ॥ § 6484

## व्युत्पत्तेरर्थप्रत्यायकत्वोपक्षेपः

ननु ? व्युत्पत्तिवशेन शब्दः अर्थप्रत्यायकतामुपयाति । व्युत्पत्तौ च यावन्तो यत्क्रमावर्णा यदर्थमभिवदन्तो दृष्टाः, ते तावन्तः तत्क्रमकास्तमर्थमभिवदिष्यन्तीति किं विकल्पमालया । तदुक्तम् श्लो. वा. १-१-५ स्फोटवाद श्लो ६९— § 6485

यावन्तो यादृशा ये च यदर्थप्रतिपादने ।
वर्णाः प्रज्ञा(?)सामर्थ्यः ते तथैवावबोधकाः इति ॥§ 6487

## व्युत्पत्तिपदार्थः

तदुच्यते—व्युत्पत्तिरेवेयं विचारणीया वर्तते । *परावगतिपूर्विका हि शाब्दात् स्वयमवगतिः । परावगतौ च के कियन्तः कथं कमर्थं प्रतिपादयन्तोऽनेन दृष्टाः येभ्यस्तथैव तमर्थं प्रतीयादिति दुरधिगमा हि वर्णवर्तनी ॥ II.148/KSV

यावन्तो यादृशा ये चेत्येवं तावत्प्रभाषसे ।
कियन्तः कीदृशाः केचेत्येवं यावन्न पृच्छयसे ॥§ 6490

तस्मात् सर्वप्रकारमवाचका वर्णाः ॥ § 6491

२ ] भ्या— nyāma-wit__ka
३ ] व्या— nyāma-wit__ka
१० ] मका— nyāma-wit__gha
१० ] म— nyāma-wit__gha

५ *] विपरीतेत्यादि—विपरीतक्रमेण वर्णानामुच्चारणेऽपि समूहालम्बनात्मकज्ञाने सर्वेषां वर्णानां विषयत्वात् वाचकत्वापत्तिः ॥
१३ *] प्रयोज्यवृद्धस्य प्रवृत्तिं पश्यन् बालः तस्य प्रवृत्तिं प्रयोजकवृद्धवाक्यार्थ ज्ञानमूलिकां जानन् हि व्युत्पद्यते ॥

## स्फोटवादः

अस्ति चेयं शब्दादुच्चरितात् तदर्थावगतिः। न चेयमकरणिकैव भवितुमर्हति। तदस्याः करणं स्फोट इति कार्यानुमानमिदमस्तु, परि शेषानुमानं वा, अर्थापत्तिर्वा। सर्वथाऽर्थप्रतीतिलक्षणकार्यवशात् कल्प्य मानं तत् करणं स्फोट इत्युच्यते। स च निरवयवः, नित्यः, एकः, निष्कारणक इति न वर्णपक्षक्षेपणदक्षदूषणपात्रतां प्रतिपद्यते। अतश्च स्फोटोऽर्थप्रतिपादकः, शब्दादर्थं प्रतिपद्यामह इति व्यवहारात्। भवतो हि वर्णजनितस्संस्कारोऽर्थप्रतिपादकः। तत्र शब्दात् इति प्रातिपदिकार्थोऽनुपपन्नः॥ § 6492

अथ वर्णाः शब्दशब्देनोच्यन्ते। ते चार्थप्रतिपादकाः इति—इदमन्यथासिद्धम्—तथापि शब्दात्(?') इत्येकत्वं विभक्त्यर्थो न संगच्छते। शब्देभ्यः II.149/KSV प्रतिपद्यामह इति व्यवहारः स्यात्। स्फोटात्मनि तु शब्देऽर्थ प्रतिपादके इष्यमाणे शब्दात् इति प्रातिपादिकार्थः, विभक्त्यर्थश्च द्वयमप्युपपन्नम्॥ § 6493

## वर्णानामर्थबोधकत्वासंभवः

ननु! न स्फोटः शब्दशब्देनोच्यते, किन्तु वर्णा एव। श्रोत्रग्रहणे ह्यर्थे शब्दाशब्दः प्रसिद्धः। त एव च श्रोत्रग्रहणा इति—नैतदेवम्— शब्दत्वस्यापि श्रोत्रग्रहणात्मनो भावात्। निर्झर झाङ्काररवप्रभृतीनां च सत्यपि श्रोत्रग्रहणत्वे शब्दकार्यनिर्वर्तकत्वानुपपत्तेः। तस्मात् यतोऽर्थप्रतिपत्तिः, स शब्दः। अर्थप्रतिपत्तिश्च स्फोटादेव, न वर्णेभ्य इति स्फोट एव शब्दः॥ § 6494

## स्फोटस्य शब्दात्मकत्वम्

ननु! *एवं सति धूमादीनामप्यथप्रतीतिहेतुत्वात् शब्दत्वं प्राप्नोति —मैवं वादीः—अथ गौः इत्यत्र श्रोत्रजप्रतिभासे बहवोऽर्थाः प्रतिभासन्ते, तत्र कस्तेषां शब्दः—इत्युपक्रम्य, यतोऽर्थप्रतिपत्तिः स शब्द इयुपसंहृते कुतो

---

४ ] ष्क्रमक— nyāma-wit__kha
६--७ ] तत्र— nyāma-wit__kha
८--९ ] तथापि— nyāma-wit__kha
१९ ] इत्येव— nyāma-wit__ka

---

२ इति] अर्थावगतिरूपात् कार्यात् तत्कारणस्य स्फोटस्यानुमानम्॥
५ न] वर्णस्यावगतिहेतुत्वपक्षस्य क्षेपणे—निरसने दक्षाणां दूषणानां पात्रताम्॥
७ न्नः] उपपन्नः—स्फोटस्य शब्दत्वात्। संस्कारस्यार्थप्रतिपादकत्वे त्विदमनुपपन्नमेव॥
८ ते] स्मृतिविषयास्सन्तः ते—इत्यर्थः॥
११ म्] वाक्यस्फोटस्य एकत्वात्॥
१६ त्वे] शब्दकार्यं—अर्थप्रतीतिः॥
१८ *] एवं सति—श्रोत्राग्राह्यत्वेऽपि अर्थप्रतीतिजनकत्वमात्रात् शब्दपद वाच्यत्वे॥
१ संहृते] अथ गौरित्यत्र कः शब्दः ? गकारोत्तरौकारोत्तरविषर्जनीया इत्युपवर्षः इति शाबरभाष्यम् १-१-५॥

धूमादीनां शब्दत्वशङ्कावकाशः ॥ § 6495

ननु चेयमर्थप्रतीतिः वर्णेषु भवत्सु भवन्ती, तेष्वभवत्सु चाभवन्ती तानुत्सृज्य कथं स्फोटकार्यतामुपयायात्—उच्यते—अनन्यथासिद्धं तद्भावभावित्वं तत्कार्यतामवगमयति, नान्यथासिद्धम् । *इदं त्वन्यथासिद्धम् । का पुनरन्यथासिद्धिः ! स्फोटव्यंजकत्वात् वर्णानां तदानन्तर्यमर्थप्रतीतेरुपप्लवते । वर्णाभिव्यक्तः स्फोटोऽर्थप्रतीतिमादधाति । भ्राम्यति जनः वर्णैरियमर्थप्रतीतिरुत्पादितेति ॥ § 6496 II.150/KSV

## स्फोटवादे पूर्वोक्तदोषानवकाशः

ननु स्फोटव्यक्तावप्रीदानीं वर्णानां क्व गतास्ते व्यस्तसमस्तविकल्पाः । आह च भट्टः श्लो-वा-११-५-स्फोट-८४ § 6497

यस्यानवयवः स्फोटः व्यज्यते वर्णबुद्धिभिः ।
सोऽपि पर्यनुयोगेन नैवानेन विमुच्यते इति ॥§ 6499

भाष्यकृताऽपि—ननु संस्कारकल्पनायामदृष्टकल्पना इत्याशंक्य प्रतिविहितं *शब्दकल्पनायां सा च शब्दकल्पना च शा-भा-१-१-५ इति—नैषदोषः—न स्फोटव्यक्तौ विकल्पाः प्रभवन्ति । कुतः ? § 6500

एके तावदाचक्षते प्रथमवर्णश्रवणवेलायामेव स्फोटोऽभिव्यक्तो भवति । न च द्वितीयादिवर्णवैफल्यम्; तदवगतेरेवातिशयकरणात् । यथा रत्नपरीक्षकाणां प्रथमदर्शने रत्नरूपममलमप्रकाशमानमपि पुनः पुनः परीक्षमाणानां चरमे चेतसि चकास्ति निरवद्यं रत्नतत्त्वम्—एवमिहापि प्रथमवर्णश्रुत्या व्यक्तेऽपि स्फोटे स्फुटतरप्रतीत्यै वर्णान्तराणि प्रयोक्ष्यन्त इति ॥ § 6501
II.151/KSV

## ध्वनेः स्फोटव्यञ्जकत्ववर्णासत्यत्वपक्षः

७ ] तिपत्ति— nyāma-wit__gha
१४ ] यां— nyāma-wit__kha
१६ ] म— nyāma-wit__ga
१८ ] ज्य— nyāma-wit__ka

५ *] इदं—वर्णानां अर्थप्रत्यायकत्वम् ॥
१२ *] पदस्फोटवाक्यस्फोटाद्यभिव्यक्त्यर्थं श्रुतचराणां तेषां संस्कारस्य हेतुत्वं कल्पनीयम् । पुनस्तैः स्फोटः, ततः शब्दबोधः । एवंचेत् संस्कारा एव शब्दबोधजनिका भवन्तु, तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इतिन्यायात् ॥
१४ ति] स्फोटस्य अखण्डत्वात् प्रथममेवाभिव्यज्यते ॥

अपरे तु वदन्ति—ध्वनय एव स्फोटस्य च व्यंजकाः । तैश्च मरुद्भिः अनवयव एव एष स्फोटोऽभिव्यज्यमानः ताल्वादिस्थानकरणसंयोगोपाधिवशोपप्लवमाननानाकारगकारादिभागयोगीव प्रतिभासते । मरुतां चंचलत्वादुच्चारितप्रध्वंसिनस्ते तं काल्पनिकाकारमवभासयन्ते । दृष्टं चोपाधिवशादसत्यमपि रूपमवभासमानम् । यथा—कृपाणमणिदर्पणादिव्यंजकभेदेन श्यामदीर्घादिरूपं वदनस्य । नादात्मको हि शब्दः वीणावेणुमृदङ्गपटहादिव्यंजकभेदेन नानात्वमुपगच्छन् दृश्यते । तस्मान्न पारमार्थिका एव ते वर्णाः, न च स्फोटस्य व्यंजका इति क्व समस्त व्यस्तविकल्पाः प्रभवेयुः ॥ § 6502

उपाधिभेदेन प्रतिभासमाना असत्याकाराश्च तेऽर्थप्रत्ययान्वयव्यति रेकानुविधायिनो दृश्यन्ते ॥ § 6503

तेन यदुच्यते शब्दकल्पनायां कल्पनाद्वैगण्यमिति—तत्रैकगुणाऽपि कल्पना नास्ति । का कथा द्वैगुण्यस्येति । तस्मात् स्फोटात्मकादेव शब्दादर्थप्रत्ययः । वर्णानुविधायित्वं तु तस्यान्यथासिद्धमिति सिद्धम् ॥ § 6504

अपि च तार्किकाणामनुमानप्रियत्वात् तत्परितोषायेदमनुमानमभ्यधायि, न परमार्थतः । परमार्थतस्तु श्रौत्रे प्रत्यये प्रतिभासमानः प्रत्यक्ष एव स्फोटः ॥ § 6505

II.152/KSV

## स्फोटस्य प्रत्यक्षत्वसाधनम्

आह—किमिदमपूर्वं तस्कराचरितं वर्तते—वर्णाः प्रत्यक्षमुपलभ्यमाना अपि दुर्भगाः न प्रत्यक्षाः, स्फोटः पुनरनवभासमानोऽपि सुभगः प्रत्यक्ष इति—उच्यते—न ब्रूमः वर्णा न प्रत्यक्षा इति । ते पुनरसन्तोऽपि उपाधिवशाद्वदनदैर्घ्यादिवदवभासन्ते । शब्दस्त्वेको निरवयवः प्रतीयते । तथा च पदमिति वाक्यमिति एकाकारा प्रतीतिरस्ति । न च भिन्ना वर्णास्तस्यामालम्बनीभवन्ति । न हि सामान्यप्रत्ययः व्यक्त्यालम्बनः, अवयविप्रत्ययो वाऽवयवालम्बनः । न च सेनावनादिबुद्धिवदयथार्था पदवाक्यबुद्धिः, बाधकाभावात् ॥ § 6506

## पद वाक्यार्थबुद्धीनामैक्यं नौपाधिकम्

१२ ] व— nyāma-wit__ka
२२ ] ल— nyāma-wit__ka
२२ ] प्र— nyāma-wit__gha

१ च] चकारात् वर्णपरिग्रहः । परन्तु वर्णाः अपरमार्थाः, स्फोटस्तु परमार्थः । मणिकृपाणाद्यभिव्यङ्ग्ये मुखे सत्यत्वं, श्यामदीर्घतादावसत्यत्वमिति एकाभिव्यञ्जकव्यङ्ग्यत्वेऽपि विशेषः स्पष्टः ॥
१८ अपि] दुर्भगाः—दौर्भाग्यवन्तः । सुभागः—सौभाग्यवान् ॥
१८ मानोऽपि] दुर्भगाः—दौर्भाग्यवन्तः । सुभागः—सौभाग्यवान् ॥
२२ न्ति] पूर्वोक्तप्रत्येकसमुदायविकल्पदुष्टत्वात् ॥

एकार्थप्रत्ययवत्त्वोपाधिकृतेयमेकाकारा बुद्धिरिति चेत्—एका-र्थ प्रतीतिरिदानीं कुतस्त्या ? पदवाक्यप्रतीतिपूर्विका हि पदार्थवाक्यार्थप्रतीतिः, पदार्थवाक्यार्थप्रतीत्याख्यकार्यैक्याच्च पदवाक्यबुद्धिरेकाकारेति दुरुत्तरमितरेतराश्रयत्वम् ॥ § 6507

औपाधिकत्वं च सामान्यावयविबुद्धेरपि सुवचम् । बाधसंदेहरहित प्रतीतिदार्ढ्यात् तत्र परिहार इति चेत्—तदितरत्रापि समानम् । तस्मात् पदबुद्धेः पदस्फोटः, वाक्यबुद्धेश्च वाक्यस्फोटो विषय इति प्रत्यक्ष एव स्फोटः । तत्र पदस्फोटात् पदार्थप्रतिपत्तिः, वाक्यस्फोटाच्च वाक्यार्थ प्रतिपत्तिः ॥ § 6508

II.153/KSV

## वाक्यस्फोटनिरूपणम्

आह—यदि निरवयवः स्फोटात्मा शब्दो भवति, *वाक्यमपि शब्द एव । तस्य पदात्मकास्त्ववयवा मा भूवन् । तस्य चेत् पदात्मानोऽवयवा भवन्ति, पदस्यापि तर्हि वर्णात्मानोऽवयवा भवन्तु—उच्यते—किंचिदुच्छ्वसितमिव मे हृदयम् । मन्ये भविष्यत्यायुष्मतो विवेकालोकः । बोध्यमानो भोत्स्यसे किंचित् । ध्वन्युपाधिभेदप्रवृत्तवर्णभेदावभासविप्रलब्धबुद्धिं भवद्विधं बोधयितुं पदस्फोट एष निरवयवोऽस्माभिर्दर्शितः । परमार्थतस्तु पदस्फोटो वाक्यावयवभूतो नास्त्येव । निरवयवमेव वाक्यं निरवयवस्यैव वाक्यार्थस्य बोधकम् । यथा पदस्यावयवा न सन्ति, तथा वाक्यस्यावयवाः पदानीति । तथा चाहुः—वाक्ये पदानामसत्त्वात् तदर्थे पदार्थानां निरवयवौ वाक्यवाक्यार्थाविति ॥ § 6509

अवयवकल्पनायां हि यथा वाक्यस्यावयवाः पदानि, पदानामवयवा वर्णाः, एवं वर्णानावप्यवयवैर्भवितव्यम् । तदवयवानामप्यवयवान्तरैरित्यानन्त्यात् का व्यवस्था स्यात् । वर्णान् प्राप्य तु यद्यवयवकल्पनातो विरन्तव्यं, तद्वाक्य एव विरम्यताम् ॥ § 6510

## वाक्यस्याखण्डत्वम्

३ ] द्व— nyāma-wit__ka
१२ ] त्म— nyāma-wit__kha
१५--१७ ] व— nyāma-wit__gha
१८ ] सत्त्वं त— nyāma-wit__kha

१० *] वाक्यस्फोटः, पदस्फोटः, वर्णस्फोटः इत्यनुक्रमश्चेत् वर्णपक्षेऽपि इदं समानमेव । अतश्च पूर्वोक्तकल्पनाद्वयानतिपातः ॥
१७ दानीति ] न सन्ति इत्याकर्षः ॥

एकघटनाकारा हि वाक्यार्थबुद्धिः तथाविधादेव वाक्यादुत्पत्तुमर्हति वृद्ध-व्यवहाराद्धि शब्दार्थे व्युत्पद्यन्ते व्यवहर्तारः । तत्रास्य पदस्य प्रयोग एव न II.154/KSV केवलस्य दृश्यते, व्यवहारानङ्गत्वात् । वाक्यं तु प्रयोगार्हमिति तत्रैव व्युत्प-त्तिः । तत एवार्थसंप्रत्ययः । *अवयवप्रतिभासस्तु भ्रममात्रम् । अर्थोऽपि वाक्यस्य एक एव नरसिंहाकारः । जात्यन्तरं हि नरसिंहो नाम । तत्र न नरार्थः, नापि सिंहार्थः ॥ § 6511

## वाक्यार्थस्याप्यखण्डत्वम्

एवं पदार्थेभ्योऽन्य एव वाक्यार्थः, पानकादिवत् । यथा पान-कः शर्करानागकेसरमरीच्यादिभ्योऽर्थान्तरमेव, यथा च सिन्दूरहरिताल-लाक्षादिभ्योऽर्थान्तरमेव चित्रम्, यथा वा षड्जर्षभगान्धारधैवतादिभ्योऽर्थान्त-रमेव ग्रामरागः; तथा पदेभ्यो वाक्यम्, पदार्थेभ्यो वाक्यार्थः ॥ § 6512

कथं तर्हि तदंशावगम इति चेत्; कल्पनामात्रं तत्, नासौ परमार्थः । तच्छब्दानुगमे तदर्थानुगमदर्शनात् पारमार्थिकत्वं भागानामिति चेत्—न—कूपसूपयूपानामेकाक्षरानुगमेऽप्यर्थानुगमाभावात् ॥ § 6513

न च केवलानुगममात्रेण तत्कारणभावो वक्तुं शक्यः, *रेणुपट-लानुगामितया करितुरगादिवत् पिपीलिकापङ्क्तेरपि दृश्यमानायास्तत्कारणत्व-प्रसङ्गात् । तस्मात् प्रकृतिप्रत्ययांशवत् असत्पदार्थपरिकल्पनं वाक्यार्था व-गमोपायतयाऽऽश्रीयते, न त्वर्थस्तदीयः तत्राश्वकर्णादिवदुपलभ्यते ॥ § 6514

## असत्यानामपि सत्यप्रत्यायकत्वम्

असत्यमपि सत्योपायतां प्रतिपद्यमानं दृश्यते । अलीकाहिदंशादयः स-त्यमरणकारणं भवन्ति । लिप्यक्षराणि चासत्यान्येव सत्यार्थप्रतिपत्तिमादधति ॥ § 6515

II.155/KSV

स्वरूपसत्यानि तानीति चेत्—न—रेखारूपतया तेषामर्थाप्रति पादक-त्वात् । गकारोऽयमित्येवंगृह्यमाणा रेखा अर्थप्रत्ययहेतवः । तायेन रूपेण सत्याः, तेन नार्थप्रदिपादकाः; येन चार्थप्रतिपादकाः, तेन न सत्या इति ॥ § 6516

४ ] र्थे— nyāma-wit__ka
१५ ] मि— nyāma-wit__ka
२१ ] तेषां— nyāma-wit__gha

३ त्वात्] न हि पदेन व्यवहरन्ति, अपि तु वाक्येन ॥
४ *] अवयवः—पदादिरूपः ॥
११ र्हि] तदंशावगमः—तदंशतया प्रतीतिः ॥
१४ *] करितुरगादौ गच्छति रेणुरुत्तिष्ठति । तत्रैव मार्गे अकस्मात् पिपीलिकाऽपि गच्छति । अत्र पिपीलिकापि रेणूद्गमहेतुस्स्यात् ॥
२१ त्यानि] अलिदंशभ्रमः खलु सत्य एव । रेखा अपि सत्या एव ॥
२२ ता] येन—रेखात्वेन । येन च—वर्णत्वेन ॥ अलिदंशभ्रमेऽपि, भ्रमत्वेनं न तस्य मरणहेतुत्वम् । अपि तु प्रमात्वभ्रान्त्यैव ॥

## प्रकृतिप्रत्ययादिविभागानामपारमार्थिकत्वम्

ननु प्रकृतिप्रत्ययाद्यंशा अपि परमार्थसन्त एव; तथा प्रतिभासात्, अर्थप्रत्ययहेतुत्वाच्च—नैतदेवम्—अन्वाख्यानभेदेन तेषां स्वरूपेणेयत्तानिश्चयानुपपत्तेः । भवतीत्यत्र भूशब्दः प्रकृतिः क्वचिदन्वाख्यायते, क्वचिद्भवशब्दः । प्रत्ययादेशागमगुणवृद्धिवर्णलोपाद्यन्वाख्यानविसंवादात् कः पारमार्थिकः प्रकृतिप्रत्ययविभागः ? कल्पनामात्रं त्वेतत् इयं प्रकृतिः, एष प्रत्यय इति । एवं पदार्थानामपि वाक्यार्थपरिकल्पनयैवापोद्धारः । तदुक्तम् वाक्य-३-१—
§ 6517

पदं केश्चिद्द्विधा भिन्नं चतुर्धा पंचधाऽपि वा ।
अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत् इति ॥§ 6519

## पदानामपि अपारमार्थिकत्वम्

अपि च पारमार्थिकत्वे पदानां नियतमविसंवादिरूपं प्रतीयेत विसंवादि तु तत् । *नामाख्यातसाधारणवर्णसन्निवेशदर्शनात् न नियत तेषां रूपम् । (II.156/KSV) अतः काल्पनिकमेव तत, न वास्तवम् । न च निश्चेतुमपि तत् पार्यते । कालेनदन्तिनागाः इत्यत्र कीदृशः पदविभागः ? अर्थ द्वयोपपत्तेः । उभयत्र च वर्णतुल्यत्वात् । किं कालेन—कृष्णेन दन्तिना —हस्तिना अगाः—त्वं गतः—इत्येवमेतानि पदानि व्यवस्थाप्यन्ताम्, अथ काले—समये, नदन्ति—शब्दायन्ते—नागा—करिणः फणिनो वेति । तस्मादनियमात् न पदतदर्थविभागः पारमार्थिकः ॥ § 6520

अथ प्रथमप्रतिपन्नवाक्यार्थानुसारेण पदतदर्थविभागो व्यवस्थाप्यते, तर्हि किं तेन तदानीं व्यवस्थापितेन ? वाक्यार्थस्य प्रथममेव प्रतिपन्नत्वात् ॥
§ 6521

किंच दध्यत्र मध्वत्रेति दधिमधुपदयोरिकारोकारयोरदर्शनेऽपि तदर्थसंप्रत्ययो दृश्यते । तस्मादपि न पारमार्थिकः पदवर्णविभागः । निरस्तावयवं वाक्यं तथाविधस्यैव वाक्यार्थस्य वाचकमिति सिद्धम् ॥ § 6522

---

३ ] द्भाव— nyāma-wit_ka
४ ] द— nyāma-wit_gha
१३ ] अगास्त्वम्— nyāma-wit_kha
१४ ] न्ति— nyāma-wit_gha
१९ ] र्द— nyāma-wit_gha

---

३ ब्दः ] भव इव आचरति भवति इति क्विप् ॥
९ *] भवति इति तिङन्तमपि, भवच्छब्दः सप्तम्यन्तमपि ॥

### स्फोटस्य परमतत्त्वरूपत्वम्

ननु यथा पदेषु वर्णा न सन्ति, वाक्येषु पदानि न सन्ति, तथा महावाक्येष्ववान्तरवक्यान्यपि न स्युः । ततः किम् ? महावाक्यान्यपि प्रकरणापेक्षया न तात्त्विकानि स्युः । ततः किम् ? *प्रकरणान्यपि शास्त्रापेक्षया न स्युः । ततोऽपि किम् ? एकमेवेदं शास्त्रतत्त्वमविभागमद्वयमापतति ॥ § 6523

उच्यते—यदि तत्त्वं पृच्छसि, बुद्ध्यसे वा—तदा एवमेवैतत् साधो ! II.157/KSV शब्दब्रह्मैवेदमद्वयमनाद्यविद्यावासनोपप्लवमानभेदमर्थभावेन विवर्तते । न तु वाचकाद्विभक्तं वाच्यमपि नाम किंचिदस्ति । तस्मात् काल्पनिक एव वाच्यवाचकविभागोऽयमविद्यैव विद्योपाय इत्याश्रीयते । वाग्रूपता तत्त्वम्, सर्वत्र प्रत्यये तदनपायात् । यथोक्तम वाक्य-१-१२५— § 6524

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
*न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी इति ॥§ 6526

### वाक्तत्त्वप्रभेदः

सा चेयं वाक् त्रैविध्येन व्यवस्थितैवावभासते—वैखरी, मध्यमा, पश्यन्तीति । तत्रेयं स्थानकरणप्रयत्नक्रमव्यज्यमानगकारादिवर्णसमुदायात्मिका या वाक्, सा वैखरीत्युच्यते । विखर इति देहेन्द्रियसङ्घात उच्यते । तत्र भवा वैखरी । तदुक्तम्— § 6527

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना इति ॥§ 6529

या पुनरन्तस्संकल्प्यमानक्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमोच्यते । तदुक्तम्— § 6530

---

६ ] वा— nyāma-wit__kha
७ ] शास्त्रे— nyāma-wit__gha

---

३ *] प्रकरणं निर्दिष्टविषयकम् । शास्त्रं तु समग्रम् ॥
७ ते] विविधं प्रतीयते । विविधं परिणमत इति वा । वाक्यपदीये विवर्तपरिणामशब्दौ पर्यायता प्रयुक्तौ ॥
९ विद्यैव] विद्योपायः—ज्ञानसाधनम् । असत्यात्सत्यसिद्धेरिदं मूलम् ॥
१० त्र] प्रत्यये—प्रतीतौ । न सोऽस्तिप्रत्ययो लोके यश्शब्दानुगमादृते इति हरिः ॥
१२ *] ज्ञानं जातमपि घटोऽयं इत्यादिप्रत्यवमर्शः यावन्न जातः, तावत् अर्थप्रकाशात्मकमपि तत् न तथा ज्ञायेत । व्यवहारानुगुण्यापादनमेव ज्ञानकृत्यम् ॥
१४ न्तीति] परासंज्ञकस्तु शब्दः अनिर्वचनीय इत्यदभिप्रायेणात्र नोक्तः ॥

II.158/KSV

केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते इति ॥§ 6532

या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशसंविद्रूपा वाक्, सा पश्यन्तीत्युच्यते । तदुक्तम्— § 6533

अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी इति ॥§ 6535

तदलमतिप्रसक्तानुप्रसक्त्या । द्राधीयसी चर्चेयं प्रकृतान्तरायकारिणीति न प्रतन्यते ॥ § 6536

## सर्वं व्यवहारमात्रम्

इह त्वेतावतैव पुनः प्रयोजनं—वर्णपदपूर्वको व्यवहारः न भवतीति । वाक्येन लोके व्यवहारात्, तस्य चावयवावयविव्यवस्थाऽनुपपत्तेः निर्भागमेव तत् वाचकं, निर्भागश्च तस्य वाच्यो ऽर्थ इति । अवान्तरवाक्यमपि प्रयोगयोग्यं व्यवहारकारणमिति तन्न निह्नूयते । अविद्यावस्थेयं वर्तते । तत्रेयं व्यवहारवर्तनी यथादृश्यमानैवास्तु । विद्यायां सर्वमेवेदमसारमिति ॥ § 6537

*पदेन तु वर्णेन वा व्यवहाराभावात्, तस्य केवलस्याप्रयोगात् तत्स्वरूपमस्यामपि दशायां न वास्तवमिष्यत इति ॥ § 6538

II.159/KSV

## स्फोटवादोपसंहारः

१० ] दं समान—
nyāma-wit_gha

१० मिति ] शून्यविवर्तवादः, विज्ञानविवर्तवादः, शब्दविवर्तवादः, ब्रह्मविवर्तवादश्चेति चत्वारो विवर्तवादाः प्रायः शब्दभेदमात्रे पर्यवस्यन्ति । निरूपणप्रक्रिया तु समाना ॥

११ *] वाक्यमेव कल्पितं चेत् किमु वक्तव्यं प्रत्येकपदानां वर्णानां वा !

तस्मादेकक्रमविरहितः कल्पितासद्विभागः
वाक्यस्फोटो जनयति मतिं तादृशीं स्वाभिधेये ।
वर्णास्त्वेते प्रकृतिलघवः कल्पनैकप्रतिष्ठाः
तस्मिन्नर्थे विदधति धियं नेत्यलं तत्कथाभिः ॥§ 6542

—स्फोटवादोपसंहारः— § 6543

## स्फोटवादनिराकरणम्

अत्राभिधीयते—किमयमनुमानमहिम्ना स्फोटाभ्युपगमः, प्रत्यक्षप्रतीतिबलवत्तया वा ? § 6544

न तावदनुमानतः स्फोटस्वरूपमुपपादयितुं पार्यते । परिदृश्यमानविशिष्टानुपूर्वीकवर्णकलापकरणेन अर्थप्रतीतेर्घटमानत्वात् ॥ § 6545

## वर्णानां वाचकत्वसमर्थनम्

ननु व्यस्तसमस्तादिविकल्पैरुत्सादितं वर्णानां वाचकत्वम्—नैतत्; दुर्विकल्पास्ते—व्यस्तानां तावद्वाचकत्वं नेष्यत एव वर्णानाम् । समस्ता एव ते वाचकाः ॥ § 6546

यत्तु—तत्सामस्त्यं नास्ति, क्रमभावित्वादिति पुट —तदसत्— क्रमभाविनामपि समस्तानां कार्यकारिणां अनेकशो दर्शनात् । यथा युगपद्भाविनः समस्तास्त्रयो ग्रावाणः एकां नासां धारयन्तो दृश्यन्ते ॥ § 6547

II.160/KSV

तथा क्रमभाविनोऽपि समस्ता ग्रासा एकां तृप्तिमुत्पादयन्तो दृश्यन्ते । एकस्मिन्नपि हि ग्रासे हीयमाने न भवति तादृशी तृप्तिः । अतः समस्ता एव ते ग्रासाः तृप्तेः कारणम् । न च समस्ता अपि ते ग्रासा युगपत्प्रयोक्तुं शक्याः ॥ § 6548

तथा एकानुवाकग्रहणे संस्थानां क्रमभाविनीनामपि सामस्त्ये सति सामर्थ्यम् । एकया संस्थया तदामुखीकरणासंभवात् । एवं तावल्लोके सामस्त्यं क्रमभाविनां दृष्टम् ॥ § 6549

वेदेऽपि दर्शपूर्णमासाभ्यां इतीतरेतरयोगशंसिना द्वन्द्वेन समर्पितसाहित्यानां आग्नेयादियागानां पक्षद्वये प्रयोज्यत्वेन चापरिहार्यक्रमाणा

३ ] विष्टाः— nyāma-wit_gha
२१ ] विना त— nyāma-wit_ga

१५ एकां] अधस्ताद्दारुणि शिला, नासा दारूपरि स्थितम् इत्यमरः पुट-१२ द्वारोपरितनशिला । इतरपार्श्वत्रयस्थितशिलाभिः (?) यते ॥
२० णे] संस्था—धारणा । प्रकृते तदुपायः ॥
२४ आग्नेयादियागानां] पक्षद्वये—शुक्लपक्षकृष्णपक्षयोः । दर्शयागे त्रयः, पौर्णमास्यां त्रयश्च विहिताः ॥

मेकाधिकारसंपादकत्वं दृष्टम् । तथा ऐन्द्रवायवं गृह्णाति आश्विनं गृह्णाति इति सोमग्रहणाभ्यासानां समस्तानां क्रमभाविनां च एकप्रधान निर्वर्तकत्वं दृष्टमिति । अतश्च नायं विरोधः—सामस्त्यं क्रमभावित्वं चेति ॥ § 6550

एवं क्रमवर्तिनोऽपि वर्णा एवार्थाभिधायिनो भविष्यन्ति ॥ § 6551

## वर्णानां क्रमेणार्थप्रत्यायकत्वेऽविरोधः

ननु ग्राससंस्थादीनां युक्तं समस्तानां क्रमभावित्वम् । यतः कार्यमपि तदीयं तृप्त्यादि क्रमेण निर्वर्त्यमानं दृश्यते । वर्णेभ्यस्तु क्रमेण श्रूयमाणेभ्यः न यावती, तावती अर्थावगतिमात्रा निर्वर्त्यमाना दृश्यते ॥ § 6552

II.161/KSV

यद्येवमाग्नेयादिभ्यस्तर्हि क्रमेण निर्वर्त्यमानं किं कार्यमुपलभ्यते ? अवान्तरापूर्वमिति ब्रूमः, शब्दप्रामाण्यात् । परमापूर्वनिर्वृत्तिस्तु तेषां सामस्त्ये सति सेस्यतीति—उच्यते । *अवान्तरापूर्वनिर्वृत्ताविदानीं क्रमभाविनामाग्नेयावयवभूतक्रियाक्षणानां किमवान्तरं कार्यं, का वा तस्य निर्वृत्तिरुपलभ्यते ? § 6553

## वर्णानां क्रमेणार्थबोधनसमर्थनम्

अपि च यथाभिमतं यत् कार्यं, तदभिसन्धानेन प्रवृत्तिः । तत् सामस्त्यात्पूर्वं न क्वचिदुपलभ्यते । न ह्यवान्तरापूर्वेण *स्वर्गमात्रा काचिदभिनिर्वर्त्यते, शास्त्रार्थस्य तदानीमनिष्पन्नत्वात् । अतः किमवान्तरापूर्वेण कृतेनापि । यत्किंचित्त्ववान्तरापूर्वप्रायं कार्यं वर्णेष्वपि न न दर्शयितुं शक्यते । किं तदिति चेत्—स्वरूपग्रहणं संस्कारो वा भविष्यति ॥ § 6554

तयोः प्रधानकार्यावयवत्वं नास्तीति चेत्—मा भूदनयवत्वम्, तदुपयोगिता तु विद्यत एव । अवयवावयविव्यवहारस्तु अवान्तरपरमापूर्वयोरपि दुरुपपादः । पदानां तु वाक्यार्थप्रितिपत्तिलक्षणप्रधानकार्यावयवभूतपदार्थज्ञानाख्यकार्यनिर्वर्तकत्वमतिस्पष्टमस्त्येवेति न तेष्वेष दोषः प्रादुष्यात् ॥ § 6555

II.162/KSV

---

३ ] इ— nyāma-wit__ka
५ ] म— nyāma-wit__gha
१३--१४ ] न— nyāma-wit__kha
१६ ] व— nyāma-wit__ca

---

१० *] आग्नेयादिभिरवान्तरापूर्वनिर्वृत्तिर्वक्तव्या चेत्, आग्नेयाङ्गभूतब्रीह्यवहननादिक्रियाभिः प्रथमं किं कार्यं निर्वर्त्यत इति वक्तव्यम् । आहत्यावान्तरापूर्वनिर्वृत्तिश्चेत्प्रकृतेऽपि समानम् ॥
१३ च] स्वर्गसाधनत्वेन ज्ञात्वा तत्र प्रवर्तते, न तु अवान्तरापूर्वसाधनत्वेन ॥
१४ *] स्वर्गमात्रा—स्वर्गलेशः ॥
२१ दोषः] एष दोषः—अबान्तरापूर्वपरमापूर्वयोर्लेशतोऽपि संबन्धानवगमरूपः ॥

वर्णानामपि, गमनक्रियाक्षणानामिव ग्रामप्राप्तौ, ग्रासानामिव तृप्तौ संस्थानामिवामुखीकरणे यद्यपि क्रमोपचीयमानतत्कार्यमात्रसमुत्मेषो नास्ति; तथापि तदौपयिकस्योपलब्धिसंस्कारादिकार्यस्य करणात् तत्कार्यावयवस्तावत्कृतो भवतीति न समस्तानां क्रमकारित्वमपहीयते। तत्र पूर्वे वर्णा अतीता अप्युपकरिष्यन्ति, चरमवर्णस्तु वर्तमान इतीदृश एवायं काल्पनिकः क्रियाक्षणसमूह इव वर्णसमूहोऽर्थप्रत्यायकः ॥ § 6556

## संकलनाज्ञानस्यापि संभवोपपादनम्

अथवा क्रमोपलब्धेष्वपि वर्णेषु मानसमनुव्यवसायरूपमखिलवर्ण विषयं संकलनाज्ञानं यदुपजायते, तत् अर्थप्रत्यायनाङ्गं भविष्यति। दृश्यते च विनश्वरेष्वपि पदार्थान्तरेषु क्रमानुभूतेषु युगपदनुव्यवसायो मानसः शतमाम्राणि भक्षितवान् देवदत्तः इति। न चायं प्रत्ययोनास्ति, सन्दिग्धः, बाध्यते वा। अनभ्युपगम्यमाने चेदृशि समुच्चयज्ञाने तन्निबन्धना भूयांसो व्यवहारा उत्सीदेयुः ॥ § 6557

स चायं संकलनाप्रत्ययः स्मर्यमाणानुभूयमानप्राक्तनान्त्यवर्णविषय तया सदसद्वर्णगोचरश्चित्ररूप उपेयते। यदि वाऽन्त्यवर्णेऽपि तिरोहिते भवन् असद्वर्णगोचर एव चित्राकारः सोऽर्थप्रतीतिहेतुरेक एवेति निरवकाशा व्यस्तसमस्तविकल्पाः ॥ § 6558

II.163/KSV

## क्रमविशिष्टतावद्वर्णविषयकं सङ्कलनाज्ञानम्

ननु ! संकलनाप्रत्ययेऽपि यदि ते वर्णाः क्रमेणावभासन्ते, तदसावपि पूर्वोत्पन्नैकैकवर्णबुद्धिर्निर्विशेष एव स्यादिति तदुपारूढा अपि वर्णा नार्थप्रतीतिहेतवो भवेयुः। यदि त्वेकसुमनस्तबकाकारवती स प्रत्ययः, तदा तस्मिन् क्रमानवगमात् विपरीतक्रमा अपि ते वर्णा अर्थप्रतीतिकारिणः स्युः—उच्यते—विशिष्टानुपूर्वीकवर्णमालाऽनुभवसमनन्तरभावी हि संकलनाप्रत्ययोऽर्थप्रतीतेर्हेतुः, न स्तबकाकारपरिच्छेदमात्रम्। विपरीतक्रमाशङ्कनं च तदानीं कुतस्त्यम् ? स्तबकावभासे तावत् क्रम एव नास्ति। कस्य वैपरीत्यमवैपरीत्यं वा, यदनन्तरजन्माऽयं समुच्चयप्रत्ययः। ताश्च विशिष्टक्रमावभासिन्य

३ ] पाधि— nyāma-wit_ka
१७ ] ल्प— nyāma-wit_ca
१९ ] रावभास— nyāma-wit_ka
२१ ] ल्प— nyāma-wit_ca

५ न्ति ] घण्टाताडनादौ दश, एकादशेत्यादि संख्यागणनायां अयमंशः स्पष्टः। उपरितनग्रन्थे अयमंशः व्यक्तः ॥
१४ न् ] स्मर्यमाणानुभूयमानवर्णविषयकत्वकल्पनाक्लेशः अस्मिन् कल्पे नास्ति। आहत्य सर्ववर्णविषयकं एकं मानसिकं ज्ञानमेव भवतु बोधजनकम् ॥
२० अपि ] तावताऽपि तस्य सर्ववर्णविषकत्वात् ॥

एव पूर्वभाविन्यो वर्णबुद्धय इति कुतो वैपरीत्यविकल्पः ? तस्मात् प्रथमपरिपठननियतानुपूर्वीकास्ते तदनन्तरभाविसमस्तावभासिसंकलनाप्रत्ययोपारूढा वर्णा अर्थप्रतीतिकारिणः स्युरिति न दोषः ॥ § 6559

यथा वा पूर्ववर्णजनितसंस्कारसहितोऽन्त्यवर्ण इति तत्रभवता मीमांसाभाष्यकृतावर्णितं शा-भा-१-१-५, तथा वर्णानामर्थप्रत्यायकत्वमस्तु ॥ § 6560

## संस्कारस्य गुणत्वं, अर्थप्रतीतिहेतुत्वं च

ननु ! अत्रोक्तं संस्कारस्यार्थप्रतीतिजनकत्वं न दृष्टपूर्वं, स्मृतावेव तस्य व्यापार इति—किमियं राजाज्ञा—स्मृतिरेव संस्कारेण कर्तव्येति ॥ § 6561

नेयं राजाज्ञा, नयाज्ञात्वेषा । न हि संस्कारो नाम स्वतन्त्रः कोऽपि धर्मी । किन्तु पटुत्वभ्यासादरप्रत्ययगृहीतेष्वर्थेषु यत् आत्मनः स्मरण कारणं, II.164/KSV स संस्कारः । सा च स्मृत्यैव कार्येण कल्प्यमाना शक्तिः । न च शक्तिरूपस्य संस्कारस्य शक्त्यन्तरमर्थप्रतीतिजन्मनि संभवति । येनैव कार्येण सा शक्तिः कल्पिता, तदपहाय किं कार्यान्तरं कुर्यात् ? स्मरणहेतोश्च संस्कारस्य प्रसवकारणतनुभवः । *अनुभवहेतोस्त्वस्य नूतनचरितस्य संस्कारस्य जन्मनिमित्तमेव नोत्पश्यामः । तस्मान्नासावर्थ प्रतीतिहेतुर्भवति ॥ § 6562

नैतत्सारम्—वर्णानुभवसंस्कृतमतेः पुंसः अर्थप्रतीतिदर्शनात् । न हि स्मरणशक्तिः संस्कारः । किन्त्वात्मगुणो वासनाख्यः । स च स्मृतिमिवार्थप्रतीतिमपि जनयितुमुत्सहते । सर्वत्र नो दर्शनं प्रमाणम् । स्मरणजननकौशलमपि तस्य तथा दर्शनादवगम्यते । तदिदमनुभवजननमपि ततो दृश्यत एव । वर्णाश्च तदनुभवाश्च व्यतीताः अन्यच्च शब्दतत्त्वं नानुभूयत इति वक्ष्यामः । अस्ति चार्थप्रतीतिः । नासौ निष्करणिका स्यात् । करणव्यतिरेकेण हि साऽनुद्भवन्ती करणमाक्षिपति । यदस्याः करणं, स संस्कार इति स्मृतिरिवार्थप्रतीतिरपि तत्कार्यत्वात्तदनुमापिका भवत्येव ॥ § 6563

## संस्कारस्यानुभवजनकत्वेऽविरोधः

यत्तु कुतस्तादृशः संस्कार उदेतीति—जडप्रश्नोऽयम्, अनुभवहेतुकस्य सुप्रसिद्धत्वात् । तथा चाहुः—वस्तुधर्मो ह्येषः, यदनुभवः पटीयान् स्मृतिबीजमाधत्ते इति ॥ § 6564

३ ] मावगम— nyāma-wit_kha
३ ] त्प— nyāma-wit_ca
११ ] मर्हति— nyāma-wit_ca

१ एव ] शाब्दबोधात्पूर्वभाविन्यः ॥
१४ *] अनुभवः—शाब्दबोधात्मकः ॥
२४ स्तादृशः ] तादृशः—अनुभवजन्यस्सन् अनुभवहेतुः ॥

ननु स्मृतिबीजमिति यदुच्यते, तत् कथमनुभवबीजं स्यात् ?—नैष नियमः—स्मृतेरेव बीजमिति । अनुभवस्तावत् तथाविधमात्मधर्ममाधत्ते । II.165/KSV स कार्यभेदोऽपि नोत्पत्तौ कारणान्तरं मृगयते । कार्यभेदश्चास्य तथा दर्शनादवगम्यत इत्युक्तम् ॥ § 6565

## संस्कारस्य स्मृतिमात्रजनकत्वेऽप्यदोषः

अथवा किमनेन निर्बन्धेन । न साक्षादर्थप्रतीतिकारी संस्कारः । स्मृतिद्वारेण तां करिष्यति । पूर्ववर्णेषु संस्कारात् स्मरणम्, अन्त्यवर्णे श्रोत्रेन्द्रियादनुभव इत्येवं स्मर्यमाणानुभूयमानवर्णकरणकोऽर्थप्रत्ययः— स्यात् । को दोषः ? § 6566

ननु अनुभवक्रमाहितसंस्कारसामर्थ्यमनुरुध्यमानाः स्मृतयोऽपि क्रमेणोत्पत्तुमर्हन्ति, न युगपदिति । ततश्च प्राक्तन एव दोषः, सामस्त्याभावादिति—नैष दोषः—नानावर्णविषयैः क्रमभाविभिरनुभवैः क्रमोपचेयात्मा, पुटपाकैरिव कार्तस्वरस्य, एक एवात्मनः संस्कारः तादृगुपाधीयते, येन सर्वानेव पूर्वदृष्टान् वर्णानसौ सकृत् स्मरतीति ॥ § 6567

संस्कारात् संस्कारोत्पत्तिरलौकिकीति चेत्—नालौकिकी, स्वाध्यायाध्ययने सिद्धत्वात् । उच्चारणक्रियायाः क्षणिकत्वात् तदाहिते संस्कारान्तरकारिणि संस्कारेऽनिष्यमाणेऽन्त्यमुच्चारणं प्रथमोच्चारणान्न विशिष्येतेति । ततः किम् ? पुरुषायुषेणापि नानुवाक एवामुखीक्रियेत ॥ § 6568

## सिद्धान्त एव कल्पनालाघवम्

ननु ! अयमीदृशः प्रकारः एकस्मरणसिद्धये कल्पनीयः, अर्थप्रतीतिहेतुता वा संस्कारस्य कल्पनीयेति सर्वथा चेयमदृष्टकल्पना । अतो II.166/KSV न पश्यामहे तत्र कः संस्कारं प्रति पक्षपातः ? कश्च स्फोटं प्रति विद्वेषः ? यदेष कल्प्यते, नैष इति—उक्तमत्र पुट-१२९ तेनैव सुगृहीतनाम्ना भाष्यकारेण शब्दकल्पनायां सा च, शब्दकल्पना च इति ॥ § 6569

## स्फोटवादे कल्पनागौरववर्णनम्

६ ] न्धनेन— nyāma-wit_kha
१२ ] क्रमवि— nyāma-wit_ca

३ स ] कार्यविशेषः अनुभवरूपः ॥
११ वैः ] प्रथमं एकवर्णविषयकः; ततः वर्णद्वयविषयः एवमुपचीयमानः ॥
२१ देष ] एषः—संस्कारः । एषः—स्फोटः ॥

ननु नास्ति कल्पनाद्वैगुण्यम् । संस्कारो हि यथाप्रसिद्धि स्थित एव । का तत्र कल्पना ? न हि वयं स्मरणैककारणत्वं संस्कारधर्ममतिलङ्घितवन्तः, भवन्त इव ॥ § 6570

कथं न लङ्घितवन्तो भवन्तः ? सर्ववर्णविषयैकस्मरणकारिता भवद्भिरपि कल्पितैव । यैव हि वर्तनी वर्णानामर्थप्रतीतौ, सैव स्फोटव्यक्तावपि । तां च कल्पयित्वा शब्दोऽन्यः कल्पित एवम् । अतश्चसंस्कारस्योभयवादिविदितस्य स्मरणकारित्वमुल्लङ्घ्य अर्थप्रत्ययकारित्वं केवलमस्माभिरभिहितम् । भवद्भिस्तु मूलत एवारभ्याभिनवं विश्वमुत्थापितम्—*अपूर्वस्य शब्दस्य तावदस्तित्वं, पुनर्वर्णव्यतिरिक्तत्वं, पुनरवयवशहित्यं कल्पितमिति कथं न कल्पनागुरुत्वम् ? तदुक्तम्— श्लो-वा-स्फोट ९० § 6571
II.167/KSV

सद्भावव्यतिरेकौ च तथाऽवयववर्जनम् ।
तवाधिकं भवेत्तस्मात् यत्नोऽसावर्थबुद्धिष इति ॥ § 6573

## स्फोटवादे अर्थप्रतीत्यनुपपत्तिः

यत्पुनरवादि—प्रथमवर्णबुद्धिवेलायामेव व्यक्तं स्फोटतत्त्वं उत्तरोत्तरबुद्धिभिरतिशयिततरप्रत्ययविषयतां नीयते, रत्नतत्त्ववदिति—स एष विषम उपन्यासः—रत्नस्य हि सावयवत्वात् प्रथमप्रत्ययाविषयीकृतसूक्ष्म तरावयवविशेषग्राहिणां उत्तरोत्तरप्रत्ययानामस्ति तत्रावकाशः । स्फोटस्तु वर्णस्वरुपवदनंश इति तत्स्वरूपसर्वस्वमाद्येनैव वर्णेन व्यक्तम् । किमिदानीमन्ये वर्णाः करिष्यन्ति । एकदेशव्यक्तिस्तु निरवयवस्य, वर्णस्येवन संभवति । यथोक्तम्—श्लो-वा-स्फोट-१० § 6574

४ ] कारणिका— nyāma-wit__ca
७ ] मधिकम— nyāma-wit__ca
१२ ] तां— nyāma-wit__kha
१४ ] विष— nyāma-wit__ka

३ इव ] इदं च संस्कारस्यार्थप्रतीतिहेतुत्वकल्पनपक्षाभिप्रायेण ॥
४ कारिता ] पूर्वपूर्वसंस्कारस्येति शेषः ॥
६ स्य ] सिद्धे वस्तुनि अतिरिक्तधर्ममात्रकल्पनमत्र, भवतस्तु धार्मिणोऽपि कल्पनम् । इदं सर्वं संस्कारस्यार्थप्रत्ययहेतुत्वपक्षे । स्मृतिहेतुत्वपक्षे त्वस्यापि नावकाशः ॥
८ * ] अपूर्वस्य—सूक्ष्मस्य स्फोटाख्यस्य ॥
१६ स्य ] वाक्यस्येत्यध्याहारः ॥

*अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः ।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम् इति
॥§ 6576

योऽपि द्वितीयो दृष्टान्त उदाहारि—यथा अनुवाकः श्लोको वा प्रथमसंस्थया गृहीतोऽपि संस्थान्तराभ्यासैः स्फुटतरं परिच्छिन्नो भवति तथा स्फोटोऽपि प्रथमवर्णान्तरैरतिशयिताभिव्यक्तिः भविष्यतीति—सोऽपि न सदृशो दृष्टान्तः, श्लोकानुवाकयोरनंशत्वानुपपत्तेः । केचिदवयवा वर्णात्मानः II.168/KSV पदात्मानो वा प्रथमायां बुद्धावपरिस्फुरन्तः संस्थाभ्यासलब्धा तिशयायां तस्यां प्रकटीभविष्यन्ति । स्फोटस्तु एकवर्ण इव निरंश इति तत्र को बुद्धेरतिशययोगः तस्मादयमपि न संगतो दृष्टान्तः ॥ § 6577

## स्फोटस्य ध्वनिव्यङ्ग्यत्वपक्षनिरासः

येऽपि च मन्वते—ध्वनिव्यङ्ग्यत्वात् स्फोटस्य न तत्र वर्णविकल्पावसर इति—तेऽपि न सम्यग्दर्शिनः—*पराणुद्य वर्णप्रतीतिं ध्वनिभ्यः शब्दप्रतीतेरनुत्पादात् । अतिद्रुतोच्चि चारयिषयाऽनुपलभ्यमानवर्णविभागाच्च शब्दादर्थप्रत्ययाभावात् ॥ § 6578

## वर्णनामसत्यत्वनिरासः

अथ ध्वनयः शब्दव्यक्तिमादधानाः स्थानकरणानुरोधेनासत्यमेव वर्णभेदमुपदर्शयन्ति, श्यामादिरूपमिव मुखस्य खङ्गादय इत्युच्यते—तदप्य सत्—असत्यत्वे निमित्ताभावात् । प्रतीयन्ते हि निर्बाधया बुद्ध्या वर्णाः । तदतिरिक्तस्तु शब्दो न प्रतीयते । यश्च न प्रतीयते, सोऽस्ति; ये च प्रतीयन्ते, ते न सन्तीत्युच्यमाने—शशो नास्ति, विषाणमस्तीति स्यात् । तस्मादयमपि न कल्पनागौरवपरिहारक्षमः पन्थाः । अतः सुष्टूक्तं शब्दकल्पनायां सा च, शब्दकल्पना च इति ॥ § 6579

तस्मात् स्फोटप्रतिपत्तौ यः क्रम आस्थेयः, सः अर्थप्रतीतावेवास्थीयतामिति किं तेन स्फोटेन ॥ § 6580

## वर्णनां बुद्धिकल्पितत्वपक्षनिरासः

३ ] संस्थाना— nyāma-wit_kha
१० ] भ्यः— nyāma-wit_kha

१ *] अल्पीयसा—एकवर्णोच्चारणानुकूलप्रयत्नेनोच्चारितः यदा एको वर्ण तदेव समग्रमपि वाक्यं मतिः गृह्णीयात्, अथवा कदापि वा न गृह्णीयात्, वाक्यस्फोटस्य निरवयवत्वात् ॥

१० *] पराणुद्य—परित्यज्य ॥
११ याऽ] उच्चरितस्य वाक्यस्य श्रवणे इति अर्थसिद्धम् ॥

अन्ये तु—उपलब्ध्यनन्तरसत्ताकानां वर्णानामर्थप्रत्यायकत्वमाचक्षते —तदिह नेष्यते, क्षणिकत्वाद्वर्णानां उपलब्धेरूर्ध्वं सत्ताऽनुपपत्तेः । सर्वथा II.169/KSV व्युत्पत्त्यनुसारेण वर्णानामर्थप्रत्यायकत्वं तद्यथा पुरा दृष्टं, तथाऽभ्युपगम्यत इति । तदुक्तं—यावन्तो यादृशाः इति ॥ § 6581

## वर्णानां प्रत्यायकत्वं अनुभवसिद्धम्

यत्त्वत्र प्रतीपमुक्तं—कियन्तः कीदृशाः इति—तत्र प्रतीतयः प्रष्टव्याः, न तपस्विनो वयमिति यत्किंचिदेतत् ॥ § 6582

यत्पुनरभ्यधायि पु. —क्रमव्यत्यासप्रयुक्ता अपि वर्णा प्रत्यायका भवेयुः । क्रम एव वा स्फोटः स्यात्—इति—तदपि न पेशलम्—क्रमो हि नाम कालभेदः । न च काल एव स्फोटो भवितुमर्हति ॥ § 6583

## स्फोटकल्पकस्यान्यथासिद्धिः

क्रमोऽपि च न स्वतन्त्रः प्रतिपादकः, पदार्थान्तरवृत्तिर्वा; किन्तु वर्णाश्रित एव । तत्र चोक्तम् श्लो. वा-१-१-८-श्लो-२६५-२६६— § 6584

*द्वये सत्यपि तेनात्र विज्ञेयोऽर्थस्य वाचकः ।
वर्णाः किन्नु क्रमोपेताः किन्नु वर्णाश्रयः क्रमः ?
क्रमः क्रमवतामङ्गमिति किं युक्तिसाध्यता ?
धर्ममात्रमसौ तेषां न वस्त्वन्तरमिष्यते ॥ § 6588

तस्मात् ये यावत्क्रमका यमर्थं प्रत्यायन्तो दृष्टा वर्णाः, ते तत्क्रमका वर्णास्तमर्थं प्रत्याययिष्यन्तीति न स्फोटादर्थावगतिः । तदेवं कार्यानुमानं, अर्थापत्तिर्वा न स्फोटसिद्धये प्रभवतीति सिद्धम् ॥ § 6589

II.170/KSV

यदप्यभाणि—शब्दादथ प्रतिपद्यामहे इति व्यवहारः स्फोटपक्षसाक्षितामालम्बत इति—तदप्यसारम्—वर्णानां वाचकत्वे यथोक्तनीत्या साधिते तत्पक्षेऽपि तथा व्यवहारोपपत्तेः ॥ § 6590

## वर्णानां वाचकत्वाक्षेपः

---

२ ] नाचक्ष— nyāma-wit__ka
१७ ] गतिरिति— nyāma-wit__kha

---

५ त्र] प्रतीपं—यावन्तो यादृशाः इत्यस्य प्रतिकक्ष्यतया ॥
१२ *] क्रमविशिष्टा वर्णा वाचकाः ? अथवा वर्णानां क्रमः वाचकः ? इति पक्षद्वये क्रमस्य वर्णाश्रितत्वेनाप्रधानत्वात् प्रथमपक्ष एव साधीयान् ॥

ननु ! कथमुपपत्तिः ? संस्कारस्तावत् न शब्दशब्देनोच्यते । न हि तथा लोके प्रसिद्धिः । *संस्कारे च वाचके व्युत्पत्तिरपि दुरुपपादा । परावगतिपूर्विका हि शब्दात् स्वावगतिः । न च परस्थः संस्कारः परस्य प्रतीतिमुपजनयन् ग्रहीतुं शक्यः, परोक्षत्वात् ॥ § 6591

वर्णेष्वपि शब्दशब्दो वर्तमानः प्रतिवर्णं वा वर्तेत, वर्णसमुदाये वा ? प्रतिवर्णं वर्तमाने च शब्दशब्दे न शब्दादर्थप्रतिपत्तिः स्यात्; एकस्य वर्णस्य वाचकत्वायोगात् । समुदाये तु न वर्तितुमर्हति शब्दशब्दः, जातिशब्दत्वात् । द्विवचनबहुवचनान्तव्यक्तिशब्दप्रयोगे हि तस्मात्सामानाधिकरण्येन न जातिशब्द एकवचनान्तः प्रयुज्यते । न हि भवति देवदत्तयज्ञदत्तौ पुरुषः इति, धवखदिरपलाशा वृक्षः इति—तथा गकारौकार विसर्जनीयाः शब्दः इत्यपि न ॥ § 6592

वनं वृक्षाः इति वनशब्दवत् तर्हि समुदायवाची भविष्यति शब्दशब्दः, न जातिशब्दवत्—इति चेत्—न—तत्र समुदायव्यतिरेकनिर्देशदर्शनात्—आम्राणां वनम् कपित्थानां वनम् इति । न चैवमिह व्यतिरेकनिर्देशोऽस्ति—गकारादीनां शब्दः इत्यदर्शनात् ॥ § 6593

अथ ब्रूयात्—आम्रादयो वनम् इत्यभेदेनापि वनशब्दः प्रयुज्यते । तथेहापि गकारादयः शब्दः इति प्रयोक्ष्यते—एतदपि नास्ति—व-
II.171/KSV नादौ भेदव्यपदेशवशेन प्रतिव्यक्ति चाप्रयोगे, सिद्धे समुदायशब्दत्वे, समुदायसमुदायिनोरभेदोपचारात् आम्रादयो वनम् इति युज्यते प्रयोक्तुम् । इह तु गकारादीनां शब्दः इति न कदाचिदपि व्यतिरेकनिर्देशो दृश्यत इति समुदायशब्दत्वमघटमानम् । तत्सर्वथा वर्णशब्दवादिनामनुपपन्नोऽयं व्यपदेशः शब्दादर्थं प्रतिपद्यामहे इति ॥ § 6594

## वर्णानां वाचकत्वसमर्थनम्

उच्यते—किमनेनोपपन्नेनानुपपन्नेन वा कृत्यम् । यद्ययमुपपद्यते, ततः किम् ? अथापि नोपपद्यते, ततोऽपि किम् ? न हि लोकव्यपदेशनिबन्धना वस्तुस्थितिर्भवति ॥ § 6595

ननु ! शास्त्रकारा अप्येवमेव व्यवहरन्ति—भावमाख्यातेनाचष्टे *इति—न शास्त्रकारव्यवहारादप्यप्रामाणिकोऽर्थः शक्यतेऽभ्युपगन्तुम् । कतरच्चेदं प्रमाणं—लोकव्यपदेशो नाम । अनुमानं तावत् प्रतिक्षिप्तम् । प्रत्यक्षमपि प्रतिक्षेप्स्यते । न चान्यत् स्फोटसिद्धौ प्रमाणं क्रमतेतदस्थानेऽयं लोकव्यपदेशनिरूपणेन स्फोटाटोपः ॥ § 6596

---

६ ] श— nyāma-wit__kha
१७ ] शब्दाः— nyāma-wit__ca
१७ ] युज्यन्ते— nyāma-wit__ca
१८--१९ ] स— nyāma-wit__kha
२७ ] द— nyāma-wit__ka

---

२ *] शब्दानां नष्टत्वात्, तत्संस्काराणामेव वाचकत्वं सिद्धं भवति ॥
२५ ति ] किन्तु प्रमाणाधीनेति शेषः ॥
२७ *] भवत्पक्षे हि संस्कारेणाचष्टे इति स्यात् ॥

## वर्णानामेव अर्थप्रत्यायकत्वं अनुभवानुगुणम्

न चात्यन्तमसङ्गतोऽयं वर्णपक्षे लौकिको व्यपदेशः । पूर्ववर्णजनितसंस्कारसहिते तावदन्त्यवर्णे वाचके सुसङ्गत एवायं व्यपदेशः, तस्य शब्दत्वात्, एकत्वाच्च ॥ § 6597
II.172/KSV

संकलनाप्रत्ययोपारूढवर्णवाचकत्वपक्षेऽपि न दोषः । न हि भेदशब्दसहित एष शब्दशब्दः प्रयुज्यते—गकारादिभ्यश्शब्दादर्थं प्रतिपद्यामहे इति । केवलस्तु जातिशब्द एकवचनान्तो बहुष्वपि वर्णेषु न विरुद्धः ॥ § 6598

किंच स्फोटपक्षे सुतरामनुपपन्नोऽयं व्यपदेशः शब्दात् इति, प्रातिपदिकार्थस्याभावात् । न हि वर्णवत् स्फोटे शब्दशब्दं प्रयुंजानो दृश्यते व्यवहर्तृजनः ॥ § 6599

## स्फोटस्य शब्दरूपत्वमपि न प्रामाणिकम्

अर्थप्रतिपत्तिहेतुत्वं शब्दलक्षणमसाधुः; धूमादिभिर्व्यभिचारात् । अथापि प्रक्रमपर्यालोचनया श्रौत्रग्राह्यत्वविशिष्टमर्थप्रतिपत्तिहेतुत्वं शब्दलक्षणमभिधीयते; तदिदं स्फोटं प्रति न सिद्धम्; तस्य श्रोत्रप्रत्ययविषयत्वाभावात् । श्रोत्रग्राह्यत्वमेव च तदितरव्यवच्छेदक्षममिति तदेव युक्तं किमुभयोपादानेन ? श्रोत्रग्राह्यत्वं च वर्णेष्वेव नार्थान्तरस्येति वर्णा एव शब्दाः । तदुक्तम्—श्लो-वा-स्फोट-९ § 6600

परस्परानपेक्षाश्च श्रोत्रबुद्ध्या स्वरूपतः ।
वर्णा एवावसीयन्ते न पूर्वापरवस्तुनी इति ॥§ 6602

## शब्दलक्षणपरिष्कारः

श्रोत्रग्राह्यत्वं शब्दलक्षणं सत्तादावप्यस्तीति चेत्—न—श्रोत्रेणैवेत्यवधारणस्य विवक्षितत्वात् ॥ § 6603
II.173/KSV

५ ] हे— nyāma-wit_kha

१६ स्तुनी ] शब्दहेतुः, तत्कार्याणि वा श्रौत्रबुद्ध्या न विषयीक्रियन्ते ॥

१६ णं ] सत्ता—शब्दगतसत्तादिः ॥

श्रोत्रमनोभ्यां ग्रहणादसिद्धमवधारणमिति चेत्—न—*समानजातीयव्यवच्छेदार्थत्वादवधारणस्य चक्षुरादीन्येव तेन व्यवच्छेद्यन्ते, न मनः ॥ § 6604

तथापि शब्दत्वे व्यभिचार इति चेत्—न—जातिमत्त्वे सतीति प्रक्रमलभ्यविशेषणापेक्षणात् । स्तनयित्नुनादप्रभृतिभिरपि न व्यभिचारः, तेषां शब्दत्वाभ्युपगमात् । तदुक्तं भाष्यकृता—द्विविधश्चायं शब्दः— वर्णात्मा ध्वनिमात्रश्च त्य-भा-२-२-४० इति ॥ § 6605

## परोक्तं शब्दलक्षणं न सुष्टु

अर्थप्रत्यायकत्वं तु न लक्षणमित्युक्तम्, अगृहीतसंबन्ध वर्णात्म न्यपि शब्दे तदभावेनाशब्दत्वप्रसङ्गात् । कालान्तरेण संबन्धबुद्धौ सत्यां च तस्यैव शब्दत्वमिति अव्यवस्थितमिदं लक्षणम् ॥ § 6606

यदपि शब्दस्वरूपनिरूपणप्रसङ्गेन तदभिधेयानां जातिगुणक्रियादीनां शब्दताऽऽशङ्कनं, तत्परिहरणं च—तदपि किमाशयमिति न विद्मः— तेषामतिविभक्तरूपग्रहणात् ॥ § 6607

अतः श्रोत्रग्राह्यस्य शब्दत्वात् स्फोटस्य च श्रोत्रग्राह्यत्वाभावात् वर्णवादिनामेव—शब्दादर्थं प्रतिपद्यामहे इत्यनुकूलो लोकव्यपदेशः, न स्फोटवादिनामिति स्थितम् ॥ § 6608

## स्फोटस्य श्रोत्रग्राह्यत्वाभावः

कथं पुनः श्रोत्रग्रहणत्वं स्फोटस्य न मृष्यते ? यावता पदं, वाक्यमिति
II.174/KSV श्रोत्प्रकरणकमेकाकारं ज्ञानं प्रत्यात्मवेदनीयमस्तिः न(?)चास्य वर्णा आलम्बनीभवेयुरित्युक्तम् । न युक्तमुक्तम्—इह हि शाबलेयादौ प्रतिपिण्डं गौरिति बुद्धिरुपजायमाना सकलपिण्डसाधारणं रूपं विपयीकरोतीति गोत्वसामान्यं तदिष्यते । एवं यदि प्रतिवर्णं पदं पदमिति, वाक्यं वाक्यमिति मतिरुपजायेत, जातिवत्, तर्हि पदं वाक्यं च सर्ववर्णवृत्ति किमपि रूपमवगच्छेम, न त्वेवमस्ति प्रतीतिः । यथा च तन्त्वाद्यवयवपरिघट्टितपटादिकार्यविषयमाद्यनयनसन्निपातसमय एव भेदग्रहरहितमवयविज्ञानमुदेति, तथा क्रमसमुच्चरदेकैकवर्णस्वरूपोपग्रहनिरपेक्षं यदि पदमिति, वाक्यमिति ज्ञानं भवेत्, तत् पदादिकमवयविनमिव पदं वाक्य मेकैकरूपमनुमन्येमहि, न त्वेवमस्ति । न हि तन्तुभिरिव पटः, वीरणैरिव कटः, वर्णैः पदमारभ्यते ॥ § 6609

१८--१९ ] चक्षु— nyāma-wit_kha

१९ ] भ्युप— nyāma-wit_kha

१८ *] समानजातीयत्वं बहिरिन्द्रियत्वेन ॥
३ मात्] मीमांसकैस्तु ध्वनेः वायुधर्मत्वमेव स्वीकृतम् ॥

१८ र्णं] न हि प्रत्येकं वर्णेषु पदत्वस्य वाक्यत्वस्य वा प्रतिसन्धानं कस्यापि भवति ॥

## वर्णानां स्वत एव भिन्नत्वम्

यत्तु गौगौरित्येवंज्ञानमभेदग्राहि दृश्यते—तदेकाद्युपाधेः । भिन्नाद्युपश्लेषे तु देवदत्त इत्यादौ नानाक्षरग्रहणमेव विलम्बितमनुभूयते । न चैवं पटादिबुद्धिषु तदवयवाः कदाचित् विच्छेदेनावभासन्ते । तस्मान्नावयवीव, जातिरिव वा पदं वाक्यमभिन्नमवभासते ॥ § 6610

## स्फोटस्य सामान्यरूपत्वनिरासः

ननु च याऽसौ शब्दशब्दात् बुद्धिः, सैवेयं स्फोटबुद्धिः ॥
किमिदानीम् ?, यदेव शब्दत्वसामान्यं, स एव स्फोटः ? § 6612

II.175/KSV

मैवम्—स्फोट एवासौ न शब्दत्वं सामान्यं तत् । सामान्यं हि तदुच्यते, यत्रैकव्यक्तिदर्शने व्यक्त्यन्तरानुसन्धानम्, शाबलेयग्रहणे बाहुलेयस्येव । इह-तु न गकारग्रहणे न वकारानुसन्धानमिति नेदं सामान्यम् । एकरूपस्त्वयं प्रतिभासः शब्दतत्त्वविषय एव । शब्दतत्त्वं च स्फोट इत्युच्यते ॥ § 6613

## शब्दत्वं न स्फोटरूपम्

आ ! ज्ञातम्—अमुनैव हि भयेन कैश्चित् स्फोटशङ्किभिः शब्दत्वसामान्यमपह्नुतम् । अस्थान एव त्वयं सं(?)सः । न हि शब्दत्वं स्फोटः । प्रतिवर्णं हि शब्दः शब्द इति बुद्धिरस्ति, न च वर्णस्फोटः । तदिदं शब्दत्वसामान्यमेव शब्दबुद्धेरालम्बनम्, न स्फोटः ॥ § 6614

सामान्यसिद्धौ तु व्यक्त्यन्तरानुसन्धानमकारणमिति प्रागेव निर्णीतम् । तस्मान्नशब्दबुद्धावपि स्फोटोऽवभासते, पदवाक्यबुद्धा विवेति ॥ § 6615

एकश्च सत्यमाह यदियमेककार्यकारित्वनिबन्धना, वनपृतनादिबुद्धिसमानयोगक्षेमैव पदवाक्यबुद्धिरिति । न च जात्यादिबुद्धिष्वसमाश्वासः, वैलक्षण्यस्य दर्शितत्वात् ॥ § 6616

## पदवाक्यादिष्वेकत्वबुद्धेरुपपादनम्

यदपि—एककार्यकारित्वनिबन्धनायामभेदबुद्धौ इतरेतराश्रयपरिचोदनं—एकार्थप्रतीतिपूर्विका पदवाक्यबुद्धिः, पदवाक्यबुद्धिपूर्विका चैकार्थ प्रतीतिरिति पु. १४० तदपि न सम्यक्—स्मर्यमाणानुभूयमानवर्णजनितेवेयमर्थप्रतीतिरित्यवोचाम, नाभिन्नपदपरिच्छेदपूर्विकेति कुत इतरेतराश्रयत्वम् ? § 6617 II.176/KSV

२२--२३ ] तेय—
nyāma-wit__kha

६ देव ] शब्दः इति शब्दः शब्दसामान्यमाचष्टे, तदेव किलशब्दत्वम् ॥

११ येन ] प्राभाकरैः ॥

२३ नाभिन्न ] अभिन्नं—अखण्डम् ॥

## बुद्धेरेकत्वानेकत्वनिदानम्

ब्रूयात्—पदवाक्ययोरेकत्वमन्तरेण कथं पदवाक्यार्थप्रतीतिरेकरूपा भवेदिति—सोऽयमतीव मुग्धालापः—प्रतीतिभेदाभेदौ हि विषयभेदाभेदावनुरुध्येते, नोपायभेदाभेदौ। भिन्नैरपि लोचनालोकान्तःकरणप्रभृतिभिरुपायैरभिन्नार्थग्राहिणी बुद्धिरुपजन्यत एव। तदिह पदार्थबुद्धेरेकात्वार्त पदार्थ एको भवतु, योऽस्या विषयः। न त्वेकं पदं, यत् कारणमिति। वाक्यार्थबुद्धेरप्येकत्वात् एको वाक्यार्थो भवतु, न त्वेकं वाक्यम्। वर्गीकरणकारणं क्रमभाविनां बहूनां वर्णानामेतत् भवति, यत् एकार्थप्रतिपादकत्वं, न त्वभेदमेव पदवाक्ययोर्गमयतीति॥ § 6618

## शब्दार्थयोरभेदासंभवः

विप्रलब्धा एव च वैयाकरणाः पदवाक्ययोरप्यभेदं मन्यन्ते किल *शब्दादनन्यभूत एव शब्दार्थ इति—स पुनरेषां व्यामोह एव, तद्भेदस्य दृढप्रमाणसिद्धत्वात्। शब्दाध्यासस्तु प्रतीतिविरुद्धत्वेन नेष्यते—इत्यलं तत्कथया। तस्मात् प्रत्यक्षगम्योऽपि न स्फोट इति सिद्धम्॥ § 6619

II.177/KSV

## बुद्धैरैक्येऽपि पदादेः नैक्यम्

ननु! अभिन्नत्वाद्वाक्यार्थबुद्धेः विषयभेदाभेदानुवृत्तित्वाच्च बुद्धिभेदाभेदयोः अभिन्नो वाक्यार्थः स्यात्—बाढम्—अभिन्नः, न त्वनवयवः; घटादेरभिन्नस्यापि सावयत्वात्॥ § 6620

## शब्दानां सांशत्वनिरूपणम्

यत्तु निरवयत्वमुच्यते—तदतीव संवित्परामर्शकैशलशून्यं व्याहृतम्—
§ 6621

अंशास्सन्ति न सन्तीति चिन्ताऽत्यन्तमसङ्गता।
निरंशस्त्वस्ति नास्तीति युक्तं चिन्तयितुं सताम्॥§ 6623

पदतदर्थभेदस्य प्रतिवाक्यं विस्पष्टमाभासमानत्वात् अनुपगृह्यमाणावयवविभागयोश्च वाक्यवाक्यार्थयोरनवभासमानत्वात्॥ § 6624

---

१० ] हः— nyāma-wit__kha
१३ ] च्च— nyāma-wit__kha

---

४ एव] एवं एकेनैव चक्षुषा घटोऽपि गृह्यते, पटोऽपि गृह्यते॥
५ त्वेकं] एकत्वं अखण्डत्वम्॥
९ *] शब्दार्थयोरविनाभावात्॥
१९ ताम्] सावयवत्वं प्रत्यक्षसिद्धम्। निरंशत्वं तु युक्तिसिद्धम्। तत्र तु विप्रतिपत्तिः स्यात्। अतः निरंशत्वं कथमित्येव विचारणीयम्॥

## पदवाक्ययोस्सांशत्वं न भ्रमसिद्धम्

अस्त्ववयवप्रतीतिः सा तु भ्रान्तेति चेत्—न—बाधकाभावात् । भ्रान्तेश्च बीजं किमपि वक्तव्यम् । सादृश्यमिति चेत्; कस्य केनेति न विद्मः । यदि हि क्वचिन्मुख्या अवयवाः प्रसिद्धा भवेयुः, तत्सादृश्यात् इतरत्र तदभावेऽपि भ्रम इति गम्येत—न त्वेवमस्ति—सर्ववाक्यानामप्यभागत्वात् । नरसिंहेऽपि नरावयवाः सिंहावयवाश्च पृथक्पृथक् प्रत्यभिज्ञायन्ते । तद्वदिहाप्यभ्युपगम्यमाने नूनं क्वचिद्वाक्ये सत्यत्वमवयवानामेषितव्यम् ॥ § 6625
II.178/KSV

## चित्रादीनामपि सांशत्वम्

चित्रेऽपि हरितालसिन्दूरादिरूपं, पानके त्वगेलादिरसः, ग्रामरागेऽपि षड्जर्षभगान्धारादिस्वरजातं पृथगवगतमिति न ते निर्भागदृष्टान्ताः । चित्रादिबुद्धयस्तर्हि दृष्टान्ता इति चेत्—बाढम्—वाक्यार्थबुद्धिरपि निर्भागेष्यत एवास्माभिः, बुद्धीनां निरंशत्वेन सर्वासामनवयवत्वात् । बुद्धिविषयीकृतस्त्वर्थो दृष्टान्तदार्ष्टान्तिकयोः सावयव एव । तस्मान्न निर्भागौ वाक्यवाक्यार्थाविति युक्तम् ॥ § 6626

## पदशक्तिग्रहोऽपि वृद्धव्यवहारादेव

यदप्यभ्यधायि—वृद्धव्यवहारतः संबन्धबुद्धिः वाक्यवाक्यार्थयोरेव, न पदतदर्थयोः; पदेन व्यवहाराभावादिति—तदप्यसाधु—वाक्यादपि व्युत्पत्तिर्भवन्ती पदार्थपर्यन्ता भवति । एवं हि पदतदर्थसंस्कृतमतेरभिनवविरचितादपि वाक्यात् वाक्यार्थप्रतीतिरुपपत्स्यते । तदावापोद्वापचक्रवैचित्र्येण वाक्यानामानन्त्यात् अशक्या प्रतिवाक्यं व्युत्पत्तिः । सापि नापेक्षिष्यते । इतरथा हि साऽवश्यमपेक्ष्येत ॥ § 6627

## पदानामपि प्रयोगार्हत्वम्

यत्तु—केवलं पदं न प्रयुज्यत इति तदसत्यमिति—तदप्यसत्—महावाक्यस्थाने अवान्तरवाक्यं न प्रयुज्यत इति तदप्यसत्यं स्यात् । स्वार्थे तत्प्रयुज्यत इति चेत्—पदमपि स्वार्थे क्वचित् प्रयुज्यत एव; यत्र पदा

---

१३ ] क्या— nyāma-wit_kha
१६ ] परतन्त्र— nyāma-wit_kha

---

४ त्वात् ] त्वन्मत इति शेषः ॥
७ के ] त्वक् परिकरसुगन्धद्रव्यम् ॥
१५ ति ] वाक्यार्थस्याखण्डस्य खण्डिततत्वादिति हेतुः ॥
१७ त्तिः ] वाक्यार्थस्य पदार्थातिरिक्तत्वे, अखण्डत्वे च वाक्यशक्तिग्रहः अशक्य एव ॥

II.179/KSV न्तराणामर्थोऽर्थप्रकरणादिना लभ्यते, तत्र यावदप्राप्तं तावत्पदमेव केवलं उच्चारयन्ति । ग्रन्थग्रहणावसरेषु च स्वरूपावधारणमपि फलवद्वर्णानाम् । मा वा फलवत्त्वं पदवर्णानां भूत्—तथापि रथावयवानामिव रथकार्येष्वपर्याप्तशक्तीनामपि स्वरूपसत्त्वमनिवार्यम् । कार्यान्तराय रथात् रथावयवाः प्रभवन्तीति चेत्—पदवर्णा अपि कार्यान्तरे प्रभविष्यन्ति । रथ कार्यैकदेशमात्रां कामपि रथावयवाः कुर्वन्तीति यद्युच्येत—पदान्यपि— वाक्यकार्यैकदेशं कमपि कुर्वन्त्येव । वर्णा अपि केचिदर्थवन्तो भवन्त्येव । तस्मान्नासन्तः पदवर्णाः ॥ § 6628

## वर्णानां सावयवत्वप्रसङ्गपरिहारः

यत्पुनरवादि—वाक्यस्येव पदानि, पदानामिव वर्णाः, वर्णानामप्यवयवान्तराणि स्युरिति—तदिदमपूर्वं पाण्डित्यम् । न हि घटाः सावयवा इति परमाणुभिरपि सावयवैर्भवितव्यम् । परमाणवो वा निरवयवा इति घटैरपि निरवयवैर्भवितव्यम् । उपलब्ध्यनुपलब्धी हि वस्तूनां व्यवस्थापिके । यद्यथोपलभ्यते, तत्तथा भवति । यद्य था नोपलभ्यते, तत्तथा न भवति । वाक्यपदयोश्च भागा उपलभ्यन्ते, न वर्णानाम् । तथा ह्युक्तमेतत् श्लो. वा. स्फोट-१०— § 6629

अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः ।
यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम् इति
॥§ 6631

तस्मात् बालिशचोदितमिदं—वर्णस्याप्यवयवा भवन्तु, पदवाक्ययोरपि वा मा भूवन्निति ॥ § 6632
II.180/KSV

## पदवाक्ययोस्सावयवत्वे युक्त्यन्तरम्

इतश्च सावयवौ वाक्यवाक्यार्थे, *पदोपजननापायाभ्यां तदर्थोपजननापायदर्शनात् । अनयैव युक्त्या पदभागा अपि प्रकृतिप्रत्ययादयः तात्त्विका इत्यवगन्तव्याः, न कल्पनामात्रप्रतिष्ठाः । वृक्षं, वृक्षेणेत्यत्र प्रकृत्यर्थानुगमे

---

१४--१५ ] उप—
nyāma-wit_kha

---

४ पि ] प्रत्येकमिति शेषः ॥ साकमन्वयव्यतिरेकौ ॥
१८ * ] पदोपजननापायौ—पदेन

प्रत्ययार्थो भिद्यते । वृक्षं, घटमिति प्रत्ययार्थानुगम प्रकृत्यर्थो भिद्यते । तत्र योऽर्थो यं शब्दमनुगच्छति, स तस्यार्थ इत्यवसीयते । तत्कथमसत्या भागाः ? § 6633

## वर्णानुगममात्रं नार्थानुगमहेतुः

यत्पुनः—कूपसूपयूपादौ सत्यपि वर्णानुगमेऽर्थानुगमो न दृश्यते । तेन चाकारणमर्थप्रतीतेर्वर्णानुगम इत्युक्तम्—तदयुक्तम्—यतो *नान्वयव्यतिरेकाभ्यामनुत्पन्ना प्रतीतिरुत्पाद्यते, येन कूपादौ तदुत्पादन माशङ्क्येत । प्रसिद्धायां तु प्रतिपत्तौ वाचकभागेयत्तानियमपरिच्छेदेऽनयोर्व्यापारः । न चैकत्र वर्णानुगमादर्थानुगमो दृष्ट इत्यन्यत्रादृश्य मानोऽपि हठादापादयितुं युक्तः ॥ § 6634

रेणुपटलानुगतपिपीलिकापङ्क्तिद्वारकव्यभिचारोद्भावनमपि न पेशलम्—पांसुपटलविकलपिपीलिकापङ्क्तिदर्शनेन तस्याः तत्प्रतीतिकारित्वाभावनिश्चयात् । करिकरभतुरगप्रभृतीनां तु प्रत्येकं व्यभिचारेऽपि बहु प्राणिरूपसामान्यानपायात् तत्कारणमेव धूलीपटलमवगम्यते ॥ § 6635

II.181/KSV

## अश्वकर्णादिपदानां गमनिकाप्रदर्शनम्

यदपि—अश्वकर्णादौ अवयवार्थलोपात् अन्यत्राप्येवमिति कथितम्—तदपि न चतुरश्रम्—अश्वकर्णशब्दो हि क्वचिदर्थप्रकरणवशात् न्यग्भवदवयवशक्तितया तिरस्कृतावयवार्थवस्त्वन्तरव्यक्तौ न सर्वात्मनाऽवयवार्थाभावः; व्यस्तत्वेन सामस्त्येन वा पुनः प्रयोगान्तरे तदर्थसंप्रत्ययदर्शनात् । अश्वमारोह कर्णे कुण्डलं इति व्यस्तयोः प्रयोगः । तुरगश्रोत्रे तु प्रतिपिपादयिषिते अश्वकर्णः इति समस्तप्रयोगोऽपि तदर्थापरित्यागी दृश्यते इति न सर्वात्मना निरर्थका भागाः ॥ § 6636

## प्रकृतिप्रत्ययादिनिर्णयोपायः

---

९ ] गु— nyāma-wit__ka
११ ] मे—अ-ख मात्दा— nyāma-wit__gha
१६ ] र्य— nyāma-wit__ca

---

५ *] अन्वयव्यतिरेकौ हि ज्ञापकौ । न तु कारकौ । अन्वयव्यतिवेकाभ्यां नोत्प द्यत इत्यन्वयः ॥
१२ यात्] अन्यथा करितुरगादीनामपि तद्धेतुत्वे न स्यादित्यर्थः ॥
१५ हि] ओषधिविशेषेऽपि अश्वकर्णसादृश्यादेव तत्प्रयोग इति न सर्वथाऽर्थशून्यत्वम् ॥

यत्पुनः अन्वाख्यानविसंवादात् प्रकृतिप्रत्ययविभागनियमो नावकल्पत इति—एतदपि न युक्तम्—आप्ततरोक्तीनां प्रामाण्यात् । त्रिमुनिव्याकरणमिति पाणिनिमतमेव हि प्रकृतिप्रत्ययविभागं अवितथं प्रत्येष्यामः । क्रियत्यपि चांशे प्रायेण सर्वेषामन्वाख्यातॄणामविवादः । विकरणादिविसंवादमात्रं त्वकिंचित्करम् । अतः पारमार्थिकत्वात् प्रकृतिप्रत्ययांशयोः न कल्पनामात्रेण पृथक्करणम् ॥ § 6637

## पदविभागव्यवस्थोपायः

यदप्यवर्णि—वर्णसामान्यात् पदविभागज्ञानं दुर्घटं—कालेनदन्तिनागाः इति—तदप्यसारम्—स्वरस्मरणादीनां पदभेदावगमोपायानां संभवात् ।
II.182/KSV *सरामः इत्याख्यातस्य अन्यत् स्वरादिरूपम्, नाम्नोऽन्यत् । नामत्वेऽपि स इति राम इति च द्वे पदे । तयोरन्यद्रूपम् । सह रामेण वर्तत इत्येकपदेऽपि अन्यद्रूपमित्यभियोगविशेषवतां सर्वं सुभगमिति नाशक्यः पदविभागपरिच्छेदः ॥ § 6638

## वर्णविकृतावपि प्रत्यभिज्ञानसंभवः

यदपि—दध्यत्र मध्वत्र इति तथाविधपदरूदादर्शनेऽपि तदर्थसंप्रत्यय इत्युक्तम्—सोऽपि न दोषः—यतः ते एवैते पदे ईषद्विकृते, तत्प्रत्यभिज्ञानाद्वेति केचित् ॥ § 6639

अथवा इगन्तदधिमधुपदवत् यणन्तयोरपि विषयान्तरे साधुत्वात्, तथैव तद्विधात् व्युत्पत्तेः यणन्ते अपि पदे अर्थप्रतिपादके भविष्यत इत्यलमेवंप्रायैः कदाशाव्याहृतैः ॥ § 6640

## पदानामसत्यत्वानुपपत्तिः

अपि च पदानामसत्यत्वे किमर्थ एष तद्व्युत्पत्तौ इयान् प्रयत्नो वृद्धैराधीयते ? § 6641

असत्यमपि सत्योपायतां प्रतिपद्यत इति चेत्, न—अदृष्टत्वात्—अलिकाहिदंशादयः सत्यमूर्छाहेतवो येऽत्रोदाहृताः, ते तथा न भवन्ति, विषाशङ्काया अपि तत्कार्यहेतुत्वात् । शङ्का हि नाम बुद्धिः । बुद्धिश्च न न कारणम् । न चासती बुद्धिः ॥ § 6642

---

३ ] गं— nyāma-wit__ka
७ ] अपि— nyāma-wit__kha
१७ ] तु— nyāma-wit__kha
१८ ] ह— nyāma-wit__ka

---

९ *] सृगतौ—इतिधातोः उत्तमपुरुषबहुवचने आख्यानस्यान्तोदात्तत्वम् । बहुव्रीहित्वे आद्युदात्तत्वम् । अन्यत्र उदात्तत्वम् ॥
१६ वा ] (?)

## असत्यात्सत्यप्रतिपत्तिनिराकरणम्

यदपि लिप्यक्षराणामसत्यानां सत्यार्थप्रतिपादकत्वमुच्यते—तदप्यनभिज्ञभाषितम्—रेखास्तावत् स्वरूपतः सत्याः । ताश्च खण्डिकोपाध्यायोपदेशसंस्कृतमतेः वर्णानुमापिका भवन्ति । तथा संबन्धग्रहणात् रेखानुमितेभ्यश्च वर्णेभ्यः अर्थप्रतिपत्तिरिति नासत्यास्सत्योपायाः ॥ § 6643 II.183/KSV

अयं गकारः* इति तु सामानाधिकरण्यभ्रमः लिङ्गलिङ्गिनोरभेदोपचारात् । यथा प्रस्थमिताः सक्तवः प्रस्थशब्देनोच्यन्ते, तथा रेखातोऽपि गकारानुमानात् रेखैव गकार इत्युच्यते । एवमनिष्यमाणे लिप्यनभिज्ञस्यापि ततोऽर्थप्रतिपत्तिः स्यात्, रेखानामसत्यवर्णानां विद्यमानत्वात् । न चेवमस्ति । तस्मात् वर्णानुमानपुरस्सरैव रेखाभ्योऽर्थावगतिः । अभ्यस्तत्वाद्विषयस्य, सक्ष्मत्वाच्च कालस्य क्रमो न लक्ष्यते, न त्वन्यथा ततोऽवगतिः । तस्मात् पारमार्थिकत्वात् पदतदर्थानां न निरवयवौ वाक्यवाक्यार्थाविति स्थितम् ॥ § 6644

यत्पुनः वाक्यभागपदवर्णापह्नववर्त्मना शब्दब्रह्मैवाद्वयमुपदर्शयितुमुपक्रम्यते—तत्र पुरस्तात् सविस्तरं समाधिमभिधास्यामः ॥ § 6645

## वाचस्त्रैविध्यतात्पर्यम्

यत्पुनरवादि वाचस्त्रैविध्यं—तदपि नानमन्यन्ते । एकैव वैखरी वाग्वागिति प्रसिद्धा हि ॥ § 6646

अन्तस्संजल्पो वर्ण्यते मध्यमा वाक्
सेयं बुद्ध्यात्मा नैष वाचः प्रभेदः ।
बुद्धिर्वाच्यं वाचकं चोल्लिखन्ती
रूपं नात्मीयं बोधभावं जहाति ॥§ 6650

II.184/KSV

पश्यन्तीति तु निर्विकल्पकमतेर्नामान्तरं कल्पितं ।
विज्ञानस्य हि न प्रकाशवपुषः वाग्रूपता शाश्वती ।
*जातेऽस्मिन् विषयावभासिनि ततः स्याद्वाऽवमर्शो गिरः
न स्याद्वापि न जातु वाग्विरहितो बोधो जडत्वं स्पृशेत् ॥§ 6654

१३ ] ह्म उ— nyāma-wit__ka

२ ताश्च ] खण्डिका—वेदभागः, अनुवाकवत् ॥
५ * ] रेखायामिति शेषः ॥
१९ न्ती ] उल्लिखन्ती बुद्धिः इत्यन्वयः ॥
२३ * ] विषयप्रकाशके ज्ञाने जाते, तत्र शब्दस्य परामर्शः स्यात् न वा न तत्र निर्बन्धः । परन्तु शब्दाविषयकत्वमात्रात् विषयाविषयकत्वं न भवेत् । शब्दाननुविद्धा प्रतीतिः स्यादेव ॥
२४ बोधो ] जडत्वं—घटादिवन्निर्विषयत्वम् ॥

## स्फोटवादोपसंहारः

तदास्तामियं शब्दब्रह्मचर्चा । प्रकृतमनुसरामः ॥ § 6655

इति विततया वर्णा एते धिया विषयीकृताः
दधति पदतां वाक्यत्वं वा त एव च वाचकाः ।
न च तदपरः स्फोटः श्रोत्रे विभात्यवबोधने
न च विधिहतो वाच्ये बुद्धिं विधातुमसौ क्षमः ॥§ 6659

—इति स्फोटनिराकरणम्— § 6660

II.185/KSV

—वाक्यार्थबोधविचारः— § 6661

## पदार्थनां वाक्यार्थबोधजनकत्वपक्षः

एवं स्फोटे प्रतिहते, वर्णेषु वाचकेषु स्थितेषु कश्चिदाह—वाढं वर्णेभ्यः पदार्थप्रतीतिरस्तु । वाक्यार्थप्रतीतौ न तेषां सामर्थ्यम् ॥ § 6662

कुतस्तर्हि वाक्यार्थावगतिः ? पदार्थेभ्य इत्याह ॥ § 6663

तथा च वर्णानां पदार्थप्रतिपत्तौ चरितार्थत्वात् न वाक्यार्थे सामर्थ्यम् । अपरिम्लानसामर्थ्यास्तु पदार्था आसते । ते वाक्यार्थबुद्धेर्विधातारः ॥ § 6664

*अर्थापत्त्या हि वर्णानां कार्येषु शक्तयः कल्प्यन्ते । तत्र पदार्थबुद्धेरन्यथानुपपन्नत्वात् यथोक्तनीत्या वर्णानां तत्प्रतिपादने शक्तिरवगम्यते । वाक्यार्थप्रतीतिः पुनरन्यथाऽप्युपपद्यमाना न तत्र तेषां शक्ति मुपकल्पयितुमर्हति ॥ § 6665

## वर्णानां वाक्यर्थबोधजनकत्वासंभवः

किंच किमेकमेव संस्कारमादधाना वर्णाः पदार्थं वाक्यार्थं च बोधयन्ति, भिन्नं वा ? तत्र च— § 6666

एकयैव हि संस्कृत्या कथं कार्यद्वयं भवेत् ।
न चैषां पूर्वसंस्कारात् अन्योऽस्तीति प्रतीयते ॥§ 6668

१ ] ब्र— nyāma-wit__kha
४ ] रे वर्णा— nyāma-wit__ka
८ ] षु— nyāma-wit__ka
१५ ] तत्र— nyāma-wit__ka

२ इति ] विततया—एवं विस्तरेण प्रतिपादितया रीत्या वर्णाः धिया विषयीकृताः पदतां, वाक्यतां वा दधति । न त्वतिरिक्तं पदं वाक्यं वा । कृताम् इति पाठे तत् पदतामित्यादेर्विशेषणम् ॥

५ च ] विधिहतः—दुर्भगः । असौ—स्फोटः ॥

१३ *] अनन्यथासिद्धौ ह्यन्वयव्यतिरेकौ कार्यकारणभावनिर्णायकौ ॥

वाक्यार्थप्रतीतेरन्यथापि भावात् न नानासंस्कारकल्पनाबीजमस्ति ॥
§ 6669

अपि च पदेषु पूर्ववर्णेषु नातिदूरमतिक्रान्तेषु बुद्ध्योपसंहर्तुं शक्येषु घटमानं अन्त्यवर्णवेलायामनुसंधानं वाक्येषु पुनरतिचिरतरतिरोहिताक्षरपर II.186/KSV परानुसन्धानमतिक्लिष्टमदृष्टपूर्वमिति दुर्घटमेतत् । व्यवहितपदोच्चारणे तु दृश्यते वा वाक्यार्थप्रतीतिः, यत्र पूर्ववर्णानुसन्धानगन्धोऽपि नास्ति । तस्मान्न वर्णा वाक्यार्थबुद्धिहेतवः ॥ § 6670

## वर्णानां वाक्यार्थबोधजनकत्वानुपपत्तिः

अपि च पदार्थं वाक्यार्थं च प्रतिपादयन्तो वर्णाः—युगपत् प्रतिपादयेयुः, क्रमेण वा ? तत्र सकृदुच्चरितानां युगपदुभयकरणमनुपपन्नम्, अशक्यत्वात् ॥ § 6671

क्रमपक्षेऽपि पूर्वं चेत् वाक्यर्थप्रतिपादनं, तदयुक्तम्—अनवगतपदार्थस्य वाक्यार्थप्रत्ययादर्शनात् । अथ पूर्वं पदार्थप्रतिपादनं, ततो वाक्यार्थप्रत्यायनं, हन्त तर्हि पदार्थप्रत्ययादेव वाक्यार्थबुद्धेः सिद्धत्वात् किमिति पुनः व्यापारान्तरे श्रम आश्रीयते । तस्मात् पदार्थप्रतिपादनपर्य वसितसामर्थ्यानि पदानि । पदार्थेभ्यस्तु वाक्यार्थप्रत्यय इति सिद्धम् ॥ § 6672

## वर्णानामनुपस्थितावपि वाक्यार्थज्ञानसंभवः

अपि च अन्वयव्यतिरेकाभ्यामेवं अवगम्यते—यत् पदार्थपूर्वको वाक्यार्थ इति । यो हि मानसादपचारात् श्रुतेष्वपि पदेषु पदार्थान्नावगच्छति, नावगच्छत्येव वाक्यार्थम् । यस्तु अश्रुतेष्वपि पदेषु प्रमाणान्तरतः पदार्थान् जानीयात्, जानात्येवासौ वाक्यार्थम् ॥ § 6673

पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः ।
खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः ॥ श्लो. वा-वाक्य-३३५ § 6675

II.187/KSV

९ ] च्चा— nyāma-wit_kha
११ ] ति— nyāma-wit_kha

९ प] उभयं—पदार्थप्रतिपादनं, वाक्यार्थप्रतिदादनं च ॥
१७ चारात्] अपचारः—अनवधानादिः ॥
१९ त] आ—इति ईषदर्थे । अस्पष्टरूपमिति यावत् ॥

दृष्टा वाक्यविनिर्मुक्ता न पदार्थैर्विना क्वचित्§ 6676

इति ॥ § 6677

तदेषा वाक्यार्थबुद्धिः पदार्थप्रतीतिं न व्यभिचरति । व्यभिचरति तु पदप्रतीतिमिति न तत्कार्या भवितुमर्हतीति ॥ § 6678

## पदार्थानामेव वाक्यार्थबुद्धिजनकत्वम्

यदप्युच्यते—प्रत्येकं व्यभिचारात्, समुदितानामसाधारण्यात् न पदार्थानां वाक्यार्थावगतिहेतुत्वमिति—तदप्ययुक्तम्—प्रत्येकं तावत् गमकत्वं नेष्यत एव । समुदितानां त्वसाधारण्यं भवदपि न नः क्षतिकरम् । न ह्येते लिङ्गवत् संबन्धग्रहणमपेक्षमाणा अवबोधकाः, यदसाधारण्यान्नावकल्पेत । किन्तु अगृहीतसंबन्धा अपि आकाङ्क्षायोग्यतासन्निधितात्पर्यपर्यालोचनया परस्परं संसृज्यन्ते । स एव वाक्यार्थः, यः संसृष्टः पदार्थसमुदायः, इतरविशिष्टो वेतर इति ॥ § 6679

नाप्यशाब्दत्वमित्थं वाक्यार्थप्रतीतेराशङ्कनीयम्, शब्दावगतिमूलत्वेन तस्याः शाब्दत्वात् । शब्दात् पदार्थप्रतिपत्तौ वाक्यार्थप्रतिपत्तिरिति सर्वमनवद्यम् । तदुक्तं—पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि । अथेदानीमवगताः पदार्था एव वाक्यार्थमवगमयन्ति शा. भा. १-१-२५ इति ॥ § 6680

II.188/KSV

## वाक्यैरेव वाक्यार्थबोधपक्षः

अत्राप्यभिधीयते—न पदार्थेभ्यो वाक्यार्थावगतिः, अपि तु वाक्यादेव । तथा चायं वाक्यार्थ इति प्रसिद्धिः, न पदार्थार्थ इति । यथा हि काल्पनिकवर्णसमूहात्मकं पदं पदार्थप्रतिपत्तिमादधाति, तथा काल्पनिकपदसमूहात्मकं वाक्यं वाक्यार्थप्रतिपत्तिमाधास्यति ॥ § 6681

ननु ! पदसमूहात्मकं वाक्यमन्यन्नास्ति, किन्तु पदान्येव वाक्यम् । पदानां च स्वार्थे चरितार्थत्वात् न वाक्यार्थसामर्थ्यमित्युक्तम्—नैतद्युक्तम्—पदार्थानामपि चरितार्थत्वात् । क्व तेषां चरितार्थत्वम्—*स्वप्रतिपत्तौ ॥ § 6682

६ ] एवं— nyāma-wit_ca
९ ] सं— nyāma-wit_kha
१५ ] त्रा— nyāma-wit_kha

४ ण्यात् ] तथाच अनुगतरूपमन्तरा न तत्रान्वयव्यतिरेकाधीनकारणत्वं निश्चेतुं शक्यम् ॥
९ यः ] संसृष्टः इति खले कपोतन्यायेन संसर्गस्य वाक्यार्थत्वपक्षे । इतर इत्यादि खण्डवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधपक्षे ॥
२१ * ] स्वविषयकज्ञानजनने ॥

## पदार्थानां वाक्यार्थबोधाजनकत्वम्

ननु ! पदानि स्वप्रतिपत्तौ चरितार्थीभूय पदार्थप्रतिपत्तिमादधति । पुनस्तान्येव कथं वाक्यार्थप्रतिपत्तिमाधास्यन्ति ? पदार्थास्तु स्वावगतेरूर्ध्वं न क्वचित्परत्रचरितार्था इति वाक्यार्थबुद्धेर्विधातारो भवन्तु—नैत देवम्—अन्त्यपदस्यान्यत्र चरितार्थत्वाभावात् ॥ § 6683

अन्त्यपदमेव पूर्वपदस्मरणोपकृतं वाक्यमुच्यते । तदर्थश्च पूर्वपदार्थविशिष्टो वाक्यार्थ इत्येके । तस्मात् वाक्यादेव वाक्यार्थप्रत्ययः ॥ § 6684

## पदानां वाक्यार्थबोधजननप्रकारः

किन्तु—किमेकसंस्कारस्मरणेन कार्यद्वयं पदानि विदधाति विभिन्न संस्कारेण वा ? इति—तत्र कार्यभेदात् कारणभेदानुमानमिति प्रसिद्ध एष II.189/KSV
पन्थाः । एकोऽप्यतीन्द्रियः संस्कारः कार्यात् कल्प्यते; बहवोऽपि तत एव कल्पयिष्यन्ते, कार्यस्य भिन्नत्वात् ॥ § 6685

यदपि चिरतिरोहितवर्णप्रबन्धानुसन्धानं दुर्घटमिति कथितं—तदपि न चारु—कयाचित्कल्पनया वर्णानामिव पदबुद्धौ, पदानामपि वाक्यबुद्धावुपारोहसंभवात् । एतच्चानन्तरं दर्शयिष्यते ॥ § 6686

यदपि विकल्पितं—युगपद्वा क्रमेण वा वर्णाः पदवाक्यार्थप्रत्यये व्याप्रियेरन् ? इति—तत्राप्युच्यते—यौगपद्यं तावदनभ्युपगमादेव प्रत्युक्तम् । क्रमोऽप्येषामीदृशः—यत् प्रथमं पदार्थमवगमयन्ति, ततो वाक्यार्थम् । सोऽयं तर्हि पदार्थपूर्वक एव वाक्यार्थ उक्तो भवतीति चेत्—मैवम्—पदार्थो हि नाम प्रमेयमेव । न ते प्रमाणवर्गे निपतन्ति । न च पदार्थवाक्यार्थयोरत्यन्तं भेदः, येन तयोः धूमाग्न्योरिव संबन्धग्रहणसापेक्षयोः तदनपेक्षयोर्वा रूपदीपयोरिव प्रत्याय्यप्रत्यायकभावः । न हि स्वशरीर एव गम्यगमकवाचोयुक्तिः प्रवर्तते । कथं भवान् स्वभावहेतुवादिनो बौद्धस्य शिष्य इव निर्वृत्तः ॥ § 6687

## पदैः व्यक्तिबोधनप्रकारः

ननु ! सामान्ये हि पदं वर्तते, विशेषे च वाक्यम् । अन्यच्च सामान्यम्, अन्ये च विशेषाः । यदुक्तं— § 6688

---

२ ] न्तीति— nyāma-wit_ca nyāma-wit_kha
१७ ] हि— nyāma-wit_kha
२१ ] स्वभावात्—

---

७ णेन ] कार्यद्वयं—पदार्थप्रतिपादनम्, वाक्यार्थप्रतिपादनं च ॥

सामान्यान्यन्यथासिद्धेः विशेषं गमयन्ति हि§ 6689

इति व्यतिरेक एव प्रत्याय्यप्रत्यायकयोः—उच्यते—बाढम् ? अस्त्य- II.190/KSV यमियान् व्यतिरेकः । किन्तु विरतव्यापारे चक्षुषीव शब्दे, धूमा दिवत् प्रमेयात् पदार्थात् अग्नेरिव वाक्यार्थस्यावगमो नास्ति । न हि पदार्थाः प्रमेयीभूय धूमवत् पुनः प्रमाणीभवितुमर्हन्ति । किन्तु पदान्येव तत्प्रतिपादनद्वारेण वाक्यार्थप्रतिपत्तौ पर्यवस्यन्ति । कथमात्मीयमेव ग्रन्थं नावबुध्यन्ते भवन्तः ! श्लो-वा-वाक्य-३४० § 6690

वाक्यार्थप्रत्यये तेषां प्रवृत्तौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् इति ॥§ 6692

अवान्तरव्यापारो हि न कारकस्य प्रधाने व्यापारे कारकतां व्याहन्ति । पदानां हि द्वयी शक्तिः, अभिधात्री तात्पर्यशक्तिश्च । तत्र अभिधात्री शक्तिरेषां पदार्थेषूपयुक्ता । तात्पर्यशक्तिश्च वाक्यार्थे पर्यवस्यतीति ॥ § 6693

## तात्पर्यवृत्त्या व्यक्तिबोधः

भाष्यकारोऽपि पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि इति वदन् अभिधाव्यापार एव शक्तेः विरतिमाह, न तात्पर्यशक्तेः । अभिधाय निवृत्तव्यापाराणि पदानि यदर्थपराणि, तत्रानिवृत्तव्यापाराण्येव । एवं हि शाब्दता वाक्यार्थप्रत्ययस्य न हास्यते । सर्वात्मना तु विरतव्यापारे शब्दे, साऽवश्यं हीयते । शब्दावगतिमूलत्वात्तु शाब्दत्वे श्रोत्रत्वमपि स्यात्, श्रोत्रस्य पारंपर्येण तन्मूलत्वात् । शब्दे च विरतव्यापारे कतमत् तत्प्रमाणम्, यस्य वाक्यार्थप्रतीतिः फलमिति न विद्मः ॥ § 6694

न प्रत्यक्षम्, अतीन्द्रियत्वाद्वाक्यार्थस्य । नानुमानम्, न चानुमानमेषा धीः श्लो-वा-१-१-१-त्रो-२३२ इत्यादिना ग्रन्थविस्तरेण स्वयमेव निरस्तत्वात् । न शब्दः, निवृत्तव्यापारत्वात् ॥ § 6695

---

१० ] वाच्यम—क, यद्य— nyāma-wit_kha
१०--१२ ] णि— nyāma-wit_kha
१२ ] पदा— nyāma-wit_ka

---

१ सामा ] कार्यं प्रति विशेषा एव कारणम्, न सामान्यम् । दण्डत्वादिकं हि घटादीन् प्रत्यन्यथासिद्धम् ॥
४ न्ति ] तदा हि शाब्दबोधस्यानुमितित्वं स्यात् ॥
६ ये ] तेषां—पदानाम् ॥

II.191/KSV

सामान्यान्यन्यथासिद्धेः विशेषं गमयन्ति हि§ 6696

इति न्यायात् । अर्थापत्तिरिति चेत्, किमिदानीमर्थापत्तिगम्यो *धर्मः ? न चैतद्युक्तं, इष्टं वा । तदिदं सप्तमं प्रमाणमवतरति पारार्थ्यं नाम । एतच्चापि नेष्टम् । अतो न पदार्थनिमित्तकः वाक्यार्थप्रत्ययः ॥ § 6697

## शाब्दबोधस्य शब्दजन्यत्वोपपत्तिः

यदप्युक्तं—अन्वयव्यतिरेकाभ्यां पदार्थनिमित्तकत्वं वाक्यार्थस्यावगम्यत इति—तत्र पदार्थसंसर्गस्वभावत्वाद्वाक्यार्थस्य सत्यं तत्पूर्वकत्वमिष्यत एव वाक्यप्रतिपत्तेः, न तु तज्जन्यत्वं, शब्दव्यापारानुपरमात् । मानसे चापचारे सति पदानामपि ग्रहणं नास्त्येव, यतः क्षणान्तरे समाहितचेताः स वक्ति नाहमेतदश्रौषम्, अन्यत्र मे मनोऽभूत्, पुनर्ब्रूहि इति । इतरथा हि पदानि स्मृत्वा तदर्थमेवावगच्छेत्, न पुनः पृच्छेत् । तस्मात् पदानां ग्रहणमेव तत्र वाक्यार्थावगमे निमित्तम् ॥ § 6698

## प्रमाणान्तरोपस्थितस्य न शाब्दबोधविषयत्वम्

यदपि—पश्यतः श्वेतमारूपं इति—तदपि न किंचित् । किं प्रत्यक्षेण शुक्लो गौः गच्छत् दृश्यते । न शुक्लो गौः गच्छतीति वाक्यस्यार्थो न भवति । प्रत्यक्षप्रतिभासात्तु प्रत्यक्षार्थ एवासौ न वाक्यार्थ इत्युच्यते । एवं श्वेतोऽश्वो धावति इत्यानुमानिकोऽयं प्रत्ययः पर्वतेऽग्निरितिवत् । वाक्यश्रवणात्तु विना न वाक्यार्थो भवितुमर्हतीत्यलं प्रसङ्गेन ॥ § 6699

II.192/KSV

तस्मात् वर्णेभ्य एव कयाचित्कल्पनया पदवाक्यभावमुपगतेभ्यः पदार्थ-वाक्यार्थप्रत्यय इति युक्तम् । तस्मात् पदार्थजन्या न भवति वाक्यार्थबुद्धिरिति सिद्धम् । अनुपरतव्यापारात् वाक्यादेवेयमुद्भवति ॥ § 6700

---

२--३ ] पदार्थां नामेति तच्च— nyāma-wit__kha
९ ] दार्थां— nyāma-wit__kha
११ ] ति— nyāma-wit__kha
१७ ] र्थ— nyāma-wit__ga
१८ ] युक्त— nyāma-wit__kha

---

१ *] धर्मे शब्द एव प्रमाणमिति मीसांसकाः ॥
२ मं] प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धय इति प्रमाणषट्कवादिनो हि भाट्टाः ॥
६ चारे] अपचारः—अनवधानादिः ॥
१७ ति] किन्तु पदजन्यैव ॥

## वर्णानां पदभावोपगमप्रकारनिरूपणम्

आह—कया पुनः कल्पनाया पदवाक्यभावमुपगता वर्णाः पदार्थवाक्यार्थप्रतीतिमादध्युरिति ॥ § 6701

तत्र आचार्यास्तावदिमां कल्पनामदीदृशन् । प्रथमं वर्णज्ञानं, ततः संस्कारः । ततो द्वितीयवर्णज्ञानं, तेनप्रथमवर्णज्ञानजनितेन च संस्कारेण पटुतरसंस्कारः । ततः तृतीयवर्णज्ञानं, तेन प्राक्तनेन संस्कारेण पटुतरः संस्कारः । एवं यावदन्त्यवर्णज्ञानम् । अन्त्यवर्णज्ञानानन्तरं तु ततः संस्कारात् सकलपूर्ववर्णविषयमेकस्मरणम् । तेनान्त्यवर्णज्ञानस्य विनश्यत्ता । विनश्यदवस्थग्रहणस्मरणविषयीकृतो वर्णसमूहः पदमिति ज्ञायते ॥ § 6702

## वाक्यभावप्रदर्शनम्

ततः पदज्ञानात् संस्कारः । ततः तथैव वर्णक्रमेण द्वितीयपदज्ञानम् । तेन प्रथमपदज्ञानजन्मना च संस्कारेण पटुतरसंस्कारो जन्यते । पुनस्तेनैव क्रमेण तृतीयपदज्ञानम् । तेन प्राक्तनेन च संस्कारेण पीवरतरः संस्कारः जन्यते । एवं यावदन्त्यपदज्ञानं अन्तरेण स्थवीयसा संस्कारेण सर्वपदविषयमेकस्मरणमुपजन्यते । संस्कारस्यैवैकत्वात् सोऽयं स्मरणानुभवविषयीकृत-
II.193/KSV वर्णसमूह एव पदम् । पदसमूहो वाक्यमित्युच्यते । ततो वाक्यार्थप्रतिपत्तिः । संस्कारस्य च संस्कारान्तरकरणकौशलमवश्यमेषितव्यम् । अन्यथा सर्वत्र क्रियाभ्यासोऽनर्थकः स्यादिति ॥ § 6703

## वर्णानां पदवाक्यरूपतापत्तिनिराकरणपक्षः

अत्र वदन्ति—नेयं प्रक्रिया साध्वी, ज्ञानयौगपद्यप्रसङ्गात् । तथा, हि—चरमपदप्रतिभासानन्तरं यथा पूर्वपदस्मरणं, तथा तदैव संकेतस्मरणेनापि भवितव्यम् । अनवगतपदार्थसंबन्धस्य हि न वाक्यार्थप्रतीतिः । अस्मृतसंकेतस्य च न पदार्थप्रतीतिः । यत्राप्यभ्यस्ते विषये संकेतस्मृतिर्न संवेद्यते, तत्राप्यविनाभावस्मृतिरेव बलादसौ कल्प्यते, अनवगतपदपदार्थसंबन्धस्य नारिकेलद्वीपवासिन इवार्थप्रत्ययाभावात् । संबन्धानुभवस्य च पूर्ववृत्तत्वेनेदानीं स्मरणमुखेनोपकारित्वात् । तस्मादन्त्यपदज्ञानानन्तरं पूर्वपदसमयस्मरणयोः युगपदुत्पादात् ज्ञानयौगपद्यम् ॥ § 6704

## पदैः वाक्यज्ञाने ज्ञानयौगपद्यं दुर्वारम्

२४ य ] समयः—शक्तिः ॥

अथ समयस्मरणानन्तरं पूर्वपदस्मरणमुपेयते—तथापि तत्स्मृतिकाले पदार्थज्ञानोपजननात् पुनरपि ज्ञानयौगपद्यम् । न च तदा पदार्थज्ञानं नोदेतीति शक्यते वक्तुम्, अविकलतदुपजननकारणसामग्रीसन्निधानात्, प्रतिनायकस्य च तदानीमभावात् । पदार्थज्ञानोत्तरकालं तर्हि पूर्वपदस्मरणमस्त्विति चेत्; एवं तर्हि चरमपदज्ञानप्रत्यस्तमयात् अन्त्यपद * रहितं II.194/KSV वाक्यं स्यात् । अन्त्यपदज्ञानस्य हि सङ्केतस्मृतिवेलायां विनश्यत्ता, पदार्थज्ञानवेलायां विनाश एव यतः ॥ § 6705

## असंवेद्यमानशब्दसत्ताऽसंभवः

ब्रूयात्—असंवेद्यमानमपि तदानीमन्त्यपदमस्त्येवेति—स्वस्ति तर्हि न्यायविस्तराय ॥ § 6706

अपिच तदानीमनुपलभ्यमानेनापि सता किमन्त्यपदेन क्रियते ? पुनरवगमोऽस्य भविष्यतीति चेत्; स कुतस्त्यः ? श्रोत्रस्य विरम्यव्यापारासंवेदनात् । मनसश्च स्वातन्त्र्येण बाह्ये विषये सामर्थ्यासंभवात् । सत्यपि पुनस्तदवगमे ज्ञानयौगपद्यानपायात् ॥ § 6707

अपिच पूर्वपदैः अर्थशून्यतया शुष्कनीरसतनुभिः अन्त्यपदानुभव समनन्तरं स्मृतैरपि को गुणः ? न हि तथाविधपदस्मरणमर्थप्रत्यायनाङ्गम् ॥ § 6708

अथ सार्थकानि प्रांचि पदानि स्मर्यन्ते, तर्हि समयस्मरणपदार्थज्ञानादिकार्यसाङ्कर्यकृतं अनेकशाखं प्रतिपदं ज्ञानयौगपद्यमापद्यत इत्यसतीयं कल्पना ॥ § 6709

## वर्णानां पदवाक्यभावे पक्षान्तरम्

व्याख्यातारस्तु प्रक्रियान्तरमाचचक्षुः—वर्णानुगमरूपेण तावत् प्रथम II.195/KSV पदज्ञानमुत्पद्यते । ततः सङ्केतस्मरणम् । तेन विनश्यदवस्थेन पदज्ञानेन स्वविषयावच्छेदेन पदार्थज्ञानमाधीयते, यत्र वाचकावच्छिन्नं वाच्यस्वरूपमवभासते । तथाविधपदार्थज्ञानान् संस्कारः । ततः तथैव क्रमेण द्वितीयपदज्ञानम् । तदनु समयस्मरणम् । तेन विनश्यदवस्थेन च द्वितीयपदज्ञानेन

१ ] था— nyāma-wit__kha
७ ] अवि— nyāma-wit__ca
८ ] व्र— nyāma-wit__ka

३ ण ] शक्तिज्ञानादिरूपसामग्र्यां सत्यां, पदे श्रुतेऽपि पदार्थस्मृतिर्न भवतीति कथज्यते ?
५ * ] वेदग्रहणादौ, लङ्घनाभ्यासादौ वा ॥
९ राय ] मीमांसकानां, शब्दविवर्तवादिनां च स सिद्धान्तः । तदङ्गीक्रियते चेत् न्यायशास्त्रस्य वैफल्यमिति नर्मोक्तिः ॥
१४ दैः ] पदार्थज्ञानाभावादिति हेतुः । मध्ये पदार्थज्ञानाङ्गीकारे तु ज्ञानयौगपद्यम् ॥
१८ शाखं ] प्रतिपदं—एकैकपदश्रवणवेलायाम् । प्रतिक्षणं वा ॥

तथैव स्वावच्छेदेन स्वार्थज्ञानम् । तेन प्रथमपदार्थज्ञानाहितेन च संस्कारेण दृढतरः संस्कारः । पुनर्वर्णक्रमेण तृतीयपदक्रमेण तृतीयपदज्ञानम् । पुनः सङ्केतस्मरणम् । सङ्केतस्मृतिसहायेन तेन विनश्यदव स्थेन स्वार्थे तथैव स्वावच्छिन्नं ज्ञानम् । तेन प्राच्येन च संस्कारेण दृढतरः संस्कारः । एवं तावत् यावदन्त्यपदज्ञानात् स्वावच्छिन्नार्थप्रतीतिः । ततः पूर्वोपचितात् महतः संस्कारात् विशिष्टसर्वविषयमेकं स्मरणम्, यस्य स्वाभिधानावच्छिन्नाः सर्वे पूर्वपदार्था विषयतां प्रतिपद्यन्ते । तस्मिन् स्मरणे तथान्त्यपदार्थज्ञानेऽवच्छेदकत्वेन प्रस्फुरत्पदसमूहो वाक्यम्, अवच्छेद्यत्वेन प्रकाशमानोऽर्थसमूहो वाक्यार्थः । एवं स्मर्यमाणानुभूयमानौ पदपदार्थसमूहौ वाक्यवाक्यार्थाबुक्तौ भवतः ॥ § 6710

## पक्षान्तरनिराकरणम्

एतदपि न विचारक्षमम्—अन्त्यपदार्थप्रतीतिसमये तदवच्छेदकतया प्रतिभासमानं पदं तत्प्रतीतौ तावत् कारणमिति नात्र विमतिः । स्वयं च प्रतिभासमानत्वात् कर्मापि भवत्येव । तस्येदानीं कर्मत्वे करणं चिन्त्यम् । न श्रोत्रं तावत् करणम्, अन्त्यपदप्रतीत्यनन्तरमेव तद्व्यापारस्य विरतत्वात् । विरम्य च पुनर्व्याप्रियमाणत्वानुपपत्तेः । मनस्तु बाह्ये विषये स्वातन्त्र्येण प्रवर्तितुमसमर्थम् । तत्प्रवृत्तौ सर्वाण्येव प्रथमपदात्प्रभृति पदानि मानसव्यवसायगोचराणि भवन्तु; किं स्मर्यमाणत्वमन्येषामुच्यते ?* § 6711

II.196/KSV

अथ तदन्त्यपदं अर्थे इव आत्मन्यपि तदवच्छेदकत्वप्रतिपत्तेः करणत्वं प्रतिपत्स्यत इति मन्यसे—तदयुक्तम्—स्वप्रतीतौ तस्य कर्मत्वात् । न चैकस्यामेव क्रियायां तदेव कर्म करणं च भवितुमर्हति । विस्तरतश्चायं वाचकावच्छिन्नवाच्यप्रतिभासः प्रत्यक्षलक्षणे प्रतिक्षिप्त इति अलं पुनस्तद्विमर्देन ॥ § 6712

## वाक्यार्थबोधप्रकारे पक्षान्तरम्

अपर आह—प्रथमं पदज्ञानम् । ततः सङ्केतस्मरणम् । ततः पदार्थज्ञानम् । पदार्थज्ञानात् पदज्ञानस्य विनश्यत्ता । विनश्यदवस्थपदज्ञानमपेक्षमाणं श्रोत्रं प्रथमपदावच्छेदेन द्वितीयपदे ज्ञानमादधाति । द्वितीयपदज्ञानानन्तरं पुनः संबन्धस्मरणम् । ततः पदार्थज्ञानम् । तेन द्वितीयपदज्ञानस्य विनश्यत्ता

६ ] सव— nyāma-wit_kha
१७ ] चरचारीणि— nyāma-wit_kha
२३ ] ---Note: न चरितार्थत्वं—अन्त्यपदत्वादेव ॥

१७ *] मध्ये पदस्मरणं मा स्तु । मनसैव तावद्विषयकं ज्ञानं भवतु ॥

। विनश्यदवस्थपदज्ञानसहायात् श्रोत्रात् तथैव तदवच्छेदेनोत्तरोत्तरपदज्ञानं तावत् यावदन्त्यपदज्ञानमिति ॥ § 6713

तदज्ञानानन्तरं च प्राक्तनप्रक्रियावत् नात्र पूर्वपदस्मरणमुपयुज्यते । तत्फलस्य च विनाशदशापतितपदज्ञानकृतावच्छेदमहिम्नैव सिद्धत्वात् । तस्य हि फलमन्त्यपदावगमसमये सकलपूर्वपदोपस्थापनम् । तच्च विनश्यदवस्थपूर्वपूर्वपदज्ञानकृतोत्तरोत्तरपदानुरागबलादेव लब्धमिति किं तत्स्मरणेन ? तदभावाच्च नात्र ज्ञानयौगपद्यादिचोद्यावसरः समस्ति । यथोपदर्शितान्त्यपदज्ञानमेव च वाक्यार्थज्ञानमिति न तस्य चरितार्थत्वमन्यत्रइत्येवं वाक्यादेव वाक्यार्थप्रत्ययः सेत्स्यति, न पदार्थेभ्य इति ॥ § 6714

II.197/KSV

ज्ञानोपजननानुपपत्तेः । प्रथमपदज्ञानानन्तर हि संबन्धस्मरणम् । तेनैव तस्य विनश्यत्ता । पदार्थप्रतिपत्तिकाले च पदज्ञानं विनष्टमेव । विनश्यदवस्था बुद्धिः बुद्ध्यन्तरविरोधिनीति सामान्येन श्रवणात् ॥ § 6715

## ज्ञानविशेषयोर्यौगपद्यसंभवपक्षः

ब्रूयात्—कार्यभूतया बुद्ध्या कारणभूतबुद्धिः विरुध्येत, न बुद्धिमात्रेण बुद्धिमात्रमिति—एतदयुक्तम्—विशेषे प्रमाणाभावात ॥ § 6716

अभ्युपगम्यापि ब्रूमः—विशेषे प्रमाणभूतयोरेव बुद्ध्योर्भवतु वध्यविघातभावः । तथापि पदज्ञानं संकार इव समयस्मृतेः कारणमेव, संस्कारेणेव तेनापि विना तदनुत्पादात् । संस्कारप्रबोधे तस्य व्यापार इति चेत्; तेनापि द्वारेण यत् कारणं, तत् कारणमेव । तदिह पदज्ञानं समयस्मरणं, पदार्थज्ञानमिति त्रीणि ज्ञानानि युगपदवतिष्ठन्त इति परः प्रामदः ॥ § 6717

## एतत्पक्षेऽपि ज्ञानयौगपद्यं दुर्वारम्

अपि च पदज्ञानमुपजायमानं वर्णक्रमेण जायते, न सहसैव; निरंशपदवादस्य व्युदस्तत्वात् । तत्र च द्वित्राणि, त्रिचतुराणि, पंचषाणि वाऽक्षराणि क्रमेण ग्रहीष्यन्ते । तद्विषया हि क्रमभाविन्यः उपजननापायधर्मिका बुद्धयः । अत्रान्तरे विनश्यदवस्थमाद्यपदज्ञानमासिष्यते, तदुपरागेण द्वितीयपदज्ञानमुत्पत्स्यत इति दुराशैवेयम् ॥ § 6718

II.198/KSV

२३ ] मन्त्यप— nyāma-wit__kha
२४ ] मुपपद्य—क मुपपत्स्य—

nyāma-wit__kha

६ दानुराग ] अनुरागः—अनुरंजनम् । तावत्पदार्थविषयकविशष्टशाब्दबोधप्रयोजकसंस्कार विशेषः
॥
१३ मात्रेण ]

अदृष्टविशेषोद्भूतसंस्काराधीनस्मरणेन साकम् ॥
१६ इव ] समयस्मृतेरेव—इत्यन्वयः । समयः—संकेतः ॥

## व्यवहितपदोच्चारणेऽपि शाब्दबोधः

अपिच व्यवहितोच्चरितेभ्योऽपि पदेभ्यः वाक्यार्थप्रत्ययः दृश्यते । यत्रानेककार्यपर्यालोचनाव्यग्रहृदयः स्वामी रे कन्दलक ! इत्युक्त्वा, कार्यान्तरं संविधाय, तुरगं इति वदति । पुनः प्रयोजनान्तराय व्यवहृत्य, कल्पितपर्याणं इत्यादि वक्ति । पुनरन्यत् किमपि कृत्वा ब्रवीति आनय इति । तत्र रे कन्दलक ! कल्पितपर्याणं तुरगमानय इति वाक्यार्थावगमो भवति । भवन्मते चासौ दुरुपपादः । पदानुरागस्य तत्रासंभवात् । पूर्वपदस्मरणस्य चानभ्युपगमात् ॥ § 6719

## शङ्करस्वामिपक्षः

किंच न प्रवरमतानुसारिणामिव भवतां विशेष्यबुद्धिषु विशेषणविशेष्ये द्वे वस्तुनी आलम्बनम्, अपि तु विशेष्यमात्रम्, उपायभेदादेव प्रतीत्यतिशय इति । ततश्च सत्यपि पूर्वपदानुरागे तत्प्रतिभासाभावात् शुद्धमेव द्वितीयपदज्ञानं संपन्नमिति किं तदनुरागेण ? अतश्चेयमनुपपन्ना कल्पना, यतो द्वितीयपदस्य स्वार्थे शुद्धस्यैव सङ्केतग्रहणं वृत्तम् । यदा क्वचित् प्रथमं प्रयुक्तमासीत्, अधुना तु तत्पदं पदान्तरोपरक्तं संजातमिति तादृशस्यागृहीतसंबन्धत्वादर्थप्रतिपत्तिहेतुत्वं न स्यादित्यास्तामपूर्वमिदं शङ्करस्वामिनः पाण्डित्यम् ॥ § 6720

## स्वमतेन वाक्यार्थबोधोपवर्णनम्

II.199/KSV आह—यदीमाः सर्वा एव सदोषाः तान्त्रिकरचिताः कल्पनाः न साधीयस्यश्चेत्, तदाऽऽत्मीया का चन निर्दोषा साध्वी कल्पना निवेद्यताम्—उच्यते—न वयमात्मीयामभिनवां कामपि कल्पनामुत्पादयितुं क्षमाः ॥ § 6721

न हीयं कविभिः पूर्वैः अदृष्टा सूक्ष्मदर्शिभिः ।
शक्ता तृणमपि द्रष्टुं मतिर्मम तपस्विनी ॥§ 6723

कस्तर्हि विद्वन्मतितर्कणीयग्र-
न्थोपबन्धे तव दोहदोऽयम् ।
न दोहदः, पर्यनुयोगभूमिः,
परोपदेशाच्च न तस्य शान्तिः ॥§ 6727

---

३ ] ग— nyāma-wit__kha
६ ] सर्व— nyāma-wit__kha
२४ ] च्च— nyāma-wit__kha

---

६ वात् ] अत्यन्तव्यवहितत्वादेव ॥
९ भेदादेव ] न तु विषयाधिक्यात् ॥
१४ स्वामिनः ] अयं न्यायभाष्यटीकाकार इति चक्रधरः ॥

राज्ञा तु गह्वरेऽस्मिन् अशब्दके बन्धने विनिहितोऽहम् ।
गन्थरचनाविनोदात् इह हि मया वासरा गमिताः ॥§ 6729

## स्वमते वर्णेभ्य; वाक्यार्थबोधवर्णनम्

तथापि वक्तव्यं कथं वर्णेभ्यो वाक्यार्थप्रतीतिरिति । उच्यते— चिरातिक्रान्तत्वं अचिरातिक्रान्तत्वं वा न स्मृतिकारणम् । संस्कारकरणकं हि स्मरणं भवति । तच्च सद्यः प्रलीने चिरप्रलीने वा न विशिष्यते इत्येवं पूर्वेषां पदानां चिरतिरोहितानामपि, व्यवहितोच्चारितानामपि संस्कारात् स्मरणं भविष्यति । अन्त्यपदस्य चानुभूयमानत्वोपगमे ज्ञानयौगपद्यादिप्रमादप्रसङ्ग इति वरमन्त्यपदमपि स्मर्यमाणमस्तु । स्मृत्यारूढान्येव सर्वपदानि वाक्यार्थमवगमयिष्यन्ति ॥ § 6730

## वाक्यार्थबोधक्रमः

तत्र चेयं कल्पना—वर्णक्रमेण तावत् प्रथमपदज्ञानम् । ततः सङ्केतस्मरणं, संस्कारश्च युगपद्भवतः । ज्ञानयोर्हि यौगपद्यं शास्त्रे * प्रतिषिद्धं, न संस्कारज्ञानयोः । ततः पदार्थज्ञानम् । तेनापि संस्कारः । पुनर्वर्णक्रमेण द्वितीयपदज्ञानम् । ततः सङ्केतस्मरणम् । पूर्वसंस्कारसहितेन च तेन पटुतरः संस्कारः । पुनः पूर्ववर्णक्रनेण तृतीयपदज्ञानं, संकेतस्मरणं, पूर्वसंस्कारापेक्षः पदुतरः संस्कार इत्येवं पदज्ञानजनिते पीवरे संस्कारे, पदार्थज्ञानजर्निते च तादृशि संस्कारे स्थिते अन्त्यपदार्थज्ञानानन्तरं पदसंस्कारात् सर्वपदविषयस्मृतिः, पदार्थसंस्काराच्च पदार्थविषया स्मृतिरिति संस्कारत्रयात् क्रमेण द्वे स्मृती भवतः । तत्रैकस्यां स्मृतावुपारूढः पदसमूहो वाक्यं, इतरस्यामुपारूढः पदार्थसमूहो वाक्यार्थः ॥ § 6731 II.200/KSV

## शाब्दबोधस्य स्मृतिमूलकत्वेऽपि नाप्रामण्यम्

ननु ! स्मृतेरप्रमाणत्वात् अप्रमाणत्वमिदानीं वाक्यार्थप्रतीतेः— मैवम्— *तथासंबन्धग्रहात् । यत्र ह्यन्यथासंबन्धग्रहणं, अन्यथा च प्रतिपत्तिः, तत्रायं दोषः । यथा धूमे गृहीतसंबन्धे नीहाराद्दहनानुमितौ । इह तु क्रमवर्तिनां

५ ] विरल— nyāma-wit__gha
१६ ] पू— nyāma-wit__ca

११ *] कश्मीरे अरण्ये राज्ञा शङ्करवर्मणा चिरमसौ निक्षिप्त इति वार्तेति चक्रधरः ॥
२१ *] स्मृतेः अप्रमात्वं न तदभाववति तत्प्रकारकत्वरूपम् ॥ किन्तु प्रमात्वाभावमात्ररूपम् । तच्च प्रमालक्षणे अनुभवत्वनिवेशप्रयुक्तम् । अतश्च यथा संबन्धः, तथा ग्रहान्न शाब्दबोधस्याप्रामाण्यम् ॥

वर्णानां अन्यथा प्रतिपत्त्यसंभवात्, यथैव व्युत्पत्तिः तथैव प्रतीतिरिति न किंचिदवद्यम् । अचिरनिर्वृत्तानुभवसमनन्तर भाविनी च स्मृतिरनुभवायते ॥ § 6732

## पदार्थज्ञानं मानसरूपं वा

अथ वा कृतं स्मरणकल्पनया । अन्त्यपदार्थज्ञानानन्तरं सकलप-
II.201/KSV दपदार्थविषयो मानसोऽनुव्यवसायः शतादिप्रत्ययस्थानीयो भविष्यति । तदुपारूढानि पदानि वाक्यं, तदुपारूढश्च पदार्थो वाक्यार्थः । तथा विधश्च मानसोऽनुव्यवसायः सकललोकसाक्षिकत्वादप्रत्याख्येयः ॥ § 6733

## अन्तिमतावत्पदार्थस्मरणस्यावश्यकता

ननु ! अन्त्यपदार्थज्ञानानन्तरं किं पूर्वपदतदर्थविषयेन स्मरणेन, अनुव्यवसायेन वा । अन्त्यपदार्थश्चेत् ज्ञातः, समाप्तं कर्तव्यं, किमन्यदवशिष्टं, यत् व्यवसायेन, स्मरणेन, अनुव्यवसायेन वा करिष्यते—कथं न करिष्यते एकाकारो हि वाक्यवाक्यार्थप्रत्ययः प्रत्यात्मवेदनीयो न शक्यतेऽपह्नोतुम् । न चासौ स्मरणादनुव्यवसायाद्वा विना संपद्यत इत्यस्ति तदुपयोगः । इत्थं स्मरणारूढं संकलनाज्ञानविषयीकृतं चेदं पदनिकुरुम्बं वाक्यं, तथाविधश्चैष वाक्यार्थः ॥ § 6734

## संसर्गभासकसामग्रीप्रदर्शनम्

ननु ! मा भूत् पदस्फोटः वाक्यस्फोटश्च वाचकः ।
मा च भूतामिमौ वाक्यवाक्यार्थौ भागवर्जितौ ॥§ 6736

वर्णा एव भवन्त्वेते वाचकाः केनचिद्वृथा ।
पदं वर्णसमूहोऽस्तु वाक्यं च पदसंहतिः ॥§ 6738

भवन्तु भवदाख्याताः पदवाक्यादिकल्पनाः ।
पदार्थानां तु संसर्गे मार्गः क इति कथ्यताम् ॥§ 6740

१ ] त्वया— nyāma-wit__kha
१० ] वा— nyāma-wit__kha
१७--१९ ] भवन्तु— nyāma-wit__kha

२ ते] तेन तावद्वर्णश्रवणपूर्वक इव बोधः भवति ॥
११ ते] तावद्वर्णविषयकं श्रौत्रऽत्यक्षमिव, तज्जन्यमिव च ज्ञानम् ॥
१७ चिद्वृथा] प्रत्येकं अबोधका अपीत्यर्थः ॥

असंसृष्टा हि गौरश्वः पुरुषो हस्ती इति पदार्थाः न वाक्यार्थभावमधिरोहन्ति । अन्त्यपदार्थज्ञानानन्तरभाविना हि स्मरणेन, अनु व्यवसायेन II.202/KSV वा विषयीक्रियमाणास्तु यथावगता एव विषयीक्रियन्ते । संसर्गावगमस्तु कुतस्त्य इति चिन्त्यम्—उच्यते—अस्त्यत्र विवादः । केचिदाचक्षते अन्विता एव पदार्थाः पदैरभिधीयन्ते, अन्यथा पदानां वाक्यत्वायोगादिति ॥ § 6741

अन्ये तु मन्यन्ते—शुद्धानामेव पदार्थानां पदैरभिधानम् । ते तु तथाऽभिहिताः सन्तः परस्परमाकाङ्क्षासन्निधियोग्यत्वपर्यालोचनया संसर्ग मधिगमयन्तीति ॥ § 6742

## अन्विताभिधानाभिहितान्वयवादौ

तत्रेदं विचार्यम्—व्युत्पत्तिर्बलीयसी, न हि शब्दो व्युत्पत्तिनिरपेक्षो ऽर्थमवगमयति । व्युत्पत्तिश्च किं वाक्यस्य वाक्यार्थे, पदस्य वा पदार्थे इति ॥ § 6743

*यदि वाक्यस्य वाक्यार्थे व्युत्पत्तिः, तदाऽन्विताभिधानम् । पदस्य पदार्थे व्युत्पत्तौ अभिहितान्वय इति ॥ § 6744

## अभिहितान्वयवादवर्णनम्

किं तावत्प्राप्तम् ? अभिहितान्वय इति, पदार्थप्रतिपत्तिपूर्वकत्वाद्वाक्यार्थप्रतिपत्तेः । न ह्यनवगतपदार्थस्य वाक्यार्थसंप्रत्ययो दृश्यते, पदार्थविभागश्च गम्यते—अस्य पदस्य जातिरर्थः, अस्य द्रव्यं, अस्य गुणः, अस्य क्रियेति । स चैवमवकल्पते, यदि तावत् सोऽर्थः पदैरभिधीयते । पदान्तौरार्थोपरक्ते तु—तस्मिन्नभिधीयमाने तदर्थेयत्तैव नावधार्यते, कदम्बा कारार्थप्रतीतेः ॥ § 6745

II.203/KSV

## अन्विताभिधाने विभक्तपदार्थज्ञानासंभवः

आवापोद्वापाभ्यां तदवधारणमिति चेत्—मैवम्—आवापोद्वापपरीक्षावसरेऽपि कदम्बप्रतीत्यनपायात् । न ह्येकमेव किंचिद्वाक्यमन्विता भिधायिपदग्रथितम्, *अन्यत्र तु शुद्ध एव पदानामर्थः; किन्तु सर्वत्र कदम्बकरूपादुपायात् कदम्बकरूपमुपेयं प्रतीयत इति दुरवगमः पदार्थविभागः ॥

९--१० ] र्थमवगमयति व्युत्पत्तिमन्तरेण—
nyāma-wit__kha

१२ *] वाक्यघटकसर्वपदानां युगपदन्वितत्वेनैव अभिधाने अन्विताभिधानम् । पदैरर्थाभिधानाननन्तरं अन्वयभाने अन्विताभिधानम् ॥
२२ *] अन्यत्र—वाक्याद्बहिः ॥

§ 6746

ततश्च पदार्थानामनपेक्षणे गामानयेति वाक्यात् अश्वानयननियोगः प्रतीयेत, गां बधानेति वाक्यादश्वबन्धननियोगः प्रतियेत । अपेक्ष्यते तु पदानामर्थः । सोऽपेक्ष्यमाणः इयानिति नियतोऽवधारयितव्यः । तदवधारणं शुद्धाभिधायिषु पदेष्ववकल्पते । तस्मात् पदपदार्थयोरौत्पत्तिकः संबन्ध इष्यते ॥ § 6747

## व्यवहाराच्छक्तिग्रहः पदविषयक एव

वृद्धव्यवहारेषु च वाक्यादपि भवन्ती व्युत्पत्तिः पदपर्यन्ता भवति । इतरथा हि प्रतिवाक्यं व्युत्पत्तिरपेक्ष्येत । सा चानन्त्यात् दुरुपपादेति शब्दव्यवहारोच्छेदः स्यात् । दृश्यते च पदार्थविदामभिनवकविश्लोकादपि वाक्यार्थप्रतीतिः । सा पदतदर्थव्युत्पत्त्याऽवकल्पते । वाक्यवाक्यार्थ योस्तु व्युत्पत्तावपेक्षमाणायां सा न स्यादेव । तस्मान्नान्विताभिधानम् ॥ § 6748

II.204/KSV

(?) तदुपरंजकद्वितीयपदार्थावगतिः सिद्धैव । तदपि पदमन्यानुरक्तस्वार्थवाचीत्यनेनैव न्यायेन एकमेव पदमखिलपदाभिधेयार्थवाचि संपन्नमिति तेनैव व्यवहारोऽस्तु ॥ § 6749

न चासौ संपद्यते । गौरित्युक्ते सर्वगुणक्रियाऽवगमात् न ज्ञायते किमुपादीयतामिति । सर्वावगमो ह्यनवगमनिर्विशेष एव, व्यवहारानुपपत्तेः । न हि रसविदां पूर्णोऽप्यब्धिः मेरोरतिरिच्यते, सलिलकार्यानिर्वृत्तेः । नियतगुणक्रियानुरक्तस्वार्थप्रतिपादने तु गोशब्दस्य न हेतुमुत्प श्यामः ॥

§ 6750

## पदान्तरसन्निधानमात्रान्नान्वयभानम्

पदान्तरसन्निधानं नियमहेतुरिति चेत्, किं स्वरूपमात्रेण, अर्थ प्रतिपादनेन वा ? § 6751

स्वरूपमात्रेण जपमन्त्रपदानामिव सन्निधानं भवदपि असन्निधानान्न विशिष्यते, अनुहीतसंबन्धस्य तत्कृतोपकारादर्शनात् ॥ § 6752

---

२--३ ] वाक्या— nyāma-wit_kha

५ ] प— nyāma-wit_kha

१७ ] यथाहुः न— nyāma-wit_ca

---

३ तियेत ] वाक्यघटकप्रत्येकपदार्थज्ञानानपेक्षणात्, प्रत्येकं पदशक्तिग्रहणा संभवाच्च वाक्ये सर्वस्मात् पदात् सर्वोऽप्यर्थः प्रतीययेत ॥

५ त्तिकः ] औत्पत्तिकः—सहजः ॥

१७ हि ] सरसामस्मि सागरःगी. १०.

२४ इत्यभिप्रायेणेदम् ॥

अर्थप्रतिपादनेन तु पदान्तरं यदि नियमहेतुः, सोऽयमभिहितानामर्थानामन्वय उक्तो भवति । तस्मात् स एव श्रेयान् पदेभ्यः प्रतिपन्ना निष्कृष्टास्तावदर्था आकांक्षासन्निधियोग्यत्ववशेन परस्परमभिसंबध्यन्ते । II.205/KSV (?) येनाकाङ्क्षितः, यश्च सन्निहितः, यश्च संबद्धुं योग्यः, स तेन संबध्यते; नातोऽपरः ॥ § 6753

## अन्वयशून्यवाक्यनिदर्शनम्

अत एव अङ्गुल्यग्रे हस्तियूथशतमास्ते इति नास्ति संबन्धः, योग्यत्वाभावात् । अन्विताभिधानवादिनां तु अनन्वितस्यानभिधानात् तत्राप्यन्वयः प्राप्नोति । स च नास्ति । तस्मात् अभिहितानामेव पदार्थानामन्वय इति युक्तम् । तदुक्तं—पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि । अथेदानीमर्थाः अवगता वाक्यार्थं संपादयन्ति इति ॥ § 6754

## अन्विताभिधानवादिभिः अभिहितान्वयदूषणम्

एवं प्राप्ते अभिधीयते—न व्युत्पत्तिनिरपेक्षो दीप इव शब्दोऽर्थमवगमयति । व्युत्पत्तिश्च वृद्धव्यवहारात् । वृद्धानां च व्यवहारो वाक्येन, न पदेन; केवलपदस्याप्रयोगात् ॥ § 6755

*अर्थप्रकरणप्राप्यपदार्थान्तरवेदने ।
पदं प्रयुज्यते यत्तत् वाक्यमेवोदितं भवेत् ॥§ 6757

वक्ता वाक्यं प्रयुङ्क्ते च संसृष्टार्थविवक्षया ।
तथैव बुध्यते श्रोता तथैव च तटस्थितः ॥§ 6759

सेयं वाक्यस्य वाक्यार्थे व्युत्पत्तिः ॥ § 6760
II.206/KSV

## वाक्यस्वरूपम्

वाक्यं च किमुच्यते ? संहत्यार्थमभिदधन्ति पदानि वाक्यमिति वाक्यविदः । तत्रायं पदसमूह एवार्थो भवति । एवं न संहत्यार्थमभिदध्युः पदानि, यद्येकैकस्य पदस्य सर्वत्र व्यापारः । यथा हि बाह्यानि कारकाणि काष्ठादीनि सर्वाण्येव पाके व्याप्रियन्ते, यथा च शिविकाया उद्यन्तारः सर्वे

३ ] स्ता— nyāma-wit_kha
७ ] ---Note: (?)
११ ] ---Note: (?)

२ ति ] प्रथममर्थस्याभिधानात् ॥
११ इव ] स्यरूपतस्सन् इति शेषः ॥
१४ *] अर्थः—प्रयोजनम् ॥

शिबिकामुद्यच्छन्ति, यथा त्रयोऽपि ग्रावाण उखां बिभ्रति —तथा सर्वाण्येव पदानि वाक्यार्थमवबोधयन्ति । तदिदमन्विताभिधानम् । अन्यानन्वितनिष्कृष्ट-स्वार्थपर्यवसायित्वे हि सति न सर्वेषां वाक्यर्थे व्यापारस्स्यात् ॥ § 6761

## अन्विताभिधानवादे पदान्तरं न व्यर्थम्

ननु ! एवमेकैकस्य कृत्स्नकारित्वे सत्येकस्मादेव कृत्स्नसिद्धेः पदान्त-रोच्चारणं व्यर्थमित्युक्तम्—नैतत्—पदान्तरेण विनैव एकस्मात् कृत्स्नकार्य-संपत्त्यभावात् । न तर्ह्येकं कृत्स्नकारीति चेत्—मैवम्— एकैकस्य कृत्स्न-फलपर्यन्तव्यापारपतितत्वात् एकैकस्मिन् सति कृत्स्नफलपर्यन्तो व्यापारो निर्वर्तते, एकैकेन विना न निर्वर्तत इत्येवमेकैकं कृत्स्नकारि भवति ॥ § 6762

ननु ! एवं तर्हि समुदाय एव कर्ता भवतु, किं समुदायिभिः ? त-तश्च तदेवायातं निरवयवौ वाक्यवाक्यार्थाविति—नैतद्युक्तम्—सङ्घातकार्यवत् स्वकार्यस्यापि दर्शनात् ॥ § 6763

अर्थ किं सङ्घातकार्यम् ? किंच तत् स्वकार्यम् ? § 6764

II.207/KSV

वाक्यार्थप्रतिपत्तिः सङ्घातकार्यम् । स्वकार्यं तु पदार्थप्रतिपत्तिः । यथा पाकः सङ्घातकार्यम् । स्वकार्यं ज्वलनभरणादि काष्ठस्थाल्या दीनाम् ॥ § 6765

## अन्विताभिधाने दूषणोद्धारः

ननु ? यदि पदानां पदार्थप्रतिपादनम् स्वकार्यम्, शुद्धस्तर्हि पदस्यार्थः— न शुद्धः पदार्थः । सङ्घातकार्यमकुर्वतां शुद्धानां पदानामदृष्टष्वात् । न ह्येषां स्वकार्ये सङ्घातकार्ये च पृथक् प्रयोगोऽस्ति, सर्वथा सङ्घातकार्य एव प्र-योगात् । *तत्र प्रयुक्तानामप्येषां स्वकार्यं न नावगम्यते । अत एव न निरचयवं वाक्यमिष्यते, स्वकार्यप्रत्यभिज्ञानात् ॥ § 6766

संहतास्ते संघातकार्यं कुर्वन्तो दृश्यन्ते, न संघात एव संहतेष्वपि कुर्व-त्सु स्वकार्यं पृथक्पृथगुपलभ्यते । यथा शकटांगानां अयमंशोऽनेन कृतः, अयमनेनेति न पृथक्पृथक् प्रयुज्यमानानि शकटांगानि मनागपि शकट-कार्यं कुवन्तीत्येवं न केवलं पदं प्रयुज्यते, प्रयुक्तमपि वा न तत्कार्याङ्गम् । पदान्तरेण तु सह व्यापारात् तदन्वितार्थकार्येव पदमिति— युक्तम् । त-

७ ] प— nyāma-wit_kha
१३ ] स्व— nyāma-wit_kha
१७--१८ ] कार्ये— nyāma-wit_kha
२० ] प्रति— nyāma-wit_kha

१ ग्रावाण ] पिठरस्स्थाल्युखा इत्यमरः ॥
१६ स्यार्थः ] तथा चामिहितान्वयवाद एवासौ ॥
१९ *] तत्र—सङ्घातकार्ये ॥

दिदमुक्तं—संहत्यार्थमभिदधन्ति पदानि वाक्यम्, एकार्थः पदसमूहो वाक्यम् इति ॥ § 6767

तदेवमवयवकार्योपलम्भात् न वैयाकरणवन्निमित्तान्यपि निह्नुमहे कृत्स्नफलसिद्ध्यवधि व्यापारपरिनिश्चयाच्च नान्यमीमांसकवत् शुद्ध पदार्थाभिधानमुपगच्छामह इति ॥ § 6768
II.208/KSV

## अन्विताभिधानवादे दूषणोद्धारः

यत्पुनरभ्यधायि—प्रतिवाक्यं व्युत्पत्तिरपेक्षणीया, अन्यथा नवकविश्लोकादर्थः पदार्थविदो न प्रतीयेतेति—तदिदं व्युत्पत्त्यनभिज्ञस्य चोद्यम्—न ह्येवं व्युत्पत्तिः गोशब्दस्य शुक्लान्वितोऽर्थः इति । स हि व्यभिचरति, कृष्णान्वितस्य दर्शनात् । नापि सर्वान्वितस्तदर्थः, आनन्त्येन दुरवगमात् । किन्त्वाकाङ्क्षितयोग्यसन्निहितार्थानुरक्तोऽस्यार्थ इति ॥ § 6769

एतां च व्युत्पत्तिं वाक्यान्यावापोद्वापाभ्यां रचनावैचित्र्यभांजि संजनयन्ति । पदार्थपर्यन्तापि भवन्ती व्युत्पत्तिः ईदृशी दृश्यते, न शुद्धपदार्थविषया, पदेन व्यवहाराभावादित्युक्तम् । तथापि न न ज्ञायते— इयान् पदस्यार्थ इति शकटाङ्गवदावापोद्वापाभ्यां तत्कार्यभेदस्य दर्शितत्वात् ॥ § 6770

तदित्थं न प्रतिवाक्यं व्युत्पत्तिरपेक्ष्यते । सन्निहितयोग्याकाङ्क्षितार्थोपरक्तस्वार्थाभिधायित्वेन हि क्वचिद्गृहीतसंबन्धः सर्वत्र गृहीतो भवति । ततश्च नवकविश्लोकादप्यर्थप्रतिपत्तिरुपपत्स्यते । पदपदार्थयोस्तु न व्युत्पत्तिः, उपायाभावादित्युक्तम् ॥ § 6771

## अन्विताभिधानेऽपि पदान्तरसार्थक्यम्

यदपि पदान्तरोच्चारणमफलमिति, तदपि परिहृतम्—पदान्तरसन्निधाने हि सर्वाणि पदानि कृत्स्नकारीणि भवन्तीत्युक्तत्वात् । * पदान्तरसन्निधानेन II.209/KSV
क्रियत इति चेत्; सर्वकारकेष्वपि तुल्योऽयमनुयोगः । संहत्य तु सर्वाणि कारकाणि कुर्वन्तीत्युच्यन्ते । तथा पदान्यपि अर्थाभिधानेनापि चोपकुर्वत्सु पदेषु नाभिहितान्वयः, अनन्वितेऽर्थे व्युत्पत्त्यभावात् । अनुपगमे वा दुरुपपादः पदार्थानामन्वयः, उपायाभावात् ॥ § 6772

---

११ ] पर— nyāma-wit__kha
१६ ] धेय— nyāma-wit__kha
२३ ] ता— nyāma-wit__kha

---

३ हे] वाक्यशक्तिवादिनः खलु ते । तेन वाक्यशक्तिनिर्णयहेतुभूतपदशक्तेः शाब्दबोधे निमित्तत्वाभावः सिद्ध्यति ॥
१० इति] अन्वयोपस्थापन इति शेषः ॥
२० *] कार्यान्विते शक्तिः, इतरान्विते शक्तिः, अन्विते शक्तिः इति अन्विताभिधानवादे कक्ष्यात्रयं वर्तते ॥

## अन्वयस्य आकांक्षाद्यधीनत्वासंभवः

ननु आकांक्षासन्निधियोग्यत्वान्यभ्युपाय इत्युक्तम्—न युक्तमुक्तम् । कस्येयमाकाङ्क्षा ? शब्दस्य, अर्थस्य, प्रमातुर्वा ? शब्दार्थयोस्तावदचेतनत्वात् नाकाङ्क्षायोगः । फलत इयं तु तत्र तत्र वाचोयुक्तिः शब्दः शब्दान्तरमाकांक्षति, अर्थोऽर्थान्तरम् इति । प्रमातुः पुनः स्वतन्त्रस्या कांक्षा न प्रमाणम्, पुरुषेच्छया वस्तुस्थितेरघटमानत्वात् । शब्दाख्यप्रमाणपृष्ठभावेन तु पुरुषस्याकाङ्क्षा भवन्ती भवत्यर्थानां संसर्गहेतुरित्येवं शब्दस्यायमियानिषोरिव दीर्घदीर्घो व्यपारः । उपरतव्यापारे तु शब्दे पुरुषाकाङ्क्षामात्रं न संबन्धकारणम् ॥ § 6773

अशाब्दत्वं च वाक्यार्थप्रतीतेरित्थमापतेत् ।
व्यवधानमयुक्तं च साक्षाच्छाब्दत्वसंभवे ॥§ 6775
तस्मादन्विताभिधायीनि पदानीति स्थितम् ॥ § 6776

## अन्विताभिधानवादसमर्थनम्

एष एव हि संसर्गप्रतीतेः पन्थाः— § 6777

व्यतिषक्तार्थबुद्ध्या हि व्यतिषङ्गोऽवगम्यते ।
अपरं तु न संसर्गप्रतीतेरस्ति कारणम् ॥§ 6779

II.210/KSV

न खल्वानय गां शुक्लां संसर्ग इति कथ्यते ।
व्यवहारे क्वचिद्वृद्धैः, *पदं संसर्गवाचकम् ॥§ 6781

प्रयुज्यमानमप्येतत् बालिशेन हि केनचित् ।
अनन्वितार्थमेव स्यात् दशदाडिमवाक्यवत् ॥§ 6783
तस्मादन्वितानामेवाभिधानं युक्तम् ॥ § 6784

## अनन्वितवाक्ये गतिप्रदर्शनम्

---

५ ] णं— nyāma-wit_kha
१३ ] क्तो— nyāma-wit_ga

---

९ तीतेरित्थ ] इत्थं—शाब्दादनुपस्थितस्य शाब्दबोधविषयत्वे ॥

१६ * ] पदं प्रयुज्यमानमपि—इत्यन्वयः ॥

आह— § 6785

अङ्गुल्यग्रादिवाक्येषु कथं तव समन्वयः ?§ 6786

उच्यते— § 6787

उक्तानामपि संसर्गे कथं तव समन्वयः ॥§ 6788

आह— § 6789

नन्वत्र योग्यताभावादसंसर्ग उपेयते ।
आकाङ्क्षादित्रयाधीनः संसर्गो हि मयेष्यते ॥§ 6791

उच्यते— § 6792

मयाऽपि योग्यासन्नादिसंसृष्टस्वार्थवाच्यता ।
पदानां दर्शिता सा च तेषु नास्तीत्यनन्वयः ॥§ 6794

आह—अन्विताभिधानवादी हि भवान् । ततश्च— § 6795

भवतोऽनभिधानं स्यादन्वयासंभवादिह ॥§ 6796

II.211/KSV

अहं त्वभिहितान्वयवादी । तेन— § 6797

मम त्वनभिहितत्वेऽपि नाभिधानं विरुध्यते ॥§ 6798

उच्यते— § 6799

कष्टं *मीमांसकेनापि भवता सूक्ष्मदर्शिना ।
नाद्यापि शब्दव्यापारपरमार्थोऽवधारितः ॥§ 6801

प्रकाशकत्वं शब्दस्य व्यापारो हि निसर्गतः ।
पुंसस्तु गुणदोषाभ्यां तस्मिन् सदसदर्थता ॥§ 6803

क्रियाकारकसंसर्गबुद्धिरत्रापि शब्दजा ।
तादृश्येवायथार्था तु नरबुद्धिप्रमादतः ॥§ 6805

---

१२ ] ना— nyāma-wit__ca nyāma-wit__kha
१६ ] कथं— nyāma-wit__kha
१७ ] सुस्पष्टम—

---

१२ भिधानं ] अनभिधानं—वाक्यघटकपदानां प्रत्येकार्थबोधाभावः ॥
१६ * ] मीमांसकः—विचारकुशलः । मानेर्जिज्ञासायाम् इति वार्तिकम् ॥
२० त्रापि ] अत्रापि—अंगुल्यग्रवाक्यादौ ॥

तदुक्तं—प्रमाणान्तरदर्शनमत्र बाध्यते इति ॥ § 6806

अत एव प्रमाणत्वं शब्दे निष्प्रतिमं स्वतः ।
शब्दे कर्मणि तत्रापि बाधकानुपसर्पणात् ॥§ 6808

तेनाङ्गुल्यग्रवाक्येऽपि शाब्दोऽस्त्येव समन्वयः ।
आधाराधेयक्रियादिनिर्देभानस्यात्र प्रतीयमानत्वात ॥ ?§ 6810

वस्तुतोऽसंभवो यस्तु तुल्य एव स आवयोः ।
अयोग्यत्वेन संसर्गप्रतीत्यर्थनिबर्हणात् ॥§ 6812

## अन्वितभानमेवौत्सर्गिकम्

यदि तु शादोऽन्वयो न भवेत्, कचतटपादिवर्णनिर्देशमात्रमिदं स्यात्;
II.212/KSV दशदाडिमादिप्रलापतुल्यं वा स्यात् । अनन्विताभिधानात् वाक्यत्वमेव न भवेत् । अस्ति तु वाक्यत्वम् । तेन मन्यामहे अस्ति शाब्दोऽन्वय इति अत्रापि अन्विताभिधानं न विरुद्धम् । बाधकस्त्वन्यविषय एव, न शब्द-संसर्गविषय इत्युक्तम् । अत एव स्वसामर्थ्यसिद्धनिर्निबन्धबोधकत्वव्यापारे शब्दे स्वतो वेदप्रामाण्यमनाकुलं निर्वक्ष्यति, अपौरुषेयतया विप्लवासंभवात् । स्वव्यापारस्य च स्वत एव शुद्धत्वमित्यलमतिप्रसङ्गेन ॥ § 6813

इत्यन्विताभिधानेन वाक्यार्थज्ञानसंभावात् ।
व्युत्पत्तिरहितः प्राज्ञैः प्रहेयोऽभिहितान्वयः ॥§ 6815

## अन्विताभिधानवादखण्डनम्

तदेतदपि नानुमन्यते—यदुक्तं वृद्धव्यवहारात् व्युत्पत्तिरिति—तत् सत्यम् । वाक्येन व्यवहार इत्येतदपि सत्यम् । शिबिकोद्यंचन्नृव सर्वाणि पदानि कार्ये संहत्य व्याप्रियन्त इत्येतदपि सत्यमेव ॥ § 6816

व्युत्पत्तिश्चिन्त्यताम्—किमेकघटनाकारसङ्घातकार्यनिष्ठैव सा ? किं वा पदार्थपर्यन्ता ? इति । पूर्वस्मिन् पक्षे प्रतिवाक्यं व्युत्पत्तिरपरिहार्या । सा च बहुप्रमादेत्युक्तम् । पदार्थपर्यन्तायां तु व्युत्पत्तौ नूनं निर्धारणीयं इयान्

---

८ ] प्रवादवत्र— nyāma-wit_kha
११ ] निर्विबन्ध—

nyāma-wit_kha

---

५ योः ] शब्दादर्थतीतिस्तु उभयोस्तुल्या । अन्यथाऽयोग्यत्वज्ञानं वा कथं भवेत् ॥
१० य ] अन्यविषयः—वस्तुविषयः ॥

२१ म् ] आवापोद्वापादिमूलकशक्तिग्रहणासंभवादिति हेतुः ॥

पदस्यार्थः इति । भवद्भिरपि शकटावयवदृष्टान्तवर्णनेन पदव्यापारनिर्धारणमङ्गीकृतमेव । इतरथा हि पदार्थनियमानपेक्षणे गामानयेतिविवक्षावान् अश्वपदमपि नित्तितयोपाददीत । न हि भवतामनपेक्षितपदार्थ एव वैयाकरणानामिव, वाक्यार्थप्रत्ययः । तदसौ यावानावापोद्वापपर्यालोचनया गोपदस्यार्थो निर्धार्यते, तावानेव सङ्घातकार्येऽपि व्याप्रियमाणस्य तस्यार्थः ॥
§ 6817

II.213/KSV

## अभिधात्रीशक्तिः पदार्थ एव

ननु आकाङ्क्षितयोग्यसन्निहितार्थोपरक्तस्तस्यार्थ इत्युक्तम्—नैतद्युक्तम्—सर्वदा संहत्यव्याप्रियमाणमेतत्पदं पश्यतस्तवायं भ्रमः । अर्थः तावानस्य, यावत्यभिधात्री तस्य शक्तिः ॥ § 6818

कियति तस्याभिधात्री शक्तिः ? कियति तस्यानभिधात्री शक्तिः ? यावत्तमर्थं अन्योन्यमाकाङ्क्षितैश्च सन्निहितैश्च संयुज्यमानं न मुंचति ॥ कियन्तं च न मुंचति, गोत्वमात्रं, तद्वन्मात्रं वा ? इत्यतस्तावत्येवाभि धात्री शक्तिरन्वयव्यतिरेकाभ्यां अस्य निर्धार्यते ॥ § 6819

अतः परमेकस्य पदस्याप्रयोगात् सर्वदा सङ्घातकार्यरहितकेवलस्वकार्यचातुर्यानवधारणात् प्रधानकार्ये तात्पर्यशक्तिरस्य व्याप्रियते, नाभि धात्री । तां च पृथगविवेचयता भवता अन्विताभिधानमभ्युपगतम् । तच्च न युक्तम्—तर्वत्र अभिधात्र्याः शक्तेरविशेषात् । पदार्थनियमानव धारणं पदान्तरोच्चारणवैफल्यमित्यादिदोषाणामनपायात् ॥ § 6820

## अन्विताभिधाने विरोधप्रदर्शनम्

येनान्वितमर्थमभिदधाति गोशब्दः, तदनभिधाने, तदन्वितानवगमात् येन सह संसर्गः, स न गृह्यते, तत्संसृष्टश्च गृह्यते इति विप्रतिषिद्धं स्यात् । तदभिधाने वा तद्वत्सर्वाभिधानमिति एकमेव गोपदं सर्वार्थं भवेत् । तस्मान्न सर्वत्राभिधात्री शक्तिः पदस्योपपद्यते इति नान्विताभिधानम् ॥ § 6821
II.214/KSV

## अन्विताभिधाने शब्दानामर्थासंस्पर्शित्वप्रसंगः

६--७ ] न— nyāma-wit__kha
१६ ] व— nyāma-wit__ka

१४ कार्ये ] कार्यं—आनयनादि ॥

२१ स्मान्न ] सर्वत्र—संसर्गाशेऽपि ॥

अन्विताभिधानपक्षे च कथमङ्गुल्यग्रवाक्येऽपि नान्वयः स्यात् ? शाब्दोऽस्त्येव समन्वय इति चेत्; अर्थासंस्पर्शी शब्दः प्राप्नोति, बहिरन्वयाभावात् । प्रकाशकत्वमात्रं व्यापार इति चेत्—बाढम्—तत्त्वन्वितानन्वितविषयं वेदितुं युक्तम्, न पुनरन्वितविषयमेवेति शक्यते नियन्तुम् । दशदाडिमादिवाक्यमनन्वितार्थप्रतिपादकमपि दृश्यते यतः । न तत् वाक्यमिति चेत्, अङ्गुल्यग्रवाक्यमपि न वाक्यमेव । आधाराधेयक्रियासंसर्गप्रतीतिस्तु भ्रममात्रम् । तस्मात् अन्वितमर्थमभिदधति पदानीत्यसमीचीनम् ॥ § 6822

## अभिहितान्वयेऽपि क्लेशः

*तत्किमयश्शलाकाकल्पाः परस्परमसंसृष्टा एव पदार्थाः पदैरुच्यन्ताम् ? एतदपि नास्ति । तथाविधव्यवहाराभावात् । पश्चादन्वयस्य च दुरवगमत्वात्, विरम्यव्यापारस्य चासंवेदनात् । तस्मात् पक्षद्वयमपि न क्षेमाय । तदुक्तम्— § 6823

मतद्वयमपीदं तु नास्मभ्यं रोचतेतराम् ।
कुतोऽन्विताभिधानं वा कुतो वाऽभिहितान्वयः ॥§ 6825

## उक्तोभयवादमध्यस्थो वादः

अन्या तु वाचो युक्तिः कैश्चित्कृता—अन्वीयमानाभिधानं, अभिधीयमानान्वयश्चेति । साऽपि न हृदयङ्गमा ॥ § 6826
II.215/KSV

न हि द्वे अनुभूयेते क्रिये एते पृथक्स्थिते ।
अभिधानक्रिया चान्या वाच्यस्था चान्वयक्रिया ॥§ 6828

ते हि क्रमेण वा स्याताम्, युगपद्वा ? क्रमपक्षे पूर्वमन्वयक्रिया चेत्, तदिदमन्विताभिधानमेव, नान्वीयमानाभिधानम् । पूर्वं चेदभिधानक्रिया, सोऽयमभिहितान्वय एव, नाभिधीयमानान्वयः । युगपत्तु क्रियाद्वयसंवेदन नास्ति । अर्थगतायाः क्रियायाः शब्दप्रयोगकालेऽनुपलम्भात् ॥ § 6829

अभिधानक्रियैवैका तदभिज्ञैः परीक्ष्यते ।
अन्वीयमानताऽर्थानां अभिधानाद्विना कुतः ॥§ 6831

---

१ ] त्व— nyāma-wit_kha
६ ] त्किं श— nyāma-wit_kha
१७ ] नं— nyāma-wit_kha

---

८ *] दारुशलाकाः कदाचित् वज्रलेपसंसृष्टा वा भवेयुः ॥
१५ श्चेति ] अन्वयार्हपदार्थाभिधानम्, पदार्थाभिधानेनान्वयाभिधानं च ॥

गौः शुक्ल इति जातिगुणयोरेकद्रव्यसमवेतयोरपि शब्दमन्तरेण कुतोऽन्वयमवगच्छामः ॥ § 6832

उक्तेर्नूतनतैवेयं न पुनर्वस्तु नूतनम् ।
न चात्रापि निवर्तन्ते दोषाः पक्षद्वयस्पृशः ॥§ 6834

## अन्विताभिधाने पक्षान्तरम्

अन्ये मन्यन्ते—*सामान्येनान्विताभिधानम्, विशेषतश्चाभिहितान्वय इति । गोशब्दो हि स्वार्थमनवगतविशेषगुणक्रियासामान्यान्वितमभिधत्ते, तावत्यन्विताभिधानम् । शुक्लादिगुणविशेषसबन्धस्तु पदान्तरादवगम्यते । सोऽयं विशेषोऽभिहितान्वय इति—एतदपि तादृगेव ॥ § 6835

दोषोऽन्विताभिधाने यः सामान्येऽपि स तादृशः ।
दोषस्तुल्यो विशेषेऽपि यश्चोक्तोऽभिहितान्वये ॥§ 6837

II.216/KSV

न चेदमपूर्ववस्तु वर्णितम् । अभिहितान्वयवादिनः विशेष एवाभिहितान्वयमिच्छन्ति । सामान्येऽपि हि पदं वर्तते, विशेषे वाक्यम् । वाक्यार्थप्रतीतये च अभिहितान्वय आश्रीयते इति प्राक्तन एवेष्टः पन्था वेदितव्यः ॥ § 6838

## पदानां संहत्य कारित्वम्

कथं तर्ह्याभिधानिकी व्यवहारः ? सङ्कुलमिवैनं पश्यामः, सर्वत्र दोषसंभवात्—उच्यते—न कदाचिदत्र सङ्कुलता । संहत्यकारीणि हि पदानीत्युक्तम् । समुदितैः पदैरेको वाक्यार्थः प्रत्याय्यते । स च गुणगुणिभूतेतरपदार्थसंसृष्टः कश्चित्पदार्थ एवेति किमत्र सङ्कुलम् ॥ § 6839

## पदानामन्वयज्ञापकत्वम्

ननु किमयमन्विताभिधानपक्षः पुनरुत्थापयितुमिष्टः ? मैवम्— नेदमन्विताभिधानम् । कथं तर्हि संहत्यकारिता पदानाम् ? उच्यते— संहत्यकारिताऽप्यस्ति, न चान्विताभिधानम् । *अन्वितमर्थं पदानि— संहत्य

१ ] क्ति— nyāma-wit_ka
१०--११ ] आ— nyāma-wit_kha
१४--१५ ] ण— nyāma-wit_kha

५ *] सामान्येन—सामान्याकायेण—आपाततः ॥
६ क्रिया ] सामान्यं—जातिः ॥
२० *] अन्वितं—वस्तुगत्याऽन्वयविशिष्टम् ॥

संपादयन्ति, न त्वन्वितमभिदधति । किमिदानीं कुर्वन्ति वाक्यार्थं पदानि, घटमिव मृदादीनि—एतदपि नास्ति—ज्ञापकत्वात्तेषाम् । का तर्हियं वाचोयुक्तिः, संहत्यकारीणि पदानि, न चान्वितमभिदधतीति ? इयं वाचोयुक्तिः । पदान्यन्वितं प्रत्याययन्ति, नान्वितमभिदधति ॥ § 6840

### अन्वये शक्त्यसम्भवः

नाभिधात्री शक्तिरन्वितविषया, किन्त्वन्वयव्यतिरेकानुगतनिष्कृष्टस्वार्थ-
II.217/KSV विषयैव । तात्पर्यशक्तिस्तु तेषामन्वितावगमपर्यन्ता सह व्यापारात्, व्यापारस्यैतदीयस्य निराकाङ्क्षप्रत्ययोत्पादनपर्यन्तत्वात् । तथा हि— § 6841

अन्यथैव प्रवर्तन्ते प्रत्यक्षाद्युद्भवा धियः ।
अर्थं पूर्णमपूर्णं वा दर्शयन्त्यः पुरः स्थितम् ॥§ 6843

अन्यथैव मतिश्शाब्दी विषयेषु विजृम्भते ।
प्रतिपत्तुरनाकाङ्क्षप्रत्ययोत्पादनाविधिः ॥§ 6845

अत एव पदं लोके केवलं न प्रयुज्यते ।
न हि तेन निराकाङ्क्षा श्रोतुराधीयते मतिः ॥§ 6847

### शक्तेरभावेऽपि संसर्गभानसंभवः

ननु अभिधानव्यतिरिक्तः कोऽन्यः शब्दस्य कृत्स्नफलपर्यन्तः प्रत्यायनात्मा व्यापारः ? अस्ति कश्चित्, यः सर्वैरेव संसर्गवादिभिरप्रत्याख्येयः । न हि संसर्गोऽभिधीयते, प्रतीयते च वाक्यात् ॥ § 6848

ननु संसृष्टाभिधाने सति संसर्गः प्रतीयेत, नान्यथा—नैतदेवम्— संहत्यकारित्वादेव संसर्गावगतिसिद्धेः । न हि संहत्यकरणम्, असंसृष्टं च कार्यं क्वचित् दृश्यते ॥ § 6849

अपि च प्रकृतिप्रत्ययौ परस्परापेक्षमर्थमभिदधाते । न च प्रकृत्या प्रत्ययार्थोऽभिधीयते, नियोगस्याधातुवाच्यत्वात् । न च प्रत्ययेन प्रकृत्यर्थोऽभिधीयते, नियोगादेः लिङ्वाच्यत्वानुपपत्तेः । न च तौ पृथक्पृथक् स्वकार्यं कुरुतः । एवं पदान्यपि परस्परापेक्षीणि संहत्य कार्यं करिष्यन्ति । न च परस्परमर्थमभिधास्यन्ति वाक्यान्यपि प्रकरणपतितान्येवमेव । तदुक्तम्—
§ 6850

---

६ ] श्ब्दे— nyāma-wit_kha
१७ ] स्य— nyāma-wit_kha
१८ ] यज्या, गागा—

nyāma-wit_kha

---

२३ कुरुतः ] परस्परापेक्षितार्थप्रतिपादनात्
॥

II.218/KSV

प्रकृतिप्रत्ययौ यद्वत् अपेक्षेते परस्परम् ।
पदं पदान्तरं तद्वत् वाक्यं वाक्यान्तरं तथा इति ॥§ 6852

अयमेव पक्षः श्रेयान् यत् संहत्यकारित्वं पदानां, असंकीर्णार्थत्वं च ॥ § 6853

निरपेक्षे प्रयोगेऽयश्शलाकाकल्पना भवेत् ।
तदन्विताभिधाने तु पदान्तरमनर्थकम् ॥§ 6855

संहत्यकारिपक्षे तु दोषो नैकोऽपि विद्यते ।
तेनायमुपगन्तव्यः मार्गो विगतकण्टकः ॥§ 6857

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता ।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः ॥§ 6859

तेनान्विताभिधानं हि नास्माभिरिह मृष्यते ।
*अन्वितप्रतिपत्तिस्तु बाढमभ्युपगम्यते ॥§ 6861

संहत्यकारकत्वाच्च पदानां न स्वार्थाभिधित्सयैव समुच्चारणम्, अपितु प्रधानं कार्यमेव कर्तुम् । तदुक्तम्— § 6862

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् इति ॥§ 6864

## वाक्यार्थबोधविचारोपसंहारः

३ ] गो— nyāma-wit__ka   nyāma-wit__kha
१२ ] मत—क, प्रत्य—

११ *] अन्वितेति वस्तुस्थित्यभिधानम् ॥

सेयं व्युत्पत्तिमूला पदविसरसमुद्भिद्यमानाङ्कुरश्रीः
संस्कारोदारपत्रा कुसुमचयवती प्रोल्लसद्भिः पदार्थैः ।
II.219/KSV प्रज्ञावल्ली विशाला फलति फलमिदं स्वादु वाक्यार्थतत्त्वं
नैराकांक्ष्यं तु सान्द्रे हृदय उपगते यान्ति यस्मिन् पुमांसः
॥§ 6868

आह च— § 6869

पदात्प्रभृति या चैषा प्रज्ञा ज्ञातुर्विजृम्भते ।
पुष्पिता सा पदार्थेषु वाक्यार्थेषु फलिष्यति ॥§ 6871

तस्मादनया नीत्या संसर्गप्रत्ययो भवति साधुः ।
संसृष्टाश्च पदार्था वाक्यार्थ इति न्यवेदि प्राक् ॥§ 6873

यश्चैष लोकव्यवहारसिद्धिः
प्रादर्शि वाक्यार्थमितावुपायः ।
स एव वेदेऽप्यवधारणीयः
तत्रापि तान्येव पदानि तेऽर्थाः ॥§ 6877

—इति वाक्यार्थविचारः § 6878

## वेदार्थावधारणप्रकारविचारोपक्षेपः

आह—लोके प्रमाणान्तरपरिच्छेद्यत्वात् वाक्यार्थस्य तदवगमोपायत्वं शब्दानां योजयितुं शक्यते । वेदार्थस्तु—अतीन्द्रियः । न च रागादिदोषकलुषमनसामस्मदादीनां अतीन्द्रियपदार्थदर्शनकौशलमस्ति । तददर्शने च तत्र वृद्धव्यवहारात् व्युत्पत्तिरेव न संभवति । सोऽहमद्य वेदार्थं बुभुत्समानो वेदविदं कंचिदाचार्यमभिगच्छेयम् । सोऽप्यतीन्द्रियार्थदर्शी न भवतीति तस्यापि तथैव व्युत्पत्त्यभाव इति तेनाप्यन्यः कश्चिदभिगन्तव्यः । सोऽप्यन्यमित्यन्धप-
II.220/KSV रम्परा प्राप्नोति । न च वेद एव, वृद्धिरादैच् इति * पणिनिरिव, मस्त्रिगुरुः इति ब्रुवन् पिङ्गल इव, हस्त करः पाणिः इति कथयन्नभिधानमालाकार इव स्वयमुपदिशति—एषोऽस्य मामकस्य शब्दस्यार्थः इति । तस्मात्सर्वथा दुरवगमो वेदार्थः तदाह— § 6879

१५ ] त्त्वं— nyāma-wit__kha
१६ ] लसद्भिः— nyāma-wit__kha
४ ] सं— nyāma-wit__kha

२१ *] सान्द्रे—संसर्गज्ञानवति ॥

स्वयं रागादिमात्रार्थं वेत्ति चेत्तस्य नान्यतः ।
न वेदयति वेदोऽपि वेदार्थस्य कुतो गतिः इति ॥§ 6881

अथ निगमनिरुक्तव्याकरणवशेन पदार्थकल्पना क्रियते; तर्हि नानामतित्वात् उपदेष्टृना, अनेकार्थत्वाच्च धातूनां नाम्नां, उपसर्गनिपातानां च न नियतः कंचिदर्थो व्यवस्थापयितुं शक्यते । अन्यथा तत्कल्पनासंभवात् । आह च—प्र-वा-१-३२० § 6882

तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ ।
खादेच्छ्वमांसमित्येषः नार्थ इत्यत्र का प्रमा इति
॥§ 6884

## वैदिकशब्दा आपि लौकिका एव

तदेतत् बधिरस्य रामायणं वर्णितमस्माभिः, यू एवमपि श्रुत्वा वेदार्थपरिगमाभ्युपायं मृगयते । अनेन हि पवक्तिन वाक्यार्थपरिगमोपाय प्रकटनेन सर्वमपाकृतं भवति । उक्तं हि—नाभिनवाः केचन वैदिकाः शब्दाः । रचनामात्रं वेदे भिद्यते, न तु पदानि । सर्गात्प्रभृति च प्रवृत्तोऽयं वेदविदांव्यवहारः । तत एव दीर्घप्रबन्धप्रवृत्तात् अद्यत्वे वयसि व्युत्पद्यामहे । व्युत्पद्यमानाश्च तं तमर्थं प्रतिपाद्यामहे ॥ § 6885

## वेदार्थावगमसहकारीणि

किंच वेदार्थस्य परिज्ञानोपयिकानि व्याकरणमीमांसादिशास्त्राणि क्व गतानि ? यदेषु जीवन्मु न वेनार्थोऽवधार्यते ॥ § 6886

II.221/KSV

अपि च, रे मूढ ! स्वयं रागादिमान्नार्थं वेत्ति ? वेदस्य कोऽर्थो रागादिमतः ? प्रत्यक्षमतीन्द्रियेऽर्थे मा प्रवर्तिष्ट, न तु रागादिमान् अग्निहोत्रं जुहुयात् स्वर्गकामः इतिवाक्यादपि अग्निहोत्राख्यं कर्म स्वर्गसाधनमिति

२२ ] ना— nyāma-wit_kha    nyāma-wit_kha
३ ] न चे— nyāma-wit_ka
११--१२ ] मतः—

३ देष्टृना ] प्रसिद्धं हि नैको ऋषिर्यस्य मतं    प्रमाणम् इत्यादि ॥

नावगच्छेत् ॥ § 6887

अतीन्द्रियेऽर्थे नियता कुतोव्युत्पत्तिरिति चेत्, उक्तमत्र, वेदवत्तद्व्यवहारस्य तदर्थपरिगमोपायस्य सुचिरप्ररूढत्वात्। वेदार्थश्च, तदवगमश्च, तदुपायश्च, तदनुष्ठ नं च नाद्यत्वे प्रवृत्तानि। त नि केषां (?)ऽनादीन्येव। अस्मन्मते तु जगत्सर्गात्प्रभृति प्रवृत्तानि। कस्तेष्वद्य पर्यनुयोगावसरः ? सेयमनेन पापकारिणा खादेच्छ्वमांसं इत्याद्यपभाषणेन केवलमवीचिकेदारकुटुम्बिनमानं कर्तुं वेदनिन्दैव मन्दमतिना कृता, न दूषणमभिनवं किंचिदुत्प्रेक्षितमिति ॥ § 6888

## वेदार्थव्युत्पत्त्यसंभवः

अथापर आह—किमेष तपस्वी पराणुद्यते ? कियनेनापराद्धम् ? किमनेन विरुद्धमभिहितम् ? न हि लोकतो वेदार्थे व्युत्पत्तिरवकल्पते ॥ § 6889

कोऽयं लोको नाम ? किं यः कश्चित् प्राकृतः, उत वैयाकरणः संस्कृतमतिः ? इति ॥ § 6890

तत्र शाकटिकाः साधुशब्दप्रयोगानभिज्ञमनसो निसर्गत एवाक्षतकण्ठाः वराकाः संस्कारबाह्यैः गाव्यादिभिरेव शब्दैर्व्यवहरन्ति । तैश्च व्यवहरन्तः कथमिव वैदिकेषु शब्देषु व्युत्पत्तिमवाप्नुयुः ? § 6891

यद्यपि चास्ति एषि एमि इति कश्मीरेषु, गच्छ इति दर्वाभिसारेषु, II.222/KSV करोमि इति मद्रेषु कतिपये साधुशब्दा पामरैरपि प्रयुज्यन्ते; तथाप्यतीव प्रविरलसंचारोऽसौ व्यवहार इत्यनुपादेय एव वैदिकशब्दव्युत्पत्तेः ॥ § 6892

## व्याकरणेनापि वेदार्थावधारणासंभवः

अथ व्याकरणस्य वेदाङ्गत्वात् ततः साध्वसाधुशब्दप्रविभागमवगच्छन्तः साधुभिर्भाषितव्यं, असाधुभिर्न इति विधिनिषेधनियमितमतयः साधुभिरेव शब्दैर्व्यवहरन्तो विद्वांसः तनीयसैव क्लेशेन वैदिकेष्वपि शब्देषु व्युत्पत्तिमासादयेयुरिति कथ्यते—तदपि न चतुरश्रम्—इतरेतराश्रयप्रसङ्गात्। वेदे हि सिद्धप्रामाण्ये तदङ्गभूतव्याकरणाभ्याससमासादितसाध्वसाधुशब्दप्रविवेक वृद्धव्यवहारपरिचयपुरस्सरा वैदिकशब्देषुव्युत्पत्तिः, तद्व्युत्पत्तौ च सत्यां बोधकत्वादप्रतिपादकत्वलक्षणमप्रामाण्यमपोज्झतो वेदस्य प्रामाण्यमिति ॥ § 6893

## प्राकृतव्याकरणस्य वेदाङ्गत्वापत्तिः

---

५ ] क— nyāma-wit_kha

---

७ मानं] अवीची—नरकविशेषः । नरकक्षेत्रस्वामिन मित्यक्रोशोक्तिः । वेदनिन्दायास्तावदेव फलमित्यर्थः ॥

अथ वेदाङ्गमिदमिति श्रद्धामवधूय यदृच्छाधीतेनैव व्याकरणेन पूर्वोक्तकार्यसिद्धेर्नेतरेतराश्रयमिति वर्ण्यते—किमिदानीं नाटकप्रकरणादिकाव्योपयोगिसंस्कृतभाषाविशेषपरिज्ञानायैव प्राकृतलक्षणवद्व्याकरणमध्येतव्यम् ? तथाऽभ्युपगमेवाऽनङ्गत्वाविशेषात्—प्राकृतलक्षणप्रसिद्धशब्दव्यवहारानुसारेण वैदिकशब्दव्युत्पत्तिरापाद्यत इति सुतरां दुस्स्थत्वं ॥ § 6894

अपि च सत्यपि व्याकरणाधिगमे, श्रुतेऽपि साधुभिर्भाषितव्यम् इत्युपदेशे, *सत्यं वदत ! वेदार्थानुष्ठानपरायणोऽपि कृतबुद्धिरपि निषिद्धाचरणपराङ्मुखोऽपि श्रोत्रियोऽपि श्रद्दधानोऽपि यदि कश्चित् केवलैः साधुभिरेव II.223/KSV शब्दैर्व्यवहरन् दृष्ट एकाकी ? तैश्च नानार्थक्रियासाधनभूतभूरिव्यवहारं निर्वहन् तदनुचरः परिज्ञातो न भूयः केवलसाधुशब्दप्रयोगकुशलः कल्पनीयः । कुतश्चासौ लभ्यते ? तस्मान्न वृद्धव्यवहाराद्वेदार्थ व्युत्पत्तिरुपपद्यते ॥ § 6895

## व्याकरणस्य वेदार्थानिर्णायकत्वम्

अथ व्याकरणमेव वेदार्थव्युत्पत्तौ उपायतां प्रतिपत्स्यते इति मन्यसे; तदपि कथमिति चिन्त्यम् । न हि विवरणकार इव पाणिनिर्वेदं व्याचष्टे । व्याचक्षाणो वा परिमितदर्शिनि अस्मादृशे, द्वेषादिदोषकलुषितमनसि तस्मिन् अस्मदादीनां वेदार्थं बुभुत्समानानां किदृशी विस्रम्भः ? किं यथैव व्याचष्टे, तथैव वेदार्थः, अन्यथा वेति ॥ § 6896

यदि तु साध्वसाधुशब्दविवेककरणद्वारेण व्याकरणं कारणं वेदार्थव्युत्पत्तेरित्युच्यते—तत्रापि—स्वातन्त्र्येण वेदस्येव व्याकरणस्य शास्त्रत्वानुपपत्तेः । अङ्गत्वप्रसिद्धेश्च वैदिकविध्यपेक्षितार्थसंपर्कित्वमस्य नूनमेषितव्यम् । तत् कस्य विधेः शेषतया व्याकरणमवतिष्ठेतेति वाच्यम् । साधुभिर्भाषितव्यं, असाधुभिर्नेत्यनयोरेव विधिनिषेधयोरिति चेत्; नन्वेतावेव विधिनिषेधौ तावद्विचारयामः । किं क्वचित्प्रकरणे पठितौ ? किमनारभ्याधीतौ ? क्लृप्ताधिकारी, कल्प्याधिकारी वा ? इति ॥ § 6897

## साध्वसाधुशब्दविभागसंभवाक्षेपः

आस्तां चेदम् ! वितता खल्वियं चिन्ता । साध्वसाधुशब्दस्याप्रसिद्धत्वात् किंविषयाविमौ विधिनिषेधौ स्यातामितीदमेव चिन्त्यताम् । व्रीहिभिर्यजेत(?') न कलंजं भक्षयेत् इति व्रीहिकलंजस्वरूपस्य लोकतोऽवगतौ II.224/KSV

१८ ] मन— nyāma-wit_ka
२४ ] द— nyāma-wit_gha
६ ] क— nyāma-wit_kha
८ ] नूत— nyāma-wit_kha
८--९ ] सा— nyāma-wit_kha

७ *] सत्यं वदत—इति शपथवाक्यम् । व्याकरणादिपठनमात्रेण न कश्चित्तादृशो दृश्यत इति भावः ॥
१३ हि ] विवरणकारः—व्याख्यानकारः ॥

तद्विषयविधिनिषेधावबोधो न दुर्घटः । इह तु ब्रीहय इव कलंजमिव न साध्वसाधुशब्दस्वरूपं लोके प्रसिद्धम्; प्रत्यक्षादिप्रमाणातीतवात् । प्रत्यक्षं तावत् साध्वसाधुशब्दप्रविवेकेन लोकतोऽवगम्यते । कृतश्रमश्रवणयुगलकरणिकासु प्रमितिषु शब्दस्वरूपमेव केवलं विषयता मुपयाति । न जातु तद्गतं साधुत्वमसाधुत्वं वा । न हि शब्दत्वादिजातिवत्, उदात्तादिधर्मवच्च साध्वसाधुतायां कस्यचिदपि श्रैत्रः प्रत्ययः प्रसरति । प्रत्यक्षप्रतिषेधे च सति तत्पूर्वकसंबन्धग्रहणासंभवात् अनुमानमपि निरवकाशमेव । शब्दस्तु द्विविधः पुरुषप्रणीतः, वैदिको वा । तत्र पुरुषप्रणीतः प्रत्यक्षानुमानविषयीकृतार्थप्रतिपादनप्रवण एव भवति इति तदपाकरणादेव पराकृतः । वैदिकस्तु संप्रति चिन्त्यो वर्तते । स हि सिद्धे साध्वसाधुत्वे तद्विधिनिषेधे व्याप्रियते । न पुनः तत एव तत्सिद्धिर्युज्यते । तथाऽभ्युपगमे वा दुरुत्तरमितरेतराश्रयत्वमवतरति— विधिनिषेधसिद्धौ साध्वसाधुशब्दसिद्धिः, साध्वसाधुशब्दसिद्धौ च विधिनिषेधसिद्धिरिति ॥ § 6898

## साधुत्वमपि दुर्वचम्

किंचेदं साधुत्वं नाम ? यदि वाचकत्वम्, गाव्यादयोऽपि सुतरां वाचका इति तेऽपि कथं न साधवः ? अर्थावगतिसाधनाद्धि साधुत्वम् । तच्च यथा गाव्यादिषु झटित्येव भवति, न तथा गवादिष्विति प्रथमं त एव साधवः ॥ § 6899

एवं च यदाहुः— § 6900

असाधुरनुमानेन वाचकः कैश्चिदिष्यते § 6901

इति; तदत्यन्तमसांप्रतम्; सोपानान्तरप्रतीतिप्रसक्तेःविपर्ययस्य च लोके प्रसिद्धत्वात् ॥ § 6902

II.225/KSV

यस्तावदनधिगतव्याकरणसरणिः पामरादिः, सः गाव्यादिशब्दश्रवणे सति तावत्येव जातसन्तोषः तत एवार्थमवगच्छन् गवादिशब्दानुमानव्यवधानमनारुह्यैव व्यवहरति । हेमगिरिमुत्तरेण यादृंशि मादृशैरनुभूतानि तरुकुसुमफलानि, तथाविधास्तस्य साधुशब्दा इति सर्वात्मनाऽनवधारितसंबन्धः स

---

१७--१८ ] शब्द— nyāma-wit_kha

८--९ ] म— nyāma-wit_kha

---

१९ नुमानेन ] अनुमानेन—साधुशब्दानुमानद्वारा ॥

कथं तावदनुमातुं प्रभवेत् ? § 6903

येऽपि व्याकरणार्णवकर्णधाराः चिराभ्यस्तसूक्तयः सूरयः, तेऽपि गाव्यादिभिर्व्यवहरन्तोऽनुमानक्रममननुसरन्त एव तेभ्योऽर्थं प्रतिपद्यन्त, इति प्रत्यात्मवेदनीयमेतत् । तस्मात् वाचकत्वमेव साधुत्वम् । एतच्च गवादिष्विव गाव्यादिषु दृश्यत इति तेऽपि साधवः स्युः ॥ § 6904

असाधुत्वमप्यवाचकत्वमुच्यते । तच्च वायसवाशितादिषु व्यवस्थितं न वर्णात्मकेषु व्यक्तवागुच्चार्यमाणेषु शब्देष्विति न तेऽसाधवः ॥ § 6905

## साध्वसाधुशब्दयोः विलक्षणबोधजनकत्वं नास्ति

ब्रूयात्—नार्थप्रतीतिसाधनत्वमात्रं साधुत्वम्, धूमादिभिरतिव्याप्तेः । अपि तु विशिष्टक्रियाकरणत्वम् । तच्च गवादिष्वेवास्ति, न गाव्यादि ष्विति न ते साधव इति—एतदप्यसमीक्षिताभिधानम्—अभिधानक्रियाकारणत्वं हि वाचकत्वमिति पूर्वमेव सुनिपुणमुपपादितम् । तच्च गवादिषु गाव्यादिषु च समानमिति सर्व एव साधवः ॥ § 6906

## साध्वसाधुत्वे न शास्त्रगम्ये

अथ लक्षणानुगतत्वं, तद्बाह्यत्वं च साधुत्वमसाधुत्वं च वर्ण्यते— तद-युक्तम्—पारिभाषिकत्वप्रसङ्गात् । न चान्यत्किमपि साध्वसाधु लक्षणम- II.226/KSV
तिसूक्ष्मयाऽपि दृष्ट्या शक्यमुत्प्रेक्षितुम् । अतो वाचकावाचकावेव साध्वसाधू इति स्थितम् ॥ § 6907

तेन तयोः प्रवर्तमानौ विधिनिषेधाविमौ व्यर्थौ भवेताम् । कथम् त-वा-१-३-१८— § 6908

साधुभिर्भाषणं तावत् प्राप्तत्वान्न विधीयते ।
*अवाचकनिषेधश्च नाप्राप्तेरवकल्पते ॥§ 6910

न हि सलिलं पिबेत् अनलं न पिबेत् इति विधिनिषेधौ संभवतः । सलिलपानस्य स्वतः प्राप्तत्वात्, अप्राप्ते च शास्त्रस्यार्थवत्त्वात् । ज्वलन-पानस्य च कस्यांचिदप्यवस्थायां अप्राप्तेः प्रतिषेधानर्थक्यात् । प्राप्तिपूर्विका हि प्रतिषेधा भवन्ति । न हि ग्रीष्मे ज्वालायमानमारवमार्गभ्रमणोज्जृम्भित-तृषातिशयतनूकृततनुरपि तनूनपातं पातुं लवणोपयोगोपनीततृड्विकारः कर-भोऽपि यतेतेति ॥ § 6911

---

१४ ] त— nyāma-wit_ca
१२--१३ ] ला—

nyāma-wit_kha

---

१० तु] विशिष्टेति । विलक्षणेत्यर्थः ॥
१४ अथ] लक्षणं—पाणिन्यादिसूत्रम् । तच्चाग्रेस्पष्टीभविष्यति ॥
१८ मानौ]

विधिनिषेधौ—साधुभिर्भाषितव्यम्, असाधुभिर्नेति ॥
२१ *] अवाचकत्वरूपत्वात् असाधुत्वस्य ॥

## साध्वसाधुशब्दयोः पुण्यपापहेतुत्वमपि दूर्वचम्

तत्रैतत्स्यात्—गवादेर्गाव्यादेश्च वाचकत्वाविशेषेऽपि साध्वसाधुशब्दोच्चारणकरणकपुण्यपापप्राप्तिपरिहारप्रयोजननियमविधानाय शास्त्रसाफल्यं भविष्यति । तदुक्तम् वा-प-३-३-३०— § 6912

वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः इति— § 6913

एतदपि दुर्घटम्—प्रतिपदमशक्यत्वात्, वर्गीकरणनिमित्तस्य चासंभवात्
II.227/KSV । अवश्यं हि विधिं वा निषेधं वा विधित्सतां प्रविषेध्यांश्च निषे ध्यांश्च शब्दानुपदर्श्य, नियमो विधातव्यः एभिर्भाषतव्यं, एभिर्न इति । तत्र यद्युभये ते शब्दाः प्रतिव्यक्ति नामग्रहणपरिगणनपुरस्सरमुपदर्श्येरन्, तदयमर्थः कल्पशतजीविनः भगवतः परमेष्ठिनोऽपि न विषयः, प्रविततवदनसहस्रसंकुलमूर्तेरनन्तस्यापि न गोचरः, वाचस्पतेर्न भूमिः, सरस्वत्या अतिभारः, तेषामानन्त्येन दर्शयितुमशक्यत्वात् ॥ § 6914

## साध्वसाधुशब्दवर्गीकरणासंभवः

अथ किंचिदुपलक्षणमवलम्ब्य तेषां वर्गीकरणमुपेयते—हन्त तर्हि दृश्यताम् ! न च तत्संभवति ॥ § 6915

अविभक्ता हि शब्दत्वजातिः शब्दापशब्दयोः ।
न चावान्तरसामान्ये केचिद्वर्गद्वये स्थिते ॥ § 6917

न हि साधुत्वसामान्यं इतरेषु व्यवस्थितम् ।
इतरेष्वप्यसाधुत्वसामान्यमुपलभ्यते ॥ § 6919

तदनुपलम्भादसंभवति वर्गीकरणकारणे कथमेष नियमो विधीयेतेति नावधारयामः ॥ § 6920

## साधुशब्दभाषणनियमासंभवः

---

१७--१८ ] प्र— nyāma-wit_kha

८ ] मेकेष्वेव— nyāma-wit_kha

९ ] च— nyāma-wit_ka

---

१० ण] उपलक्षणं—परिचायकम् ॥

१५ ते] न हि इत्यनुवर्तते ॥

किंच नियमार्थेऽपि शास्त्रे वक्तव्यं—कीदृशो नियमार्थ इति—किं साधुभिरेव भाषितव्यम्, भाषितव्यमेव नाधुभिरिति । उभयथा च प्रमादः । आह हि त-वा-१-३-१८— § 6921

II.228/KSV

यदि साधुभिरेवेति नासाधोरप्रसङ्गतः ।
नियतं भाषितव्यं चेत् मौने दोषः प्रसज्यते इति
॥§ 6923

न च वाचकत्वादन्यत् साधुत्वमित्युक्तम्, अवाचकस्य प्रयोगप्रसङ्ग एव नास्तीति ॥ § 6924

### अपशब्दप्रयोगप्रतिषेधोऽपि न शक्यः

अथ प्रमादाऽशक्तिकृतापशब्दप्रयोगप्रतिषेधाय नियम आश्रीयते— तत्रापि— § 6925

प्रमादाऽशक्तिजाः शब्दाः यदि तावदवाचकाः ।
तेषु प्रसङ्गो नास्तीति तन्निवृत्तिश्रमेण किम् ॥§ 6927

अथ वाचकता तेषां अप्रमादोत्थशक्तिवत् ।
न तर्हि प्रतिषेधः स्यात् अप्रमादोत्थशक्तिवत् ॥§ 6929

ननु ! अस्ति तावदपशब्दानामशक्यनिह्नवः परिदृश्यमानो लोके प्रयोग इति तन्निवृत्तिफल एष प्रयोगनियमः कथं न भवेत्— § 6930

यद्येवं अक्षिनिकोचहस्तसंज्ञादेरपि प्रचुरः प्रयोगो दृश्यत इति तद्व्युदासफलोऽप्येष नियमः स्यात् ॥ § 6931

अपि च विधिफलः सर्वत्र नियमो भवति, ऋतावुपेयात् इत्यादि । निषेधफला तु परिसंख्या पंच पंचनखा भक्ष्याः इति । तदयमपशब्दे प्रयोगप्रतिषेधफलश्च नियमश्चेति व्याहतमभिधीयते ॥ § 6932

II.229/KSV

परिसंख्या तर्हि भविष्यतीति चेत्—न—शब्दापशब्दयोर्युगपत्प्राप्त्यभावात् । तत्र चान्यत्र च प्राप्तौ परिसंख्याऽभिधीयते इति न्यायात् ॥ § 6933

१ ] श— nyāma-wit_kha
६ ] क्त— nyāma-wit_ca

४ मौने] मौनं खलु शास्त्रविहितम् ॥ नियमस्यं सम्मतत्वात् ॥
१६ इत्यादि] ऋतावेव, उपेयादेवेति

### साध्वसाधुशब्दयोः पुण्यपापहेतुत्वमपि न

यदपि पुण्यपापफलत्वं सुशब्दापशब्दयोरिति गीयते—तदपि न पेशलम्—परिदृश्यमानं अविवादसिद्धं अर्थप्रत्ययोपजननमपहाय परोक्षस्यादृष्टस्य पुण्यपापात्मनः कल्पनानुपपत्तेः ॥ § 6934

### अर्थवादवाक्यत्वं तद्विधेः

यश्चायं स्वर्गे लोके कामधुग्भवति इति साधुशब्दस्तुत्यर्थवादः, यश्च स वाग्वज्रो यजमानं हिनस्ति इत्यपशब्दे निन्दार्थवादः, तत्र पदार्थस्य विस्पष्टदृष्टत्वात् अर्थवादमात्रपर्यवसितौ च द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात् इति न्यायात् न फलार्थतेति ॥ § 6935

तदेवं साधुभिर्भाषितव्यं, असाधुभिर्न इति विधिनिषेधयोरनारभ्याधीतयोः श्रूयमाणयोरपि दौस्थित्यात् तन्मूलतया लब्धप्रमाणभावा व्याकरणस्मृतिः अंगतामेष्यति वेदस्येति दुराशैव । प्रकरणविशेषपाठे तु तयोस्तदुपयोगादेव न सार्वत्रिको नियमार्थतेति सर्वथा न तन्मूलत्वं व्याकरणस्य ॥ § 6936

### व्याकरणाध्ययनस्य वैफल्यशङ्का

आह—तर्हि निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति विधेः शिक्षाक-
II.230/KSV ल्पसूत्रनिरुक्तच्छन्दोज्योतिश्शास्त्रवत् व्याकरणमपि वेदाङ्गत्वा दध्येयमित्यवगम्यते—नैतदप्यस्ति—शिक्षादीनां इतरेतरसाध्यसंकीर्णविविधविध्यपेक्षितवेदोपकारनिर्वर्तकत्वेन तदङ्गता सुसंगता । व्याकरणस्य तु सुदूरमपि धावनप्लवने विदधतः साधुशब्दप्रयोगनियमद्वारकमेव तदङ्गत्वं संभाव्यते, न मार्गान्तरेण । स च नियमो दुरुपपाद इति दर्शितम् । अतो नांगान्तराणि स्पर्धितुमर्हति व्याकरणम् ॥ § 6937

### व्याकरणं न षङ्गान्तर्गतम्

निष्कारणषडङ्गवेदाध्ययनविधौ च निष्कारणग्रहणं यथा प्रयोजनशैथिल्यं सूचयति, न तथा प्रयोजनवत्ताम् । श्रुतिलिङ्गाद्यङ्गत्वप्रमाणापेक्षया षडङ्गता वर्णयिष्यते ॥ § 6938

### वाक्यानि च न व्याकरणविषयानि

---

१ ] तव्यः— nyāma-wit_ca

---

४ श्चायं ] एकश्शब्दः सम्यग्ज्ञातः सुप्रयुक्तः इत्यादिः ॥

४ श्च ] मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।......यथेन्द्रशत्रुः स्वरतोऽपराधात् इत्याद्यन्तौ ॥

एतेन तस्माद्ब्राह्मणेन न म्लेच्छित वे नापभाषित वै, म्लेच्छो ह वा एष यदपशब्दः इति एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति इति, आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत् इति तस्मादशेषा व्याकृता वागुच्यते इत्यादिवचनान्तरमूलताऽपि व्याकरणस्मृतेः प्रत्युक्ता ॥ § 6939

## शिष्टत्वमपि दुर्वचम्

शिष्टप्रयोगमूला तर्हि व्याकरणस्मृतिरस्तु, *वैद्यकस्मृतिरिवान्वयव्यतिरेकमूलेति चेत्—के शिष्टा इति पृष्टो वक्तुमर्हसि । किं तदभिमतगवादिसाधुशब्दव्यवहारिणः, गाव्याद्यशिक्षितापशब्दवादिनाः, द्वये वा ? § 6940

II.231/KSV

आद्ये पक्षे दुरुत्तरमितरेतराश्रयत्वम्—शिष्टप्रयोगमूलं व्याकरणम्, व्याकरणविदश्च शिष्टा इति । न ह्यशिक्षितव्याकरणाः तत्संस्कृतगवादिशब्दप्रयोगकुशला भवन्ति ॥ § 6941

मध्यमपक्षे गाव्यादिव्यवहारिणः शाकटिकाः शिष्टाः, तत्प्रयोगमूलं गवादिशब्दसंकारकारि व्याकरणमिति व्याहतमिव लक्ष्यते ॥ § 6942

तृतीये तु पक्षे गोगाव्यादिशब्दप्रयोगसांकार्यात् किंफलं व्याकरणं भवेत् । वैद्यस्मृतेस्तु युक्तमन्वयव्यतिरेकमूलत्वं, तथा दर्शनादिति । तदनयाऽपि दिशा न प्रयोजनवत्तामुपयाति व्याकरणम् ॥ § 6943

## व्याकरणस्य फलवत्वं सूत्रे नोक्तम्

अतश्च निष्प्रयोजनं व्याकरणम्, तत्सूत्रकृता स्वयं प्रयोजनस्यानुक्तत्वात् । न हि अथातो धर्मजिज्ञासा प्रमाणादिज्ञानात्, साधर्म्यादिज्ञानद्वा निःश्रेयसाधिगमः, इतिवत् तत्र सूत्रकारः प्रयोजनं प्रत्यपीपदत् ॥ § 6944

सुज्ञानत्वान्न प्रत्यपादयदिति चेत्—किमुच्यते सुज्ञानत्वम् ? यदद्यापि निपुणमन्वेषमाणा अपि न विद्मः, यत्र चाद्यापि सर्वे विवदन्ते ॥ § 6945

## व्याकरणाध्ययनस्यापुरुषार्थत्वम्

१२ ] योऽ— nyāma-wit__ca
१७ ] पृथक्— nyāma-wit__kha
८ ] व— nyāma-wit__kha

५ त्युक्ता ] तद्वाक्यानामर्थवादरूपत्वादिति हेतुः ॥
६ *] अन्वयव्यतिरेकमूला वैद्यकस्मृतिरिवेत्यन्वयः ॥

किंच धर्मार्थकाममोक्षाश्चत्वारः पुरुषार्थाः । तेषामन्यतमः किल व्याकरणस्य प्रयोजनमाशङ्क्येत ॥ § 6946

II.232/KSV तत्र न तावद्धर्मस्तस्य प्रयोजनम् । स हि यागदानहोमादिस्वभावः, तज्जनितसंस्कारापूर्वरूपो वा वेदादेवावगम्यते । चोदनैव धर्मे प्रमाण मिति हि तद्विदः । चोदनामूलमन्वादिस्मृतिसदाचारपुराणेतिहासगमयो वा स कामं भवतु । व्याकरणस्य तु स्वतस्तदुपदेशसामर्थ्यासंभवात् अङ्ग समाख्यातत्वाच्च न तत्प्रयोजनता युक्ता ॥ § 6947

प्रयोगनियमद्वारकस्तु धर्मः तस्याप्रयोजनतया निरस्त एव ॥ § 6948

अर्थप्रयोजनता तु वार्तादण्डनीत्योः प्रसिद्धा, न व्याकरणस्य । अधीतव्याकरणाः अपि दरिद्राः प्रायशो दृश्यन्ते इति न तस्य अर्थः प्रयोजनम् ॥ § 6949

कामस्तु वात्स्यायनप्रणीतकामशास्त्रप्रयोजनतामुपगतः न व्याकरणसाध्यतां स्पृशति ॥ § 6950

मोक्षे तु द्वारमात्मादिपरिज्ञानमाचक्षते क्लेशप्रहाणं चाध्यात्मविदः । षत्वणत्वपरिज्ञानं पुनरपवर्गसाधनमिति न साधीयान् वादः । तदेवं धर्मादिचतुर्वर्गादिकोऽपि न व्याकरणसाध्य इति स्थितम् ॥ § 6951

## व्याकरणं न वेदाङ्गम्

अथोच्यते—सकलपुरुषार्थसार्थसाधनोपदेशविधेः वेदस्य व्याकरणमवलग्नकमङ्गम् । अतस्तत्प्रयोजनेनैव प्रयोजनवदिदमिति न पृथक् प्रयोजनान्तरमाकांक्षतीति—तदपि परिहृतम्—यया हि साधुशब्देतरोपदेशदिशा तस्य तदङ्गता, सा व्युदस्तैव । न चाङ्गस्यापि सतस्तस्य तत्सेवाद्वारमपरमस्तीति नष्प्रयोजन्यमेव । न चेदृशमनुपकारकमप्यङ्गं भवितुमर्हति । न हि तत् प्रधानेनाङ्गीक्रियते । नियोगगर्भो हि विनियोग इति न्यायविदः ॥ § 6952

II.233/KSV

## रक्षोहादिकमपि न व्याकरणफलम्

यान्यपि रक्षादीनि प्रयोजनानि व्याकरणस्य व्याख्यातृभिरभिहितानि, तेषामन्यतोऽपि सिद्धेः न व्याकरणशरणता मुक्ता ॥ § 6953

रक्षा तावदध्येतृपरम्परात एव सिद्धा । मनागपि स्वरतो वर्णतो वा प्रमाद्यन्तं कचिदधीयानं अन्येऽध्येतारः मा विनीनशः,* श्रुतिमित्थमुच्चारय

---

३ ] या हि साधुशब्दो—
nyāma-wit__kha

---

४ नित ] संस्कारः—पुरुषगतातिशयः । मतभेदेन विकल्पः ॥
१७ ण ] मध्यमं चावलग्नं च इत्यमरः ।
२० त्सेवा ] सेवा—सहकराः ॥
२६ *] अपस्वराध्ययने हि महाननर्थ उक्तः ॥

इत्याचक्षाणाः शिक्षयन्तीति रक्षितो भवति वेदः ॥ § 6954

ऊहस्तु त्रिविधः मन्त्रसामसंस्कारविषयः । तत्र सामविषयः ऊहः कशास्त्रादवगम्यते, याज्ञिकप्रयोगप्रवाहाद्वा । मन्त्रविषयोऽप्येवम् । प्रोक्षणादिसंस्कारविषये तु तस्मिन् व्याकरणमपि किं कुर्यात् ? § 6955

आगमस्त्वनन्तरमेव परीक्षितः । आगमगम्यं च प्रयोजनं भवति, न चागम एव प्रयोजनम् ॥ § 6956

लाघवं तु किमुच्यते ? वाल्यात्प्रभृति बहुषु बहत्स्वपि वत्सरेषु यत्नाधिगन्तुं शक्यते व्याकरणम्, स चेल्लधुरुपायः कोऽन्यस्ततो गुरु भविष्यति ॥ § 6957

सन्देहोऽपि न कश्चिद्वेदार्थे व्याकरणेन पराणुद्यते । प्रतिवाक्यमुपप्लवमाननानाविधसन्देहसहस्रविस्रंसनफला मीमांसा हि दृश्यते, न व्याकरणम् । तेन रक्षोहागमलध्वसन्देहाः प्रयोजनम् इति यदुच्यते तन्न साधु व्याहृतम् ॥ § 6958

यान्यपि प्रयोजनान्तराणि भूयांसि—तेऽसुरा हेलयो हेलयः इत्युदाहरणदिशा दर्शितानि, तान्यपि तुच्छत्वात् आनुषङ्गिकत्वाद्योपेक्षणीयानि । तदुक्तम् त-वा-१-३-१८— § 6959
II.234/KSV

अर्थवत्त्वं न चेज्ज्ञातं मुख्यैर्यस्य प्रयोजनैः ।
तस्यानुषङ्गिकेष्वाशा कुशकाशावलम्बिनी इति ॥§ 6961

## व्याकरणेन शब्दसंस्कारः न संभवति

अथ कथ्यते—किं प्रयोजनान्तरपर्येषणया ? शस्दसंस्कार एव व्याकरणस्य प्रयोजनमिति—तदपि व्याख्येयम्—कः शब्दस्य संस्कारः ? तेन वा कोऽर्थ इति । न हि व्रीहीणामिव प्रोक्षणम्, आज्यस्येवावेक्षणम्, अग्नीनामिवाधानं शब्दस्य कश्चन व्याकरणकारितः संस्कारः संभवति ॥ § 6962

नैयायिकादिपक्षे च क्षणिकाः वर्णाः । तेषामुच्चारितनष्टानां कः संस्कारः ? शरादेरिव न वेगः, नात्मन इव भावना, न शाखादेरिव स्थितस्थापक इति ॥ § 6963

वर्णानां नित्यत्वपक्षेऽपि क्षणिकाभिव्यक्तिकत्वमपरिहार्यम् । अतस्तेष्वपि कः संस्कारः ? § 6964

१२ ] यौक्तिक— nyāma-wit__kha

१ ] रपि— nyāma-wit__kha
१० ] त्व— nyāma-wit__kha

## व्याकरेण वर्णादिसंस्कारासंभवः

संस्कारश्च वर्णस्य वा, पदस्य वा, वाक्यस्य वेति विकल्प्यमानः न कस्यचिद्व्यवस्थापयितुं शक्यः । वैयाकरणानां तु निरवयववाक्यवादिनां पद-वर्णयोः संस्कारः सुतरामनालम्बनः ॥ § 6965

अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिकं अन्यान्येव पदानि संस्करिष्यन्त इति चेत्—न—असतां संस्कार्यत्वानुपपत्ते । आह च— § 6966

II.235/KSV

वाक्येभ्य एव परिकल्पनया विभज्य
संस्कर्तुमिच्छति पदानि महामतिर्यः ।
उद्धृत्य सौरभविभूषितदृशि कस्मात्
आकाशशाखिकुसुमानि न संस्करोति इति ॥§ 6970

## व्याकरणस्याध्येयत्वं नापि विधिसिद्धम्

न च शब्दसंस्कारकर्तव्यतोपदेशी कश्चिदनारम्याधीतो वा प्रकरणपठितो वा विधिरुपलभ्यते, यमनुरुध्यमानाः शब्दस्योपयुक्तस्य चात्वं लेकृष्णविषाणं प्रास्यति इतिवत् उपयोक्ष्यमाणस्य वा, व्रीहीन् प्रोक्षति इतिवत् कंचन-संस्कारमनुतिष्ठेम । स्वाध्यायोऽध्येतव्यः इति तु विधिः अभिमुखीकरणेन माणवकस्य वा ग्रन्थस्य वा संस्कारमुपदिशतीति महती चर्चैषा तिष्ठतु । सर्वथा नायं व्याकरणनिवर्त्यप्रत्ययागमवर्णलोपादेशादिद्वारकशब्दसंस्कारोप-देशशङ्कामपि जनयतीत्यास्तामेतत् ॥ § 6971

न च शब्दप्रयोगोपायस्य स्थानकरणादेः कोष्ठस्य मातरिश्वनो वा श्रोत्रेन्द्रियस्य वा तदुपलब्धिकारणस्य प्रयोक्तुरात्मनो वा बुद्धेर्वा कश्चित् व्याकरणेन संकारलेशः शक्यक्रिय इति तद्वारकेऽपि संस्कारेऽनुपाय एव व्याकरणम् ॥ § 6972

न च स्थूलपृषतीत्यादिकतिपयशब्दव्युत्पादनमेव व्याकरणप्रयोजनतया वक्तव्यम्; तस्यापि कल्पसूत्राद्युपायान्तरलभ्यत्वात् ॥ § 6973

## शब्दतत्त्वज्ञानं न व्याकरणाधीनम्

---

१८ ] चि— nyāma-wit__kha
१९ ] रूढ— nyāma-wit__kha

---

२ वादिनां ] वाक्यं अखण्डमिति ते वदन्ति ॥

१२ वा ] प्राभाकरभट्टमतभेदेन विकल्पः ॥

यश्चाह—तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते त. वा. १-३-१८ इति—तस्य सोपहासमुत्तरं वार्तिककार एव दर्शितवान् ॥ § 6974

II.236/KSV

तत्त्वावबोधः शब्दानां नास्ति श्रोत्रेन्द्रियादृतेत-वा-१-३-१८ इति ॥ § 6975

## सूत्रेऽप्यसंस्कृत शब्दप्रयोगः

अपि च व्याकरणेन कृतेऽपि शब्दसंस्कारे तदुपदिष्ट संस्कारबहिष्कृतशब्दप्रयोगान् विदधतः तत्रतत्र पूर्वेऽपि दृश्यन्ते । सूत्रकारस्तावत् जनिकर्तुः प्रकृतिः तत्प्रयोजको हेतुश्च इति तृजकाभ्यां कर्तरि इति प्रतिषिद्धं षष्ठीसमासं, तथा जनिकर्तुः इति धातुनिर्देशैकविषयं जनिशब्दं अर्थनिर्देशेऽपि प्रयुक्तवान् ॥ § 6976

## वार्तिकेऽसंस्कृतशब्दप्रयोगः

वार्तिककारोऽपि दम्भेर्हल्गृहणस्य जातिवाचकत्वात् सिद्धम् इति तथैव प्रयुक्तवान् । अन्यभाव्यं तु कालशब्दव्यवायात् इति च क्लेशेन समाससंज्ञया गुणवचनसंज्ञाबाधितत्वात् अगुणवचनत्वात् ब्राह्मणादिगणपठितत्वात् गुणवचनब्राह्मणादिभ्यः इत्यप्राप्तमेव ष्यञं कृतवान् ॥ § 6977

## भाष्येऽसंस्कृतशब्दप्रयोगः

भाष्यकारोपि अविरविकन्यायेन इति द्वन्द्वगर्भे तत्पुरुषे प्रयुयुक्षिते सुपो धातुप्रातिपदिकयोः इति प्राप्तमपि लोपं न कृतवान् । अन्यथा कृत्वा चोद्यं, अन्यथा कृत्वा परिहार इति चात्रचान्यथैवं कथं प्राप्तमपि णमुलमुपेक्ष्य त्त्काप्रत्ययं प्रायुङ्क्त ॥ § 6978

तदिदं त्रिमुनिव्याकरणस्य त्रयोऽपि च मुनयः स्खलन्तीति कमुपालभेमहि ! § 6979

II.237/KSV

## मन्वादिस्मृतिष्वसंस्कृतशब्दप्रयोगः

२० ] ज— nyāma-wit__kha   nyāma-wit__ca
२३ ] तेन—ख, श्लोकेन—

१७ न्तीति ] यद्यपीदं सर्वं सुपरिहरम् । अथापि व्याकरणप्रणेतार एव एवं क्लिश्यन्ति चेत्, अन्येषां तेन को लाभः ?

मन्वादिग्रन्थेष्यपि क्रियन्तोऽपशब्दा गण्यन्ते ? ज्ञातारस्सन्तिमे इति मनुना, अक्षिणी आज्य इत्याश्वलायनेन, मूर्धन्याभिजिघ्रणं इति गृह्यकारेण, तदनन्तरं तुभ्यं च राघवस्य इति वाल्मीकिना, जन्मे जन्मे यदभ्यस्तम् इति द्वैपायनेन प्रयुक्तम् । § 6980

आह च त-वा-१-३-१८— § 6981

अन्तो नास्त्यपशब्दानामितिहासपुराणयोः इति ॥§ 6982

अथवा किमनेन पुराणपुरुषपरिवादेन । सर्वथाऽयं वस्तुसंक्षेपः— *क्षामोऽपि कश्चिदुपयोगो न लोके वेदे वा व्याकरणस्य विद्यत इति ॥ § 6983

## व्याकरणस्य विफलत्वं वैयकरनै रप्युक्तम्

किंचान्यत्—अथ शब्दानुशासनम् इत्युपक्रम्य केषां शब्दनाम् इति पृष्ट्वा, लौकिकानां वेदिकानां च इति प्रतिज्ञाय—न लौकिकास्सर्वे व्याकर्तुं पारिताः शब्दाः । नापि वैदिकाः । तथाहि—तेषां व्याक्रिया प्रतिपदं वा विधीयते ? लक्षणतो वा ? प्रतिपदं तावदनुशासनमघटमानं आनन्त्याच्छब्दानाम् । तथा चाहुः—बृहस्पतिरि द्राय दिव्यं वर्षसहस्रं प्रतिपदं विहितान् शब्दान् प्रोवाच, न चान्तं जगाम(?') इति ॥ § 6984

नापि लक्षणतः, तदसंभवात् । न हि सकलसाधुशष्दवर्गानुगतं अपशब्देभ्यश्च व्यावृत्तं गोत्वादिवदिह किंचिल्लक्षणमस्तीत्युक्तम् ॥ § 6985

II.238/KSV

## सूत्रानुगुणत्वं साधुत्वमित्यपि न युक्तम्

तत्रैतत्स्यात—न जात्यादिरूपमिह लक्षणमभिधित्सितम् । अपि तु कथमनुशासनमिति प्रश्नपूर्वकमुक्तं प्रकृत्यादिविभागकल्पनया, सामान्यविशेषतता लक्षेणेनेति च । तथा हि—कर्मण्यण् इति सामान्यलक्षणं—कर्म-

७ ] म— nyāma-wit_kha
१७ ] स्या— nyāma-wit_kha
३ ] तत्संभवो— nyāma-wit_kha

५ योः ] इदं सर्वं छान्दसमिति यद्यपि परिहरन्ति । परन्तु अपशब्दत्वं समान मेवेति भावः ॥

६ *] इदं सर्वं छान्दसमिति यद्यपि परिहरन्ति । परन्तु अपशब्दत्वं समान मेवेति भावः ॥

ण्युपपदे धातुमात्रादण्प्रत्ययो भवतीति । आतोऽनुपसर्गे कः इति विशेषलक्षणम् आकारान्ताद्धातोः उपसर्गरहितात् कर्मण्युपपदे कप्रत्ययो भवतीति । तेनानेन सामान्यविशेषवता लक्षणेन कुम्भकारः नगरकारः इत्यादयः, गोदः कम्बलद इत्यादयो भूयांसः शब्दाः अक्लेशेनैव व्याकरिष्यन्त इत्युच्यते प्रकृत्यादिविभागकल्पनयेत्यत्र यद्वक्तव्यं, तत्प्रागेव सविस्तरमभिहितम् । सामान्यविशेषवता लक्षणेनेति तु संप्रतिनिरूप्यते । तदपि व्यवस्थितं लक्षणं न दृश्यते—तथा हि—धातोः परे प्रत्यया भवन्तीति लक्षणं कुर्वता वक्तव्यम्—कः पुनरयं धातुर्नामेति ॥ § 6986

## धातुस्वरूपमपि दुर्वचम्

ननु भूवादयो धातवः इत्युक्तमेव तत्स्वरूपं—केचन शब्दाः कयाचित्परिपाट्या पठिताः, ते धातुसंज्ञया लक्ष्यन्ते । तेभ्यः परे तिङः कृतश्च प्रत्यया भवन्तीति—सत्यमुक्तमेतत्—किन्तु एवं पाठे कृतेऽपि न धातुस्वरुपनिर्णय उपवर्णितो भवतिं । तथा च गण्डतीत्यपि प्राप्नोति,* धातोस्तिङ्प्रत्ययविधानात् । घट चेष्टायां इति धातुः अस्ति च घट इति प्रातिपदिकम् । अमो रोगे इति धातुः अनुबन्धत्यागात् अम् इति भवति; अस्ति च द्वितीयाविभक्तेरेकवचनमिति । भू शब्दो धातुः; अस्ति च भूप्रातिपदिकम् । यती प्रयत्ने इति लुप्तानुबन्धः यत  इति धातुः; अस्ति च यत् इति सर्वनाम । II.239/KSV तत्र च पाठप्रसिद्धरूपमात्राविशेषात् अधातोरपि घट-भू-यच्छब्दरूपात् परे तिङ्प्रत्यया भवेयुः ॥ § 6987

## क्रियावचनत्वमपि न धातुलक्षणम्

क्रियावचनो धातुरिति चेत्—भवति तिष्ठति इत्येवमादीनामधातुत्वं प्रप्नोति, गण्डेश्चानर्थकः पाठः ॥ § 6988

उभयं तर्हि धातुलक्षणं पाठः, क्रियावचनता चेति—न भवितुमर्हति । तदपि हि व्यस्तं वा लक्षणं, समस्तं वा ? व्यवस्तपक्षे प्रत्येकमभिहिते दोषस्तदवस्थ एव । समस्तपक्षेऽपि भवत्यादौ क्रियावचनत्वस्य द्वितीयलक्षणस्य चाभावादधातुत्वमेव स्यादिति । एवं धातोः प्रकृतेरनिर्णीतत्वात् कुतः परे तिङश्च कृतश्च प्रत्यया उत्पद्येरन् ॥ § 6989

## तिङर्थोऽपि दुर्वचः

८--१० ] ते— nyāma-wit__kha
१४ ] पुरः— nyāma-wit__kha
१ ] साधु— nyāma-wit__kha
२ ] गमे— nyāma-wit__kha
५--७ ] क्षे— nyāma-wit__kha

१२ *] न चेष्टापत्तिः, नामपदानामपि धातुत्वप्रसङ्गात् ॥
१४ त्यागात्] अनुबन्धः—इत् ॥
२१ णं] पाठः—तथा परिगणनम् ॥

किंच केचन तिङ्प्रत्ययाः कालाद्युपाधयः न तद्वचनाः । अनुक्तेषु च कालादिषु तत्पूर्वकं वर्तमाने लट्, भविष्यति लृट्, भूते लुङ् इति नियमनिरूपणमशक्यम् ॥ § 6990

उच्यतां तर्हि तिङ्भिः कालादय इति चेत्—न—भाष्यविरोधात् । उक्तं हि भगवता भाष्यकारेण भूते धात्वर्थ इति । न च धात्वर्थेनैव धात्वर्थो व्यवस्थापयितुं शक्यते । लिङादयश्च सुतरामनधिगम्यमानविषयाः । ते हि विध्यादावर्थे विधीयन्ते । स च बिधिरूपोऽर्थः स्वरूप तश्च उपाधितश्च न शक्यो निर्णेतुमिति ॥ § 6991

II.240/KSV

## कारकप्रकरणस्य दुःस्थत्वम्

तथा कारकानुशासनमपि दुस्स्थम् । ध्रुवमपाये अपादानम् इत्युच्यते । तत्र ध्रुवस्य वृक्षादेः—वृक्षात् पतितो देवदत्तः इति पतनक्रियायां अचलतः कृशमपि न कारकत्वमुत्पश्यामः । क्रियायोगि हि कारकम् । सा च वृक्षे नोपलभ्यत इति ॥ § 6992

सार्थाद्धीनःरथात्पतितः इति सार्थरथयोः क्रियोपलभ्यते, न वृक्षवन्निश्चलत्वमिति चेत्—सत्यम्—स्वरसप्रवृत्ता तयोरस्ति क्रिया । हाने याने च पादपनिर्विशेषावेव सार्थरथौ । न च यदेकस्यां क्रियायां कारकं, तत् सर्वासु क्रियासु कारकं भवति, अतिप्रसङ्गात् ॥ § 6993

## द्वितीयानुशासने दोषः

कर्मणा यमभिप्रैति स संप्रदानम् इत्यत्र कर्मशब्दः क्रियावचनो वा स्यात्, ईप्सिततमकारकवाची वा ? आद्ये पक्षे क्रियया सर्वकारकाण्यभिप्रेयन्त इति क्रियासु कारकाणि संप्रदानतां प्रतिपद्येरन् । न चोपाध्यायस्य किचिदभिप्रीयमाणस्य व्यापारमुत्पश्याम इत्यसावकारकमेव तत्र स्यात् । प्रतिग्रहस्तु क्रियान्तरमेव । तत्र चोक्तं क्रियया चाभिप्रेयमाणं फलं भवति, न कारकमिति वक्ष्यामः ॥ § 6994

द्वितीयस्तु पक्षः—कर्मणा कारकेण गवादिना यमभिप्रैतीति सुतरां संकटः । क्रियासंबन्धितया हि कारकं कारकं भवति, न कारकसंबन्धितया, करोतीति कारकमिति व्युत्पत्तेः ॥ § 6995

II.241/KSV

१७ ] अवलग्न— nyāma-wit__kha
३ ] सं— nyāma-wit__kha
६--८ ] द्वितीयः । कारक— nyāma-wit__kha

८ निर्णेतुमिति ] विधिनिमन्त्रणादीनां भेदस्यात्यल्पत्वादिति हेतुः ॥
१५ क्रियायां ] सार्थ-रथयोः चलनवत्त्वेन गमनक्रियायां कारकत्वेऽपि पतनक्रियायां कथं कारकत्वम् ॥

## करणलक्षणमपि न युक्तम्

साधकतमं करणम् इति तमबर्थानवधारणात् अनुपपन्नम् । अनेककारकसंदर्भसन्निधाने कार्यमात्मानं लभते । तेषामन्यतमव्यपगमेऽपि न लभ्यत इति ततः किमिव कारकमतिशयखचितवपुरिति, यं तमर्थं मङ्गलकलशेनाभिषिंचामः । प्राचुर्येण हि प्रधानसंपत्तिपर्यन्तव्यापारयोगित्व मित्यादि सर्वसाधारणं न काष्ठैकनिष्ठमिति काष्ठैः पचति इति कथं तेषामेव करणत्वम् ? § 6996

## अधिकरणलक्षणे दोषः

आधारोऽधिकरणम् इति यदुच्यते, तत्र वक्तव्यम् । कस्याधार इति; क्रियायाः, कारकस्य वा ? यदि क्रियाधारत्वं अधिकरणलक्षणम्, अशेषकारकाणामधिकरणसंज्ञा प्रसज्येत, क्रियायोगाविशेषात् ॥ § 6997

अथ यत्र स्थाल्यादौ कर्माश्रितं तण्डुलादि तदधिकरणम्; समे देशे पचति इति न स्यात्, अप्सुपचति इति स्यात् । कटे स्थितो भुङ्क्ते इति चापभ्रंशो भवेत् । कर्तुर्हि तत् अधिकरणं, न कर्मणः । कर्तृकर्मणोः क्रियाश्रययोः धारणमधिकरणत्वेन कारकमिति चेत्, उभयधारत्वं न कटस्य, न स्थाल्या इति द्वयोरप्यधिकरणता हीयेत । एकैकाधारत्वे तु तल्लक्षणे परस्परापेक्षया पुनस्तत्स्वरूपसांकर्यं भवेत् । यदि तु सकलकारकाधारत्वं अधिकरणलक्षणं, स्थाल्यां ओदनं पचति इति न स्यात्, सकलकारकानधिकरणत्वात् । स्थाल्या अधिकरणस्य चाकारकत्वप्रसक्तिः । न ह्यधिकरणमधिकरणाश्रितं भवति । *मध्याह्ने स्नाति, रात्रावश्नाति, पूर्वस्यां दिशि विहरति इति II.242/KSV
कालादीनामव्यापारत्वात् अकारकत्वमेव भवेत् । तथा च सति एते प्रयोगा असाधवः स्युः ॥ § 6998

## कर्मत्वमपि दुर्वचम्

कर्तुरीप्सिततमं कर्म इति साधकतमवदिहापि न वाचकोऽयमतिशायनः, सर्वकारकाणां क्रियार्थितया कर्तुरीप्सिततमत्वात् ॥ § 6999

अथ यदर्था क्रिया, तदर्थं कर्तुरीप्सिततमं; तदर्थं त्वन्यत् इति तत्र तमप्प्रत्य इत्युच्यते—तर्हि तस्य कारकत्वमेव न युक्तम् । क्रियासंपादकं

१२ ] शबलि— nyāma-wit__kha
१३ ] नं कार्यं प्रति— nyāma-wit__kha
२२ ] त्वे कारण— nyāma-wit__kha
२ ] स्वरूप— nyāma-wit__ca
७ ] संप्रत्यय— nyāma-wit__kha

१७ स्य ] अधिकरणस्य—अधिकरणभूतायाः स्थाल्याः ॥

१८ *] यद्यपि सर्वाधारः काल उच्यते । परन्तु तदेवाक्षिप्यते ॥

हि कारकमुच्यते, न क्रियासंपाद्यम् । क्रियासंपाद्यं तु फलं भवति, न कारकम् । कारकं च, क्रियया चाप्तुमिष्टतमं इति च विप्रतिषिद्धम् ॥
§ 7000

## क्रियानिर्वर्तकत्वं न कारकत्वम्

अथाभिधीयते क्रियोपयोगयोग्यतानिबन्धनोऽयं कारकव्यपदेशः । स च विचित्रः क्रियोपयोगः । अन्यथा करणस्य, अन्यथाऽधिकरणस्य, अन्यथा संप्रदानादेः । इह च क्रियासाध्यत्वेऽपि ओदनस्य तत्क्रियोपयोगि त्वमनिवार्यम्, तमनुद्दिश्य क्रियायाः प्रवृत्त्यभावात्—इतीत्थमनेन रूपेण तस्य क्रियासाधनत्वात् कारकत्वमिति—नैतदेवम्—कारकत्वव्यपदेशो हि न पारिभाषिकः, किंतु क्रियासंबन्धनिबन्धनः । क्रियासंबन्धश्च ईदृशः— यदुपेया क्रिया, तदुपायः कारकमिसि । विपर्यये तु कीदृशः कारक (?)वः ? § 7001

१ II.243/KSV

## कर्मत्वविशेषः

अस्तु तर्हि तण्डुलान् पचति इति, मा च भूत् ओदनं पचति इति, ओदनस्य फलदशानुप्रवेशादिति—उक्तमत्र—तण्डुलेष्वपि तमबर्थो न वाचकः, तेषामपि फलसाधनोपयोगाविशेषादिति ॥ § 7002

## कर्तृत्वमपि दुर्वचम्

स्वतन्त्रः कर्ता इति किमिदं स्वातन्त्र्यं क्रियासंपाद्यं ? यदिच्छातः प्रवर्तनमिति चेत्; कूलं पतति इति चैतन्यशून्यतया कूलस्येच्छानुपलम्भात् अकर्तृत्वं भवेत् ॥ § 7003

## कारकान्तरप्रेरकत्वादिकमपि न कर्तृत्वम्

अथ यद्व्यापाराधीनः कारकान्तरव्यापारः स कर्तेत्युच्यते, सर्वकारकनिर्वर्त्यत्वात् क्रियायाः न विद्मः किंव्यापाराधीनः कस्य व्यापार इति, समग्रकारकग्रामस्य परस्परापेक्षत्वात् ॥ § 7004

---

१. अतिशायने खलु तमप् ॥

---

८ ] क्रि— nyāma-wit_kha
९ ] य— nyāma-wit_ca

---

१७ वेत् ] तथा च तत्र प्रथमा न स्यात् ॥

अथ यः कारकान्तराणि प्रयुङ्क्ते, तैश्च न प्रयुज्यते, स कर्तेति— तर्हि पुनरचेतनानामकर्तृत्वप्रसङ्गदोषस्तदवस्थ एव ॥ § 7005

अथ धातुनाऽभिधीयमानव्यापारः कर्तेति, तत्रापि न विद्मः कस्य धातुनाऽभिहितो व्यापारः, सकलकारकवाचित्वात् पचेः । अन्यथा हि सकलव्यापारानभिधायिनि धातौ, तदर्थसाधने सर्वेषां सङ्गतिरेव न स्यात् । तथा च सति सर्वकारकणि कर्तृत्वमेव स्पृशेयुः ॥ § 7006

II.244/KSV

## प्राधान्यमपि न कर्तुः

अथ मतं अगुणतो धातुनाऽभिधीयमानव्यापारः कर्तेति,—तदप्यसत्सकृदुच्चरितो धातुः अनेकस्मित् कारकचक्रे कस्यचिद्गुणत्वेन कस्य चित्प्राधान्येन व्यापारं कथमिव कथयितुं शक्ष्यतीति । तत्प्रयोजको हेतुश्च इति प्रयोज्येनैव व्याख्यातम् । एवं कारकानुशासनस्याव्यवस्थानात् तदधीनप्रसक्तविभक्तिविधानमपि प्रत्युक्तम्, अपादाने पंचमी सप्तम्यधिकरणे च इत्यादिविषयनिरूपणपूर्वकत्वात् तद्विधानस्येति ॥ § 7007

## समासत्वस्य दुर्वचत्वम्

किंच—यदपि कृत्तद्धितसमासानुशासनं, तत् सामर्थ्यनियमपूर्वकम्, समर्थानां प्रथमाद्वा समर्थः पदविधिः इति परिभाषणात् । तदत्रापि वक्तव्यम्—सामर्थ्यं नाम किमुच्यत इति । एकार्थान्वयित्वमिति चेत्; तत् कुतोऽवगम्यते ? तद्धितसमासप्रयोगप्रतिपत्तिभ्यामेवेति चेत्, तर्हि ताभ्यां सामर्थ्यावगमः, सामर्थ्ये सति तयोः प्रवृतिरितीतरेतराश्रयम् ॥ § 7008

अपि च सामर्थ्यमन्तरेणापि क्वचित् प्रयुजते समासम्, अश्राद्धभोजी, दधिघटः, गोरथः,* इति । तथा, सत्यपि सामर्थ्ये तद्धितप्रयोगं परिहरन्ति अङ्गुल्या खनति, वृक्षमूलादागत इति, आङ्गुलिकः वार्क्षमूल इति न वक्तारो भवन्तीति एतदप्यसमंजसमनुशासनम् ॥ § 7009

## प्रातिपदिकत्वमपि दुर्वचम्

१३ ] गुणो— nyāma-wit_kha
१९ ] त— nyāma-wit_kha
२ ] दृश्यन्त— nyāma-wit_kha
३ ] च— nyāma-wit_ka

४ चेः ] विक्लृत्यनुकूलव्यापारः खलु धात्वर्थः । स व्यापारः सकलकारकसाधारण एव ॥
१९ *] प्रथमे नञा सामर्थ्याभावः ।
समनन्तरयोः अपूर्णार्थत्वात् सामर्थ्याभावः ॥

तथा अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति संज्ञालक्षणमतिव्यापकम्, वाक्यस्यापि प्रातिपदिकसंज्ञाप्रसंगात् ॥ § 7010

II.245/KSV

अथ कृत्तद्धितसमासाश्च इति सूत्रान्तरे समासग्रहणम् विधिशेषत्वेन वर्ण्यमानं तदितरप्रतषेधफलं भवतीति ततो वाक्यनिवृत्तिः सेत्स्यति—यद्येवं अधातुरप्रत्ययः इति न वक्तव्यम्; धातुप्रत्यपयोरपि तत एव प्रतिषेधसिद्धेः ॥ § 7011

अथ एकार्थतया समानशीलस्य वाक्यस्यैव प्रतिषेधे प्रभवति समासग्रहणं, न धातुप्रत्यययोरिति—तदपि दुराशामात्रम्; वाक्यसमासयोरपि वावचनानर्थक्यकथनेन पार्थगर्थ्यव्यवस्थापनादिति ॥ § 7012

तदेवं प्रातिपादिकसंज्ञाविषयस्यानिश्चयात् तत्प्रकृतिकानां ङ्याप्प्रातिपदिकात् इत्यधिकृत्य स्वादिप्रत्ययानां विधानमनुपपन्नमित्यलं प्रसङ्गेन ॥ § 7013

सर्वथा दुर्व्यवस्थितं शब्दानुशासनम् ॥§ 7014

## व्याकरणे न्यूनताः

यश्च व्याख्यातृणां उक्तानुक्तदुरुक्तनिरीक्षणप्रयत्नः, यश्च वाचकमात्रा वार्णाधिक्यमिषपुरस्सरलक्षणपरिचोदनप्रकारः, यच्चेदं व्याख्यातृवचनं इह न भवत्यनभिधानात् इति, यच्च पदे पदे बहुलवचनं—तत् सर्वं सुतरामपरिशुद्धिमनुशासनस्य दर्शयतीति ॥ § 7015

## अपशब्दभूयिष्टत्वं व्याकरणस्य

अन्ये तु, *शोभेति, चीर्णमिति, न याति प्रतिभेत्तुमिति, मातुरनुहरतीति फलिनबर्हिणं (?')बलवानो ह्यद्यासेति, कांदिशीक इति, भ्राजिष्णुरिति, गणेय इति, वरेण्य इति लक्ष्यसंग्रहबहिष्कृतस्मृतिसंदेहविपर्ययप्रतिपादकत्वलक्षण स्खलितं विप्लुतं च पाणिनितन्त्वं इति मन्यमानाः तत्र महान्तमाक्षेपमतानिषुः—स तु स्थूलोदरप्राय इति इह ग्रन्थगौरवभयान्न लिख्यते ॥ § 7016

II.246/KSV

## व्याकरणस्य शोधनमप्यशक्यम्

---

८ ] रवाक्य— nyāma-wit__kha

८ ] सार्थशक्त्य— nyāma-wit__kha

nyāma-wit__kha

२ ] घासी— nyāma-wit__kha

१३ ] सार्थशक्त्य—

---

१८ *] एते शब्दाः मूलधातुरूपापेक्षयाऽपशब्दा इव । तेषां साधुत्वं महता क्लेशेन संपाद्यते ॥

ननु ! यदि लक्षणस्य प्रणेता पाणिनिः असम्यग्दर्शी, तत्र विवरणकाराश्च नातिपुणदृशः, काममन्यः सूत्रकृत् कृतबुद्धितरो भविष्यति, वृत्तिकाराश्च प्रौढतरदृष्टयो भविष्यन्ति । तेभ्यश्च शब्दलक्षणमविप्लुतमवभोत्स्यामह इति—नैतदस्ति—तेषामपि अभियुक्तराः केचिदुत्प्रेक्षन्त एव दोषं, तेषामपरे, तेषामप्यपरे । तदेवमनवस्थ प्रसङ्गान्नास्ति निर्मलमनुशासनमिति क्लेशायैव व्याकरणाध्ययनमहाव्रतग्रहणम् । तथा चाह बृहस्पतिः प्रतिपदमशक्यत्वात्, लक्षणस्याप्यव्यवस्थानात्, तत्रापि स्खलित दर्शनात् अनवस्थाप्रसङ्गाच्च मरणान्तो व्याधिर्व्याकरणमित्यौशनसा इति । इहाप्युक्तम्— § 7017

दुष्टग्रहगृहीतो वा भीतो वा राजदण्डतः ।
पितृभ्याभिशप्तो वा कुर्यात् व्याकरणे श्रमम् ॥§ 7019

अन्यैरप्युक्तम्— § 7020

वृत्तिः सूत्रं तिला माषाः कटन्दी कोद्रवोदनः ।
अजडाय प्रदातव्यं जडीकरणमुत्तमम् इति ॥§ 7022

एवं व्याकरणावगाहनकृतोद्योगोऽपि विद्वज्जनः
व्युत्पत्तिं लभते न वैदिकपदग्रामे मनुष्योक्तिवत् ।
अन्यत्किंचन तत्प्रतीतिशरणं नास्तीति च व्याकृतं
तस्मादप्रतिपत्तिमन्थरमुखे वेदाः प्रमाणं कथम् ॥§ 7026

II.247/KSV

## व्याकरणस्यावश्याध्येयत्वम्

८ ] सूची— nyāma-wit__ka    nyāma-wit__kha
१५ ] पदी—क, पत्रीं—

६ चाह ] बृहस्पतिरध्यापयिता । इन्द्रोऽध्येता । दिव्ये वर्षसहस्रमायुः । तथापि नान्तं जगामेति ॥

९ माषाः ] कटन्दीति वैशेषिकभाष्यविशेष इति चक्रधरः ॥

अत्राभिधियते—यत्तावदिदमवादि—गवादिशब्दवत् अनादिप्रबन्धसिद्धमेव गाव्यादेरपि वाचकत्वमिति—तत्रामुं पक्षं संशयदशामेव तावदारोपयापः । पूर्वपाक्षिकोक्तयुक्तिसमुत्थापितस्थिरतरविपर्ययज्ञानसमनन्तरं सहसैव सम्यग्ज्ञानोत्पादनातिभारात् भारैकदेशावतरणन्यायेन संशयस्तावदुपपद्यते । ततः तर्कात् परिशोधितेऽध्वनि सुगमे सुखं विहरिष्यति सम्यङ्निर्णयोपायो न्याय इति तदुच्यते । यदि गाव्यादीनां गवादीनामिव शब्दानां प्रयोगे गतिरन्या न काचित् संभावनाभूमिमध्येति, तत् सत्यमादिसत्तायाः कल्पने कोऽवसरः ॥ § 7027

यथाहि स्वाध्यायाध्ययनसमये यादृशमेव शब्दं यथोदितमात्रानुस्वारस्वरादिस्वरूपसमुत्थं तमुच्चारयत्याचार्यः, तादृशमेव तं शिष्यः प्रत्युच्चारयति । प्रमाद्यन्तं वा गुरुरेवैनमनुशास्ति । आ तदुच्चारणसामर्थ्योपजननं तावत् न मुंचति, शिक्षयति । सोऽपि शिष्टः यदा गुरुर्भवति, तदा स्वशिष्यं तथैव शिक्षयिष्यति । आचार्योऽपि यदा शैशवे शिष्य आसीत्, तदाऽन्येन गुरुणा शिक्षितोऽभूत् । सोऽपि तदन्येन । सोऽपि तदन्येनेत्येवमनादित्वं जैमिनीयपक्षे, आ जगत्सर्गात्प्रभृति प्रवृत्तत्वं वा नैयायिकपक्षे वेदस्य व्यवस्थितम् ॥ § 7028

## साधुशब्दव्यवस्थाप्रदर्शनम्

इत्थमेव यदि गाव्यादीनां गवादिवदप्रमादकृतः सुपरिरक्षितः प्रयोगः, तथैव चैतेभ्योऽर्थप्रतिपत्तिपूर्वको व्यवहारः तदाऽनादिगवादिशब्दसमानविषया एव गाव्यादय इति तदा कस्य किं ब्रूमः । अस्ति त्वत्रापरः प्रकारः । न ह्येकान्तेन यादृगेव वक्ता शब्दः प्रयुज्यते तादृगेव श्रोत्रा प्रत्युच्चार्यते । किन्तु प्रमादालस्यादिविविधापराधविधुरकरणोच्चार्यमाणोऽपभ्रंशतां स्पृशन् दृश्यत इत्यस्ति संशयावसरः ॥ § 7029

II.248/KSV

## अपभ्रंशोत्पत्तिक्रमः

अपभ्रंशतयाऽपि ये स्थिताः, स्थास्यन्ति वा शाकटिकभाषाशब्दाः, तानपि गोपालबालाबलादिषु प्रयुंजाना जरठपामराः प्रयत्नेनापि न यथोच्चारितानेव तान् पाठयितुं शक्नुवन्तीति अशक्तिजशब्दप्रयोगबाहुल्यदर्शनात् संशयाना कुशाग्रबुद्धेरपि बुद्धिः भवितुमर्हति (?')किमेते गवादिशब्दा एवानादिसिद्धवाचकशक्तिभाजः, तेभ्योऽन्ये विगुणकरणप्रयोज्याप्रमादप्रभवाः अपभ्रंशाः ?

२१ ] त् प्रमाद— nyāma-wit_kha

३ ] वा— nyāma-wit_kha

१४ नादित्वं ] ते हि शब्दनित्यत्ववादिनः ॥

२० तादृगेव ] उच्चारणानूच्चारणवेलायामिदम् ॥

किं वा सर्वे एव तुल्यकक्ष्या इति । तेषांस तुल्यकक्ष्यत्वे, य एतेऽद्यत्वेऽपि प्रमादतः प्रमदादासदारकादिवदनेष्वपभ्रष्टा अभ्यधिकतरामपभ्रंशदशां स्पृशन्तः तेऽपि तामेव गवादिशब्दधुराभधिरोहेयुः ॥ § 7030

## अपभ्रंशानां न साधुशब्दतौल्यम्

न चैवमस्त्विति शक्यमभ्यनुज्ञातुम्, इदनीमेव भ्रश्यतां तेषां प्रत्यक्षत उपलब्धेरिति । तस्मादवश्यं तावत् अद्यत्वे परिदृश्यमानाऽपभ्रंशदृशा दुर्बलबालाबलादिशब्दाः न गवादिशब्दान् स्पर्धितुमर्हन्ति । ते चेन्न स्पर्धन्ते तदधुना गाव्य दयोऽपि प्रकारान्तरोपपत्तिसंभावनाभङ्गुरप्रभावाः सन्तः न गवादिशब्दसमानविधित्वमध्यवसातुं शक्नुयुविति तर्कयामः ॥ § 7031

तदुक्तं भगवता जैमिनिना शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् जै. सू. १-३-२५ इति । भाष्यकारेणापि तद्व्याख्यातम् महता प्रयत्नेन शब्द II.249/KSV उच्चारितो वायुः नाभेरुत्थितः उरसि विस्तीर्णः कण्ठे विवर्तितः मूर्धानमाहत्य परावृत्तः वक्त्रे चरन् विविधान् शब्दानभिव्यनक्ति । तत्रापराध्येताऽप्युच्चारयिता—यथा शुष्के पतिष्यामीति कर्दमे पतति, सकृदुपस्पृक्ष्यामीति द्विरुपस्पृशति इत्यादिना ॥ § 7032

## अपभ्रंशशब्दानामनादित्वासंभवः

आह—विशेषे तर्हि प्रमाणं वक्तव्यं—यदेते गाव्यादयः प्रमादाद्यपराधनिबन्धना एव, न गवादिशब्दसमानविधय इति—उच्यते । भवतु, सिद्धं नस्समीहितं—संशयदशां तावदानीतोऽयं अनादिगाव्यादिशब्दवाची महापुरुषः संबोध्यते (?')भो महात्मन् ! इत्थं पूर्वोक्तनीत्या संशये सति, चिन्त्यताम् ! किमेते गाव्यादयो गवादिसमानयोगक्षेमा एव हस्तः करः पाणिरितिवत् भवन्तु । किंवाऽपराधसंभावनया मार्गान्तरमालाम्बन्तामिति ॥ § 7033

## अपभ्रंशपदानां साधुपदपर्यायत्वाभावः

तत्रैकस्मिन् वाच्ये बहवस्तुल्यकक्ष्या वाचका इति नैष न्यायः । कथम् ? प्रत्यर्थं शब्दनिवेशात् । तेनैव सम्बन्धकरणसौकर्यात् । अन्यथा च संबन्धे यत्नगौरवप्रसङ्गात् । प्रत्यर्थं शब्दनिवेशे हि सति परस्परमव्यभिचारिणौ शब्दार्थौ भवतः, स शब्दः तस्य वाचकः, सोऽर्थः तस्य वाच्य इति । अनेकशब्दवाच्यस्त्वेकोऽर्थः तं वाचकं शब्दं विजह्यादपि, *तमन्तरेण शब्दाभिधेयतामपि प्रतिपद्यते इतिव्य भिचारः ॥ § 7034
II.250/KSV

७ ] दा— nyāma-wit__kha
२ ] न्य— nyāma-wit__kha
५ ] न— nyāma-wit__kha

२५ *] हस्तः, करः इत्यादिशब्दात्तु सूक्ष्मार्थभेदेन भिन्नधातुनिष्पन्नाः ।— गौः, गावि इत्यनयोस्तु न तथात्वमिति ॥

## गोगाव्यादिपदवैलक्षण्यम्

अनेकार्थवाचिनि चैकस्मिन् वाचके इष्यमाणे शब्दोऽर्थ व्यभिचरेत्, तस्यैवार्थान्तरस्यापि ततः प्रतिपत्तेरिति इत्थमनियमोऽयमुपप्लवेत । हस्तः करः पाणिरित्यादौ । अक्षाः, पादाः, माषा इत्यादौ तु किं क्रियते ? गतिरन्या नोपलभ्यते । तेनानेकशब्दत्वं अनेकार्थत्वं दैवबलवत्तयाऽङ्गीकृतम् ॥ § 7035

प्रथमः पुनरेष ऋजुः पन्थाः, यदेकस्य वाचकस्यैको वाच्योऽर्थ इति । इह च गत्यन्तरमतिस्पष्टमस्ति प्रमादप्रभवत्वं नाम । तस्मिन् सति किमिति प्रथमप्राप्तोऽयं प्रतिवाच्यं वाचकनियमक्रमो लङ्घ्यते । तेन प्रमादापराधनिबन्धना गाव्यादयः, न गवादिसमानमहिमान इति युक्तम् ॥ § 7036

## गाव्यादिपदेषु शक्तिग्रहासंभवः

किंच वाचकशक्तिर्नाम सूक्ष्मा परमपरोक्षा अर्थापत्तिमात्रशरणावगमा, न तन्मन्दतायां । *अन्यतः कुतश्चिदवगन्तुं पार्यते । सा चेयमन्यथाऽप्युपपद्यमाना गवादिभ्योऽर्थप्रत्ययादिव्यवहारे मन्दीभवति । तेषु शक्ति कल्पनायामर्थापत्तिः । एवं च गवादय एव वाचकशक्तेराश्रयाः न— गाव्यादयः ॥ § 7037

## अपभ्रंशैः व्यवहारनिर्वाहक्रमः

कथं तर्हि बहूनामनधिगतव्याकरणतन्त्राणामेभिरविच्छिन्नो व्यवहारः ? यथैव म्लेच्छभाषाभिः अक्षिनिकोचहस्तसंज्ञादिव्यवहारिणां वा स्वैः स्वैरुपायैः ॥ § 7038

II.251/KSV

## अपभ्रंशेषु शक्तिभ्रमादेव बोधः

किमक्षिनिकोचादीनां अन्त्यजनपदवाचां नास्ति शक्तिः ? ओमित्युच्यते । कथं तर्हि तेभ्योऽर्थप्रतिपत्तिर्नैसर्गिकी ? तेषां शक्तिर्नास्तीति ब्रूमः । तत्स्वरूपस्याव्यवस्थितत्वेन सांसिद्धिकशक्तिपात्रतानुपपत्तेः । प्रतिपत्तिस्तु स्वकृतसमयमात्रनिबन्धना तेभ्यः ॥ § 7039

## साधुशब्देषु शक्तिग्रहमूलम्

---

९ ] तु— nyāma-wit_kha
१५ ] र्थां— nyāma-wit_kha

---

१० *] तन्मन्दतायां—अर्थापेतः दुर्बलत्वे । अन्यथापि कार्यसिद्धौ ॥

ननु ! नैयायिकानां वा न समयः प्रतिपत्त्युपायः ? सत्यम्—स ह्रीश्वर-प्रणीतः प्रथमसर्गात् प्रभृति प्रवृत्तः मीमांसकाभ्युपगत नैसर्गिकशक्तिसोदर्य एव; न मादृशरचितपरिमितविषयसमयसमानः । स च गवादिशब्देष्वेव प्राप्तप्रतिष्ठः, न गाव्यादिषु । ते तु वर्णसारूप्यच्छायया गवादिशब्दस्मृतिमादधानाः तदर्थप्रतिपत्तिहेतुतामुपगच्छन्ति ॥ § 7040

## साध्वसाधुशब्दपरिज्ञानोपायः

ननु ! अनवधृतस्वरूपाणां कथं गवादिशब्दानां स्मरणम् ? तदवधारणे वा कोऽभ्युपायः ? *अभियोगविशेष इति ब्रूमः । कः पुनरभियोगः ? को वा तस्य विशेषः ? व्याकरणाध्ययनं अभियोगः । तदभ्यासानुसारेण लक्ष्यनिरीक्षणं तस्य विशेषः । व्याकरणेन च प्रतिपदमपर्यवसितमार्यजनप्रयोज्यसाधुशब्दसार्थसङ्ग्रहतः तद्विसदृशबर्बरपुरन्ध्रिप्रायप्राकृतगोचरापशब्दपरिहारप्रकारव्युत्पादनमुपक्रम्यते, यदानन्त्यात् किल कल्पशतैरपि नावकल्पते ॥ § 7041

II.252/KSV

किन्तु व्यपनीतातिव्याप्त्यादिदोषोपनिपातत्रासत्रिमुनिपरीक्षितलक्षण द्वारकस्तदुपदेशः श्रूयते । तेन च वेदेनव धर्माधर्मयोः, ब्रह्मावतारेणेव सत्यानृतयोः, नीतिशास्त्रेणेव हिताहितयोः, मन्वादिवचनेनेव भक्ष्याभक्ष्ययोः, दिव्येनेव शुद्ध्यशुद्धयोः सिध्यत्येव साध्वसाधुशब्दयोरधिगम इति सर्वलोकसाक्षिकमेतत् कथमपनीयते ? § 7042

दृश्यते ह्यद्यत्वेऽपि व्याकरणकोविदानामितरेषां च कृषीबलादीनां अतिमहान् वचसि विशेष इत्येवं प्रमादादिमूलगाव्याद्यपशब्दप्रयोगसंभवात् अनेकशब्दगतवाचकशक्तिकल्पनागौरवप्रसङ्गात् अभियोगविशेषसाध्यमान साध्वसाधुशब्दाधिगमसौकर्याच्च गवादीनामेव वाचकत्वं, न गाव्यादीनामिति स्थिते पूर्वपक्षोपन्यस्तः समस्त एव परीवादः परिहृतो वेदितव्यः ॥ § 7043

## शब्दसाधुत्वस्य प्रमाणगम्यत्वप्रदर्शनम्

तथाहि । यत्तावदभ्यधायि साधुत्वनिश्चये प्रमाणं नास्तीति— § 7044

साधुत्वं नेन्द्रियग्राह्यं लिङ्गमस्य न विद्यते ।
शास्त्रस्य विषयो नैष प्रयोगो नास्त्यसंकरः ॥§ 7046

७ ] य— nyāma-wit_ca
१४ ] तद्वि— nyāma-wit_ca
१७ ] तः— nyāma-wit_kha

२ त] मीमांसकाः किलातिरिक्तशक्तिवादिनः ॥
७ *] अभियौगः—अनुग्रहः । सहायता ॥

इति—तत्रायं प्रतिश्लोकः— § 7047

साधुत्वमिन्द्रियग्राह्यं लिङ्गमप्यस्य विद्यते ।
शास्त्रस्य विषयो ऽप्येवं प्रयोगोऽप्यस्त्यसंकरः ॥§ 7049

इति । श्रौत्रे हि प्रत्यये ग्रस्तनिरस्तरोमशाम्बूकृतादिदोषरहितोदात्तादिधर्मसंबन्धप्रसिद्धानुपूर्वीकवर्णगणात्मकपदप्रतिभासस्तावदस्ति । स च न सं-
II.253/KSV दिग्धः, न बाधकविधूतधैर्यः, नाशुद्धकरणजन्मा, न कल्पनामात्र स्वरूप इति तत्र परिस्फुरत्स्फुटक्रमवर्णात्मकपदग्रहणमेव साधुत्वग्रहणम्, तद्विपरीतयथानिर्दिष्टदोषकलुषितशब्दग्रहणमेव च असाधुत्वग्रहणमिति प्रत्यक्षम्ये एव साधुत्वासाधुत्वे इति ॥ § 7050

## साधुत्वासाधुत्वयोः ऐन्द्रियकत्वम्

ननु ! यदि श्रोत्रकरणकेनैव प्रत्ययेन साधुत्वासाधुत्वे प्रतिपत्तारः प्रतिपद्यन्ते, व्याकरणाध्ययनवन्ध्यबुद्धयोऽपि प्रतिपद्येरन् । न च प्रतिपद्यन्ते । तस्मान्न ते इन्द्रियविषये इति—नैष दोषः । वैयाकरणोपदेशसहायकोपकृतश्रोत्रेन्द्रियगाह्यत्वाभ्युपगमात् । यथा हि ब्राह्मणत्वादिजातिः उपदेशसव्यपेक्षचक्षुरिन्द्रियग्राह्यापि न प्रत्यक्षगम्यतामपोज्झति । यथाऽऽह न हि यत् गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम् इति । यथा वा सविकल्पकप्रत्यक्षप्रामाण्यसिद्धौ शब्दानुविद्धबोधेऽपि प्रामाण्यमुपपादितमादौ ॥ § 7051

किल संज्ञोपदेशिना पनसोऽयमिति वृद्धवचसा चक्षुरिन्द्रियेण पनसज्ञानमुत्पद्यते, सङ्केतकरणकाले तदुभयजमिति अव्यपदेश्यपदेन व्यपनीतम् । व्यवहारकाले तु पुनः पनसादिज्ञानमुपदेशस्मरणापेक्षचक्षुर्जनितमपि चाक्षुषमेवेति वर्णितम् । एवमिहापि व्याकरणकोविदोपदेशसचिव श्रवणेन्द्रियग्राह्ये अपि साधुत्वासाधुत्वे न प्रत्यक्षतामतिवर्तेते ॥ § 7052

## ब्राह्मणत्वादेः आचारगम्यत्वेऽपि प्रत्यक्षत्वम्

यथा च ब्राह्मणत्वादिजातिप्रतीतौ कारणान्तरमुक्तं—क्वचिदाचारतश्चापि
II.254/KSV सम्यग्राजानुपालितादिति मन्वादिदर्शितानवद्यवर्त्मानुसरणनिपुण तरभूपतिपरिपाल्यमानवर्णाश्रमाणां शङ्कितकृतककपटार्यवेषदुष्टशूद्रताव्यभिचारे देशे विशिष्टाचारगम्यापि ब्राह्मणत्वादिजातिर्भवति—एवमि हापि विशिष्टशब्दश्रवणानन्तरकालप्रवृत्तव्यवहारावगमार्थप्रतिपत्तिसहितं शब्दानुशासनशास्त्रोप-

२२ ] ले— nyāma-wit_kha

२ ] धर्मा— nyāma-wit_ca

५ ये ] लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् । अम्बूकृतं सनिष्ठेवम् इत्यमरः । रोमशः कर्कशः ॥

१६ मारुह्य ] उन्नतस्थानस्थितिर्हि क्वचित् प्रत्यक्षकारणं भवति ॥

दिष्टप्रकृतिप्रत्ययविकरणवर्णलोपागमादेशादिलिङ्गमव्यभिचारि तत्स्वरूपावधारणे कारणं भविष्यति । यदेवंलक्षणकमर्थप्रत्यायकं च शब्दस्वरूपं, तत साधुतयाऽवधृतमिति व्याप्तिग्रहणोपपत्तेः ॥ § 7053

## शब्दसाध्वसाधुत्वयोः शास्त्रमपि प्रमाणम्

शास्त्रमपि श्रुतिस्मृतिरूपं अदुष्टशब्दप्रयोगोपनतक्रतूपकारकरणकस्वर्गादिफलसंयोगमुपदिशत् अपशब्दभाषणप्रभवप्रत्यवायप्रतिपादकं च वाग्योगविद्दुष्यति चापशब्दैः इत्यादि साधुत्वेतरपरिच्छेदे प्रमाणतां प्रतिपद्यत एव ॥ § 7054

## शास्त्रेण साध्वसाधुशब्दनिर्णयः

ननु ! व्रीहिकलंजवत् तत्स्वरूपसिद्धौ सत्यां तद्विधिप्रतिषेधयोः शास्त्रं क्रमते; न तु तत्स्वरूपमेव विधत्ते, स्वरूपस्याभावार्थत्वेन विधिविषयत्वायोगात् इत्युक्तम्—सत्यम्—किन्तु श्रुतिस्मृतिशास्त्रयोः धर्मोपदेशिनोः यथोपवर्णितेनैव प्रकारेण साध्वसाधुविषयविधिनिषेधपरत्वम् । तत्स्वरूपप्रतिपत्तिकर्तव्यतापरं तु विध्यपेक्षितव्याकरणस्मृतिरूपमेव शास्त्रं वेदितव्यम् । मूलविध्यपेक्षितसाधुत्वान्वाख्यानपरत्वाच्च व्याकरणस्य मूलशास्त्रमपि तत्र सोपानव्यवहितं प्रमाणीभवत्येव ॥ § 7055

II.255/KSV

## साधुत्वासाधुत्वयोः शास्त्रगम्यतम्

यदि वा पाणिन्यादिष्टस्मृतिद्रढिम्ना मूलभूतमाचमनादिविधिवद्वैदिकमपि तथाविधं विधिवाक्यं कल्पयितुं शक्यमिति शास्त्रस्यापि नाविषयः साधुत्वम् ॥ § 7056

## वैयाकरणानां प्रयोगस्य उपादेयत्वम्

१३ ] आह— nyāma-wit__ca
१७--१९ ] तं— nyāma-wit__kha

१० त्वेन ] अभावार्थत्वेन—धात्वर्थत्वाभावेन ॥
१३ त्ति ] तथा च अधात्वर्थत्वेऽपि प्रतिपत्तिनियमविधिः संभवति ॥
१७ मिति ] स्मृत्या श्रुत्यनुमानस्य संप्रतिपन्नत्वात् ॥

शब्दवित्प्रयोगश्च सङ्कररहित एव । तथा हि—अन्या एव निरवद्यवर्णक्रमोदीरणोदारगम्भीरगतयः सूक्तयः सूरिजनस्य । अन्या एव दुःश्रवाः कुस्सितसङ्कीर्णवर्णविभागविनिहितहृदयोद्वेवाः ग्राम्या गिरः इति प्रत्यक्षमुपलभ्यते ॥ § 7057

स चायमसङ्करः प्रयोगः व्याकरणसहायकं प्रतिपद्यमानः साधुत्वावगमोपायतां भजत एवेति सर्वथा नाप्रामाणकः साध्वसधुशब्दविभाग इति ॥ § 7058

एवं च ब्राह्मणेन न म्लेच्छित वै नापभाषित वै म्लेच्छो हवा एष यदपशब्दः इत्याद्यागमशब्दान्यपि तदुपयोगीनि व्याख्यातानीव भवन्तीति ॥ § 7059

## विधेः नियमकरणसंभवः

यत्पुनर्नियमशास्त्रे साधुभिर्भाषितव्यम्, असाधुभिर्न इत्यस्मिन्नपभाषितं, तदपि न पेशलम्—न हि नीरपानोपदेशवत् कृशानुपाननिषेधवद्वा ऽनवकाशमिदं शास्त्रं; अपशब्दानामनार्यजनवदनप्रतिष्ठानां यथातथाऽर्थप्र-
II.256/KSV तीत्युपायत्वदर्शनपूर्वकप्रयोगप्रसङ्गानपायेन प्राप्तौ सत्यां प्रतिषेधस्याव काशसंभवात् । साधुभिरेव भाषणस्य भोजनप्राङ्मुखतादिवत् नियमादृष्टसाफल्यात् ॥ § 7060

## साध्वसाधुशब्दोपदेशसंभवः

यदपि साध्वसाधुस्वरूपानवधारणात् प्रतिपदोपदेशाद्यशक्यत्वं आशङ्कितं—तदपि प्रतिविहितम्—यादृगिदं प्रत्यक्षानुमानगम्यं साध्वसाधुशब्दस्वरूपं व्याख्यातं, तदवलम्बनपुरस्सरनियमकरणस्य सुशकत्वात् ॥ § 7061

अत एव साधुत्वं नाम किमुच्यते इति यद्विकल्पितं—तत् प्रतिविहित मेव भवति । यतः व्याकरणलक्षणानुगमविशेषितं वाचकत्वं साधुत्वमित्युक्तम् । तच्च सर्वानुगामिगोत्वादिवत्सामान्यं वा भवतु । पाचकत्वादिवत् असत्यपि सामान्येऽवच्छेदकं भवतु । सर्वथा तत्कृतो निर्वहति सर्वो व्यवहारः । वर्गीकरणे हि तदेव कारणमिति ॥ § 7062

अथवा पुनरस्तु वाचकत्वमेव साधुत्वम्; तथापि तत्र नियमशास्त्रं साधुभिरेव भाषितव्यमिति प्रवर्तितुमर्हत्येव ॥ § 7063

## साधुशब्दभाषणविधेर्नियमविधित्वसंभवः

---

९ ] तवाक्येन— nyāma-wit_kha

२२ ] स्ववर्गा—(?)

---

१५ स्य ] भोजनस्य रागप्राप्तावपि स्नानादिनियमार्थं विधानवत् नियमविधिरयम् ॥

२३ था ] तत्कृतः—अवच्छेदकत्वकृतः ॥

यद्यप्यसाधोरवाचकत्वात् प्रयोगप्रसङ्गोनास्ति—तथापि साधुस्मरणसरणिसमुपारूढवाचकत्वशङ्कोपप्लवमानप्रसङ्गनिवृत्तये नियमसाफल्यं भविष्यति । विधिफलत्वेन नियमस्य फलतः परिसंख्याकार्यं असाधु शब्दनिवृत्तिः स्थास्यतीति सोऽपि न दोषः ॥ § 7064

II.257/KSV

## साध्वसाधुशब्दप्रयोगस्य पुण्यपापहेतुत्वम्

यदपि परार्थत्वात् फलश्रुतिमर्थवादीकुर्वता पुण्यपापफलत्वं दूषितम्, तदपि न सांप्रतम्—अर्थप्रतीतिपारार्थ्ये सत्यपि प्रयोगनियमापूर्वद्वारकपुण्यपापफलत्वसंभवात् । पर्णमय्यादिष्वपि तथा प्रसंग इति चेत्—भवतु को दोषः ? नैयायिकैः एकाकार निरवलम्बनार्थवादपदोपदेशानभ्युपगमात् शब्दशक्तितात्पर्यपर्यालोचनमपि तैरन्यथा क्रियत इति प्राग्विचारित आह्निक ४ मिति तिष्ठत्वेषा कथा । तेन कामधुग्भवति इत्यादिवचनान्यपि व्याकरणाध्ययनफलप्रकटनपटूनि तथैव नेतव्यानि ॥ § 7065

## सूत्रे प्रयोजनाकथननिदानम्

यदपि सूत्रकृता स्वयं प्रयोजनं किमिति न व्याहृतमिति व्याहृतं—तदप्यदूषणमेव—व्याकरणं हि वेदांगमिति प्रसिद्धमेतत् आ हिमवतः, आ च *कुमारीभ्यः । वेदश्च यदि निष्प्रयोजनः—स्वस्ति प्रजाभ्यः, समाप्तानि दृष्टादृष्टफलानि सर्वकर्माणि, जितं चातुर्वर्ण्यबाह्यैः अन्त्यजनपदवासिभिः म्लेच्छैः ॥ § 7066

अथ सप्रयोजनो वेदः सोंऽगवत्त्वात् अंगैः सहैव सप्रयोजनतां भजत इति कोऽर्थः प्रयोजनान्तरचिन्तया । न हि दर्शपूर्णमासप्रयोजनादन्यत् प्रयाजादिप्रयोजनमन्विष्यत इति मन्वानः स्वयं सूत्रकृत् प्रयोजनं नाख्यत् ॥ § 7067

व्याख्यातारस्तु मुख्यानुषंगिकभेदभिन्नप्रयोजनप्रपंचप्ररोचनातिशयव्युत्पादनद्वारकश्रोतृजनोत्साहपरिपोषसिद्धये दर्शितवन्त इति न कश्चिदुपालम्भ्यः ॥ § 7068

II.258/KSV

## व्याकरणस्य वेदाङ्गत्वसमर्थनम्

८ ] दो— nyāma-wit_ca

५ पि ] परार्थत्वत्—विधिप्रतिषेधार्थत्वात् ॥
८ एकाकार ] निरवलम्बनेति । निर्विषयेत्यर्थः ॥
१४ * ] कुमारी—कन्याकुमारीप्रदेशाः ॥

कथं पुनरंगता व्याकरणस्य ? कमुपकारमावहत इति । कस्यैष पर्यनुयोगः ? वेदवत् अंगानामनादित्वात् ईश्वरप्रणीतत्वाद्वा पर्यनुयोजनानुपपत्तेः । संक्षेपविस्तरविवक्षया हि पाणिनिपिंगलपराशरप्रभृतयः तत्र तत्र कर्तारः प्रसिद्धिं गताः । परमार्थतस्तु वेद इव तदर्थोऽपि, तदर्थावगमोपायोऽपि हि सर्व एवानादयः, प्रजापतिनिर्मिता वेत्येवमपर्यनुयोज्या एव । अत एव वेदैस्तदङ्गैश्च सह चतुर्दश विद्यास्थानानि गण्यन्ते— § 7069

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश इति ॥§ 7071

## भाट्टोक्तशब्दसंस्कारादिपक्षः

येऽपि शब्दसंस्कारादिविकल्पाः कृताः—तेऽपि बहुभाषित्वापस्मार निर्मिता एव, न वस्तुस्पृशः । शिष्टा एवात्र प्रष्टव्याः । त एव च जानन्ति—के संस्कृताः शब्दाः ? के वा तद्विपरीताः । कश्च तेषां संस्कार इति । न च तावता शिष्टप्रयोगमूलमेव व्याकरणं ब्रूमः, वेदवदनादित्वस्य दर्शितत्वात् । अन्धपरम्पराप्रसङ्गदोषपरिजिहीर्षया तु शिष्टप्रयोगमूलत्वमभिधीयते । वैद्यकस्मृतेरिव अन्वयव्यतिरेकमूलत्वात् । ये हि व्याकरणस्मृतौ साधव इत्यनुशास्यन्ते शब्दाः ते शिष्टैस्तथैव प्रयुज्यमाना दृश्यन्ते, हरीतकीभक्षणादिवारोग्यम् । न तु शिष्टेभ्यः शब्दसमाम्नायमधिगम्य पाणिनिः ग्रन्थं प्रणीतवात् । न चान्वयव्यतिरेकाभ्य द्रव्यशक्तीरवगम्य चरकं प्रणीतवानिति विद्यानामनादित्वाभिधानात् ॥ § 7072
II.259/KSV

एतेनेतरेतराश्रयमपि प्रत्युक्तम्, न हि शिष्टेभ्यो व्याकरणस्य प्रभव इति ॥ § 7073

## शिष्टप्रयुक्तापशब्दानां गमनिका

यत्तु शिष्टानामपि प्रमादित्वमुपवर्णितम्—किल पुराणैर्मुनिभिरपि बहुभिरपशब्दाः प्रयुक्ता इति—तत्राभियुक्तैः तदपनयनमार्गः प्रदर्शित एव । स तु ग्रन्थविस्तरत्रा सादिह न प्रतन्यते ॥ § 7074

४ ] मो— nyāma-wit_kha
८--९ ] के— nyāma-wit_kha
१६ ] शिष्टा— nyāma-wit_kha

१५ कं ] किन्तु अनादिकालप्रवृत्तगुरपरम्परोपदेशलब्धज्ञानेन । आदिम उपदेष्टा तु ईश्वर एव ॥
२० मार्गः ] छाब्दसत्वादिरूपः ॥

## पाणिन्याद्युक्तिषु दोषशङ्कापरिहारः

यदपि पाणिनितन्त्रे धातुप्रातिपदिककारकाद्यनुशासनविसंष्ठुलत्वमने कशाखमाख्यापितं—तदपि निपुणमतिभिः प्रतिसमाहितमेव । न च तेषामपि दोषोत्प्रेक्षणसंभवादनवस्था, निपुणदर्शितमार्गे विप्लवकारवैतण्डिकपण्डित तस्करावकाशानुपपत्तेः ॥ § 7075

## शोभादिशब्दानां साधुत्वम्

एतेन शोभा-चीर्ण-वर्ण-वरेण्य-गणेय-भ्राजिष्णु-कान्दिशीकादिशब्दासंग्रहस्मृतिसंदेहविपर्ययादिदूषणान्यपि कैश्चिदुत्प्रेक्षितानि प्रतिक्षिप्तानि मन्तव्यानि, तानि च तैरेव समाहितानीति ॥ § 7076

## बृहस्पतिवचनस्य गतिप्रदर्शनम्

बार्हस्पत्यमपि सूत्रं असूत्रमेवेत्यलंस्वमनीषिकाकल्पितानल्पदुर्विकल्पडंबरोत्तर्भितालीकपाण्डित्यगर्वगलग्रहणगद्गदगिरामुद्वेगकारिणानेन वस्तु II.260/KSV
विचारेण । सर्वथा प्रकृतिनिर्मलमत्युदारं व्याकरणाम्बरमेवंप्रायैः परिवादपांसुपातैः न मनागपि धूसरीकर्तुं पार्यत इति सिद्धम् ॥ § 7077

तस्मात् पवित्रात् सर्वस्मात् पवित्रं आर्यजनबहुमतं अधिगतचतुर्वर्ग अग्राम्यमात्मानं कर्तुं अध्येतव्यं व्याकरणम् ॥ § 7078

## व्याकरणस्यावश्याध्येयत्वोपसंहारः

आह च— § 7079

आपः पवित्रं प्रथमं पृथिव्यां
अपां पवित्रं परमा हि मन्त्राः ।
तेषां च सामर्ग्यजुषां पवित्रं
महर्षयो व्याकरणं निराहुः ॥§ 7083

## व्याकरणाध्ययनप्रशंसा

---

३--४ ] त— nyāma-wit__kha
१५ ] परमं— nyāma-wit__kha

---

२ तिभिः ] पतञ्जलिभर्तृहरिप्रभृतिभिः ॥ ॥
११ त ] प्रत्युत प्रक्षेप्तुः शिरस्येव ते पतेरन्

इहाप्युक्तम्— § 7084

रूपान्तरेण देवास्ते विहरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ॥§ 7086

किंच— § 7087

वरं हि जातास्तिमयो गभीरे
जलाशये पङ्किनि नित्यमूकाः ।
न मानवा व्याकरणाभियोग—
प्रबुद्धसंस्कारविहीनवाचः ॥§ 7091

II.261/KSV

मनुना च पङ्क्तिपावनत्वेनाधिगतव्याकरणः मीमांसकश्च स्वस्मृतौ पठितौ— § 7092

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्§ 7093

इति । पुष्पदन्तो ऽप्याह— § 7094

भ्रष्टः शापेन देव्याः शिवपुरवसतेर्यद्यहं मन्दभाग्यः
भाव्यं वा जन्मना मे यदि मलकलिले मर्त्यलोके सशोके ।
स्निग्धाभिर्दुग्धधारामलमधुरसुधाबिन्दुनिष्यन्दिनीभिः
कामं जायेय वैयाकरणभणितिभिःतूर्णमापूर्णकर्णः ॥§ 7098

## व्याकरणेन वेदसहकारः

एवं व्याकणाभियोगसुलभप्रौढोक्तिभिः पण्डितैः
अक्लेशेन विचित्रवैदिकपदव्युत्पत्तिरासाद्यते ।
अन्यैरप्युपबृंहिते दृढतरैरङ्गैः निरुक्तादिभिः
वेदे स्वार्थधियं वितन्वति कुतः प्रामाण्यभङ्गो भवेत् ॥§ 7102

---

१७ ] रास— nyāma-wit_kha

---

५ यो ] तिमयः—जलचरप्राणिविशेषाः ॥
९ च ] एते पंक्तावुपविश्य भुञ्जानाः तत्रत्यान् सर्वान् पावयन्ति ॥

*अङ्गभावनिरपेक्षयैव नः
प्रत्ययो यदि ह शब्दविद्यया ।
वैदिकार्थविषयो विधीयते
तत्कुतस्त्यमितरेतराश्रयम् ॥§ 7106

II.262/KSV

## पाणिनिव्याकरणवैशिष्ट्यम्

आदृतमस्खलितव्यवहारैः
*भोगिमतं श्रुतसङ्गिभिरार्यैः ।
व्याकरणं कथमेतदनादि
प्राकृतलक्षणसाम्यमुपेयात् ॥§ 7110

## शब्दप्रामाण्यनिगमनम्

एवं मृषात्वमुदगीयत येन येन—
च्छिद्रेण कल्पितपिशाचरवैरनार्यैः ।
तत्तत्समग्रमपसारितमित्यतश्च
प्रामाण्यमप्रतिहतं स्थितमागमानाम् ॥§ 7114

## प्रमाणविचारनिगमनम्

इति प्रमाणानि यथोपदेशं
एतानि चत्वारि परीक्षितानि ।
प्रवन्वतां संव्यवहारमेभिः
सिध्यन्ति सर्वे पुरुषार्थसार्थाः ॥§ 7118

इति जयन्तभट्टकृतौ न्यायमञ्जर्यां षष्ठमाह्निकम्

---

४ ] परास्त— nyāma-wit__kha
८ ] तौल्य— nyāma-wit__kha
१६ ] न्तु— nyāma-wit__kha

---

१ *] व्याकरणाध्ययनवेलायां तस्य वेदाङ्गत्वज्ञानस्यानपेक्षितत्वान्नान्योन्याश्रयः ॥
२ यो] प्रत्ययः—विश्वासः ॥
६ *] भोगी—शेषः—तदंशभूतः पतञ्जलिः ॥
१२ मानाम्] सर्वमप्येतद्धि वेदप्रमाण्मयसंरक्षणाय ॥

## २.३ सप्तममाह्निकम्—प्रमेयपरीक्षाः प्रमेयनिर्देशः

II.263/KSV

एवं प्रमाणपदार्थे परीक्षिते सति यदर्थं तत्परीक्षणं तत् प्रमेयमिदानीं दर्शयितुमाह— § 7120

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥ १-१-९ ॥ § 7121

प्रमाणवदिहाप्येतत्सूत्रं व्याख्यायि सूरिभिः ।
एवं विभागसामान्यलक्षणप्रतिपादकम् ॥ § 7123

प्रमेयश्रुतिरात्मादिपदपर्यन्तवर्तिनी ।
तेषामेव प्रमेयत्वं नान्यस्येति नियच्छति ॥ § 7125

यथा देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्ताम् इति एवकारादिश्रुतिमन्तरेणापि शब्दसामर्थ्यात् त एव भोजनक्रियायोगिनोऽवगम्यन्ते, नान्ये; तथेहाप्यात्मादयः प्रमेयमित्युक्ते तथैव तदितरप्रमेयनिषेधोऽवधार्यते ॥ § 7126

### प्रमेयविभागाक्षेपः

ननु कथं द्वादशविधमेव प्रमेयमवधार्यते, यावता समानतन्त्रे
II.264/KSV पृथिव्यानीनिनव द्रव्याणि(?') रूपादयश्चतुर्विंशतिगुणाः, उत्क्षेपणादि पंचकर्माणि, परापरभेदेन द्विविधं सामान्यं, नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः, एकः समवाय इति षड्पदार्थाननुक्रम्य तदवान्तरविशेषैरानन्त्यं प्रमेयस्योपवर्णितमस्ति ॥ § 7127

उच्यते—किं पुनरिह प्रमेयं विवक्षितमिति तत्सामान्यलक्षणं ताव परीक्ष्यताम् ॥ § 7128

### प्रमेयसामान्यलक्षणम्

आह—सूक्तमिदं—कस्यापि कर्णे पृष्टः कटिं चालयतीति । द्वादशविधत्वमाक्षिप्तं न प्रतिसमाधत्ते भवान् । प्रयेयस्य सामान्यलक्षणं तु *परीक्षते

१२ ] मध्याप्यते—क, मुपपद्यते— nyāma-wit_kha
१२ ] सामान्य— nyāma-wit_kha
२०--२१ ] परीक्ष्यत एव—क, परीक्षत एव— nyāma-wit_kha

७ द ] पद्यते—गम्यते इति पदं—मोक्षः ॥
२० * ] भवान् परीक्षते—इत्यन्वयः ॥

इति ॥ § 7129

उच्यते—अलं केलिना ! एतदेवात्र प्रतिसमाधानं भवति । न हि प्रमाणविषयमात्रमिह प्रमेयमभिमतम्, एवंविधस्य प्रसिद्धत्वेन लक्षणानर्हत्वात् । प्रमाण एवं ज्ञाते सति तद्विषयोऽर्थः प्रमेयमिति प्रज्ञायत एव । किं तेन लक्षितेन ? तस्मात् विशिष्टमिह प्रमेयं लक्ष्यते ॥ § 7130

*ज्ञातं सम्यगतम्यग्वा यन्मोक्षाय भवाय वा ।
तत्प्रमेयमिहाभीष्टं न प्रमाणार्थमात्रकम् ॥ § 7132

तच्च द्वादशविधमेव भवति, न न्यूनमधिकं वेति समाहितमित्थं भवति विभागाक्षेपः ॥ § 7133

## द्वादशानां विशिष्टप्रमेयत्वम्

कुतः पुनरेषः प्रमेयविशेषो लभ्यते ? निःश्रेयसार्थत्वाच्छास्त्रस्य । प्रमेयज्ञानस्य प्रमाणज्ञानवदन्यज्ञानोपयोगितामन्तरेण स्वत एव मिथ्याज्ञान- II.265/KSV
निवृत्त्यादिक्रमेण अपवर्गहेतुत्वप्रतिज्ञानात् । तथाविधस्य चापवर्गोपायत्वस्यात्मादिष्वेव भावात् ॥ § 7134

## आत्मादीनां प्रमेयत्वोपपादनम्

भवत्वेवम् ! सूत्रस्य तु कथमीदृशप्रमेयविशेषसमर्थने सामर्थ्यम् ? विशेषनिर्देशात्तु, शब्दप्रयोगसामर्थ्याच्च ॥ § 7135

सत्यम्, आकाशकालदिगादि प्रमाणविषयत्वात् प्रमेयं भवति । तत्तु न सप्रयोजनं आत्मशरीरेन्द्रियार्थमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्, अस्यैव निःश्रेयसहेतुत्वादित्याशयः ॥ § 7136

तदित्थमेष तुशब्दः निःश्रेयसानङ्गभूतप्रमेयान्तरपरिहारद्वारेणविशिष्टमात्मादि प्रमेयमिह सूचयति ॥ § 7137

तद्द्वादशविधत्वेऽपि हेयोपादेयभेदतः ।
द्विधोच्यते मुमुक्षूणां तथैव ध्यानसिद्धये ॥ § 7139

१० ] यस्य— nyāma-wit_ka; nyāma-wit_kha; nyāma-wit_ca
१४ ] विशेषात्तु— nyāma-wit_kha
१८ ] ङ्ग— nyāma-wit_kha
२१ ] सुसूक्ष्माणां— nyāma-wit_kha

५ *] सम्यक् ज्ञातं मोक्षाय, असम्यग्वा ज्ञातं भवाय वा—इत्यन्वयः ॥
२१ थैव ] ध्यानं—चिन्तनम् । हेयोपादेययोश्चिन्तनं हानाय, उपादानाय च ॥

तत्र देहादि दुःखान्तं हेयमेव व्यवस्थितम् ।
उपादेयोऽपवर्गस्तु, द्विधाऽवस्थितिरात्मनः ॥§ 7141

सुखदुःखादिभोक्तृत्वस्वभावो हेय एव सः ।
उपादेयस्तु भोगादिव्यवहारपराङ्मुखः ॥§ 7143

## आत्मादिज्ञानस्य मुमुक्षुसंपाद्यत्वम्

आत्मनो हि भोगाधिष्ठानं शरीरम् । भोगसाधनानीन्द्रियाणि । भोक्तव्या
II.266/KSV इन्द्रियार्थाः । भोगकारणं मनः । प्रवृत्तिः पुण्यपापात्मिका । रागादयश्च दोषाः शरीरादिजन्महेतवः । एतत्कृतश्च शरीरादियोगवियोगाभ्यासः प्रेत्यभावः । *एतत्कृतमेव च संसारे सुखदुःखरूपं फलं । तच्च विविधमेव । *विवेकवतः सर्वं दुःखमेवेति । एवं शरीरादि दुःखान्तं हेयतयैव भावनीयम् । एददनुपयुक्तश्चात्माऽपि तथैव । एतद्वियुक्तस्त्वात्मैवापवर्ग उच्यते । स चोपादेयतया भावनोयैत्यत एवात्मपदसंगृहीतस्याप्यस्य पुनर्निर्देशः, स र्हि परमः पुरुषार्थ इति ॥ § 7144

## तत्त्वज्ञानस्य मोक्षहेतुत्वोपपापनम्

एवमिदं द्वादशविधं प्रमेयं हेयोपादेयतया तत्त्वज्ञानेन भावयन अभ्यासात् तद्विषयविपरीतग्रहात्मकं मिथ्याज्ञानं क्षिणोति ॥ § 7145

तत्त्वज्ञानोदयेनास्य मिथ्याज्ञानेऽपबाधिते ।
रागद्वेषादयो दोषाः तन्मूलात्क्षयमाप्नुयुः ॥§ 7147

क्षीणदोषस्य नोदेति प्रवृत्तिः पुण्यपापिका ।
तदभावान्नतत्कार्यं शरिराद्युपजायते ॥§ 7149

---

६ ] गा— nyāma-wit__kha
७ ] द्वि— nyāma-wit__kha
८ ] सुखं दुःखं वेति— nyāma-wit__kha
९ ] ष— nyāma-wit__gha
९ ] मु— nyāma-wit__gha
१२ ] भेदं— nyāma-wit__kha
१४ ] ज्ञानेन ते— nyāma-wit__kha

---

७ *] एतत्कृतं—जननमरणावृत्तिरूपप्रेत्यभावकृतम् ॥

८ *] परिणामतापसंस्कारदुःखैः गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः इति योगसूत्रम् २-७६ ॥

९ र्ग] यद्यपि तदत्यन्तविमोक्षोऽपवर्गः न्या-सू इति आत्यन्तिकदुःखनिवृत्तिरेव मोक्ष इत्युक्तम् । परन्तु दुःखास्यन्ताभावस्य स्वतः पुरुषार्थत्वासंभवात् तद्विशिष्ट आत्मैव परमपुरुषार्थः । सूत्रं तु प्राप्ताप्राप्तविवेकन्यायेन प्रवृत्तम् ॥

*अशरीरश्च नैवात्मा स्पृश्यते दुःखडम्बरैः ।
अशेषदुःखोपरमः सोऽपवर्गोऽभिधीयते ॥§ 7151

II.267/KSV

तदित्थमेव द्वादशविधं प्रमेयं अतिगहनसंसारमारवस्थलप्रभवभीमसन्तापनिर्वापणमहाह्रदतामुपयातीति तदेवोप देशार्हमिति सिद्धम् ॥ § 7152

## आत्मविचारोपक्षेपः

विरक्तसंकथास्तावदसतां तापसोदिताः ।
आत्मैव ह्यस्ति नास्तीति कथं न परिचिन्त्यते ॥§ 7154

## शरीरात्मवादोपक्षेपः

तथा च लोकायतिकाः परलोकापवादिनः ।
चैतन्यखचितात् कायात् नात्माऽन्योऽस्तीति मन्वते ॥§ 7156

न च तावदात्मा प्रत्यक्षतो गृह्यते, घटादिवत् बाह्येन्द्रियेण, *सुखादियन्मनसा वा परिच्छेत्तुमशक्यत्वात् । अनुमानं तु न प्रमाणमेव चार्वाकाणाम् । न चात्मसिद्धौ किंचन लिङ्गमस्ति । ज्ञानादियोगस्तु भूतानामेव परिणामविशेषोपपादितशक्त्यतिशयजुषां भविष्यति । यथा गुडपिष्टादयः प्रागसतीमपि मदशक्तिं आसादितसुराकारपरिणामाः प्रपद्यन्ते, तथा मृदाद्यवस्थायां अचेतनान्यपि भूतानि शरीराकारपरिणतानि चैतन्यं स्रक्ष्यन्ति । कालान्तरे च व्याध्यादिना परिणामविशेषमवजहन्ति तान्येव चैतन्यशून्यतामुपयास्यन्ति । चैतन्यवत्त्वानपायाच्च तावन्तं कालं तान्येव स्मृत्यनुसन्धानादिव्यवहारनिर्वहणनिपुणतामनुभविष्यन्ति इति किमनुमानक आत्मा स्यात् ? § 7157

II.268/KSV

आगमास्तु मनोरथाधिरूढप्रामाण्याः कथमात्मानमवबोधयितुं शक्ष्यन्ति । अयमपि चागमोऽस्त्येव विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञाऽस्ति इति । तत् आत्मनो नित्यस्य परलोकिनोऽभावात् कृतमेताभिः अपार्थकपरिश्रमकरिणीभिः परलोककथाभिः ॥ § 7158

---

३ ] तीव्र— nyāma-wit__kha
४ ] वा— nyāma-wit__kha
५ ] दसंजातफलोचिताः— nyāma-wit__kha
१४--१५ ] न्ते— nyāma-wit__kha
१५ ] वि— nyāma-wit__kha
१६ ] त्वा—ख, तत्त्वा— nyāma-wit__gha
१८ ] क्यन्ते— nyāma-wit__kha

---

१ *] अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः इति श्रुतिः ॥
३ संसार ] मारवं—मरुसंबन्धि ॥
९ *] अहं सुखी इत्यत्रापि शरीरमेव भासत इत्याशयः ॥

## आत्मनः अहमर्थत्वम्

तत्र प्रत्यक्षमात्मानमौपवर्षाः प्रपेदिरे ।
अहंप्रत्ययगम्यत्वात् सयूथ्या अपि केचन ॥§ 7160

अस्त्ययमहंप्रत्ययः कश्चित् शरीरसमानाधिकरणः स्थूलोऽहम् क्षामोऽहं इति । कश्चित् ज्ञातृसमानाधिकरणः—जानाम्यहम् स्मराम्यहम् इति । तत्र स्थूलादिसमानाधिकरणस्तावदास्तामहं प्रत्ययः ॥ § 7161

ज्ञानेच्छासुखदुःखादिसामानाधिकरण्यभाक् ।
यस्त्वहंप्रत्ययस्तत्र नात्मनोऽन्यः प्रकाशते ॥§ 7163

न हि ज्ञानसुखेच्छादियोगः कायेन्द्रियादिषु ।
न च ज्ञानादिशून्येऽर्थे जानामीत्यादिसंविदः ॥§ 7165

II.269/KSV

ज्ञानमात्रावभासोऽपि वारितः प्रत्यभिज्ञया ।
ज्ञातवानहमेवादौ अहमेवाद्य वेद्मि च ॥§ 7167

नोत्तरस्य च पूर्वस्य न ज्ञानक्षणयोर्द्वयोः ।
न सन्तानस्य चैतस्मिन् प्रत्ययेऽस्त्यवभासनम् ॥§ 7169

नोत्तरोज्ञानवान् पूर्वं पूर्वो जानाति नाधुना ।
न द्वयोर्द्वयमप्यस्ति सन्तानस्तु न वास्तवः ॥§ 7171

अवस्तुत्वाच्च नासौ पूर्वं किंचिज्ज्ञातवान्, न चाद्य किंचिज्ज्ञानातीति । तस्मादहमेव ह्यो ज्ञातवान्, अहमेवाद्य जानामीत्यस्मिन् प्रत्यये ह्यश्चाद्य चानुवर्तमानो ज्ञाता प्रतिभातीति गम्यते ॥ § 7172

## शरीरं न अहमर्थः

२ ] स्त्व— nyāma-wit__kha
३ ] कृशोऽह— nyāma-wit__kha
८ ] कर्मे— nyāma-wit__kha
११ ] ज्ञातव्यमह— nyāma-wit__kha

१ र्षाः ] उपवर्षः पूर्वोत्तरमीमांसावृत्तिकारः । भगवतोपवर्षेण प्रथमे तन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्यामः इत्युद्धारः कृतः इति शाङ्करब्रह्मसूत्रभाष्यम् ३-३-५३ ॥

८ न्द्रियादिषु ] प्रत्येकसमुदायादिविकल्पैरसंभवादिति हेतुः ॥

११ च ] एतस्मिन् प्रत्यये प्रत्यभिज्ञायां न केवलं पूर्वज्ञानक्षणस्य, न केवलं उत्तरस्य तस्य, न द्वयोः ज्ञानक्षणयोस्सन्तानस्य च अवभासनं अस्ति । एतदेवोपपादयति अनन्तरवाक्यैः । न वास्तवः, अतिरिक्तसन्तानानङ्गीकारादिति हेतुः ॥

न चासौ कायः, बालाद्यवस्थाभेदेन नानात्वात्, अचेतनत्वाच्च । एवंच प्रत्यभिज्ञाऽहंप्रत्ययग्राह्ये ज्ञातरि सिद्धे, सोऽयं स्थूलादिसमानाधिकरणः अहंप्रत्ययः तदभेदोपचारेण शरीरे वर्तमानो मिथ्येति कल्पयिष्यते । न पुनरेतदनुरोधेन ज्ञानादिसमानाधिकरणाहंप्रत्ययमिथ्यात्वकल्पनं युक्तं, अबाधितत्वात् । न खल्वहं जानामीति प्रत्ययः केन चिदल्पीयसा दोष-कारणेन कलुषीकर्तुं पार्यते । तत् अस्यात्मैव मुख्यो विषयः, तदतिरिक्तं II.270/KSV
वस्तु भाक्त इति । तस्मादहंप्रत्ययगम्यत्वादात्मा प्रत्यक्ष इति ॥ § 7173

## आत्मनः अहंप्रतीतिविषयत्वे विवादः

अत्र वदन्ति—शब्दमात्रोच्चारणमेतत् अहं जानामि अहमिच्छामि अहं-सुखी अहं दुःखी इति । न तु ज्ञानादिस्वरूपातिरिक्तः तदाश्रयः कश्चिदेतासु बुद्धिषु परिस्फुरतीति । कथमेकस्यामेव संविदि कर्ता च कर्म चात्मा भवेत् ॥ § 7174

*ग्राह्यग्राहकतैकस्य ज्ञानस्यापाकरिष्यते ।
त्वयाऽपि नेष्यते चेति तथा नास्त्यात्मनोऽपि सा ॥ § 7176

## विज्ञानात्मनः ज्ञातृत्वासंभवः

यच्च अवस्थाकृतं भेदमबलम्ब्य ग्राह्यग्राहकभावसमर्थनमेकस्यैवात्मनः कृतं किल द्रव्यादिरूपमात्मनो ग्राह्यं, ज्ञातृरूपं च ग्राहकमिति तदनुपपन्न-म्—द्रव्यादिरूपे ग्राह्ये न ज्ञातरि ग्राह्यता साधिता स्यात् । आत्मवर्तिनोऽपि द्रव्यादिरूपस्य घटादितुल्यत्वात् ॥ § 7177

## व्यवसायानुव्यवसायवैलक्षण्यविमर्शः

---

१ ] व— nyāma-wit_kha
१३ ] सत्या— nyāma-wit_kha
१५ ] स्वरूप— nyāma-wit_kha
१६ ] स्वरूपे— nyāma-wit_kha
१६ ] ग्राहकता— nyāma-wit_kha

---

२ एवंच ] प्रत्यभिज्ञाऽहंप्रत्ययः—प्रत्यभिज्ञारूपः अहंप्रत्ययः ॥
३ मानो ] मिथ्येति—न चासौ कायः इत्याद्युक्तहेतुनेति शेषः ॥
७ स्तु ] भाक्तः विषय इत्यर्थः ॥
१२ * ] आत्मा अहंप्रत्ययगम्यश्चेत्, तत्प्रत्ययविषयोऽप्यात्मा, तादृशप्रत्ययाश्रयोऽप्यात्मेति एकस्यैव कर्तृत्वकरणत्वे विरुद्धे स्याताम् ।
१७ त्वात् ] तथा चात्मनः घटादिवत् पराक्त्वमेव स्यात् ॥

यदपि निपुणंमन्यैरुच्यते—भवतु ज्ञातृतेव ग्राहिका । तथापि विष-
II.271/KSV योपाधिकृ तोऽस्त्येव भेदः । घटावच्छिन्ना हि हि ज्ञातृता ग्राह्या, शुद्धैव तु ज्ञातृता ग्राहिकेति । घटमहं जानामि इति कोऽर्थः ? कथम् जानन्तमात्मानं जानामि इत्यस्मत्प्रयोगसंभेदाच्चैवमवकल्पते । अन्यत्र तु शुद्धविषयग्रहणमेव भवति घटोऽयं इति—तदेतदपि सरलमतिप्रतारणमात्रम्—यथा हि घटोऽयं इत्त्र घटमात्रप्रवणैव संवित्, एवं अस्मत्प्रयोगसंभेदेऽपि घटमहं जानामि इत्यत्र घटप्रवणैव बुद्धिः ॥ § 7178

इयांस्तु विशेषः—पूर्वं केवलं घटग्रहणं, अधुना तु ज्ञानविशिष्टघटावमर्श इति ॥ § 7179

## विज्ञानस्यात्मत्वे युक्तिः

ननु ! विभज्यमानायां प्रतीतौ घटोऽयं इति तावत् विषयग्रहणम् । जानामि इति तु ज्ञानग्रहणमपि भवतु नाम । अहमिति तु कस्य ग्रहणम् ? न चैकस्यामेव प्रतीतौ अंशविभागेव प्रामाण्यमप्रामाण्यं च वक्तुं युक्तम्—घटमिति जानामीति च प्रमाणं, अहमिति तु न प्रमाणमिति । तस्मादत्र ज्ञातुरवभासोऽभ्युपेयः ॥ § 7180

उक्तमत्र नैकस्यां प्रतीतावात्मनः कर्तृता कर्मता च स्यातामिति ॥ § 7181

## ग्राह्यस्यैव न ग्राहकत्वम्

यस्तूपाधिस्त्वयोन्नेतुमुपक्रान्तः, सोऽयं न घटते, घटप्रवणत्वात् । घटं अहं जानामि इति प्रतीतेर्विभज्यमानत्वेऽपि घटमिति जानामीति च अंशद्वयं विषयनिष्ठमेव जातम् । अहमिति तु अयमंशः यद्यात्मविषय इष्यते, तर्हि स एव तु शुद्धोऽवशिष्यते ग्राह्यो ग्राहकश्चेति । नावस्थाकृतस्तद्भेदः
II.272/KSV समर्थितः स्यात् । भेदाभावेन चैकस्यैव—ग्राह्यग्राहकभाव मनुपाधिकमभिदधता विज्ञानवादवर्त्म संश्रितं स्यात् । तस्मादहंप्रत्ययस्य ग्राहकाद्भिन्नं ग्राह्यं अभिधित्सता शरीरमेव ग्राह्यमभ्युपगन्तव्यम् । ज्ञानसामानाधिकरण्यानुपपत्तेश्च वरमस्य मिथ्यात्वम्, अस्तु नामात्मावलम्बनता ॥ § 7182

अत एव कृशश्यामसामानाधिकरण्यधीः ।
शरीरालम्बनत्वस्य साक्षिणी न विरोत्स्यते ॥ § 7184

---

३--४ ] अ— nyāma-wit_kha
५ ] तथा— nyāma-wit_kha
६--७ ] बुद्धिः— nyāma-wit_kha
२३ ] ना— nyāma-wit_kha

---

१ थापि ] विषयगतः उपाधिः । स चानुपदं प्रदर्शितः ॥

२० स्यात् ] न ह्यात्मनः घटावच्छिन्नत्वं, तदनवच्छिन्नत्वं च कदापि वक्तुं शक्यम् ॥

## अहमर्थस्य शरीरातिरिक्तत्वं नानुभवसिद्धम्

ननु ! ममेदं शरीरं इति भेदप्रतिभासात् कथमहंप्रत्ययः शरीरालम्बनः स्यात् ? भोः साधो ! नैवंविधेषु विश्वसितुमर्हति । ममात्मा इत्यपि भेदप्रत्ययदर्शनात् ॥ § 7185

अथावस्थाभेदादिना यथातथा तत्समर्थनमास्थीयते; तदिह शरीरालम्बनत्वेऽपि सैव सरणिरनुसरिष्यते । तस्मात् अहंप्रत्ययः शरीरालम्बन एवेति, स च ज्ञानादिसमानाधिकरणो मिथ्या, स्थूलादिसमानाधिकरणस्तु सम्यगिति ॥ § 7186

## मम शरीरम् इति प्रतितेर्मिथ्यात्वम्

ये तु मम शरीरं ममात्मा इति बुद्धी,—ते द्वे अपि मिथ्या, ममप्रत्ययस्याहंप्रत्ययवत् आत्मानालम्बनत्वात्, शरीरे च भेदानुपपत्तेः ॥ § 7187

मम पाणिर्भुजो वेति भिन्नत्वादुपपद्यते ।
शरीरं तु ममेत्येषा कल्पना राहुमूर्धवत् ॥§ 7189

तस्मादहंकारममकारयोः द्वयोरप्यविषयत्वात् आत्मा परोक्ष इति सिद्धम् ॥ § 7190

II.273/KSV

## आत्मनः स्वयंप्रकाशत्वपक्षः

अपरे पुनराहुः—(?) ग्राह्यग्राहकरूपोभयसंपत्तेरेकस्य कर्मत्वं कर्तृत्वं च युगपदात्मनो मन्यामहे; किन्तु चितिशक्तिस्वभावमपरसाधनमपरोक्षमात्मतत्त्वं प्रचक्ष्महे । न ह्यात्माऽन्यजन्येन ज्ञानेन घटादिरिव प्रकाश्यते, अपि तु स्वत एव प्रकाश्यते । चेतनत्वमपि तस्य नैसर्गिकमेव, न करणोपनीतचितियोगनिबन्धनम् । चिद्योगाद्धि चेतनत्वे घटादावपि तत्प्रसङ्गः । न चास्ति नियमहेतुः, अनेककारकनिकरपरिघटिततनुरपि चितिरात्मानमेव ज्ञातारं करोति, न कारकान्तरमिति । तस्मात् स्वत एव चित्स्वभावता तस्य भद्रिका । तदिदमात्मप्रकाशनं संविद्वदवगन्तव्यम् । यदाहुः—संवित संवित्तयैव संवेद्यते, न संवेद्यतयेति । नास्याः कर्मभावो विद्यत इत्यर्थः । एवमात्मा ग्राहकतयैव प्रकाश्यते, न ग्राह्यतयेति तद्वैरुप्यस्य चोदनमनुपपन्नमिति ॥
§ 7191

२ ] सि— nyāma-wit__kha; nyāma-wit__ca

२३ ] चिन्त— nyāma-wit__ca

१२ त्वात् ] आत्मनः—इति शेषः ॥
१५ भाव ] अपरसाधनं—साधनान्तरानधीनप्रकाशम् ॥
१८ पि ] अस्वयंप्रकाशस्यात्मत्वे चैतन्याश्रयत्वे च घटस्यापि चैतन्याश्रयत्वमस्त्वित्यापादने नोत्तरं वक्तुं शक्यमित्यर्थः ॥

## आत्मनः स्वयंप्रकाशत्वासंभवः

एतदपि न चतुरश्रम्—अपरसाधनमिति कोऽर्थः ? उपायान्तरनिरपेक्षमेव प्रकाशमानमात्मतत्त्वमास्त इति; तदयुक्तम्—अकरणिकायाः प्रतीतेरदृष्टत्वात् । अपूर्वं च तत् किमपि यथाभ्युपगतप्रमाणातिरिक्तमेव प्रमाणं स्यात् । न च नियमकारणमत्र पश्यामः, तथा प्रकाशमानः स्व एवात्मा प्रकाशते, न परात्मेति । प्रकाशमानत्वेन चात्मनो नूनमनुभूयमानता वाच्या । अनुभूयमानता च अनुभवकर्मत्वम्, इतरथाऽस्याः प्रत्यक्षतैव न स्यात् ॥
§ 7192

II.274/KSV

## आत्मनः अपरोक्षत्वनिराकरणम्

अथोच्यते—न प्रत्यक्ष आत्मा, किन्त्वपरोक्ष इति; नेदमर्थान्तरवचनम् । शिशव एवं प्रतार्यन्ते, न प्रामाणिकाः । प्रत्यक्षश्च न भवति, अपरोक्षश्च भवतीति चित्रम् ॥ § 7193

प्रत्यक्षज्ञानकर्मत्वमस्य नास्तीति चेत्, तर्ह्यपरोक्षत्वमपि मा भूत् । प्रकाशत्वादपरोक्षत्वमिति चेत्—न—दीपादेः प्रकाशस्याप्यन्धादिभिरगृह्यमाणस्य प्रकाशमानत्वायोगात् । तस्मात् प्रकाशते चेदात्मा नूनमनुभूयेतापीति बलात् कर्मत्वमपरिहार्यम् । अतश्च तदवस्थैव द्वैरूप्यचोदना ॥ § 7194

## ज्ञानमपि न स्वयंप्रकाशम्

प्रकाशज्ञानपक्षं च प्रतिक्षेप्स्यामः । स चात्मन्यपि तुल्यो न्यायः । कल्पनाद्वैरूप्यं च भवतां, आत्मा च स्वप्रकाशः, संविच्च स्वप्रकाशेति । न च निपुणमतिरपि विवेकमीदृशमुपदर्शयितुं शक्नोति भवान्—इयं स्वप्रकाशा फलरूपा संवित्, अयं स्वप्रकाशो ज्ञातृरूप आत्मेति । चित्रं चेदं यत्तयोः द्वयोः प्रकाशयोरन्तराले तद्व्यापारः परोक्षः ज्ञानाख्यः संपन्नः इति ॥ § 7195

## अहंप्रतीतेः शरीरविषयत्वम्

ननु घटमहं जानामि इत्यत्र त्रयप्रतिभासः—घटं इति विषयः प्रकाशते, अहं इत्यात्मा, जानामि इति संविदिति ॥ § 7196

II.275/KSV

उक्तमत्र—घटं जानामि इति ज्ञानविशेषणविषयप्रतिभासः । अहं इति तु शरीरे ज्ञातृत्वभ्रमः, एकस्यात्मनः ग्राह्यग्राहकभावानुपपत्तेरिति ॥ § 7197

---

५ ] पूर्वं— nyāma-wit_ca
११ ] क्ष— nyāma-wit_kha
१७ ] श— nyāma-wit_kha

---

५ रात्मेति ] स्वं प्रतीति शेषः ॥
१८ संवित् ] संवित्—आत्मधर्मभूता ॥
१४ द्वैरूप्य ] द्वैरूप्यं—कर्तृत्वं, कर्मत्वं च ॥

### आत्मनः चैतन्यरूपत्वासंभवः

यदपि स्वतश्चेतनस्वभावत्वमात्मनः कल्प्यते—तदपि न सोपपत्तिकम् ॥
§ 7198

सचेतनश्चिता योगात् तद्योगेन विना जडः ।
नार्थावभासादन्यद्धि चैतन्यं नाम मन्महे ॥§ 7200

### अत्मनः ज्ञानरूपत्वे दोषः

यदि च स्वत एवार्थावभाससामर्थ्यमात्मनः—तत् किमिन्द्रियैः प्रयोजनम् ? मनष्षष्ठैरिन्द्रियनिरपेक्षपदार्थपरिच्छेदसामर्थ्यपक्षे च सर्वसर्वज्ञतापत्तिः । अतोऽवश्यं ज्ञानसमवायिनिबन्धनमेवात्मनश्चेतयितृत्वम् ॥ § 7201

न च घटादिभिरतिप्रसङ्गः आशङ्कनीयः । पदार्थस्वभावोपनतस्यैव क्रियावैचित्र्यस्य सर्वलोकप्रसिद्धत्वात् । *चेतनादिक्रियाः कर्मसमवायिन्यो न भवन्ति । गमनादिक्रियास्तु कर्तृसमवायिन्यः । तदियं ज्ञानक्रियाऽपि कर्तृसमवायिन्येव । न च वस्तुशक्तिरनुयोज्या भवति ॥ § 7202

न जडत्वाविशेषेऽपि कर्मादौ समवैति चित् ।
न द्रव्यत्वाविशेषेऽपि गन्धः स्पृशति पावकम् ॥§ 7204

तस्मान्न प्रत्यक्ष आत्मा, नापि स्वतश्चेतयितेति स्थितम् ॥ § 7205
II.276/KSV

### आत्मनः मानसप्रत्यक्षगम्यत्वपक्षः

स्वयूथ्यास्तु केचिदाचक्षते—यद्येकस्य कर्तृत्वं कर्मत्वं चानुपपन्नमित्यप्रत्यक्ष आत्मा इष्यते ? तदयमनुमानेनापि कथं ग्रहीष्यते ? § 7206

आत्मानमात्मनाऽऽत्मैव लिङ्गादनुमिनोति हि ।
तत्र नूनमुपेतव्या कर्तृता कर्मताऽस्य च ॥§ 7208

तत्रानुमानज्ञानस्य यथाऽऽत्मा याति कर्मताम् ।
तथाऽहंप्रत्ययस्यैषः प्रत्यक्षस्यापि गच्छतु ॥§ 7210

---

५--६ ] स— nyāma-wit__kha
१०--११ ] न्य एव— nyāma-wit__kha
१२ ] चे— nyāma-wit__kha
१५ ] दे— nyāma-wit__kha

---

५ नः ] आत्मनः ज्ञानरूपत्वात्, ज्ञानस्य च सविषयत्वनियमात् ॥
९ * ] चेतयते इति क्रियाः ॥
१२ त्वाविशेषेऽपि ] कर्म—घटादिः ॥

देहादिव्यतिरिक्तश्च यथा लिङ्गेन गम्यते ।
तथाऽहंप्रत्ययेनापि गम्यतां तद्विलक्षणः ॥§ 7212

## अरूपस्याप्यात्मनः प्रत्यक्षत्वम्

ननु ! आत्मनः किं रूपं, यत् प्रत्यक्षेण साक्षात्क्रियते ?—यद्येवं सुखादेरपि किं रूपं, यन्मानसप्रत्यक्षसमधिगम्यमिष्यते ॥ § 7213

ननु ! आनन्दादिस्वभावं प्रसिद्धमेव सुखादेः; तर्हि तदाधारत्वमात्मनोऽपि रूपमवगच्छतु भवान् ॥ § 7214

सुखादि चेत्यमानं हि स्वतन्त्रं नानुभूयते ।
मतुबर्थानुवेधात्तु सिद्धं ग्रहणमात्मनः ॥§ 7216

इदं सुखमिति ज्ञानं दृश्यते न घटादिवत् ।
अहं सुखीति तु ज्ञप्तिः आत्मनोऽपि प्रकाशिका ॥§ 7218

II.277/KSV

## आत्मनः प्रत्यक्षत्वमन्तरा सुखादेः प्रत्यक्षं न संभवति

अपि च— § 7219

ज्ञातृज्ञानविशिष्टार्थग्रहणं किल भाष्यकृत् ।
स्वयं प्रादीदृशत्तच्च किं वा युक्तमुपेक्षितुम् ॥§ 7221

विशेष्यबुद्धिमिच्छन्ति नागृहीतविशेषणाम् ।
पूर्वं चाननुभूतस्य स्मरणं नावकल्पते ॥§ 7223

न चानुमानतः पूर्वं ज्ञात्वाऽऽत्मानं विशेषणम् ।
तद्विशिष्टार्थबुद्धिः स्यात् क्रमस्यानवधारणात् ॥§ 7225

तस्मात् प्रत्यक्ष आत्मा ॥ § 7226

## आत्मनः प्रत्यक्षत्वाभावे प्रतिसन्धानासंभवः

३ ] न च— nyāma-wit_kha
१७ ] स्मरणा— nyāma-wit_kha

३ रूपं ] रूपं—आकारः ॥
१२ कृत् ] न्यायभाष्यम् ३-१-१५ ॥
१४ न्ति ] न इच्छन्ति—इत्यन्वयः ॥

सामानाधिकरण्यं च स्मरणानुभवादिषु ।
अनुसन्धीयमानं यद्दृश्यते तत्कथं भवेत् ॥§ 7228

पूर्वं अहममुमर्थमनुभूतवान्, अहमेवाद्य पुनरनुभवामि इति तुल्यविषयं तावत् । तुल्यकर्तृकताऽपि तत्र प्रकाशते, इतरथा ह्यनुमातुमप्यात्मा न शक्येत ॥ § 7229

ज्ञानेच्छासुखदुःखादि किलेदं लिङ्गमात्मनः ।
एकाश्रयतया ज्ञातं अनुसन्धातृबोधकम् ॥§ 7231

तथात्वेन च तज्ज्ञानं आश्रयज्ञानपूर्वकम् ।
ज्ञाते तत्राफलं लिङ्गं अज्ञाते तु न लिङ्गता ॥§ 7233

II.278/KSV

तस्मात् प्रत्यक्ष एवात्मा वरमभ्युपगम्यताम् ।
*वृद्धागमानुसारेण संविदालोकनेन च ॥§ 7235

## आत्मनः अनुमेयत्वपक्षः

अथवाऽभिनिवेशेन किमनेन प्रयोजनम् ।
अनुमेयत्वमेवास्तु लिङ्गेनेच्छादिनाऽऽत्मनः ॥§ 7237

तदाह सूत्रकारः— § 7238

### इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम् ॥ १-१-१० ॥

§ 7239

इच्छा नाम तावदित्थमुपजायते—यज्जातीयमर्थमु पयुंजानः पुरुषः पुरा सुखमनुभूतवान्, पुनः कालान्तरे तज्जातीयमर्थमुपलभ्य सुखसाधन तामनुस्मृत्य तदादातुमिच्छति । सेयमनेन क्रमेण समुपजायमानेच्छा पूर्वापरानुसन्धानसमर्थमाश्रयमनुमापयति, कार्यस्य निराधारस्यानुपपत्तेः । आश्रयमात्रप्रतीतौ चायमन्वयव्यतिरेकवानेव हेतुर्भवति । इच्छा धर्मिणी — आश्रितेति साध्यो धर्मः—कार्यत्वात्, घटादिवत्; गुणत्वात्, रूपादिवत् इति

५ ] क्यते— nyāma-wit_kha
१७ ] मित्थमु— nyāma-wit_kha
१८ ] मु— nyāma-wit_kha
२२ ] इ— nyāma-wit_kha

११ *] [In the print edition there is a footnote reference, but no corresponding note.]
२१ र्मिणी ] धर्मिणी—पक्षः ॥

वा हेतुर्वक्तव्यः ॥ § 7240

गुणत्वं चेच्छादीनां अचाक्षुषप्रत्यक्षत्वादिना रसादिवद्दर्शितमाचार्यैः ॥ § 7241

## आत्मानुमानप्रकारः

एवमन्वयव्यतिरेकवताऽमुना हेतुना अधिष्ठानमात्रेऽनुमिते, तदधिष्ठानत्वे II.279/KSV च देहेन्द्रियादौ प्रसक्ते पूर्वानुभूतसुखसाधनत्वानुसन्धानसव्य पेक्षतदुत्पादन-पर्यालोचनया तत्कार्यसमानकर्तृकत्वावगमात् शरीरादिप्रतिषेधे सति, स एव केवलव्यतिरेकिभवने तु विशिष्टमाश्रयमनुमापयति । इच्छा—शरीरादिविल-क्षणाश्रया—शरीरादिषु बाधकोपपत्तौ सत्यां कार्यत्वात् । अत्र च साधर्म्य-दृष्टान्तो न संभवतीति वेधर्म्यदृष्टान्तः प्रदर्श्यते । स च घट एव । योऽभूत् साधर्म्यदृष्टान्तः कार्यत्वे निर्विशेषणेऽपि घटः, स एव वैधर्म्यदृष्टान्तः सविशेषणे । यत्र विलक्षणाश्रितत्वं नास्ति, तत्र सविशेषणं कार्यत्वमपि नास्ति, यथा घटादाविति न न शक्यते वक्तुम् । तत्र कार्यत्वमात्रयोगेऽपि सविशेषणानां कार्यत्वाभावात् विलक्षणाश्रितत्वमपि तत्र नास्ति, भूताश्रितत्वेन प्रत्यक्षमुपल-भ्यमानत्वात् ॥ § 7242

## केवलव्यतिरेकिसमर्थनम्

ननु चान्वयदर्शनमन्तरेण केवलो व्यतिरेकः प्रतीयमानः संदिग्धो भव-ति—किं तत्साध्याभावकृतैव तस्य तस्माद्व्यावृत्तिः, उत निमित्तान्तरकृता ? इति । सन्दिग्धव्यतिरेकस्य हेतोरगमकत्वं निश्चितव्यभिचारहेतुवदिति तार्किकाः—उच्यते—स्यादेतदेवम्, यदि प्रथममनवगतान्वय एव केवल-व्यतिरेकशरणो हेतुः प्रयुज्येत । यत्र त्वन्वयव्यतिरेकवानेव हेतुः कंचन विशेषमाश्रित्य केवलव्यतिरेकितामवलम्बते, तत्र न ? सन्दिग्धव्यतिरेक-ताऽवकाशं लभते । घटो हि भूतलाश्रितत्वेन प्रत्यक्षमुपलभ्यते । तदस्य विलक्षणाश्रयविरहादेव (?)सविशेषणहेतुशून्यता जाता, निर्विशेषणावस्थायां तद्योगदर्शनादिति न सन्दिग्धो व्यतिरेकः ॥ § 7243
II.280/KSV

अथवा शरीरत्वं सामान्यमिह वैधर्म्यदृष्टान्तीकर्तव्यम् । तत्र हि सर्वात्म-ना कार्यत्वस्य शङ्काऽपि नास्ति । न च तद्विलक्षणाश्रितम्, शरीराश्रितत्वस्य प्रत्यक्षमुपलम्भादिति ॥ § 7244

---

९--१० ] का— nyāma-wit_kha
१२ ] मा— nyāma-wit_kha
१३ ] त्वं— nyāma-wit_kha
१९--२० ] य— nyāma-wit_kha
२२ ] शेष— nyāma-wit_kha
२५ ] स्पर्शो— nyāma-wit_kha

---

१० त्वे ] शरीरादिषु बाधकोत्पत्तौ सत्यां इति विशेषणरहिते कार्यत्वे ॥
२० न ] विशेष—प्रयोगविशेषम् ॥
२५ ना ] शरीरस्य सर्वैरपि अनित्यत्वाङ्गीकारात् ॥

## इच्छालिङ्गकात्मानुमानम्

तदियमिच्छा प्रथमपदार्थदर्शनादिकार्यसमानकर्तृकतयाऽवगम्यमाना शरीरादिविलक्षणमाश्रयमवगमयति, सविशेषणात्कार्यत्वादिति स्थितम् । यश्च स विलक्षण आश्रयः तत्राऽऽत्मसंज्ञाऽगमिकी ॥ § 7245

## द्वेषादिलिङ्गकात्मानुमानम्

एवमेव द्वेषादेरात्मलिङ्गता वक्तव्या । यज्जातीयस्यार्थस्य सन्निधानादुःखमनुभूतवान् पुरुषः, तज्जातीयमर्थं पुनरुपलभमानो दुःखसाधनतामनुसन्धाय तत् द्वेष्टीति । सोऽपि प्रतिसन्धातारमेकमन्तरेण नोपपद्यते ॥ § 7246

आभ्यामिच्छाद्वेषाभ्यामनन्तरं प्रयत्नः समुत्पद्यते । सोऽपि यथोक्तेन क्रमेणानुसन्धानपूर्वक एव । प्रयतमानस्य सुखदुःखे भवतः । ते अपि तथैव द्रष्टव्ये ॥ § 7247

## ज्ञानस्यात्मानुमानलिङ्गत्वेनाकथने हेतुः

ज्ञानं तु यद्यपि प्रथममनुसन्धाननिरपेक्षमपि भवति । तदपि च शक्यत एवात्मलिङ्गमभिधातुम्; तथाप्यनुसन्धानपूर्वेच्छादिकार्यप्रकर णात् II.281/KSV
निर्णयात्मकमेव ज्ञानमुदाहर्तव्यम् । तत्र हि बुभुत्साविमर्शादिपूर्वकत्वमुपलब्धमिति तदेककर्तृकत्वमुपकल्प्यते । तदेवमिच्छादीन्यात्मलिङ्गानीति स्थितम् ॥ § 7248

## अनेकहेतुकथने दोषाभावः

शास्त्रे चानेकहेतूक्तिः न दोषाय कथास्विव ।
शिष्यः कश्चित्क्वचित्किंचित् अनुस्मृत्याभिधास्यति ॥§ 7250
इति कारुणिको हि मुनिरनेकमिह हेतुमार्गमुपदिष्टवान् ॥ § 7251

## आत्मनः अनुमेयत्वेऽपि सुखाद्युपलब्धिसंभवः

२ ] ण— nyāma-wit_ca
१० ] य— nyāma-wit_kha
१२--१३ ] मु— nyāma-wit_kha

१ मिच्छा ] प्रथमेति—पूर्वसंजातेत्यर्थः । दर्शनविशेषणम् ॥
३ मिकी ] आगमिकी—वेदसिद्धा ॥
१३ ते ] कुत्रचित् जिज्ञासापूर्वकत्वात् ज्ञानस्य, इच्छैवादौ सूत्रकारैरुपात्तेत्यर्थः ॥
१५ थास्विव ] जल्पादिकथायां खलु द्वितीयहेतुप्रयोगे हेत्वन्तररूपं निग्रहस्थानम् ॥

ननु ! अत्र चोदितं—अनुसन्धातारमन्तरेण तदेतदिच्छादि कार्यं नावकल्पत इति कथं ज्ञायते । एकत्र प्रमातरि तद्दर्शनादिति यदुच्यते—तदिदमेकप्रमातृग्रहणादात्मप्रत्यक्षत्वमङ्गीकृतं स्यात् इति व्यर्थमनुमानम् । अग्रहणे तु प्रमातुरेकस्य तत्पूर्वकत्वेनेच्छादेः प्रतिबन्धाग्रहणादशक्यमनुमानमिति—परिहृतमेतत्—कार्यत्वेनैव लिङ्गत्वमिच्छादेरुपवर्णितमस्माभिः, न स्मरणादिसमानाधारतयेति ॥ § 7252

किमर्थस्तर्हि प्रतिसन्धानोपन्यासः ? शरीरादिषु तदाश्रयत्वप्रतिषेधार्थः । न त्वेवं व्याख्यातवन्तो वयम्, एकस्य प्रमातुः इच्छादिकार्याश्रयत्वदर्शनात् एकाश्रयत्वानुमानमिति । तस्मान्न दोषः ॥ § 7253

II.282/KSV

## आत्मसाधकव्याप्तिग्रहणसमर्थनम्

ननु कथं न दोषः ? शरीराद्याश्रयत्वप्रतिषेधसाधनेऽपि हेतोर्व्याप्ति ग्रहणासंभवात् । यावद्धि दर्शनस्मरणेच्छादि कार्यजातमेकप्रमातृनियततयाऽनवधारितं, तावत् कथमस्मदवस्थाभिः न शरीराद्याश्रयत्वनिषेधस्य तत्पूर्वकस्य चैकात्माश्रितत्वस्य सिद्धिः ॥ § 7254

क एवमाह—न गृहीतमेककर्तृकतया कार्यमिच्छादीति—यदि गृहीतं तर्हि वक्तव्यम्, क्व गृहीतम् ? केन वा प्रमाणेन गृहीतमिति । स्वात्मन्येवेति चेत्, सोऽयं प्रत्यक्ष आत्मा भवेत् । एवमनभ्युपगमे वा न व्याप्ति ग्रहणमिति ॥ § 7255

उच्यते—न च प्रत्यक्ष आत्मा, न च व्याप्तेरग्रहणम् । न चैव धर्म्यन्तरे व्याप्तिर्गृह्यते । किन्तु स्वसन्तान एव । तथापि न सिध्यति प्रमातृनियतानुमानम् ? कथमिव सिध्यति ? सन्तानान्तरेषु एकप्रमातृपूर्वकत्वेन प्रतिसन्धानस्य दृष्टत्वात् ॥ § 7256

## व्याप्तिग्रहणकालासंभवप्रदर्शनम्

ननु ! कोऽत्र व्याप्तिग्रहणकालः ? प्रमाणानुमानबद्धि तद्भेदेन भवितव्यम् । ततः किम् ? इदं ततो भवति । कथं स्वसन्तान एव व्याप्तिर्गृह्यताम्

४ ] ग्र— nyāma-wit_kha
८ ] न्वे— nyāma-wit_ka
१० ] श— nyāma-wit_kha
११ ] ग्राहकबु— nyāma-wit_kha
११ ] कत्र— nyāma-wit_kha
१३ ] वा— nyāma-wit_kha
२०--२१ ] प्र— nyāma-wit_kha
२१ ] स्या— nyāma-wit_ca
२२ ] किश्च— nyāma-wit_kha
२२ ] तृ— nyāma-wit_kha

७ धार्थः ] शरीरस्य क्षणिकत्वेन प्रतिसन्धानासंभवात् ॥

२२ द्धि ] तद्भेदेन—कालभेदेन ॥

? कथं वा तत्रैव प्रमातृनियमोऽनुमीयतामिति । सेयसुभयतः पाशा रज्जुः । आत्मा वा प्रत्यक्षः । व्याप्तिर्वा दुरवगमेति ॥ § 7257
II.283/KSV

## आत्मनः अप्रत्यक्षेऽपि व्याप्तिग्रहणम्

नैतदेवम्—यथा शाक्यपक्षे—सत्त्वात् क्षणिकत्वानुमाने व्याप्तिग्रहणम्, तथेहापि भविष्यति । तत्र हि यैव क्रमयौगपद्यव्यावृत्त्या सत्त्वस्य नित्येभ्यो व्यावृत्तिः, स एव क्षणिकैः अन्वय इति धर्म्यन्तरनिरपेक्षतयैव साध्येऽपि धर्मिणि प्रतिबन्धग्रहणं च अनुमानं च दर्शितम् । तद्वदिहाप्येकप्रमातृपूर्वकत्वेन प्रतिसन्धानस्य धर्म्यन्तरे यद्यपि ग्रहणं नास्ति । तथापि सन्तानान्तरभेदे यदस्यादर्शनं, तदेवैककर्तृकत्वदर्शनमिति कोऽनयोर्हेतुत्वे विशेषः ? § 7258

## व्याप्तिग्रहणासंभवाक्षेपपरिहारौ

ननु ! तत्र नित्येभ्यः क्रमयौगपद्यव्यावृत्त्या व्यावृत्तत्वं शक्यग्रहणम् । इह तु प्रमातृभेदेन प्रतिसन्धानव्यावृत्तिर्दुरवगमा । स्वसन्तानेऽपि ज्ञानक्षणाभिन्ना एव प्रमातारः । न च तेभ्यो व्यावृत्तं प्रतिसन्धानमिति ॥ § 7259

तिष्ठत्वन्वयः, व्यतिरेकमुखेनापि कष्टमिदमनुमानं वर्तते । स्वसन्ताने सन्तानान्तरवत् प्रमातृभेदाग्रहणात् । तद्भेदग्रहे हि स्वपरसन्तान विवेको न स्यात् । यद्येवम्, प्रमातृभेदग्रहणाभावात् पुनरप्यात्मा प्रत्यक्ष आयातः ॥ § 7260

मैवम्—नात्मा प्रत्यक्षः । प्रमातृभेदो हि स्वसन्ताने न गृह्यत इत्युक्तम् । न पुनस्तदैक्यं गृह्यते । अन्यद्य भेदाग्रहणम्—अन्यद्य तदैक्यग्रहणम् । भेदाग्रहणादेव च व्याप्तिसिद्धेः न कष्टमनुमानम् ॥ § 7261
II.284/KSV

ननु च स्वसन्तानेऽपि प्रमातृभेदाग्रहणं किं प्रमातुरेकत्वात्, उत ज्ञानानां कार्यकारणभावात् ? इति न निश्चीयते । ततश्च संदिग्धो व्यतिरेकः—यथा ज्ञानानां कार्यकारणभावो नास्ति, यथा च न तत्कृतोऽयं व्यवहारः, तथाऽनन्तरमेव सविस्तरं वक्ष्यामः । तस्मादिच्छादिकार्येण युक्तमेकप्रमात्रनुमानम् ॥ § 7262

३ ] क्ष— nyāma-wit_ca
६ ] स्य— nyāma-wit_kha
७ ] त्तं स— nyāma-wit_kha
८ ] मातृ— nyāma-wit_kha
११ ] स— nyāma-wit_kha
१२ ] न चै— nyāma-wit_kha
१५ ] अ— nyāma-wit_kha
१७ ] ने— nyāma-wit_kha
२२ ] व— nyāma-wit_kha

९ त्वं ] सत्त्वस्य इति शेषः ॥
१४ णाभावात् ] स्वापरसन्तनविवेकाभावादिति हेतुः ॥

## देहादेः इच्छाद्याश्रयत्वासंभवः

ननु चाश्रितमिच्छादि देह एव भविष्यति ।
भूतानामेव चैतन्यमिति प्राह बृहस्पतिः ॥§ 7264

उक्तं च मदशक्तिवद्विज्ञानमिति—उच्यते—शरीरं तावन्नेच्छादेरा श्रयः; शैशवयौवनवार्धकादिदशाभेदेन भिन्नत्वात् ॥ § 7265

तथाहि नान्यदृष्टोऽर्थः स्मर्तुमन्येन शक्यते ।
न चान्येन स्मृते तस्मिन् अन्यस्येच्छोपजायते ॥§ 7267

तेनाद्यादर्थविज्ञानात् प्रकृत्येच्छासमुद्भवात् ।
एकस्य कार्यचक्रस्य वक्तव्यः कश्चिदाश्रयः ॥§ 7269

शरीरं च बाल्याद्यवस्थाभेदेन भिन्नम् । अतस्तस्य नाश्रयो भवितुमर्हति, सन्तानान्तरवत् । यथा हि देवदत्तदृष्टेऽर्थे न यज्ञादत्तस्य स्मरणं, एवं बालशरीरानुभूते युवशरीरस्य तन्न स्यात् ॥ § 7270

## शरीरस्यैकत्वनिरासः

ननु अवस्थामात्रमेव भिन्नम्; अवस्थातृशरीरस्वरूपमभिन्नमेव प्रत्य-
II.285/KSV भिज्ञाप्रत्ययप्रामाण्यादवगम्यते । न चेयं प्रत्यभिज्ञा लूनपुनर्जात केशनखादिप्रत्यभिज्ञावदन्यथासिद्धा, विनाशस्यानुपलम्भात् । स्तम्भादौ हि क्षणभङ्गित्वप्रतिषेधः प्रत्यभिज्ञयैव करिष्यते । *सा चेहापि तादृश्येव —तदयुक्तम्—स्तम्भादौ नानात्वकारणाग्रहणात् । इह तु रूपपरिणाम सन्निवेशाद्यन्यत्वदर्शनात् सादृश्यनिबन्धनेयं भ्रान्तिरेव प्रत्यभिज्ञा । न खलु शिशुशरीरे, तरुणशरीरे, जरच्छरीरे च तुल्यमेव परिमाणाद्युपलभ्यते ॥ § 7271

## शरीरभेदसाधनम्

७ ] भृती— nyāma-wit__kha
१० ] य— nyāma-wit__kha
१२ ] न्य— nyāma-wit__kha
१४ ] सम्भवा— nyāma-wit__kha
१४ ] म्बा— nyāma-wit__kha
१६ ] म्बा— nyāma-wit__kha
१६ ] वे— nyāma-wit__kha
१८ ] णामा— nyāma-wit__kha

७ विज्ञानात्] प्रकृत्य—प्रारभ्य ॥
१५ *] सा—प्रत्यभिज्ञा । एवं च प्रत्यभिज्ञाऽप्रामाण्ये स्तम्भादेरपि स्थिरत्वं न सिद्ध्येत् ॥

आहारपरिणामाच्च देहभेदोऽवगम्यते ।
पाकजोत्पत्तिमार्गेण न जीर्येतान्नमन्यथा ॥§ 7273

न भवेत्परिपोषो हि दधिक्षीरादिभक्षणे ।
*कांचिकाद्युपयोगे च न दृश्येतास्य रक्तता ॥§ 7275

क्षीणैरवयवः कैश्चित् कैश्चिच्चाभिनवोद्गतैः ।
अभिन्न एवावयवी कथं भवितुमर्हति ॥§ 7277

तथा च केचित् पच्यमानस्य घटादेरपि प्रागवस्थाविसदृशरूपादियोगिनः पाककारणभूतवेगवदग्निद्रव्यसंयोगपर्यालोचनयैव प्रलयोदयौ कल्पितवन्तः ॥ § 7278

II.286/KSV

## पीलुपाकवादवर्णनम्

यद्यपि कन्दुकनिक्षिप्ता घटादयः तृणपर्णादिपिहितवपुषोऽपि तद्विवरप्रसृतेन नयनरश्मिना न विनष्टा इत्युपलभ्यन्ते । यद्यपि तत्संख्या, तत्परिमाणः, तत्सन्निवेशः, तद्देशाश्च पक्वा अपि दृश्यन्ते, यद्यपि पतन्तो न विभाव्यन्ते, यद्यपि च तदा तेषां कर्त्रादिकारककलापासंभवात् पुनर्घटनमघटमानमिव लक्ष्यते—तथापि तेषामनुमानेन विनाशः परिकल्प्यते । सर्वावयवेष्वन्तर्बहिश्च पाकात् पूर्वरूपादिविलक्षणगुणोपलब्धेः अन्तःप्रवेशः कृशानोरनुमीयते । तेन वेगवता वह्निद्रव्येण नोदनात् अभिघाताद्वा नूनं घटाद्यारम्भकेष्ववयवेषु क्रिया जायते, क्रियातः विभागः, विभागात् द्रव्यारम्भकसंयोगविनाशः, तद्विनाशात् द्रव्यविनाश इति ॥ § 7279

*अनुप्रवेशपक्षेऽपि सूक्ष्मविवरपरिकल्पनात् अवश्यमवयवसंयोगविघटनं घटादेरिति विनाश एव ॥ § 7280

## पीलुपाकवादे युक्त्यन्तरम्

---

१९ ] नुमीयते— nyāma-wit__ca
३ ] श्चना— nyāma-wit__kha
३ ] गेन दृश्यते तस्य रि— nyāma-wit__kha
११ ] ततो— nyāma-wit__kha
१२ ] रुद्ध— nyāma-wit__ka

---

२ था ] अन्यथा—शरीरपरिणामाभावे ॥
४ * ] अवन्तिसोमधान्याम्लकुञ्जलानि च काञ्चिके इत्यमरः ॥
७ च ] केचित्—पीलुपाकवादिनः ॥
१९ * ] पिठरपाकवादे ॥

अपि च पाकानन्तरं कन्दुकादपकृष्यमाणाः पिठारादयः केचित् स्फुटिताः, केचिद्वक्रतां गताः, केचित् सन्निवेशान्तरमेव प्रतिपन्ना दृश्यन्ते । तस्मादपि पश्यामो नश्यन्तीति ॥ § 7281

*तत्संख्यत्वादिति सर्वमनैकान्तिकं सूच्यग्रविद्धकण्ठकोणैः कुम्भादिभिः । अतः पूर्वोक्तनीत्या नष्टेषु घटादिकार्यद्रव्येषु परमाणव एव पच्यन्ते । II.287/KSV पक्वाश्च श्यामादिगुणानवजहतः रक्तादिगुणान्तरयोगमनु भवन्तः प्राणिगतसुखदुःखोपभोगसाधनभूतादृष्टप्रेर्यमाणाः परस्परं संयुज्य द्व्यणुकादिप्रक्रमेण तादृशमेव घटादिकार्यमारभन्ते । तत्रामुष्मिन् क्षणेऽमुष्य कार्यस्य प्रसवः, अमुष्य प्रलय इति प्रक्रिया न लिख्यते, ग्रन्थविस्तरभयात्, अप्रयोजनत्वाच्चेति ॥ § 7282

## आम्रफलादिष्वपि पीलुपाकः

एवं तपनातपपच्यमानेष्वाम्रादिफलेष्वेष एव न्यायः । शरीरेऽप्यौदर्येण तेजसा पच्यमानेष्वन्नपानादिषु रसमलधातुभावेन परिणाममुपगच्छत्सु प्रायेण प्रतिक्षणमुत्पादविनाशौ संभवत इति स्थैर्याभावात् कथमनुसन्धानादिकार्ययोगस्तस्येति ॥ § 7283

## पिठरपाकवादसमर्थनम्

अपरे पुनः प्रत्यक्षबलवत्तया घटादेरविनाशमेव पच्यमानस्य मन्यन्ते । सुषिरद्रव्यारम्भाच्च अन्तर्बहिश्च पाकोऽप्युपपत्स्यते । *दृश्यते च पक्वेऽपि कलशे निषिक्तानामपां बहिः शीतस्पर्शग्रहणम् । अतश्च पाककाले ज्वलदनलशिखाकलापानुप्रवेशकृतविनाशवत् तदापि शिशिरतरनीरकणनिकरानुप्रवेशकृतविनाशप्रसङ्गः । न चेदृशी प्रमाणदृष्टिः । अतः प्रकृतिसुषिरतयैव कार्यद्रव्यस्य घटादेरारम्भात् अन्तरान्तरा तेजःकणानुप्रवेशकृतपाकोपपत्तेरलं विनाशकल्पनया । *पिठरपाकपक्ष एव पेशलः ॥ § 7284

यादृगेव हि निक्षिप्तः घटः पाकाय कन्दुके ।
पाकेऽपि तादृगेवासौ उद्धृतो दृश्यते ततः ॥§ 7286

II.288/KSV

१ ] म्बा— nyāma-wit__kha
२ ] यू— nyāma-wit__kha
८ ] दृश्य— nyāma-wit__kha
१५ ] बलादपि— nyāma-wit__kha

४ *] पूर्वस्थितसंख्यासमानसंख्यावत्त्वात् ऐक्यमिति न । सूक्ष्मावयवविश्लेषस्य ज्ञातुमशक्यत्वात् । तत्रावयविनाशाङ्गीकारात् ॥

१६ *] अवयविनः सच्छिद्रत्वे युक्तिमाह—दृश्यत इत्यादि ॥

२१ *] पिठरः स्थाल्युखा कुण्डम् इत्यमरः । अवयवीति यावत् ॥

क्वचित्तु सन्निवेशान्तरदर्शनं काष्ठाद्यभिघातकृतमुपपत्स्यते । पावकसंपर्ककारित्वे तु सर्वत्र तथाभावः स्यात् । तस्मादविनष्टा एव घटादयः पच्यन्ते । सोऽयं तु घटादिन्यायः शरीरे नेष्यते ॥ § 7287

न ह्यन्नपाकः स्थैर्येऽपि तत्र कुम्भादिपाकवत् ।
चयापचययुक्तं हि शरीरमुपलभ्यते ॥§ 7289

तस्मात् परिमाणादिभेददर्शनान्नैकं शरीरं इति ज्वालादिप्रत्यभिज्ञावत्तत्प्रत्यभिज्ञेति स्थितम् ॥ § 7290

## अवस्थाऽवस्थावतोर्भेदाभेदविमर्शः

यदप्युच्यते अवस्थानामेव नानात्वम्, अवस्थाता पुनरेक एव देहाख्य इति—तदप्ययुक्तम् भेदाभेदविकल्पानुपपत्तेः । यदि शरीरादव्यतिरिता एव तदवस्थाः, तर्हि तन्नानात्वात् शरीरनानात्वप्रसङ्गः । एकस्माच्छरीरादप्यनन्यत्वात् अवस्थानामप्यन्योन्यं भेदो न स्यात् ॥ § 7291

अथ व्यतिरिक्ताः शरीरादवस्थाः, तर्हि भेदेन तदुपग्रहो दर्शयितव्यः । न चासावस्ति । गोत्वादावनुवृत्ता बुद्धिरन्यथाऽसिद्धा सती जातितद्वतोर्भेदमापादयन्ती न केनचित्प्रतिहन्यते । इह पुनरवस्थातुरेकत्वग्राहिणी बुद्धिः पूर्वनीत्या प्रमाणबाधितत्वात् भ्रान्तेति । तस्मात् शरीरस्य भिन्नत्वात् सन्तानान्तरवत् स्मृत्यनुसन्धानादिकार्ययोगो दुर्घट इति न तस्येच्छादिकार्याश्रयत्वम् ॥ § 7292

II.289/KSV

## शरीरचैतन्यवादनिरासः

इतश्च न शरीरस्य ज्ञानादियोगः, परिणामित्वात्, क्षीरवत्; रूपादिमत्त्वात्, तद्वदेव; अनेकसमूहस्वभावत्वात्, त्रिदण्डादिवत्; सान्निवेशविशिष्टाच्च भूतत्वात्, वाह्यभूतवत् ॥ § 7293

चैतन्यशून्यं शरीरं, शरीरत्वात्, भूतशरीरवत् । न शरीरधर्मश्चैतन्यम्, अयावद्द्रव्यभावित्वात् । न च संयोगादिभिः व्यभिचारः; तदुपजननापाययोर्निमित्तान्तरजन्यत्वदर्शनात्, इह च तदभावात् । विशेषगुणत्वे सतीति वा विशेषणोपादानान्न व्यभिचारः । तद्विशेषगुणत्वे हि चैतन्यस्य रूपादिवत्तदवस्थानादविनाशप्रसङ्गः ॥ § 7294

१ ] क—ख, कै—ग, के— nyāma-wit_ca
७--८ ] क—ख, कै—ग, के— nyāma-wit_ca
१०--११ ] तदा अ— nyāma-wit_kha
१२--१३ ] न— nyāma-wit_kha
१७ ] वा— nyāma-wit_kha
१९ ] कण्डुवा— nyāma-wit_kha

४ स्थैर्येऽपि ] शरीरस्येति शेषः ॥
१३ नुवृत्ता ] अनुगमकतया खलु गोत्वादिसिद्धिः ॥

## किण्वादिदृष्टान्तदौस्थ्यम्

यत्तु मदशक्तिवदित्युक्तम्—तत्रमदशक्तेर्दृष्टत्वात् अभ्युपगमः, न तु ज्ञानस्य तत्र दर्शनम् ॥ § 7295

ननु ज्ञानमपि तदन्वयव्यतिरेकानुविधायि प्रायेण दृश्यते । भूतेष्वन्नपानाद्युपयोगपुष्टेषु पट्वी चेतना भवति, तद्विपर्यये विपर्ययः । ब्राह्मीघृताद्युपयोगसंस्कृते च कुमारशरीरे पटुप्रज्ञता जायते ॥ § 7296

वर्षासु च स्वेदादिनाऽनतिदवीयसैव कालेन दध्याद्यवयवा एव चलन्तः पूतनादिक्रिमिरूपा उपलभ्यन्ते । चैतन्ये च गुरुलाघवव्यवहारोऽपि भूतातिशयसदसत्त्वकृतो भविष्यतीति भूतचैतन्यपक्ष एव युक्तियुक्तो लक्ष्यते ॥ § 7297

II.290/KSV

नैतच्चारु—चेष्टेन्द्रियार्थाश्रयः शरीरं लक्ष्यते । तत्र तदनुग्रहात् इन्द्रियानुग्रहे सति पटुकरणत्वात् विषयग्रहणमपि पटुतरमिवभवति । न च विषयग्रहणादन्यच्चैतन्यं नाम ॥ § 7298

## चेतनानामभौतिकत्वम्

एतेन ब्राह्मीघृतोपयोगोऽपि व्याख्यातः । व्यापकत्वादात्मनः सर्वत्र भावे सति भोगायतनत्वेन कदाचित् भूतावयवानां उपादानम् । अतः शुक्रशोणितादिवत् दध्यवयवान् विकृतानुपादास्यते । तथा च स्वेदजादिभेदेन बहुभेदो भूतसर्गः प्रवर्तते विचित्रकर्मपरिपाकापेक्षयेति यत्किंचिदेतत् । तस्मान्न सर्वथा भूतानां चैतन्यमिति सिद्धम् ॥ § 7299

## इन्द्रियचैतन्यवादनिरासः

नापीन्द्रियाणि यथोक्तस्य ज्ञानादेः कार्यस्याश्रयतां प्रतिपद्यन्ते— § 7300

### दर्शनस्पर्शनाभ्यामेकार्थग्रहणात् ॥ न्या-सू-३-१-१ § 7301

यमर्थमहमद्राक्षं चक्षुषा, तमेवैतर्हि स्पर्शनेन स्पृशामि, यमस्प्राक्षस्पर्शनेन, तमधुना चक्षुषा पश्यामि इति कतरदिन्द्रियमेवमनुसन्दधीत ? न

७ ] न्य— nyāma-wit_kha
८ ] वादपक्ष— nyāma-wit_kha
१० ] व— nyāma-wit_kha
११--१२ ] पाटवं न हि— nyāma-wit_kha
१४ ] व— nyāma-wit_kha
२० ] म— nyāma-wit_kha

३ पि ] तत्—शरीरम् । शरीरप्रेरणादौ शरीरान्तरानपेक्षणात् प्रायेण इति ॥
७ न्तः ] पूतना—इति क्रिकृमिसंज्ञा ॥
१८ स्य ] ज्ञानादेः कार्यस्य—ज्ञानादिरूपकार्यस्य ॥

चक्षुः, स्पर्शाविषयत्वात् । न त्वगिन्द्रियं, रूपाविषयत्वात् । तस्मादुभयविषयग्रहणसमर्थः कश्चिदनुसन्धाताऽस्तीति स इन्द्रियव्यतिरिक्तो गम्यते ॥ § 7302

II.291/KSV

## गुणगुणिभेदसिद्धिः

अमुनैव प्रसङ्गेन रूपादिव्यतिरेकिणः ।
वक्तव्या गुणिनः सिद्धिरेतद्बुद्धिनिबन्धना ॥§ 7304

रूपादिषु स्वतन्त्रेषु न ह्येषप्रत्ययो भवेत् ।
न रूपमस्य विषयः न स्पर्शो न च तद्द्वयम् ॥§ 7306

अतश्च—न गुणव्यतिरिक्तो गुणी, भेदेनाग्रहणात्—इत्यसिद्धः परोक्तो हेतुः, भेदग्रहणस्य दर्शितत्वात् । वृत्तिविकल्पादीनां तु प्रतिसमाधानं सामान्यसमर्थनावसरे कथितम्, अवयविसिद्धौ वक्ष्यते चेत्यलमवान्तरचिन्तया ॥ § 7307

## इन्द्रियाणामनात्मत्वे हेत्वन्तराणि

इतश्च नेन्द्रियाणां चैतन्यम्, करणत्वात्; वास्यादिवत् । भौतिकानि चेन्द्रियाणि वर्णयिष्यामः । तेन य एष भूतचैतन्यनिराकरणे न्यायो वर्णितः, स तेष्वपि योजनीयः ॥ § 7308

अतश्चैवं— § 7309

### इन्द्रियान्तरविकारात् ॥ न्या. सू. ३-१-१२ ॥ § 7310

आम्रे हि चक्षुषा दृष्टे रसनिष्यन्दसुन्दरे ।
रसनस्य विकारः स्यात् न दन्तोदकसंप्लवः ॥§ 7312

II.292/KSV

बहूनामिन्द्रियाणां च भिन्नाभिप्रायता भवेत् ।
तेनैकत्रैव सन्ताने नानाचेतनता भवेत् ॥§ 7314

अति तुच्छश्चायमिन्द्रियचैतन्यपक्ष इति किमत्र बहु लिख्यते ॥ § 7315

---

२२ ] य— nyāma-wit__kha
१४ ] म्भे— nyāma-wit__ca
१५ ] वि— nyāma-wit__kha

---

५ न्त्रेषु] स्वतन्त्रेषु—द्रव्यरूपेषु । यदि रूपं द्रव्यवत् स्वतन्त्रं स्यात् दृष्टमेवस्पृशामि इति न स्यात् ॥
९ रे] कथितं—तुल्यव्यायातिदेशात् ॥
१७ न] सूत्रगतविकारपदस्य भाष्योक्तं विवरणं—दन्तोदकसंप्लवः इति । दन्तोदकं—लालाजलमिति यावत् ॥

## मनश्चैतन्यवादनिरासः

ननु ! मनस्तर्हि इच्छादेरधिष्ठानं भविष्यति। तद्धि नित्यमेकं सर्वविषयं, अभौतिकमिति न प्राक्तनदोषैः स्पृश्यते—उच्यते—मनसोऽपि तदाश्रयत्वमनुपन्नम्। कुतः ? § 7316

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ न्या. सू. ३-१-१७ ॥ § 7317

मनसो हीच्छाद्याश्रयत्वे ज्ञानादौ कर्तृत्वात् तस्यापि बाह्यगन्धादिविषयज्ञानयौगपद्यानुपपत्तेः तद्ग्रहणकरणघ्राणाद्यधिष्ठानपटुना केन चिदान्तरसुखदुःखादिविषयग्राहिणा स्मृत्यादिक्रियाकारिणा च करणेन भवितव्यमिति तत्रात्मसंज्ञा भवेत्, आत्मनि च कर्तरि मनस्संज्ञेति ॥ § 7318

## बाह्यान्तरकरणयोरावश्यकता

न चास्य बाह्यकरणैः सिध्यन्ति सकलाः क्रियाः।
न च स्मृतिसुखेच्छादौ चक्षुरादीनि साधनम् ॥ § 7320

तेनेच्छाकृतिसुखदुःखवेदनानां
आधारो न खलु मनो न चेन्द्रियाणि।
II.293/KSV देहोऽपि व्रजति न तत्समाश्रयत्वं
तेनान्यं पुरुषमतः प्रकल्पयामः ॥ § 7324

## आत्मसाधने हेत्वन्तराणि

दिक्प्रदर्शनमिदं कृतमिच्छा-
द्वेषयत्नसुखदुःखमतीनाम्।
लिङ्गताकथनमात्मनि तत्र
त्वस्ति हेतुनिवहो बहुरन्यः ॥ § 7328

४ ] नत्वानु— nyāma-wit_ca
७ ] ण— nyāma-wit_kha
११ ] शक्तानि च— nyāma-wit_kha
११ ] नि— nyāma-wit_kha
१२ ] सुखकृति—ख, मृतिसुख— nyāma-wit_ca

११ म् ] रूपादिसाक्षात्कारकरणतयैव चक्षुरादीनां सिद्धेः ॥

कर्तृप्रयोज्यता खलु दृष्टा दात्रादिकरणजातस्य ।
त्वक्श्रोत्राद्यपि करणं तथैव कर्त्रा प्रयुज्येत ॥§ 7330

हिताहितप्राप्तिविसर्गयोग्या
चेष्टा च दृष्टा नियता शरीरे ।
तच्चेतनाधिष्ठिततामुष्य
गन्त्रीरथादेरिव कल्पयामः ॥§ 7334

प्राणादिमारुतानामन्तश्चलतां चलाचलगतीनाम् ।
सहजनिजकर्मविकृतौ कारणमनुमीयते किंचित् ॥§ 7336

इदं च देहादितरत्र दुर्लभं
निरीक्ष्य वृद्धिक्षतभग्नरोहणम् ।
ध्रुवं ग्रहस्येव गतिः प्रकल्पते
निजाश्रयक्षेमपरायणो नरः ॥§ 7340

II.294/KSV

## मनसः ज्ञानसामान्यकरणत्वम्, अनात्मत्वं च

युक्तं च नैव मनसा ह्यनधिष्ठितानां
स्वार्थप्रमाकरणकौशलमिन्द्रियाणाम् ।
स्यात् कश्चिदिष्टविषयानुगुणः प्रयत्नः
यत् प्रेरितं समधितिष्ठति तानि, चेतः ॥§ 7344

ज्ञानप्रयत्नादिमतोऽथ कस्य
दृष्टान्तता स्यात् करणादिलिङ्गे ।
*कार्ये न नः पर्यनुयोग एषः
सामान्यमात्रस्य तवापि सिद्धेः ॥§ 7348

## आत्मनित्यत्वावश्यकता

१ ] मर्श— nyāma-wit__kha
६ ] कश्चि— nyāma-wit__kha
८ ] भग्न— nyāma-wit__kha
१० ] म— nyāma-wit__kha
१४ ] द— nyāma-wit__kha
१८ ] था— nyāma-wit__kha

१ स्य ] इदमेव आत्मा इन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् इत्युक्तम् ॥
३ हिताहित ] प्राप्तिविसर्गे—उपादानहाने ॥
१९ * ] कार्यसामान्यं करणजन्यमिति, तच्च करणं ज्ञानप्रयत्नादिमांस्तु न शरीरादिः, किन्त्वतिरिक्तः कश्चित् । स एवात्मा ॥

प्रत्यक्षादिप्रमाणैर्यः व्यवहारः स चात्मना ।
विना नित्येन नेत्येवं ततोऽप्येतस्य कल्पना ॥§ 7350

यत् प्रत्यक्षं प्रत्यभिज्ञास्वभावं
ज्ञात्रन्यत्वे तस्य न ह्यात्मलाभः ।
ग्राह्यस्यैक्यं यद्वदर्थस्य तस्मात्
सिध्यत्येवं ग्राहकस्यापि पुंसः ॥§ 7354

अविनाभावग्रहणं लिङ्गज्ञानं तदन्वयस्मरणम् ।
लिङ्गिप्रमितिरितीदं न बोद्धृभेदे प्रमाणं स्यात् ॥§ 7356

II.295/KSV

ज्ञाते वनेचरमुखादतिदेशवाक्ये
दृष्टे मृगे विपिनवर्तिनि गोसदृक्षे ।
तत्संज्ञितामितिफलं लभते प्रमातृ-
भेदे न चेदमुपमानमिति प्रतिष्ठम् ॥§ 7360

वर्णानां श्रवणं क्रमेण समयस्मृत्या पदार्थग्रहः
तत्संस्कारजमन्त्यवर्णकलनाकाले तदालोचनम् ।
आकांक्षादिनिबन्धनान्वयकृतं वाक्यार्थसंपिण्डनं
ज्ञात्रैकेन विनाऽतिदुर्घटमतो नित्यात्मसिद्धिर्ध्रुवा ॥§ 7364

मयेदं पूर्वेद्युर्विहितमिदमन्येद्युरपरं
विधातव्यं चेति श्रुतिकृषिवणिज्यादिषु जनाः ।
यदेवं चेष्टन्ते निपुणमनुसन्धाय तदमी
ध्रुवं सर्वावस्थानुगतमवगच्छन्ति पुरुषम् ॥§ 7368

## आत्मलक्षणज्ञानस्य फलम्

इत्यात्मलक्षणमवादि यदेतदिच्छा-
द्वेषप्रयत्नसुखदुःखसमाश्रयत्वम् ।
*तत्सङ्गिनं तदिह हेयतया व्यवस्येत्
तद्विप्रयुक्तमधिगम्यतया मुमुक्षुः ॥§ 7372

४ ] चेत्— nyāma-wit__kha
७ ] णात्—क— nyāma-wit__ca
८ ] ऽनुमानं— nyāma-wit__kha

२३ *] तत्संगिनं—इच्छाद्वेषप्रयत्नादिमन्तम् ॥
। अशेषविशेषगुणोच्छोदो हि मोक्षः सिद्धान्ते

### विज्ञानात्मवादोपक्षेपः

अथो तथागताः प्राहुः किं पुंसा कल्पितेन वः ।
*ज्ञानमात्रेण पूर्वोक्तः व्यवहारः प्रसिद्ध्यति ॥§ 7374

II.296/KSV

ज्ञानं किमात्मवन्नित्यं सौगतैरुपगम्यते ।
प्राग्दर्शितानुसन्धानकामनादिक्रियाक्षमम् ॥§ 7376

ज्ञानं बौद्धगृहे तावत् कुतो नित्यं भविष्यति ।
अन्येऽपि सर्वे संस्काराः क्षणिका इति गृह्यताम् ॥§ 7378

क्षणिकं चेष्यते कार्यं न क्वचित् किंचिदाश्रितम् ।
स्वतन्त्रं ज्ञानमेवातः नान्यस्तेनानुमीयते ॥§ 7380

### इच्छादीनां ज्ञानरूपत्वम्

ज्ञानस्य च प्रभेदोऽयं इच्छाद्वेषसुखादिकः ।
न वस्त्वन्तरमित्येवं न ततोऽप्यन्यकल्पनम् ॥§ 7382

गुणत्वमपि नास्त्यस्य यतोऽधिष्ठानकल्पना ।
न गुणव्यतिरिक्तश्च गुणी नामास्ति कश्चन ॥§ 7384

### क्षणिकविज्ञानवादे स्मरणाद्युपपत्तिः

निराश्रयेषु विज्ञानस्कन्धेषु क्षणभङ्गिषु ।
कथं स्मृत्यादिकार्यं वा परलोकोऽपि वा कथम् ॥§ 7386

सत्यपि परलोके कथमकृताभ्यागमकृतविप्रणाशौ पराक्रियेते ? येन हि ज्ञानेन चैत्यवन्दनादि कर्म कृतं, तस्य विनाशात् न तत्फलोपभोगः । यस्य च फलोपभोगः तेन न तत्कर्म कृतमिति—नैषदोषः—कार्यकारणभावस्य

२ ] गोऽवकल्पते— nyāma-wit_kha
३ ] रभ्युपेयते— nyāma-wit_ca
४ ] स्मरणा— nyāma-wit_kha
१० ] नु— nyāma-wit_kha; nyāma-wit_ca

२ *] ज्ञानमात्रेण—न तु ज्ञानाश्रयेण ॥
१३ न्धेषु ] रूपविज्ञानवेदनासंज्ञासंस्कार-रूपपञ्चस्कन्धात्मको जीवः । तत्र विज्ञानमप्येकः ॥

II.297/KSV नियामकत्वात् । अनादिप्रबन्धप्रवृत्तो हि ज्ञानानां हेतुफलभाव प्रवाहः । एष एव च सन्तान इत्युच्यते । तत्कृतश्चायं अनुसन्धानादिकार्यनियमः । सन्तानानादित्वात्, तदविच्छेदाच्च परलोकोऽपि न क्लिष्टकल्पनः ॥ § 7387

## सन्तानसांकर्यनिरासः

यद्यपि सन्तत्यन्तरपतितज्ञानजन्यमपि सन्तत्यन्तरे ज्ञानं दृश्यते, तथापि न तादृशकार्यकारणभावेन सन्तानव्यवहारः प्रतिसन्धानादिकार्यनिर्वाहो वा; किन्तु उपादानरूपतद्विशेषनिबन्धन एवैष निर्वहति नियमः । तस्मिन्नेव सति स्वरूपसन्तानविभागोऽवकल्पते ॥ § 7388

स्मृतिवत्परिहर्तव्यौ कृतनाशाकृतागमौ ।
तत्सन्तानोपसंक्रान्त्या कुसुमे बीजरागवत् ॥§ 7390

आह च— § 7391

यस्मिन्नेव हि सन्ताने आहिता कर्मवासना ।
फलं तत्रैव बध्नाति कार्पासे रक्तता यथा ॥§ 7393

यथा यस्मिन्नेव हि कार्पसबीजे वर्णः रक्तताख्यः कृतः, तस्यैव कुसुममपि रक्तम्, नान्यस्येति; तथा यस्मिन्नेव ज्ञानसन्ताने यादृशी कर्मवासना, तादृशं फलं तस्मिन्नेव सन्ताने भवति, नान्यस्मिन् ज्ञान इत्यर्थः । तथा च कृतहानाकृताभ्यागमदोषनिरासः ॥ § 7394

## आत्मनः नित्यत्वासंभवः

नित्यस्त्वात्माऽभ्युपगम्यमानः यदि सुखादिजन्मना विकृतिमनुभवति त-
II.298/KSV दयं अनित्य एव चर्मादिवदुक्तः स्यात् । निर्विकारत्वे तु सताऽ सता वा सुखदुःखादिना कर्मफलेन कस्तस्य विशेष इति कर्मवैफल्यमेव । तदुक्तम्— § 7395

१२--१५ ] यथा— nyāma-wit_kha
१७ ] नि— nyāma-wit_kha
१७ ] ध— nyāma-wit_kha

५ ज्ञानं] मातापितृवासनायाः पुत्रे संक्रमणम्, गुरोः ज्ञानस्य शिष्ये संक्रमणं च दृश्यते । परन्त्वत्र सहकारित्वमेव, न तूपादानत्वम् ॥

वर्षातपाभ्यां किं व्योम्नः चर्मण्यस्ति तयोः फलम् ।
चर्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः इति
॥§ 7397

तस्मादुत्सृज्यतामेषः मूर्धाभिषिक्तः प्रथमो मोहः आत्मग्रहो नाम । तन्निवृत्त्या चात्मीयग्रहोऽपि विरंस्यति अहमेव न, किं मम इति । तदिदमहंकारममकारग्रन्थिप्रहाणेन नैरात्म्यदर्शनमेव निर्वाणद्वार मबलम्ब्यताम् ॥
§ 7398

## क्षणिकवादोपक्षेपः

तस्य च मार्गः क्षणिकपदार्थनिश्चयः । क्षणिकेषु हि सर्वभावेषु निराश्रयेषु ज्ञानस्याप्याश्रयविरहात् कुतस्त्यमात्मकल्पनमिति ॥ § 7399

कथं पुनरेषः सकलप्रमाणातीतः क्षणिकपदार्थवादः शक्यते शाक्यैरभ्युपगन्तुम् ॥ § 7400

न खलु क्षणभाङ्गित्वे भावानामक्षजा मतिः ।
प्रमाणं, क्षणिकाकारकल्पनोत्पत्त्यसम्भवात् ॥§ 7402

अथवाप्यविनाभूतहेतुज्ञानोपपत्तितः ।
न भूमिरनुमानस्य विकल्पनियतस्थितेः ॥§ 7404

स्मरणप्रत्यभिज्ञाने प्रत्युत स्थैर्यसाधके ।
एवं च वंचनामात्रं आशुनाशित्वदेशनाः ॥§ 7406

II.299/KSV

## क्षणिकत्वसाधनम्

उच्यते—प्रत्यक्षगम्यं क्षणिकत्वं भवति, न भवतीत्येषं करिष्यते विचारः । अनुमानं तु संप्रत्येवाभिधीयते—सत्त्वात् क्षणिकाः पदार्था इति । सत्त्वं तावदर्थक्रियाकारित्वमुच्यते । यथोक्तम् प्र. वा. १-३-२— § 7407

---

१०--१२ ] मतिः—
nyāma-wit__kha
८५१.१८--८५२.१ ]

यथार्थमर्थक्रियासमर्थं यत्—
nyāma-wit__kha

---

३ इति ] उच्यते किल अहमेव न किञ्चिच्चेद्द्वयं कस्य भविष्यति इति ॥

४ मेव ] नैरात्म्यदर्शनं—अहमर्थक्षये सति जायमानः अनुभवः ॥

अर्थक्रियासमर्थं यत् तदेव परमार्थसत् इति ॥§ 7408

## सत्त्वस्वरूपं किम्

सत्प्रत्ययगम्यत्वे हि सत्त्वे, केशोण्ड्रकादेरपि सत्त्वप्रसङ्गः । सत्ता सम्बन्धित्वे तु सत्त्वे, सामान्यादीनां तदसम्बन्धादसत्त्वं स्यात् । अर्थक्रियासामर्थ्यसत्त्वानुवर्ती च लौकिको व्यवहारः । सत्यपि पुत्रे तत्कार्यादर्शनात्—अपुत्रा वयम् इति व्यपदिशन्ति लौकिका । पुत्रादन्यस्मिन्नपि तत्कार्यकारिणि सति सपुत्रा वयम् इति च ब्रुवते । तस्मादर्थक्रियाकारित्वमेव सत्त्वम् ॥ § 7409

## सत्त्वस्य क्षणिकत्वसाधकत्वम्

भवत्वेवं, तस्य तु कुत्र कथं वा क्षणिकत्वेन व्याप्तिग्रहणम् ? कुत्रेति यत् पृच्छसि, यत्र रोचते महाभागाय घटे, पटे वा गृह्यतां व्याप्तिः ॥ § 7410

किं साध्यधर्मिण्येव व्याप्तिग्रहणमुपपद्यते ? § 7411

धीमन् ! कोऽत्र प्रमादः ? न हि दैवनिर्मितः कश्चित् साध्यधर्मी नाम । ग्रहीतुं शक्यते चेद्व्याप्तिः, यत्र तत्र सा गृह्यतामिति ॥ § 7412

II.300/KSV

## सत्त्वक्षणिकत्वयोः व्याप्तिः

यत्तु कथमस्या ग्रहणमिति—तदुच्यते—भावानां हि सत्त्वं क्रमयौगपद्याभ्यां व्याप्तम् ॥ § 7413

नित्येषु च पदार्थेषु व्यापकानुपलम्भनात् ।
तद्व्याप्तमपि सत्त्वं हि बलात्तेभ्यो निवर्तते ॥§ 7415

न च राशिस्तृतीयोऽस्ति तेन गत्यन्तरक्षयात् ।

---

२ ] न्थे— nyāma-wit_kha
१२ ] त— nyāma-wit_kha
१२ ] क्षण— nyāma-wit_kha

---

१ पि ] तत्रापि किल अस्ति इति प्रतीतिस्समाना ॥
१४ दार्थेषु ] व्यापकं—अर्थक्रियाकारित्वम् ॥
१६ च ] तृतीयः राशिः—क्रममौगपद्यातिरिक्तः कल्पः ॥

क्षणिकानेव तान् भावान् सत्त्वं समबलम्बते ॥§ 7417

तच्च स्वग्राहकाद्बोधात् असन्दिग्धं प्रतीयते ।
ज्ञानोत्पत्त्यैव तद्धेतोः असामर्थ्ये पराकृते ॥§ 7419

असमर्थात्समुत्पादो दृश्यते न हि कस्यचित् ।
शक्ताशक्तप्रसूतत्वे न तद्बोधोऽस्ति संशयः ॥§ 7421

अत एव च तज्ज्ञानं प्रमाणं जगदुस्सदा ।
स्वरूपे शक्तिजत्वे तु संशयादेरसंभवात् ॥§ 7423

किमिदं रजतं, उत शुक्तिकेति विशेषांशे संशेरतां नाम प्रमातारः; न तु सामर्थ्यं प्रति दोला काचित् संभवति—किमिदं ज्ञानं समर्थेन जनितम् ? उत तदितरेण ? इति । असमर्थस्य जनकत्वानुपपत्तेः । व्यापकानुपलम्भस्यापि व्याप्तिग्राहिणः स्वत एव प्रामाण्यम् । संशय विपर्ययोस्तत्राप्यभावात् ॥ § 7424

II.301/KSV

## नित्यपदार्थस्यासंभवः

कथं पुनर्नित्येषु पदार्थेषु सत्त्वव्यापकयोः क्रमयौगपद्ययोरनुपलम्भः ? उच्यते—नित्यो हि भावः क्रमेण वा कार्यं कुर्यात्, यौगपद्येन वा ? परस्परपरिहारव्यवस्थितात्मनां तृतीयप्रकारानुपपत्तेः ॥ § 7425

## क्रमशः कार्योत्पत्तिपक्षदूषणम्

न तावत् क्रमेण, स हि समर्थो वा स्यात् ? असमर्थो वा स्यात् । समर्थश्चेत् किं क्रमेण ? समर्थस्य कालक्षेपायोगात् । असमर्थस्तु असमर्थत्वादेव न करोति किंचिदिति तस्यापि किं क्रमेण ? § 7426

## सहकारिसान्निध्याद्यनुपपत्तिः

४ ] सक्त— nyāma-wit__kha
४ ] तत्र बो— nyāma-wit__kha
१० ] ग्रहतः— nyāma-wit__ka
१४ ] विरह— nyāma-wit__kha
१६ ] क्षे— nyāma-wit__kha

८ ति ] दोला—डोला, संदेहः ॥

सहकार्यपेक्षया करोतीति चेत्—न—असमर्थस्य सहकारिणाऽपि सामर्थ्याधानानुपपत्तेः। समर्थस्य स्वत एव सामर्थ्ये सति सहकारि वैयर्थ्यात् ॥ § 7427

सहकारिसन्निधानेऽपि चास्य स्वरूपेण वा कर्तृत्वं स्यात्, पररूपेण वा ? स्वरूपस्य च प्रागपि भावात्, तस्य च कारकत्वात्, किं सहकारिणा। पररूपेण कर्तृत्वे—पूर्वरूपपरित्यागात्, तद्रूपान्तरापत्तेश्च क्षणिकत्वमापद्यते ॥ § 7428

## सहकारित्वमपि दुर्वचम्

एवं सहकार्यपि समर्थासमर्थतया विकल्पनीयः। स्वतोऽस्य सामर्थ्येकिं परोपकारानुसरणदैन्येन ? असमर्थस्तु सचिवः किमागत्यापि तपस्वी करिष्यति ॥ § 7429

II.302/KSV

किंच किंचित्करो वा सहकारी स्यात्, अकिंचित्करो वा ? अकिंचित्करपक्षे सर्वः सर्वस्य सर्वत्र कार्ये साचिव्यमुपगच्छेत्। किंचित्करश्चेत् वक्तव्यं, किं करोतीति ॥ § 7430

उपकारमिति चेत्, स उपक्रियमाणात् भिन्नः, अभिन्नो वा ? अभिन्नश्चेत्, स एव कृतः स्यात्। भेदे तस्य किमायातम्, यदसौ न पूर्ववदास्ते ॥ § 7431

*कार्यादपि भेदाभेदाभ्यां चिन्त्य उपकारः। न कार्याद्भिन्नः, अनुपलम्भात्। द्वयकरणाभावाच्च। कार्यादव्यतिरेके तूपकारे सहकारिणा क्रियमाणे कार्यमेव तेन कृतं स्यादिति मूलकारणानर्थक्यम् ॥ § 7432

## एकैकस्य कारकत्वासंभवः

ननु च एक एव भावः कारकः। स एव हि समर्थः। तदितरपदार्थसन्निधानं तु स्वहेतुवशादुपनीतमिति नोपालम्भमर्हति—नैतद्युक्तम् —एकस्य कदाचिदपि कारकत्वानुपलब्धेः तत्सामर्थ्यस्य दुरधिगमत्वात्। एवं ह्यसौ समर्थ उच्यते, यद्येकः कदाचित् कार्यमुत्पादयन् दृश्येत, न तु विस्मृत्यापि दृश्यते ॥ § 7433

१९ ] रित्व— nyāma-wit_kha
१ ] रे— nyāma-wit_kha
३ ] मुप— nyāma-wit_kha
६ ] क— nyāma-wit_kha
६--७ ] पि— nyāma-wit_kha
८--९ ] स— nyāma-wit_kha
१५ ] का— nyāma-wit_kha

२ च] समर्थत्वेन इत्यादिः ॥
१२ स्यात्] उपकारस्य
वस्तुस्वरूपत्वापत्येति हेतुः ॥
१४ *] कार्यं—प्रकृतं फलम् ॥

अथ कार्यस्यायं स्वभावः, यदेकस्मान्नोत्पद्यते, कारणं तु शक्तमेवेति—तदप्ययुक्तम्—कार्यस्वभावपराधीनत्वेन कारणस्य सामर्थ्य विरहप्रसङ्गात् । एवं ह्यसौ समर्थः कथ्येत, यदि कार्यस्वभावमनादृत्य स्वतन्त्र एक एव प्रसह्य कार्यं जनयेत् । न चैवं दृश्यते इति यत्किंचिदेतत् ॥ § 7434
II.303/KSV

## कारणे सामर्थ्यं दुरुपपादम्

अथ समर्थमेव कारणम् । तस्य त्वयं स्वभावः, यत् सहसैव कार्यंन करोति, कतिपयक्षणव्यवधाने तु कार्यं करोतीति । यद्येवं न कदाचित् कार्योत्पादः स्यात् । कार्योत्पादसमयेऽपि कतिपयक्षणव्यवहितकार्यजनन-स्वभावानपयात् पुनः कतिपयक्षणावेक्षणं स्यात् । तेष्वपि कतिपयेषु क्ष-णेष्वतिक्रान्तेषु स एवास्य स्वभावस्तदवस्थ इति पुनरप्येवं भवेदिति कदा नाम—कार्यं जनयेत् । तदेवमादिदोषोपहतत्वात् न क्रमेण भावानामर्थ-क्रियासामर्थ्यम् ॥ § 7435

## यौगपद्यपक्षदूषणम्

नापि युगपत्; लोके तथा व्यवहारादर्शनात् । युगपत् कृतकार्य स्यापि स्थिरस्य पुनरकरणे हेत्वभावः । पुनश्च कुर्वन्नपि भावः कार्यं न तदेव कुर्यात्, कृतस्य करणायोगात् । कार्यान्तरकरणे तु स एवायं पुनः क्रमपक्ष आपतेदित्येवं क्रमयौगपद्ये नित्येभ्यः पदार्थेभ्यः निवर्तेते । ते च निवर्तमाने सत्त्वस्य व्यापके इति सत्त्वं तेभ्य आदावेव निवर्तते । तेभ्यः प्रच्युतं सत्त्वं गत्यन्तरविरहात् क्षणिकेष्वेव निविशते ॥ § 7436

## सत्त्वक्षणिकत्वयोर्व्याप्तिग्रहणम्

अतो यद्यपि कार्यहेतौ धूमाग्न्योरिव, स्वभावहेतावपि वा क्वचित् वृक्ष-त्वशिंशपात्वयोरिव पूर्वमिह साध्यसाधनधर्मयोर्ग्रहणं धर्म्मन्तरे न वृत्तम्—त-थापि साध्यधर्मिण्येव व्याप्तिग्रहणमुपपत्स्यते, विपक्षव्यावृत्तेः सुपरिनिश्चित- II.304/KSV
त्वात् । सैव च विपक्षाद्व्यावृत्तिः । स एव चास्य हेतोः स्वसाध्येनान्वयः । न ह्येवं सम्भवति, नित्येभ्यश्च व्यावृत्तं सत्त्वं, क्षणिकेषु च न निविष्टमिति;

२ ] क— nyāma-wit_kha
४ ] द्यवे— nyāma-wit_kha
५ ] र्थं— nyāma-wit_kha
८ ] क— nyāma-wit_kha

१२ ] यै— nyāma-wit_ga; nyāma-wit_ca

२३ त्वेन ] कार्यस्यायं स्वभावः इति खलूक्तम् ॥
९ भावः ] वस्तुस्वरूपस्य तदानीमपि सत्त्वात् ॥

१६ थापि ] साध्यधर्मिणि—साध्यरूपधर्मिणि ॥

तृतीयराश्यभावात् । निराश्रयत्वानुपपत्तेश्च ॥ § 7437

तदेवं क्वचिद्धर्मिणि व्याप्तौ गृहीताय—यदि स एव कदाचित् परं प्रति दृष्टान्तीक्रियते, तदैवं नाम भवतु, को दोष इति ॥ § 7438

## क्षणिकत्वानुमानेऽनवस्थापरिहारः

ननु व्यापकानुपलब्धिः अनुमानम् । अनुमानेन चानुमानस्य व्याप्तिग्रहणेऽनवस्था ॥ § 7439

नानवस्था, तावत्येव पर्यवसानात् । न हि व्यापकानुपलब्धेः अनुमानान्तरात् व्याप्तिनिश्चयः, किन्तु प्रत्यक्षविकल्पादेव । तदनया व्याप्तिनिश्चयात् सिद्धमेतत्—यत् सत्, तत् क्षणिकमिति ॥ § 7440

## क्षणिकत्वसाधकव्याप्तिग्रहणे पक्षान्तरम्

अन्ये तु रीत्यन्तरेण व्याप्तिनिश्चयमाचक्षते । विरुद्धयोरेकपरिच्छेदेऽन्यतरनिवृत्तिरवश्यंभाविनी, विरुद्धत्वादेव । विरुद्धे च सत्त्वनित्यत्वे पूर्वोक्तयैव नीत्या । सत्त्वं च विस्पष्टमुपलभ्यते भावानाम्— इति तदुपलम्भान्नित्यत्वनिवृत्तिः । नित्यत्वनिवृत्तिरेव क्षणिकत्वनिश्चयः, प्रकारान्तराभावात् ॥ § 7441

## नित्यत्वाग्रहणेऽपि व्यावृत्तिसिद्धिः

ननु ! शीतोष्णयोः पृथगुपलम्भात् विरोधनिश्चये युक्त एकग्रहणे द्वितीय-
II.305/KSV व्युदासः । इह तु सत्त्वमेवोपलभ्यते, न नित्यत्वमिति कथं तद्वि रोधादितरव्यावृत्तिः—नैषदोषः—पृथगुभयानुपलम्भेऽपि सत्त्वसिद्ध्यैव नित्यत्वनिराससिद्धेः ॥ § 7442

## सत्त्वज्ञानस्य क्षणिकत्वे प्रमाणत्वम्

कथमन्यधिया बुद्धिः अन्यमुदस्यति—उच्यते— § 7443

द्विचन्द्रदर्शनस्यैकशशभृद्बिम्बवेदिनी ।
धीरतद्विषयत्वेऽपि यथा मिथ्यात्वकारणम् ॥§ 7445

तथा स्थैर्यासमाविष्टा सामर्थ्यग्राहिणी मतिः ।

---

२१ ] दे— nyāma-wit_ca
६ ] नी— nyāma-wit_kha
९ ] त्ते— nyāma-wit_kha
१२ ] बु— nyāma-wit_kha

---

७ च ] सत्त्वनित्यत्वे—अर्थक्रियाकारित्वं, स्थिरत्वं च ॥

स्थिरत्वाविषयत्वेऽपि तद्व्यवच्छेदकारिणी ॥§ 7447

सत्त्वं नानास्वभावत्वं स्थैर्यमेकस्वभावता ।
तयोर्विरोधो युक्त्याऽपि वक्तुं न हि न शक्यते ॥§ 7449

तस्मात् सत्त्वप्रतीतिरेव नित्यत्वनिवृत्तिः, सैव च क्षणिकत्वव्याप्तिरिति सिद्धं सत्त्वात् क्षणिकत्वम् ॥ § 7450

## कारकत्वमेव क्षणिकत्वपर्यवसायि

अपि च सर्वदा कार्यानुत्पादात् कारकावस्था नूनमेकक्षणस्थायिनी भावानामुपगन्तव्या । व्यापारावेशवशेन वा श्रोत्रियादिपक्षे, सहकार्यादिसन्निधनासादनेन वा नैयायिकपक्षे । कारकत्वं नाम वस्तुनः रूपं एकक्षणवृत्त्येव, कार्योत्पत्त्येव तत्कल्पनात् । ततः पूर्वमुत्तरकालं वा कारकत्वयोगात् । कारकत्वमेव परमार्थसत्, अकारकस्य ज्ञानजनकत्वाभावात् अस्तित्वमपि दुर्वचम् । अतश्च सर्ववादिभिरेव प्रायेण क्षणि कत्वमिदमभ्युपगतमिति यश II.306/KSV
एव केवलं सौगताः पीतवन्तः । तस्मात् सिद्धं यत् कारकं, यच्च सत्, तत् क्षणिकमिति ॥ § 7451

## ध्वंसस्य हेत्वनपेक्षत्ववादः

अतश्च—क्षणभङ्गिनो भावाः, प्रलयं प्रति हेत्वनपेक्षत्वात् । भावो हि स्वतो नश्वरात्मा भवेत्, तद्विपरीतो वा ? § 7452

विनश्वरस्वभावेऽस्मिन् कृतं प्रलयहेतुभिः ।
अनश्वरस्वभावे हि कृतं प्रलयहेतुभिः ॥§ 7454

क्व तर्हि मुद्गरादीनां व्यापारः ? विजातीयसन्ततिजन्मनीति ब्रूमः ॥ § 7455

अभावस्तु तज्जन्यो न संभवत्येव, प्रमाणविरुद्धत्वात् । भावो हि स्वरूपेण न भवति, न त्वभावोऽप्यस्य भवतीति । स्वरूपं तु तस्य भवनात्मकं चेत्, सर्वदैव भवेदेव, न न भवेत् । अभवनात्मकं तु तदेव न भवेत्, परापेक्षाया अभावात् । न हि मुद्गरादिकारणान्तरसापेक्षः कुम्भादेर्विनाशो भवितुमर्हति ; उत्पत्ताविव नाशेऽपि समर्थासमर्थभिन्नाभिन्नोपकारकारिसहकार्यादिविकल्पकलापानपायात् ॥ § 7456

१८ ] त— nyāma-wit__kha
३ ] पा— nyāma-wit__kha
१६ ] पि— nyāma-wit__kha
१६ ] भ— nyāma-wit__kha
१९ ] कारि— nyāma-wit__kha

२ वा ] श्रोत्रियपक्षे—अतिरिक्तशक्त्यङ्गीकारपक्षे ॥
१२ हेतुभिः ] एतेन नाशस्य कारणापेक्षा निराकृता ॥
१५ स्तु ] तज्जन्यः—मुद्गरादिजन्यः । भावस्य स्वरूपच्युतिः अभावः । तथा चात्रैव मुद्गरादिव्यापारः । न त्वभावोत्पत्तौ ॥
१६ तु ] तस्य—अभावस्य ॥

## विनाशस्य विलम्बासहत्वम्

अथ कतिपयक्षणव्यवहितविनाशस्वभावो भावः इष्यते—तर्हि प्राक्तननयेन कदाचिदपि न विनश्येत् । विनाशसमयेऽपि तत्स्वभावानपायेन पुनः कतिपयक्षणापेक्षणप्रसङ्गात् ॥ § 7457
II.307/KSV

अपि च यदाऽपि तेन नष्टव्यं, तदाऽप्यस्य न स्वरूपादतिरिक्तः कश्चन विनाशहेतुरवतरति । तच्च स्वरूपं आद्येऽपि क्षणे तस्य तादृशमेवेति तदैव वा नश्येत्, न कदाचिद्वा ॥ § 7458

अपमृत्योरपक्रान्तः तस्य चेत्प्रथमः क्षणः ।
अविनाशिस्वभावत्वात् आस्तां युगशतान्यपि ॥§ 7460

न चैवमभ्युपगम्यते । तस्मात् आत्मलाभाविनाभावी भावानां विनाश इति सिद्धः क्षणभङ्गः ॥ § 7461

## प्रत्यभिज्ञायाः क्षणिकवादप्रतिकूलत्वनिरासः

यदपि क्षणभङ्गसाधकस्य पदार्थस्थैर्यावसायि प्रत्यभिज्ञानविज्ञानं अनुमानस्य बाधकमभिधीयते—तदपि न पेशलम्—अशिथिलप्रतिबन्धहेतौ बाधकस्य निरवकाशत्वात् । उक्तं हि—बाधाविनाभावयोर्विरोधान्नैकत्र समावेशः इति ॥ § 7462

अनुष्णस्तेजस्वी, कृतकत्वात् इत्यत्रापि प्रतिबन्धवैधुर्यमेव साध्यसिद्धिं निरुणद्धि, नाध्यक्षबाध्यत्वम् ॥ § 7463

अथवा किमनेन निर्बन्धेन ? § 7464

अग्निशैत्यानुमानादौ युक्तं प्रत्यक्षबाधनम् ।
तस्य ह्यनन्यथासिद्धिः, इह त्वेतन्न युज्यते ॥§ 7466

## प्रत्यभिज्ञायाः अन्यथासिद्धत्वम्

प्रत्यभिज्ञायाः क्षणभङ्गपक्षेऽपि सदृशपरापरक्षणगणप्रसवप्रतारितमतीनां उपपद्यमानत्वात् । एवंच सति— § 7467
II.308/KSV

५ ] पाद्यपे— nyāma-wit_kha
७ ] थ— nyāma-wit_kha
११ ] नं— nyāma-wit_kha
२१ ] लभ्य— nyāma-wit_kha

९ स्मात्] वस्तुनः स्वरूपलाभे, तदविनाभावी विनाशः ॥

यदि हि व्याप्तिशैथिल्यं सिद्धं किं प्रत्यभिज्ञया ।
अथ न व्याप्तिशैथिल्यं सिद्धं किं प्रत्यभिज्ञया ॥§ 7469

न चेत्थं प्रत्यभिज्ञैव व्याप्तिविप्लवकारणम्, इतरेतराश्रयप्रसङ्गात् । व्याप्तिविप्लवेनानुमाने न्यग्भूते प्रत्यभिज्ञा प्रमाणं भवति,—तस्यां च प्रमाणीभूतायां व्याप्तिवैधुर्यादनुमानाप्रामाण्यम् ॥ § 7470

अनुमानप्रामाण्येऽपि समानो दोष इति चेत्—न—तस्य प्रतिबन्धमहिम्नैव प्रामाण्यसिद्धेः । न हि तस्य प्रत्यभिज्ञादौर्बल्यनिबन्धन प्रामाण्यम् ॥ § 7471

## प्रत्यभिज्ञास्वरूपविमर्शः

अपि च केयं प्रत्यभिज्ञा नामेति नैपुण्येन निरूपयितुमर्हन्ति अत्रभवन्तः । किं स एवायं स्तम्भः इत्येकं ज्ञानम्, उत द्वे एते स्मृत्यनुभवज्ञाने ? § 7472

यद्येकं, तदस्य कारणं वाच्यम्, यत उत्पद्यते । नेन्द्रियम्, सः इत्यस्मिन्नंशे तस्यासामर्थ्यात् । न च संस्कारः, तस्यापि अयं इत्यंशे कौशलाभावात् ॥ § 7473

उभाभ्यां न च सम्भूय तज्ज्ञानमुपजन्यते ।
पृथक्पृथक् स्वकार्ये हि निर्ज्ञातं कौशलं तयोः ॥§ 7475

संस्कारस्य स्मृतिरेव कार्यम्, इन्द्रियस्यानुभव एव । सम्भूय तु न ताभ्यामेकं कार्यमारभ्यते । न हि मृत्पिण्डतन्तुनिर्वर्त्यमेकं घटपटरूप II.309/KSV कार्यमुपलब्धम् । न चेन्द्रियं केवलमीदृशि कार्ये समर्थम् । यथासन्निहिताकारमात्रग्राह्यविषयकमिन्द्रियं प्रत्यभिज्ञानमातनोतीति विस्मयः । तस्मात् द्वे एते ज्ञाने, स इति स्मरणम्, अयमित्यनुभवः ॥ § 7476

## प्रत्यभिज्ञायाः ज्ञानद्वयरूपत्वम्

स्मृतिः स्मर्तव्यविषया ग्रहणं ग्राह्यगोचरम् ।
न तदैक्यपरामर्शि दृश्यते प्रत्ययान्तरम् ॥§ 7478

यथा निरन्तरोत्पन्ने घटज्ञानपटस्मृती ।
न तुल्यविषये तद्वत् एते अपि भविष्यतः ॥§ 7480

---

४ ] न— nyāma-wit__ca nyāma-wit__ja
९ ] स्त(?)ः— nyāma-wit__ka ; कुम्भः nyāma-wit__kha
११ ] चार— nyāma-wit__kha
१४ ] धार्य— nyāma-wit__ka;

---

२३ या ] पक्षद्वयेऽपि प्रत्यभिज्ञाया अप्रमाणत्वात् ॥
४ दोष ] दोषः—अन्योन्याश्रयः ॥
१६ ते ] स्मृतित्वानुभवत्वयोः कदापि सामानाधिकरण्यासंभवात् ॥

## प्रत्यभिज्ञाया एकज्ञानत्वेऽपि नेष्टसिद्धिः

यद्वा भवतु नामेदं एकमेव हि वेदनम् ।
तथापि कीदृशं वस्तु स्पृशतीति परीक्ष्यताम् ॥§ 7482

अतीतकालयुक्तं चेत् स्मरणान्न विशिष्यते ।
अनागतविशिष्टं चेत् सङ्कल्पप्रायमेव तत् ॥§ 7484

वर्तमानैकनिष्ठं चेत् स्थिरत्वं तर्हि सुस्थितम् ।
कालत्रयपरीतं चेत् विरोधात्तत्तु दुर्लभम् ॥§ 7486

परस्परपरित्यागव्यवस्थितनिजात्मनाम् ।
एकत्र न समावेशः कथं चिदुपपद्यते ॥§ 7488

II.310/KSV

## वर्तमानमात्रग्रहणे क्षणिकत्वसिद्धिः

यथा हि— § 7489

नीलाभावाविनाभूतलोहिताद्यपसारणम् ।
कुर्वता नीलबोधेन नीलं भवति निश्चितम् ॥§ 7491

तद्वदिहापि— § 7492

*तदभावाविनाभूत भूतकालाद्यपोहनम् ।
विदधद्वर्तमानार्थज्ञानं तद्ग्राहितां व्रजेत् ॥§ 7494

## प्रत्यभिज्ञायाः अधिकविषयत्वाभावः

एतेन पूर्वज्ञानविशिष्टार्थग्राहित्वं प्रत्यभिज्ञायाः प्रत्युक्तम् । पूर्वज्ञानस्येदानीमसत्त्वेन विशेषणत्वानुपपत्तेः । अगृहीतविशेषणायाश्च विशिष्टबुद्धेरभावात् ॥ § 7495

१३ ] स्वस्व— nyāma-wit_kha
१४ ] वेदय— nyāma-wit_kha
१४ ] ता भवे— nyāma-wit_kha

५ म् ] इयं परिहासोक्तिः । वर्तमानमात्रविषयकत्वे क्षणिकत्वमेव हि सिद्ध्येत् ॥

१३ *] तदभावः—वर्तमानाभावः ॥

१४ ज्ञानं ] तद्ग्राहितां—स्थिरत्वविषयकत्वम् ॥

अथ उपजननापायरहितवस्तुस्वरूपग्राहिणी प्रत्यभिज्ञेत्युच्यते— तदप्ययुक्तम्—वर्तमानैकनिष्ठतायाः प्रदर्शितत्वात् । भावानां च विनाशजन्मनोः वर्तमानो वा कालः—स्यात्, अन्यो वा ? तदन्यस्तावत् ग्रहीतुमशक्य इत्युक्तम् । वर्तमाने तु तदुत्पादविनाशकाले कथ्यमाने तद्ग्रहणात्तदविनाभूतौ भावानामुत्पादविनाशावपि गृहीतौ स्याताम् ॥ § 7496

सेयं तपस्विनी स्थैर्यं प्रसाधयितुमागता ।
प्रत्यभिज्ञा विनाशित्वं प्रतिष्ठाप्य गमिष्यति ॥§ 7498

II.311/KSV

## प्रत्यभिज्ञायाः सादृश्यादिविषयकत्वम्

अपि च लूनपुनर्जातकेशनखादिषु सादृश्यात् दृश्यमाना प्रत्यभिज्ञा स्तम्भादिष्वपि तद्वदेव न स्थिरतामुपपादयेत् । तत्र बाधकयोगादिति चेत्— इहाप्युक्त एव बाधकः परस्परविरोधिभूतादिकालसमावेशस्यैकत्र (?)र्घटत्वादिति । तस्मात् प्रत्यभिज्ञाप्रत्ययस्य बाधकस्याभावात् सिद्धमानुमानिकं भावानां क्षणिकत्वम् ॥ § 7499

## क्षणिकत्वस्य प्रत्यक्षगम्यत्वपक्षः

अपरे पुनः प्रत्यक्षगम्यमेव क्षणिकत्वमाचक्षते ॥ § 7500

नातीतानागतौ कालौ विचारयति चाक्षुषम् ।
वर्तमानः क्षणश्चैकः इति तन्निष्ठमेव तत् ॥§ 7502

यदि च वर्तमानताव्यतिरिक्तग्राहि प्रत्यक्षमिष्यते तद्वक्तव्यम्—*किं पूर्वविज्ञानमनागतकालावच्छिन्नपदार्थग्रहणनिपुणम्, उत उत्तरविज्ञान मतीतकालालिङ्गितभावाकलनकुशलमिति ॥ § 7503

तत्र आद्यविज्ञानसमुपजननसमये तत्क्षणातिरिक्तभाविकालासन्निधानात् न तेन तद्ग्रहणम्, अनागतग्रहणे वा कथमागामिजन्मग्रहणं स्यात् ? § 7504

उत्तरविज्ञानप्रसवसमयेऽपि भूतकालस्य भूतत्वादेव न सन्निधानम्, असन्निहितभूतकालग्रहणे वा पूर्वजन्मग्रहणप्रसङ्गः ॥ § 7505

II.312/KSV

१ ] र्थो— nyāma-wit_kha
८ ] श्य— nyāma-wit_kha
१७ ] ज्ञा— nyāma-wit_ga
१७ ] ज्ञा— nyāma-wit_ga
२० ] न स्या— nyāma-wit_kha

१६ *] कालद्वयविशिष्टवस्तुग्रहणे स्थिरत्वं सिद्ध्यति । तन्न संभवति । पूर्वकालविषयकस्योत्तरकालाविषयकत्वात् । उत्तरकालविषयकस्य पूर्वकालाधिकविषयकत्वात् ॥
२२ ङ्गः ] न चेष्टापत्तिः, ग्रहणस्मरणयोरवैलक्षण्यप्रसंगात् ॥

## वर्तमानकालस्य तत्क्षणमात्ररूपत्वम्

अथ वर्तमानानुप्रवेशेन भूतभाविनोः कालयोः ग्रहणं मन्यसे— तर्हि वर्तमानानुप्रवेशात् वर्तमान एव स कालः गृहीतः स्यात्, न भूतः भावी वा ॥ § 7506

अथ न कश्चिदेव कालः क्वचिद्गृह्यते, अर्थ एव केवलः प्रकाशत इति— तदयुक्तम्—तदनवच्छिन्नभावग्रहणस्य भवद्गृहे चानभ्युपगमात् ॥ § 7507

## प्रत्यक्षस्य वर्तमानविषयकत्वम्

ननु कोऽयं कालो नाम शाक्यानां ? न कश्चित् वास्तवः, किन्तु काल्पनिक एव तद्व्यवहारः ॥ § 7508

सर्वथेन्द्रियजं ज्ञानं वर्तमानैकगोचरम् ।
पूर्वापरदशास्पर्शकौशलं नावलम्बते ॥§ 7510

वर्तमानश्च कियान् कालः ? एक एव क्षणस्ततः । पूर्वः क्षणोऽतीततां स्पृशति, उत्तरस्त्वनागतताम् ॥ § 7511

## वर्तमानकालस्य न विततत्वम्

ननु च पचति, पठतीति वर्तमानोऽपि हि वितत एव कालः प्रतीयते —नैतत्सारम्— § 7512

II.313/KSV

न ह्यस्ति कालावयवी नानाक्षणगणात्मकः ।
वर्तमानक्षणो दीर्घः इति बालिशभाषितम् ॥§ 7514

क्षणसमुदायात्मकत्वे तु नानारूपत्वमेव तस्य भवेत् । अतीतानागतक्षणानुप्रवेशात् । तस्मादेकक्षणो वर्तमानः, स चात्यन्तमल्पीयानित्येवमेकक्षणपरीतार्थदर्शि चाक्षुषं ततः पूर्वमूर्ध्वं वा न पदार्थसत्तां गृह्णातीति क्षणिका एव भावाः ॥ § 7515

---

१ ] तत्र—(?) nyāma-wit_kha
२ ] व— nyāma-wit_kha
४ ] प्रकाश्य— nyāma-wit_kha
५ ] व— nyāma-wit_kha
५ ] प्रतिभासस्य भवद्भिरेवा— nyāma-wit_kha
१७--१८ ] त्यू— nyāma-wit_kha

---

१ वेशेन ] वर्तमानदिवसप्रतीतौ अनेकक्षणानां पूर्वापरभावापन्नानां एकस्मिन् दिवसे भानात् एवमुक्तम् ॥

५ मात् ] सर्वत्र प्रतीतिषु कालस्य विशेषणतया भानाङ्गीकारात् ॥

१४ वी ] निरवयवद्रव्यं किल कालः ॥

## प्रत्यक्षेण क्षणिकत्वग्रहणोपपादनम्

ननु च वर्तमानक्षणात् पूर्वमूर्ध्वं वा तदस्तित्ववत् नास्तित्वमपि न गृहीतमेवेति कथं क्षणिकत्वम् ॥ § 7516

क एवमाह ? न गृहीतं नास्तित्वम् ? अनुपलब्धेरेव नास्तित्वव्यवहारात् । उपलम्भो हि भावानां सत्ता, अनुपलम्भश्च नास्तित्वम् । दर्शनादर्शने एव सदसत्त्वयोर्लक्षणम् । तस्मात् क्षणान्तरे तदनुपलम्भात् नास्तित्वमेवेत्येवं क्षणिकत्वग्राहि प्रत्यक्षमिति स्थितम् ॥ § 7517

## प्रत्यभिज्ञाया विततकालाविषयकत्वम्

ननु च प्रत्यभिज्ञातो दीर्घकालत्वनिश्चयः ।
किमद्यापि न मुक्तोऽसि तत्प्रामाण्यकुतृष्णया ॥§ 7519

परीक्षितं हि तस्याः स्वरूपं कार्यं च कारणम् ।
न शक्नोत्येव सा स्थैर्यं उपपादयितुं ध्रुवम् ॥§ 7521

न पूर्वं नोत्तरं ज्ञानं ग्राहि कालान्तरस्थितेः ।
तदिदं बोध्यमानोऽपि रागान्धो नावबुध्यसे ॥§ 7523

II.314/KSV

पूर्वं हि ज्ञानं तत्कालमेव, उत्तरमपि स्वकालमेव वस्तु गृह्णाति; तु नास्त्येव ग्रहणम् । अग्रहणमेव हि मध्यमाहुः ॥ § 7524

## धारावाहिज्ञानस्याप्रामाणिकता

नन्वविच्छिन्नदृष्टीनां न हि त्र्युट्यदवस्थितिः ।
स्तम्भादिरवभातीति कथमेतस्य भङ्गिता ॥§ 7526

नैतदेवम्—तत्राप्येकक्षणवृत्तित्वात् ज्ञानस्य । क्षणान्तरे तु ज्ञानमेव नास्ति तत् । तत् कस्याविच्छिन्नसत्ता ? कस्य त्रुटितसत्ता ? कस्य वा बाधकम् ? § 7527

---

१ ] त्वान्ना— nyāma-wit__kha
३ ] ब्ध ए— nyāma-wit__kha
४ ] भावेन्ना— nyāma-wit__kha
४ ] म्भाद्य— nyāma-wit__kha
९ ] कारणं च— nyāma-wit__kha
११ ] र्वैणो— nyāma-wit__ca
१२ ] ते— nyāma-wit__kha

---

१५ दृष्टीनां ] न हि भातीत्यन्वयः ॥
१८ त् ] क्षणिकत्वात् ज्ञानानाम् ॥

ननु अस्त्येव क्षणान्तरे विज्ञानम्, अविच्छिन्नत्वाद्दृष्टेरिति चेत्— मैवम्— बुद्धेरदीर्घकालत्वात् ज्ञानान्तरोत्पाद एवासावित्यवधारयत्वायुष्मान् ॥ § 7528

तस्माद्यथैव सन्तानवृत्त्या ज्ञानक्षणोदयः ।
तथैवोत्पाद्यतामेषा स्तम्भक्षणपरम्परा ॥§ 7530

## ज्ञानस्य स्थिरत्वेऽपि न वस्तुस्थैर्यग्रहणम्

सोऽयं अविच्छिन्नदृष्टीनां अत्रुटितपदार्थसत्ताग्रहणाभिमान इत्थमुत्थितः ॥ § 7531

स्थिरेणापि न बोधेन दीर्घकालस्थितिग्रहः ।
न ह्यसन्निहितग्राहि प्रत्यक्षमिति वर्णितम् ॥§ 7533

II.315/KSV

तत्काले सन्निधिर्नास्ति क्षणयोर्भूतभाविनोः ।
वर्तमानक्षणश्चैको न दीर्घत्वं प्रपद्यते ॥§ 7535

तेन बुद्धेस्स्थिरत्वेऽपि स्थैयेमर्थस्य दुर्वचम् ।
न त्वनन्तरया नीत्या तस्या अपि चिरं स्थितिः ॥§ 7537

साऽपि हि स्वसंवेद्यत्वात् एकक्षणपरीतैव प्रकाशत इति । तस्मात् क्षणिकग्राहि प्रत्यक्षमिति सिद्धम् ॥ § 7538

## क्षणिकवादं प्रत्यनुमानं न प्रतिकूलम्

ननु स्थैर्यं पदार्थानामनुमानात्प्रतीयते ।
अन्वयव्यतिरेकाभ्यां मुद्गरादिर्विनाशकः ॥§ 7540

निश्चीयते घटादीनां तेन पूर्वं तदागमात् ।
विनाशरहितत्वेन सिद्धत्येषामवस्थितिः ॥§ 7542

न—अनुपलम्भव्यतिरिक्तस्य हेतुमतः विनाशस्यानुपलब्धेः । उपलम्भ एवास्तित्वं भावानाम्, अनुपलम्भश्च नास्तित्वम् । न च घटानुपलब्धिः मुद्गरादिकार्या, ततः प्रागपि भावात् ॥ § 7543

५ ] ---Note : (?)
६ ] र्था— nyāma-wit_ca
८ ] ग्राह— nyāma-wit_kha
१४ ] द्यमान— nyāma-wit_ja
१ ] पत्ते— nyāma-wit_kha

१२ नीत्या ] तस्याः—बुद्धेः चिरं स्थितिरपि न इत्यन्वयः ॥
१७ पूर्वं ] तदागमात्—मुद्गरादिनिपातात् ॥
१९ ब्धेः ] अनुपदमेव विनाशस्य हेतुजन्यत्वनिरासात् ॥

## घटकालेऽपि घटानुपलंभः

ननु दृश्यानुपलब्धेः असत्त्वनिश्चयः। स च कपालकाल एव घटस्यावकल्पते। मध्ये त्वदर्शनं अन्यथाऽपि स्यादिति नादर्शनमात्रमेव नास्तित्वम्— II.316/KSV मैवम्—त्वदभिमते मध्येऽपि दृश्यस्यैव घटस्यानुपलम्भ इति तदाऽप्यस्य नास्तित्वमेव ॥ § 7544

अथापि मध्ये सर्वेषां न घटानुपलम्भनम् ।
तद्वत्कपालकालेऽपि सर्वेषामिति का प्रमा ॥§ 7546

## अनुभवस्सर्वेषां नैकरूपः

यदहं न वेद्मि, तत् परोऽपि न वेदेति चेत्; तर्हि मध्येऽपि घटं सर्व एव न पश्येयुरिति नास्त्येवासौ कपालीभूतघटवत् । अपि च— § 7547

*यदि यत्त्वं न जानासि तदन्योऽपि न मन्यते ।
स्वजायाजघनस्पर्शसुखमप्येष मा ग्रहीत् ॥§ 7549

यदि वा बुध्यसे यत्त्वं तदन्योऽप्यधिगच्छति ।
त्वज्जायाजघनस्पर्शसुखमप्यधिगच्छतु ॥§ 7551

तदलं ते परगृहवृत्तान्तचिन्तया । यत् पश्यसि तदस्तीति जानीहि यन्न पश्यसि तन्नास्तीति विद्धि । एवमनुपलम्भ एव भावानां विनाश इति न तस्य मुद्गरादिकार्यत्वम् । अतोऽनुमानमपि न स्थैर्यसाधकम् । तस्माद्यथोक्तक्रमेण प्रत्यक्षमेव क्षणिकपदार्थपरिच्छेदीति स्थितम् ॥ § 7552

## क्षणिकवादे दोषोद्धारः

स्मरणप्रत्यभिज्ञानस्वकर्मफलभोक्तृताः ।
क्षणिकत्वेऽपि कथिताः कार्यकारणभावतः ॥§ 7554

II.317/KSV

तदेवमुपपन्नेयं गृह्यतां क्षणभङ्गिता ।
त्यज्यतां दीर्घसंस्कारकारणं स्थिरताग्रहः ॥§ 7556

---

५ ] तु— nyāma-wit__kha
६--८ ] न— nyāma-wit__kha
१२--१४ ] ते— nyāma-wit__kha
१५ ] स्वजा— nyāma-wit__kha

---

२ नं] अन्यथा—देशान्तरनयनादिना, आलोकाद्यभावेन वा ॥
३ स्यैव] पूर्वापरेति शेषः ॥
९ *] यदि न मन्यते—इत्यन्वयः । भवता ज्ञातमपि अन्यो जानीयात् । भवता ज्ञातमपि अन्यः न जानीयाच्च ॥

## क्षणभङ्गनिरासोपक्रमः

अत्राभिधीयते नैव प्रमाणद्वयमप्यदः ।
भावानां क्षणभङ्गित्वं उपपादयितुं क्षमम् ॥§ 7558

## सत्त्वं नार्थक्रियाकारित्वम्

अर्थक्रियासमर्थत्वं सत्त्वं यत्तावदुच्यते ।
तदसत्कूटहेमादिव्यभिचारावधारणात् ॥§ 7560

किन्त्वबाधितसद्बुद्धिगम्यता सत्त्वमिष्यते ।
सदसद्व्यपदेशस्तु पुत्रादावौपचारिकः ॥§ 7562

एवं च बाधकाभावपर्येषणपरायणम् ।
न सत्त्वग्राहकं ज्ञानं स्वतः प्रामाण्यमर्हति ॥§ 7564

सत्त्वे च संशयोऽप्यस्ति सकलप्राणिसाक्षिकः ।
उपलब्ध्यव्यवस्थात इत्येवं वर्णयिष्यते ॥§ 7566

## क्षणिकस्यार्थक्रियाकारित्वासंभवः

अर्थक्रियासमर्थत्वं त्वदुक्तं सत्त्वमस्तु वा ।
तदपि व्याप्तिशून्यत्वान्न हेतुर्गन्धवत्त्ववत् ॥§ 7568

क्षणिकस्यापि भावस्य सत्त्वं नास्त्येव सोऽपि हि ।
क्रमेण युगपद्वाऽपि न कार्यकरणक्षमः ॥§ 7570

II.318/KSV

क्षणिकस्य क्रमः कीदृग्युपत्करणे पुनः ।
एकवस्तुक्षणस्यापि रूपभेदः प्रसज्यते ॥§ 7572

कार्याण्येकेन रूपेण भिन्नानि जनयेत्कथम् ।
रूपभेदविरोधात्तु वस्तुनो नास्तिता भवेत् ॥§ 7574

---

१४ ] ब्धि— nyāma-wit__kha; nyāma-wit__gha
३ ] षु— nyāma-wit__kha
४ ] क्रम— nyāma-wit__kha

---

४ हेमादि ] सत्यहेमकूटहेमयोरुभयोरपि ॥ एकरूपज्ञानजनकत्वात् सत्त्वं स्यात् p. 300

## क्षणिकवादस्य दुर्वचत्वम्

स्थिते च वस्तुसद्भावे क्षणिकत्वं परीक्ष्यते ।
तदसत्त्वे तु तच्चिन्ता व्योम्नि रोमन्थकेलिवत् ॥§ 7576

ज्ञाने क्षणिकचिन्ता चेत् किं तस्यापि पराकृतौ ।
वहन्त्येतानि शास्त्राणि ज्ञेयाभावे च तत्कुतः ॥§ 7578

## क्षणिकवादे कार्यानुपपत्तिः

अपि च—क्षणिकत्वपक्षे किमेकस्मादेकोत्पादः ? उत बहुभ्य एकोत्पत्तिः ? अथैकस्मादनेकनिष्पत्तिः ? आहोस्वित् बहुभ्यो बहुसम्भवः ? इति परीक्षणीयम् ॥ § 7579

न तावदेकस्मादेकोत्पत्तिः, अलौकिकत्वात् । एकस्मादप्यग्नेः भस्मधूमेन्धनविकाराद्यनेकप्रकारकार्यकलापोत्पाददर्शनात् । कार्यसिद्धये च सर्वत्र सहकारिसन्निधापनप्रयत्नदर्शनात्, न वै किंचिदेकं जनकम् इति ग्रन्थविरोधाच्च ॥ § 7580

## एकस्मात्कारणादनेककार्यासंभवः

एतेन तृतीयः पक्षः निरस्तः एकस्मादनेकोत्पत्तिरिति । एकश्च नैकं जनयत् क्रमेण जनयेत्, युगपद्वा ? न क्रमेण, स्थैर्यप्रसङ्गात् ॥ न यगपत्, II.319/KSV
अदृष्टत्वात् । एकस्य चानेककार्यकरणशक्तियोगेन तद्भेदान्नानात्वप्रसङ्गः ॥ § 7581

विरुद्धधर्मयोगेऽपि यदि चैकत्वमिष्यते ।
अनेकक्षणयोगेऽपि भाव एक उपेयताम् ॥§ 7583

## बहुभिः कारणैरेकाकार्यस्याप्यसंभवः

अथ बहुभ्य एकोत्पादनमिति पक्ष आश्रीयते—तद्वक्तव्यम्—किं तदेकं कार्यम् ? कैर्वा बहुभिरुत्पाद्यते इति । न ह्यस्माकमिव भवतां अनेकोपायनिबहनिर्मितं अवयविस्वरूपं कार्यमस्ति; संचितैः संचिता एव

१५ ] कार्यकालो— nyāma-wit_kha

५ ] काव— nyāma-wit_kha

१ द्भावे ] बाह्यार्थशून्यवादिनः किल ते ॥ ॥
१७ ताम् ] तथा च वस्तुनां स्थिरत्वसिद्धिः

जन्यन्त इत्यभ्युपगमात् ॥ § 7584

यदि चानेककारणकार्यमेकमुच्यते तदस्य कारणभेदोपनतस्वभावनानात्वयोगात् एकत्वमेव तावद्विरुध्यते । अन्यथात्वे हि न कारणाधीनं भावानां रूपमित्याकस्मिकत्वप्रसङ्गः । कारणभेदापादितनानात्वस्यापि यदि चैकत्वं, तदेकस्य नानाकालयोगिनोऽप्येकत्वं स्यात् । असत्त्वं वा भिन्नस्वभावस्य वस्तुन इति पूर्ववत् वक्तव्यम् ॥ § 7585

## बौद्धमते ग्राह्यग्राहकभावानुपपत्तिः

लोचनालोकमनस्कारादिकारणभेदे कार्यमप्येकरूपं ज्ञानं इति चेन्न—तस्य भवन्मते विषयाकारग्राहकत्वस्वसंवेदनरूपभेदात् । निराकार- II.320/KSV ज्ञानवादिनो हि बौद्धस्य प्रतिकर्मव्यवस्था न सिध्यति, जनकस्य कर्मणः प्रतिभासे स्थैर्यप्रसङ्गात्, एकसामग्र्यधीनत्वपक्षस्य चासम्भवात् । सम्भवेऽपि वा ग्राह्यनियमनिमित्ताभावादिति ॥ § 7586

## बहुभ्यो बहुसंभवदूषणम्

अथोच्यते—किमनभ्युपगतपक्षोपमर्दनेन । बहुभ्यो बहुसंभव इत्येष एव नः पक्षः । सन्तानवृत्त्या वर्तमाना पूर्वसामग्री सरूपामुत्तरसामग्रीमारभते । विजातीयकारणानुप्रवेशे तु विरूपामिति ॥ § 7587

अथ केयं सामग्री नाम ? न समग्रेभ्यो भिन्ना, पृथगनुपलम्भात् । अव्यतिरेके तु समग्र एव सामग्री । तत्र पूर्वसमुदायेन उत्तरसमुदायारम्भे तदन्तर्गतं समुदायिनमेकमेक एवोत्पादयेत्, एकं वा सर्वे संभूयेति ॥ § 7588

तत्र आद्ये पक्षे सैवेयमेकस्मादेकोत्पत्तिरुक्ता स्यात् । सा च प्रतिषिद्धा ॥ § 7589

## कार्यसांकर्यप्रसंगस्तन्मते

अथैकैकसमुदायिनिष्पत्तौ सर्वसमुदायिनां व्यापारः—स तु क्रमेण वा, यौगपद्येन वा ? तत्र क्रमपक्षे क्षणिकत्वहानिः । ये हि तत्र पंचषास्समुदायिनः क्षणाः वर्तन्ते, ते एकं तमुत्पाद्य पुनरपरमारभेरन्, पुनरन्यमिति तावत्काल-

७ ] क— nyāma-wit_kha
९ ] दोप— nyāma-wit_kha
१४ ] स्थानमिष्यते— nyāma-wit_kha
१७ ] न व— nyāma-wit_kha
१ ] कं— nyāma-wit_kha
४ ] कफल— nyāma-wit_kha

१ मात्] अयमेव प्रतीत्यसमुदयवादः तदिष्टः ॥
७ नालोक] चित्तामोगो मनस्कारः इत्यमरः ॥
१० वात्] तस्यानुपदमेव दूषितत्वात् ॥
११ निमित्ताभावादिति] क्षणिकवादे नियामकत्वस्य दुर्वचत्वात् ॥

प्रतीक्षणादक्षणिकत्वम् ॥ § 7590

अथ युगपदेव सर्वनिष्पत्तौ सर्वे व्याप्रियन्ते, तर्हि निकुरुम्बरूपमेव कार्यं निकुरुम्बरूपादेव कारणादुत्पन्नमिति, कारणविवेकनियमाभावात् रूपरसादिप्रविभागो न स्यात् । इदं रूपं, एष रसः इति कथं निश्चीयते II.321/KSV ? चित्रेण चित्रमुत्पादितमिति सर्वं रूपं स्यात् । सर्वो वा रसः । यद्वा न रूपं, न रसः, अन्यदेव किंचिद्वस्त्वन्तरं तत् स्यात् ॥ § 7591

## कारणेषु वैलक्षण्यमपि तन्मते दुर्वचम्

अथोच्यते—यद्यपि रूपरसादिसामग्री तत्सामग्र्या एव जनिका, तथापि क्वचित् किंचिदुपादानकारणं, इतरत्सहकारि कारणम् । तत्र रूपक्षणनिष्पत्तौ रूपस्योपादानकारणत्वात् इतरेषां च सहकारिकारणत्वात् न पदार्थसङ्कर इति—तदयुक्तम्—सर्वथा कारणत्वानपायात् ॥ § 7592

## अस्मिन् पक्षे स्थैर्यापत्तिः

अपि च येन स्वरूपेण रूपस्य रूपं प्रत्युपादानकारणता, तेनैव यदि रसं प्रति सहकारिकारणता तदा पुनरपि रूपरसयोरविशेषः । अथान्येन रूपेण रूपस्य रूपोपादानता, अन्येन च रससहकारितेति, तर्हि स्वभाव भेदान्नानात्वम्, नानत्वे च स्थैर्यम्, असत्त्वं वेत्युक्तम्— § 7593

अथ नास्त्यनयोः किंचिद्विरुद्धत्वं स्वभावयोः ।
कथं बौद्धगृहे जातस्त्वमेवमभिभाषसे ॥§ 7595

भावानां परस्परपरिहारव्यवस्थितरुपत्वादस्त्येवैषां लक्षणिको विरोधः ॥ § 7596

II.322/KSV

## क्षणिकवादे कारणविशेषव्यवस्थापनं दु(?)करम्

अपि च क्षणिकत्वे पदार्थानां, इदमत्रोपादानकारणं, इदं सहकारिकारणमिति विशेषोऽपि दुरवगमः । तथा हि—किमिदमुपादानं नाम ? किं स्वसन्तानविनाशेन बीजादिवत् कार्यजनकमुपादानम्, उत स्वविशेषसमर्प-

८--९ ] नि— nyāma-wit_kha
११ ] चि— nyāma-wit_kha
१९ ] स्वरू— nyāma-wit_ca
१ ] त्वम— nyāma-wit_kha
५ ] न— nyāma-wit_kha

७ निका ] न तु कार्यस्येति शेषः । अतश्च कार्ये सांकार्यं नापादयितुं शक्यमित्यभिमानः ॥
१६ से ] करणाकरणादिविरुद्धधर्मयोगाद्धि क्षणिकत्वं साध्यते ॥
१७ स्त्येवैषां ] लाक्षणिकः—तत्तदसाधारणधर्मविशेषकृतः ॥

णेनोत्पादकमिति । यदि पूर्वः पक्षः, परलोकचर्चा चार्वाकवदुपेक्षिता स्यात् । ज्ञानसन्तानविनाशेन ज्ञानान्तरारम्भप्रसङ्गात् ॥ § 7597

स्वविशेषार्पणपक्षेऽपि सर्वविशेषार्पणं वा स्यात्, कतिपयविशेषार्पणं वा ? सर्वविशेषार्पणे निर्विकल्पज्ञानं सविकल्पकस्य नोपादानकारणं स्यात् ॥ § 7598

## क्षणिकवादे हेतुदर्शनं व्याप्तिस्मारकं न स्यात्

लिङ्गदर्शनजन्या च प्रतिबन्धस्मृतिः कथम् ।
कथं वा रसविज्ञानं रूपज्ञानादनन्तरम् ॥§ 7600

सन्तानभूयस्त्वाद्भविष्यतीति चेत्—न—एकप्रमात्रधीनप्रतिसन्धानोपनिबन्धनव्यवहारप्रतिबन्धविप्लवप्रसङ्गात् । नित्यमेकमात्मानमन्तरेण सन्तानैकतायामपि तावदसौ व्यवहारो नावकल्पते । किमुतैकत्रैव देवदत्तसन्तानभूयस्त्वे सतीति ॥ § 7601

II.323/KSV

कतिपयविशेषार्पणेन तु यद्युपादानता, तदानीं रूपमपि ज्ञानोपादान कारणतां प्रतिपद्येत । तस्मान्नोपादानकारणं नाम किंचित् । तन्निरासेन च तद्वैलक्षण्यलक्ष्यमाणस्वरूपस्य सहकारिणोऽपि व्युदासो वेदितव्यः ॥ § 7602

## सहकार्यधीनत्वे स्थैर्यसिद्धिः

अपि च— § 7603

प्रतिक्षिपसि मत्पक्षे सर्वथा सहकारिणम् ।
स्वयं चाङ्गीकरोषीति, भिक्षो ! रागीव लक्ष्यसे ॥§ 7605

भिन्नाभिन्नोपकारादिविकल्पास्त्वत्प्रकल्पिताः ।
सहकारिप्रतिक्षेपकारिणः क्वाधुना गताः ? ॥§ 7607

*आ ! ज्ञातं युक्तिशक्त्यैषः युष्माभिरुपकल्पितः ।
दोषो न बाधते युष्मान् मन्त्रोत्थापितसर्पवत् ॥§ 7609

---

९ ] क— nyāma-wit__kha
१७ ] रूपोपादानता यदि— nyāma-wit__ca
२ ] त— nyāma-wit__kha
८७०.३--८७१.४ ] भि— nyāma-wit__kha

---

४ स्यात्] आत्मस्थानापन्नस्य नाशाङ्गीकारात् ॥
७ स्यात्] निर्विशेषणकं हि ज्ञानं निर्विकल्पकम् । तथा च निर्विकल्पापेक्षयाऽतिरिक्तविषयकत्वं न स्यात् ॥
११ न्तान] भूयस्त्वम्—एकोपादानकानेक-विज्ञानपरम्परारूपम् ॥
३ *] बौद्धानां मन्त्रदिसिद्ध पहासोऽयम् ॥

## क्षणिकावादे कार्यकरणभावासिद्धिः

अथवा—तिष्ठतु तावदुपादानसहकारिकारणविवेकः ! कार्यकारणभाव एषः भदन्तसिद्धान्ते दुरुपपादः । परोत्पत्तावव्याप्रियमाणमेव यदि कारण-मुच्यते सर्वं सर्वस्य कारणं स्यात् ॥ § 7610

न चालब्धात्मनस्तस्य व्यापारः परजन्मनि ।
लब्धात्मनस्तु व्यापारे स्थितिस्सिद्धा क्षणान्तरे ॥§ 7612

II.324/KSV

## आनन्तर्यमात्रं न कारणत्वगमकम्

अथ ब्रूयात्—इदं प्रतीत्य इदं प्रतीयते इति इदंप्रत्ययतामात्रमेव कार्य-कारणभाव इति—तथापि लब्धात्मनः क्षणस्य प्रतीतिरिति द्वितीयक्षणाव-स्थानमपरिहार्यमेव ॥ § 7613

न चानन्तर्यमात्रेण कार्यकारणग्रहः ।
*अहेतुफलभावेऽपि तथाऽनन्तर्यदर्शनात् ॥§ 7615

व्यापारस्तु परोत्पत्तौ नास्त्येव क्षणभङ्गिनः ।
न वर्तमानकालस्य न भूतस्य न भाविनः ॥§ 7617

## तुलादृष्टान्तवैरूप्यम्

अथ मन्येथा यथा तुलान्तयोर्नामोन्नामौ भवतः, एवं पूर्वोत्तरयोः क्षणयोः नाशोत्पादावित्येवं पूर्वक्षणविनाशेनोत्तरक्षणनिवृत्तेः इयतैव तौ कार्यकारण-भावमश्नुवीयातामिति—एतदप्यमनोरमम्—न ह्ययमायुष्मता सम्यगवधृत-स्तुलादृष्टान्तः ॥ § 7618

तत्रान्यदेव हेमादि नामोन्नामनिबन्धनम् ।
उन्नामो न तु नामेन तेन वा स विधीयते ॥§ 7620

---

८--९ ] भाव एव— nyāma-wit__kha
३ ] मस्त्यव— nyāma-wit__kha
६ ] त— nyāma-wit__kha
६ ] मेव— nyāma-wit__kha

---

८ स्य ] आत्मा—स्वरूपम् । स्वयं लब्धस्वरूपं चेत्, अनन्तरमन्यमुत्पादयेत् । अतश्चान्ततः क्षणद्वयसिद्धिरनिवार्या ॥
१० मेव ] पूर्वापरभावमात्रं कार्यकारणभावप्रयोजकम् ॥
१४ * ] अन्यथासिद्धवस्तुषु इदं संमतम् ॥
१ तः ] अन्यतरस्य नमनं अन्यतरस्योन्नमनहेतुः ॥

इह हि न पूर्वेण क्षणेन, नापि तद्विनाशेनोत्तरः क्षण उत्पद्यते । न च हेमस्थानीयमिहान्यदस्तीत्यनुत्पाद एवावशिष्यते ॥ § 7621
II.325/KSV

सर्वथा परनिष्पत्तौ निर्व्यापारं न कारणम् ।
सव्यापारस्य कर्तृत्वे क्षणिकत्वं तु दुर्घटम् ॥§ 7623

इत्थं च सत्त्वं व्यावृत्तं क्षणिकेभ्यो विशेषतः ।
तेनासाधारणत्वेन यायात्संशयहेतुताम् ॥§ 7625

## सत्त्वं क्षणिकत्वविरुद्धस्यैव साधकम्

अथवा लब्धात्मनः पदार्थस्य परोत्पत्तौ व्याप्रियमाणत्वेन कारकत्वावधारणात्, द्वित्रक्षणस्थायित्वमवश्यमनन्तरनीत्या भवेदिति प्रत्युत सत्त्वादक्षणिकत्वसिद्धेः विरुद्धोऽयं हेतुः ॥ § 7626

अतश्चैवं, नित्यानामेवार्थक्रियाकारित्वोपपत्तेः समवाय्यसमवायिनिमित्तभेदेन त्रिविधा कार्यकारणसामग्री परस्परसंसर्गमागत्य यथासन्निधानं कार्यं प्रसूत इति कृतं क्रमयौगपद्यविकल्पैस्तावकैः । यदैवाविकलसंसर्गा सामग्री तदैव कार्योत्पत्तिः ॥ § 7627

## कार्याणां क्रमादेवोत्पत्तिः

*अत एव च कार्याणां युगपन्न समुद्भवः ।
न चापि कारणं नित्यं सामग्री न हि सर्वदा ॥§ 7629

प्राणिकर्मविपाकोऽपि सामग्यन्तर्गतोऽस्ति नः ।
सर्वस्य सुखदुःखादिहेतोस्तदुपपादनात् ॥§ 7631

न च समग्रव्यतिरेकाव्यतिरेकविकल्पः अस्मत्पक्षे सामग्रीं अपबा धते; समग्रधर्मत्वात् सामग्र्याः । समग्रापेक्षया च सामग्र्या एव च तमबर्थातिशययोगात् करणमिति प्रमाणसामान्यलक्षणे वर्णितमेतत् ॥ § 7632
II.326/KSV

७ ] शेषणो— nyāma-wit_kha
९ ] रि— nyāma-wit_ca
१३ ] ण— nyāma-wit_kha
१७ ] का— nyāma-wit_kha
१८ ] कुतः— nyāma-wit_ja
१८ ] ल— nyāma-wit_kha
५ ] वा— nyāma-wit_kha

२० *] अत एव—कार्यस्य सामग्रीमेलनाधीनत्वादेव ॥

२ प्राणि ] कर्मविपाकः—धर्माधर्मौ कार्यसामान्यकारणभूतौ ॥

## कारणानां प्रत्येकसामर्थ्यप्रश्नोऽपि व्यर्थः

समर्थत्वासमर्थत्वविकल्पोऽपि न सङ्गतः ।
सामग्र्या एव सामर्थ्यं ततः कार्यस्य दर्शनात् ॥§ 7634

तदन्तर्गतस्य तु कारकजातस्य शकटाद्यङ्गस्येव सामर्थ्यं यावत्, तावदभ्युपगतमेव तदपेक्षस्य सामग्र्याः साधकतमत्वस्य निर्वहणात् । न हि भवति कृष्णाच्छुक्लतर इति ॥ § 7635

अविकलं तु सामग्र्या एव सामर्थ्यं, यदनन्तरं कार्यनिष्पत्तिरिति कार्यनिष्पत्तिदर्शनादेवावगम्यते ॥ § 7636

## कारकत्वं न क्षणिकम्

यदपि एकक्षणस्थायि कारकं स्यादित्युद्घोषितं परैः—तदप्यसत्— कार्यनिष्पत्तिपर्यन्तत्वादवस्थानस्य । एकेन च क्षणेन कार्यनिष्पत्तेरघटमानत्वात् । कार्यनिष्पत्तेरूर्ध्वं तु सामग्री विप्लवते न समग्राणिः तेषामेकैकशः क्वचित्क्वचिदुपलम्भात् चक्रसूत्रदण्डादीनाम् । इत्थं स्थिराणामेव पदार्थानां अर्थक्रियासामर्थ्यः समर्थिसमिति न ततः क्षणभङ्गसिद्धिः ॥ § 7637

एवंच सत्त्वनित्यत्वयोः विरोधात्—सत्त्वप्रतीत्यैव एकचन्द्रबुद्धिवत् तदितरनिराकरणमित्यादि यत् प्रलपितं तत् प्रतिक्षिप्तं भवति ॥ § 7638
II.327/KSV

## ध्वंसस्यानपेक्षत्वनिराकरणम्

यदप्यभाणि नाशं प्रत्यनपेक्षत्वात् क्षणिकाः पदार्था इति—तदपि यत्किंचित्—दण्डादिव्यवहारान्वयव्यतिरेकानुविधायिनस्तत्कार्यस्य घटाद्यभावस्य विस्तरतः प्रमाणचिन्ताऽवसरे प्रसाधितत्वात् । प्रध्वंसाभावश्च विनाश इत्युच्यते ॥ § 7639

नश्वरानश्वरत्वादिविकल्पास्तु न साधवः ।
सामग्र्यधीनः प्रध्वंसः भावानामात्मलाभवत् ॥§ 7641

मुद्गरादिसामग्र्या घटस्य किं क्रियते ? मृत्पिण्डादिसामग्र्या किमस्य क्रियते ? आत्मलाभ इति चेत्, अनयाऽप्यात्महानं करिष्यते ॥ § 7642

---

८ ] प्र— nyāma-wit__kha
१६ ] पक्षेण च तेषामेक— nyāma-wit__kha
१७ ] संप— nyāma-wit__kha
२० ] सत्य— nyāma-wit__kha
२ ] द्रुघणा— nyāma-wit__ca; nyāma-wit__ja

---

११ र] कृष्णात् कृष्णतरो भवती । प्रत्येकमल्पशक्तित्वेऽपि सामग्रीदशायां मिलिता शक्ततरा भवति सामग्री ॥
१६ ते] विप्लवते—रिक्तसामर्थ्या भवति । अन्ततः अदृष्टविशेषस्य गलितत्वात् ॥
६ त्] भावानां स्वरूपलाभः यथा सामग्र्यधीनः, तथैव तेषां स्वरूपच्युतिरपि सामग्र्यधीना ॥

## भावाभावयोरुभयोरपि हेत्वधीनत्वम्

ननु ! *नश्वरश्चेत् तत्कारणमफलम्, अनश्वरत्वे त्वशक्तमिति— उत्पत्तावपि तुल्योऽयं प्रलापः । भवनस्वभावश्चेत् घटः स्वत एव भवति, किं दण्डादिकारकसामग्र्या ? अभवनस्वभावस्तु कर्तुमशक्यः, खरविषाणवदिति ॥ § 7643

कारकव्यापारकार्यत्वदर्शनात् अपर्यनुयोग एष इति चेत्, विनाशे च समः समाधिः, उत्पत्तिवत् विनाशस्यापि कारकान्वयव्यतिरेकानुविधायित्वात् ॥ § 7644

II.328/KSV

तस्मादुत्पन्नमात्रस्य विनाशो नास्ति वस्तुनः ।
आविनाशकसद्भावादवस्थानमिति स्थितिः ॥§ 7646

## घटादीनां नित्यत्वापादनपरिहारः

ननु ! सापेक्षाणां भावानां नावश्यंभाविता भवेदिति घटस्य विनाशहेतुर्नोपनिपतेदपि कदाचित्—*इत्येवमसौ किं नित्य एव भवत्विति —अहो ! महान् प्रमादः, उत्सन्नाः प्रजाः, पतितो महान् वज्राशनिः, दुष्परिहरोऽयं दोष उत्थितः । यदि घटो नित्यो भवेत्, एष कालाग्निरुद्र इव त्रिभुवनमपि भस्मीकुर्यात् ॥ § 7647

## घटादीनां सावयवत्वेन नाशावश्यंभावः

अपि च, रे मूढ ! सावयवस्य, आश्रितस्य कार्यस्य च नूनमवयवविभागात्—आश्रयविनाशाद्वा यदा कदाचिद्भवितव्यमेव विनाशेनेति कस्तन्नित्यत्वशङ्कावसरः ? तथा हि न रामाभिषेककलशमद्य यावदनु वर्तमानमीश्वरवेश्मन्यपि पश्यति लोक इत्यवश्यंभावी तस्य विनाशहेतुः । तस्मात् सहेतुको विनाश इति न स्वत एव विनश्वरा भावाः ॥ § 7648

## वस्तुस्थैर्यं प्रत्यक्षसिद्धम्

११ ] सां— nyāma-wit_kha
१४ ] त्वम्— nyāma-wit_kha
७ ] स्व— nyāma-wit_kha

९ *] घटः इति शेषः । यदि घटः नश्वरस्वभाववान् तर्हि कारकवैयर्थ्यम् । अनश्वरत्वे कारकाणि तदुत्पादनसामर्थ्यशून्यानि भवेयुः ॥
१८ सापेक्षाणां ] भावानां—पदार्थानाम् । परापेक्षत्वमेव हेतुः । यथा घटादिः दण्डचक्राद्यपेक्षः, कदाचित् सामग्रीवैकल्यान्न भवत्यपि, एवं ध्वंसोऽपि कदाचिन्न भवत्यपि । ततश्च एकोऽपि वा घटः नित्यः स्यादित्याक्षेपः ॥
१९ *] इत्येवमित्यादि आशयोद्घाटनम् । उपहसति—अहो इत्यादि ॥

अपि च प्रत्यज्ञा स्वतेजोविभवविधूतबौद्धसिद्धान्तध्वान्तसिद्धान्तसंततिर-भङ्गुरमेव भावनिवहमनिशमुपदर्शयन्ती दिनेशदीधितिदशशत विभागवती II.329/KSV सर्वतो जाज्वलीतीति कस्तस्य सत्यं क्षणभङ्गिनो भावानभिदध्यात् । यच्च किंचन तस्यामपभाषितं—तत्सर्वमसमंजसम् ॥ § 7649

## प्रत्यभिज्ञाप्रामाण्यम्

यत्तावदिदं विकल्पितं—स एवायमिति किमेकं विज्ञानम्, उत द्वे ? इति—तत्रोच्यते—सामानाधिकरण्येनैकविषयावद्योतनाप्रवणैकप्रतीतिसंवेदनात् केयं द्वित्वाशङ्का ? योऽयमयं सः, यः सः सोऽयमित्येकत्वावमर्शिनी खल्वियमेका । स्वतस्तु याऽनेकप्रतीतिरनुभूयते घटोऽयमिति तन्न निरन्तरोत्पन्नघटज्ञानपटस्मरणवत् भिन्नविषयं बुद्धिद्वयमिति ॥ § 7650

## प्रत्यभिज्ञायाः प्रत्यक्षत्वम्

यत्तु किमेकप्रतीतिजन्मनि करणमिति— § 7651

कार्यं चेदवगम्येत किं कारणपरीक्षया ।
कार्यं चेन्नावगम्येत किं कारणपरीक्षया ॥§ 7653

न च कार्यमकारकं भवितुमर्हति, कार्यत्वस्यैवानुपपत्तेः इति भवितव्यमेव तत्र कारणेन । अस्ति च संस्कारसहितमिन्द्रियमस्याः प्रतीतेः कारणं पृथक् । कार्यताऽपि तयोर्दर्शनादेव गम्यते । तदिह सन्निहितयोरेककार्यजन्मनि व्यापारात् तदपि किमिति नेष्यते । मृत्तन्तुकार्यमेकमदर्शनादेवानभ्युपगतम् । इदं तु दृष्टत्वाद्दुरपह्नवम् ॥ § 7654
II.330/KSV

*क्वचित्तु केवलेन्द्रियव्यापारादपि—कार्यादर्शनान्न सर्वत्र तथाविधस्यैव तस्य कार्यकारित्वं, सहकार्यपेक्षेण कार्यान्तरजननात् ॥ § 7655

## प्रत्यभिज्ञाविषयनिर्णयः

९ ] बोध— nyāma-wit_kha
९--१० ] द्विनिर्भ— nyāma-wit_kha
१२ ] तस्य सम— nyāma-wit_kha
१३ ] क— nyāma-wit_ca
१४ ] न नै— nyāma-wit_kha
१५ ] योऽयं समः यः समो nyāma-wit_kha
१६ ] नी— nyāma-wit_kha
१७ ] व— nyāma-wit_gha
६--७ ] वा— nyāma-wit_kha

११ ती] सूर्यालोकरहितसमयेऽपि हि प्रत्यभिज्ञा भवति ॥
२ या] उच्यतां यत्किञ्चित्कारणम्, आवश्यकत्वात् ॥
६ व] दर्शनं—अन्वयव्यतिरेकानुभवौ ॥
९ *] ननु तर्हि इन्द्रियजन्यं सर्वमपि प्रत्यभिज्ञा स्यादिस्यत्राह—क्वचिदित्यादि ॥

यत्तु उक्तं—कीदृशोऽर्थः प्रत्यभिज्ञायामवभातीति—तत्रैते वादिनः शतकृत्वो दत्तोत्तरा अपि यत्पुनरस्माननुयुंजते, तेन बलवदुद्विग्नाः स्मः । उक्तमत्र प्रमितयः प्रष्टव्याः, न तु वादिन इति । अतीतकालविशिष्टो वर्तमानकालावच्छिन्नश्चार्थ एतस्यामवभासते ॥ § 7656

## एकस्य कालद्वयसंबन्धः न विरुद्धः

ननु पूर्वापरौ कालौ परस्परविरोधिनौ ।
नैकत्र विशतस्तेन तद्भेदाद्वस्तु भिद्यते ॥§ 7658

नैतदेवम्—केयूरकिरीटकटककुण्डलादिभेदेऽपि देवदत्तस्याभदात् । अवयव्यस्ति, नास्तीति परीक्षणं वादान्तरगमनम् । अपवर्गाह्निके च विस्तरेणावयवी साधयिष्यत इत्यास्तामेतत् ॥ § 7659

कुण्डलादीनामविरोधादिति चेत्—न—लाक्षणिकविरोधाभ्युपगमात् । परस्परपरिहारव्यवस्थितात्मनो हि सर्वे भावा इति भणद्भिर्भवद्भिरभ्युपेयत एषां विरोधः ॥ § 7660

II.331/KSV

## एकस्य कालद्वयसंबन्धो न विरुद्धः

ननु ! केयूरादीनां विरोधेऽपि तदाऽवस्थानादेकदेवदत्तसंबन्धित्वमभ्युपपद्येतापि । भूतवर्तमानयोस्तु युगपदसन्निधानात् कथं तद्विशिष्टता स्तम्भादेरुच्यते—प्रतीयते च द्वौ कालौ, न च सन्निहिताविति चित्रम् ॥ § 7661

किं भूतोऽपि काल इदानीमस्ति—मैवम्—नासावस्तीत्युच्यते, अपि त्वासीदिति । अस्तीत्युच्यमानः वर्तमान एव स्यात्, न भूतः ॥ § 7662

हन्त तर्हि भूतः भूतत्वादेव नेदानीमस्तीति कथं प्रतिभासते ? भूतत्वेनैवेति ब्रूमः । भूतः कालो भूततयैव गृह्यते, वर्तमानोऽपि वर्तमानतयैव, अर्थस्तूभयानुगत एक एव, तथा ग्रहणात् ॥ § 7663

## भूतकालस्येदानीं भानसंभवः

२१ ] व्यव— nyāma-wit_kha
२ ] त— nyāma-wit_kha
५ ] द— nyāma-wit_kha

२० विरोधादिति ] भूतभविष्यत्वयोस्तु विरोधः स्पष्टः ॥
२० मात् ] न हि कुण्डलविशिष्टवेषेण केयूरविशिष्टत्वं संभवति ॥
२ योस्तु ] यद्यपि सिद्धान्ते युगपत्सन्निधानं न; किन्त्वेकवस्तुनि । परन्तु क्षणिकवाददृष्ट्याऽयमाक्षेपः ॥

ननु भूतकालस्येदानीमभावात् तद्विषयं ज्ञानमनर्थजं स्यात्—न— धर्मिणस्तदवच्छिन्नस्य ज्ञानजनकस्य भावात् । भूतः कथमवच्छेदक इति चेत्, तथा प्रतिभासात् । प्रतीतिमवमृशतु भवान् स एवायम् इति । यः पूर्वमासीत्, स इदानीमप्यस्तीति । सोऽयमतीतकालविशिष्टोऽर्थ एतस्यां बुद्धाववभासते ॥ § 7664

## प्रत्यभिज्ञाया इन्द्रियजत्वम्

ननु । असता भूतकालेन विशेषितमर्थं कथमिन्द्रियजा प्रतीतिरालम्बनीकुर्यात् ? उच्यते— § 7665

II.332/KSV

अन्त्यसंख्येयसंवित्तिकाले प्रागवलोकिताः ।
यथा शतादिज्ञानानि जनयन्ति पदातयः ॥§ 7667

अतीतकालसंसर्गो भवन्नेवं विशेषणम् ।
स्तम्भादिप्रत्यभिज्ञायाः कारणत्वं प्रपद्यते ॥§ 7669

## अविद्यमानस्यापि विशेषणतया भानसंभवः

संख्येयाः पदातयः सन्ति, अतीतकालस्तु नास्तीति चेत्—कपित्थेषु भक्ष्यमाणेषु किं वक्ष्यति देवानां प्रियः ? शतं कपित्थानां भक्षितवान् वाहीक इति प्रतीतिदर्शनात् । न च नवनवतावनुपयुक्तेषु कपित्थेषु एकत्रैव शतं मया भक्षितम् इति मतिः । अतः यथा तत्रातिक्रान्तान्यपि नवनवतिकपित्थानि शतप्रतीतिहेतुतामुपयान्ति, प्रतिभासोपारूढत्वात्; एवमतीतकालयोगोऽपि प्रतिभासमानः प्रत्यभिज्ञामाधास्यतीति ॥ § 7670

## विकल्पानां प्रामाण्यम्

विकल्पमात्रं शतप्रत्यय इति चेत्, भो महात्मन् ! किं वा तव न विकल्पमात्रम् । किन्तु जीवन्त्यमी सविकल्पकप्रामाण्यवादिनः ॥ § 7671

---

१० ] स्या— nyāma-wit__kha
१७ ] घटाद— nyāma-wit__ca
१ ] पदात— nyāma-wit__ca
२ ] ह्री— nyāma-wit__ja
३--४ ] ष्वत्रैकशत(?) शतमिति भवति nyāma-wit__kha

---

१७ था ] शतादिगणनवेलायां अन्तिममेव वस्तु इन्द्रियसन्निकृष्टम् । अथापि शतपदात्यादिज्ञानं प्रत्यक्षमेवेति सर्वे वदन्ति । तद्वदिहापि ॥
३ षु ] एकत्रैव—हठात् एकक्षणे ॥

यश्च सामान्यसंसिद्धौ प्रकारः प्राक् प्रदर्शितः ।
योज्यः स एव द्वित्वादिसंख्यासद्भावसिद्धये ॥§ 7673

इत्यलं कथान्तराक्षेपेण ॥ § 7674
II.333/KSV

## प्रत्यभिज्ञायां गतकालस्य विषयत्वम्

ननु ! अतिक्रान्तग्राहि प्रत्यभिज्ञानं, इन्द्रियार्थसन्निकर्षजं चेति नः कौतुकमिदम् । किं तत्कौतुकम् ? अर्थस्तावदस्य पुरोऽवस्थितोऽस्त्येव जनकः स्तम्भादिः ॥ § 7675

ननु ! अस्ति, स तु वर्तमानकाल एव—न केवलं, वर्तमान-कालयोगिनाऽर्थेन तत्प्रत्ययजननात्, तस्य वर्तमान इवातीतोऽपि कालः अवच्छेदकतां प्रतिपद्यते । स च तदवच्छिन्नोऽर्थः इदं च ज्ञानमादधातीत्य-र्थजमेतत् इन्द्रियजमपि भवति, तद्भावाभावानुविधानात् ॥ § 7676

## अतीतविषयकस्यापीन्द्रियजन्यत्वम्

ननु ! अतीतेऽर्थे कथमिन्द्रियं प्रवर्तते ? § 7677

कस्यैष पर्यनुयोगः ? नेन्द्रियस्य, अचेतनत्वात् । पुरुषस्तु अविष्फारिताक्षस्तु लभत इति सोऽप्यननुयोज्यः ॥ § 7678

## प्रत्यभिज्ञाया अबाधितत्वम्

ननु ! अतीतग्राहित्वात् अप्रामाण्यं कल्पयितुं युक्तमस्या बुद्धेः, नेन्द्रिय-स्यातीतेऽपि सामर्थ्यं दृष्टपूर्वमिति—मैवम्—अप्रामाण्यं नाम बाधकप्रत्ययात् कल्प्यते, न चासावस्ति प्रत्यभिज्ञायाम् । अनुमानं तु बाधकं प्रतिक्षिप्तम् ॥ § 7679

## प्रत्यभिज्ञाया अप्रामाण्ये हेतुर्नास्ति

---

११ ] क्षे— nyāma-wit__kha   nyāma-wit__gha
२ ] दृष्ट— nyāma-wit__kha
३ ] ताव— nyāma-wit__kha;

---

९ श्च ] अनेकव्यक्त्यनुगतसामान्यग्रहणन्यायेनैव, अनेककालानुगतव्यक्तेरपि ग्रहण मुपपादनीयमिति भावः ॥

नन्‌ ! कारणदोषादपि कल्प्यत एवाप्रामाण्यम्‌ ॥ § 7680
आयुष्मन्‌ ! सोऽप्युच्यताम्‌ ॥ § 7681
१ II.334/KSV

उक्त एवेन्द्रियस्यातीतग्रहणविषये सामर्थ्यविरहः । वत्स ! न सम्यगुक्तवानसि । नायमिन्द्रियस्य तिमिरादिरिव दोषः । अतीते काले स्वतन्त्रे तस्यासामर्थ्यम्, न तद्ग्राह्यवर्तमानवस्तुविशेषणीभूते । संस्कारसचिवस्य चास्य सामर्थ्यम्, न केवलस्येत्युक्तम्‌ । तस्मादतीतकालविशेषितपुरोवर्तिवर्तमानस्तम्भादिपदार्थविषयमिन्द्रियार्थसन्निकर्षोत्पन्नमेवेदं प्रत्यभिज्ञाज्ञानमिति सिद्धम्‌ ॥ § 7682

## प्रत्यभिज्ञाया मानसत्वं वा

अथवा पूर्वविज्ञानविशिष्टग्राहि मानसम्‌ ।
इष्यतां प्रत्यभिज्ञानं गन्धवत्कुन्दबुद्धिवत्‌ ॥§ 7684

यथा हि लोचनगोचरेऽपि कुन्दकुसुमे तदविषयगन्धविशेषिते बाह्येन्द्रियद्वारकं ग्रहणमघटमानमिति मानसमेव सुरभि कुसुममिति ज्ञानं, एवं पूर्वविज्ञानविशेषितस्य स्तम्भादेर्विशेषणमतीतक्षणविषय इति मानसी प्रत्यभिज्ञा । II.335/KSV पूर्वप्रवृत्तबाह्येन्द्रियोपजनितज्ञानविशिष्टबाह्यविषयग्राहिणि चान्तःकरणेऽभ्युपगम्यमाने सति नान्धाद्यभावप्रसङ्ग इति बहुशः कथितम्‌ ॥ § 7685

नन्‌ ! कुन्दादेर्विशेषणं वर्तमानमस्ति सौरभम्‌ । इह त्वतीतं पूर्वविज्ञानमिति कथं विशेषणम्‌ ?—उक्तमत्र । किं तेन सता करिष्यसि ? शतादिबुद्धिष्वतिक्रान्तस्यापि कपित्थादेः कारणत्वदर्शनादिति ॥ § 7686

तदेवमन्तःकरणजन्मनाऽपि प्रत्यभिज्ञानेन स्थैर्यमवस्थाप्यत एव भावानाम्‌ ॥ § 7687

---

१. तथाचार्थजन्यत्वात्तस्य प्रत्यक्षत्वम्‌ ॥

---

७ ] स— nyāma-wit__kha
९ ] स्य— nyāma-wit__kha
१०--११ ] पूर्ववर्ति— nyāma-wit__kha
१३ ] र्वाभिमा— nyāma-wit__kha
१३ ] ब्राह्ममाणं— nyāma-wit__kha
७ ] म— nyāma-wit__kha

---

१४ भिज्ञानं ] इदमत्र तत्त्वम्—लौकिकसन्निकर्षद्वयजन्यमेकं ज्ञानमिव, संस्कार-इन्द्रियजन्यं सुरभि कुसुमम्‌ इत्यादिज्ञानमपि सर्वसंमतम्‌ । कुसुमं तु चाक्षुषम्, सौरभं तु घ्राणग्राह्यम्‌ । इन्द्रियद्वयं तु युगपन्न प्रसरति । संस्कारस्य इन्द्रियसहकारित्वात्‌ निरंशत्वाच्च प्रत्यभिज्ञायाः प्रत्यक्षमेव तत्‌ । अथवा संस्कारजन्यस्मृत्युपस्थापितं विशेषणं भासते । इयमेव ज्ञानलक्षणेत्युच्यते । तथा च लौकिकालौकिकसन्निकर्षद्वय जन्यं ज्ञानं प्रत्यभिज्ञेति न दोषः । ग्रन्थकारस्तु अलौकिकं सन्निकर्ष नाङ्गीकरोतीति मानसं तदिति वदति । मानसत्वे बाह्यत्वेनानुभवस्यास्वारस्यापत्त्या अनन्तरकालिकैः अलौकिकस्सन्निकर्षः अङ्गीक्रियत इति ज्ञेयम्‌ ॥
५ ङ्ग ] मनसः बाह्ये विषयेऽप्रवृत्त्येति हेतुः । मनः बाह्ये नैव प्रवर्तत इति न । स्वातन्त्र्येण न प्रवर्तते इत्येव ॥

## वस्तुस्थैर्यवादः

या तु मुण्डितकेशादिप्रत्यभिज्ञानतुल्यता ।
स्तम्भादिप्रत्यभिज्ञायाः कथ्यते साऽप्यसङ्गता ॥§ 7689

तत्रान्तराले मुण्डितशिरोदर्शनमेव बाधकम् । इह तु न किंचिदस्ति ॥
§ 7690

अत एव शब्दे तदेव स्फुरन्त्या विनाशबुद्ध्या वैधुर्यमुपनीता प्रत्यभिज्ञा स्थास्नुतामुपस्थापयितुमसमर्थेत्युक्तम् ॥ § 7691

ज्वालादावपि तैलवर्तिक्षयाद्यनुमानबाधितत्वात् भ्रान्ता प्रत्यभिज्ञा, न तु तथा स्तम्भादावनुमानमपि बाधकमस्ति । सत्त्वानुमानं तु निरस्तमेव ॥
§ 7692

II.336/KSV

## अनुमानेन प्रत्यक्षबाधेऽपि नात्र तद्युक्तम्

यद्यपि नैष नियमः—प्रत्यक्षानुमानयोर्विरोधे प्रत्यक्षं बलीय इति, त्वरित-तरपरिभ्रमितचक्रीभवदलातग्राहिणः प्रत्यक्षस्य अनुमानबाध्यत्वदर्शनादिति—तथापि प्रकृतं क्षणिकत्वानुमानं अन्यथासिद्धं, अनन्यथासिद्धं तु प्रत्यक्षमिति प्रत्यक्षमेव क्षणिकत्वानुमानस्य बाधकम् ॥ § 7693

न चेतरेतराश्रयत्वम्, अनुमानमिथ्यात्वनिबन्धनप्रत्यभिज्ञाप्रत्यक्षप्रामाण्यान-भ्युपगमात् । स्वहेतुबलवत्तयैव प्रत्यभिज्ञाप्रत्यक्षं प्रमाणम् । न तस्येदं दैन्यम्, यदनुमानमिथ्यात्वे सति तत्प्रमाणीभविष्यतीति ॥ § 7694

## ज्ञानस्य क्षणिकत्वासंभवः

आस्तां वा प्रत्यभिज्ञानं, य एष प्रथमाक्षजः ।
स्तम्भादिबोधस्तेनापि बाध्यते क्षणभङ्गिता ॥§ 7696

तुल्यसामग्र्यधीनत्वस्य निराकृतत्वात्, निराकारत्वस्य निराकरिष्यमाण-त्वात्, अन्वयव्यतिरेकोपकृतमानसप्रत्यक्षनिश्चितजनकत्वस्य चार्थस्यावभास्य-त्वनिश्चयात्, उत्पन्नोऽर्थो ज्ञानं जनयति, जातेन च तेन ज्ञानेनगृह्यत इति

१५ ] स— nyāma-wit__kha
१६ ] तु न तामव— nyāma-wit__kha
१६ ] तुं— nyāma-wit__kha
२२ ] था— nyāma-wit__kha
२ ] न— nyāma-wit__kha

११ तु ] लूनपुनर्जातकेशादीत्यर्थः ॥
१५ भिज्ञा ] प्रत्यभिज्ञा—स एवायं गकारः इत्यादीति शेषः ॥
३ ति ] अनुमानमिथ्यात्वाधीनं न प्रत्यक्षप्रामाण्यम्, किन्तु स्वकारणादेव ॥

बलात् द्वित्रक्षणावस्थायित्वमस्यापद्यत इति कुतः क्षणिकत्वम् ? § 7697
II.337/KSV

## घटादीनां स्थिरत्वम्

यदि लब्धस्वरूपोऽपि न नष्टः प्रथमे क्षणे ।
हेत्वन्तराद्विनाशोऽस्य न स्वरूपनिबन्धनः ॥§ 7699

विचित्रा च पदार्थानां प्रतीतिरिह दृश्यते ।
चिरन्तनमतिः काचित् काचित्तत्कालजा मतिः ॥§ 7701

सलिलाहरणव्यग्रकुम्भावगतिरन्यथा ।
तथैव कन्दकाकृष्टकुम्भावगतिरन्यथा ॥§ 7703

## रविगुप्तपक्षनिरासः

एतेन रविगुप्तोऽपि परिम्लानमुखः कृतः ।
क्षणिकत्वक्षमाध्यक्षसमुत्प्रेक्षणपण्डितः ॥§ 7705

तथा हि—वर्तमानवस्तु विग्रहग्राहिविज्ञानं अनन्तरोक्तनयेन स्वजन कार्थप्रतिभासनात् द्विक्षणस्थायितामर्थस्य गमयतीत्युक्तम् । आद्यं च किंचिद्विज्ञानं अनागतकालस्पर्शि भवति । यथाऽऽह भट्टः— § 7706

रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते§ 7707

इति । उत्तरमपि प्रत्यभिज्ञानं अतीतकालावच्छिन्नमर्थमवद्योतयतीति दर्शितम् ॥ § 7708
II.338/KSV

---

१ ] स्यो— nyāma-wit__kha
२ ] दित्व— nyāma-wit__kha
५ ] प्र— nyāma-wit__kha

---

१ त] अयं घटः इति खलु निषयाभिमुखोऽनुभवः । स च पूर्वं विषयस्य ज्ञानाभिमुखत्वकृतः । विषयस्य ज्ञानाभिमुख्यमेव विषयीकरणम् । अतः अन्ततः क्षणद्वयावस्थानं ज्ञानानामावश्यकम् ॥
११ नः] अन्ततः ज्ञानस्य द्विक्षणावस्थानमावश्मकमित्युक्तम् । घटादौ तु वैलक्षण्यात् स्थित्वस्य सिद्धिः ॥
३ स्तु] विग्रहः—स्वरूपम् ॥
५ र्शि] न हि समनन्तरे क्षणे सर्वं नङ्क्ष्यतीति कस्यापि प्रतीतिः ॥

## अतीतकालग्रहणेऽप्युत्पत्तेरग्रहणम्

न चातीतानागतजन्मग्रहणमाशङ्कनीयम्, इयति कारणसामर्थ्यनियमात् । न ह्यतीतानागतजन्मग्रहणमशक्यक्रियमिति यदपि दृश्यमानं ग्रहणं, तदप्यपह्नोतुं युक्तम् ॥ § 7709

न चैतावताऽतीतानागतकालावच्छिन्नवर्तमानवस्तुग्रहणमात्रेण सामान्यतोदृष्टेन अदृष्टमप्यतीतानागतज्ञानं कल्प्यम् । यथादर्शनं हि वस्तूनि व्यवस्थाप्यन्ते, न तु किंचिद्दृष्टवाऽन्यदपि कल्प्यते, दृष्टमपि वा निह्नूयते इति ॥ § 7710

## वस्तूनां स्थिरत्वं प्रत्यभिज्ञाग्राह्यम्

अपि च अनिमेषदृष्टेरत्रुटितसत्ताकस्तम्भादिपदार्थग्राहि प्रत्यक्षमुपपद्यते । तत् कथं क्षणिकग्राहि कथ्यते ॥ § 7711

यच्च तत्र विकल्पितं—अतीतानागतक्षणयोः असन्निहितत्वेन प्रत्यक्ष ग्राह्यताऽनुपपत्तेः वर्तमानक्षणस्य चातिसूक्ष्मत्वात् तत्कालग्राहिणा प्रत्यक्षेण क्षणिकत्वमेव गृहीतं भवतीति—तदुपपन्नम्—मा नामाभूदतीतानागतकालग्रहणं, वर्तवान एव तु तत्रानिमेषदर्शने कियान् काल इति चिन्त्यताम् । निमेषकृतस्यापि दर्शनविच्छेदस्यानवकाशात् । यावद्धि दर्शनं न विच्छिन्नं, तावान् वर्तमानः काल इति तद्ग्रहणेन स्थैर्यं गृहीतं भवति, न क्षणिकत्वम् ॥ § 7712

II.339/KSV

## वर्तमानकालस्य न क्षणरूपत्वम्

ननु ! तावानसौ कालः क्षणसमुदायो भवति, न क्षणः । क्षणश्चैक एव वर्तमानो भवति । अतः पूर्वापरौ क्षणावतीतानागतौ भवतः । तयोश्च न ग्रहणमित्युक्तम् ॥ § 7713

भो महात्मन् ! सिद्धे क्षणकत्व एव एवं शक्यते वक्तुम्, न तत्साधनावसरे । कालो ह्येको नित्यो विभुरिति साधितोऽनुमानपरीक्षायाम् । न तु क्षणसमुदायात्मा कालः । कालस्य तु भेदाः क्रियोपजननविनाशाद्युपाधिनिबन्धनाः कल्प्यन्त इत्यपि तत्रैव परीक्षितम् । तदयमनिमेषदृष्टेः दर्शनविच्छेदानुपग्रहात् तावानेकः कालः स इति वर्तवान एव भवति नानाक्षणसमुदायः । क्षणसमुदायात्मकेऽपि वा काले दर्शनविच्छेदानवधारणात् क्षणसमुदाय एव वर्तमानीभवतु ॥ § 7714

---

८ ] याव— nyāma-wit__kha
११--१३ ] स वर्तमान एव—

nyāma-wit__kha

---

१८ म्] कालस्यातीन्द्रियत्वेन अज्ञातस्सत्वात् ॥
१० दृष्टेः] अनिमेषदृष्टिः—परमात्मा ॥
११ ति] तत्तद्वस्तुदृष्टयेति शेषः ।

तावन्निमेषाः दिनानि वा यत् एवं वर्तते, तावनेक एव सः कालस्तस्य भवति ॥

## कालस्याप्रामाणिकत्वेऽपि न क्षणिकत्वसिद्धिः

ननु ! कालो नाम न कश्चित् पारमार्थिकः पदार्थ एव परिदृश्यमानः वर्तमानादिव्यवहारहेतुः । स च न चिरमनुभूयत इति क्षणिक उच्यते—
§ 7715

भिक्षो ! अलमवान्तरगमनेन । मा भूत् कालः । पदार्थस्त्वनिमेषदृष्ट्य-विच्छेदान्न नश्यन् दृश्यत इति न क्षणिकग्राहि प्रत्यक्षम् ॥ § 7716
II.340/KSV

## ज्ञानस्यास्थिरत्वेऽपि वस्तुस्थैर्योपपत्तिः

ननु ! भवद्भिरपि न स्थिरं ज्ञानमिष्यते । क्षीणे च ज्ञाने सोऽर्थो द्वितीयक्षणे केन गृह्येत ? ज्ञानान्तरेण तु गृह्यमाणः स एवेत्यत्र को निश्चयः ? § 7717

अनिमेषदृष्टेर्ज्ञानं न क्षीयत एवेत्येके ॥ § 7718

अथवा किं न एतेन । न हि विषयप्रतिभासकाले ज्ञानमवभासत इति असकृदुक्तं, वक्ष्यते च । तेन तत्कीदृशमिति कुतो वयं विद्मः । अर्थस्त्व-विच्छिन्नसत्ताक एव गृह्यते । ज्ञानं तु वर्तमानकालमप्यतीतानागतकालग्राहि भवति; स्मरणमिव, भूतभविष्यद्वृष्ट्यनुमानमिव ॥ § 7719

## इन्द्रियस्य, सन्निकर्षस्य, अर्थस्य च स्थिरत्वम्

ननु ! इन्द्रियव्यापारो न क्षणान्तरस्थायीति तस्मिन्नसति कुतोऽर्थस्य विततकालताग्रहणम् ? § 7720

भदन्त ! भवतु, श्रान्तोऽसि । लज्जस्वैवंब्रुवाणः । निमेषकृतोऽपि विच्छे-दोऽस्य नास्ति । अथ च न स्थिरः इन्द्रियव्यापार इति ग्राहिकतामात्रम् । सन्निकर्षश्चास्य विषयग्रहणे व्यापारः । *स च स्थिर एव । तस्माद्वितत-कालस्य वस्तुनः प्रत्यक्षेण ग्रहणमिति स्थितम् ॥ § 7721
II.341/KSV

---

१८ ] दवच्छिन्नपत्ताक एव— nyāma-wit__kha
१९ ] ने— nyāma-wit__ca
५ ] स्य— nyāma-wit__kha
७ ] तदलं— nyāma-wit__kha
७ ] म— nyāma-wit__kha
८ ] साहसि— nyāma-wit__kha

---

१ त] ज्ञानं तु अनुव्यवसायेन मानसेन गृह्यते ॥
९ *] सः—विषयः । इदमत्र तत्त्वम्—कालः अतीन्द्रियः, नित्यः, व्यापकश्च । परन्तु उपाधिवशात्तत्तद्व्यवहारः । उपाधीनां घटादीनां प्रत्यक्षत्वात् प्रत्यक्षत्वेन व्यवहारः । जन्यमात्रत्य कालोपाधित्वात्, घटः यावत्कालं वर्तते, तावान् एकः घटकाल इत्युच्यते । क्षणोपाधिदृष्ट्या घटस्य नानाकालसंबन्धेऽपि घटस्य स्वकालदृष्ट्या न नानाकालसंबन्धः, किन्तु एक एव स काल इति न कश्चन विरोधः ॥

## ध्वंसस्य हेतुजन्यत्वाद्वस्तुस्थैर्यसिद्धिः

एवंच स्थिते न स्वरूपमात्रनिबन्धन एव भावानां विनाशः, किंतु हेत्वन्तरनिबन्धनो भवति । ततश्च आविनाशहेतूपनिपातात् अवस्थानमेव भावानाम् । अविद्यमानविनाशकारणानां च नित्यत्वमेव व्योमादीनामिति सिद्धम् ॥
§ 7722

## सत्त्वासत्त्वयोर्दर्शनादर्शनरूपत्वाभावः

यत्पुनरभाणि—दर्शनादर्शने एव सत्त्वासत्त्वे भावानामिति—तदपि व्यामूढभाषितम् । दर्शनादर्शनाभ्यां भावाभावयोः परिच्छेदः, न पुनः दर्शनादर्शने एव भावाभावौ ॥ § 7723

अभावश्च विस्तरतः प्राक् प्रसाधितः । स च सहेतुक इति न स्वत एव विशरारवो भावाः ॥ § 7724

## क्षणिकवादे व्यवहारानुपपत्तिः

एवं त्वनिष्यमाणे पदार्थस्थैर्यपक्षे—ज्ञानजनकस्य नियतस्य वस्तुनो दर्शनम्, दर्शनविषयीकृतेऽस्य प्रवृत्तिः, प्रवृत्तिविषयीकृतस्य प्राप्तिरिति व्यवहारो न स्यात्, अर्थक्षणनानात्वात् ॥ § 7725

## क्षणिकवादे बाध्यबाधकभावानुपपत्तिः

बाध्यबाधकभावश्च क्वचित् ज्ञानानां दृष्टः । स च न स्यात्; पूर्वावगतरजतादिविषयाभावग्राहिणो ज्ञानस्य गृहीतमुद्गरदलितश्चधटा भावज्ञानवत् बाधकत्वानुपपत्तेः ॥ § 7726

II.342/KSV

पूर्वदृष्टस्य स्मरणं, स्मृतस्य कस्य चित् प्रत्यभिज्ञानं, प्रत्यभिज्ञातस्य च गृहादेरेवार्धकृतस्य समापनं इत्यादयश्च व्यवहारा विलुप्येरन् ॥ § 7727

## क्षणिकवादनिराससंग्रहः

११ ] मेव— nyāma-wit__kha
११--१३ ] वि— nyāma-wit__kha
१३ ] दण्डा— nyāma-wit__kha
१ ] तु निष्य— nyāma-wit__kha
५ ] घ— nyāma-wit__kha

१३ णानां ] विनाशकारणानि—असमवायिकारणनाशादीनि ॥

अथ सन्तानमाश्रित्य क्रियते तत्समर्थनम् ।
न, तस्य भिन्नाभिन्नत्वविकल्पानुपपत्तितः ॥[§ 7729]

अभेदपक्षे क्षणवत् व्यवहारो न सिध्यति ।
व्यतिरेके तु चिन्त्योऽसौ वास्तवोऽवास्तवोऽपि वा ॥[§ 7731]

अवास्तवत्वे पूर्वोक्तं कार्यं विघटते पुनः ।
वास्तवत्वे स्थिरो वा स्यात् क्षणिको वेति चिन्त्यताम् ॥[§ 7733]

सन्तानिनिर्विशेषः स्यात् सन्तानः क्षणभङ्गुरः ।
न सिध्येत्पुनरप्येवं व्यवहारः पुरोदितः ॥[§ 7735]

अथापि नित्यं परमार्थसन्तं
सन्ताननामानमुपैषि भावम् ।
उत्तिष्ठ, भिक्षो ! फलितास्तवाशाः
सोऽयं समाप्तः क्षणभङ्गवादः ॥[§ 7739]

तदेवं सति सन्तानच्छद्मनो विनिवारणात् ।
लोकयात्रा स्थिरैरेव पदार्थैरुपपाद्यताम् ॥[§ 7741]

## क्षणिकवादे प्रमाणाभावः

एवमनन्तरनिगदितदूषणनिकुरम्बविनिहतप्रसरम् ।
नाध्यक्षं क्षणिकत्वे, न चानुमानं प्रमाणं स्यात् ॥[§ 7743]
II.343/KSV

क्षणभङ्गे निरस्ते च कार्यमाधारवद्ध्रुवम् ।
अतो ज्ञानादिकार्येण युक्तमाश्रयकल्पनम् ॥[§ 7745]

सुखादेरपि कार्यस्य विज्ञानाद्व्यतिरिक्तता ।
प्रागुक्तेति तदप्यन्यद्भवत्यस्यानुमापकम् ॥[§ 7747]

१४ ] कथ्य— nyāma-wit__ca
२ ] प— nyāma-wit__kha

१६ पुरोदितः ] अतश्च सन्तानिनः अतिरिक्तत्वे, सत्यत्वे च स्थिरत्वसिद्धिः । अयमर्थः समनन्तरश्लोके स्पष्टः ॥

## क्षणिकवादे पारलौकिकविलोपः

किंच नांगीकरोषि त्वमात्मानं पारलोकिनम् ।
उपैषि परलोकं च विदितं ते बकव्रतम् ॥§ 7749

कर्मसन्तानिनाऽन्येन यत्कृतं चैत्यवन्दनम् ।
ततोऽद्य फलमन्येन भुज्यतेऽकृतकर्मणा ॥§ 7751

न च निर्वृत्तिरप्यस्य चैत्यवन्दनकर्मणा ।
ज्ञानक्षणेन नैकेन किंचित् कर्म समाप्यते ॥§ 7753

कार्यकारणभावाश्च यस्त्वयोक्तः स दूषितः ।
कार्यकारणभावेऽपि न ह्यन्यत्वं निवर्तते ॥§ 7755

अनैकान्तिकता चास्य सन्तानान्तरबुद्धिभिः ।
उपादानत्वरूपोऽपि विशेषः प्राङ्गिराकृतः ॥§ 7757

कार्पासरागसंक्रांन्तिदृष्टान्तो यश्च वर्णितः ।
सोऽप्ययुक्तः स्वरूपेण तत्रतस्यैव दर्शनात् ॥§ 7759

य एव रागः कार्पासबीजे समुपकल्पितः ।
स एव दृश्यते पुष्पे न तु तस्मात्फलान्तरम् ॥§ 7761

*एवं कर्मानुवृत्तिः स्यात् फलभोगस्तु दुर्घटः ॥§ 7762
II.344/KSV

## क्षणिकवादे कृतहानादिरनिवार्या

कर्मानुवृत्तिरप्येषा न चैकस्यास्ति कस्यचित् ।
कार्यकारणयोर्भेदात् कार्पासकुसुमादिवत् ॥§ 7764

---

९ ] पारलौकिकम्— nyāma-wit_kha
१३ ] णः— nyāma-wit_ca
१६ ] तत्त्वं—क, न्तत्वं— nyāma-wit_kha

---

५ *] कथञ्चित्कर्मानुवृत्तावपि सुखदुःखानुभवस्यान्तिमक्षण एव संभवेन, अन्यः कर्ता, अन्यो भोक्ता इत्यनिवार्यमेव ॥

अन्यत्रैव हि कर्म स्यात् अन्यत्रैव च तत्फलम् ।
न च सन्तानभोगाय कश्चित्कर्मानुतिष्ठति ॥[§ 7766]

फलमस्मान्ममैव स्यात् इति सर्वः प्रवर्तते ।
सर्वथा शाक्यभिक्षूणां परलोको विसंष्ठुलः ॥[§ 7768]

न तत्प्रसाधने तेषां काचिद्गमनिकाऽस्ति वा ॥[§ 7769]

## ज्ञानसन्तानस्याविच्छेदोऽपि दुर्वचः

गर्भादौ प्रथमं ज्ञानं विज्ञानान्तरपूर्वकम् ।
ज्ञानत्वादित्ययं हेतुः अप्रयोजक इष्यते ॥[§ 7771]

मूर्छाद्यनन्तरोद्भूतज्ञानैश्च व्यभिचार्यताम्
मूर्छितस्यापि विज्ञानमस्तीत्येतत्तु कैतवम् ॥[§ 7773]

न ह्यर्थावगतेरन्यद्रूपं ज्ञानस्य किं चन ।
मूर्छादिषु कुतस्तत्स्यात् कुतो वा कललादिषु ॥[§ 7775]

कललादिदशायां वा यदि विज्ञानमिष्यते ।
मातापितृस्थयोरस्तु शुक्रशोणितयोरपि ॥[§ 7777]

ततश्चैकत्र संताने चेतनद्वयमापतेत् ।
चेतनानां बहुत्वं वा दम्पत्योर्बहुपुत्रयोः ॥[§ 7779]

II.345/KSV

## सन्तानानां सौसादृश्यमपि दुर्वचम्

न चैष नियमो लोके सदृशात्सदृशोद्भवः ।
वृश्चिकादेस्समुत्पादः गोमयादपि दृश्यते ॥[§ 7781]

शरीरान्तरसंचारचातुर्यं च धियां कथम् ।
ज्वालादिवन्न मूर्तत्वं न च व्यापकताऽत्मवत् ॥[§ 7783]

---

१६ ] कौतुक— nyāma-wit__kha

४ ] चैतन्य— nyāma-wit__kha

---

१४ क ] कललं—गर्भपिण्डावस्थाभेदः ॥
१८ वा ] अन्यथा घटादीनामपि
तथैवानादित्वं स्यात् ॥

## जननमरणाद्युपपादनमपि क्षणिकवादे दुर्घटम्

*आतिवादिकदेहेन नीयन्ते चेद्भवान्तरम् ।
नन्वातिवाहिकेऽप्यासां कथं संचारसंभवः ॥§ 7785

आस्तामेवैष वा जीवेद्देहेऽपि पथि गच्छताम् ।
प्रदेशान्तरसंचारो ज्ञानानां भवतां कथम् ॥§ 7787

न ह्येषां भूतधर्मत्वं न स्वतो गतिशक्तिता ।
न च जात्यादिवद्वृत्तिः न च व्यापकताऽऽत्मवत् ॥§ 7789

एवं यदैव निष्क्रान्तः विहारकुहराद्भवान् ।
तदा काष्ठीभवेद्देहः ज्ञानसंक्रान्त्यसंभवात् ॥§ 7791

तदयं संक्षेपार्थः त्यक्तव्यो वा निरस्य कौरुकुचीम् ।
सुरगुरुवत्परलोकः नित्यो वाऽऽत्माऽभ्युपेतव्यः ॥§ 7793

II.346/KSV

## आत्मनः ज्ञानसुखाद्युपपत्तिः

यत्त्वस्य चर्मगगनोपमतां विकल्प्य
नाशित्वमुक्तमथवा विफलत्वमेव ।
तन्नैव साधु सुखदुःखदशोपभोग-
योगेऽपि नाशमधिगच्छति नायमात्मा ॥§ 7797

विकृतिश्च तस्य सुखदुःखजन्मना
न हि तादृशी भवति लुप्यते यया ।
सहकारिकारणवशात्तु जायते
तदवश्यमेव समुपैति भोक्तृताम् ॥§ 7801

१३ ] देशा— nyāma-wit_ja
१७ ] कष्टी— nyāma-wit_kha
१७ ] न्ति— nyāma-wit_ca
५ ] दृ— nyāma-wit_kha
१० ] मुप्य येन— nyāma-wit_kha

९ *] आतिवाहिकदेहः—अन्तराभवदेहः ॥
१७ स्य ] कौरुकुची—निर्वक्तुमशक्यः उद्वेगविशेषः । शब्दानुकरणमिदम् ॥
४ ति ] सिद्धान्ते आकाशस्य तुच्छत्वानङ्गीकारात्, विशिष्टरूपेण विकारित्वेऽपि स्वरूपप्रच्युतेरभावाच्च न हानिः ॥

## अवस्थावादः

अथवोपजनव्ययस्वभावः
स्वदशाभेदसमन्वये हि पुंसः ।
फणिनः किल कुण्डलाद्यवस्था-
नुगतस्येव न भिन्नतेति केचित् ॥§ 7805

अवस्था एवैताः प्रसभविलयातङ्कविधुराः
अवस्थाता त्वेकः स्फुरति निरपायस्थिरवपुः ।
असत्यस्मिन् पूर्वावगतविषयाऽनुस्मृतिभुवां
न सिद्धिः कार्याणामिति निपुणमावेदितमिदम् ॥§ 7809

II.347/KSV

## आत्मनः स्थिरत्वज्ञानेन लाभः

ननु विमृशति भोगे कर्म नित्योऽपि नात्मा
न हि नरकनिमग्नो मन्यते कश्चिदेवम् ।
किल यदहमकार्षं प्राग्भवे कर्म पापं
फलमुपनतमस्माद्भुज्यते तन्मयेति ॥§ 7813

कार्योपभोगसमये किमनेन कृत्यं
नास्य प्रवृत्तिरधुना न निवृत्तिरस्मात् ।
यस्त्वप्रवृत्तिजननौपयिकोऽवमर्शः
शास्त्रादसौ भवति शास्त्रविदामवश्यम् ॥§ 7817

विमर्शोऽयं पश्चादपि भवतु दृष्टे तु विषये
मया यूना यत्तत्किमपि सदसद्वा कृतमभूत् ।
ततो वृद्धोऽद्याहं फलमनुभवामीति तदयं
पुमानस्ति स्थायी सुकृतफलभोगादिनिपुणः ॥§ 7821

३ ] य— nyāma-wit_kha
९ ] ति— nyāma-wit_kha

१२ केचित् ] तथोक्तं भट्टेन—विक्रियामात्रवाचित्वे न (?)युच्छेदोऽस्ति तावता इति ॥
१७ नु ] नित्योऽप्यात्मा सुखदुःखभोगे तद्धेतुभूतं कर्म न हि विमृशति । अतः किं लाभ इत्याक्षेपः । विमृशत्येव, कार्यसामान्यस्य सहेतुकत्वज्ञानादिति समाधानम् ॥
४ नेन ] अनेन—पूर्वोक्तज्ञानेन । कार्यस्य निरोद्धुमशक्यत्वादिति हेतुः । उत्तरस्वप्रवृत्तिशिक्षणं भविष्यतीति न वैफल्यमिति सारम् ॥

## क्षणिकवादिनां क्रियावैरूप्यम्

नास्त्यात्मा फलभोगमात्रमथ च स्वर्गाय चैत्यार्चनं
संस्काराः क्षणिकाः युगस्थितिभृतश्चैते विहाराः कृताः ।
सर्वं शून्यमिदं वसूनि गुरवे देहीति चादिश्यते
बौद्धानां चरितं किमन्यदियती दम्भस्य भूमिः परा ॥§ 7825

II.348/KSV

## अर्वाचीनचार्वाकमतम्

अत्र सुशिक्षितचार्वाक आह—यावच्छारीरमवस्थितमेकं प्रमातृतत्त्वं अनुसन्धानादिव्यवहारसमर्थमस्तु नाम, कस्तत्र कलहायते । शरीरादूर्ध्वं तु तदस्तीति किमत्र प्रमाणम् ? न च पूर्वशरीरमपहाय शरीरान्तरं संक्रमति प्रमाता ॥ § 7826

## पारलौकिकात्मा नास्ति

यदि ह्येवं भवेत्, तदिह शरीरे शैशवदशानुभूतपदार्थस्मरणवत् अतीतजन्मानुभूतपदार्थस्मरणमपि तस्य भवेत् । न हि तस्य नित्यत्वाविशेषे च, शरीरभेदाविशेषे च स्मरणविशेषे कारणविशेषमुत्पश्यामः, यदिह जन्मन्येवानुभूतं स्मरति, नान्यजन्मानुभूतमिति । तस्मादूर्ध्वं देहात् नास्त्येव प्रमातेति नित्यात्मवादमूलपरलोककथाकौरुकुचीमपास्य यथासुखमास्यताम् ॥ यथाऽऽह— § 7827

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥ इति ॥§ 7829

## आत्मनः स्थिरत्वस्यौत्सर्गिकत्वम्

अत्रोच्यते—न खलु निपुणमिव सुशिक्षितमायुष्मता चार्वाकाचार्यचातुर्यम् । यावच्छरीरमेकमनुयायि प्रमातृतत्त्वमस्तीति यदुक्तवानसि तन्न विस्मर्तुमर्हसि । न चास्तित्वाविनाभावी भावानां विनाशः स्वाभाविकः, किन्तु हेत्वन्तरनिमित्तक इति सौगतैस्सह कलहमतिमात्रमधुनैव कृत्वा समर्थितोऽयमर्थः । न च विनाशहेतुः प्रमातुरतिचिरमपि विचार्यमाणः कश्चित् कुतश्चित् अवाप्यते । न चानुपलभ्यमानोऽप्यसौ कल्पयितुं पार्यते ॥ § 7830 II.349/KSV

५ ] कुरुकुर्वी— nyāma-wit_kha
७ ] वेत्— nyāma-wit_ja
८ ] शान्तस्य— nyāma-wit_kha
१० ] नपा— nyāma-wit_ca
१३ ] तरि— nyāma-wit_kha

११ सि ] यावच्छरीरमवस्थितिरङ्गीकृता चेत्, तेनैव न्यायेन निस्यत्वमिति भवेदेव ॥

## आत्मनो विनाशहेतुर्नास्ति

न ह्यात्मा पटादिरिव सावयव उपलभ्यते, यदवयवविभागादिना नङ्क्ष्यतीति गम्यते । उत्पत्तिरपि नात्मनो दृष्टा, यतस्तदविनाभाविनः निरवयवस्यापि कर्मादेरिव विनाशः प्रतीयते । न चैष कस्यचिदात्मागुणः, येनाश्रयविनाशाद्वा विरोधिगुणान्तरप्रादुर्भावाद्वा प्रध्वंसमासादयेत् ॥ § 7831

न चैवं शक्यते वक्तुम्—किं विनाशहेत्वनुमानेन ? प्रत्यक्ष एवास्य विनाशो दृश्यत इति । यतो न शरीरवदसौ दह्यमानः, शकुनिभिरवलुप्यमानो वा कदाचिदुलब्ध इति । तस्माद्विनाशादर्शनात् विनाशहेत्वनुमानासंभवाच्च अस्ति चेदात्मा नित्य एवेत्यवधार्यताम् ॥ § 7832

तस्मात् भूतचैतन्यमेव चिरन्तनचार्वाकाचार्यवत् परलोकापलापपरितोषालम्बनयत्किंचित्कारित्वसुलभसुखासिकासक्तहृदयैर्वरमाश्रितुम् । आशरीरमवस्थिते तु प्रमातृतत्त्वे सति न फलन्त्येते परलोकापलापमनोरथाः । भूतचैतन्यपक्षोऽपि च पुरा पराकृत एव । तस्मादस्ति नित्यः परलोकी प्रमातेति ॥ § 7833

नित्यत्वे सति पूर्वदेहसंबन्धः, भविष्यद्देहान्तरसंबन्धश्चास्य न दुरुपपादः ॥ § 7834

II.350/KSV

## आत्मनः विभुत्वेऽपि शरीरान्तरप्राप्त्यादि युज्यते

शरीरान्तरसंचारस्त्वस्य नास्तीति यदुक्तं—तद्युक्तमेव । व्यापिनः सर्वत्र विद्यमानस्यात्मनः कः संचारार्थः ? § 7835

व्यापित्व एव किं प्रमाणमिति चेत्—सर्वत्रैव कार्योपलम्भः प्रमाणम् । इतो वाराणसीमपि गतस्य मे भदत्येव स्मरणेच्छादिकार्ययोगः । स चात्मैकप्रभवः । आत्मनश्च शरीरस्येव न तत्र गमनम्, अमूर्तत्वात् । न शरीरगुणवत्, *तदनाश्रितत्वात् । न प्राणादिवत्, अन्तश्शरीरवृत्तित्वाभावात् ॥ § 7836

## आत्मनः न शरीरान्तर्वर्तित्वम्

अन्तश्शरीरवृत्तित्वाभाव एव किं प्रमाणमिति चेत्—उच्यते—अन्तश्शरीरवृत्तित्वे हि द्वयी गतीः, एकदेशवृत्तित्वं, सर्वशरीरापूरकत्वं वा ॥ § 7837

---

१६ ] र्नामा— nyāma-wit__kha
१६ ] रमापूर्य— nyāma-wit__kha
२ ] स— nyāma-wit__ca

---

२० कुनिभि ] शकुनिः—मांसादनः गृध्रादिः ॥
११ *] तत्—शरीरम् ॥

तत्र सर्वशरीरापूरकत्वे शरीरपरिमाणानुविधायित्वात् बालयुवस्थाविरशरीरवत् पूर्वनीत्या परिमाणान्यत्वेन तदन्यत्वात् पुनरपि प्रतिसन्धानादिकार्यवैधुर्यप्रसङ्गः । करिमशकशरीरयोगे च कर्मपरिणामोपनते तस्य संकोचविकासौ प्राप्नुतः । तौ च नित्यस्य विरुध्येते ॥ § 7838

एकदेशवृत्तित्वे तु तदनधिष्ठितानामवयवानामनात्मकत्वात् मृतशरीरावयवत् अयथेष्टविनियोज्यता—काष्ठीभावः स्यात् ॥ § 7839

## आत्मनो न स्वज्ञानेन सर्वशरीरव्यापकत्वं

प्रदोपवदेकदेशवृत्तेरप्यात्मनः सकलशरीराधिष्ठातृत्वमिति चेत्— वर्तिप्रदेशोपचिततेजःपिण्डवदेकत्र शरीरावयवे सविशेषचैतन्यसंवित्तिः स्यात् ॥ § 7840

II.351/KSV

अस्त्येव हृदयदेशे तदतिशय इति चेत्—न—अनुपलम्भात् । दहनहिमकृपाणादिस्पर्शेषु न हृदयस्य, प्रदेशान्तरस्य वा शरीरे वेदनाविशेषं पश्यामः । तस्मान्न हृत्पुण्डरीके दीपवदवस्थानमात्मनः ॥ § 7841

## आत्मनोऽविभुत्वपरवचनगतिः

अत एव— § 7842

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् § 7843

इति व्यासवचनमनेवंपरमवगन्तव्यम् ॥ § 7844

यदि तु मनोवदेकदेशवृत्तेरणुपरिमाणस्याशु संचरतः शरीराधिष्ठातृत्वमात्मनः कथ्यते—तथापि सहसैव चिरप्रोषितागतदयितजनदर्शनोद्ध तसकलशरीरव्यापिस्वेदरोमांचादिदर्शनं विरुध्यते । न च द्वयोरण्वोरात्ममनसोः कर्तृकरणव्यवस्थाऽपि निर्वहतीति । तस्मान्नाणुरात्मा, न च शरीरमात्रपरिमाण इति व्यापक एवावशिष्यते । तदेवं वाराणस्यामपि अयमात्मा विद्यत एवेति तत्र तत्कार्यदर्शनमवकल्पते, नान्येन गमनादिप्रकारेणेति ॥ § 7845

---

१७ ] षय— nyāma-wit__kha
२२ ] कष्टी— nyāma-wit__kha
१ ] तद्दे— nyāma-wit__kha
६ ] या— nyāma-wit__kha
७ ] बलाद्यमः— nyāma-wit__kha
९ ] तगता— nyāma-wit__kha
९ ] द्र— nyāma-wit__kha
११ ] र— nyāma-wit__kha

---

४ र ] औपाधिकपरिमितत्वपरमित्यर्थः । अन्यथा परमात्मनोऽपि तथाश्रवणात् विभुत्वं न स्यात् ॥

## ऐकात्म्यवादनिरासः

ननु ! सर्वत्र सुखदुःखज्ञानादिकार्यदर्शनात् सर्वप्राणिनामेक एवात्मा भवेत्—न—सुखदुःखव्यवस्थादर्शनात्, बन्धमुक्तव्यवस्थोपपत्तेश्चात्मभेदस्य दर्शयिष्यमाणत्वात् ॥ § 7846

II.352/KSV

## विभोरपि कर्तृत्वोपपत्तिः

व्यापिनः तथं कर्तृत्वमिति चेत्, ज्ञानचिकीर्षाप्रयत्नसमवाय एवास्य कर्तृत्वम्, न व्यापारयोग इति निर्णीतमेतत् ॥ § 7847

ननु ! व्यापिन्यात्मनि कथं शरीराद्बहिरण्वपि तत्कार्यं न दृश्यते—कर्माक्षिप्तशरीरेन्द्रियादिसहकारिसन्निधाननिबन्धनो हि तत्कार्योत्पादः । स कथं ततो बहिर्भवेत् इति ॥ § 7848

तस्मादनन्तरोक्तेन प्रकारेणोपपादितम् ।
नित्यत्वाद्व्यापकत्वाच्च परलोकित्वमात्मनः ॥§ 7850

## आत्मनः देहातिरिक्तत्वे हेत्वन्तराणि

सूत्रकारस्तु पारलौकिकत्वसिद्धये हेत्वन्तराणि प्रत्यपादयत् । सद्योजातस्य बालस्य वदनविकासरोदनाद्यनुमितो हर्षशोकादियोगस्तोवदस्ति । युवशरीरादौ रोदनादि शोकादिकारणकमवगतम् । आननविकासादि हर्षहेतुकम् । एवं शिशोरपि तन्निबन्धनः तदुत्पादः । तौ च हर्षशोकौ सुखदुःखसाधनाधिगमतदनुस्मरणान्यतरकारणकौ भवितुमर्हतः, तथा दृष्टत्वात् । इह चास्य न सुखदुःखसाधनपदार्थानुभवस्तादनीमस्ति—इति तदनुस्मरणमेव हर्षशोकहेतुर्भवेत् ॥ § 7851

तदनुस्मरणपि तदनुभवप्रभवम् । अनुभवश्चेह जन्मनि सद्योजातस्य न समस्तीति जन्मान्तरानुभूतसुखदुःखसाधनानुस्मरणनिमित्तक एवास्य हर्षशोकसमुत्पाद इति जन्मान्तरानुगमान्नित्य आत्मा ॥ § 7852

II.353/KSV

## शिशोस्सुखदुःखानुस्मरणम्

१५ ] विभागो— nyāma-wit__kha

२ ] र्म— nyāma-wit__ca
५ ] व— nyāma-wit__kha
६ ] क्रमे— nyāma-wit__kha
१५ ] रम— nyāma-wit__kha
१६ ] भव—ख— nyāma-wit__gha

१ चेत् ] विभोश्चलनाद्यसंभवादिति हेतुः ॥
९ स्य ] निद्रादिष्वपीति शेषः ॥

ननु ! अभिनवजीवलोकावलोकनाह्लादनिबन्धन एवास्य मुखविकासः, तथा योनिद्वारनिर्गमनोद्गतनिरर्गलक्लेशपीडितस्य तस्य रोदनमिति न जन्मान्तरानुभूतस्मरणं कल्पयितुं युक्तम्, अतिप्रसङ्गात्—मैवम्— सुखदुःखहेतुमीदृशमननुभवतोऽप्यकस्मादेव हर्षशोकदर्शनात् ॥ § 7853

## शिशोर्मुखविकासादेरहेतुकत्वनिरासः

ननु ! कमलमुकुलविकासादिवत् स्वाभाविकमेव शिशोर्मुखविकासादिकार्यं स्यात्—स्वाभाविकं नाम किमुच्यते, किमहेतुकम्, अविज्ञातहेतुकम्, अनियतहेतुकं वा ? § 7854

न तावदहेतुकं कार्यं संभवति, कार्यत्वहानिप्रसङ्गात् ॥ § 7855

नाप्यविज्ञातहेतुकं तद्भवितुं युक्तम्—कार्यमुपलभ्यते । तद्धेतुपरिज्ञाने यततां भवान्; किमुदास्ते ? न चासौ ज्ञातुमशक्यः, कार्यस्यैव तत्र ज्ञापकत्वात् ॥ § 7856

नाप्यनियतहेतुकं कार्यं किंचिदस्ति । कार्योत्पादननियमेनैव हेतुनियमसिद्धेः । अत एव तत्कार्यमुपपादयितुकामाः तन्नियतमेव कारणमुपाददते लौकिकाः ॥ § 7857

## गोमयवृश्चिकादेरुपपत्तिप्रदर्शनम्

यत्राप्यनियतो हेतुः वृश्चिके गोमयादिकः ।
अभियुक्तस्तु तत्रापि विशेषं न न मन्वते ॥§ 7859

II.354/KSV

तदेव कारणनियमोऽपि कार्यविशेषदर्शनादुरपह्नव इति मुखविकासस्य हर्ष एव कारणमवगम्यते, सहस्रकृत्वस्तथा दर्शनात् ॥ § 7860

अचेतनानां तु तामरसादीनां विकासकारणं तरणिकिरणनिकरपरिष्वङ्गाद्युपलब्धमिति तदपि न स्वाभाविकम् ॥ § 7861

तस्मान्मुखविकासस्य हर्षः, हर्षस्य च स्मृतिः ।
स्मृतेरनुभवो हेतुः स च जन्मान्तरे शिशोः ॥§ 7863

## जन्मान्तरानुभूतानां न सर्वेषां स्मरणम्

५ ] द्वावयि— nyāma-wit_kha
१२ ] स्तद— nyāma-wit_kha
१३ ] र्शिनां दु— nyāma-wit_ka

२१ स्मादेव] सुषुप्त्यादौ इति शेषः ॥
१२ ते] अन्यथा मृदः कुतो न वृश्चिकोत्पत्तिरिति प्रश्नः दुरुत्तरः स्यात् ॥

ननु ! शिशोर्जन्मान्तरानुभूतस्मरणे सर्वदा सर्वस्मरणप्रसङ्गः—न—यावत्कार्यं कारणकल्पनात् । न हि सर्वदा सर्वानुस्मरणं संवेद्यते । न च तत्कल्पनायां कारणमुपलभ्यते । न चैकदर्शनात् सर्वं कल्प्यं, दृष्टमपि वा निह्नोतव्यमिति परीक्षकाणामुचित एष पन्था इत्यसकृदुक्तम् ॥ § 7864

## शिशोस्तन्यपानप्रवृत्त्या जन्मान्तरसिद्धिः

अपि च पयसस्तृप्तिहेतुतामनुस्मरन् बालकः स्तन्याभिलाषेण मातुस्तनतटे दृष्टिं निदधाति । न चाद्य तेन तस्य तत्साधनत्वमवगतमिति जन्मान्तरे सम्बन्धग्रहणमस्य वृत्तमिति मन्यामहे ॥ § 7865

न चायस्कान्तदृष्टान्तसमाश्रयेण स्वाभाविकमेव तत् बालकस्य कुचकलशनिकटोपसर्पणमिति वक्तुमुचितम्, अनन्तरमेव निरस्तत्वात् ॥ § 7866

## गर्भस्थशिशोः पोषणकारणम्

ननु च गर्भशय्याशायिनोऽपि परिपोषदर्शनात् तत्साधनोपादाने तदनुस्म-
II.355/KSV रणमेव प्राप्नोति—यदि कार्यमवगम्यते तत्रापि तत्कारणमवगम्य ताम्, को दोषः ? तत्र तु जनयित्रीजठरपतितान्नपानपरिपाकसंक्रान्त्या तत्परिपोषमायुर्वेदविदो वदन्तीति कथं तत्र स्मतणादिकल्पना ॥ § 7867

कल्पनायां वा प्रथमं निषेकानन्तरमेव कललादिशुक्रशोणितविकारसंभवात् तद्दशास्वपि स्मरणकल्पनाप्रसङ्गः । न च तत्कल्पनायामपि काचिदस्माकं क्षतिः । अयं तु स्तन्याभिलाषेण कुचक्षीरकलशावलोकनोपसर्पणादरो दारकस्य तदनुस्मरणकृत एवेति सर्वथा जन्मान्तरसंबन्धानुमानान्नित्योऽयमात्मेति ॥ § 7868

## जन्मान्तरसमर्थकहेत्वन्तरम्

अतश्चैवं— § 7869

### वीतरागजन्मादर्शनात् ॥ ३-१-२५ ॥ § 7870

रागादिवासनाभ्यासेन सुदृढप्ररूढेनानादिप्रबन्धप्रवृत्तेन अपरित्यज्यमानाः सरागा एव जन्तवो जायन्ते । न खलु लोके कश्चन तादृशो दृश्यते प्राणी, यो जातो वीतरागश्चेति । स एष सरागो जायमानः पूर्वोपचितां रागादिवासनामनुसरतीति सिद्धो जन्मान्तरसंबन्धः ॥ § 7871

---

२० ] र्वे— nyāma-wit__kha nyāma-wit__gha
५ ] मित्तो— nyāma-wit__kha
६ ] प्य— nyāma-wit__kha
६ ] तो— nyāma-wit__kha;
७ ] णं कल्प्य— nyāma-wit__kha
१७ ] द— nyāma-wit__kha

---

२२ म् ] एतज्ज्ञन्मन्यप्यनुभूतं सर्वं न हि स्मर्यते । अदृष्टमेवात्र नियामकम् ॥

१२ तिः ] जन्मान्तरसिद्धेरिति शेषः ॥

## जगद्वैचित्र्यहेतुतया कर्मपरंपरासिद्धिः

तथा च केचिज्जायन्ते लोभमात्रपरायणाः ।
द्रव्यसङ्ग्रहणैकाग्रमनसो मूषकादयः ॥[§ 7873]

मनोभवमयाः केचित् सन्ति पारावतादयः ।
कुजत्प्रियतमाचंचुचुम्बनासक्तचेतसः ॥[§ 7875]

II.356/KSV

केचित् क्रोधप्रधानाश्च भवन्ति भुजगादयः ॥[§ 7876]

ज्वलद्विषानलज्वालाजालपल्लवितानानाः ।
जगतो यच्च वैचित्र्यं सुखदुःखादिभेदतः ॥[§ 7878]

कृषिसेवादिसाम्येऽपि विलक्षणफलोदयः ।
अकस्मान्निधिलाभश्च विद्युत्पातश्च कस्य चित् ॥[§ 7880]

क्वचित्फलमयत्नेऽपि यत्नेऽप्यफलता क्वचित् ।
तदेतद्दुर्घटं दृष्टात्कारणाद्व्यभिचारिणः ॥[§ 7882]

तेनादृष्टमुपेतव्यमस्य किंचन कारणम् ।[§ 7883]

## जगद्वैचित्र्यकारणस्य न भौतिकत्वम्

अदृश्यो भूतधर्मस्तु जगद्वैचित्र्यकारणम् ॥[§ 7884]

यदि कश्चिदुपेयेत को दोषः कर्मकल्पने ॥[§ 7885]

संज्ञामात्रे विवादश्च तथा सत्यावयोर्भवेत् ॥[§ 7886]

भूतवद्भूतधर्मस्य न चादृश्यत्वसंभवः ।

१३ ] ष्टो— nyāma-wit_kha
१६ ] च— nyāma-wit_kha

६ कृषिसेवा ] सेवा—गुरुसेवा । गुरुसेवादीनां समानत्वेऽपि शिष्ययोः ज्ञानसंपत्तौ दृश्यते तारतम्यम् ॥

१४ वः ] अत्तश्चादृष्टस्य भूतधर्मत्वे तस्य प्रत्यक्षत्वापत्तिः ॥

दृष्टश्च साध्वीसुतयोः, यमयोस्तुल्यजन्मनोः ॥§ 7888

विशेषो वीर्यविज्ञानसौभाग्यारोग्यसंपदाम् ।
स्वाभाविकत्वं कार्याणां अधुनैव निराकृतम् ॥§ 7890

तस्मात् कर्मभ्य एवैष विचित्रजगदुद्भवः ॥§ 7891
II.357/KSV

## कर्मणां शक्तिवैचित्र्यम्

कर्मणां ननु वैचित्र्यं कर्मान्तरकृतं यदि ।
अनिष्टं तत् स्वतस्सिद्धं जगत्येव तदिष्यताम् ॥§ 7893

कर्मणां शास्त्रतो ज्ञाता विचित्रफलशक्तता ।
दृष्टार्थेषु च वाक्येषु दृष्टा प्रत्यक्षतोऽपि सा ॥§ 7895

तस्माद्दृष्टस्य कार्यस्य युक्ता कारणकल्पना ।
कारणस्य त्वदृष्टत्वात् किं हेत्वन्तरचिन्तया ॥§ 7897

## कार्यकारणभावपरंपरायां नानवस्था दोषः

हेत्वन्तरं तु तद्धेतोः नास्तीत्येतावतैव किम् ।
दृष्टस्याप्यस्य कार्यस्य युज्यते हेत्वपह्नवः ? ॥§ 7899

हेत्वन्तरनिमित्तेऽपि कर्मवैचित्र्यकल्पने ।
संसारस्य त्वनादित्वात् नानवस्था भयावहा ॥§ 7901

तथा च पुण्यः पुण्येन पापः पापेन कर्मणा ।
जायते जन्तुरित्येवं धर्मशास्त्रेषु पठ्यते ॥§ 7903

---

१०--१२ ] हे— nyāma-wit_kha

---

१५ श्च ] साध्वीयमपदाग्यां
कारणान्तरनिराकरणम् ॥
३ त् ] अनवस्थाप्रसङ्गो हेतुः । यत्र कुत्रचित् स्वभाववादस्यावश्यकत्वादादावेव तच्छरणीक्रियतामिति भावः ।
समाधत्ते—कर्मणामित्यादिना ॥
५ सा ] सा—विचित्रफलशक्तता ।
आयुर्वेददास्त्रवाक्येषु हरीतक्यादौ सा दृष्टा ॥

तस्मात् कुतर्कमूलेन दृष्टकार्योपपातिना ।
सर्वलोकविरुद्धेन चोद्येन कृतमीदृशा ॥§ 7905

तस्मात् कल्प्यानि कर्माणि दृष्टकार्योपपत्तये ॥§ 7906
II.358/KSV

## स्थिरस्यात्मनः आवश्यकत्वम्

एषां च क्षणभङ्गित्वात् संस्कारद्वारिका स्थितिः ।
स कर्मजन्यसंस्कारः धर्माधर्मगिरोच्यते ॥§ 7908

विना च नित्यमात्मानं न धर्माधर्मयोः स्थितिः ॥§ 7909

नित्यस्तस्माद्भवति पुरुषः स्वप्रणीतानुगच्छ—
द्धर्माधर्मक्रमपरिणतानन्दतापोपभोगः ।
प्रामाण्यं च स्फुटमभिहितं पूर्वमेवागमानां
तेभ्योऽप्यात्मा जननिधनातीततत्त्वः प्रसिद्धः ॥§ 7913

## आत्मानित्यत्ववचनगमनिका

यद्विज्ञानघनादिवेदवचनं तत्पूर्वपक्षे स्थितं
पौर्वापर्यविमर्शशून्यहृदयैः सोऽर्थो गृहीतस्तथा ।
*मैत्रेय्या परिचोदितस्तु भगवान् यद्याज्ञवल्क्योऽब्रवीत्
*आत्मा नैव विनश्यतीति तदिदं सिद्धान्तसारं वचः ॥§ 7917

तेनात्मनित्यत्वसमर्थनेन
सुस्पष्टसिद्धः परलोकमार्गः ।
य एव देहान्तरसंगमोऽस्य
तमेव तज्ज्ञाः परलोकमाहुः ॥§ 7921
II.359/KSV

५ ] न्त— nyāma-wit__kha
९ ] दा— nyāma-wit__ca
१३ ] वादः— nyāma-wit__kha

२ संस्कारः ] संस्कारः—अतिशयः ॥
१० *] बृहदारण्यकोपनिषदि ६ अध्याये द्रष्टव्यम् ॥
११ *] अविनाशी वा अरे अयमात्मा इति श्रुतिः ॥
१४ एव ] परलोकपदेन एतल्लोकमपि क्रोडीकर्तुं व्याख्याति—देहेत्यादि ॥

### जन्मान्तरज्ञानप्रयोजनम्

इति कबलने मांस्पाकानां, परस्त्वपरिग्रहे,
कितवजनतागोष्ठ्यां, वेश्यामुखाम्बुजचुम्बने ।
रतमतिरभूद्धूर्तो मत्वा भवान्तरनास्तितां
तदयमधुना तत्संसिद्धेरहो बत दूयते ॥§ 7925

तस्मान्नित्योऽयमात्मा न च कलुषफलस्तस्य नैसर्गिकोऽयं
रागद्वेषादियोगोऽपि तु सकलगुणापोढमेवास्य रूपम् ।
तेनानादिप्रबन्धोपचितपरिणमत्कर्मपाकोपनीतं
दुःखं संत्यज्य निःश्रेयसमखिलभयातीतमाप्तुं यतेत ॥§ 7929

॥ इति श्री भट्टजयन्तकृतौ न्यायमञ्जर्यां सप्तममाह्निकम् ॥

## २.४ अष्टममाह्निकम्—प्रमेयपरीक्षा : शरीरपरीक्षा

II.360/KSV

आत्मानन्तरं विभागसूत्रे शरीरनिर्देशात् तदनुक्रमेण तत्स्वरूपनिरूपणार्थमाह— § 7931

**चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ २-२-३२ ॥** § 7932

शरीरस्य यल्लक्षणं, येन रूपेण विभाव्यमानस्यापवर्गोपयोगिता तदुभयमपि प्रतिपाद्यते ॥ § 7933

### शरीरलक्षणम्

तत्र शरीरत्वमेव तावत् प्रथमं शरीरस्य लक्षणम् । तेन हि समानासमानजातीयकेभ्यः तद्व्यवच्छिद्यते । तस्मिन् सत्यपि चेष्टेन्द्रियार्थाश्रयत्वं यदस्य लक्षणमुच्यते, तत् तेन रूपेणात्मनो भोगायतनं शरीरमिति ज्ञापयितुम् । चेष्टेन्द्रियार्थाश्रयतया हि शरीरमात्मनो भोगसाधनं भवति । मुमुक्षुणा च सुखदुःखोपभोगरहितात्मतत्त्वस्वभावनिःश्रेयसाधिगमविनिहितमनसा तथा भोगाधिष्ठानत्वेन शरीरं भावयता तत्परिहरणे यत्नः कार्य इति आचार्यः चेष्टेन्द्रियार्थाश्रयत्वमस्य लक्षणमुक्तवान् ॥ § 7934

१६ ] मांसादीनां— nyāma-wit_ja
९ ] क्षूणां— nyāma-wit_ca
१० ] सां— nyāma-wit_ca
११ ] तां— nyāma-wit_ca

१६ ने] मांस्पाकाः—मांसपाकाः ॥
१० च] अशेषविशेषगुणोच्छेदो हि मोक्षः ॥

## चेष्टास्वरूपम्

ननु ! चेष्टा क्रिया । क्रियाश्रयत्वे सत्यपि न वृक्षादीनां शरीरत्वमिति अतिव्यापकं लक्षणम्—न—विशिष्टचेष्टाश्रयत्वस्य विशिष्ट प्रमेयलक्षणप्रक्रमतोऽवसीयमानत्वात् । हिताहितप्राप्तिपरिहारयोग्यव्यापाराधिकरणं हि शरीरमुच्यते, न चेष्टामात्रस्याधिष्ठानम् । रथादिनाऽपि नातिव्याप्तिः, यथोक्तप्रक्रमवशादेव अन्येन प्रेरणायामसत्याम् इति विशेषलाभात् । आत्मप्रयत्नातिरिक्तप्रेरकनिरपेक्षहिताहितोपादानपरित्यागोपाधिकचेष्टाविशेषाश्रयः शरीरमित्यर्थः ॥ § 7935 II.361/KSV

## शरीरलक्षणे दोषपरिहारः

ननु ! पाषाणान्तर्गतमण्डूकशरीरेषु तदाश्रयत्वादर्शनादव्याप्तिः— न—योग्यताया—स्तत्रापि भावात् । सत्यामपि क्रियायोग्यतायां सर्वतो निर्विवरनिबिडदृषत्कर्परोपरुद्धावकाशतया चलितुमसौ न प्रभवति भेको वराकः । तथा च स्फुटिते तस्मिन्नश्मनि तत्क्षणमेवासौ चलत् दृश्यते इति निबिडपाशसंयतशरीरवत् तदानीं चेष्टाया अदर्शनेऽपि नाव्याप्तिः ॥ § 7936

## मुमुक्षुशरीरनियमाभावः

मुमुक्षुशरीरमेव लक्ष्यमित्येके । तेन न मण्डूकशरीरादिभिरव्याप्तिः, अलक्षणीयत्वात्तेषामिति—तदयुक्तम्—नियतस्य मुमुक्षुशरीरस्याभावात् तादृशिं च भेकादिशरीराणि नितरां निर्वेदकारीणि भवन्ति । मुमुक्षुरपि कर्मविपाकमनेकप्रकारमाकलयन् मण्डूकीभावमात्मनोऽपि न न शङ्कते ॥ § 7937

प्रत्यासन्नापवर्गपुरप्रवेशविपश्चित्तममपश्चित्तममपश्चिमजन्मानं मुमुक्षुं प्रति लक्षणाद्युपदेशः क्वोपयुज्यते ? इत्यतः पूर्वोक्त एवाव्याप्तिपरिहारः श्रेयान् ॥ § 7938

II.362/KSV

## इन्द्रियाश्रयत्वपरीक्षा

१० ] चित— nyāma-wit__kha
११ ] न्वे— nyāma-wit__kha
१६ ] न— nyāma-wit__kha

४ म् ] चेष्टते इति व्यवहारः खलु यत्नाधीनव्यापार एव स्वरसः ॥

भवत्वेवं चेष्टाश्रयत्वं शरीरलक्षणम् । इन्द्रियाश्रयत्वं तु कथम् ? भौतिकानि हीन्द्रियाणि स्वावयवसमाश्रितानि घ्राणरसननयनस्पर्शनानि । श्रोत्रमनसी तु नित्यद्रव्यत्वादनाश्रिते एवेति कथमिन्द्रियाश्रयता शरीरस्येति— § 7939

उच्यते—नात्र आधाराधेयभाव आश्रयार्थः; किन्तु तदनुग्राह्यत्वात्तदाश्रितानि इन्द्रियाप्युच्यन्ते । देशकालदशानुकूलपथ्यभोजनाभ्यङ्गव्यायाममर्दनाद्युपचारोपचितशरीरस्य हि पुंसः पटुतराणि स्वविषयग्रहणे भवन्तीन्द्रियाणि । दीर्घाध्वलङ्घनकदशनशुष्कजरत्पुरन्ध्री सेवनादिक्लिष्टशरीरस्य तु पुंसः मन्दशक्तीनि भवन्ति तदनुग्राहकत्वादिन्द्रियाणामाश्रयः शरीरम् ॥ § 7940

## अर्थाश्रयत्वलक्षणपरीक्षा

अर्थानां तु रूपरसगन्धादीनां केषां चिदाश्रयः शरीरं भवत्येव तत्समवायिनाम् । न तु तावता किंचिद्भोगायतनत्वोपयोगि रूपमभिहितं भवति ॥ § 7941

लक्षणमपि तदतिव्यापकं रूपरसादिसमवायस्य वृक्षादावपि भावात् । तस्मात्—तदर्थाश्रयत्वमीदृशमत्र विवक्षितम् । य एते परवनितादिशरीरवर्तिनः प्रविकचमुचुकुन्दकुन्दकन्दलकुमुदकुड्मलादिबाह्यविषयसमवायिनश्च रूपरसादयोऽर्था रमणीयतामादधाना रागवृद्धिहेतवो भवन्ति भोक्तुरात्मनः शरीरे सति, न शरीररहितस्येति अर्थानां भोगसाधनभावादाश्रयः शरीरम् । अतः सुष्ठूक्तं चेष्टेन्द्रियार्थाश्रयः शरीरमिति ॥ § 7942

II.363/KSV

तदित्थं भोगायतनत्वेन बन्धहेतुत्वाद्धेयमित्यर्थः । तदिदानीमस्मदादिशरीरं किं पर्थिवम्, किं वा नानाभूतनिर्मितमिति परीक्ष्यते ॥ § 7943

## शरीरस्य पार्थिवत्वविचारफलम्

ननु ! किमनया परीक्षया प्रयोजनम् ? § 7944

निःश्रेयसोपयोगो हि यः शरीरस्य दर्शितः ।
सोऽनेकप्रकृतित्वेऽपि न स तस्य विशिष्यते ॥§ 7946

मैवं वोचः— § 7947

---

३ ] यपुरन्ध्रि— nyāma-wit__kha
४ ] त्सचन्द्र— nyāma-wit__kha
१० ] र्थभोगा— nyāma-wit__kha
११ ] कन्दलकम— nyāma-wit__kha
१९ ] ना— nyāma-wit__kha
१९ ] हि— nyāma-wit__kha
१९ ] सत्य— nyāma-wit__ca

---

४ दीर्घाध्व ] लङ्घनं—निरशनम् ॥
१३ यः ] अर्थः—भोगः । तदाश्रय तदवच्छेदकं शरीरम् ॥

प्रतिपन्नस्वरूपस्य चिन्त्या कार्योपयोगिता ।
कार्या कार्यार्थिनोऽप्यादौ यत्नस्तद्रूपनिर्णये ॥§ 7949

तथा चेन्द्रियाणि भौतिकत्वाहङ्कारिकत्वादिवेकेन परीक्षिष्यन्ते ॥ § 7950

अर्था अपि कति, किंगुणा इति ॥ § 7951

बुद्धिरपि किं प्रधानस्य प्रथमो विकारः महच्छब्दवाच्यः, उत आत्मन एव धर्मो ज्ञानाख्यः क्षणिकः ? इत्येवं सर्वत्र द्रष्टव्यम् ॥ § 7952

## मानवशरीरस्य पार्थिवत्वादिविकल्पाः

तत्र पाथिवमेवास्मदादिशरीरमिति केचित् । असाधारणो हि धरणिधर्मः गन्धस्तस्मिन्नुपलभ्यत इति ॥ § 7953

II.364/KSV

पृथिव्युदककारणमित्यन्ये । क्लेदस्यापि तस्मिन् दर्शनात् । असति हि सलिलसंसर्गे न पार्थिवावयवाः क्लेदमनुभवन्तीति ॥ § 7954

क्षितिजलज्वलनजनितमित्यपरे, गन्धक्लेदवदूष्मणोऽपि तत्रोपलंभादिति ॥ § 7955

वसुमतीसलिलसितेतरसरणिसमीरणरचितमिति चान्ये, रचना विशेषस्य पवनकार्यस्य तत्रावधारणादिति ॥ § 7956

अवनिवनदहनपवनगगनविनिर्मितमिति चापरे, गन्धादिवदवकाशस्याप्याकाश-कार्यस्य तत्र दर्शनात् । सुषिरं हि शरीरमुपलभ्यते । अवकाशे चाकाशैक-देशेऽप्यवच्छेदाभिप्रायेण श्रोत्रवत् भक्त्या तत्कार्यत्वव्यपदेश इति ॥ § 7957

## मानवशरीरस्य पार्थिवत्वम्

तदत्र किं तत्त्वम् ? पार्थिवमेवास्मदादिशरीरमिति, विजातीयकार्य-स्यावयविनोऽनुपपत्तेः । पार्थिवावयवसमवेतशरीरावयविग्राहिणस्त्वभेदप्रत्य-यस्य तृणपर्णपाषाणमूलकाद्यभेदप्रत्ययवत् अपवादासंभवात् । न वयमिह भूतान्तराणां कारणभावनिषेधं शिक्ष्मः । केवलपार्थिवतया निर्विवादेऽपि कुम्भादावम्भःप्रभृतीनां कारणत्वानपायात् । तद्व्यतिरेकेण घटादेर्घटयितुम-शक्यत्वात् ॥ § 7958

२१ ] कारो— nyāma-wit_kha
६ ] सा— nyāma-wit_kha
९ ] वाः— nyāma-wit_kha
१२ ] त— nyāma-wit_ca
१८ ] व— nyāma-wit_kha
२० ] विघ्नः— nyāma-wit_kha; nyāma-wit_gha
२० ] दसिद्धे— nyāma-wit_kha; nyāma-wit_gha

१ ये ] देहेन्द्रियादिविलक्षणत्वज्ञानमात्मन आवश्यकम् । तच्च देहेन्द्रियादीनां स्वरूपनिष्कर्षमन्तरा न संभवति ॥

१२ लिल ] सितेतरसरणिः—कृष्णवर्त्मा—अग्निः ॥

किन्तु घटादाविव शरीरेऽपि समवायिकारणं पृथिव्यवयवानेवाचक्ष्महे, तदाश्रितत्वस्यास्य प्रत्यक्षेण ग्रहणात् । सहकारिकारणानु प्रविष्टभूतान्तरसंब- II.365/KSV
न्धनबन्धनस्तु तिस्मन् क्लेदोष्मव्यूहावकाशसं प्रत्ययः । तद्यथाऽऽगमपठितेषु वरुणलोकादौ केवलजलादिजन्येषु शरीरेषु सहकारित्वानुप्रविष्टपार्थिवावयवोपष्टम्भवशेन स्थैर्याद्युपलंभइति । तस्मादस्मदादिशरीरं पार्थिवम् ॥ § 7959

## शरीरस्य पार्थिवत्वं वेदसंमतम्

वेदे च तथैव व्यवहारो दृश्यते । अग्नीषोमीयादिपशोः प्रलयकाले, यजमानस्य वा प्रेतस्य पात्रचयनकर्मणि सूर्यं चक्षुर्गमयतात् इत्युपक्रम्य, पृथिवीं ते शरीरम् इति पठ्यते । तच्च प्रकृतिगामित्ववचनम् । यद्यतः प्रकृतेरुत्थितं तत्तस्यामेव लीयतामित्यर्थः । तत्र यथा तैजसं चक्षुरिति सूर्याख्ये तेजसि तद्गमनमुपदिष्टम्, एवं पृथिव्यां शरीरस्येति ॥ § 7960

तस्मात्पृथिव्यवयवैरयमस्मदादि-
देहो निबद्ध इति नात्र सतां विवादः ।
सोऽयं च दुःखवसतेर्भवमन्दिरस्य
स्तम्भः कठोर इति यत्नत एव हेयः ॥§ 7964

## इन्द्रियपरीक्षा

### घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ १-१-१२ ॥

§ 7965

अत्र इन्द्रियाणां विषयोपलब्धिकारणत्वं सामान्यसक्षणं प्रसिद्धमेव । विभागोऽपि पंचबाह्येन्द्रियाणीत्येष सूत्रित एव । स चानन्तरमेव तीर्थान्तरकथितकर्मेन्द्रियानिषेधात् साधयिष्यते ॥ § 7966
II.366/KSV

## चक्षुरादिलक्षणम्

१ ] स्ततः सिद्धः— nyāma-wit__kha
२ ] षु— nyāma-wit__kha
३ ] द्यनु— nyāma-wit__kha
१०--१२ ] दः— nyāma-wit__kha

२३ हे ] इतराणि तु सहकारीणि ॥ प्रयोजनमुक्तम् ॥
१२ हेयः ] अनेन चैतद्धानस्य

विशेषलक्षणानि तु पंचानां पंच समाख्यानिर्वचनसामार्थ्यात् प्रमाणवदवगन्तव्यानि ॥ § 7967

जिघ्रत्यनेनेति घ्राणं गन्धं गृह्णातीति, गन्धोपलब्धावसाधारणकारणं घ्राणम् ॥ § 7968

रसयत्यनेनेति रसनं, रसं गृह्णातीति रसोपलब्धावसाधारणं कारणं रसनम् ॥ § 7969

चष्टेऽनेनेति चक्षुः, रूपं पश्यतीति रूपोपलब्धावसाधारणं कारणं चक्षुः ईक्षणं लोचनं तदुच्यते ॥ § 7970

स्पृश्यत्यनेनेति स्पर्शनम्, स्पर्शं गृह्णातीति स्पर्शोपलब्धावसाधारणं कारणं स्पर्शनम् ॥ § 7971

स्पर्शनमिति वक्तव्ये त्वग्ग्रहणं उपचारात् मंचाः क्रोशन्ति इतिवत् तदधिष्ठानत्वं दर्शयितुम् । यथा त्रिपुटिकाधिष्ठानं घ्राणं, जिह्वाधिष्ठानं रसनम्, गोलकाधिष्ठानं चक्षुः, तथा त्वगधिष्ठानं स्पर्शनम्, शिरःप्रभृत्यापादाङ्गुष्ठं स्पर्शोपलम्भात् । त्वगिति च न बाह्यमेव चर्म केवलमुच्यते, अपि तु सकलशरीरव्यापि; तुहिनकणशिशिरसलिलपान समये अन्तर्हृदयेऽपि शीतस्पर्शोपलम्भादिति ॥ § 7972

## इन्द्रियाणामाश्रयाः

स्वावयवसमवायित्वेऽपि चेन्द्रियाणां त्रिपुटिकाद्याश्रयत्वं आश्रयत्वमात्रापेक्षयोच्यते, न समवायित्वादिति ॥ § 7973

II.367/KSV

शृणोत्यनेनेति श्रोत्रं, शब्दं गृह्णातीति शब्दोपलब्धावसाधारणं कारणं श्रोत्रम् । तच्चाकाशैकदेशत्वादनाश्रितमपि कर्णशष्कुल्यधिष्ठानमुच्यते । तदेवं विशेषलक्षणानि पंच पंचनामुक्तानि भवन्ति ॥ § 7974

## इन्द्रियाणां बन्धहेतुत्वम्

तानीमानीन्द्रियाणि स्वविषयग्रहणलक्षणानि आत्मनो भोगसाधनत्वात् संसारकारणानीति हेयतया भावयितव्यानि । तथा भाव्यमानानि निर्वेदोत्पादनादिद्वारेण अपवर्गाय कल्पयिष्यन्त इति ॥ § 7975

## इन्द्रियाणां भौतिकत्वम्

१--३ ] च— nyāma-wit_kha
७ ] त् प्रयुक्तं— nyāma-wit_ca
८ ] व— nyāma-wit_ca

७ णं ] त्वक् पदं इन्द्रियवाचकमपीति केचन ॥

भूतेभ्यः इति किमर्थम् ? उक्तं हि इन्द्रियाणां स्वविषयग्रहण लक्षणत्वम् । तत्र न भूतग्रहणं लक्षणार्थम्, अपि तु तद्विनिश्चयार्थम् । यथा आप्तोपदेशः शब्दः इत्यत्राप्तग्रहणं लक्षणविनिश्चयार्थम् । स्वस्वविषयोपलब्धिलक्षणत्वं हीन्द्रियाणां भूतप्रकृतित्वे सति निर्वहति नान्यथेति ॥ § 7976

## इन्द्रियाणां भौतिकत्वं कीदृशम् ?

तानि पुनरिन्द्रियाणां कारणानि पृथिव्यप्तेजोवायुराकाशमिति भूतानि । एभ्यः पंचभ्यः—यथासङ्ख्यं घ्राणरसनचक्षुस्त्वक्श्रोत्राणि पंञ्चेन्द्रियाणि भवन्ति । भूतप्रकृतित्वमिति भूतस्वभावत्वं व्याख्यायमानं पंचस्वपि संभवति । भूतकारणकत्वं तु अन्येषु चतुर्ष्वपि तथैव । श्रोत्रे तु कथंचित् कर्णशष्कुल्यवाच्छिन्ननभोभागाभिप्रयेण व्यवहारतः समर्थनीयम् । एवं सति भौतिकानीन्द्रियाणि स्वं स्वं विषयमधिगन्तुमुत्सहन्त इति तल्लक्षणत्वमेषां—सिद्ध्यतीति । अतो भूतेभ्यः इत्युक्तम् ॥ § 7977
II.368/KSV

## इन्द्रियाणां प्राप्यकारित्वे सांख्यपक्षः

ननु ? एतत्परीक्षणीयं वर्तते । किं भौतिकानामिन्द्रियाणां स्वविषयग्रहणकरणत्वं, उतान्यथेति ॥ § 7978

एवं हि साङ्ख्याः संप्रवदन्ते—आहङ्कारिकाणीन्द्रियाणि अर्थं साधयितुमर्हन्ति, नान्यथा । तथा हि—कारकं कारकत्वादेव प्राप्यकारि भवति । भौतिकानि चेन्द्रियाणि कथं प्राप्यकारीणि दूरवर्तिनि विषये भवेयुः । आहङ्कारिकाणां तु तेषां व्यापकत्वात् विषयाकारपरिणामात्मिका वृत्तिर्वृत्तिमतोऽनन्या सती संभवत्येवेति सुवचं प्राप्यकारित्वम् ॥ § 7979

## इन्द्रियाणामाहंकारिकत्वे युक्तिः

अपि च महदणुग्रहणमाहङ्कारिकत्वे तेषां कल्पते, न भौतिकत्वे । भौतिकत्वे हि यत्परिमाणं ग्रहणं तत्परिमाणं ग्राह्यं गृह्णीयात्; अस्ति च गोलकादधिकपरिमाणस्य पटपिठरादेर्ग्रहणं, हीनपरिमाणस्य च वटधानादेः । अतोऽपि न भौतिकानीन्द्रियाणि ॥ § 7980

भौतिकानामपि दीपादीनां परं प्रकाशयतां स्वात्मप्रकाशकत्वमपि दृष्टम् । एवमिन्द्रियाण्यपि पटादिस्वरूपं प्रकाशयन्ति स्वरूपमपि प्रकाशयेयुः । न च प्रकाशयन्तीत्यतोऽपि न भौतिकानि ॥ § 7981

---

२१--२३ ] ल— nyāma-wit_kha

३ ] वसानं दिवादिभ्यो भूतेभ्यः संभवति । तदवनतौ पंच— nyāma-wit_kha

१७ ] ग्रामा— nyāma-wit_ka

२०--२१ ] च— nyāma-wit_kha

---

४ अन्येषु ] पृथिव्यप्तेजोवायुषु ॥

१३ त्वात् ] भूतापेक्षया व्यापकत्वम् ॥

## इन्द्रियाणां प्राप्यकारित्वे सिद्धान्तः

अत्राभिधीयते—यत्तावत् प्राप्यकारित्वं भौतिकत्वपक्षे नावकल्पत इति जल्पितवानसि, तन्मन्ये—नूनं त्वया गोलकमेव चक्षुरिति चेतसि गृहीतम्; II.369/KSV अन्यथा कथमित्थमकथायव्यः । स चायमायुष्मतो महान् भ्रमः । न खलु कृष्णसारं चक्षुः; तदधिकरणं तु तेजः चक्षुः । तच्च वेगवद्द्रव्यत्वात् दूरमपि प्रसरतीति कोऽस्य प्राप्यकारितायां मादः ॥ § 7982

## चक्षुषः गोलकरूपत्वाक्षेपः

ननु ! गोलकेऽपि चिकिप्सादिप्रयोगात्, गोलकगुणदोषानुवर्तित्वाच्च विषयोपलब्धेः गोलकमेव चक्षुः स्यात् । अनुपलभ्यमानं च तेजः कथमिन्द्रियमुच्यते । कथं च तेजसा वेगवतापि विस्फारिते चक्षुषि सहसैव योजनशतसहस्रव्यवहितसितकरतरणितारकादि ग्रहीतुं शक्येत ? कथं वा तदल्पकं वराकं नायनं तेजः समन्ततः प्रसरता सकलभुवनप्रथितप्रभावेन महीयसाऽपि मिहिरमहसा प्रतिहतगति भवेदिति भास्करदर्शनं इत्थं न सम्पद्येत । तेजःपक्षे च काचाभ्रकपटलस्फटिकान्तरितपदार्थोपलब्धिः कथं समर्थ्येत । तस्माद्वरं शक्तिविशेषयुक्तं गोलकमेव, साधो ! चक्षुरभ्युपगच्छेति ॥ § 7983

## चक्षुषः गोलकातिरिक्तत्वम्

उच्यते—न खलु भवदनुशासनेन युक्तिविरुद्धमर्थमभ्युपगच्छामः । प्राप्यकारि हि कारकं दृष्टम् । कृष्णसारपक्षे च कुतः प्राप्यकारित्वम् ? शक्तिरपि कल्प्यमाना निराश्रया न परिकल्पनीयैवेति तदाश्रयचिन्तायां न गोलकमात्रमाश्रयो भवितुमर्हति, अप्राप्यकारित्वप्रसंगादिति तदधिकरणं तेज एव शक्तेराश्रयो भवेत् ॥ § 7984

II.370/KSV

## इन्द्रियाणामप्राप्यकारित्वपक्षः

ननु च ! *प्राप्यकारित्वमेव चिन्त्यं वर्तते । तद्धि रसनस्पर्शनयोः केवलमवलोक्यते लोके । चक्षुःश्रोत्रे तु दूरदेशव्यवस्थितविषयग्राहिणी कथं

११ ] द(?)— nyāma-wit_kha
१२ ] बाल— nyāma-wit_kha
१५ ] पक्ष— nyāma-wit_kha
१८--१९ ] योक्ते— nyāma-wit_kha

१८ णं ] तदाधिकरणं—तदाधिकरणकम् ॥
२० * ] इन्द्रियं स्वसम्बद्धं वस्तु गृह्णातीति पक्षः प्राप्यकारित्वपक्षः । असंबद्धं गृह्णातीति पक्षः विपरीतः बौद्धानाम् । संबन्धः—सन्निकर्षः ॥

प्राप्यकारिणी स्याताम् ॥ § 7985

घ्राणं तु त्रिपुटिकानिकटनिहितपदार्थगन्धमपि गृह्णाति, दूरतोऽपि च प्रचलदनिलबलवेल्लितफुल्लमल्लिकादिसौरभमुपलभते । त्रिपुटितकोपकण्ठ-ढौकितेनापि द्रव्येण न तस्य सन्निकर्ष इति तदप्यप्राप्यकार्येव तस्माच्छ-क्तिविशेषणमधिष्ठानमेव तत्तदिन्द्रियमिति गृह्यताम् । उत्सृज्यतां प्राप्य-कारित्वपक्षः ॥ § 7986

चक्षुषि चन्द्रार्कग्रहादिग्राहिणि नितरां प्राप्यकारित्वमित्युक्तमेव ॥ § 7987

## इन्द्रियाणां प्राप्यकारित्वपक्षः

अत्रोच्यते—न प्राप्यकारित्वमुत्स्रष्टुं शक्नुमः । कारकत्वमेव तथा स-त्येषामुत्सृजेम । कारकं च, अप्राप्यकारि चेति चित्रम् ॥ § 7988

अदृष्टमपि कारणमात्मनो व्यापकत्वात् तद्वृत्तिधर्माधिकं नाप्राप्यकारि भवेत्; किमुत दृष्टं चक्षुरादि कारकमिति ॥ § 7989

अप्राप्यकारित्वे च शक्तेरविशेषणात् कुड्यादिव्यवहितमपि वस्तु चक्षुषा दृश्येत । तत्र कार्यानुपलम्भान्न शक्तिः कल्प्यत इति चेत्—किं शक्तः कल्प्यताम्, किं तेज इति संप्रधारणायां तेजसो द्रव्यत्वात् व्यवधानादि अनुगुणम्, अमूर्तायास्तु शक्तेः व्यवधानमबाधकं भवेदिति तेज एवेन्द्रियं कल्पनीयं, न शक्तिः, शक्तिमदधिष्ठानं वा ॥ § 7990

II.371/KSV

## प्राप्यकारित्वोपपादनम्

प्राप्यकारिता च श्रोत्रस्य तावत् वीचीसन्तानसदृशशब्दपरम्परारम्भण-द्वारेण दर्शिता शब्दाधिकरणे ॥ § 7991

घ्राणस्यापि समीरणान्दोलितकुन्दलतादिप्रसृततत्परिमाणनिकराधिकरण-गन्धग्रहणात् प्राप्यकारिता । न च परमाणूनामपसर्पणे द्रव्यपरिक्षयाद्याशंक-नीयम्; भूयस्त्वात्परिमाणूनाम् । अत एव गन्धद्वारकतद्द्रव्यसम्पर्कदोषनिर्ह-रणाय प्रायश्चित्तमशुचिद्रव्यघ्राणे समामनन्ति ॥ § 7992

चक्षुषस्तेजः प्रसरणात् प्राप्यकारिता । अनुपलभ्यमानं तेज इति चेत् किं चन्द्रमसः परभाग उपलभ्यते, पृथिव्याश्चाधोभागः ? न खलु प्रत्य-क्षैकशरणाः पदार्थाः । अनुमानादिभिरप्येषामुपलम्भः सम्भवत्येव । उक्तं चानुमानम् । रूपोपलब्धिकार्येण तैजसमेव चक्षुरनुमीयते । तेजोद्रव्यं हि दीपादि रूपस्य प्रकाशकं दृष्टमिति ॥ § 7993

४--५ ] प्रा— nyāma-wit_ca
९ ] न— nyāma-wit_kha
१६ ] द्योत— nyāma-wit_kha
१६ ] देह— nyāma-wit_kha

३ र्ष] घ्राणेन्द्रियं न द्रव्यग्राहकम् ॥

## चाक्षुषतेजसः अप्रत्यक्षत्वम्

प्रत्यक्षेण तु नायनं तेजः किमिति नोपलभ्यत इति चेत्—उच्यते — विचित्रा हि द्रव्यगुणानामुद्भवाभिभवादिवशेन गतयो भवन्ति । तद्यथा — सर्वतः प्रसरता बहलबहलेन शीतस्पर्शाश्रयेण द्रव्येण व्याप्तौ हेमन्तशिशिरौ ऋतू भवतः । निराधारस्य शीतस्पर्शगुणस्यानुपलब्धेः । अथः सत्यपि तत्र सलिलद्रव्ये तद्गुणस्य शीतस्पर्शस्यैवोपलब्धिः, न शुक्लरूपस्येति ॥ § 7994

तेजोद्रव्येण च निरर्गलं विजृम्भमाणेन भूयसा ग्रीष्मो भवति । तत्र सत्यपि तेजोद्रव्ये तद्गुणस्योष्णस्पर्शस्यैव ग्रहणम्, न भास्वररूपस्येति ॥ § 7995

II.372/KSV

भास्वरं च कार्तस्वरादौ तैजसद्रव्ये रूपमुपलभ्यते, नोष्णस्पर्शः ॥ § 7996

उदकान्तर्गते च तेजसि ज्वलनतप्ते जले ज्वलनगुणः उष्णस्पर्शोऽनु भूयते, न भास्वरं रूपमिति ॥ § 7997

एवमिह नयनरश्(?) तेजसि द्रव्ये द्वावपि रूपस्पर्शौ नोपलभ्येते इति कमुपालभेमहि ॥ § 7998

उक्तं च *दृष्टानुमितानां च नियोगप्रतिषेधानुपपत्तिः प्रमाणस्य तत्त्वविषयत्वात् न्या. सू-३-१५० इति ॥ § 7999

## चक्षुस्तेजसः क्वचिदुपलंभः

न च सर्वत्र नयनरश्मेरनुपलम्भः । क्वचिद्धि पृषदंशप्रभृतीनां नक्तंचरणां निशि निबिडतमतमःपकपटलावलिप्ते वेश्मनि संचरतां चाक्षुषं तेजः भास्वरं रूपं दूरमपि प्रसरदुपलभ्यत एव । अन्यत्र मध्यन्दिनोल्काप्रकाशवदग्रहणमस्मदादिनयनरश्मेः ॥ § 8000

अयं तु विशेषः—उल्कारूपस्य दिवाकरकरविभवाभिभूतत्वादग्रहणम्, नयनरश्मिरूपस्य त्वनुद्भतत्वादेवेति ॥ § 8001

## काचाद्यान्तरितानां ग्रहणोपपत्तिः

यत्तु काचाभ्रपटलस्फटिकान्तरितपदार्थोपलम्बनं; तत्र काचादीनां केषांचित् अतिस्वच्छत्वात्, केषां चिच्च सुषिरत्वात् चाक्षुषतेजःप्रसर निरोधकौशलं नास्तीति नाप्राप्यकारित्वं चक्षुषस्तावता भवति ॥ § 8002

II.373/KSV

---

४ ] तः— nyāma-wit_ca
१५ ] या— nyāma-wit_kha
१७ ] त— nyāma-wit_kha

---

१ त ] तस्य बहिः प्रसराङ्गीकारत् ॥
१४ * ] प्रत्यक्षतः, अनुमानतो वा यत् यथा प्रतिपन्नम्, तत्तथैव । तत्र एवमेव भवतु, तथा मा भवतु इति विधिनिषेधौ न संभवतः । प्रमाणं खलु तद्विषयं व्यवस्थापक मित्यर्थः ॥
१६ चिद्धि ] पृषदंशः—मार्जालः ॥

## चाक्षुषतेजसः वेगातिशयः

यत्तु—कुतो नयनरश्मेरीदृशी गतिः, गगनमाक्रम्य यद्भस्तिमालिनं स्पृशति, न प्रतिहन्यते च सावित्रेण वेगवता तेजसेति—उक्तमत्र दृष्टानुमितानां नियोगप्रतिषेधानुपपत्तिरिति । कार्य सत्तया हि तथाविधं कारणं कल्प्यते, यद्दूरमपि प्रसरति, प्रसरदपि परेण न निरुध्यते । दृष्टश्चानिरोधो भर्जनकपालादौ तेजसः पच्यमानद्रव्यपाकसिद्धेः । कलशे च निषिक्तानां अपां बहिःशीतस्पर्शग्रहणात् अनिरोधः । एवं नयनरश्मेरपि भविष्यति । न तु गोलकस्यैव शक्तिकल्पना लघ्वीति वक्तव्यम्, प्राप्यकारिकारकस्वरूपपरित्यागप्रसङ्गात् । प्राप्यकारीणि चक्षुःश्रोत्रे, त्वगादिवत् इति ॥ § 8003

## इन्द्रियाणां आश्रयातिरिक्तत्वम्

अत एव सर्वेन्द्रियाणां प्राप्यकारित्वम् पश्यद्भिः शास्त्रज्ञैः इन्द्रियार्थसन्निकर्षः षड्प्रकारो व्याख्यातः । प्राप्यकारिता च न गोलकस्योपपद्यते, तदप्राप्तस्य पर्वतादेग्रहणात्, प्राप्तस्य च प्रत्युतांजनशलाकादेरग्रहणात् । अतो न गोलकं चक्षुः ॥ § 8004

## गोलकसंस्कारेण चक्षुषः अतिशयलाभः

*चिकित्सादिप्रयोगस्तु गोलके यः प्रवर्तते ।
सोऽयमाधारसंस्कारः आधेयस्योपकारकः ॥§ 8006

अत एव गोलकगुणदोषानुवर्तित्वमपि विषयोपलब्धेर्घटमानम्, आधार
II.374/KSV द्वारके हि तदाधेयस्यैव तौ गुणदोषाविति । तस्मात् अप्राप्तविषय ग्रहणानुपपत्तेः गोलकचक्षुःपक्षः भिक्षूत्प्रेक्षितः प्रेक्षावतां हृदयेषु न विश्राम्यतीति प्राप्यकारि तेज एव चक्षुरिति स्थितम् ॥ § 8007

## इन्द्रियाणां आहंकारिकत्वानुपपत्तिः

इत्थं भौतिकेन्द्रियवादेऽपि प्राप्यकारित्वसिद्धेः न कापिलकथितमाहङ्कारिकत्वमिन्द्रियाणामुपपद्यते ॥ § 8008

ननु ! पक्षद्वयेऽपि प्राप्यकारित्वोपपत्तेः कोऽयं भौतिकत्वं प्रत्यभिनिवेशातिशयो भवतामिति—उच्यते—*एकप्रकृतिकत्वे हीन्द्रियाणां एक-

---

३ ] बलव— nyāma-wit__ca
७--८ ] व्ये प्राप्ता त्वना—

nyāma-wit__kha

---

१३ *] वैद्यकचिकित्सादीनां गोलक एव खलु प्रयोगः, न तु इन्द्रिये; तस्या तीन्द्रियत्वादित्याक्षेपयेयेदं समाधानम् ॥

२२ *] एकप्रकृतिकत्वम्—एकोपादानकत्वम् । अहंकारतत्वात् सर्वेन्द्रियाणां युगपत उत्पत्तिरिति सांख्याः ॥

मेव सर्वविषयप्रकाशनकुशलमिन्द्रियं भवेत्, सर्वाणि वा सर्वविषयग्राहीणि भवेयुः, कारणस्याविशेषात् । कारणनियमाधीनो हि कार्यनियमः । अहङ्काराख्यं च कारणं सकलविषयप्रकाशनशक्तियुक्तम् । इन्द्रियाण्यपि तथा भवेयुः । एकविषयप्रकाशनशक्तियुक्ते तस्मिन् कथमिन्द्रियान्तराणि विषयान्तरग्राहीणि भवेयुः ? भौतिकत्वे तु भूतानां भेदात् नियतगुणोत्कर्षयोगित्वात् नियतविषयग्राहीन्द्रियप्रकृतित्वम् ॥ § 8009

तथा च प्रदीपादितेज रूपरसाद्यनेकविषयसन्निधानेऽपि रूपस्यैव प्रकाशकमुपलब्धम् । अतस्तेजःप्रकृति चक्षुरिन्द्रियमपि रूपस्यैव प्रकाशकं भवितुमर्हति । एवमिन्द्रियान्तरेष्वपि वक्तव्यम् । तदेष विषयनियमः प्रकृतिनियमकारित इन्द्रियाणामिति भौतिकानीन्द्रियाणि ॥ § 8010

## चक्षुरादिभिः रूपादिग्रहणोपपत्तिः

यद्येवं तैजसेन चक्षुषा कथं पार्थिवस्य रूपस्य ग्रहणम् ? पृथिव्या एव वा ? आप्येन च रसनेन पार्थिवस्य रसस्य; वायवीयेन स्पर्शनेन्द्रियेण च II.375/KSV
पृथिव्यादिस्पर्शस्य ? तदिदं प्रकृतिनियमेऽपि कथं विषयसांकर्यमिति — नैषदोषः—रूपादिविषयविषयोऽपि ह्येषां नियमः न तदाश्रयविषयः । तैजसं हि प्रदीपादि द्रव्यं रूपमेव प्रकाशयद्दृश्यते, न तेजोवृत्त्येव रूपम् । आप्यमपि द्रव्यं रसमेव व्यनक्ति, न तु सलिलस्थमेवेति । घ्राणे तु न कश्चिद्दोषः, तद्ग्राह्यस्य गन्धस्य पृथिव्येकवृत्तित्वादिति ॥ § 8011

द्रव्यस्यापि दर्शनस्पर्शनग्राह्यत्वमविरुद्धमित्थं भौतिकत्वेऽपीति ॥ § 8012

## इन्द्रियैः महद्वस्तुग्रहणोपपत्तिः

यत्तूक्तं महदणुग्रहणान्न भौतिकानीन्द्रियाणीति—परिहृतं तत् गोलकाद्यधिष्ठानातिरिक्तस्येन्द्रियस्य दर्शितत्वात् । तच्च विततत्वाद्विततग्राहि भवत्येव । विततेनापि च तेजसाऽणुद्रव्यं प्रकाश्यमानं दृश्यते दीपादिना तण्डुलादीति । अतोऽपि नाहङ्कारिकत्वम् ॥ § 8013

## इन्द्रियैः स्वगुणाग्रहणम्

यत्पुनरभ्यधायि—भौतिकत्वे परगुणवत् स्वगुणस्यापि प्रकाशक मिन्द्रियं स्यादिति—तदयुक्तम्—सगुणस्येन्द्रियस्येन्द्रियभावात् । इन्द्रियेण हि सता तेन विषयः परिच्छिद्यते । सगुणस्य चास्येन्द्रियत्वं, स्वगुणरहितं तत् इन्द्रिय-

२ ] क— nyāma-wit_kha
३--४ ] युक्ते— nyāma-wit_kha
८ ] शी— nyāma-wit_kha
१५ ] रस— nyāma-wit_kha
१५--१९ ] धू— nyāma-wit_kha
२० ] नी— nyāma-wit_kha
२१--२२ ] पि— nyāma-wit_kha

मेव न स्यात् । अनिन्द्रियं च कथं ग्राहकम् ? अतः इन्द्रियगुणानां प्रमाणकोट्यन्तःपातित्वात् न तत्प्रमेयत्वम् । तस्मा द्भौतिकानीन्द्रियाणि स्वं स्वं विषयमुपलभन्त इति सिद्धम् ॥ § 8014

## इन्द्रियाणां भौतिकत्वसाधकानुमानम्

प्रयोगस्तु—पार्थिवं घ्राणं, द्रव्यत्वे सति रूपादिमध्ये गन्धस्यैव व्यंचकत्वात्, *गन्धयुक्तिद्रव्यवत् । तत्र व्यंजकत्वमात्रमनैकान्तिक मिति गन्धस्यैव विशेष्यते । सोऽयमसिद्धो हेतुर्भवेत्, गन्धत्वस्यापि घ्राणव्यङ्ग्यत्वादिति रूपादिमध्य इत्युक्तम् । तथापि सन्निकर्षेण व्यभिचार इति तद्व्युदासाय दृश्यत्वे सतीति विशेषणम् ॥ § 8015

II.376/KSV

एवं रसनादिष्वपि प्रयोगा रचनीयाः । श्रोत्रं त्वाकाशैकदेश इति शब्दाधिकरणे निर्णीतम् । गन्धादिविषयोपलब्धिनिबन्धनसुखदुःखोपभोगहेतुभूतधर्माधर्मोपनिबद्धानां चेन्द्रियाणामिन्द्रियत्वमिति तद्वशात् यथा यथा नियत विषयग्रहणकरणता घटते, तथा तथा कल्प्यत इति सर्वमनवद्यम् ॥ § 8016

## त्वगिन्द्रियैकान्तवादः

आह—भवन्तु भौतिकानीन्द्रियाणि; पंचेति तु न युक्तमुक्तम् । त्वगेव ह्येकमिन्द्रियं भवितुमर्हति, सर्वत्रानपायात् ॥ § 8017

करतलकपोलकण्ठादिवर्तिनाऽपि त्वगिन्द्रियेण रूपोपलम्भप्रसङ्ग इति चेत्—न—*अवयवविशेषे शक्तिविशेषनियमात् । न हि पाणिना पादेन वा उपस्थकार्यं कर्तुं शक्यते । अस्ति च अवयवविशेषे स्वभावविशेषवैचित्र्यम् ॥ § 8018

तुषारकर्पूरापूर्णवारिण्युत्तरमानसे ।
यथा च वृषणौ स्नातुः स्फुटतो न तथा स्फिचौ ॥§ 8020

क्लिन्नार्द्रतृणकाष्ठादिधूमेन कटुना यथा ।
मूर्धाक्षिवेदनोदेति न तथाऽवयवान्तरे ॥§ 8022

तस्मात् अवयवविशेषव्यवस्थितनानाशक्तिखचितं त्वगेवैकमिन्द्रियमिति ॥ § 8023

II.377/KSV

१ ] अ— nyāma-wit__kha
११ ] का— nyāma-wit__ca
१७ ] ष— nyāma-wit__kha

५ *] सुगन्धद्रव्यसज्जीकरणसंस्काराद्युपयोगिद्रव्यम् ॥
१७ *] अवयवाः—जिह्वानासिकादयः ॥
२० से] उत्तरमानसम्—मानससरोवरोत्तरक्षेत्रम् ॥

## त्वगिन्द्रियैकान्तवादनिरासः

उच्यते—कुतोऽयमपूर्व एष महाप्राज्ञो वादी सरलमतीनस्मान वंचयितुमागतः, योऽवयवविशेषे शक्तिविशेषमाश्रयन्नपि एकमिन्द्रिय मन्यते । शक्तिभेदादाश्रयभेदाच्च नानात्वमेवैतदिन्द्रियाणां युक्तमित्यल महात्मभिस्सह कलहेन ॥ § 8024

मनुष्यैस्सह संवादो मादृशानां हि शोभते ।
देवास्तु नररूपेण त इमे भान्ति वादिनः ॥§ 8026

## चक्षुःश्रोत्रयोरेकैकेन्द्रियत्वम्

ननु ! *नानात्वपक्षेऽपि पंचत्वनियमः कथम् ।
द्वे श्रोत्रे चक्षुषी द्वे च कथं ते एकमिन्द्रियम् ॥§ 8028

आह च—सव्यष्टस्येतरेण प्रत्यभिज्ञानात्—गौ. सू. ३-१-७ इति । चक्षुष्टवजातेरेकत्वादिति चेत्—तर्हीन्द्रियत्वजातेरेकत्वात् एकमेवेन्द्रियं स्यात्—उच्यते—चक्षुस्तावत्तेज इति निर्णीतम् । तच्चैकमेव, तदधिष्ठानमप्येकमेव घोणावंशव्यवहितमनेकमिवोपलभ्यते ॥ § 8029

भिन्नं वा तद्भवतु । तेजस्तत्ककार्यैक्यात् आश्रयभेदेऽप्येकमेव श्रोत्र मपि कर्णच्छिद्रद्वयानुस्यूतमेकमेव नभोदेशप्रायं वेदितव्यम्, कार्यैक्यस्य तत्रापि भावात् ॥ § 8030

II.378/KSV

तेनाधिष्ठानभेदेऽपि कार्यैकत्वस्य दर्शनात् ।
तत्सामान्यस्य चैकत्वात् एकत्वं श्रोत्रचक्षुषोः ॥§ 8032

न चेन्द्रियजातेरैक्यात् एकमिन्द्रियम्; कार्यस्योपलब्धिलक्षणस्य कारणस्य गन्धादेः अधिष्ठानस्य त्रिपुटिकादेः गतेश्च बहिःप्रसरणात्मिकायाः, आकृतेश्च परिमाणस्वभावाया जातेश्च घ्राणत्वादेः, जातिशब्दवाच्यस्य योनेर्वा पृथिव्यादेः पंचविधत्वात् पंचैवेन्द्रियाणि कल्प्यन्ते । यथा परमाणुत्वसामान्याविशेषोऽपि पृथिव्यादिचतुर्विधकार्यदर्शनात् चतुर्विधाः परमाणवः कल्प्यन्त इति ॥ § 8033

२ ] षंचा— nyāma-wit_kha
३ ] णामु— nyāma-wit_ca
१२ ] घ्राण— nyāma-wit_kha
१९--२० ] श्च— nyāma-wit_kha

१ वादी ] एवं सति सर्वप्राणिनां इन्द्रियमेकमेव, शरीरभेदात् कार्यवैलक्षण्यमिति स्यात् । इष्टापत्तौ च सर्वात्मनार्मैक्यं स्यादिति नर्मोक्त्या समाधत्ते—सरलेत्यादिना ॥
७ *] नानात्वम्—इन्द्रियनानात्वम् ॥

## कर्मेन्द्रियाणामावश्यकता

ननु ! तथापि न पंचेन्द्रियाणि । कथम् ? *बुद्धीन्द्रियवत् कर्मेन्द्रियाणामपि पंचानामुपसंख्येयत्वात् । तदुक्तम्— § 8034

वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः ॥§ 8035

तेषां च वचनादानविहरणोत्सर्गानन्दात्मकपंचविधकार्यसाधनादिन्द्रियत्वं, तत्कार्यस्यानितरेतरसाध्यत्वादिति ॥ § 8036

## अतिरिक्तकर्मेन्द्रियनिरासः

अत्राह—अत्यल्पमिदमुच्यते—पंच कर्मेन्द्रियाणीति । अन्यान्यपि खलु न सन्ति कर्मेन्द्रियाणि ? तथा हि—कण्ठोऽन्ननिगरणेन, स्तनकलशालिङ्गनादिना वक्षः, भारवहनेन चांसद्वयं इन्द्रियमुच्यते न कथम् ? तत्कार्यस्य II.379/KSV शरीरावयवान्तरेऽपि दर्शनादिति चेत्—किन्नु भवानन्नपानं पाणिपादेन निगिरति ? पायुना वा ? आदानमपि किमास्यादिना वा न कुर्वते तिर्यंचः मनुष्या अपि हि क्वचित् । असत्स्वपि च भवत्कल्पितेषु—कर्मेन्द्रियेषु तत्कार्यं यावत् तावदन्यथापि दृश्यते । न त्वेवं बुद्धीन्द्रियेषु ॥ § 8037

भवत्युत्पाटिक्षस्य न मनागपि रूपधीः ।
ईषद्विहारादानादि दृष्टं लूनाङ्घ्रिपाणिषु ॥§ 8039

## कर्मेद्रियाणामतिप्रसक्तत्वम्

अपि च विहरणमपि न केवलं चरणयुगलकार्यम्, अपि तु जानूरुजङ्घादिसहितपादसम्पाद्यमानमपि । आदानमपि बाहुसहिताभ्यां, पाणिभ्यामभिनिर्वर्त्यते, न केवलाभ्याम् ॥ § 8040

वागिन्द्रियं तु नाभेरूर्ध्वं सर्वमेव स्यात् । एवं ह्याहुः—(?')वायुर्नाभेरुत्थितः उरसि विस्तीर्णः कण्ठे विवर्तितः मूर्धानमभिहत्य परावृत्तः वक्त्रे चरन् विविधान् शब्दानभिव्यनक्ति इति । अस्ति चेदृगनुभवः जल्पतां, विशेषतस्त्वखण्डगेयं गायतामिति । एवंच कर्मेन्द्रियमयमेव विश्व-

१ ] बु— nyāma-wit__kha
१२ ] यन्त्रा— nyāma-wit__kha
१४ ] पि— nyāma-wit__kha; nyāma-wit__gha
१६ ] ---Note: दित्या(?ख)

१ *] बुद्धीन्द्रियं—ज्ञानेन्द्रियम् ॥

मिति न शरीरमिन्द्रियव्यतिरिक्तं किंचिद्भवेत् । § 8041

अथ शरीरावयवेष्वेव भिन्नकार्यकारिषु कर्मेन्द्रियवहारः, तर्हि कण्ठादिभिरतिप्रसङ्ग इत्युक्तम् ॥ § 8042

उपस्थेन्द्रियं च कथमेकं गण्यते, तेनानन्दवत् मूत्रोत्सर्गस्यापि साधनात् ॥ § 8043

१ २ II.380/KSV

## वाचः इन्द्रियत्वानुपपत्तिः

वागिन्द्रियं तु सुतरामहृदयङ्गमम् । संयोगविभागनिर्वर्त्यो बाह्यः शब्द उपलभ्यते । तद्भेदाच्च भिद्यते । यादृशो हि भेरीदण्डसंयोगजः शब्दः, न तादृशः कूर्मीकोणसंयोगजः । एवं विचित्रस्थानकरणसंयोगात् विचित्रो वर्णात्मकः शब्द उदेतीति न वागिन्द्रियं नाम किंचित् ॥ § 8044

लोकश्च वाङ्छब्देन वर्णात्मकमेव शब्दे व्यपदिशति । शब्दश्चेन्द्रियविषयः, नेन्द्रियम् । तस्मादनेकविधदुःखोपभोगक्षेपक्षमकर्मपरिणामनिर्मितमेतच्छरीरं तैस्तैरवयवैः तं तं कर्मफलोपभोगमात्मनः संपादयतीत्यलं एवंविधेन्द्रियकल्पनार्जवेन ॥ § 8045

## मन एकमेवान्तरिन्द्रियम्

अन्तःकरणस्यापि त्रैविध्यमनुपपन्नम्, एकेन मनसैव पर्याप्तेः । बुद्धिस्तु उपलब्धिस्वभावत्वात् करणकार्यं, न तु करणम् । अहङ्कारोऽपि ज्ञानविषय एव, न करणम् । एतच्च सविस्तरं बुद्धिलक्षणे वृक्ष्यामः । तस्मात् न त्रयोदशविधं करणमिति सिद्धम् ॥ § 8046

न्यूनाधिकत्वशमनादत इन्द्रियाणि
पंचैव बाह्यविषयाधिगमक्षमाणि ।
अन्तस्सुखादिविषयग्रहणोपयोगि
षष्ठं मनस्तु कथयिष्यति सूत्रकारः ॥§ 8050

II.381/KSV

१. किं बहुना । वृश्चिकासनाद्यभ्यासवन्तो हि पाणिभ्यामपीषद्विहरन्ति ॥
२. अखण्डगेय—गानविशेषः, आनाभेरुत्थप्यमानस्वरैर्गेयः ॥

७ ] श्च विद्यन्ते— nyāma-wit__kha

१३ ] ज— nyāma-wit__kha

८ तादृशः ] कूर्मी—वाद्यविशेषः ॥
१४ त्रैविध्य ] मनोबुद्ध्यहङ्कारभेदेन त्रिविधमन्तःकरणमिति सांख्याः ॥

१७ विधं ] पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, त्रीण्यन्तःकरणानि ॥

तस्मादिमानि विषयप्रसभोपभोग-
लुब्धानि चोरचटुलानि यथेन्द्रियाणि ।
पुंसो भवाब्धिपतितस्य विवेकरत्नं
आनन्ददायि न हरन्ति तथा विधेयम् ॥§ 8054

## इन्द्रियार्थपरीक्षा

**गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः ॥ ॥ १-१-१४ ॥** § 8055

तदर्थाः इत्यत एवापकृष्य वा, प्रक्रमाद्वा अर्थाः इति लक्ष्यपदं दर्शयितव्यम् । तदर्थाः इति लक्षणम् । तदिति प्रक्रान्तेन्द्रियपरामर्शः । तेषां अर्थाः विषयाः इन्द्रियविषया अर्था इत्यर्थः । एतच्च तेषां सामान्यलक्षणम् । गन्धरसरूपस्पर्शशब्दा इति विभागः ॥ § 8056

## इन्द्रियलक्षणानि

विशेषलक्षणं तु पुनः तदर्थाः इत्येवं योजनीयम् । तदिति घ्राणादीनां विशेषसंज्ञानिर्दिष्टानामवमर्शः । एवंच घ्राणस्य विषयो गन्धः, रसनस्य विषयो रसः—इत्यादिविशेषलक्षणमुक्तं भवति । गन्धत्वादीनां तु घ्राणादिग्राह्यत्वादतिव्याप्तिरिति पृथिव्यादिगुणा इति विशेषणोपादानम् । ते चामी गन्धादयः इन्द्रियार्था भोग्यास्सन्तः सक्तिहेतवः संसार (?)माणमावहन्तीति हेयतया भावयितव्याः ॥ § 8057

II.382/KSV

## गन्धादीनां रागहेतुत्वम्

ननु एवं गन्धादिगुणाधिकरणस्यावयविनः प्रथमस्य रागहेतोरसंग्रहः स्यात् । वक्ष्यति च तन्निमित्तं त्ववयव्यभिमानः इति । संख्या परिमाणादिगुणान्तराणामपि रागहेतुत्वमस्त्येव । यथा हि बर्हिकलापानुकारिपरिमृदितकुसुमदलपटलशबलविलासिनीकेशपाशवृत्ति रूपं हरति हृदयं यूनां, तथा तद्गता बहुत्वसंख्याऽपि । उत्तप्तकनकशिलानिभनितम्बबिम्बरूपवत् तत्परिमाणमपि । हरति च सरभसमवयवसंयोगविभागाद्यपि ॥ § 8058

---

१--२ ] तानि— nyāma-wit_kha
८ ] क्ष्यम्— nyāma-wit_ca; nyāma-wit_gha
८--११ ] सामान्य— nyāma-wit_kha
२२ ] रहसि— nyāma-wit_ca

---

१६ व्याः ] प्रकर्षेण मेयम्—प्रमेयमिति व्युत्पत्त्या हेयतया मुमुक्षुज्ञेयत्वमुक्तम् ॥
१७ स्य ] प्रथमस्य—प्रधानस्य ॥

तथा कन्दुकादिक्रीडासु किसलयितविलासरसमधुरपरिभ्रमणादि कर्मजातम् ॥ § 8059

तथा अन्त्यजात्यादिपरिहारेण स्वानुरूपजातियोगित्वमपीत्यादि सर्वं द्रव्यगुणकर्मादि सक्तिकारणमनुक्तं स्यात् ॥ § 8060

## सूत्रयोजनायां पक्षभेदः

तत्र केचित्—पृथिव्यादिगुणा इति द्वन्द्वसमासं व्याचक्षते—पृथिव्यादीनि च गुणाश्चेति । पृथिव्यादिपदेन गुणाधिकरणमवयवि द्रव्यमुक्तम् । आश्रितत्वविशेषणाभ्यां सर्वे गुणा इति । गुणग्रहणेन संख्यापरिमाणादिवत् कर्मसामान्याद्यपि सर्वमुक्तम् । अतो नासंग्रह इति ॥ § 8061

तदिदमनुपपन्नम्—गन्धादिग्रहणस्य हि तदानीमानर्थक्यम्, गुणाश्च इत्यनेनैव गतार्थत्वात् । *विशेषख्यापनार्थं तदुपादानमिति चेत्; तर्हि किं द्वन्द्वसमासवर्णनेन ? अयमेवास्तु समाधिः ॥ § 8062

II.383/KSV

## रूपरसादीनामिन्द्रियार्थत्वे विशेषः

यद्यपि द्रव्यकर्मसामान्यानां अन्येषां च संख्यापरिमाणादिगुणानां अस्त्येव सक्तिहेतुता—तथापि प्राधान्येन गन्धादीनामेव सा दृश्यते । न हि रूपादिनिरपेक्षस्य द्रव्यस्य संख्यादेः सामान्यस्य वा सक्तिहेतुत्वं समस्तीति रूपादय एव मुख्यं रागकारणम् । तत्र झटिति बुद्धेः प्रसरणात् । उक्तं च— § 8063

तथापि नितरां रागवृद्धौ रूपादयो नृणाम् ।
त एव कविभिर्गीताः पंचेषोः पंच सायकाः ॥§ 8065

तस्मात् पृथिव्यादीनां गुणा इति षष्ठीसमास एव श्रेयान् । गुणव्यतिरिक्तश्च गुणी पूर्वमेव साधितः यमहमद्राक्षं, तं स्पृशामि इति प्रत्ययप्रामाण्यात् ॥ § 8066

## पृथिव्यादीनां गुणविभागः

---

४ ] न्धि— nyāma-wit_kha
१४ ] सं— nyāma-wit_ca
२० ] समर्थि— nyāma-wit_kha

---

४ र्मादि ] सक्तिः—आसक्तिः, राग इति यावत् ॥
१० *] विशेषः—गुणेष्ववान्तरविभागः ॥
१५ म् ] शब्दस्पर्शरूपरसगन्धाः पञ्चविषयाः साक्षाद्बन्धहेतवः । एतद्द्वारेव संख्यापरिमाणादीनां बन्धकत्वम् ॥

पृथिव्यादीनां गुणा इति यदुक्तं, दिदानीं विभज्य वर्ण्यते, कस्य कति गुणा इति । तत्र— § 8067

गन्धादयो नियोक्तव्याः चत्वारः पृथिवीगुणाः ।
अप्तेजोमरुतामेकं पूर्वपूर्वमपोह्य तु ॥ § 8069

गन्धवर्जं रसरूपस्पर्शाः अपाम्, रसवर्जं रूपस्पर्शौ तेजसः, रूपवर्जं स्पर्श एव वायोः इति । आकाशस्य तु गुणः शब्दः ॥ § 8070
II.384/KSV

## भूतानामेकैकगुणवत्त्वनिराकरणम्

ननु ! नायं गुणविनियोगः साधीयान् । पृथिव्याश्चतुर्गुणत्वे पार्थिवेन घ्राणेन्द्रियेण चतुर्णामपि तद्गुणानां ग्रहणं स्यात् । एवमुत्तरेष्वपि वक्तव्यम् । तस्मादेकैकगुणत्वमेव भूतानामुच्यताम्—नैतदेवम्—न हि गुणाः स्वेच्छया लभ्यन्ते । किन्तु यथोपलभ्यन्ते, तथा व्यवस्थाप्यन्ते । प्रतीतिप्रमाणका हि वयम् । तत्र—पार्थिवे द्रव्ये चतुर्णामपि गुणानां उपलंभात् कथमेकगुणां पृथिवीं ब्रूमः । रूपैकगुणे च तेजसि, पृथिव्युदकयोः वायुवदरूपत्वादप्रत्यक्षत्वं स्यात् । तस्मात् त्रीणि रूपवन्ति तव्याणि ॥ § 8071

## सर्वस्य सर्वगुणवत्त्वनिराकरणम्

यद्येवं सर्वेषां सर्वत्रोपलंभात् सर्वाणि सर्वगुणानि भवन्तु भूतानि । पटपटायते पृथिवी, चलचलायन्ते आपः, धगधगायते तेजः । कथकथायते वायुः इति सर्वेषां गुणः शब्दः स्यात् । उच्यते—न सर्वे गुणाः सर्वत्रोपलभ्यन्ते । निर्गन्धानामपां सर्वत्र दर्शनात् । क्लिन्नरूपादौ तु पार्थि वावयवसंक्रान्त्या गन्धः पयस्युपलभ्यते ॥ § 8072

## शब्दस्याकाशमात्रगुणत्वम्

एवं सुवर्णे तैजसे द्रव्ये, संयुक्तसमवायात् रसाद्युपलब्धिः । शब्दस्तु सर्वकालमाकाशवृत्तिरेव प्रतीयते । पृथिव्याद्यवयवसंयोगविभागप्रभवस्त्वसाविति तदाश्रितत्वभ्रममावहति, न त्वकाशाद्विना तस्य ग्रहणमिति ।
II.385/KSV
आकाशगुण एव शब्द इत्येतच्च प्राङ्निर्णीतम् । तस्मात् न सर्वेषां सर्वगुणत्वम् ॥ § 8073

---

८ ] णं— nyāma-wit_kha
१७ ] निष्क्रा— nyāma-wit_kha
२२ ] गु— nyāma-wit_kha

---

९ ताम् ] इतरत् जले गन्धवदौपाधिकमस्तु ॥
१३ स्यात् ] यस्य कस्यचित्
क्वचिदौपाधिकत्वे हि विनिगमकाभावः ॥

## इन्द्रियाणां विषयनैयत्यम्

यच्च पृथिव्याश्चतुर्गुणत्वे तद्गुणानां चतुर्णामपि पार्थिवघ्राणेन्द्रिय ग्राह्यत्वं स्यादिति—तन्न—*गुणोत्कर्षस्य नियामकत्वात् । सातिशयगन्ध गुणाधिकरणैर्विजातीयद्रव्यावयवसंस्पर्शलेशरहितैः केवलपृथिव्यवयवैरदृष्ट सहकारिभिः घटितं घ्राणेन्द्रियमिति गन्धस्यैव ग्राहकम् ॥ § 8074

## तत्तदिन्द्रियेषु तत्तद्गुणस्य प्राधान्यम्

एतदेव च भूयस्त्वमाचक्षते । यथाऽऽह कणव्रतः—भूयस्त्वाद्गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने प्रकृतिः । इहाप्युक्तं—तद्व्यवस्थानं तु भूयस्त्वात् इति । दृश्यन्ते च केवलपृथिव्यवयवोपादानेष्वपि पदार्थेषु व्यवस्थितकार्यनियमाः शक्तयः । यथा— § 8075

पार्थिवत्वाविशेषेऽपि विषं मरणकारणम् ।
*अगदद्रव्यमन्यत्तु जीविताय प्रकल्पते ॥§ 8077

तस्मादपर्यनुयोज्योऽयं पार्थिवेन घ्राणेन गन्धवत् तद्रसादयोऽपि कथं न गृह्यन्त इति ॥ § 8078

## इन्द्रियैः स्वगतगुणग्रहणाग्रहणे

सातिशयप्रकृतिगुणयोगेऽपि न च स्वगुणग्रहणनैपुण्यमिन्द्रियाणामिती न्द्रियचिन्तायां निर्णीतम् । श्रोत्रेण तु स्वगुणस्य शब्दस्य ग्रहणमिति परि
शेषानुमानप्रमाणकोऽयमर्थः शब्दपरीक्षायामेव परीक्षित इत्यलमतिप्रसङ्गेन II.386/KSV
॥ § 8079

इति निपुणधियामसम्मतैषा
सकलगुणैकगुणत्वकल्पना ।
तदयमकलुषोऽभ्युपेयतां
गुणविनियोगविधिर्यथोदितः ॥§ 8083

## इन्द्रियाणां विमर्शनस्य फलम्

१३ ] ति— nyāma-wit_kha
१४ ] णाकाश— nyāma-wit_kha

२ *] गुणः—गन्धः ॥ अन्यत्—हरीतक्यादि ॥
१० *] अगदः—व्याधिः ।

तेऽमी ज्ञेयाः कृतकमधुरं रूपमादर्शयन्तः
तिक्तोद्गाराः परिणतिविपत्कारिणो हीन्द्रियार्थाः ।
त्यक्ताश्चैते व्यपगतमहामोहपङ्केन पुंसा
तीर्णश्चायं भवजलनिधिः क्लेशकल्लोलरौद्रः ॥§ 8087

—इतीन्द्रियपरीक्षा— § 8088

## बुद्धिपरीक्षा

### बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ १-१-१५ ॥ § 8089

ननु ! पर्यायोच्चारणमेतत्, न बुद्धेर्लक्षणाभिधानम्—न—पर्यायप्रयोगस्यैव लक्षणक्षमत्वात् । लक्षणं हि तदुच्यते—येन समानेतरजातीयेभ्यः लक्ष्यं व्यवच्छिद्यते । व्यवच्छिद्यते च बुद्धिः बुद्ध्यादिपर्यायवाच्यतयैव तेभ्य इति नाभिधानमालामात्रमिदम् ॥ § 8090

१ II.387/KSV

## सूत्रस्य लक्षणपरत्वम्

ननु ! सामयिकत्वाच्छब्दार्थप्रत्ययस्य, समयस्य च पुरुषेच्छानुवर्तित्वात् कथमिदं व्यवस्थितं लक्षणं स्यात् ?—मैवम्—सार्वजनीनस्य समयस्य विप्लावयितुमशक्यत्वात् । तद्विशिष्टस्य तद्वाच्यस्य लक्षणत्वात् ॥ § 8091

प्रकारान्तरेण लक्षणमस्याः किमिति नोक्तमिति चेत्, शिंशपाचोद्य मिदम् । तस्मिन्नप्युक्तेऽनुयुंजीत भवात् इत्थं किमिति नोक्तम् इति ॥ § 8092

## बुद्धिलक्षणविचारः

अस्ति च प्रयोजनं पर्यायद्वारकलक्षणोपवर्णनस्य, यत् सांख्यानां व्यामोहनिरसनम् । एवं हि साङ्ख्याः संगिरन्ते—बुद्धिरन्या, ज्ञानमन्यत्, उपलब्धिरन्येति । तद्भ्रयापनयनायेदमुच्यते—बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्—एक एवार्थ इत्यर्थः । इत्थं च स्वरूपतो निर्ज्ञाता बुद्धिः भोगस्वभावत्वात् तत्साधनत्वाच्च संसारहेतुरिति हेयत्वेन भाव्यते, सुखादिबुद्धिः भोगः, तत्साधनबुद्धिस्तु भोगसाधनमिति । कथं पुनः पारमर्षाः प्रवदन्ति, बुद्धिरन्या, ज्ञानमन्यत्, उपलब्धिरन्येति ? नित्यां हि बुद्धिं ते मन्यन्ते ॥ § 8093

१. बुध्युपलब्धिज्ञानानां भिन्नत्वं सांख्या मन्यन्ते । तन्निराकरणार्थं एषामर्थान्तरत्वं निरस्यते सूत्रे । इतरदार्थिकम् ॥

१ ] क्षे— nyāma-wit__kha
२ ] त्काहा— nyāma-wit__kha
११ ] निवर्त्य— nyāma-wit__kha
१३ ] द्वदि— nyāma-wit__kha
२२ ] न्यो— nyāma-wit__kha

९ तेभ्य ] तेभ्यः—समानेतरजातीयेभ्यः ॥

## सांख्यसंमतबुद्धिपरीक्षा

तत् किमात्मैव तैः बुद्धिरिति गृहीतः ?—न—अचेतनायाः भोग्यायाः प्रकृतेः थमा विकृतिः महच्छब्दवाच्या बुद्धिः । पुरुषस्तु चेतनः भोक्ता अन्य एव । ताविमौ प्रकृतिपुरुषौ विवेकेनापश्यतां संसारः । प्रकृतिपुरुषविवेक- II.388/KSV
ज्ञानान्मोक्षः इति ॥ § 8094

## प्रकृतिस्वरूपम्

का पुनः प्रकृतिर्नाम ? सत्त्वरजस्तमसां त्रयाणां गुणानां साम्यावस्था प्रकृतिः । प्रधानमव्यक्तं च तदुच्यते, यत्साम्यावस्थागतं गुणत्रयमिति ॥ § 8095

ननु ! तत्सत्त्वे किं प्रमाणम् ? अनुमानमित्याह । तथा हि चराचरमिदं विश्वं सुखदुःखमोहाविनाभूतमुपलभ्यते । न हि ब्रह्मादौ स्तम्ब पर्यन्ते जगति तथाभूतं किमपि भूतमुपलभ्यते, यत् सुखदुःखमोहैर्विनाकृतम् ॥ § 8096

तत्र सुखस्वभावं सत्त्वम्, दुःखस्वभावं रजः, मोहस्वभावं तमः । सर्वत्र च प्रीत्यप्रीतिविषाददर्शनात् प्रकाशप्रवृत्तिनियमावगमाच्च सर्वं त्रिगुणात्मकं जगत् । कार्यं च यत् परस्परान्वितरूपं तदेकरूपात्कारणादुत्पद्यमानं दृश्यते । मृदन्वितानि हि घटशरावोदंचनप्रभृतीनि कार्यस्यैकस्मान्मृदात्मनः कारणादुद्भवन्ति । तदिदं विश्वं सुखदुःखमोहान्वितमिति तदात्मककारणकार्यं भवितुमर्हति । यत् सुखदुःखमोहात्मकं कारणं सा सत्त्वरजस्तमोरूपा प्रकृतिः ॥ § 8097

## प्रकृतिसाधकानुमानान्तराणि

एवमन्वयपुरस्सराः परिमाणादिहेतवोऽपि वक्तव्याः । इयत्तया वा चतुरश्रतादिना वा परिमाणेन तद्वतां कार्याणामेकप्रकृतित्वदर्शनात् । विषम- II.389/KSV
वृत्तयश्चैते गुणाः कार्येषु दृश्यन्ते । क्वचित्सत्त्वमाधिकम्, ऊने रजस्तमसी । क्वचिद्रजः प्रकृष्टम्, अल्पे सत्त्वतमसी । क्वचित्तमः प्रवृद्धम्, तुच्छे सत्त्वरजसी इति । तदेषां वैषम्यभेदोपदर्शितविश्वरूपकार्याणां क्वचित् साम्यावस्थया भाव्यम् । सा प्रकृतिरुच्यते । सेयमचेतना भोग्या प्रकृतिः । अस्यास्तु भोक्ता चेतनः पुरुषः ॥ § 8098

१० ] रवि— nyāma-wit__kha
१२ ] दादि— nyāma-wit__kha

२ बुद्धिः ] बुद्धिस्तु प्रकृतेः परिणामः । ज्ञानं तु पुरुषस्य स्वरुपं मुख्यम् । गोणं तु ज्ञानं बुद्धेः वृत्तिरेव । तदा तु पुरुषस्य स्वरूपं चैतन्यम् ॥

१५ मिति ] सत्कार्यवादिनः सांख्याः उपादानोपादेययोः अभेदमङ्गीकुर्वन्ति । अतः तदात्मक इत्युक्तम् ॥

## सांख्योक्तपुरुषानुमानप्रकारः

पुरुष इदानीं किमनुमानकः ? उक्तमेव भोग्येन भोक्तुरनुमानम् । न ह्यचेतनस्य—भोग्यस्य भोक्तारमन्तरेण भोग्यतैवोपपद्यते । दृष्टा च *सेति भोक्ता कल्प्यते ॥ § 8099

स च चितिशक्तिस्वभावक एव सर्वप्रकारकर्तृत्वादिव्यहार निर्वहबहिष्कृतस्वरूपः । द्रष्टृत्वमेव पुरुषस्य स्वरूपमाहुः । यथा भवन्त एनमात्मानमध्यवसायादिधर्मयोगिनं मन्यन्ते, न तथाऽसौ भवितुमर्हति; अध्यवसायादेर्बुद्धिधर्मत्वात् ॥ § 8100

कर्तुं शक्नोति पुरुषः तृणस्यापि न कुब्जताम् ।
अन्योपनीतमर्थं तु स पश्यत्येव केवलम् ॥§ 8102

## प्रकृतेरेव सर्वकर्तृत्वम्

प्रकृतिरेवैनं भोगापवर्गाभ्यां संयुनक्ति । न च निर्विकारा सती भोगसंपादनसमर्थाऽसौ भवतीति महदादिविकृतीः प्रतिपद्यते । पङ्गुबन्धन्यायेन II.390/KSV प्रकृतिपुरुषौ संयुज्येते । प्रकृतिरचेतना दृश्या भोग्या द्रष्टारं भोक्तारं पुरुषमपेक्षते । पुरुषोऽपि द्रष्टा भोक्ता दृश्यं भोग्यमपेक्षते । इत्येवं तयोः पङ्ग्वन्धवत् संयोगो भवति । दर्शनशक्त्या पङ्गोः, गमनशक्त्या चान्धस्य एकत्र मेलनात् कार्यसिद्धिः । एवं प्रकृतिपुरुषसंयोगात् सर्गः प्रवर्तते तदुक्तम्—
§ 8103

पुरुषस्य दर्शनार्थः कैवल्यार्थः तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगः, तत्कृतः सर्गः ॥ सां-का-११§ 8105

## बुद्धेः परिणामभेदाः

यच्चेत्थं प्रधानान्महत्तत्त्वमुत्पद्यते, सा बुद्धिरध्यवसायात्मिका धर्मज्ञानवैराग्यैश्यर्यतद्विपर्ययरूपवृत्तियोगिनी महत्तत्त्वमुच्यते ॥ § 8106

बुद्धेरहङ्कार उदेति । स चाभिमानस्वभावः ॥ § 8107

*अहंकारात्तु घ्राणादीनि पंच बुद्धीन्द्रियाणि, वागादीनि पंच कर्मेन्द्रियाणि, सङ्कल्पकमेकादशं मनः गन्धादितन्मात्राणि च पंचेति षोडशको गुणः प्रभवति

१ ] मा— nyāma-wit__ca
१ ] नि— nyāma-wit__ca
२० ] य— nyāma-wit__ca
१ ] प्रा— nyāma-wit__kha

२ *] सा—भोग्यता ॥
५ रूपः] यतः स्वतः निर्गुणः निर्विकारश्च ॥
२० र्य] तद्विर्ययः—अधर्माज्ञानावैराग्यानैश्वर्यरूपः ॥
२२ *] सात्त्विकाहंकारादेकादशेन्द्रियाणि, तामसाहंकारात्पञ्चतन्मात्राणि जायन्ते ॥

॥ § 8108

ततो गन्धादितन्मात्रपंचकात् पंच पृथिव्यादीनि महाभूतानि जायन्त इति । आह च— § 8109

(?')प्रकृतेर्महास्ततोऽहङ्कारः तस्माद्गणश्च षोडशकः ।
तस्मादपि षोडशकात् पंचभ्यः पंच भूतानि ॥ सां. का. २२ § 8111

तानीमानि पंचविंशतितत्त्वानि संचक्षते । प्रधानं प्रकृतिरेव, न विकृतिः । महदहङ्कारतन्मात्राणि सप्त पूर्वपूर्वापेक्षया विकृतयः, उत्तरो वोत्तर- II.391/KSV
कार्यापेक्षया प्रकृतयः । एकादशेन्द्रियाणि, पंचभूतानि विकृतय एव । अप्रकृतिविकृतिरूपस्तु शुद्धः पुरुष इति । तदाह— § 8112

(?')मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारः न प्रकृतिर्न विकृतिः पुरुषः ॥ सां. का. ३ § 8114

## प्रकृतेर्बाधकत्वप्रकारः

एवं महादिविकारवती प्रकृतिरात्मनो भोगं साधयति । कश्चास्य भोगः ? बुद्धिवृत्त्यनुपातित्वम् । विषयाकारपरिणतेन्द्रियवृत्त्यनुरक्तां बुद्धिवृतिं ज्ञानात्मिकां पुरुषः पश्यति । दर्शनेऽपि न तस्य किंचिदन्यत्वम् । तदेव दर्शनं—यत् तत्र प्रतिबिम्बनमिति । इत्थं तयोः बुद्धिपुंसोः संयोगे सति पुरुषधर्मश्चेतयितृत्वलक्षणः बुद्धावसन्नपि सन्निव लक्ष्यते । बुद्धिधर्मश्च कर्तृत्वादिः आत्मनि साक्षिस्थानीयेऽसन्नपि सन्निव विभाव्यते । तदाह— § 8115

(?')तत्स्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ सां. का. २० § 8117

## प्रकृतेर्मोचकत्वप्रकारः

अथ अपवर्गाय कथमात्मनः प्रकृतिरवकल्पते ? स्वरूपं प्रकाशयतीत्याचक्षते । अनवधृतप्रकृतिस्वरूपः पुमान् स्वरूपनिष्ठ एव प्रकृतिकृतमखिलं आत्मकृतमिति मन्यमानः तदुपार्जितं भुङ्क्ते । यदा तु पृथग्भूतामेनां मन्यते,

१७ ] बुद्धि— nyāma-wit_kha
१८--१९ ] त— nyāma-wit_kha
२ ] प्र— nyāma-wit_kha

१४ न ] तस्य—पुरुषस्य । अन्यत्वम्—रूपान्तरापत्तिः ॥

तदा भवत्त्वियमायासहेतुरेव मम, इति बुद्ध्यमानः तत्कृतमनुपभुंजानः स्वरूपनिष्ठ एवावतिष्ठते । प्रकृतिरपि भवतु ! दृष्टाऽहमनेन, पृथङ्नामेष मन्यते इति न तदभिमुखीभवितुमुत्सहते । तदाह— § 8118
II.392/KSV

प्रकृतेस्सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्नदर्शनमुपैति पुरुषस्य ॥ सां-का-१६§ 8120

## प्रकृतिपुरुषविवेकः

परस्परं च भग्नरसयोः प्रकृतिपुरुषयोः व्यापकत्वात् सत्यपि संयोगे सर्गो न प्रवर्तत एवेत्याह— § 8121

दृष्टा मयेत्युपेक्षक एकः दृष्टाऽहमस्मीत्युपर(?) त्यन्या ।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥§ 8123

अपरिम्लानकुतूहलो हि पुमान् वंचयितुं शक्यते, न दृष्टतत्त्व इति मत्वा सत्यामपि योग्यतायां निवर्तते प्रकृतिः नटीव रङ्गभूमौ प्रदर्शितनिखिलनिजनृत्तवृत्तान्तनैपुणा तत इत्याह— § 8124

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥
सां-का-६१§ 8126

## प्रकृतेरेव बन्धमोक्षौ

तदेवं प्रकृतिरेव संसारे प्रवर्तते, प्रकृतिरेव मोक्षमनुभवतीत्याह— § 8127

तस्मान्न बध्यतेऽद्धा नापि मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥
सां-का-६२§ 8129

किमर्थं पुनरसावेवं चेष्टते प्रकृतिरिति चेत्—किं क्रियते ? *स्वभाव एवैष दैवहतिकायास्तस्याः— § 8130

९ ] सा— nyāma-wit_ja
११ ] त्येका— nyāma-wit_kha
१६--१७ ] प्र— nyāma-wit_kha

६ त्वात् ] व्यापकत्वात्—विभुत्वात् ॥
१९ सा ] असौ—जडा ॥
१९ *] [In the print edition there is a footnote reference, but no corresponding note.]

II.393/KSV

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतः तस्यार्थमपार्थकं चरति ॥§ 8132

## अचेतनाया अपि प्रकृतेः कर्तृत्वादि

अचेतनत्वादस्याः कथमेवंकारित्वमिति चेत्—उक्तमत्र— § 8133

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥
सां-का-५७§ 8135

ननु ! उत्पन्नतत्त्वज्ञाने पुंसि प्रकृतेर्भोगानुकूलमहदादिकार्यारम्भपराङ्मुखत्वात् एकस्मिंस्तत्त्वविदि मुक्ते सति सर्वे मुक्ताः स्युः—नैषं दोषः—तत्त्वविदमेव पुमांसं प्रति तस्या औदासीन्यात् । *अन्यसाधारणत्वेन तत्कार्यानपायात् । तथा च पातजलिः—कृतार्थं प्रति नष्टमप्यनष्ट तदत्यसाधारणत्वात् यो-सू-२-२२ ॥ § 8136

## सदेहमुक्तिः, विदेहमुक्तिश्च

ननु एवं यदेव तत्त्वज्ञानमुत्पन्नम्, तदेव प्रकृत्युपाजितकर्मफलोपभोगपरिहारिणः पुंसः शरीरपातः स्यात्—नेत्याह— § 8137

तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥§ 8138
ततः संस्कारविरतौ सत्यां— § 8139

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति—इति ॥§ 8141
१ II.394/KSV

## बुद्धि-ज्ञान-उपलब्धिपदानामपर्यायत्वम्

१. स्वभावो दुरतिक्रमः इति हि न्यायः ॥

८ ] भो— nyāma-wit_kha
११ ] अ— nyāma-wit_ca
१४ ] नितः— nyāma-wit_ca
१६ ] सा— nyāma-wit_kha

४ विवृद्धिनिमित्तं ] क्षीरं किल शिशुं स्वयं पोषयति ॥
८ *] अन्ये—अतत्त्वविदः ॥

अहो नु खलु कापिलकविकथारसाक्षिप्तहृदयैः अतिबहु प्रसक्तानुप्रसक्त्या लिखितमस्माभिः । तदियं प्रधानविकृतिः प्रथमा महच्छब्दवाच्या सा बुद्धिः तत्त्वविदं प्रति नष्टाऽपि अन्यसाधारणत्वादनष्टैवेति नित्या । नित्यत्वाच्च प्रत्यभिज्ञासनुसन्धानादिव्यवहारप्रबन्धनिर्वहणक्षमा बुद्धिः । *ज्ञानं तु तस्याः वृत्तिः । उपलब्धिस्तु पुंसो वृत्तिमद्बुद्धिदर्शनमिति नैषां पर्यायशब्दत्वमिति ॥
§ 8142

## सांख्यप्रक्रियानिरासः

अत्र प्रतिविधीयते—आत्मन्येव नित्ये व्यापिनि बोद्धरि ज्ञातर्यध्यवसातरि धर्माधर्मादियोगिनि प्रत्यभिज्ञानादिकार्याणां कर्तरि सेयं बुद्धिः असंज्ञा सांख्यैः कल्पिता । चेतनत्वं तु ज्ञानादियोगिन्या अपि यत्त्वस्या नाभ्युपगतं, सोऽयमतीव तमस्विनां भ्रमः । य एव बुध्यते, जानाति, अध्यवस्यति—स एव पश्यति, चेतयते च । न खल्वत्र वस्तुस्वरूपभेदं पश्यामः । तत्र बुद्धिर्बुध्यते, जानाति, अध्यवस्यति—पुरुषस्तु पश्यति, चेतयते चेति वंचनायैवमुच्यते, मुग्धतया वा ॥ § 8143

## आत्मनः द्रष्टृत्वादिकं स्वाभाविकम्

यच्चेदमुच्यते—बुध्याध्यवसितमर्थं पुरुषः पश्यतीति—तद्व्याख्येयम्—किमिदं तस्य द्रष्टृत्वमिति । प्रतिबिम्बनमिति चेत्; किं स्वच्छे पुंसि वृत्तिमती बुद्धिः संक्रामति, उत वृत्तिमत्यां बुद्धौ पुमानिति । तत्र चितिशक्तिरपरिणामिनी अप्रतिसंक्रमेति न बुद्धौ पुरुषस्य संक्रमणम् । बुद्धौ तु पुंसि संक्रान्तायामपि पुंसः किं वृत्तम्, येन द्रष्टा संपन्नः ॥ § 8144

II.395/KSV

द्रष्टृत्वं स्वभाव एवास्येति चेत्; किं बुद्धौ प्रतिबिम्बनेन । विशिष्टविषयावच्छेद इति चेत्; ततः पूर्वमनालम्बनं द्रष्टृत्वमघटमानमिति न नैसर्गिकं द्रष्टृरूपत्वं पुंसः स्यात् ॥ § 8145

## बुद्धि-पुरुषधर्मविभागानुपपत्तिः

१ ] क— nyāma-wit__kha
१ ] कथा— nyāma-wit__kha
२ ] प्र— nyāma-wit__kha
१८ ] क— nyāma-wit__kha

४ *] ज्ञानम—गौणम् बुद्धिः, तस्याः वृत्तिः । तस्याः फलं उपलब्धिः ॥
१८ म् ] ज्ञानम—गौणम् बुद्धिः, तस्याः वृत्तिः । तस्याः फलं उपलब्धिः ॥

दर्शनशक्तिः स्वाभाविकीति चेत्—न—तस्या भेदाभेदाभ्यां निरूपयिःतुमशक्यत्वात् । प्रतिबिम्बपक्षे च परस्परानुरागस्य तुल्यत्वात् अवियोगाच्च कथमिदं निर्धार्यताम्—अमी बुद्धिधर्माः, अमी पुंधर्मा इति । न हि तयो पार्थगर्थ्येन कदाचित् स्वरूपावधारणं वृत्तम् ॥ § 8146

## बुद्धि पुरुषयोरवैलक्षण्यप्रसङ्गः

अनवधारितकार्यभेदत्वाच्च नानात्वमपि तयोर्दुर्वचम् । चेतनाचेतनत्वात् भोक्तृभोग्यत्वाच्च विस्पष्टं तयोर्नानात्वमिति चेत्—न—ज्ञानादियोगित्वं बुद्धेः अचेतनत्वं चेति चित्रम् ॥ § 8147

अपि च कल्पयित्वाऽपि बुद्धिपुंसोर्नानात्वं बुद्धिधर्माः पुंसि, पुंधर्माश्च बुद्धावारोपणीयाः इति किं भेदेन ! भेदे च बुद्धेर्ज्ञानादियोगित्वेन चेतनत्वापत्तेः एकत्र कार्यकारणसंघाते चेतनद्वयमनिष्टं प्रसज्येत ॥ § 8148

## बुद्धेरावश्यकत्वाभावः

नित्यमन्तःकरणमन्तरेण पुंसः उपलब्धिर्न भवेदिति बुद्धेः कल्पना चेत्—अस्त्येव नित्यमन्तःकरणं मनः । तेन करणेन कर्तुरात्मनः विषयो * पल- II.396/KSV ब्धिक्रिया निर्वर्त्यते । सैव च बुद्धिरित्याख्यायते, न त्वन्या नित्या बुद्धिरस्तीति ॥ § 8149

## बुद्धेः कर्तृत्वाद्यनुपपत्तिः

किंच कस्य कृते परिदृश्यमानमात्मनो ज्ञानादिकर्तृत्वं उत्सृज्य बुद्धेरदृश्यमानं तदुपेयते । कोऽत्रातिशयः ? § 8150

ननु ! पुरुषस्य स्वातन्त्र्यात्मककर्तृत्वे सति स्वकृतकर्मफलोपभोगानन्त्यादनिर्मोक्षः स्यात् । न हि कर्मणां परिक्षयः जन्मकोटिशतैरपि शक्यक्रियः । यदा त्वकर्तारं उदासीनमेवं प्रकृतिर्बध्नाति, तदा सैव ज्ञाता सती मोक्ष्यतीति न दूरं मोक्षवर्त्म भविष्यतीति ॥ § 8151

## पुरुषस्यानिर्मोक्षप्रसङ्गः

---

३ ] पुं— nyāma-wit_kha
८ ] भेदधर्मं— nyāma-wit_kha
१६ ] श— nyāma-wit_kha
१७ ] त्— nyāma-wit_ca

---

१ क्तिः ] न तु दर्शनम् ॥
१२ * ] यतः पुरुषः अपरिणामी अप्रतिसंक्रमश्च ॥
१७ र्तृत्वे ] स्वाभाविके इति शेषः ॥

अहो बत ! निखिलमेव मौर्ख्यं सांख्यहृदयेष्वेव प्रतिष्ठितमिति कथ मन्यो जन इदानीं मूर्खो भविष्यति ! अचेतने हि निरङ्कुशे प्रधाने बन्धयित-रि सुतरामनिर्वोक्षः स्यात् । तत्त्वविदमपि पुमांसं न बध्नाति प्रकृति रिति कोऽस्या नियन्ता ? पङ्ग्वन्धन्यायेन संयोगस्य तदाऽपि तुल्यत्वात् । निवृत्त-कुतूहलः पुमानिति चेत्—प्रकृतिरनिर्मुक्तकौतुकाऽभिनववधूरिवस्थितैव ॥ § 8152

अपि च, रे मूढ ! पूर्वमपि तपस्विना पुंसा किं कृतम्, यदाऽसौ बद्धोऽभूत् ? द्रष्टृत्वं तु तस्य रूपं तदविनाभूतमिति कैवल्यदशायामपि तन्न नश्यत्येवेति तदाऽपि तस्य बन्धनाय कथं न प्रवर्तेत निर्मर्यादा प्रकृतिः ? § 8153

II.397/KSV

दृष्टाऽस्मीति विरमतीति चेत्—मैवम्—न ह्यसौ एकपत्नीव्रतदुर्ग्रहगृहिता । निस्सङ्ख्यपुरुषोपभोगसौभाग्या पण्यवनितेव, न वाऽसौ नियमेन व्यवह-र्तुमर्हतीत्यास्तामेतत् ॥ § 8154

## महदादिसृष्टिक्रमनिराकरणम्

यच्च सत्त्वरजस्तमोभिः त्रिभिर्गुणैः समावस्थायाः प्रधानशब्दव्यपदेशभाजः प्रकृतेः महान्नाम बुद्धिरुत्पद्यते इत्यादि प्रक्रियाजालमालपितम्—तत्सर्वं महान्धपरम्परान्यायप्रवृत्तगुरुपाठक्रमोपनतमेव, न प्रमाणमूलम् । कार्याद्धि कारणमल्पपरिमाणमुपलभ्यते; न तु विपर्ययः । स्वावयवाश्रितस्य घटप-टादेर्दर्शनात् । तदवयवानां तदपेक्षयाऽल्पत्वात् । अन्यस्या मृदः महाप-रिमाणत्वमप्रयोजकम् ॥ § 8155

## अहंकारादिसृष्टयनुपपत्तिः

अपि च—बुद्धिर्नाम विषयोपलंभः । अहङ्कारोऽप्यहंप्रत्ययरूपोऽ भि-मानः बुद्धिविशेष एव । तेन बाह्यानीन्द्रियाणि जन्यन्ते, गन्धादयश्च गुणाः, गुणैश्च पृथिव्यादीनि भूतानीति महाव्यामोहः । इदं च चित्रम्— विषयजन्या हि सुखादयः प्रसिद्धाः । तेऽद्य सुखादिजन्या विषयाःसंवृत्ता इति नवेयं विश्वामित्रस्येव सांख्यमुनेः सृष्टिः ॥ § 8156

१४--१५ ] ग्भिः— nyāma-wit_kha

१६ ] पर्व— nyāma-wit_ca

५ कौतुका] स्वतः परिणामस्वभावा हि प्रकृतिः ॥

१२ सौभाग्या] प्रकृतिः किल सर्व कारणी एका ॥

२३ तेऽद्य] सुखदुःखमोहात्मिका हि प्रकृतिरुच्यते ॥

## प्रकृतिसद्भावे प्रमाणाभावः

न च प्रधानास्तित्वमपि प्रमाणवत्, अन्वयादिहेतूनामसाधनत्वात् । चेतनानामपि हि कामं भवेदपि सुखदुःखमोहान्वितत्वम् । अचेतनानि भूतानि II.398/KSV सुखदुःखमोहवन्तीति सुभाषितम् । घटे पटे शकटे च सुखदुःखमोहाः सन्तीति कः प्रतिपद्येत ? प्रकाशप्रवृत्तिनियमा अपि चेतनेष्वेव दृश्यन्ते, नाचेतनेष्वित्यसिद्धत्वाद्धेतोर्न प्रधानसिद्धिः ॥ § 8157

## सत्कार्यवादपरिक्षा

अपि च सत्कार्यवादमूल एष तपस्विनां विभ्रमः सर्वं सर्वत्रास्तीति । ततोऽन्वयसिद्धं बुध्यमानास्ते प्रधानसिद्धावध्यवसिताः । सत्कार्यवादश्च विचार्यमाणः न समस्त्येवेति कुतस्त्या हेतुसिद्धिः ? § 8158

## कार्यकारणभावविषये विप्रतिपत्तिः

ननु ! सत्कार्यवादे कार्यकारणभावो भवति भावानां, नान्यथा । तथा हि—चतुष्टयी गतिरिह स्यात् । घटादिकार्यं मृत्पिण्डादिना कारयेन क्रियमाणं असद्वा क्रियते ? सद्वा ? सदसद्वा ? अनुभयस्वभावं वा ? इति ॥ § 8159

## सांख्यैः असत्कार्यवादनिरासः

तत्रासतः करणे खरविषाणादेपि करणं स्यात् । असत्त्वे हि घटस्य खरविषाणस्य को विशेषः ? घटस्यापि प्रागभावप्रध्वंसाभावदशयोः असत्त्वाविशेषात् प्रागभावदशायामिव प्रध्वंसदशायामपि करणं भवेत् ॥ § 8160

असत्करणे च नियतोपादानग्रहणं न प्राप्नोति । तैलार्थी तिलसर्षपानुपादत्ते, न सिकताः । असत्त्वे च तैलस्य को विशेषः सर्षपाणां सिकताभ्यः ॥ § 8161

II.399/KSV

असति च कार्ये, निरालम्बनः कारकव्यापारो भवेत्, न ह्यसौ मृत्पिण्डादिविषयो भवितुमर्हति । कार्यं चासत् ॥ § 8162

## उपादानोपादेययोर्भेदानुपपत्तिः

---

११ ] णमपि क्रियते— nyāma-wit_kha

१४ ] कृ— nyāma-wit_kha

---

१ त्वात् ] प्रकृतिः किल सर्व कारणी एका ॥

१७ त्त्वे ] अन्वयदृष्टान्ताभावादिति हेतुः ॥

२० ति ] तदा हि मृदं करोति इति व्यवहारःस्यात् । न तु घटं करोति इति ॥

अपि चाविद्यमाने कारणव्यतिरिक्ते च कार्ये जन्ये तत्कारणस्य मृत्पिण्डादेः घटादिकार्यं जनितवतः किमिति न स्वरूपमुपलभ्यते । § 8163

अथ स्वविनाशेन कारणं कार्यस्य जनकमिष्यते, तदियमभावाद्भावोत्पत्तिर्भवेत् । तस्यां च कुतोऽयं नियमः, यदनन्तरवृत्त एव मृत्पिण्डाभावः कुम्भमभिनिर्वर्तयति, न चिरातिक्रान्त इति । अतश्च परुत्मृत्पिण्डे नष्टे एषमः कुम्भोत्पादः स्यात् ॥ § 8164

अथ स्वाव्यतिरिक्तमेव कारणेन कार्यं जन्यते, तर्हि कारणस्य सत्त्वात् तदव्यतिरिक्तं कार्यं सदेवेति नासतः करणम् ॥ § 8165

## कार्यस्य सदसद्रूपत्वनिरासः

सदसदपि न कार्यं वक्तुं युक्तम्—सदसतोर्विप्रतिषेधेन एकत्र समावेशायोगात् । रूपभेदादविरोध इति चेत्—न—कार्यस्य विचार्यमाणस्यैकत्वात् । तच्च तेनैव स्वेन कार्येण रूपेण सच्चेत्, नासद्भवेत् । असच्चेत्, न सत् इति पररूपेण त्वसत्त्वं सर्वभावानामस्त्येव ॥ § 8166

अनुभयात्मकं तु वस्तु नास्त्येवेति तत्पारिशेष्यात् सदेव कार्यम् ॥ § 8167

१ II.400/KSV

किमिति च तदा नोपलभ्यत इति चेत्—अनुमानेनापि यदुपलब्धं तत् किमनुपलब्धं भवति ? प्रत्यक्षेण तु तदनीमनुपलम्भोऽनभिव्यक्तत्वात् । अभिव्यतिसम्पादन एव च कारकप्रयत्नसाफल्यम् । कार्यं तु सदेवेति ॥ § 8168

## कार्यस्वरूपसिद्धान्तः सत्कार्यवादनिरासश्च

अत्राभिधीयते—केन तु रूपेण तदानीं कार्यं सदिति मन्यसे ? यदि कारकव्यापाराभिनिर्वर्त्येन सलिलाहरणाद्यर्थक्रियासमर्थेन पृथुबुध्नोदराकारवता रूपेण चक्रमूर्धनि घटोऽस्तीति—तदाऽभिव्यक्तेनापि रूपेण सत्त्वात् अत्यन्ताय कारकव्यापारवैफल्यम् । इत्यमपि च कारकप्रवृत्तौ तद्व्यापारानुपरमप्रसङ्गः । किं हि तदोपलभ्य कारकाणि निवर्तेरन्, कार्यस्य प्रागुपलब्धत्वात् ॥ § 8169

१. तिलेष्विति शेषः ॥

५ ] चरन्— nyāma-wit__kha
८--९ ] व— nyāma-wit__kha
१५ ] च— nyāma-wit__kha

२ ते] मृत्पिण्डघटयोरत्यन्तं भेदात् द्वयोरप्युपलब्धिः स्यात् ॥
५ श्च] परुत्—यस्मिन् कस्मिंश्चित् ॥
२३ ङ्गः] कार्यनिष्पत्तिर्हि कारकव्यापारावधिः ॥

## घटस्य पूर्वं सत्त्वासंभवः

अथ मृत्पिण्डरूपेण तदानीं घटोऽस्तीति कथ्यते, न तर्ह्यसौ तदानीं घटोऽस्ति, मृपिण्ड एवा(?)वस्ति । न ह्यन्यरूपेणान्योऽस्तीति शक्यते वक्तुम् । उष्ट्रोऽप्यसन् मृत्पिण्डरूपेणास्तीति स्यात् ॥ § 8170

अथोष्ट्ररूपमुत्तरकालमपि न निर्वर्त्यते, घटस्तु ततो निर्वर्त्यते— यद्येवं यदैवासौ निर्वर्त्यते, तदैवास्ति, न ततः पूर्वमिति ॥ § 8171

अथ पूर्वं शक्तयात्मना तस्यास्तित्वं, इदीनीं अभिव्यक्त्यात्मना क्रियते इति—तदप्यनुपपन्नम्—अभिव्यक्तिरपि तत्स्वरूपाद्भिन्ना, अभिन्ना वा ? सती, असती वा ? इति विकल्प्यमाना न पूर्वोक्तं दोषमतिवर्तते ॥ § 8172
II.401/KSV

## अभिव्यक्तिस्वरूपविमर्शः

का चेयमभिव्यक्तिः ? किं कार्यात्मनाऽवस्थानम्, अथ संस्थानविशेषः, उत प्रतीतिः ? इति ॥ § 8173

यदि कार्यात्मनाऽवस्थानं, तत्पूर्वं नाभूत्, तदधुना भूतमित्यसत्कार्यम् । पूर्वमपि वा यदि तदासीत्, तदा पुनः कारकवैफल्यम् ॥ § 8174

संस्थानमपि अवयवसन्निवेशविशेषः । स चासन्नेव क्रियते । अवयवास्तु सन्तीति कस्यात्र विवादः ?* न हि परमाणवोऽस्माभिर्नाङ्गीकृताः ॥ § 8175

प्रतीतिस्तु घटस्य चक्षुरादिकारकसामग्र्यधीना, न मृत्पिण्डदण्डचक्रादिकारकचक्रसाध्येति, सा चक्रमूर्धनि घटस्य नास्त्येवेति असन् घटः ॥ § 8176

दर्शनादर्शनाधीने सदसत्त्वे हि वस्तुनः ।
*दृश्यम्यादर्शनात्तेन चक्रे कुम्भस्य नास्तिता ॥§ 8178

चक्रमूर्धवत् प्रध्वंसदशायामप्यनुपलम्भात् घटस्य नास्तित्वमेवेति । अतश्च— § 8179

नासतो विद्यते भावः नाभावो विद्यते सतः गी. २-१६§ 8180

२--४ ] वदो न स्व— nyāma-wit__kha
१३ ] न्नेव ते— nyāma-wit__kha
२० ] म— nyāma-wit__kha

१४ *] तावत्यर्थे सत्कार्यवादश्चेत्, इष्टापत्तिः ॥
१९ *] दृश्यस्यादर्शनम्—योग्यानुपलब्धिः ॥

इत्यप्रमाणकम्, पूर्वापरान्तयोर्भावस्वरूपादर्शनात् ॥ § 8181
II.402/KSV

## शक्त्यात्मनापि कार्यस्य न सत्त्वम्

शक्त्यात्मनाऽपि यदस्तित्वमस्योच्यते—अत्रापि चिन्त्यम्—केयं शक्तिर्नामेति । यदि घटस्वरूपाद्भिन्नाऽसौ, तर्हि पररूपेण घटोऽस्ति, स्वरूपेण च नास्तीत्यसत् कार्यमुक्तं स्यात् । घटादभिन्नत्वे तु शक्तेः शक्तिरूपेण घटोऽस्तीति स्वरूपेणैव घटास्तित्वमुक्तं भवेत् । तच्च प्रत्यक्षविरोधान्निरस्तम् ॥ § 8182

## असत्कार्यवादे दूषणोद्धारः

असत्करणपक्षे च यच्चोदितं—शशविषाणाद्यपि क्रियेतेति—तत्तु वचनव्यक्त्यपरिज्ञानात् । यदसत्, तत् क्रियते इति नेयं वचनव्यक्तिः, अपि तु यत् क्रियते, तदसत् इति ॥ § 8183

## असतः कार्यस्य शशशृङ्गादिवैलक्षण्यम्

स्वरूपसहकार्यादिहेतवो यद्विधायिनः ।
दृश्यन्ते, जन्यते तद्धि न व्योमकुसुमादिकम् ॥§ 8185

*प्रागभावदशायां च हेतुव्यापारदर्शनम् ।
न तु प्रध्वंसवेलायां अतः कमनुयुंज्महे ॥§ 8187

उपादानं तु सर्वस्य यन्न सर्वत्र दृश्यते ।
तन्न कार्यस्य सद्भावात्, अपि त्वेवं निरीक्षणात् ॥§ 8189

अद्यत्वे व्यवहारोऽपि नैवापूर्वः प्रवर्तते ।
यथोपलब्धो वृद्धेभ्यः स तथैवानुगम्यते ॥§ 8191
II.403/KSV

३--५ ] स्ति— nyāma-wit__kha
७ ] न्न— nyāma-wit__kha
१६ ] र्त्य— nyāma-wit__kha

१ म्] भवदभिमतार्थे इति शेषः । शशशृङ्गादितौल्यनिराकरणमात्रे तात्पर्यादिति हेतुः । पूर्वापरान्तौ—पूर्वोत्तरावधी ॥
१२ *] प्रागसत्त्वमात्रं कार्यत्वप्रयोजकम्, न त्वसत्त्वमात्रमित्यर्थः ॥

तैलार्थी सिकताः कश्चिदाददानो न दृश्यते ।
अदृष्टवा चाद्य नान्योऽपि तदर्थी तासु धावति ॥§ 8193

अन्वयव्यतिरेकौ च गृह्येते व्यवहारतः ।
अनादिश्चैष संसारः इति कस्यानुयोज्यता ॥§ 8195

## कारणस्य कार्यानुकूलशक्तिमत्त्वम्

अथवा शक्तिनियमादेवोपादाननियम उपपत्स्यते ॥ § 8196

शक्तिस्तु नित्या सूक्ष्मा च नेह काचिदुपेयते ।
तदभ्युपगमे नित्यं कार्योत्पत्तिप्रसक्तितः ॥§ 8198

किन्तु योग्यतावच्छिन्नस्वरूपसहकारिसन्निधानमेव शक्तिः । सैवेयं द्विविधा शक्तिरुच्यते—*अवस्थिता, आगन्तुकी च । मृत्त्वाद्यवच्छिन्नं स्वरूपं अवस्थिता शक्तिः । आगन्तुकी च, दण्डचक्रादिसंगरूपा । शक्तिद्वयकृता च कार्यनिष्पत्तिरसकृद्दृष्टेति तदर्थिभिस्तु तदुपादानम् ॥ § 8199

योग्यताऽपि नार्थान्तरं किंचित्, किन्तु वस्तुविशेष एवेत्येवं वस्तुविशेषनियमात् उपादाननियमसिद्धेः न सत् कार्यम् ॥ § 8200

## योग्यता न कार्यस्वरूपा

न च शक्तिरेव कार्यमिति वक्तव्यम् । कार्यस्वरूपस्य ततः पृथ ग्भूतस्य प्रतीत्या व्यवस्थापनात् । शक्तेश्च कार्यत्वे कार्यादेव कार्योत्पादोऽ II.404/KSV
ङ्गीकृतः स्यात् । न च घटात् घट उत्पत्तुमर्हति । शक्तेश्च कार्यमुत्पद्यत इत्यभ्युपगतम् । अतोऽन्यत् कार्यम्, अन्या च शक्तिः ॥ § 8201

## योग्यताया अद्विष्ठत्वम्

ननु ! वाच्यवाचकयोश्शब्दार्थयोः, व्यङ्ग्यव्यंजकयोश्च दीपघटयोः उभयाश्रिता शक्तिर्दृष्टेति कार्यकारणयोरप्यसावुभयाधिष्ठाना भवितुमर्हति ।

---

१२--१३ ] सद्वि— nyāma-wit_kha
१६ ] प— nyāma-wit_ca
१८ ] अनुवाद्य— nyāma-wit_kha
१८ ] यो— nyāma-wit_kha
१९ ] पि सा नथमनु— nyāma-wit_kha

---

७ क्तितः ] अकरणवेलायामपि तत्र शक्तिरस्तीति कथं वक्तुं शक्यम् ॥
९ * ] वस्तुस्वरूपसिद्धार्हतारूपा । न हि दण्डचक्रादिभिरपि पाषाणात् घटः कर्तुं शक्यः ॥
२ याधिष्ठाना ] आधाराधेयामावादिवदिति शेषः ॥

असति द्वितीये कार्याख्ये तदाश्रये कथमियमुभयाश्रिता स्यादिति ॥ § 8202

नैतदेवम्—यथादर्शनं शक्तेरभ्युपगमात । न चैकत्र दृष्टं रूपमन्यत्रापि मृग्यते । वाच्यवाचकयोः व्यङ्ग्यव्यजकयोश्च द्वयोः पृथक्त्वेन दर्शनादुभयाश्रिता शक्तिरङ्गीकृतेति हेतुद्वयस्यानुपलम्भात् केवलकारणवत्तिरेव शक्तिः । तत्कृतश्चोपादाननियम इति सिद्धम् ॥ § 8203

## असत्कार्यवादे स्वारस्यम्

*असत्कार्यपक्ष एवोपादाननियमविचारो युक्तः ॥ § 8204

उत्पत्तौ खलु सिद्धायां उपादानं विचार्यते ।
सतस्तु नैव नास्तीति किमुपादानचिन्तया ॥§ 8206

सत्कार्यवादे च सुतरामुपादाननियमो दुर्घटः; सर्वस्य सर्वत्र भावात् । सिकतातिलसरित्तीरकेदारव्यस्तबीजनियताङ्कुरादिक्रमोत्पद्यमानतिल-
II.405/KSV स्वरूपपर्यालोचनया तिलेष्विव सिकतास्वपि तैलसंभवात् । —सर्वस्य सर्वत्र चास्तित्वे नियतपदार्थप्रतिष्ठितहानोपादानादिव्यवहार सकल एव विप्लवेत ॥ § 8207

## सत्कार्यवादे असामञ्जस्यम्

अपि च प्रायश्चित्तमेष तपस्वी तप्तकृच्छ्रमतिकष्टं कथं चरिष्यतीति महन्मम मनसि कारुण्यम् । अन्नं च तावदयमश्नाति, अन्ने च वर्चोऽस्तीति विड्भक्षणात् प्रायश्चित्तीयत एवायमिति अलं सत्कार्यवादप्रमादेन ॥ § 8208

## असत्कार्यवादे दोषोद्धारः

यत्पुनरभाणि—कारणानुपमर्देन कार्यानुत्पादात् अभावाद्भावोत्पत्तिर्भवेत् । तत्र चानन्तरवृत्त्युत्पत्तिनियमो न स्यात् इति—तदप्ययुक्तम्— मूर्तानां समानदेशत्वावरोधात् कार्यकारणयोरेकदेशत्वं नेष्यते । नैतावता भावोत्प-

१ ] स— nyāma-wit__kha
५--६ ] वि— nyāma-wit__kha
१५ ] न् गतो— nyāma-wit__kha
१५ ] त्ते— nyāma-wit__kha

८ *] असत् इस्यस्य कारणे इत्यादिः । तेन शशशृङ्गादिव्यावृत्तिः ॥
१२ भावात्] प्रकृतेरेकस्या एव सर्वोपादानत्वात् ॥
१३ पि] सरित्तीरसिकताभ्यः तिलसस्यस्योत्पत्त्या सिकतानां तिलोपादानत्वात् ॥
१७ च] तेजःपुरीषयोर्वर्चः इत्यमरः ॥
३ ता] ननु तत्तत्प्रागभावस्य तत्तत्कार्यं प्रति कारणत्वाङ्गीकारात् अभावात् भावोत्पत्तिर्दुर्वारिति चेत्, हेतौ पञ्चम्या अपि साधुत्वात् । अन्यथा तन्मते घटः मृत्पिण्ड एव वर्तते; न तु दण्डादिषु इति निरूपणासंभवप्रसङ्गः ॥

त्तिरभावाद्भवितुमर्हति, कारणाधीनतदुत्पाददर्शनात् । अत एवानन्तर्यनियमोऽप्युपपन्नः । न च कार्यकारणयोरभेदात् सत् कार्यमिति वक्तव्यम् । तयोः प्रत्यक्षसिद्धभिन्नस्वरूपत्वात् ॥ § 8209

## असंबद्धात्कार्योत्पत्तिनिरासः

यत्तु निरलम्बना कारकप्रवृत्तिरिति चोदितम्—परिहृतं तत् भाष्यकारेण बुद्धिसिद्धं तु तदसत् इति । वृद्धव्यवहारतः कार्यकारणभावा मवगम्य II.406/KSV अमुष्मात् कारणात् इदमीदृशं कार्यमुत्पद्यत इति बुद्धौ निर्धार्य *कारकाणि कर्ता नियुङ्क्ते इति न निर्विषयः कारकव्यापारः ॥ § 8210

तदेवं सत्कार्यवादस्य निष्प्रमाणकत्वात् तन्मूलान्वयादिहेतुसिध्यभावात् न प्रधानास्तित्वसिद्धिः । तदभावाच्च न तद्विकृतिः नित्याबुद्धिः । अपि तु ज्ञानोपलब्धिरूपैवेति सम्यक् सूत्रितं बुद्धिरुपलब्धि र्ज्ञानमित्यनर्थान्तरम् इति ॥ § 8211

## बुद्धेरनित्यत्वम्

इतश्चानित्या बुद्धिः—जानामि, ज्ञास्यामि, अज्ञासिषमिति उपजननापायधर्मतया पाकादिवत् कालत्रयेऽपि प्रकाशमानत्वात् । ज्ञानव्यतिरिक्तायाश्च बुद्धेरप्रतिभासात् ॥ § 8212

अयं तु विशेषः । पाकादिक्रियाणां ओदनादिफलावच्छेदद्वारकं कालवैतत्यमपि भवति । उपलब्धेस्तु वस्तुस्वरूपप्रकाशनमात्रपरिसमाप्तप्रयोजनायाः कालवैतत्यं नास्त्येव । अत एवानित्यत्वेऽपि उत्पन्नापवर्गिणीमेव बुद्धिमाचक्षते, शब्दवत्; न घटादिवत् कालान्तरस्था यिनीमिति ॥ § 8213

## बुद्धेरात्मगुणत्वम्

सा चेयं बुद्धिः आत्मान्तःकरणशब्ददीपेन्द्रियार्थाद्यनेककारककलापकार्याऽपि सती न बाह्येन बाह्यकर्मणि समवैति । न बाह्यकरणे चक्षुरादौ । नान्तःकरणे मनसि । किन्तु कर्तर्येव । कर्ताऽपि च नित्यः
II.407/KSV विभुरात्मा, न भूतसङ्घातस्वभावः कार्यस्तस्या आश्रय इत्यात्मपरीक्षायां निर्णीतम् । गुणत्वमपि चास्यास्तत्रैव दर्शितम् ॥ § 8214

## बुद्धेराशुतरविनाशित्वे हेतुः

१ ] णपदे— nyāma-wit__kha
८ ] लाद— nyāma-wit__ca
१३ ] तृ— nyāma-wit__kha

९ *] मृदं घटं करोति इत्येव व्यवहारात्, उपादानकारणेनेतरकारकसंबन्धात् न दोष इति भावः ॥

ननु एवं तर्हि न बुद्धेरनित्यत्वम्, विनाशकारणाभावात् । द्विविधो हि गुणानां विनाशहेतुः—आश्रयविनाशः, विरोधिगुणप्रादुर्भावो वा । नेहाश्रयविनाश, नित्यत्वादात्मनः । न च विरोधिनमस्याः कं चिद्गुणमुपलभामहे—न—शब्दवदाशुविनाशित्वात् । नित्याकाशगुणोऽपि शब्दः शब्दान्तरमारभ्य यथा विनश्यति, तथा बुद्धिः बुद्ध्यन्तरमारभ्य विनश्यतीति तथा दर्शनात् कल्प्यते । यावांश्च कश्चन विनाशदर्शनभेदोपलम्भादिः शब्दस्यानित्यतायां न्याय उक्तः, स सर्वोऽपि बुद्धावपि योजनीयः ॥ § 8215

## ज्ञानानाम(?)गपद्यकारणम्

अत एव न बुद्धीनामेकप्रमातृवृत्तीनां यौगपद्य विद्यते, वर्णानामिवैकवक्तृप्रयुक्तानाम् । विनश्यदविनश्यद्द्वयोस्तु बुद्ध्योराशु विनाशित्वेऽपि यौगपद्यमनुभवादभ्युपेयतइत्यलमतिविस्तरेण ॥ § 8216

बुद्धेरनित्यतायां च प्रायेण सर्ववादिनामविवादः । तथा चाह जैमिनिः सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् इति ॥ § 8217

## बुद्धेरपि हेयत्वम्

अचिररुचिवत्तस्मात् बुद्धिर्निसर्गविनश्वरी— § 8218

भवति जनकः स्वात्मा तस्याः स एव समाश्रयः ।
II.408/KSV भवमरुभवैस्तापैः या जातमेव युनक्ति सा—
व्यसनजननीं जह्यादेनां परमार्थवित् ॥§ 8221

—इति बुद्धिपरीक्षा— § 8222

## मनःपरीक्षा

### युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ १-१-१२ ॥ § 8223

मनसो यदेव सत्त्वे प्रमाणं, तद्गम्यत्वमेवास्य लक्षणम्, समानेतरजातीयव्यवच्छेदकारित्वात् ॥ § 8224

## मनसः प्रत्येकगणनायां हेतुः

७ ] द्ध्यां— nyāma-wit_kha
८ ] शब्दा— nyāma-wit_kha
११ ] कथमा— nyāma-wit_kha
१५ ] पापा— nyāma-wit_kha
१६ ] नामतः— nyāma-wit_kha

१५ त] अन्यथा कार्यकारणयोरसमानकालिकत्वापत्त्या क्षणिकवादतौल्यप्रसङ्गः ॥

ननु ! मनस इन्द्रियत्वात् तद्वर्गे एव पठनं युक्तम् । किमर्थोऽयं पृथङ्निर्देशः ?—न—धर्मभेदात् । भौतिकानीन्द्रियाणि नियतविषयाणि । सगुणानां चैषामिन्द्रियभावः । मनस्तु न भौतिकम्, न नियतविषयम् । न चास्य सगुणस्येन्द्रियभावः इति ॥ § 8225

## मनसः अभौतिकत्वम्

तच्च न भौतिकम्, अकार्यत्वात् । अत एव न तद्गुणयोगि । न च नियतविषयम् । सर्वविषयत्वं त्वस्य सकलबाह्येन्द्रियाणामधिष्ठातृत्वत् । तदनधिगम्यसुखादिविषयग्राहित्वाच्च । बाह्येन्द्रियाणि हि मनोऽ धिष्ठितानि स्वविषयेषु प्रवर्तितुमुत्सहन्ते चक्षुरादीनि, नान्यथा ॥ § 8226

II.409/KSV

कस्मादेवमिति चेत्—युगपत् ज्ञानानुत्पत्तेः । उत्तरकालं च बाह्येन्द्रियव्यापारविरहेऽपि तदर्थावमर्शात्— § 8227

अस्त्येकेन्द्रियगम्येषु क्वचिज्ज्ञातिगुणादिषु ।
विज्ञानायौगपद्यं यत् मनसस्तन्न साधनम् ॥§ 8229

तत्र विषयादिदोषेण दूरत्वादिना जात्यादेः युगपत् गृहीतुमशक्यत्वात् ॥ § 8230

## ज्ञानायैगपद्यस्य मनस्साधकत्वम्

यत्तु—नानेन्द्रियग्राह्येषु युगपत्सन्निहितेष्वपि गन्धरसरूपादिषु विषयेषु तद्ग्रहणेषु च स्वकार्यानुमितसन्निधानेषु, सत्स्वप्यविकलेषु कारणेषु युगपदुपलब्धयो न भवन्ति, ततोऽवसीयते—नूनं कारणान्दरमेभिरपेक्ष्यते । तच्च मन इत्याख्यायते ॥ § 8231

## ज्ञानायौगपद्ये कारणम्

ननु च ! § 8232

सुगन्धि शीतलां दीर्घां अश्नन्तः शुष्कशष्कुलीम् ।
कपिलब्राह्मणास्सन्ति युगपत् पंचबुद्धयः ॥§ 8234

१६ ] प्य…ते— nyāma-wit__kha
१७ ] धर्मेषु करणेषु युगपदुपलब्धयो न
भवन्ति परी— nyāma-wit__kha
२० ] पूप— nyāma-wit__kha

७ चास्य ] गुणाः—गन्धरसरूपस्पर्शशब्दाः ॥
१५ म् ] अत्र हेतुः अनन्तरवाक्येनोच्यते ॥

अपि च अयं खल्वध्यापकः अधीते, व्रजति, कमण्डलुं धारयति, पन्थानं पश्यति, शृणोत्यरण्यजान् शब्दान्, बिभ्यत् व्यालिलिङ्गानि बुभुत्स- II.410/KSV त इति क्रमाग्रहणात् युगपदेता बुद्धयोऽस्य भवन्तीति—न—आशूत्पत्तेः सूच्यग्रभिद्यमानकोकनददळकदम्बकालवदतिसूक्ष्मत्वात् कालस्य क्रमस्तत्र न विभाव्यते । भवितव्यं तु तेनेति ॥ § 8235

## स्मृतिकारणतयाऽपि मनस्सिद्धिः

यदि कारणान्तरनिरपेक्षचक्षुरादिकरणसाध्या एव रूपादिविषयोपलब्धयः, तदुत्तरकालमुपहतकरणानामपि कथं स्मरणादिरूपस्तदवमर्शः ? अतो नूनं नयनादिवत् करणान्तरमविकलं तद्ग्राहि विद्यते ॥ § 8236

## मनसः अणुत्वादिः

अव्यापकं च तत् । व्यापित्वे न हि बुद्धीनां यौगपद्यं निवर्तते । अस्ति चायं व्यवहारः उक्तेऽपि क्वचिद्वचसि कश्चिदाह, नाहमेतदश्रौषम, अन्यत्र मे मनोऽभूत् इति । तस्मान्न व्यापकं मनः ॥ § 8237

प्रतिशरीरमेकं च, तदनेकत्वे पुनरपि ज्ञानयौगपद्यानपायात् ॥ § 8238

क्रियावच्च तत्, निष्क्रियेणेन्द्रियाणामधिष्ठातुमशक्यत्वात् ॥ § 8239

मूर्तं च तत्, अमूर्तस्य क्रियानुपपत्तेः ॥ § 8240

मूर्तत्वे सति नित्यं च तत् निरवयवत्वात्, अनाश्रितत्वाच्च मुर्तत्वं त्वनित्यतायामप्रयोजकमिति वक्ष्यामः ॥ § 8241

निरवयवं च, तदवयवकल्पनायां प्रमाणाभावात् ॥ § 8242

वेगवच्च, तदाशुसंचारात् । आशुसंचारमन्तरेणोपलब्धिशैघ्र्यस्य दृष्टस्यानुपपत्तेः ॥ § 8243

इन्द्रियसंयोगि च तत्, द्रव्यत्वात् ॥ § 8244
II.411/KSV

द्रव्यं च तत्, वेगादिगुणयोगात्; क्रियावत्त्वादनाश्रितत्वाच्च ॥ § 8245

अचेतनं च तत्, कारणत्वात्, इतरथा ह्येकत्र शरीरे चेतनद्वय समावेशात् अव्यवहारः स्यादिति । तस्मादेवंरूपं मनः ॥ § 8246

साङ्ख्योक्तं सु तस्य रूपमयुक्तमिति तत्प्रक्रियानिषेधादेव व्याख्यातम् ॥ § 8247

---

७ ] ह— nyāma-wit__kha
८ ] रं— nyāma-wit__kha
१८ ] दैर्घ्य— nyāma-wit__kha; nyāma-wit__gha
२१ ] चेत— nyāma-wit__kha
२२ ] रेषां— nyāma-wit__kha; nyāma-wit__gha

---

८ व्यं ] प्रथमदलभेदनस्य द्वितीयदलभेदनस्य च हि कालभेदः अवर्जनीयः ॥

## मनस्साधकहेत्वन्तराणि

अन्यान्यपि स्मृत्यनुमानागमसंशयप्रतिभास्वप्नोहज्ञानानि, आन्तरसुखदुःखेच्छाद्वेषादिविषयग्राहीणि च ज्ञानानि मनसो लिङ्गानि सन्त्येव । तेषां बाह्येन्द्रियव्यापारसाध्यत्वासंभवात् करणरहितायाश्च क्रियाभिनिवृत्तेरदर्शनादिति ॥ § 8248

## मानसानि ज्ञानानि

स्मृतिस्तावन्मनोजन्यैव । अनुमानागमज्ञानं तु परोक्षार्थविषयत्वात् मानसम् । संशयस्तु मानसोऽपि कश्चिद्वक्ष्यते । प्रतिभा मनासी दर्शितैव—श्वो मे भ्राताऽऽगन्ता इति । स्वप्नज्ञानमुपरतेन्द्रियग्रामस्य भवत् कथं नाम न मानसम् ॥ § 8249

तर्कोऽपि संशयवत् क्वचिद्विषये मानसो भवत्येव । सुखादीनां तु ज्ञप्तिवत् उत्पत्तिरपि मनोनिबन्धनैव । कार्यणामात्मगुणानामुत्पत्तौ प्रत्यासन्नकारणान्तरसंभवेऽपि आत्ममनस्संयोगस्यावधृतसामर्थ्यस्यासम वायिकारणत्वात् II.412/KSV
। अतश्च विषयानुभवजन्येऽपि सुखादौ मनस्संयोगः कारणम् ॥ § 8250

सुखादीनां च बोधस्वरूपत्वं स्वसंवेद्यत्वं च निरस्तम् । अतस्तदुपलब्धौ मनस एव कारणता ॥ § 8251

## मनसः संस्कारविशेषवत्त्वम्, हेयत्वं च

तदिदं मनः पूर्वकृतशुभाशुभकर्मसंकारवताऽऽत्मना तद्वशादेव शरीरदेशे संयोगं प्रतिपद्यते । तत्रैव च जीवनव्यवहारः । विपच्यमानकर्माशयसहितः आत्ममनस्संयोगो जीवनमिति हि वदन्ति । संयुक्तंचात्मना मनः तेषु तेषूपपत्तिस्थानेषु नानाविधभोगसाधनतया संसारकारणं भवति । नित्यत्वादात्ममनसोः अनादित्वाच्च संसारस्य नेदं चोदनीयं—*प्रथममेव कथं आत्ममनसोस्संयोग इति । न हि प्रथमो नाम कश्चित् कालः समस्ति; आदिसर्गस्यापि पूर्वसर्गसापेक्षत्वात् । ईश्वरोऽपि हि कर्मापेक्ष एव विचित्रस्य जगतः स्रष्टेति निर्णीतमेतदिति कृतं विस्तरेण ॥ § 8252

---

१ ] अन— nyāma-wit_kha
१७ ] तस्य— nyāma-wit_ca
९३९.१९--९४०.२० ] सं—

nyāma-wit_kha

---

१० म] मनसः तत्रात्यन्तं अपेक्षितत्वात् मानसमित्युच्यते । कारणं तु व्याप्तिज्ञानम् शब्दश्च यथासंख्यम् ॥
१७ च] बौद्धादिसंमतमिदम् ॥

१९ र्म] संस्कारः—भावनातिरिक्तः संस्कारविशेषः ॥
२३ *] प्रथममेव—प्राथमिक एवेत्यर्थः ॥

विदधत्सुखादिभोगं वहच्च तरलेन्द्रियाश्वसारथिताम् ।
बन्धनिमित्तं मन इति मनस्विना यत्नतो हेयम् ॥§ 8254
—इति बुद्धिपरीक्षा— § 8255
II.413/KSV

## प्रवृत्तिपरीक्षा

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ १-२-२७ ॥ § 8256

वागिति वर्णात्मकशब्दकारणसंयोगाद्युच्यते, नेन्द्रियमिति व्याख्यातम् । बुद्धिरिति मन इहोच्यते, नोपलब्धिः । शरीरं प्रसिद्धम् । तेषां आरम्भः व्यापारः, तैर्वा आरम्भ इति सर्वथा तदीयक्रिया प्रवृत्तिरित्युच्यते ॥ § 8257

### पापरूपा प्रवृत्तिः

सा च द्विविधा पुण्या पापिका च । तत्र पापिका वाचा चतुर्विधा, मनसा त्रिविधा, शरीरेण त्रिविधैवेति दशविधा ॥ § 8258

वाचा प्रवृत्तिस्तत्र अनृतपरुषसूचनासम्बद्धवचनरूपा चतुर्विधा ॥ § 8259

परद्रोहपरद्रव्याभिलाषनास्तिक्यानुव्यानरूपा त्रिविधा मनसा प्रवृत्तिः ॥ § 8260

हिंसास्तेयप्रतिषिद्धमैथुनाचरणरूपा त्रिविधा शरीरेण प्रवृत्तिः । मैथुनग्रहणं एवंप्रकारसुरापानाद्युपलक्षणार्थम् । सेयं दशविधा प्रवृत्तिः अनवरतमभिज्व-लतो निरतिशयदुःखवेदनादायिनो नरकानलस्येन्धनम् ॥ § 8261

### पुण्यरूपा प्रवृत्तिः

पुण्याऽपि सत्यप्रियहितवचनस्वाध्यायाध्ययनरूपा चतुर्विधा वाचा प्रवृत्तिः । जपयज्ञे हि स्वाध्यायपाठ एवोपांशुना, अन्तस्संजल्पेन वा ॥ § 8262

अस्पृहाऽनुकम्पापरलोकश्रद्धात्मिका त्रिविधा मनसा प्रवृत्तिः ॥ § 8263
II.414/KSV

दानपरित्राणपरिचरणरूपा त्रिविधा शरीरेण प्रवृत्तिरितीयमपि दशविधैव । एषा च स्वर्गसदनद्वारसोपानकल्पा ॥ § 8264

### प्रवृत्तेः द्विविधत्वम्

---

६ ] सैव— nyāma-wit_kha
१३ ] खा— nyāma-wit_kha

---

४ लेन्द्रियाश्व ] इन्द्रियाणि हयानाहुः इति श्रुतिः ॥

८ मिति ] वागिन्द्रियं पूर्वमेव निरस्तम् ॥

सेयमुभयतो विंशतिभेदा प्रवृत्तिः संक्षेपतो द्विविधैव, विधिनिषेधात्मकतदवगमोपायभेदात् । विधिनिषेधावगमशरण एव हि सदसत्कर्मावगमः । तत्र विहितानुष्ठानं स्वर्गाय, निषिद्धाचरणं नरकायेत्येवं सुखदुःखोपभोगस्थानशरीरेन्द्रियाद्यभिसम्बधनिबन्धनमेषा प्रवृत्तिर्भवन्ती संसारस्य परमं कारणं भवति ॥ § 8265

## प्रवृत्तेर्धर्माधर्महेतुत्वम्

यो ह्ययं देवमनुष्यतिर्यग्योनिषु शरीरसंसर्गः, यश्च प्रतिविषयं बुद्धिसंसर्गः, यश्चात्मना सह मनसस्संसर्गः स सर्वः प्रवृत्तेरेव परिणामविभवः । वृत्तेश्च सर्वस्याः क्रियात्वात् क्षणिकत्वेऽपि तदुपगतो धर्माधर्मशब्दवाच्यः आत्मसंस्कारः कर्मफलोपभोगपर्यन्तस्थितिरस्त्येव । न च फलमदत्त्वा धर्माधर्मौ क्षीयेते । अन्त्यसुखदुःखसंविद्विरोधिनौ हि धर्माधर्मावुदाहरन्ति । न च जगति तथाविधं किमपि कार्यमस्ति वस्तु, यन्न धर्माधर्माभ्यामनाक्षिप्तसंभवमिति तदुच्छेदे मुमुक्षुणा यत्न आस्थेयः ॥ § 8266

इति वितनुतः पुण्यापुण्यप्रवृत्तिसमुद्भवौ
निगलवदिमौ धर्माधर्मौ रुजं भवबन्धने ।
यदि निरवधेर्दुःखस्यान्तं चिकीर्षसि सर्वथा
परिहर मनोवाक्कायानां प्रवृत्तिमनर्गलाम् ॥§ 8270

II.415/KSV

## दोषपरीक्षा

### प्रवर्तनालक्षणा दोषाः ॥ २-२-२७ ॥ § 8271

प्रवर्तना प्रवृत्तिं प्रति प्रयोजकता । सा लक्षणं येषामिति प्रवर्तनालक्षणा दोषाः । दोषप्रयुक्तो हि पुरुषः पुण्ये कर्मणि, पापे वा प्रवर्तते ॥ § 8272

## दोषस्यानुपदेश्यत्वशङ्कापरिहारौ

२ ] धका— nyāma-wit__kha
४ ] नभि— nyāma-wit__kha
६ ] ग्भूमि— nyāma-wit__kha; nyāma-wit__gha
८ ] हि— nyāma-wit__kha
११ ] मा— nyāma-wit__kha
१४ ] म— nyāma-wit__kha
१८ ] त्तिः— nyāma-wit__kha

१० न्ति ] सुखदुःखयोरुभयोरपि हेयत्वात्, तद्धेतुभूतौ धर्माधर्मावपि हेयावेव ॥

ननु ! प्रत्यात्मवेदनीयतया दोषाणां स्वरूपमपरोक्षमेव । तत् किमर्थमेषां लक्षणतो रूपं निरूप्यते—सत्यम्—प्रत्यात्मवेहनीयत्वेऽपि यदेषां प्रवर्तनालक्षणत्वमुपदिश्यते, तदनेन रूपेण संसारकारणत्वज्ञापनार्थम् । धर्माधर्मनिर्मितो हि शरीरादिदुःखाधिष्ठानसंबन्धः । तद्बीजस्य च कर्मणः कारणं दोषाः कर्मणि पुमांसं प्रवर्तयन्तो भवन्तीति प्रवर्तनालक्षणा इत्युक्ताः ॥ § 8273

परसन्तानवर्तिनां दोषाणां अप्रत्यक्षत्वात् तत्प्रतीतये प्रवर्तनालक्षणत्वकथनमिति त्वपव्याख्यानम्—अल्पप्रयोजनकत्वादिति ॥ § 8274

## दोषाणां विभागः

तेषां दोषाणां त्रयो राशयो भवन्ति, रागः द्वेषः मोहः इति । तत्रानुकूलेष्वर्थेषु अभिलाषलक्षणो रागः । प्रतिकूलेष्वसहनलक्षणः द्वेषः । वस्तुपारमार्थ्यापरिच्छेदलक्षणो मिथ्याध्यवसायो मोहः ॥ § 8275
II.416/KSV

## ईर्ष्यादीनां क्लेशेष्वेवान्तर्भावः

ननु च ! ईर्ष्यासूयालोभमानमदमत्सरादिदोषान्तरसंभवात् कथं त्रय एव दोषाः ?—न—ईर्ष्यादीनां यथानिर्दिष्टेष्वेवान्तर्भावात् ॥ § 8276

## रागप्रभेदाः

कामः, मत्सरः, स्पृहा, तृष्णा, लोभ इति पंचप्रकारो रागपक्षः । स्त्रीसंयोगेच्छा कामः । यदन्यस्मै निवेद्यमानमपि वस्तु धनवन्न क्षीयते, तदपरित्यागेच्छा मत्सरः । अनात्मीयवस्त्वादित्सा स्पृहा । पुनर्भवप्रति सन्धानहेतुभूतेच्छा तृष्णा । निषिद्धद्रव्यग्रहणेच्छा लोभ इत्यभिलाषप्रकारभेदात् रागपक्ष एवायम् ॥ § 8277

## दोषप्रभेदाः

१ ] य— nyāma-wit_kha
१ ] तत्किमेते— nyāma-wit_kha
३ ] विहि—ख— nyāma-wit_gha
१७ ] लक्षणो— nyāma-wit_ca

६ न्तान ] सन्तानः—आत्मा । बौद्धप्रभावात्प्रयुक्तः शब्दः ॥
१४ कामः ] यद्यपि इन्द्रियसुखसामान्यं कामः, तथापि तीव्रत्वादस्य प्रयोगप्राचुर्याच्च एवं व्याख्यानम् ॥

द्वेषपक्षोऽपि पंचविधः, क्रोधेर्ष्यासूया द्रोहोऽमर्ष इति । अक्षिभ्र्वादि विकारहेतुः प्रज्वलनात्मकः क्रोधः । साधारणेऽपि वस्तुनि परस्य दर्शनाद्य- सहनं ईर्ष्या । परगुणेष्वक्षमा असूया । परापकारः द्रोहः । अद- र्शितमुखादिविकारः परं प्रति मन्युः अमर्षः इति असहनप्रकारभेदादेष द्वेषपक्षः ॥ § 8278

## मोहप्रभेदाः

मोहपक्षस्तु चतुर्विधः—मिथ्याज्ञानं, विचिकित्सा, मानः, प्रमाद इति । अतस्मिंस्तदिति ज्ञानं मिथ्याज्ञानम् । किं स्विदिति विमर्शो विचिकित्सा II.417/KSV । असद्गुणाध्यारोपेण स्वोत्कर्षबुद्धिर्मानः । कियदेतदित्यवज्ञया कर्तव्याकरणं प्रमादः । स एव मद इत्याख्यायते । सोऽयं तत्त्वापरिज्ञानप्रकारभेदान्मोह- पक्षः ॥ § 8279

## मोहस्य पापतमत्वम्

एवं त्रय एवैते दोषाः । शोकहर्षौ तु सुखदुःखे उच्येते, न दोषान्तर- म् । तेषां तु मोहः पापतमः, इतरयोस्तु तदधीनात्मलाभत्वात् । *मूढस्य हि रागद्वेषौ भवतः, मिथ्यासंकल्पादुत्पद्यमानयोरनुभवात् । कुसंकल्प- श्च मिथ्याज्ञानप्रकृतिः । एवं मिथ्याज्ञानस्यैव भगवतः सर्वमिदं विलसितं, योऽयमनेकप्रकारः संसारदुःखभारः ॥ § 8280

## मोहस्य स्वतो दोषत्वम्, दोषहेतुत्वं च

यद्येवं न तर्हि मोहस्य दोषत्वम्, दोषकारणत्वादिति—न—तल्लक्षणा न- पायात् । सत्यपि दोषान्तरहेतुत्वे स्वयमपि पुरुषप्रवृत्तिप्रयोजकत्वलक्षणयोगात् रागवत् दोषत्वं न मोहोऽपि जहाति । त इमे दोषाः संसारहेतव इति यत्नतः शमनीयाः ॥ § 8281

## दोषशमनोपायः

कथं पुनरमी शमयितुं शक्याः ? उक्तमत्र—नाकस्मिकाः, न नित्याः, नाज्ञातशमनोपायाः, न चाशक्यप्रतिक्रिया इति । विस्तरतश्चैतदप वर्गाह्निके II.418/KSV परोक्ष्यते । मिथ्याज्ञाननिमित्ताः खल्वेते दोषाः । तस्मिन् सम्यग्ज्ञानप्रभावनिहते हेतोरभावान्न भवन्त्येवेति ॥ § 8282

---

९ ] ति व्या— nyāma-wit__kha nyāma-wit__kha
१४ ] प्रवृत्तिरेव—

---

८ द्गुणाध्यारोपेण ] स्वस्मिन्नित्यादिः ॥
१२ * ] मूढः—मोहाक्रान्तः ॥

## दोषस्य एकत्वशङ्कापरिहारौ

ननु ! एवं प्रसवविनाशकारणयोरेकत्वात् एक एव दोषो भवेदिति त्रित्वं हीयेत—न—अनुभवसिद्धभेदत्वात् । अनुभूयते हि रागद्वेषमोहानामितरेतरविभक्तं स्वरूपम् । कारणैकत्वं तु न प्रयोजकम्, एकस्मादेव ज्वलनसंयोगात् उत्पद्यमानानां विनश्यतां च पार्थिवपदार्थवृत्तीनां गन्धरस रूपस्पर्शानां नानात्वदर्शनात् । अतः सूक्तं दोषणां त्रैराश्यमिति ॥ § 8283

संसारकाराभवनप्रवेश-
मार्गास्त एते त्रय एव दोषाः ।
एषां प्रहाणोद्यममादधानः
न जन्ममृत्यू पुनरभ्युपैति ॥§ 8287

## प्रेत्यभावपरीक्षा

पुनरुत्पत्तिः प्रेत्यभावः ॥ १-१-१९ ॥ § 8288

कस्येयं पुनरुत्पत्तिरुच्यते, आत्मनः शरीरस्य वा ? तत्रात्मनो नित्यत्वादुत्पत्तिरेव नास्ति, का कथा पुनश्शब्दार्थस्य ? शरीरस्य तु उत्पत्तिरस्ति, न तु पौनःपुन्येन । न हि मृतं शरीरं तदेव पुनरुत्पद्यते । तस्मात् पुनरुत्पत्तिः प्रेत्यभाव इत्यवाचकं सूत्रम्—उच्यते—पुनश्शब्दार्थस्य यत्नत उपदिष्टस्य परिहर्तुमशक्यत्वात् । तस्यैव निर्वेदोत्पादद्वारकापवर्गोपयोगयोग्योपदेशत्वात् ।
II.419/KSV आत्मनश्च स्थायित्वेन क्रियाभ्या वृत्तिसंभवात्, तस्यैव पुनः पुनरुत्पत्ति ब्रूमः । उत्पत्तिवन्मरणमपि । सोऽयमात्मन एव मृत्वा पुनर्जन्म प्रेत्यभाव इति ॥ § 8289

## नित्यस्याप्यात्मनः जन्ममरणोपपादनम्

ननु ! जन्ममरणे उभे अपि नित्यत्वादात्मनः न संस्तः इत्युक्तम्— सत्यम्—शरीरादिसंयोगवियोगयोस्तु तथाभिधानान्न दोषः । मरणं— आत्मनः भोगायतनदेहेन्द्रियादिवियोग उच्यते । जन्म तु तत्संबन्धः । ते एते विपच्यमानकर्माशयानुरूपेण देहेन्द्रियादित्यागोपादाने एव मरणजन्मनी क्रियाभ्यावृत्त्या भवन्ती प्रेत्यभाव इत्युच्यते । स एव च संसारः । तदित्थमनुध्यायतः

२ ] त्वा— nyāma-wit_ja
१४ ] देष्टव्य— nyāma-wit_ca
१५--१६ ] आ— nyāma-wit_kha
२२ ] सारे— nyāma-wit_kha

१ त्वात्] मिथ्याज्ञानस्यैव हेतुत्वं, तदभावस्य च विनाशकत्वम् ॥

कस्य सचेतसो निर्वेदो नोदियात् । तदुक्तम्— § 8290

जराशवियोगमरणव्याधयस्तावदासताम् ।
जन्मैव किं न धीरस्य भूयो भूयस्त्रपाकरम् ॥§ 8292

## देहेन्द्रियादिरचनाप्रकारः

अथ यैरुत्पद्यमानैर्देहेन्द्रियादिभिरात्मनः संबन्धः, तेषां कथमुत्पत्तिरित्युक्तं सूत्रकृता—व्यक्तात् व्यक्तानामुत्पत्तिः प्रत्यक्षप्रामाण्यात् न्या-सू-४-१-११ इति । व्यक्तादिति कापिलाभ्युपगतत्रिगुणात्मकाव्यक्तरूपकारणनिषेधेन परमाणूनां शरीरादौ कार्ये कारणत्वमाह ॥ § 8293

तथा हि—पार्थिवं, आप्यं, तैजसं, वायवीयमिति चतुर्विधमिदं कार्यं स्वावयवाश्रितमुपलभ्यते । तत्र यथा घटः सावयवः कपालेष्वाश्रितः, एवं कपालान्यपि सावयवत्वात्तदवयवेषु, तदवयवा अपि तदवयवान्तरेषु इत्येवं II.420/KSV तावत्, यावत् परमाणवो निरवयवा इति । यत्र यावतः कार्यजातस्य स्वावयवाश्रितस्य प्रत्यक्षेण ग्रहणं तत्र तदेव प्रमाणम् । तत ऊर्ध्वमनुमानम् ॥ § 8294

## परमाणुसाधकानुमानम्

तदपि हि कार्यं स्वावयवाश्रितम्, सावयवत्वात्, परिदृश्यमानकार्यवत् । निरवयत्वे तु तस्य परमाणुत्वमेव । परमाणुषु च सावयवत्वस्य च हेतोरसिद्धत्वान्नावयवान्तरकल्पना । तेषां हि सावयवत्वे तदवयवाः परमाणवो भवेयुः । न ते उत्पत्तिक्रमवत् विनाशक्रमेणापि परमाणवोऽनुमीयन्ते । लोष्टस्य प्रविभज्यमानस्य भागाः, तद्भागानां च भागान्तराणीत्येवं तावत् यावदशक्यभङ्गत्वमदर्शनविषयत्वं च भवति । तद्यतः परमवयवविभागो न संभवति, ते परमाणव उच्यन्ते । तेष्वपि हि विभज्यमानेषु तदवयवाः परमाणवो भवेयुर्न ते । तदेतदेवं उत्पत्तिक्रमवत् विनाशक्रमस्येदृशो दर्शनात् सन्ति परमाणवः ॥ § 8295

## परमाणूनामावश्यकता

५ ] क— nyāma-wit_kha
११--१३ ] त— nyāma-wit_kha
१३ ] व— nyāma-wit_kha
१५--१६ ] नु— nyāma-wit_kha
१८ ] दृश्य— nyāma-wit_kha
२० ] तदेवमुत्पत्ति— nyāma-wit_kha

६ निषेधेन ] व्यक्तादेव व्यक्तानामुत्पत्तिः, न तु अव्यक्तादिति सूचनेनेत्यर्थः ॥

अत्र हि त्रयी गतिः । अस्य घटादेः कार्यस्य निरवयवत्वमेव वा, अवयवानन्त्यं वा, परमाण्वन्तता वा ? तत्र निरवयवत्वमनुपपन्नम्, अवयवानां पटे तन्तूनां, घटे च कपालानां प्रत्यक्षमुपलम्भात् । अनन्तावयव योगित्वमपि न युक्तम्, मेरुसर्षपयोरनन्तावयवयोगित्वाविशेषेण तुल्यपरिमाणत्वप्रसङ्गात् । तस्मात्परमाण्वन्ततैव युक्तिमती ॥ § 8296

II.421/KSV

त इमे परमाणवः चेतनेच्छाप्रेरणमन्तरेण विशिष्टक्रमकमितरेतर सङ्घटनमलभमानाः कार्यसिद्धये न पर्याप्नुयुः, अचेतनत्वादिति चेतन एषामधिष्ठाना सकलभुवननिर्माणनिपुणमतिरीश्वरोऽभ्युपगतः । तत्सि द्धये च सकलकुतर्कतिमिरतिरस्कारपूर्वकं पूर्वमेव निरवद्यमनुमानमुपपादितम् ॥ § 8297

ईश्वरोऽपि नानेकात्मवृत्तिविपाकोन्मुखधर्माधर्मसंस्कारवैचित्र्यमननुरुध्यमानः विचित्रस्य जगतो जन्म निर्मातुमर्हतीत्येतदपि दर्शितम् ॥ § 8298

## परमाणुभिः जगदारम्भक्रमः

न च सकृदेव सर्वे निर्वर्त्यमानकार्यपरिमाणानुगुणसङ्ख्याः परमाणवः एकत्र संयोज्य कार्यमारभन्ते, किन्तु द्व्यणुकादिप्रक्रमेण । सकृदारम्भे हि कुम्भे भज्यमाने कपालशर्कराकणचूर्णादिक्रममपहाय प्रथममेव परमाण्वन्तता भवेत्; सर्वसंयोगस्य सर्वविभागेन सहसैव विनाशात् । अतश्च कर्परादिक्रमदर्शनं विरुध्येत । अविनष्टेऽपि पटादौ तन्त्वाद्यवयवाश्रितत्वमुपलभ्यमानं कथं वा समर्थ्येत ? परमाणूनामप्रत्यक्षत्वेन तदाश्रितत्वस्य ग्रहीतुमशक्यत्वात् । परमाणूनां घटस्य च मध्ये कार्यान्तरानारम्भादिति । तस्मात् द्व्यणुकादिप्रक्रमेण परमाणवः कार्यमारभन्ते ॥ § 8299

## द्व्यणुकोत्पत्तिः

ननु ! द्वावेव परमाणू प्रथमं संघटेते इत्यत्र का युक्तिरुच्यते ? बहुत्वसंख्यायाः महत्परिमाणकारणत्वदर्शनात्, त्रिषु परमाणुषु प्रथमं मिलत्सु तत्कार्ये बहुत्वसंख्यायाः महत्त्वारम्भकत्वात् तत्प्रत्यक्षत्वं प्रसज्येत । न च तत्प्रत्यक्षत्वम्, अतिसूक्ष्मत्वात् । अतो द्वाभ्यां परमाणुभ्यां द्व्यणुकमादावुत्पद्यते ॥ § 8300

II.422/KSV

## द्व्यणुकस्याप्रत्यक्षत्वम्, त्र्यणुकोत्पत्तिश्च

८ ] म— nyāma-wit_kha
९ ] सं— nyāma-wit_kha
१६--१७ ] त्व— nyāma-wit_kha

४ योगित्वाविशेषेण ] अवयवपरंपरायाः कुत्रचिद्विश्रान्तौ सत्यां अधिकावयवत्वान्महत्वम्, न्यूनावयवत्वात् अल्पत्वं च वक्तुं शक्यम् ॥
११ ती ] तदा हीश्वरस्य पक्षपातप्रसङ्गः ॥

तच्च परमाणुवदप्रत्यक्षमेव, महत्त्वानुत्पादात् । द्व्यणुकद्वयेन तु कार्यारम्भ इष्यमाणे तदविशेषप्रसङ्गः द्व्यणुक इव तत्रापि महत्त्वोत्पत्तौ कारणाभावात् । अतः त्रिभिर्द्व्यणुकैः त्र्यणुकमारभ्यते । तत्र च बहुत्वसंख्यया महत्त्वमप्यारप्स्यते, प्रत्यक्षत्वं च भविष्यति । ततः परं तु क्रमसामान्ये प्रमाणमस्ति, लोष्टादिभङ्गे स्वावयवखण्डावयवदर्शनम् । क्रमविशेषे तु प्रमाणं नास्ति इत्थमारम्भ इति । यत्र वा दर्शनमस्ति तत्र तदस्तु क्रमविशेषे प्रमाणमिति ॥ § 8301

## अन्त्यावयविनिरूपणम्

*आरभ्यारम्भकत्वं नेष्यते, मूर्तानां समानदेशत्वविरोधात् । न हि परमाणवः प्रथमं कार्यमारभ्य, तदनु त एवोत्तरोत्तरकालं कार्याण्यारभन्ते । किन्तु यत्परमाणुनिर्वृत्तं कार्यं द्व्यणुकं, तत् कार्यान्तरस्यारम्भकम् तदप्यन्यस्य कार्यण्येत्येवं तावत्, यावत् परिपूर्णावयविनिष्पत्तिः ॥ § 8302

II.423/KSV

इत्थं च तन्तुभिः पटः क्रियते, न तन्त्ववयवैरंशुभिः; इतरथा ह्युत्तरोत्तरकार्यारम्भेऽपि पूर्वपूर्वकारणानपायात् मूर्तानामेकदेशत्वं स्यात् । न च तद्दृश्यत इति यथोक्त एव क्रमः श्रेयान् ॥ § 8303

तदेवमनेकात्मसमवेतधर्माधर्मसंस्कारपरिपाकानुरूपप्रसरदीश्वरेच्छाप्रेर्यमाणपरमाणुक्रियानुपूर्वीनिर्वर्त्यमानद्व्यणुकादिकार्यप्रक्रमेण शरीराद्यवयविनिवृत्तिरिति स्थितम् ॥ § 8304

## शरीरविषये पक्षान्तराणि

एतद्विपरीतानि तु मतान्तराणि प्रमाणविरुद्धानि । तथाहि—नित्यमेव शरीरादि अनुत्पत्तिधर्मकमिति प्रत्यक्षविरुद्धम् । पृथिव्यादेरप्यवयवसन्निवेशविशिष्टत्वात् कार्यत्वम् ईश्वरसिद्धौ निर्णीतम् ॥ § 8305

आकस्मिकत्वमपि शरीरादेः कार्यस्य न युक्तम्; कारणनियमोपलम्भात्, अनिमित्तायाश्च भावोत्पत्तेरनुपपत्तेः ॥ § 8306

---

५ ] भक्तेः सा— nyāma-wit__kha

६--८ ] मा— nyāma-wit__kha

२० ] ष्ट— nyāma-wit__kha

२० ] त्वात्— nyāma-wit__kha

---

४ सामान्ये ] समान्यतः अल्पपरिमाणात् महत्परिमाणः अवयवी भवतीति नियमः । न त्ववयवसंख्यादिनियमः ॥

८ *] आरभ्यस्य—कार्यस्य आरंभकत्वं—उत्तरोपादानत्वम् । कापालिकापेक्षया कपलः अवयवी । अयं च घटस्य उपादानम् । एवं च घटः कपालश्च द्वाववयवी समकालौ स्याताम् । अतः घटावस्थितिवेलायां पूर्वावयविनो नाशः, अवयवानाभेवावस्थानं वक्तव्यमिति भावः ॥

१२ वैरंशुभिः ] न हि तन्तुर्नामावयवी पटकाले तिष्ठति ॥

अभावात् भावोत्पत्तिरपि तादृगेव ॥ § 8307

त्रिगुणात्मकप्रधानविकारमहदहङ्कारादिकारणकत्वमपि कार्यस्य पृथिव्यादेः प्रागेव प्रतिषिद्धम् ॥ § 8308

अनारब्धावयविरूपकार्याः परमाणव एवैते संचयविशिष्टास्सन्तः लोकयात्रां वहन्तीत्येतदपि न समीचीनम्; संचयस्य भेदाभेदविकल्पाभ्यां (?)नुपपद्यमानत्वात्, परमाणूनां चातिसौक्ष्म्यादप्रत्यक्षत्वात् ॥ § 8309

*पौद्गलिककार्यपक्षेऽपि पर्यायान्तरेण परमाणूनां कथनम्, अप्रमाणकत्वं वा ॥ § 8310

II.424/KSV

शब्दविवर्तत्वं तदनुगमाग्रहणादनुपपन्नम् ॥ § 8311

*परमात्मोपादानत्वमपि न संभवति, तस्यैव निष्प्रमाणकत्वात् ॥ § 8312

न च न कदाचिदनीदृशं जगत् पू. सं. ४९१ इति पादप्रसारिकामात्रं कर्तुमुचितम्; सर्गप्रलयप्रबन्धस्य समर्थितत्वादिति ॥ § 8313

अतश्च पक्षान्तरदुर्बलत्वात्
यथोदितः सिद्ध्यति भूतसर्गः ।
तं यस्तु पश्यन्नपि निह्नुवीत्
तस्मै नमः पण्डितशेखराय ॥§ 8317

अनादौ संसारे स्थितमिदमहो मूढमनसां
जनित्वा जन्तूनां मरणमथ मृत्वापि जननम् ।
इयं सा दुःखानां सरणिरिति संचिन्त्य कृतिना
निधातव्यं चेतो जननमरणोच्छेदिनि पदे ॥§ 8321

## फलपरीक्षा

### प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ १-१-२० ॥ § 8322

प्रवृत्तिदोषास्तु व्याख्याताः । तज्जनितोऽर्थः फलमित्युच्यते । अर्थपदग्रहणं गौणमुख्यभेदप्रदर्शनार्थम् । सुखदुःखे मुख्यं फलम् । तत्साधनं तु II.425/KSV शरीरेन्द्रियविषयादि गौणम् । सर्वं हीदं प्रवृत्तिदोषाक्षिप्तं फलमित्युक्तम् ।

१४ ] व— nyāma-wit_kha
२२--२३ ] ग्र— nyāma-wit_kha

४ एवैते ] संचयविशिष्टाः—सङ्घातरूपा इत्यर्थः । इदं बौद्धानां मतम् ॥
७ *] इदं जैनानाम् ॥
९ त्वं ] अनुगमः—कारणस्य कार्येऽनुवृत्तिः ॥
१० *] भर्तृप्रपञ्चादीनां ब्रह्मपरिणामवादिनां मतमिदम् ॥
११ नीदृशं ] कदाप्यनीदृशं न, किन्तु अनादिकालादेवमेवेति स्वभाववादिनः ॥

तदिदमनादिना प्रबन्धेन प्रवर्तमानं फलं पुनः पुनरुपभुज्यत इति महतः खेदस्य हेतुरिति भाव्यमानं निर्वेदवैराग्यादिमार्गेणापवर्गोपयोगितां प्रतिपद्यते ॥ § 8323

आत्तमात्तं विजहतः त्यक्तं त्यक्तं च गृह्णतः ।
पुंसः फलघटीयन्त्रं अहो कष्टः परिश्रमः ॥§ 8325

## फलद्वैविध्यम्

तत्पुनः फलं कर्मणा किं सद्य एव संपद्यते, कालान्तरेण वा ? उच्यते—द्विविधं कर्म—विहितं निषिद्धं च । तत्र विधिफलानां कालनियमो नास्ति । क्रियाफलं हि दोग्धि पचति इति समनन्तरमुत्पद्यमानं दृश्यते । विधिफलानां तु नैव नियम इति शब्दपरीक्षायां चित्राक्षेपपरिहारावसरे पू-सं-६५७ निरूपितमेतत् ॥ § 8326

## विधिफले विशेषः

विधिफलमपिः च किंचन चोदनावचनपर्यालोचनया सद्य इति निश्चीयते, वृष्टिरिव कारीर्याः । किंचित् ऐहिकफलमपि कर्म वस्तुबलात् कालान्तरापेक्षं भवति, पुत्रेष्ट्यादि । न हि सहसैव निधिलाभवत् पुत्रलाभः संभवति, गर्भसंभवहेतुभूतभार्यापरिरम्भणादिक्रमापेक्षत्वात् ॥ § 8327

ज्योतिष्टोमादि तु स्वर्गफलं कर्मफलस्वरूपमहिम्नैव पारलौकिकफलमवतिष्ठते । स्वर्गो हि निरतिशया प्रीतिः, तदन्यथानुपपत्तिपरिकल्पितः, कनकगिरिशिखरादिर्वा भोगदेशः । उभयथाऽपि नैतद्देहो पभोगयोग्यतां II.426/KSV
प्रतिपद्यते । अनियतफलं तु चित्रादि कैश्चिदुक्तम् । तच्च युक्तमयुक्तमिति वा तत्रैव परीक्षितम् ॥ § 8328

## निषिद्धफलविचारः

१ ] पु— nyāma-wit_kha
१ ] युज्यते पुनस्त्य— nyāma-wit_kha
५ ] प— nyāma-wit_kha
९४९.१७--०००.० ] दे— nyāma-wit_kha
१७ ] ग्य— nyāma-wit_kha

८ ते] यद्यपि कृष्यादीनां क्रियाणामपि सद्यः फलं न दृश्यत इति शङ्का स्यात्; परन्तु फलपर्यन्ततावत्क्रियाया एव पाकादिवदेकक्रियारूपत्वात् कृषेः सद्यःफलत्वम् ॥

१७ दे] [In the print edition there is a footnote reference, but no corresponding note.]

निषिद्धस्य तु कर्मणः सर्वस्यैव प्रायेण परलोक एव फलम् । परदाराभिमर्षणादौ हि क्रियाफलं सुरतसुखादि सद्यः फलम् । निषेधविधिफलं तु नरकपतनं पारलौकिकम् । स्वर्गवन्नरकस्यापि निरतिशयदुःखात्मनः, तदन्यथाऽनुपपतिपरिकल्पितदेशस्वभावस्य वा एतच्छरीरानुप भोगयोग्यत्वात् ॥ § 8329

तीव्रसंवेगनिर्वृत्तं तु कर्म विहितं इतरद्वा प्रत्यासन्नविपाकं इहैव भवति, *नन्दीश्वरनहुषयोरिवेत्यागमविदः ॥ § 8330

चोरब्रह्मघ्नादयश्च केचित् प्रत्यासन्नप्रत्यवायाः प्रायेण दृश्यन्त एवेत्येवमेषां विचित्रः कर्मणां विपाकः ॥ § 8331

## कर्मणां फलप्रदत्वप्रकारः

यदपि चोच्यते—कर्मकाले फलं नास्ति, फलकाले कर्म नास्ति । कालान्तरे च फलस्यान्यत् प्रत्यक्षं कारणमुपलभ्यते सेवादिकमिति—तदपि पूर्वं परिहृतम् । कर्मणां विनाशेऽपि तज्जनितस्य आत्मसंस्कारस्य धर्माधर्मशब्दवाच्यस्य भावात् । दृष्टस्य च सेवादेः कारणस्य व्यभिचारात् अदृष्टकल्पनाया अवश्यंभावित्वात् ॥ § 8332

II.427/KSV

धर्मादिरात्मनिसमवायात्, फलस्य च पुत्रपश्वादेः अन्यत्र समवेतत्वात् भिन्नाधिकरणत्वं कर्मफलयोरित्यपि न चोद्यम्; मुख्यस्य सुखदुःखात्मनः फलस्य भिन्नाश्रयत्वानुपपत्तेः । सुखदुःखे ह्यात्मनि वर्तेते, धर्माधर्मौ च तत्स्थावेवेति ॥ § 8333

*दृष्टं नैव सुखस्य कारणमतस्तद्धेतुरागेण किं ?
दुःखस्यापि न तन्निबन्धनमिति द्वेषस्तदर्थेषु कः ?
तस्मात्कर्मनिमित्तकं फलमिति ध्यायन्न कुर्यात् कृती
सङ्गं कर्मणि येन दुस्तरमसौ संसारमापद्यते ॥ § 8337

## दुःखपरीक्षा

६ ] यो— nyāma-wit_kha
१५ ] फलस— nyāma-wit_kha; nyāma-wit_gha
१९ ] ष्टे— nyāma-wit_kha

७ *] नन्दीनामकः तीव्रतपःफलतया तदैव गाणापस्यस्थानमवाप । एवं नहुषः तीव्रपापफलतया क्षणादेव स्वर्गाद्भ्रष्टः । तथा हि श्रूयते—अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते इति ॥
१९ *] फलपरीक्षायाः प्रयोजनमाह—दृष्टमित्यादिना ॥

बाधनालक्षणं दुःखम् ॥ १-१-२१ ॥ § 8338

बाधना पीडनं—सन्तापनम् । सा लक्षणमस्येति बाधनालक्षणं दुःखम् । तत्र मुख्ये दुःखे लक्ष्ये, लक्षणशब्दो यथाश्रुत एव । बाधनयैव हि दुःखस्वरूपं लक्ष्यते—बाधयति दुःखयतीति । गौणे तु दुःखे शरीरादौ लक्ष्ये, बाधनालक्षणं—बाधनानुषक्तमिति व्याख्येयम् ॥ § 8339

## प्रत्येकं दुःखलक्षणकथनाक्षेपः

ननु ! पूर्वसूत्रव्याख्यातेन फलग्रहणेनैव दुःखस्योपदिष्टत्वात् किमर्थं पुनरुपदेशः ? सुखप्रत्याख्यनार्थं इति चेत्—न—पूर्वापरविरोधात् । सकलप्राणभृदनुभवसाक्षिकत्वेन च सुखस्य प्रत्याख्यातुमशक्यत्वात् । तत्प्रत्याख्याने च विवक्षिते किमर्थं प्रमेयसूत्रे फलपदोपादानम् ? फले खलु सुख दुःखे इति व्याख्यातम् । ततश्च सुखे प्रत्याख्याते दुःखमेवावशिष्यते II.428/KSV
। तच्चानेन दुःखशब्देनैव निर्दिष्टमिति किं फलग्रहणेन ? § 8340

## उक्ताक्षेपपरिहारः

उच्यते—न सुखलेशस्य संसारे जन्तुभिरन्तराऽन्तराऽनुभूयमानस्य प्रत्याख्यानाय दुःखग्रहणम् । किन्तु सर्वत्र तथात्वभावनोपदेशार्थम् । सोऽपि हि सुखलवः दुःखमेवेति भावयितव्यः, तत्साधन (?) दुःखमेवेति मन्तव्यम् ॥ § 8341

न तद्व्यवसितं पुंसां न तत्कर्म न तद्वचः ।
न तद्भोग्यं समस्तीह यन्न दुःखाय जायते ॥§ 8343

## दुःखे तारतम्यम्

तदित्थं दुःखं उत्कृष्टं तिरश्चाम्, मध्यमं मनुष्याणाम् । हीनं देवानाम् । हीनतरं वीतरागाणामित्यागमविदः । वीतरागाणां दुःखतानवं युक्तितोऽप्यवगम्यते, दुःखस्य रागनिबन्धनत्वात् ॥ § 8344

तत्त्वतश्चिन्त्यमानं हि ? सर्वं दुःखं विवेकिनः ।
विषसंपृक्तमधुवत् सुखं दुःखीभवत्यदः ॥§ 8346

---

४ ] पीड— nyāma-wit_kha
५ ] बा— nyāma-wit_kha
९ ] लो— nyāma-wit_kha
१३ ] सन्न— nyāma-wit_kha
१८ ] त्सृ— nyāma-wit_kha
२२ ] घृत— nyāma-wit_ca

---

१३ म्] संसारे सुखमेव नास्ति, सर्वं दुःखमेवेति बौद्धाः; । सिद्धान्तिनां पु अस्ति संसारे सुखलेशः । अन्यथा गुणगणनायां सुखस्य पाठो न स्यात् ॥

सुखाधिगमलोभेन यतमानो हि पुरुषः ।
सहस्रशाखमाप्नोति दुःखमेव तदर्जने ॥§ 8348

एवं सर्वमिदं दुःखं इति भावयतोऽनिशम् ।
सर्वोपपत्तिस्थानेषु निर्वेदोऽस्य प्रवर्तते ॥§ 8350

II.429/KSV

निर्विण्णस्य च वैराग्यं विरक्तस्य च देहिनः ।
क्लेशकर्मप्रहाणादिद्वारो निःश्रेयसोदयः ॥§ 8352

## दुःखस्य फलरूपत्ववर्णनफलम्

ननु ! एवं तर्हि फलग्रहणं न कर्तव्यम्, दुःखपदेनैव गतार्थत्वादित्युक्तम्—मैवम्—तस्यान्यप्रयोजनत्वात् । प्रवृत्तिदोषजनितत्वेन सुखदुःखे भावयितव्ये अभ्यासेन च वर्तमाने इति । कर्मदोषजनितत्वेन हि फलमनुचिन्तयतः तत्कारणयोरनुकूलप्रतिकूलयोरस्य रागद्वेषौ मा भूताम् । अभ्यावृत्त्या च ससाधनस्य फलस्य हानोपादानस्रोतसोह्यमानः तत्रात्यन्ताय निर्विद्यतामिति फलग्रहणम् । तदेवं अन्यथा फलस्य निःश्रेयसोपयोगित्वम्, अन्यथा तु फलत्वे सत्यपि दुःखस्येति ॥ § 8353

## दुःखस्वरूपनिगमनम्

दीर्घस्य दुःखस्य निमित्तभूतं
सुखं च दुःखात्मकमेव सर्वम् ।
मुमुक्षुणा हेयतया विचिन्त्यं
*देहादि दुःखान्तमिदं प्रमेयम् ॥§ 8357

इति निपुणमतिर्यो दुखमेवेति सर्वं
परिहरति शरीरे क्लेशकर्मादिजालम् ।
अजमजरमनन्तं चिन्तयन्नात्मतत्त्वं
गतभयमपवर्गं शाश्वतं सोऽभ्युपैति ॥§ 8361

॥ इति श्री भट्टजयन्तकृतौ न्यायमञ्जर्यां अष्टममाह्निकम् ॥

७ ] स्वोपदेशे— nyāma-wit__ca
८--९ ] हि— nyāma-wit__kha
११ ] त— nyāma-wit__kha
२० ] तत्त्वं— nyāma-wit__kha

१७ *] द्वादशविधप्रमेयेषु आद्यन्तवर्जम् ॥

## २.५ नवममाह्निकम्—प्रमेयपरीक्षाः अपवर्गपरीक्षा

II.430/KSV

एवं शरीरादौ दुःखपर्यन्ते हेये प्रमेये निर्णीते, यदर्थ एतदुपदेशः यत्परमुपादेयं प्रमेयं, यदर्थः शास्त्रारम्भः तमपवर्गं लक्षयितुमाह— § 8363

तदत्यन्तविमोक्षोऽपवर्गः ॥ १-१-२२ ॥ § 8364

तदिति प्रक्रान्तस्य दुःखस्यावमर्शः । न च मुख्यमेव दुःखं बाधनास्वभावमवमृश्यते, किन्तु तत्साधनं तदनुषक्तं च सर्वमेव । तेन दुःखेन वियोगोऽपवर्गः ॥ § 8365

अस्ति प्रलयवेलायामप्यात्मनो दुःखवियोगः । स ह्यपवर्गो न भवति, सर्गसमये पुनरक्षीणकर्माशयानुरूपशरीरादिसंबन्धे सति दुखसंभवात् । अतः तद्व्यावृत्त्यर्थमत्यन्तग्रहणम् ॥ § 8366

### अशेषविशेषगुणोच्छेद एव मोक्षः

आत्यन्तिकी दुःखनिवृत्तिरपवर्गः, न सावधिका । द्विविधदुःखावमर्शिना सर्वनाम्ना सर्वेषामात्मगुणानां दुःखवदवमर्शात्, अत्यन्तग्रहणेन च सर्वात्मना तद्वियोगाभिधानात् नवानामात्मगुणानां बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां निर्मूलोच्छेदः अपवर्ग इत्युक्तं भवति ॥ § 8367

II.431/KSV

### विशेषगुणानां मुक्तौ नाशस्यावश्यकता

यावदात्मगुणास्सर्वे नोच्छिन्ना वासनादयः ।
तावदात्यन्तिकी दुःखव्यावृत्तिर्नावकल्पते ॥§ 8369

धर्माधर्मनिमित्तो हि संभवः सुखदुःखयोः ।
मूलभूतौ च तावेव स्तम्भौ संसारसद्मनः ॥§ 8371

तदुच्छेदे तु तत्कार्यशरीराद्यनुपप्लवात् ।

७ ] मा— nyāma-wit_kha
८ ] नु— nyāma-wit_ga
१८ ] हि— nyāma-wit_ca

७ अस्ति ] प्रलयेति सुषुप्त्यादीनामुपलक्षकम् ॥

नात्मनः सुखदुःखे स्तः इत्यसौ मुक्त उच्यते ॥§ 8373

इच्छाद्वेषप्रयत्नादि भोगायतनबन्धनम् ।
उच्छिन्नभोगायतनः नात्मा तैरपि युज्यते ॥§ 8375

प्राणस्य क्षुत्पिपासे द्वे लोभमोहौ च चेतसः ।
शीतातपौ शरीरस्य षडूर्मिरहितः शिवः ॥§ 8377

तदेवं नवानामात्मविशेषगुणानां निर्मूलोच्छेदोऽपवर्ग इति यदुच्यते, तदेवेदमुक्तं भवति तदत्यन्तविमोक्षोऽपवर्ग इति ॥ § 8378

## मुक्तिकालिकात्मस्वरूपम्

ननु ! तस्यामवस्थायां कीदृगात्माऽवशिष्यते ?
स्वरूपैकप्रतिष्ठानः परित्यक्तोऽखिलैर्गुणैः ॥§ 8380

*उर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः ।
संसारबन्धनाधीनदुःखक्लेशाद्यदूषितम् ॥§ 8382

## वेदान्तिसंमतमोक्षनिरासः

अत्र तावत् वेदान्तिन आहुः—नायमिदृशो मोक्षः प्रेक्षावतां प्रयत्नभूमिर्भवितुमर्हति । को हि नाम शिलाशकलकल्पं अपगतसकलसुख *संवेदनसंस्पर्शं आत्मानमुपपादयितुं यतेत ? सोपाधिसावधिकपरिमितानन्दनिष्यन्दात् स्वर्गादप्यधिकं अनवधिकनिरतिशयनैसर्गिकानन्दसुन्दरं अपरिम्लानतत्संवेदनसामर्थ्यं चतुर्थं पुरुषार्थमाचक्षन्ते विचक्षणाः ॥ § 8383

II.432/KSV

## मुक्तेरपि संसार एव वरम्

यदि तु जडः पाषाणनिर्विशेष एव तस्यामवस्थायामात्मा भवेत्, । तत्कृतं अपवर्गेण ! संसार एव वरमस्तु ! यत्र तावदन्तराऽन्तराऽपि दुःखकलुषितमपि स्वल्पमपि सुखमुपभुज्यते । चिन्त्यतां तावदिदं, किमल्पसुखानुभवो भद्रकः, उत सर्वसुखोच्छेद एव । तस्मान्नित्यसुखमात्मनो महत्त्ववदस्तीति आगमप्रामाण्यादभ्युपगम्यताम् । तच्च संसारदशायां अविद्यावरणवशेन नानुभूयते । तत्त्वज्ञानाभ्यासभावनाभिभूतनिरन्तराविद्यावरणस्त्वात्मा तस्यामवस्थायां तदनुभवतीति ॥ § 8384

३--५ ] ते— nyāma-wit_ja
६ ] गु— nyāma-wit_kha
७ ] योगो— nyāma-wit_kha
१८ ] वस्था— nyāma-wit_kha

१० *] ऊर्मिष्टकमनुपदमुक्तं क्षुत्पिपासालोभमोहशीतातपा इति ॥
१३ *] संवेदनम्—अनुभवः ॥

## सिद्धान्ते मुक्तौ सुखाभावे प्रमाणम्

तदिदमनुपपन्नम्—आत्मनो नित्यसुखसत्तायां प्रमाणाभावात् । प्रत्यक्षं तावन्नास्मदादीनामन्येषां वा केषांचिदस्मिन्नर्थे प्रभविष्यतीति केयं कथा ? अनुमानमपि न संभवति, लिङ्गलेशानवलोकनादिति ॥ § 8385

## नित्यसुखसद्भावे अनुमानं न प्रमाणम्

ननु ! उक्तमेवानुमानमपवर्गाय, यत्र प्रेक्षावतां प्रयत्नः । सुखसिद्धये हि बुद्धिमन्तो यतन्ते, नाश्मकल्पमात्मानं कर्तुमिति । तदयं इष्टाधिगमार्थः मुमुक्षोः प्रयत्नः, प्रेक्षापूर्वकारिप्रयत्नत्वात्, कृष्यादिप्रयत्न वदिति ॥ § 8386
II.433/KSV

*नानिष्टोपरमार्थत्वात्; अनिष्टस्यापि शान्तये ।
सन्तः प्रयतमाना हि दृश्यन्ते व्याधिखेदिताः ॥§ 8388

अतिदुर्वहश्चायं संसारदुःखभार इति तदुपशमाय व्यवस्यन्तः सन्तः न निष्प्रयोजनप्रयत्ना भवन्तीति अनैकान्तिको हेतुः ॥ § 8389

## नित्यसुखसद्भावे आगमाः न प्रमाणम्

अथ आगमादवगम्यते—विभुत्वेनेव, नित्येन सुखेनाविनाकृतः स्वात्मेति । तथा च पठ्यते—विज्ञानमानन्दं ब्रह्म इति— § 8390

स्यादेतदेवम्—यद्येतदेव केवलं आगमवचनमश्रोष्यत । वचनान्तरमपि तु श्रूयते—न ह वै सशरीरस्य सतः प्रियाप्रिययोरुपहतिरस्ति । अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः इति ॥ § 8391

## आगमवाक्यानामन्यथासिद्धत्वम्

ननु ! भवत्पठितमागमवचनं अन्यथापि व्याख्यातुं शक्यते । सशरीरस्य इति प्रक्रमात् सांसारिके सुखदुःखे अनुकूलेतरविषयोपलंभसंभवे तदानीमशरीरमात्मानं न स्पृशत इत्यर्थः ॥ § 8392

हन्त ! तर्हि त्वदधीतमपि वेदवचनं आनन्दं ब्रह्म इति संसारदुःखपरिहारप्रकरणादेव तद्दुःखापायविषयं व्याख्यास्यते । न खलु व्याख्यानस्य भगवतः काचिदभूमिरस्ति । दृष्टाश्च दुःखोपरमे सुखशब्दप्रयोगाः ॥ § 8393

---

५ ] व— nyāma-wit_kha
७ ] यः— nyāma-wit_kha
१४ ] आ— nyāma-wit_kha
३ ] मा— nyāma-wit_kha

---

७ *] न—इत्यादि समाधानम् । इष्टप्राप्तिवदनिष्टनिवृत्तिरपि पुरुषार्थ एव ॥

चिरज्वरशिरोर्त्यादिव्याधिदुःखेन खेदिताः ।
सुखिनो वयमद्येति तदपाये प्रयुंजते ॥§ 8395
II.434/KSV

## मुक्तौ शरीरादीनामप्यङ्गीकारप्रसङ्गः

यदि च आनन्दम् इति वचनात् नित्यं सुखमात्मन इष्यते, तर्हि ब्रह्म इति वचनात् व्यापकत्वमिव, विज्ञानम्* इति वचनात् ज्ञानमपि नित्यमस्याभ्युपगन्तव्यम् । अतश्च सुखवत् ज्ञानस्यापि नित्यत्वात् संसारेऽपि नित्यसुखोपलब्धिः स्यात् । ततश्च धर्माधर्मफलाभ्यां सुखदुःखाभ्यामस्य नित्यस्य सुखस्य साहचर्यमनुभूयेत । अपि च— § 8396

सुखवत् ज्ञानवच्चास्य कामं देहेन्द्रियाद्यपि ।
नित्यं प्रकल्प्यतामित्थं मोक्षो रम्यतरो भवेत् ॥§ 8398

अथ कार्यं सुखज्ञानम्, हेतुस्तस्य विचिन्तनीयः—यत उत्पद्यत इति । धर्माच्चेत्, सोऽपि किंप्रभव इति वाच्यम् । योगसमाधिज इति चेत्, तस्य स्वकार्यत्वात् स्वकार्यसुखसंवेदनावसानत्वान्न शाश्वतिकत्वं स्यात् । अप्रक्षयश्च धर्मस्य निरनुमानकः । न हि योगसमाधिजो धर्मः न क्षीयत इत्यत्र च किंचिदनुमानमस्ति । विपर्यये तु प्रसिद्धमनुमानम्, सर्वस्य कृतकस्यानित्यत्वदर्शनादिति । क्षीणे च धर्मे तत्कार्यज्ञानाभावात् सदपि सुखमनुपलभ्यमानं असतो न विशिष्यते ॥ § 8399

## आत्मसुखस्य स्वप्रकाशत्वनिराकरणम्

स्वप्रकाशं तत् सुखमिति चेत्—न—संसारेऽपि तदुपलब्धिप्रसङ्गात् । शरीरादिसंबन्धः प्रतिबन्धहेतुरिति चेत्—न—शरीरादीनामुपभोगार्थत्वात् । भोगार्थाः शरीरादयस्ते भोगप्रतिबन्धं विदधतीति न साध्वी कल्पना ॥ § 8400

II.435/KSV

## सुखस्यावरणासंभवः

१४ ] तथा— nyāma-wit__ca
१६--१७ ] ति— nyāma-wit__kha
३ ] ग— nyāma-wit__kha

४ *] विज्ञानम्—इत्यर्शाद्यजन्तम् । आनन्दम् इतिपदसमभिव्याहारात् आनन्दपदस्य स्वतः पुंलिङ्गत्वेनार्शाद्यजन्तत्वावश्यकत्वात् ॥
१० कार्यं] सुखज्ञानम्—सुखानुभवः ॥

अविद्यावरणात् संसारे स्वप्रकाशसुखानुपलम्भ इति चेत्—न—प्रकाशस्य तुच्छेनावरितुमशक्यत्वात् । न च प्रकाशरूपं पारमार्थिकमात्मनः सुखं तद्विपरीततुच्छस्वभावेयमविद्या न परीतुमर्हति, मेघादिना दिनकरकिरणावरणावधारणात् ॥ § 8401

अविरलगवलमलीमसं बलाहकव्यूहपिहितरविबिम्बम् ।
तदपि न रजनीसदृशं दिनमिति सहसा मोहमहिमा ॥§ 8403

*मेघा अपि रवेरन्ये स्वरूपेण च वास्तवाः ।
तत्त्वान्यत्वादचिन्त्या तु नाविद्याऽवरणक्षमा ॥§ 8405

तस्मान्न नित्यानन्दत्वमात्मनः सुवचम् ॥ § 8406

## मोक्षस्य नित्यसुखरूपत्वे मुक्त्यसंभवः

अपि च मोक्षे नित्यानन्दस्वभावे तद्रागेण प्रयतमानो मुमुक्षुः न मोक्षमधिगच्छेत् । न हिरागिणां मोक्षोऽस्तीति मोक्षविदः ॥ § 8407

दुःखनिवृत्त्यात्मकेऽपि मोक्षे दुःखद्वेषात् प्रयतमानस्य समानो दोष इति चेत्—न—मुमुक्षोर्द्वेषाभावात् । रागद्वेषौ हि संसारकारणमिति च जानाति मुमुक्षुः, द्वेष्टि च दुःखमिति कथं संगच्छते ॥ § 8408

सुखेऽप्यस्य रागो नास्त्येवेति चेत्—न—स्वर्गनिर्विशेषेऽपवर्गे स्वर्गवद्रागस्य संभाव्यमानत्वात् । दुःखेन तु निर्विण्णस्य मुमुक्षोर्वैराग्यं जायते न दुःखविषयो द्वेषः । विरक्तस्य चास्य मोक्षं प्रति यत्नो भवति, न दुःखं द्विषत इति न समानो न्यायः ॥ § 8409

II.436/KSV

## केवलदुःखनिवृत्तेरपि पुरुषार्थत्वम्

यदुक्तं तादृशो मोक्षः प्रेक्षावतां प्रयत्नविषयो न भवतीति—तदपि न सांप्रतम्—प्रयोजनानुसारेण प्रमाणव्यवस्थानुपपत्तेः । न हि प्रयोजनानुवर्ति प्रमाणं भवितुमर्हति ॥ § 8410

यदि निरानन्दो मोक्षः प्रेक्षावतां न रुचिरः—कामं मा भूत्—न त्वप्रमाणकमानन्दं त्वत्र कल्पयितुं शक्नुमः ॥ § 8411

७--८ ] य— nyāma-wit_kha
२२ ] स— nyāma-wit_kha
१ ] ---Note : (?)

७ *] समाधानम्—मेघा इत्यादि ।
तत्त्वेत्यादि—मिथाभूता सदसदनिर्वचनीया
अविद्येति हि तन्मतम् ॥
१८ न्यायः ] दुःखकारणस्य रागस्य निवृत्त्या
दुःखनिवृत्तिः । सुखे रागे तु नैवं वक्तुं
शक्यम् ॥

## सुखरहितस्यापि मोक्षस्योपादेयत्वम्

न च सर्वात्मना साधूनामनभिमत एव तथाविधो मोक्षः । न चतदवाप्तये न प्रयतन्ते । ते ह्येवं विवेचयन्ति । दुःखसंस्पर्शशून्यशाश्वतिक सुखसंभोगासंभवात्, दुःखस्य चावश्यं हातव्यत्वात्, विवेकहानस्य चाशक्यत्वात्, विषमधुनी इवैकपात्रे पतिते उभे अपि सुखदुःखे त्यज्येतामिति । अतश्च संसारान्मोक्षः श्रेयान्, यत्रायमियानतिदुस्सहो दुःखप्रबन्धोऽवलुप्यते, वरमियती कादाचित्की सुखकणिका त्यक्ता, न तस्याः कृते दुःखभार इयानूढ इति । तस्मान्न सुखोपभोगात्मको मोक्ष इति ॥ § 8412

## जागति सुखमेव नास्तीति बौद्धपक्षः

अन्यस्त्वाह—तिष्ठतु तावन्मोक्षः ! संसारेऽपि न सुखं नाम किंचिदस्तीति सर्व एवायं दुखाभावमात्रे सुःखव्यवहारः । तथा हि— § 8413

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि
क्षुधार्तस्सन् शालीन् कबलयति मांस्पाकवलितान् ।
II.437/KSV प्रदीप्ते रागाग्नौ घननिबिडमाश्लिष्यति वधूं
प्रतीकारे व्याधेः सुखमिति विपर्यस्यति जनः ॥§ 8417

## संसारे सुखसद्भावसिद्धान्तः

उच्यते—तदिदमतिकृतकवैराग्यप्रकटनकौरुकुचीकौशलम्, आनन्दात्मनः प्रतिप्राणिसंवेद्यस्य सुखस्य निह्नोतुमशक्यत्वात् । अनिवृत्तेऽपि दुःखे क्वचित् सुखसंवेदनात् न दुःखाभावः सुखम् । निरभिलाषस्याप्यतर्कितोपनतसुखसाधनविषयसंपर्के सति सुखसंवेददर्शनात् ॥ § 8418

अभिलाषात्मकदुःखाभावः सुखमित्यपि न मनोज्ञम् । यस्तु दुःखाभावे क्वचित् सुखमित्यपि व्यपदेशः प्रशान्तरोगाणामिव पूर्वं दर्शितः, स भाक्त इति न तावता स्वसंवेदनसाक्षिकसुखापह्नवः कर्तुमुचितः । मोक्ष तु नित्यसुखमसंभवत्प्रमाणत्वात् नाभ्युपगम्यते ॥ § 8419

---

७ ] ---Note : (?)
१० ] ---Note : (?)
१६ ] सं— nyāma-wit__kha
१९ ] मतीव— nyāma-wit__kha
२० ] नि— nyāma-wit__kha
२ ] दुः— nyāma-wit__kha; nyāma-wit__gha
६ ] णं— nyāma-wit__kha

---

७ मोक्ष ] अन्यथा (?) स्यात् ॥
१५ त्वात् ] अन्यथा हि अनुकूलत्वप्रतिकूलत्वादिज्ञानानां भ्रमत्वप्रसङ्गः । सर्वं भ्रम एवेति वादस्तु असकृन्निरस्त एव ॥

## मोक्षस्य आत्मस्वरूपात्मकत्वम्

अपि च मोक्षे सुखमस्ति न वेति विचार एष न प्रामाणिकजनोचितः । स्वरूपेण व्यवस्थानमात्मनो मोक्ष इति मोक्षविदः । तत्र आत्मस्वरूपमेव कीदृशमिति चिन्त्यम्, न पृथङ्मोक्षस्वरूपम् । आत्मनश्च सुखदुःखबुध्यादयः आगन्तुका गुणाः, न महत्त्ववत् सांसिद्धिका इति निर्णीतमेतदात्मलक्षणे, सुखादिकार्येण चात्मनोऽनुमानादिति ॥ § 8420

## आत्मनः चैतन्यरूपत्वनिरासः

अत एव कापिलकथितचितिशक्तिस्वभावत्वमपि न युक्तमात्मनः ॥ § 8421
II.438/KSV

स चेतनश्चिता योगात् तद्योगेन विना जडः ।
*चितिर्नामार्थविज्ञानं कादाचित्कं तु तस्य तत् ॥§ 8423

नार्थसंवेनादन्यत् चैतन्यं नाम विद्यते ।
तच्च सामग्र्यधीनत्वात् कथं मोक्षे भविष्यति ॥§ 8425

जाग्रतः स्वप्नवृत्तेर्वा सुषुप्तस्यापि वाऽऽत्मनः ।
ज्ञानमुत्पद्यतेऽन्या तु चतुर्थी नास्ति तादृशी ॥§ 8427

जाग्रद्दशायां स्वप्ने च बुद्धेः प्रत्यात्मवेद्यता ।
सुखं सुप्तोऽहमद्येति पश्चात्प्रत्यवमर्शनात् ॥§ 8429

तदा त्ववेद्यमानाऽपि सुषुप्ते धीः प्रकल्प्यते ।
तुर्यावस्था तु संवित्तिशून्यस्य स्थितिरात्मनः ॥§ 8431

तुर्यावस्थातिगं रूपं यदाहुः केचिदात्मनः ।
प्रमाणागोचरत्वेन कल्पनामात्रमेव तत् ॥§ 8433

संवित्प्रसवसामर्थ्यं सामग्रीसन्निधानतः ।
यदि नामात्मनोऽस्त्यस्य तावता न चिदात्मता ॥§ 8435

१२ ] क— nyāma-wit_kha
१३ ] तदभावादचेतनः— nyāma-wit_kha
१ ] चेत्य— nyāma-wit_kha

८ *] न हि चेतन—चैतन्यशब्दौ पर्ययरूपौ ॥
१४ नात्] सुखमहमस्वाप्सम् इति प्रत्यवमर्शः । तदा ज्ञानाभाववचनं तु विषयानवभासादित्याशयः ॥

## ज्ञानोत्पत्त्यर्हत्वरूपचैतन्यरूपत्वेऽविरोधः

यदि तु दर्शनशक्तियोग्यतामात्रमेव पुंसश्चैतन्यमुच्यते—तर्हि तथाविधस्य तस्य कैवल्यस्यास्माकीनमोक्षसदृशत्वमेव । सत्संवित्प्रसवयोग्य तामात्र- II.439/KSV संभवेऽपि दृश्येन्द्रियसंप्रयोगादिसामग्रीवैकल्यात् कैवल्यावस्थाया मात्मनो द्रष्टृत्वासंभवात् । दर्शनशून्यस्य चान्यस्य चैतन्यस्य निरस्तत्वादिति ॥ § 8436

## बौद्धसंमतमोक्षविमर्शः

निर्वाणादिपदाख्येयमपवर्गं तु सौगताः ।
*सन्तत्युच्छेदमिच्छन्ति, स्वच्छां वा ज्ञानसन्ततिम् ॥§ 8438

मतद्वितयमप्येतत् प्रत्युक्तं पूर्वमेव यत् ।
ध्वस्तश्च ज्ञानसन्तानः नित्यश्चात्मा समर्थितः ॥§ 8440

सन्तत्युच्छेदपक्षस्तु नैयायिकमतादपि ।
शोच्यो यत्राश्मकल्पोऽपि न कश्चिदवशिष्यते ॥§ 8442

## जैनसंमतमोक्षविमर्शः

अर्हत्पक्षेऽपि यद्रूपं अन्यसापेक्षमात्मनः ।
न केवलस्य ताद्रूप्यम् इत्यस्मन्मततुल्यता ॥§ 8444

विकारित्वं तु जीवानां अत्यन्तमसमंजसम् ।
शब्दपुद्गलवच्चैतत्प्रत्याख्येयमसंभवात् ॥§ 8446

तस्मान्न वेदान्तविदो वदन्ति
मोक्षं न साङ्ख्या न च सौगताद्याः ।
इत्यक्षपादाभिहितोऽपवर्गः
श्रेयांस्तदत्यन्तविमोक्ष एव ॥§ 8450

II.440/KSV

८ ] यो— nyāma-wit__kha
९ ] व— nyāma-wit__kha
१८ ] तद्रूपं— nyāma-wit__kha

६ *] आद्यः माध्यमिकानाम् । अन्यस्तु इतरेषां त्रयाणाम् ॥
११ नः] शरीरानुगुणपरिमाणवानात्मेति हि तन्मतम् ॥
१२ ता] सिद्धान्तेऽपि घटाकाशवत् शरीरौपाधिकः परिमाणोऽविरुद्धः ॥
१६ न] सम्यगिति शेषः ॥

## मोक्षोपायविचारः

आह—भवत्वयमीदृगपवर्गः । स तु कथमधिगम्यत इत्युच्यताम् । उक्त-मेव भगवता सूत्रकारेण— § 8451

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्त-रापायादपवर्गः ॥ १-१-२ ॥ § 8452

दुःखोच्छेदस्तावदपवर्ग इति कथितम् । कार्यत्वाच्च दुःखस्य कार-णोच्छेदात्तदुच्छेदः । कारणं चास्य जन्म । जन्मनि सति हि दुःखं भवति । जायते इति हि जन्म देहेन्द्रियादिसंबन्धः आत्मनः । तदपि जन्मकार-णोच्छेदादेवोच्छेद्यम् । अतस्तत्कारणं प्रवृत्तिरुच्छेद्या । तस्या अपि हेतू-च्छेदात् उच्छेद इति तद्धेतयो दोषाः उच्छेद्याः । तेषां तु निमित्तं मिथ्याज्ञानम् । तस्मिन्नुच्छिन्ने दोषा उच्छिन्ना भवन्तीति मिथ्या ज्ञानमुच्छेद्यम् । तदुच्छेदे च तत्त्वज्ञानमुपायः । प्रसिद्धो ह्ययमर्थः समर्थितश्च पूर्वं विस्तरतः तत्त्वज्ञानं मिथ्याज्ञानस्य बाधकमिति । तस्मा तत्त्वज्ञानान्मिथ्याज्ञानदोषप्रवृत्तिजन्मदुःख-निवृत्तिक्रमेणापवर्ग इति ॥ § 8453

## तत्त्वज्ञानस्य मिथ्याज्ञाननिवर्तकत्वम्

यद्यपि मिथ्याज्ञानमपि जन्मकार्यम्, अशरीरस्यात्मनो मिथ्याज्ञानानुप-पत्तेः । इतरेतरकार्यकारणभावेन बीजाङ्कुरवदनादिप्रबन्धप्रवृत्तेन प्रवर्तमाना मिथ्याज्ञानादयो भावाः संसार इत्याख्यायते—तथापि—तत्कारणोच्छेद-चिन्तायां कुतः प्रभृत्युच्छेद उपक्रम्यतामिति विचार्यमाणे विशेषनियमाभावात् यतः कुतश्चिदिति प्राप्ते, मिथ्याज्ञानस्य प्रतिकूलमुच्छेद कारणं तत्त्वज्ञान- II.441/KSV
मुपलब्धमिति विशेषे प्रमाणाभवात् तदुच्छद एवोपक्रम्यते ॥ § 8454

अत एव मिथ्याज्ञानमूलः संसार उच्यते । तस्मिन् उच्छिन्ने तदुच्छेद-संभवात्, न ततः प्रभृति संसारः प्रवर्तत इति निपुणमतिभिरपि निर्धारयितुं शक्यम्, अनादित्वात्तस्येति ॥ § 8455

तदेवं तत्त्वज्ञानान्मिथ्याज्ञानापाये तत्कार्यदोषापायः, दोषापाये प्रवृत्त्य-पायः, प्रवृत्त्यपाये जन्मापायः, जन्मापाये दुःखापायः—स एवापवर्ग इति । तदिदमुक्तं उत्तरोत्तरापाये तदनन्तरापायात् इति ॥ § 8456

## मोक्षस्य दुरधिगमत्वशंका

१५ ] दि— nyāma-wit_kha
१८ ] न्मि— nyāma-wit_kha
३ ] वृत्त— nyāma-wit_kha
७ ] भाव— nyāma-wit_kha

१४ म् ] अयं प्रायोवादः, तत्त्वज्ञानस्यापि शरीराधीनत्वात् ॥

आह—विदितोऽयं सूत्रार्थः; किन्त्वघटमानमनोरथविडम्बनामात्रमिदम् अलीकश्रद्दधानताप्रकटनं वा । दुरधिगमस्तु संकटो मोक्षमार्गः ॥ § 8457

साध्यस्त्रिवर्ग एवैषः धर्मकर्मार्थलक्षणः ।
चतुर्थः पुरुषार्थस्तु कथास्वेव विराजते ॥§ 8459

यदा प्रियवियोगादि भवत्युद्वेगकारणम् ।
तदा मोक्षकथाः कामं क्रियन्तां शोकशान्तये ॥§ 8461

न त्वद्यसमये तदधिगमसमर्थामुपलभामहे सरणिम्, ऋणक्लेशप्रवृत्त्यनुबन्धस्य दुस्तरत्वात् ॥ § 8462

### ऋणत्रयस्य दुस्तरत्वम्

ऋणानुबन्धस्तावत्—जायमानो ह वै ब्राह्मणः त्रिभिर्ऋणैर्ऋणवा (?) ।
II.442/KSV ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्यः इतीदं हि वेदे पठ्यते । तत्र प्रथमं ऋषीणामनृणः स्याम् इति ब्रह्मचर्यमाचरति । ततः पितृणामनृणः स्याम् इति कृतदारसङ्ग्रहः प्रजोत्पादनाय व्यवहरति । तदनु गृहस्थ एव दर्शपूर्णमासादिषु सहस्रसंवत्सरपर्यन्तेषु कर्मस्वधिकृतः क्रतूननुतिष्ठतीति देवानामनृणः स्याम् इति । कोऽस्य मोक्षव्यवसायावसरः ? § 8463

### मोक्षस्य श्रुतिविरुद्धत्वम्

ननु च ! § 8464

ऋणाणि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्—§ 8465

इति मन्वादिस्मरणात् अस्त्येव तदवसरः—न—श्रुतिवाक्यविरोधात् । एवं हि श्रूयते *जरामर्यं वा एतत्सत्रं यदग्निहोत्रं दर्शपूर्णमासौ च जरया ह वा एष एतस्मान्मुच्यते मृत्युना वा इति । न च कर्मप्रयोगाशक्त्या कर्मभ्यो विरन्तुं शक्यते; स्वयमशक्तस्य बाह्यशक्त्युपदेशात् । अन्तेवासी वा जुहुयात्, *ब्रह्मणा हि स परिक्रीतः । क्रीतो वा जुहुयात् धनेन हि स परिक्रीतः । अशक्तस्य च मोक्षोपायानुष्ठानेऽप्यस्य कथं शक्तिः ? § 8466

४ ] लभ्य— nyāma-wit_kha
५ ] क्षीरहोता— nyāma-wit_kha
५ ] घृतेन— nyāma-wit_kha

७ ये ] अभाववैराग्यवतामुपदिश्यताम्, न तूत्साहवतामित्यर्थः ॥
१६ * ] जरामर्यम्—जरामरणावधिकम् ॥
१९ * ] ब्रह्म—वेदः ॥

## रागादीनां अवर्जनीयत्वम्

क्लेशानुबन्धादप्यपवर्गाभावः— § 8467

ये हि रागादयो दोषाः आत्मनश्चिरसंभृताः ।
कस्तान् शमयितुं शक्तः पुनरावृत्तिधर्मकान् ॥§ 8469

II.443/KSV

कामं चिरं विजित्यापि क्रोधं वा लोभमेव वा ।
पुनर्गच्छन् वशे तेषां लोकः प्रायेण दृश्यते ॥§ 8471

तथाहि—चिरमपि तपसि नियमितमतिरपि अविजितविषमशरविकृतिः तनुपवनापनीतवसनकामिनीस्तनजघनदर्शनादेव वशं विश्वामित्रः कुसुमधन्वनो गत इति श्रूयते ॥ § 8472

## रागविवृद्धिहेतव एवाधिकाः

अलमाख्यायिकया । अद्यत्वेऽप्येवं शतशो दृश्यत इति दुरुच्छेदा दोषाः । वीतरागजन्मादर्शनात् इति च विचारितमात्मपरीक्षायाम् । अवियुक्त एव दोषैर्जन्तुर्जायत इति दोषविवृद्धिहेतवश्च रूपादयो विषयाः । ते कथमिव स्वकर्मण्युदासते ॥ § 8473

ताम्बूलं कुसुमसुगन्धयस्समीराः
सौधेषु प्रतिफलिताः शशाङ्कभासः ।
वाचश्च प्रणयनवामृतद्रवार्द्राः
दूतीनां दधति न कस्य रागवृद्धिम् ॥§ 8477

अपि च— § 8478

मुग्धस्मितसुधाधौतमधुरालापशालिना ।
मुखेन पक्ष्मलाक्षीनां कस्य नाक्षिप्यते मनः ॥§ 8480

इत्येवं निदानानुपशमादपि स्थित एव क्लेशानुबन्धः ॥ § 8481

## प्रवृत्तेरपि दुस्त्यजत्वम्

---

११ ] शं— nyāma-wit_kha
१२ ] म— nyāma-wit_ca

---

२० इत्येवं ] निदानम्—विषयवासनाः ॥

प्रवृत्त्यनुबन्धः खल्वपि— § 8482
II.444/KSV

रागादिप्रेर्यमाणो हि कर्माण्यारभते नरः ।
दीर्घदीर्घाः प्रतायन्ते यैर्धर्माधर्मवासनाः ॥§ 8484

यः प्रवृत्त्यनुबन्धश्च हेतुरन्यस्य जन्मनः ।
तेन जन्मान्तरेणान्या जन्यते कर्मवासना ॥§ 8486

*एकमेवेदृशं कर्म कर्तुमापतति क्वचित् ।
जन्मायुतशतेनापि यत्फलं भुज्यते न वा ॥§ 8488

क्लेशकर्मानुबन्धोत्था जन्मदुःखादिशृङ्खला ।
पुनरावर्तमानैषा केनोपायेन भज्यताम् ?§ 8490

*विना फलोपभोगेन न विनाशोऽस्ति कर्मणाम् ।
तेषां ज्ञानाग्निना दाह इति श्रद्धाविजृम्भितम् ॥§ 8492

कार्यकारणभावो हि शास्त्रादेवावधारितः ।
कर्मणां च फलानां च स कथं वा निवर्तताम् ॥§ 8494

न च प्यज्ञानसापेक्षं कर्मेष्टं बन्धकारणम् ।
येनात्मज्ञानयुक्तानां तदुदासीत तान् प्रति ॥§ 8496

अज्ञाननैरपेक्ष्येण कर्मणां स्वभाव एवैषः, यत् फलाविनाभावित्वमिति ॥
§ 8497

तस्मादित्थमृणक्लेशप्रवृत्त्याद्यनुबन्धतः ।
न मोक्षसिद्धिरस्तीति तदर्थो विफलः श्रमः ॥§ 8499
II.445/KSV

अशक्येऽर्थे वृथा यत्न इति मत्वा मनीषिभिः ।
मोक्षचर्चाः परित्यज्य स्वे गृहे सुखमास्यताम् ॥§ 8501

---

१४--१५ ] ए— nyāma-wit_kha
१८ ] भु— nyāma-wit_kha
२ ] न्य— nyāma-wit_kha
८ ] ---Note: (?)

---

६ *] एकमेव कर्मानेकजन्मारंभकमपि भवति ॥

१० *] नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि इति हि वचनम् ॥

## मोक्षस्य दुरधिगमत्वशङ्कानिरासः

अत्राभिधीयते—यत्तावदुक्तं ऋणानुबन्धात् इति—तदयुक्तम्— विधिपदाश्रवणात् औपचारिकम् ऋणशब्दं जायमानशब्दं च प्रयुज्य कर्मस्तुतिरियं क्रियते जायमानो ह वै ब्राह्मणः इति । न तद्व्यतिरिक्त पुरुषार्थविषयप्रयत्नप्रतिषेधो विधीयते ॥ § 8502

तथा हि—ऋणशब्दोऽयं विषयान्तरे मुख्यार्थः प्रसिद्धः, यत्रोत्तमर्णः सलाभममुतः प्रतिग्रहीष्यामि इति धनमधमर्णाय प्रयच्छति । अधमर्णोऽपि सलाभमस्मै प्रदास्यामि इति मत्वा गृह्णाति । सोऽयं ऋणशब्दस्य मुख्यो विषयः इह नास्त्येव ॥ § 8503

जायमानोऽपि मुख्यः उत्पद्यमानो हि मातुः कुक्षिकुहारान्निस्सरन्नभिधीयते । न चासौ तपस्वी बालः कर्मभिरभिसंबध्यते । तस्मात् ब्रह्मचर्यम्, अपत्योत्पादनम्, अध्वरप्रयोग इति त्रितयमिदम्, ऋणवदवश्यकर्तव्यमिति कर्मस्तुतिरियमौपचारिकपदप्रयोगाद्गम्यते । न चैतावता मोक्षव्यवसायावसरविरह इति परिशङ्कनीयम्, आश्रमान्तरस्य तदौपयिकस्य दर्शनात् ॥ § 8504

## कर्मणां विरतिः आवश्यकी

ननु ! मरणावधि दर्शपूर्णमासादिधर्मोपदेशात् कथमाश्रमान्तरग्रहणम्—न—जरामर्यवादस्थाप्यपरित्यागप्रतिपादनाय कर्मप्रशंसार्थत्वात् । ये II.446/KSV
चत्वारः पथयो देवयानाः इत्यादयो हि चतुर्थाश्रमशंसिनः भूयांसः सन्ति मन्त्रार्थवादाः । मन्वादिस्मृतिवचनानि चतुर्थाश्रमोपदेशीनि चतुर्थाश्रमोचितशौचाचारादीतिकर्तव्यतावितानविधानपराणि च प्रबन्धेनैव दृश्यन्ते— § 8505

एवं गृहाश्रमे स्थित्वा विधिवत् स्नातको द्विजः ।
वने वसेत्सुनियतः भैक्षभुग्विजितेन्द्रियः ॥§ 8507

इत्युपक्रम्य चतुर्थाश्रमोचितमोक्षोपायानुष्ठानोपदेशाय षष्ठोऽध्यायः समस्त एव मनुनाऽनुक्रान्तः ॥ § 8508

## सन्यासाश्रमः स्पष्टश्रुतिसिद्धः

१९ ] ---Note : (?)
२१ ] ---Note : (?)
५ ] वि— nyāma-wit_ca
६ ] तु— nyāma-wit_kha

७ मुख्यो ] जन्मान्तरी(?) ऋणविषयत्वे लोकव्यवहार याकुली दृढा ॥

जाबालश्रुतौ च विधायकेनैव ब्राह्मणवाक्येन प्रतिपदमाश्रमचतुष्टय मुपदिष्टम् ब्रह्मचारी भूत्वा गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत् इति ॥ § 8509

अग्निसमारोपणविधानोपदेशश्च प्रत्यक्षश्रुतः कथमपह्नूयते । § 8510

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् इति
॥§ 8511

अपि च उपनिषदामध्ययनं असति मोक्षोपायप्रयोगसमर्थे चतुर्थाश्रमे निरर्थकमेव प्राप्नोति । क्रियाकाण्डानुष्ठाननिष्ठत्वे हि वेदस्य ज्ञानकाण्डोपदेशः किंप्रयोजनः स्यात् ॥ § 8512

### चतुर्थाश्रमकालः

तदेवं वर्णवत् आश्रमाणामपि चतुर्णां प्रत्यक्षोपदेशसिद्धत्वाच्चतुर्थाश्रमिणां
II.447/KSV च मोक्षाधिगमोपायतत्त्वज्ञानभावनाभ्यासावसरसंभवात् सोऽयं जरामर्यवादः प्रशंसामात्रपर एवावतिष्ठते । जरया ह वा एष एतस्मान्मुच्यते मृत्युना वा इति च वचनात् जरसा कर्मत्यागानुज्ञानात् स एव चतुर्थाश्रमावसर इति गम्यते । तदुक्तम्— § 8513

गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत् ॥§ 8515

म. स्मृ. ६. २ इति ॥ § 8516

इतरथा हि मृत्युनैव च तस्मान्मृच्यते इत्यवक्ष्यत, च त्वेवमब्रवीत् । तस्मात् वार्धकदशोचितं चतुर्थमाश्रममनुमन्यन्ते ॥ § 8517

### विरक्तस्य सर्वस्य सन्यासाधिकारः

११ ] प— nyāma-wit__kha

१ वाक्येन ] प्रतिपदम्—स्वपदेनैवेति यावत्
॥

तिष्ठतु वा वार्धकदशा । यूनोऽपि परिपक्वकाष यस्याश्रमचतुष्टय क्रममनपेक्ष्यैव मोक्षाधिकार आख्यातः । यथोक्तं ब्रह्मचर्यादेव प्रव्रजेत् इति । अत एव द्विविधो ब्रह्मचारि भवति—उपकुर्वाणः नैष्ठिकश्च । तत्र उपकुर्वाणकः यो ब्रह्मचर्यमनुभूय गृहस्थाश्रममनुभवति । स चापरि पक्वकषायः, अनुषशान्तरागः । तमेव प्रतीदमुच्यते— § 8518

अनधीत्य द्विजो वेदान् अनुत्पाद्य च सन्ततिम् ।
अनिष्टवा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः § 8520

म. स्मृ. ६. ३७ इति ॥ § 8521

यस्तु परिपक्वकषायः स नैष्ठिक एव ब्रह्मचारी भवति, न गृहस्था(?)मं प्रतिपद्यते । गृहस्थोऽपि परिपक्वकषायः वानप्रस्थाश्रममुल्लङ्घ्य यतित्वेऽधिक्रियते । यथोक्तम्—गृहाद्वा वनाद्वा प्रव्रजेत् इति ॥ § 8522

II.448/KSV

## गृहस्थस्यापि मोक्षः

केचित्तु—कर्मफलाभिसन्धिरहितस्य, कर्तव्यमिति कर्म कुर्वतः क्षीणरागस्यात्मविदः गृहस्थस्यापि मोक्षमाचक्षते । यथाऽऽह याज्ञवल्क्यः— § 8523

न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।
श्राद्धकृद्वेदविद्यावित् गृहस्थोऽपि विमुच्यते § 8525

इति । तस्मादृणानुबन्धादपवर्गाभाव इत्ययुक्तम् ॥ § 8526

## क्लेशानां परिहारोपायः

---

१३ ] गार्हस्थ्यरा— nyāma-wit_kha

२--३ ] यो— nyāma-wit_kha

---

६ न् ] पतत्यधः इति प्रसिद्धः पाठः ॥

११ स्यापि ] भवेत्सरागस्य तपोवनं गृहं निवृत्तरागस्य गृहं तपोवनम् इति हि प्रसिद्धम् ॥

यत्तु क्लेशानुबन्धादिति—तदप्यनध्यवसायमात्रम् । *प्रतिपक्षभावनादिना क्लेशोपशमस्य सुशकत्वात् । यदि हि दोषा नित्या भवेयुः, अनित्यत्वेऽप्याकस्मिका वा, सहेतुत्वेऽपि यद्देषां नित्यो हेतुर्भवेत् । कार्यो ऽपि वा यद्यसौ न ज्ञायेत, ज्ञातस्य वाऽस्य शमनोपायो न ज्ञायेत, ज्ञातोऽपि वाऽनुष्ठातुमसौ न शक्येत, तदा क एवैनमुच्छिन्द्यात् । किन्तु— § 8527

नाकस्मिका न नित्यास्ते न नित्याज्ञातहेतुकाः ।
नाज्ञातशमनोपायाः न चाशक्यप्रतिक्रियाः ॥§ 8529

न हि दोषाणां आत्मस्वरूपवन्नित्यत्वं, उपजननापायधर्मकत्वेन ग्रहणात् मिथ्याज्ञानं च प्रसवकारणमेषामवधृतमिति नाकस्मिकत्वम्, अविनाशिहेतुकत्वम्, अज्ञातहेतुकत्वं वा ॥ § 8530

II.449/KSV

## प्रतिपक्षभावनया क्लेशक्षयः

मिथ्याज्ञानस्य च सन्यग्ज्ञानम् प्रतिपक्षभावनाभ्यासेन च समूलमुन्मीलयितुं शक्यन्ते दोषाः इति नाज्ञातप्रतीकारत्वं तेषाम् । उक्तं च केन चित् प्र-वा-३-२२०— § 8531

*सर्वेषां सविपक्षत्वात् निर्ह्रासातिशयाश्रितात् ।
सात्मीभावात्तदभ्यासात् हीयेरन्नास्रवाः क्वचित् ॥§ 8533

इति । विषयदोषदर्शनेन हि तेषु सक्तिलक्षणो रागः शाम्यति । यदा ह्येष चिन्तयति विवेकी— § 8534

असौ तरलताराक्षी पीनोन्नतघनस्तनी ।
विलुप्यमाना कान्तारे विहगैरद्य दृश्यते ॥§ 8536

विभाति बहिरेवास्याः पद्मगन्धनिभं वपुः ।
अन्तर्मज्ज्ञास्थिविण्मूत्रभेदःक्रिमिकुलाकुलम् ॥§ 8538

---

६--७ ] य— nyāma-wit__kha
८ ] ज्ञा— nyāma-wit__kha
१ ] ल— nyāma-wit__ca
१ ] ताः— nyāma-wit__kha
२ ] मुना— nyāma-wit__kha
४ ] वं— nyāma-wit__kha

---

१ *] प्रतिपक्षभावनाः—अविद्यादिविरोधिनः ज्ञानाभ्यासादयः प्रतिपक्षभावनाः, अहिंसाप्रतिष्ठायां वैरत्यागः इत्यादियोगशास्त्रोक्ताः ॥

१४ *] द्वन्द्वरूपत्वात् जगति सर्वस्य, तत्तद्विरोधिगुणानामभ्यासात् आस्रवाः—दोषाः हीयेरन् । सात्मीभावः—आत्मना समरसभावः ॥

अस्थीनि पित्तमुच्चाराः क्लिन्नान्यान्त्राणि शोणितम् ।
इति चर्मपिनद्धं तत् कामिनीत्यभिधीयते ॥§ 8540

मेदोग्रन्थी स्तनौ नाम तौ स्वर्णकलशौ कथम् ।
विष्ठादृतौ नितम्बे च कोऽयं हेमशिलाभ्रमः ॥§ 8542

मूत्रासृग्द्वारमशुचि च्छिद्रं क्लेदि जुगुप्सितम् ।
तदेव हि रतिस्थानं अहो पुंसां विडम्बना ॥§ 8544

प्रीतिर्यथा निजास्योत्थं लिहतः शोणितं शुनः ।
शुष्केऽस्थिनि तथा पुंसः स्वधातुस्यन्दिनः स्त्रियाम् ॥§ 8546
II.450/KSV

व्यात्तानना विवृत्ताक्षी विवर्णा श्वासघुर्घरा ।
कथमद्य न रागाय म्रियमाणा तपस्विनी ॥§ 8548

अहो बत वराकोऽयं अकाले तृषितः फणी ।
प्रसारितमुखोऽस्माकं शोणितं पातुमागतः ॥§ 8550

*किमनेनापराद्धं नः स्वभावो वस्तुनः स्वयम् ।
स्पृश्यमानो दहत्यग्निः इति कस्मै प्रकुप्यति ॥§ 8552

नानुकूलः प्रिये हेतुः प्रतिकूलो न विप्रिये ।
स्वकर्मफलमश्नामि कः सुहृत्कश्च मे रिपुः ॥§ 8554

एवमहनिशं चिन्तयतो नितान्तं शान्तस्य मनसः समचित्तता सर्वत्र समुद्भवतीति विलीयन्ते दोषग्रन्थयः ॥ § 8555

अत एवोपदिश्यन्ते मोक्षशास्त्रेष्वनेकशः ।
तस्य तस्योपघाताय तास्ताः प्रत्यूहभावनाः ॥§ 8557

## प्रतिपक्षभावनया दोषक्षयः

११ ] व्रणे— nyāma-wit__kha
२० ] प्यास्ते— nyāma-wit__kha
४ ] र्दिवं— nyāma-wit__kha
४ ] मनः— nyāma-wit__kha

१३ *] विरोधिदर्शनेऽपि द्वेषाभावाभ्यासायोच्यते—किमित्यादि ॥

ननु च प्रतिपक्षभावनेऽपि न सर्वात्मना दोषपक्षः क्षयमुपयाति । निम्बाभ्युपयोग इव क्रियमाणे कफधातुरिति—नैतदेवम्—तत्र निम्बोपयोगवत् तदनुकूलस्यान्नपानादेरुपयोगदर्शनात् । अपि च— § 8558

*धर्मिलोपभयात्तत्र नेष्टः सर्वात्मना क्षयः ।
कफाधिक्यं तु हन्तव्यं धातुसाम्यस्य सिद्धये ॥§ 8560

II.451/KSV

इह सर्वात्मनोच्छेद्याः क्लेशाः संसारकारिणः ।
छेदश्चैकान्ततस्तेषां प्रतिपक्षोपसेवया ॥§ 8562

न च प्रतिपक्षभावनाभ्यासमेकं अस्त्रमपास्य तदुपशमे निमित्तान्तरं किमपि क्रमते ॥ § 8563

## भोगानां नोपभेगेन क्षयः

न हि विषयाभिलाषस्तदुपभोगेन विरंस्यति । यथाऽऽह— § 8564

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥
म-भा-आ-८५-१२§ 8566

अन्यत्राप्युक्तम्—भोगाभ्यासमनु विवर्धन्ते रागाः, कौशलानि चेन्द्रियाणाम् इति ॥ § 8567

पाराशर्योऽप्याह— § 8568

तृष्णाखनिरगाधेयं दुष्पूरा केन पूर्यते ।
या महद्भिरपि क्षिप्तैः पूरणेनैव खन्यते इति ॥§ 8570

तस्मात् प्रतिपक्षभावनैव भगवती भीमकान्तिः अन्तःकरणकान्तारे निरन्तरमभिज्वलन्ती दावदहनदीधितिरिव दहति दोषविटपकानिति । तदेवं दोषानुबन्धविध्वंसोपायसंभवान्न तत्कृतो मोक्षमार्गनिरोधोऽभिधातव्यः ॥ § 8571

८ ] मूल— nyāma-wit__ca
१० ] तपा— nyāma-wit__kha
१ ] ते— nyāma-wit__kha

४ *] धर्मी—शरीरम् ॥

## क्लेशाद्यनुबन्धनिवृत्तिमात्रं साध्यम्

अत एव केचन चेतनस्य प्रकृत्या निर्मलत्वात् मलानामागन्तुकत्वात्, मलनिबर्हणहेतोश्च यथोक्तस्य संभवात्, तदाचरणात्तदपाये सति स्वतस्सकलपदार्थदर्शनसामर्थ्यस्वभावचित्तत्वावस्थानात् सर्वज्ञसिद्धिमदूरवर्तिनीमेव मन्यन्ते ॥ § 8572

II.452/KSV

## सुषुप्त्यादौ शुद्धस्यात्मनो लेशतो भानम्

यदप्युक्तं क्लेशशून्यत्वमात्मनो न कदाचिदपि दृष्टम्, अनुबन्धवृत्तित्वात् क्लेशानामिति—तदप्यसत्यम्—सुषुप्तावस्थायामस्पृष्टस्य दोषैरात्मनः प्रत्यहमुपलम्भात् । जाग्रतोऽपि का चन तादृशी दृशा दृश्यत एव, यस्याम-सावात्मस्वरूप एवात्मा निर्मलोऽवतिष्ठते । यथोक्तं अहरहर्ब्रह्मलोकं यान्ति इति । तदलमनेन दोषानुबन्धकथानुबन्धेन ॥ § 8573

## प्रवृत्तीनां विरतिसंभवः

यदपि प्रवृत्त्यनुबन्धादिति प्रत्यपादि—तदपि सूत्रकृता समाहितम् —न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य न्या-सू-४-१-६४ इति । दोषेषु बन्धहेतुषु विगलितेषु प्रवृत्तिरपि न देहेन्द्रियादिजन्मने प्रभवतीति ॥ § 8574

## कर्मक्षयप्रकारवर्णनम्

ननु दोषक्षयान्मा भूत् उत्तरः कर्मसङ्ग्रहः ।
कथं फलमदत्वा तु प्राक्तनं कर्म शाम्यति ॥§ 8576

अत्र केचिदाहुः—ददत्येव कर्माणि, नादत्वा शाम्यन्ति; तथापि बन्धहेतवो न भवन्ति । यतः शमसन्तोषादिजनितं योगिनः सुखमुत्पाद्य धर्मो विनङ्क्ष्यति, अधर्मश्च शीतातपक्लेशादिद्वारकं दुःखं दत्वेति ॥ § 8577

II.453/KSV

## कर्मणां फलनैयत्येऽपि न हानिरिति पक्षः

९ ] वरणा— nyāma-wit__kha
१ ] ति— nyāma-wit__kha
६ ] द— nyāma-wit__kha

९ इति ] तर्हि किमर्थो मोक्षार्थप्रयत्नः इति चेत्—जाग्रतः पूर्ववत् क्लेशानुवृत्तेरवर्जनीयत्वात् । तदानीमपि पूर्णस्य स्वरूपस्य भानाभावात् ॥

ननु ! अमुष्मात्कर्मणः इदं फलं भवतीति कर्मफलानां कार्यकारण भावनियमात्, कथमियता कर्मफलोपभोगो भवेदित्यन्यथा तदुपभोगमपरे वर्णयन्ति । योगी हि योगर्धिसिद्धा विहितनिखिलनिजधर्माधर्मकर्मा निर्माय तदुपभोगयोग्यानि तेषु तेषूपपत्तिस्थानेषु तानि तानि सेन्द्रियाणि शरीराणि, रण्डान्तःकरणानि च मुक्तेरात्मभिरुपेक्षितानि गृहीत्वा सकृदेव सकलकर्मफलमनुभवति प्राप्तैश्वर्य इतीत्थमुपभोगेन कर्मणां क्षयः ॥ § 8578

## तत्त्वज्ञानेन कर्मणां नाशपक्षः

अन्ये त्वाचक्षते—किमनेन भोगायासेन, अदत्तफलान्येव कर्माणि योगिनो नङ्क्ष्यन्ति । तत्त्वज्ञानस्यैव भगवत इयान् प्रभावः, यदस्मिन्नुत्पन्ने चिरसंचितान्यपि कर्माणि सहसैव प्रलयमुपयान्ति । भोगादपि तेषां प्रक्षयः शास्त्रप्रामाण्यादेवावगतः । तथा तत्प्रामाण्यादेव तत्त्वज्ञाना दपि तत्प्रक्षयं प्रतिपत्स्यामहे । तथा चाह— § 8579

यथैधांसि समिद्धोऽग्निः भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा§ 8581

गी. ४-३७ इति ॥ § 8582

न चेदं श्रद्धामात्रम्, वेदविदामग्रण्या व्यासमुनिनैव समभिधानात्, अवेदार्थं हि नासावभिदधीतेति ॥ § 8583

II.454/KSV

## कर्मणां फलजननशक्तिनाशपक्षः

तमन्ये न मन्यन्ते । न सर्वात्मना कर्मणां दाहः । किन्तु स्वरूपेण सतामपि सहकारिवैकल्यात् स्वकार्यकरणोदासीनता तेषां भवति, भ्रष्टानामिव बीजानामङ्कुरकरणकौशलहानिः । यतः सामग्री कार्यस्य जनिका, न केवलं कारकम् । अतो न कर्माण्येवकेवलानि फलोपभोगयोग्यशरीरेन्द्रियादिजन्मनिमित्ततामुपयान्ति । किन्तु मिथ्याज्ञानेन दोषैश्च सहितानि । तदुक्तं

११ ] ग— nyāma-wit_ca
१३ ] स— nyāma-wit_kha
७ ] न कर्माण्येव—

nyāma-wit_ca

१ तीति ] न तु शीतातपादिरूपम् ॥
४ रीराणि ] परकायप्रवेशादिना ।

रण्डेत्यादि—तत्स्वाभिनोऽभावात् ॥
६ र्य ] सौभर्यादिः दृष्टान्तः ॥

अविद्यातृष्णे धर्माधर्मौ च जन्मकारणम् इति ॥ § 8584

तत्त्वविदश्च तत्त्ववित्त्वादेव नाविद्या मिथ्याज्ञानात्मिका भवति । दोषाणां तु प्रथमे दर्शित एव क्रमः । तदभावे भवन्तावपि धर्माधर्मौ न बन्धाय कल्पेते । न हि स्वकार्यमङ्कुरादि कुसूलवर्तीनि बीजानि जनयितुमुत्सहन्ते ॥ § 8585

भ्रष्टबीजानामपि स्वरूपशक्तिरपि तानवं गता । तद्वत् कर्मणां स्वरूपशक्तिशैथिल्यं मा नाम भूत् । तथापि कुसूलवर्ति बीजवत् सहकारि वैधुर्यात् कार्यानारम्भ इति । तदिदमुक्तं न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य न्या-सू-४-१-६४ इति ॥ § 8586

## धर्माधर्थयोः न संपूर्णनाशः

ननु स्वरूपसत्तायां धर्माधर्मयोः कथमिदमुक्तं नवानामात्मगुणानां निर्मूलोच्छेदोऽपवर्ग इति—नैष दोषः—मनस्संयोगवदकिंचित्करयोरवस्थानमपि उच्छेदान्न विशिष्यते । मुक्तस्यात्मनः विभुत्वादपरिहार्यो मन स्संयोगः II.455/KSV । न च तदानीमसौ सन्नपि सुखदुःखज्ञानादिजन्मनि व्याप्रियते । एवं धर्माधर्मौ सन्तावपि फलमनाक्षिपन्तौ किं करिष्यत इति फलत उच्छिन्नावेव भवतः । तस्मान्नवानामात्मगुणानामुच्छेदोऽपवर्ग इत्यविरुद्धम् ॥ § 8587

एवं प्रवृत्त्यनुबन्धस्यापि बन्धहेतोरभावान्न दुर्गमोऽपवर्गः ॥ § 8588

## ज्ञानकर्मसमुच्चयवादः

अपरे पुनराहुः—कर्मफलानां शास्त्रतः कार्यकारणभावनियमावगतेः शमसन्तोषशीतातपादिद्वारकसुखदुःखमात्रोपपादनेन कर्मपरिक्षयानुपपत्तेः, योगर्द्धा च दीर्घकालावधिसुखदुःखोपभोगस्य सकृदेव संपादयितुमशक्यत्वात् ज्ञानाग्निना च दाहे तत्कर्मोपदेशिवैदिकवचनसार्थानर्थक्यप्रसङ्गात्, अदत्तफलस्य कर्मणोऽनुपरमात्, अवस्थानपक्षे चिरमप्युषित्वा कुसूलावस्थितबीजवत् कालान्तरेणापि तत्फलाक्षेपप्रसङ्गात् अवश्यं स्वफलोपभोगद्वारक एव कर्मक्षयो वाच्यः ॥ § 8589

न चानिर्मोक्ष आशङ्कनीयः, ततश्चिरादपि तत्सिद्धिसंभवात् । तथा च मुमुक्षुर्नित्यनैमित्तिकं कर्मावश्यमनुतिष्ठेत्, अननुतिष्ठन् प्रत्यवेयादिति त-

६ ] मर्थ्या— nyāma-wit_ca
१० ] श्चि— nyāma-wit_kha
१० ] त्सं— nyāma-wit_ca

५ पि] तानवं—तनुताम् । न तु संपूर्णनाशः ॥
७ सुक्तं] हीनक्लेशस्य—नष्टदोषस्य प्रवृत्तिः, प्रतिसन्धानाय—वासनाद्यनुवृत्तये न—न प्रभवति ॥
१४ म्] अथमेव सिद्धान्त इति वक्ष्यति । वस्तुतस्तु, फलादानस्य पक्षद्वयेऽपि समानत्वात्, धर्माधर्मयोस्तथैवावस्थानकथनमर्थहीनम् ॥

त्कुतोऽस्य बन्धः स्यात् । काम्यं निषिद्धं च कर्म स्वर्गनरककारि विस्पष्टमेव बन्धसाधनमिति तत्परिहरेदेवेत्येवं तावदुत्तरोऽयं न कर्मसंचयः प्रवर्तते । तदाह— § 8590

नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ।
मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः इति ॥§ 8592

II.456/KSV

## नित्यकाम्यकर्मविभागः

प्राक्तनस्य तु कर्मसंचयस्य भोगादेव क्षयः । आत्मविदश्च मुमुक्षोरयमनुष्ठानक्रमो भवति, नेतरस्येति स एवेत्थमपवृज्यत इति । आह च— § 8593

आत्मज्ञे चैतदस्तीति तज्ज्ञानमुपयुज्यते ।
तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वक्रियाक्षये ॥
उत्तरप्रचयासत्त्वात् देहो नोत्पद्यते पुनः ॥§ 8596

ननु ! नित्यकर्मनुष्ठानपक्षे नास्त्येव मोक्षः । यान्येव हि नित्यानि दर्शपौर्णमासादिकर्माणि यावज्जीवं दर्शपूर्णमासाभ्यां यजेत इत्यादिचोदनोपदिष्टानि, तान्येव फलवन्ति श्रूयन्त इति काम्यान्यपि भवितुम र्हन्ति दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत् अग्निहोत्रं जुहुयात्स्वर्गकामः इति—न—फलाभिसन्धानपूर्वकत्वेनाप्रयोगात् । तथाऽऽह— § 8597

प्रार्थ्यमानं फलं ज्ञातं नानिच्छोस्तद्भविष्यति§ 8598

---

१३ ] क्षयसं— nyāma-wit_ca

---

८ त्वात्] तथा च नाभुक्तम् इत्यादिवचनं प्रारब्धकर्मविषयम् । यथैधांसि इत्यादि संचितकर्मविषयमित्यविरोधः ॥

इति । सोऽयं प्रवृत्तौ विशेषः । प्रयोगेऽपि विशेषः । काम्यं कर्म सर्वाङ्गोपसंहारेण प्रयुज्यमानं फलसाधनमिति न यथाशक्ति तथा तथा प्रयोक्तव्यमिति । नित्यकर्मणः अकरणात् प्रत्यवाय इति यथाशक्त्यपि तत् प्रयोक्तव्यम् । अननुष्ठितात् यादृक्, तादृक् अनुष्ठितश्रेयःप्रत्यवायपरिहारोपपत्तेः ॥ § 8599

काम्ये तु सर्वाण्यङ्गानि यद्यसावुपसंहर्तुं न शक्नुयात्, मा प्रवर्तिष्ट । न ह्यप्रवर्तमानः प्रत्यवेयादिति ॥ § 8600

II.457/KSV

एवंच तदेव दर्शपौर्णमासादिकर्म यावज्जीवं इति चोदनयोपदिष्टं नित्यं सत् तत्फलानभिसन्धानात् प्रयुक्तं न बन्धाय कल्पते । क्व सा स्वर्गसाधनत्वशक्तिः अस्य गतेति चेत्—न—न वयं कर्मणां शक्तिमशक्तिं वा प्रत्यक्षतः प्रपश्यामः । शास्त्रैकशरणास्तु श्रोत्रिया वयम् । चोदनैव धर्मे प्रमाणमिति नः कुलव्रतमेतत् । सा च चोदना एकत्र कामिनमधिकारिणमाश्रित्य प्रवृत्ता । तदधिकारश्च फलनिर्वृत्तेर्विना न स्यादिति फलपर्यन्ततां प्रतिपद्यते ॥ § 8601

अन्यत्र तु यावत्पदोषबद्धजीवनपदार्थावच्छिन्नाधिकारिलाभेन प्रवर्तमाना न फलाय प्रभवति । अक्रियमाणे तु शास्त्रार्थे प्रत्यवायाय भवति अधिकृतेन सता शास्त्रार्थस्त्यक्त इति । काम्ये त्वनुत्पन्नकामोऽधिकृत एव न भवतीति नाधिकृतेन सता विधिस्त्यक्त इति न प्रत्यवैतीति । उपक्रम्य त्वन्तराले त्यक्तुं न लभत एव । वीतायां फलेच्छायां, आवाप्ते वा फले तत्कर्मसमापनवदवश्यकर्तव्यमेव तदित्यलं शास्त्रान्तरगर्भेण भूयसा कथाविस्तरेण ॥ § 8602

सर्वथा सुष्टूक्तं नित्यनैमित्तिके कुर्यात् इति ॥§ 8603

## मोक्षस्य दुर्लभत्वम्

ननु ! भोगात् प्राक्तनकर्मक्षयपक्षे दीर्घकालापेक्षणात् अप्रत्यासन्न इव मोक्षो लक्ष्यते—किं त्वया ज्ञातमधुनैव । हुंकृत्वा निर्विलम्बमेव मोक्षमाप्नुयादिति । न खलु सुलभोऽयं पुरुषार्थः । किं न श्रुतमिदमायुष्मता व्यासवचनम्— § 8604

II.458/KSV

४ ] य— nyāma-wit__kha
६ ] स— nyāma-wit__kha
२१ ] यो— nyāma-wit__ca
२ ] म— nyāma-wit__kha
५--७ ] न— nyāma-wit__kha

२३ हुंकृत्वा ] भर्त्सनादिनेति यावत् । नर्मोक्तिरियम् ॥

अनेकजन्मसंसिद्धस्ततो याति परां गतिम् गी. ६.
४५ इति ॥§ 8605

ज्ञानाग्निदाहवचनं तु ज्ञानप्रशंसार्थमेव । सोऽयं ज्ञानकर्मसमुच्चयान्मोक्ष उच्यत इति ॥ § 8606

## ज्ञानकर्मसमुच्चयवादनिरासारम्भः

अत्राभिधीयते—न खलु फलोपभोगद्वारकः कर्मणां परिक्षयः जन्मकोटिशतैरपि शक्यक्रियः । उक्तं हि— § 8607

एकमेवेदृशं कर्म कर्तुमापतति क्वचित् ।
जन्मायुतशतेनापि यत्फलं भुज्यते न वा ॥§ 8609

देहैस्तत्कर्मभोगार्थैः कर्मान्यन्न करिष्यते ।
देहबन्धनमित्येषा दुराशैव तपस्विनाम् ॥§ 8611

तदीदृशमेनं मोक्षपथमुपदिशद्भिर्याज्ञिकैः मोक्षोपेक्षणमनक्षरमुपदिष्टं भवतीति । तस्मात् पूर्वोक्तनीत्यैव कर्मणां बन्धहेतुत्वमपाकरणीयम् ॥ § 8612

## कर्मनाशस्वरूपनिश्चयः

ननु ! पक्षचतुष्टयेऽपि दोष उक्तः—न—चतुर्थपक्षस्य निरवद्यत्वात् । सहकारिवैकल्यात् कुसूलावस्थितबीजवत् कर्मणामनारम्भकत्वे सति न कश्चिद्दोषः । एष एव च तेषां दाहः, यत् कार्यानारम्भकत्वम् ॥ § 8613

## कर्मणां फलादानम्

४ ] श— nyāma-wit__kha
१४ ] कर्मसाध—

nyāma-wit__kha

९ उक्तः ] अपरे इत्यादिना ४५५ पुटे

उक्तः । चतुर्थः पक्षः ४५४ पुटे उक्तः ॥

ननु ! अविनष्टस्वरूपाणि कुसूलबीजवदेव कदा चिरादारप्स्यन्ते कार्यम् । तस्माद्वरमुच्छिद्यन्तामेव । किमिदानीं नित्यमात्मानमप्युच्छेत्तुं यतामहे । II.459/KSV स हि पुरा भोक्ताऽभूदिति मुक्तोऽपि पुनर्भोक्तृतां प्रतिपद्येतेति वरमुच्छिद्यन्तामेव ॥ § 8614

सामग्र्यभावात् कथमसौ पुनः भोक्तृतां गच्छेत् ? इति चेत्— कर्माण्यपि सहकार्यभावात् कथं कार्यमारभेरन् ? न च कर्मणां बन्धकरणे रागादयो न सहकारिण इति वक्तुं शक्यते; वीतरागस्य जन्मादर्शनात् इत्यसकृदुक्तत्वात् । तस्मादयमेव सूत्रकारोपदिष्टः पन्थाः पेशलः न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य इति ॥ § 8615

## ज्ञानकर्मसमुच्चयवादखण्डनम्

यच्चेदमुच्यते ज्ञानकर्मसमुच्चयान्मोक्ष इति—तत्रेदं वक्तव्यम् । कर्मणां कीदृशो मोक्षं प्रत्यङ्गभावः ? न हि तत्साध्यो मोक्षः; स्वर्गादिवदनित्यत्वप्रसङ्गात् ॥ § 8616

अपि च—आत्मैव स्वरूपावस्थितो मोक्ष इत्युच्यते; न चात्मस्वरूपं कर्मसाध्यम्, अनादिनिधनत्वेन सिद्धत्वात् ॥ § 8617

## कर्मणां चित्तकषायनिवर्तकत्वम्

ननु ! नित्यकर्माननुष्ठाने प्रत्यवेयादिति तद्द्वारकबन्धपरिहारोपायत्वात् कर्मापि मोक्षाङ्गं स्यात्—न—सन्यासविधानस्य प्रत्यक्षोपदेशादि त्युक्तत्वात् । अपरिपक्वकषायाणां शनैश्शनैस्तत्परिपाकौपयिकत्वेन कर्मानुष्ठानं पारम्पर्येणापवर्गोपाय इति तु बाढमभ्युपगम्यते । यथाऽऽह मनुः— § 8618

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः इति ॥ § 8619

II.460/KSV

अध्यात्मविदश्च ज्ञानकाण्डौपयिकमेव क्रियाकाण्डं मन्यन्ते । साक्षात्तु कर्मसाध्येऽपवर्गे स्वर्गवदपायित्वप्रसङ्गात् कृतकस्य सर्वस्यानित्यत्वात् तत्त्वज्ञानमेव मोक्षोपाय इत्युक्तम् ॥ § 8620

## यमनियमादीनामपि ज्ञानाङ्गत्वम्

१० ] थं— nyāma-wit_kha
१६ ] कर्मसा— nyāma-wit_kha

१८ ज्ञैश्च ] ब्राह्मी—ब्रह्मप्राप्त्यर्हा ॥

यदपि यमनियमादिसाध्यमङ्गभूतं कर्मजातम्, तदपि तदङ्गतां गच्छन्न वार्यते । *तत्कार्यत्वेऽपि—यावद्गुणप्रध्वंसाभावस्वभावत्वात् मोक्षस्य न क्षयित्वं स्वर्गवत् । अन्यस्तु न मोक्ष इत्युक्तम् ॥ § 8621

तत्पूर्वोक्तप्रक्रमेणापवर्ग—
प्राप्तेस्तत्त्वज्ञानमेवाभ्युपायः ।
कर्म त्वङ्गं तत्र शौचादि किंचित्
किंचित्तत्स्यादात्मसंस्कारपूर्वम् ॥ § 8625

## मोक्षहेतुतत्त्वज्ञानस्वरूपविचारः

आह—तत्त्वज्ञानमिदानीं विचिन्त्यताम्—किंविषयं तदपवर्गाय कल्पते ? कुतो वा तस्य निःश्रेयससाधनत्वमवगतमिति ॥ § 8626

ननु ! आत्मज्ञानमपवर्गहेतुरिति बहुशः कथितमेवैतदिति कोऽयं प्रश्नः ?—न—विप्रतिपत्तेः । विप्रवदन्ते ह्यत्र वादिनः ॥ § 8627

## मोक्षहेतुज्ञानविषये पक्षभेदाः

एक एवायम् । अविद्यापरिकल्पितः जीवात्मपरमात्मविभागः । परमात्मतत्त्वज्ञानादविद्यापाये मोक्ष इति ब्रह्मवादिनः ॥ § 8628

II.461/KSV

शब्दाद्वैतनिश्चयादिति वैयाकरणाः ॥ § 8629
विज्ञानाद्वैतदर्शनादिति शाक्यभिक्षवः ॥ § 8630
प्रकृतिपुरुषविवेकविज्ञानादिति पारमर्षाः ॥ § 8631
ईश्वरप्रणिधानादिति चान्ये ॥ § 8632
तदेवं कस्मै तत्त्वज्ञानाय स्पृहयन्तु मुमुक्षवः इति वाच्यम् ॥ § 8633

## आत्मतत्त्वज्ञानस्यैवापवर्गोपायत्वम्

७ ] दिषु— nyāma-wit__kha
७ ] भूतं— nyāma-wit__kha
१३ ] द्वा स्या— nyāma-wit__ca
१२ ] प— nyāma-wit__kha

२ *] अङ्गिनः यत् फलम् तदेव किलाङ्गस्यापि ॥
७ म्] [In the print edition there is a footnote reference, but no corresponding note.]
१७ चान्ये] पातञ्जलाः ॥

उच्यते—भिन्नास्तावदात्मान इति गृह्यतामात्मज्ञानमेव निःश्रेयसाङ्गमिति ॥ § 8634

यत्तु—कुतस्तस्य निःश्रेयससाधनत्वमवगतमिति; अक्षपादवचनादिति ब्रूमः । अक्षपादस्तावदेवमुपदिष्टवान् आत्मज्ञानान्निःश्रेयसाधिगमः इति । न च निष्प्रमाणकमर्थमेष ऋषिरुपादिशदिति भवितव्यमत्र प्रमाणेन । तत्तु वैदिकं विधिवाक्यं आत्मा ज्ञातव्यः इति ॥ § 8635

स एष तावन्न निरधिकारः विधिः; अधिकाररहितस्य च विधेः प्रयोगयोग्यत्वाभावात् । अधिकारान्वेषणमुपक्रमणीयम् । परप्रकरणपरिपठनविरहाच्च नास्य समिदाधिविधिवत् प्रधानाधिकारनिवेशित्वम् । अतः विश्वजिदधिकरणन्यायेन स्वर्गकाममधिकारिणमिह यावदुपादातुमध्यवस्यामः, तदैव न स पुनरावर्तते इत्यर्थवादसमर्पितेयमपुनरावृत्तिरेव हृदयपथमवतरति, रात्रिसत्र इव प्रतिष्ठेति तामेवास्य फलत्वेन प्रतिपद्यामहे ॥ § 8636

II.462/KSV

सा चेयं साध्यमानाऽपि रूपादेव हि शाश्वती ।
चकास्त्यपुनरावृत्तिः न स्वर्गवदपायिनी ॥§ 8638

## आत्मज्ञानस्य न दृष्टफलसंभवः

ननु ! दृष्टप्रयोजनालाभे सति अदृष्टप्रयोजनपरिकल्पनावसरः । इह च दृष्टमेव प्रयोजनमात्मज्ञानस्य कर्मप्रवृत्तिहेतुत्वमुपलभ्यते । नित्येनात्मना विना भूतेष्वेवाचेतनेषु श्मशानावधिषु बहुवित्तव्ययायाससाध्यानि को नाम ज्योतिष्टोमादिकर्माण्यनुतिष्ठेदिति नित्य एवात्मा परलोकी ज्ञातव्यः । एवं हि निर्विशङ्कः कर्मसु प्रवर्तेतेति ॥ § 8639

तदिदमनुपपन्नम्—अन्यत एव सिद्धत्वात् । प्रत्यभिज्ञाप्रत्यक्षप्रत्ययेन जैमिनीयैः, अनुमानमहिम्ना च नैयायिकादिभिः आत्मा नित्य इति निश्चित एव । किमत्र विधिः करिष्यति । इतिकर्तव्यताकलापोपदेशश्च तदानीमत्यन्तनिष्प्रयोजनः स्यात् ॥ § 8640

## वेदस्य फलवत्त्वम्

११ ] दिद— nyāma-wit__kha
१४ ] वत्— nyāma-wit__kha
१७ ] त्त— nyāma-wit__kha
३ ] नाशा— nyāma-wit__kha

६ विधिवाक्यं ] आत्मा वारे द्रष्टव्यः इत्यस्यार्थानुवादोऽयम् ॥
१३ मानाऽपि ] रूपं—स्वरूपम् । ध्वंसरूपा हि सा ॥
२१ येन ] कीदृशं पापं मया जन्मान्तरे कृतम् इत्यादिप्रत्यभिज्ञयेत्यर्थः ॥

अमी च तथा नामातिमहान्तो वेदग्रन्था इयत्येव पर्यवसन्ना इति ?—तदिदमुपनतम्—सेयं महतो वंशस्तम्बात् लट्वाऽऽकृष्यत इति । तस्मादर्थवादसमर्पितमपुनरावृत्तिरूपमेव फलमात्मज्ञानविधिरबलम्बत इत्येवं केचित् ॥ § 8641

II.463/KSV

## आत्मज्ञानस्य मोक्षसाधनत्वं विधिसिद्धम्

सूक्ष्मदर्शिनस्त्वाहुः—इयमपि महती दुर्गतिः, यत् अर्थवादमुखप्रेक्षित्वमस्योक्तमधिकारविधेः । विश्वजिति रात्रिसत्रे वा किमन्यत् क्रियताम् । न हि विश्वजिद्रूपपर्यालोचनतः कश्चिदधिकारी लभ्यत इति बलात् स्वर्गकामादिः कल्प्यते वा, अर्थवादसमर्पितो वाऽबलम्ब्यते । यत्र तु विधिस्वरूपमहिम्नैव तदुपलम्भः, तत्र किं कल्पनया, किमर्थवादवदनावलोकनदैन्येन वा ॥ § 8642

इह च स्वाध्यायोऽध्येतव्यः इतिवत् अग्नीनादधीत इतिवद्वा कृत्येन द्वितीयया वा ईप्सिततमत्वनिर्देशात् तन्निष्ठत्वमेवावतिष्ठते । तत्र यथाऽग्न्यर्थतयाऽऽधानविधिरवगम्यमानः अग्नीनामनेकविधपुरुषार्थोपयिककर्मकलापोपयोगात् तदार्जनेनैव कृतार्थत्वमुपगत इति न फलान्तरमपेक्षते, यथा वा स्वाध्यायोऽध्येतव्यः इत्यक्षरग्रहणार्थत्वात् अस्य विधेः अक्षरग्रहणस्य च फलवत्कर्मावबोधद्वारेण परमपुरुषार्थोपायत्वावधारणान्न तदतिरिक्तघृतमधुकुल्यादिफलान्तरापेक्षित्वम् । न चाध्यापनविध्यङ्गत्वं, स्वमहिम्नैवेप्सिततमसंस्कारद्वारकाधिकारलाभात्; एवमिहाप्यपहतपाप्मादात्मस्वरूपपरिज्ञानमेव तस्य परमपुरुषार्थतामवबोधयन्नस्य विधेरन्यप्रयोजनतामापादयति ॥ § 8643

*कश्चित् किल संस्कारविधिः संस्क्रियमाणनिष्ठोऽपि संस्क्रियमाणप्रयोजनापेक्षया परमुखप्रेक्षी भवति—व्रीहीन् प्रोक्षति इतिवत् । कश्चित्तु संस्क्रियमाणप्रयोजनमलभमानः तदीप्सिततमत्वानिर्वहणात्—संस्कारविधित्वमेव जहाति सक्तून् जुहोति इतिवत् । यथोक्तम्— § 8644

II.464/KSV

भूतभाव्युपयोगं हि द्रव्यं संस्कार्यमिष्यते ।

---

१० ] थ्य— nyāma-wit__kha
११ ] ड्वा— nyāma-wit__ca
१५ ] त्तमा— nyāma-wit__kha
१६ ] धिस्वरू— nyāma-wit__kha
१९--२० ] द्वाक्यत्वे— nyāma-wit__ca
३ ] र— nyāma-wit__kha

---

२ म्बात्] लट्वा—सूक्ष्मशलाका ॥
२० *] व्रीहीणां प्रोक्षणसंस्कृतानां पुरोडाशाद्युपयुक्तत्वात्तथात्वम् । सक्तूनां तु न तथोपयोगः, होमेन भस्मीभावात् ॥

सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित्
तं. वा. २-१-४-१२ इति ॥§ 8647

## स्वतः पुरुषार्थानां न फलान्तरम्

यस्य तु संस्कार्यमनर्धमिव रत्नम् अपर्युषितमिवामृतम्, अनस्तमितविव चन्द्रबिम्बम्, अपरिम्लानमिव शतपत्रमस्ति, कस्तर्हि प्रकरणपाठापेक्षायां अर्थवादमुखप्रेक्षणेन फलकल्पनायां वाऽभिलाषः ? अत एव न कामश्रुतिप्रयुक्तत्वमाधानस्य, न चाचार्यकरणविधिप्रयुक्तत्वमध्ययनस्येति ॥ § 8648

तस्मात् स्वाध्यायाध्ययना(?)धानविधिसमानयोगक्षेमत्वात् आत्मज्ञानविधेः, तत्कृतमात्मज्ञानमपवर्गार्थमवगम्यते । तथाविधस्वरूप आत्मैव परोपाधिजनितधर्मरहितः अपवर्ग इत्युच्यते । यतः तदिदमित्थमात्मज्ञान मेव निःश्रेयससाधनं, अनन्यलभ्यमिति तदेवोपदिष्टवानाचार्योऽक्षपादः ॥ § 8649

यत्तु विज्ञानसत्तात्मशब्दाद्यद्वैतदर्शनं—तत् मिथ्याज्ञानमेवेति न निःश्रेयससाधनमिति ॥ § 8650

## ब्रह्माद्वैतवादनिरासः

ननु कथमद्वैतदर्शनं मिथ्या कथ्यते तत् । प्रत्युत द्वैतदर्शनमविद्या मायाऽपि, मिथ्याज्ञानमिति युक्तम् । तथा हि—प्रत्यक्षमेव तावत् निपुणं निरूपयतु भवान् । तत्र हि यदन्यानपेक्षतया झगिति पदार्थस्वरूपमवभासते, तत् पारमार्थिकम्, इतरत् काल्पनिकमिति गम्यते । सद्रूपमेव च II.465/KSV
च तत्राभिन्नमन्यनिरपेक्षमवभाति । भेदस्त्वन्यापेक्ष इति नाक्षजविज्ञानविषयतामुपयाति ॥ § 8651

## कारणस्यैव सत्यत्वम्, कार्यस्य मिथ्यात्वम्

तत्र यथा मृद्रूपतातः प्रभृति यावत्कुम्भावस्थेत्यस्मिन्नन्तराळे आविर्भवतां तिरोभवतां च घटकपालशकलशर्कराकणादीनां कार्याणां रूपमपरमार्थसदेव व्यवहारपदवीमवतरति । परमार्थतस्तु मृत्तिकैव । यथाऽऽहुः मृत्तिकेत्येव सत्यम् छां. ६-१-४ इति । एवं तदपि मृत्तिकारूपं सत्तापेक्षया न परमार्थसदिति सत्तैव सर्वत्र परमार्था । तदेव सल्लक्षणं ब्रह्मेत्याहुः ॥

१० ] सं— nyāma-wit_kha
११ ] योगा— nyāma-wit_ca
१ ] भेद— nyāma-wit_ca
८ ] च— nyāma-wit_kha
८ ] रू— nyāma-wit_kha

१५ ते ] परमुखनिरीक्षणं हि स्वप्राधान्यं निवर्तयति ॥
१६ न्यापेक्ष ] प्रतियोगिस्मरणादिसापेक्षः ॥

§ 8652

आगमश्च एकमेवाद्वितीयं छां. ६-२-१ इत्यादिः अभेदमेव दर्शयति नेह नानास्ति किंचन । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति इति च ॥ § 8653

## प्रत्यक्षस्य शास्त्राविरोधित्वम्

न च प्रत्यक्षविरुद्धत्वमभेदशंसिनो वक्तुं शक्यमागमस्य । न ह्यन्यनिषेधे प्रत्यक्षं प्रभवति, स्वरूपमात्रग्रहणे परिसमाप्तव्यापारत्वात् । पररूपनिषेधमन्तरेण च भेदस्य दुरुपपादत्वात् भेदे कुण्ठमेव प्रत्यक्षमिति कथमभेदग्राहिणं आगमं विरुन्ध्यात् । तदुक्तं— § 8654

आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः ।
नैकत्व आगमस्तेन प्रत्यक्षेण विरुध्यते ॥§ 8656

II.466/KSV

## बन्धमोक्षव्यवस्था

ननु यद्येकमेव ब्रह्म, न द्वितीयं किंचिदस्ति, तर्हि तद्ब्रह्म नित्यशुद्धबुद्धस्वभावत्वात् मुक्तमेवास्ते । केन तद्बद्धमिति किमर्थोऽयं मुमुक्षुणां प्रयत्नः । कुतस्त्यो वाऽयं विचित्रजगदवभासः—अविद्योच्छेदार्थो मुमुक्षुप्रयत्न इति ब्रूमः । ततस्त्य एवायं विचित्रजागदवभासः ॥ § 8657

## अविद्यास्वरूपम्

केयमविद्या ? ब्रह्मणो व्यतिरिक्ता चेत् नाद्वैतम् । अव्यतिरेके तु ब्रह्मैव सा, ततो नान्याऽस्त्येषेति कथमुच्छिद्येत—मैवम्—वस्तुनीदृंशि कुतार्किकचोद्यानि क्रमन्ते । अविद्या ह्ययमवस्तुरूपा, माया, मिथ्यावभासस्वभावाऽभिधीयते । तत्त्वाग्रहणमविद्या । अग्रहणं च नाम कथं वस्तुधर्मैः विकल्प्यते ? § 8658

१७--१८ ] म— nyāma-wit__kha

१ ] ए— nyāma-wit__kha

३ ] धिर्न— nyāma-wit__kha

८ ] र्मे— nyāma-wit__kha; nyāma-wit__gha

८ क्षं ] प्रत्यक्षं विधायकम्, न निषेधकम्, प्रतियोगिनः तेन उपस्थापयितुमशक्यत्वात् ॥

## अविद्याश्रयः

ननु ! तत्त्वाग्रहणरूपाऽपि कस्येयमविद्या । न हि ब्रह्मणो नित्यबुद्धस्वभावत्वादविद्या भवति । अन्यस्तु नास्त्येव तदाश्रयः । न च निरधिकरणमेव मिथ्याज्ञानं भवितुमर्हति—उच्यते—*जीवात्मनामविद्या, न ब्रह्मणः ॥ § 8659

ननु ! के ते जीवात्मानः ? तेऽपि ब्रह्मणोऽन्यानन्यतया चिन्त्या एवआः ! क्षुद्रतार्किक ! सर्वत्रानभिज्ञोऽसि । ब्रह्मैव जीवात्मानः, न ततोऽन्ये । न हि दहनपिण्डाद्भेदेनापि भान्तः स्फुलिङ्गाः अग्निस्वरूपा न भवन्ति ॥ § 8660

II.467/KSV

## जीवाज्ञानवादः

तत् किं ब्रह्मण एवाविद्या ?—न च ब्रह्मणोऽविद्या । यथा ह्येकमेव घटाद्यावरणोपहितभेदतया भिन्नमिव विभाति नभः—पटाकाशं घटाकाशमिति, तदावरणवशादेव च रजोधूमादिकलुषितमपि भवति, तदावरणविरतौ तु गळितकालुष्यमले तत्रैव परमे व्योम्नि लीयते—तथैव जीवा त्मानोऽपि अविद्याकल्पितभेदाः तत्कृतमनेकप्रकारकालुष्यमनुभवन्ति । तदुपरमे च परे ब्रह्मणि लीयन्ते इति ॥ § 8661

## अन्योन्याश्रयपरिहारः

ननु ! एवं सत्यप्यविद्यापरिकल्पित एष ब्रह्मजीवात्मविभागः । सा च जीवात्मनामविद्येत्युच्यते । तदेतदितरेतराश्रयमापद्यते—अविद्याकल्पनायां सत्यां जीवात्मानः, जीवात्मसु च सत्सु अविद्येति—भवत्वितरेतराश्रयम् । अविद्याप्रपंच एवायमशेषः । कस्यैष दोषः ? § 8662

यदि वाऽनादित्वमस्य परिहारो बीजाङ्कुरवद्भविष्यति । भवद्भिरपि चायमनादिरेव संसारोऽभ्युपगतः । अविद्ययैव च संसार इत्युच्यते ॥ § 8663

## अविद्यानिवृत्त्युपायः

ननु ! अनादेरविद्यायाः कथमुच्छेदः ? किमनादेरुच्छेदो न भवति *भूमे रूपस्य । भवद्भिर्वा कथमनादिस्संसार उच्छेद्यते ? § 8664

---

१० ] प्रबु— nyāma-wit_kha
११ ] चा— nyāma-wit_kha
१ ] वस— nyāma-wit_kha
७ ] कथ— nyāma-wit_ca

---

३ *] भामतीकारपक्षोऽयम् । विवरणकारस्तु ब्रह्माज्ञानवादी ॥
२० *] अनादेः कालात्—मृदि विद्यमानं रूपं पाकान्नश्यति किल ॥

ननु ! उपाये सत्यनादिरप्युच्छिद्यते । अद्वैतिनां कस्तदुच्छेदोपायः ? II.468/KSV अविद्यैवेति ब्रूमः । श्रवणमननिध्यानादिरप्यविद्यैव । सा ह्यभ्यस्य माना सती अविद्यान्तरमुत्सादयति, स्वयमप्युत्सीदति । यथा पयःपयो जरयति, स्वयं च जीर्यति । विषं विषान्तरं शमयति, स्वयं च शाम्यति । यथा वा द्रव्यान्तररजः क्षिप्तं रजःकलुषितेऽम्भसि तद्यात्मानं संहृत्य स्वच्छमम्बु करोति । एवमियमविद्यैवाविद्यान्तरमुच्छिन्दन्ती विद्योपायतां प्रतिपद्यते ॥
§ 8665

## असत्यादपि सत्यसिद्धिः

ननु ! स्वरूपेणासत्यैवेयमविद्या कथं सत्यकार्यं कुर्यात् ? उच्यते—
§ 8666

असत्यादपि सत्यार्थसम्पत्तिरुपपत्स्यते ।
मायासर्पादयो दृष्टाः सत्यप्रलयहेतवः ॥§ 8668

रेखागकारादयश्चासत्याः सत्यार्थप्रतीत्युपाया दृश्यन्ते । स्वरूपेण सत्यास्त इति चेत्—किं तेन क्रियते । गकारादित्वेन हि ते प्रतिपादकाः । तद्येषामसत्यमिति ॥ § 8669

## शुद्धस्यापि ब्रह्मणोऽविद्याऽऽवरणम्

ननु ! ब्रह्मणो नित्यशुद्धत्वात् जीवानां च ततोऽनन्यत्वात् कथं तेष्वविद्याऽवकाशं लभते—परिहृतमेतत् घटाकाशदृष्टान्तोपवर्णनेन ॥ § 8670

अपि च यथा विशुद्धमपि वदनबिम्बं अम्बुमणिकृपाणदर्पणाद्युपाधिवशेन श्यामदीर्घस्थूलादिरूपमपारमार्थिकमेव दर्शयति, तथा ब्रह्मणस्तदभावेऽपि जीवेषु तदवकाश इति ॥ § 8671
II.469/KSV

## बद्धमुक्तव्यवस्थोपपत्तिः

ननु ! परमात्मनो नित्यत्वात् जीवानामप्यन्योन्यमनन्यत्वमित्येक स्मिन् बद्धे, मुक्ते वा सर्वे बद्धाः मुक्ता वा स्युः—अयि कुतर्ककलुषितमते कथं बोध्यमानोऽपि न बुध्यसे । घटाकाशे हि घटभङ्गात् परमाकाशप्रतिष्ठे

१० ] ध्या— nyāma-wit_kha
११ ] मय—ख, मिति— nyāma-wit_ca
१ ] न्य— nyāma-wit_kha
६ ] मप्य— nyāma-wit_ca
८ ] ऽपि— nyāma-wit_kha

११ त्य ] प्रलयः—मरणम् ॥

जाते, न पटाकाशोऽपि तथा भवति । एकस्यापि जीवात्मनः उपाधिभेदात् सुखदुःखानुभवभेदो दृश्यते—पादे मे वेदना शिरसि मे वेदना इति । तीव्रतरतरणितापोपनतातनुतरक्लमस्य च यत्रैव च शरीरावयवे शिशिरहरिचन्दनस्थासकमुपरचयति परिजनः, तत्रैव तद्दुःखोपरमानुभवः नान्यत्रेति, एवमेकस्मिन्नपि परमात्मनि कल्पनामात्र प्रतिष्ठेष्वपि जीवात्मसु बद्धमुक्तव्यवस्था सिद्ध्यत्येवेति एकात्मवाद एवायमागमानुगुणः उपगन्तुं युक्तः, नानन्त्यमात्मनाम् ॥ § 8672

ब्रह्मदर्शनमेवातः निःश्रेयसनिबन्धनम् ।
भेददर्शनमूढानां संसारविरतिः कुतः—इति ॥§ 8674

## ब्रह्माद्वैतवादनिराकरणम्

अत्राभिधीयते—कपटनाटकरहस्यप्रक्रियाकूर्चोपरचने तदनुगुणदृष्टान्तपरम्परोपपादने च किमुच्यते परं कौशलं भवताम् ! प्रमाणवृत्तनिरूपणे तु तपस्विन एव भवन्तः । तथा हि—भेदस्य प्रमाणबाधितत्वात् किमयमभेदाभ्युपगमः भवताम्, उत स्वित् अभेदस्यैव प्रमाणसिद्धत्वादिति । द्वयमपि नास्ति । प्रत्यक्षादीनि हि सर्वाण्येव भेदप्रतिष्ठानि प्रमाणानि ॥ § 8675
II.470/KSV

## भेदस्य प्रत्यक्षत्वम्

यत्तावत् भेदस्य परापेक्षत्वात् अक्षजज्ञानगम्यता नास्तीति—तदयुक्तम्—अभेदस्य सुतरां परापेक्षत्वात् । मृत्पिण्डात्प्रभृति घटकर्परचूर्णपर्यन्तकार्यपरम्परापरिच्छेदे तदनुगतमृद्रूपताग्रहणे च सति मृदस्तदभिन्न रूपत्वमवधार्येत, नान्यथा ॥ § 8676

*भिक्षवस्त्वाचक्षते चाक्षुषं व्यावृत्तस्वलक्षणग्राहि, नाभेदविषयं, अभेदस्य परापेक्षत्वादिति ॥ § 8677

## अभेदस्य भेदाधीनत्वम्

१ ] प— nyāma-wit_kha
१० ] सुखं, वे— nyāma-wit_kha
११ ] नु— nyāma-wit_kha
१२ ] म्ला— nyāma-wit_kha
१४ ] यु— nyāma-wit_kha
१९ ] दर्श— nyāma-wit_ca
१--२ ] प— nyāma-wit_kha
४ ] ता— nyāma-wit_kha

४ न] स्थासकं—चन्दनादिलेपगम् ॥
१६ त्वात्] अभेदो हि भेदनिराकरणरूपः ॥
१८ था] स्वरूपेण भासमाना इति यावत्
॥
१९ *] भिक्षवः—बौद्धाः ॥

अयमस्मादन्य इतीयं परापेक्षा प्रतीतिरिति चेत्—अयमस्मिन्ननुस्यूत इतीयमपि परापेक्षैव ॥ § 8678

तदत्र भवान् भिक्षवश्च द्वावपि दुर्ग्रहोपहतौ । भेदाभेदग्रहणनिपुणमक्षजमिति परिक्षितमेतद्विस्तरतः सामान्यचिन्तायाम् । अङ्गुलिचतुष्टयं हि प्रतिभासमानमितरेतरविविक्तरूपमप्यनुगतरूपमपि प्रकाशत इत्युक्तम् ॥ § 8679

व्यावृत्तिरनुवृत्तिर्वा परापेक्षाऽस्तु वस्तुषु ।
*असङ्कीर्णस्वभावास्तु भावा भान्त्यक्षबुद्धिषु ॥§ 8681

१ II.471/KSV

## प्रत्यक्षं भेदाभेदोभयविषयकम्

यदप्युक्तं आहुर्विधातृ प्रत्यक्षं, न निषेद्धृ इति—तदप्यसाधु— विधातृ इति कोऽर्थः ? इदमपि— § 8682

वस्तुस्वरूपं गृह्णाति नान्यरूपं निषेधति ।
प्रत्यक्षमिति चेत्—मैवम्—ज्ञानं तर्हि न तद्भवेत् ॥§ 8684

अन्यरूपनिषेधमन्तरेण तत्स्वरूपपरिच्छेदस्याप्यसम्पत्तेः । पीता दिव्यवच्छिन्नं हि नीलं नीलमिति गृहीतं भवति, नेतरथा । तथा चाह तत् परिच्छिनत्ति, अन्यद्व्यवच्छिनत्ति इति ॥ § 8685

भाववदभावमपि गृहीतुं प्रभवति प्रत्यक्षमिति च साधितमस्माभिरेवैतत् । तस्मादितरेतरविविक्तपदार्थस्वरूपग्राहित्वान्नाभेदविषयंप्रत्यक्षम् ॥ § 8686

## शब्दानुमानयोः भेदावलम्बनत्वम्

शब्दानुमानयोस्तु संबन्धग्रहणाधीनस्वविषयव्यापारयोः भेदमन्तरेण स्वरूपमेव नावकल्पत इति तावुभावपि भेदविषयावेव । विशेषविषयत्वाभावेऽपि लिङ्गसामान्यस्य तदितरविलक्षणस्य परिच्छेदात् भेदविषयमनुमानम् ॥ § 8687

१. देशान्तरकालान्तरव्यक्तीनां भानस्यावश्यकत्वात् ॥

८ ] भेदस्य— nyāma-wit_ca
११ ] भ— nyāma-wit_kha
१८ ] म— nyāma-wit_kha
१ ] न्नं त्व— nyāma-wit_kha

९८६.६--९८७.७ ] दादिवाग्रू— nyāma-wit_kha

२ रापेक्षैव ] स्वरूपेण भासमाना इति यावत् ॥
८ *] स्वरूपेण भासमाना इति यावत् ॥

१८ रेण ] संबन्धः किल व्यक्त्योरेव, न सामान्ययोः ॥

शब्दस्य तु पदात्मनः तद्वदादिवाच्यभेदरूपस्य तु परस्परोपरक्तपदार्थपुंजस्वभावः, इतरपदार्थविशेषितान्यतमपदार्थरूपो वा वाक्यार्थो विषय इति पूर्वमेव निरूपितम् । अतः सर्वथा न भेदस्य प्रमाणबाधितत्वम् ॥ § 8688

नाप्यभेदग्राहि किंचन प्रमाणमस्ति यथोक्तेनैव न्यायेन ॥ § 8689

II.472/KSV

## अभेदे न श्रुतिः प्रमाणम्

यस्तु आगमः पठितः एकमेवाद्वितीयम् नेह नानास्ति किंचन इत्यादिः—*तस्यार्थवादत्वान्न यथाश्रुत एवार्थो ग्रहीतव्यः ॥ § 8690

## अर्थवादानां सर्वेषां न स्वार्थे प्रामाण्यम्

ननु ! सिद्धेऽप्यर्थे वेदस्य प्रामाण्यमभ्युपगतमेव भवद्भिः—बाढमभ्युपगतम् । किन्तु धूम एवाग्नेर्दिवा ददृशे नार्चिः इत्येवमादीनां प्रत्यक्षा दिविरुद्धार्थाभिधायिनामर्थवादानां मुख्यां वृत्तिमपहाय गौण्यापि वृत्त्या व्याख्यानमाश्रितम् । एवमिदमपि वचनं इतरप्रमाणविरुद्धमर्थमभिदधत् अन्यथा व्याख्यायते ॥ § 8691

ये तु प्रमाणान्तरविरुद्धार्थानुवादिनो न भवन्ति अर्थवादाः, तेषामस्तु स्वरूपे प्रामाण्यं वायुर्वै क्षेपिष्ठा देवता इत्येवमादीनाम् ॥ § 8692

तस्मात् सुखदुःखावस्थाभेदेऽपि नावस्थातुरात्मनो भेदः, देहेन्द्रियादि नानात्वेऽपि वा न तस्य नानात्वमित्येवं यथाकथंचिदयमर्थवादो योजनीयः । अभेदोपदेशी तु तत्परः शब्दः विधिरूप इह नास्त्येव । एवमागमबलादपि नाद्वैतसिद्धिः ॥ § 8693

## अविद्यास्वरूपाद्यनुपपत्तिः

यत्पुनः अविद्यादिभेदचोद्यमाशङ्क्याशङ्क्यपरिहृतम्—तत्राशङ्का साधीयसी । समाधानं तु न पेशलम् । तत्त्वान्यत्वाभ्यामनिर्वचनीयेयमविद्येति कोऽर्थः ? § 8694

II.473/KSV

अनादिना प्रबन्धेन प्रवृत्ताऽऽवरणक्षमा ।

९ ] णा— nyāma-wit_kha
१६ ] दं विरुद्ध— nyāma-wit_ca
१६ ] णा— nyāma-wit_kha
२१ ] वा— nyāma-wit_kha

४ ग्राहि ] अभेदेत्यत्र केवलेत्यादिः ॥
६ *] जीवे परमात्मतौल्यबोधनायार्थवादः । तौल्यं च स्वतः निर्दुःखत्वादिना ॥
१० म् ] पूर्वसंपुटे ६७६ तमपुटे ॥

यत्नोच्छेद्याप्यविद्येयं असती कथ्यते कथम् ॥§ 8696

अस्तित्वे क एनामुच्छिन्द्यादिति चेत्—कातरसन्त्रासोऽयम् । सता मेव हि वृक्षादीनां उच्छेदो दृश्यते, नासतां शशविषाणादीनाम् । तदियमुच्छेद्यत्वादविद्या नित्या मा भूत्, सती तु भवत्येव ॥ § 8697

नित्यं न शक्यमुच्छेत्तुं सदनित्यं तु शक्यते ।
असत्त्वमन्यत्, अन्या च पदार्थानामनित्यता ॥§ 8699

## अविद्या भावरूपापि

न च तत्त्वाग्रहणमात्रमविद्या, संशयविपर्ययावप्यविद्यैव । तौ च भावस्वभावत्वात् कथमसन्तौ भवेताम् ? ग्रहणप्रागभावोऽपि नास न्निति शक्यते वक्तुम्, अभावस्याप्यस्तित्वसमर्थनादिति सर्वथा नासती अविद्या ॥ § 8700

असत्त्वे च निषिद्धेऽस्याः सत्त्वमेव बलाद्भवेत् ।
सदसद्व्यतिरिक्तो हि राशिरत्यन्तदुर्लभः ॥§ 8702
सत्त्वे च द्वितीयाया अविद्याया भावान्नाद्वैतम् ॥ § 8703

## जीवस्य कल्पितत्वासंभवः

यत्तु ब्रह्मणः सततप्रबुद्धत्वात् अविद्याक्षेवता नेति जीवानामविद्यास्पदत्वमभिहितम्, अविद्योपरमे ब्रह्मणि परमे त एव घटाकाशवल्लीयन्त इति च—तदपि न चतुरश्रम्—आकाशावच्छेदहेतोः घटादेर्घटमानत्वात् । अविद्यायास्त्वसत्त्वात् तत्कृतः परमात्मनोऽवच्छेद इति विषमो दृष्टान्तः । अवच्छेदकाभावाच्च जीवविभागकल्पनाऽपि निरवकाशैव ॥ § 8704

II.474/KSV

## अदिद्याया अनादित्वासंभवः

यच्च इतरेतराश्रयत्वं परिहर्तुमनादित्वमावेदितं अविद्यायाः—तत्र बीजाङ्कुरवत्, वाद्यन्तरोपगतसंसारवच्च तस्याः सत्यत्वमेव स्यात् । अनादिप्रबन्धप्रवृत्तत्वे सत्त्वे चास्याः प्रतिकूलहेत्वन्तरोपनिपातकृतमपाकरणमुचितम् । एकात्मवादिनां तु तददितिदुर्घटमित्यनिर्मोक्ष एव स्यात् । यथाऽऽह भट्टः—
§ 8705

५ ] त्रो— nyāma-wit__kha
११ ] र्घ— nyāma-wit__kha
२१ ] कत्वा— nyāma-wit__kha; nyāma-wit__gha
२ ] द्वेद्या—ख, दभ्य— nyāma-wit__ca
३ ] चा— nyāma-wit__kha

१२ द्वितीयाया ] परब्रह्मापेक्षयेति शेषः ॥

स्वाभाविकीमविद्यां च नोच्छेत्तुं कश्चिदर्हति ।
विलक्षणोपपाते हि नश्येत् स्वाभाविकं क्वचित् ॥§ 8707

न त्वेकात्माऽभ्युपायानां हेतुरस्ति विलक्षणः§ 8708

श्लो. वा. १-१-५ संब ८६ इति ॥ § 8709

## अविद्याया न बन्धनिवर्तकत्वसंभवः

यत्पुनः अविद्यैव विद्योपाय इत्यत्र दृष्टान्तपरम्परोद्घाटनं कृतं— तदपि क्लेशाय, नार्थसिद्धये । सर्वत्रोपायस्य स्वरूपेण सत्त्वात् । असतः खपुष्पादेरुपायत्वाभावात् । रेखागकारादीनां तु वर्णरूपतया सत्त्वं यद्यपि नास्ति; तथापि स्वरूपतः सत्त्वं विद्यत एव ॥ § 8710

II.475/KSV

## सत्यस्यैव सर्वत्र निवर्तकत्वम्

ननु ! गकारोऽयमिति गृह्यमाणः स रेखासन्निवेशः अर्थप्रत्यायको भवति, न चासौ तेन रूपेणास्ति—मैवम्—स्वरूपेण सतोऽर्थस्य रूपान्त रेणापि गृह्यमाणस्य कूटकार्षापणादेरिव व्यवहारहेतुता दृश्यते च, युक्ता च । यस्तु स्वरूपत एव नास्ति, न, तस्य स्वात्मना परात्मना वा व्यवहाराङ्गता समस्ति । रेखासन्निवेशश्च स्वरूपेण सन्निति वर्णात्मत्वेनासन्नपि तत्कार्याय पर्याप्नुयात् । न त्वयम् अविद्यायां न्यायः, स्वरूपासत्त्वात्तस्याः ॥ § 8711

सर्पादौ तु सर्पादिस्वरूपवत् तद्ज्ञानस्यापि तत्कार्यत्वमवगतम् ॥ § 8712

अत एव शङ्काविषस्यापि स्वशास्त्रेषु चिकित्सामुपदिशन्ति ॥ § 8713

एवं वनगुहाकुहरदेशादेष निस्सृतः केसरी सरोषमित एवाभिवर्त्तते इत्यसत्येऽप्युक्ते यद्भीरूणां पलायनादि, शूराणां च सोत्साहमायुधोद्यमनादि सत्यं कार्यमुपलभ्यते, तत्र सिंहज्ञानस्य तत्कार्यत्वात् नासत एवोपायत्वम्

७ ] धी— nyāma-wit_kha
१३ ] णा— nyāma-wit_kha
१४ ] व— nyāma-wit_kha
१५ ] स्वस्व— nyāma-wit_ca
१५ ] त— nyāma-wit_kha
३ ] नव— nyāma-wit_kha
३ ] रा— nyāma-wit_kha
५ ] रूपमु— nyāma-wit_kha

२ स्वाभाविकं ] सत्येनातपादिना हि सत्यस्य शैत्यादेर्निवृत्तिसंभवः ॥
३ नां ] अभ्युपायः—अभ्युपगमः ॥
१० च ] रज्जौ हि सर्पभानम्, न तु शून्ये । तथाङ्गीकारे तु निरधिष्ठानभ्रमवादः स्यात् ॥

॥ § 8714

एतेन प्रतिबिम्बदृष्टान्तोऽपि प्रत्याख्यातः, खङ्गादेः मुखादिकालुष्य कल्पनाकारणस्य तत्र सद्भावात् । इह तु तदभावादिति ॥ § 8715

## एकात्मवादे बद्धमुक्तादिव्यवस्थानुपपत्तिः

यदपि बद्धमुक्तव्यवस्थासिद्धये पादवेदनाद्युदाहृतम्—तदप्येवमपाकृतम्—अवच्छेदकस्य पादादेः तत्र तात्त्विकत्वात् । इह तु भेदकल्पनाबीजमद्वैतवादिनां दुर्घटमिति बहुशः प्रदर्शितम् ॥ § 8716

II.476/KSV

तदत्रायं वस्तुसङ्क्षेपः—अविद्यायामसत्यां सर्व एवायं यथोदाहृतो व्यवहारप्रकारः तत्कृत इति नावतिष्ठते । सत्यां तु तस्यां नाद्वैत मिति । अत एवाह सूत्रकारः सङ्ख्यैकान्तासिद्धिः प्रमाणोपपत्त्यनुपपत्तिभ्याम् न्या. सू. ४-१-४ इति ॥ § 8717

## आत्माद्वैतवादनिराकरणोपसंहारः

यदि तावदद्वैतसिद्धौ प्रमाणमस्तिः तर्हि तदेव द्वितीयमिति नाद्वैतम् । अथ नास्ति प्रमाणम्, न तरामद्वैतम्, अप्रामाणिकायाः सिद्धेरभावादिति ॥ § 8718

*मन्त्रार्थवादोत्थविकल्पमूल-
मद्वैतवाद परिहृत्य तस्मात् ।
उपेयतामेष पदार्थभेदः
प्रत्यक्षलिङ्गागमगम्यमानः ॥§ 8722

## शब्दाद्वैतवादनिराकरणम्

एतेन शब्दाद्वैतवदोऽपि प्रत्युक्तः— § 8723

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः§ 8725

१३ ] रः— nyāma-wit__ca
१४ ] एकमेव सं—

nyāma-wit__ca

१४ *] नेह नानास्ति इत्यादयः मन्त्राः । एकमेवाद्वितीयम् इत्यादयः अर्थवादाः ॥

वा. प. १-१ इति ॥ § 8726

उच्यते—तत्र अनादिनिधनपदनिवेदितापूर्वापरान्तरहिता वस्तुसत्ता नित्यत्वम्, ब्रह्मपदप्रतिपादितं च व्यापित्वमित्युभयमपि शब्दस्य प्रागेव निरस्तम् । निरवयवश्च स्फोटात्मा शब्दः प्रतिक्षिप्त एव ॥ § 8727

II.477/KSV

## शब्दविवर्तवादोपन्यासः

यत्तु नित्यं व्यापि च किंचिदुच्यते, तत् शब्दतत्त्वमित्यत्र का युक्तिः । आह—शब्दोपग्राह्यतया च शब्दतत्त्वम् ॥ § 8728

तथा हि सर्वप्रत्यय उपजायमानः नानुल्लिखितशब्दः उपजायते । तदुल्लेखविरहिणः अनासादितप्रकाशस्वभावस्य प्रत्ययस्यानुत्पन्ननिर्विशेषत्वात् । एवमीदृशमित्यादिपरामर्शप्रमुषितवपुषि वेदने वेदनात्मकतैव न भवेत् ॥ § 8729

## सर्वप्रत्ययानां शब्दानुविद्धत्वम्

येऽपि वृद्धव्यवहारोपयोगवैधुर्यादनवाप्तशब्दार्थसंबन्धविशेषव्युत्पत्तयः बालदारकप्रायाः प्रमातारः, तेऽऽपि नूनं यत् सत् तत् किम् इत्यादिशब्दजातमनुल्लिखन्तो न प्रतियन्ति किमपि प्रमेयम् । अतः शब्दोन्मेषप्रभावप्राप्तप्रकाशस्वभावत्वात् सर्वप्रत्ययानां शब्दानुविद्धं बोधकत्वमिति सर्वं शब्दतत्त्वमित्यवधार्यताम् । वा. प. १. १३४ तदाह— § 8730

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते इति ॥§ 8732

एवमनभ्युपगमे तु संविदः प्रकाशशून्यतया अनधिगतविषयः सर्व एवान्धमूकप्रायो लोकः स्यात् । आह च वा. प. १-१२५— § 8733

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।

३ ] यदु— nyāma-wit_ca
६ ] वा— nyāma-wit_kha
१४ ] न्मिषित— nyāma-wit_ca
१५--१६ ] नाम्— nyāma-wit_kha

१४ त्वात्] शब्दार्थयोरविनाभावादिति यावत् ॥

न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी इति ॥§ 8735

अतः क्रमेण तावदेवं बोध्यसे, शब्दाख्यविशेषणानुवेधविशेषा भवात् सर्वं II.478/KSV निर्विकल्पकम् इन्द्रियजं सविकल्पकं वा ज्ञानं शब्दविशिष्ट मर्थमवद्योतयति गौः शुक्लो गच्छतीति, जातिगुणक्रियावच्छिन्नविषयाव भासिनि प्रत्यये शब्दविशिष्ट एवार्थः स्फुरतीति बुध्यस्व ॥ § 8736

## अर्थानां शब्दात्मकत्वसमर्थनम्

एवं चेद्बोद्धुमवतीर्णोऽसि शब्दाख्यविशेषणानुरक्तस्य तस्य विशेष्यस्य स्वरूपं पृष्टः शब्देनैव दर्शयसि, शब्दापरित्यागलब्धप्रकाशस्वरूपयैव वाऽनुभूत्याऽनुभवसीति सोऽपि विशेष्यः शब्दरूप एवेति जानीहि । तदेवं शब्द एवार्थोपारूढः प्रतिभातीति व्यवतिष्ठते ॥ § 8737

इत्थमियन्तमध्वानं चेत्प्राप्तोऽपि तदधुना यदुपारूढः शब्दः प्रकाशते, तस्य पृथक् प्रदर्शयितुमनुभवितुं चाशक्यत्वात् शब्द एव तथा तथा प्रतिभातीति शब्दविवर्त एवायमर्थः, नान्यः कश्चिदिति प्रतिपत्तुमर्हसि ॥ § 8738

यथा चायमिन्द्रियजेषु प्रतिभासेषु प्रक्रमः, तथा शाब्देष्वपि प्रत्ययेषु शब्दविशिष्टो वाऽर्थः प्रविभाति, शब्दो वाऽर्थारूढः, शब्द एवार्थरूपेण विवर्तत इति गृह्यताम् ॥ § 8739

अतश्च शब्दब्रह्मेदमेकम् अविद्योपाधिदर्शितविचित्रभेदम्, अविद्योपरमे यथावस्थितस्वरूपं प्रकाशत इति युक्तम् ॥ § 8740

## शब्दविवर्तवादनिरासः

अत्राभिधीयते—न खलु प्रकारत्रयमपीदमुपपद्यते, पदपदार्थसंब- II.479/KSV न्धव्युत्पत्तिविरहिणाम् अनवाप्तशब्दयोजनावैरूप्यस्वरूपमात्रप्रतिष्ठ विशुद्धवस्तुग्रहणप्रवणेन्द्रियजप्रत्ययदर्शनात् । वृद्धव्यवहारपरिचयाधिगतशब्दार्थसंबन्धसंस्कृतधियामपि शब्दस्मरणसंस्कारप्रबोधहेतुभूतप्रथमोदभूतविशुद्धवस्त्ववभासस्यापरिहार्यत्वात् । यत्र हि वस्तुनि निविशमानः शब्दः शब्दविद्व्यवहारेषु योऽवधृतस्तद्दर्शने तत्संस्कारप्रबोधात् स हि स्मृतिपथमेति, नान्यथेति ॥ § 8741

३ ] प्रक्र— nyāma-wit_kha
४ ] अ— nyāma-wit_kha
१२ ] त— nyāma-wit_kha
१८ ] रू— nyāma-wit_kha
२ ] ब्दोपजनित— nyāma-wit_ca
२ ] सारूप्य— nyāma-wit_kha
४ ] स्था— nyāma-wit_kha

११ सि ] शब्दस्य
सूक्ष्मत्वादन्यथासिद्ध्यसंभवादिति हेतुः ॥
१७ ल ] शब्दस्य
सूक्ष्मत्वादन्यथासिद्ध्यसंभवादिति हेतुः ॥

### प्रत्ययानां न शब्दानुविद्धत्वम्

सामान्यशब्देष्वपि यत् तत् किं इत्यादिषु विशेषशब्देष्विव सैव वार्ता । तेषामपि व्युत्पत्त्युपयोगविरहे विविधवनविहारि विहङ्गकूजितादिवदर्थप्रतीतिहेतुत्वानुपपत्तेः ॥ § 8742

सविकल्पकदशायामपि न वाचकविशिष्टं वाच्यं मेचकगुणखचितमिव कुवलयमवलोकयति लोक इति विस्तरशः प्रत्यक्षलक्षणे परीक्षितमेतत् । आह च श्लो. वा. प्रत्यक्ष. १७२— § 8743

न शब्दाभेदरूपेण बुद्धिरर्थेषु जायते ।
प्राक्शब्दाद्यादृशी बुद्धिः शब्दादपि हि तादृशी इति ॥§ 8745

### अर्थेन साकं शब्दभानासंभवः

संज्ञित्वमात्रमधिकमधुना ध्वनिसन्निधाने बुद्धिसधिरोहति, न तद्धि । शिष्टोऽर्थः । तस्य हि न नेत्रेण, न श्रोत्रेण, नोभाभ्यां, न केवलं मनसा वा ग्रहणमुपपद्यते, अतिप्रसङ्गात् । शब्दो हि अनेकधर्मके धर्मिणि एक * तरधर्मावधारणाभ्युपायो भवति । न तत्रात्मानमारोपयति । न हि II.480/KSV दीपेन्द्रियप्रभृतयः प्रतीत्युपायाः तदुपेये रूपादावात्मानमारोपयन्ति । अत एव तदुपायत्वभ्रमकृतस्तदभेदवादोऽपि न युक्तः ॥ § 8746

न ह्युपायादभिन्नत्वं तदुपेयस्य युज्यते ।
रूपस्य न ह्यभिन्नत्वं दीपाद्वा चक्षुषोऽपि वा ॥§ 8748

### अर्थस्य शब्दविवर्तत्वाभावः

अपि च—यदि शब्दादभिन्नोऽर्थः प्रतिभात्येव, कोऽध्यासार्थः ? अभेदेऽपि शब्दमयमेव विश्वमिति, तत्रापि कोऽध्यासार्थः ? अध्यास भ्रमस्तु वैयाकरणानां एकाकारनिर्देशदोषनिर्मितः । यथाऽऽह श्लो. वा. प्रत्यक्ष १८२— § 8749

---

१२ ] ति— nyāma-wit_kha
४ ] अ— nyāma-wit_kha

---

१० *] अनादिनिधनंन सोऽस्ति प्रत्ययःवाग्रूपता चेत् इति श्लोकैरुक्तम्, शब्दस्य तत्त्वरूपत्वम्, सर्वप्रत्ययानां शब्दानुविद्धत्वम्, अर्थस्य शब्दविवर्तत्वं च ॥

१७ णानां] गौः इति शब्दः, अर्थः, प्रत्ययश्चेति त्रयमपि हि निर्दिश्यते ॥

गौरित्येव हि निर्देशः वाच्यस्तद्बुद्धिवाचिनाम्§ 8750

इति । कस्त्वया दृष्टोऽर्थः इति पृष्टो वक्ति गौः इति कीदृशं ते ज्ञानमुत्पन्नम्—गौः इति । कीदृशं शब्दं प्रयुक्तवानसि— गौः इति । तत एषा भ्रान्तिः । वस्तुतस्तु विविक्ता एवैते शब्दज्ञानार्थाः । तदुक्तम् श्लो. वा. प्रत्यक्ष. १८५— § 8751

गवि सास्नादिसद्रूपा गादिरूपाभिधायके ।
*निराकारोभयज्ञाने संवित्तिः परमार्थतः इति ॥§ 8753

II.481/KSV

## नानार्थकस्थले शब्दार्थयोरभेदासंभवः

एवं इन्द्रियजेष्विव शाब्देष्वपि प्रत्ययेषु न शब्दस्वरूपमध्यस्यतीति युक्तम् । यदि च शब्दः स्वरूपेणार्थं प्रतिपादयति, तदा अक्षशब्दस्यैक्यात् देवनविभीतकरथाक्षेषु तुल्या प्रतीतिः स्यात् । न चाक्षशब्दाः भिन्ना इति वक्तव्यम्, स्वरूपप्रत्यभिज्ञानानपायात् । तदुच्चारणे चार्थत्रव्यां संशयदर्शनात् ॥ § 8754

भवतिशब्दयोश्च सुप्तिङन्तयोः तुल्यरूपत्वात् । अध्यासपक्षे तुल्यार्थप्रतीतिहेतुत्वं प्राप्नोति । तथा च सिद्धसाध्यबुद्धिः संवेद्यमानाऽपि निह्नूयेत । एवमगादित्यश्च इति, अजावय इत्यादावपि द्रष्टव्यम् ॥ § 8755

## शब्दे अर्थाध्यासः विरुद्धश्च

६ ] नाम्— nyāma-wit__kha
६ ] गौः— nyāma-wit__kha
२ ] र्थ— nyāma-wit__ca
४ ] रू— nyāma-wit__kha

१ निर्देशः ] वाच्यम्, तद्बुद्धिः, वाचकः शब्दश्च ॥
५ *] मीमांसका अपि निराकारज्ञानवादिन इति चक्रधरः । परं तु निराकारज्ञानवादः अन्यः, अन्यश्च निरालम्बनज्ञानवाद इत्यवधेयम् ॥
७ न ] विभीतकं—फलविशेषः ॥
७ ब्दाः ] उक्तार्थत्रयवाचिनः इति शेषः ॥
११ च ] तिङन्तत्वे साध्यत्वम्, सुबन्तत्वे सिद्धत्वम् । एवं अगात् इत्यादि सुबन्तं तिङन्तं च ॥

शब्दस्य सिद्धरूपत्वात् तदध्यासेनार्थबुद्धाविष्यमाणायां यजेत दद्यात् जुहुयात् इत्यादौ न क्वचित् साध्यबुद्धिर्भवेत्, सिद्धाध्यासेन साध्यबुद्धेरननुरूपत्वात् ॥ § 8756

जातिगुणक्रियाशब्दाश्च गौः शुक्लो गच्छतीत्यादयः केन कारणेन नियतमध्यासमनुरुन्धत इति नावगच्छामः । शब्दस्यार्थानपेक्षनिसर्गसिद्धवैश्वरूप्यकल्पनाबीजाभावात् । प्रतिनियतशब्दवृत्तेश्च कस्यचि ल्लक्षणस्यानुपलक्षणात् II.482/KSV । वृक्षप्लक्षशब्दयोश्च घटपटशब्दयोरिव स्वरूपभेदा विशेषात्, अर्थानपेक्षित्वाच्च विशेषणविशेष्यभावसामानाधिकरण्ये शब्दाध्यासवादिनो न भवेताम् । न ह्येकत्र वस्तुनि वाच्ये क्वचिदनयोः शब्दयोर्वृत्तिः ॥ § 8757

एतेन नीलोत्पलमपि प्रत्याख्यातम् ॥ § 8758

## शब्दविवर्तवादे सामानाधिकरण्यासंभवः

तत्रैतत्स्यात्—न नीलगुणविशेषितमिदं उत्पलं नाम किंचिदस्ति विशेष्यम्, अपि तु तत् निरस्तावयवार्थं अश्वकर्णादिवत् अर्थान्तरमेवेदं; व्युत्पत्तिप्रकारमात्रं तु विशेषणविशेष्यभाववर्णनमिति—तदेतदसमीचीनम्—अनुभूयमानावयवार्थप्रतीतिनिह्नवनिर्मित्तानुपलम्भात् । अश्वकर्णादौ हि युक्तमर्थान्तरत्वं; तत्र हि नाश्वार्थः, न कर्णार्थः । निरवयववाक्यार्थवादश्च प्रागेव विस्तरेण निरस्त इत्यलं पुनरुक्तालापेन ॥ § 8759

## शब्दविवर्तवादे पर्यायपदानां सामानाधिरकरण्यं स्यात्

अथ शब्दद्वयाध्यासमात्रनिबन्धनमेव सामानाधिकरण्यं वृक्षः प्लक्षः इत्युच्यते—तदपि न चारु—वृक्षस्तरुरितिपर्याययोरपि तत्संभवे सति सामानाधिकरण्यप्रसङ्गात् ॥ § 8760

अपि च पर्यायेषु हस्तः करः पाणिः इत्यादिषु शब्दरूपभेदाध्यासपक्षे अर्थबुद्धिभेदः प्राप्नोति । न चासावस्तीति नाध्यासः ॥ § 8761

किंच संबन्धग्रहणनिरपेक्षोऽपि शब्दः स्वसामर्थ्यमनुरुध्यमानः स्वाध्यासेन बुद्धिं विदध्यात् । तदपेक्षायां वा कस्य केन संबन्ध इति न बुध्यामहे—शब्दादर्थस्य पृथग्व्यवस्थितात्मनः त्वन्मते दुर्लभत्वात् । II.483/KSV शब्दव्यतिरिक्तार्थोपगमे वा किमनेन शब्दाध्याससमर्थनाडम्बरेण ? विरम्यताम् अतो मृगतृष्णानुसरणरणिकात् ॥ § 8762

---

१० ] सा— nyāma-wit_ca
११ ] तं— nyāma-wit_kha
२२ ] न— nyāma-wit_ca
१ ] स— nyāma-wit_kha
८ ] त— nyāma-wit_kha

---

३ त्वात्] न हि तेजसि तमसः, तमसि तेजसो वाऽध्याससंभवः ॥

१२ त्] प्रकृते शब्दतत्त्वरूपम् ॥

## शब्दे अर्थाध्यासासंभवः

अपि चाध्यासः क्वचित्सादृश्याद्भवति, शुक्ताविव रजतस्य । क्वचिदनुरागाद्भवति, लाक्षाया इव स्फटिके । शब्दार्थयोर्मूर्तामूर्ततयाऽतिदूरभिन्नस्वरूपयोः सादृश्यं तावदनुपपन्नम् । अनुरागोऽपि तत एव दुर्घटः, पृथग्देशत्वात्, भिन्नेन्द्रियग्राह्यत्वाच्च ॥ § 8763

## शब्दार्थयोर्बिम्बप्रतिबिम्बभावासंभवः

प्रतिबिम्बवर्णनमपि न सुन्दरम्, दूरदेशत्वेन शब्दार्थयोः प्राप्त्यभावात् । अप्राप्तयोश्च प्रतिबिम्बे द्वारकोद्याननिवासिवासुदेवसुन्दरीवदनतामरसानि सागरतरङ्गपवनपरिचयचलदलकलतिकालांच्छितानि स्वच्छेषु ज्योत्स्नावदातद्युतिषु तुषारगिरिगह्वरगततुहिनशिलाकर्पूरदर्पणेषु प्रतिबिम्बितानि दृश्येरन् ॥ § 8764

अथ सर्वगतत्वेन शब्दानामर्थदेशे प्राप्तिरभिधीयते, तर्हि सकलशब्दसार्थसाधारण्यात् अत्यन्तमध्याससाङ्कर्यम् अनवधार्यमाणविशेषनियमकारणमापद्यत इत्यलमतिप्रसङ्गेन । सर्वथा न संबद्धः शब्दाध्यासवादः ॥ § 8765

II.484/KSV

## विवर्तवाद एवासमर्थनीयः

विवर्तवादोऽपि न समंजसः । तथा हि—*विवर्ततेऽर्थभावेन इति कोऽर्थः ? न तावदर्थात्मना शब्दः परिणाममुपयाति, क्षीरमिव दधिरूपेण, परिणामित्वेन विकारितया वा क्षीरादेरिवानित्यत्वप्रसङ्गात् । तथाभावेऽपि च नाद्वैतसिद्धिः दध्न इव क्षीरविकारस्य, शब्दविकारस्यार्थस्य ततोऽन्यत्वात् । अन्यत्वाच्च बाधकारणकालुष्याद्युपप्लवविरहप्रतीतिसमर्पितभेदत्वात् ॥ § 8766

## अर्थप्रतिभासस्यायथार्थत्वपक्षनिरासः

अथार्थप्रतिभासमसत्यमपीन्द्रजालवदुपदर्शयति शब्द इत्ययं विवर्तोऽर्थः, सोऽपि न युक्तः । बाह्यस्य वस्तुनः पदाभिधेयस्य जातिव्यक्त्यादेः, वाक्यवाच्यस्यापि भावनादेः पूर्वप्रसाधितत्वात् । अवयवव्यादेश्चादूर एवाग्रे समर्थयिष्यमाणत्वात् । न चेन्द्रजालमायादिवदयथार्थतायामिह किमपि कारणमुत्पश्यामः ॥ § 8767

---

१६ ] सु— nyāma-wit_ca
१--२ ] र्ते— nyāma-wit_kha
४ ] स्या— nyāma-wit_ca
५ ] हितकिसलय— nyāma-wit_kha
८--९ ] र्थित— nyāma-wit_kha

---

१ चि ] अनुरागः—अनुरञ्जनम् ॥
१० अथ ] तन्मते शब्दस्यैव ब्रह्मत्वात् ॥
१३ *] वाक्यपदीये हि विवर्ततेऽर्थभावेन यत्तस्य परिणामोऽयम् इति विवर्तपरिणामशब्दौ पर्यायतया बहुलं प्रयुक्तौ ॥

## अर्थानां मिथ्यात्वपक्षनिरासः

अथार्थरूपेण शब्दः शुक्तिरिव रजताकारतयाऽवभासत इतीयं विवर्तवाचो युक्तिः—इयमपि न साधीयसी—शुक्तिका हि रजतवत्प्रकाशत इति शक्यं वक्तुम्, शुक्तेराकारसारूप्येण तथाऽवभाससम्भवात् । इह तु शब्दार्थयोरत्यन्तविसदृशवपुषोराकारसमारोपकारणानवधारणात् कथमितररूपेणेतरस्यावभासः । शुक्तिकारजतादिषु च बाधकवशात् तथात्वमवगतम् । इह II.485/KSV तु न बाधकं किंचिद्भवति, भविष्यति वेति वर्णितम् ॥ § 8768

## शब्दानुवेधोऽपि न साधीयः

अथ स्वानुवेधमजहत् सत्यामसत्यां वाऽर्थबुद्धिमादधाति शब्द -त्ययं विवर्तार्थः—एषोऽपि संप्रत्येव प्रतिक्षिप्तः । शब्दानुवेधविरहिणीनां प्राचुर्येण प्रतिपत्तीनां प्रदर्शितत्वात् । न चान्यः कश्चिद्विपश्चिच्चेतसि विवर्तते विवर्तप्रकारः इत्यवाचकमुच्यते—विवर्ततेऽर्थभावेन इति ॥ § 8769

## शब्दस्य जगत्स्रष्टृत्वनिरासः

अथ शब्दब्रह्मैव सृजति जगदित्ययं विवर्तप्रकार उच्यते—सोऽपि न सम्यक्—अचेतनत्वेन शब्दस्य ईश्वरस्येव स्रष्टृत्वानुपपत्तेः । न च परमाणुवदस्य कारणत्वम्, अवयवसमवायित्वेन पृथिव्यादेः कार्यस्य ग्रहणात् ॥ § 8770

अथ विज्ञानमानन्दं ब्रह्म इत्यागमवचनमनुसरता विभुत्वमिव चेतनत्वमपि शब्दब्रह्मणो वर्ण्यते—तर्हि ईश्वरस्यैव शब्दब्रह्मेति नाम कृतं स्यात् ॥ § 8771

## ब्रह्मद्वैविध्यनिरासः

यदप्युच्यते—

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म, परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति § 8774

इति—तदापि ब्रह्म सुभिक्षमत्यन्तमलौकिकम् । एकतरस्य ब्रह्मणः II.486/KSV कात्पनिकत्वात् । अकाल्पनिकत्वे वा कथमद्वैतवादः । तस्मात् कृतमनेन

१६--१७ ] धर्म— nyāma-wit__kha
१९ ] परिव— nyāma-wit__kha
९ ] न्ती— nyāma-wit__kha
१० ] इ— nyāma-wit__ca; nyāma-wit__gha

१३ वायित्वेन ] न तु शब्दसमवायित्वेन ॥
१८ व्ये ] शब्दब्रह्म—अपरं ब्रह्म । परं ब्रह्म—परमात्मा ॥
२० ह्म ] सुभिक्षम्—इति नर्मोक्तिः ॥
२१ वादः ] परं ब्रह्म एकमेवेति नाद्वैतहानिः इत्यपि न—तर्हि द्वे ब्रह्मणी इति कथनमयुक्तं स्यात् ॥

शब्दब्रह्मणा । स्वस्ति परस्मै ब्रह्मणे भूयात् ॥ § 8775

अविद्यामायाविनिर्मितविविधभेदप्रथनकल्पश्च सत्ताद्वैतदूषणावसर एव निवारित इति शब्दाद्वैतमपि तद्वदसमंजसमिति सिद्धम् ॥ § 8776

## जगतः ब्रह्मोपादानत्वनिरासः

एतेन परमात्मोपादानत्वमपि प्रत्युक्तम् । परमात्मनो निसर्गनिर्मलस्य एवंप्रायकलुषविकारकारणत्वानुपपत्तेः ॥ § 8777

असत्यमेव विकारजातं अविद्यातः परमात्मनि विभातीत्येतदपि दूषितम् । अतः सर्वथा नाद्वैतपक्षः कश्चिदनवद्यः ॥ § 8778

## ऐकात्म्यवादेऽनुपपत्तयः

अथ सर्वप्राणिनामेक एवात्मा, न नानात्मानः—इतीदृशमुच्यते— तदप्यप्रमाणकम्—एकस्मिन् सुखिनि न सर्वे सुखिनः, एकस्मिन् दुःखिते न सर्वे दुःखिताः इति व्यवस्थादर्शनात् । आत्मपरव्यवहारस्य च सर्वजनप्रतीतिसिद्धस्य दुरपह्नवत्वात् । अन्यदृष्टे च सुखदुःखसाधने वस्तुनि स्मरणानुसन्धानपूर्वकेच्छाद्वेषादिकार्यजातस्यान्यत्रानुपलम्भात् । एकस्मिंश्च वीतरागे मोक्षमासादितवति संसारिणामन्येषामानन्त्यदर्शनात् ॥ § 8779

II.487/KSV

अहंप्रत्ययस्य प्रत्यगात्मवृत्तेः परत्रासम्भवात् । जगद्वैचित्र्यस्य च पुरुषभेदनियतधर्मनिबन्धनस्यान्यथानुपपत्तेः । आत्मभेदस्य विस्पष्टसिद्धत्वात् ॥ § 8780

तप्तलोहस्फुलिङ्गघटाकाश पादवेदनादिदृष्टान्तकदम्बकस्य च निषेधः कृत एवेति एकात्मवादोऽपि न युक्तिमानित्यलं विस्तरेण ॥ § 8781

## शब्दविवर्तवादोपसंहारः

शब्दस्यायं विवर्तः कथमखिलमिति प्रस्फुरत्तद्विविक्त-
स्वाकारोऽर्थप्रपंचः कथमिव विकृतिः ब्रह्मणो वेदृशी स्यात् ।
तस्मान्नानात्मतत्त्वो परिचितसदसत्कर्मपाकानुसार-
प्रादुर्भूतेश्वरेच्छावशविचलदणुप्रोद्भवो भूतसर्गः ॥§ 8785

१३ ] प्र— nyāma-wit__kha
१४ ] म— nyāma-wit__kha
५ ] था— nyāma-wit__ca
१४ ] त्वे पर— nyāma-wit__kha

४ एतेन] अयमेव ब्रह्मपरिणामवादः भर्तृप्रपञ्चादिसंमतः शंकराचार्यादिदूषितश्च ॥
१४ वृत्तेः] ऐकात्म्यवादे हि अहमर्थः न आत्मा, किन्तु अन्तःकरणमेव ॥
२१ त्त्वो] अनेकात्मगर्भ इति भूतसर्गविशेषणम् ॥

## विज्ञानाद्वैतवादः

एवं स्थितेषु सर्वेषु तूष्णीमद्वैतवादिषु ।
विज्ञानाद्वैतवादी तु पुनः प्रत्यवतिष्ठते ॥§ 8787

सत्यमनुपजननमनपायमपरिमितमद्वयं ब्रह्म न युक्तिमदिति युक्त एव तदनभ्युपगमः । विज्ञानमेव तु क्षणिकं उपजननापायधर्मकं अनादिसन्तान-प्रबन्धप्रवृतमिदं तथा तथाऽवभातीति न ततोऽद्वितीयमर्थरूपं नाम किंचिद-स्तीति पश्यामः ॥ § 8788

II.488/KSV

## विज्ञानाद्वैतसमर्थनम्

ननु ! प्रत्यक्षादिना प्रमाणेन परस्परविसदृशपदार्थस्वरूपसंवेदनस्य द-र्शितत्वात् कथं विज्ञानस्यायमवभासः, अर्थाभावे तत्स्वरूपानुपपत्तेः । ग्राह्य-ग्रहणं हि नाम विज्ञानं भवति, न ग्रहणग्रहणमिति ॥ § 8789

उच्यते—इदं तावत्परीक्ष्यताम् । यदेतत् प्रत्यक्षविज्ञानं नीलमिदम् पीतमिदम् इत्युत्पद्यते, तत्र किमेक आकारः प्रकाशते, उत द्वितयमिति ॥ § 8790

## आकारद्वयानुपलंभः

यदि द्वितयमवभाति अयमर्थो नीलम्, इदं तज्ज्ञानमिति, तत् किमत्र विचार्यते, जितं भवद्भिः । जितस्य यदापद्यते तदस्मासु विधीयताम् ॥ § 8791

अथ एक एवायमाकारः प्रथते, तर्ह्यस्ति विचारावसरः । कस्याय-माकारः, किमर्थस्य, किं ज्ञानस्येति । स चैवं विचार्यमाण आकारः य-द्यर्थस्येति तद्भवन्तो जेष्यन्ति । ज्ञानाकारपक्षे तु वयं जेष्याम इति ॥ § 8792

## ज्ञानस्यावर्जनीयत्वम्

३ ] न— nyāma-wit__kha
९ ] व— nyāma-wit__kha

९ न ] स्वप्रकाशज्ञानमात्रमिस्यर्थः । निर्विषयस्य कथं ज्ञानत्वमित्यर्थः ॥

१४ ताम् ] परन्तु आकारद्वयानुपलंभाव भवतां विजयः ॥

किं तावदत्र युक्तम् । ज्ञानस्यायमाकार इति । कुतः ? कल्प-
II.489/KSV ना तावदिहाल्पीयसीति । अर्थाकारपक्षे हि अर्थस्य जडात्मनः प्रकाश्ययोगात् ग्राह्यत्वमन्यथा न स्यादिति ग्राहकान्तरकल्पनाऽवश्यंभाविनीति कल्पनाद्वैगुण्यम् ॥ § 8793

अथार्थ एव ग्राह्यात्मा यः, स एव ग्राहक इति—कथ्यते, स तर्हि प्रकाश एवेति संज्ञायामेव विवादः स्यात् । बाह्याभ्यन्तरकृतो विशेषं इति चेत्, अहो विशेषज्ञो देवानांप्रियः । ग्राहकाद्विच्छिन्नता हि ग्राह्यस्य बाह्यता । न शरीरापेक्षिणो बाह्यता भवति । यदा च ग्राह्यादर्थात् अव्यतिरिक्त एव ग्राहक इष्यते, तदाऽस्य न ततो विच्छिन्नतेति अबाह्यत्वात् ज्ञानमेव तदिति कथं न नाम्नि विवादः ॥ § 8794

उभयसिद्धत्वात् ज्ञानस्य तस्यायमाकारी भवितुमर्हति । ज्ञाने हि न केचन विवदन्ते । अतस्तस्यैवायमाकार इति युक्तमनेककल्पनातो ह्येकार्थकल्पना ज्यायसीति ॥ § 8795

## ज्ञानस्यावश्यकत्वे हेत्वन्तरम्

अतश्च ज्ञानस्यायमाकारः । ज्ञानं हि प्रकाशकम् अप्रकाशस्यार्थस्य भवद्भिरभ्युपगम्यते । ततश्च अर्थात् प्रथमतरमस्य ग्रहणेन भवितव्यम् । अगृहीतस्य दीपादेः प्रकाशस्य प्रकाशकत्वादर्शनात् । उत्पन्नेष्वपि च घटादिष्वर्थेषु प्रकाशवैकल्याद्वा, प्रतिबन्धवैधुर्याद्वा भवत्यग्रहणम् । ज्ञानस्य तूत्पन्नस्य सतः न किंचिद्ग्रहणे प्रतिबन्धकः । न च प्रकाशकान्तरापेक्षणम्,
II.490/KSV स्वत एव दीपवत् प्रकाशस्वभावत्वात् । अतः यदेव तस्योत्पादः, तदेव ग्रहणमवश्यं भवेत् । न चेत् कालान्तरेऽपि न स्यात् ॥ § 8796

## ज्ञानस्य स्वप्रकाशत्वम्

किं हि तस्य कालान्तरे भविष्यति, किं वा तदा नाभूत्; येन तत् कालान्तरे ग्रहीष्यते, तदा च न गृह्यत इति । ज्ञानान्तरेण कालान्तरे तद्ग्रहीष्यत इति चेत्, तदपि केन ग्राहीष्यते ? अन्येनेति चेत्, तदप्यन्येनेति कोऽवधिः ? श्रम इति चेत्, कामं श्रान्तो विरंस्यति भावन्, अर्थं तु न गृहीतवानेव, प्रकाशाग्रहणे तत्प्रकाश्यपरिच्छेदायोगादित्येवं न कदाचिदर्थ-

---

१४ ] भवति ह्य— nyāma-wit__kha
१८ ] त्त— nyāma-wit__kha
२१ ] न— nyāma-wit__kha
१ ] शः— nyāma-wit__ca
१ ] श्च— nyāma-wit__ca
६ ] वा— nyāma-wit__kha

---

३ त्व ] अन्यथा—ज्ञानं प्रकाशकमन्तरा ॥
४ ना ] ज्ञानस्य, अर्थस्येति द्वितयकल्पना ॥
६ काश ] अन्यथा ग्राहकत्वासंभवः ॥
१९ त् ] प्रकाशकान्तरापेक्षायामनवस्था ॥

ग्रहणं स्यात् । तस्मादर्थग्रहणवादिनापि पूर्वं ज्ञानग्रहणमवश्याश्रयणीयम् । यथोक्तं— § 8797

*अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति इति ॥§ 8798

## प्रथमं ज्ञानस्यैव भानम्

अतश्चैतदेवम्—ज्ञानपृष्ठेन चोत्तरकालभाविप्रत्यवमर्शदर्शनात् । ज्ञातो मयाऽयमर्थः इति हि प्रत्यवमृशन्तः प्रमातारः प्रथमं ज्ञानग्रहणमनुमोदन्ते । न ह्यगृहीतविशेषणा विशेष्यबुद्धिर्भवति । तस्मादपि पूर्वं ज्ञानग्रहणमिति सिद्धम् ॥ § 8799

ज्ञानं च गृह्यमाणं आकाररहितं ग्रहीतुमशक्यमिति बलात् साकारमेव तत् ग्रहीतव्यम् । साकारे च ज्ञाने गृहीते सति द्वितीयकारणाभावात् कुतो ज्ञानातिरिक्तो बाह्योऽर्थः ? § 8800

II.491/KSV

## ज्ञानस्य विषयसंबन्धात्साकारत्वम्

इतश्च साकारं ज्ञानम्, आकारवत्तामन्तरेणास्य प्रतिकर्मव्यवस्थानुपपत्तेः । कल्पयित्वाऽपि बाह्यमर्थम् अवश्यमाकारवत्ता विज्ञानस्य विषयनियमसिद्धये वक्तव्या । नीलज्ञानं हीदं अनेकसन्निधाने समुपजायमानं कथमखिलतदितरपदार्थपरिहारेण केवलनीलालम्बनतामवलम्बेत ? बोधस्वभावतायाः सर्वान् प्रत्यविशिष्टत्वात् । प्रवृत्तिरपि प्रेक्षापूर्वकारिणां कथं तदेकविषयैव स्यात् । न च नीलजनितत्वकृत एष तदधिगमनियम इति कथयितुमुचितम्, आलोकलोचनादिकारकान्तरजनितत्वस्यापि भावेन तद्विषयत्वप्रसङ्गात् । अतो नीलाकारतैव नीलविषयत्वव्यवस्थाहेतुः न निमित्तान्तरम् । आह च—
§ 8801

१३ ] नां— nyāma-wit_ca
१४ ] म— nyāma-wit_kha
४ ] नुलग्न— nyāma-wit_kha
६ ] त्वेनार्थ— nyāma-wit_kha

२ *] यस्य ज्ञानं न प्रत्यक्षम्, तस्य तद्विषयस्याप्यभानमेव ॥
७ ति ] द्वितीयस्य ग्राह्यस्याभावादिति भावः ॥
१६ अतो ] यदा च ज्ञानमेवार्थाकारं जातम्, तर्हि अर्थः प्रत्येकं मा स्तु ॥

तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः ।
भाव्यतेऽनात्मना येन प्रतिकर्म विभज्यते इति ॥§ 8803

## ज्ञानस्यैव प्रमाणत्वं फलत्वं च

अत एव आकारग्रहणमेवातिशयमाश्रित्य तमबर्थसमर्थने सति साधकतमं ज्ञानमेव प्रमाणं भविष्यति । अपरथा कारकातिशयदर्शनाभावे तत्त्साधकतमत्वस्य दुरुपपादत्वात् । साकारज्ञानसाक्षी च लौकिकोऽपि दृश्यते व्यवहारः । एवं च वक्तारो भवन्ति लौकिकाः, नीलोऽर्थोऽयं, यतोऽत्र तदाकारं ज्ञानमुत्पन्नम्, इति । तेन प्रतिकर्मनियमान्यथानुपपत्तेः अवश्यं साकारमेव ज्ञानम् ॥ § 8804
II.492/KSV

इत्थं सत्यपि बाह्येऽर्थे ज्ञानस्याकारकल्पना ।
भवेदेवेति तत्रैव सन्तुष्य स्थीयतां वरम् ॥§ 8806

## विज्ञानवादिन सौत्रान्तिकखण्डनम्

ये तु ब्रुवन्ते—ज्ञानस्य स्वतः स्वच्छत्वभावत्वेन नीलपीताद्यवभासः परोपाधिरेव भवितुमर्हति, स्फटिकस्येव लाक्षादिनाऽरुणिमाद्यनुवेधः । अतः पृथगननुभूयमानोऽपि बाह्योऽर्थः साकारज्ञानावभासान्यथाऽनुपपत्त्याऽनुमीयते । यथोकतं—बाह्यसिद्धिः स्याद्यतिरेकतः *इति ॥ § 8807

तदिदमनुपपन्नम्—अन्वयानुपलब्धेः— § 8808

अर्थे हि सति साकारं निराकारं तदत्यये ।

१० ] व्यं ते— nyāma-wit_kha
१३--१४ ] नीला— nyāma-wit_ga
१ ] तु— nyāma-wit_kha
५ ] ज्ञानं हि— nyāma-wit_kha

२ ना] अनात्मना—ज्ञानातिरिक्तेन ॥
७ श्यं] यद्यपि बौद्धाः निराकारज्ञानवादिनः, परन्तु अर्थे सति च साकारं निराकारं तदत्यये इत्युक्तेः, सांख्यमतेऽन्तःकरणस्य विषयाकारप्राप्तिवत्, ज्ञानस्य अर्थाकारप्राप्तेः साकारज्ञानवादिनस्ते इत्युच्यते । एवं ज्ञानाकाराङ्गीकारादेव विषयस्यापलापः कर्तुं शक्यते, आकारद्वयानुपलंभादिति । विषयासान्निध्ये तु ज्ञानं निराकारं—निर्विषयम् अवतिष्ठते । ततश्च निराकारज्ञानवादः अन्यः, निरालम्बनज्ञानवादपययिः निर्विषयज्ञानवादश्चान्यः ॥
१३ *] व्यतिरेकतः—अर्थाभावे ज्ञानाकारासिद्धेः, बाह्यार्थसिद्धिः ॥

नित्यानुमेयबाह्यार्थवादी ज्ञानं क्व दृष्टवान् ॥§ 8810

लाक्षास्फटिकादौ तु तथा युक्तम्, तदनुरक्तस्फटिकशकलावलोकनात् । इह पुनः— § 8811

अर्थेन रज्यमानं हि निराकारं निसर्गतः ।
ज्ञानं न खलु पश्यामः लाक्षया स्फटिकं यथा ॥§ 8813

## आकारद्वयं तु अनुभवविरुद्धम्

आकारद्वयप्रतिभासो हि नास्तीत्युक्तम् । अभ्युपगमे वा सुदुस्त रमनवस्थादूषणम् । अर्थाकारश्च प्रत्यक्षः, तत्कृतश्च ज्ञानाकारः प्रत्यक्षः II.493/KSV इत्युच्यमाने, अर्थाकारस्तावत् साकारेण ज्ञानेन गृहीतः । स इदानीं ज्ञानाकारोऽपि ग्राह्यत्वात् साकारज्ञानान्तरं भवेत् । तदपि साकारं ज्ञानान्तरं तथाभूतज्ञानान्तरग्राह्यमेव स्यादित्यनिष्टम् ॥ § 8814

अथ स्वप्रकाशं तत् साकारं ज्ञानमिष्यते, तेन ज्ञानान्तरानपेक्षणात् नानवस्थेति; तर्हि स्वप्रकाशसाकारज्ञानव्यतिरिक्तार्थाकारानवभासात् तदेवास्तु, कुतो द्वितीय इदानीमर्थाकारः ॥ § 8815

## विषयमिथ्यात्वेऽपि ज्ञानस्याकारसंभवः

न चान्यथानुपपत्त्याऽपि तत्कल्पना युक्तिमती । न हि राजशासनमिदं अर्थेनाकारवता भवितव्यमिति । ज्ञानमेव नीलाद्याकारं यदि भवेत् को दोषः स्यादिति । नीलाद्याकारयोगात् अर्थस्स भवेदिति चेत्, संज्ञायां विवाद इत्युक्तम् । द्वितीयस्याभावात् स्वच्छत्वात् ज्ञानस्य कालुष्यमन्यकृतं युक्तमिति चेत्, अविद्यावासनाकृतं तद्भविष्यति । स्वतः स्वच्छमपि ज्ञानमनाद्यविद्यावासनाविभवोपनतमनेकाकारकालुष्यरूषितवपुरिव प्रकाशते ॥ § 8816

ज्ञानवासनाभेदसन्तानयोश्च बीजाङ्कुरवदनादित्वान्नात्र पर्यनुयोगस्यावसरः—कुतो वासना प्रवृत्ता इति । तस्मादनादिवासनावैचित्र्यरचितज्ञानवैचित्र्योपपत्तेः कृतमनुमेयेनापि बाह्येनार्थेनेति ज्ञानस्यैवायमाकार इति सिद्धम् ॥ § 8817

---

६ ] का— nyāma-wit_kha
१० ] प्रतीतिः— nyāma-wit_kha
१० ] दुरुत्तर— nyāma-wit_kha
१३--१४ ] र— nyāma-wit_kha
१५ ] पे— nyāma-wit_kha
५ ] त— nyāma-wit_kha
६ ] वेन तत्तद— nyāma-wit_kha

---

१३ त्या ] अन्यथानुपपत्त्या—विषयमन्तरा स्वतः ज्ञानस्याकारान्यथानुपपत्त्या ॥

## ज्ञानातिरिक्तार्थनिराकरणम्

अतश्च ज्ञानस्यैवायमाकारः, ज्ञानेन विना हि न क्वचिदर्थरूपमुपलभ्यते
II.494/KSV । ज्ञानं त्वर्थरहितमपि गन्धर्वनगरमायादिषु विस्पष्टमुप लभ्यते इत्यन्वयव्यतिरेकाभ्यामपि ज्ञानाकारत्वमवगच्छामः । यदि च ज्ञानादर्थः पृथगवस्थितात्मा भवेत्, ज्ञानमन्तरेणाप्यसावुपलभ्येत; न चैवमस्ति । तस्मादभेद एव ज्ञानार्थयोः । यदाह— § 8818

सहोपलम्भानियमादभेदो नीलतद्धियोः इति ॥§ 8819

## आकारस्य ज्ञानार्थमेलनकृतत्वनिरासः

न च ज्ञानार्थसंसर्गधर्म आकारो भवितुमर्हति । यदि हि पृथगर्थमनाकारं, पृथक्च ज्ञानमानाकार उपलभ्य, संसृष्टयोर्ज्ञानयोराकारवत्ता मुपलभेमहि, तत इममाकारं संसर्गधर्मं प्रतिपद्येमहि । न त्वयमस्ति क्रमः । अर्थरहितत्वेऽपि च स्मरणस्वप्नादिज्ञानानामाकारवत्त्वमस्तीत्युक्तम् । अतः कथं संसर्गधर्म आकारः ? § 8820

## अर्थाकाराणां कल्पितत्वमावश्यकम्

अपि च नक्षत्रं तारका तिष्य इति कथमेकस्मिन्नर्थे परस्परविरुद्धलिङ्गसमावेशः ? ॥ § 8821

परिव्राजककामुककौलेयकानां च कथमेक एव वनितारूपोऽर्थः कुणप इति कामिनीति भक्ष्यम् इति च प्रतिभासत्रितयविषयतामनुभवेत् ? ॥ § 8822

दारा इति कथमेकैव स्त्रीव्यक्तिः पुंवचनबहुवचनविषयतां यायात् ? ॥ § 8823

षण्णगरिति च कथं बहनामन्यलिङ्गानामेकता स्त्रीलिङ्गता च भवेत् ? ॥ § 8824

II.495/KSV

१२--१३ ] ज्ञा— nyāma-wit_kha

१७ ] वत्व— nyāma-wit_kha

१५ ] ना— nyāma-wit_kha

५ च] ज्ञानस्य, अर्थस्य च यः संसर्गः—परस्पराभिमुखीभवनम्, तत्कृतः आकारः ॥

*ह्रस्वदीर्घयोश्च कथं परस्परापेक्षग्रहणयोरर्थेनैकतर आकारः पारमार्थिकः स्यात् ? ॥ § 8825

ज्ञानानां तु भिन्नत्वात् विचित्रवासनाभेदसहकारिरूपानुविधानेन जायमानानां न किंचिदपि विरोधः ॥ § 8826

तस्मात् ज्ञानमेवेदं सर्वत्र तथा तथा प्रतिभाति, न तद्व्यतिरिक्तो ऽर्थो नाम किंचिदिति ज्ञान एव चैकत्रायं प्रमाणप्रमेयप्रमितिव्यवहारः परिसमाप्यते । तस्य हि विषयाकारता प्रमेयम्, ग्राहकाकारता प्रामाणम्, स्वसंवित्तिश्च फलमिति । यथोक्तम्— § 8827

यदाभासं प्रमेयं तत् प्रमाणफलते पुनः ।
ग्राहकाकारसंवित्त्योः त्रयं नातः पृथक्कृतम् इति ॥§ 8829

तदिदं अनाद्यविद्यावासनाविलासविपर्यासिततत्त्वदर्शनतया ज्ञानमेव ग्राह्यग्राहकसंवित्तिभेदवदिव लक्ष्यते । अविद्याविरतौ तु स्वच्छमेव तत्संपद्यते, न किंचिद्वेति ॥ § 8830

तदुक्तम्— § 8831

(?')नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥§ 8833

तथा— § 8834

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥§ 8836

II.496/KSV

इत्यर्थरूपरहितं संविन्मात्रं किलेदमिति पश्यन् ।
परिहृत्य दुःखसन्ततिं अभयं निर्वाणमाप्नोति ॥§ 8838

१० ] रा— nyāma-wit_kha
१५ ] वै— nyāma-wit_ca
२३ ] यमे— nyāma-wit_kha
३ ] संसृ— nyāma-wit_kha

१ *] ह्रस्वत्वदीर्घत्वादिकं बुद्धिकृतमिति हि सर्वसंमतम् ॥

७ संवित्तिश्च ] बौद्धाः किल नैरात्म्यवादिनः । अतः प्रमाता इति विभागः नास्ति

## विज्ञानाद्वैतनिरासः

अत्राभिधीयते—न खल्वेक एव बोधात्मा ग्राह्यग्राहकतयोभयस्वभावो भवितुमर्हति । ग्राह्यग्राहकरूपयोरितरेतरविसदृशत्वेन एकत्र समावेशानुपपत्तेः । तथा हि—नीलज्ञानम्, पीतज्ञानम्, शुक्लज्ञानमिति नीलपीताद्युपजननापायेऽप्यनुवर्तमानबोधरूपतया नीलादिविलक्षणमन्वयव्यतिरेकाभ्याममवधार्यते ॥ § 8839

अपि च ज्ञानम् अहंकारास्पदम् आनन्दादिस्वभावं स्वकर्मणि च सव्यापारमिव भवद्भिरभ्युपगतम् । अर्थस्तु नैवमात्मक इति कथमनयोरभेदः ॥ § 8840

## प्रतीयमानः आकारः अर्थस्यैव

यद्यपि ज्ञानमिदम्, अयमर्थ इत्येवमाकारद्वयप्रतिभासो नास्ति, *तथाप्ययमेकोऽप्याकारः प्रतिभासमानः प्रकाश्य एव प्रतिभाति, न प्रकाशकः । इदं नीलमिति ग्राहकाद्विच्छिन्न एव ग्राह्याकारोऽवभासते, न त्वहं नीलमिति तदैक्येनावभासोऽस्ति इति ॥ § 8841

II.497/KSV

अपि च प्रकाश्यस्य नीलादेः प्रकाशकबोधाधीनं युक्तं नाम ग्रहणम् । बोधस्य तु तद्ग्राहकस्य तदा किंकृतं ग्रहणमिति चिन्त्यम् । न बोधान्तरनिबन्धनम्, अनवस्थाप्रसङ्गात् । नापि स्वप्रकाशं ज्ञानम्, अहं नीलमित्यप्रतिभासात् ॥ § 8842

## अर्थस्य प्रकाशसंभवाक्षेपः

ननु ! नैव ग्राह्यग्राहकयोरन्यत्वमिति । योऽयं ग्राह्यावभास इति भवताऽभ्युपगतः, स एव ग्राहकावभासः । ग्राहकादन्योऽहि ग्राह्यः जडात्मा भवेत् । ग्राहकस्तु प्रकाशस्वभावः, ग्राहकत्वादेव । द्वयप्रतिभासश्च नास्तीत्युक्तम् । तत्रान्यतरस्य प्रतिभासने जडप्रकाशयोः कतरस्यावभासितुं युक्तमिति चिन्तायां, बलात् प्रकाश एव प्रकाशते, न जडः । निराकारश्च न प्रकाशः प्रकाशत इति तस्मिन् साकारे प्रकाश्यमाने कुतो जडात्मा तदतिरिक्तोऽर्थः स्यात् ॥ § 8843

---

४ ] को— nyāma-wit__kha
७ ] णा— nyāma-wit__kha; nyāma-wit__gha
१३ ] श— nyāma-wit__kha
८ ] काश— nyāma-wit__kha
१० ] श— nyāma-wit__kha

---

६ भावं ] स्वकर्मणि—स्वस्य स्वेन विषयीकरणे । स्वप्रकाशं हि ज्ञानम् । स्वप्रकाश मित्युक्ते त्रिपुटीरहितमित्येवार्थः । इतरत्तु व्यावहारिकम् ॥
९ *] आकारद्वयाप्रतिभासमात्रेण आकारद्वयाभावः न सिद्ध्यति । प्रतीयमानस्त्वाकारः अर्थस्यैव, बाह्यतयाऽनुभवात् । आन्तरं तु ज्ञानम् अनुव्यवसायगम्यम् ॥
१९ डात्मा ] ग्राहकस्याजडत्वात् ॥

## अर्थप्रकाशे ज्ञानप्रकाशासंभवप्रदर्शनम्

तदिदमपेशलम्—उपायेनोपेयनिह्नवस्याशक्यकरणीयत्वात् । रूपस्य हि प्रकाशकं चक्षुः । न चक्षुरेव प्रकाशतामित्युक्त्वा रूपमपह्नोतुं शक्यते । तदिदमर्थस्य मूर्तिद्रवत्वकाठिन्यादिधर्मविशेषितात्मनः तद्विपरीतस्वच्छस्वभावं ज्ञानं प्रकाशकम्, न तदेव चक्षुर्वत् तदाऽवभासितुमर्हति च ॥ § 8844

## ज्ञानानवभासेऽपि अर्थप्रकाशसंभवः

ननु ! चक्षुर्वत् उपायत्वं ज्ञानस्य प्रकाशस्वभावत्वात् । चक्षुर्जन्यो हि प्रकाशो नाम ज्ञानमुच्यते, न चागृहीतः प्रकाशः प्रकाश्यं प्रकाशयतीति— II.498/KSV सत्यम्—वक्षुर्जन्यः प्रकाशः ज्ञानमिष्यते । स तु प्रकाशः रूपादिविषयप्रकाशः, न प्रकाशप्रकाशः । न हि चक्षुषा प्रकाशः प्रकाश्यते, अपि तु रूपं प्रकाश्यते । तत्र यद्रूपमुच्यते, स विषयो ग्राह्यः; यत्तत्प्रकाशते इत्युच्यते, स प्रकाशः ज्ञानं ग्राहकम् । *तदुत्पत्तिमात्रेण च रूपं प्रकाशितं भवतीति न प्रकाशो ग्रहणमपेक्षते ॥ § 8845

## ज्ञानप्रकाशे बाह्यविषयानवभासप्रसङ्गः

ननु ! उक्तमत्र नानुपलब्धायां बुद्धावर्थः प्रकाशते— § 8846

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति§ 8847

इति—तदयुक्तम्—अप्रत्यक्षोपलम्भस्य च प्रत्युत अर्थदृष्टिः प्रसिद्ध्यति । उपलम्भोत्पाद एव अर्थदृष्टिः, न पुनरुपलम्भदृष्टिः ॥ § 8848

ननु ! उपलब्धेरग्रहणे तदुत्पादनुत्पादयोः अविशेषात्, अनुत्पन्नोपलम्भस्याप्यर्थः प्रत्यक्षः स्यादिति सर्वसर्वज्ञत्वप्रसङ्गः—तदिदमतिसुभाषितम्—अर्थप्रकाशात्मैव खलूपलम्भः । स कथमुत्पन्नादनुत्पन्नो न विशिष्येत । तस्मात् अर्थप्रत्यक्षीकरणात्मकत्वात् ज्ञानस्य तदुत्पाद एवार्थप्रत्यक्षता, न तद्ग्रहणमिति अगृहीतमेव ज्ञानमर्थप्रकाशकमिति युक्तम् ॥ § 8849

---

१५--१६ ] स्व— nyāma-wit_kha

११ ] षः— nyāma-wit_kha
१ ] त— nyāma-wit_kha
३ ] द उ— nyāma-wit_kha

५ ] मनु— nyāma-wit_kha
५ ] दुत्पन्नेन विशे— nyāma-wit_kha

---

१० *] मात्रेणेति—स्वरूपसदेव ज्ञानमर्थप्रकाशकम्, न तु ज्ञातं सत्, चक्षुरिन्द्रियवदेव ॥

## ज्ञानाग्रहण एवार्थग्रहणम्

यत्तु उपायत्वात् ज्ञानस्य पूर्वं ग्रहणमुच्यते—तत्, चक्षुरादिभिरनैकान्तिकमित्युक्तम् ॥ § 8850
II.499/KSV

गृहीतं यदि च ज्ञानं भवेदर्थप्रकाशकम् ।
धूमवद्दीपवद्वेति वक्तव्यं, यदि धूमवत् ॥§ 8852

भवेदर्थानुमेयत्वं तत्त्वयैव च दूषितम् ।
आकारद्वयसंवित्तिविरहान्न च दीपवत् ॥§ 8854

घटं दीपेन पश्यामीत्यस्ति द्वितयवेदनम् ।
न तु ज्ञानेन विज्ञेयं जानामीति द्वयग्रहः ॥§ 8856

## स्वप्रकावस्त्वसंभवः

यदपि प्रकाशत्वात् ज्ञानस्य प्रदीपवत् पूर्वं ग्रहणमुक्तम्—तदपिव्याख्येयम्—प्रकाशत्वादिति कोऽर्थः ? प्रकाशयतीति प्रकाशः, तस्य भावः प्रकाशत्वमिति—तत् चक्षुरादिभिरनैकान्तिकमुक्तमेव ॥ § 8857

अथ प्रकाशनं प्रकाशः, तर्हि प्रकाशत्वादिति असिद्धो हेतुः । न ह्यर्थ ग्रहणकाले बुद्धेः प्रकाशनमस्ति ॥ § 8858

अथ प्रकाशशब्दो बोधपर्याय एव । प्रकाशत्वात् बोधरूपत्वादित्यर्थः, तदा साधनविकलो दृष्टान्तः, प्रदीपस्य बोधरूपत्वाभावात् । अतश्च स्वसंवेदनपक्षो न युक्तियुक्तः, स्वतः प्रकाशस्य कस्य चिदप्यदृष्टत्वात् ॥ § 8859

## स्वप्रकाशपदार्थस्वरूपम्

ननु ! ज्ञानशब्ददीपाः त्रयः स्वपरप्रकाशा इत्याहुः—तदयुक्तम्— शब्द-
II.500/KSV दीपयोः स्वग्रहणेऽर्थप्रकाशने च सामग्र्यन्तरसव्यपेक्षत्वात् । शब्दः अर्थप्रकाशने समयग्रहणमपेक्षते, स्वप्रकाशने तु श्रोत्रम् । दीपोऽपि चक्षुराद्यपेक्ष एव गृह्यते, ग्राहयति चार्थम् ॥ § 8860

८ ] अरूप— nyāma-wit_kha
११ ] चे— nyāma-wit_kha
१४ ] पंच— nyāma-wit_kha
२ ] प्र— nyāma-wit_kha
६ ] न वो— nyāma-wit_ca
९ ] प्रकाशाः स्व— nyāma-wit_ca
११ ] त्रादि— nyāma-wit_kha; nyāma-wit_ca

१५ भावात् ] अबोधरूपस्याप्यर्थप्रकाशकत्वं दीपादेदृष्टम् ॥

इयांस्तु विशेषः—घटादिग्रहणे आलोकसापेक्षं चक्षुः प्रवर्तते । आलोकग्रहणे तु निरपेक्षमिति । नैतावता दीपस्य स्वप्रकाशता स्यात् । *इत्थं च मार्जारादिनक्तंचरचक्षुरपेक्षया सर्व एव घटादयः स्वप्रकाशाः स्युः ॥ § 8861

ज्ञानस्य परप्रकाशकत्वमेव दृश्यते, न स्वप्रकाशकत्वम्, अर्थप्रकाशकाले तदप्रकाशस्य दर्शितत्वात् ॥ § 8862

मुधैव नस्माद्गणितस्त एते
त्रयः प्रकाशाः स्वपरप्रकाशाः ।
प्रदीपबोधध्वनिनामधेयाः
विभिन्नसामग्र्यभिवेद्यवेदकाः ॥§ 8866

आत्मप्रत्यक्षवादिनां तु अवस्थाभेदेन ग्राह्यग्राहकांशयोर्भेदो विद्यत एवेति सर्वथा न स्वप्रकाशं ज्ञानम् ॥ § 8867

## अर्थग्रहणवेलायां न ज्ञानग्रहणसंभवः

यदप्यभिहितं—उत्पद्यमानमेव ज्ञानं अनपेक्षत्वात्, अप्रतिबन्धत्वाच्च तदैव गृह्यते, न वा कदाचिदिति—तदप्यसांप्रतम्—तदानीं तद्ग्रहणसामग्र्यभावात् ॥ § 8868

II.501/KSV

न चाविबन्धमात्रेण प्रतीतिरवकल्पते ।
उपायविरहेणापि तदा ज्ञानस्य न ग्रहः ॥§ 8870

न च जैमिनीया इव वयं ज्ञानं नित्यपरोक्षमाचक्ष्महे । ज्ञातो मयाऽयमर्थः इति कालान्तरे तद्विशिष्टार्थग्रहणदर्शनात् ॥ § 8871

शुक्लः पट इति ज्ञाने यथाऽसौ भाति तद्गुणः ।
तथा ज्ञातोऽर्थ इत्यत्र भात्यर्थो धीविशेषणः ॥§ 8873

न विशेष्ये च संवित्तिः अगृहीतविशेषणा ।

---

१६ ] श— nyāma-wit__kha
१६ ] श— nyāma-wit__kha
१८ ] द्र— nyāma-wit__kha
१९--२१ ] शाः— nyāma-wit__kha
२३ ] विज्ञा— nyāma-wit__kha
४ ] वि— nyāma-wit__kha
४ ] गम्य— nyāma-wit__kha

---

२ *] इत्थं च—सामग्रीन्यूनतामात्रेण । मार्जारादीनामालोकापेक्षाया अभावेन, तेषां घटादयोऽपि स्वप्रकाशा भवेयुः ॥
१० तु] पश्यत्यात्मानमात्मना इत्यादौ हि कर्तृत्वकर्मत्वकरणत्वादिकं उपाधिभेदेन स्पष्टम् ॥
१५ चा] अविबन्धः—अप्रतिबन्धः । प्रतिबन्धकाभावमात्रं न हि कार्यजनकम् ॥
१८ रे] कालान्तरे—अनुव्यवसायकाले ॥

नानुसायधियं वेत्थं प्रतीयेत क्रमाग्रहात् ॥§ 8875

न च नित्यपरोक्षा बुद्धिः अनुमातुमपि न शक्यत इति च विचारितमेव ॥ § 8876

तदलमनया कथया। किमिति शाक्यसुत्सृज्य श्रोत्रियमिदानी मनुयुंज्महे ॥ § 8877

## ज्ञानाग्रहणेऽपि विषयग्रहणम्

अतश्च यदुक्तं ज्ञानपृष्ठावमर्शदर्शनात् ज्ञानग्रहणपूर्वकमर्थग्रहणमिति — तन्न सार्वत्रिकम्, अपि तु क्वचिदेव ज्ञानविशिष्टार्थसंवेदनात् तथाऽभ्युपगम्यते। तस्मात् अर्थग्रहणात् पूर्वं ज्ञानस्यानवभासात् निराकारावसायविरहाच्च ज्ञानस्यैवायमाकार इति कदाशाप्रलपितमेतदरुणाम्बराणाम् ॥ § 8878

II.502/KSV

## अर्थस्य कल्पनीयत्वं न

यत्पुनरभ्यधायि—ज्ञानाकारपक्षे कल्पनाऽल्पीयसीति—तत्र यथोक्तनीत्या प्रत्यक्षगम्ये बाह्ये ग्राह्येऽर्थाकारे कल्पनोक्तिः कीदृशी। कीदृशं वा तदल्पत्वम् महत्त्वं वेति ॥ § 8879

## अर्थापलापे ज्ञानस्याप्यपलापः स्यात्

उभयसिद्धत्वमपि यदवादि ज्ञानस्य—तत्र यदि प्रमाणायत्ता वस्तुस्थितिः, अर्थोऽप्युभयसिद्ध एव। इच्छाद्वेषनिबन्धनायां तु वस्तुस्थितौ ज्ञानमपि कथमुभयसिद्धं स्यादिति यत्किंचिदेतत् ॥ § 8880

## ज्ञानाकारमन्तरापि प्रतिकर्मव्यवस्थासिद्धिः

यत्पुनरिदमभिहितं—अभ्युपगम्यापि बाह्यमर्थं अप्रत्याख्येयः प्रतिकर्मव्यवस्थासिद्धये ज्ञानस्याकारयोग इति—तदपि न सांप्रतम्—प्रतिकर्मव्यवस्थायाः प्रकारान्तरेणाप्युपपत्तेः ॥ § 8881

---

११ ] मा— nyāma-wit__kha
११ ] भ्र— nyāma-wit__kha
१७ ] कश्चि— nyāma-wit__ca
१७ ] निष्ठा— nyāma-wit__kha
२१ ] ह्ये— nyāma-wit__ca

---

१ ना ] अनुसायः—अनुव्यवसायः ॥
१५ सिद्धं ] शून्यवादिना विवाद इति शेषः। न हि विवादाविषयः कश्चिदर्थो वर्तते ॥
१८ स्थायाः ] प्रकारान्तरेण—विषयीकरणमात्रेण ॥

यद्यपि अनेकसन्निधाने नीलज्ञानमुपजायते । यद्यपि च बोधस्वरूपत्वमशेषसाधारणम्, तथापि नीलेनैव कर्मकारकेण तदुपजनितमिति नीलनिष्ठमेवावतिष्ठते । चक्षुरादिनाऽपि तज्जनितमिति चेत्—सत्यं जनितम्—न तु कर्मणा सता । नीलेन तु कर्मभूतेन तदुत्पाद्यत इति तदेकविषयमेव भवति । कुत एष नियम इति चेत्, वस्तुस्वभावकृत एव । आकारपक्षेऽपि समानोऽयं पर्यनुयोगः ॥ § 8882
II.503/KSV

यदुच्यते—किमिति नीलमेव कर्मकारकम्, किमिति वा कर्मविषयमेव ज्ञानमिति—तत्र वस्तुस्वभावैरुत्तरं वाच्यम् ॥ § 8883

*आकारमपि च ज्ञानमुपाददानं कर्मकारकस्यैव कथमुपाददीत, न कारकान्तरस्य ? इत्यत्रापि वस्तुस्वभाव एव शरणमिति ॥ § 8884

## ज्ञानं प्रति विषयस्य कारणत्वम्

अर्थस्य च ज्ञानजनकत्वं अन्वयव्यतिरेकाभ्यामवगम्यते ॥ § 8885

यदा हि देवदत्तार्थी कश्चिद्व्रजति तद्गृहम् ।
तत्रासन्निहितं चैनं गत्वाऽपि न स पश्यति ॥§ 8887

क्षणान्तरे स आयान्तं देवदत्तं निरीक्षते ।
तत्र तत्सदसत्त्वेन तथात्वं वेत्ति तद्धियः ॥§ 8889

अनागते देवदत्ते न देवदत्तज्ञानमुदपादि, तस्मिन्नागते च तदुत्पन्नमिति तद्भावभावित्वात् तज्जन्यं तदवसीयते । इत्थं च तज्जन्यत्वेनैव तत्र नियमसिद्धेः अलमाकारकल्पनया ॥ § 8890

एतेन पुरुषप्रवृत्तिरपि नियतविषया व्याख्याता । साधकतमत्वं तु सामग्र्याः प्रमाणसामान्यलक्षणे निर्णीतमेव ॥ § 8891

यस्तु लौकिको व्यपदेश उदाहृतः सोऽपि व्यभिचरति । नीलोऽर्थोऽयम्, यतस्तद्विषयं ज्ञानमुत्पन्नम् इत्यपि न व्यपदिशन्ति लौकिकाः ? तस्मादर्थे सत्यपि साकारं ज्ञानमेषितव्यमिति यदुक्तं— तदनुपपन्नम् ॥ § 8892
II.504/KSV

## सहोपलंभात् न ज्ञानार्थयोरभेदः

७ ] द— nyāma-wit_kha; nyāma-wit_ca; nyāma-wit_gha
१० ] क— nyāma-wit_kha
११ ] त— nyāma-wit_kha
१५ ] अर्थ— nyāma-wit_kha
६ ] क— nyāma-wit_kha
७ ] न तत्— nyāma-wit_kha

९ *] ज्ञानं च आकारम् उपाददानमपि—इत्यन्वयः ॥
१८ या] ज्ञानं हि गुण । न हि द्रव्यस्येव तस्याकारः संभवतीति सारम् ॥

यदप्यवर्णि— § 8893

सहोपलंभनियमादभेदो नीलतद्धियोः§ 8894

इति—तदपि बालभाषितमिव नः प्रतिभाति, अभेदे सहार्थानुपपत्तेः ॥ § 8895

अथ एकोपलंभनियमात् इति हेत्वर्थो विवक्षितः—तदयमसिद्धो हेतुः, नीलादिग्राह्यग्रहणसमये तद्ग्राहकानुपलम्भात् । ग्राहकाकारानु वेधरहितत- द्विच्छिन्नबाह्यग्राह्यमात्रप्रतिभास एवायं नीलमिदम् इत्यादिः दर्शितः ॥ § 8896

## सहोपलंभोऽप्यसिद्धः

क्वचिच्च ग्राह्याकारानुपश्लिष्टकेवलग्राहकावमर्शनमपि दृश्यते— न स्म- रामि, मया कोऽपि गृहीतोऽर्थस्तदा इति । तदेवमितरेतरविभक्त- ज्ञानार्थाकारसंवेदनात् कथम् ॥ § 8897

एकोपलम्भनियमादभेदो नीलतद्धियोः§ 8898

इत्युच्यते । नीलतद्धियोः इति वदता भवताऽप्येष भेद एव निर्दिश्यते ॥ § 8899

परमतानुवादमात्रमेतदिति चेत्—न—अभेदे पृथङ्निर्देशस्याप्यघटमान- त्वात् । तस्मादपि न ज्ञानस्यायमाकारः ॥ § 8900

## ज्ञानार्थयोः भेदः अनुभवसिद्धः

यदप्युक्तं—असत्यपि बाह्येऽर्थे स्वप्नगन्धर्वनगरमायादिषु ज्ञानस्याकारव- त्ता दृश्यत इति तस्यैवायमाकारो युक्त इति—तदपि दुराशामात्रम् —सर्वत्र ज्ञानाद्विच्छिन्नस्व ग्राह्याकारस्य प्रतिभासनात् ॥ § 8901
II.505/KSV

---

१३ ] न्नो— nyāma-wit__kha nyāma-wit__ca
५ ] दि— nyāma-wit__kha;

---

४ ये] तद्ग्राहकस्य—ज्ञानस्य अनुपलंभात्
॥

तथा हि—भ्रमज्ञानेषु चतुष्टयी गतिः—आत्मख्यातिः, असत्ख्यातिः, अख्यातिः, विपरीतख्यातिर्वा ॥ § 8902

तत्र रजतमिदम् इति सामानाधिकरण्येनैकार्थप्रतिभासात्, तन्मते च संवित्तेरपरोक्षत्वात् रजताधिगमाभिमानेन तदर्थिनस्तत्र प्रवृत्तेः, बाधकप्रत्ययस्य तथाविधबोधनिषेधपरत्वेन प्रादुर्भावात् न तावदख्यातिरिति प्रागेव प्र. सं. ४५६ प्रासाधितमेतत् ॥ § 8903

## असत्ख्यातिनिरासः

असत्ख्यातिरपि नास्ति, एकान्तासतः खपुष्पादेः प्रतिभासायोगात् । देशकालव्यवहितानुभूतपूर्वपदार्थविषय एव भ्रान्तोऽपि प्रत्ययः प्राणभृतां भवति, न त्वत्यन्तासदर्थविषयः ॥ § 8904

## सर्वेषां भ्रमाणां सालम्बनत्वम्

तथा हि—द्विविधा भ्रान्तिः—बाह्येन्द्रियजा, मानसी च । तत्र बाह्येन्द्रियजे भ्रमज्ञाने विषयदोषात्, इन्द्रियदोषाद्वा समुत्पद्यमाने न क्वचित् निरालम्बनता दृश्यते । भास्वररूपसादृश्येन हि विषयदोषेण शुक्तिका रजतमिति परिस्फुरति । मरुस्थलीपतितोत्फलितं च सावित्रं तेजः तरलतरङ्गसारूप्येण पय इति चकास्ति । इन्द्रियदोषादपि पित्तोपहतरसनस्य तिक्ततया शर्कराऽवभासते । तिमिरसीमन्तितनयनवृत्तेः चन्द्रमण्डलमेकमपि द्विधा प्रतिभाति । *तिमिरकणनिकरविवरविरचित प्रसृताश्च नयनरश्मय एव सूर्यांशुसंवलिताः सन्तः II.506/KSV सूक्ष्मतया केशकूर्चकाकाराः प्रतिभान्तीति ॥ § 8905

## मानसविभ्रमाणामपि सालम्बनत्वम्

अन्तःकरणदोषेण विभ्रमो यस्तु जायते ।
असत्यपि महेलादौ पुष्पेषुमुषितात्मनाम् ॥§ 8907

सोऽपि कश्चित् विषयदोषसहायो भवति । स चालम्बन एव प्र. सं. २२८ ॥ § 8908

---

१२ ] ध— nyāma-wit_ca
२० ] त्थि— nyāma-wit_ca
५ ] दि— nyāma-wit_ca
१०१३.६--१०१४.८ ] हा— nyāma-wit_kha

---

२ ख्यातिर्वा ] इतरख्यातीनामत्रैवान्तर्भाव इति तात्पर्यम् । वस्तुतस्तु अख्यात्यन्यथाख्यात्योरेव सर्वेषामन्तर्भावः ॥
१२ दोषेण ] भ्रमहेतुत्वात्तस्य दोषत्वेन कथनम् ॥
१५ *] तिमिरं—नयनदोषविशेषः । न तु तमः ॥
१९ पि ] महेला—महिला । पुष्पेषुः—कामः ॥

तस्याः पाणिरिति ज्ञानं यथा भवति कुत्रचित् ।
कोमलानिलकल्लोलवेल्लिते बालपल्लवे ॥§ 8910

अनपेक्षिततत्तुल्यपदार्थस्यैव या पुनः ।
मानसी मन्मथोन्मादमहिम्ना मानिनीमतिः ॥§ 8912

तस्यामपि रागादिवासनाबलोपप्लवमानस्मृत्युपस्थापितदेशकालव्यवहितोपलब्धपुरन्ध्रीरूपादिसमुल्लेखः, न त्वेकान्तासतः खरविषाणादेरिव ॥ § 8913

प्रतिभानिद्रादिमनोदोषजन्मनि स्वप्नेऽपि दृष्टपूर्वस्यैव तस्याकारस्योल्लेखः ॥ § 8914

*जालज्वलागळद्वह्निद्रवद्रव्यादिदर्शने ।
रूपमन्यस्थमन्यत्र वेत्ति न त्वसदेव तत् ॥§ 8916

तदेवं भ्रान्तिबोधेषु नास्त्यत्यन्तासतां प्रथा ।
देशकालान्यथात्वं तु केवलं भाति वस्तुनः ॥§ 8918

II.507/KSV

## असत्ख्यातिवादे विशेषः

ननु ! तत्रासतोऽर्थस्य प्रतिभासे देशान्तरादिषु सत्त्वं क्वोपयुज्यते ? देशान्तरे हि सन् असन् वा तत्र तावन्नास्त्येव सोऽर्थः । न च द्वयोरसत्त्वयोः किंचिद्विशेषः । देशकालावपि किं सन्तावसन्तौ वा प्रतिभासेते इति विकल्पनायां तथा तयोरपि तुल्यो दोषः—मैवम्—भवतोऽप्यसत्ख्यातिवादिनः किं सर्वत्रैव तदर्थासत्त्वं संमतम्, उत तद्देश एव ? तत्रासन्निधानमात्रेण तावत् क इव तव स्वार्थः ? सर्वत्रासतस्तु प्रतिभासे कुतस्त्य एष नियमः—यत् असत्त्वाविशेषेऽपि रजताद्येवासत् प्रतिभाति, न खरविषाणादीति ॥ § 8919

अयं तु द्वयोरसत्त्वयोर्विशेषः—देशान्तरादिषु सतोऽर्थस्य स्मरणाद्युपारोहेण प्रतिभासमानता युज्यते, न त्वेकान्तासत इति । एवं देशकालयोरपि सदसत्त्वविकल्पचोद्यं परिहर्तव्यम् ॥ § 8920

अतश्च किंचिदपि नात्यन्तासदर्थग्राहि ज्ञानमस्तीति किं दृष्टान्तबलेन सर्वत्रार्थशून्यता कल्प्येत ? तस्मान्नासत्ख्यातिः ॥ § 8921

---

१२ ] संवृत्त्याद्यु— nyāma-wit__kha
१३ ] पूर्वपु— nyāma-wit__kha
१६ ] ज्व— nyāma-wit__kha
१६ ] दग्धा—ख, द्वह्या— nyāma-wit__ca
७ ] दि संप्र— nyāma-wit__kha

---

९ *] जालम्—इन्द्रजालम् ॥
१४ च] द्वयोः—तद्देशासत्त्वदेशान्तरासत्त्वयोः ॥
१८ व] असत्ख्यातिरूपः ॥

## आत्मख्यातिनिरासः

आत्मख्यातेस्तु निराकरणाय सोऽयमियान् कलिः वर्तते । तत्र च बहुशः कथितं—ग्राहकाद्विच्छिन्नमेव ग्राह्यमवभासते नीलमिदम् इति, न तु तदभेदेन नीलमहम् इति । भ्रान्तिज्ञानेषु तदर्थासन्निधानात् भ्रान्तत्वमस्तु, नात्मतत्त्वग्रहणमिति ॥ § 8922

II.508/KSV

यच्चोच्यते— § 8923

यदन्तर्ज्ञेयरूपं तत् बहिर्वदवभासते§ 8924

इति—सेयं विपरीतख्यातिरेवाङ्गीकृता स्यात् । तद्वरं सैव तपस्विनी साधीयसी ॥ § 8925

## अर्थस्य ज्ञानरूपत्वासंभवः

अथ कथ्यते—ग्रहकात् सत्यं विच्छिन्नं ग्राह्यं; तत्तु ज्ञानरूपमेवेति—तत्र विच्छिन्नमिति प्रियमावेदितम् । ज्ञानत्वे तु तस्य का युक्तिः ? न च ज्ञानयोः युगपदुत्पन्नयोः क्रमभाविनोर्वा ग्राह्यग्राहकभाव उपपद्यते । यौगपद्ये सव्येतरगोविषाणवत् ग्राह्यग्राहकनियमाभावात् । क्रमपक्षेऽपि पूर्वमुत्तरस्य ग्राहकं चेत्—तदुत्पत्तितद्ग्रहणकालप्रतीक्षणात् क्षणिकतां जह्यात् । उत्तरमपि यदि पूर्वस्य ग्राहकं तदापि सैव वार्ता । तावत्कालमवस्थितिमन्तरेण तद्ग्राह्यतानुपपत्तेः । न च ज्ञानत्वं नाम सामान्यं ग्राह्यग्राहकयोरनुगतम्, गोत्वमिव शाबलेयादौ, विभाति । अतो विच्छिन्नश्चेत् ग्राहकात् ग्राह्यांशः, सोऽर्थ एव भवेदिति न ज्ञानस्यायमाकारः ॥ § 8926

## आकारस्य संसर्गधर्मत्वाभावः

१५ ] र्थ— nyāma-wit_kha
१ ] त्वज्ञान— nyāma-wit_kha
६ ] स्थि— nyāma-wit_kha
८--९ ] ग्राह्यरत्सोऽन्य— nyāma-wit_kha

७ कात् ] सत्यम्—इत्यर्धाङ्गीकारे ॥
९ च ] ग्राह्यकस्य ग्राह्यस्य च उभयोः ज्ञानरूपत्वाङ्गीकारात् ज्ञानयोः इति ॥
११ ग्राह ] सत्यम्—इत्यर्धाङ्गीकारे ॥

यत्तु संसर्गधर्मः आकारो न भवतीति भाषितं, तद्युक्तमेव— § 8927

न कुण्डदधिवत् कश्चित् संसर्गोऽस्त्यर्थबोधयोः ।
तत्कृताकारवत्ता वा प्रागनाकारयोस्तयोः ॥§ 8929

II.509/KSV

तदेवं शाक्योक्तयुक्तिशकलदौर्बल्यात् सर्वत्र विच्छेदप्रतिभासात् ज्ञानस्य स्दतो वैवित्र्यानुपपत्तेः अर्थस्यैवायमाकार इति सिद्धम् ॥ § 8930

## एकस्मिन्नर्थे न विरुद्धाकारोल्लेखः

यत्तु अर्थाकारपक्षे चोदितं—एकत्रार्थे नक्षत्रं तारका तिष्य इति परस्परविरूद्धाकारसमावेशो न युक्त इति—तत्रोच्यते—अनुपपन्नमिति नः क्क संप्रत्ययः, यत् न प्रमाणेनावगतं विरुद्धमपि तदवबुद्ध्यामहे, यदेकत्र निविशमानं न पश्यामः । तदिह यद्यबाधितेन ज्ञानेन विस्पष्टमाकारत्रयमेकत्र गृह्यते, तत् कथमनुपपन्नं स्यात् ? कथं वा विरुद्धमिति ॥ § 8931

## नानाकारेष्वन्यतमस्य कल्पितत्वसंभवः

अथैकं सम्यक्प्रमाणपरिनिश्चितरूपं, इतरत् काल्पनिकमिति प्रतीयते —तदेवमस्तु, को दोषः ? दृष्टश्च चित्रादावनेकवर्णसमावेशः । न चैकत्र विरोधं अविरोधं वा दृष्टवा सर्वत्र तत्कल्पनमुचितम् । अबाधितावगतिनिबन्धना हि वस्तुस्थितयो भवन्ति, न कल्पनानिर्मिताः ॥ § 8932

## शब्दसाधुत्वं व्याकरणाधीनम्

अपि वा वस्तुताद्रूप्यसदसत्तानपेक्षया ।
शब्दप्रयोगसाधुत्वं अन्वाख्यायेत केवलम् ॥§ 8934

दाराः इति नैकस्याः स्त्रीव्यक्तेः पुंस्त्वंहुवं त्व वा विद्यते । शब्दस्त्वेष तत्र प्रयुज्यमानः साधुर्भवति ॥ § 8935

II.510/KSV

नार्थासंस्पर्शिता चास्य तावता व्यवतिष्ठते ।
यथैतदात्मकं वस्तु तथा शक्नोति भाषितुम् ॥§ 8937

१३ ] कौशल— nyāma-wit__kha
१५ ] आ— nyāma-wit__kha
१९ ] वि— nyāma-wit__kha
२ ] वल— nyāma-wit__kha
१० ] असौ— nyāma-wit__kha

८ तं] पदानां तत्तल्लिङ्गकत्वं व्याकरणशास्त्रसिद्धम् । अर्थेषु व्यक्तिभेदेन विरूद्धधर्मवत्त्वं तु भानमात्रम्; न वस्त्वन्वयि ॥

## सर्वस्य वस्तुनः अनेकरूपत्वम्

परिव्राड्भृतीनां च कुणपादिप्रतीतयः ।
अर्थस्यानेकशक्तित्वात् नावहन्त्यर्थशून्यताम् ॥§ 8939

किं न भक्षयितुं शक्या नारी कौलेयकेन सा ।
किं वा न शमयत्येषा कामिनो मदनज्वरम् ॥§ 8941

शवाद्वा केन रूपेण सा विशिष्येत योगिनः ।
धीत्रयं तु न सर्वेषां अभावात् सहकारिणः ॥§ 8943

प्रतिप्राणिनियतानेकविधवासनाभेदसहकारिसापेक्षो हि तस्य तस्य ज्ञानस्यात्मलाभ इति न सर्वेषां सर्वसारूप्येण ज्ञानम् ॥ § 8944

## अर्थानां वासनाकल्पितत्वासंभवः

यद्येवं वासनाभेद एव विविधप्रतिभोद्भवहेतुर्भवति, किं अर्थकल्पनया ? अयि साधो ! किमद्यापि न परिहरसौ सुचिरं गुणितां कल्पनावाचोयुक्तिम् । न ह्यर्थः कल्प्यते, अपि तु प्रतिभासत एव । बहुरूपस्य तु तस्य एकतमरूपपरिच्छेदनियमे किमपि वासनादि कारणं क्वचित् कल्प्यते । कस्तावताऽर्थनिह्नवस्यावसरः ॥ § 8945
II.511/KSV

## वासनाया दुर्निरूपत्वम्

यच्चोक्तं वासनाभेद एव ज्ञानवैचित्र्यकारणम्, इतरेतरकार्यकारणभावप्रबन्धश्च बीजाङ्कुरवदनादिः ज्ञानयासनयोरिति—तदप्यघटमानम्—केयं वासना नाम ? ज्ञानादव्यतिक्ता चेत्, साऽपि *स्वच्छरूपत्वात् न ज्ञानकालुष्यकारणं भवेत् । ज्ञानव्यतिरिक्ता चेद्वासना तद्वैचित्र्यहेतुश्च सोऽर्थ एव पर्यायान्तरेणोक्तः स्यात् ॥ § 8946

## वासनायास्संस्काकाररूपत्वम्

१३ ] वा— nyāma-wit_ca
१७ ] स— nyāma-wit_kha
१७ ] स्य— nyāma-wit_kha
२ ] ति— nyāma-wit_ca
५ ] काश— nyāma-wit_kha
६ ] यद्येत्थं— nyāma-wit_kha

२ क्तित्वात् ] अनेककार्यकारित्वादित्यर्थः ॥
१० सुचिरं ] गुणितां—अभ्यस्ताम् ॥
१६ *] ज्ञानादव्य तिरिक्तत्वादेव स्वच्छत्वम् ॥

अपि च वासना नाम विषयानुभवसमाहितः संस्कार इति लोके प्रसिद्धिः । संस्कारश्च यदनुभवघटितः, तत्रैव क्वचिदवसरे स्मरणमुपजनयति । न पुनरसदेव वैचित्र्यमिदमीदृशमावहति ॥ § 8947

किंच भिक्षुपक्षे क्षणिकत्वेन ज्ञानानां ग्राह्यग्राहकभाव इव वास्यवासकभावोऽपि निराकर्तव्यः । स्थायिनो हि भावास्तिलादयः स्थायिभिरेव चम्पकादिभिः वास्यन्ते । न तूत्पद्य सपद्येव विनश्यद्भिः ज्ञानैः तादृश्येव ज्ञानानीति ॥ § 8948

निरन्वयविनाशाच्च न तदंशोऽनुवर्तते ।
यतः कथञ्चिद्वास्येत पूर्वेण ज्ञानमुत्तरम् ॥§ 8950

## वासनावादेऽव्यवस्थापत्तिः

अपि च एकत्र देवदत्तसन्ताने वासनातः सहस्राणि ज्ञानवैचित्र्यकारीणि भवेयुः । न हि गोवासनातो हस्तिज्ञानमुदेति ॥ § 8951
II.512/KSV

अनन्तत्वेऽपि खल्वासां आरम्भे नियमः कुतः ?
असमंजसकारित्वे व्यवहारस्य विप्लवः ॥§ 8953

धूमज्ञानसमुत्पादे धूमवासनया कृते ।
किं तदा न जलज्ञानं जनयेज्जलवासना ॥§ 8955

वासनाश्च वासनासन्तानारम्भहेतव एव भवेयुः, न पुनरनुभवज्ञानमाधातुमुद्यच्छेयुः । सदृशात् सदृशोत्पत्तिरिति हि भवतां दर्शनम् ॥ § 8956

## वासनाया आश्रयानुपपत्तिः

अपि च न निराधारा वासना आसते । न च भवत्पक्षे तदाधारः कश्चन संभवति, भङ्गुरत्वेन, ज्ञानस्य तदाश्रयत्वानुपपत्तेः । एकज्ञानाश्रितत्वे सर्वासां वासनानां तद्विनाशे नाशः स्यात् । प्रतिवासनमाश्रयाभेदे तदानन्त्येनानियमश्च शतशाखः ॥ § 8957

## आलयविज्ञानप्रवृत्तिविज्ञानभेदनिरासः

११ ] ना— nyāma-wit__kha
१२ ] मनुभव— nyāma-wit__kha

४ ] सा— nyāma-wit__ca
४ ] स्य— nyāma-wit__ca
७ ] इव— nyāma-wit__ca
११ ] स्त्यम— nyāma-wit__kha

११ वेयुः ] ज्ञानानि इति कर्तृ ॥
१२ त्वासां ] आरंभे—उत्तरज्ञानोत्पादने ॥

न चालयविज्ञानं नाम किंचिदस्ति । सत्यपि तस्मिन्नशेषवासनासहस्र-समाश्रये तत्क्षणिकत्वात्, सकृदेव तथाविधवासनाकुसूलज्ञानविनाशः स्यात् । पुनरुत्पादेऽपि कथं तथाविधं ज्ञानमेव समुत्पाद्येत । त तु गवाश्वादिज्ञान-क्रमनियमो भवेत् इति सर्वथा सङ्कटोऽयं पन्थाः । तस्मात् मृगतृष्णिकैषा तपस्विनां वासनात एव लोकयात्रासिद्धेः किं बाह्येनार्थेनेति ॥ § 8958

II.513/KSV

कृतमतिवाचालतया चिरमपि निपुणैर्निरूप्यमाणोऽतः ।
अर्थस्यैव न बुद्धेः सिध्यति नीलादिराकारः ॥§ 8960

एकश्च बोधः प्रमितिप्रमाण-
प्रमेयरूपाणि कथं बिभर्ति ?
भिन्नं प्रमाणात् फलमभ्यधायि
प्रत्यक्षचिन्तावसरे पुरस्तात् ॥§ 8964

## शून्यवादिभिः अवयवातिरिक्तावयविखण्डनम्

ये तु ब्रुवते—*तिष्ठतु तावत् प्रमाणमार्गं इति प्रमेयमेव विकल्पयन्तो न ब्राह्ममर्थं कंचन निरपवादं प्रतिपद्यामहे । तथा हि—न तावदयं अवयवी घटादिरवकल्पते, अवयवव्यतिरेकेणावयविनोऽनुपलम्भात् । यो हि यस्माद्व्यतिरिक्तः, सः तदधिष्ठितदेशव्यतिरिक्तदेशाधिष्ठान उपलभ्यते, घटदिव पटः । न चैवमवयवेभ्यः पृथग्देशो दृश्यते अवयवी । तदग्रहणे च तद्बुध्यभावात् । घटाग्रहणेऽपि पटो गृह्यते, नत्ववयवानुपलब्धाववयवीति कथं स तेभ्यो भिद्येत ॥ § 8965

## सर्वावयवैर्नेन्द्रियसन्निकर्षः

अवयवग्रहणानुपपत्तेश्च । न हि सर्वे तदवयवाः शक्यन्ते ग्रहीतुमर्वाग्भागवर्तिन एव गृह्येरन्, न मध्यपरभागगता इति ॥ § 8966

बुध्या विभज्यमाने चानुपलम्भात् । यदा हि पटं पाणौ निधाय बुध्या विविनक्ति, एष तन्तुः एष तन्तुरिति, तदा प्राच्यादंचलात्प्रभृति प्रतिचीन- II.514/KSV

१५ ] दे— nyāma-wit_kha
१५--१६ ] क— nyāma-wit_kha
३ ] न्न— nyāma-wit_kha
३ ] णं— nyāma-wit_ca
५ ] त्रं— nyāma-wit_kha
९--१० ] न— nyāma-wit_kha
१४--१५ ] वि— nyāma-wit_kha

५ बाह्येनार्थेनेति ] वासना अपि बाह्यार्थानालम्ब्यैव हि लब्धस्वरूपाः । वासनापदस्य संस्कारपर्यायत्वे तु न हानिः ॥

१२ *] अतिरिक्तावयविनिराकरणेन सर्वापलापस्सुसाध इति भावः ॥

मंचलं यावद्विविंचयन्नसौ तन्तुसन्ततिमेव केवलामुपलभते, न ततोऽतिरिक्तं पटावयविनम् ॥ § 8967

## अवयिनः वृत्त्यनुपपत्तिः

वृत्त्यनुपपत्तेश्च । नैकत्रावयवे कार्त्स्न्येनावयवी वर्तते, तदन्येष्ववृत्तिप्रसङ्गात् । नैकदेशेनवर्तते, स्वारम्भावयवव्यतिरिक्तदेशाभावात् । अभ्युपगमे वाऽनवस्थाप्रसङ्गात् । यैरप्येकदेशैरवयवेष्वसौवर्तते, तेष्वपि कथं वर्तते अन्यैरेकदेशैः तेष्वपि अन्यैरिति नास्त्यन्तः । *असंबद्धस्त्वेकदेशैरवयवीति कथं तद्वारेण स्वारम्भकैरपि संबध्येत । तस्मादभय्यपि नास्य वृत्तिरवयवेष्विति ॥ § 8968

## धारणाकर्षणादिकं नावयविनः, किन्तु संधातस्यैव

धारणाकर्षणादि तु अनारब्धकार्ये काष्ठमूलककार्पासादावपि दृश्यत इत्यनैकान्तिकम् । एकाकारातु प्रतीतिविकल्पमात्रम् । एकदेशावस्थानादिनिमित्तमाश्रित्य करितुरगपदातिप्रभृतिष्विव सेनेति, धवखदिरपलाशादिष्विव वनमिति, संचितेष्वभवयवेष्वेव घठ इत्यादिबुद्धिर्भविष्यती त्येवावयवावयवपर्यालोचनयाऽणुसंचयमात्रमेवावशिष्यते, नान्यत् ॥ § 8969

## संघातोऽपिनातिरिक्तः

संचयोऽपि च व्यतिरिक्ताव्यतिरिक्ततया चिन्त्यमानो नास्त्येवेत्यणव एवावशिष्यन्ते । परमाणवोऽपि— § 8970
II.515/KSV

## षड्केन युगपद्योगात्परमाणोष्षडंशता § 8971

इत्येवं विकल्प्यमाना विप्लवन्त एव । न च तैरतिसूक्ष्मैरेष व्यवहारोऽभिनिर्वर्त्यत इति । तस्माद्बाह्यस्य प्रमेयस्यैव निरूप्यमाणस्यानुपपत्तेः विज्ञानमात्रमेवेदमित्यभ्युपगमनीयम् ॥ § 8972

१८--२० ] ते— nyāma-wit__kha

४ ] प्रतीति— nyāma-wit__kha

२२ ] र— nyāma-wit__kha

६ *] येषु नास्त्यवयवी, तेषां कथं तदवयवत्वम्; अतिप्रसङ्गात् ॥

९ पि ] न हि कार्पासादि अन्त्यावयवि ॥

## अवयवातिरिक्तावयविसाधनम्

तेऽप्येवं वदन्तः प्राक्तनेभ्योऽपि भिक्षुभ्यः कृपणतरा इव लक्ष्यन्ते । अपूर्वं एष तर्कमार्गः, यत्र प्रतीतिमुत्सृज्य तर्जनीविस्फोटनेन वस्तुव्यवस्थाः क्रियन्ते ॥ § 8973

दृढेन चेत्प्रमाणेन बाधादिरहितात्मना ।
गृहीत एवावयवी किमेभिर्बालवल्गितैः ॥§ 8975

अथ नास्ति प्रमाणेन केन चित्तदुपग्रहः ।
*एतदेवोच्यतां वृत्तिविकल्पैः किं प्रयोजनम् ॥§ 8977

न च शक्नुयः पदे पदे वयमेभिरभिनवमल्पमपि किंचिदपश्यद्भिः तदेव पुनःपुनः पृच्छद्भिः शाक्यहतकैस्सह कलहमतिमात्रं कर्तुम् ॥ § 8978

## अवयविनि प्रमाणोपन्यासः

सविकल्पकं प्रत्यक्षं प्रमाणमिति साधितम् । निर्विकल्पकेनापि शब्दोल्लेखमात्ररहितं सविकल्पकग्राह्यमेव वस्तु गृह्यत इति च दर्शितम् । एकाकारविषयव्यतिरेकेण च तद्बुद्धेरेककार्यत्वैकदेशाद्यन्यथासिद्धिनिब न्ध- II.516/KSV
नत्वमपि न किंचिद्वक्तुं शक्यत इत्यपि वर्णितम् । क्वचिद्वा पृतनावनादौ बाधकोपनिपातात् एकावगतिमिथ्यात्वात्, न सर्वत्र मिथ्यात्वकल्पना युक्तेत्यप्युक्तम् । किं वा तदस्ति, यत्सामान्यसमर्थनावसरे नाकथितम् । तस्मात्तयैव नीत्याऽवयव्यपि सिद्ध एव, तद्ग्राहिणः प्रत्यक्षस्य निरपवादत्वात् ॥ § 8979

## अवयविन्याक्षेपानां परिहारः

यत्तु देशभेदेनाग्रहणात्, *तदग्रहे तद्बुद्ध्यभावादिति—तत्रावयवाश्रितत्वमेव निमित्तं, नासत्त्वम् ॥ § 8980

देशभेदेन हि ज्ञानं, *तद्देशस्य कथं भवेत् ।
न हि कश्चित् स्वतन्त्रोऽसौ अपि त्ववयवाश्रितः ॥§ 8982

---

१८ ] प्रकुर्व— nyāma-wit_kha
१८ ] नर्त— nyāma-wit_kha
१ ] अ— nyāma-wit_kha
४ ] म— nyāma-wit_kha
४ ] ना— nyāma-wit_kha
१० ] त्वे त— nyāma-wit_kha

---

१ भिक्षुभ्यः ] वैभाषिकाः, माध्यमिका वा ॥
७ *] एतदेव—अवयवी नास्ति, प्रमाणाभावादिति ॥
१७ *] तदग्रहे—देशभेदाग्रहे ॥
१९ *] तद्देशः—अवयवस्य यो देशः, स एवावयविनोऽपि ॥

यावतां ग्रहणोऽप्यस्मिन् बुद्धिर्भवति तावताम् ।
अपेक्षतेऽसौ ग्रहणं न सर्वेषामिति स्थितिः ॥§ 8984

विविच्यमानेष्वंशेषु युक्तस्तदनुपग्रहः ।
तदावयविनाशो हि बुद्धौ विपरिवर्तते ॥§ 8986

अवयववविभागो ह्यवयविनो विनाशहेतुः । तस्मिन् बुद्ध्या समुल्लिख्यमानेऽवयविविनाशोऽपि नानुल्लिखितो भवेदिति कथमवयवी तदानीं गम्येत ? § 8987

## अवयवेषु अवयविनः व्यासज्यवर्तमानत्वम्

वृत्तिश्चावयवेष्वस्य व्यासज्यैवेति गम्यते ।
न प्रत्यवयवं तस्य समाप्तिर्व्यक्तिजातिवत् ॥§ 8989

II.517/KSV

व्यासज्य वर्तमानो हि न खल्ववयवान्तरैः ।
वर्तते, तदसंवित्तेः, किन्तु वर्तत एव सः ॥§ 8991

तथा चाहुः—वर्तत इति ब्रूमः, अनाश्रितस्यानुपलंभात् ॥ § 8992

वृत्तिरेवंविधाऽन्यत्र क्वदृष्टेति यदुच्यते ।
प्रत्यक्षदृष्ट एवार्थे दृष्टान्तान्वेषणेन किम् ॥§ 8994

तस्मात् प्रत्यक्षत एवावायववृत्तेरवयविनः उपलब्धेः न तद्वृत्तौ विकल्पानामवसरः ॥ § 8995

## अवयविग्राहकप्रमाणस्यानन्यथासिद्धत्वम्

स्रक्सूत्रादिवृत्तिरपि तथा दर्शनादभ्युपगता । तदियमवयविवृत्तिरपीदृशी दृश्यमाना किमिति निह्नूयते । न चावयविग्राहिणः प्रत्यक्षस्य कश्चिदपवादः समस्ति ॥ § 8996

अदुष्टकारणोद्भूतं अनाविर्भूतबाधकम् ।
असन्दिग्धं च विज्ञानं कथं मिथ्येति कथ्यते ?§ 8998

न च सेनावनवदवयविग्रहणं अभिधातुमुचितम्, अबाधितत्वात्, सेनादौ बाधकसद्भावात् ? § 8999

१६ ] भाग— nyāma-wit_kha
३ ] एव— nyāma-wit_kha
९ ] राधः— nyāma-wit_ca
१३ ] दि— nyāma-wit_ca

९ माप्ति ] [In the print edition there is a footnote reference, but no corresponding note.]

## सेनादिवैलक्षण्यं पटादेरवयविनः

अपि च गजवाजिपदातिपीलुपलाशशिंशपादिदर्शनस्य तत्र घटमानत्वात्, तत्समवाये सेनावनादिप्रतीतिरुपपद्येतापि । इह तु किंसमुदायविषयः पटप्रत्यय इति चिन्त्यम् । तन्तुससुदायालम्बन इति चेत्, तन्तु * प्रत्यय II.518/KSV इदानीं किमालम्बनः ? सोऽपि स्वावयबालम्बन इत्येवमवयवावयवनिरूपणे परमाणवः, पत्त्यश्वशमीशिंशपादिस्थानीय वक्तव्याः । तेषां च तद्वत् ग्रहणमनुपपन्नं, अतीन्द्रियत्वादिति न तदालम्बनोऽवयविप्रत्ययः । तस्मादवयवी प्रत्यक्षग्राह्योऽस्तीति सिद्धम् ॥ § 9000

## परमाणूनां प्रमाणसिद्धत्वम्

परमाणवोऽपि कार्यानुमानपरिनिश्चितनित्यनिरवयवस्वरूपाः सन्तीति पूर्वमेव समर्थितम् । अतो न षट्कयोगादिना सावयवत्वमेषा उपपादयितुं पार्यते । मूर्तत्वमप्यनित्यतायामप्रयोजकमिति दर्शयिष्यते ॥ § 9001

## शून्यवादे प्रमाणाभावः

अतः प्रमेयपर्यालीचनवर्त्मनाऽपि शून्यवादसमर्थनं न सुशकम् । प्रमेयविचारेऽपि हि प्रमाणवृत्तमेव परीक्ष्यते । अतश्च प्रमाणचर्चातो विभ्यद्भिः प्रपलाय्य या प्रमेयकथावीथी तथागतैबलम्बिता तस्यामपि सैव भीषणमुखी प्रमाणचर्चिकेवोपनता ॥ § 9002

सर्वती विपदां मार्गं आदेशयितुमुद्यते ।
विधौ विधुरतां यति प्रपलाप्य क्व गम्यते ॥§ 9004

तस्मात् प्रमाणतोऽशक्ये शक्ये वा वस्तुनिर्णये ।
एवंप्रायमयुक्तं वः कुशकाशाबलम्बनम् ॥§ 9006

एवं निष्फलमुत्सृथ्य शून्यवादबकव्रतम् ।
बाह्येनैवार्थजातेन व्यवहारो विधीयत्तम् ॥§ 9008

II.519/KSV

१६ ] दि— nyāma-wit__ca
५ ] गे— nyāma-wit__kha
५ ] निष्प्र— nyāma-wit__kha
५ ] निरूप्य— nyāma-wit__kha
७ ] चैं— nyāma-wit__kha
११ ] यत्— nyāma-wit__kha
१२ ] तेन— nyāma-wit__kha

५ *] व्यक्तिषु जातिवत् ॥
१६ ता] प्रमाणं तु अबाधितं साधितम् । तेन प्रमेयमपि सिद्धत्येवेति नावयविनिराकरणसंभवः ॥

## वैराग्यजननायापि न क्षणिकवादाद्यावश्यकता

अथ अस्थाशैथिल्यजननाय सर्वं शून्यं सर्वं क्षणिकं सर्वं निरालम्बनं इत्युपदिश्यते—तर्हि किमनेन मृषोद्येन ! सत्यप्यात्मनि, सत्स्वपि स्नेषु पदार्थेषु विषयदोषदर्शनद्वारेण भवत्येव विवेकवतां वैराग्यमिति तदुपजननाय शून्यवादादिवर्णनं वक्रः पन्थाः । प्रत्युत प्राज्ञो मुमुक्षुः क्षणिकनैरात्म्यशून्यतादिवचनं युक्तिबाधितमवबुध्यमानः वंचनामयमिव तदुपदेशमाशङ्कते ॥
§ 9009

स एष बुद्धिशून्यानां शून्यवादपरिग्रहः ।
प्रतारणपराणां वा न तु तत्त्वार्थदर्शिनाम् ॥§ 9011

तस्मात्परीक्ष्यमाणोऽयं शब्दाद्यद्वैतपक्षवत् ।
विज्ञानाद्वैतपक्षोऽपि गन्धर्वनगरायते ॥§ 9013

## अपवर्गपरीक्षोपसंहारः

तदेवमद्वैतदृशान दृश्यते
जनस्य निःश्रेयससंपदागमः ।
अतो यथोक्तात्मसुतत्त्वचिन्तया
कृती व्यवस्येदपवर्गसिद्धये ॥§ 9017

## सांख्योक्तप्रक्रियायाः डपसंहारः

साङ्ख्यैर्यस्त्वपवर्गसाधनविधावुक्तःप्रकृत्यात्मनोः
अन्यत्वावगमोऽभ्युपाय इति स प्रागेव निर्वासितः ।
II.520/KSV अज्ञा शक्तिमति विकारबहुला बध्नात्यकिंचित्करं
भूयो न प्रकृतिः पुमांसमिति वा कस्तां नियन्तुं क्षमः ॥§ 9021

पुंसा न किंचिदपि बन्धनिधानभूतं
अत्यल्पमात्रमपि कर्म कृतं कदाचित् ।

---

१४ ] त्मकं— nyāma-wit_kha
९ ] घि— nyāma-wit_kha

---

३ अथ ] आस्था—लौकिकवस्तुष्वासक्तिः ॥

१३ दृशा ] अद्वैतदृशा—विज्ञानाद्वैत-शब्दाद्वैत-ब्रह्माद्वैत-शून्याद्वैतदर्शनैः ॥

३ दाचित् ] कर्तृत्वादिकं सर्वं प्रकृतेरेवेति वर्णनात् ॥

मश्नाति तं प्रकृतिरेव निरङ्कुशैषा
मत्ता करेणुरिव पद्मवनानि भूयः ॥ § 9025

## जैनाद्युक्तप्रक्रियाया उपासंहारः

कचनिलुंचनदिक्पटधारण-
क्षितिधराक्रमणक्रमपूर्वकम् ।
क्षपणकास्त्वपवर्गमुशन्त्यमी
ह्यतितरां परमार्थविदस्तु ते ॥ § 9029

लोम्नां नित्यसंभवात् खलतयोमोक्षं क्षणात्प्राप्नुयुः
संसारोपरमो दिगम्बरतया सद्यस्तिरश्चां भवेत् ।
मुक्ताः स्युः गिरिशृङ्गवासिन इमे शश्वत्तदारोहणात्
जन्तूनामपवर्गवर्त्म निकटं केनेदृशं दर्शितम् ॥ § 9033

तस्मादात्मज्ञानं सन्तः मोक्षप्राप्तौ हेतुं प्राहुः ।
*तीर्थे तीर्थे तद्याचार्यैः तैस्तैरुक्तं संज्ञाभेदैः ॥ § 9035
II.521/KSV

## पातञ्जलप्रक्रियोपसंहारः

यदपीह केचिद विकल्पमीश्वर—
प्रणिधानमाहुरपवर्ग साधनम् ।
इदमात्मदर्शनमवादि तैरपि
प्रथितो हि पूरषविशेष ईश्वरः ॥ § 9039

## गौतमोक्तप्रक्रियैव साधीयसी

१४ ] बध्ना— nyāma-wit_ca
१७ ] प— nyāma-wit_kha
४ ] यायि— nyāma-wit_kha
५ ] जैना— nyāma-wit_ca
८ ] धिकंस— nyāma-wit_ca

७ ण ] पर्वतशिखरगुहादिवासः । उपहासोक्तिरियम् ॥
१० यो ] खलतयः—शिरोरुहव्याधयः ॥
१५ * ] सर्वेषु वैदिकशास्त्रेषु ॥
१६ ल्प ] ईश्वरप्रणिधानाद्वा इति योगसूत्रम् । अविकल्पं—निर्वीजसमाधिरूपम् ॥
१९ रः ] क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः इति योगसूत्रम् ॥

दृष्टा वाद्यन्तराणां गतिरियमियती नापवर्गस्य मार्गं
स्प्रष्टुं द्रष्टुं समर्थास्त इति चिरमिह श्वभ्र एव भ्रमन्ति ।
नेदीयानेषु तस्माद्भवमरुपतितैः अक्षपादोपदिष्टः
पन्थाः क्षेमाया मोक्षाधिगमसमुचितः क्षिप्रमालम्बनीयः ॥§ 9043

॥ इति श्री भट्टजयन्तकृतौ न्यायमञ्जर्यां नवममाह्निकम् ॥

# २.६ दशममाह्निकम्—संशयपरीक्षा : संशयलक्षणम्

II.522/KSV

संशयादेः पदार्थगणस्य प्रमाणप्रमेयपदसंगृहीतस्यापिन्यायप्रवृत्तिप्रयो जनतया पृथग्व्युत्पादनीयत्वस्य प्रागेव समर्थितत्वात्, प्रथमसूत्रे च प्रमेया नन्तरं संशयोद्देशात्-उद्देशानुक्रमेण तस्य लक्षणं प्रतिपादयितुमाह— § 9045

**समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ न्या-सू-१-१-२३ ॥** § 9046

ननु ! संशयस्य समानधर्मोपपत्त्यादिकारणभेदेन पंचविधत्वात् सामान्यसक्षणम्, विभागः, विशेषलक्षणानि च वक्तव्यानि । तत्र सामान्यलक्षणेविभागे च सूत्रद्वयम्, विशेषलक्षणार्थं च पंचानां तत्प्रमेदानां सूत्रपंचकमित्येवं सप्त सूत्राणि प्रणेतुं युक्तानि । एकं चेदं सूत्रं श्रूयते । तत्कथमेतद्भविष्यति—उच्यते—सत्यमाह भवान् । किं त्वेकमेवेदं सूत्रम् आवृत्तिन्यायमाश्रित्य सप्तधा कल्पयिष्यते ॥ § 9047

### सूत्रविभागः

तत्र आचार्यास्तावदेवं व्याचक्षते—समानधर्मोपपत्तेः, उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षो विमर्शः संशयः, इतीयत्सूत्रं सामान्यलक्षणा II.523/KSV प्रतिपादकम् । समानानेकधर्मोपपत्तेः, विप्रतिपत्तेः, उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति विभागसूत्रम् । पुनश्च समानधर्मोपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विशेषापेक्षोविमर्शः संशय इत्येतदेव सूत्रं प्रथमस्य संशयस्य विशेषलक्षणप्रतिपादकमिति ॥ § 9048

---

१३ ] ब्धि— nyāma-wit_kha
१०२६.१५--१०२७.१६ ] तो— nyāma-wit_kha
१६ ] इयदस्य— nyāma-wit_kha

---

६ भेदेन ] समानधर्मोपपत्तिः, अनेकधर्मोपपत्तिः, विप्रतिपत्तिः, उपलब्ध्यवस्थ, अनुपलब्ध्यव्यवस्था इति पञ्च ॥

## सूत्रस्य सामान्यविशेषलक्षणपरत्वम्

ननु ! एतदेव सूत्रं सामान्यलक्षणार्थम्, इयदेव चेदयमन्यूनानतिरिक्तं विशेषलक्षणार्थमिति कथमेतत्—उच्यते—*विशेषस्मरणकारणभूत साधारणधर्मग्रहणात्, विशेषाग्रहणात्, विशेषास्मृतेश्च संशयो भवतीति प्रत्यात्मवेदनीयं तावदेतत् । सूत्रे विशेषापेक्ष इत्यनेन पदेन विशेषस्मरणमुपदिष्टम् । उपलब्ध्यनुपलब्ध्यव्यवस्थापदेन च विशेषाग्रहणमितीयत्तावत् द्वयोरपि सामान्यविशेषलक्षणयोः तुल्यम् । समानशब्दस्त्वाक्षिप्तसामान्यवचनः सन् तत्सामान्यलक्षणमाह । अनुगतसामान्यत्रचनस्तु विशेषलक्षणमिति ॥ § 9049

### सामान्यविशेषलक्षणप्रतिपादनप्रकारः

कथं पुनरयमेवाक्षिप्तसामान्यवचनः, कथंचानुगतसामान्यवचन इति —उच्यते—संशयोत्पत्त्यैव समानधर्यमात्रमाक्षिप्यते, यद्गृह्यमाणं विशेषस्मरणबीजसंस्कारोद्बोधनिमित्ततां प्रतिपद्यते, तद्व्यतिरेकेण संशयानुत्पादात् ॥ § 9050

तथा हि—विरुद्धविशेषावमर्शस्वभावस्तावत्संशयः । न च विरुद्धविशेषाणां पुरोऽवस्थिते धर्मिणि सन्निहितानाम् अवमर्शनम्, विरुद्ध तयैवैकत्र II.524/KSV सन्निधानाभावात् । अतः स्मृत्युपारूढानाम् अवमर्शनम् । स्मृतिश्च नाकस्मादुद्भवतीति यत्सहचरितानां तेषां विशेषाणां पूर्वं पर्यायेण ग्रहणं वृत्तम्, तद्दर्शनसंस्कारप्रबोधद्वारेण स्मरणकारणमवश्यमेवाश्रयणीयम् । तत्तु अनुगतं वा भवतु, व्यावृत्तं वा, विप्रतिपत्त्यात्मकं वा, आन्तरम् उपलब्ध्यनुपलब्ध्यव्यवस्थारूपं वेत्येवमाक्षिप्तसामान्यवाचिनि समानशब्दे पंचसाधारणरूपावगमात् सामान्यलक्षणार्थता ॥ § 9051

यदा त्वनुगतमेव धर्मम् आरोहपरिणाहादिस्वभावमाचष्टे समानशब्दः, तदाविशेषलक्षणार्थ इति ॥ § 9052

### सूत्रयोजानाप्रदर्शनम्

तत्र चेत्थं सूत्रयोजना—समानो धर्मः परिणाहादिः । तस्य गुणत्वेन प्रतिद्रव्यमन्यत्वेऽपि तुल्यरूपावगतिविषयीकृतत्वात् समानत्वमुपपद्यते । तस्योपपत्तिः उपलब्धिः । अथापि सत्ता उपपत्तिशब्देनोच्यते । साऽप्युपलब्ध्यधीनस्थितिरेव भवतीति सर्वथा समानधर्मोपलब्धेः संशय इत्युक्तं भवति ॥ § 9053

---

१ ] तत्र— nyāma-wit__kha
२ ] ता च— nyāma-wit__kha
१३ ] तद्य— nyāma-wit__kha
२१ ] लब्धिः— nyāma-wit__kha
२१ ] पत्तिः— nyāma-wit__kha

---

४ *] विशेषाः—स्थाणुत्वपुरुषत्वादयः ॥
१ स्य ] न हि गुणः सामान्यम् ॥
२ त्वात् ] तथा चा ननुगतस्यापि कुत्रचिदनुगमकत्वमनुभव बलात् ॥

## संशयस्य धर्मिविषयकत्वम्

ननु ! समानधर्मः अर्थान्तरं धर्मिणः । न चार्थान्तरे दृष्टेऽन्यत्र संशयो भवितुमर्हति—न—अर्थान्तरविशेषत्वात् । अर्थान्तरविशेषस्तु धर्म्यवोच्यते, अर्थान्तरेण परिणाहादिना विशेष्यत इति तस्मिन्नेव—साधारण धर्माध्यासित-
II.525/KSV वपुषि धर्मिणि नयनपथवर्तिनि तद्गतविशेषावमर्शात्मा तत्रैव संशयो जायते । योऽयमूर्ध्वत्वविशिष्टो धर्मी दृश्यते, सः स्थाणुर्वास्यात्, पुरुषोवेति नार्थान्तरत्वं दूषणम् ॥ § 9054

## संशयकारणान्तरम्

तथापि वक्रकोटरत्वकरचरणादिविशेषदर्शिनः न दृष्टः संशय इति कारणान्तरमुच्यते—उपलब्ध्यनुपलब्ध्यव्यवस्थात इति । विशेषाग्रहणा दित्यर्थः । कथं पुनरुपलब्ध्यनुपलब्ध्यव्यवस्थात इत्यनेन विशेषाग्रहणमुच्यते—इत्थमुच्यते—इदन्तयाऽनिदन्तया वा तत्रोपलब्धिः न व्यवतिष्ठते, अनुपलब्धिर्वा— इति । विशेषग्रहणे हि सति तद्व्यवस्थानं संभवति— स्थाणुरयम्, न पुरुष इति वक्रकोटरादियिशेषग्रहणे । शिरःपाण्यादिपरिच्छेदे तु—पुरुषोऽयम्, न स्थाणुरिति ॥ § 9055

## संशयकारणान्तरम्

एवमनेन पदेन विशेषाग्रहणमुक्तम् । तथापि प्रेङ्खारूढस्य साधारणधर्मदर्शिनः विशेषानुपलभमानस्यापि न दृष्टः संशय इति कारणान्तरमुच्यते— विशेषापेक्ष इति । विशेषस्मृत्यपेक्ष इत्यर्थः ॥ § 9056

## सौत्रं विशेषपदं विशेषस्मृतिपरम्

ननु ! विशेषापेक्ष इति श्रूयते, न विशेषस्मृत्यपेक्ष इति—सत्यम्— अश्रूयमाणमपि तत्स्मरणं संशयप्रस्तावादवगम्यते । स्मर्यमाणत्वेन हि विशेषाणां संशयोत्पत्तावपेक्षा, नानभूयमानतया; अनुभूयमानेषु हि तेषु संशयच्छेदो भवति, न संशयः ॥ § 9057
II.526/KSV

अपेक्षाशब्दार्थनिरूपणादेव वा स्मृतिर्लभ्यते । विशेषाणां अपेक्षा— आकाङ्क्षा । ते चानुपलभ्यमानाः पूर्वानुभूताश्च आकाङ्क्षन्ते इतीयं सा तेषां स्मृतिः । संप्रत्युपलभ्यमानेषु एकान्ताननुभूतेषु वा तेष्वाकाङ्क्षाऽनुपपत्तेः ॥ § 9058

८--९ ] अनेन— nyāma-wit_kha    ९--१० ] इं— nyāma-wit_ca

११ थापि ] डोलायमानास्थितिमारूढस्यं ॥

## विशेषाग्रहणस्य संशयकारणत्वम्

ननु ! समानधर्मोपपत्तेः विशेषस्मृतेश्चेति—कारणद्वयमेवास्तु किं वि-शेषाग्रहणेन । अपि च— § 9059

विशेषस्मरणादेव नन्वाक्षिप्तस्तदाऽग्रहः ।
ग्रहणं स्मरणं चैव भवेतां युगपत्कथम् ॥§ 9061

—अस्त्येतत्—किन्तु नातिदूरगतायां निजप्रमदायां अनुरागवतः कामिनः समानधर्मदर्शने, तद्गतविशेषादर्शने, तदनुस्मरणे च सत्यपि न भवत्येव संशयः । अतः संशयोत्पत्त्यव्यभिचारे देशकालव्यवहितविशेषाग्रहणसिद्धये पदान्तरमुपादीयते देशान्तरे कालान्तरे वा चिरदृष्टानां विशेषाणामिदानीमग्रहणं संशयकारणम्, न विशेषाग्रहणमात्रम् । एवममुना पदत्रयेण संशयलक्षणमिदमुक्तम् ॥ § 9062

## संशयकारणानां मेलनासंभवपरिहारः

ननु च ! संभूय कारकैः कार्यमारभत इति न्यायात् समानधर्मोपलब्धि-विशेषानुपलब्धि—तत्स्मृतिलक्षणकारणत्रयजन्ये संशये ज्ञानयौगपद्य मापद्यते । क्रमभावित्वे हि बुद्धीनां नैककार्योत्पत्तौ युगपद्व्यापारः समस्ति । विशेषाश्च बहवोऽपि संभवन्तीति तत्स्मरणान्यपि युगपद्भू यांसि II.527/KSV
भवेयुः—नैतदेवम्—समानधर्मग्रहणानन्तरं पूर्वोपजातविविधविशेषानुभवपरम्परोपचित पीवरसंस्कारद्वारकमेकमेव तद्विषयं स्मरणं भविष्यति—यथा वर्णानामर्थप्रतीतौ वर्णितम् ॥ § 9063

## विशेषानुपलब्धिः प्रागभावरूपा

उपलब्ध्यनुपलब्ध्यव्यवस्थासूचिता च विशेषानुपलब्धिः अनुपलब्धिरेव, न सा ज्ञानात्मिका, किन्तु ज्ञानानुत्पाद इति तत् तृतीयं कारणमपि भवन्न ज्ञानात्मकमिति द्वे एव ज्ञानात्मके कारणे—समानधर्मग्रहणम्, विशेषस्मरणं च । तयोः प्रथमं समानधर्मग्रहणं विनश्यदवस्थं, विशेस्मरणं च द्वितीयमविनश्यदवस्थं संशयमुपजनयतः । ईदृशयोश्च ज्ञानयोः यौगपद्यमविरुद्धमिति शास्त्रे स्थितम् ॥ § 9064

एवं समानधर्मग्रहणात् विशेषाग्रहणात् विशेषस्मृतेश्च संशय इति पदत्रयेण संशयलक्षणमनवद्यमुच्यत इति ॥ § 9065

---

३ ] द— nyāma-wit_kha
५ ] कि— nyāma-wit_kha
६ ] त— nyāma-wit_ca
१६ ] ज— nyāma-wit_kha
१९ ] तृ— nyāma-wit_ca
२० ] ज्ञा— nyāma-wit_kha

---

१४ विशेषा ] ज्ञानानां द्विक्षणावस्थायित्वात्, अयौगपद्याच्च ॥
२२ स्ति ] विशेषाः—वक्रकोटरत्वादयः ॥
६ म ] अन्यथा तेषां कुत्रापि कारणत्वं न स्यात् ॥

## पक्षान्तरेण संशयसूत्रव्याख्यानम्

तदेतदाचार्यव्याख्यानमरोचयन्तः परेऽपरथा व्याचक्षते—सामान्यलक्षणं तावत् विमर्शपदेनैव प्रतिपाद्यते । न हि पर्यायोच्चारणमात्रमिदं विमर्शः संशयः इति । किन्तु संशय इति लक्ष्यपदम्, विमर्श इति लक्षणपदम् । प्रमाणपदवच्च निर्वचनसव्यपेक्षम् एतत्पदं लक्षणप्रतिपादनक्षमं भवति । विरुद्धार्थावमर्शो विमर्शः स्थाणुर्वा, पुरुषो वेति । इयता च सजातीयसंशय-पञ्चकानुगतं विजातीतेभ्यः प्रमाणादिभ्यो व्यवच्छिन्नं सामान्यलक्षणमुक्तं भवति
II.528/KSV । संशयोत्पादककारणपरिगणनं पुन रिन्द्रियार्थसन्निकर्षोत्पन्नग्रहणवदिहापि नोपयुज्यते, कारणान्तराणामपि आत्ममनस्यन्निकर्षादीनां अपरिहार्यत्वात् ॥
§ 9066

अथान्यासाधारणकारणनिर्देशश्चिकीर्षितः, तेनापि कोऽर्थः ? सामान्य-लक्षणस्य प्रतिपिपादयिषितत्वात्, तस्य च विमर्शपदादेव सिद्धत्वात् ॥ § 9067

## व्याख्यानान्तरस्य क्लिष्टत्वम्

उपलब्ध्यनुपलब्ध्यव्यवस्थापदप्रतिपाद्यमानविशेषाग्रहणवर्णनं चातीव क्लिष्ट-मिति, पुनश्च विशेषलक्षणप्रसङ्गे यथाश्रुतमेव तद्व्याख्येयमित्यतिभारः ॥ § 9068

एवं विमर्शपदेन विजातीयव्यवच्छेदकारिणि सामान्यलक्षणे वर्णिते स-मानधर्मोपपत्तेः इत्येकमेव पदं सजातीयसंशयान्तरव्यवच्छेदकारि विशेष-लक्षणक्षमं भवतीति तत्रापि पदत्रययोजनं नोपायुज्यत इति ॥ § 9069

अत्र व्याख्यानद्वयेऽपि कतरत्साध्विति तद्विदः प्रमाणम् ॥ § 9070

## अनेकधर्मोपत्तिपदार्थविवरणम्

अनेकधर्मोपपत्तेः इत्यत्रापि त्रिपदपरिग्रहणेनैन लक्षणमाचार्या वर्णयन्ति । अनेकधर्मोपपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातो विषेषापेक्ष इत्यसाधारण-धर्मग्रहणात् विशेषग्रहणात् विशेषस्मृतेश्च संशय इत्यर्थः । एकैकपदोपादान-फलं च पूर्ववदत्रापि दर्शयितव्यम् । न चेन्द्रियमनस्संयोगादिकारणान्तरप-रिगणनचोदनं युक्तम्, तेषां सर्वबुद्धिजन्मसुतुल्यत्वात् । इहासाधारणसंश-यज्ञानकारणोपदेशप्रस्तावादिति ॥ § 9071
II.529/KSV

## संशयसूत्रव्याख्याने पक्षान्तरम्

३ ] प्रवणप— nyāma-wit__kha
१० ] त्राप्य— nyāma-wit__kha
११ ] लब्धेः— nyāma-wit__ca
२० ] वि— nyāma-wit__kha

१२ च ] प्रमीयते अनेनेति किल तत्र निर्वचनम् ॥
५ तेषां ] ज्ञानसामान्यकारणत्वात् ॥

अन्ये तु सामान्यलक्षणसम्पादिते विजातीयव्यवच्छेदे केवलसजातीय-व्यवच्छिन्नलक्षणप्रधितपादननिपुणमनेकधर्मोपपत्तिपदमेव पूर्ववद्वर्णयांचक्रुः ॥ § 9072

ननु ! अनेकधर्मशब्देन कथमसाधारणो धर्म उच्यते ?—एवमुच्यते—समानजातीयमसमानजातीयं चानेकम् । तस्मात्परावृत्तो धर्मः अनेक धर्म इति ॥ § 9073

यद्वा किमनया क्लिष्टकल्पनया ! अस्त्ययमेकशब्दः समानपर्यायः । तत्र स्पष्ट एव नञ्समासेनासमानधर्मः अनेकधर्मः साधारणधर्म उच्यते एवेति ॥ § 9074

## असाधारणधर्मस्य संशयकारणत्वाक्षेपः

भवत्वेवम् ! असाधारणधर्मस्य तु कथं संशयकारणत्वमिति चिन्त्यम् । विरुद्धविशेषानुस्मरणकारणकं हि संशयमाहुः । विशेषाणां च स्मरणहेतोः संस्कारस्य तदुद्बोधकं भवति, येन सहैते पूर्वं पर्यायेणोपलब्धाः । असाधारणधर्मस्य तु असाधारणधर्मत्वादेव न केनचित्सह पूर्वं ग्रहणमभवत् । भावे तु असाधारणधर्मतैव हीयेतेत्यतः कथमसौ तत्स्मृतिहेतुः । व्यावृत्ततयैव तु स्मृतिहेतुत्वेऽस्य त्रैलोक्यस्मरणनिमित्तता प्रसज्येत, *ततोऽपि व्यावृत्तत्वादिति ॥ § 9075

II.530/KSV

## असाधारणधर्मस्य संशयकारणत्वनिरूपणम्

नैष दोषः—प्रकारान्तरेणास्य स्मृतिहेतुत्वात् । इह हि केषुचित्केषुचित् असाधारणधर्मा धर्मिषु भवन्तः तद्गतसाधारणधर्मान्तरसहचरिता भवन्ति । तद्यथा पृथिवीत्वगन्धत्वादयो धर्माः पृथिव्यामसाधारणास्सन्तः, स्नेहवत्त्वादिधर्माश्च तथैवाप्सु द्रव्यत्वसहचारिणो दृष्टाः । रूपादिषु रूपत्वादिधर्माः गुणत्वसहचारिणः, उत्क्षेपणादिषु उत्क्षेपणत्वादिधर्माः कर्मत्वसहचारिणः । एवं प्रकृतेऽपि धर्मिणि कस्मिंश्चिदसाधारणो धर्म उपलभ्यमानः केनापि साधारणधर्मान्तरेण सहचरितो भवतीति भवति विशेषानुस्मृतिद्वारेण संशयसाधनम् ॥ § 9076

## अनेकधर्मस्य समानधर्माद्विशेषः

१ ] मुत्पा— nyāma-wit_kha
२ ] रूप— nyāma-wit_kha
४--५ ] स— nyāma-wit_kha
१३ ] त्वादेव— nyāma-wit_ca
१३ ] दर्शन— nyāma-wit_kha
१८ ] ध— nyāma-wit_kha
२० ] व— nyāma-wit_kha

१८ स्य ] शब्दत्वादिः नित्यानित्यव्यावृत्तत्वात् उभयकोट्युपस्थापकः इत्युक्तः, न तु साक्षात् संशयकारणम् ॥
२१ * ] स्वव्यतिरिक्तसर्वेभ्योऽपि ॥

ननु ! एवं तर्हि व्यावृत्तत्वादेव समानधर्मादिषु संशयः, नानेकधर्मादिति—मैवम्—अनेकधर्म एवासौ तेन वर्त्मना विशेषान् स्मारयन् संशयजन्मने कल्पते । असति हि तस्मिन् किमालम्बनं व्यावृत्तत्वं स्यादित्यलमतिसूक्ष्मेक्षिकया ॥ § 9077

तस्योदाहरणं भाष्यकारेण दर्शितं शब्दे विभागजत्वम् । यथा हि पृथिव्यादौ पृथिवीत्वादिः व्यावृत्तो धर्मः द्रव्यत्वाद्यनुगतधर्मसहचारी दृष्टः एवं शब्दे विभागजत्वं धर्मः केनचित् द्रव्यत्वादीनामन्यतमेन धर्मेण सहचरितः स्यादिति संशयः ॥ § 9078

## विभागजविभागविमर्शः

ननु ! विभागजत्वमसाधारणो न भवत्येव शब्दधर्मः, विभागजवि भागेऽपि भावात् । तथा च प्रयोगः—गुणः शब्दः, विभागजत्वात् विभागजविभागवत् इति—तत्र केचिदाहुः सत्यमस्ति विभागेऽपि विभागजत्वम् । शब्दे तु विशेषो विवक्षितः ॥ § 9079

II.531/KSV

द्विविधो हि विभागजो विभागः—कारणविभागपूर्वकः, कारणाकारणविभागपूर्वकश्च । कारणं समवायिकारणमत्राभिप्रेतम् । कारणविभागपूर्वकस्तावत् तन्तुविभागात् तन्त्वाकाशविभागः ॥ § 9080

कारणाकारणविभागपूर्वकस्तु अङ्गुल्याकाशविभागात् हस्ताकाशविभागः ; हस्ताकाशविभागादपि शरीराकाशविभाग इति ॥ § 9081

*शब्दस्तु नियमेनैव कारणविभागपूर्वकविभागप्रभवः—वंशदलविभागात् दलाकाशविभागः ; दलाकाशविभागाद्यासमवायिकारणात् शब्दो निष्पद्यत इत्यनेन विशेषेणास्येदृशविभागजत्वस्यासाधारणत्वं शब्दधर्मस्योच्यत इति ॥ § 9082

## विभागजविभागानङ्गीकारपक्षः

अन्ये तु विभागजं विभागममृष्यमाणाः यथाश्रुतस्यैव शब्दे विभागजत्वस्यासाधारणधर्मतामाचक्षते ॥ § 9083

ननु ! किमिति विभागजं विभागं ते न मृष्यन्ते ? अस्ति ह्ययं तत्सिद्धौ न्यायः—यदा ह्यवयवे कर्मोत्पन्नं अवयवान्तराद्विभागं करोति,

---

३ ] स— nyāma-wit__kha
४ ] प्रसंगेन— nyāma-wit__ca; nyāma-wit__gha
७ ] न— nyāma-wit__kha
९ ] वि— nyāma-wit__kha
११ ] च— nyāma-wit__kha
१ ] न्ति— nyāma-wit__kha

---

११ या ] मानवबुद्धेरतिविचित्रत्वादेवमपि संभवतीति प्रदर्शनमात्राभिप्रायं तदिति गृह्यतामित्याशयः ॥
१ * ] शब्दः—इत्यस्य विभागजेत्यादिः ॥

न *तदाकाशादिदेशात् । यदा ह्याकाशादिदेशात्, न तदाऽअयवान्तरादिति स्थितिः ॥ § 9084

II.532/KSV

## विभागजविभागस्यावश्यकता

किं कृता पुनरियं स्थितिरिति चेत्—उच्यते—या ह्यवयवक्रिया नभोभागविभागकारिणी, नासौ द्रव्यारम्भकसंयोगप्रतिपक्षभूतं विभागमारभमाणा दृश्यते, दिनकरकिरणपरामर्शोपजनितकमलदलविकासकारिक्रियावत् । तदेव कथमिति चेत्—कमलस्य मुकुलविकासदशयोः प्रत्यभिज्ञायमानत्वेनाविनाशनिश्चयात् ॥ § 9085

इयं तु पाट्यमानवंशदलक्रिया द्रव्यारम्भकसंयोगप्रतिद्वन्द्विभूत विभागारम्भिका, द्रव्यानारंभक संयोगप्रतिद्वंद्विविभागजनिकोपलभ्यते इति नासौ नभसो विभागमारभेतेत्यत एषा स्थितिरस्तीति विभागजविभागकल्पना क्रियते ॥ § 9086

## विभागस्यैव संयोगनाशकत्वम्

संयोगान्तं कर्मेति तावत् स्थितम् । अन्यथा हि तस्य कालान्तरस्थायित्वं, नित्यद्रव्यसमवेतस्य च नित्यत्वं स्यात् । तस्मात् कर्मणोऽचिरजीवित्वात् तद्विनाशकेन संयोगेन भवितव्यम् । उत्तरस्तु संयोगः पूर्वसंयोगोपरमे सति जायते, नान्यथा । न च विभागव्यतिरिक्तः कश्चन संयोगस्य हन्ता समस्ति ॥ § 9087

कर्म तूत्तरसंयोगजन्मनिर्ज्ञातकौशलम् ।
न हि प्राक्तनसंयोगविनाशाय प्रकल्पते ॥§ 9089

तस्मात् विभागेनैव संयोगविरोधिना भवितव्यम् ॥ § 9090

II.533/KSV

यदधिकरणो विभागः तदधिकरणमेव संयोगमुपशमयति, न त्वङ्गुलिविभागः कुण्डबदरसंयोगोपमर्दाय प्रभवतीत्यतः न वंशदलवृत्तिविभागः दलाकाशसंयोगमुपहन्तुमलमिति नूनं दलाकाशसंयोगवैरिणा दलाकाशविभागेन भवितव्यम् ॥ § 9091

११ ] को— nyāma-wit_kha
२१ ] नाशकारिणा भाव्य— nyāma-wit_kha
१--२ ] गे— nyāma-wit_kha

९ *] आकाशदेशोऽत्र अवयविदेशः विवक्षितः । क्रिया हि कदाचित् पूर्णेऽवयविनि, कदाचिदवयवैकदेशे च जायते ॥
११ रियं ]
अनारंभकसंयोगप्रतिद्वंद्विविभागजनिका क्रिया आरंभकसंयोगप्रतिद्वंद्विविभागजनिका न भवति इतीयं स्थितिः ॥
४ था ] अन्यथा—पूर्वसंयोगानाशे ॥

## विभागजविभागस्यावर्जनीयत्वम्

तदिदानीं तस्योत्पत्तिकारणचिन्तायां क्रियायां—वंशदलविभागमात्रो पजननने चरितार्थत्वात्, तं निर्माय विभागान्तरनिर्माणे विरम्य व्यापारासंवेदनात्, अवश्यं वंशदलविभाग एव प्रत्यासन्नतया दलाकाशविभागारम्भकोऽभ्युपगमनीयः । एवमनभ्युपगमे कर्मनित्यत्वप्रसङ्गादिति ॥ § 9092

## विभागजविभागखण्डनम्

अत्र वदन्ति । *न कर्मनित्यत्वं अनभ्युपगम्यमानेऽपि विभागजे विभागे भविष्यति; उत्तरसंयोगस्य कर्मविनाशहेतोरस्तित्वात् । पूर्वसंयोगानुपरमे कथं तदुत्पाद इति चेत्; बाढम् ! उपरत एव पूर्वसंयोगः । कस्तस्योपरमहेतुरिति चेत्— § 9093

कर्म ह्युत्तरसंयोगनिमित्तं यदुपेयते ।
तदेव पूर्वसंयोगध्वंसकारि भविष्यति ॥§ 9095

न यज्जनने शक्तं अशक्तं तद्विनाशने ।
हेतुर्दहनसंयोगः पाकजोत्पादनाशयोः ॥§ 9097

यथा च विभागेऽधिकरणनियमः, यदाधारो विभागः, तदाधारमेव संयोगं निरुणद्धि; तथा कमंण्यपि नियमः । कर्मापि स्वाश्रयस्य यदन्य दिक्संयोग- II.534/KSV
निबन्धनं, तत् तद्विरुद्धदिग्वृत्तेः संयोगस्योपमर्दकमिति नातिप्रसङ्गः । एवं कर्माविष्टस्योत्तरसंयोगदर्शनमदूषणं, विगन्तरसंयोगस्य तेनोपमर्दनात् ॥ § 9098

## एकस्योभयकारित्वेऽदोषः

अपि च यदेव कर्म वंशदलनविभागकारि कथ्यते, तदेव दलाकाशविभागकारि भविष्यति । को दोषः ? § 9099

ननु ! व्योमविभागकारि कर्म, न द्रव्यारम्भकसंयोगप्रत्यनीकभूतविभारम्भकं, अम्भोरुहकर्मवत् इत्युक्तम्—सत्यमुक्तम्, अयुक्तं तु—शतपत्रपत्रकर्मणोऽपि द्रव्यारम्भकसंयोगप्रतिकूलविभागारम्भकत्वात् । तच्च कर्म कुड्मलकमलात् विकचकमलस्यान्यत्वनिश्चयान्निश्चितम् ॥ § 9100

१६ ] वि— nyāma-wit_kha
१६--१७ ] सं— nyāma-wit_ca
२२ ] पल्लवक— nyāma-wit_kha

१७ *] न भविष्यति—इत्यन्वयः ॥
३ ङ्गः ] [In the print edition there is a footnote reference, but no corresponding note.]

## कमलकुड्मलकुसुमयोर्भेदः आवश्यकः

ननु ! तदेवेदमरविन्दमिति संदेहविपर्ययरहिततामरसप्रत्यभिज्ञादर्शनात् कथं संकोचविकासदशामात्रभेदात् तदन्यत्वमिति कृतमनया दुरा शया । शरीरेऽपि सुस्पष्टोपलभ्यमानशैशवयौवनवार्धकादिदशाभेदभिन्न स्वरूपे प्रत्यभिज्ञानदर्शनात् । न च शरीरकुशेशययोः विशेषलेशमतिकृशमपि पश्याम इति कुतस्तदेकत्वम् ॥ § 9101

भवतु वा पुण्डरीकस्याविनाशः ! निदर्शनमात्रमिदं तु वर्णितम्, न तु प्रतिबद्धःकश्चन हेतुरस्तीत्यभ्यधायि, येन वंशदलकर्मणः कोकनदपल्लवकर्मसाम्यं कल्प्येत । क्रियात्वं त्वप्रयोजकमेव, तत्कर्मणां विचित्रकार्यहेतुत्वात् ॥ § 9102

II.535/KSV

## अवयवावयविविभागयोरैक्यम्

यदि वा नान्यो वंशदलविभागः, नान्यश्च तत्कार्यो दलाकाशविभागः । किन्तु— § 9103

एक एव विभागोऽयं भेदोऽस्याश्रयभेदतः ।
एकत्र देशेऽवस्थानात् व्योम्नो वंशदलस्य च ॥§ 9105

समानदेशे वृत्तित्वं मूर्तानां हि विरुध्यते ।
व्योम्नस्सर्वगतत्वात्तु विद्यते तत्र सन्निधिः ॥§ 9107

एकदेशाश्रयत्वे तु यदेकस्माद्विभागकृत् ।
तदेवान्यत इत्यस्ति न विभागो विभागजः ॥§ 9109

## अतिरिक्तविभागनिराकरणम्

अपरे पुनः विभागजविभागपराकरणोपारूढरभसाः संगिरन्ते— तिष्ठतु तावत् दूरत एव विमागजो विभागः । कर्मजोऽपि न विभागो नाम कश्चिदस्ति । संयोगविरोधिनि तस्मिन्नभ्युपगम्यमाने मुद्गरादिवत् पूर्वं सिद्ध-

४ ] म— nyāma-wit_kha
७ ] न्धः— nyāma-wit_ka; nyāma-wit_kha; nyāma-wit_gha
७ ] र— nyāma-wit_kha
८ ] क— nyāma-wit_kha
१० ] अ— nyāma-wit_kha

१२ या] अन्यथा हि परिणामवादप्रसरप्रसङ्गः ॥

४ त्र] देशः—दिग्देशः । दिगेव हि सर्वत्र मुख्यो देशः ॥

ताऽवश्यंभाविनी । ततश्च पूर्वसिद्धो विभागः संयोगमुन्मूलयतीति घटमुद्गरयोरिव संयोगविभागयोरेकत्र युगपदुपलब्धिर्भवेत । न चैवमस्ति । तस्मात् संयोगाभावविषय एव विभक्तप्रत्यय इति न विभागालम्बनतां प्रतिपद्यते ॥
§ 9110

सत्यपि विभागे तस्मिन् क्षणे संयोगस्याविनाशात् न भवति विभक्तप्रतिभासः । क्षणान्तरे च संयोगविनाशे सति भवतीत्यन्वयव्यतिरेकाभ्यां संयोगाभावविषय एवावसीयते इत्यतो न प्रत्यक्षगम्यता निभागस्य । संयोगभङ्गलिङ्गेन च तत्परिकल्पनक्रियेव तं हिनस्तीति पुरस्तादुपपादितम् ॥ § 9111
II.536/KSV

## कारणत्रैविध्यम्

कथं तर्हि विभागजत्वं शब्दस्य भाष्यकार उदाहृतवान् ? उच्यते— त्रिविधं कारणं कार्योत्पत्तिं प्रति विधत्ते—समयायिकारणं, असमवायिकारणं, निमित्तकारणं चेतिः तत्र समवायिकारणं तदुच्यते, यत्राश्रितं कार्यमुपलभ्यते—यथा पटस्य तन्तवः ॥ § 9112

असमवायिकारणं तु द्विविधम्—कार्यैकार्थसमवायलक्षणया प्रत्यासत्त्य । प्रत्यासन्नं, कारणैकार्थसमवायलक्षणया वा संबद्धम् । तत्र कार्यैकार्थसमवायेन प्रत्यासन्नं यथा—पटस्य तन्तुसंयोगः । कारणैकार्थसमवायेन तु प्रत्यासन्नं यथा—पटरूपस्य तन्तुरूपमिति ॥ § 9113

## असमवायिकारणे विशेषः

अवधृतकारणं च तदसमवायिकारणमाश्रयणीयं, अतो बुद्धिजन्मनि सत्यप्येकार्थममवाये नान्येषामात्मगुणानामिच्छादीनासममवायिकारणत्वं,* अपि त्ववधृतसामर्थ्यस्यात्ममनस्संयोगस्यैवेति ॥ § 9114

समवाय्यसमवायिव्यतिरिक्तं तु कार्योत्पत्तौ निर्ज्ञातसामर्थ्यं यत् कारणं तत् निमित्तकारणमुच्यत इति ॥ § 9115

## विभागस्यावश्यकता

५ ] उत्पन्ने— nyāma-wit_ca
६ ] त्ययः— nyāma-wit_ja
७ ] न— nyāma-wit_kha
१० ] वि— nyāma-wit_kha
१४ ] वा— nyāma-wit_kha
१५ ] कार्यका— nyāma-wit_ca

५ णं] कारणत्वेन संप्रतिपन्नमेवेत्यर्थः ॥
७ *] ज्ञानादीनामिच्छाद्यसमवायिकारणत्वपरिहाराय असमवायिकारणसामान्यलक्षणे ज्ञाना-दिभिन्नत्वविशेषणस्यावश्यकत्वात् ॥

एवं स्थिते शब्दस्य नित्यत्वे निरस्ते, कार्यत्वे च साधिते तदुत्पत्तौ आकाशं तावत् समवयिकारणम् । निमित्तकारणानि तु भूयांसि सन्त्येव । असमवायिकारणं तु चिन्त्यम् । तच्चाकाशाश्रितमवश्यम् । अन्यथा प्रत्यासत्त्यभावात् । तद्गुणान्तराणां च विभुत्वादीनां अनवधृतशक्तित्वात् वंशदलपाटनसमनन्तरं च शब्दोत्पाददर्शनात् एवं मन्यामहे ॥ § 9116 II.537/KSV

क्रिया यदैव संयोगं हन्ति वंशदलाश्रितम् ।
तदैव गगने कंचित् करोत्यतिशयं ध्रुवम् ॥§ 9118

आकाशातिशयो यश्च क्रियाजः शब्द कारणम् ।
असौ विभागनामेति शब्दे तज्ज्ञन्यतोच्यते ॥§ 9120

तदेवमेतत् यथागममाचार्यमतमभिहितमस्माभिः ॥ § 9121

## कीदृशो विभागः शब्दहेतुः

एतच्च मतिमद्भिर्विचारणीयम्—किमाकाशातिशयमात्रं किंचित् असमवायिकारणम्, उत यथा मुद्गरदण्डसंयोगकार्ये शब्दे भेरीगगनसंयोगस्यासमवायिकारणत्वम्, एवं वंशदलविभागकार्ये तस्मिन् दलगगनविभागस्येति । दलाकाशविभागोऽपि किं दलविभागजः, उत कर्मज एवेति ॥ § 9122

सर्वथा कश्चिदसाधरणो धर्मः संशयहेतुरुदाहर्तव्य इतीयता नः प्रयोजनम् ॥ § 9123

II.538/KSV

## विप्रतिपत्तेः संशयजनकत्वम्

विरूद्धा प्रतिपत्तिः विप्रतिपत्तिः । अस्त्यात्मेत्येके, नास्त्यात्मेत्यपरे । सेयं विप्रतिपत्तिरूपलभ्यमाना—*विशेषस्मरणद्वारेण संशयमावहति । न चेह कश्चिदनुगतो व्यावृत्तो वा धर्मः संशयकारणं, अपि तु विप्रतिपत्तिरेवेति । किं तत्रापि त्रिपदपरिग्रहेण लक्षणवर्णनम्, एकेनैव वा पदेनेति पूर्ववदाचार्यद्वयमतमनुसरणीयम् ॥ § 9124

---

२ ] शं— nyāma-wit_kha
८ ] क्ति— nyāma-wit_ca
११ ] स— nyāma-wit_ca
११ ] अ— nyāma-wit_kha
१२ ] भेरी— nyāma-wit_kha
१२ ] नकार्य— nyāma-wit_ca
१९--२० ] अ— nyāma-wit_kha
२० ] रूप— nyāma-wit_kha

---

१३ भावात्] व्यधिकरणयोः कथं कार्यकारणभावः ॥
१३ क्तित्वात्] शब्दोत्पत्ताविति शेषः ॥
१४ एवं] इदमत्र तत्त्वम्—सिद्धान्ते हि अवयवावयविनावत्यन्तंभिन्नौ । संयोगविभागौ च नियमेनाव्याप्यवृत्ती । अतः अवयवसंयोगविभागाभ्यामेवावयविनि तावुपपादनीयौ ॥
८ *] विशेषस्मरणं—कोटिद्वयस्मरणम् ॥

## उपव्यब्ध्यलवस्थया संशयः

उपलब्ध्यव्यवस्थातः खल्वपि भवति संशयः । सच्चोदकमुपलभ्यते यथा ह्रदादिषु । क्वचिदसच्च भास्करकरनिकरप्रतिफलनतरलितासु मरुस्थालीषु । तदेवमुपलब्धेरव्यवस्थितत्वात् क्वचिदुपलभ्यमाने भवति संशयः—किमिदं सदुपलभ्यते, किमसदिति ॥ § 9125

## अनुपलब्ध्यव्यवस्थाया संशयः

अनुपलब्ध्यव्यस्थातश्च भवति संशयः । किंचिदसदेव नोपलभ्यते नभःसमादि । किंचित्सदपि नोपलभ्यते मृदन्तरितशङ्कुमूलजलादि । तदन्यत्रानुपलभ्यमाने संशेते पुमान्, किमिदमसदेव नोपलभ्येते, उत सदिति ॥ § 9126

## अव्यवस्थायाः स्वरूपम्

*अव्यवस्थशब्देनात्र पूर्वं पर्यायेण प्रवृत्तसदसदाश्रितविशेषादर्शनं सूचितम्; इदानीं पुनः अर्थक्रियासमर्थतादिविशेषदर्शनशून्यचेतसां उपलब्ध्यनुप- II.539/KSV
लब्धिमात्रोपपत्तेः संशयो भवतीति वर्ण्यते । न चैवं सति सर्वत्रानाश्वास इति शङ्कनीयम्, यथानुभवं संशयाभ्युपगमात् । सर्वत्र च तदुत्पादकविशेषाग्रहणतत्स्मरणादिकारणसान्निध्यासंभवादिति ॥ § 9127

अत्रापि पदत्रयेण एकेन वा पदेन लक्षणोपपादनं पूर्ववद्द्रष्टव्यम् ॥ § 9128

## सौत्रपदानां न पौनरूक्त्यम्

ननु च ! उपलब्ध्यनुपलब्धी सदसतो; समान एव धर्म इति पूर्वेण गतार्थत्वम्—नैतत्—पूर्वनिर्दिष्टस्योर्ध्वत्वादेर्धर्मस्य ज्ञेयस्थत्वात्, उप लब्ध्यनुपलब्ध्योश्च ज्ञातृस्थत्वात् ॥ § 9129

अत एव च मानसमिमं संशयमाचक्षते, न बाह्यधर्मिसंबद्धसाधारणोर्ध्वतादिधर्माधिगमाधीनसंशयवत् बाह्येन्द्रियजम् ॥ § 9130

## उपलब्ध्यनुपलब्ध्यव्यवस्थयोर्विशेषः

६ ] का— nyāma-wit_kha
११ ] ब्ध्यदर्शन— nyāma-wit_kha
११ ] व— nyāma-wit_kha
१३ ] णात्— nyāma-wit_kha

१ *] उपलब्धेरव्यवस्था अनुपलब्धौ, अनुपलब्धेरव्यवस्था उपलब्धौ च विश्राम्यतीति अनयोः को भेद इति शङ्कां वारयति—अव्यवस्थेत्यादिना ॥
६ अत्रापि ] व्याख्यान इति शेषः ॥

ननु च ! उपलब्धित्वं अनुपलब्धित्वं वाऽत्र संशयकारणम् । तद्धि न ज्ञातरि वर्तते, किन्तु बुद्धाविति कथमयं विशेषः—सत्यमेवम्— असमानधर्मोऽप्युपलब्धितादिकः यदाश्रितः, तद्धि बोद्धरि वर्तते । अतो विशेषात् पृथगेव कथ्यते । यथा ह्यसाधारणताश्रयः, एवंप्रकारमेव च विशेषमाश्रित्य किंचित् पंचविधत्वं विपंच्यते ॥ § 9131

परमार्ततस्तु सर्वत्रानुगतसंबन्धो दुष्परिहरः, विशेषस्मरणजन्यत्वात्संशयस्य । विशेषाणां च येन सह पूर्वं दर्शनमभूत्, तस्मिन्ननुपलभ्य माने II.540/KSV स्मरणासंभवात् । अतस्तस्यानेकविशेषानुगामित्वात् समानत्वमपरिहार्यम् । अत एव चाक्षिप्तसामान्यवाचिनं समानशब्दं सामान्यलक्षणे व्याचख्युराचार्या इत्यलमतिविस्तरेण ॥ § 9132

इति पंचविधः प्रपंचितः
मुनिना दर्शित एष संशयः ।
फलवद्व्यवहारहेतुतां
अनुमानाङ्गतया विभर्ति यः ॥§ 9136

अनुमानिरपेक्ष एव वा
किल दृष्टे विषयेऽर्थसंशयः ।
वहति व्यवहारवर्तनीं
इति पूर्वं च विचारितं बुधैः ॥§ 9140

—इति संशयपरीक्षा— § 9141

## अथ प्रयोजनपरीक्षा

### यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥ १-१-२४ ॥ § 9142

यमित्यत्र देशकालपुरुषदशाभेदभिन्नप्रयोजनविशेषव्याप्तये वीप्सा द्रष्टव्या । अर्थः—अर्थ्यमानः उच्यते, न वस्तुरूप एव, अभावस्यापि प्रयो जनत्वसंभवात् । *अधिकारः—अर्थस्य व्यवसायः । यं यमर्थं आप्तव्यं हातव्यं वाऽधिकृत्य व्यवसायः प्रवर्तते, तत्प्राप्तये परिहाराय वा चेष्टते पुरुषः—तत् प्रयोजनमिति ॥ § 9143

II.541/KSV

१२ ] तत्— nyāma-wit_ca
२ ] स— nyāma-wit_kha
७ ] न्नु— nyāma-wit_kha

२० ब्दं ] सामान्यलक्षणे—संशयसामान्यलक्षणे ॥
११ *] अधिकृत्य—इत्यत्रैकदेशः अधिकारः ॥

## फलस्य द्विविधत्वम्, आपेक्षिकत्वं च

तच्च गौणमुख्यभेदेन द्विविधम् । मुख्यं सुखप्राप्तिः, दुःखपरिहारश्च । तत्साधनं तु गौणम् । सुखसाधनमपि चन्दनधनसारहारमहिलादि प्राप्तव्यत्वात् मुख्यत्वेन यदा विवक्षितं भवति, तदा तदवाप्त्युपाये गौणता द्रष्टव्या ॥
§ 9144

तच्च प्रयोजनं देशकालपुरुषशाभेदादव्यवस्थितं भवति । तद्यथा ग्रीष्मे मरुस्थले निशातमलातकनिकरमिव किरति किरणमिषेण पूषणि, तृषातुरस्य तुषारकणोत्करदन्तुरमम्बु परमं सुखसाधनम्, तदेव शिशिरे सकलजगत्कम्पकारिणि दारुणसमीरणशिथिलीकृतनीरेषु काश्मीरेषु श्लेष्मोपचयजनितजडिमजठरशिखिनः खेदाय जायते । तस्मादनियत एवायं सुखदुःखसाधनभावो भावानाम् ॥ § 9145

*यद्यपि च यदेकदा सुखसाधनमिति विदितमुपयुक्तम्, अतिक्रान्तं वस्तु तत्—तथापि तज्जातीयत्वलिङ्गावधृतसुखसाधनभावे भावान्तरेऽदि प्रवर्तन्त एव तदर्थिनः ॥ § 9146

## प्रयोजनस्य प्रवर्तकत्वाक्षेपसमाधाने

ननु ! प्रयोजनस्य प्रवर्तकत्वमयुक्तम्, सदसद्विकल्पाभ्यामनुपपत्तेः । सत्त्वे कर्णनासादिवत्—न तदर्था प्रवृत्तिः । असत्त्वे तु खपुष्पा दिवत् न तराम्—नैष दोषः—ईप्साजिहासाविषयीकृतस्य तस्य प्रवर्त कत्वात् । न II.542/KSV
हि तत् खपुष्पादिवदसाध्यम् । नापि शिरःपाण्यादिवत् सिद्धमेव । अदि तु साध्यत्वेन बुद्ध्युपारूढं तत् प्रवर्तकमिति सर्वलोकसाक्षिकमेतत् । तस्मात् इच्छाविषयीकृतं तत् प्रवर्तकमिति युक्तम् ॥ § 9147

इत्थं प्रवर्तकत्वे प्रयोजनस्योपपदिते मुनिना ।
भग्ना भवन्ति सर्वे प्रेरकपक्षाः पराभिहिताः ॥§ 9149

प्रयोजनमतोऽखिलैर्विधिवचोभिरादिश्यते
प्रयोजननिबन्धनास्तनुभृतामशेषाः क्रियाः ।

२ ] म— nyāma-wit_kha
५ ] तं— nyāma-wit_kha
८ ] क— nyāma-wit_kha
१४ ] नु— nyāma-wit_kha
१८--१९ ] ति— nyāma-wit_kha

१६ त्वेन] अर्थकामावपि हि पुरुषार्थवर्गपरिगणितौ ॥
१ *] प्रयोजनस्य प्रवर्तकत्वं आक्षिप्य सामाधत्ते—यद्यपीत्यादिना । अस्यैव विवरणमुपरिष्टात् ॥
७ त्] न हि खपुस्पे कस्यचिदीप्सा भवति ॥
११ क्षाः] पूर्वं एते पक्षा विचारिता विस्तरेण ॥

क्रिमेरपि यथा तथा किमपि जीवितं बिभ्रतः
प्रयोजनबहिष्कृतं न खलु चेष्टितं दृश्यते ॥§ 9153

वैतण्डिकः प्रयतते निजपक्षसिद्धै
तां चैष वेद परपक्षनिषेधलभ्याम् ।
तस्मादियं स्वमतसाधनवर्जिताऽपि
युक्ता प्रयोजनवती भवितुं वितण्डा ॥§ 9157

—इति प्रयोजनपरिक्षा— § 9158

## अथ दृष्टान्तपरीक्षा

### लौकिकपरीक्षकानां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ॥ १-१-२५ ॥ § 9159

II.543/KSV

लौकिकपरीक्षकौ वादिप्रतिवादिनौ दृष्टान्तलक्षणप्रस्तावाद्वेदितव्यौ । न तु मूर्खपण्डितौ, *प्रकृतासङ्गतेः । तयोश्च सङ्गत्यभावात् । तयोश्च यस्मिन्नर्थे—भावस्वभावे अभावात्मके वा बुद्धिसाम्यं—प्रयोज्यप्रयोजकभावव्यवस्थित-साध्यसाधनधर्माधिकरणत्वे—साध्यव्यावृत्तिपूर्वकसाधनधर्मव्यावृत्ततायां वा तुल्यरूपा बुद्धिः स दृष्टान्तः । तस्य तथाविधधर्माधारत्वं तद्रहितत्वं वा वक्ष्यमाणादुदाहरणलक्षणान्मन्तव्यम् ॥ § 9160

### शिष्टमन्यतो ग्राह्यम्

यथा चानुमानलक्षणे तत्पूर्वकं इति प्रतिबन्धग्रहणोपायमात्रं प्रतिपादित-म्, तत्स्वरूपं तु अवयवलक्षणे निर्णीतं उदाहरणसाधर्म्यात् साध्य साधनं हेतुः तथा वैधर्म्यात् इति; एवमिह वादिप्रतिवादिप्रसिद्धिमात्रं दृष्टान्तस्य द-र्शितम् । रूपं तु तस्य द्विविधमपि तत्रैव वक्ष्यते साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् तद्विपर्ययाद्वा विपरीतम् इति ॥ § 9161

४ ] नन्वेष— nyāma-wit__ca
१० ] प्रस्तावलक्षणा— nyāma-wit__kha
१५ ] ल— nyāma-wit__kha
१५ ] णा— nyāma-wit__kha

२ *] प्रकृतं खलु न्यायशास्त्रम् । वस्तुतस्तु लोकस्यैव एतच्छास्त्रलक्ष्यत्वात् दृष्टान्तव्यवहारस्य सर्वत्र दर्शनात् लोकव्यवहारेऽपि दृष्टान्तप्रयोगदर्शनात् ऐहिकामुष्मिकपरौ उत्तानगंभीरप्रज्ञपरौ वा लौकिकपरीक्षकशब्दौ ॥
१० पि] [In the print edition there is a footnote reference, but no corresponding note.]

अनित्यः शब्दः कृतकत्वात्, यत् कृतकं तदनित्यं दृष्टम्—यथा घट इति साधर्म्यदृष्टान्तः । यत्पुनरनित्यं न भवति; तत् कृतकमपि न भवत्येव — यथाऽऽकाश इति वैधर्म्यदृष्टान्तः । यथोक्तलक्षणवैकल्यात्तु दृष्टान्ताभासता भवति ॥ § 9162

आभासभेदविभवः कथयिष्यते तु
तेषामुदाहरणलक्षणवाक्प्रसङ्गे ।
आभासता वचनदोषकृताऽपि काचित्
अस्तीति साऽवयवलक्षण एव वाच्या ॥§ 9166

II.544/KSV

द्विविधोऽपि दृष्टान्तः सुदृष्टिभिर्यत्नतोऽधिगन्तव्यः ।
स हि निश्चलः फलनिधेः अनुमानमहातरोः स्कन्धः ॥§ 9168

—इति दृष्टान्तपरीक्षा— § 9169

## अथ सिद्धान्तपरीक्षा

## तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ १-१-२६ ॥

§ 9170

तन्त्र्यतेऽनेन पदार्थस्थितिरिति तन्त्रं प्रमाणमुच्यते । अधिकरणम् — आश्रयः । तन्त्रम् अधिकरणं यस्य सः, तन्त्राधिकरणः, प्रमाणमूलक इत्यर्थः । अभ्युपगमः—स्वीकारः, तस्य संस्थितिः इत्थंभावव्यवस्था धर्मनियमः—इदमित्थमिति; इदमिति सामान्यनिर्देशः, इत्थमिति विशेषनिर्देशः । एवं च तन्त्राधिकरणाभ्युपगमसंस्थितिः—प्रमाणमूलाभ्युपगमविषयीकृतः सामान्यविशेषवानर्थः सिद्धान्त इति सामान्यलक्षणमुक्तं भवति ॥ § 9171

## सूत्रव्याख्याने पक्षान्तरम्

अन्ये तु व्याचक्षते—तन्त्रम्—इतरेतरसंबद्धस्यार्थसमूहस्योपदेशः शास्त्रम् । अधिक्रियते इत्यधिकरणं पक्ष उच्यते । अभ्युपगमः, यथोक्त एव । संस्थितिशब्दः प्रत्येकमभिसंबध्यते । तन्त्रसंस्थितिः अधिकरणसंस्थितिः, अभ्युपगमसंस्थितिः इत्यनेन तन्त्रनिर्देशसाम्यात् सर्वतन्त्रप्रति तन्त्रसिद्धान्तयोःसूचनम् । इतराभ्यां पदाभ्यां उत्तरयोः अधिकरणभ्युपागमसिद्धान्तयोरिति ॥ § 9172 II.545/KSV

१७ ] मः— nyāma-wit_kha

५ स्था ] संस्थितिः—अविचाल्यनिर्णयो वा इत्यर्थो वा ॥
॥

८ ति ] तन्त्राभ्युपगमः—शास्त्राश्रितः निर्णयः

## एताद्व्याख्याने न्यूनता

एतत्तु अपव्याख्यानम् । न ह्येवं सिद्धान्तचतुष्टयानुगतं किंचित्सामान्यलक्षणमुक्तं भवति । न चेदं विभागार्थं विशेषसक्षणार्थं वा सूत्रम्, तत्प्रतिपादनस्योत्तरसूत्रैः करिष्यमाणत्वात् । उक्तस्य च पुनर्वचने प्रयोजनाभावात् । अतः पूर्वप्रक्रमेणैव सिद्धान्तस्य सामान्यलक्षणवर्णनं श्रेयः ॥ § 9173

## सिद्धान्तविभागः, लक्षणानि च

तस्य स्वकण्ठेन विभागमाह— § 9174

### स चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात् ॥ १-१-२६ ॥ § 9175

चतुष्प्रकारो हि सिद्धान्तः—सर्वतन्त्रसिद्धान्तः, प्रतितन्त्रसिद्धान्तः अधिकरणसिद्धान्तः, अभ्युपगमसिद्धान्त इति ॥ § 9176

तत्र— § 9177

### सर्वतन्त्राविरुद्धः स्वतन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ § 9178

अत्र तन्त्रशब्देन शास्त्रमुच्यते स्वशास्त्रे य उपदिष्टोऽर्थः, सर्वशास्त्राविरूद्धश्च स सर्वतन्त्रसिद्धान्तः । यथा—चाक्षुषं प्रमाणमिति ॥ § 9179

ननु अत्रापि विविदन्ते । ब्रह्मवादिनां हि सर्वैवेयं अविद्या । अविद्या च
II.546/KSV कथं प्रमाणमिति—न—व्यवहारावस्थायां तैरपि तत्प्रामाण्या भ्युपगमात् संख्यालक्षणविषयविप्रतिपत्तिस्तु प्रतिशास्त्रं भवतु । चाक्षुषं प्रमाणं इतीयति सर्ववादिनामविवादः ॥ § 9180

## प्रतितन्त्रसिद्धान्तलक्षणम्

तन्त्रे अधिकृतोऽर्थ इति वर्थते । यथाऽस्माकमीश्वरेच्छाप्रेरितपरमाणुनिर्मितानि समानतन्त्रे कणव्रतमते तथैव सिद्धानि, परतन्त्रे च संख्या(?)शास्त्रे तथा नाभ्युपगम्यन्त इति ॥ § 9181

यथा वा गुणत्रयात्मिकायाः प्रकृतेः महदहङ्करादिरूपेण भूतसर्ग ति सांख्यानां स्वतन्त्रसिद्धोऽर्थः; समानतन्त्रेऽपि पातंजले योगाशात्रे सिद्ध एव,

---

१०४३.९--१०४४.१० ] तत्र—
nyāma-wit_kha

---

२० म ] संस्थितिपदं सामान्यलक्षणानुगमसूचकम् ॥
७ मात् ] अयमंशः सर्वापलपिनां माध्यामिकानामपि समानः ॥

परतन्त्रे तु वैशेषिकादिमते न सिद्ध इति ॥ § 9182

ननु ! अस्य कथं प्रमाणमूलता—स्थाने प्रश्नः, सत्यमेतत्— आस्माकीने हि प्रतितन्त्रसिद्धान्ते प्रमाणमूलत्वं यथार्थमेव । सांख्यसिद्धान्तस्य तु प्रमाण— § 9183

मूलत्वाभावेऽपि परतन्त्रत्वख्यापनायोदाहृतः ।
तदभिप्रायेण वाऽस्य प्रमाणमूलता वक्तव्येति ॥§ 9185

## अधिकरणसिद्धान्तलक्षणम्

### यत्सिद्धावन्यप्रकरणसिद्धिः साऽधिकरणसिद्धान्तः ॥ १-१-३० ॥ § 9186

II.547/KSV

प्रक्रियत इति प्रकरणं—पक्ष उच्यते । यस्यार्थस्य सिद्धौ सत्यां प्रकरणान्तरसिद्धिः भवति—सोऽधिकरणसिद्धान्तः, तदधिकरणानामर्थान्तराणां सिद्धेः ॥ § 9187

कः पुनः यत्सिद्धौ इति सर्वनाम्ना प्रत्यवमृश्यते, पक्षः हेतुर्वा ?* किंचातः ? पक्षः कथं पक्षान्तरसिद्धये कल्पते । हेतुना हि पक्षसिद्धिः क्रियते, न पक्षेण हेतोः । हेतोस्त्वधिकरणसिद्धान्तत्वे कथं सिद्धान्ताश्रया न्यायप्रवृत्तिरिति तदुद्देशप्रयोजनं वर्णितम् । न्यायो हि हेतुरेव । स एव चाधिकरणसिद्धान्तः । न च हेतुर्हत्वाश्रय इति ॥ § 9188

## सिद्धसाध्यभाव आपोक्षिक एव

उच्यते—उभयथाऽप्यदोषः । हेतुरपि क्वचित् पक्षीभवति, पक्षोऽपि हेतूभवत्येव । तत्र तावदांजस्येन हेत्वधीना पक्षसिद्धिरिति हेतुरेव सर्वनाम्नाऽवमृश्यते । तत्सिद्धावन्यप्रकरणसिद्धेः स एवाधिकरणसिद्धान्तः ॥ § 9189

कथं तर्हि तदाश्रया न्यायप्रवृत्तिः ?—उच्यते—हेतुरपि तदन्यतरा सिद्ध इव साध्यमानत्वात् पक्षीभवन् न्यायान्तराश्रयतां प्रतिपत्स्यते ॥ § 9190

६ ] (?) nyāma-wit_kha
२१ ] भिन्न— nyāma-wit_kha

१६ ता ] तत्तन्त्रदृष्टा इतराण्यप्रामाणिकानि खलु । अतश्च तस्य तन्त्रत्वमेव कथम् ?
२० व्येति ] वस्तुतस्तु—सर्वेषामहि शास्त्राणां व्यवस्थितविषयत्वात्, तत्तन्मर्यादानतिक्रमेण तेषां प्रमाणसिद्धत्वमस्त्येव । सांख्यतन्त्रं हि तत्त्वक्षेत्रनियतम् । न्यायतन्त्रं च स्थूलजगद्विषयकम् ॥
४ * ] साध्यं तु साध्यत्वादेव न विकल्पितुमर्हति ॥

अपि वा—पक्ष एव सर्वनाम्नाऽवमृश्यमानः भवत्वधिकरणसिद्धान्तः । स च स्पष्ट एव न्यायस्याश्रयः । स च सिध्यन् पक्षान्तराण्याक्षिपन्नेव सिद्ध्यतीत्यधिकरणसिद्धान्ततां भजते ॥ § 9191

तस्योदाहरणं—इन्द्रियव्यतिरिक्तः ज्ञाता, दर्शनस्पर्शनाभ्यामेकार्थग्रहणादिति । अत्र इन्द्रियव्यतिरिक्ते ज्ञातरि सिद्ध्यति, तदनुषङ्गीण्य र्थान्तराण्यपि II.548/KSV सिद्ध्यन्ति—नाना इन्द्रियाणि, नियतविषयाणि; गुणव्यतिरिक्तं द्रव्यं—इत्येवमादीनि ॥ § 9192

## अभ्युपगमसिद्धान्तनिरूपणम्

## अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणं अभ्युपगमसिद्धान्तः ॥ १-१-३१ ॥ § 9193

अत्र अपरीक्षिताभ्युपगमात् इति यथाश्रुतपंचमीनिर्देशमनुरुध्यमानाः, प्रमाणमूलाभ्युपगमविषयीकृतोऽर्थः सिद्धान्तः—इति च सामान्य लक्षणमनुसरन्तः केचित् एवं व्याचक्षते—धर्मिणः शब्दादेः नित्यानित्यत्वविचारचर्चायां अपरीक्षितस्यैव—आकाशविशेषगुणत्वादिधर्मपरीक्षारहितस्यैवाऽभ्युपगमः कर्तव्यः । ततोऽपरीक्षिताभ्युपगमात् किं सिद्ध्यति ?—उच्यते—तद्विशेषपरीक्षणमिति । तद्गतनित्यानित्वत्वपरीक्षणं हि सामान्येन धर्मिण्युपादीयमाने व्योमविशेषगुणत्वादिधर्मपरीक्षारहिते सत्युपपद्यते । यदि पुनराकाशविशेषगुणत्वविशिष्टः शब्दः धर्मित्वेनोपादीयते परं प्रत्यसिद्धविशेषणः पक्षो भवेदिति ॥ § 9194

एवमपि कृते यदि पुरोधर्मिणं विकल्पयेत्—कीदृशस्य सतः शब्दस्य भवता नित्यत्वं साध्यते—द्रव्यस्य, गुणस्य वेति । स एवं विकल्पयन् *अर्थान्तरगमनात्तावत् पराजित एव भवति । जितमप्येनं पुनर्जेतुं स्व बुद्ध्यतिशयचिख्यापयिषया, परबुद्ध्यवज्ञया च वादी ब्रवीति—अस्तु द्रव्यं शब्द इति ॥ § 9195
II.549/KSV

## पूर्वोक्तव्याख्याननिराकरणम्

८ ] न— nyāma-wit_ca
१२ ] नि— nyāma-wit_kha
१३--१४ ] मा— nyāma-wit_kha

२६ न्तः ] अर्थान्तररूपनिग्रहस्थान प्राप्त्येति शेषः ॥

९ *] परस्परविरुद्धो खलु तावुभौ ॥

एतत्तु व्याख्यानं न बुद्ध्यामहे । एवं व्याचक्षाणानामेषां अभ्युपगमसिद्धान्त इति को नु व्यवसित इति । यदि तावत् अनित्यः शब्द इति द्रव्यत्वगुणत्वादिविशेषरहितः शब्दाख्यधर्मिनिर्देशो यः प्रथममुपात्तः, स एवाभ्युपगमसिद्धान्तः । तत्र अभ्युपागमार्थः कीदृशः, कश्च प्रतितन्त्रसिद्धान्तादस्य विशेषः ॥ § 9196

अथास्तु द्रव्यं शब्द इति स्वबुद्ध्यतिशयाभिमानेन पश्चादभ्युपगम्यमानद्रव्यत्वविशिष्टशब्दनिर्देशः अभ्युपगमसिद्धान्तः, तर्हि सूत्रम्, अपरीक्षिताभ्युपगमात् इति न योजितम्, अन्यत्रैव तैस्सूत्रार्थो नीत इति ॥ § 9197

तस्मादेवं व्याख्यायते—अपरीक्षिताभ्युपगम एव स्वमतिकौशल्येन क्रियमाणः अभ्युपगमसिद्धान्तः—अस्तु द्रव्यं शब्द इति । प्रमाणमूलाभ्युपगमविषयीकरणं तु सामान्यलक्षणे प्रौढवाद्यभिप्रायेणैव योज्यम् । द्रव्यत्वमपि प्रमाणमूलं शब्दस्य भवतु; तथापि तस्यानित्यत्वमिति । किल निरवयवं द्रव्यं अनित्यमिति नास्त्येव, शब्दस्य तु तादृशस्याप्यनित्यत्वमहं साधयामीति ॥ § 9198

कथं तर्हि पंचमी ? किं पंचम्या ! वस्तु तावदीदृशं यथा व्याख्यतमस्माभिः ॥ § 9199

## अभ्युपगमात् इत्यत्र पञ्चम्यर्थः

पंचम्यपि चेत्थं योज्यते । किमर्थं पुनरयमपरीक्षित एव शब्दगतद्र व्यत्वाभ्युपगमः क्रियत इति पृच्छते उत्तरं पंचम्याऽभिधीयते—यस्मादपरी क्षिताभ्युपगमात् तद्विशेषानित्यत्वपरीक्षणमवकल्पते, तस्मादपरीक्षिताभ्यु पगमोऽपि अभ्युपगमसिद्धान्त इति । न तु तद्विशेषणपरीक्षणमेव II.550/KSV
सामा नाधिकरण्यनिर्देशात् अभ्युपगमसिद्धान्त इति मन्तव्यं, परीक्षणस्य सिद्धान्ताश्रितत्वात् । तस्मात् तद्विशेषपरीक्षणार्थः अपरीक्षिताभ्युपगमः प्रौढवादिना क्रियमाणः अभ्युपगमसिद्धान्त इति सूत्रार्थः । इत्थमेव च तत्र तत्र प्रवादुकानां व्यवहारः ॥ § 9200

इमाश्च सिद्धान्तभिदाश्चतस्रः
न्यायप्रवृत्तेः प्रथमं निमित्तम् ।
प्रवर्तते नैव परीक्षकाणां
अनाश्रिता न्यायकथा कदाचित् ॥§ 9204

—इति प्रयोजनपरिक्षा— § 9205

२५ ] स्थि— nyāma-wit_kha
१ ] र्मिणि— nyāma-wit_ca
११ ] त्यं— nyāma-wit_kha
१५--१६ ] द्र— nyāma-wit_kha
१८ ] मो— nyāma-wit_kha
२० ] वि— nyāma-wit_kha
२६ ] श्रया— nyāma-wit_kha

११ इति ] अपरीक्षितमभ्युपगम्य इति सूत्रितव्यं स्यात्तदेत्यर्थः ॥
७ सूत्रार्थः ] तथा च परपक्षाभ्युपगमोऽपि स्वप्रौढिमसूचकः आवश्यक इति प्रयोजकत्वमस्तु पञ्चम्यर्थः ॥

## न्यायावयवपरीक्षा

इह हि स्वयमवगतमर्थं अनुमानेन परस्मै प्रतिपादयता साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते, तावान् प्रयोक्तव्यः । तमेव च परार्थानुमानमाचक्षते नीतिविदः ॥ § 9206

## परार्थानुमाननिराकरणपूर्वपक्षः

ननु ! नैव परार्थानुमानं नाम किंचिदस्तिः वक्त्रपेक्षया; श्रोत्रपेक्षया वा तदनुपपत्तेः ॥ § 9207
II.551/KSV

वक्त्रान्वमायि स ह्यर्थः नेदानीमनुमीयते ।
श्रोतुः स्वार्थानुमानं तत् वाक्यावगतिहेतुकम् ॥§ 9209

यथा प्रत्यक्षतो धूमं दृष्टवाऽग्निमवगच्छति ।
तथा तदीयाद्वचनादिति कस्य परार्थता ॥§ 9211

आगमस्त्वेष भिद्येत कश्चिदर्थोपदेशकः ।
कश्चित्तत्प्रत्ययोपायन्यायमार्गोपदेशकः ॥ इति ॥§ 9213

## परार्थानुमानसाधनम्

सत्यम्—न परमार्थतः परार्थमनुमानमुपपद्यते । किन्तु द्विविधः प्रतिपत्ता । स्वयमवगतयथाप्रकृतलिङ्गव्याप्तिकः, तद्विपरीतश्च । तत्र स्वयमवधृतप्रतिबन्धं प्रति नोपदिश्यत एवमनुमानम्, स्वत एव तस्य (?)तीत्युपपत्तेः । अनवधृतव्याप्तिकस्य तु व्याप्तिरेव व्युत्पाद्यत इति तं प्रति परार्थमनुमानं तदुपदेशकं वाक्यमेवाख्यायते । तथा हि— § 9214

वक्ता स्वप्रत्ययेनेदं न हि वाक्यं प्रयुज्यते ।
परो मद्वचनादेव तमर्थं बुद्ध्यतामिति ॥§ 9216

किं त्वेनमनुमानेन बोधयामीति मन्यते ।
सोऽपि तद्वचनान्नैव तमर्थमवबुद्ध्यते ॥§ 9218

---

७ ] ज्ञा— nyāma-wit__ca
१४ ] वास्या— nyāma-wit__ca
२० ] वं— nyāma-wit__ca

---

२ कः ] अतश्च परार्थानुमानं शब्दएवान्तर्भूतम् ॥

किन्तु व्याप्तिमतो लिङ्गात् स्वयं तत्तु न पश्यति ।
तत्प्रतीत्यभ्युपायत्वात् परार्थमिदमुच्यते ॥§ 9220

अतश्च श्रोतुः स्वार्थानुमानमेवेदम् । वक्ता तु तथा परं प्रतिपादयन् परार्थानुमानं प्रयुङ्क्ते इत्युच्यते ॥ § 9221

II.552/KSV

### परार्थानुमानस्य प्रमाणत्वम्

न चानुवादमात्रं तत् वक्तुरित्युपपद्यते ।
यतो व्याप्रियते सम्यक् परस्य प्रतिपत्तये ॥§ 9223

तेनानधिगतार्थोपदेशकत्वात् नानुवादमात्रम् । स्वावगमापेक्षया त्वनुवादत्वे नेदानीमाप्तवचनं अननुवादरूपं किंचिद्भवेत्, सर्वस्य स्वोपलब्धिपूर्वकत्वादिति ॥ § 9224

तस्मात् परार्थानुमानवाक्योपपत्तेः तदेकदेशाः अवयवा युक्ता इति लक्ष्यन्ते ॥ § 9225

प्रतिज्ञाहेतूदाहरणोपनयननिगमनान्यवयवाः ॥ १-१-३२ ॥
§ 9226

एतच्च सूत्रमेकमेव सामान्यलक्षणमवयवानामभिधत्ते, विभागं च प्रमाणानामिव—प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति । तत्र अवयवाः, भागाः, अंशाः, एकदेशाः इत्येवं अवयवशब्दः साधनीयार्थप्रतिपत्तिपर्यन्तवचनकलापैकदेशत्वमवयवानां सामान्यलक्षणमाचष्टे ॥ § 9227

### न्यायस्य वाक्यसमुदायरूपत्वम्

यद्यपि चैकवदनविनिर्गतानां निसर्गभङ्गुराणां अदीर्घायुषां अपरिहार्यक्रमजन्मनां वर्णानां द्रुमाणामिव पारमार्थिकस्समूहो न समस्त्येव; तथापि सिषाधयिषितार्थप्रतिपादनरूपैककार्योपयोगमूलीकृतात्मनां तेषां काल्पनिकः कलापः पूर्वमेव वाक्यकल्पनावसरे समर्थित इति तद्भागा अपि संभवन्त्येव ॥ § 9228

II.553/KSV

---

१५--१६ ] ब्दः— nyāma-wit__kha

१९ ] नां— nyāma-wit__kha

१९ ] हरूपः— nyāma-wit__ca
२० ] चू— nyāma-wit__ca

---

१५ ते ] तथा च मानसपरामर्शजनकत्वात्तद्वाक्यसमुदायत्य न तस्य शब्दरूपत्वम्, किन्त्वनुमानरूपत्वम् ॥

७ तानां ] वर्णानां वृक्षाणामिव मेलनासंभवहेतवः—निसर्गेत्यादयः ॥

## पदानामपि वाक्यत्वम्

न च पदानामेवानुमानवाक्यावयवत्वम्, अपि तु खण्डवाक्यानाम् एकैकेन पदेन प्रतिज्ञोदाहरणादीनामभिधातुमशक्यत्वात् । हेतुवचनं तु एकमपि पदं क्वचिद्भवति—कृतकत्वात्—इति । तदपि वा सविशेषणं प्रयुज्यमानं पदसमुदायेनैव प्रतिपाद्यते—वस्तुत्वे सति कृतकत्वात्— इति ॥ § 9229

उदाहरणवचनमपि घटवत् इत्यालस्यादेव प्रयुंजते । तद्धि व्याप्तिप्रदर्शनाय एवं वक्तव्यम्—यत् कृतकं तत् अनित्यं दृष्टं, यथा घटः— इति ॥ § 9230

तस्मादवयवानामवयवत्वमेव लक्षणं, न पदत्वम् ॥ § 9231

विभागोऽपि प्रतिज्ञादिपदसन्निधाववयवश्रुतेरेवावगम्यते, प्रतिज्ञादयः पंचावयवाः, न न्यूनाः नातिरिक्ता इति ॥ § 9232

## अवयवसंख्याविमर्शः

ननु अत्र विवदन्ते केचित् नूनतामवयवानामाचक्षते । त्र्यवयवं द्व्यवयवं वा साधनवाक्यं वदन्तः ॥ § 9233

अन्ये तु जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनम्, संशयव्युदास इति पंचभिस्सह प्रतिज्ञादीन् दशावयवानाहुः ॥ § 9234

II.554/KSV

## पक्षान्तरनिराकरणम्

उच्यते—न्यूनता यथाऽवसरं प्रतिसमाधास्यते । आधिक्यमप्ययुक्तम्, जिज्ञासादीनां अशब्दस्वभावत्वेन वाक्यावयवत्वायोगात् ॥ § 9235

तथा हि—अप्रतीयमानेऽर्थे प्रतीतिप्रयोजनस्य प्रवर्तिका जिज्ञासा । सा चेच्छास्वभावत्वादान्तरः प्रमातृधर्मः न वाक्यावयवः ॥ § 9236

अर्थक्रियासाधनेऽर्थे विमर्शः संशयः—किमेवमयम्, अयथैवमिति । सोऽपि ज्ञानात्मकत्वान्न वाक्यावयवः ॥ § 9237

प्रमातुः प्रमाणानि प्रवर्तमानानि प्रमेयमर्पयितुं पारयन्तीति सम्भावना शक्यप्राप्तिः । साऽपि तथैव न वाक्यावयवः ॥ § 9238

प्रयोजनं संशयितस्य निर्णयः कथं वाक्यावयवतां स्पृशेत् ॥ § 9239

---

२ ] के— nyāma-wit_kha
४ ] मूहैरेव— nyāma-wit_ca
१४ ] दिभिः— nyāma-wit_ca
२० ] ज्ञा— nyāma-wit_kha
२२--२३ ] वं— nyāma-wit_kha

---

१४ इति ] वर्णसमुदायस्यैव पदत्वेऽपि एकाक्षराणां कः इत्यादीनां यथा पदत्वम्, तथैव संसर्गविशिष्टार्थबोधकत्वे एकस्य पदस्यपि वाक्यत्वमविरूद्धम् ॥

१ न्ते ] केचित्—बौद्धाः । अन्ये—भिमांसकाः ॥

संशयव्युदासस्तु प्रत्यक्षोपालम्भः । स च वचनस्वभावत्वेऽपि न साधनवाक्यस्यावयवत्वं प्रतिपद्यते ॥ § 9240

तदिमे संशयादयः प्रकरणप्रवृत्तिहेतवो भवन्ति, न वाक्यावयवा इति सूक्तं प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः इति ॥ § 9241

## प्रतिज्ञालक्षणम्

तेषाम्— § 9242

## साध्यनिर्देशः प्रतिज्ञा ॥ १-१-३३ ॥ § 9243

प्रतिज्ञेति लक्ष्यनिर्देशः । साध्यनिदश इति लक्षणम् । शुद्धस्य धर्मिणो वा,* धर्मस्य वा, द्वयोर्वा स्वतन्त्रयोः, धर्मिविशिष्टस्य वा धर्मस्य साध्यत्वानुपपत्तेः धर्मविशिष्टो धर्मी साध्य इत्यनुमानलक्षणे निर्णीतमेतत् । तस्य निर्देशः—परिग्रहवचनं प्रतिज्ञेति ॥ § 9244

II.555/KSV

## प्रतिज्ञालक्षणस्य दुष्टत्वाक्षेपः

ननु ! सावधारणत्वाद्वाक्यानां किं साध्यनिर्देश एव प्रतिज्ञेत्यवधारणम्, उत प्रतिज्ञैव साध्यनिर्देश इति ॥ § 9245

यदि साध्यसिदेश एव प्रतिज्ञेत्यवधार्यते, तदा यत एवकारकरणम्, ततोऽन्यत्रावधारणमिति प्रतिज्ञा नियम्यते, साध्यनिर्देशं मा हासीरिति, साध्यनिर्देशस्त्वनियमित इति प्रतिज्ञामपहायापि भवेदित्यतिव्यापकं लक्षणम् ॥ § 9246

अथ प्रतिज्ञैव साध्यनिर्देश इत्यवधार्यते, ततः साध्यनिर्देशो नियम्यते प्रतिज्ञां मा त्याक्षीदिति । प्रतिज्ञा त्वनियमितेति साध्यनिर्देशमपहायापिभवेदिति साध्यनिर्देशेन प्रतिज्ञाया अव्याप्तत्वात् अव्यापकं लक्षणमिति ॥ § 9247

## उक्तदोषपरिहारः

३ ] प्र— nyāma-wit__kha
१४ ] त्याक्षीदि— nyāma-wit__kha

२१ *] न हि यत्र कुत्रचित् वह्निः साध्यः । किन्तु अधिकरणविशेषे ॥
५ म्] तथा च वह्निमान् इत्यस्यापि प्रतिज्ञात्वं स्यात् ॥
९ मिति] तथा च पर्वतः इत्यस्यापि प्रतिज्ञात्वं स्यात् ॥

तदेतदयुक्तम् । न हि सर्वं वाक्यं सावधारणं भवति । यथा एष पन्थाः स्रुघ्नं गच्छति इति । न हि तत्र—एष एवेति, स्रुघ्नमेवेति वा गच्छत्येवेति वा नियन्तुं शक्यत इति ॥ § 9248

अथापि अवधारणममश्याश्रयणीयं, तद्भवतु—साध्यनिर्देश एव प्रतिज्ञति । न चातिव्याप्तिः, प्रतिज्ञामपहायान्यत्र साध्यनिर्देशस्यादर्शनात् । अनियमितोऽप्यसावन्यत्र न च दृश्यते एवेति । तस्मात् साध्यतिर्देश एव प्रतिज्ञेति स्थितम् । तद्यथा—अनित्यश्शब्द इति ॥ § 9249

II.556/KSV

## विशेषणस्य स्वविरुद्धधर्ममात्रव्यावर्तकत्वम्

ननु ! अत्रापि किमनित्य एव शब्दः, इत्यवधारणम्, उत शब्द एवानित्य इति । तत्र अनित्य एव शब्द इत्युक्ते, तद्गतधर्मान्तरतिरस्कारात्, कृतकत्वमपि तत्र न भवेदित्यसिद्धो हेतुः । शब्द एवानित्यः इति त्ववधार्यमाणे घटादावनित्यत्वप्रतिषेधादन्वयशून्यता हेतोः स्यादिति —नैष दोषः—निरवधारणस्यापि वचनप्रयोगस्य दर्शितत्वात् । अनित्य एव शब्द इत्यवधारणे वा नानित्यत्वव्यतिरिक्ततदविरुद्धकृतकत्वाद्यशेष धर्मान्तरनिषेधस्तत्र विधीयते । किन्तु, तद्विरुद्धनित्यत्वमात्रनिषेध एव —अनित्य एव शब्दः, न नित्य इत्यर्थः । तदुक्तम् श्लो. वा. अनु-५५— § 9250

नियमस्तद्विरुद्धाच्च कल्प्यते, नाविरोधिनः§ 9251

इति ॥ तस्मान्न हेतोरसिद्धत्वम् ॥ § 9252

## प्रतिज्ञावाक्यवैयर्थ्यशङ्का

ननु ! साधनवाक्ये प्रतिज्ञावचनमसमंचतम्, असाधनांगवचनत्वात् । हेतुदृष्टान्तवचनाभ्यां हि साध्यसिद्धेः ते एव वक्तव्ये । न च स्वप्रतिपत्तावुपलब्धं सर्वमेव परस्मै आख्येयम् । आख्याने वा धर्मिमात्रमाख्यायताम् । स्वप्रतिपत्तौ हि पूर्वं पर्वतादेः शुद्धस्य धर्मिणो ग्रहणम् । सिषाधयिषित-

---

६ ] च— nyāma-wit_ca
८ ] व— nyāma-wit_kha
११--१२ ] यव— nyāma-wit_ca
१३ ] विशे— nyāma-wit_ca
१५ ] पक्षा— nyāma-wit_ca
१९ ] पू— nyāma-wit_ca

---

१० ति ] किन्तु तथा विवक्षायां सत्यामेव ॥
१४ नात् ] पक्षमन्तरा कथ्यमानस्य तस्य साध्यत्वाभावात् ॥

हुतवहादिधर्मविशेषरूषितवपुषः एवमभ्युपगमेऽनुमानवैफल्यप्रसङ्गात् । अतः कथं प्रथममेव साध्यधर्माध्यासितस्वरूपधर्मिनिर्देशकरणम् ॥ § 9253

II.557/KSV

अपि च विवादादेव प्रतिज्ञार्थो लभ्यते इति किं स्वकण्ठोक्तेन तेन प्रयोजनम् ॥ § 9254

## प्रतिज्ञावाक्यस्यावश्यकता

उच्यते—स्वप्रतिपत्तिमनुसरता परस्य प्रतिपत्तिरुत्पादनीयेति स्वप्रतिपत्तौ प्रथममुपलब्धो धर्मी तावत् आख्येय एव । अनुच्यमाने हि धर्मिणि निरधिकरणो हेतुः क्वसाध्यं साधयेत् । धर्मिण्यनवच्छिन्ने च धर्ममात्रेऽनुमानमनर्थकम्, अविवादसिद्धत्वात्; अस्ति हि यत्र क्वचित् अनित्यत्वमिति ॥ § 9255

आश्रयासिद्धश्च धर्मिनिर्देशाद्विना हेतुर्नवेदिति अवश्यनिर्देश्यो धर्मी ॥ § 9256

यद्यपि धर्मिमात्रदर्शनमेव प्रथममभूत्; तथापि किं साधयितुमेष हेतुः प्रयुक्तो भवेत् इत्युपप्लवशमनाय साध्यधर्मनिर्देशोऽपि कर्तव्यः । शब्दः कृतकत्वादिति हि प्रयुज्यमानं तदिदं अन्धपदमिवासाधनं भवेत् ॥ § 9257

## उदाहरणादिना प्रतिज्ञाया नान्यथासिद्धिः

अथ व्याप्तिप्रदर्शनप्रवणेन यत् कृतकं तदनित्यं दृष्टं इति दृष्टान्तवचसा, तस्मादनित्यः इति निगमनवचनेन वा विरंस्यति स उपप्लव इति—तथापि श्रोतृबुभुत्सोपरमपरिश्रमफले साधनवाक्ये साधनाधिगमाकाङ्क्षासंपादनाय साध्यं निर्देष्टव्यम् । न हि शब्द इत्येतावत्युक्ते तत्र साधनमाकाङ्क्षति कश्चिदिति साधनवचनावसरतत्प्रयोगसाफल्योत्पादनायैव नूनं अनित्यः शब्दः इति प्रतिज्ञावचनं प्रयोक्तव्यम् ॥ § 9258

II.558/KSV

## पक्षप्रतिपक्षपरिग्रह एव प्रतिज्ञा

१ ] दू— nyāma-wit__ca
६ ] एवानुद्देश्य— nyāma-wit__kha
७ ] र्म्य— nyāma-wit__kha
१० ] र्मः— nyāma-wit__kha
१२ ] तुं— nyāma-wit__kha
१४ ] व— nyāma-wit__kha; nyāma-wit__ca; nyāma-wit__gha
१५ ] निपु— nyāma-wit__kha
१७ ] समुत्पा— nyāma-wit__kha

६ ज्ञात् ] प्रतिज्ञावाक्येनैव पक्षे साध्यसिद्धेः, उपरितनवाक्यानां वैयर्थ्यम् । अयं बौद्धानामाक्षेपः ॥

१८ वेत् ] स्वस्य दर्शनमन्यत्, परव्युत्पादनं चान्यत् इत्यर्थः ॥

यच्च विवादादेव प्रतिज्ञार्थस्य लब्धत्वमभिधीयते; तदभ्युपगमनमेव शब्दान्तरेण प्रतिज्ञायाः। यतः विरुद्धो वादः विवादः। एक आह नित्यः शब्दः; इतरस्तु अनित्यः इत्याह। सोऽयं पक्षप्रतिपक्षपरिग्रहो विवादः प्रतिज्ञैव। स तु पक्षप्रतिपक्षपरिग्रहः तदहरेव भवतु, दिनान्तरे वेति किमनेन विशेषेण। अपरिहार्यं प्रतिज्ञावचनमिति ॥ § 9259

## पक्षाभासानां प्रतिज्ञात्वासंभवः

प्रतिज्ञैव च पक्ष इत्युच्यते। तदेवंविधे पक्षलक्षणे प्रदर्शिते बलात् पक्षाभासाः प्रतिक्षिप्ताः भवन्ति। तद्यथा—अनुष्णोऽग्निः इति प्रत्यक्षविरुद्धः पक्षः। न रूपग्राहि चक्षुः इति अनुमानविरुद्धः ॥ § 9260

शब्दविरुद्धस्तु बहुशाखः—ब्राह्मणेन सुरा पेया इत्यगामविरुद्धः। जनयित्री मे वन्ध्या पिता मे ब्रह्मचारी इति धर्मिधर्मपदयोरेव विप्रतिषेधात् स्ववचनविरुद्धः। न चन्द्रः शशी इति लोकप्रसिद्धिविरुद्धः ॥ § 9261

उपमानविरुद्धस्तु—न गवयपदवाच्योऽयं गोसदृशः इति। अप्रसिद्धविशेषणः नभःकुसुमकृतावतंसः चैत्रः इति। अप्रसिद्धविशेष्यः सुगन्धि गगनकमलम् इति। अप्रसिद्धोभयः खपुष्पकृतशेखरः वन्ध्या सुतः इति ॥ § 9262

II.559/KSV

## सिद्धसाध्य पक्षाभासत

यत्रापि विशेष्यणयोरुभयोरपि प्रमाणन्तरतः स्वरूपं निश्चितमेव, तन्निर्देशोऽपि पक्षाभास एव—शीतं तुहिनं, उष्णोऽग्निः इति साध्यत्वाभावेन अनुमानप्रयोगावसरविरहादिति। *इयमेव च सा सिद्धसाध्यतोच्यत इति ॥ § 9263

## सर्वेषामपि हेतुदोषत्वमेवं

ये चैते प्रत्यक्षविरुद्धतादयः पक्षदोषाः, ये च वक्ष्यमाणाः साधनविकलत्वादयो दृष्टान्तदोषाः, ते वस्तुस्थित्या सर्वे हेतुदोषा एव। प्रपंचमात्रं तु पक्षदृष्टान्तदोषवर्णनम्। तथा चाबाधितत्वं हेतुलक्षणमेवोक्तम्। दृष्टान्तदुष्टतया च हेतोरेव लक्षणं अन्वयव्यतिरेकयोरन्यत् हीयत इति, सर्वे च ते

११ ] तीति— nyāma-wit_ca
१४ ] सूनुः— nyāma-wit_ca
१६ ] योः— nyāma-wit_ca
२२ ] द्द— nyāma-wit_kha

११ मिति ] तथा च पर्वतो वह्निमान् इति वाक्येनैव पर्वते वह्निज्ञानसंभवेऽपि व्याप्तिव्युत्पादनार्थं इतरावयवानां प्रयोगः ॥

३ *] सिद्धसाध्यतेति विशेष्याभिप्रायेण स्त्रीलिङ्गनिर्देशः ॥

हेतुदोषा एव ॥ § 9264

> अत एव च शास्त्रेऽस्मिन् मुनिना तत्त्वदर्शिना ।
> पक्षाभासादयो नोक्ताः हेत्वाभासास्तु दर्शिताः ॥§ 9266

> कश्चिद्धेत्वनपेक्षोऽपि पक्षमात्रप्रतिष्ठितः ।
> बोधोऽनुमानारूपस्य स्ववाक्यादिकृतो यथा ॥§ 9268

## हेतुपरीक्षा

एवं लक्षणको हेतुरिति तत्स्वरूपावधारणं सति तदभिधायकं वचनं मुखमेव लक्ष्यते इत्यर्थात्मकहेतुलक्षणं तावदुच्यते— § 9269
II.560/KSV

### उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥ १-१-३४ ॥ इति ॥

§ 9270

ननु ! अर्थात्मको हेतुः अनुमानम् । तच्च लक्षितमेव पूर्वम्— तत्पूर्वकं त्रिविधमनुमानम् इति—सत्यम्—तत्र तत्पूर्वकं इति सर्वनाम्ना परामृष्टप्रत्यक्षमूलतोपवर्णनेन प्रतिबन्धपरिच्छेदोपायमात्रनिरूपणं कृतम् । इह तु प्रतिबन्धस्वरूपमपि प्रतिपाद्यते ॥ § 9271

## सूत्रे पाठभेदः

तत्रा हि अर्थात्मके हेतौ लक्ष्ये पंचमीमपास्य उवाहरणसाधर्म्ये साध्यसाधनं हेतुः इति सूत्रं पठन्ति । व्याचक्षते च साधर्म्यं हेतुरित्युच्यमाने गन्धवत्त्वादेरसाधारणहेतोः साध्यधर्मिव्यक्तिभेदवृत्तित्वेन साधर्म्यरूपसंभवात्, विरुद्धस्य च पक्षविपक्षवृत्तेः तत्साधर्म्यस्वभावत्त्वात् हेतुत्वं प्रसज्यत इति तन्निवृत्त्यर्थं उदाहरणग्रहणम् । उदाह्रियतेऽस्मिन् साध्यसाधनयोः प्रयोज्यप्रयोजकभाव इत्युदाहरणं दृष्टान्तः । तेन साधर्म्यं कस्येति प्रकृतत्वात् प्रत्यासत्तेश्च साध्यधर्मिण इत्यवगम्यते । उदाहरणसाधर्म्ये साध्यदृष्टान्तधर्मिसाधारणो धर्मो हेतुरिति नासाधारणादौ तथाविप्रसक्तिरिति ॥ § 9272

## साध्यसाधनदलप्रयोजनम्

---

५ ] स्वरूप्य— nyāma-wit__ca
११ ] स्य— nyāma-wit__kha
२० ] स्य ध— nyāma-wit__kha

---

१२ तिष्ठितः ] परं त्वस्यापि तादृशपक्षकत्वात् हेतुदोषत्वमेव । अयमर्थः एकज्ञानविषयकत्वरूपसंबन्धकल्पनायां विश्रान्तः ॥

एवमपि प्रमेयत्वादेरनैकान्तिकहेतोः तथा भागासिद्धस्यानित्यत्वसिद्धये चतुर्विधपरमाणुपक्षीकरणे गन्धवत्त्वादेः प्रकरणसमकालात्ययाप * दिष्टयोश्च II.561/KSV उदाहरणसाधर्म्यसंभवात् हेतुत्वं भवेदिति तद्व्यवच्छेदाय साध्य साधनग्रहणम् । साध्यदृष्टान्तधर्मिणोश्च समानो धर्म साध्योऽप्यनित्यत्वादिः भवत्येवेति तस्यापि हेतुता मा प्रसाङ्क्षीदिति साध्यसाधनग्रहणम् । लिङ्गसामान्यलाभार्थं साध्यसाधनं यदुदाहरणसाधर्म्यं स हेतुरिति ॥ § 9273

साध्यसाधनशब्देन च प्रतिबन्धो लक्ष्यते । स च सव्यभिचारादिषु नास्तीति न ते हेतवः । प्रतिबन्धश्च पंचलक्षणक इत्येकैकलक्षणापायकृतहेत्वाभासपंचकनिर्देशादेव सूत्रितवानाचार्यः ॥ § 9274

## उदाहरणसाधर्म्यदलप्रयोजनम्

ननु ! एवं तर्हि साध्यसाधनग्रहणमेव हेतुलक्षणमस्तु । तद्धि सकलहेत्वाभासव्युदाससमर्थमिति किमुदाहरणसाधर्म्यग्रहणेन—न—समानजातीयव्यवच्छेदार्थत्वात् । अहेतवो हि विजातीयाः । तद्व्यवच्छेदः साध्यसाधनग्रहणात् । समानजातीयस्य केवलव्यतिरेकिणः व्यवच्छेदाय उदाहरणसाधर्म्यग्रहणमिति ॥ § 9275

## केवलान्वयिहेतुविमर्शः

तत्किं केवलान्वयी हेतुरिति लक्ष्यत्वेन विवक्षितः—न—तथाविधस्य हेतोरभावात् । अन्वयव्यतिरेकवानेव लक्ष्यः । तत्रोदाहरणसाधर्म्यं वैधर्म्यसंभवे तु सति साधर्म्यमप्यस्त्येवेति । न सावधारणं वा विशेषविधिरूपेणैवेदमुदाहरणसाधर्म्यग्रहणं केवलान्वयिलक्षणं वर्णनीयमिति ॥ § 9276

II.562/KSV

## हेतुसामान्यलक्षणम्

ननु ! यदि द्विविधो हेतुरिष्यते, तर्हि सामान्यलक्षणमादौ वक्तव्यम् ततो विशेषलक्षणमिति—उच्यते—साध्यसाधनग्रहणमेव प्रतिबन्धसूचकं सामान्यलक्षणं भविष्यति । उदाहरणसाधर्म्यग्रहणं तु अन्वयव्यतिरेकिणो लक्षणम् । उत्तरसूत्रं च केवलव्यतिरेकिणः । केवलान्वयी हेतुर्नास्त्येवेत्येवं पंचमीमुपेक्ष्यार्थात्मकहेतुलक्षणमाचख्युः ॥ § 9277

---

७ ] पदे— nyāma-wit_kha
८ ] क्ष— nyāma-wit_kha
८ ] भाव— nyāma-wit_kha
१२ ] दाय— nyāma-wit_ca
१६ ] लक्ष्यम— nyāma-wit_kha
१७ ] ना— nyāma-wit_ca

---

९ ये] पृथिव्यप्तेजोवायुपरमाणवः चतुर्विधाः ॥
१० *] अर्थः—धूमादिः । लिङ्गमेवानुमितिकरणमिति प्राचीनाः ॥
३ वा] एतेन केवलान्वयिनोऽपि क्रोडीकरणम् ॥

## प्रसिद्धसौत्रपाठनिर्वाहः

अपि वा भवतु तत्रापि संशयव्यवच्छेदफलः पंचमीपाठः । कश्चिदेवमभिदधीत साध्यसाधनम् इति पर्यायपठनमात्रमेतत्, न हेतुलक्षणम् । अपि च यत्रैव दृष्टान्तधर्मिणि हेतुधर्मप्रयुक्ततया साध्यधमोऽवधारितः, तत्रैव पुनः असाबुपलभ्यमानः तमुपस्थापयतु । धर्म्यन्तरे तु तदुपलम्भात् भवतु संशयः, किं तत् साध्याविनाभूतमिह हेतोस्सत्त्वं, उतान्यथेति । तस्येदमुत्तरमुच्यते उदाहरणसाधर्म्यात् इति ॥ § 9278

## पञ्चम्यर्थवर्णनम्

अयमर्थः—देशकालव्यक्तिविशेषाणां व्यभिचारात् न तेषु प्रतिबन्धावधारणम्, अपि तु सामान्यधर्मयोरेव ॥ § 9279

व्यक्तिभेदाश्रयत्वे हि नैव व्याप्तिग्रहो भवेत् ।
दृष्टान्तेऽप्यभ्यनुज्ञैवं भवता दीयते कथम् ॥§ 9281

तदभ्यनुज्ञानात्तु सामान्येन व्याप्तिग्रहणमङ्गीकृतमेव भवति । तस्मिंश्च
II.563/KSV सति उदाहरणसाधर्म्यात् साध्यसाधनमेव भवति, न संशयः; संशयस्य विशेषाग्रहणकारणकत्वात् । इह च उदाहरणसाधर्म्यपदोपात्तं लिङ्गसामान्यमेव विशेषो गृह्यत इति कुतः संशयः ॥ § 9282

## हेतोः पञ्चलक्षणकत्वम्

साध्यसाधनपदमपि न पर्यायमात्रम्, अपि तु पंचलक्षणकप्रतिबन्धसूचनेन हेतोः हेतुत्वसमर्थनार्थमेव । कस्मात् हेतुर्हेतुर्भवति, साध्यसाधनत्वात्, गमकत्वादित्यर्थः । साध्यसाधनता चास्य पंचलक्षणकात् प्रतिबन्धाद्विना न निर्वहतीति असौ साध्यसाधनपदेन लक्ष्यते । सोऽपि च प्रयोज्यप्रयोजकभावगर्भः साधनताङ्गतामेतीति तथाविध एव सूच्यते ॥ § 9283

*अत एव चाप्रयोजक एवैकः परमार्थतो हेत्वाभास इति वक्ष्यते ॥ § 9284

तदिदमीदृशं साध्यसाधनत्वं हेतोः कुतो भवतीति—उदाहरणसाधर्म्यात् इति संशयं व्यवच्छिन्दन्त्या पंचम्या कथ्यते ॥ § 9285

---

५ ] अ— nyāma-wit__kha
१० ] व— nyāma-wit__ca
१३ ] ष— nyāma-wit__kha
१६ ] व सूच्यते— nyāma-wit__ca

---

१८ वेत् ] प्रातिस्विकव्यक्तिषु व्याप्तिग्रहासंभवात् ॥

६ *] साधकस्यैव हेतुत्वात्, असाधको हेत्वाभास इति स्पष्टम् ॥

## दिङ्नागोक्तदूषणोद्धारः

अतश्च यदुच्यते परैः— § 9286

साधर्म्यं यदि हेतुः स्यात् न वाक्यांशो न पंचमी§ 9287

इति—तदिदमनुपपन्नम्—पंचम्या अर्थात्मकत्वे हेतावनुपयोगात् । तत्रापि वा तस्यास्समर्थितत्वात् । वाक्यांशे लक्षणान्तरकरणात् । तच्चेदमिदानीमुच्यते उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः । यथोक्तादुदाहरणसाधर्म्यात् विवक्षादिक्रमेण यद्वचनं प्रवर्तते, स हेतुः ॥ § 9288
II.564/KSV

यद्यपि च ज्ञानस्याप्युदाहरणसाधर्म्यात् कर्मभूतात्, करणात्मकाद्वा भवत्यभिनिर्वृत्तिः, तथापि वाक्यावयवकरणसामर्थ्यात् वचनमवसीयते ॥ § 9289

यदि वाक्यावयवकरणमिदम्, किमर्थं तर्ह्यर्थव्युत्पादनम् ?—उक्तमत्र, तदौपयिकत्वादिति ॥ § 9290

साध्यसाधनग्रहणं वचनलक्षणे किमर्थम् ? हेत्वाभासवचननिरसनम् अर्थात्मकहेतुनिरसनादेव हि सिद्धम्—न हेत्वाभासवचनव्यवच्छेदार्थं तत् । किन्तु हेतुवचनविशेषप्रतिपत्त्यर्थम् । न स्वरूपमात्रनिर्देशकं वचनम्—कृतकत्वम् इत्येवमादि प्रयोक्तव्यम्; अपि तु हेतुविभक्त्यन्तं कृतकत्वात् इति, कृतकत्वेन इति कृतकोऽयमस्मात् इति वाऽभिधातव्यम् । एवं हि तत् साध्यसाधनं भवतीति ॥ § 9291

### तथा वैधर्म्यात् ॥ १-१-३५ ॥ § 9292

उदाहरणग्रहणमनुवर्तते, साध्यसाधनमिति च । एतच्च तथाशब्दो पादानसामर्थ्याद्गम्यते—उदाहरणवैधर्म्यात् साध्यसाधनं हेतुः । अत्राप्यर्थात्मकहेतूपूर्वकन्वात् तद्वचनस्यार्थात्मक एव हेतुः प्रथमं प्रयुज्यत इति तल्लक्षणाय पूर्ववत् पंचमीपाठशून्यमेव सूत्रं वर्णयन्ति । वैधर्म्यं हेतुः इत्युच्यमाने पक्षवैधर्म्यस्यापि विपक्षवृत्तेः अशेषाश्वव्यक्तिपक्षीकरणे—तुरगा इमे, विषाणित्वात्—

३--५ ] य— nyāma-wit_kha
१०५७.१०--१०५८.११ ] दर्क पक्षधर्म— nyāma-wit_kha
१२ ] त्वात्— nyāma-wit_kha; nyāma-wit_ca; nyāma-wit_gha
१७ ] सा— nyāma-wit_kha
१८ ] लक्ष्य— nyāma-wit_kha

१० वाक्यांशो ] साधर्म्यस्य हेतुत्वे, तस्य वस्तुत्वेन, अवयववाक्यार्थत्वं न स्यात् ॥

१८ म् ] अर्थः खलु साधनम्, न वचनम् ॥

इत्येवमादेर्हेतुत्वं स्यात् इति उदाहरणग्रहणम् ॥ § 9293

तथाप्यसाधारणादेः उदाहरणवैधर्म्यस्य हेतुता प्रसज्यत इति पूर्ववत् साध्यसाधनग्रहणं प्रतिबन्धसूचकं सकलहेत्वाभासव्यवच्छेदकं योजनीयम् ॥ § 9294

तस्मादेव सकलहेत्वाभासव्यवच्छेदसिद्धेः उदाहरणवैधर्म्यग्रहणं समान जातीयान्वयव्यतिरेकिहेतुव्यवच्छेदाय व्याख्येयम् ॥ § 9295

II.565/KSV

## अन्वयव्यतिरेकिवैलक्षण्यं केवलव्यतिरेकिणः

ननु ! येधर्म्यशब्दः केवलान्वयिनमेव हेतुं अव्यतिरेकं व्यवच्छेत्तुमलम्, तस्य वर्धम्यंशून्यत्वात् । अन्वयव्यतिरेकिणस्तु हेतोः उदाहरणसाधर्म्यवत् तद्वैधर्म्यस्यापि भावात् कथमनेन व्यावर्तनम् ? उच्यते— § 9296

वैधर्म्यशब्दोपादानात् केवलान्वयिनो यथा ।
निवृत्तिर्गम्यते तद्वत् अन्वयव्यतिरेकिणः ॥ § 9298

साध्यसाधनशब्दो हि प्रतिबन्धोपलक्षणः ।
व्याख्यातः प्रतिबन्धश्च व्यतिरेकान्वयात्मकः ॥ § 9300

वैधर्म्यसाधनेऽप्यस्मिन् स एव यदि वर्ण्यते ।
पूर्वत्रकथनाद्व्यर्थं वैधर्म्यग्रहणं भवेत् ॥ § 9302

केवलव्यतिरेकाख्यप्रतिबन्धाभिधित्सया ।
वैधर्म्यवचनं तस्मात् सफलं व्यवतिष्ठते ॥ § 9304

अध्याहृतैवकारं वा तद्व्युदासाय पठ्यताम् ।
विशेषविधिरूपेण व्याख्यानं वा विधीयताम् ॥ § 9306

केवलान्वयिहेतुश्च न कश्चिदुपलभ्यते ।
तेन पूर्वोक्त एवास्य व्यवच्छेद्यो भविष्यति ॥ § 9308

## पूर्वसूत्रेऽवधारणाभावः

६ ] दसिद्धये— nyāma-wit__kha
८--९ ] स्या— nyāma-wit__kha

ननु ! एवं तर्हि अनेनैव न्यायेन पूर्वसूत्रं केवलान्वयिलक्षणार्थं स्यात्; यथेह वैधर्म्यग्रहणं साधर्म्यव्यवच्छेदकम्, एवं तत्र साधर्म्यग्रहणं वैधर्म्यव्यवच्छेदाय स्यादिति—उक्तमत्र—न केवलान्वयी नाम हेतुः संभवतीत्यलक्षणीय एवासौ । तदेवमन्वयव्यतिरेकवतो हेतोः लक्षणाय पूर्वसूत्रम् । इदं तु केवलव्यतिरेकिलक्षणायेति स्थितम् ॥ § 9309
II.566/KSV

## पञ्चम्यन्तपदपाठपक्षः

अर्थात्मकहेतुलक्षणपक्षेऽपि पंचमीपाठः पूर्ववत् संशयपराकरणफलत्वेन वर्णनीयः । वचनात्मकहेतुलक्षणेऽपि तथैव सूत्रं योज्यम् । यथोक्तवैधर्म्यात् प्रवृत्तं वचनं साध्यसाधनं हेतुविभक्त्यन्तं प्रयोक्तव्यमिति ॥ § 9310

## केवलव्यतिरेकिनिराकरणम्

तदेतदाक्षिपन्ति—लक्ष्ये सति लक्षणं वक्तव्यं भवति । केवलव्यतिरेकी तु नाम न समस्त्येव हेतुरिति कस्येदं लक्षणमुच्यते । प्रतिबन्धेन हि हेतोर्गमकत्वमुक्तम् । प्रतिबन्धश्च पंचलक्षणको व्याख्यातः । एकैकलक्षणविरहनिबन्धनाश्च पंचहेत्वाभासा भविष्यन्ति । तत् पक्षधर्मत्वविरहिण *इवासिद्धस्य हेतोरन्वयशून्यस्यापि न हेतुता युक्ता । केवलव्यतिरेकमात्रशरणेन हेतुना साध्यसिद्धौ तथाविधसिद्धिसुभिक्षसंभवात् यत् यस्मै रोचते, स तत्सर्वं साध्येत् । असाधारणस्य वा किमिति हेतुत्वं व्यतिरेकवतोऽपिनेष्यते ॥ § 9311

## केवलव्यतिरेकव्याप्तेरसाधकत्वम्

अपि च— § 9312

अन्वयस्यापरिच्छेदात् व्यतिरेकेऽपि संशयः ।
साध्याभावकृता तस्मात् व्यावृत्तिरुत वाऽन्यथा ॥§ 9314

अन्वये हि क्वचिद्गृहीतेऽन्यत्र हेतुव्यावृत्तिरवगम्यमाना साध्यव्यावृत्तिकृतैवेति अवधार्यते, नेतरथा । इत्थमेव च सन्दिग्धव्यतिरेकता व्यावर्तते, नान्यथेति ॥ § 9315
II.567/KSV

८ ] त्यर्थः— nyāma-wit_kha
१०५९.१५--१०६०.१८ ] सं— nyāma-wit_kha

१८ *] असिद्धस्य हेतोरिवेत्यन्वयः ॥
२१ साध्येत्] घटः नित्यः घटत्वात्, यन्नैवं तन्नैवम्, यथा पट इत्यपि प्रयोक्तुं शक्यत्वात् ॥

सन्दिग्धव्यतिरेके च साध्यसाधनता कथम् ।
लक्ष्याभावादतश्चेदं कथ्यते तस्य लक्षणम् ॥§ 9317

## केवलव्यतिरेक्यभावे सूत्रनिर्वहिः

तस्मान्न साध्यसाधनग्रहणेन हेतुद्वयसामान्यलक्षणमभिधाय, उदाहरणसाधर्म्यग्रहणेन अन्वयव्यतिरेकिणो लक्षणम्, उदाहरणवैधर्म्यग्रहणेन च केवलव्यतिरेकिणो वर्णनीयम् । अपि तु सूत्रद्वयेनैकस्यैवान्वयव्यतिरेकवतो हेतोर्लक्षणं व्याख्येयम् । अन्वयव्यतिरेकयोर्गमकाङ्गत्वात् एकेनान्वयनिरूपणं, अपरेण च सूत्रेण व्यतिरेकव्युत्पादनम् । अत एव भाष्यकारः किमेतावद्धेतुलक्षणम् ? नेत्युच्यते—तथा वैधर्म्यात् इत्येकवाक्यतयैव व्याख्यातवान् । उदाहरणमपि च सूत्रद्वये तुल्यमेव अन्वयव्यतिरेकिहेतोरुक्तवान् उत्पत्तिधर्मकत्वात् इति ॥ § 9318

## केवलव्यतिरेकिसाधनम्

अत्र वदन्ति—यदि वयं कंचन शुष्कमेव केवलव्यतिरेकिणं हेतुमुपगच्छेम, तत एवमनुयुज्येमहि । किन्त्वन्वयव्यतिरेकवानेषु हेतुः क्वचित् साध्यविशेषे विशेषणवशात् केवलव्यतिरेकितामबलम्बत इति ब्रूमः । तद्यथा—इच्छादिगतं कार्यत्वमात्मसिद्धौ । तत्र हि कार्यत्वमात्रं आश्रितत्वमात्रेण व्याप्तमुपलब्धमन्वयव्यतिरेकयुक्तमेव, घटादेः कार्यस्याश्रितस्य दृष्टत्वात् । यत्र चाश्रितत्वं नास्ति, तत्र कार्यत्वमपि नास्त्येव, व्योमादौ । सोऽयमन्वयव्यतिरेकवानेव हेतुः यदा परिदृश्यमानशरीराद्याश्रयव्यतिरिक्ताश्रयाश्रितत्वे साध्ये
II.568/KSV (?')देहादिषु बाधकोपपत्तौ सत्यां कार्य त्वात् इति सविशेषणः प्रयुज्यते, तदा केवलव्यतिरेकी संपद्यते । देहादि यतिरिक्तस्याश्रयस्यात्मनो नित्यपरोक्षत्वेनान्वयानुपलम्भादिति ॥ § 9319

दृशस्य चान्वयमूलस्य तस्यां दशायां केवलव्यतिरेकितामुपगतस्यु हेतुत्वोपगमात् न पूर्वोक्तदोषावसरः । न हीदृशा हेतुना सर्वः सर्वं साधयितुमुत्सहते । न चासाधारणस्य हेतुत्वं इत्थं स्थिते प्रसज्येत । पंचलक्षणत्वमपि पूर्वाश्रयापेक्षमस्य भविष्यति ॥ § 9320

## केवलव्यतिरेकिणि दोषोद्धारः

१ ] सा— nyāma-wit__kha
३ ] त— nyāma-wit__kha
१२ ] त्वं— nyāma-wit__kha
२० ] त्वानु— nyāma-wit__kha

२४ इति ] इदमेव देहाद्यनाश्रितत्वे सति कार्यत्वात् इति नवीनभाषयोच्यते ।

परिशेषानुमानानां सर्वेषामपीयमेव रीतिः ॥

यच्च सन्दिग्धव्यतिरेकित्वमाशङ्कितं—तदप्यन्वयव्यतिरेकमूले केवलव्यतिरेकिणि निरवकाशम्, कार्यस्याश्रितस्योपलम्भात्, अश्रितत्वव्या वृत्त्या व्योमादौ च कार्यत्वव्यावृत्तिदर्शनात् । इदानीं घटादौ शरीरे वा सविशेषव्यावृत्तिर्दृश्यमाना विशिष्टाश्रयव्यावृत्तिकृतैवावगम्यत इति न सन्दिग्धो व्यतिरेकः । एतच्चात्मसिद्धिप्रसङ्गे निर्णीतमिति निरपवादः केवलव्यतिरेकी हेतुरस्त्येव लक्ष्य इति तल्लक्षणार्थमुत्तरसूत्रम् । अन्वयव्यतिरेकिहेतुलक्षणार्थं पूर्वसूत्रम् । केवलान्वयी हेतुर्नास्त्येव । सामान्यलक्षणे तु अनुमानलक्षणवत्, साध्यसाधनपदाद्वाऽवगन्तव्यम् ॥ § 9321

## भाष्यविरोधपरिहारः

भाष्याक्षराणि तु काममुपेक्षिष्यामहे । अथवा यथा कथंचिद्वा व्याख्यास्यामः । केवलव्यतिरेकिणं त्वीदृशमात्मादिप्रसाधने परममस्त्रमुपेक्षितुं न शक्नुम इति अयथाभाष्यमपि व्याख्यानं श्रेयः ॥ § 9322
II.569/KSV

## उदाहरणनिरूपणम्

### साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ १-१-३६ ॥ § 9323

यथा तत्पूर्वकमनुमानं इत्यत्र प्रतिबन्धग्रहणोपायमात्रं प्रतिपादितम्, इह तु प्रतिबन्धस्वरूपमुदाहरणसाधर्म्यमुक्तम् । एवं लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः, इत्यत्रं वादिप्रतिवादिप्रतिपन्नत्वं द्विविधस्यापि दृष्टान्तस्य सामान्यलक्षणमुक्तम् । इह तु प्रयोज्यप्रयोजकभावव्यवस्थितसाध्यसाधनधर्माधिकरणत्वमेकस्य, द्वितीयस्य च तद्रहितत्वं लक्षणमुपपाद्यते ॥ § 9324

## उदाहरणसूत्रविवरणम्

तत्र साध्यसाधर्म्यात्तद्धर्मभावी इति साधर्म्यदृष्टान्तस्य लक्षणम् । *वचनाधिकारेऽपि अर्थात्मकदृष्टान्तचिन्तनं तदौपयिकत्वात् हेतुवत् कर्तव्यम् ॥ § 9325

१ ] ग— nyāma-wit_kha
४ ] च— nyāma-wit_kha
६ ] कर्थमप्यु— nyāma-wit_kha
१८ ] करणे— nyāma-wit_kha

१ *] न्यायावयवनिरूपणपरं हि प्रकरणम् ॥

साध्यः—धर्मविशिष्टो धर्मी, तेन साधर्म्यं—समानो धर्मः—लिङ्गसामान्यं यत् उदाहरणसाधर्म्यं पूर्वमुक्तं, तदेव द्विष्ठत्वादुभाभ्यां व्यपदिश्यते इति इह च साध्यसाधर्म्यपदेनोक्तम् । तस्मात् साध्यसाधर्म्यात् यः तद्धर्मभावी—तस्य—साध्यस्य धर्मः—नित्यत्वादिः यस्मिन् भवति, सः तद्धर्मभावी । पंचम्या प्रयोजकत्वमुच्यते । हेतु धर्मप्रयुक्तो हि साध्यधर्मः यत्रास्ति, सः साधर्म्यदृष्टान्त इत्यर्थः । स एव च वचसः कर्मतां प्रतिपद्यमानः उदाहरणं भवतीत्यर्थवचनवाचिनोः दृष्टान्तोदाहरणशब्दयोः सामानाधिकरण्यमविरुद्धम् ॥ § 9326

II.570/KSV

दृष्टान्त एवान्वयख्यापकेन वचनेनोच्यमानः उदाहरणं— इत्युक्ते सति तदभिधायकं वचनं उदाहरणं भवत्येव । यद्यत् कृतकं, तत्तदनित्यं दृष्टं—यथा घट इति ॥ § 9327

## कार्येण कारणानुमानस्यापि संग्रहः

ननु ! एवं यत्र हेतुकृता साधर्म्यवत्ता, यथा—जलधरोन्नमनवृष्ट्यादौ, तादृश एवं दृष्टान्त उपदिष्टो भवेत्—न यत्र साध्यधर्मकृता हेतुसत्ता, यथा धूमानुमान इति—अदर्शनज्ञो देवानांप्रियः—नात्रोत्पत्त्यपेक्षया प्रयोज्यप्रयोजकभावो विवक्षितः, किन्तु ज्ञप्त्यभिप्रायेण । ज्ञप्तौ च धुम एवाग्नेः प्रयोजकतां प्रतिपद्यते । न हि धूमाग्न्योः कार्यकारणभावेन गम्यगमकभावः । किन्तु नित्यसाहचर्येणैव नियमनाम्ना संबन्धेनेत्यसकृदुक्तम् ॥ § 9328

## कारक—ज्ञापकरूपहेतुद्वैविध्यम्

धूमः स्वरूपतो नाम जायतां जातवेदसः ।
अग्निस्तु नाक्षिपत्येनं स एव ह्यग्निमाक्षिपेत् ॥§ 9330

प्रयोजकत्वमग्नेश्च पंचम्या यदि कथ्यते ।
यत्र यत्राग्निरित्येवं तन्निर्देशः प्रसज्यते ॥§ 9332

यस्य प्रयोजकत्वं हि चिख्यापयिषितं भवेत् ।
यच्छब्देन च पूर्वत्र स हि निर्देशमर्हति ॥§ 9334

भवेदेवं च हेतुत्वं धूमं प्रति विभावसोः ।

२० ] साधन— nyāma-wit_kha  nyāma-wit_kha
७ ] का— nyāma-wit_kha
१७ ] नग्निस्तमा—

५ हेतुत्वं ] हेतुत्वं—अनुमानविधया ॥

न च तद्युज्यते वक्तुं अनैकान्तिकदोषतः ॥§ 9336

प्रयोजकत्वमिच्छन्ति तस्मान्नोत्पत्त्यपेक्षया ।
अपि तु ज्ञप्त्यभिप्रायं हेतोरेवोचितं च तत् ॥§ 9338

II.571/KSV

तस्मात् हेतुधर्मप्रयुक्तः साध्यधर्मः यत्र ख्याप्यते, स साधर्म्यदृष्टान्तः । तद्वचनमुदाहरणमिति सिद्धम् ॥ § 9339

## वैधर्म्योदाहरणम्

### तद्विपर्ययाद्वा विपरीतम् ॥ ३-२-३७ ॥ § 9340

दृष्टान्त उदाहरणं इति वर्तते । तदिति साध्यसाधर्म्यपरामर्शः । तच्च यद्यपि पूर्वसूत्रे लिङ्गसामान्यं व्याख्यातम्—तथाप्युभयस्य संभवादिहानुमेय-सामान्यं साध्यसाधर्म्यं द्रष्टव्यम् । तद्विपर्ययात्—साध्याभावात्, तद्विप-रीतः—अतद्धर्मभावी—साधनरहितः यो दृष्टान्तः, स वैधर्म्यदृष्टान्तः पूर्ववत् वचसः कर्मतामापद्यमानः वैधर्म्योदाहरणं भवति । विपरीतं इत्युदाहर-णापेक्षया नपुंसकलिङ्गनिर्देशः ॥ § 9341

## वैधर्म्यदृष्टान्ते विशेषः

किमर्थं पुनः साध्याभावात् साधनाभावो वैधर्म्यदृष्टान्तो वर्ण्यते, न पुनः साधर्म्यदृष्टान्तस्थित्या साधनाभावादेवं साध्याभाव इति—उक्तमत्र— § 9342

व्याप्यव्यापकभावो यः साध्यसाधनधर्मयोः ।
स एव वैपरीत्येन मन्तव्यस्तदभावयोः इति ॥§ 9344

किं कारणम् ? साधनधर्मे हि धूमे साध्यधर्मेणाग्निना व्याप्तेऽनग्निः तत्र निवेशमलभमानोऽन्यत्रानवकाशादधूम एव निविशते । एवं साध्यध-र्माभावेऽनग्नौ साधनधर्माभावेनाधूमेन व्याप्ते सति धूमस्तत्रालब्धावकाशः अनन्यगतित्वादग्नावेव निविशत इति ॥ § 9345

II.572/KSV

---

२ ] दि— nyāma-wit_ca
३ ] य उत्था— nyāma-wit_kha
६ ] ध्यधर्म— nyāma-wit_kha
७--८ ] तथाप्यत्र— nyāma-wit_kha
१४ ] ना— nyāma-wit_kha
१५ ] त्— nyāma-wit_kha
१६ ] त्र— nyāma-wit_kha

## साधर्म्यदृष्टान्ताद्वैधर्म्यदृष्टान्तवैपरीत्यम्

यदि तु साधर्म्यदृष्टान्तवत् तथैव व्याप्यव्यापकभावः ख्याप्यते— स्साधनाभावे साध्यं नास्तीति—तदा धूमाभावेनानग्निना व्याप्तेन अग्नि तत्रालब्धनिवेशः धूममेवाबलम्बेतेति स्यात् । न चैतन्निर्वहति, अधूमेऽपि वह्निदर्शनात् इत्येवं सपक्षैकदेशवृत्तेर्हेतुत्वमपि प्रसिद्धं हीरेत, व्याप्तिवैधुर्यादिति ॥ § 9346

अपि च धुमाभावेनाग्न्यभावे व्याप्ते कथ्यमाने सत्यधूमो नियमितो भवति अनग्निं मा हासीत् इति । अग्निस्त्वनियमित इति स्वातन्त्र्यादधूमवद्धूममपि स्पृशेदिति व्यभिचारात् प्रतिबन्धो विप्लवेत । तदुक्तम्— § 9347

यदा तु साध्याभावेन हेत्वभावो विरुध्यते ।
तदा साध्यं ततो दृष्टं अवतिष्ठेत साधने ॥§ 9349

एवं नियवितं साध्यं साधने ख्यापितं भवेत् ।
साधनं तु स्वतन्त्रत्वात् साध्याभावेऽपि संभवेत् ॥§ 9351

## समव्याप्तिकस्थलेऽपि तुल्यो न्यायः

तस्मात् यत्रापि समव्याप्तिकौ साध्यसाधनधर्माविति सपक्षैकदेशवृत्तित्वेनाहेतुत्वमाशङ्क्यते, तत्रापि साधनधर्मस्य विपक्षात् व्यावृत्तिमभिधित्सता साध्याभावे साधनाभावो दर्शयितव्यः । यत्रानित्यत्वं नास्ति, तत्र कृतकत्वमपि नास्ति, यथाऽऽकाश इति ॥ § 9352

II.573/KSV

योऽप्यविद्यमानविपक्षो हेतुः, सोऽपि सुतरां ततो व्यावृत्तो भवति, तदभावात्तत्रावृत्तेरिति । अतश्च सर्वपदार्थानित्यत्ववादी एवमपि वैधम्यदृष्टान्तं प्रदर्शयन् न वार्यते—यत्र नित्यत्वं नास्ति, तत्र कृतकत्वमपि नास्ति यथाशशविषाणादाविति ॥ § 9353

ते एते साधर्म्यवैधर्म्योदाहरणे अन्वव्यतिरेकवति हेतावुभे अपि संभवन्ती विकल्पेन प्रयोक्तव्ये । एकेनैव व्याप्तेः प्रदर्शनात् किमन्येन कृत्यम् ॥ § 9354

---

६ ] अन— nyāma-wit__ca
८ ] सा— nyāma-wit__kha
९ ] ध्यं पुनः— nyāma-wit__kha
१३ ] हेत्व— nyāma-wit__kha

---

८ इत्येवं ] धूमो हि सपक्षैकदेशे वह्निमत्ययोगोलके नास्ति ॥

१० इति ] स्वातन्त्र्यं—नियमाभाव एव ॥

## उभयविधव्याप्त्योरावश्यकता

केचित्तु व्याप्तिसौष्ठवप्रदर्शनाय द्वयोरपि प्रयोगमिच्छन्ति । स भवतु, मा वा भूत् । नेदं महद्विमर्दस्थानम् ॥ § 9355

ननु ! हेतूदाहरणाधिकमिति निग्रहस्थानमिदमादिष्टम्—न— समानजातीयाभिप्रायं तद्भविष्यति । साधर्म्यदृष्टन्तानेकत्वे वैधर्म्यदृष्टन्तानेकत्वे वा तन्निग्रहस्थानमित्यास्तामेतत् ॥ § 9356

## सःध्यर्म्यं दृष्टान्ताभासाः

इत्थे साधर्म्यवैधर्म्यदृष्टान्तस्वरूपे व्युत्पादिते त्वसात्तल्लक्षणरहिता दृष्टान्ताभासा भवन्ति । तत्र साध्यविकलः, साधनविकलः, उथयविकल इति वस्तुदोषकृतास्त्रयः साधर्म्यदृष्टान्ताभासाः । अनन्वयः, विपरीतान्वय इति द्वौ वचनदोषकृतौ । यथा नित्यः शब्दः अमूर्तत्वात् इत्यत्र बुद्धिवत् इति साध्यविकलो दृष्टान्तः । परमाणुवत् इति साधनविकलः घटवत् इति उभयविकलः । व्योम्नि नित्यत्वान्मूर्तत्वं विद्यत इन्य  नन्वयः । यदमूर्तं तन्नित्यमिति II.574/KSV
वक्तव्ये, यन्नित्यं तदमूर्तमिति विपरीतान्वय इति ॥ § 9357

## वैधर्म्यदृष्टान्ताभासाः

वैधर्म्यदृष्टान्ताभासा अपि पंचैव साध्याव्यावृत्तः, साधनाव्यावृत्त उभयाव्यावृत्त इति वस्तुदोषास्त्रयः । अव्यतिरेकः विपरीतव्यतिरेक इति वचनदोषौ द्वौ । यथा तत्रैव हेतौ—यत्र नित्यत्वं नास्ति, तत्रामूर्तत्वमपि नास्ति, यथा परमाणुष्विति साध्याव्यावृत्तः । यथा बुद्धाविति साधनाव्यावृत्तः । यथाऽऽकाश इत्युभयाव्यावृत्तः । नित्यत्वामूर्तत्वे घटे न विद्येते इत्यव्यतिरेकः । यत्र नित्यत्वं नास्ति, तत्रामूर्तत्वनपि नास्ति इति वक्तव्ये, यत्रामूर्तत्वं नास्ति तत्र नित्यत्वमपि नास्ति इति विपरीतव्यतिरेक इति ॥ § 9358

एते च वस्तुवृत्तेन हेतुदोषा एव, तदनुविधायित्वात् । अत एव हेत्वाभासवत् सूत्रकृता नोपदिष्टाः । अस्माभिस्तु शिष्यहिताय प्रदर्शिता एवम् ॥ § 9359

## उपनयलक्षणम्

३ ] णाभ्याम— nyāma-wit_kha nyāma-wit_kha
४ ] त्वे— nyāma-wit_kha
१५ ] आकाशः—
१६ ] अ— nyāma-wit_kha

१५ वा ] पूर्वं समयकरणवेलायामेव तथैवकरणेतु अयमपि न दोषः ॥

उदाहरणापेक्षः तथेत्युपसंहासे न तथेति वा साध्यस्यापेनयः ॥ १-१-३९ ॥ § 9360

उदाहरणम् आत्मलाभे अपेक्षत इति—उदाहरणापेक्षः पक्षधर्मोपसंहारः II.575/KSV उपनयः । द्विविधश्चासौ—तथेति, न तथेति वा, उदाहरणद्वै विध्यात् । तत्र साधर्म्योदाहरणापेक्षः तथेत्युदनयः । यत् कृतकं तदनित्यं दृष्टं, यथा घटः, न च तथा कृतकः शब्दः इति । वेधर्म्योदाहरणापेक्षस्तु न तथेत्युपनयः— यन्नित्यं, तदकृतकं दृष्टं—यथाऽऽकाशः न च तथा कृतकः शब्द इति । अत्रापि निषेधद्वययोगाद्विधिरेव गम्यते ॥ § 9361

## सौत्रपदवैयर्थ्यशङ्कापरिहारौ

ननु ! साध्यस्य इत्यवाचकः सूत्रावयवः । पक्षधर्मोपसंहारोह्युपनयः, न साध्योपसंहारः । साध्यो हि धर्मः, धर्मी वा स्यात् न तर्योरन्यतरस्याप्ययमुपसंहार इति—उच्यते—साध्यो धर्म्येव, न धर्म इह विवक्षितः । तत्रायं हेतोरुपसंहारः—तथा च कृतकः शब्दः इति । सेयं साध्यस्येति सप्तम्यर्थे षष्ठी मन्तव्या । साध्ये धर्मिणि हेतोरुपसंहारः उपनय इति ॥ § 9362

## षष्ठ्याः सप्तम्यर्थसंभवः

नन्वाधारविवक्षायामिह प्राप्नोति सप्तमी ।
संबन्धमात्रे वा वाच्ये कथमाधारतोच्यते ॥§ 9364

नैतत्, संबन्धसामान्येऽप्युक्ते भवति धर्मिणा ।
योगो विशेषचिन्तायां तस्य त्वाधारता भवेत् ॥§ 9366

विशेषेऽन्तर्निगूढे च प्रायः षष्ठीप्रयुज्यते ।
शेषो नामाविवक्षैव कारकाणामिति स्थितिः ॥§ 9368
II.576/KSV

तथा च राज्ञः पुरुषः ब्राह्मणस्य कमण्डलुः ॥§ 9369

---

५ ] आकाशः— nyāma-wit__kha
६--८ ] अ— nyāma-wit__kha
१८ ] षं तन्नि— nyāma-wit__kha
१८ ] नि— nyāma-wit__kha

---

१२ हारः ] हेतोः पक्षवृत्तित्वोपसंहार इत्यर्थः ॥
२० साध्यो ] साध्यविशिष्टपक्षस्य साध्यत्वात् पक्षः साध्यः ॥
४ चिन्तायां ] संबन्धत्वसामान्येनाधारत्वमर्थः, न त्वाधारत्वेनेत्यर्थः ॥

तरोः शाखेति सर्वत्र विशेषोऽन्तर्व्यवस्थितः ॥§ 9370

अतश्च धर्माय जिज्ञासा—धर्मजिज्ञासा । सा हि तस्य ज्ञातुमिच्छाशा-भा-१-१-१ इतिवत् संबन्धमात्रसमर्पिकाऽपि सेऽयं षष्ठी विशेषयर्य वसाना भविष्यतीति सूक्तं साध्यस्योपसंहार इति ॥ § 9371

## उपनयस्य व्यर्थत्वाक्षेपः

ननु ! उपनयवचनमनर्थकम् । पक्षहेतुदृष्टान्तवचनैः किं न पर्याप्तम् ? यदर्थमुपनयवचनमुच्चार्यते । यदि धर्मिणि हेतोः सत्त्वसिद्धये तदभिधानम्—तदैष वृथैव श्रमः । पक्षधर्मवचनेनैव कृतकत्वात् इत्येवमादिना सिद्धत्वात् ॥ § 9372

अथ साध्यदृष्टान्तधर्मिणोः साम्यापादनाय तदुच्चारणं, तदपि न चतुरश्र-म्—उदाहरणसाधर्म्यात् इत्यनेनैव गतार्थत्वात् । उदाहरणसाधर्म्यवचनं हि हेतुवचनमेव भवेत् ॥ § 9373

अथ स्वप्रतिपत्तौ तदर्थदर्शनात् परं प्रति तद्वचन—तत्रापि परामर्शज्ञाने विवदन्ते ॥ § 9374

अपि च स्वयं दधिभक्षणसमनन्तरं यदि कदाचिदनुमेयमतिरुपजायते, तत् किमपरस्मै तदुपदिश्यताम् ॥ § 9375

## प्रतिज्ञादीनां क्रमेऽप्याक्षेपः

योऽप्ययं प्रतिज्ञाहेतूदाहरणोपनयनिगमनप्रयोगक्रम आश्रीयते, सोऽपि II.577/KSV स्वप्रक्रियानुरागुनिर्मित एव, न वस्तुबलप्रवृत्तः । तथा हि—यद्यत् कृतकम्, तत्तदनित्यं दृष्टम्, कृतकश्च शब्द इतीयतो वननात् को नाम शब्दानित्यतां नावगच्छेत् । त्वमेवात्र सत्यव्रतधनः प्रमाणम् । डिण्डिकरागं परित्य-ज्याक्षिणीनिमील्य चिन्तय तावत्, किमियताऽर्थं बुध्यसे न वा । तस्मात् स्वप्रक्रियापक्षपातमपास्य पंचावयवमेवं क्रमकं वाक्यं उपेक्ष्य यथोक्तमेव वाक्यं प्रयुङ्क्ष्वेति ॥ § 9376

## उपनयस्यावश्यकतावर्णनम्

१ ] ध्या— nyāma-wit_kha
१० ] अनु— nyāma-wit_ca
११ ] म— nyāma-wit_ca
६ ] प्र— nyāma-wit_kha

९ हि ] तस्य इति षष्ठीमुक्त्वा धर्माय इति कथनादेवं गम्यत इत्यर्थः ॥
१६ र्णिणोः ] साम्यापादनं—सपक्षवदेवायं पक्षोऽपि इति प्रदर्शनम् ॥
४ रागं ] डिण्डिकाः—क्षपणकाः । तेषां रागः—स्वरविशेषः—एवमपि, तथापि इत्यनिर्णयप्रदर्शकः । नर्मोक्तिरियम् ॥
६ मेव ] यथोक्तं—उदाहरणोपनयरूपम् ॥

अत्रोच्यते—इदं तावत् भवान् पृष्टो व्याचष्टाम् । किं स्वप्रतिपत्तिमनुसरन्तः परप्रतिपादनाय वाक्यरचनां कुर्मः, उत परहृदयानुवर्थनेनेति । तत्र पराभिप्रायस्य वैचित्र्यात् परोक्षत्वाच्च दुरवगमत्वेन न विद्मः किं विदध्महे ? किं भुवमुत्क्षिपामः ? किमरत्निना परं पीडयामः ? उत हस्तसंज्ञया व्यवहरामः ? आहो हेतुमात्रमेव केवलं प्रयुञ्महे ? किं वात्र्यवयवं वाक्यमभिदध्मः ? उत पंचावयवादपि वाक्यादभ्यधिकमाख्यानकमस्मै वर्णयमः ? इत्येवमनवस्थितत्वात् पराभिप्रायस्य स्वप्रति पत्तिमेवानुसरता परः प्रत्याय्यः ॥ § 9377

## प्रतिज्ञादिक्रमस्य युक्तत्वम्

तत्र स्वप्रतिपत्तौ पर्वतादिधर्मी प्रथमं दृष्ट इति स प्रतिज्ञाय कथ्यते । ततोऽपि धूमादिलिङ्गमुपलब्धमिति हेतुवचनेन तदावेद्यते । ततो यत्र धूमस्त-
II.578/KSV त्राग्निः यथा महानसः इति व्याप्तिस्मरणमभवदिति दृष्टान्तवचसा तदभिधीयते । ततः तथा चायं धूमः इति परामर्शज्ञानमुदपादीति तदुपनयवचनेन प्रतिपाद्यते । ततः तस्मादत्राग्निः इत्यनुमेयज्ञानमुपजायते इति निगमनेन तदुच्यते । ततः परप्रतिपत्तिपर्यवसानात् किमन्यदुपदिश्यमानमिति । न च दधिथक्षणसदृशं अतोऽन्यतममपि भवितुमर्हति, अनुमेयप्रतिपत्तावुपादयत्वात् ॥ § 9378

## सर्वैरुपनयस्यापरित्याज्यता

येषामपि मते परामर्शज्ञानं नाति, तैरप्युपनयवचनमवश्यमेवापरिहार्यम्; अनुमेयप्रतिपत्तये दृष्टान्ते दर्शितशक्तिरेव हेतुः प्रभवति नान्यथेति । अतो यद्यपि पक्षधर्मवचनेन हेतुधर्मिसंबन्धमात्रमुपपादितम्— तथापि अधुना दृष्टान्ते दर्शितशक्तिधर्मः सः तस्मिन् धर्मिणि तथाविधो हेतुः स्यात्, न वति असिद्ध्याशङ्काशमनमुपनयवचनमन्तरेण न भवत्येवेत्यवश्यं प्रयोक्तव्यं तदिति । स्वप्रतीत्यनुसरणेन च वाक्यरचनायाः स्थतत्वात् क्रमोऽपि यथोक्त उपयुज्यते ॥ § 9379

## अवयवद्वयवादनिरासः

४ ] भूप— nyāma-wit_ca; nyāma-wit_gha
७ ] च्छिन्न— nyāma-wit_ca
१५ ] य— nyāma-wit_ca
१९ ] हतु— nyāma-wit_kha

२२ दृशं ] अतः—एषु पञ्चावयवेषु ॥

अत एव च यत् कृतकं, तदनित्यं दृष्टं इत्यभिधानं अनुपपन्नम्, अनवगते धर्मिणि, तद्वर्तिनि च हेतौ प्रथममेव व्याप्तिस्मरणासंभवेन तद्वचनायोगात् । तदिदमवयविविपर्यासवचनं अप्राप्तकालनिग्रहस्थानमुपदेक्ष्यामः ॥ § 9380

अपि च यत् कृतकं, तदनित्यं दृष्टं, कृतकश्चशब्दः इत्येतावदेव प्रयोक्तव्यमिति वदता भवता कृतकश्च शब्दः इतीदमुपनयवचनमनु ज्ञातम् II.579/KSV कृतकत्वादिति पक्षधर्मवचनं तु निह्नुतम् । कृतकश्च शब्दः इत्येतावदेव हेतुवचनमिति चेत्—न—प्रयोजकस्य पंचम्यादिना निर्देशार्हत्वादिति यत्किंचिदेतत् ॥ § 9381

## एकावयववादनिरासः

यदप्युच्यते प्र. वा. ३-२६— § 9382

......विदुषां वाच्यो हेतुरेव हि केवलः § 9383

इति—तदप्यचारु—विद्वद्भिर्विदत्वादेव हेतोरपि प्रज्ञानात् । अपूर्वा इमे विद्वांसः, ये प्रतिज्ञाद्यवयवचतुष्टयस्यार्थं जानन्ति, हेतुवचनस्य तु न विन्दन्तीति । तस्मात् पराशयस्य सर्वथा दुर्बोधत्वात् पूर्वोक्तेनैव क्रमेण स्वानुभवसाक्षिकेण वाक्यरचनां कृत्वा परः प्रत्याय्य इति ॥ § 9384

## निगमनलक्षणम्

हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ १-१(?) ॥
§ 9385

हेतुः दृष्टान्तधर्मिणि निर्ज्ञातशक्तिः साध्ये धर्मिणि अपदिश्यतेऽनेनेति हेत्वपदेश—उपनयः । तस्मात्—हेत्वपदेशात् प्रवृत्तं प्रतिज्ञायाः पुनर्वचनं निगमनम् । निगम्यतेऽनेने पूर्वोक्ताः अवयवाः—एकत्र साध्येऽर्थे समर्प्यन्ते—नियोज्यन्त इति निगमनम् । तस्मात् कृतकत्वादनित्यः शब्दः इति । तदिदं निगमनं साधर्म्यवैधर्म्यभेदेन हेतोः दृष्टान्तस्य च तदपेक्षिणश्च तथा न तथा इत्युपनयस्य द्वैविध्येऽपि प्रतिशावचनवत्तुल्यमेव भवति ॥ § 9386
II.580/KSV

७ ] त— nyāma-wit_kha
८ ] दि— nyāma-wit_kha
१६ ] ध— nyāma-wit_kha
१८ ] र्थ्य— nyāma-wit_kha

१९ न्तीति ] तथा च हेतुवचनमपि विफलमेवेति भावः ॥

## निगमनलक्षणाक्षेपः

ननु ! प्रतिज्ञावचनमेव तावत् असाधनाङ्गवचनत्वात् अपार्थकम् । तस्या एव पुनर्वचनं निगमनमधुना सफलं भविष्यतीति केयं कथा ? प्रतिज्ञायाः पुनर्वचनम् इति च न वाचको ग्रन्थः; साध्यनिर्देशो हि प्रतिज्ञा सिद्धनिर्देशस्तु निगमनमिति ॥ § 9387

वाचके वा ग्रन्थे, पौनरुक्त्यादेव निगमनस्य वैफल्यम् । स्वप्रतिपत्तौ च परामर्शज्ञानान्तरं साध्यावगतिरेव भवन्ती दृश्यते । सा परस्याप्युपनयवचनश्रवणसमनन्तरमुपजायत एवेति किं तदुक्त्या प्रयोजनम् ॥ § 9388

## उक्ताक्षेपपरिहारः

उच्यते—प्रतिज्ञायास्तावत् साफल्यं समर्थितमेव । तस्याश्चेदं पुनर्वचनं सिद्धसाध्यभेदे सत्यपि धर्मिधर्मनिर्देशमात्रसाम्यादुच्यते । सिद्धसाध्यभेदादेव च न पौनरुक्त्यकृताफल्यम् । स्वप्रतिपत्तये च परामर्शज्ञानानन्तरं साध्यबुद्धिरुत्पन्ना सा परस्मै कथ्यमाना न निष्प्रयोजना भवति ॥ § 9389

अस्माद्धेतोरिदं साध्यं अहमज्ञासिषं यथा ।
तथा त्वमपि जानीहि मा स्म विघ्नोऽत्र ते भवेत् ॥§ 9391

एवमुक्ते संशयानस्य संशयः शाम्यति, विपर्यस्तमतेश्च विपर्ययः । तदर्थश्चायं परार्थानुमानोपन्यासश्रमः । तदिदं—*विपरीत प्रसङ्गप्रतिषेधार्थं निगमनमाहुः ॥ § 9392

II.581/KSV

## असाधारण्यनिरासकत्वपक्षः, तन्निरासश्च

ये तु यथाश्रुतसाध्यनिर्देशात्मकप्रतिज्ञापुनर्वचनसमर्थनलोभादद्यापि प्रतिज्ञायाः सिद्धिमबुध्यमानाः असाधारणाशङ्काव्यवच्छेदाय निगमनवचनमिच्छन्ति—ते न सम्यगभ्ययुः—असाधारणाशङ्कायाः दृष्टान्तवचनेनैव निरस्तत्वात् । *विशेषस्य हि हेतुत्वसंभावनायामसाधा रणाशङ्का स्यात् । यत् कृतकं, तदनित्यं इति तु दृष्टान्तवचसा सामान्यस्य हेतुत्वे कथिते कथमसाधारणत्वमाशङ्क्येत ? § 9393

यदि पुनरुपनयवचनेन साध्ये धर्मिणि हेतोरुपसंहारात् असाधारणत्वमाशङ्क्येत, तत्पुनर्दृष्टान्तधर्मिवृत्तित्वमस्य दर्शयितव्यम् । तस्मिन् द-

१२ ] त— nyāma-wit_kha
१७ ] द— nyāma-wit_kha
२० ] शङ्का— nyāma-wit_kha

२३ *] विपरीतप्रसङ्गः—बाधापादनम् ॥
४ *] विशेषस्य—पक्षमात्रवृत्तेः ॥

र्शिते पुनः तद्वृत्तित्वात् धर्मिण्यसिद्धत्वमाशङ्कनीयम् । पुनस्तद्व्यावृत्तये धर्मिणि हेतोरुपसंहारो विधेय इत्येवमसाधारणासिद्धायशङ्काभ्यां गच्छेदिति न कदाचित् साध्यप्रतीतिर्भवेदिति नासाधारणशङ्काव्युदासाय तत्प्रयोगः, किन्तु पूर्वरीत्यैवेति ॥ § 9394

तस्माद्विवक्षितेऽर्थे यथोदितक्रमनिवेशिनोऽवयवान् ।
एकत्र संघटयितुं निगमनवचनं प्रयोक्तव्यम् ॥§ 9396

## परार्थानुमानपरमफलम्

त इमे प्रतिज्ञादयो निगमनपर्यन्ताः पंचावयवाः यथासंभवमागमादिप्रमाणानुगृहीताः परस्परानुषक्ताश्च स्वार्थं साध्यन्ति । तत्र मुख्यया वृत्त्या प्रतिपाद्येनानुमानेनैव सर्वेऽवयवा अनुगृह्यन्ते । प्रपंचाय तु प्रमाणान्तरानुग्रह एषामुच्यते ॥ § 9397

II.582/KSV

प्रतिज्ञायास्तावदागमोऽनुग्राहकः उपेयते, उपदेशस्वभावत्वात् । अनित्यः शब्दः इति वक्ता तु एवंविधे विषये ऋषिवदस्वतन्त्रत्वात् । अनुमानमुपदिशति । प्रतिज्ञावचनं तु तच्छायानुपातित्वात् । शब्दप्रामाण्यसिद्ध्यर्थे वा शास्त्रे तत्प्रतिज्ञायाः शब्दविषयत्वादागमानुगृहीतत्वमुच्यते ॥ § 9398

हेतुवचनमनुमानेनानुगृह्यते ॥ § 9399

उदाहरणं तु प्रत्यक्षेण, तन्मूलत्वाद्व्याप्तिपारिच्छेदस्य ॥ § 9400

यथा गौः, तथा गवयः इतिवत् यथा घटस्तथा शब्दः इत्यनया च्छायया उपमानकारणभूत वनेचरादिवचनसदृशत्वात् उपमानं उपनयस्या नुग्राहकमभिधीयते ॥ § 9401

निगमनस्य तु सर्वावयवानामेकत्र नियोजनार्थत्वात् सर्वप्रमाणानुग्राह्यतैव ॥ § 9402

## प्रतिज्ञादीनां प्रयोगक्रमः

इतरेतरानुषक्तत्वात् प्रतिज्ञां विना निराश्रयो हेतुर्भवेदिति सा पूर्वं प्रयोक्तव्या अनित्यः शब्दः इति । ततो हेतुं परोजिज्ञासत इति हेतुवचनमुच्चार्यते कृतकत्वात् इति । हेतौ श्रुते क्वास्य व्याप्तिरवधृतेति दर्शयितुमुदाहरणमुच्यते यत् कृतकं, तदनित्यं दृष्टं—यथा घटः इति । एवमुक्ते ईदृशो निर्ज्ञातशक्तिरेष हेतुः साध्ये धर्मिणि भवेत्, न वेत्यसिद्धताशङ्कामपाकर्तुमुपनयः प्रसज्यते । ततः अमुना क्रमेण तवापि साध्यप्रतीति र्भवतु

१० ] शङ्का— nyāma-wit_kha
११ ] उक्ता— nyāma-wit_kha
१२ ] उक्ता— nyāma-wit_kha
२२ ] ता तु— nyāma-wit_ca
२६ ] था— nyāma-wit_kha
१ ] की— nyāma-wit_kha

इति सर्वावयवानेकत्र साध्येऽर्थे समर्थयितुं निगमनमभिधीयते । अन्यतम-मवयवमन्तरेण सकलमिदमनुषक्तार्थवाक्यं स्यादिति पंचावयवमेव यथोप-दिष्टक्रमकं वाक्यं प्रयोक्तव्यम् ॥ § 9403

II.583/KSV

### अवयवपरीक्षोपसंहारः

इत्यारब्धोपकारः तदनुगुणफलैः आगमादिप्रमाणैः
अत्योन्यापेक्षिणोऽमी नियतमवयवाः साधयन्त्यर्थजातम् ।
यश्चैतेषां प्रमेये वचसि च चतुरस्तस्य जातिप्रयोग-
प्रायैः शक्यो न पक्षः क्षपयितुमिति हि
व्याहरद्वृत्तिकारः ॥§ 9408

॥ इत्यवयवपरीक्षा ॥

॥ इति श्री भट्टजयन्तकृतौ न्यायमञ्जर्यां दशममाह्निकम् ॥

## २.७ एकादशमाह्निकम्—तर्कादिपरीक्षा : तर्कलक्षणम्

II.584/KSV

अवयवानन्तरं प्रथमसूत्रे तर्कस्योद्देशात उद्देशानुक्रमेण तस्य लक्षणमाह—
§ 9411

अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहस्तर्कः ॥ १-१-४० ॥ § 9412

अविज्ञाततत्त्वेऽथ इति सामानाधिकरण्यनिर्देशात् अर्थ एव अन्यपदार्थः, न पुरुषः । पुरुषां हि षष्ठ्या निरदेक्ष्यत अविज्ञातं तत्त्वं अस्य इति । तत्त्वपदोपादानेन धर्मिणः सामान्यधर्ममात्रविशिष्टस्य विज्ञातत्वं सूचयति । कारणोपपत्तितः इति संशयज्ञानोल्लिख्यमानपक्षद्वयान्यतरपक्षोत्थापनानुकूल-कारणावलोकनं तर्कस्योत्थापकमाह । अत एव अविज्ञाततत्त्वेऽर्थे भवन्ताव-पि बुभुत्साविमर्शेन तर्कतां प्राप्नुतः । तत्त्वज्ञानार्थम् इति साक्षात्प्रमाणताम-स्य निरस्यति । प्रमाणानुग्रहं तु विषयपरिशोधनद्वारेण विदधत् तत्त्वज्ञानाय कल्पते । तर्कः, ऊहः इति पर्यायपदोपादानस्य प्रयोजनं वक्ष्यामः ॥ § 9413

१--५ ] अ— nyāma-wit_kha
९ ] त्व— nyāma-wit_kha
१ ] शेष— nyāma-wit_kha

१७ द्वृत्तिकारः ] (?)—सूत्रवृत्तिकारः, भाव्यकार इति यावत् ॥
७ स्य ] सर्वथा अज्ञातत्वे विचाराप्रवृत्तेः ॥

## नि कृष्टसूत्रार्थः

तेनायं सूत्रार्थः—अविज्ञाततत्त्वे—सामान्यतो ज्ञाते धर्मिणि एकपक्षानुकूलकारणदर्शनात् तस्मिन् संभावनाप्रत्ययः भवितव्यतावभासः तदितरपक्षशैथिल्यापादनेन तद्ग्राहकं प्रमाणं अनुगृह्णत्—सुखं प्रवर्तयन् तत्त्व II.585/KSV ज्ञानार्थं ऊहस्तर्क इति । यथा वाहकेलिप्रदेशादौ ऊर्ध्वत्वविशिष्टधर्मि दर्शनात् पुरुषेणानेन भवितव्यमिति प्रत्ययः ॥ § 9414

## तत्त्वज्ञानार्थदलप्रयोजनम्

ननु ! तत्त्वज्ञानार्थम् इत्युक्ते सति सामार्थ्यादविज्ञाततत्त्वता— लभ्यत एवेति किमर्थं कण्ठेन पुनरनूद्यते—बाढम्—किन्तु क्वचिद्विषये ज्ञाततत्त्वेऽपि पूर्वतर्केणावसृष्टे सति, उत्तरकालं तर्कितो मयाऽयमर्थ इति स्मर्यमाणतर्कविशेषणतया गृह्यमाणः विशेषणीभूतस्तर्कः तत्त्वज्ञानार्थो भवतीति तद्युदासाय पुनरविज्ञाततत्त्वग्रहणम् । मार्गशोधनद्वारेण तर्कस्य तत्त्वज्ञानार्थत्वमिह विवक्षितम् । तच्च अविज्ञाततत्त्वेऽर्थे संभवतीति ॥ § 9415

## तर्कस्यातिरिक्तत्वाक्षेपः

ननु ! नैव संशयनिर्णयान्तरालवर्तीतर्कप्रत्ययः कश्चिदस्ति । तथा हि—यदि तावादनवगतविशेषस्य । संभवत्यसौ प्रत्ययः, तर्हि संशय एव भवेत् । अवगतविशेषस्य भवन् निर्णयतामेव स्पृशेत् । पुरुष एव इति एवकारार्थासमुन्मेषरहितोऽपि प्रत्ययः नानिर्णयो भवितुमर्हति । तुरगपरिसरणसमुचितदेशदर्शनमपि यदि स्थाणुपक्षं स्थगयितुमलमिति मन्यते, तत् करचरणादिनरविशेषदर्शनवत् तन्निर्णयकारणमेव स्यात् । अथ तस्यामपि तुरगविहरणभुवि निशि निखनति कश्चन स्थाणुमिति शङ्कसे, यद्येवं स्थाणुपक्षानपायात् पुनः संशय एव स्यात्—इति न तृतीयः पक्षः समस्तीति—लक्ष्याभावात् कस्येदं लक्षणमिति ॥ § 9416

II.586/KSV

## तर्कस्यातिरिक्तत्वनिरूपणम्

६ ] बाह्य— nyāma-wit__kha
१४ ] तत्र— nyāma-wit__kha
१६--१७ ] द्यु— nyāma-wit__kha
२० ] नि— nyāma-wit__kha
२१ ] प्रत्ययः— nyāma-wit__ca
२१ ] क्षणा— nyāma-wit__kha

२१ ज्ञानार्थो ] तत्त्वज्ञानदार्ढ्यार्थतर्कचिन्तनरूपः खलु सः, न तर्कः ॥
१ र्ती ] तर्कप्रत्ययः—तर्करूपं ज्ञानम् ॥

उच्यते—न खलु स्वमतिपरिकल्पितविकल्पवितानेन प्रत्यात्मवेदनीयाः प्रतीतयोऽपनेतुं शक्याः । तथा हि—स्थाणुर्वा, पुरुषो वा इति प्रतीतिरेका, पुरुष एवायं इत्यन्या ? अन्या च पुरुषेणानेन भवितव्यं इति मध्यवर्तिनी तृतीया संभावनाप्रतीतिः, स्वहृदयसाक्षिकैव ॥ § 9417

साम्येन हि समुल्लेखः संशये पक्षयोर्द्वयोः ।
निर्णये त्वितरः पक्षः स्पृश्यते न मनागपि ॥§ 9419

तर्कस्त्वेकतरं पक्षं विभात्युत्थापयन्निव ।
नरसंभावनाबीजवाजिवाहनदर्शनात् ॥§ 9421

वाहकेलिप्रदेशविशेषदर्शनं हि पुंसि संभावनामात्रमुपजनयितुमलं, न तु शिरःपाण्यादिविशेषदर्शनवत् सर्वात्मना स्थाणुपक्षापसारणेन पुरुषस्य निर्णयाय प्रभवति । अतोऽयमगृहीतविशेषस्यैव भवति प्रत्ययः, न तु संशयः; एकतरपक्षानुकूलकारणोपपत्त्यत् जायमानत्वात् ॥ § 9422

## तर्कस्यानिर्णयरूपत्वम्

कथं पुनः पाणिपादादिपुरुषविशेषवत् अश्ववाहनदेशविशेषः विशेषकार्यं न कुर्यात् । करणे वा स्थाणुपक्षोत्सारणात् निर्णय एवायमिति —कस्यैष पर्यनुयोगः—यथा हि शिरःपाण्यादिदर्शने सति पुरुषनिर्णयो भवति, न तथा तुरगवहनदर्शने सति । अननुयोज्याश्च पदार्थाः एवंभवत एवं मा भूत इति । यथा च देशान्तरे स्पर्धमान एव स्थाणुपक्ष आस्ते, न तथा वाहकेळिभूमौ, अपि तु शिथिलीभवति । संभवत्प्रमादत्वाच्च न सर्वात्मना निवर्तते ॥ § 9423
II.587/KSV

## तर्कः न संशयरूपः

ननु ! यदि न निवर्तते, तर्हि स्पर्धताम् । मा वा स्पर्धिष्ट । स्थितस्तावत् स्थाणुपक्ष इति संशय एवायमिति—मैवम्—न स्थाणुपक्षः सर्वात्मना निवर्तते, नाप्यास्ते । एवमेवायं त्रिशङ्कुरिव लम्बमानः प्रत्या यान्तरनिर्वृत्तये प्रभवतीति तथा विधप्रत्ययानुभवादेव परिकल्प्यते । वाहकेलिप्रदेशदर्शने हि यथा पुरुषविशेषाः स्मरणपथमवतरन्ति, न तथा स्थाणुविशेषाः । उभय-

३ ] न्या— nyāma-wit_kha
८ ] ननु— nyāma-wit_kha
१० ] नि— nyāma-wit_kha
१४ ] करेणे— nyāma-wit_kha
१ ] तथा— nyāma-wit_kha

३ च ] देशान्तरे—अरण्यादौ । निवर्तते—स्थाणुपक्षः ॥
७ मानः ] प्रत्ययान्तरं—विलक्षणप्रत्ययम् ॥

विशेषस्मरणजन्मा च संशय इति सोऽयं वाहकेलि प्रदेशविशेषः शिथिलयति स्थाणुपक्षं, न सर्वात्मनोच्छिनत्तीति। तत् दर्शनात् भवति प्रत्ययान्तरमूहरूपं पुरुषेणानेन भवितव्यम्, इतीत्यलमतिविस्तरेण ॥ § 9424

## भाष्योक्तोदाहरणविमर्शः

यत्तु भाष्यकारेण तर्कोदाहरणमभ्यधायि—जन्मोच्छेददर्शनात् *कृतकतत्कारणप्रत्यय इति—न तद्धृदयङ्गमम्—तेन क्रमेण निर्णय एवासौ तत्कारणतथात्वं न तर्क इति ॥ § 9425

अथवा कार्योदाहरणत्वादस्य तत्रापि संशयनिर्णयान्तरालवर्ती तर्कप्रत्ययो द्रष्टव्यः। स उदाहरणं भविष्यति ॥ § 9426

## ऊहादिपदप्रयोजनम्

ऊह इति पर्यायाभिधाने किं प्रयोजनम् ? लक्षणप्रतिपादनमेव— तर्कस्य लक्षणम्, यत् ऊहरूपत्वम्। इतरस्तु सूत्रे कारणविशेषाय फलनिर्देशः II.588/KSV
। कारणोपपत्तितः इति कारणनिर्देशः। अविज्ञाततत्त्वेऽर्थे इति विषयनिर्देशः। तत्त्वज्ञानार्थः इति फलनिर्देशः ॥ § 9427

अपि च तर्कशब्दं केचित् अनुमाने प्रयुंजते। यथा स्मृतिकाराः पठन्ति— § 9428

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इति ॥§ 9430

तदिहापि तर्कोऽनुमानं मा विज्ञायीत्यूहग्रहणम्। ऊहोऽत्र तर्क उच्यते नानुमानम्। तत्त्वज्ञानार्थताऽप्यस्य प्रमाणानुग्राहकत्वेन, न साक्षात्। तथैव चार्थं साधयितुमेष वादे प्रयुज्यते, हृदयशुद्धिप्रकाशनार्थम् ॥ § 9431

## सांख्यपक्षनिराकरणम्

४--६ ] द— nyāma-wit_kha
६--७ ] कं का— nyāma-wit_ca
१२ ] ष— nyāma-wit_ca

१३ *] तत्करणं—जन्मकारणं कृतकमिति प्रत्ययः। तर्क इतिशेषः। अत्मनः जन्मनः-शरीरसंबन्धस्य कारणं यदि नित्यं, तर्हि शरीरसंबन्धोऽपि नित्यः। यद्यनित्यः तर्ह्यनित्यः कदाचिन्निवर्तेत। अयं विचारः प्रथमसूत्रस्थः ॥

३ न्ति ] वस्तुतस्तु तस्मिन् श्लोके तर्कः ऊह एव, न त्वनुमानम्। तर्कानुगृहीतः आगमः सुदृढं प्रमाणं भवतीति। तर्कः खलु प्रमाणानुग्राहकः ॥

कापिलास्तु बुद्धिधर्ममूहमाहुः । सः तत्सिद्धान्तप्रसिद्धसत्त्वरजस्तमोरूपप्रकृतिप्रभवभुवनसर्गादिव्यवहारनिराकरणवर्त्मना पूर्वमेव निरस्तः ॥ § 9432

## मीमांससंमतोहप्रदर्शना

जैनिनीयास्तु ब्रुवते—युक्त्या प्रयोगनिरूपणमूह इति । इह हि किंचिदुपदिष्टदृष्टादृष्टस्वभावसकलेतिकर्तव्यताकलापं कर्म भवति । यथा आग्नेयोऽष्टाकपालः इति दर्शपूर्णमासकाण्डे पठितम् । क्वचित् पुनः प्रधानकर्ममात्रमुपदिश्यते, इतिकर्तव्यता तु काचन नाम्नायते । यथा सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः इति ॥ § 9433

II.589/KSV

तत्र विचार्यते—किमितिकर्तव्यताविरहितयथाश्रुतप्रधानमात्रसंपादनेन तत्र शास्त्रार्थप्रयोगः परिसमाप्यते, उत तदपि सेतिकर्तव्यताकं प्रधानमनुष्ठेयमिति ॥ § 9434

तत्र अपूर्वप्रयुक्तत्वेन धर्माणां प्रतिकरणं भेदे स्थिते निरङ्गस्य प्रधानस्याननुष्ठेयत्वात् विध्यन्ताधिकरणसिद्धान्तन्यायेन प्राकृतवत् वैकृतकर्म कर्तव्यमिति सेतिकर्तव्यताकं तदनुष्ठीयते । एवं सामान्यातिदेशे स्थिते सति कस्य वैकृतस्य कर्मणः कुतः प्रकृतेः धर्मा अधिगन्तव्या इति चिन्तायां, द्रयदेवतादिचोदनासारूप्यपर्यालोचनोपनतहृदयसन्निधानप्राकृतकर्मविशेषसंबन्धिन एव तत्र धर्मा भवितुमर्हन्तीति स्थापिते, युगपदुपनिपतदनर्गलचोदकव्यापारोपनीतनिखिलाखडमण्डलविध्यन्तकाण्डाधि— गम्यधर्मप्रबन्धप्राप्तौ सत्यां ते धर्माः कथं प्रयोक्तव्या इति युक्त्या प्रयोगनिरूपणं ऊह उच्यते, येन इत्थं प्रयोक्तव्या इति धर्मा व्यवस्थाप्यन्ते ॥ § 9435

## मीमांसकमते तर्कत्रैविध्यम्

स च त्रिविधः मन्त्रसामसंस्कारविषयः । मन्त्रविषयस्तावत् यथाऽत्रैव सौर्ये चरौ प्रकृतिवद्भावेन अग्न्नेयात्, अग्नये त्वा जुष्टं निर्वपामि इति निर्वापमन्त्रः प्राप्तः कथं प्रयोक्तव्य इति विचारणायां—उच्चारणमात्रेण मन्त्राणामनुपयोगात् प्रयोगसमवेतद्रव्यदेवतादिप्रकाशनद्वारेण तदुपयोगस्य व्यवस्थितत्वात्, इह व प्राकृत एवायं अग्नये जुष्टं इति प्रयुज्यमानो मन्त्रः प्रयोगसमवेतस्यार्थस्याप्रकाशनात् असङ्गतो भवेत् । सर्वात्मना चोत्सृज्यमाने मन्त्रे II.590/KSV
मन्त्रप्रकाशितकर्मानिनुष्ठानात् न प्रकृतिवत् कृतं भवेदित्यग्निपदोद्धारेण सूर्य-

४ ] उद्ध— nyāma-wit__ca
५ ] पठति— nyāma-wit__ca
१२ ] प्रकृति— nyāma-wit__ca
१७ ] सं— nyāma-wit__kha
२० ] शेष— nyāma-wit__ca
२४ ] हावि— nyāma-wit__kha

१७ र्माणां ] प्रतिकरणं—प्रत्यनुष्ठानम् ॥
४ प्राप्तौ ] विनिगमकाभावात्—प्राप्तिः ॥

पदप्रक्षेपेण मन्त्रः ऊहेनेत्थं प्रयोक्तव्य इति गम्यते सूर्याय त्वा जुष्टं निर्वपामि इति ॥ § 9436

ननु ! *ऊहप्रवरनामधेयानाममन्त्रत्वादित्थमपि न मन्त्रेण स्मृतं कर्म कृतं स्यात्—नैतत्—एकदेशविकृतमनन्यवद्भवति इति न्यायात् ॥ § 9437

## सामरूपोहः

सामविषयस्तु गीतयस्सामानि इति स्थिते क्वचित्कर्मणि रथन्तरमुत्तरयोर्गायति बृहदुत्तरयोर्गायति इति श्रुतेः सा बृहद्रथन्तरगीतिः यस्यामृचि योनिभूतायामुत्थिता, ततोऽन्यस्यामपि प्रयुज्यते । तादृगक्षरापायेऽपि सा गीतिः ऋगन्तराक्षरेण्वपि प्रत्यभिज्ञायते रथन्तरमनेन श्लोकेन गीतम् इति व्यवहारदर्शनात् ॥ § 9438

## संस्काररूपोहः

संस्कारः खल्वपि प्राकृतौ प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति इति संस्कारश्चोदितः क्वचिच्च विकृतौ श्रूयते नखनिर्भिन्नश्चरुर्भवति इति । तत्रोलूखलमुसलयोः प्रकृतौ पुरोडाशापेक्षिततुषकणविप्रमोकपूर्वकतण्डुलीभावसंपादनद्वारेणोपयोगात् विकृतावपि तत्कार्यापन्नानां नखानां प्रोक्षणाख्यः संस्कारः क्रियत इति । सोऽयं त्रिविध ऊहः ॥ § 9439

## तन्मते ऊहस्य पञ्चविधत्वपक्षः

केचित्तु पंचविधमूहमाचक्षते । धर्मस्यार्थकृतत्वात्, (?')द्रव्यगुणसंस्कार-
II.591/KSV व्यतिरिक्तक्रमप्रतिषेधे चोदनानुबन्धः समवायात् जै-सू-९-२-१२, ४० इति सूत्रमनुसरन्तः । एतत्तु प्रतन्यमानमतिप्रसङ्गमावहति । त्रिविधमेव चोहं याज्ञिका अनुमन्यन्त इति ॥ § 9440

## मीमांसकोक्तोहनिराकरणम्

१० ] क— nyāma-wit_kha
१२ ] रविषय— nyāma-wit_kha
१८ ] ति— nyāma-wit_kha

१६ *] ऊहः उक्तः । यागे अध्वर्युणा यजमानस्य गोत्रप्रप्रवरणामधेयानि श्रावयितव्यानि ॥

६ केचित्तु] उक्तत्रयेण साकं द्रव्योहः, गुणोहः इति द्वयम् ॥

अत्र वदन्ति—सोऽयमूहशब्दः श्रोत्रियैरनुमाने प्रयुक्तः । यथा स्मृतिकारैः तत्र तर्कशब्दः यस्तर्केणानुसन्धत्ते इति । तथाहि—वैकृतं कर्म धर्मित—त्समवेतार्थप्रकाशकमन्त्रप्रयोगनिर्वर्त्यम्—इति—साध्यो धर्मः, कर्मत्वात्—प्राकृतकर्मवत् इति । प्राकृतेषु च कर्मसु तथा तथा व्याप्तिग्रहणत् सर्वोऽयमनुमानमार्ग एव । नखाः प्रोक्षणीयाः, प्रयोगोपयोगि तण्डुलनिर्वर्तकत्वादिति ॥ § 9441

सामसु तु स्पष्टमेव वचनमस्ति रथन्तरमुत्तरयोर्गायति इति । तदभावेऽपि मन्त्रसंस्कारसमानयोगक्षेमत्वमेव ॥ § 9442

## मीमांसकोक्तोहः शब्द एव वा

अपि च शब्दपृष्ठस्थितन्यायसहस्रव्युत्पादनात्मके मीमांसाशास्त्तन्यायलभ्योऽर्थः चोदनार्थ एवेति स्थापितम् । अतश्च यथोक्तोहलभ्यस्यार्थस्य चोदनार्थता मातिवतिष्ठेति सोऽयमूहः शब्द एवान्तर्भावणीयः । प्रमाणान्तरगोचरो वा धर्मः स्यात् । न्यायविशेषात्मकस्तूहः नानुमानादर्थान्तरं स्यात् । अग्नये—इत्यस्य स्थाने सूर्याय इति पदस्य प्रयोग ऊहस्य फलम्; नोहः । तस्मान्न याज्ञिकैः प्रमाणादर्थान्तरमूह उक्तः ॥ § 9443

इह तु पूर्वोक्तया नीत्या प्रमाणव्यतिरिक्त ऊहः उपपादितः । श्रोत्रियास्तु तदनभिज्ञतया न्याये न्यायफले च ऊहशब्दमुपचरितवन्त इत्यलं शास्त्रान्तरोद्धारगहनाभिः कथाभिः ॥ § 9444

II.592/KSV

तदेष मीमांसककल्प्यमानः
नोहः प्रमाणव्यतिरेकमेति ।
प्रमाणसन्देहदशान्तराळ-
वर्ती तु तर्कः कथितोऽत्र शास्त्रे ।§ 9448

—इति तर्कपरीक्षा— § 9449

## निर्णयपरीक्षा

तर्कानन्तरं निर्णयो भवति, पठितश्चेति स लक्ष्यते— § 9450

### विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ १-१-४१ ॥

§ 9451

११ ] निर्व— nyāma-wit_kha
१२ ] द्याश्र— nyāma-wit_ca
१३--१४ ] हः— nyāma-wit_kha

२१ रो ] सिद्धान्ते धर्मस्यानुमानगम्यत्वाङ्गीकारात् ॥

अवधारणं निर्णय इत्युच्यमाने मिथ्यावधारणमपि तथा स्यादित्यर्थग्रहणम् । इन्द्रियादिजनितमपि तत्त्वावधारणमस्त्येव । न्यायोपरमहेतोस्तु निर्णयस्योद्देशात् स एवानुमानजन्यो लक्षणीय इहेति पक्षप्रतिपक्षा भ्यामित्युक्तम् ॥ § 9452

## पक्षप्रतिपक्षशब्दार्थः

एकाधिकरणौ धर्मौ तुल्यकालौ विरोधिनौ ।
पृथक्परिग्रहौ पक्षप्रतिपक्षावुदाहृतौ ॥§ 9454

न तर्हि ताभ्यां निर्णयः, तयोरन्यतरविषयो हि भवति निर्णयः, न तत्करणक एवेति—सत्यम्—इह तु पक्षप्रतिपक्षशब्दाभ्यां तद्विषयौ साधनतदुपालम्भौ लक्ष्येते । तौ च तस्मिन् करणमेव । किमर्थं पुनः लक्षणाऽऽश्रीयते साधनोपालम्भाभ्यां इत्येव कथं न सूत्रितम् ? एव मभिधीयमाने पुन- II.593/KSV
स्तयोर्विषयो मृग्यः । लक्षणाप्रयोगे तु सोऽप्यवगतो भवेत् । मुख्यमभिधाय तदितरो लक्ष्यते ॥ § 9455

## पक्षप्रतिपक्षयोः निर्णयाङ्गत्वम्

भवत्वेवम् ! द्वाभ्यां तु कथं निर्णयः, एकमेव हि साधनं निर्णयाय कल्पते—एवमेतत्—न द्वितीयमपि साधनं निर्णयनिमित्तमाचक्ष्महे, किन्तु तदुपालम्भस धनं च, साधनोपालम्भश्च—साधनोपालम्भौ, ताभ्यां निर्णयः ॥ § 9456

एतदुक्तं भवति—स्वपक्षे साधनमधिगच्छन्, परपक्षसाधने च दूषणमुत्प्रेक्षमाणः स्वपक्षं प्रमाता निर्णयतीति ॥ § 9457

न खल्वेवं न जाने । किन्तु उपालम्भस्य क इव निर्णयजन्मनि व्यापारः । स हि परपक्षसाधनमेवोच्छिन्द्यादिति—अस्त्येतत्—तदुच्छेदद्वारेणापि तु स्वपक्षसाधनाभिमानमाविष्कुर्वन् कल्पत एव निर्णयायेति युक्तः द्वयोरपि कारणभावः ॥ § 9458

## अर्थपदप्रयोजनम्

ननु ! इदानीमर्थग्रहणमनर्थकमिव । न ह्येवंविधसाधनाधीनजन्मा निर्णयाभासः संभवति । साधनोपालम्भलक्षणार्थावपि पक्षप्रतिपक्षशब्दौ विष-

१ ] अव— nyāma-wit_kha
७ ] ति— nyāma-wit_kha
१७--१८ ] स्व— nyāma-wit_kha
२० ] स्वे— nyāma-wit_kha
२१ ] नमहि— nyāma-wit_kha
२३ ] वं— nyāma-wit_kha

१२ ति ] किन्तु, अर्थवानेव भविष्यति ॥

यम(?)दितुं न शक्नुत इत्युक्तमेवेति कोऽर्थोऽर्थग्रहणेन ? उच्यते—पक्षप्रतिपक्षयोस्तु द्वयोः अन्यतरार्थेऽवधारणं भवति, नोभयत्र । स एव च परमार्थतोऽर्थः, इतरस्तु भ्रान्तिकल्पित इति प्रदर्शनायार्थपदोपादानम् ॥ § 9459

II.594/KSV

लक्ष्यमाणसाधनोपालम्भनिष्ठत्वात्तु पक्षप्रतिपक्षशब्दयोः विषयनिर्देशार्थं अर्थपदमित्येके ॥ § 9460

## विमृश्येतिपदप्रयोजनम्

विमृश्य इति किमर्थम् ? वस्तुस्वरूपकथनार्थमेव । अनुमानकारणको हि निर्णयः इह लक्ष्यत इत्युक्तम् । अनुमानं च संशयविषये प्रवर्तत इति तर्कानन्तरमपि । अनेनैवाशयेन अस्योपादानम् । संशयादनन्तरं तर्कः, तर्कादूर्ध्वं च निर्णयो दृष्टः प्रवर्तमानः । अतस्स तत्पूर्वक इष्यते ॥ § 9461

निर्णये तु समुत्पन्ने बुभुत्सा विनिवर्तते ।
अत एव हि मन्यन्ते तदन्तं न्यायचिन्तनम् ॥§ 9463

## सूत्रे नियमत्रयविवक्षा

भवत्वेवम्, इदन्तु चिन्त्यताम्—क्व नियमः, किं विमर्शे ? किं पक्षप्रतिपक्षयोः ? किं निर्णये ? इति । त्रयेऽपि च नोपपद्यत इति । न विमृश्यैव निर्णयः, अविमृश्यापि भावात् । न पक्षप्रतिपक्षाभ्यामेव, इन्द्रियादेरपि तदुत्पादात् । न निर्णय एव, तर्कस्यापि क्वचिदनिवृत्तेः—उक्तमत्र, उद्देशसूत्रे तत्त्वज्ञानपदोपादानात् प्रमाणपदेन च तत्फलाक्षेपात् न निर्णयमात्रेणोद्दिष्टेन किमपि प्रयोजनम् । विशिष्टस्तु निर्णयः लक्ष्यत्वेन विवक्षितः ॥ § 9464

परीक्षाविषयो यो हि निर्णयो न्यायनिर्मितः ।
नियमत्रयमप्येतत् तस्मिन्न हि न युज्यते ॥§ 9466

II.595/KSV

## संशयाभावेऽपि विचारप्रवृत्तिः

७ ] क— nyāma-wit_kha
१० ] उच्य— nyāma-wit_kha
१७ ] पेक्षणा— nyāma-wit_ca
१७ ] त्रो— nyāma-wit_kha
१८ ] क्षण— nyāma-wit_kha
२० ] नि— nyāma-wit_ca

२२ च] तर्कात् पूर्वं जातस्तु न क्षोदक्षमो भवेदित्याशयः ॥

स हि विमृश्यैव भवति, विमर्शपूर्वकत्वात् परीक्षायाः । अनुमानं च संदिग्धे विषये प्रवर्तत इति प्रायेण तद्व्यवहारः ॥ § 9467

यद्यपि क्वचिदसंदिग्धेऽपि विषये दृष्टं प्रवर्तमानमनुमानमनलार्थितायामतर्कितोपनतपर्वतनितम्बनिर्गतधूमदर्शनेन कृशानुकल्पमिव; तथापि वस्तुयोग्यतावशेन संदिग्धविषयमेवानुमानमिच्छन्ति न्यायविदः । प्रकृतश्च निर्णयः पक्षप्रतिपक्षाभ्यामेव निर्णय एवेति न शक्यते नियन्तुम्, अन्यथा न्यायानुपरमादिति । शास्त्रे तु विनापि संशयादस्ति निर्णयः ॥ § 9468

यद्यपि च तत्रापि सूत्रकृता सर्वपरीक्षाणां संशयपूर्वकत्वमुपदेशातिदेशाभ्यामभ्यधायि, तथापि नासौ शास्त्रीयो निर्णयः, परीक्षाकार्यत्वात् ॥ § 9469

## शास्त्रीयनिर्णयेषु विशेषः

यस्तु शास्त्रत एव क्वचिद्विषयनिर्णयः, स विमर्शवर्जमुत्पद्यते । वादेऽपि विमर्शरहितो भवति निर्णयः । उभौ निश्चितौ वादं कुरुतः, संदिग्धस्य तत्रानधिकारात् । कथं तर्ह्येष प्रवादः संशयच्छेदो वादस्य फलम् इति ? प्रथममुभयोरपि निश्चितयोर्वादप्रवृत्तौ अन्तराले बलादापतति युक्तिद्वयोपनिपातकृतः संशय इति वस्तुनिर्णयावसानत्वाद्वादस्य संशयच्छेदफलत्वमाचक्षते ॥ § 9470

## निर्णयपरीक्षोपसंहारः

यद्यप्यनिश्चितमतिः कुरुते न वादं
श्रुत्वा तथापि परकीयनयप्रयोगम् ।
II.596/KSV अन्तर्मतद्वयबलाबलचिन्तनेन
संशय्य निर्णयति नूनमसौ स्वपक्षम् ॥ § 9474

—इति निर्णयपरीक्षा— § 9475

## वादपरीक्षा

न्यायपरीक्षाद्वारकवस्तुविचारयोग्याः कथा वादिनां भवन्ति—वादः, जल्पः, वितण्डेति । तत्र वादस्तावदुच्यते— § 9476

---

१५ ] व— nyāma-wit_kha
१८ ] वेश— nyāma-wit_kha

---

१५ यः ] अन्यथा श्रोतव्यो मन्तव्यः इति श्रवणानन्तरमननं न स्यात् ॥

## प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ १-२-१ ॥ § 9477

पक्षप्रतिपक्षौ व्याख्यातौ । तयोः परिग्रहः—अभ्युपगमनियमः । एको वक्ति नित्यः शब्दः इति । अपरस्तु अनित्यः शब्दः इत्याह । सोऽयं पक्षप्रतिपक्षपरिग्रहो वादः । एतच्च रूपं कथात्रयेऽपि साधारणमिति विशेषमाह—प्रमाणतर्कसाधनोपालम्भ इति । प्रमाणैः तर्केण च साधनम्, उपालम्भश्चास्मिन् क्रियते इति प्रमाणतर्कसाधनोपालम्भः । न त्वीदृशी वितण्डा, तस्याः प्रतिपक्षसाधनोपन्यासशून्यस्वभावत्वात् ॥ § 9478

### कथासु परार्थानुमानमेव प्रमाणम्

ननु ! प्रत्यक्षादेः प्रमाणस्य परप्रतीत्यनुपायत्वात् न तेन वादे साध-
II.597/KSV नोपालम्भौ शक्यक्रियौ । तर्कस्य तु प्रतीतिसाधनत्वमपि तावत् न संभवति, संभवनाप्रत्ययस्वभावत्वात् । किमुत परप्रत्यायनाङ्गतेति न तरां तस्य साधनोपालम्भहेतुत्वम् । सत्यमेवम्—इह तु न प्रमाणशब्देन प्रत्यक्षादेरभिधानम्; अपि तु प्रमाणमूला अवयवाः उच्यन्ते । तैश्च सिद्ध्युपालब्धी क्रियेते । एवं तर्कस्य तु स्वतः साधनोपालम्भकरणकौशलशून्यात्मनोऽपि प्रमाणानुग्राहकत्वात् पारम्पर्येण तद्धेतोराशयशुद्धिप्रदर्शनार्थमुपादानम् ॥ § 9479

### पञ्चावयवोपपन्नदलप्रयोजनम्

यद्येवं प्रमाणपदेनैव तन्मूलावयवप्रतिपादनात् पंचावयवोपपन्नग्रहणमतिरिच्यते ॥ § 9480

तत्र के चिदाचक्षे—प्रमाणतर्कसाधनोपालम्भ इति वादलक्षणे, छलजातिनिग्रहस्थानसाधनोपालम्भ इति च जल्पलक्षणे श्रवणात्, वादे सर्वात्मना छलादिनिषेधप्रसक्तौ कतिपयनिग्रहस्थानोद्भावनाभ्यनुज्ञानार्थं पंचावयवोपपन्नग्रहणम् ॥ § 9481

अनेन च हीनं—अन्यतमेनाप्यवयवेन न्यूनम्, हेतूदाहरणाभ्यामधिकं—अधिकमिति न्यूनाधिकयोरुद्भावनमनुज्ञायते । सिद्धान्ताविरुद्धग्रहणेनापि—सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः इति विरुद्धाख्यहेत्वाभासोद्भावनमनुज्ञातम्—इत्येवं वादे त्रीणि निग्रहस्थानान्युद्भावनीयानि ॥ § 9482

### वादे चोदनीयनिग्रहस्थानानि

---

६ ] साधनो— nyāma-wit_kha; nyāma-wit_ca; nyāma-wit_gha
१२ ] रनुमा— nyāma-wit_kha
२२ ] णा— nyāma-wit_kha

---

१५ स्याः ] वादिदृष्ट्या प्रतिपक्ष इत्युच्यते । वैतण्डिकदृष्ट्या तु स्वपक्षः ॥

अन्ये वदन्ति—विरुद्ध एव हेत्वाभासो वादे चोद्यते, नानैकान्तिकादिरिति । कथमेतत् युज्यते ? निग्रहस्थानेभ्यः पृथगुपदिष्टा हेत्वभासा वादे चोदनीया भविष्यन्ति इति—भाष्यकारवचनात् प्रमाणपदेन च तन्मूलाव- II.598/KSV यवाक्षेपात् प्रमाणाभासमूलनिरासे सति सकलहेत्वाभासोद्भावनमपि तत्र सिद्धमिति ॥ § 9483

सिद्धान्ताविरुद्धग्रहणेन सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गः अपसिद्धान्तः इत्यपसिद्धान्ताख्यनिग्रहस्थानाभ्यनुज्ञानमित्येवमष्टौ निग्रहस्थानानि वादे उद्भाव्यन्त इति—तदनुपपन्नम्—न हि त्रीणि वा अष्टौ वा वादे निग्रहस्थानानि चोदनीयानीति चोदनावैदिकी, राजशासनं वा । वस्तुपरिशुद्धिसाधनं सर्वमेव तत्र प्रयोगार्हम् । अयं तु विशेषः—जल्पे कस्यांचिदवस्थायां बुद्धिपूर्वकमपि छलादिप्रयोगः क्रियते । वादे तु न तथा तेषां प्रयोगः । भ्रान्त्या तु कथंचित्प्रयुक्तानामवश्यमुद्भावनम्; अनुद्भावने वस्तुपरिशुद्धेरभावात् ॥ § 9484

## स्वमतेन दलप्रयोजनम्

कथं तर्हीदं पदद्वयं—सिद्धान्ताविरुद्धः, पंचावयवोपपन्न इति । अपसिद्धान्तादिसम्यग्दूषणदिक्प्रदर्शनेन एवंप्रकारवस्तुशुद्ध्यनुगुणनिग्रहस्थानजाताभ्यनुज्ञानार्थमेवेत्यभियुक्ताः । अप्रतिभाविक्षेपादयो हि न वादे पराजयहेतवः, क्षणान्तरेणाप्यागत्य अनुस्मृत्य च साधनमुपालम्भं वा तत्र प्रवदन्न पराजीयते । प्रतिज्ञाहान्यादि तु सम्यक्पराजयकारणमखिलमाभ्यां पदाभ्यामभ्यनुज्ञातमत्रेति ॥ § 9485

## प्रमाणतर्कदलप्रयोजनम्

ननु ! इदानीं प्रमाणतर्कग्रहणमपार्थकम्, पंचावयवोपपन्नपदेनैव प्रमाणमूलावयवोपदेशात्, वस्तुपरिशुद्ध्यनुगुणनिग्रहस्थानाभ्यनुज्ञानाच्च किमिव नोक्तम्—न—अभिप्रायनैर्मल्यनिवेदनद्वारकवादजल्पविवेकप्रतिपादनार्थत्वात्
II.599/KSV । स्वप्रतिपत्तिसाधनमपि प्रत्यक्षादि वादे प्रयोक्तुमुचितं, आशयशुद्धिमुपदर्शयितुम् । अत्र वस्तुनि मम प्रथमं तर्कः इत्थं प्रवृत्त आसीत्, ततः प्रमाणमिदं प्रवृत्तम् इत्येवमाद्यपि तत्र वक्तव्यम् । अत एव चान्यतरपक्षनिर्णयावसान एव भवति वादः । न जल्पवत् अलीकदूषणाडम्बरविरचितपरपरिभवपर्यवसानोऽपीति तथा बुद्धिपूर्वमाभासानामप्रयोग इति निर्मत्सरकथात्वमस्योक्तमिति अकलुषाकूतकथनाय प्रमाण तर्कपदम् ॥ § 9486

---

७ ] ना— nyāma-wit_kha
११ ] वृ— nyāma-wit_kha
१६ ] द्य— nyāma-wit_kha
१७ ] प्यागत्य— nyāma-wit_kha
२५ ] म— nyāma-wit_kha

## प्रमाणतर्कदलप्रयोजनान्तरम्

अपि च साधनोपालम्भव्यतिषङ्गप्रतिपादनमपि तस्य फलम् । उभावपि परस्परमनुबन्धेन वादिभ्यां परीक्ष्यमाणौ पक्षप्रतिपक्षौ वादतां प्रयोजयतः, न तु स्वगुहे शास्त्रे वा विविच्यमानौ । प्रमाणैरेव वादे, छलादिभिरेव जल्पे व्यवहार इति नियमशङ्कानिरसनमपि तत्पदोपादानप्रयोजनमुक्तमन्यैरिति कृतमतिविस्तरेण । सर्वथा वादलक्षणं सुस्थम् ॥ § 9487

वादं तु निर्णयफलार्थिभिरेव शिष्य-
सब्रह्मचारिगुरुभिः सहवीतरागैः ।
न ख्यातिलाभरभसप्रतिवर्धमान-
स्पर्धानुबन्धविधुरात्मभिरारभेत ॥§ 9491

—इति वादपरीक्षा— § 9492

## जल्पपरीक्षा

**यथोक्तोपपन्नः छलजातिनिग्रहस्थानसाधनोपालम्भः जल्पः ॥ १-२-२ ॥** § 9493

II.600/KSV

यथोक्तोपपन्नग्रहणेन सर्वातिदेशे वादजल्पयोरविशेष इति शङ्कमानाः केचन पक्षप्रतिपक्षपरिग्रहमात्रातिदेशमेव व्याचक्षते । इयतस्तु पूर्वसूत्रानुवृत्त्यापि सिद्धेः मन्दफलमेव यथोक्तोपपन्नवचनं भवेदिति समस्तादितिदेश एव वरम् । न च तत्रापि वादजल्पयोः साम्यम्, गम्यमानार्थानतिदेशात् । श्रौत एवार्थः अतिदिश्यते, न गम्यमानः । तत्कृत एव च तयोर्भेदः ॥ § 9494

तथा च प्रमाणतर्कसाधनोपालम्भ इत्यत्र गम्यमानोऽर्थः अभिप्रायनियमः । स नातिदिश्यते । सिद्धान्ताविरुद्धः पंचावयवोपपन्नः इत्यत्रापि बुद्धिपूर्वकजात्यादिप्रयोगप्रतिषेधतदुद्भावननियमरूपः गम्यमानोऽर्थः । सोऽपि नातिदिश्यत इति कुतस्तयोरविवेकः । अत एव च बुद्धिपूर्वक प्रयोगानुज्ञानाय छलजातिनिग्रहस्थानसाधनोपालम्भ इत्युक्तम् ॥ § 9495

## जल्पे छलादेरभ्यनुज्ञानम्

---

३--४ ] ज— nyāma-wit__kha
१७ ] र्थ अ— nyāma-wit__kha

भवत्वेवम् ! छलादीनां त्वसदुत्तरत्वात् कथमिव साधनोपालम्भहेतुत्वम् । परपक्षप्रतिक्षेपद्वारकमिति चेत्—न—असदुत्तरत्वेन प्रतिक्षेपे ऽपि तेषाम-सामर्थ्यात् । एवमपि च साधनग्रहणमनर्थकमेवेति—सत्यमेवेदम्—किन्तु कस्यांचिदवस्थायां स्वप्रतिपत्तिसाधनोपहिततत्त्वज्ञानरक्षायै तान्यपि व्याप्रियन्ते । यदा जानन्नपि परपक्षकश्मिमानम्, स्वपक्षे द्रढिमानं च क्वचिदवसरे परप्र-युक्ते साधने दूषणं सपदि न पश्यति, स्वपक्षसाधनं च झटिति न स्मरति, तदा छलादिभिरप्युपक्रम्य परमभिभवति, आत्मानं च रक्षतीति ॥ § 9496
II.601/KSV

## छलादिप्रयोगफलम्

ननु ! यदि परोऽपि छलादीनि जानीयात्, तेषु चानुरूपमुत्तरमभिद-धीत, कथं जीयेत ? प्रत्युत जयत्येव—सत्यम्—तथाप्येकान्तपराजयात् वरं संदेह इति युक्तमेव तत्प्रयोगेण स्फुटाटोपकरणम् ॥ § 9497

ननु ! ईदृंशि प्रयोजनानि जिगीषतो जनस्य जानपदसदसि भव-न्ति । तस्यापि न निपुणमतिपरिषदि । मुमुक्षोस्तु दूरापेतैव कथेयमिति कथमिह मोक्षशास्त्रे जल्पाद्युपदेशः ?—नैतदेवम्—मुमुक्षोरपि क्वचित्प्रसङ्गे तदुपयोगात् । तथोक्तं तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे, बीजप्ररोह-संरक्षणार्थं कण्टकशाखावरणवत् न्या-सू-४-५- इति ॥ § 9498

## वितण्डादिप्रयोगकालः

यदि हि क्वचिदाश्रमे सुखमासीनं अनेकशिष्यगणोपास्यमानं रहस्यतत्त्व-मुपदिशन्तं शान्तमानसमाचार्यं अनार्यः कश्चिद्विपश्चिदागत्य दुरधिगतकतिप-याक्षरचयजनितगुरुतरगर्वगद्गदया गिरा (?')भोस्तपस्विन् ! किं व्याख्यायते ? हुं ! आन्वीक्षकी ! सरलमतिप्रियेयं विद्या । क्व वेदाः ! क्ववेदप्रामाण्यम् ! क्वात्मज्ञानम् ? क्वापवर्गः ? इत्यादि मन्दं मन्दं विहस्य सहसा दुष्टमेध इव प्रकटिताकाण्डदण्डकाशडम्बरवित्रासिताश्रममृगवर्गमुद्वाहयन् आकुल-यति, तदा जगज्जालमिन्द्रजालपण्डितविलसितमिति जानन्नप्याचार्यः यदि त-मुपेक्षते, तिरस्करोति, सद्यः सम्यक्साधनाप्रतिभासेऽपि यदि छलादिभिरेनं न शमयति; तदा तस्मिन् गते तत उत्थाय शिष्यगणा ब्रूयुः कष्टमस्थाने

९ ] पक्षे— nyāma-wit__kha
६ ] गि— nyāma-wit__kha
८ ] परः— nyāma-wit__kha
१२ ] सदसि— nyāma-wit__kha
१०८५.१४--१०८६.१६ ] सी— nyāma-wit__kha
१८ ] आ— nyāma-wit__kha
२० ] म— nyāma-wit__kha
२१ ] नितम्ब— nyāma-wit__kha
२२ ] शाम्यो— nyāma-wit__kha

१२ रे ] दौर्भाग्यवशादिति शेषः ॥
१७ योगेण ] स्फुटाटोपः—फटाटोपः ॥

क्लिष्टाः स्मः ॥ § 9499
II.602/KSV

योऽसावस्माकमाचार्यः प्रख्यातो न्यायवित्तमः ।
अद्य त्वागत्य सोऽन्येन पण्डितेन पराजितः ॥§ 9501

तच्छ्रुत्वा जन इतरोऽपि सत्पथास्था-
शैथिल्यात्सपदि तमेव माऽनुयासीत् ।
तन्नूनं परिभवभूमिकामसभ्यो
नेतव्यः सदसि स वावदूकपाशः ॥§ 9505

तद्विधानघटने निरर्गलं
जल्पमस्त्रमुपदिष्टवान् मुनिः ।
आनुषङ्गिकमपि प्रयोजनं
तस्य रागिजनतासु वर्णितम् ॥§ 9509

—इति जल्पपरीक्षा— § 9510

## वितण्डापरीक्षा

स प्रतिपक्षस्थापनाहीनो वितण्डा ॥ १-२-३ ॥ § 9511

स एव यथोक्तलक्षणकः जल्पः वितण्डा भवति । को विशेष इति चेत्—आह—प्रतिपक्षस्थापनाहीन इति । उत्तरपक्षवादी वैतण्डिकः । प्रथमवादी प्रथमसाध्यमानपक्षापेक्षया । तत्पक्षः हस्तिप्रतिहस्तिन्यायेन प्रतिपक्ष इत्युच्यते । तमसावभ्युपगच्छत्येव, न तत्र साधनमुपदिशति, परपक्षमेवाक्षिपन्नास्ते । तर्हि साधनाद्विना पक्षोऽपि सोऽस्य नास्त्ये वेति ॥ § 9512 II.603/KSV

## स्थापनापदप्रयोजनम्

प्रतिपक्षहीनो वितण्डेत्युच्यताम्, किं स्थापनाग्रहणेन ?—न—अभ्युपगममात्रेण तद्भावात् । तमनभ्युपगम्य प्रलपतः कस्तस्य शृणुयात् । औपचारिको वा परमतपराकरणरूप एवास्य पक्षः । तस्मिन् हि सति स्वपक्षो हि तस्य सिद्ध्येदिति । परमताक्षेपप्रवणप्रवृत्तेश्च बलात् द्वितीयपक्षवाद्येव वैत-

४ ] थस्य— nyāma-wit_kha
१६ ] दी— nyāma-wit_kha
१६ ] या— nyāma-wit_kha
१८ ] प— nyāma-wit_kha

१६ स ] वावदूकपाशः—नीचवावदूकः ॥
१९ नं ] प्रयोजनं—जयादि ॥
५ क्षः ] यथा खण्डनकारस्य, शून्यवादिनो माध्यमिकस्य वा ॥

ण्डिक इति । तदेवं पक्षोऽस्यास्तीति, साधनं तु नास्तीति सम्यक्सूत्रितं स प्रतिपक्षस्थापनाहीनो वितण्डा इति ॥ § 9513

इत्युदाहृतमिदं कथात्रयं
यत्परस्परविविक्तलक्षणम् ।
स्थूलमप्यनवलोक्य कथ्यते
वाद एक इति शाक्यशिष्यकैः ॥§ 9517

—इति वितण्डापरीक्षा— § 9518

## हेत्वाभासपरीक्षा

पक्षधर्मत्वादीनि पंच लक्षणानि हेतोरुक्तानि । तेषामेकैकापायात् पंच हेत्वाभासा भवन्तीति तान् दर्शयितुमाह— § 9519
II.604/KSV

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासाः ॥ २-२-४ ॥ § 9520

अत्र हेत्वाभासश्रुतिरेव निर्वचनसहिता सामान्यलक्षणं बोधयति— अहेतवः हेतुवदाभासन्त इति हेत्वाभासाः इति । लक्षणैकदेशयोगाच्च हेतुवदाभासनं, अहेतोरप्युपपद्यते । सकललक्षणापायेऽपि पंचमीनिर्देशादिः भ्रमहेतुरित्येके ॥ § 9521

सव्यभिचारादिपदपर्यन्तवर्तिनी तु सैव श्रुतिः विभागमवगमयति, प्रमाणश्रुतिवदित्युक्तम् । पक्षधर्मतादिलक्षणानां च क्रमनियमाभावात् साध्यसमविरुद्धसव्यभिचारातीतकालप्रकरणसमा हेत्वाभासा इति पाठो नाश्रितः ॥ § 9522

## हेत्वाभाससंख्याविमर्शः

ननु ! त्रय एव हेत्वाभासा इति शाक्याः—न—प्रत्यक्षागमबाधितस्य च हेतोः पूर्वं प्रदर्शितत्वात् ॥ § 9523

ननु ! एकस्यैव रूपद्वयवैकल्यात् कथं न षष्ठादयः तत्प्रभेदाः स्युः यथा अनित्यः शब्दः चाक्षुषत्वात् इति । एष हि पक्षे वृत्त्यभावादसिद्ध उच्यताम्, उत सामान्यादेः विपक्षादप्रच्युतः सव्यभिचारः, उत जात्यन्तर-

१८ हेत्वाभास ] श्रुतिः—शब्दः ॥
२३ च ] पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-अवाधितत्त्व-असत्प्रतिपक्षितत्वक्रमः ॥
१ य ] बाधसत्प्रतिपक्षौ विना त्रयः ॥
३ यः ] पक्षसत्त्वाद्येकैकवैकल्ये यथा एकैको हेत्वाभासः, तथा द्वयवैकल्ये अन्यः अतिरिक्तः कश्चित् षष्ठो हेत्वाभास इत्येवं त्रयादिवैकल्येऽपि अस्तु ॥

मेव ताभ्यामिति—नैतदेवम्-एकैकरूपापायनिमित्तभेदपंचकप्रतिपादने कृते द्वित्रिरूपापायात् न रूपान्तरमवतरति, किन्तु तेषामेव समावेशःस्यात् ॥ § 9524

II.605/KSV

अपि च प्रथमगृहीतान्यतमरूपवैकल्यलब्धैकहेत्वाभासरूपेऽस्मिन् किं रूपान्तरनिरूपणेनेत्यास्तामेतत् ॥ § 9525

## अप्रयोजकहेतोरसिद्धावन्तर्भावः

ननु ! अप्रयोजको नाम षष्ठो हेत्वाभासः समस्तीति न पुनरपि पंचत्वम्—न—तस्यान्यथासिद्धत्वेन असिद्ध एवान्तर्भावं वक्ष्यामः । अवान्तरभेदविवक्षायां तु हेत्वाभासानामियत्तानिश्चयः न शक्यक्रियः, न च सप्रयोजन इति पंचैव हेत्वाभासा इति सिद्धम् ॥ § 9526

## सव्यभिचारलक्षणम्

तेषां सव्यभिचारस्तावदुच्यते— § 9527

**अनैकान्तिकः सव्यभिचारः ॥ १-२-५ ॥** § 9528

व्यभिचारः एकत्र व्यवस्थाऽनियमः । तेन सह वर्तत इति सव्यभिचारः —विपक्षादप्रच्युत इत्यर्थः । एकस्मिन् अन्ते भवन् ऐकान्तिकः । तद्विपर्यायादनैकान्तिक इति स एवार्थः । एवमिह लक्ष्यलक्षणपदयोः यथाकाम मभ्युपगमः, न प्रत्यक्षादिवत् व्यवस्थया ॥ § 9529

सव्यभिचारपदे लक्ष्याभिधायिनि लक्षणवचनमनैकान्तिकपदम्, अनैकान्तिकपदे तु लक्ष्यवाचिनि सव्यभिचारपदं—लक्षणप्रतिपादकं प्रसिद्धाप्रसिद्धिविभागापेक्षया पिककोकिलवत् द्रष्टव्यम् । पिकः कोकिलः इत्युक्ते यस्य पिकशब्दार्थः प्रसिद्धः, स ततः कोकिलशब्दार्थमवभोत्स्यते । प्रसिद्धकोकिलशब्दार्थस्तु पिकशब्दार्थमिति ॥ § 9530

II.606/KSV

## अनैकान्तिकपदार्थः

७ ] ए— nyāma-wit__kha
१७ ] द्वा— nyāma-wit__kha
१८ ] द्ध— nyāma-wit__kha

७ मावेशःस्यात् ] दुष्टसंकरेऽपि दोषासंकर इति न्यायात् ॥
९ रूपेऽस्मिन् ] तावतैव वादिनो निग्रहादिति भावः ॥

आह, भवत्वेवम् ! इदं तु चिन्त्यताम् । अनैकान्तिकः इति किमयं पर्युदासः, प्रसज्यप्रतिषेधो वा ? किंचातः ? पर्युदासपक्षे स्वपक्षनियतादैकान्तिकादन्यः यः, स एवानैकान्तिक इति स एवैको हेत्वाभासः स्यात् । प्रसज्यप्रतिषेधे त्वैकान्तिकाभावस्य निवृत्तिरूपस्य हेत्वाभासता भवेत्, न लक्ष्यत्वेनाभिमतस्य विपक्षवृत्तेः हेत्वन्तरस्य प्रमेयत्वादेरिति— उच्यते—प्रश्न एवायमनुपपन्नः । संशयानो हिपरं पृच्छति । संशयश्चोभयथा दर्शनाद्भवति । न च नामपद संबद्धस्य नञः द्वयी वृत्तिर्दृष्टा । अश्राद्धभोजी इत्यादौ हि भुजिना नञ् संबध्यते, श्राद्ध न भुङ्क्ते इति; न तु नाम्ना श्राद्धेनेति ॥
§ 9531

## नामपदसंबद्धनञः पर्युदास एवार्थः

आख्यातेनापि प्रयोज्यमानः क्वचित् प्रकरणसामर्थ्यानुरोधात् प्रत्ययार्थसंबन्धमवधूय धात्वर्थमेव केवलमालिङ्गन् पर्युदासवृत्तिर्भवति —नेक्षेतोद्यन्तमादित्यम् इति । न तु नाम्ना संबध्यमानः क्वचिदपि पर्युदासवृत्तिमुल्लङ्घ्य प्रसज्यप्रतिषेधमात्रपरतामबलम्बमानो दृश्यते । अब्राह्मणादौ सर्वत्र तदन्यावगतिदर्शनात् इति कुतस्त्यः संशयः ॥ § 9532

## पर्युदासपक्षोक्तदोषपरिहारः

अथवा किमनयाऽवान्तरचिन्तया ! यथा पृष्टं कृत एवोत्तरमुच्यते । एकस्मिन्ननित्यपक्षे नित्यपक्षे वा नियतः एकान्तिकः एकपक्षवृत्तिरुच्यते । ततोऽन्यः पक्षद्वयवृत्तिः अनेकान्तिको भवति । एवं न सर्वे हेत्वाभासाः पक्षद्वयवृत्तय इति न संख्याहानिः अतः पर्युदासपक्षे तावन्न दोषः ॥ § 9533
II.607/KSV

## प्रतिपेधार्थकत्वेऽपि न दोषः

प्रसज्यप्रतिषेधेऽपि—ऐकान्तिको न भवति यः, स एवाहेतुरिति न निवृत्तिमात्रपरत्वम् । अश्राद्धभोजीति कृता पुरुष उच्यते, न श्राद्धभोजनाभावमात्रम् । एवमिहापि तद्धितेनैकान्तनियतताप्रतिषेधविशिष्टः हेतुरेवोच्यते, नाभावमात्रम्—इत्येवमुभयथाऽपि न दोषः ॥ § 9534

तस्योदाहरणं—नित्यः शब्दः प्रमेयत्वात्—इति । एष हि नित्यानित्यपक्षयोरन्यतरस्मिन्नपि न नियत इति विपक्षवृत्तित्वादनैकान्तिक उक्तो भवति ॥ § 9535

---

१० ] णा— nyāma-wit_kha
१२ ] न प— nyāma-wit_ca
१३ ] ता— nyāma-wit_kha
१६ ] प— nyāma-wit_kha

---

२० तोऽन्यः ] पक्षद्वयं—सपक्षविपक्षौ ॥
२ भोजीति ] कृता—कृत्प्रत्ययेन ॥

## परोक्तानैकान्तिकविभागविमर्शः

ननु ! षड्प्रकारः परैरनैकान्तिक इष्यते । सपक्षैकदेशवृत्तिः विपक्ष व्यापी, विपक्षैकदेशवृत्तिः सपक्षव्यापी, उभयपक्षैकदेशवृत्तिः, उभयपक्षव्यापीति साधारणः चतुष्प्रकारः । असाधारणः विरुद्धाव्यभिचारी चेति । स कथमिह न निर्दिश्यते—उच्यते—सपक्षव्याप्त्यादिभेददर्शनं तावत् अप्रयोजनकम्, अशक्यं च; हेत्वाभासानामवान्तरभेदानन्त्यात् । विपक्षाद्व्यावृत्तिर्यस्य नास्ति, स सव्यभिचारः—इत्यन्यतमहेतुरूपरहितत्वमनैकान्तिकलक्षणमिह विवक्षितम् । तच्चोक्तमेव । किमवान्तरभेदपरिगणनेन ॥ § 9536

असाधारणविरुद्धाव्यभिचारिणौ तु न संस्त एव हेत्वाभासाविति न व्याख्यायेते ॥ § 9537

१ II.608/KSV

## असाधारणानैकन्तिको नातिरिक्तः

ननु ! साधारणवदसाधारणस्यापि गन्धवत्त्वादेः संशयहेतुत्वदर्शनात् कथमसंभवः ? अनेकधर्मोपपत्तेश्च संशयः भवद्भिरपि व्याख्यात एव—नैतदेवम्—उभयविशेषसहचरितधर्मदर्शनं हि तदनुस्मरणयुक्तेन संशयमुपजनयति । असाधारणस्तु असाधारणत्वादेव न तत्सहचरः कदाचिदुपलब्ध इति कथं संशयहेतुः ? § 9538

कथं तर्ह्यनेकधर्नोपपत्तेरिति वर्ण्यते ? वर्णितमेतत् । वस्तुनो हि विशेषधर्मः कश्चिदसाधारणः केनापि धर्मान्तरेण सहचरितो दृष्टः, सोऽय शब्दे विभामगजत्वाख्यो धर्मः केनचिद्धर्मान्तरेण द्रव्यत्वेन गुणत्वेन वा सहचरितो भवेदितीत्थमनेकधर्मोपपत्तेः संशयो वर्णितः ॥ § 9539

तदिहापि गन्धवत्त्वमसाधारणमेव यदि संशयहेतुतया वर्ण्यते, तर्हि साधारणात् वस्तुधर्मत्वादेव संशयो भवेत्, नासाधारणात् गन्धवत्त्वात् । न हि तन्नित्यानित्ययोरन्यतरेणापि सहचरितमुपलब्धम् । वस्तुधर्मस्तु धर्मान्तरानुयायी दृश्यत इति वस्तुधर्मत्वमेव तत्कारणम् । अतः नित्या भूः, गन्धवत्त्वात् इत्यसाधारणानैकान्तिकः न वक्तव्यः ॥ § 9540

## विरुद्धाव्यभिचारोऽपि नातिरिक्तः

१. व्यतिरेकः—विपक्षावृत्तित्वम् ॥

२ ] वि— nyāma-wit__ca
१२ ] प्राय— nyāma-wit__kha
१९ ] व— nyāma-wit__ca
२३ ] व— nyāma-wit__kha

विरुद्धाव्यभिचर्यपि न वाच्य एव, एकत्र धर्मिणि परस्परविरुद्धद्वयप्रयोजकहेतुद्वयोपनिपातस्यानुपपत्तेः ॥ § 9541

ननु ! प्रत्यक्षो वायुः, स्पर्शवत्त्वात्, घटवत् अप्रत्यक्षो वायुः, अरूपत्वात्, आकाशवत् इत्यस्ति हेतुद्वयसन्निपातः । त एव च विरुद्धाव्यभिचार्युच्यत इति—अत्र तावत् एतदेव वक्तव्यम्—कोऽयमपूर्वः प्रामाणिकव्यवहारः ईदृशः, यत् अनुमानेन प्रत्यक्षत्वमप्रत्यक्षत्वं वा साध्यत इति । इन्द्रिय- II.609/KSV
जप्रमितिविषयो ह्यर्थः प्रत्यक्षो भवति । स एष वायुः यदीन्द्रियजे प्रत्यये प्रतिभात्येव, किमनुमानेन । अथ तत्र न प्रतिभाति तथापि किमनुमानेनेति ॥ § 9542

## विरुद्धाव्यभिचारिणोऽप्रयोजकत्वम्

किंच अनयोरन्यतरो हेतुः अवश्यमप्रयोजकः, वस्तुनः द्वैरूप्यानुपपत्तेः । हेतौ च प्रयुक्ते तद्गुणदोषपरीक्षणमेव प्रतिवादी विधत्ताम्, कोऽवसरः प्रतिहेतूपन्यासस्य । विडम्बनार्थस्तदुपन्यास इति चेत्—न—विडम्बनोपन्यासस्य जात्युत्तरप्रकारत्वात् । इह च हेत्वाभासाः वास्तवा एवानुमानदोषाः । एकत्र प्रयोजकवृद्धहेतुद्वयसमावेशासंभवस्योक्तत्वात् । कथं तर्हि प्रकरणसम इति चेत्, तत्रैव विशेषं वक्ष्यामः ॥ § 9543

## विरुद्धाव्यभिचारिणः विप्रतिपत्तिरूपत्वं वा

अथ हेतुप्रयोगरहितोभयवादिपरिगृहीतपक्षप्रतिपक्षोपन्यासमात्रं विरुद्धाव्यभिचारिणो रूपमुच्यते, सोऽयं विप्रतिपत्तेः सशयो भवति, न हेत्वाभासादस्मादिति ॥ § 9544

अपि च, यदि संशयजनकत्वं अनैकान्तिकलक्षणमुच्येत—काममसाधारणस्य वा विरुद्धाव्यभिचारिणो वा यथा तथा संशयहेतुतामधिरोप्य कथ्यतामनैकान्तिकता, न तु संशयजनकत्वं तल्लक्षणम्, इन्द्रिया देरपि तज्जनकत्वेन तथाभावप्रसक्तेः । अपि तु पक्षद्वयवृत्तित्वमनैकान्ति कलक्षणम्
II.610/KSV । स तु पक्षद्वयवृत्तित्वात् संशयमपि जनयतीति वस्तुस्वभावो ऽयम् । अतः असाधारणविरुद्धाव्यभिचारिणोः कथंचित्संशयहेतुत्वेऽपि पक्षद्वयवृत्त्यभावत् नानैकान्तिकवर्गेऽन्तर्भावः । क्व तर्हि तावन्तर्भविष्यतः ? जात्युत्तराणामानन्त्यात् तेष्विति वक्ष्यामः ॥ § 9545

---

८ ] कि— nyāma-wit_kha
११ ] सं— nyāma-wit_kha
११ ] नं— nyāma-wit_kha
२१ ] तन्य— nyāma-wit_ca

---

१६ हेत्वाभासाः ]
वास्तवाः—वस्तुगताः,—हेतुगताः ॥
१९ न्यास ] प्रतिज्ञामात्रमिति यावत् ।
प्रकरणसमे तु हेतुप्रयोग आवश्यकः ॥

तस्मादसाधारणसंज्ञकस्य
हेतोर्विरुद्धाव्यभिचारिणो वा ।
विपक्षवृत्तित्वमतर्कयन्तः
वदन्त्यनैकान्तिकतां न तद्ज्ञाः ॥§ 9549

## विरुद्धलक्षणम्

**सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ १-२-६ ॥** § 9550

सपक्षविपक्षयोः वृत्त्यवृत्ती हेतोर्लक्षणम् । ते यस्य विपर्यस्ते दृश्येते, यः सपक्षे न वर्तते, विपक्षे च वर्तते, सः साध्यविपर्ययसाधनात् विरुद्धो भवति; सोऽयमुच्यते—सिद्धान्तमभ्युपेत्येति ॥ § 9551

सिद्धान्तशब्दः यद्यपि धर्मविशिष्टे धर्मिणि व्याख्यातः, अयमित्थमित्यभ्युपगमविषयीकृतोऽर्थः सिद्धान्त इति—तथापीह तदेकदेशसाध्यधर्मविषयो लक्ष्यते । तं सिद्धान्तं साध्यधर्ममभ्युपगम्य यो विरुणद्धि— व्याहन्ति—तद्विपर्ययं साधयति स विरुद्ध इत्यर्थः ॥ § 9552

## सूत्रार्थवर्णनम्

ननु समानकर्तृकयोः क्त्वाप्रत्ययः स्मर्यते । इह च हेतोरचेतनस्याभ्युपगमेन
II.611/KSV कर्तृत्वासंभवात् पुरुषस्तत्कर्ता भवेत् । सिद्धान्तं च विरुणद्धि हेतुः इति भिन्नककतृत्वमुच्यते—उच्यते समानकर्तृकत्वसिद्धये हेतोरेवाभ्युपगमे कर्तृत्वमुपचाराद्वर्णयिष्यते । हेतुबलात् पुरुषेणाभ्युपगमः क्रियमाणः हेतुनव कृतो भवति । एवं च स एवाभ्युपगन्ता, स एव विरुणद्धीति न भिन्नकर्तृकत्वम् ॥ § 9553

ननु ! उपचारपरिग्रहश्चेदभिमतः, तदत्र त्रितयं वक्तव्यम्—मुख्येऽर्थे प्रमाणबाधः, निमित्तम्, प्रयोजनं चेति । मुख्येऽर्थे प्रमाणबाधः, उक्त एव हेतोरचेतनत्वम् । निमित्तमप्यस्ति हेतुसाधनको ह्यभ्युपगम इति । प्रयोजनं तु विशेषविरुद्धानां हेत्वाभासत्वनिवारणम् ॥ § 9554

सिद्धान्तशब्दस्यापि समुदायवाचिनः यदेकदेशेऽवस्थापनं, तस्यापि विशेषविरुद्धव्यवच्छेद एव फलम् ॥ § 9555

---

९ ] ब्दोऽपि यदि— nyāma-wit__kha
११ ] रति— nyāma-wit__ca
१५ ] ते— nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ca
२० ] साध्ये— nyāma-wit__kha

---

१६ ते ] वस्तुस्वरूपदृष्टया अन्तत्वं सिद्धं विवाक्षितमिति भावः ॥
१८ हेतोर ] वस्तुस्वरूपदृष्टया अन्तत्वं सिद्धं विवाक्षितमिति भावः ॥
३ म ] हेतुबलाद्धि पुरुषेणाभ्यपगमः इत्यनुपदमेवोक्तम् ॥
४ तु ] विशेषविरुद्धाः—अनुपदं प्रदर्श्यन्ते ॥

## विशेषविरुद्धस्य न हेत्वाभासता

विशेषविरुद्धानां हि हेत्वाभासत्वाभ्युपगमे सर्वानुमानोच्छेदप्रसङ्गः न हि तथाविधो हेतुरिह जगति कश्चिदवाप्यते, यः साध्यसिद्धयेऽभिधीयमानः धर्मस्य वा धर्मिणो वा विशेषं न कंचन बाधते । तथाहि— अनित्यः शब्दः, कृतकत्वात् इति सकलतार्किकगृहप्रसिद्ध एष हेतुः अनित्यतां साधयन्नपि यद्यत्कृतकम्, तत्तदश्रावणं दृष्टम् । यो यः कृतकः स स व्योमविशेषगुणो न भवति इति धर्मिणो विशेषं बाधत एवेत्यहेतुः स्यात् । न चैवं युक्तमिति न विशेषविरुद्धो नाम हेत्वाभासः अभ्युपगन्तव्यः; किन्तु साध्यस्वरूपविपर्ययसाधन एवेति ॥ § 9556

II.612/KSV

## परोक्तविरुद्धविभागस्यायुक्तता

अत एव यथा तीर्थान्तरे वर्ण्यते—विरुद्धश्चतुष्प्रकारः—*धर्मस्वरूपविपरीतसाधनः, धर्मिस्वरूपविपरीतसाधनः, धर्मविशेषविपरीतसाधनः, धर्मिविशेषविपरीतसाधन इति । तथेह नेष्यते, अतिप्रसङ्गस्य दर्शितत्वात् इति । अस्योदाहरणं—नित्यः शब्दः, कृतकत्वात् इत्यादि ॥ § 9557

## विरुद्धस्य व्यभिचारिवैलक्षण्यम्

ननु ! एकैकलक्षणापायात् पंच हेत्वाभासा इत्युक्तम् । अस्य च हेतोरुभे लक्षणे न स्तः । यथा ह्यस्य सपक्षे वृत्तिर्नास्ति, तथा विपक्षादपि व्यावत्तिः । यदि हि सपक्षादिव विपक्षादपि व्यावृत्त एष भवेत् गन्धवत्त्ववदसाधारण एव स्यादिति—सत्यमेवम्—विपक्षादव्यावृत्तिः व्यभिचारं प्रति प्रयोजकतां प्रतिपद्यते । प्रतिपक्षगामी हि व्यभिचरित इत्युच्यते । सपक्षे वृत्तिविच्छेदस्तु विपर्ययसिद्धौ प्रयोजक इति सत्यामपि विपक्षवृत्तौ सपक्षवृत्तिविच्छेदनिबन्धनमेवास्य विरुद्धत्वमुच्यते । विपक्षादप्रच्युतः स्वसाध्यमेव न साधयेत् । सपक्षे त्ववर्तमानोऽसौ विपरीतमपि साधयतीति तल्लक्षणापायकृतमेवास्य विरुद्धत्वमाचक्षत इत्यलं सूक्ष्मेक्षिकया । तदिदमुक्तं सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः इति ॥ § 9558

## अपसिद्धान्तादीनां विरुद्धरूपत्वपक्षः

४ ] व— nyāma-wit_kha
१५ ] व— nyāma-wit_kha
२१ ] त्थ— nyāma-wit_kha

९ वा] कंचन विशेषम्—इत्यन्वयः ॥
१५ *] धर्म—साध्यः । धर्मी—पक्षः ॥
१८ इत्यादि] द्वितीयस्य शब्दः । गुणः, चाक्षुषत्वादित्यादि ॥
५ त] व्यभिचारी तु न सपक्षान्नियमेन व्यावृत्तः । साधारणः खलु सः । एवं च विरुद्धप्रयोगे अज्ञानातिशयः सूच्यते ॥

अन्ये त्वन्यथा व्याचक्षते—किल साध्यधर्मविपर्ययसाधकवत् अपसिद्धान्त-
II.613/KSV प्रतिज्ञाविरोधादयोऽपि सिद्धान्तविरोधिनः संगृहीतुं युक्ता एव । ते चैवं व्याख्यायमाने न संगृहीताः स्युः । क्त्वाप्रत्ययसिद्धान्तशब्दौ च न समन्वितौ स्याताम् । तस्मादभ्युपगतसिद्धान्तविरोधी इति सूत्रार्थे वर्णिते, अभ्युपगतं सिद्धान्तं यो विरुणद्धि, स विरुद्धः । तत्कालोपात्त प्रतिज्ञाविषयीकृतं वाऽवसरान्तरव्यवस्थापितं वेत्येतत्संग्रहश्च कृतो भविष्यति । सिद्धान्तशब्दश्च न सङ्कोचितो भविष्यति । क्त्वाप्रत्ययस्तु असङ्गतत्वादुपेक्ष्यत एव, भिन्नकर्तृकत्वात् आनन्तर्यस्य गम्यमानस्य चानुपयुक्तत्वादिति ॥ § 9559

## एतत्पक्षस्य भाष्यानुगुणत्वम्

तथा च भाष्यकारेण अविशेषेण पूर्वाभ्युपगतसिद्धान्तविरुद्धमेवोदाहरणमुक्तं सोऽयं विकारो व्यक्तेरपैति, नित्यत्वप्रतिषेधात् । अपेतोऽप्यस्ति विनाशप्रतिषेधात् इति । अत्र हि प्रतिषिद्धनित्यधर्मत्वादित्ययं हेतुः व्यक्तेरपेतोऽपि विकारोऽप्यस्तीत्यमुं सिद्धान्तं विरुणदि अनेन वा विरुध्यत इति ॥ § 9560

## उक्तपक्षेऽस्वारस्यम्

एतत्त्वहृदयङ्गममिव व्याख्यानम् । अपसिद्धान्तप्रतिज्ञाविरोधादेः निग्रहस्थानसूत्रे हेत्वाभासेभ्यः पृथगुपदेशात् किमिह तत्सङ्ग्रहेण । प्रत्युत, सङ्ग्रह एव दोषः । यो हि मीमांसकोऽहम् इत्यभ्युपगम्य अनित्यः शब्दः, कृतकत्वात्, घटवत् इति ब्रूयात्, न तस्यायं हेतुः विरुद्धो भवेत्, अपि तु अपसिद्धान्तनैवासौ निगृह्येत । तस्मात् साध्यविपर्ययसाधन एव विरुद्ध II.614/KSV
उच्यते, न तु पूर्वाभ्युपगतस्वसिद्धान्तविरुद्धः ॥ § 9561

## उक्तपक्षस्य सूत्राननुगुणत्वम्

न च निरभिप्राय एव सूत्रकृता क्त्वानिर्देशः कृतः, किन्तु ततः प्रतीयमानमानन्तर्यमप्यपेक्षमाणेन । यो हि सिद्धान्तमभ्युपेत्य प्रतिज्ञाय तत्सिध्यर्थतयोपादीयमानः तमेव विरुणद्धि, स विरुद्धो हेत्वाभास इति प्राक्तनमेव व्याख्यानमनवद्यम् ॥ § 9562

६ ] वं त— nyāma-wit_ca
८ ] ज्यमान— nyāma-wit_ca
९ ] ण— nyāma-wit_kha
९ ] न्तानुगुण— nyāma-wit_kha
११ ] षेधस्या— nyāma-wit_ca
१८ ] न्तात्— nyāma-wit_kha

१६ तिषेधात्] नित्यत्वप्रतिषेधे हि विकार आवश्यकः । अतः परस्परविरुद्धं तत् ॥

२ विरुद्धः] भाष्यं तु एतद्विषये तटस्थमिति भावः ॥

अतः प्रतिज्ञाविपरीतसाधनात्
विरुद्धतामेति न हेतुरन्यथा ।
विशेषबाधादिनिबन्धनं पुनः
चहुप्रकारत्वमसुष्य नेष्यते ॥§ 9566

## सप्रतिपक्षलक्षणम्

यस्मात् प्रकरणचिन्ता स निर्णयार्थमुपदिष्टः प्रकरणसमः ॥ १-२-७ ॥ § 9567

एकैकलक्षणापायनिमित्तहेत्वाभासपंचकप्रतिज्ञानात्, असत्प्रतिपक्षत्वलक्षणवैकल्यात् किल प्रकरणसमो नाम हेत्वाभासो वक्तव्यः । स च न संभवति, सप्रतिपक्षस्य हेतोरभावात् । अद्यात्मकत्वाद्धि वस्तूनामेकत्र परस्परविरोधिधर्मद्वयप्रयोजकहेतुसमावेशो नास्तीत्यसकृदुक्तम् । अतं एव II.615/KSV
हि विरुद्धाव्यभिचारी निरस्तः । अनुमानविरुद्धमनुमानं च नेष्यत एव । तत्कुतः सप्रतिपक्षो हेत्वाभासः ? अतश्च लक्ष्याभावात् कस्येदं लक्षणमित्यत्राह—यस्मादित्यादि ॥ § 9568

## सूत्रव्याख्यानम्

विचार्यमाणौ प्रागुक्तलक्षणकौ पक्षपतिपक्षौ प्रकरणम् । तस्य चिन्ता संशयात् प्रभृत्यानिर्णयात् यद्यपि भवति, तथापीह विमर्शात्मिकैव गृह्यते । सा यस्मात् भवति ॥ § 9569

कस्माच्च सा भवति ? विशेषानुपलम्भात् । स एव विशेषानुपलम्भः यदि निर्णयार्थमुपदिश्यते, तत्प्रकरणमनतिवर्तमानत्वात् प्रकरणसमो भवति । नित्यः शब्दः, अनित्यधर्मानुपलब्धेः, आकाशवत् । अनित्यः शब्दः, नित्यधर्मानुपलब्धेः, घटवत्—इति । सोऽयं सप्रतिपक्षो हेतुरिह लक्ष्यो विद्यते ॥ § 9570

## विरुद्धहेतुद्वयासमावेशेऽपि तथा प्रयोगः

---

१ ] त— nyāma-wit__ca nyāma-wit__kha
१२--१३ ] त्याशङ्क्या—

---

१७ एव ] उभयोस्तुल्यबलत्वात् । अन्यतरस्याधिकबलत्वे तु, यत्प्रयुक्ता तस्याधिकबलताः तेनैवानुमानबाधो युक्तः ॥

न च द्रव्यात्मकानि वस्तूनि, प्रमातारस्तु रूपमेषां नियतमवधारयितु मशक्नुवन्त एवं भ्राम्यन्तीति ॥ § 9571

तथा हि—एकस्तद्विशेषानुपलब्धेः पक्षधर्मान्वयव्यतिरेकात्पश्यंस्तथेति II.616/KSV साध्यं बुध्येत, तथैव परं प्रत्याययेदिति । इतरोऽपि द्वितीय विशेषानुपलब्धेः साधनतां बुद्ध्वा प्रत्यवस्थानं च करोतीति स्वप्रतिपत्तिसाक्षिक एवैष प्रकरणसमो हेत्वाभासः ॥ § 9572

## सप्रतिपक्षस्य इतरवैलक्षण्यम्

तथा च न तावदयं सम्यग्घेतुः, प्रतिपक्षोपहतत्वेन स्वसाध्योपस्थानसामर्थ्यशून्यत्वात् । हेत्वाभासोऽपि भवन् न तावदसिद्धः, साध्ये धर्मिणि शब्देऽनुपलभ्यमाननित्यधर्मत्वस्य हेतोः सद्भावात् । नापि विरुद्धः, साध्य, विपर्ययसाधननिमित्तभूतसपक्षवृत्त्यवियोगानुपपत्तेः । नाप्यनैकान्तिकःपक्षद्वयसाधारणत्वानवधारणात् । संशयजनकत्वं तु न तस्य लक्षणमित्युक्तमेव ॥ § 9573

## सप्रतिपक्षस्यानतिरिक्तत्वाक्षेपः

ननु ! एकस्मिन् पक्षे नियतः ऐकान्तिक, तद्विपर्ययादनैकातिकः । स चायं नित्यानित्यपक्षयोरन्यतरत्रापि न नियत इति अनैकान्तिक एव स्यात् । अपि चाहुः— § 9574

अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञानसंशयैः § 9575

श्लो. वा. १-१-२ श्लो ५४ § 9576

इति । तत्र यथा इन्दियादेरबोधकत्वाद्वा संशयविपर्ययस्वभावावभाससमुत्पादनदौरात्म्याद्वा भवत्यप्रामाण्यव्यवहारः, एवमनुमानमपि तेनैव वर्त्मना प्रमाणाभासतामबलम्बते ॥ § 9577

## हेत्वाभासत्रैविध्याक्षेपः

३ ] को वि— nyāma-wit_kha
३ ] वय— nyāma-wit_kha
५ ] स— nyāma-wit_kha
५ ] क्ष— nyāma-wit_kha
१४ ] एक ए— nyāma-wit_ca
१७ ] तथे— nyāma-wit_kha

१० न्तीति ] नन्वेवं सद्धेतावपि सप्रतिपक्षप्रसङ्ग इति चेत्—सत्यम्—तत्र भ्रममूलकत्वोद्धा वनेनैव वादिनो जयः ॥

तत्रासिद्धस्तावदलभमानो धर्मिणि वृत्तिं तत्र साध्यधर्मधियमाधातु मन-धिकृत इत्यज्ञानफलत्वादप्रामाण्यफलमनुभवति ॥ § 9578

II.617/KSV

विरुद्धस्तु विपर्ययसाधन इति भवन्त एव प्रतिपन्नाः ॥ § 9579

संशयजनकस्त्वनैकान्तिको भवितुमर्हति । न तु पारिभाषिकविपक्ष वृत्तित्वमेव तस्य लक्षणमुचितम् । उभयमपि चान्यतरपक्षनियमविरहितत-नुरिति किमिति न भवति विमर्शमुपदधदनैकान्तिक इति त्रय एव हेत्वाभासाः ॥ § 9580

## सप्रतिपक्षस्यातिरिक्तत्वसाधनम्

उच्यते—न फलनियमेन लक्षणनियमः कर्तुं शक्यते । यद्यपि द्विविधं त्रिविधं भवत्यप्रमाणफलम्, तथापि न त्रिलक्षणके लिङ्गेऽविनाभावः प-रिसमाप्यते,* अपि तु पंचलक्षणक इति प्रसाधितोऽयमर्थः । तद्वैकल्याच्च हेत्वाभासानामपि पंचत्वमेव । फलं तु द्विविधमस्तु, त्रिविधं वा । न ह्यप्रतिप-त्तिजनकं किंचिल्लिङ्गमुपलभामहे । न चाप्रतिपत्तिः प्रयत्नजन्या, प्रागभावस्य निसर्गसिद्धत्वात्—इत्यलमवान्तरचिन्तनेन ॥ § 9581

## सप्रतिपक्षस्यानेकान्तिकवैलक्षण्यम्

न फलापेक्षः लिङ्गलक्षणनियमः । तत्र यथा पक्षधर्मरहितत्वमसिद्धलक्ष-णम्, एवं व्यतिरेकवैकल्यं अनैकान्तिकलक्षणम् । एष च हेतुः पक्षधर्मान्व-यव्यतिरेकाणामन्यतमेनापि रूपेण न विकल इति कथमनै कान्तिकतां प्रतिपद्येत । व्यस्ततायां हि सर्वाण्येतानि सन्ति लक्षणानि । समस्तस्तु नोपन्यस्त एव हेतुत्वेन नित्यानित्यधर्मानुपलब्धेरिति ॥ § 9582

## सप्रतिपक्षस्य संशयजनकत्वम्

ननु ! यद्यस्य पक्षधर्मान्वयव्यतिरेका निरपवादाः सन्ति, कथं तर्हि न
II.618/KSV हेतुरेवायम् । इतरस्यपि पक्षधर्मान्वयव्यतिरेकाणां निरपवादाना मसंभ-वात् सोऽपि न कथं हेतुः ? अस्त्विति चेत्—न—वस्तुनः द्वैरूप्यानुपपत्तेः । एवमिमौ हेतू पक्षद्वयेऽपि बुद्धिं जनयन्तौ संशयमावहतः, नानैकान्तिकवत् विपक्षवृत्तित्वेनेति हेत्वाभासान्तरत्वम् ॥ § 9583

एवंविधस्य चास्य प्रकरणसमस्य विरुद्धाव्यभिचारीति नाम यदि क्रियते—तदपि भवतु । न पुनरनैकान्तिकप्रभेदतामवलम्बते, तल्लक्षणासंस्पर्शात् । उभयप्रतीतिजनकौ हीमौ हेतू भवतः, नोभयपक्षवृत्तीति ॥ § 9584

१४--१५ ] को वि— nyāma-wit_kha
१७ ] वप— nyāma-wit_kha
१७ ] स— nyāma-wit_kha

१४ *] तदा हि हेत्वाभासानामैक्यमपि स्यात्, विजयरूपैककार्यकारित्वात् ॥

### सप्रतिपक्षस्य बाधाद्वैलक्षण्यम्

नाप्ययं कालात्ययापदिष्टः, प्रत्यक्षागमयोरन्यतरस्यापि बाधकस्यानु पलम्भात् । अनुमानं तु नानुमानस्य बाधकं भवितुं क्षममित्युक्तम् । न चेतरेतरवाद्यपेक्षयाऽनयोरसिद्धत्वमभिधेयम्, संशयजनकत्वेऽनुभवसिद्धे सति विशेषानुपलब्धेरप्रत्याख्येयत्वात् ॥ § 9585

### सप्रतिपक्षस्थले परस्परप्रतिघातासंभवः

ननु ! निश्चितस्य साधनप्रयोगाधिकारात् कथंचित्तावत् साधनं प्रयुंजीत । निश्चितत्वे च तद्धर्मानुपलब्ध्योः परस्परमसिद्धत्वं स्थितमेव—नैतदेवम्—अन्यतरधर्मानुपलब्धेरेव पक्षधर्मत्वान्वयव्यतिरेकात् पश्यन्नसौ निश्चिततां प्राप्तः, न द्वितीयधर्मानुपलब्धेः असिद्धतां बुध्यमानः । अत एव भ्रान्तिमूल एष हेत्वाभासः । द्वितीयधर्मानुपलब्धिसिद्धत्वनिश्चये तु सम्यग्घेतुरेव स्यात् । तदसिद्धत्वानवधारणेऽप्यसौ स्वस्य हेतोस्त्रैरूप्यदर्शनात् निश्चितमतिर्भूत्वा
II.619/KSV साधनं प्रयुंजान इतरेण तथैव निश्चितमतिना प्रतिप्रयोगे कृते, तस्यापि त्रैरूप्यमुपलभमानः संशयमधि गच्छतीत्यलं प्रसङ्गेन ॥ § 9586

तदेवं असिद्धादिलक्षणवैपरीत्यात् प्रतीत्यनुगुणः प्रकरणसमो नामासद्धो हेत्वाभासः ॥ § 9587

### सप्रतिपक्षविषये पक्षान्तरम्

अपरे पुनः उदाहरणान्तरमस्य व्याहरन्ति—नित्यः शब्दः, पक्षसपक्ष योरन्यतरत्वात्, आकाशवत् । अनित्यः शब्दः, पक्षसपक्षयोरन्यतरत्वादेव, घटवदिति ॥ § 9588

ननु ! पक्षसपक्षयोरन्यतरः पक्षो वा स्यात्, सपक्षो वा स्यात्, न तृतीयः । न हि मित्रावरुपयोरन्यतरः सोमो भवतुमर्हति । तत्र पक्षेन्यतर शब्दवाच्येऽनन्वयः । न हि शब्दाख्यः पक्षः धर्मी धर्म्यन्तरे वर्तते । सपक्षे त्वन्यतमाभिधेये पक्षधर्मता नास्ति । न ह्याकाशादिः सपक्षः शब्दाख्ये धर्मिणि वर्तते ॥ § 9589

### अन्यतरत्वं न प्रत्येकमात्रम्

---

५ ] कथं चित्तावान्— nyāma-wit__kha

७ ] र्मां— nyāma-wit__kha

८--९ ] ल— nyāma-wit__kha

---

१४ च ] नित्यधर्मानुपलब्ध्यनित्यधर्मानुपलब्ध्योरित्यर्थः ॥

उच्यते—न पक्षत्वादिति हेतुः प्रयुक्तः, सपक्षत्वादिति वा; येनैवं स्यात्; पक्षसपक्षयोरन्यतरत्वादिति । तच्च द्वयोरपि किमपि साधारणं रूपम् । न हि वरुणो यष्टव्यः(?') इति यादृशी बुद्धिः, तादृश्येव मित्रावरुणयोरन्यतरो यष्टव्यः इति । विशेषनिष्ठतायां तु बलादापाद्यमानायां सकलानुमानोच्छेदः । न चान्यतरत्वं शब्दमात्रारोपितं रूपमवास्तवमिति वदितुमुचितं अर्थासंस्पर्शितायाः प्रतिक्षिप्तत्वात् ॥ § 9590

II.620/KSV

अन्यतरत्वादित्यसिद्धो हेतुरिति चेत्, किल पक्ष एवायं, न पक्षसपक्षयोरन्यतर इति—तदयुक्तं—यत एवायं पक्षः, तत एवायं पक्षसपक्षयोरन्यतरः । न ह्यपक्षः पक्षसपक्षयोरन्यतरः स्यात् । न ह्यवरुणो मित्रावरुणयोरन्यतर इत्युक्तमेव ॥ § 9591

पक्षोऽपि च भवन्नेषः न पक्षत्वादित्यनेन रूपेण—हेतूक्रियते, किन्तु अन्यतरत्वादिति । इत्थं च हेतूकरणे नैकोऽपि दोष इति ॥ § 9592

## सप्रतिपक्षोदाहरणान्तरम्

अपरमुदाहरणम्—*सन् सर्वज्ञः, इतरतद्विपरीतविनिर्मुक्तत्वात् घटवत् असन् सर्वज्ञः, इतरतद्विपरीतविनिर्मुक्तत्वात्, खरविषाणवत् इति अत्राप्याक्षेपप्रतिसमाधानप्रकारः पूर्ववदनुसरणीयः ॥ § 9593

धर्म्यसिद्धतादि च यत्नतः परिचिन्तनीयम् ॥ § 9594

एवंजातीयकं तूदाहरणं नानुमोदन्ते मतिमन्तः । यत्र हि हेतुना स्वयमर्थं सम्यगसम्यग्वाऽनुमाय प्रमाता परप्रत्यायनाय तमेव हेतुं प्रयुंजीत, स प्रयुज्यमानः वस्तुबलप्रवृत्ततया हेतूभवति, हेत्वाभासीभवति वा ॥ § 9595

## उक्तानुमानयोः अनुदाहरणत्वम्

तथा हि—आरोहपरिणाहवति पुरोऽवऽस्थिते धर्मिणि स्थाणुगतविशेषानुपलम्भात् एकस्य पुरुष इति भवति प्रतीतिः, इतरस्य तु पुरुषगत
II.621/KSV विशेषानुपलब्धेः स्थाणुरिति भवति मतिः । एवं च यदाऽसावेकः पुरुषत्व सिद्धये परं प्रति स्थाणुधर्माग्रहणं हेतुत्वेन ब्रूयात्, इतरोऽपि पुरुषधर्माग्रहणेन स्थाणुतां प्रतिष्ठापयन् प्रत्यवतिष्ठेत, तदा स्वप्रतीत्यनुसरणपुरस्मरसाधनाभिधानात् भ्रान्तिसंभवाच्च युक्तं तथाविधोदाहरणकीर्तनम् । एवं नित्यः, शब्दः अनित्यधर्मानुपलब्धेः आकाशवत्; अनित्यः शब्दः, नित्यधर्मानुपलब्धेः, घटवत् इत्यपि द्रष्टव्यम् ॥ § 9596

२ ] तथश्च— nyāma-wit_kha
१८ ] तं— nyāma-wit_kha
२० ] पुरुषे— nyāma-wit_kha

१० म् ] उभयानुगतं खल्वन्यतरत्वम्, न प्रत्येकमात्रस्वरूपम् ॥
१३ दितुमुचितं ] अस्य शब्दानाम् इत्यादिः ॥
२१ *] सर्वज्ञे सत्त्वं साध्यम् । घटादीनामिव सर्वज्ञास्यापि सत्वमावश्यकम्, स्वभिन्नस्वविलक्षणविलक्षणत्वादिति हेतुः ॥

## सप्रतिपक्षहेत्वोर्वस्तिवत्वावश्यकता

यस्तु न वस्तुमूलः केवलोत्प्रेक्षामात्राबलम्बनः स्वप्रतीतिषु न दृष्टपूर्वः, किं तदुपन्यासेन ? § 9597

एतेन सद्वितीयप्रयोगा अपि प्रत्युक्ताः । यथा क्वचित् साधनप्रयोग कृते सति तत्रैवं परः प्रत्यवतिष्ठते—प्रस्तुतसाध्यधर्माधिकरणत्वशून्यधर्मिघटान्यतरसद्वितीयो घटः, अनुत्पन्नत्वात्, कुड्यवदिति । यथा प्रस्तुतेन सिषाधयिषितेन धर्मेण शून्यः यः प्रकृतो धर्मी घटश्च, तयोरन्यतरेण सद्वितीयोऽयं घटाख्यो धर्मी, तत्र हेतुः अनुत्पन्नत्वम्, तस्य कुड्यादौ व्याप्तिरिति ॥ § 9598

## केवलस्वबुद्धिकल्पितत्वस्यासप्रतिपक्षता

सत्यं वदत, यद्यस्ति लोके क्वचिदीदृशः प्रतीतिक्रमः—घटश्च धर्मी, धर्मिघटयोरन्यतरेण सद्वितीय इत्यत्र अन्यतरशब्दः सामान्यवचनोऽपि धर्मिणि व्याख्येयः । न हि घट एव घटेन सद्वितीयो भवितुमर्हति इत्यलमलीककल्पनाकौशलप्रत्याख्यानेन ॥ § 9599

सम्यग्वा यदि वा ऽन्यथा विदधते ये हेतवः संविदं
दृष्टाः स्वात्मनि ते प्रयोक्तुमुचिताः कामं परज्ञप्तये ।
ये तु स्वप्रतिपत्तिमेव न तथा कर्तुं क्षमाः कल्पना-
सामर्थ्योत्थितवस्तुशून्यघटनाः किं तत्प्रयोगे फलम् ॥§ 9603

II.622/KSV

## अनुभवासिद्धहेतोः न सप्रतिपक्षत्वम्

ये तु सूक्ष्मोत्प्रेक्षणक्षमप्रज्ञातिशयाभिमानदुर्विदग्धाः तथाविधानपि प्रयुंजते— § 9604

कृतकरचनाचातुर्यं तैः प्रदर्शितमात्मनः
भवति न पुनश्शुद्धिः काचित्प्रमेयदिशः कृता ।
क्वचिदवसरे एवंप्रायाः परभ्रमकारिणः
किल सफलतां दध्युः जल्पे यथा कथितं पुरा ॥§ 9608

६ ] ---Note : (?)
६ ] इति— nyāma-wit__ca
६ ] ष्टरूपो— nyāma-wit__kha
१६ ] धा— nyāma-wit__kha
१८ ] व— nyāma-wit__kha

६ ल्पे ] जल्पे—इति वितण्डाया अप्युपलक्षकम् ॥

तत्र त्वेतान् कथयति परः प्राज्ञमानी यदा वा
तस्याख्येयो निपुणमतिना पूर्वनीत्या समाधिः ।
द्राधीयस्या तदलमनया तार्किकम्मन्यगोष्ठ्या
हेत्वाभासः प्रकरणसमस्त्वेष निर्णीत एव ॥§ 9612

## असिद्धलक्षणम्

साध्याविशिष्टः साध्यत्वात्साध्यसमः ॥ १-२-८ ॥ § 9613

अन्यतरवादिप्रसिद्धंअन्यतरं प्रति यत् साधयितुमुपादीयते, तत् साध्यम् । तदविशिष्टो हेतुः साध्यसमः ॥ § 9614

कथं साध्येन तुल्यता हेतोरिति चेत्, आह—साध्यत्वादिति । यथा साध्यमसिद्धत्वात् साध्यम्, तथा तत्सिध्यर्थमुपात्तो हेतुरपियः असिद्धत्वात् साध्यः, सः साध्याविशिष्टत्वात् साध्यसम उच्यते ॥ § 9615

II.623/KSV

एतच्चान्यतरासिद्धस्यैव लक्षणम् । यथा मीमांसकं प्रति अनित्यः शब्दः कृतकत्वात्, घटवत् इति । *न चाक्षुषत्वादेरुभयासिद्धस्य साध्यत्वं संभवतीत्यतः सकलासिद्धभेदसङ्ग्रहाय साध्यत्वात् इत्येतत्पदरहितं साध्याविशिष्टः इत्येवासिद्धलक्षणमुपवर्णनीयम् ॥ § 9616

## साध्यस्य रूपद्वयम्

साध्यस्य च रूपद्वयमस्ति, असिद्धत्वं साध्यत्वं च । तत्रासिद्धत्वमेव भवति तदविशिष्टत्वकारणं इहाश्रीयते सर्वासिद्धभेदसाधारणम् न तु साध्यत्वमन्यतरासिद्ध्येकलग्नमिति । एवंचासिद्धत्वमेवासिद्धस्य लक्षणमुक्तं भवति । पक्षधर्मत्वं यस्य नास्ति, साध्ये धर्मिणि यो न वर्तते—हेतुः सोऽसिद्ध इति ॥ § 9617

## असिद्धा अनेकविधाः

तस्य तु भूयांसो भेदा भवन्ति—हेतुस्वरूपे तावत् अन्यतरस्य वादिनोः, द्वयोर्वा अज्ञानम् संदेहः, विपर्यय इति । तथा तदाश्रयेऽपि धर्मिणि एकस्य वा, द्वयोर्वा तथैवाज्ञानसन्देहविपर्यया इति । भूयसि च पक्षीकृतेऽर्थे तदेकदेशे क्वचिद्वृत्तिः,—तदितरत्रावृत्तिरिति । एकदेशवृत्तावपि द्वयोरेकस्य वा तथैवाज्ञानसंशयविपर्यया इत्येवं प्रकारभेदोदाहरण— वर्णनमल्पप्रयोजनमिति न प्रस्तूयते ॥ § 9618

१३ ] र्थः— nyāma-wit__kha
१५--१६ ] वं— nyāma-wit__kha
१७ ] त्वं तेन चा— nyāma-wit__ca

१८ * ] न संभवति—इत्यन्वयः ॥

## अन्यतरासिद्धेः सर्वसंप्रतिपन्नत्वम्

अन्यतरासिद्धे तु न विवदन्ते, प्रमाणस्यापक्षपातित्वात् । यदि तावत् कृत- II.624/KSV कत्वं शब्दे प्रमाणतो निश्चितं, तर्हि मीमांसकस्यापि तार्किकस्येव तत्सिद्ध- मेव । अथ तत्रकृतकत्वनिश्चयनिपुणं नास्त्येव प्रमाणम्, तदा तार्किकोऽपि तूष्णीमास्ताम् । द्वयोरप्यसौ चाक्षुषत्वादिवत् न सिद्धो हेतुः । वाङ्मात्रेण त्वसिद्धिकथनमसांप्रतम्, अतिप्रसङ्गादिति ॥ § 9619

## असिद्धस्यानित्यदोषत्वम्

सत्यमेवं—न सर्वदाऽन्यतरासिद्धस्य हेत्वाभासत्वं समभिदध्महे । किन्तु किंचित्कालमिति । यदेकेन वादिना हेतौ प्रयुक्ते द्वितीयो वदति, मां प्र- ति न सिद्ध एष हेतुः इति । तदा हेतोः प्रयोक्ता तत्साधनमभिधेयम् । अनभिधानात्स पराजीयते । साधने तु तेनोक्ते तदसिद्धतोद्भा वनवादी पराजीयत इति यावत्तत्सिद्धौ नोपन्यस्तं साधनं, तावदेवासौ अन्यतरासिद्धः । अनन्तरं तु सम्यग्घेतुः उभयासिद्धो वा भविष्यतीति ॥ § 9620

## व्यधिकरणासिद्धिस्वरूपम्

व्यधिकरणासिद्धिस्तु यथोक्तभेदान्तर्गत एव । यथा नित्यः शब्दः काक- स्य कार्ष्ण्यात् इति ॥ § 9621

क्वचित्पुनश्च व्यधिकरणासिद्धोऽपि भवति गमक इत्येके । तद्यथा ब- हलबहलः प्रचलजलधरश्यामलवपुः अम्बरतलमाक्रामन् धूमप्रबन्धः क्षोणी ध्रकन्दरादिप्रदेशधर्मत्वानवधारणेऽपि तत्र गमयितुमलमनलमिति यदा वा अग्निमानेषु देशः, धूमोपलब्धेः इति प्रयुज्येत, तदा उपलब्धे, रात्मधर्मतया वैयधिकरण्येऽपि गमकताऽस्तीति ॥ § 9622
II.625/KSV

## अन्यथासिद्धस्य नातिरिक्तत्वम्

अन्ये तु अन्यथासिद्धत्वं नाम तद्भेदमुदाहरन्ति । यस्य हेतोः धर्मिणि वृत्तिर्भवन्त्यपि साध्यधर्मप्रवृत्ता न भवति, सोऽन्यथासिद्धः । यथा—अनित्याः मनःपरमाणवः, मूर्तत्वात्, घटवत् इति ॥ § 9623

---

४ ] द्वयेत्— nyāma-wit__kha
१०--११ ] रसिद्धनन्तरं— nyāma-wit__kha
१६ ] विशेष— nyāma-wit__kha
१६ ] था— nyāma-wit__kha
२ ] प्रवृ— nyāma-wit__ca

---

२४ ताऽस्तीति ] यदि अत्र धूमोपलब्धेः इत्येवात्र हेतुः, तदा चोपलब्धिविषयधूमस्य सामानाधिकरण्यं संभवति ॥

ननु ! कथमयमन्यथासिद्ध उच्यते ? किमिति सद्धेतुरेव न भवति ? किं परमाणुषु मूर्तत्वं न वर्तते ? किं घटादावनित्यतया व्याप्तं न दृश्यते ? किमाकाशादेः खपुष्पादेर्वा विपक्षान्न प्रच्यवते ? किं प्रत्यक्षेणागमेन वा बाध्यते ? किं प्रतिपक्षेण प्रबाध्यते ? येनाभासतां भजते—न—प्रतिबन्धाभावात् ॥ § 9624

## अन्यथासिद्धस्याप्रयोजकत्वम्

ननु ! पंचानां प्रतिबन्धलक्षणानां कतमदस्य श्लथीभूतम् ? नान्यतमस्यापि शैथिल्यं ब्रूमः । तत्किं पंचस्वपि लक्षणेषु न परिसमाप्तः प्रतिबन्धः ? न न परिसमाप्तः । का तर्हीयं विडम्बना—पंचसु लक्षणेषु प्रतिबन्धः परिसमाप्यते, तानि चास्य सन्त्येव । न चैष प्रतिबन्धः इति कैतवम्—उच्यते—प्रयोज्यप्रयोजकभावेन साध्यसाधनधर्मयोः धूमाग्निवत् प्रतिबन्धोऽवधार्यते । स चात्र प्रयोज्यप्रयोजकभावो नास्तीति । अत एवायमन्यथासिद्धः अप्रयोजक इति कथ्यते ॥ § 9625

## अप्रयोजकत्वनिर्णयक्रमः

कथं पुनरस्याप्रयोजकत्वमवगतम्—उच्यते—मूर्तत्वं हि सर्वगतेतरद्रव्यपरिमाणविशेषादिधर्मः वस्तुस्वभावमात्रनिबन्धनः न कृतकत्वादि वदनित्यतां II.626/KSV प्रयोक्तुमुत्सहते । तथा हि परमाणुषु सिद्धेषु सत्सु तत्र वर्त मानं मूर्तत्वं अनित्यतां साधयेत्, अन्यथात्वाश्रयासिद्धतामुपेयात् । सिध्यन्त एव च सावयवकार्यानुमानमार्गेण, लोष्टप्रविभंगावभासमान भागपरम्परापरिकल्पनक्रमेण वा परमाणवो निरवयवाः सिद्ध्यन्ति । सावयवत्वे हि तदवयवाः परमाणवो भवेयु, न ते । तेषामप्यवयवान्तरपरिकल्पनायामपि अवयवानामानन्त्याविशेषत् सर्षपस्य मेरोश्च साम्यमापद्यते । न च तदस्ति । तदेवं निरवयवेषु परमाणुषु निसर्गसिद्धमनाश्रितत्वम् । अतश्च आश्रयविनाशावयवविभागादिविनाशकारणाभावात्, स्वाभाविकविनाशवादनिराकरणाच्च कथं परमाणूननित्यता स्पृशेत् । मूर्तत्वं तु वस्तुधर्मत्वाद्धवदपि प्रमेयत्वात् न प्रयोजकम् ॥ § 9626

इयांस्तु विशेषः—प्रमेयत्वं उभयपक्षस्पर्शादनैकान्तिकं भवदप्रयो जकम् । इदं तु मूर्तत्वं अनित्यव्यतिरिक्तस्वन्तरपरिचयविरहितमपि न प्रयोजकमिति ॥ § 9627

६ ] दावपि— nyāma-wit_ca
१०--११ ] प्र— nyāma-wit_kha
१७ ] रूप— nyāma-wit_ca
२३ ] वा— nyāma-wit_kha
१ ] नां— nyāma-wit_kha
१ ] तां— nyāma-wit_kha

१६ हि ] सर्वगतद्रव्यं—आकाशादि अमूर्तमुच्यते ॥
१८ ते ] सावयवत्वमेवानित्य प्रयोजकम् ।
२४ श्च ] अश्रयनाशान्नाशः रूपादीताम् । स्वाभाविकविनाश वादः बौद्धानाम् ॥

## मूर्तत्वहेतोरनैकान्तिकत्वाक्षेपः

ननु ! इदमपि प्रमेयत्ववत् विपक्षवृत्त्येव मूर्तत्वम् । क्व विपक्षे वर्तते ?—परमाणुष्वेव । ननु तेषां पक्षीकृतत्वात् कथं विपक्षता—न (?)षेच्छानुरोधेन वस्तु विपरिवर्तते । विपक्षो हि नाम स उच्यते, यः सिषाधयिषितधर्मविपरीतधर्माध्यासिततया दृढप्रमाणसिद्धः । परमाणवश्चैतेऽनन्तरनिर्दिष्टनीतिक्र-
II.627/KSV मेण निर्णीतनित्यत्वाः परमार्थतो विपक्षा एवानित्यत्ववादिनः । स तु रागद्वेषकलुषितहृदयतया यदि तावत् पक्षतया ब्रवीति, ब्रवीतु नाम । न तु सुस्पष्टासिद्धनित्यतानां विपक्षभावो निवर्तत इति ॥ § 9628

## तस्यानैकान्तिकत्वासंभवः

तदिदमनुपपन्नम्—अनेन क्रमेण धूमानुमानस्याप्यनैकान्तिकत्वप्रसङ्गात् । धूमो हि महीभृति हुतवहविरहितवपुषि विपक्षे वर्तत एव । न तत्र चित्रभानोरभावो निश्चित इति चेत्—किन्नु खलु सद्भावोऽस्य तत्र गृहीतः, तथा सति वा कृतमनुमानेन ॥ § 9629

अथ सत्त्वमसत्त्वं वा नावधारितमेव धराधरे, धूमकेतोस्तर्हि सन्दिग्धा तत्र विपक्षता । निश्चितविपक्षवृत्तिवत् संशयितविपक्षवृत्तिरपि नानैकान्तिकतामतिवर्तत इति सर्वानुमानानामेव निवापांजलिर्दत्तः स्यात् ॥ § 9630

## पक्षस्यापि सपक्षविपक्षत्वाक्षेपपरिहारौ

न च वादिहृदयपरिकल्पनोपारूढस्थितिरपि पक्षो नाम नास्ति । तदभावे किमपेक्षः सपक्षविपक्षव्यवहारः । बुद्ध्यारूढत्वपक्षेऽपि न सपक्ष विपक्षयोः पक्षत्वम् । न च वस्तूनामुभयात्मकता भवेत् । किन्तु कंचिकालमत्यतरासिद्धिवत् विमतिपथापतितस्य वस्तुनः—पक्षत्वमुपेयते । निर्णयजन्मा तु विमतिविरतौ नूनमन्यतरवर्गपतितोऽसौ भविष्यतीति सर्वथा न तस्यां दशायां तेनानैकान्तिकत्वोद्भावनं युक्तम् ॥ § 9631

## पक्षे साध्यसिद्ध्यसंभवाक्षेपपरिहारौ

ननु ! अनेन पथा पृथक्कृते सपक्षविपक्षाभ्यां पक्षेन तत्रान्वयव्यतिरेकयोः
अन्यतरस्यापि ग्रहणं भवेत् । सपक्षे ह्यन्वयो गृह्यते, विपक्षे च व्यतिरेकः II.628/KSV
। एष तु ताभ्यामर्थान्तरमिति तत्रागृहीतान्वयव्यतिरेकात्मनियमे हेतुः षण्ढ इव सुतजन्मनि न समर्थ एव साध्योपस्थापने भवेत् ॥ § 9632

---

८--९ ] त— nyāma-wit_kha
९ ] तनुत— nyāma-wit_ca
११ ] न्— nyāma-wit_kha
४ ] पुत्र— nyāma-wit_kha
४ ] ध्यसाध— nyāma-wit_kha

अलमनया डिम्भबिभीषिकया । न हि सकलसपक्षविपक्षसाक्षात्करणकारणकेकोल्लेखपुरस्सरं व्यप्तिग्रहणमिति पूर्वमेव निर्णीतोऽयमर्थः । न चतद्वर्जमिति व्याप्तिग्रहणं भवति, येन षण्ढसुतसाम्यचोदनावकाशः स्यात् । सामान्येन हि व्याप्तिर्गृह्यमाणा तत्रापि गृहीता भवत्येव । तेनापि च कालान्तरे सपक्षविपक्षान्यतरवर्गानुप्रवेशिना भवितव्यमेव । विमत्यवस्थायां तु पृथगेव ताभ्यामसाविति न तत्र वर्तमानो हेतुरनैकान्तिको भवति ॥
§ 9633

एतेन ईश्वराद्यनुमानानामप्यनैकान्तिकत्वमपाकृतं वेदितव्यम् तस्मान्नानैकान्तिकत्वेनागमकं मूर्तत्वम्, अपि त्वन्यथासिद्धत्वेनैवेति ॥ § 9634

## उक्तहेतोर्बाधितत्वमपि न

ननु ! एवमपि परमाणुप्रसाधनानुमानमहिमहतशक्तितया मूर्तत्वमनित्यत्वसिद्धावक्षमं जातमिति ततश्च कालात्ययापदिष्टत्वात् नान्यथासिद्धतामधिगच्छेत्—नैतदेवम्—कालात्ययापदिष्टो हि प्रत्यक्षागमापहृतविषय उच्यते, अनुष्णः कृष्णदर्मा मदिरा द्विजैः पातव्या इत्यादौ । दर्शितः यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः सः न्याभा-१-१-१ इति । न च परमाणुषु परमाणुतयैव सततपरोक्षेषु प्रत्यक्षमनित्यताविपर्ययग्राहि प्रवर्तितुं शक्तम् । आगमस्तु नास्त्येवेति कुतः कालात्ययापदिष्टता ॥ § 9635
II.629/KSV

## अनुमानेनानुमानबाधाक्षेपः

ननु ! किमिदम(?)निपतिवचनम्, उत वैदिकी चोदना, यत् प्रत्यक्षागमयोरेव बाधकत्वम् अनुमानं प्रति, नानुमानान्तरस्येति । परमाणुप्रसाधनानुमानं हि दृढं, अदृढस्य तदनित्यतानुमानस्य मूर्तत्वादेर्यदि बाधकं स्यात् को दोषः स्यादिति ॥ § 9636

अथ मनुषे—नियम एवैषः, प्रत्यक्षानुमानयोर्विरोधे प्रत्यक्षमेव बलीय इति तदेवानुमानस्य बाधकमुचितम्, नानुमानान्तरमिति—तदसत्—अलात चक्रादौ प्रत्यक्षमप्यनुमानेनानन्यथासिद्धेन बाध्यत एव ॥ § 9637

## अनुमानेन प्रत्यक्षस्यापि बाधः

६ ] ल्लास— nyāma-wit_kha

१५ मिति ] धर्मिग्राहकप्रमाणबाधितत्वादनित्यत्वस्य ॥

ननु ! भ्रमणविरतौ परिमितपरिमाणोल्मुकग्राहि प्रत्यक्षमेव तत्र प्रत्यक्षस्य बाधकम्, नानुमानमिति—नैवम्—अनवरतपरिभ्रमणसमुद्भूत चक्रावभाससमय एव अनुमानेन तत्र भ्रान्ततानिश्चयात् ॥ § 9638

पूर्वप्रवृत्तं अचक्राकारतदलातपरिछेदि प्रत्यक्षं बाधकमिति चेत्—न—पूर्वप्रवृत्तत्वेनैवातिक्रान्तत्वात् । तस्मादनुमानमेव चक्रज्ञानबाधकम् । एवंच अनन्यथासिद्धमनुमानमपि प्रत्यक्षस्य बाधकं भवति ॥ § 9639

यच्चानन्यथासिद्धतया मूलस्तम्भभूतमखिलानुमानप्रतिष्ठायतनं प्रत्यक्ष मपि बाधते, तत् अनुमानस्य तपस्विनः कथं न बाधकम् ? अतश्च प्रत्यक्षागमग्रहणस्योपलक्षणार्थत्वात् अनुमानबाधितमपि कालात्ययापदिष्टमेवेति ॥ § 9640

II.630/KSV

## अनुमानेनानुमानबाधासंभवसिद्धान्तः

तदेतदसमीचीनम्—अनुमानादेर्बाध्यबाधकभावानुपपत्तेः । सर्वत्र खलु प्रमाण भासरूपं बाध्यते, न तु प्रमाणं नाम शक्यते बाधितुम् । अलातचक्रादावपि प्रत्यक्षाभासस्य बाधकमनुमानं, न प्रत्यक्षस्य । एवमत्रापि अनुमानाभासस्य बाध्यता, नानुमानस्य ॥ § 9641

तदिदानीमनुमानाभासत्वमस्य किंकृतमिति चिन्त्यताम् । स्वलक्षणवैधुर्यादिति चेत्, किमनुमानांतरेण बाधकेन । तद्बाध्यतया तु तदाभासत्वकथनमितरस्यापि तादृशमेव । परमाणुप्रसाधनानुमानमनन्यथासिद्धम् । इदं तु मूर्तत्वमन्यथासिद्धमिति चेत्, आगतोऽसि मदीयं पन्थानम् । अन्यथासिद्धत्वादेव तदप्रामाण्ये सिद्धे किं तद्बाधया ॥ § 9642

अन्यथासिद्धत्वमेव कथमिति चेत्—न घटादौ मूर्तत्वप्रयुक्तमनित्यत्वम्, अपि तु कार्यत्वप्रयुक्तम् । कार्यस्य हि कारणविभागाद्वा, तद्विनाशाद्वा विनाशोपपत्तेः कार्यत्वमेवानित्यत्वप्रयोजकं युक्तम्, न मूर्तत्वम् । मूर्तत्वे त्वनित्यताक्षेपिणि परमाणुतैव हीयेतेत्युक्तम् । तस्मान्न मूर्तत्वमनित्यतायां कारकं ज्ञापकं वेति भवत्यन्यथासिद्धम् ॥ § 9643

## अप्रयोजकस्यासिद्धावन्तर्भावहेतुः

१ ] लका— nyāma-wit_ca
३ ] द्— nyāma-wit_kha
८ ] धीनम्— nyāma-wit_kha
१७ ] णुषु— nyāma-wit_kha
२२ ] लब्धे— nyāma-wit_kha
२४ ] त्व— nyāma-wit_ca

५ त्वात् ] स्मृतेस्तु ॥
प्रामाणकोटावपरिगणितत्वान्न बाधकत्वसंभवः

भवत्वेवम्; असिद्धवर्गे तु कथमेष हेतुर्गण्यते ? *साध्यधर्मयुक्ता धर्मिणि वृत्तिरस्य नास्तीति चेत्—यद्येवं पंचानामपि तत्प्रयुक्तवृत्तिरहितत्वात् असिद्ध एवैको हेत्वाभासः स्यात् ॥ § 9644

अथ सत्यपि प्रयोजकत्वे विपक्षवृत्त्याद्यवांतररूपभेदनिबन्धनानैकान्तित्वादिव्यपदेशपंचकभाज इमे हेत्वाभासा इष्यन्ते; हन्त तर्हि प्रकृ तोऽयं हे- II.631/KSV तुः मूर्तत्वात् इति किमनैकान्तिक उच्यताम्, अथ कालात्ययापदिष्टः,— आहोस्विद्विरुद्धः, उत प्रकरणसमः ? इति । नैषामन्यतमोऽपि वक्तुं शक्यते, एतल्लक्षणानुपपत्तेरिनि चेत्; काममसिद्धोऽपि मा वादि, पक्षे वर्तमानत्वेन तल्लक्षणस्याप्यनुपपत्तेरिति ॥ § 9645

## अप्रयोजकस्यातिरिक्तत्वमेवास्तु

अस्तु तर्हि षष्ठ एवायं हेत्वाभासः । सम्यग्घेतुतां तावद्यथोक्तनयेन नाश्नुत एव । न चैतेष्वन्तर्भवति इति बलात् षष्ठ एवावतिष्ठते । कथं विभागसूत्रमिति चेत्, अतिक्रमिष्याम इदं सूत्रम् । अतिक्रामन्तः— सुस्पष्टदृष्टमपीमं अप्रयोजकं हेत्वाभासमपह्नुवीमहि ? न चैवं युक्तम् । अतो वरं सूत्रातिक्रमः, न वस्त्वतिक्रम इति ॥ § 9646

अथ वा न सूत्रकारनियमोल्लङ्घनं श्रेयः । प्रमाद्यन् खलु परिमित दर्शी मादृशः अन्यथा ब्रूयात् । न न्यायमहोदधेः पारदृश्वा भगवानक्षपादः । तदेनं हेत्वाभासं असिद्धवर्ग एव निक्षिपामः ॥ § 9647

## अप्रयोजकस्यासिद्धत्वमेव

ननु ! पक्षे वर्तमानः कथं तत्र निक्षेप्तुं शक्यते ? यथा साध्यधर्मप्रयोजकतया पक्षेऽपि वर्तितुं युक्तम्, *तथा न वर्तत एवायं तत्रेत्यदूरविप्रकर्षेण भवत्येवायमसिद्धः । अत एवायमन्यथासिद्ध इत्युच्यते । यथाऽसिद्धः सिद्धो भवति, तथा न सिद्धः; अन्यथा तु सिद्ध इत्यनयानीत्योत्तानवृत्तिमात्रलाभेऽप्ययमसिद्धः । एवं अन्येषु तु हेत्वाभासेषु भङ्ग्यापि नान्तर्भवतीत्युक्तमेतत् ॥ § 9648
II.632/KSV

## अप्रयोजकत्वं सर्वानुगतं वा

९ ] स्या— nyāma-wit_kha
१२ ] अन— nyāma-wit_kha
१६ ] दत्र— nyāma-wit_ca
२२ ] लं— nyāma-wit_kha
२२ ] वाङ्मोऽ— nyāma-wit_kha

१ *] मूर्तत्वसत्वेऽपि अनित्यत्वव्याप्यमूर्तत्वव्य परमाणावभावात् ॥

१९ *] साध्यसाधनसमर्थत्वं हि हेतुस्वरूपम् । तस्यासिद्धिः ॥

अथवा सर्वहेत्वाभासानुवृत्तमिदं अन्यथासिद्धत्वं नाम रूपमिति न न षठोऽयं हेत्वाभासः । तत्तु क्वचित् केवलमेव दृश्यते । क्वचिदव्यभिचारादिरुपान्तरसहचारितम् । अतश्च व्यभिचारादिरूपापेक्षमेव पंचत्वसुपदिष्टवान् मुनिरिति न विभागसूत्रविरोधेत्यलमतिविस्तरेण ॥ § 9649

युक्तस्तस्मादन्यथासिद्धनामा
हेत्वाभासः सोऽयमेकप्रकारः ।
यस्योत्ताना विद्यमानाऽपि पक्षे
वृत्तिर्न स्यात्साध्यधर्मप्रयुक्ता ॥§ 9653

हेत्वाभासकुदुम्बकस्य तदिदं सर्वस्य साधारणं
रूपं यद्यपि लक्षणान्तरकृतः भेदस्तथा नान्यतः ।
सामान्यं तु विशेषरूपरहितं नास्ति प्रमाणं यथा
मा भूदत्र तथेति नास्य विषयश्चोद्यस्य वस्तुस्थितिः ॥§ 9657

—इति असिद्धपरीक्षा— § 9658

## बाधितलक्षणम्

कालात्ययापदिष्टः कालातीतः ॥ १-२-९ ॥ § 9659

यथाप्राप्तं हेतुप्रयोगकालमतीत्य यो हेतुरपदिश्यते, स कालात्ययापदिष्टः—कालातीत उच्यते ॥ § 9660

II.633/KSV

## व्याख्यान्तरम्

तत्र केचिदाचक्षते । प्रतिज्ञानन्तरं हि हेतुः प्रयोक्तुं युक्तः । तत्र यः प्रतिज्ञायाः पूर्वमेव, दृष्टान्तवचनादेरप्यूर्ध्वं वा प्रयुज्यते स कालात्यया पदिष्ट इति—तदनुपपन्नम्— § 9661

अक्षतप्रतिबन्धस्य साध्यावगतिकारिणः ।
क्रमातिक्रममात्रेण न हेत्वाभासता भवेत् ॥§ 9663

कियांश्चैषदोषः, पदान्तरव्यवहितोच्चारणं नाम । व्यवहितमपि येन सह समुचितसमयमन्वेतुमधिकृतं इतरदतिनिकटपठितमपि पराणुद्य दवीय-

११०८.१७--०००.० ] तत्र— nyāma-wit_ca
२० ] र्थतः— nyāma-wit_ca
२१ ] श्चय— nyāma-wit_ca
२३ ] मन— nyāma-wit_ca

७ स्योत्ताना ] उत्ताना वृत्तिः—इत्यन्वयः ॥

साऽपि तेनैव संबन्धमनुभवति । यथा— § 9664

*अथसा पथि गच्छन्तीं औषधीं दीर्घलोचनाम् ।
दृष्ट(?)सि ? केदारे यो लुनासि मम प्रियाम् इति
॥§ 9666

अपि च (?)तकालमेतत् कथितं पृथगेव निग्रहस्थानम् । तच्चे पुनरुच्यमानं न (?) त्वार्थमावहति तस्मादपव्याख्यानमेतत् ॥ § 9667

## व्याख्यानान्तरम्

अपर आह—(?)शेषणस्य हेतोः प्रयुज्यमानस्य यस्य विशेषणं कार्यकालमत्येति, न (?)तमवतिष्ठते, स कालात्ययापदिष्ट इति । यथाकालान्तरस्थायी (?)ः, संयोगव्यङ्ग्यत्वात्, रूपवत् इति । अत्र न व्यङ्ग्यत्वमात्रं (?) विवक्षितम्, अपि तु सविशेषणं संयोगव्यङ्ग्यत्वम् । स चा(?) व्यंजकः, दृष्टान्तधर्मिणि रूपे तदवगतिपर्यन्त स्थितिरुपलभ्यते दीपादिसंयोगः II.634/KSV
। साध्यधर्मिणि तु शब्दे न तथाऽवस्थान मिति दूरतो हि दारुपरशुसंयोगविच्छिन्ने छेत्रा पुनरुद्यम्यमाने परश्वथे श्रूयते शब्दः इति तदुपलब्धिकाले तदत्ययात् कालात्ययापदिष्टोऽयं हेतुरिति ॥ § 9668

## व्याख्यानान्तरनिरासः, स्वपक्षश्च

एतदपि न सङ्गतम्—असिद्धत्वेनास्य हेत्वाभासान्तरत्वानुपपत्तेः । तस्मादयमर्थ—हेतोः प्रयोगकालः प्रत्यक्षागमानुपहतपक्षपरिग्रहसमय एव । तमतीत्य प्रयुज्यमानः—प्रत्वक्षागमबाधिते विषये वर्तमानः कालात्यया पदिष्टो भवति । तस्योदाहरणं पूर्वमेव प्रदर्शितम् ॥ § 9669

उष्णो न तेजोऽवयवी कृतकत्वाद्धटादिवत् ।
ब्राह्मणेन सुरा पेया द्रव्यत्वात् क्षीरनीरवत् ॥§ 9671

यच्च किंचिदभिधेयवत्र तत्
सर्वमुक्तमनुमानलक्षणे ।
अप्रयोजकनिरूपणे पुनः
किंचनोदितमतो विरम्यते ॥§ 9675

२ ] अ— nyāma-wit_kha

१ *] यः केदा(?) लुनासि—इत्यन्वयः ॥

## हेत्वाभासपरीक्षोपसंहारः

हेत्वाभासास्त एतेऽवगतिनियमितानन्यसंकीर्णरूपाः
निर्णीताः पंचयेऽर्थे विदधति महतीं शुद्धिमभ्यस्यमानाः ।
पक्षादौ वृत्तिभेदाकलनगुरुतरक्लेशनिष्पाद्यमानैः
तैन यत्ता तदीया क्वचन फलवती नादतास्तेन तद्भैः ॥§ 9679

—इति हेत्वाभासाः— § 9680
II.635/KSV

## छलपरोक्षा

तत्त्वाध्यवसायसंरक्षणं जल्पवितण्डयोः प्रयोजनमुक्तम् । तदङ्गभूतानि छलजातिनिग्रहस्थानानि । यद्यपि च वादे केषांचदभ्यनुज्ञानमस्ति । तथापि जल्पवितण्डे एव तेषां प्राचुर्येण क्षेत्रमिति तदौपयिकतया तत्स्वरूपनिरूपणं युक्तमित्युद्देशक्रमेण छलस्य तावल्लक्षणमाह— § 9681

वचनविघातोऽर्थविकल्पोपपत्त्या च्छलम् ॥ १-२-१० ॥
§ 9682

छलस्य भेदवत्त्वात् सामान्यलक्षणं, विभागः, विशेषलक्षणानि च वक्तव्यानि । तानीह सर्वाणि स्वकण्ठेन किल तत्पूर्वकमनुमानम् इत्यत्र त्रिचतुराक्षरसमर्पितापरिमितविषयवितताानुमानलक्षणलब्धनिरति शयसूत्रकरणकौशल्यस्य मे किमधुना शिष्यजनमनःक्लेशकारिणा संक्षिप्ता भिधानदोहदेनेति मन्यमानः सूत्रकृदुक्तवान् ॥ § 9683

## छलसूत्रव्याख्यानम्

तत्र वचनविघातः इति सूत्रं सामान्यलक्षणप्रतिपादकम् । परस्य वदतः वचनविघातः—अभिधाननिरोधः छलम् । किमास्यपिधानादिना ? नेत्याह—अर्थविकल्पोपपत्त्येति । वक्तुः अनभिप्रेतमर्थान्तदुक्ते वचसि समारोप्य तन्निषेधं छलवादी करोति । कथमर्थान्तरारोपणमिति चेत्— अर्थविकल्पोपपत्त्या । विकल्पमानार्थघटनयेत्यर्थः ॥ § 9684

## निर्विशेषं न सामान्यम्

३ ] ना— nyāma-wit_kha
४ ] नेय— nyāma-wit_kha
४ ] त्वेत— nyāma-wit_kha
१२ ] (?)— nyāma-wit_kha

१६ वान् ] विस्तरेणेति शेषः ॥

किमुदाहरणम् ? विशेषलक्षणेषु वक्ष्यामः । इहैव कस्मान्नोच्यते ? असंभवादिति ब्रूमः । न हि निर्विशेषं सामान्यमुपपद्यत इति । तदुदाह्रियमाणं बलाद्विशेषनिष्ठमेवावतिष्ठते ॥ § 9685

II.636/KSV

अन्येष्वपि गौर्न पदा स्प्रष्टव्या इति सामान्योपदेशेषु नामूर्तायां आकाशनिर्विशेषवपुषि जातौ स्पर्शप्रसक्तिः, तन्निषेधो वाऽवकल्पते । किन्तु व्यक्तिष्वेवेति विशेषविषय एव सर्वत्र क्रियायोग इति तत्रैवोदाहरणवर्णनं युक्तम् ॥ § 9686

## विशेषस्यैव सामान्यदृष्टान्ततापि

कथं तर्हि सकलहेत्वाभाससार्थसामान्यलक्षणम्, अप्रयोजकत्वम् अनपेक्षितसव्यभिचारविरुद्धादिविशेषमप्युदाहरणद्वारेण दर्शितम्—अनित्याः परमाणवः, मूर्तत्वात्, घटवत् इति—उच्यते—प्रमाणे तर्हि प्रत्यक्षादिविशेषनिरपेक्षं प्रमाणसामान्यं नोदाहृतम् ? ननु ! अयमपरो दोषोऽस्तु । तदप्ययुक्तमेवानुष्ठितम् । किमिति नोदाहृतम् अनपेक्षितप्रत्यक्षादिविशेषं प्रमाणसामान्यम्—अत्रोच्यते—न शक्यमुदाहर्तुम्, असंभवादिति तन्नोदाहृतम्; न पुनरालस्यात् प्रमादाद्वा । हेत्वाभाससमूहत्वाधारण रूपं त्वप्रयोजकत्वं तथा संभवादुदाहृतम् । न च तत्सामान्यात् अत्रापि तथाऽस्त्विति वक्तव्यम् । न हि चाक्षुषेण पंचाशद्भवितुमर्हति । तस्मा नैवं वक्तुं शक्यम् ॥ § 9687

## सर्वत्र नैको न्यायः संभवति

यथा विरुद्धादिविशेषरूपरहितमप्रयोजकत्वं हेत्वाभासेषु सामान्यरूपं दृश्यते, तथा प्रमाणेष्वपि प्रत्यक्षादिविशेषरूपरहितं तद्दृश्यताम् । यथा वा प्रमाणेषु तन्न दृश्यते, तथा हेत्वाभासेष्वपि मा दर्शीति वस्तुस्वभावानामनुयोगक्षेत्रताऽनुपपत्तेः ॥ § 9688

II.637/KSV

अपि च अप्रयोजकत्वं सामान्यं विरुद्धादिविशेषेष्विव तद्रूपरहितेषु तद्विशेषेष्वपि संभवद्दृश्यते । अत एव तदपि स्वविशेषनिष्ठमेवोदाहृतं— अनित्याः परमाणवः, मूर्तत्वात् इति । न चाकाशवदनालम्बनमेव किंचिदप्रयोजकत्वसामान्यमिति । तस्मात् सुष्ठूक्तं—न सामान्यलक्षणे शक्यमुदाहर्तुम् इति ॥ § 9689

११--१४ ] न— nyāma-wit_kha
१७ ] स— nyāma-wit_ca
१८ ] हेत्वाभासे— nyāma-wit_ca

११ म् ] स न्यायः अत्रापि भवत्वित्याशयः । तत्राप्याक्षिपति नन्विति ॥ प्रमाणलक्षणेऽप्ययमस्तु दोष इत्यर्थः ॥

### छलविभागः

एवं सामान्यलक्षणमभिधाय छलस्य विभागमाह— § 9690

## तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च— ॥ १-२-११ ॥ § 9691

*निगदव्याख्यातं सूत्रम् । विभागसामान्यलक्षणयोश्च उपदेशपौर्वापर्यनियमो नास्तीति पूर्वमेवोक्तम् ॥ § 9692

### वाक्छललक्षणम्

अथ विभागक्रमेण लक्षणान्याह । तत्र— § 9693

## अविशेषाभिहितेऽर्थे वक्तुरभिप्राथादर्थान्तरकल्पना वाक्छलम् ॥ १-२-१२ ॥ § 9694

संभवद्विशेषेऽप्यविशेषसाधारणार्थसमर्पणकौशलशालिनि श्लेषालङ्कारवति शब्दे प्रयुक्ते सति, वक्तुरभिप्रेतमर्थमपह्नुत्य ततोऽर्थान्तरं परिकल्प्य, तन्निषेधवचनम्, वाचि निमित्तभूतायां छलं वाक्छलम् ॥ § 9695

II.638/KSV

नवकम्बलोऽयं माणवकः इति नवः कम्बलोऽस्य नव कम्बला अस्य इति विग्रहद शादृश्यमानविशेषमपि समासपदमिदं अर्थद्वयेऽप्यवि शिष्टम् । तत्र अभिनवकम्बलयोगं वक्तुरभिप्रेतं प्रमाणोपपन्नं च निह्नुत्य नवसंख्यासंबन्धमध्यारोप्य तत्प्रतिषेधेन परः प्रत्यवतिष्ठते—कुतोऽस्य नवकम्बलाः ? इति । तदेतत् साधारणशब्दे वाचि छलं वाक्छलमिति ॥ § 9696

### वाक्छलप्रतिसमाधानम्

यथा च कस्यांचिदवस्थायां जल्पादौ छलादिप्रयोगो युक्त इति तद्युत्पादनम्, एवं परप्रयुक्तस्यापि सतः छलादेः प्रतिसमाधानमभिधेयमिति तदपि व्युत्पाद्यते। नव कम्बला अस्येति मम विवक्षितमिति कुतः प्रतिपन्नमायुष्मता ? किमयमभिनवकम्बलयोगप्रतिपादको न भवत्येव बहुव्रीहिः । पक्षद्वयेऽपि च संभवति । यदि तावदर्थप्रकरणादिसामर्थ्यपर्यालोचनावसितनियताभिधेयवृत्तिशब्दव्यवहाराभिज्ञोऽसि, तदर्थसिद्धमर्थमभिनवकम्बलसम्बन्धमेव बुद्धा

---

९ ] प्य— nyāma-wit_kha ; षेऽपि— nyāma-wit_ca
९--१० ] इव— nyāma-wit_ca
१३ ] द्— nyāma-wit_kha
२१ ] नया— nyāma-wit_kha
२१ ] मा— nyāma-wit_ca

---

४ *] निगदः—स्पष्टवचनम् । तेनैव व्याख्यातम् । स्पष्टार्थकमिति यावत् ॥

तूष्णीमास्स्व । अथ शुष्कतार्किककुटुम्बकगर्भदास इव शब्दवृत्तानभिज्ञ एव त्वम्, तर्हि पक्षद्वयसंभ वेन संशयानो मामेव पृच्छ किं ते विवक्षितम् इति । *निषेधकस्सन् वक्तुमुपक्रमसे ॥ § 9697

## अर्थद्वयसाधारणपदप्रयोगो न दोषाय

ननु ! त्वमप्यर्थप्राप्त्यादिफलपर्यन्तशब्दप्रयोगप्रवृत्तः किमिति साधारणमिदमन्धपदप्रायं वचः प्रयुङ्क्षे ? अयि बालिश ! तवैवेहेदमन्धपदम् ॥ § 9698

II.639/KSV

अर्थप्रकरणाधीननियतस्वार्थवृत्तिताम् ।
यो न जनाति शब्दानां स एवमपभाषते ॥§ 9700

इदमर्थद्वये तावत् साधारणपदं भवेत् ।
जातिशब्दाः पुनर्व्यक्तिसहस्राक्षेपकारिणः ॥§ 9702

स्पृशन्ति नियतं वाच्यं तेऽपि प्रकरणादिना ।
ब्राह्मणान् भोजयेत्यादौ तद्बालेन न शिक्षितम् ? ॥§ 9704

तस्माच्छब्दार्थसन्देहे प्रयोक्ता वा स पृच्छ्यते ।
न त्वर्थान्तरमारोप्य तन्निषेधो विधीयते ॥§ 9706

## सामान्यच्छललक्षणम्

**संभवतोऽर्थस्यातिसामान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलम् ॥ १-३-१३ ॥** § 9707

अनिव्यापकं सामान्यम्—अतिसामान्यम् । तद्योगात्—तत्संभवात् क्वचिद्व्यक्तार्थस्य कस्य चित्संभवतः संभाव्यमाननिष्पत्तेः वक्त्राऽभिहितस्य सतः या असद्भूतार्थकल्पना—वक्तुरनभिप्रेतातिसामान्यहेतुत्वकल्पना तया च प्रत्यवस्थानं तत्सामान्यनिमित्तं छलं सामान्यच्छलम् ॥ § 9708

यथा—क्वचिदुचितोपचारवचनाराध्यमानप्रगुणब्राह्मणकुले तत्कथाबहुले राजकुले कश्चित्सुजन्मा कंचिदग्रजन्मानं स्तौति—अहो नु खल्वसौ ब्राह्मणः

२ ] वे— nyāma-wit_kha
५ ] त— nyāma-wit_kha
१३ ] वत्स— nyāma-wit_kha
२१ ] गुणचद्— nyāma-wit_kha

३ *] मामपृष्ट्वेत्यादिः ॥

विद्या चरणसंपन्नः इति । तस्मिन् प्रसङ्गे तथाविध एवापरः तमुत्साहयन्
II.640/KSV कथयति—संभवति ब्राह्मणे विद्याचरणसंपत् इति । तत्र पिशुनश्छल-
वाद्याह—यदि ब्राह्मणे विद्यावचरणसंपत् संभवति, तर्हि ब्रात्येऽपि ब्राह्मण-
त्वजात्यनपायात् सा भवेत् इति ॥ § 9709

तत्रेदमतिव्यापकं ब्राह्मणत्वसामान्यं यतो विद्याचरणसंपदमत्येति, स्पृश-
ति च तद्योगात् ब्राह्मणव्यक्तौ । संभवतः विद्याचरणसंपद्रूपस्यार्थस्य व-
क्त्राऽभिहितस्य सतः, तत्र वक्तुरनभिमतामेवातिसामान्यहेतुतामारोप्य च्छल-
वादी प्रत्यवतिष्ठत इति ॥ § 9710

## सामान्यच्छलप्रतिसमाधानम्

अत्रोत्तरं—केन ब्राह्मणत्वस्यात्र हेतुत्वमभिहितम्, यदनैकान्तिकीकुर्वन्
प्रत्यवस्थितोऽसि । संभावनावचनमिदं स्तुत्यर्थमुपन्यस्तम् । विद्याचरणसंप-
दां पात्रं हि ब्राह्मणः । सति ब्राह्मणत्वे पूर्वजन्मोपचितसुकृतपरिणामात् भवति
विद्याचरणसंपत् । न च तदेव तस्या हेतुरिति ॥ यथा (?')संभवन्त्यस्मिन्
क्षेत्रे शालयः इति क्षेत्रप्रशंसापरे वाक्ये प्रयुक्ते, नैवं वक्तुमापद्यते यदि
क्षेत्रमेव शालिसंभवहेतुः, तर्हि विनाऽपि हलबलीवर्दादिसामग्रीं महत्यव-
ग्रहेऽपि शालयोऽस्मिन् भवेयुः इति । तदिदमर्थवादगत्यनभिज्ञस्य भवतः
भाषितमित्यास्तामेतत् । इदं तु भवन्तं पृच्छामि भो महात्मन् ! § 9711

*स्वभावशुद्धा परिनिश्चितार्थ—
संस्पर्शिनी पुण्यसहस्रलभ्या ।
केनेदृशी सर्वजनानुकूला
कल्याणिनी ते निरमायि वाणी ॥§ 9715

II.641/KSV

## उपचारच्छललक्षणम्

### धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेधः उपचारच्छलम् ॥ १-२-१४ ॥ § 9716

४ ] पनयनात्सं— nyāma-wit_kha

९ ] स्य— nyāma-wit_kha

१ विद्या ] चरणम्, आचरणमिति वा पदम् । आचार इत्यर्थः ॥

११ त्वे ] गुणदोपयोरुभयोरपि वंशः सहकारीति उत्सर्गसिद्धमिदम् । कदाचित् ब्राह्मणपदं केवलव्यक्तिवाच्यपि ॥

१७ * ] स्वभावेत्यादि—परिहासवचनम् ॥

*अभिधानस्य धर्मः अनेकप्रकारः । मुख्यया वृत्त्या, गौण्या वा, लाक्षणिकया वा यत् अर्थे प्रत्यायनं, तदनेन विकल्पमानेन धर्मेण गौणेन, लाक्षणिकेन वा निर्देशे—प्रयोगे कृते, यः अर्थसद्भावप्रतिषेधः—मुख्यार्थनिषेधः, स उपचारनिमित्तं छलं उपाचारच्छलम् ॥ § 9717

यथा मंचाः क्रोशन्ति इत्युक्ते, छलवाद्याह—कथमचेतनाः काष्ठरचनात्मानः मंचाः क्रोशन्ति ? मंचस्थाः पुरुषा एते क्रोशन्ति, न मंचाः इति ॥ § 9718

## उपचारच्छलप्रतिसमाधातम् ॥

अत्र समाधिः—वृद्धव्यवहाराच्छब्दार्थव्युत्पत्तिः । तत्र न केवल यैव मुख्यया वृत्त्या शब्दाः प्रवर्तवानाः दृश्यन्ते, वृत्त्यन्तरव्यवहारस्यापि सुप्रसिद्धत्वात् । न च निर्निमित्तमेव परशब्दं परत्र प्रयुक्तवन्तो वयम्, *सहचारणादिसूत्रनिवेदितनिमित्तनिकुरुम्बान्यतमनिमित्तपूर्वकत्वात् अस्य प्रयोगस्य । स्थानादयं तद्वदुपचारः । स त्वं गौणलाक्षणिकादिशब्दप्रयोगा वगतिबाह्य एव, य एवं प्रत्यवतिष्ठते ॥ § 9719

II.642/KSV

## गौणलक्षिणकयोर्भेदः

गौणलाक्षिणकयोः कथं विशेषः ? इति चेत्—उच्यते—सत्यं गौणेऽपि लक्षणा विद्यते । एवं सति गोशब्दः स्वार्थमभिधाय सास्नादिमन्तं, तदीयान् गुणानेव जाड्यमौढ्यतिष्ठन्मूत्रणादीन् लक्षयति । न तु तावत्येव विरमति । स तु सामानाधिकरण्येन वाहीकेऽपि प्रवर्तते । गौर्वाहीकः इत्येवं प्रयुज्यमानः स गौणो भवति ॥ § 9720

यस्तु स्वार्थाभिधानानन्तरं तदितरमर्थं गुणमगुणं वा लक्षयत्येव, न सामानाधिकरण्येन परत्र प्रयुज्यते शब्दः, स लाक्षणिको भवति गङ्गायां घोषः प्रतिवसति इति । तथा चोक्तं गौणे हि *प्रयोगः, न लक्षणा याम् इत्यलं शास्त्रान्तरोद्गारगहनाभिः कथाभिः ॥ § 9721

---

१० ] वर्तित— nyāma-wit_kha
१४ ] चेत् कथ्यताम्— nyāma-wit_kha
१४--१५ ] गो— nyāma-wit_kha
१६ ] मान्द्या— nyāma-wit_kha
२१ ] ऽपि— nyāma-wit_kha
२१ ] गे— nyāma-wit_kha

---

१ *] अभिधानं—शब्दव्यापारः ॥
१० *] सहचरणस्थानतादर्थ्य—न्या. सू. २-२-६४ इत्यादिसूत्रपठितानि उपचार निमित्तानि । प्रकृते स्थानं निमित्तम् ॥
२१ *] समानाधिकरणेत्यादिः । इदं वाक्यं प्राभाकरस्येति चक्रधरः ॥

मुख्यमर्थमथ लाक्षणिकं वा
गौणमप्यवगमय्य च शब्दः ।
लोकवेदविहितं व्यवहारं
सन्तनोति तदभिज्ञमतीनाम् ॥§ 9725

कुर्यादाक्षेपं यश्च भाक्ते प्रयोगे
मुख्यं मत्वार्थं तत्र वक्तुर्न दोषः ।
तेन त्वात्मीयं शब्दवृत्तानभिज्ञं
रूपं व्यक्तं स्यादत्र वृद्धाः प्रमाणम् ॥§ 9729

## छलभेदाक्षेपपरिहारौ

एवं छलस्य विशेषलक्षणान्यभिधाय तत्परीक्षार्थमाक्षेपं करोति— § 9730
II.643/KSV

**वाक्छलमेवोपचारच्छलं तदविशेषात् ॥ १-२-१५ ॥** § 9731

न खलु वागुपचारच्छलयोः कश्चिद्विशेषः । अनेकधा शब्दार्थे संभवति वक्त्रभिमतादर्थादन्यस्य कल्पनं, तत्प्रतिषेधनं चोभयत्रापि समानम् । अवान्तरविशेषकृतनानात्वाभ्युपगमे च तदानन्त्यप्रसङ्गः ॥ § 9732

अत्र समाधिमाह— § 9733

**न तदर्थान्तरभावात् ॥ १-२-१६ ॥** § 9734

नैतदेवम्—वाक्छलमेवोपचारच्छलमिति, ततोऽर्थान्तरत्वात् । वाक्छले हि नवकम्बलः इति नवसु कम्बलेषु, नवे च कम्बले मुख्यार्थ एव शब्दः *सरामः इत्यादिवत् । ततस्त्वेकतरं वक्तुरनभिप्रेतं छलवादिनाऽऽरोप्य निषिध्यते । उपचारच्छले तु काष्ठसन्निवेशे मुख्यार्थे मंचशब्दः पुरुष भक्त्या प्रवृत्तः । मुख्यमभिधाय च गौणः प्रत्याय्यो भवति । न त्वेष क्रमः साधारणशब्देष्विति महान् भेदः ॥ § 9735

वाक्छले चार्थसत्तैव निषिध्यते कुतोऽस्य नव कम्बलाः इति । इह तु सतो मंचस्य क्रोशनशक्तिर्निषिध्यते ॥ § 9736

समाधिरपि साधारणशब्दानभिज्ञतां परस्य प्रदर्शयता वाक्छले वाच्यः । उपचारच्छले तु गौणशब्दवृत्त्यनभिज्ञतामिति महान् विशेषः ॥ § 9737

## छलत्रैविध्यसमर्थनम्

६ ] वाच्यं— nyāma-wit__kha
२० ] यको— nyāma-wit__kha
२५ ] णादि— nyāma-wit__kha

१८ *] सः समः इति, समेण, रामया सह वा वर्तत इत्यर्थभेदास्संभवन्ति । परन्तु सर्वेऽपि मुख्याः ॥

अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः ॥ १-२-१७ ॥
§ 9738

II.644/KSV

छलस्य द्वित्वमभ्यनुज्ञाय त्रित्वं भवता प्रतिषिध्यते, यतः सामान्यच्छलं पार्श्वे कृत्वा वागुपचारच्छलयोरभेदमभिहितवानसि । यथा चायं तदविशेषादिति त्रित्वप्रतिषेधः, तथा द्वित्वस्यापि, किंचित्साधर्म्यस्य सामान्यच्छलेऽपि भावात् ॥ § 9739

तथा हि—यदि तावद्वाचि निमित्तभूतायां इदं प्रवृत्तं छलम्, इदं चेति तदभेदं मन्यसे, तर्हि सामान्यच्छलमपि मा पृथग्वोचः । तदपि हि न शरीरे मनसि बुद्धौ वा प्रवृत्तम्, अपि तु वाच्येवेतिः वाक्छलमेवैकस्यात् ॥ § 9740

अथैवं सत्यपि तद्विशेषो दृश्यमानः न पराणुद्यते, सामान्यच्छलेपि न शब्दार्थोऽन्यथाकृतः, किन्तु सामान्यस्य हेतुत्वमनुक्तमारोपितमिति पृथगिष्यते; तर्हि वागुपचारच्छले अपि भिद्येते एवेति दर्शितम् । अतो युक्तं छलत्रित्वम् ॥ § 9741

न चानन्त्यम्, इयत्तानियमकारिणः निमित्तत्रयस्य दर्शितत्वात् । अवान्तरभेदकृतं तु तदानन्त्यमिष्यते एव जातिवदित्यलं प्रसङ्गेन ॥ § 9742

तस्मात् परस्परविविक्तनिजस्वरूपं
ईदृक् छलत्रितयमेतदिहोपदिष्टम् ।
तस्य क्वचित्स्वयमपि क्रियते प्रयोगः
वाच्यः परैरभिहितस्य तथा समाधिः ॥§ 9746

॥ इति श्री भट्टजयन्तकृतौ न्यायमञ्जर्या एकादशमाह्निकम् ॥

## २.८ द्वादशमाह्निकम्—जाति-निग्रहस्थानपरीक्षा : जातिसामान्यलक्षणम्

II.645/KSV

छलानन्तरं जातेरुद्देशात् तस्यास्सामान्यलक्षणं तावदाह— § 9748

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ १-२-१८ ॥ § 9749

---

८ ] वो— nyāma-wit_kha
९ ] निमित्ते— nyāma-wit_kha
१२ ] भवत्विद— nyāma-wit_kha

---

१९ माधिः ] वादिनोः परस्परं स्फूर्तिप्रतिभादिपरीक्षणाय, सदस्यानां स्वचातुर्यप्रदर्शनेना, वर्जनाय वा छलस्य प्रयोगः ॥

## व्यख्यानान्तरम्, तन्निरासश्च

अत्र त्रैकाल्यसमादिसकलविशेषसंग्रहाय साधर्म्यवैधर्म्यादिपदनिरपेक्षमेव प्रत्यवस्थानपदं जातिसामान्यलक्षणप्रतिपादकमाहु; ॥ § 9750

प्रतीपं अवस्थानं प्रत्यवस्थानम् । तावन्मात्रमेव च यत्किंचिदुत्तरं परप्रयुक्ते हेतौ जायमानत्वाज्जातिरित्यभिधीयते—तदनुपपन्नम्—प्रत्यवव स्थानमात्रस्य साधर्म्यादिनिरपेक्षस्य जातित्वे हेत्वाभासोद्भावनमपि जातितामश्नुवीत् ॥ § 9751

अथ तस्य सम्यगुत्तरत्वात् इह च निर्विशेषणप्रत्यवस्थानमात्रोपपादनात् फल्गुप्रायमसदुत्तरं जातित्वेन विवक्षितमित्युच्यते—तथापि छलस्य जातित्वप्रसक्तिरपरिहार्यैव । तद्व्युदासाय तु तदन्यत्वे सति इत्यादिक यदि किंचिदध्याह्रियते—तदमुष्य श्रूयमाणस्य साधर्म्यवैधर्म्यग्रहणस्यै को दोषः ? § 9752

## सौत्रलक्षणस्यादुष्टत्वम्

ननु ! त्रैकाल्यसमादीनामसंग्रहः किं न दोषः ? न हि त्रैकाल्यसमादिषु साधर्म्येण वैधर्म्येण वा प्रत्यवस्थानमस्तीति—नैष दोषः— साधर्म्यवैधर्म्याभ्यामित्यसमासकरणेन दिक्प्रदर्शनस्य सूचनात् । साधर्म्येण वैधर्म्यैण वा, कथमेष हेतुः हेतुर्भवतीति वा, किमनेन क्रियते इति वा यदेवंप्रकारं प्रत्यवस्थानं हेतुप्रतिबिम्बवर्त्मना क्रियते, सा जातिः इत्युच्यमाने भविष्यति सकलविशेषसङ्ग्रहः । त्रैकाल्यसमादिष्वपि वा यादृशस्य तादृशस्य साधर्म्यवैधर्म्यप्रकारस्यः योजयितुं शक्यत्वात् । न ह्युदाहरणसाधर्म्यं साध्यसाधनमिह विवक्षितम्, तद्वैधर्म्यं वा; साधर्म्यादिमात्रं तु । तत्रापि नात्यन्ताय दुरवगममिति यथाश्रुतमेव साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरिति सामान्यलक्षणं युक्तम् ॥ § 9753

II.646/KSV

## जातिविभागः, लक्षणानि च

अथ भेदवत्त्वाज्जातेः चतुर्विंशतिधा विभागमाह— § 9754

**साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥ ५-१-१ ॥** § 9755

२ ] र्म्या— nyāma-wit_ca
११--१३ ] सा— nyāma-wit_kha
१६ ] नात्— nyāma-wit_ca
१६ ] भ— nyāma-wit_kha

१३ णेन ] असमासकरणं—प्रत्यवस्थानपदेन ॥

अत्र समा इति स्त्रियां पुंसि च तुल्यत्वान्निदर्शस्य, जात्यपेक्षया स्त्री निर्देशो वा प्रतिषेधापेक्षया पुंन्निर्देशो वा वर्णनीयः । विशेषलक्षणसूत्रेषु पुनः प्रायेण पुल्लिङ्गनिर्देशो दृश्यते । स तु प्रतिषेधापेक्षया तेषु व्याख्येय इति तद्व्याख्यानावसर एव वक्ष्यामः ॥ § 9756

## जात्युपदेशाक्षेपः

ननु ! आस्तां तावद्विशेषलक्षणवर्णनम् । इदमेव त्वादौ चिन्त्यताम् । किमर्थमेवंविधमसदुत्तरजातं शास्त्रे व्युत्पाद्यते । एवंप्रकाराणां च धूलि प्रक्षेपसदृशानां सारेतरपरीक्षणक्षमविचक्षणोपेक्षणीयानामसदुत्तराणां आन- II.647/KSV
न्त्यात् चतुर्विंशतिसंख्यापि कथमिति महान् विस्मयोऽस्माकम् ॥ § 9757

## तत्त्वसंरक्षणार्थमुपदेशोऽपि न घटते

यदपि च तत्त्वाध्यवसायसंरक्षणं तत्प्रयोजनमभिधीयते—तदपि न हृदयङ्गमम्—असदुत्तरोपन्यासेन तत्त्वाध्यवसायस्य संरक्षितुमशक्य त्वात् ॥ § 9758

अथ विकटाटोपप्रकटनपाटवोपहितापरसंमोहनद्वारेण तद्रक्षणमास्थीयते, तर्हि निष्ठीवनहसिततर्जनांसमर्दनकौपीनावरणविदारणचरणावस्फोटनाद्यपि व्युत्पाद्यतामिह मोक्षविद्यायाम् ॥ § 9759

## जात्युत्तरस्यावसराभावश्च

अपि चेदं विचार्यताम्—क्व जातिप्रयोगैः प्रत्यवस्थेयम्, सम्यक्साधने परेण प्रयुक्ते, तदाभासे वा ? न तावत्साधनाभासे, तस्य हि येन निमित्तेनासिद्धत्वादिना साधनाभासत्वमुपनतं, तदेव तत्रप्रयोक्तुमुचितम्, (?)जातयः । तेनैव च परः पराजीयते । नापि सम्यक्साधने, तत्र प्रयुक्तानामपि तासामकिंचित्करत्वात् । न हि जातिप्रयोगकलुषितमपि सम्यक्साधनमसाधनीभवितुमर्हति ॥ § 9760

## परपक्षे संचशयाधानमपि न फलम्

अथैकान्तपराजयाद्वरं संदेह इति ताभिरुपक्रम्यते—तत्रापि न तथोपक्रममाणः कमिव प्रत्याययेत् ? न नीतिविदः, नीतिविदस्तावज्ज्ञानन्त्येव, (?')सोऽयं यथोचितमभिवदितुमपारयन् किमप्यालजालमालपितुं प्रवृत्तः, इति । शाकटिकादिप्रत्यायनं तु प्रत्यन्तगह्वरजनपदेषु ग्राम्य सदसि II.648/KSV
लाभादिकामस्य कस्यचित् प्रयोजनवद्भवेदपि कदाचित्, न तु मोक्षशास्त्रे तथाविधोपदेशः पेशल इति ॥ § 9761

१३ ] ष्ठीवित— nyāma-wit_kha
२१ ] म— nyāma-wit_kha
२२ ] नी— nyāma-wit_kha

## जात्युत्तरस्य जल्पाद्यङ्गतया सार्थक्यम्

अत्राभिधीयते—समाहितमेतद्भगवता सूत्रकारेणैव तत्त्वाध्यवसायसंरक्षणार्थं, कण्टकशाखापरिवरणवत् इति वदता । जल्पवितण्डाङ्गभूतानि छलजातिनिग्रहस्थानानि । तदुक्तं छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः इति । भास्यकृदप्याह—छलजातिनिग्रहस्थानानां पृथगुपदेश उपलक्षणार्थः । उपलक्षितानां स्ववाक्ये परिवर्जनं, परवाक्ये च पर्यनुयोगः । जातेस्तु परेण प्रयुज्यमानायाः सुवचः समाधिः, स्वयं च सुकरः प्रयोगः इति ॥ § 9762

## जात्युत्तरप्रयोगकालः

यदा हि मुमुक्षोः आगमाद्वा युक्तितो वा तत्त्वज्ञानमुत्पन्नं, न चाद्यापि भावनाभ्यासप्रसादसमासादिततद्दृढिमातिशयः वर्तते, तस्यामवस्थायां यदि केनचित् किमप्यनुमानप्रायमभिधाय तदाकुलीक्रियेत, तदत्ऽसौ विदितयुक्त्यागमगौरवोऽपि सपदि तदुत्पादिते तत्त्वज्ञाने मनागसंभावनालेशमिवाधिगच्छेत् । तस्मिन् वा दृढप्रत्ययेऽपि तत्पार्श्ववर्तिनः शिष्याः शिथिलितास्था भवेयुः । अतो झटिति स दूषणमपश्यन् प्रतिपक्षं जातिप्रयोगैरप्यसौ शमयेदेव, नोदासीतेत्युक्तं जल्पलक्षणे ॥ § 9763

## जात्युत्तरस्य तत्त्वसंरक्षकत्वम्

परोदिता वा जातीः प्रत्यभिज्ञाय तत्क्षणमेव परिहरेदिति सफ
II.649/KSV जातिव्युत्पादनम् । यथा क्वचिदचिरव्युप्तसस्ये संप्रत्युद्भिद्यमानकोमलाङ्कुरनिकरदन्तुरितसीमनि केदारे तदुपद्रवः द्रुततरगामिनो यतः कुतश्चन चतुष्पदाद्द्विपादाद्वाऽभिशङ्क्यत इति तत्परिहाराय समन्ततो निरन्तरकण्टकशाखासन्ततिपरिचरणमाधीयते, एवमिहापि जात्यादिप्रयोगतदुद्धारद्वारकं तत्त्वाध्यवसायसंरक्षणं कर्तव्यमिति ॥ § 9764

## जात्युत्तरप्रयोगावकाशः

---

३ ] लादी— nyāma-wit__kha
१० ] व्याकु— nyāma-wit__kha
१२--१३ ] शि— nyāma-wit__kha
१३ ] ला— nyāma-wit__kha
१३ ] गि— nyāma-wit__kha
१८ ] दो द्विपदो वा— nyāma-wit__kha
१९ ] द्वा— nyāma-wit__kha

---

८ मुमुक्षोः ] आगमाद्वा इति श्रवणम् । युक्तितः इति मननम् ॥

यत्तु विकल्पितं—क्व जातेः प्रयोगः, सम्यक्साधने, तदाभासेवेति—तदुच्यते—सम्यग्दूषणमपश्यत्ता किल जात्यादि प्रयोक्तव्यम् । तच्च सद्दूषणादर्शनं सम्यक्साधने तदभावादेव भवतु, साधनाभासे वा, प्रमादादिनेवेति कोऽत्र विशेषः ? § 9765

मुमुक्षोस्तु ज्ञाततत्त्वस्य तत्प्रतिकूलवादिना केन चिदाक्षिप्तस्य तत्प्रयुक्ते तत्त्वप्रतिक्षेप बलात् साधनाभासविषय एव सम्यग्दूषणमपश्यतः जातिप्रयोगावसरः । ज्ञात्वाऽपि साधनानामाभासतां यथा तथा सत्वरमेव निर्भर्त्स्यतामयं दुराचारः(?') इति पार्श्वस्थितसुकुमारमतिशिष्यजनोत्साहजन नाय जात्याद्याडम्बरविरचमुचितमेव मुमुक्षोः । मुमुक्षुं प्रति च शास्त्रारम्भात् आंजस्येन तदपेक्षया साधनाभासविषय एव जातिप्रयोगः । अत एव च भाष्यकृता प्रथमं साधनाभासा एव जात्युदाहरणं दर्शितम् ॥ § 9766

लाभादिकामानां तु सम्यक्साधनेऽपि प्रयुक्ते युक्त एव जात्याद्युपक्रमः । इतरथा हि निस्संशय एव पराजयः स्यादित्येतच्च आनुषङ्गिकं प्रयोजनमित्युक्तम् ॥ § 9767

## चपेटादिवर्जने हेतुः

यत्पुनरभिहितं—असदुत्तरकथने कथं न चपेटादिकं प्रयुज्यत इति—तदप्यसत्—तस्यात्यन्तमलौकिकत्वात् । लोको हि तदेवं मन्येत— § 9768
II.650/KSV

नूनमेष न जानाति वक्तुं सदृशमुत्तरम् ।
अन्यथा वाचमुत्सृज्य पाणिना प्रहरेत् कथम् ॥§ 9770

खेदयेद्वादिनं यस्तु हस्तपादादिचापलैः ।
स संसद्युच्यते सद्भिः भण्ड एव न पण्डितः ॥§ 9772

जात्योपक्रममाणस्तु न तथैष विहस्यते ।
न हि संदूषणच्छाया तत्रात्यन्तमसङ्गता ॥§ 9774

तन्न कौपीनवसनापनयादिसाम्यं जात्युत्तराणामिति ॥ § 9775

## जातिप्रयोगलाभः कस्य ?

यत्तु कस्तैः प्रत्याय्यत इति—तन्न—न सर्वः सर्वज्ञकल्पो भवति, न च शाकटिकतुल्यः । सन्ति हि मध्यमदशावर्तिनः जनाः; त आराधयिष्यन्त

२--३ ] स— nyāma-wit_kha
६ ] पक्षे— nyāma-wit_kha
६ ] स— nyāma-wit_kha
१० ] आक्रम्ये— nyāma-wit_kha

इत्यलं प्रसङ्गेन ॥ § 9776

यत्पुनः असदुत्तराणामानन्त्यात् कथं चतुर्विंशतिसंख्येति—तत्राप्युच्यते—सत्यप्यानन्त्ये जातीनामसंकीर्णोदाहरणविवक्षया चतुर्विंशतिप्रकारत्वमुपवर्णितं, न तु तत्संख्यानियमः कृत इति ॥ § 9777

## सूत्रपदयोजनाक्रमः

तदत्र साधर्म्येण प्रत्यवस्थानं अविशिष्यमाणं स्थापनाहेतोः तत्साधर्म्यसमा जातिः। सा च साधर्म्यहेतौ वैधर्म्यहेतौ च प्रयुज्यते वैधर्म्येण प्रवर्तमानं तथैव वैधर्म्यसमा जातिः। उत्कर्षापकर्षाभ्यां प्रत्यवस्थानं उत्कर्षापकर्षसमे जाती इत्येवं सर्वत्र योज्यम् ॥ § 9778

स्थापनाहेतुतश्चाविशेष्यमाणत्वं जातिवाद्यभिप्रायेण तासां द्रष्टव्यम्। जा-
II.651/KSV तिवादी ह्येवं वदति—यथा भवत्प्रयुक्तं साधनं तथेदमपि किमिति न भवतीति। अत एव हेतुप्रतिबिम्बनद्वारक एव जात्युपन्यास इत्युक्तम् ॥ § 9779

## साधर्म्यवैधर्म्यसमौ

अथ विशेषलक्षणान्याह। तत्र— § 9780

### साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ ५. १. २ ॥ § 9781

प्रतिषेधापेक्षया पुंलिङ्गनिर्देश इति तत्र तत्र द्रष्टव्यम्। तत्र च साधर्म्येण वैधर्म्येण वा साधनमभिधाय सिषाधयिषितपक्षोपसंहारे साधनवादिना कृते, साध्यधर्मविपर्ययोपपादनाय साधर्म्येण प्रत्यवस्थानमविशिष्यमाणं स्थापनाहेतुतः—साधर्म्यसमः प्रतिषेधः ॥ § 9782

## साधर्म्यसमोदाहरणम्

उदाहरणं तु—अनित्यः शब्दः, प्रयत्नानन्तरीयकत्वात्, यत् प्रयत्नानन्तरीयकं, तत् अनित्यं दृष्टम्, यथा घटः—इति साधर्म्येण हेतौ प्रयुक्ते, जातिवादी साधर्म्येणैव प्रत्यवतिष्ठते—नित्यः शब्दः, निरवयवत्वात्, निरवयवं द्रव्यं आकाशादि नित्यं दृष्टमिति। न चात्र विशेषहेतुरस्ति, घटसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्यः शब्दः, न पुनः आकाशसाधर्म्यान्निरवयवत्वान्नित्यः शब्द इति ॥ § 9783

५ ] हेतुतः— nyāma-wit_kha
७ ] वै— nyāma-wit_kha
१६ ] सा— nyāma-wit_kha

## वैधर्म्यसमोदाहरणम्

तथाऽत्रैव वैधर्म्येण । त्यवस्थानं—नित्यः शब्दः, निरवयवत्वात्, यत् पुनरनित्यं तत् सावयवं दृष्टम्, यथा घटादि द्रव्यमिति । न चास्ति II.652/KSV विशेषहेतुः, घटसाधर्म्यात् प्रयत्नानन्तरीयकत्वात् अनित्यः शब्दः, न पुनः घटवैधर्म्यात् निरवयवत्वात् नित्य इति ॥ § 9784

वैधर्म्यहेतावपि साधनादिना प्रयुक्ते, अनित्यः शब्दः, प्रयत्नानन्तरीयकत्वात्, यदनित्यं न भवति, तत् प्रयत्नानन्तरीयकमपि न भवति, आकाशादिवत्—इत्यत्र एतदेव पूर्वोक्तं साधर्म्यवैधर्म्यप्रत्यवस्थानद्वयमुदाहर्तव्यमिति ॥ § 9785

यथा क्वचिदवसरे स्वयं प्रयोगो जातीनामुपयुज्यत इति तत्स्वरूपव्युत्पादनमुपक्रान्तम् एवं परप्रयुक्तानां तासां उत्तरमपि वक्तव्यम् ।अतस्तद्व्युत्पादनार्थमाह— § 9786

**गोत्वाद्गोसिद्धिवत्तत्सिद्धिः ॥ ५. १. ३ ॥** § 9787

साधर्म्यवैधर्म्यसमयोरिदमुत्तरम् । यदि साधर्म्यमात्रं वैध र्म्यमात्र वा साध्यसाधनं प्रतिज्ञायेत, स्यादियमनवस्था । भवेच्च भवत्प्रयुक्तानामीदृशामपि स्थापनाहेतोरविशेषः । विशिष्टं तु साधर्म्यं वैधर्म्यं वा प्रयोजकं मुच्यमानं नैवंविधैः प्रत्यवस्थानैः उपहन्यते । यथा सत्यपि सत्तादिसामान्यसंबन्धे, सत्यपि शुक्लादिगुणसंबन्धे, सत्यपि चलनादिकर्मयोगे न गौः तथात्वेन तत्साधर्म्यात् सिद्ध्यति, अश्वादिवैधर्म्याद्वा, किन्तु अव्यभिचारिणः गोत्वादिसंबन्धादेव । तथेहाप्यस्खलितनियमं साधर्म्यं, वैधर्म्यं वा साध्यसिद्धिनिबन्धनम्, न साधर्म्यादिमात्रमिति ॥ § 9788
II.653/KSV

## उत्कर्षादिसमाः

**साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षा पकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः ॥ ५. १. ४ ॥** § 9789

१ ] Correction : ; ¹ (sic !)
५ ] वें— nyāma-wit_kha
१० ] प्रकार— nyāma-wit_kha
१३ ] को— nyāma-wit_kha
१७ ] था— nyāma-wit_kha

१० तासां ] अन्येनासदुत्तरे दत्ते; तत्र समीचीनोत्तरादाने पराजयः ॥
१८ र्म्यात् ] साधर्म्यमात्राद्वस्तुसिद्धिश्चेत्, सत्तासाधर्म्यात् गौरप्यश्वो भवेत् ॥
२० मिति ] सिद्धिः—ज्ञप्तिः, निष्पत्तिश्च । निष्पत्तिरत्र स्वरूपावाप्तिः । गोः रूपं हि गोत्वादेव सकले तरव्यावृत्तं सर्वसमानं च सिध्यति । सत्तादिः शुक्लादिर्वा न तादृशगोत्वस्वरूपसाधक भवति ॥

दृष्टान्तधर्मं साध्ये धर्मिणि योजयन्—असन्तमध्यारोपयन् उत्कर्षेण प्रत्यवस्थानं यत् करोति, स उत्कर्षसमः प्रतिषेधः । यथा—अनित्यः शब्दः प्रयत्नानन्तरीयकत्वात्, घटवत्—इत्युक्ते, अपर आह—यदि प्रयत्नानन्तरीयकत्वात्, घटवदनित्यः शब्दः, घटवदेव मूर्तोऽपि भवति । न चेन्मूर्तः, घटवदनित्योऽपि मा भूदिति मूर्तत्वस्य धर्मान्तरस्य प्रसंजनमुत्कर्षसमः ॥
§ 9790

## अपकर्षसमः

दृष्टान्तधर्मविकल्पनेनैव साध्यधर्मिणि सिद्धस्यापि धर्मस्यापकषण प्रत्यवस्थानमपकर्षसमः । पूर्वस्मिन्नेव प्रयोगे, घटः खलु प्रयत्नानन्तरीयकस्सन् अश्रावणो दृष्टः, एवं शब्दोऽपि प्रयत्नानन्तरीयकत्वादश्रावणोऽस्तु । न चेदश्रावणः, घटवदनित्योऽपि मा भूदिति सतः श्रावणत्वस्यापसारणमपकर्षसमः ॥ § 9791

## वर्ण्यसमः, अवर्ण्यसमः

ख्यापनीयः—वर्ण्यः—प्रतिपिपादयिषितः साध्यधर्मः । तद्विपर्ययात् अवर्ण्यः—सिद्धः दृष्टान्तधर्मः । तावेतौ (?')वर्ण्यावर्ण्यौ विपर्यस्यन्— इतरमितरेण
II.654/KSV समीकुर्वन् प्रत्यवस्थानं यत् करोति, तौ वर्ण्यावर्ण्यसमौ * प्रतिषेधौ भवतः । यदि शब्दः नित्यत्वेन वर्ण्यते—साध्यते, घटोऽपि वर्ण्यतामिति वर्ण्यसमः । घटश्चेन्न वर्ण्यते, शब्दोऽपि मा वर्णीत्यवर्ण्यसमः ॥ § 9792

## विकल्पसमः

धर्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमः प्रतिषेधः । तत्रैव प्रयोगे—प्रयत्नानन्तरीयकं किंचिन्मृदु दृष्टं, दुकूलराङ्कवशय्यादि; किंचित् कठिनं, कर्परपरश्वधादि । एवं प्रयत्नानन्तरीयकं किंचिदनित्यं भविष्यति घटादि, किंचिन्नित्यं शब्दादीति ॥ § 9793

## साध्यसमः

३--४ ] अ— nyāma-wit__kha
५ ] तद्धर्मो मा— nyāma-wit__kha
८--९ ] क— nyāma-wit__kha
१४ ] व— nyāma-wit__kha
१७ ] ग— nyāma-wit__kha

१२ र्ण्यः ] वर्ण्यः—प्रकृत इति यावत् ॥
१४ * ] साधर्म्यमात्राद्वस्तुसिद्धिश्चेत्, सत्तासाधर्म्यात् गौरप्यश्वो भवेत् ॥
२० ब्दादीति ] अतो न निर्णयः कर्तुं शक्यत इति ॥

उभयोरपि साध्यदृष्टान्तयोः साध्यत्वापादनेन प्रत्यवस्थानं साध्यसमः प्रतिषेधः । यदि यथा घटास्तथा शब्दः, प्राप्तं तर्हि यथा शब्दः, तथा घट इति । शब्दश्च अनित्यतया साध्य इति घटोऽपि साध्य एव स्यात् । अन्यथा हि न तेन तुल्यो भवेदिति ॥ § 9794

अत्र पंचानामुत्तरम्— § 9795

किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः ॥ ५-१-५ ॥ § 9796

किंचित्साधर्म्यादुपसंहारः सिद्ध्यति—यथा गौः, एवमयं गवयः इति । न तु सर्वथा रूपाभेदः तयोः आपादयितुं शक्यः । प्रमाणावगतस्वभावभेदानां भावानामितरेतररूपसंकरस्य कर्तुमशक्यत्वात् । एवंच स्वप्रतिबन्धसाधर्म्ये सुस्थिते स्वसाध्यमुपस्थापयति स्थापनाहेतौ साध्यदृष्टान्तयोर्धर्मविकल्पमापादयता वैधर्म्यं च किंचिदभिदधता प्रतिषेधः कर्तुं न लभ्यत इति ॥ § 9797

II.655/KSV

अथ षष्ठस्योत्तरम्— § 9798

साध्यतिदेशाच्च दृष्टान्तोपपत्तेः ॥ ५-१-६ ॥ § 9799

यदुच्यते घटोऽपि शब्दवत् साध्यो भवत्विति—तन्नैवम्—लौकिकपरी क्षकाणां यस्मिन्नर्थे बुद्धिसाम्यम्, स दृष्टान्तः । तेनाविपरीततया शब्दे ऽतिदिश्यते । यथा घटः प्रयत्नानन्तरीयकः सन् अनित्यः, एवं शब्दोऽ पीति । एवं साध्यातिदेशात् दृष्टान्त उपपद्यमाने न तस्य साध्यत्वाभि धानमुपपद्यते ॥ § 9800

## प्राप्तिसमाप्राप्तसमौ

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वादप्राप्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ ५. १. ७ ॥ § 9801

प्राप्त्यप्राप्तिविकल्पनपूर्वकमुभयत्रापि दोषापादनं प्राप्त्यप्राप्तिसमौप्रतिषेधौ भवतः । हेतौ साधनवादिना प्रयुक्ते, पर आह—सोऽयं हेतुः प्राप्य वा साध्यं साधयेत्, अप्राप्य वा ? प्राप्य चेत्, द्वयोर्लब्धस्वरूपयोरेव प्राप्तिर्भवतीति ।

९ ] कर्तुं— nyāma-wit_kha
१०--११ ] बिम्बसामर्थ्ये— nyāma-wit_kha
२५ ] र— nyāma-wit_kha

१२ इति ] साधर्म्यं, वैधर्म्यं वा न स्वेच्छया निर्णेतुं युक्तमिति सारम् ॥
१९ ते ] न दृष्टान्तदार्ष्टान्तिकयोरभेदः, अभेदे तदसंभवात् । अतः सर्वत्र संप्रतिपत्तिरावश्यकी ॥

किं कस्य साध्यम्, साधनं वेत्यविशेषः । अप्राप्य तु साधकत्वमनुपपन्नं, अतिप्रसङ्गात् । न ह्यप्राप्य प्रदीपः प्रकाश्य प्रकाशयेदिति ॥ § 9802

अनयोरुत्तरम्— § 9803

घटादिनिष्पत्तेः पीडने चाभिचारादप्रतिषेधः ॥ ५. १. ८ ॥
§ 9804

II.656/KSV

नायं प्रतिषेध उपपद्यते, उभयथाऽपि कारणभावस्य दर्शनात् । दण्डचक्रमूत्रादिकारकानि प्राप्य मृदं घटादिकार्यं निष्पादयन्ति दृश्यन्ते । अभिचारकर्मणा च श्येनादिना दूरस्थस्यापि शत्रोः पाटनं संपाद्यते इति ॥
§ 9805

## प्रसङ्ग-समप्रतिदृष्टान्तसमौ

दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसंगप्रतिदृष्टान्तसमौ ॥ ५. १. ९ ॥ § 9806

अतिप्रसङ्गापादनेन प्रत्यवस्थानं प्रसङ्गसमः प्रतिषेधः । पूर्वोदाहृत एव हेतौ—यद्यप्यनित्यत्वे प्रयत्नानन्तरीयकत्वं साधनम् । प्रयत्नानन्तरीयकत्वे इदानीं किं साधनम् ? तत्साधने किम् ? इति दृष्टान्तस्य घटादेरनित्यतायां कारणं (?')न किंचिदपदिश्यते । तेन तत्कारणान्वेषणातिप्रसङ्गात् प्रसङ्गसमोऽयं प्रतिषेधः ॥ § 9807

## प्रतिदृष्टान्तसमः

प्रतिदृष्टान्तेन प्रत्यवस्थानं प्रतिदृष्टान्तसमः प्रतिषेधः । यथा— घटः प्रयत्नानन्तरीयकस्सन् अनित्यो दृष्टः, एवमाकाशं प्रयत्नानन्तरीयक नित्यं दृश्यते, तद्वच्छब्दोऽपि नित्यः स्यादिति । कः पुनराकाशस्य प्रयत्ना नन्तरीयकत्वं वदेत् ? कूपखननादिनाऽऽकाशकरणं मन्वान एवं ब्रूयादपि कश्चित् ॥ § 9808

II.657/KSV

ननु ! एवमपि व्यभिचारोद्भावनमेतत् सम्यगुत्तरम्, नासदुत्तरप्रकारो जातिप्रयोगः—नैतदेवम्—न हि हेतोरनैकान्तिकत्वमुद्भावयन्नसौ साधुरिव

७ ] णा— nyāma-wit_kha
८ ] पीडनं— nyāma-wit_kha
१३ ] नि— nyāma-wit_kha
१५ ] किं— nyāma-wit_kha
१७ ] मः— nyāma-wit_kha

८ इति ] सत्यं, साध्यसाधनयोः संबन्ध आवश्यकः । बह्निधूमयोः प्रतिबन्धः, अभिचारादाबुद्देश्यत्वं चास्त्येव । न हि एकरूपस्संबन्धः सर्वत्रेत्याशयः ॥

जातिवादी प्रत्यवतिष्ठते । अपि तु प्रतिदृष्टान्तबलेन नित्यत्वमेव साधयन्नुत्थित इति जातिप्रयोग एवायम् । हेत्वाभासा अपि स्वरूपनिगूहनपुरस्सरमपर-हेतुप्रतिबिम्बवर्त्मना प्रदर्श्यमाना जातितां प्रतिपद्यन्त एव ॥ § 9809

अत्र प्रसङ्गसमस्य तावदुत्तरमाह— § 9810

प्रदीपोपादानप्रसङ्गविनिवृत्तिवत्तद्विनिवृत्तिः ॥ ५-१-१० ॥ § 9811

असिद्धं हि नाम साध्यते, न सिद्धम्; तत्र प्रयत्नवैफल्यात् । सान्धकारे हि सद्मनि पिठरादिपदार्थदर्शनाय प्रदीपमुपाददते लौकिकाः, न दीपदर्शनाय दीपान्तरमाहरन्तीति । अन्तरेणापि हि दीपान्तराणि दृश्यत एव प्रदीपः । एवं लौकिकपरीक्षकाणां घटादौ प्रयत्नानन्तरीयकत्वस्य सिद्धत्वात् तत्र कारणापदेशो निष्प्रयोजन इति । तस्मान्नायमपितप्रसङ्गा पादनस्य विषयः ॥ § 9812

अथ प्रतिदृष्टान्तसमस्योत्तरम्— § 9813

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ ५-१-११ ॥ § 9814

प्रतिदृष्टान्त एव साधकबुद्ध्या यदि त्वयोपन्यस्तः तर्हि विशेषहेतुर्वक्तव्यः, अनेन हेतुना प्रतिदृष्टान्त एव साधकः, न दृष्टान्त इति । न चासौ विशेषे हेतुरुच्यते । तस्मान्न प्रतिदृष्टान्तः सिद्धिहेतुरिति दृष्टान्त एव—साधको भवति । प्रतिदृष्टान्तहेतुत्वेऽपि स्थिते सति अहेतु र्दृष्टान्तः न हि साधकः स्यात् । II.658/KSV
न च तदस्तीत्युक्तम् । अतो नाहेतुर्दृष्टान्तः ॥ § 9815

अथ यथा प्रतिदृष्टान्तो न साधकः, एवं दृष्टान्तोऽपि मा भूदित्यनया नीत्या प्रत्यवतिष्ठते, स हन्त तर्हि प्रतिदृष्टान्तस्य तावदहेतुत्वं स्वकण्ठेन कथितमिति तस्मिन्नसाधके सति दृष्टान्त एव साधक इति ॥ § 9816

## अनुत्पत्तिसमः

प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ ५. १. १२ ॥ § 9817

अनुत्पत्त्या प्रत्यवस्थानम्—अनुत्पत्तिसमः प्रतिषेधः । प्राक्तन एव प्रयोगे जातिवाद्याह—अनित्य इत्युत्पत्तिधर्मक उच्यते । यश्चोत्पत्तिधर्मकः,

---

१ ] दृ— nyāma-wit_kha
२ ] ग्रह— nyāma-wit_kha
७ ] प्र— nyāma-wit_kha
१४ ] त्वेन— nyāma-wit_kha
१७ ] द्ध— nyāma-wit_ca
१९ ] न— nyāma-wit_kha
२१ ] ह— nyāma-wit_kha
२२ ] के— nyāma-wit_kha

---

१७ तिदृष्टान्तः ] सिद्धस्यैव खलु हेतुत्वं, दृष्टान्तत्वं वा ॥

तस्योत्पत्तेः पूर्वमनुत्पत्त्या भवितव्यम् । अनुत्पन्ने च शब्दाख्य धर्मिणि प्रयत्नानन्तरीयकत्वं धर्मः क्व वर्तताम् ? अलब्धपक्षवृत्तिश्च कथमनित्यत्वं साधयतु । असिद्धे चानित्यत्वे शब्दस्य बलान्नित्यत्वमेव भवति कारणाभावादिति । अनित्यत्वसिद्धिकारणस्य प्रयत्नानन्तरीयकत्वस्याभावादित्यर्थः । अथवा शब्दोत्पादककारणाभावादनुत्पन्ने शब्दे निराश्रयो हेतुरिति ॥ § 9818

अस्योत्तरम्— § 9819

## तथाभावादुत्पन्नस्य कारणोपपत्तेः न कारणप्रतिषेधः ॥ ५-१-१३ ॥ § 9820

शब्दाख्यधर्मिणः सिद्धस्य सतः नित्यत्वमनित्यत्वं वा विचार्यते । तदसिद्धौ हि नित्यत्वमपि कस्य भवानभिदधीत् ? उत्पन्नस्य चास्य तथा II.659/KSV भावो भवति, नानुत्पन्नस्य । उत्पन्नः खल्वयं शब्द इति भवति नानुत्पन्नः । प्रागुत्पत्तेरलब्धात्मनः किमुच्यते ? लब्धस्वरूपस्य पुनः अनित्यत्वकारणप्रयत्नानन्तरीयकत्वस्य सद्भावादयुक्त एवायं प्रतिषेधः ॥ § 9821

### संशयसमः

## नित्यानित्यत्वसाधर्म्यात्संशयः ॥ ५. १. १४ ॥ § 9822

नित्य नित्यसाधर्म्योपन्यासेन संशयापादनप्रवणं प्रत्यवस्थानं संशयसमः प्रतिषेधः । अनित्यः शब्दः, प्रयत्नानन्तरीयकत्वात् इत्यस्मिन्नेव हेतौ अस्ति शब्दस्यानित्यसाधर्म्यं प्रयत्नानन्तरीयकत्वम्, अस्ति च नित्येन सामान्येन साधर्म्यं ऐन्द्रियकत्वम् । अतः किमनित्यसाधर्म्यात् प्रयत्नानन्तरीयकत्वात् अनित्यः शब्दः, उत नित्यसाधर्म्यात् ऐन्द्रियकत्वान्नित्यः इति संशयः—एवं परः प्रत्यवतिष्ठते । न च साधर्म्यसमप्रयोग एवायमाशङ्कनीयः, संशयापादनप्रवणत्वादस्येति ॥ § 9823

अस्योत्तरम्— § 9824

## साधर्म्यात्संशये न संशयः वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ ५. १. १५ ॥ § 9825

स्थाणुर्वा पुरुषो वेति स्थाणुपुरुषयोस्साधर्म्यादूर्ध्वत्वादेः संशयो भवति, न तु शिरःपाण्यादिवैधर्म्यात् । प्रत्युत ततोऽसौ निवर्तते । यदि पुन-

४ ] तथा च— nyāma-wit__kha
१३ ] स— nyāma-wit__kha
१७ ] त्वसा— nyāma-wit__kha

१ म् ] अन्यथा उत्पत्तिः कथम् ?

रुभयथाऽपि साधर्म्यादिव वैधर्म्यादपि संशयः स्यात् तथा सत्यत्यन्तसंशयः प्राप्नोति । इह चनि विशेषदर्शनस्थानीयमनित्यत्वसाधनं शब्दे प्रयत्नानन्तरीयकत्वमस्तीति नित्यत्वं सामान्यगतं संशयकारणमिति नाभ्युपगम्यते । II.660/KSV तस्मादप्रतिषेधोऽयं नित्यसामान्यसाधर्म्यनिबन्धनसंशयापादनरूपः ॥ § 9826

## प्रकरणसमः

उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः ॥ ५. १. १६ ॥
§ 9827

पक्षप्रतिपक्षौ निर्णयलक्षणे व्याख्यातौ । तावेव प्रकरणम् । प्रकरणमनतिवर्तमानः प्रकरणसमः प्रतिषेधो भवति । पूर्वस्मिन्नेव प्रयोगे नित्यः शब्दः, निरवयवत्वात्, आकाशवत् इत्येवंजातीयकं प्रतिप्रयोगमुपन्यस्य स्वपक्षमुत्थापयति जातिवादी । साधर्म्यग्रहणं चोपलक्षणम् । वैधर्म्येणापि प्रतिप्रयोगोपन्यासे प्रकरणसम एव प्रतिषेधो भवति । उभयवैधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति । मूलहेतावपि साधर्म्येण वैधर्म्येण वा प्रयुक्ते प्रयोगद्वयमेतद्वेदितव्यम् ॥ § 9828

## प्रकरणसमस्य साधर्म्यवैधर्म्यसमाभ्यां विशेषः

ननु च ! ते एवैते साधर्म्यवैधर्म्यसमे जाती साधर्म्यहेतौ वैधर्म्यहेतौ वा प्रयुज्यमानत्वाच्चतुर्धा स्थितेइति ताभ्यामेव गतत्वात् नाभिनवोऽयं जातिप्रयोगः । चतस्रश्चैता जातय इत्येकत्वमपि न सङ्गतम्—उच्यते—तत्र पर पक्षप्रतिषेधप्रवणतयैव प्रत्यवस्थानमुदाहृतम्, इह तु पक्षसाधनच्छाययेति । अत एव प्रकरणसमोऽयमुच्यते जातिः । अनित्यपक्षवन्नित्य पक्षेऽपि प्रतिक्रियतेऽस्यामिति । उद्भावनभङ्गिभेदाच्च जातिनानात्वम् । असङ्कीर्णोदाहरणविवक्षया चतुर्विंशतिभेदत्वम् । वस्तुतस्तु तासामानन्त्यमित्युक्तम् ॥* § 9829
II.661/KSV

अत्रोत्तरम्— § 9830

१ ] नन्त— nyāma-wit_kha
९ ] स्यन्— nyāma-wit_kha
११ ] सेन— nyāma-wit_ca
१५ ] च तवोत्थिते— nyāma-wit_kha
१७ ] इहैव— nyāma-wit_kha
१८ ] यं— nyāma-wit_kha

१ यः ] सर्वत्र एतादृशसाधर्म्यवैधर्म्ययोः सुलभत्वेन सर्वत्र सदा संशयः स्यात् (Edtext outside numbered paragraph) ॥
२० * ] सर्वत्र एतादृशसाधर्म्यवैधर्म्ययोस्सुलभत्वेन सर्वत्र सदा संशय एव स्यात् ॥[[This seems to be a duplicate of note n="२-६५९-a".]]

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥ ५. १. १७ ॥ § 9831

निर्णयोत्पत्त्या प्रकरणं पर्यवसितं भवति । प्राङ्निर्णयात् तदवस्थमेव । तदिह प्रकरणमुत्थापयता भवता उभयसाधर्म्यं तदुत्थापनकारणमभिहितम्, उभयसाधर्म्यात् प्रक्रियासिद्धेरिति ब्रुवता । उभयसाधर्म्ये च—मदुक्तमपि साधर्म्यमस्त्येव, अन्यथा उभयशब्दार्थः कः ? एवं च तदभ्यनुज्ञातं भवतीति तत्प्रतिषेधो नोपपद्यते । प्रतिषेधोपपत्तौ वा नोभयसाधर्म्यं प्रकरणकारणं सिध्यतीति । निर्णयोत्पत्तिनिमित्तं च प्रकरणोपरमाय न किंचिदुक्तम्,* उभयसाधर्म्याभिधानादिति ॥ § 9832

## अहेतुसमः

त्रैकाल्यानुपपत्तेर्हेतोरहेतुसमः ॥ ५. १. १८ ॥ § 9833

कालत्रयानुपपत्त्या हेतुमाक्षिप्य क्रियमाणः प्रतिषेधः अहेतुसमोभवति । हेतुः साधनम् । साधनं च साध्यात् पूर्वं पश्चाद्वा सह वा भवेत् ? यदि पूर्वम्, असति साध्ये तत् कस्य साधनम् ? अथ पश्चात् साधनं, पूर्वं साध्यम्; तदसति साधने कस्येदं साध्यं भवेत् । पूर्वसिद्धे वा साध्ये किं साधनेन ? अथ युगपत् साध्यसाधने भवतः, न तर्हि तयोः सव्येतरगोविषाणयोरिव साध्यसाधनभावो भवेत्—इत्येवमयं हेतुः अहेतोर्न विशिष्यते ॥ § 9834

II.662/KSV

अस्योत्तरम्— § 9835

न हेतुतस्साध्यसिद्धेस्त्रैकाल्यासिद्धिः ॥ ५. १. २० ॥ § 9836

न त्रैकाल्यासिद्धिः । कस्मात् ? हेतुतः साध्यसिद्धेः । उत्पत्तौ तावदयं पर्यनुयोगः, पूर्वसिद्धेन हेतुना तन्त्वादिना पश्चाद्भाविनोऽसत एव कार्यस्य पटादेः सिद्धिरित्युक्तत्वात् । बुद्धिसिद्धं तु तदसत् न्या. सू. ४-१-५० इति । ज्ञप्तावपि परिहृत एष दोषः, उपलब्धिहेतोः उपलब्धिविषयस्य चार्थस्य पूर्वापरसहभावानियमात् । यथादर्शनं व्यवस्थेतिप्रमाणपरीक्षयामभिधानात् । दृश्यते च निर्वर्तनहेतुना निर्वर्तनीयनिर्वृत्तिः, उपलब्धिहेतुना च उपलभ्य-

३ ] गुक्त— nyāma-wit_kha
१२--१३ ] अ— nyāma-wit_kha
१३--१४ ] साधनं तद— nyāma-wit_kha
१४--१५ ] अ— nyāma-wit_kha
२३ ] स्य— nyāma-wit_kha

८ *] अतश्च त्वया मत्पक्षः न निरस्त एवेति ममैव जयः ॥

स्योपलम्भः इति । प्रमाणसिद्धे च वस्तुनि कोऽयमाक्षेपः ? § 9837
प्रतिषेधे च तुल्योऽयमनुयोग इत्याह— § 9838

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ ५-१-२० ॥ § 9839

प्रतिषेधोऽपि प्रतिषेध्यात् पूर्वं, पश्चात्, सह वा भवेत् ? इति विकल्प्यमाने न प्रतिषेद्धव्यं प्रतिषेद्धुमुत्सहत इति ॥ § 9840

## अर्थापत्तिसमः

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ ५-१-२१ ॥ § 9841

अर्थादापद्यते प्रतिपक्षसिद्धिः—इत्येवं क्रियमाणः प्रतिषेधः अर्थापत्तिसमो भवति । पूर्वस्मिन्नेव प्रयोगे—यदि घटसाधर्म्यात् प्रयत्नानन्तरीय कत्वात् II.663/KSV अनित्यः शब्दः, अर्थादापद्यते आकाशसाधर्म्यान्नित्य इति । अस्ति चास्य नित्येन साधर्म्यमाकाशादिना द्रव्येण निरवयवत्वमिति । उद्भावन प्रकारभेदाच्च जातिभेद इत्युक्तम् ॥ § 9842

अस्योत्तरम्— § 9843

अनुक्तस्यार्थादापत्तेः पक्षहानेरुपपत्तिः ॥ ५. १. २२ ॥ § 9844

अनुपपादितसाधनमनुक्तमप्यर्थादापद्यत इति वदतः पक्षहानिरप्युपपद्यते । मामकानित्यपक्षसिद्धौ हि सत्याम्, अर्थादापद्यते तावकस्य नित्यपक्षस्य हानिरिति ॥ § 9845

दोषान्तरमाह— § 9846

अनैकान्तिकत्वाच्चार्थापत्तेः ॥ ५-१-२३ ॥ § 9847

उभयपक्षतनानेयमर्थापत्तिः, विपर्ययेणापि प्रयोक्तुं शक्यत्वात् । नित्यः शब्दः, निरवयवत्वात् इत्येवमप्युक्ते शक्यं वक्तुम्, यदि नित्याकाशसाधर्म्यात् निरवयवत्वात् नित्यः शब्दः अर्थादापद्यते, अनित्यघटादिसाधर्म्यात् प्रयत्नानन्तरीयकत्वादनित्य इति । न चैवमपि काचिदर्थसिद्धिः । न खलु वै घनस्य ग्रावणः पतनमित्युक्ते अर्थादापद्यते द्रवस्य वारिणः पतनाभाव इति ॥ § 9848

---

४ ] ध्यं— nyāma-wit_kha
१४ ] म— nyāma-wit_kha
११ ] मर्थे— nyāma-wit_kha

---

१ इत्याह ] प्रमाणस्यैव कस्यचिदभावात् प्रमाणसिद्धे वस्तुनि इति कथम् ? इति यदि प्रत्यवतिष्ठेत तदा प्रतिबन्द्येवोत्तरमित्यर्थः ॥
१६ हानि ] नित्यपक्षस्य हानिः अर्थादापद्यत इत्यन्वयः ॥
२३ वै ] घनस्य ग्रावा—करका ॥

## अविशेषसमः

### एकधर्मोपपत्तेः क्वचिदनुपपत्तेः प्रतिषेधाभावः ॥ ५-१-२५ ॥

§ 9849

II.664/KSV

अविशेषोपपादनेन प्रत्यवस्थानं—अविशेषसमः प्रतिषेधः । यदि शब्द-घटयोरेकधर्मः प्रयत्नानन्तरीयकत्वमस्तीति तयोरनित्यत्वाविशेष उच्यते—तर्हि सर्वभावानामविशेषप्रसङ्गः । कथम् ? सद्भावोपपत्तेः— सत्तासंबन्धादित्यर्थः । सोऽयमविशेषसमः प्रतिषेधः ॥ § 9850

एतस्योत्तरम्— § 9851

### क्वचित्तद्धर्मोपपत्तेः क्वचिदनुपपत्तेः प्रतिषेधाभावः ॥ ५-१-२५ ॥

§ 9852

क्वचिदविशेषापादनहेतुरुपपद्यते धर्मः, क्वचित्तु नोपपद्यत इत्येवमयम प्र-तिषेधः । शब्दघटयोरेको धर्मः प्रयत्नानन्ततरीयकत्वमस्ति, येन तयोर्धर्मान्त-रमनित्यत्वमविशेषरूपमुपपाद्यते । न तु सर्वभावानामीदृशमविशेषकारणं धर्मजातमस्ति ॥ § 9853

यत्तु सद्भावोपपत्तेरिति, तेन किं धर्मान्तरमविशेषरूपं साध्येत ? अनित्यत्वमेवेति चेत्, तर्ह्ययं प्रतिज्ञार्थो व्यवतिष्ठेत अनित्याः सर्वे भावाः, सत्त्वात् इति । स चायमनुपपन्नः दृष्टान्तानुपपत्तेः । सर्वभावानां पक्षीकृतत्वात् दृष्टान्तो न कश्चिदवशिष्यते । न च प्रतिज्ञातैकदेश एव दृष्टान्तीकर्तुं शक्यः, सिद्धसाध्यभेदात् । साध्यः प्रतिज्ञातोऽर्थो भवति, सिद्धश्च दृष्टान्तः । न च दृष्टान्तरहितो हेतुः स्वसाध्योपस्थापनसामर्थ्यमश्नुते ॥ § 9854

न च सौगतोक्तनीत्या नित्येभ्यो व्यापकानुपलब्ध्या सत्त्वं व्यावर्तित म-नित्येष्वेव प्रतिष्ठां लभते । यैव विपक्षाद्व्यावृत्तिः स एव साध्येनानुगम इति वक्तव्यम्—तन्नीतेः प्रागेव प्रतिक्षेपात् । प्रत्युक्तं हि विस्तरतः क्षणभङ्गसाध-नमिति ॥ § 9855

II.665/KSV

किंचिद्धि सत्त्वयोगि भावजातमनित्यं भवति, किंचिन्नित्यमिति नाय-मेकान्तः—सत्त्वादनित्याः सर्वे भावा इति ॥ § 9856

अपि च सर्वभावानामनित्यत्वे साध्यमाने तदन्तर्गतत्वाच्छब्दस्याप्यनित्य-त्वमभ्युपगतं भवेदित्येवमप्ययमप्रतिषेधः ॥ § 9857

## उपपत्तिसमः

---

१२ ] न— nyāma-wit_kha
१२ ] प— nyāma-wit_kha
१६ ] न— nyāma-wit_kha
१६ ] तेः— nyāma-wit_kha
२४ ] रूप— nyāma-wit_kha

उभयकारणोपपत्तेरुपपत्तिसमः ॥ ५. १. २६ ॥ § 9858

उभयकारणोपपत्त्या पक्षद्वयोपपत्तिवर्णनम्—उपपत्तिसमः प्रतिषेधः ॥ § 9859

यद्यनित्यत्वकारणं प्रयत्नानन्तरीयकत्वमुपपद्यते शब्दस्येति अनित्यः शब्दः, नित्यत्वकारणमपि निरवयवत्वमस्योपपद्यत इति नित्यः स्यात् । उभयत्रापि कारणोपपत्तेः ॥ § 9860

ननु सैवेयं साधर्म्यादिसमा प्रकरणसमा वा जातिः, न भेदान्तरम्—मैवम्—उद्भावनाप्रकारेण भेदात् । परपक्षोपमर्दबुद्ध्या साधर्म्यादिसमा जातिः प्रयुज्यते । पक्षान्तरोत्थापनास्थया प्रकरणसमा । अप्रतिपत्तिपर्यवसायित्वाशयेनेयमुपपत्तिसमेति ॥ § 9861

अत्रोत्तरम्— § 9862

उपपत्तिकारणानुज्ञानादप्रतिषेधः ॥ ५-१-२७ ॥ § 9863

उभयकारणोपपत्त्या प्रतिषेधमभिदधता पक्षद्वयकारणोपपत्तिः अनुज्ञाता भवति । सा चेदनुज्ञाता कथमेकतरपक्षप्रतिषेधः । एकतरपक्षप्रतिषेधश्चेत् कथमुभयकारणोपपत्तिः । उभयपक्षकारणोपपत्तिः एकतरपक्षप्रतिषधश्चेति विप्रतिषिद्धम् । व्याघातादेव ततपक्षप्रतिषेधोऽवकल्पत इति चेत्—समानो व्याघातः । तेन हि परपक्षवत् स्वपक्षोऽपि प्रतिहन्यत *इति । न हि व्याघात एकं पक्षं साधयति, एकं बाधत इति ॥ § 9864 II.666/KSV

## उपलब्धिसमः

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमःप्रतिषेधः ॥ § 9865

निर्दिष्टस्य साध्यधर्मसिद्धिकारणस्याभावेऽपि साध्यधर्मोपलब्ध्या प्रत्यवस्थानं—उपलब्धिसमः प्रतिषेधः । यदेतदनित्यतायां शब्दस्य प्रयत्ना नन्तरीयकत्वं कारणमुपदिष्टम्, तस्याभावेऽपि प्रबलप्रभंजनजवभज्यमानजरत्पादपपातप्रभवेऽपि शब्दे दृश्यत एवानित्यत्वम् । अन्यत्रापि विद्युदादौ विनाऽपि प्रयत्नानन्तरीयकत्वमुपलभ्यत एवानित्यतेति ॥ § 9866

अस्योत्तरम्— § 9867

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ ५-१-२९ ॥ § 9868

१६ ] विकल्पयिष्य— nyāma-wit_kha
१७ ] एव— nyāma-wit_kha
२०--२१ ] य— nyāma-wit_kha
२२ ] म— nyāma-wit_kha
२३ ] वे— nyāma-wit_kha

१७ *] इष्टापत्तौ च केवलवैतण्डिकः स्यात् । एतस्य तु वादे नाधिकारः ॥

अत्रैतदेव तावद्वक्तव्यं सपक्षैकदेशवृत्तित्वमिदमस्य हेतोरुद्भावितम् । न च सपक्षैकदेशवृत्तिरगमकः । प्रयत्नानन्तरीयकत्वमनित्यत्वे प्रतिबद्धम्, न पुनरनित्यं प्रयत्नानन्तरीयकत्वे । यत्प्रयत्नानन्तरोयकम्, तदनित्यम् इति हि व्याप्तिः, न तु यदनित्यम्, तत्प्रयत्नानन्तरीयकम् इति । यथा यत्राग्निस्तत्र धूमः इति न । यत्र धूमस्तत्राग्निः इति ॥ § 9869

एवं प्रयत्नानन्तरीयकत्वमन्तरेण समीरणरयपात्यमानवनस्पत्यादिशब्दे विद्युदादौ वा येयमनित्यतोपलब्धिः, न सा तस्य हेतुतामपहन्तीति ॥ § 9870
II.667/KSV

## शब्दस्य प्रयत्नाधीनत्वम्

अपि च प्रयत्नानन्तरीयकत्वमिति कारणादुत्पत्तिरियमभिधीयते, न तु कारणं नियम्यते प्रयत्न एवेति । तत्र पवननोदनजनिततरुशब्दवत् असत्यपि प्रयत्ने, कारणान्तरं तदुत्पादकं भविष्यति । कारणान्तरजन्येऽप्यनित्यत्वं शब्दे विद्युदादौ वा न विरुद्धमिति ॥ § 9871

कथं पुनरिदमेव गम्यते—प्रयत्नादिभिरसन्नुत्पाद्यते शब्दः, न पुनस्सन्नभिव्यज्यत इति—सतोऽनुपलब्धौ निमित्ताभावात् । आवरणं निमित्तमिति चेत्—न—*मूलोदकादिषु मृद इव शब्दे कस्यचिदावरणस्याग्रहणात् । तस्मान्न मूलोवकादिना तुल्यः शब्दः इत्यसन्नेव प्रयत्नादिना क्रियत इति ॥ § 9872

## अनुपलब्धिसमः

### तदनुपलब्धेरनुपलम्भादभावासिद्धौ तद्विपरीतोपपत्तेः अनुपलब्धिसमः ॥ ५-१-३० ॥ § 9873

अनुपलब्धेरनुपलम्भोपन्यासेन प्रत्यवस्थानम्—अनुपलब्धिसमः प्रतिषेधः । यदुक्तम्—आवरणानुपलम्भादसत्यावरणे प्रागुच्चारणादग्रहणादसन्नेव शब्दः प्रयत्नेनाभिनिर्वर्यत्त इति—तदयुक्तम्—आवरणानुपब्धेरप्यनुपलम्भात् तस्याश्चानुपलम्भादभावः, अनुपलब्धेरभावात् उपलब्धिर्भवति, प्रतिषेधद्वयेन विधेरेव प्रतीतेः । आवरणोपलब्धेश्चावरणसत्ता सिद्ध्यतीति तत्कृतमेव शब्दस्याग्रहणम्, नासत्त्वकृतमित्यभिव्यंजकमेवास्य प्रयत्नादि कार-

८ ] त्वादि— nyāma-wit__kha
९ ] त्स— nyāma-wit__kha
१२ ] सावु— nyāma-wit__ca
१९--२० ] य— nyāma-wit__kha
२०--२१ ] स— nyāma-wit__kha
२३--२४ ] प्रकृ— nyāma-wit__kha

१४ *] मूलोदकं—भूमेरन्तः, कूपखननादावभिव्यज्यमानं जलम् ॥

णमिति ॥ § 9874
II.668/KSV

अस्योत्तरम्— § 9875

अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः ॥ ५. १. ३१ ॥ § 9876

आवरणानुपलब्धिर्नास्ति, अनुपलब्धेः इति योऽयं हेतुरुक्तः, स न हेतुः । कुतः ? अनुपलम्भस्वभावत्वादनुपलब्धेः—उपलम्भप्रतिषेधात्मकत्वादित्यर्थः । अस्तित्वनास्तित्वे हि भावानां उपलम्भानुपलम्भाभ्यामवस्थाप्येते—यदुपलभ्यते तदस्ति, शशवत्; यन्नोपलभ्यते तन्नास्ति, तद्विषाणवत् । नोपलभ्यते च शब्दस्यावरणं, मूलोदकादेरिव मृत्तिका— इत्यनुपलम्भान्नास्तीति गम्यते । अनुपलम्भो ह्ययमावरणविषयः, नानुपलब्धिविषयः स आवरणस्यैव नास्तितामवगमयति, नानुपलब्धेरिति अनुपलब्धेर्भावादावरणमेव नास्तीति ॥ § 9877

## अनुपलब्धेरनुपलंभासंभवः

ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम् ॥ १-१-३२ ॥ § 9878

ज्ञानविकल्पाः—प्रतीतिप्रकाराः । तेषां भावाभावौ प्रतिप्राणिसंवेद्यौ भवतः । अस्ति मे ज्ञानम् इत्येवं सर्वः प्रत्यक्षानुमानागमज्ञानानि प्रमाणफलानि स्मरणसंशयादिज्ञानानि च प्रमाणफलान्यनुभवतीति । सा चेयमावरणानुपलब्धिः उपलब्धिवदध्यात्मं संवेद्यते, नोपलभे शब्दस्यावरणं, मृदमिव मूलोदकादेः इति । तदेवं बाह्यपदार्थभावाभाववत् आन्त रज्ञानभावाभावयोरपि II.669/KSV प्रत्यक्षत्वादपर्यनुयोगोऽयं अनुपलब्धेरनुपलम्भादावरणमस्ति शब्दस्य इति । तस्मात् प्रागुच्चारणादसन्नेव शब्द इति सिद्धम् ॥ § 9879

## अनित्यसमः

४ ] अ— nyāma-wit_kha
४ ] र्थ— nyāma-wit_kha
९ ] भावं— nyāma-wit_kha
१३ ] प्रा— nyāma-wit_kha
१५ ] वा— nyāma-wit_kha
१९ ] भावा— nyāma-wit_ca
१९ ] णम— nyāma-wit_ca

१७ ध्यात्मं ] अध्यात्मं—मानसानुभवः । मनो हि सुखादिभावग्राहकमिवाभावग्राहकमपि भवति ॥

## साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ ५. १. ३३ ॥ § 9880

सर्वभावानित्यत्वप्रसङ्गेन प्रत्यवस्थानम्—अनित्यसमः प्रतिषेधः । अनित्येन घटेन साधर्म्यमस्ति शब्दस्येति यदि तस्यानित्यत्वमुच्यते, तर्हि सर्वभावानामपि घटेन किमपि साधर्म्यमस्तीति सर्व एवानित्याः स्युः ॥ § 9881

अविशेषसनैवेयं जातिरिति चेत्—न—तत्र हि सत्ताभियोगात् सर्वभावानामविशेष आपादितः, इह तु घटसाधर्म्यादेवानित्यत्वमापाद्यत इति । उद्भावनभङ्गिभेदाच्च जातिनानात्वमित्यसकृदुक्तम् ॥ § 9882

अत्रोत्तरम्— § 9883

## साधर्म्यादप्यसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्यात् ॥ ५. १. ३४ ॥ § 9884

अतिप्रसङ्गमापादयतो ह्येतद्विवक्षितं भवति—घटसाधर्म्यादसिद्धिरनित्यत्वस्येति । यदि च घटसाधर्म्यादनित्यत्वस्यासिद्धिः, तर्हि तावकस्यास्य प्रतिषेधवाक्यस्याप्यसिद्धिः, प्रतिषेध्यवाक्यसाधर्म्यात् । अस्ति हि प्रतिषेधवाक्यस्य प्रतिषेध्यवाक्येन साधर्म्यं प्रतिज्ञाद्यवयवयोगित्वमिति ॥ § 9885

II.670/KSV

किंच— § 9886

## दृष्टान्ते साध्यसाधनभावेन प्रतिज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथा भावान्नविशेषः ॥ ५. १. ३५ ॥ § 9887

न हि साधर्म्यमात्रं साधनं भवति, अपि तु दृष्टान्तधर्मिण्यवधृतसामर्थ्यं साधर्म्यं वैधर्म्यं वा । तथाविधं चेत् सर्वभावानामस्ति, भवतु तेषामप्यनित्यत्वम्, को द्वेषः ? नास्ति चेत्, कोऽयमतिप्रसङ्गः । न हि दृष्टान्तधर्मिणि प्रज्ञातसामर्थ्यं साधर्म्यमुभयथा भवति—पक्षान्तरं स्पृशति । तेन साधर्म्यविशेषस्य हेतुत्वात् तस्य च सर्वत्रासंभवात् न सर्वानित्यत्वम् । *अविशेषसमायां च जातौ यत्समाधानमुक्तं, तदिहापि वक्तव्यमिति ॥ § 9888

### नित्यसमः

२ ] त— nyāma-wit_kha
४ ] त— nyāma-wit_kha
४ ] यो— nyāma-wit_kha
५ ] दितं— nyāma-wit_kha
१० ] तं— nyāma-wit_kha
१२ ] क्यस्य— nyāma-wit_ca
१८ ] म— nyāma-wit_kha
२१ ] दो— nyāma-wit_kha
२१ ] वेत्रा— nyāma-wit_kha
२२ ] त्माघ— nyāma-wit_kha

१४ र्म्यात् ] अन्ततः वाक्यत्वम् अस्ति साधर्म्यम् ॥

२३ *] प्रकृतस्यानित्यत्वस्य प्रतिषेधासिद्धिरित्यर्थः ॥

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्निस्यसमः ॥ ५-१-३६ ॥ § 9889

अनित्य(?)वाख्यसाध्यधर्मस्वरूपविकल्पनेन शब्दनित्य(?)वापादनं नित्यसमः प्रतिषेधः । अनित्यः शब्दः इति प्रतिज्ञाते हि जातिवादी विकल्पयति—किमिदमनित्यत्वं शब्दस्य नित्यम्, अथानित्यम् इति । यदि तावदनित्यम्, तथ कदाचित् प्रच्यवेत । तत्प्रच्युतेः नित्यः शब्दः । अथ नित्यमनित्यत्वम् (?')तर्हि धर्मस्य नित्यत्वात्, तस्य च निराधारस्यानुपपत्तेः तदाश्रयस्य शब्दस्यापि नित्यत्वम् । अनित्यत्वे हि, शब्दे विनाष्टे तदाधारो धर्मः क्व वर्तेतेति ॥ § 9890

II.671/KSV

अस्योत्तरम्— § 9891

प्रतिषेध्ये नित्यमनित्यभावात् अनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ ५-१-३७ ॥ § 9892

प्रतिषेध्ये शब्दे नित्यमनित्यत्वस्य भावश्चेदुच्यते, तदनित्य एवासावुक्तो भवति । अनित्यत्वोपपत्तेश्च तत्प्रतिषेधो नोपपद्यते । नित्यमनित्यत्वं शब्दस्य इति च ब्रवीषि, नित्यतां च तद्योगादस्योपपादयसीति महानयमायुष्मतो भ्रमः ॥ § 9893

अथ निरधिकरणो धर्मः कथं स्यादिति—तदुच्यते—अनित्यत्वं हि नाम निरोधः, प्रध्वंसः, अभावः इत्यनर्थान्तरम् । अनित्यत्वादभाव इति तु व्यवहारमात्रम् । सा चेयमनित्यता शब्दावच्छिन्ना न, शब्दाधिकरणा । न घटाभावः घटाश्रितो भवितुमर्हति । भावस्वभावा हि धर्माः धर्माश्रिता भवन्ति, नाभावः । अभावस्त्वाश्रितोऽपि न प्रतियोग्याश्रितो भवति किन्त्वर्थान्तरवृत्तिः भूप्रदेश इव घटाभाव इति ॥ § 9894

नित्यानित्यत्वविरोधाच्च—नित्यत्वमनित्यत्वं चैकत्र धर्मिणि विरुध्येते । तत् कथमभिधीयते नित्यमनित्यत्वस्य भावान्नित्यः शब्द इति ॥ § 9895

## कार्यसमः

प्रयत्नकार्यानेकत्वात्कार्यसमः ॥ ५-१-३८ ॥ § 9896

प्रयत्नकार्यनानात्वोपन्यासेन प्रत्यवस्थानं कार्यसमः प्रतिषेधः । अनित्यः शब्दः, प्रयत्नानन्तरीयकत्वात् इत्युक्ते, अपर आह— प्रयत्नस्य हि कार्य-

३ ] त्व— nyāma-wit_kha
३ ] साधर्म्य— nyāma-wit_kha
४ ] सति— nyāma-wit_kha

१४ ति] न तु नित्यत्वं सिद्ध्येत् । निराधारः धमः कथं स्यादिति चेत्, धर्मिणि सिद्धे साधारत्वम्, नेतरदेत्यदोषः । उपरिष्टादिदं स्पष्टम् ॥

II.672/KSV द्वैधमुपलब्धम्, किंचिदसदेव प्रयत्नेन निर्वर्त्यते, यथा घटादि । किंचित् सदेवावरणव्यपनयनादिना प्रयत्नेनाभिव्यज्यते—यथा मृदन्तरितमुदकादि । एवं प्रयत्नकार्यनानात्वात् किं प्रयत्नेनाविद्यमानः शब्दो निर्वर्त्यते घटवत्; उत विद्यमान एवाभिव्यज्यते मृदन्तरितसलिलवदिति संशयः ॥ § 9897

न चेयं संशयसमा जातिः, हेत्वर्थविकल्पनेनात्र प्रत्यवस्थानात् । तत्र हि निरवयवत्वाद्याकाशधर्मोपन्यासेन संशय आपादितः; इह तु साधनवाद्युक्तप्रयत्नानन्तरीयकत्वहेत्वर्थनिरूपणेनेति । उद्भावनाप्रकारभेदश्च जातीनां वैचित्र्यकारणमित्युक्तमेव ॥ § 9898

अत्रोत्तरम्— § 9899

**कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणानुपपत्तेः ॥ ५-१-३९ ॥** § 9900

यद्यपि प्रयत्नकार्यान्यत्वमुपलभ्यते; तथापि प्रकृते शब्दे प्रयत्नस्याभिव्यक्तावहेतुत्वम् । न प्रयत्नतः शब्दमभिव्यनक्ति, किन्त्वभूतप्रादुर्भावमेव विधत्ते । कस्मात् ? अनुपलब्धिकारणानुपपत्तेः । यत्र हि सतः पदार्थस्य प्रयत्नोऽभिव्यक्तिहेतुः, तत्र तस्य सतः सलिलादेरनुपलब्धिकारणमस्ति मृदादिव्यवधानम् । तदपोहमाचरता प्रयत्नेन तदभिव्यक्तिः संपाद्यते । शब्दस्य तु न किंचिदनुपलब्धिनिबन्धनं व्यवधानादि संभवतीति वर्णितम् । अतस्तस्यासत एवात्मलाभनिमित्तमुच्चारणादिप्रयत्नः न सतोऽभिव्यक्तिनिमित्तम् । तस्मादनित्यः शब्द इति सिद्धम् ॥ § 9901

तदेवमनेन चतुर्विंशतिविधजात्युदाहरणप्रतिसमाधानोपदेशवर्त्मना शब्दानित्यत्वसाधके परकीयमुपालम्भजातमेवंप्रायमखिलमपाकृतम्, आम्रसेकपितृतर्पणन्यायेन भवति भगवता सूत्रकारेण ॥ § 9902
II.673/KSV

## षट्पक्षीविवरणम्

इदमपरमिदानीमुपदिश्यते चतुर्विंशतावपि जातिवादिना प्रयुक्तासु मूलसाधनवादी—विस्पष्टानुमानोदन्तपरीक्षणपुरस्सरं सदेवोत्तरं यथोपदिष्टमभिदधीत; न तु जातिप्रयोगानुकारिदुरुत्तरालापचापलेन षट्पक्षीं प्रवर्तयेत् । तस्यां हि प्रस्तुतायां उभयोरपि वादिप्रतिवादिनोरसिद्धिः असद्वाचित्वात् । कथं पुनः षट्पक्षी प्रवर्तत इति—तत्पथं दर्शयितुमाह— § 9903

**प्रतिषेधे हि समानो दोषः ॥ ५. १. ४० ॥** § 9904

स्थापनाहेतुवादिना प्रथमपक्षस्थेन स्थापनाहेतुः प्रयुक्तः, अनित्यः शब्दः, प्रयत्नानन्तरीयकत्वात् इति ॥ § 9905

---

१२ त्व] कार्यान्यत्वं—कार्यविशेषः ॥  स्वसिद्धान्तोऽपि स्थापित इत्यर्थः ॥
२१ म्] उदाहरणप्रदर्शनव्याजेन

ततो जातिवादी द्वितीयपक्षस्थः प्रयत्नकार्यानेकत्वात् इति प्रयत्ना नन्तरीयकत्वं अभिव्यञ्ज्येऽपि शब्दे भवति इति हेतोरनैकान्तिकत्वमाह ॥ § 9906

तदधुना तृतीयपक्षस्थः स्थापनाहेतुवादी यदि यथोपदिष्टमावरणानुपलब्धिक्रममनुसृत्य विशेषमुपदर्शयन् अनैकान्तिकतामुद्धरति, ततस्तावत्येव पर्यवस्यति कथा—इति चतुर्थादिपक्षावसरविरहात् नावतरत्येव षट्पक्षी ॥ § 9907

यदि तु तं क्रममपहायैव तृतीयपक्षस्थोऽसौ वदति—(?')हेतोश्चेदनैकान्ति कत्वमुद्भावयसि, अनैकान्तिकत्वादसाधकः स्यादिति—नन्वयं तावकः प्रतिषेधोऽप्यनैकान्तिकः—किंचित्प्रतिषेधति, किंचिन्नेति—हेतोस्साधकत्वं प्रतिषेधति, न स्वरूपमिति । अत एवेत्थं प्रतिषेधस्यानैकान्तिकत्वात् सोऽपि हि नाभिव्यक्तिपक्षमेव साधयेत्, उत्पत्तिपक्षेऽपि प्रयत्नसाफल्योपपत्तेः । उभयत्रापि च विशेषहेतोरनपदेशात् । एवमनैकान्तिकत्वमभिहितवति साधन- II.674/KSV
वादिनि, भवति प्रतिषेधवादिनोऽपि वचनावसर इति अवतरति षट्पक्षी ॥ § 9908

स हि चतुर्थपक्षस्थ एव वदति— § 9909

## प्रतिषेधविप्रतिषेधे तत्प्रतिषेधदोषवद्दोषः ॥ ५-१-४१ ॥ § 9910

विविधः प्रतिषेधः—विप्रतिषेध इहोच्यते, न व्याधातः, प्रकृतसङ्गतेरभावात् । योऽयं प्रतिषेधेऽपि समानोऽनैकान्तिकत्वदोष उच्यते, स प्रतिषेधप्रतिषेधेऽपि भवत्प्रयुक्ते समानः, सोऽपि हि पूर्ववदनैकान्तिक एवेति ततः पंचमं पक्षमबलम्ब्य मूलसाधनवादी मतानुज्ञामुद्भावयति ॥ § 9911

सा च— § 9912

## प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानदोषप्रसंगो मतानुज्ञा ॥ ५-१-४२ ॥ § 9913

प्रतिषेधेऽपि समानो दोष इति समुद्भावितं दोषमनुद्धृत्य तं प्रतिषेधं सदोषमभ्युपेत्य मदुक्ते प्रतिषेधविप्रतिषेधे—समानदोषप्रसङ्गमापादयतस्ते मतानुज्ञा निग्रहस्थानं भवति । चोरो भवान् इत्युक्तेऽभियुक्तेन चौर्यमात्मनो निराकरणीयम्, न तु भवानपि चोरः इति परः प्रतिपत्तव्यः —इति ॥ § 9914

एवं पंचमपक्षस्थे मूलसाधनवादिनि कथितवति, परः षष्ठं पक्षमास्थाय पुनरभिधत्ते—यदि स्वपक्षदोषानुद्धरणपुरस्सरपरपक्षदोषापादनोपनतमतानुज्ञानिग्रहस्थानपात्रमहमादिश्ये, हन्त तर्हि तवापि तदेव निग्रह स्थानमवतरति, त्वमप्येवमकार्षीः । तथा हि द्वितीयपक्षस्थेन मया प्रय-

---

१२ ति ] स्वपक्षे अनैकान्तिकत्वमनुद्धरन्, परपक्षे अनैकान्तिकत्वमापादयति चेदित्यर्थः ॥

२० वादी ] स्वपक्षे दोषमभ्युपगम्य परपक्षे दोषोद्भावनं मतानुज्ञा निग्रहस्थानम् ॥

त्वकार्यानेकत्वात् इति यदनैकान्तिकत्वमुद्भावितम्, तदनुद्धृत्यैव प्रतिषेधेऽपि
II.675/KSV समानो दोषः इति मय्येव प्रतीपमापादितम् । तदेवं त्वत्त एव शिक्षित्वाऽहम-
पि चतुर्थपक्षस्थः तथैव त्वयि दोषमर्पितवानिति, मम चेन्मतानुज्ञा, प्रथमतरं
तवासौ भवेदिति ॥ § 9915

तदेतदाह— § 9916

**स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारहेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोषः ॥ ५-१-४३ ॥** § 9917

स्वपक्षः मूलसाधनवाद्युक्तः—प्रयत्नानन्तरीयकत्वादनित्यः शब्दः इति । तल्लक्षणः—तत्समुत्थानः, तद्विषयः प्रयत्नकार्यानेकत्वात् इति प्रतिषेधः । तमपेक्षमाणः, तमनुद्धृत्य—अनुज्ञाय प्रवृत्तः प्रतिषेधेऽपि समानो दोषः इत्युपपद्यमानः, परपक्षेऽनैकान्तिकत्वदोषोपसंहारः । तस्य च हेतुनिर्देश इत्ययमनैकान्तिकः प्रतिषेध इति, तस्मिन् सति परपक्षकथितानैकान्तिकत्वदोषाभ्युपगमात्, तदनुद्धरणेन तस्यैव प्रतीपदोषोद्भावनात् समानो मतानुज्ञादोष इति षष्ठः पक्षः ॥ § 9918

## षट्पक्ष्यां पक्षविवेचनम्

सेयं षट्पक्षी । तस्यां प्रथमतृतीयपंचमाः । स्थापनाहेतुवादिनः (?) । द्वितीयचतुर्थषष्ठाः प्रतिषेधवादिनः एते च साध्यसाधकतया परीक्ष्यमाणाः पौनरुक्त्यमतानुज्ञादिदोषापहतत्वात् अन्यतरस्यापि वादिनः साध्यसिद्धये न प्रकल्पन्ते ॥ § 9919

तथा हि—चतुर्थषष्ठयोः पक्षयोः अर्थाविशेषात्पुनरुक्तदोषप्रसङ्गः । चतुर्थे पक्षे परस्य समानदोषत्वमुच्यते । षष्ठेऽपि तथैव समानः । तृतीय पंचमयोस्तृतीये पक्षे परोक्षं समानदोषत्वमभ्युपगम्यते । पंचमेऽपि म-
II.676/KSV तानुज्ञामुद्भावयता तदङ्गीकृतमेव भवति । तृतीयचतुर्थयोश्च परोक्तदोषानुद्धरणात्तु मतानुज्ञेत्यैवं षट्पक्ष्यामुभयोरसिद्धिः । तस्मात् सदुत्तरैरेव दोषचिकित्सा साधीयसी, नासदुत्तरैः, षट्पक्षीप्रसङ्गादिति ॥ § 9920

## षट्पक्ष्यां विश्रान्तौ कारणम्

२१ ] क्तं— nyāma-wit__kha

४ वेदिति ] इयमेव प्रतिबन्दीत्युच्यते । स्वपक्षे दोषमनभ्युपगम्य ममाऽयं दोषः इत्यु च्यते, तर्हि तवैवायं प्रथमो दोषः स्यात् इति ॥

२४ ज्ञादिति ] वादिनोऽपि साध्यासिद्धिः स्यात् । अतः वादिना सावधानेन भवितव्यम् ॥

ननु ! असदुत्तरकथनेऽपि कथं षट्पक्ष्यामेव विरामः ? शतपक्षी सहस्रपक्षी वा कथं न प्रवर्तते ? कोऽत्र नियमः ? इति चेत्—उच्यते—इयत्येव निवर्तते वचनावकाश इति नानन्तपक्षता संभवति । तथा हि—पूर्वोत्तरपक्षवादिनौ तावत् साधनदूषणवादिनौ भवत एव, कोऽत्र विचारः । तत्र स्थापनाहेतुवादिना तावत् प्रथमं स्वपक्षसाधनेऽभिहिते, दूषणवादिना च तत्र दूषणे वर्णिते, तृतीये वचसि वर्तमानः साधनवादी सम्यङ्गीत्योपक्रममाणः तद्दूषणमुद्धर्तुं शक्नुयान्न वेति तस्यामेव दशायां प्राड्विवाकायत्तो निर्णयः ॥ § 9921

असदुत्तरोपन्यासे तु तृतीयवचसा तेन कृते दूषणवाद्यपि लब्धावकाशः, तत एव शिक्षित्वा चतुर्थे वचसि वर्तमानः तत्प्रतीपं योजयति । ततः स्थापनाहेतुवादी प्रतीपयोजनायामफलायां दुरुत्तरायां समव्ययफलायां अशक्यक्रियायां च निरुद्योगः किंचिदभिनवं दूषणमुत्प्रेक्ष्य पंचमे वचसि स्थितो मतानुज्ञामाह ॥ § 9922

ततस्तामपि परपक्षमनतिवर्तमानां पश्यन् प्रतिषेधवादी षष्ठे वचसि स्थित्वा तां तत्पक्ष एव योजयति—इत्येवं वृत्ते दूषणान्तरासंभवात्, प्रतीपयोजने च भग्नरसत्वात् तूष्णीमेवासितुमुचितमिति तावत्येव भवति वचनविरतिः, न शतसहस्रादिपक्षप्रसङ्गः प्रवर्तत इत्यतः षट्पक्षीमेव दर्शितवानाचार्यः । स II.677/KSV
चान्तेवासिनं बोधयितुमेवमुपा दिशदनेन पथा प्रवर्तेत भवान्, अन्येन मा प्रवर्तिष्टेति ॥ § 9923

## षट्पक्ष्युपदेशफलम्

वाच्यमुत्तरमतो निरवद्यं
जातिवादिनमपि प्रति तज्ज्ञैः ।
कश्मलोत्तरगिरा न तु कार्या
पक्षषट्कपरिकल्पनगोष्ठी ॥§ 9927

यादृग्यज्ञो बलिरपि तथेत्येवमादाय बुद्धौ
यस्तु ब्रूयात्कलुषमफलस्तस्य शुद्धोऽपि हेतुः ।
षट्पक्षादिप्रसरणपरिम्लानकान्तिर्न बुद्धिं
शक्तः स्वार्थे जनयितुमसावग्रतः प्राश्निकानाम् ॥§ 9931

## जातिपरीक्षोपसंहारः

९ तु ] तृतीयकक्ष्यायामित्यर्थः ॥

इतीदं व्याख्यातं निजसरणिसाङ्कर्यरहितं
स्वरूपं जातीनां स्फुटमिह चतुर्विंशतिविधम् ।
अमूषां तत्त्वज्ञः परविरचितानां परिहृतौ
स्वयं चोपन्यासे न हि सदसि संमुह्यति नरः ॥§ 9935

—इति जातिपरीक्षा— § 9936

## निग्रहस्थानपरिक्षा

जात्यनन्तरं निग्रहस्थानोद्देशात् तल्लक्षणप्रतिपादनार्थमाह— § 9937

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ १. २. ६० ॥
§ 9938

II.678/KSV

निग्रहः—पराजयः, तस्य स्थानम्—आश्रयः, कारणमित्यर्थः । किंच पराजयनिमित्तं विप्रतिपत्तिः, अप्रतिपत्तिश्च । विपरीता—कुत्सिता गर्हणीया प्रतिपत्तिः—विप्रतिपत्तिः—साधनाभासे साधनबुद्धिः, दूषणाभासे दूषणबुद्धिः । अप्रतिपत्तिस्तु आरम्भविषयेऽनारम्भः । आरम्भस्य विषयः— साधने दूषणं, दूषणे चोद्धारः । तयोरकरणं—अप्रतिपत्तिः ॥ § 9939

## जल्पे पराजयकारणे

द्विधा हि वादो पराजीयते—यथाकर्तव्यमनारभमाणः, विपरीतं वा प्रतिपाद्यमानः । अत एव न कर्मकरणयोर्निग्रहमादिशन्ति । न हि ताभ्यां किंचिदपराद्धम्, स्वविषये प्रयुज्यमानयोः सामर्थ्यानपायात् । कर्ता तु प्रमाद्यन् अप्रयोज्यं प्रयुंजानः, प्रयोज्यमप्रयुंजानो वा निग्रहमर्हति । प्रायेण चातत्त्ववादिनो निगृह्या भवन्ति ॥ § 9940

तत्त्ववाद्यपि कदाचन जल्पे वितण्डायां वा सम्यक्साधनमप्यपदिश्य प्रतिवादिप्रतिपादितदूषणाभासनिराकरणसरणिमनुगुणामपश्यन् निगृह्यत एव । अत एव च—भाष्यकृतोक्तम्—तत्त्ववादिनमतत्त्ववादिनं चाभिप्लवन्ते निग्रहस्थानानि न्या-भा-५-२-१ इति । असमासकरणमनेक निग्रहस्थानभेदावरोधार्थम् ॥ § 9941

अत एवानन्तरमाह— § 9942

तद्विकल्पाज्जातिनिग्रहस्थानबहुत्वम् ॥ १-२-६१ ॥ § 9943

---

१५ न] कर्म—विषयः । करणं—न्यायप्रयोगादि । तयोर्न निग्रहः, किन्तु पुरुषस्यव । विषयः न हि केनाप्यन्यथयितुं शक्यः ॥

*तदिति साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानस्य, विप्रतिपत्त्यप्रतिपत्त्योश्च परामर्शः । नानाकल्पो विकल्पः—प्रकारभेद इत्यर्थः । साधर्म्य वैधर्म्याभ्यां प्रत्यवस्थानप्रकारस्य बहुत्वात् जातिबहुत्वम् । तद्व्याख्यातम् । विप्रतिपत्त्यप्रतिपत्तिप्रकारबहुत्वान्निग्रहस्थानबहुत्वम् ॥ § 9944 II.679/KSV

## निग्रहस्थानविभागः

तद्द्वाविंशतिधा विभज्य दर्शयति— § 9945

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासः हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थकमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ ५-२-१ ॥ § 9946

अत्र अननुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, पर्यनुयोज्योपेक्षणम् —इति अप्रतिपत्त्या सङ्गृहीतानि; शेषाणि विप्रतिपत्त्या । पुनरुक्तम्, अधिकम् इत्यसमासकरणेन विप्रतिपत्त्यैव वाभिमतम् । किमसमासक्लिष्टकल्पनया । साऽपि हि कुत्सितैव प्रतिपत्तिः, यत् पुनरुक्तम्, अधिकं वा प्रयुज्यत इति । असङ्कीर्णोदाहरणविवक्षया च द्वाविंशतिभेदसङ्कीर्तनम् । अवान्तरभेदैस्तु जातिवदानन्त्यमेव तेषामिति ॥ § 9947

## धर्मकीर्तेराक्षेपः

अत्र कीर्तिराह—द्वाविंशतिधा निग्रहस्थानानि विभज्यन्ते । तेषां च प्रतिपदमिदानीं विशेषलक्षणानि वर्ण्यन्त इति न मृष्यामहे । कुतः— § 9948

असाधनाङ्गवचनम् अदोषोद्भावनं द्वयोः ।
निग्रहस्थानमन्यत्तु न युक्तमिति नेष्यते ॥§ 9950

II.680/KSV

वादिना सिषाधयिषितपक्षसिद्धये साधनमभिधेयम् । स चेदसाधनाङ्गं ब्रूयात्, निगृह्येत । प्रतिवादिनाऽपि वाद्युक्ते साधने दूषणमुद्भावनीयम् । स चेददोषमेव दोषत्वेनोद्भावयेत्, निगृह्येत । ते एव द्वयोर्वादिप्रतिवादिनोर्निग्रहस्थाने । अतोऽन्यथा निग्रहकरणमन्याय्यमेव । प्रतिज्ञाहान्यादिषु तत्प्रभेदेषु च प्रतिपदमयुक्ततां दर्शयिष्यते । कतिच्छात्रशिशुप्रलापप्रायाणि निग्रहस्थानानि निर्दिष्टानि । तादृंशि शास्त्रे लक्ष्यन्त इति परममप्रतिष्ठानम् ॥ § 9951

१ *] पूर्वतनसूत्रद्वये उभयोः प्रस्तुतत्वात् तच्छब्दस्यैवं व्याख्यानम् ॥

## धर्मकीर्त्याक्षेपस्य समाधानम्

अत्रोच्यते—संक्षेपविवक्षया द्वे एव निग्रहस्थाने इति वयमपि किं नोक्तवन्तः—विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् इति । एतच्च सामान्यलक्षणमखिलभेदसङ्ग्रहक्षमं भवति, न भवदुक्तम् ॥ § 9952

तथा हि—उत्तराप्रतिभानेन वादिनोरन्यतरः पराजीयते, न वा ? न पराजीयत इति कथमुच्यते ? तत्किं मूक एव जित्वा गच्छतु । निगृह्यते चेत्, किमनेनापराद्धम्, नादोष उद्भावितः ॥ § 9953

## विप्रतिपत्त्यप्रतिपत्त्योस्सर्वान्तर्भावः

अथ प्रसज्यप्रतिषेधेनोद्भावनाभाव एव व्याख्यायते, तर्हि दूषणाभासोद्भावनमनुमतं स्यात् । अथ दोषानुद्भावनमादौ व्याख्याय, पुनरदोषोद्भावनम् आवृत्त्य पर्युदासेन वर्ण्यते, हन्त तर्हि ते एवैते विप्रतिपत्त्यप्रतिपत्ती उक्ते स्याताम् । दोषानुद्भावनमप्रतिपत्तिः, विपरीतदोषोद्भावनं विप्रतिपत्तिः ॥ § 9954

एवमसाधनाङ्गवचनमपि विकल्पनीयम् । प्रसज्यप्रतिषेधवृत्त्य । साध-
II.681/KSV नाङ्गस्यावचनं चेत्—सेयमप्रतिपत्तिः । पर्युदासवृत्त्या साधनाङ्गा दन्यच्चेत् वचनं, सेयं विप्रतिपत्तिः । अतः शब्दान्तरेणाक्षपादपादेभ्य एव शिक्षित्वा, तदेव निग्रहस्थानद्वयमनेन श्लोकद्वयेन निबद्धम्, न पुनरभिनवमल्पमपि किंचिदुत्प्रेक्षितमिति ॥ § 9955

## निग्रहस्थानव्यवस्थापि न युक्ता

न च यथासंख्यनियमेन द्वयोर्द्वे निग्रहस्थाने वर्णनीये, अपि तु यथासंभवमुभयोरपि यथावसरं तत्तन्निग्रहस्थानमादेष्टव्यम् । द्वाविंशतिभेदत्वं च निग्रहस्थानानामसङ्कीर्णोदाहरणविवक्षया कथ्यते, न नियमायेत्युक्तमेव । परस्परविसदृशं च लक्षणमेषां इदानीमुपदिश्यत एव । तत्रैव चायुक्तत्वमेषाम्, बालिशप्रलापकल्पत्वं वा पराक्रियत एवेत्यलमतिप्रसङ्गेन ॥ § 9956

## प्रतिज्ञाहानिः

---

५ ] ई— nyāma-wit__kha
७--८ ] व— nyāma-wit__kha
९ ] त— nyāma-wit__kha
१० ] त्तिः— nyāma-wit__kha
११ ] त्तिः— nyāma-wit__kha
१३ ] त्तिः— nyāma-wit__kha
१४ ] त्तिः— nyāma-wit__kha
१५ ] के— nyāma-wit__kha

---

१५ नेन] श्लोकद्वयं—सामान्यलक्षणपरविभागपरसूत्रद्वयम्
॥

१७ च] वादिनः विप्रतिपत्तिः, प्रतिवादिनः अप्रतिपत्तिरिति व्यवस्थायां ॥

एवं सामान्यलक्षणं विभागं चाभिधाय विशेषलक्षणान्याह— § 9957

## प्रतिदृष्टान्तधर्मानुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ ५. २. २ ॥

§ 9958

प्रतिज्ञासिद्धये वादिना साधनेऽभिहिते, तत्र प्रतिवादिना च दूषणे उद्भाविते, तृतीये वचसि तु वर्तमानो वादी यदि प्रतिदृष्टान्तधर्मं स्वदृष्टान्तेऽनुजानाति, तदस्य प्रतिज्ञा हीयत इति प्रतिज्ञाहानिर्नाम निग्रहस्थानं भवति ॥ § 9959

तद्यथा—अनित्यः शब्दः, ऐन्द्रियकत्वात्, घटवत् इत्युक्ते, पर आह—सामान्यमैन्द्रियकमपि नित्यं दृष्टमित्यनैकान्तिको हेतुः इति ॥ § 9960

II.682/KSV

तत्र साधतवाद्याह—सामान्यमैन्द्रियकं नित्यम्, तर्हि तथैव घटोऽपि नित्योऽस्तु इति । अयमस्यैवंवदतो भ्रमः—किल नित्यानित्यपक्षवृत्तिः अनैकान्तिको भवति हेतुः । घटस्य तु नित्यतायां एकस्मिन्नित्यपक्ष एव वृत्तेः अनैकान्तिकतामेष विजह्यादिति । तदेवमस्य ब्रुवत् प्रतिज्ञाहानिर्भवति । घटस्य हि नित्यत्वे तद्दृष्टान्तबलादेव शब्दोऽपि नित्यः स्यादिति ॥ § 9961

### धर्मकीर्त्याक्षेपः

अत्र कीर्तिराह—प्रतिज्ञैव तावदसाधनाङ्गवचनमिति तदभिधानं निग्रहस्थानं भवितुमर्हति, न तद्धानिः । न च हानिरप्यस्ति । यदि नाम घटस्य दृष्टन्तीकृतस्य प्रतिदृष्टान्तधर्मं नित्यत्वमयमभ्युपैति, किमियता शब्दानित्यत्वप्रतिज्ञामवजहाति ॥ § 9962

अपि च हेत्वाभासा अपि निग्रहस्थानवर्गे गणिता एव । स चायमनैकान्तिकहेत्वाभासप्रयोगादेव पराजीयते, न प्रतिज्ञाहान्येति तस्या विषयान्तरं वक्तव्यम् ॥ § 9963

### आक्षेपस्य समाधानम्

अत्रोच्यते—प्रतिज्ञायास्तावदसाधनाङ्गवचनता नास्तीत्यवयवलक्षणे (?)नर्णीतमेतत् । प्रतिज्ञासिद्ध्यर्थ एव सर्ववादिनां प्रयासः । अनिर्दिष्टा च सा साधयितुमशक्यैवेति न तद्वचनमसाधनाङ्गवचनम् । लौकिकेष्वपि

६ ] निः— nyāma-wit_kha
१२--१३ ] क— nyāma-wit_kha
१४ ] न द्— nyāma-wit_ca
२४ ] सा— nyāma-wit_kha

१३ ह्यादिति ] विजह्यादिति भ्रमः—इत्यन्वयः । अनैकान्तिकता परिहृता भवतीति भ्रमः ॥

२० हेत्वाभास ] प्रयोगः—उद्भावनम् । हेत्वाभासस्यापि निग्रहस्थानपरिगणनमस्ति ॥

ऋणादानादिविवादपदेषु प्रतिज्ञाहानिमेव मुख्यं पराजयकारणमाहुः । यथाऽऽह नारदः— § 9964
II.683/KSV

सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् इति ॥§ 9966

प्रतिदृष्टान्तधर्मं च स्वदृष्टान्तेऽभ्युपगच्छन् उत्सृजत्येव प्रतिज्ञाम् । नित्यत्वं हि सामान्यवत् घटस्यापि सहते । तदृष्टान्तबलेन शब्देऽपि सिषाधयिषतीति नूनमिदानीं नित्यत्वमेव घटधर्मः शब्दे सिद्ध्येदिति कथं तदनित्यत्वप्रतिज्ञाऽस्य न हीयते ॥ § 9967

## अनैकान्तिकोद्भावनं नालम्

यत्तूक्तं हेत्वाभासप्रयोग एव निग्रहनिमित्तम्, न प्रतिज्ञाहानिरिति— स्यादेतदेवम्, *यदि द्वितीये वचसि व्यवस्थितेन प्रतिवादिना व्यभिचारोद्भावनया प्रत्यवस्थितो वादी तावत्येव विरमेत् । स तु तृतीये वचसिवर्तमानः तदुद्धरणबुद्ध्या तथाविधमभिधत्ते, येन प्रतिज्ञां जहाति । अतश्च व्यभिचारपरिहरणलोभाभिहितप्रतिदृष्टान्तधर्माभ्यनुज्ञ वचनोपनततदर्थप्रतिज्ञाहानिनिबन्ध न एवास्य निग्रहो युक्तः, न हेत्वाभासप्रयोगकृत इति अयमेव मुख्यः प्रतिज्ञाहानेर्विषयः ॥ § 9968

## प्रतिज्ञान्तरम्

प्रतिज्ञातार्थप्रतिषेधे धर्मे विकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ ५. २. ३ ॥ § 9969

प्रतिज्ञातार्थप्रतिषेधे परेण कृते, तत्रैव धर्मिणि धर्मान्तरं साधनीयवादिनः प्रतिसान्तरं मभिदधतो नाम निग्रहस्थानं भवति ॥ § 9970
II.684/KSV

अनित्यः शब्दः, ऐन्द्रियकत्वात् इत्युक्ते, पूर्ववत् सामान्येन व्यभिचारोद्भावनया प्रत्यवस्थित आह—सामान्यमैन्द्रियकं यन्नित्यं, तद्युक्तम्

३ ] न्ये— nyāma-wit_kha

८ *] तावत्येव वादी यदि विरमेत्, तदा स्यादेतदेवम् इत्यन्वयः ॥

। तद्धि सर्वगतम् । असर्वगतस्तु शब्द इति नो दर्शनम् इति । सोऽयं अनित्यः शब्दः इति पूर्वप्रतिज्ञातः अन्यम् असर्वगतः शब्दः इति प्रतिज्ञां कुर्वन् प्रतिज्ञान्तरेण निगृहीतो भवति ॥ § 9971

## धर्मकीर्त्याक्षेपः

अत्राह—नेदमप्रस्तुतप्रतिज्ञान्तरकरणम्, अपितु परोद्भावितव्यभिचार-निराकरणविशेषोत्पादनम् ॥ § 9972

एतदुक्तं भवति—असर्वगतत्वे सत्यैन्द्रियकत्वादनित्यः शब्द इति । तदिदमसर्वगतत्वप्रतिज्ञासिद्ध्यर्थमुपात्तं कथं निग्रहस्थानम् । यो हि मीमांसकं प्रति अनित्यः शब्दः, कृतकत्वात् इत्युक्तवान् तेन कृतकत्वमसिद्धमित्युपालब्धः, कृतकत्वसिद्धये यतेत, स किं कृतकत्वप्रतिज्ञान्तरकर णान्निगृह्येत ॥ § 9973

यस्तु पूर्वप्रतिज्ञामवधीर्य, तदनौपयिकमकस्मादेव प्रतिज्ञान्तरमारभेत, स तदा उन्मत्त एव भवेत् । न चोन्मत्तप्रलापानां शास्त्रे लक्षणकरणं युक्तम् । स्पष्टे च निग्रहहेतौ हेत्वाभासाभिधाने संभवति किमिति प्रतिज्ञान्तरं निग्रहस्थानमुच्यत इति ॥ § 9974

## अक्षेपस्य समाधानम्

अत्रोच्यते—प्रतिज्ञासिद्धये हेतुदृष्टान्तौ प्रयोक्तव्यौ, न पुनः प्रतिज्ञान्तरं करणीयमिति स्थितिः । इह च यो हेतुः अनेनोपात्तः तस्मिन् परेणानैकान्तिकीकृते सति, न तत्परिहारप्रकारमनुगुणमयमास्थितवान् । अपि तु असर्वगतत्वप्रतिज्ञामन्यामारूढः ॥ § 9975

II.685/KSV

ननु ! विशेषणमेतदनेकान्तिकत्वपरिहारार्थम्, न प्रतिज्ञान्तरमित्युक्तम्—न—असिद्धत्वात् । *सिद्धं हि विशेषणं भवति । नित्यत्ववादिनं च प्रति शब्दस्यासर्वगतत्वमसिद्धम् । साध्यते चेत्, तर्हि प्रतिज्ञान्तरमेवेदम्, हेत्वाद्यवयववैलक्षण्यात्, प्रतिज्ञालक्षणस्य च साध्यनिर्देशस्योपपत्तेः । अनैकान्तिकत्वपरिहृतये हि हेतुविशेषणं सिद्धं वाच्यम्, न तु धर्मिविशेषणं साध्यं चेति ॥ § 9976

## हेत्वाभासताऽप्यस्य न युक्ता

१९--२० ] इ— nyāma-wit_kha

२ ] वा— nyāma-wit_kha
२ ] षणोपादा— nyāma-wit_kha
६ ] त्वे— nyāma-wit_kha
१४ ] राय— nyāma-wit_ca

२० *] सिद्धत्वे तु हेत्वन्तररूपं निग्रहस्थानं भवति ॥

अन्यतरासिद्धे तु हेत्वाभासे तत्समर्थनं प्रक्रमानुरूपमेवेति न प्रतिज्ञान्तरं निग्रहस्थानं भवति। इह तु अनैकान्तिकत्वपरिहाराय यतमानः मार्गमनुगुण-मपश्यन् स्खलित इति निगृह्यते । न च हेतूदादरणादिप्रयोगनिपुणमतेरपि भ्रमादेवंविधमभिधानं न संभवति । न च प्रतिज्ञामात्रेण सिद्धिमिच्छन्नेवं ब्रवीति, अपि तु व्यभिचारं परिजिहीर्षन्निति ॥ § 9977

## नाप्यस्यासंबद्धत्वम्

न चायमुन्मत्तप्रलाप एव, प्रस्तुतानुगुण्यबुद्ध्या प्रयोगात् । अपि च अनित्यः शब्दः, चाक्षुषत्वात् इत्युभयासिद्धो नाम हेत्वाभासः भवद्भिरपि शास्त्रे लक्षित एव । स उन्मत्तप्रलापो न भवति ! यथोदाहृतम् तत् प्रतिज्ञान्तरमुन्मत्तप्रलाप इत्यपूर्व एष भिक्षोः स्वदर्शने रागः, परदर्शने द्वेषो वा । को हि नाम शिशुरपि शब्दे चाक्षुषतां ब्रूयात् । *इदं तु संभव-त्येवाभिधानम् । केवलं हेतुविशेषणे सिद्धे च वक्तव्ये भ्रमात् धर्मिविशेषणं साध्यं चायमुक्तवानिति निगृह्यते ॥ § 9978

II.686/KSV

तृतीये वचसि स्थितश्चैवमसावुक्तवानिति निमित्तान्तरमिदमस्य निग्रहे निरूपितम् । द्वितीय एव तु वचसि कथाविरतौ हेत्वाभासप्रयोगादेव निग्र-हमाप्नुयादिति प्रतिज्ञाहानिप्रस्ताव एवोक्तम् ॥ § 9979

## प्रतिज्ञाविरोधः

### प्रतिज्ञाहेत्वोविरोधः प्रतिज्ञाविरोधः ॥ ५. २. ४ ॥ § 9980

यत्र प्रतिज्ञा हेतुना विरुद्ध्यते, हेतुर्वा प्रतिज्ञया, सः प्रतिज्ञाविरोधो नाम निग्रहस्थानं भवति । गुणव्यतिरिक्तं द्रव्यम् इति प्रतिज्ञा; रूपादिभ्योऽर्थान्त-रस्यानुपलब्धेः इति हेतुः । सोऽयं प्रतिज्ञाहेत्वोविरोधः— यदि गुणव्यतिरिक्तं द्रव्यम्, न तर्हि रूपादिभ्योऽर्थान्तरस्यानुमलब्धिः । अथ रूपादिभ्योऽर्थान्त-रस्यानुपलब्धिः, न तर्हि गुणव्यतिरिक्तं द्रव्यम् । गुणव्यतिरिक्त च, द्रव्यं च, रूपादिव्यतिरिक्तस्यानुपलधेरिति याहतम् ॥ § 9981

## धर्मकीर्त्याक्षेपः

---

३--४ ] प्र— nyāma-wit_kha
७ ] ति— nyāma-wit_kha
१३ ] Correction : ; ? (sic !)
८ ] गि— nyāma-wit_kha
१६--१७ ] रू— nyāma-wit_kha
१७ ] मिश्रार्थान्तर— nyāma-wit_kha

---

१० *] इदं—शब्दः अनित्यः, ऐन्द्रियकत्वादित्यादि ॥

अत्राह—नेदं प्रतिज्ञाहेत्वोर्विरोधोदाहरणं भवतुमर्हति, हेतोरसंभवात् । संभवन् हि हेतुः प्रतिज्ञाया विरुणद्धि । तया वा विरुद्ध्यते । इह तु उपलब्धिलक्षणप्राप्तस्यानुपलब्धिः न समस्त्येव, रूपादिभ्योऽर्थान्तरस्य पृथक्त्वेनोपलब्धियोग्यत्वानुपपत्तेः । संभवन्नपि चैवंविधे विषये प्रतिज्ञाविरोधे हेतुः न द्वयीं दोषजातिमतिवर्तते—विरुद्धत्वम्, *असिद्धत्वं वा । गुणव्यतिरिक्तद्र- II.687/KSV व्यवादिनो हि भेदेनाग्रहणमसिद्धो हेतुः । सिद्धत्वे वा साध्यविपर्ययसाधनात् विरुद्ध इति । अतो हेत्वाभासग्रहणेन गतार्थत्वात् न पृथग्वक्तव्यमिदं निग्रहस्थानम् ॥ § 9982

## उदाहरणान्तरस्याप्यसाधुत्वम्

यत् अन्यदन्यैरुदाहरणमभाणि नित्यः शब्दः सर्वस्यानित्यत्वात् इति—तदप्यसाधु—वैधर्म्यदृष्टान्तस्यानेन प्रकारेण कुशिक्षितैरभिधानात् । तथा हि—सर्वशब्दोऽत्र सावयववचन इति निरवयवत्वं हेतुर्विवक्षितः— नित्यः शब्दः, निरवयवत्वात् इति । तत्र वैधर्म्यदृष्टान्तः साध्याभावे हेतोरभावं प्रदर्शयता वक्तव्यम्—नित्यः शब्दः, अनित्यसर्वत्वात्— सावयवत्वात् इति । सोऽयमशिक्षितवैधर्म्यदृष्टांतप्रदर्शनप्रक्रमैः विपर्ययेण वैधर्म्यदृष्टान्त एव कथितः सर्वस्यानिस्यत्वात् इति । तदुक्तं— § 9983

स हि दुष्टान्त एवोक्तः वैधर्म्येण सुशिक्षितैः ।§ 9984

इति । तस्मान्नेदमपि प्रतिज्ञाहेतुविरोधोदाहरणमिति ॥ § 9985

## धर्मकीर्तिदूषणपरिहारः

अत्रोच्यते—यदुक्तं—हेतोरसंभवान्नेदं निग्रहस्थानम्—इति— तदचारु—पंचम्यन्तनिर्दिष्टस्य हेतोः प्रदर्शितत्वात् । निरवद्यहेत्वभावात्तु यदि तदसंभव उच्यते, तर्हि हेत्वाभासव्याकरणमप्यकरणीयं भवेत् । पुरुषबुद्धिप्रमादनिबन्धनहेतुप्रयोगस्तु तथाविधमप्यभिधानं संभवत्येव ॥ § 9986

## हेत्वाभासनिग्रहस्थानयोर्वैलक्षण्यम्

१--२ ] ग— nyāma-wit__kha
७--८ ] इ— nyāma-wit__kha
११ ] म— nyāma-wit__kha
१४ ] त्वाभास— nyāma-wit__kha

५ *] असिद्धत्वं—स्वरूपासिद्धिः ॥

यप्पुनरभ्यधायि—संभवन्नपि हेतुरयम् असिद्धविरुद्धयोरन्यतरो भवेत्, II.688/KSV न दूषणान्तरमिति—तत्र ब्रूमः—सत्यमेतत् किन्तु हेतुस्वरूप निरूपणावसरे स यदि तद्गतदोषादोषदर्शनात् विरुद्धता तस्याभिधीयते। यथा भवद्भिः नित्यः शब्दः, कृतकत्वात् इति विरुद्धहेतौ वर्णिते क्वचित् सिद्धसाध्यत्वदृष्टान्तहीनतादिदोषान्तरसंभवे तदवधीरणया विरुद्धत्वमेव दर्शितम्। यथा वा हेत्वाभासलक्षणे कथितमस्माभिः अनित्यः शब्दः, चाक्षुषत्वात् इत्यस्यानैकान्तिकत्वदोषे सत्यपि प्रथमतरमसिद्धतैव हृदयपथमवतरति, तेनासिद्धोऽयमुच्यते, न सव्यभिचार इति। एवमिहापि हेतुगुणदोषविचारे क्रियमाणे विरुद्धतादिहेत्वाभासताऽस्य कथ्यते ॥ § 9987

यदा तु परार्थानुमानवाक्यस्य पंचावयवस्य, परमतेन वा व्यवयवस्य परस्परान्वितपदार्थसमुदायात्मा वाक्यार्थश्चिन्त्यते, तत्र इतरेतरव्याहतार्थवादिनोः प्रतिज्ञाहेतुपदयोः असंसर्गात् तद्विरोध एव झटिति मनसि विपरिवर्तत इति स एव निग्रहनिमित्तं भवितुमर्हति, यत इतरेतरविरोधिनमनन्वितार्थमभिदधति वाक्येऽपि विप्रतिपत्तिरप्रतिपत्तिर्वा भवेदित्यद एव निग्रहस्थानम् ॥ § 9988

## विरुद्धप्रतिज्ञाविरोधयोर्विशेषः

अपि च साध्यविपर्ययसाधक एव विरुद्धहेतुरुच्यते, यः प्रतिज्ञामेव बाधते। इह तु प्रतिज्ञया हेतुर्बाध्यते, प्रतिज्ञा वा हेतुनेति विकल्प्यमानत्वात् निग्रहस्थानान्तरमेवेदम् ॥ § 9989

इत्थमस्यैवोदाहरणस्योपपत्तेः उदाहरणान्तरनिरूपणं वृथाऽटाट्यैव ॥ § 9990

II.689/KSV

## भाट्टोक्तोदाहरणम्

भाट्टैस्तु भवदीयं निरालम्बनसाधनं प्रतिज्ञाविरोधोदाहरणं वर्णितम् — निरालम्बनाः सर्वे प्रत्ययाः, प्रत्ययत्वात् इति। यतः प्रत्ययत्वहेतु ग्राहकज्ञानसालम्बनत्वे तेनैवैषा प्रतिज्ञा विरुद्ध्यते। तन्निरालम्बनत्वे तु हेत्वभाव एव स्यादिति। तदुक्तम्— § 9991

१७ ] त— nyāma-wit__kha
१८ ] तोवर्ण्य— nyāma-wit__kha
४ ] तैव— nyāma-wit__kha
९ ] वद— nyāma-wit__kha
९ ] ऽप्र— nyāma-wit__kha
११ ] हेतुं— nyāma-wit__kha
१८ ] व— nyāma-wit__kha

१३ त ] तथाच वस्तुदृष्ट्या हेत्वाभासः, उक्तिदृष्ट्या निग्रहस्थानमित्युक्तम् ॥
२१ भाट्टैस्तु ] भवदीयम्—इत्यत्र भवच्छब्दः बौद्धपरः ॥

विस्पष्टश्चाक्षपादोक्तो विरोधो हेतुसाध्ययोः ।
यमदृष्टवा परैरुक्तमदूषणमिदं किल इति ॥§ 9993

तत् सर्वथा सुलभोदाहरणमिदं प्रतिज्ञाहेतुविरोधाख्यं निग्रहस्थानमिति स्थितिः ॥ § 9994

## प्रतिज्ञासंन्यासः

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः ॥ ५-२-५ ॥ § 9995

पक्षसाधने परेण दूषिते तदुद्धारणाशक्त्या प्रतिज्ञामेव निह्नुवानस्य प्रतिज्ञासन्न्यासो नाम निग्रहस्थानं भवति ॥ § 9996

अनित्यः शब्दः, ऐन्द्रियकत्वात् इत्युक्ते, तथैव सामान्येनानैकान्तिकतायामुद्भाटितायां, यत् प्रतिब्रवीति—(?')क एवमाहानित्यः शब्द इति—सोऽयमेवंब्रुवन् प्रतिज्ञासन्न्यासात् पराजीयते ॥ § 9997

## प्रतिज्ञासंन्यासे धर्मकीर्त्याक्षेपः

अत्राह—अतिस्थूलः खल्वयं प्रमादः । को हि नाम प्रतिवादी प्राश्निकसन्निधाने प्रतिज्ञां कृत्वा, तदैव तेषामेवाभ्रष्टसंस्काराणां पुरतः अपस्मारकाद्यनुपप्लुतमतिः तामेव निह्नुवीत ॥ § 9998

II.690/KSV

अपि च द्यूतपराजितपणरहितशठकितववदुदासीनः प्रतिज्ञामजहदपि हेतावनैकान्तिके किमसौ न निगृह्यते । न हि प्रतिज्ञायास्त्यागात्यागौ तदीययोः निग्रहानिग्रहयोः प्रयोजकौ, अपि तु हेतुगुणदोषावेव । स चायं साधनव्यभिचारादेवानित्यपक्षः पराजीयत इत्यलं सन्न्यासेनेति ॥ § 9999

## धर्मकीर्त्याक्षेपपरिहारः

अत्रोच्यते—परोद्भावितहेत्वनैकान्तिकत्वदूषणोद्धरणरणरणकतर लितमतेः भवेदप्ययं प्रमादः । एवं ह्यसौ वदति मयोक्तं—संयोगवियोग व्यङ्ग्यः शब्दो न भवति, न त्वनित्यः इति ॥ § 10000

६ ] ट्टंकि— nyāma-wit_kha
६ ] प्र— nyāma-wit_kha
११ ] एव— nyāma-wit_kha
११ ] व— nyāma-wit_kha
१३ ] यो— nyāma-wit_kha
१४ ] सिद्ध— nyāma-wit_kha

अयमाशयस्त्वेवंदतः—किल संयोगविभागानभिव्यञ्जत्वे मया पक्षीकृते, सामान्येन व्यभिचारो न भविष्यतीति । तदपि हि तादृशमेव, स्वाश्रयव्यञ्जत्वादिति मुह्यतः नातिस्थूलममुमीदृशं प्रमादं प्रतिपन्नस्य भवत्येव निग्रहहेतुः । अप्रमादिनोस्तु निग्रहो नाम नास्त्येव कश्चिदिह लोके परलोके वा ॥
§ 10001

यत्तु तदीययोः प्रतिज्ञात्यागात्यागयोरनैकान्तिकत्वेनैवासौ निगृह्यत इति—स्यादेतदेवं, यदि व्यभिचारोद्भावनसमनन्तरमसौ तूष्णीमेवासीत । तथाविधं तु ब्रुवाणस्तस्यैव पराजयहेतोस्सन्निकृष्टत्वात्तेनैव निगृहीतो भवति, नानैकान्तिकप्रयोगेणेति ॥ § 10002

## हेत्वन्तरम्

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ ५-२-६ ॥ § 10003

II.691/KSV

अविशेषाभिहिते हेतौ प्रतिषिद्धे तद्विशेषणमभिदधतः हेत्वन्तरं नाम निग्रहस्थानं भवति । यथा सांख्यस्येत्थंवदतः एकप्रकृतीदं व्यक्तम् परिमाणात्, घटादिवत्(?') इति । द्विविधं च विकारेषु दृष्टम्—इयत्तालक्षणमङ्कुरादेः फलान्तरस्य, चतुरश्रता च घटादेः मृत्पूर्वकस्य । तदे तत्परिमितं निकारजातमेकप्रकृतिकं दृष्टमित्यतः सर्वमिदमेकप्रकृति भवितुमर्हति । या च सैका प्रकृतिः, तत् प्रधानमिति ॥ § 10004

अस्य हेतोर्व्यभिचारः, नानाप्रकृतीनामपि परिणामदर्शनादिति । तत्परिजिहीर्षया विशेषणमाह—समन्वयादिति । सुखदुःखमोहसमन्वितं हि सर्वं व्यक्तं परिमितं दृश्यत इति । तस्य प्रकृत्यन्तररूपसमन्वयाभावादेकप्रकृतिकत्वामिति । तदिदं हेत्वन्तरं निग्रहस्थानम्, प्रागुक्ताविशेषणहेतोः स्वयमेव हेतुत्वामर्षणादिति ॥ § 10005

## अनैकान्तिकात् हेत्वन्तरस्य विशेषः

२० ] हः— nyāma-wit__kha
२ ] दिति— nyāma-wit__kha
९ ] त्— nyāma-wit__kha
१० ] प— nyāma-wit__kha
१० ] निरा— nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ca
१६ ] त्तस्य— nyāma-wit__kha
१६ ] स्य— nyāma-wit__kha

४ वा] प्रमादं वै मृत्युमहं ब्रवीमि सदाऽप्रमादममृतत्वं ब्रवीमि इति वचनम् ॥

१३ कृतीदं] व्यक्तं—महदादिस्थूलजगदन्तम् ।

अत्राह—किमयं दग्धो दह्यते, मृतो वा मार्यते । अनैकान्तिकहेतूपन्यासेनैव खल्वयं तपस्वी निगृहीत एव, असाधनाङ्गवचनादिति कृतं हेत्वन्तराख्यनिग्रहस्थानान्तरोदीरणेनेति—अत्रोच्यते—युक्तमेव तत् द्वितीये वचसि कथासमाप्तौ यथा तु भवानाह । यदा तु व्यभिचारनिराकरणाय विशेषणमपरमधिकमधुनाऽभिधातुं प्रवृत्तः, तदा तदुपादानादेव निगृह्यत इति पिष्टपेषणं संप्रत्येवायमिष्यते । पुरुषशक्तिपरीक्षात्मके च जल्पे निग्रहस्थानमिदम् । वादे तु विशुद्धाशयतया वस्तुनि परीक्ष्यमाणे विशेषणान्तरोपादानेऽपि तद्विचारः प्रस्तोतव्यः, न निग्रहः कार्य इत्यभियुक्ताः ॥ § 10006
II.692/KSV

## अर्थान्तरम्

प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् ॥ ५. २. ७ ॥ § 10007

प्रकृतादर्थादर्थान्तरं तदनौपयिकमभिदधतः अर्थान्तरं नाम निग्रहस्थानं भवति ॥ § 10008

यथा कश्चिद्वैयाकरणविटः स्फोटात्मानं शब्दं चेतसि निधाय तन्नित्यत्वसिद्धये नित्यः शब्दः, निरवयवत्वात् इत्यभिधित्सुरेव दुरितकर्मादिभिः अनैकान्तिकतामाशङ्कमानः अर्थान्तरं नाम निग्रहस्थानं जिगमिषुः, तत्रैव वाक्यशेषच्छाययोत्तिष्ठति नित्यः शब्दः निरधयवत्वात्(?') इति वयं पाणिनीयाः प्रतिपन्नोः, ये भगवतः पाणिनेश्छात्राः, इति । कः पुनर्भगवान् पाणिनिरिति—
§ 10009

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं आचार्यो नस्स पाणिनिः ॥§ 10011

कः पुनर्महेश्वरः, यतोऽक्षरसमाम्नायमधिजगाम पाणिनिरिति— § 10012

अत्युद्भटजटाजूटकोटिग्रथितचन्द्रमाः ।
विश्वस्थितिभवध्वंसहेतुरेको महेश्वरः ॥§ 10014

अपि च— § 10015

अचिन्त्यवेषाभरणस्य तत्तः
यदृच्छया यस्य निशासु ताण्डवम् ।
स भस्मभक्तीनि बिभर्ति मौलिना
कृतांजलिः पादरजांसि वासवः ॥§ 10019

११ ] किं— nyāma-wit_kha
१६ ] लयोत्पाद— nyāma-wit_ja

१४ स्थानं ] अवश्यादेवेति शेषः ॥

II.693/KSV

कीदृशं पुनस्ताण्डवं तनोति खण्डपरशुरिति— § 10020

इत्थंचारी क्रमो यस्मिन् इत्थं च करवर्तनाः ।
इत्थं यत्र कटिच्छेदाः दण्डपादास्तथेदृशाः ॥§ 10022

इत्येकैकमुपदेशयन् उत्थाय नृत्यति । तदेतदर्थान्तरं निग्रहस्थानमसाधनाङ्गमिति ॥ § 10023

कीर्तिनाऽप्यनुमोदितम्—द्वयोरपि च वादिप्रतिवादिनोः प्रकृताननुगुणमभिदधतोः भवत्यदो निग्रहस्थानम् । यथाक्रममेकस्य साधनमनवद्यमपश्यतो द्वितीयस्य दूषणमिति ॥ § 10024

## निरर्थकम्

### वर्णक्रमनिर्देशवन्निरर्थकम् ॥ ५. २. ८ ॥ § 10025

अभिधेयरहितवर्णानुपूर्वीप्रयोगमात्रं निरर्थकं नाम निग्रहस्थानं भवति—अनित्यः शब्दः, कचटतपानां गजडदबत्वात्, घझढधभवत् इत्येवं प्रकारम् । इदमपि वादिप्रतिवादिनोः प्रकृताननुगुणमभिदधतोर्भवत्यदो निग्रहस्थानम् । यथाक्रमं साधनं दूषणं च यथोचितमभिधातुमजानतोः पूर्ववदुभयोरपि निग्रहस्थानम् ॥ § 10026

## निरर्थकनिग्रहस्थानाक्षेपः

अत्राह—*सोऽयमुन्मत्तप्रलापमेव शास्त्रे लक्षयितुमुपक्रान्तः । न ह्युन्मत्तानामीदृंश्यक्षराणि मुखान्निर्गच्छन्ति । ईदृशां च निर्देशे कपोलवादित्रकक्ष्याभिताडनादीन्यपि कामं शास्त्रे निर्दिश्यन्ताम् ॥ § 10027

अपि च वर्णक्रमनिर्देशवदिति मतुपा निर्देश एष सूत्रे, वदिति वतिप्रयोगो वा ? मतुप्पक्षे सर्वं वर्णक्रमनिर्देशयुक्तं निग्रहस्थानं भवेदिति हस्तसंज्ञादिभिरिदानीमुद्ग्राहिणिकाः प्रस्तूयेरन् ॥ § 10028

II.694/KSV

अथानर्थकक्रमसिदेर्शयुक्तमिति व्याख्यायते, तथाऽपि नियमानुपपत्तिः । न ह्यर्थरहितवर्णोच्चारणमेव प्रकृतानुपयोगान्निरर्थकमेव; वर्णक्रमनिर्देशस्यापि च क्वचित्प्रकरणे सार्थकता दृश्यत एव, प्रत्याहारवत् ॥ § 10029

वतिपक्षे तु भवति दिवप्रदर्शनमेतत्; किन्त्वर्थान्तरेणैव गतार्थत्वात् पृथङ्न वक्तव्यम् ॥ § 10030

---

२४ ] घटो— nyāma-wit__kha
२४ ] दात्र— nyāma-wit__kha
२ ] वचनमि— nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ja
१५ ] शे— nyāma-wit__ca

---

१५ *] सोऽयं—सूत्रकारः ॥ तत्राप्यस्ति हि वर्णक्रमनिर्देशः ॥
१९ क्षे ] निर्दुष्टन्यायप्रयोगादिकमपि ।

## उक्ताक्षेपसमाधानम्

अत्रोच्यते—मतुपा, वतिना वाऽभिधेयशून्यत्वमात्रमत्र विवक्षितम् । अभिधेयशून्यं वचो निरर्थकमित्युक्तमिति भवति । एष एव चार्थान्तरादस्य विशेषः । तत्राभिधेयस्य भावेऽपि प्रकृतानुपयोगः । इह त्वभिधेयमेव नास्तीति यत्र क्वचित्प्रकरणवशेन वर्णक्रमनिर्देशस्यापि सार्थकता; न तदिहोदाहरणम् ॥ § 10031

उदाहरणं यदि स्फुटं पृच्छसि, न कुप्यसि चेत्, तद्भवदीयं सर्वमेव वचनमिहोदाहरणम् । *सौगतदर्शने शब्दानामर्थासंस्पर्शित्वात्, स्वलक्षणे तेषामप्रवृत्तेः । अपोहस्य चातितुच्छत्वात्, सर्वं तदभिधाने नरर्थकम् ॥
§ 10032

## बौद्धास्सर्वेऽपि न दूष्याः

*अत एव चोन्मत्तप्रलापिनः शाक्यभिक्षवोऽपि परिशुद्धवृत्तयः परलोकयाथार्थ्यदर्शिनः शौचाचारव्यवहारेषु अबाह्याः महान्तो विद्वांसस्ते कामम- II.695/KSV
र्थशून्यमपि कथयन्तः नोन्मत्ता भवितुमर्हन्ति । एवमन्यस्यापि प्रज्ञाप्रमादात् कचटतपादि व्याहरतो नोन्मत्तता ॥ § 10033

यच्चोक्तं—ईदृशां गणने का परिनिष्ठेति—तत् परिहृतमसकृत् असङ्कीर्णोदाहरणविवक्षया द्वाविंशतिभेदत्वमाश्रितमिति ॥ § 10034

कपोलवादनादीनि पुनः अकथास्वभावत्वादचिन्त्यान्येव । यस्य चास्मिन् कथाप्रसङ्गे गण्डवादित्रादि चेतसि स्फुरति, तस्यान्यदतिजघन्यमपि हृदयमवतरेदित्यलं कश्मलगोष्ठेति ॥ § 10035

## अविज्ञातार्थम्

### पर्षत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ ५-२-९ ॥ § 10036

यत् साधनवाक्यं, दूषणवाक्यं वा त्रिरभिहितं पर्षदा प्रतिवादिना न विज्ञायते क्लिष्टशब्दप्रयोगम्, अप्रसिद्धप्रयोगम्, अतिद्रुतोच्चरितमित्येवंप्रकार-

४ ] त— nyāma-wit_kha; nyāma-wit_gha; nyāma-wit_ca; nyāma-wit_ja

१० ] बोधिन— nyāma-wit_kha

१८ ] असंबद्ध— nyāma-wit_kha

२२ ] प्र— nyāma-wit_kha

२२ ] तीव्रो— nyāma-wit_kha

१० *] नेदं केवलहास्यवचनम्, वस्तुस्थितिकथनमपीति प्रदर्शयति—सौगतदर्शन इत्यादिना ॥

१३ *] अत एव—अस्योन्मत्तप्रलापत्वाभावादेव ॥

१५ त्ति] किन्तु भ्रान्ताः । भ्रान्तिः, उन्मादश्च नाविशेषः ॥

मविज्ञातार्थं नाम निग्रहस्थानं भवति । असामर्थ्यसंवरणाय च धूर्तैरिद-माश्रीयते ॥ § 10037

## निरर्थकाविज्ञातार्थयोर्विशेषः

अत्राह—अर्थासंप्रत्ययस्य समानत्वात् कोऽस्य निरर्थकाद्भेदः । अथ प्रकृतोपयोगयोग्यमर्थमसौ वदति, तदा पर्षत्प्रतिवादिनोरमेधाविता कामं भवेत्; न तु विदुषः वक्तुं विवदतः पराजयो भवितुमर्हति ॥ § 10038

किंकृतश्चैष त्रिरुच्चारणनियमः ? किं राजाज्ञया, उत स्वाक्येन ? इति न विद्मः ॥ § 10039

II.696/KSV

अत्रोच्यते—निरर्थके सर्वेण सर्वार्थशून्यता; इह तु भवन्नप्यर्थो नावगम्यते, द्रुततरोच्चारणादिव्यतिकरवशादिति कथमविशेषः । तत्र च कल्प्यते नूनमसामर्थ्यमात्मीयमावरीतुमनाः एवमभिधत्ते—न हि समर्थो विद्वान् विस्पष्टं न वक्तीति ॥ § 10040

## त्रिरभिधाननियमे विशेषः

त्रित्वनियमोऽपि न वेदवचननरपतिशासननिबन्धनः; किन्तु वस्तुस्थित्युपनत एव । यतः सकृत्, द्विरप्यभिहितमप्यनवधानादिना न गृहीतमिति संभाव्यते । त्रिस्तु यदुक्तं न ज्ञायते, तत्र वक्तुरेव जाड्यम् । अनेकप्राश्निकादिसमाजे कथितमवश्यं केनाप्यवगम्येत । सर्वैरनवगमात्तु वक्तैव निगृह्यते । चतुर्धा पंचधा वाऽभिधाने त्विष्यमाणे निरवधिताऽभिधानस्य प्रसज्यत इति युक्तस्त्रिर्वचननियम इति ॥ § 10041

## अपार्थम्

पौर्वापर्यादियागादप्रतिसंबद्धार्थमपार्थकम् ॥ ५-२-१० ॥

§ 10042

पूर्वापरासङ्गतपदकदम्बकोच्चारणादप्रतिष्ठितवाक्यार्थमपार्थकं नाम निग्रहस्थानं भवति । तद्यथा—दशदाडिमानि षडपूपा कुण्डमजाजिनं पललपिण्डः कुमार्याश्चैत्रस्य पिता प्रतिशीन इति ॥ § 10043

७ ] तो— nyāma-wit_kha
८ ] स्थित— nyāma-wit_ca
२० ] स्फैर्य्यद्भत— nyāma-wit_kha

१३ विशेषः ] सभ्यया रीत्या, भाषया च व्यवहरेदिति यावत् । स्वयमतिप्रौढपण्डितस्यापि लोकोत्तीर्णप्रज्ञस्यापि व्यवहारक्रमातिलङ्घनं पराजयहेतुः ॥

## धर्मकीर्त्यांक्षेपः, समाधानं च

अत्राह—अप्रतिसंबद्धवदेवासंबद्धवाक्यं, असंबद्धप्रकरणं च निग्रहस्थानान्तरं कस्मान्नोक्तम् ? एतेनैव गतार्थत्वादिति चेत्, यद्येवमनर्थकेनैव गतार्थत्वादपार्थकमपि पृथङ्न वक्तव्यम्—अत्रोच्यते—निरर्थके न पदार्थः, न वाक्यार्थः; केवलं वर्णा एव शुष्का उच्चार्यन्ते । अर्थान्तरेऽपि समन्वितपदार्थे व्यवस्थापितवाक्यार्थमनुपकृतं तूच्यते । इह तु पदार्थसंप्रत्ययेऽपि तदन्वयासंभवेन वाक्यार्थानवसाय इति स्पष्टो भेदः ॥ § 10044 II.697/KSV

प्रकृतविवादास्पदीभूते वस्तुनि को वा विशेष इति चेत्—उक्तमत्र — संक्षेपविवक्षायां द्वे एव निग्रहस्थाने । असंकीर्णोदाहरणविवक्षया तु द्वाविंशतिभेदत्वम् । प्रकृतवस्तुसिद्धिस्तु द्वाविंशतावपि तुल्यैव ॥ § 10045

यत्तु असंबद्धवाक्यं, असंबद्धप्रकरणं च पृथगुपसंख्येयमिति—तन्न—अप्रतिसंबद्धपदार्थेनैव तत्संग्रहात् । यदि त्वसंबद्धवाक्यमसंबद्धप्रकरणं चावश्यं वक्तव्यम्, तद्युक्तमेव भवदीयं शास्त्रम् । तथा हि वैभाषिकाणामस्ति बाह्योऽर्थः, स च प्रत्यक्षः । सौत्रान्तिकानां च सन्नप्य सावनुमेयः । योगाचाराणां साकारं ज्ञानमेव, न बाह्योऽर्थः, स च प्रत्यक्षः । *माध्यमिकानां आकारशून्यं स्वच्छं ज्ञानमात्रमेव—इत्येवमितरेतरानन्वितवाक्यप्रकरणमिदमशेषमेव शाक्यशास्त्रम् । आह च— § 10046

> दशदाडिमवाक्यस्य बौद्धशास्त्रस्य चेदृशः ।
> अन्यस्य चाप्यबद्धस्य प्रतिष्ठा केन लभ्यते ॥§ 10048

II.698/KSV

## अप्राप्तकालम्

१ ] अ— nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ja
११ ] अ— nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ca
१५ ] मे— nyāma-wit__kha

१२ चेत्] वर्णोच्चारणं वा, पदोच्चारणं वा, वाक्यप्रयोगो वा—भवतु, सर्वत्र अर्थराहित्यं समानमेव किल ॥

१९ *] यद्यपि माध्यमिकाः सर्वशून्यवदिनः इति सर्वत्रप्र सिद्धिः । परन्त्विदमेव प्रामाणिकं वचः । प्रज्ञापारमितादौ हि शून्यस्यापि अनिर्वचनीयतत्त्वरूपत्वं स्पष्टं प्रतिपादितम् । तर्हि विज्ञानवादशून्यवादयोः को विशेष इति चेत्, उक्तमत्रैव योगाचाराणां साकारं ज्ञानम्, माध्यमिकानां तु आकारशून्यं स्वच्छं ज्ञानम् इति । तथा च योगाचारैः ज्ञाने कल्पितो वा आकारः अङ्गीक्रियते, माध्यमिकैस्तु सोऽपि नाङ्गीक्रियते इति । परिकल्पितस्वभावं, परिनिष्पन्नस्वभावं, परतन्त्रस्वभावं चेति वस्तु त्रिविधं बवेत् । तत्र विज्ञानवादिनः परिकल्पितस्वभाववप्दिनः । इतरौ तु परिनिष्पन्न स्वभाववादिनौ । माध्यमिकास्तु निस्स्वभाववादिनः । अतश्च स्वभावत्रयशून्यभ्वात्वस्तुनः, ते शून्यवादिन इत्येव तत्त्वम् ॥

## अवयवविपर्यासवचनमप्राप्तकालम् ॥ ५-२-११ ॥ § 10049

प्रतिज्ञाहेतूदाहरणोपनयनिगमनवचनक्रममतिलङ्घ्य—अवयवविपर्या सेन प्रयुज्यमानमनुमानवाक्यमप्राप्तकालं नाम निग्रहस्थानं भवति ॥ § 10050

### पदानां प्रयोगक्रमे धर्मकीर्त्याक्षेपः

अत्राह—न हि पदानां वाक्येषु नियतः क्रमः कश्चिदस्ति। नियतक्रमका हि वर्णाः पदतामापद्यन्त इति युक्तम्, तदन्तरेण तदर्थानवगमात्। न हि घट इत्युक्ते घटावगतिर्भवति। वाक्येषु तु देवदत्त ! गां शुक्लामभ्याज दण्डेन दण्डेन शुक्लां गामभ्याज, देवदत्त ! इति क्रमान्तरेणापि तथैवार्थप्रतिपत्तेः किं क्रमेण। अनुमानवाक्ये तु पंचावयवाः इत्येतदेव तावत् प्रथममसांप्रतम्, प्रतिज्ञाद्यवयवानामसाधनाङ्गवचनत्वात्। तत्र तेषां पंचावयवानामपि प्रयोगः, प्रयोगेऽपि च क्रमो विवक्षितः, तदुल्लङ्घनं च निग्रहस्थानमिति महती मूर्खप्रक्रियेति ॥ § 10051

### न्यायाबयवेषु क्रमः नियतः

अत्रोच्यते—वाक्यान्तरेषु क्रमविवक्षा भवतु, मा वा भूत्; नानेन नः प्रयोजनम्। अनुमानवाक्ये तु आर्थः क्रम; बलादापतति, स्वप्रतिपत्त्यनुसारेण परप्रतिपतेरुत्पादनात्। स्वप्रतिपत्तौ च धर्मिदर्शन-तद्गतहेतुधर्मावधारण-प्रतिबन्धस्मरण-परामर्शज्ञान-साध्यनिश्चयानां क्रमेण दर्शनात् परं प्रति तथैव
II.699/KSV तदभिधानं कर्तव्यमिति सविस्तरमवयवलक्षणं निर्णितमेतत्। असाधनाङ्गत्वचनत्वमपि, प्रतिज्ञाद्यवयवानां तत्रैव निरस्तम्। अतः क्रमस्येह युक्तियुक्तत्वात्तवतिक्रमो भवत्येव निग्रहस्थानम् ॥ § 10052

## न्यूनम्

## हीनमन्यतमेनाप्यवथवेन न्यूनम् ॥ ५. २. १२ ॥ § 10053

पंचावयवे वाक्ये प्रयोक्तव्ये स्थिते, तदन्यतमेनाप्यवयवेन हीनं प्रयुंजानस्य न्यूनं नाम निग्रहस्थानं भवति ॥ § 10054

### न्यूनस्यादोषत्वाक्षेपः, समाधानं च

२ ] म— nyāma-wit__kha
४ ] क्रमा— nyāma-wit__kha
११ ] मापे— nyāma-wit__kha
१४ ] माणतये— nyāma-wit__kha

२१ म] कदाचित्तु पूर्वसमयबन्धानुरोधेनान्यथापि संभवः ॥

अत्राह—प्रतिज्ञाद्यवयवजातमसाधनाङ्गवचनमित्यतः तदनभिदधतो न निग्रहः; प्रत्युत वदतो निग्रहो युक्त इति—अत्रोच्यते—अनन्तरमेवै तत्परिहृतम्, विस्तरतश्चावयवलक्षणे । तथा हि—श्रोतुराकाङ्क्षानिवृत्तयेऽनुमानवाक्यं प्रयुज्यत इति प्रथमं तदाकाङ्क्षाविषयः साध्यधर्मविशिष्टो धर्मी प्रदर्श्यते । ततः कारणाकाङ्क्षायां हेतुवचनमभिधीयते । क्वास्य प्रतिबन्धो दृष्ट इति बुभुत्सायां उदाहरणमुपपाद्यते । इत्थमेष सिद्धप्रतिबन्धो हेतुः धर्मिणि भवेत्, न वेति शङ्कायामुपनयवचनमुच्चार्यते । तदनन्तरं सर्वावयवानामेकत्रोपसंहाराय निगमनं प्रयुज्यत इत्यन्यतमस्याप्रयोगात् निग्रहार्हता भवत्येवेत्यलमत्रैव वस्तुनि पदे पदे कलहप्रस्तावनेनेति ॥ § 10055

## अधिकम्

हेतूदाहरणाधिकमधिकम् ॥ ५. २. १३ ॥ § 10056

एकेनैव हेतुना दृष्टान्तेन वा प्रतिपादितेऽर्थे हेत्वन्तरं दृष्टान्तान्तरं वा प्रयुंजानस्य अधिकं नाम निग्रहस्थानं भवति । एतच्च वादे तावद्वीतराग II.700/KSV
कथात्मके वस्तुनिर्णयफले नेष्यत एव । जल्पेऽपि नियमाभ्युपगमेन वदतो वादिनः इदं निग्रहस्थानम् । यो हि न मया, आवाभ्यां वा साधनमधिकमभिधेयम्, उदाहरणं वेति नियम्योद्ग्राहयति, स एव तथा निगृह्यते, नान्य इति ॥ § 10057

एतच्च कीर्तिनाऽप्येवमेव कथितम्—*(?')प्रपंचकथायां तु न दोषः, इति ॥ § 10058

## अस्य दोषत्वतदभावपक्षौ

अपर आह—नियमाभ्युपामेऽपि नायं दोषः, प्रतिपत्तिद्रढिम्ने तदभिधानादिति—तदयुक्तम्—अभ्युपगतनियमत्यागादसौ निग्रहार्हो भवेत् । कश्चायं प्रतिपत्तिद्रढिमा ? प्रथमप्रयुक्तस्य हि हेतोः मृदुप्रतिपत्तिकारिणः हेतुत्वमेव न स्यात् । उत्पन्नस्य प्रत्ययस्य पुनरुत्पादनं युक्तम् । तत्र न पूर्वहेतुरद्रढिम्ने । नाप्युत्तरो द्रढिम्ने । तस्मान्नियमाभ्युपगमेऽधिकाभिधानं दोष एव ॥ § 10059

अपरं मतम्—अकृतनियमस्यापि दोष एव । प्रपंचकथायामप्ये केन हेतुना दृष्टान्तेन वा कृते निर्णये द्वितीयस्य वैयर्थ्यात् । निर्णीतस्य निर्णयानुपपत्तेः । अनिर्णयकारिणश्च प्रथमस्य हेतोः प्रयोगानर्हत्वादिति ॥ § 10060

२ ] तद्य— nyāma-wit_kha
१३ ] द्यु— nyāma-wit_kha
१४ ] सा— nyāma-wit_kha; nyāma-wit_ca
२१ ] अदृढ— nyāma-wit_kha
२२ ] तन्न— nyāma-wit_kha
२३ ] र्द्— nyāma-wit_ca

२० *] पूर्वोक्तरीत्या नियमाद्यकरणेन प्रवृत्ता कथा प्रपंचकथा ॥

## पुनरुक्तम्

शब्दार्थयोः पुनरुच्चारणं पुनर्वचनमन्यत्रानुवादात् ॥ ५. २. १४ ॥ § 10061
II.701/KSV

अर्थादापन्नस्य स्वकण्ठेन पुनर्वचनम्, शब्दस्य वाऽर्थस्य वाऽभिहितस्य पुनरभिधानं पुनरुक्तं नाम निग्रहस्थानं भवति, अनुवादं वर्जयित्वा ॥ § 10062

शब्दपुनरुक्तं तावत् यत्र पूर्वोच्चारित एव शब्दः पुनरुच्चार्यते—यथा —नित्यः शब्दः, नित्य शब्दः इति ॥ § 10063

अर्थपुनरुक्तं तु—यत्र सोऽर्थः पूर्वमन्येन शब्देनोक्तः पर्यायान्तरेण पुनरुच्यते । यथा अनित्यः शब्दः, निरोधधर्मको ध्वानः इति ॥ § 10064

यद्यपि च शब्दपुनरुक्तेऽप्यर्थपौनरुक्त्यमस्त्येव; तथापि शब्दपूर्वकत्वादर्थप्रत्यभिज्ञायाः प्रथमतरं शब्दप्रत्यभिज्ञानात् तत्पौनरुक्त्यमेव तदुच्यते । *जात्यपेक्षश्च शब्दपौनरुक्त्यव्यवहारः, न व्यक्त्यपेक्षः; *क्षणं भङ्गित्वाद्वर्णानां पुनः प्रयोगासंभवात् ॥ § 10065

अनुवादे तु पौनरुक्त्यमदोषः । यथा—हेत्वपदेशात् प्रतिज्ञायाः पुन र्वचनं निगमनम् इति ॥ § 10066

अर्थादापन्नस्यापि स्वशब्देन पुनर्वचनं भवत्येव पुनरुक्तम् । यथा असत्सु मेघेषु वृष्टिर्न भवति इत्युक्ते अर्थादापद्यते सत्सु भवति इति । तत् किमर्थं स्वकण्ठेन पुनरुच्यते । अर्थप्रतीत्यर्थो हि शब्दप्रयोगः । प्रतीतेऽर्थे किं तेनेति ॥ § 10067

एतच्च नियमाभ्युपगमे निग्रहस्थानं वेदितव्यम् । अकृतनियमस्यं तु नातीव महानयमपराधः ॥ § 10068
II.702/KSV

## शब्दपौनरुक्त्यस्य दोषत्वाशङ्का

अत्राह—नार्थपुनरुक्तादन्यच्छब्दपुनरुक्तमुपपद्यते, शब्दसाम्येऽप्यर्थभेददर्शनात् ।* स्मरत गिरिशं गिरिशो नगरी यस्यासमरद्वेषस्य क इव यदीयस्य

३ ] शब्दे— nyāma-wit_kha
११ ] पौ— nyāma-wit_ca
२२ ] री— nyāma-wit_ca
२२ ] गौ— nyāma-wit_kha
२२ ] ई— nyāma-wit_kha

२० *] जातिः—अत्व-कत्वादिः ॥
२० *] क्षणः—द्विक्षणम् । एकक्षणमात्रवर्तिनः अभावात् ॥
४ *] गिरिशं—ईश्वरं स्मरत । असमस्मरद्वेषस्य—असाधारणकामरिपोः यस्य गिरिशः—हिमवान्, नगरी—वासभूमिः । कः—चतुर्मुखः गरीयस्या मुदेन यदीयस्य वेषस्य समस्मरम् । अधीगर्येत्यादिना षष्ठी ॥

मुदा न गरीयस्या समस्मरद्वेषस्य इति । तस्मादर्थत एव पौनरुक्त्यं, न शब्दतः ॥ § 10069

अपि च विस्तरकथासु कदाचन सम्यगश्रवणशङ्कायां पुनरभिधानं नाम कियान् प्रमादः ? अर्थादापन्नस्य च स्वशब्देन पुनर्वचनं यदि निग्रहस्थान-मुच्यते, तर्हि प्रतिज्ञावचनमेव प्रथमं निग्रहस्थानम् ॥ § 10070

अधिकपुनरुक्तयोर्वा को विशेष इति वक्तव्यम् । यादृशं तादृशं च विशेषलेशमाश्रित्य पृथगभिधाने निग्रहस्थानभेदपरिगणनमशक्यक्रियं स्यात् ॥ § 10071

अनुवादश्चेदुच्यते—हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति— तत्र प्रतिज्ञैव तावदसाध्वी । तस्याः पुनर्वचनं साधु भविष्यतीति केयं कथा ॥ § 10072

## तेषां दोषत्वसमर्थनम्

अत्रोच्यते—यदुक्तमर्थपुनरुक्तादन्यन्न शब्दपुनरुक्तमिति—तदेवमेव । पृथङ्निर्देशस्त्वनया विवक्षया—यो हि शक्त्यतिशयचिख्यापयिषया सकृत्प्रयुक्तः शब्दः पुनर्मया न प्रयोक्तव्यः इति प्रतिज्ञाय जल्पं प्रवर्तयति, स शब्द- II.703/KSV
पुनरुक्तेनापि निगृह्यत इति नियम्यवादिन एव निग्रहात् । ततः अन्यस्य सम्यगश्रवणशङ्कया पुनर्वदतोऽपि न दोषः । अर्थाक्षिप्तकथनमपि कृतनिय-मस्यैव दोषः, नान्यस्येति ॥ § 10073

अत एव वादे न निग्रहस्थानमिदम्, अपि तु जल्पवितण्डयोरेव विजिगीषुकथयोः । *तयोश्च सप्रयोजनत्वम्, कथान्तरत्वं च पुरा समर्थितमेव ॥ § 10074

यत्तु प्रतिज्ञोच्चारणमर्थाक्षिप्तत्वात्, तदनुवादश्च निगमनवचनमफलत-रमिति—तदवयवलक्षणे विस्तरेण समाहितम् ॥ § 10075

अधिकपुनरुक्तयोस्त्वयं विस्पष्ट एव विशेषः । अन्यं हेतुम्, अन्यं वा दृष्टान्तं तत्रैव साध्येऽभिदधदधिकवादी भवति, तमेव हेतुं दृष्टान्तं वा पुन-र्वदन् पुनरुक्तवादीति ॥ § 10076

यत्तु—एवंविधविशेषाश्रयणे परिगणनमधटमानमिति—तत् अवान्तर-विशेषविवक्षयैवमेव । असङ्कीर्णोदाहरणप्रदर्शनाय तु द्वाविंशतिनिर्देशइत्युक्तम् ॥ § 10077

## अननुभाषणम्

१३--१४ ] प्र— nyāma-wit__kha

२१--२२ ] ल— nyāma-wit__kha

२७ ] व— nyāma-wit__kha

९ म] प्रतिज्ञाया अपि अर्थात् ज्ञातुं शक्यत्वात् ॥

२३ *] तयोः—जल्पविनण्डयोः ॥

## विज्ञातस्य पर्षदा त्रिरभिहितस्याप्यनुच्चारणमननुभाषणम् ॥ ५. २. १७ ॥ § 10078

पर्षदा विदितस्य वादिना त्रिरुच्चारितस्यापि यदप्रत्युच्चारणं—तत् अननुभाषणं नाम निग्रहस्थानं भवति । अप्रत्युच्चारयन् किमास्पदं दूषणमभिदधीत ॥ § 10079

II.704/KSV

ननु ! यद्यननुभाष्यापि तत्रोत्तरं ब्रूयात्, किमिति निगृह्येत । न च योऽनुभाषितुमसमर्थः स उत्तरमपि दातुमक्षमो भवति; विचित्रत्वात्पुरुषशक्तीनाम्—नैतदेवम्—अननुभाषणे तदुत्तरविषयापरिज्ञानात् क्वोत्तरं प्रयुज्येत । प्रयुक्तं वा कथमवधार्येत ? § 10080

न चैवं ब्रूमः यावत्किंचित् वादिना सविस्तरमभिधीयते, तदखिलमन्यूनानतिरिक्तमनुज्झितक्रमकं प्रतिवादी तथैवानुभाषेतेति । यस्तु समस्तानुभाषणं तथा कुर्यादपि नाम, तेन स्वकौशलमेव केवलं मुपदर्शितं भवति, मेधावित्वं वा । न त्वेवमकुर्वन् प्रत्यवेयादिति । स्तोकस्तोकमनुभाषमाणः, तथैव च क्रमेण दूषयन् न निग्रहमाप्नुयादिति ॥ § 10081

### धर्मकीर्त्याक्षेपः

अत्राह—यदि वादी स्वपक्षमाधनविवरणवर्त्मना बहुतरमकृतकमप्रकृतार्थमुपक्षिपेत्, तत् किं प्रतिवादिना सर्वमनुभाषणीयम् । हेतुमात्रं त्वनूद्य दूषणमुद्भावयतः नास्य निग्रहो युक्तः । दूषणविषयं तु हेतुमात्रमपि योऽनुभाषितुमकौशलः, स उत्तरविषयापरिज्ञानात् उत्तरमपि प्रतिपत्तुमसमर्थ एवेत्यप्रतिभया निगृह्यताम् । किमननुभाषणेन ॥ § 10082

अपि च, त्रिरभिहितस्येति केयं परिभाषा ? तथा च वादी परावबोधार्थं वाक्यं प्रयुंजीत, परोपद्रवार्थं वा ? तत्र परावबोधार्थे वाक्ये परावबोध एवाभिधानविधिः, न द्विस्त्रिर्वा नियमः । यावत्कृत्वः प्रयुक्ते वाक्ये परस्यायबोधो जायते, तावत्कृत्वः प्रयोक्तव्यम् । परोपद्रवार्थं तु वाक्योच्चारणमक्षत एव धर्मः !* प्राश्निकान् यथा तथा सङ्केतेनापि बोधयित्वा दुःश्लिष्टकष्टशब्दप्रयोगाद्याडम्बरविरचनयापि आन्ध्यमुत्पाद्य परानुपरुध्येतेति महत् कश्मलमेतत् । न चेदृशं शास्त्रे व्युत्पादनार्हम् । तस्मात् बहुकृत्वोऽप्यभिधाय प्रतिवादी बोधयितव्यः । न तु द्विरुच्चारितमप्रत्युच्चरन् निगृहीतव्य इति ॥ II.705/KSV
§ 10083

४ ] श्रयं— nyāma-wit__kha
nyāma-wit__kha
११ ] खिन्ना— nyāma-wit__kha
११ ] कपदे— nyāma-wit__ca
१५ ] Correction : ; परख (sic !)पर
२० ] दिना— nyāma-wit__kha
२१ ] युक्तं— nyāma-wit__kha

१९ थेवानुभाषेतेति ] किन्तु, दूषणं श्रुत्वा वादी न मया तथोक्तमिति यदि अपलपेत् तदा असंबद्धार्थकथनात् प्रतिवादी निगृह्येतापि । तद्वारणाय वादिसंमतस्य दृढीकरणार्थमनुवाद इति भावः ॥

१० *] उपहासवचनमिदम् ॥

## उक्ताक्षेपसमाधानम्

अत्रोच्यते—न खलु सकृदेव सकलपरविरचितवचनसंदर्भानुभाषणमविलम्बितक्रमकमस्माभिरपि कर्तव्यतयोपदिष्टम् । अपि तु यथोचितदूषणविषयानुभाषणमात्रमेव ॥ § 10084

यस्तु स्तोकमप्यनुभाषितुमप्रगल्भः, तस्योत्तरप्रतिभानमपि नास्तीति यदुच्यते—तदसम्यक्—*अन्यदननुभाषणम्, अन्यदुत्तराप्रतिभानम् । कस्यचिदशेषमनुभाषितवतोऽपि उत्तराप्रतिभानदर्शनात् । तदिदं अनुत्तरविषयानुद्घोषणं निग्रहस्थानमुच्यते, नोत्तराप्रतिभानम् । उत्तराप्रतिभानमनन्तरं वक्ष्यते ॥ § 10085

यत्तु त्रिरुच्चारणपरिभाषा कुतस्त्येति विकल्पितम्—तदविज्ञातार्थनाम्नि निग्रहस्थाने प्रतिविहितम् । वीतरागकथात्मके वादे शिष्टादिभिस्सह क्रियमाणे काममस्तु परावबोधावधि वाक्योच्चारणम् । जल्पे तु विजिगीषुकथायां पुरुषशक्तिपरीक्षणात् अवश्यमुच्चारणनियम आश्रय णीयः । तत्र सकृद्वा II.706/KSV
द्विर्वाऽभिहितस्याग्रहणमनवधानादिनापि संभवन् न निग्रहाय कल्पते । त्रिरभिहितस्य तु सर्वैरग्रहणे वक्तुरेवापराधः । अन्यैर्गृहीतस्य प्रतिवादिना त्वग्रहणे तस्य निग्रहः । वारत्रयादूर्ध्वमप्यभिधाने त्वाश्रीयमाणे जल्पादौ कथासमाप्तिरेव न स्यात् । छात्रशाला ह्यसौ भवेत्, नोद्ग्राहिणिकाभूमिरिति ॥ § 10086

## अज्ञानम्

अविज्ञानं चाज्ञानम् ॥ ५. २. १८ ॥ § 10087

परिषदा विज्ञातस्यापि वादिवाक्यस्य प्रतिवादिना यदविज्ञानं, तत् अज्ञानं नाम निग्रहस्थानं भवति । अविदितोत्तरविषयो हि क्वोत्तरं ब्रूयादिति ॥ § 10088

अज्ञानम्अप्रतिभा इति नानयोर्विशेषं पश्यामः—अत्रोच्यते— भिन्नविषयत्वाददोषः । उत्तरविषयाप्रतिपत्तिः अज्ञानम्, उत्तराप्रतिपत्तिस्त्वप्रतिभेति ॥ § 10089

ननु ! उत्तरविषयं यो न जानाति, स उत्तरमपि न जानात्येव—मैवम्—उत्तरविषयं जानन्नपि किंचित् उत्तरं न जानातीति लोकदृष्टमेतत् ।

५ ] चलि— nyāma-wit_kha
९--१० ] न— nyāma-wit_kha
१९ ] कं तदि— nyāma-wit_kha

१९ *] वाद्युक्तस्य ज्ञानमन्यत्, तस्योत्तरदानं चान्यत् ॥
२० दिदं] वाद्युक्तेषु यावतः अंशस्योत्तरं देयम्, तावदंशत्य सदसि सर्वेषां परिज्ञानायोद्घोषणमकुर्वतः अननुभाषणं दोषः ॥
१ तु] सर्वैः—मध्यस्थैः, सदस्यैश्च ॥

एवं तर्हि अननुभाषणेन गतार्थमज्ञानम्; अज्ञाते हि परकीये वाक्यार्थे तदनुभाषणे सामर्थ्याभावदर्शनात्—सन्ति हि केचित्, येऽनुभाषितुमशक्नुवन्तः, पत्रिकादिलिखितं तदावेदयन्तीति । एवं त्रयाणामपि च न पौनरुक्त्यम् । उत्तरविषयाप्रतिपत्तिः अज्ञानम् । प्रतिपत्तावपि तदप्रत्युच्चारणं अननुभाषणम् । अनुभाषितेऽप्युत्तराप्रतिपत्तिः अप्रतिभेति ॥ § 10090
II.707/KSV

ननु ! यद्यज्ञानसाम्येऽपि विषयभेदमाश्रित्य निग्रहस्थाननानात्वमित्यमभिधीयते, तर्ह्यज्ञानप्रकारवैचित्र्यात् भेदान्तराण्यपि वक्तव्यानीति —उक्तमत्र सारसंग्रहविवक्षया द्वे एव निग्रहस्थाने—विप्रतिपत्तिः अप्रतिपत्तिश्चेति । इतरेतरविसदृशोदाहरणदिक्प्रदर्शनाय द्वाविंशतिभेदत्वमुच्यते । अवान्तरविशेषैस्तु तदानन्त्यमभ्युपगम्यत एव । तथा च द्वाविंशतिवर्गे हेत्वाभासाश्च इति पठितम् । ते च स्वरूपेणैव तावत्पंच—सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतकाला हेत्वाभासा इति । अवान्तरभेदाश्च तेषामतिबहवः सन्त्येव । इह त्वेकमेव तन्निग्रहस्थानमादिष्टं हेत्वाभासाश्च यथोक्ताः इति । तस्मादित्थं समासव्यासवर्णनात् अलं पदे पदे पर्यनुयोगेनेति ॥ § 10091

## अप्रतिभा

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ ५. २. १९ ॥ § 10092

परपक्षे गृहीतेऽपि तस्मिन्नुत्तराप्रतिभानमप्रतिभा नाम प्रतिवादिनो निग्रहस्थानं भवति । अज्ञानादिभ्यो भिन्नताऽस्य दर्शितैव । कीर्तिरपि चैतदनुमन्यत एव निग्रहस्थानम् ॥ § 10093

ननु ! उत्तरमप्रतिपद्यमानः सदसि प्रतिवादी कथमासीत ? यत्किंचिद्विकत्थमानः । तद्यथा— § 10094
II.708/KSV

हृत्पुण्डरीकविकसत्सकलानवद्य-
विद्यावदातवदनः क्व जनोऽस्मदादिः ।
क्वायं वटुः ? कतिपयाक्षरलेशलिप्त-
जिह्वान्वितः कथमनेन सहाभिदध्मः ॥§ 10098

दानार्द्रगन्धगजकुम्भकपाटभेदि-
भीमस्फुरन्नखशिखाशिखरः क्व सिंहः ।

४ ] ज्ञानेऽपि— nyāma-wit_ca

२० ] वर्णि— nyāma-wit_kha

२४ भेदाश्च ] असिद्धिविशेषा बहवः ॥
६ मानः ] वस्तुतस्त्विदमपि अर्थान्तरमेव ।
किन्तु स्वेदसंरंभभूनिरीक्षणादावप्रतिभा मध्यस्थैर्घोषणीया ॥

क्वामी समीरणविधूतपुराणपर्ण-
*पातोद्भवद्भयविलोलदृशः कुरङ्गाः ॥§ 10102
इत्यादि यद्वा तद्वा प्रलपन्नास्ते ॥ § 10103

## विक्षेपः

कार्यव्यासंगात्कथाविच्छेदो विक्षेपः ॥ ५. २. २० ॥ § 10104

उद्ग्राहणिकामुपक्रम्य वा, तद्ग्राहयितव्यं मयेति प्रतिश्रुत्य वाऽभिमुखं प्रतिवादिनि सन्निहितेषु प्राश्निकेषु कार्यव्यासङ्गं व्यपदिशति इदं मे करणीयमपहीयते, गच्छामि इत्यभिधाय कथां विच्छिनत्ति यः स विक्षेपेण पराजीयते । अन्यतरनिग्रहान्ता हिकथा भवति । स चत्थं कथां कुर्वन्—आत्मनैवात्मानं निगृह्णाति । प्रतिश्यायेन मे कण्ठोपरोधः उदपादि, पदमपि वक्तुं न युज्यते । जननी मे जीवितं जहाति स्म, तां श्मशानभुवं प्रापय्य वह्निसात्करोमि इति ॥ § 10105

II.709/KSV

## विक्षेपस्यादोषत्वाशङ्का

अत्राह—यदि तावत् परमार्थत एव मातृमरणादिकार्यमस्योपस्थितं, तत् किमिति तपस्वी पराजीयते ? उद्ग्राहणिकाजितो मा भूवमिति किमसौ मृतां मातरमपि मा धाक्षीदिति महत् सुभाषितमिति ॥ § 10106

पीनसावरुद्धस्थानकरणो वा कथं वाचमुदीरयतु । अथासामर्थ्यस्थगनाय वितथमपि कथयति तथाविधमसौ कार्यव्यासङ्गम्, तर्हि सत्यं निगृह्यते । न तु विक्षेपेण, किन्तु अन्येनैव । वादी तावत् द्रुतकर्तव्यव्याजव्यपदेशात् अर्थान्तरगमनादिना निगृह्यते, प्रतिवादी त्वप्रतिभयैवेति । अतिप्रसङ्गश्चैवंप्रकारणां निर्देशे भवेदिति ॥ § 10107

## उक्ताक्षेपसमाधानम्

अत्रोच्यते—कथामुपक्रम्य, प्रतिज्ञां वा, हेतुमभिधाय तद्विवरणसरणिमिषमबलम्ब्य किंचिदर्थान्तरमुपन्यस्यति, यत्, तत् अर्थान्तरमुदाहृतमादावेव । इह तु कथापूर्वरङ्गे कथायां वा किमपि करणीयनिभमभिधाय

१६ ] भूदि— nyāma-wit__kha
१६ ] क— nyāma-wit__kha
२० ] क— nyāma-wit__kha
२ ] म— nyāma-wit__ca

१४ *]
पुराणपर्णपातः—पुराणपर्णपातजन्यशब्दः ॥
२० हि ] प्राय इति शेषः । कदाचित्
जयपराजयनिर्णयो न भवेदपि ॥

सभयमपसरति सदस इति कथमिव तत्तुल्यता भवति ? § 10108

अप्रतिभयाऽपि श्रुतपूर्वपक्षः पराजीयते । इह तु पूर्वपक्षमेव न शृणोति वा न करोति वा । प्रथममेव पलायत इति महान् विशेषः । अतिप्रसङ्ग-स्त्वसकृत्पराकृतः ॥ § 10109

यत्तु—हेत्वाभासेष्वन्तर्भावमस्य कीर्तिरकीर्तयत्—तदतीव सुभाषितम्—क्व हेत्वाभासः ! क्व कार्यव्यासङ्गः ! संप्रधारणैव रमणीयेयम् । अहेतवो हेतुवदवभासमानाः हेत्वाभासाः किमस्य कार्य व्यासङ्गस्याहेतोर्हेतुवदाभासनं कीर्तिना दृष्टमिति परं नः कुतूहलम् ॥ § 10110

II.710/KSV

## मतानुज्ञा

स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसंगो मतानुज्ञा ॥ ५. २. २२ ॥ § 10111

स्वदक्षे परापादितदोषमनुद्धृत्य—अभ्युपगम्य तमेव परपक्षे प्रतीप मापादयतः, परमतानुज्ञानात् मतानुज्ञा नाम निग्रहस्थानं भवति । यथा चौरो भवान्, पुरुषत्वात्, प्रसिद्धचौरवत्(?') इत्युक्ते सति—आह भवानपि चौरः, पुरुषत्वात् इति । सोऽयमेवं वदन् आत्मनः परापादितं दोषमभ्युप-गतवानिति मतानुज्ञया निगृह्यते ॥ § 10112

### मतानुज्ञाया दोषत्वशंका, समाधानं च

अत्राह—अनैकान्तिके हेतौ परेणोक्तेः तदुद्भावनमनेन प्रकारेण प्रतिवादी करोति—इति किमिति निगृह्यते । वाद्येव हेत्वाभासप्रयोगान्निगृह्यत इति ॥ § 10113

अत्रोच्यते—उक्तमादावेव (?')स्वपक्षे दोषमनुद्धृत्येति । एवं हि तेन वक्तव्यम्—(?')अनैकान्तिकोऽयं हेतुः, अचौरेऽपि पुरुषत्वस्य दर्शनादिति । एवं हि स दोष उद्धृतो भवति । एवं त्वनभिधाय—भवानपि चोरः, पुरुषत्वात् इति वदन् अनुजानात्येव परमतम् । अतोऽनैकान्तिकत्वे वक्त-व्ये, तदुद्भावनानुक्रममवधीर्य अतिप्रसङ्गमापादयन् निग्रहार्हो भवष्येवेति ।

---

१ ] अ— nyāma-wit__kha
१४ ] प— nyāma-wit__kha
१४--१५ ] तमेव— nyāma-wit__kha
२० ] न— nyāma-wit__ca
३ ] प्र— nyāma-wit__kha

---

११ म्] एतावदपि स कथं न ज्ञातवानिति ॥
२२ म्य] अनेन प्रतिबन्दीतो वलक्षण्यम् ।
नायं दोषः, यतस्त्वयाऽपि तथाऽभ्युपगन्तव्यम् इति प्रदर्शनं प्रतिबन्दी ॥

वादिनश्चानैकान्तिकहेतुप्रयोगेऽपि तदनुद्भावनान्नपराजयः । प्रतिवादिन एव हीदं सन्निकृष्टं निग्रहस्थानमिति ॥ § 10114
II.711/KSV

## पर्यनुयोज्योपेक्षणम्

निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ ५. २. २२ ॥
§ 10115

पर्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयः—इदं ते—निग्रहस्थानमुपनतम्, अतो निगृहीतोऽसि इत्येवं वचनीयः । त य उपेक्षते—नानुयुङ्क्ते, स पर्यनुयोज्योपेक्षणान्निगृह्यते ॥ § 10116

## धर्मकीर्त्याक्षेप !

अत्राह—कः कस्येदं निग्रहस्थानमापादयति—किं पर्यनुयोज्यः, उत तदुपेक्षकः ? उपेक्षकस्तावदस्य पर्यनुयोज्यतामेव न जानाति । जानन्वा कथमेनमुपेक्षेत ।—उपेक्ष्य वा किमात्मन एव निग्रहस्थानमुद्भावयन्नेवमाचष्टां एष पर्यनुयोज्योऽपि मयोपेक्षित इति निगृहीतोऽस्मि इति । पर्यनुयोज्योऽपि कथमात्मीयमवद्यं प्रकाशयेत्—इदं मे दूषणम् । तच्च भवता नोद्भावितम् । अतो भवान् जितः(?') इति । स खल्वेवमभिदधत् अमेध्यं पाणौ निधाय परं कलङ्कयितुकामः परं कलङ्कयन्नेवात्मकलङ्कमनुभवत्येवेति ॥ § 10117

अपि च नेदं निग्रहस्थानान्तरमपदिश्यते किन्त्वप्रतिभैवेति । तथा हि—यदि तावदुत्तरपाक्षिकः पूर्वपाक्षिकं साधनाभासमव्याचक्षाणं उपेक्षेत—तत्र दूषणं नोद्भावयेत् । तदुत्तराप्रतिपत्त्या न निगृह्यते, न पर्यनुयोज्योपेक्षणेन ॥ § 10118

वस्तुतस्तु द्वयोरपि तत्र जयपराजयनिर्धारणमनुपपन्नम्, एकस्य साधनाभासवादित्वात्, इतरस्य च तदुत्तराप्रतिभानात् ॥ § 10119
II.712/KSV

अथ पूर्वपाक्षिकः दूषणाभासवादिनं दोषप्राप्तं उत्तरपाक्षिकं न निगृह्णाति—तथापि तस्य दुरुत्तराप्रतिभैव । न चान्यतरस्यापि जयः पराजयो वा निर्धार्यते । एकस्य दूषणाभासवादित्वात्, इतरस्य च तदनुद्भावनात् ॥ § 10120

## उक्ताक्षेपसमाधानम्

११ ] प्या— nyāma-wit_kha
२५--२६ ] हृ— nyāma-wit_kha

२३ मे ] मे—मयि, मत्पक्ष इति यावत् ॥

अत्रोच्यते—न—अप्रतिभायाः सम्यक्साधनविषयत्वात् । सम्यक्साधने च प्रयुक्ते तदुत्तरस्याप्रतिपत्तिः अप्रतिभा भवति । साधनाभासे तु प्रयुक्ते तदाभासतानुद्भावनात् पर्यनुयोज्योपेक्षणं भवति । अत्र तु साधनाभासवादी पर्यनुयोज्यः । स उपेक्षितः । तत्र सम्यक्साधनवादी तु अपर्यनुयोज्य एवेति विशेषः ॥ § 10121

यत्तु वस्तुवृत्तेन न कस्यचिदपि जयः पराजयो वेति—तदेवमेव किन्तु जल्पे पुरुषशक्तिपरीक्षायामिदं निग्रहस्थानमुच्यते ॥ § 10122

तदुद्भावयितापि यद्विकल्पितः—तत्राप्युच्यते—पूर्वपाक्षिकेण साधना भासे प्रयुक्ते, उत्तरपाक्षिकेण तस्मिंस्तथात्वेनानुद्भाविते, प्राश्निकानामपृष्टानां वक्तुमवसराभावात्स एव साधनाभासवादी कदाचिद्वैयात्यादेवं ब्रूयात्—मयाऽस्य शक्तिं जिज्ञासमानेन साधनाभासप्रयोगः कृतः, एष तु मूर्खः तं न जानाति इति, तदा कथं न निगृह्यते । एतेन दूषणाभासवाद्यपि व्याख्यातः ॥ § 10123

अथवा उभयाभ्यर्थिताः सभापतिनियुक्ता वा प्राश्निकाः तथा कथयन्तो
II.713/KSV निगृह्णन्त्येव पर्यनुयोज्योपेक्षिणम् । साधनाभासवादिनो हि धूर्त तया तदभिधानम् । सम्यक्साधनमजानतः अर्थसंशयाद्वा संभवति । उत्तरपाक्षिकस्य तु तदनुद्भावनं मोहादेवेति स एव पराजीयते ॥ § 10124

## निरनुयोज्यानुयोगः

### अनिग्रहस्थाने निग्रहस्थानाभियोगः निरनुयोज्यानुयोगः ॥ ५. २. २३ ॥ § 10125

अनुज्झितयथोचितक्रमं, उपपन्नवादिनं, अप्रमादिनमनिग्रहार्हमपि निगृहीतोऽसीति यो ब्रूयात्, स एवाभूतदोषोद्भावनान्निगृह्यते ॥ § 10126

## धर्मकीर्त्याक्षेपः

अत्राह—यदि तावदुत्तरपाक्षिकः पूर्वपाक्षिकमदुष्टसाधनवादिनमभूतैरेव दोषैरभियुङ्क्ते, तथा सति भूतदोषोद्भावनस्योत्तरस्याप्रतिपत्तेः अप्रतिभयैव स निगृह्यताम्, किं निरनुयोज्यानुयोगाख्यनूतननिग्रहस्थानपराजीयते । भूतदोषाभियोगपक्षे तु पूर्वपाक्षिक एव साधनाभासयोगात् अनुयोज्य एव खल्वसौ न निरनुयोज्यानुयोगस्य विषयो भवितुमर्हति ॥ कथनेन । § 10127

---

४ ] ए— nyāma-wit_kha
१४ ] संभवन्ति— nyāma-wit_ca
१४ ] कि— nyāma-wit_kha
१६ ] साधनात्— nyāma-wit_kha
१६ ] वाक्य— nyāma-wit_ca
१७ ] उत्तरा— nyāma-wit_kha
१ ] म— nyāma-wit_kha
३ ] न्यूनता— nyāma-wit_kha

---

१७ यो ] कस्यापि पक्षस्याप्रतिष्ठापनात् । ततश्च जयः विषयदृष्ट्या ॥

४ दोषो ] अभूतेति—अविद्यमानेत्यर्थः ॥

## उक्ताक्षेपसमाधानम्

अत्रोच्यते—अहो नु खल्वयं तपस्वी पर्युदासस्य, प्रसज्यप्रतिषेधस्य च विशेषमपश्यन्नतिमात्रं मुह्यति । भूतदोषाप्रतिभानमन्यत्, अन्यच्चाभूतदोषप्रतिभानम् । एकत्राप्रतिपत्तिः, इतरत्र विपरीतप्रतिपत्तिः । तत्र भूतदोषाप्र- II.714/KSV
तिपत्तिः अप्रतिभा । अभूतदोषप्रतिपत्तिः अननुयोज्यानुयोगः ॥ § 10128

अपि च— § 10129

असाधनाङ्गवचनमदोषोद्भावनं च यत् ।
भवता निग्रहस्थानमाख्यातं, तत्र कथ्यते ॥§ 10131

तत्र प्रसज्यप्रतिषेध एव केवलमाश्रियमाणे हेत्वाभासा अपि न निग्रहस्थाने भवेयुः ? साधनङ्गस्यानभिधानं मौक्यमेव केवलं निग्रहस्थानं भवेत् । तस्मादसाधनाङ्गवचनं अदोषोद्भावनमपि पर्युदासव्याख्यानार्हं भवत्येव । ततश्च भूतदोषानुद्भावनमप्रतिभा, अभुतदोषो द्भावनं च निरनुयोज्यानुयोगः ॥ § 10132

अथ अभूतदोषोद्भावनेऽपि भूतदोषाप्रतिभानमस्त्येवेति तदेवास्तु निग्रहस्थानमित्युच्यते—तर्हि मूकत्वमेवैकं निग्रहस्थानं स्यात्, असाधनाङ्गवचनेऽप्येवं वक्तुं शक्यत्वादित्युक्तमेव ॥ § 10133

## अपसिद्धान्तः

**सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽप्रसिद्धान्तः ॥ ५. २. २४ ॥** § 10134

यः कंचन प्रथमं सिद्धान्तमभ्युपगम्य कथामुपक्रमते । तथा प्रवृत्तश्च
II.715/KSV सिषाधयिषितार्थसमर्थनरभसेन, दूषणोद्धरणश्रद्धया वा सिद्धान्तविरुद्ध मभिधत्ते, सः अपसिद्धान्तेन पराजोयते । तद्यथा सांख्यः प्रतिवादिसन्निधाने— § 10135

नासतो विद्यते भावः नाभावो विद्यते सतः§ 10136

---

१२--१३ ] तत्र— nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ca
१३ ] च— nyāma-wit__kha
१४ ] ख्यै— nyāma-wit__kha
२३ ] संगाद्य— nyāma-wit__kha

---

२२ अथ ] पूर्वं नञि पर्युदासः, उत्तरं नञि प्रतिषेधः ॥

इति स्वसिद्धान्तं प्रथमं प्रतिज्ञाय प्रधानसिद्धये साधनप्रयोगं करोति, व्यक्तं विकारजातम्, एकप्रकृति, समन्वयदर्शनात् । मृदन्विता हि मृद्विकाराः कुण्डपिठरशरावप्रभृतय एकप्रकृतिका दृष्टाः; एवमस्यापि गवाश्वादिविकारजातस्य सुखदुःखमोहान्वयदर्शनात् तदात्मकैकप्रकृति प्रभवत्वेन भवितव्यम् ॥ § 10137

एवमुक्तवानसौ नैयायिकेनानुयुज्यते—अथ का प्रकृतिर्नाम, का च दिकृतिरिति । *अविदितप्रकृतिविकृतिस्वरूपो हि कथं विकृतीनां एकप्रकृतित्वमेकत्वं जानीयादिति । एवमनुयुक्तः कापिलः आह—यस्यावस्थितस्य धर्मान्तरनिवृत्तौ धर्मान्तरं प्रवर्तते, सा प्रकृतिः । यत् तद्धर्मान्तरं प्रवर्तते सा विकृतिरिति । § 10138

सोऽयमेवं वदन् प्रागभ्युपगतसदसन्निरोधप्रभवाभावसिद्धान्तविरुद्धाभिधानात् अपसिद्धान्तेन निगृह्यते ॥ § 10139

यदि पूर्वधर्मनिरोधे धर्मान्तरप्रादुर्भावः, तदा— § 10140

नासतो विद्यते भावः नाभावो विद्यते सतः§ 10141

II.716/KSV

इति स्वसिद्धान्तो हीयेते । अथ सिद्धान्तो न त्यज्यते, तर्हि प्रकृतिविकारानिश्चयात् हेत्वसिद्धौ साध्याभावः प्रसज्यत इति ॥ § 10142

## उक्तापसिद्धान्तस्यादोषत्वाशङ्का

अत्राह—हेतुप्रयोगं कृतवति कपिले नैयायिकस्तदसिद्धतोद्भावनया प्रत्यवतिष्ठतां, प्रकृतिविकृतिस्वरूपप्रश्नस्य कोऽवसरः ? तदिदमर्थान्तरगमनमस्य भवेत् । एवं पृच्छतः अर्थान्तरगमनं स्वग्रन्थे निग्रहस्थान उच्यते, अथ च अधुना तेनैव व्यवह्रियत इति कोऽयं नयः ? § 10143

यदि तु सांख्यमतं निराचिकीर्षितं, तदसिद्धतैव हेतोरुद्भाव्यताम्, प्रकृत्यन्वयस्य विकारेषु असंभवादिति । विकारा हि प्रवृत्तिनिवृत्तिधर्मकाः ।

३ ] न्वय— nyāma-wit__ca
३ ] लिख्य— nyāma-wit__kha
४ ] व्याप्रि— nyāma-wit__ca
६ ] सं nyāma-wit__kha; nyāma-wit__gha; nyāma-wit__ca

६ इति ] यद्यपीदं गीतावचनं सिद्धान्तेऽपि प्रमाणमेव । असतः शशशृङ्गादेः भावः—उत्पत्तिः न । सतः घटादेः अभावः—अनुत्पत्तिः न इति च तदर्थः । ततश्चानेन शून्यवाद एव निराकृतः, न सिद्धान्तसंमतः आरम्भवादः । तथापि सांख्यानां अभिमानमङ्गीकृत्यानुवादः क्रियते ॥

१२ *] प्रकृतिविकृत्यादिपदानि हि तन्मते पारिभाषिकाणि ॥

न चैवंप्रकारमव्यक्तम्, अव्यक्तधर्मान्वये हि विकाराणां प्रवृत्तिनिवृत्त्यात्मकत्वं हीयेतेत्येवमसिद्धत्वाद्धेतोः हेत्वाभासप्रयोगादेव सांख्यो निगृहीत इति न निग्रहस्थानान्तरमपसिद्धान्त इति ॥ § 10144

## तस्य दोषत्वसमर्थनम्

अत्रोच्यते—सत्यमसिद्धो भवत्वयं कापिलकल्पितो हेतुः । प्रकृतिविकृतिप्रश्नक्रमेणापि तदसिद्धत्वमवधारयितुं शक्यत एव । किन्तु हेतुरूपेऽवधारिते तद्दूषणमभिधानीयम्, अनवधारितस्य दूषयितुमशक्यत्वादिति तत्प्रश्नो नार्थान्तरगमनम् । प्रश्नोत्तरमेव भाषमाणः परामर्शो निकटतरपरिस्फुरदपसिद्धान्ताभिधाननिबन्धननिग्रहान्तरविषयतां प्रतिपन्न इति हेत्वाभासवर्त्मनि न दूरं गम्यते ॥ § 10145

II.717/KSV

क्वचिदपि परनिग्रहस्य हेतौ
हृदयपथं प्रथमं किलावतीर्णे ।
अपरमपि न कारणं विचिन्त्यं
किमिव फलं खलु पिष्टपेषणस्य ॥§ 10149

## हेत्वाभासरूपनिग्रहस्थानम्

### हेत्वाभासाश्च यथोक्ताः ॥ ५-२-२५ ॥ § 10150

हेत्वाभासास्तु पूर्वोक्तलक्षणैरेव लक्षिताः ।
निग्रहस्थानतां यान्ति यथोक्ता इत्यतोऽब्रवीत् ॥§ 10152

प्रमाणस्य प्रमेयत्वं प्रमेयस्य प्रमाणता ।
यथा लक्षणभेदेन न तथैतेषु दृश्यते ॥§ 10154

*भेदेनोक्ताः किमर्थं त इति निगदिता पूर्वमेवात्र युक्तिः
वादे ह्येते प्रयोज्याः प्रगुणनयविदा तत्त्वशुद्धिं विधातुम् ।
एतेषां धर्मकीर्तेरपि च न विमतिः निग्रहस्थानतायां
इत्थं द्वाविंशतिर्नः गुरुभिरभिहिताः निग्रहस्थानभेदाः ॥§ 10158

---

११ ] तद्धि— nyāma-wit__kha

---

९ म्] प्रवृत्तिमात्रधर्मकं, तत् । तस्य कुत्रापि लयाभावात् ॥
१५ म्] कथायां स्वपक्षमात्रसिद्धपारिभाषिकपदप्रयोगे हि जिज्ञासाऽनिवार्या । अतः नार्थाग्तरं दोषः ॥
६ *] किमर्थं पृथगत्र हेत्वाभासाः पुनरप्युक्ता इत्याक्षेपः । हेत्वाभासाना परिशीलनं वादेऽप्यावश्यकम् । जल्पे तु ते निग्रहहेतवो भवन्तीति द्विरूपत्वं हेत्वाभासानामस्तीति न पौनरुक्त्यमिति समाधानम् ॥

## ग्रन्थोपसंहारः

इत्येवं सूत्रकारागममनुसरताऽनुज्झता भाष्यभूमिं
स्थाने स्थाने परेषां मतमतुलगति क्षिण्वता तार्किकाणाम् ।
कांचिद्वाक्यार्थचर्चामपि विरचयताऽनुक्रमेणावतीर्णा
निर्णीतः स्वे निबन्धे निपुणमिह मया षोडशैते पदार्थाः ॥§ 10162

II.718/KSV

न्यायोद्गारगभीरनिर्मलगिरा गौरीपतिस्तोषितः
वादे येन किरीटिनेव समरे देवः किराताकृतिः ।
प्राप्तोदारवरः ततस्स जयति ज्ञानामृतप्रार्थना
नम्रानेकमहर्षिमस्तक वलत्पादोऽक्षपादो मुनिः ॥§ 10166

वादेष्वात्तजयो जयन्त इति यः ख्यातस्सतामग्रणीः
अन्वर्थो नववृत्तिकार इति यं शंसन्ति नाम्ना बुधाः ।
सूनुर्व्याप्तदिगन्तरस्य यशसा चन्द्रस्य चन्द्रत्विषा
चक्रे चन्द्रकलार्धचूडचरणध्यायी स धन्यां कृतिम् ॥§ 10170

नमश्शशिकलाकोटिकल्प्यमानाङ्कुरश्रिये ।
प्रपन्नजनसंकल्पकल्पवृक्षाय शम्भवे ॥§ 10172

॥ इति श्री भट्टजयन्तकृतायां न्यायमञ्जर्यां द्वादशमाह्निकम् ॥ § 10173

—समाप्ता चेयं न्यायमञ्जरी— § 10174

---

१५ ] लुठ— nyāma-wit__ca
१९ ] वचूल— nyāma-wit__kha
१९ ] एना— nyāma-wit__ca

३ ] जयन्तभट्ट— nyāma-wit__kha

---

१४ तिस्तोषितः ] किरातरूपिणा परमेश्वरेण नियुद्ध्य अर्जुनः यथा पाशुपतास्त्रं प्राप्तवान् तथा गौतमः वादे परमेश्वरं संतोप्य न्यायशास्त्रं प्राप्तवानिति कथा सूत्रकर्ता भविष्यसि इत्यादौ पुराणे सूचिता

॥अनुगृह्णन्तु सद्भावपवित्रितजगत्त्रयाः !
अघ्राय मञ्जुलं न्यायमञ्जर्यास्सौरभं बुधाः !
--- ॥ इति पण्डितरत्नेन विदुषा वरदार्येण विरचिते न्यायसौरभे द्वादशमाह्निकम् ॥

# The TEI Header